II. 3. 6. 1921.

THE

.OWKHAMBA SANSKRIT SERIES

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS

NO. 284.

गादाधरी ।

श्रीगदाधरभट्टाचार्यचक्रवर्त्तिविरचिता ।
श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामण्या
श्रीरघुनाथतार्किकशिरोमणिविरचितदीधित्या च गर्भिता ।

GÂDÂDHARÎ

A COMMENTARY ON DÎDHITI THE COMMENTARY OF TATTVA CHINTÂMANI.

By Gadádhara Bhattâchârya Chakravartin. With Text.

Edited by *Mahâmahopâdhyâya Vindhyeswari Prasâda Dwivedin, Librarian, Govt. Sanskrit College, Benares.*
and Nyâyâchârya Vâmâcharana Bhattâchârya
Professor of the same College, and
Nyâyâcharya Sreerâma Sâstri Bhandari,

BENARES.

II. FASCICULUS XI–XX–XXI

PUBLISHED & SOLD BY THE SECRETARY
CHOWKHAMBA SANSKRIT SERIES OFFICE, BENARES.
AGENTS:-OTTO HARRASSOWITZ, LEIPZIG;
PANDITA JYESHTHARAM MUKUNDAJI, BOMBAY;
PROBSTHAIN & CO; BOOKSELLERS, LONDON.
Printed by Jai Krishna Das Gupta,
at the Vidya Vilas Press, Benares.

1920.

॥ श्रीः ॥

—*—

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ॥
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा—संस्कृतग्रन्थमाला मञ्जुलदर्शना ॥
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम ॥ २

स्तबकः—२८४

ने च साक्षादुन्नयनयोग्यत्वं तद्व्याप्यत्वम्, परम्परया तथात्वं तद्व्याप्यव्याप्यत्वमिति विशेष इति वाच्यम् । तथा सति त-रननुगमेनात्र साधारणोन्नायकताप्रवेशासम्भवात्, उक्तिवैचित्र्या-पूर्वस्माद्भेद इत्युत्तरग्रन्थासङ्गतेश्च । इत्थं च तत्त्वं चेत्यादेरुपा-त्वघटकमुन्नायकत्वं च साक्षात्परम्परया वेति नार्थः, अपि तु रुक्तोपाधितानियतमुन्नयनं साक्षात्परम्परया वेति नार्थान्तरं क्ष-करामति । विरुद्धवारणाय । साध्यविरुद्धजलत्वादिवारणाय । वत्साध्यसमानाधिकरणेति बोध्यम् । धर्मिणि साध्यसामाना-करण्यं धर्मे वा साध्यसमानाधिकरणवृत्तित्वविशेषणं बोध्यम् । धने साध्यव्यभिचारोन्नायकत्वविवक्षणे साधनव्यभिचारीत्य-र वैयर्थ्यादाह । व्यभिचारोन्नायकत्वं च यत्र क्वचिदिति । एवं ति । तत्सार्थकत्वं दर्शयति । द्रव्यत्वादौ व्यभिचारोन्नायकस्येति । यत्वं गुरुत्वव्यभिचारि रूपव्यभिचारित्वादिति रीत्येत्यादिः ।

यद्यपि वह्निमान् धूमादित्यादावपि रासभादौ वह्निव्यभिचारो-यकव्यभिचारप्रतियोगिवह्निसामग्र्यादिवारकमपि तत्, तथाप्यप्र-कृतत्वसाध्यकपृथिवीत्वाद्यतिप्रसङ्गस्य शङ्कनीयतया गुरुत्वसाध्य-नुधावनम् । बहुव्रीहिरिति । साधनं व्यभिचारि यस्येतीत्यादिः । त्पुरुषेण उक्तातिप्रसङ्गस्यैव दुर्वारत्वादिति भावः । पृथिवीत्वादा-तिप्रसङ्ग इति । अवच्छिन्नसाध्यव्यापकसङ्ग्रहाय विशेषिताविशे-तसाधारणव्यभिचारोन्नायक इति वक्तव्यत्वादिति भावः । सा-नानिष्ठमिति । उन्नायकत्वं तद्योग्यता, सा चात्र व्याप्तिरेव, पक्षध-ताया अन्तर्भावस्य वैयर्थ्यात्, साधननिष्ठत्वनिवेशनैव साधनव्या-कवारणात् । रूपवान् द्रव्यत्वादित्यादौ पृथिवीत्वाभावव्यभि-ारस्य वारणाय पूर्वोक्तैव रीतिरादरणीया ।

नन्वेवं यद्व्यभिचारेणेत्याद्यभेद इत्यत आह । उक्तिवैचित्र्याद्वेति । वमुन्नयनस्य साधनपक्षकत्वोक्तेर्यद्व्यभिचारस्य साधनरूपपक्षधर्म-लाभः, अत्र तु साधनव्यभिचारीत्यत इति विशेषादित्यर्थः । तथा पूर्वनिरुक्तस्यैव उक्तिभङ्ग्या ऽनुवादोऽयम्, न तु निरुक्तपन्तरम्, वमुपाधेः साक्षात्साध्यव्यभिचारानुमापकत्वनिर्वाहे आग्रहः, इदा-तु न तथात्वाभ्युपगम इत्येतावतैव कल्पभेदादिति भावः ।

(चि०) किञ्च अर्थान्तरस्य पुरुषदोषतयाऽऽभासान्तरस्य तत्राभावादुपाधिरेव भावत्वादिकं दोषः

(दी०) नन्वस्तु पारिभाषिकमुपाधित्वम्, तथापि साक्षाद् व्यभिचारानुन्नायकतया दोषत्वाभावेन तदुद्भावनेऽर्थान्तरस्यादेवेत्यत आह। किञ्चेति। आभासान्तरस्य। तदानीं ज्ञायमानस्य, तथा च तस्यावश्याभ्युपेयदोषभावत्वे तदुद्भावने नार्थान्तरमिति भावः।

(गा०) अवच्छिन्नसाध्यव्यापकस्य साक्षाद्व्यभिचारानुन्नायकत्वाभ्युपगमपक्षे कथञ्चिदुपाधित्वसमर्थनेऽपि तान्त्रिकाणां परार्थस्थले तदुद्भावनमर्थान्तरादिदोषेणानुपपन्नमेवेति शङ्कानिवर्तकतया किञ्चेत्यादिमूलमवतारयति। नन्वस्त्विति। उपाधित्वम्। तान्त्रिकाणामुपाधिव्यवहारविषयत्वम्। पारिभाषिकम्। स्वकल्पितपरिभाषानिर्वाह्यमित्यतोऽवच्छिन्नसाध्यव्यापकस्य साक्षात्साध्यव्यापकत्वेऽपि अस्तु उपाधित्वनिर्वाह इत्यर्थः। साक्षादिति। परम्परया व्यभिचारोन्नायकस्य दोषत्वे उपाध्युन्नायकपरम्पराया अपि तथात्वापत्तेरिति गूढोऽभिसन्धिः। दोषत्वाभावेनेति। प्रथममनाकाङ्क्षितत्वादिति शेषः। आहेति। तस्य दोषत्वं व्यवस्थापयतीत्यर्थः।

मूले अर्थान्तरस्य। अर्थान्तरादेः। पुरुषदोषतया। वादिनां तदुद्भावनदशायां आकाङ्क्षाविरहाधीनतया। आभासान्तरस्य। दोषान्तरज्ञानस्य। तत्र। तदानीम्, तदुपाध्युद्भावनदशायामिति यावत्

उपाधिस्थले व्यभिचारस्याऽऽवश्यकतया आभासान्तरस्य तत्राभावादिति यथाश्रुतासङ्गतिः, अत आभासपदं तज्ज्ञानार्थकमकृत्वा पूरणेन उक्तासङ्गतिं दीधितिकृत् परिहरति। तदानीमिति।

मूले उपाधिरेवेति। एवकारव्यत्यासेन उपाधिर्भावत्वादिकं दोष एव दोषतया उद्भाव्यमेवेत्यर्थः।

अर्थान्तरसत्त्वे उद्भाव्यत्वासम्भवादर्थान्तरप्रयोजकत्वेनाभिहितस्य आकाङ्क्षाविरहस्य प्रकृतेऽसत्त्वलाभाय आभासान्तरज्ञानाभावाभिधानस्य भावं प्रकाशयति दीधितौ। तथा चेति। तस्याव

...न परम्परया व्यभिचारोन्नायकत्वेनापि तस्य अनुमितिविरो-
धितया अवश्याभ्युपेयत्वेन तेन रूपेणाकाङ्क्षितत्व इत्यर्थः ।

(दी०) अत्र वदन्ति साध्योपन्यासानन्तरं तत्साधकस्येव
साधनोपन्यासानन्तरं तद्दोषस्य व्यभिचारादेराकाङ्क्षितत्वात्तम-
नुद्भाव्य साक्षात्तत्साधकस्य शुद्धसाध्यव्यापकस्योपाधेरुद्भावने
एवाऽप्राप्तकालत्वम्, केव कथा परम्परया तत्साधकस्याव-
च्छिन्नसाध्यव्यापकस्य, अन्यथा तत्साधकपरम्पराया अपि प्रथ-
मुपन्यासे तथात्वं न स्यात् । न च निग्रहस्थानत्वेन विशेषः,
प्रतिज्ञाहान्यादितो हेत्वाभासाच्च बहिर्भूतस्य तथात्वायोगात् ।

(गा०) परम्परया व्यभिचाराद्युन्नायकस्य प्रथममाकाङ्क्षितत्वे
साध्युन्नायकपरम्परोद्भावनप्रतिवन्देरनुद्धारात् स्वयमन्यानुद्भावन-
...पाटीं प्रदर्शयिष्यन् साम्प्रदायिकोद्भावनक्रमं निराकरोति । अत्र
वदन्तीति । साध्योपन्यासानन्तरं तत्साधकस्येवेति । पक्षे साध्य-
वत्त्वोद्भावने कृते उद्भावयितुरनाप्तत्वशङ्कया उद्भावितार्थेऽप्रमित-
त्वशङ्कया मध्यस्थस्य यथा तन्निवर्तकप्रमाणगोचरनिर्णयेच्छा स-
मुदेति तथा साधनोपन्यासे कृते तस्य दुष्टत्वादुष्टत्वकोटिकश-
ङ्कया तन्निवर्त्तकतदन्यतरकोटिनिर्णयेच्छया व्यभिचारादिरूपदोष-
स्याकाङ्क्षितत्वाद्व्यभिचारादिकमनुद्भाव्य प्रथममनाकाङ्क्षितस्य सा-
क्षाद्व्यभिचारादिसाधनस्यापि शुद्धसाध्यव्यापकोपाधेरुद्भावन एव
अप्राप्तकालत्वमित्यर्थः । परम्परया । अवच्छिन्नसाध्यव्यभि-
चारादिसाधनद्वारा । तत्साधकस्य शुद्धसाध्यव्यभिचारादिसाध-
कतयावच्छिन्नसाध्यव्यापकस्य, उद्भावने अप्राप्तकालताया: । का
कथा । का विपरीतकथावसरः । अन्यथा । तदाकाङ्क्षा-
विरह एव तत्साधकाकाङ्क्षायाम् । तत्साधकेति । तादृशोपाधिप्र-
युक्तसाधकेत्यर्थः । तथात्वम् । अप्राप्तकालत्वम् । निग्रहस्थानत्वे-
न । उपाधेरित्यादिः । विशेषः । अतथाभूततत्साधकपरम्परातः,
तथा च निग्रहप्रयोजकत्वेन हेत्वाभासादीनामिव उपाधेरपि प्रथम-
माकाङ्क्षितत्वमिति प्रथमं तदुद्भावने नाप्राप्तकालत्वम्, अपि तु त-

त्साधकोद्भावन एवेति भावः । प्रतिज्ञाहान्यादित इति । "प्रति-
निः प्रतिज्ञान्तर" मित्यादिसूत्रपरिगणनादित्यादिः । प्रतिज्ञाहान्य
उपाधेर्बहिर्भावस्स्फुटतर एव । अनौपाधिकत्वस्य व्याप्तित्वमते
धर्म्यव्याप्यत्वासिद्धिरूपतया हेत्वाभासान्तर्भावप्रसङ्गसम्भवात् हे
भासाश्चेति परिगणितत्वेऽपि आदिपदार्थे तमनन्तर्भाव्य हेत्व
साश्चेति पृथगुपादानम् । अनौपाधिकत्वस्य व्याप्तत्वनिरासादि
दिः । तथात्वायोगात् । निग्रहस्थानत्वायोगात् ।

(दी०) न च विभाजकसूत्रस्थेन हेत्वाभासाश्चेति चका
रेणानुक्तसमुच्चयपरेण साक्षात्परम्परया वाऽनुमितिदोषोन्नाय
स्य सङ्ग्रहः, तथा सति व्यभिचारस्येवाऽऽश्रयासिद्ध्यादेरप्युन्ना
कस्य तदुभयोन्नायकपरम्परायाश्च तथात्वापातात् । न चा
प्रकालतामासादयन्नपि प्रथममुपाध्युपन्यासः कथकसम्प्रदा
नुरोधादेव कर्तव्यः, तादृशसम्प्रदायमननुरुन्धानस्य तदुद्भा
पराभवतत्प्रश्नपथनिवारणीयतापत्तेः । तस्मात्प्रथमं शुद्धसाध्यव्य
भिचार एवोद्भाव्यः, तत्र कथन्तायां तद्धेतुत्वेन शुद्धसाध्यव्या
पकोपाधिव्यभिचारः, विशेषणाव्यभिचारित्वे सति विशिष्टस
ध्यव्यापकस्योपाधेर्विशिष्टसाध्यस्य वा व्यभिचारः, अत्र
[illegible] तोप्ये विशिष्टसाध्यव्यापकोपाधिव्यभिचार इति । वक्ष्यते
व्यभि
चारादेरिव तद्व्याप्यवत्त्वादेरपि ज्ञानं व्याप्त्याद्यग्रहप्र
बन्धः
म्, तथा च साध्यव्यभिचारव्याप्योपाधिव्यभिचार
नयमि
ति वोद्भावनीयमिति ।

(गा०) तदुभयेति । व्यभिचाराश्रयासिद्ध्यनुभयेत्यर्थः । तथात्
पातात्
। । निग्रहस्थानत्वापातात् तथा चाश्रयासिद्ध्याद्युन्नायक
प्रथमं
मुद्भावनेऽपि तथात्वं न स्यादिति भावः । चकारेणोपाधि
महा
रेणा सङ्गृहीत इति नाशङ्कनीयम्, दोषोन्नायकत्वाविशेषणाश्र
सिद्ध
यासुन्नायकापेक्षया निर्बीजत्वात् । तदुद्भावकम् । उपाध्यु
पक
म् । पराभवेति । निगृहीतः ।

नन्वेवमुपाधिः किमनुद्भाव्य एवेत्याकाङ्क्षायामाह । तस्मादिति । तत्र । शुद्धसाध्यव्यभिचारे । कथन्तायाम् । साधकाकाङ्क्षायाम् । तद्धेतुत्वेन शुद्धसाध्यव्यापकोपाधिव्यभिचारः, उद्भाव्य इत्यनुषज्यते । एवमुत्तरत्रापि । व्यभिचारादेस्सम्बन्धताविरहे प्राधान्येनोपाधिर्नोद्भाव्यते एवेति ध्वनितम् । अवच्छिन्नसाध्यव्यापकोपाधिव्यभिचारस्य विशेषणान्तरानवच्छिन्नशुद्धसाध्यव्यभिचारासाधकत्वेऽपि विशेषणान्तरविशिष्टतया तदुद्भावनमपि प्रथमतस्सम्भवतीत्याह । विशेषणेति । अविशिष्टेनापि विशिष्टसाध्यव्यापकव्यभिचारेण विशिष्टसाध्यव्यभिचारे सिद्ध्यति पक्षधर्मताबलात् शुद्धसाध्यव्यभिचारसिद्धिसम्भवेऽपि विशेषणान्तरानवच्छिन्ने विशिष्टसाध्यव्यापकोपाधिव्यभिचारे शुद्धसाध्यव्यभिचारावच्छिन्नस्य साधकतयोपन्यस्ते तद्रूपावच्छिन्नसिद्धौपयिकतद्रूपावच्छिन्ननिरूपितव्याप्तस्तादृशोपाधिव्यभिचारहेतावाकाङ्क्षोदयात् तस्याश्च तादृशहेतौ बाधेनोद्भावनासम्भवात् सत्यन्तविशेषितस्यैवोद्भाव्यत्वमुक्तम् । तादृशविशेषणाविशेषितेन तादृशोपाधिव्यभिचारेणैव तथाविधेन विशिष्टसाध्यव्यभिचारेणापि शुद्धसाध्यव्यभिचारसाधनसम्भवात्तस्याप्युद्भावनीयतामाह । विशिष्टसाध्यस्य वेति । अत्रापि सत्यन्तमनुषज्यते । वाकारो व्यवस्थितविकल्पार्थः । अत्र च विशेष्य इति । उपन्यस्तस्य विशेषणाव्यभिचारविशिष्टसाध्यव्यभिचारस्य घटके विशिष्टसाध्यव्यभिचार इत्यर्थः । व्यभिचारव्याप्यत्वविशिष्टस्य व्यभिचारान्तर्भावात्तादृशस्योपाधिव्यभिचारस्य प्रथममुद्भावनेऽपि नाप्राप्तकालतेत्याह । वक्ष्यते चेति । व्याप्तिग्रहप्रतिबन्धकमिति । साक्षादित्यादिः । तथा च तद्व्याप्यत्वमपि हेत्वाभास इति भावः ।

(चि०) न चैवं शब्दोऽभिधेयः प्रमेयत्वादित्यत्राश्रावणत्वम्, जलं प्रमेयं रसवत्त्वादित्यत्र पृथिवीत्वमुपाधिः स्यात्, केवलान्वयित्वसाधकप्रमाणेन तत्र साध्यसिद्धेरुपाधेर्विशिष्टाव्यापकत्वात् । न च पक्षेतरे स्वव्याघातकत्वेनानुपाधावतिव्याप्तिः, तत्रानुकू-

लतर्काभावेन साध्यव्यापकत्वानिश्चयात्,

(दी०) साध्यव्यापकत्वानिश्चयात् । उपाधित्वौपयिकतदनिश्चयात् । अनुकूलतर्कादिना तादृशव्यापकत्वनिश्चये तु बाधोन्नीतवह्नित्वस्येव निश्चितोपाधिः । न च स्वव्याघातकत्वान्नायमुपाधिः, तद्धि न सर्वानुमानसाधारणम्, अनुकूलतर्कादिनिश्चितव्याप्तिके हेतौ तदभावात् । नापि तद्व्यभिचारेण व्यभिचारानुमानेऽपि पक्षेतरान्तरस्योपाधित्वसम्भवः, अनुकूलतर्कादिना तस्य साध्यव्यापकत्वनिश्चये व्यापकव्यभिचारिणि व्याप्यव्यभिचारावश्यम्भावेन तदयोगात् । अत एव पक्षेतरस्योपाधित्वे सर्वत्रैव तादृशोपाधिसम्भवेनानुमानमात्रविलोपे व्यभिचारानुमापकत्वगर्भस्योपाधित्वस्याव्याघात इति परास्तम् । कथकसम्प्रदायानुरोधाद्बाधानुन्नीतः पक्षेतरो नोपाधित्वेन कथायामुद्भाव्य इति तु वदन्ति ।

(गा०) ननु पक्षेतरत्वे व्यापकताग्राहकतर्काभावेन साध्यव्यापकत्वानिश्चयात् न तस्य दूषकत्वमिति मूलोक्तं न सङ्गच्छते, तत्र शुद्धसाध्यव्यापकत्वानिश्चयस्यावच्छिन्नसाध्यव्यापकोपाधिसाधारणतया अदूषकत्वाप्रयोजकत्वात्, किञ्च तादृशसाध्यव्यापकतायाः पक्षेतरत्वेऽपि निश्चयसम्भवादित्याशङ्क्य साध्यव्यापकत्वानिश्चयादिति व्याचष्टे । उपाधित्वौपयिकेति । उपाधित्वौपयिकस्य तस्यानिश्चयादित्यर्थः । उपाधित्वौपयिकं च साध्यव्यापकत्वं पूर्वनिरुक्तं यदवच्छिन्नसाध्यव्यापकत्वं तदवच्छिन्नसाध्यव्यापकत्वरूपम् । सङ्केतौ च पक्षेतरत्वे न तन्निश्चयसम्भवः, तदसत्त्वादिति भावः ।

ननु तत्र तादृशव्यापकताया असत्त्वेऽपि तर्काभासात् स्वतःसिद्धव्यभिचाराग्रहाद्वा तन्निश्चयः सम्भवत्येवेत्यत आह । अनुकूलतर्कादिनेति । तादृशेति । उपाधित्वौपयिकेत्यर्थः । बाधोन्नीतवत् । वह्निरनुष्ण इत्यादिस्थलीयवह्नीतरत्वादिवत् । निश्चितोपाधिः । व्यभिचारनिश्चयाधायकतया अनुमानविरोधी । अयम् । बाधानुन्नीत-

पक्षेतरः । नोपाधिः । न दूषकः । हि । यतः । तत् । अदूषकताप्रयोजकं स्वव्याघातकत्वम् । सर्वानुमानसाधारण्यम् । सर्वत्रैवानुमाने पक्षेतरत्वस्य साध्यव्यापकतानिश्चयसम्भवेन दूषकताप्रसक्तिः । स्वपदस्यानुमानसामान्यपरतया ईदृशसर्वानुमानसाधारणस्य स्वव्याघातकता । निश्चितव्यभिचार इति । प्रथमतो हेतौ व्याप्तिनिश्चये सतीत्यर्थः । तदभावात् । पक्षेतरत्वे साध्यव्यापकत्वज्ञानेन प्रतिबन्धात् साध्यव्यापकतानिश्चयासम्भवात् । स्वपदस्य स्वव्यभिचारोन्नायकव्यभिचारानुमानपरत्वे अन्यादृशं स्वव्याघातकत्वपदार्थं निराकुरुते । नापीति । तद्व्यभिचारेण । पक्षेतरव्यभिचारेण । उपाधित्वसम्भवेन दूषकताप्रसक्तिः । तस्य । पक्षेतरस्य । व्यापकव्यभिचारिणि । व्यापकतया गृहीतस्य व्यभिचारिणि । व्याप्येति । व्याप्यस्य । व्याप्यतया गृहीतस्य साध्यस्य व्यभिचाराग्रहदशायां निश्चयेनेत्यर्थः । पक्षेतरो यदि साध्यव्यभिचारिव्यापकव्यभिचारप्रतियोगी न स्यात् साध्यव्यापको न स्यात् पक्षेतरव्यभिचारो यदि साध्यव्यभिचारव्याप्यो न स्यात् तद्व्यापकव्यभिचारो न स्यात् इति तर्केण पक्षेतरव्यभिचारस्य साध्यव्यभिचारव्याप्यतया निश्चयेनेति यावत् । तदयोगात् । व्यभिचारानुमापकसाधनरूपपक्षेतरस्य दूषकत्वायोगात् । स्वं स्वरूपोपाधिर्वा तद्व्याघातकत्वाभावः । दूषयति । अत एवेति । अत एव । पक्षेतरत्वस्य अनुकूलतर्कादिना यत्र साध्यव्यापकताग्राहकानुकूलस्य तद्व्यभिचारेण साध्यव्यभिचारोन्नायकत्ववादिमतेन । पक्षेतरत्वस्य क्वचित् दूषकत्वसम्भवेऽपि उपाधितया अनुद्भावनं व्यवस्थापयतां मतमाह । कथकेति । अत्र कथकसम्प्रदायमनुसन्धानस्य तदुद्भावनं दुर्निवारमेवेत्यस्वरसः ।

(चि०) सहचारदर्शनादेस्तेन विना संशायकत्वादित्युक्तम् । बाधोन्नीते चानुकूलतर्कोऽस्त्येवेति । एवं पर्वतान्यत्वमहानसान्यत्वादेरपि नोपाधित्वम्, पक्षमात्रव्यावर्तकविशेषणवत्त्वात् । अत एव धूमे आर्द्रेन्धनप्रभववह्निमत्त्वम्, द्रव्यबहिरिन्द्रियप्रत्यक्षत्वे उद्भूतरूपवत्त्वम्, मित्रातनयत्वश्यामत्वे शाकपाकजत्वम्,

जन्यानित्यत्वे भावत्वमुपाधिः ।

(दी०) पक्षमात्रेति । यद्यपि पर्वतावयवरूपादेरपि व्यावर्त्तकं तत्, तथापि तस्य व्यावृत्तिर्नोपाधितायामुपयुज्यते, अपि तु पक्षस्यैवेति तन्मात्रव्यावर्त्तकत्वमुक्तम् । इदं चानुपाधितायां न बीजं परिभाषामात्रत्वात्, किन्त्वनुकूलतर्काभावेन तादृशसाध्यव्यापकत्वानिश्चय इति द्रष्टव्यम् । अत एव । व्यापकताग्राहकप्रमाणासम्भवादेव । आर्द्रेन्धनेति ।

• (गा०) पर्वतावयववृत्त्यनित्यत्वादौ कृतकत्वस्य हेतोः विशेषणस्य पक्षभिन्नमपि व्यावर्त्त्यं वर्त्तत इति मूलोक्तस्य पक्षमात्रव्यावर्त्तकविशेषणवत्त्वादिति तदनुपाधित्वप्रयोजकहेतोरसङ्गतिमाशङ्कते । यद्यपीति । नोपाधितायामुपयुज्यत इति । उपाधेस्सङ्कोचनं तल्लक्षणप्रविष्टसाध्यव्यापकत्वसम्पादकतयोपयुज्यते, तद्व्यापकत्वसम्पादकता च तदधिकरणानुपाधिव्यावृत्तिरेव, न तु तदनधिकरणपर्वतावयवरूपादिव्यावृत्तिरिति भावः । पक्षस्यैवेति । व्यावृत्तिरुपाधितायामुपयुज्यते इत्यनुषज्यते । पक्षस्य साधनवत्त्वादिति भावः । इति । इत्यादिना । उक्तमिति । मात्रपदेन उपाधित्वोपयिकपक्षभिन्नव्यावृत्तिप्रयोजकताया विशेषणे व्यवच्छेदात् पर्वतभिन्नतदवयवरूपादिव्यावर्त्तकत्वेऽप्युक्तविशेषणं उक्तव्यावृत्तिविशेषणप्रयोजकत्वाभावस्याक्षततया मात्रार्थसङ्गतेरिति भावः । अनुपाधितायाम् । अव्यापकतायाम् । न बीजम् । न प्रयोजकम् । परिभाषेति । तादृशविशेषणवत्त्वेऽपि साध्यव्यापकत्वादिग्रहदूषकताया दुर्निवारत्वादिति भावः । द्रष्टव्यम् । अनुपाधित्वबीजतया ।

केचित्तु पक्षमात्रव्यावर्त्तकं विशेषणं यस्य पक्षेतरस्य तत्तथा, तद्वत्त्वात् तत्तुल्यत्वात् । विशेषणवत्त्वादिति । तादृशार्थकवतिप्रत्ययबलान्मूलस्यार्थः । पक्षेतरतुल्यता च व्यापकताग्राहकानुकूलतर्कराहित्येन, तथा च दीधितिकारोक्तदूषकताबीज एव मूलस्य तात्पर्यमिति वदन्ति ।

अत एवेति मूलस्याव्यवहितोक्तपक्षेतरत्वादनुपाधित्वोपष्टम्भपरत्वासम्भवादनुपाधिताप्रयोजकाभावप्रतियोगितया प्रक्रान्तानु-

फलतदसम्भवोपष्टम्भपरतामाह । व्यापकताग्राहकेति । प्रमाणपदं प्रमाणसहकारितत्कारणपरम् ।

(दी०) अथात्र स्वतन्त्रान्वयव्यतिरेकाभ्यामार्द्रेन्धनत्वेनैव कारणत्वम्, न पुनरार्द्रेन्धनप्रभववह्नित्वेनेति चेत् ? किञ्चातः ? न हि कारणतावच्छेदकमेव व्यापकतावच्छेदकम्, तादृशाभावप्रतियोगितानवच्छेदकस्यैव तथात्वात्, तदवच्छिन्नप्रतियोगिताकाभावस्य चातिरिक्ततया तद्वृत्तित्वेन साध्यव्यभिचारसाधने वैयर्थ्याभावात् ।

(गा०) कारणतावगमेनेत्यग्रिममूलस्य उपाधितावच्छेदकावच्छिन्नस्य कारणतानिश्चयेनेत्यर्थोऽभिमानेन आर्द्रेन्धनप्रभववह्नित्वेन धूमकारणतया तेन रूपेण उपाधित्वानुपपत्तिं शङ्कते । अथेति । स्वतन्त्रान्वयव्यतिरेकाभ्यामिति । आर्द्रेन्धनस्य वह्नेश्च पृथगन्वयव्यतिरेकयोर्धूमान्वयव्यतिरेकप्रयोजकत्वदर्शनेनेत्यर्थः । न पुनरिति ।

यद्यपि आर्द्रेन्धनप्रभववह्नित्वेन कारणत्वेऽपि तादृशान्वयव्यतिरेकोपपत्तिः ।

न च तेन रूपेण कारणत्वे आर्द्रेन्धनप्रभववह्निसत्त्वे आर्द्रेन्धनविरहे धूमविरहो नोपपद्यत इति वाच्यम् । कारणतावच्छेदकविशिष्टस्य प्राक्सत्तायाः प्रकृतकार्योत्पादप्रयोजकत्वोपगमेनाकारणस्याप्यार्द्रेन्धनस्य कारणतावच्छेदकतया तदभावेन धूमाभावोपपत्तेः, तथापि आर्द्रेन्धनप्रभवत्ववह्नित्वयोरेकैकविशिष्टत्वेनापरस्य जनकतावच्छेदकत्वं वाच्यम्, तथा च तयोर्विशेषणविशेष्यभावे विनिगमनाविरह इति प्रत्येकमेव कारणत्वम्, अन्यथा घटादावपि चक्रविशिष्टदण्डत्वादिना हेतुताप्रसङ्गात् ।

न चैवमार्द्रेन्धनस्य शुष्केन्धनमात्रजन्यवह्नेश्च सत्त्वे धूमोत्पत्तिप्रसङ्ग इति वाच्यम् । प्रत्येकरूपेण स्वरूपयोग्यत्वेऽपि आर्द्रेन्धनवह्न्योर्जन्यजनकभावरूपप्रत्यासत्तेः फलोपधाने तन्त्रतया आर्द्रेन्धनप्रभववह्नित्वस्य धूमोपधायकतावच्छेदकत्वात् । अत एव दण्डत्वचक्रत्वादिना पृथग्घटादिस्वरूपयोग्यत्वेऽपि चक्रादिविशिष्टदण्डत्वं घटाद्युपधायकतावच्छेदकम् ।

जन्यानित्यत्वे भावत्वमुपाधिः ।

५(दी०) पक्षमात्रेति । यद्यपि पर्वतावयवरूपादेरपि व्यावर्त्तकं तत्, तथापि तस्य व्यावृत्तिर्नोपाधितायामुपयुज्यते, अपि तु पक्षस्यैवेति तन्मात्रव्यावर्त्तकत्वमुक्तम् । इदं चानुपाधितायां न बीजं परिभाषामात्रत्वात्, किन्त्वनुकूलतर्काभावेन तादृशसाध्यव्यापकत्वानिश्चय इति द्रष्टव्यम् । अत एव । व्यापकताग्राहकप्रमाणासम्भवादेव । आर्द्रेन्धनेति ।

(गा०)पर्वतावयवरूपस्यान्यत्वादौ कृष्णत्वस्य भेदविशेषणस्य पक्षभिन्नमपि व्यावर्त्त्यं भवतीति मूलोक्तस्य पक्षमात्रव्यावर्त्तकविशेषणकत्वादिति तदनुपाधित्वप्रयोजकहेतोरसङ्गतिमाशङ्कते । यद्यपीति । नोपाधितायामुपयुज्यत इति । उपाधेस्सङ्कोचनं तल्लक्षणघटकसाध्यव्यापकत्वसम्पादकतयोपयुज्यते, तद्व्यापकत्वसम्पादकता च तदधिकरणानुपाधिव्यावृत्तेरेव, न तु तदनधिकरणपर्वतावयवरूपादिव्यावृत्तेरिति भावः । पक्षस्यैवेति । व्यावृत्तिरुपाधितायामुपयुज्यते इत्यनुषज्यते । पक्षस्य साधनवत्त्वादिति भावः । इति । इत्याशयेन । उक्तमिति । मात्रपदेन उपाधित्वोपयिकपक्षभिन्नाव्यावृत्तिप्रयोजकताया विशेषणे व्यवच्छेदात् पर्वतभिन्नतदवयवरूपादिव्यावर्त्तकत्वेऽप्युक्तविशेषणे उक्तव्यावृत्तिविशेषणप्रयोजकत्वाभावस्याक्षततया मात्रार्थसङ्गतिरिति भावः । अनुपाधितायाम् । अव्यापकतायाम् । न बीजम् । न प्रयोजकम् । परिभाषेति । तादृशविशेषणवत्त्वेऽपि साध्यव्यापकत्वादिग्रहदूषकताया दुर्निवारत्वादिति भावः । द्रष्टव्यम् । अनुपाधित्वबीजतया ।

केचित्तु पक्षमात्रव्यावर्त्तकं विशेषणं यस्य पक्षेतरस्य तत्तथा, तद्वत्त्वात् तत्तुल्यत्वात् । विशेषणवत्त्वादिति । तादृशार्थकवतिप्रत्ययबलान्मूलस्यार्थः । पक्षेतरतुल्यता च व्यापकताग्राहकानुकूलतर्कराहित्येन, तथा च दीधितिकारोक्तदूषकताबीज एव मूलस्य तात्पर्यमिति वदन्ति ।

अत एवेति मूलस्याव्यवहितोक्तपक्षेतरत्वानुपाधित्वोपष्टम्भपरत्वासम्भवादनुपाधिताप्रयोजकाभावप्रतियोगितया प्रक्रान्तानु-

फलतईसम्भवोपष्टम्भपरतामाह । व्यापकताग्राहकेति । प्रमाणपदं प्रमाणसहकारितत्कारणपरम् ।

(दी०) अथात्र स्वतन्त्रान्वयव्यतिरेकाभ्यामार्द्रेन्धनत्वेनैव कारणत्वम्, न पुनरार्द्रेन्धनप्रभववह्नित्वेनेति चेत् ? किञ्चातः ? न हि कारणतावच्छेदकमेव व्यापकतावच्छेदकम्, तादृशाभावप्रतियोगितानवच्छेदकस्यैव तथात्वात्, तदवच्छिन्नप्रतियोगिताकाभावस्य चातिरिक्ततया तद्वद्वृत्तित्वेन साध्यव्यभिचारसाधने वैयर्थ्याभावात् ।

(गा०) कारणतावगमेनेत्यग्रिममूलस्य उपाधितावच्छेदकावच्छिन्नस्य कारणतानिश्चयेनेत्यर्थाभिमानेन आर्द्रेन्धनप्रभववह्नित्वेन धूमकारणतया तेन रूपेण उपाधित्वानुपपत्तिं शङ्कते । अथेति । स्वतन्त्रान्वयव्यतिरेकाभ्यामिति । आर्द्रेन्धनस्य वह्नेश्च पृथगन्वयव्यतिरेकयोर्धूमान्वयव्यतिरेकप्रयोजकत्वदर्शनेनेत्यर्थः । न पुनरिति ।
यद्यपि आर्द्रेन्धनप्रभववह्नित्वेन कारणत्वेऽपि तादृशान्वयव्यतिरेकोपपत्तिः ।

न च तेन रूपेण कारणत्वे आर्द्रेन्धनप्रभववह्निसत्त्वे आर्द्रेन्धनविरहे धूमविरहो नोपपद्यत इति वाच्यम् । कारणतावच्छेदकविशिष्टस्य प्राक्सत्तायाः प्रकृतकार्योत्पादप्रयोजकत्वोपगमेनाकारणस्याप्यार्द्रेन्धनस्य कारणतावच्छेदकतया तदभावेन धूमाभावोपपत्तेः, तथापि आर्द्रेन्धनप्रभवत्ववह्नित्वयोरप्येकविशिष्टत्वेनापरस्य जनकतावच्छेदकत्वं वाच्यम्, तथा च तयोर्विशेषणविशेष्यभावे विनिगमनाविरह इति प्रत्येकमेव कारणत्वम्, अन्यथा घटादावपि चक्रविशिष्टदण्डत्वादिना हेतुताप्रसङ्गात् ।

न चैवमार्द्रेन्धनस्य शुष्केन्धनमात्रजन्यवह्नेश्च सत्त्वे धूमोत्पत्तिप्रसङ्ग इति वाच्यम् । प्रत्येकरूपेण स्वरूपयोग्यत्वेऽपि आर्द्रेन्धनवह्न्योर्जन्यजनकभावरूपप्रत्यासत्तेः फलोपधाने तन्त्रतया आर्द्रेन्धनप्रभववह्नित्वस्य धूमोपधायकतावच्छेदकत्वात् । अत एव दण्डत्वचक्रत्वादिना पृथग्घटादिस्वरूपयोग्यत्वेऽपि चक्रादिविशिष्टदण्डत्वं घटाद्युपधायकतावच्छेदकम् ।

अथ कारणतावच्छेदकसम्बन्धेनैकक्षणावच्छिन्नसामानाधिकरण्यमेव कार्योपधाने प्रयोजकम्, न तु जन्यजनकभावादिरूपप्रत्यासत्तिः, अव्यापकत्वात्, यत्तु कृतिसाध्यताज्ञानेष्टसाधनताज्ञानयोः पृथक्पृथक्प्रवृत्तिहेतुत्वेऽपि तयोरभेदस्य कार्योपधानप्रयोजकतया कृतिसाध्यताविषयकेष्टसाधनताज्ञानत्वं फलोपधानरूपकारणतायामवच्छेदकमिति विधिवादे मिश्राणां मणिकारतात्पर्यवर्णनं तदपि इच्छातद्विषयफलसाधनताज्ञानकृतिसाध्यताज्ञानानां त्रयाणां युगपदवस्थानासम्भवेनैकक्षणावच्छिन्नसामानाधिकरण्यापेक्षायामेव ज्ञानयोरभेदापेक्षासम्भवदस्थानमित्यभिप्रायेण सङ्गच्छते, अन्यथा कारणयोः क्वचिदभेदरूपायाः क्वचिज्जन्यजनकभावरूपायाः प्रत्यासत्तेः फलोपधानप्रयोजकतामभ्युपेत्यातिप्रसङ्गवारणे कृतिसाध्यताविषयकनिश्चयत्वादिना प्रवृत्त्यादिहेतुत्वे तद्विषयकत्वसंशयान्यत्वज्ञानत्वादीनां विशेषणविशेष्यभावे विनिगमनाविरहेण तेन रूपेण पृथगेव कारणता, तत्तत्कारणतावच्छेदकावच्छिन्नानामभेदः कार्योपधाने प्रयोजक इत्यपि स्यात्। एवं च दण्डचक्रसंयोगादेः कारणप्रत्यासत्तिविधया न घटाद्युपधाने अपेक्षा, अपि तु स्वतन्त्रान्वयव्यतिरेकेण तस्यापि घटादिकं प्रति कारणता, इति चेत्? सत्यम्, इन्धनारम्भकपरमाणुषु वह्निनोदनाख्यसंयोगात्तेषां क्रिया, ततो विभागः, ततो द्व्यणुकारम्भकसंयोगनाशः, तन्नाशाद् द्व्यणुकनाशः, ततः पाकजविलक्षणरूपवद्भिः परमाणुभिः धूमद्व्यणुकाद्युत्पत्त्या त्रसरेण्वादिक्रमेण महाधूम उत्पद्यते, सामानाधिकरण्यप्रत्यासत्त्या धूमहेतुरूपविशेषस्याग्निसंयोगेन जनने च परमाणूनां जलसंयोगरूपमार्द्रत्वं सहकारि, अम्लद्रव्यसंयोग इव दधिहेतुभूतरसविशेषस्य दुग्धारम्भकपरमाणुषु तेजःसंयोगेन जनने, एवं च वह्नित्वादिना कारणत्वे वह्न्यार्द्रेन्धनयोरुभयोः सत्त्वे आर्द्रेन्धनदाहं विना धूमोत्पत्तेर्नावकाशः, द्रव्यान्तरारम्भरहितानां रूपविशेषविशिष्टपरमाणूनामभावादिति किमार्द्रेन्धनप्रभववह्नित्वेन कारणतयेति।

न चैवं वह्नित्वादिनापि कारणत्वमनर्थकम्, पूर्वद्रव्यविनाशरूपविशेषोपपादकस्य वह्नेस्तेनैवान्यथासिद्धत्वात्, स्वनाशेन इन्धनस्यापि तथात्वात्, अन्यथाऽन्यस्यापि स्वनाशद्वारा प्रतिबन्धकस्य हेतुताप्रसङ्गादिति वाच्यम्। वह्निना इन्धनं विनाश्य परमाणुषु रूप-

विशेषे जनितेऽपि वह्नीन्धनयोरसत्त्वे धूमानुत्पादेन तद्धेतुताया आवश्यकत्वात् ।

न च रूपविशेषमुत्पाद्य विनष्टे वह्नौ परमाण्वादावारम्भकसंयोगानुकूलक्रियानुत्पादान्न धूमोत्पत्तिः, तादृशक्रियामुत्पाद्य वह्नौ विनष्टे च तादृशक्रियारम्भकसंयोगजनने जायत एव त्रिचतुरादिक्षणमध्ये धूमः, वह्न्यवयवेषु संयुक्तेषु कारणान्तरविरहात् कार्यद्रव्यं नोत्पद्यते, अवयवसंयोगानां समवायिकारणत्वादिति वाच्यम् । एवं सत्यवयवसंयोगसमवायिकारणत्वादेर्हेतुत्वस्याप्रत्याख्येयत्वात्, अन्यथा घटपटादावपि दण्डवेमादेरन्यथासिद्ध्या अहेतुतापत्तेः ।

न चैवं वह्नेर्हेतुत्वेऽपि इन्धनस्य हेतुत्वमप्रामाणिकमिति वाच्यम् । इन्धनासत्त्वे वह्नेरनवस्थानेन तदवस्थानद्वारा तस्यापि हेतुताया आवश्यकत्वात् । जलसंयोगरूपमार्द्रत्वं रूपविशेषद्वारा पृथगेव हेतुः । न हीन्धनकारणतायां तस्यावच्छेदकत्वम् । आर्द्रेन्धनत्वादिनैव कारणत्वमित्यस्याप्ययमेव तात्पर्यम् ।

यत्तु आर्द्रेन्धनप्रभववह्नेर्जातिविशेषपुरस्कारेण हेतुता, न तु तादृशवह्नित्वेनेति नोक्तविनिगमनाविरह इति तदपि न सत् । प्रामाणिकवह्नित्वजात्या कारणत्वेऽप्युक्तदिशाऽतिप्रसङ्गवारणसम्भवेनावान्तरजातौ मानाभावादित्यलमधिकेन ।

कारणतावगमेन इति मूलस्य आर्द्रेन्धनप्रभववह्नित्वादिरूपोपाधितावच्छेदकाभिमतरूपेण कारणतानिश्चयेनेति नार्थः, परन्तु यादृशयादृशकार्यकारणभावादिना तत्तद्रूपावच्छिन्नस्य फलोत्पत्तिप्रयोजकत्वं तादृशकार्यकारणभावपरमेव तदित्याशयेन समाधत्ते । किञ्चेति इति ।

नन्वेवमार्द्रेन्धनप्रभववह्नित्वं यदि धूमव्यापकतावच्छेदकं न स्यात् तदा तत्कारणतावच्छेदकं न स्यादिति व्यापकताग्राहकतर्कस्येष्टापत्त्या नावतार इति कथं तद्ग्रहसम्भवतीत्यत आह । न हीति । यतः स्वरूपयोग्यतावच्छेदकत्वमात्रं व्यापकतावच्छेदकत्वनिर्वाह्यमिति न, येन आर्द्रेन्धनप्रभववह्नित्वादेरन्यथासिद्धिनिरूपकत्वेन स्वरूपयोग्यतानवच्छेदकत्वस्येष्टतया तदापत्तेरसम्भवेनैव व्यापकतावच्छेदकत्वग्रहो न स्यात्, अपि तु फलोत्पत्तिप्रयोजकतावच्छेदकत्वमपि तन्निर्वाह्यम्, तदभावापत्त्यैव व्यापकतावच्छेदकत्वं

सुग्रहमित्यर्थः । यादृशान्यथासिद्धया आर्द्रेन्धनप्रभववह्नित्वादिकं न स्वरूपयोग्यतावच्छेदकं तादृशी यदि व्यापकतावच्छेदकत्वमपि विघटयेत्तदा तद्रूपसाधारणं धूमाद्युत्पत्तिसामान्यप्रयोजकतावच्छेदकत्वं व्यापकतावच्छेदकत्वानियतं न स्यादिति तदभावस्तदभावं न प्रसञ्जयेत्, तदेव न, कारणतावच्छेदकत्वे इव व्यापकतावच्छेदकत्वे ऽनन्यथासिद्धत्वप्रवेशस्याभावादित्याह । तादृशेति । तथात्वात् । व्यापकतावच्छेदकत्वात् ।

ननु तथापि आर्द्रेन्धनप्रभववह्नित्वादिना वह्न्यादेर्नोपाधितासम्भवः, वह्नित्वाद्यवच्छिन्नव्यभिचारस्यैव धूमादिव्यभिचारव्याप्यतया आर्द्रेन्धनप्रभवत्वादिविशेषणस्यासिद्धिमात्रवारकतया वैयर्थ्येन तद्घटितरूपावच्छिन्नव्यभिचारस्य साध्यव्यभिचारासाधकत्वादित्यत आह । तदवच्छिन्नाभावस्य चेति । विशिष्टवह्नित्वाद्यवच्छिन्नाभावस्येत्यर्थः । अतिरिक्ततया शुद्धवह्नित्वाद्यवच्छिन्नाभावभिन्नतया । तद्वद्वृत्तित्वेन । शुद्धवह्नित्वावच्छिन्नाभावाघटितेन विशिष्टवह्नित्वावच्छिन्नव्यभिचारेण ।

(दी०) सत्यपि चाऽऽर्द्रेन्धने तत्संयुक्ते च वह्नौ दाहप्रतिबन्धकसत्त्वे धूमानुत्पादात् क्लृप्तकारणभावस्य वह्नेर्विशेषरूपेण कारणत्वकल्पनयैवोपपत्तावक्लृप्तनत्कारणभावानां दाहप्रतिबन्धकाभावानां तत्कारणत्वकल्पनानौचित्यात् । एकस्यामार्द्रेन्धनव्यक्तौ प्रतिबद्धायां तत्रैव व्यक्त्यन्तराद्धूमोत्पादात् तत्तदिन्धनजन्यधूमं प्रति तत्तदभावानां कारणत्वस्य वाच्यत्वेऽतिगौरवाच्च । महति चाऽऽर्द्रेन्धने तत्प्रभवे चाणीयसि वह्नौ महति वह्न्यन्तरे विद्यमानेऽप्यार्द्रेन्धनप्रभवमहावह्नेरनुत्पाददशायां प्रकृष्टधूमानुत्पादादार्द्रेन्धनप्रभववह्नित्वेन कारणत्वमित्यपि वदन्ति ।

(गा०) आर्द्रेन्धनप्रभववह्नित्वेनापि धूमस्वरूपयोग्यत्वं व्यवस्थापयतां मतमाह । सत्यपि चेत्यादिना वदन्तीत्यन्तेन । धूमानुत्पादादित्यादिकं आर्द्रेन्धनप्रभववह्नित्वेन कारणमित्यत्रेम हेतुः । आर्द्रेन्धने वह्नेरसंयोगस्थले पृथक्कारणतामतेऽपि धूमानुत्पादो निर्वहति, कार-

णानां कारणतावच्छेदकसम्बन्धघटितसामानाधिकरण्यातिरिक्तप-
रम्परप्रत्यासत्तेः कार्योत्पत्तावनपेक्षितत्वेऽपि संयोगविशेषसम्बन्धेन
धूमं प्रति तादात्म्यसम्बन्धेनाऽऽर्द्रेन्धनस्य संयोगसम्बन्धेन च वह्नेः
कारणत्वे आर्द्रेन्धनतादात्म्यवति वह्निसंयोगस्य धूमोत्पत्तावपेक्षा-
सम्भवात्, अत उक्तं तत्संयुक्ते च वह्नावेति। आर्द्रेन्धने वह्निसं-
योगे सति तस्यापि दाहसम्भवेन धूमोत्पत्तिरिष्टैवेत्यत आह। दाह-
प्रतिबन्धकसत्त्वे इति। एतदुपलक्षणम्, दाहप्रतिबन्धकासत्त्वेऽपि
दाहोत्तरमेव धूमोत्पादात् तत्पूर्वं धूमोत्पत्त्यापत्तिरपि पृथक्कारणता-
मते द्रष्टव्या। दाहप्रतिबन्धकसत्त्वे धूमोत्पत्तिस्तदभावस्य धूमका-
रणताकल्पनेनापि शक्यते वारयितुमित्याशङ्कां निराकरोति। क्लृप्ते-
त्यादिना। क्लृप्तकारणभावस्य। अवश्यकल्पनीयकारणताकस्येत्य-
र्थः। विशेषरूपेण। आर्द्रेन्धनप्रभववह्नित्वेन। अक्लृप्तेति। उभया-
सिद्धेत्यर्थः। दाहप्रतिबन्धकाभावानाम्। मणिमन्त्रादिविशेषाद्य-
भावादीनाम्। तत्कारणत्वेति। धूमकारणत्वेत्यर्थः। अनौचित्यं
कारणताबाहुल्येन। मणिविशेषादीनामपि धूमसामान्यं प्रति
नैकप्रतिबन्धकतया निर्वाह इति दर्शयति। एकस्यामिति।
प्रतिरुद्धायाम्। दाहप्रतिबन्धकमण्यादिसमवहितायां सत्याम्।
तत्रैव। तदिन्धनव्यक्तावेव। व्यक्त्यन्तरात्। सन्निहिता-
र्द्रेन्धनान्तरात्। तत्तदभावानाम् तत्तदिन्धनप्रत्यासन्नमण्याद्यभा-
वानाम्। कारणत्वस्येति। एतदुपलक्षणम्, यद्व्यक्तिजन्यधूमोऽ-
प्रसिद्धः तज्जन्ये धूमे प्रतिबन्धकाभावकारणत्वस्य दुष्कल्पतयाऽस-
ति प्रतिबन्धके वह्न्यादिघटितसामान्यसामग्रीबलात् तत्र धूमोत्प-
त्तिवारणाय तत्तदिन्धनानां विशेषसामग्रीत्वस्य कल्पनीयत्वेत्यपि
द्रष्टव्यम्। आर्द्रेन्धनदाहस्य धूमकारणतयाऽप्युक्तापत्तिवारणसम्भ-
वः, एवमिन्धनस्यादाहे तदारम्भकाणुषु द्रव्यान्तरावष्टम्भरूपप्रति-
बन्धकसत्त्वेन धूमोत्पत्तिप्रयोजकरूपविशेषाभावेन च न धूमोत्पत्ति-
रित्यनुशयान प्रकृष्टापकृष्टधूमयोग्यप्रकृष्टापकृष्टार्द्रेन्धनप्रभववह्न्यन्व-
यव्यतिरेकानुविधायितया तादृशतादृशधूमं प्रति तादृशतादृशवह्नि-
विशेषरूपेण हेतुताया आवश्यकतया यद्विशेषयोरिति न्यायेन
धूमसामान्यं प्रत्यार्द्रेन्धनप्रभववह्नित्वेन कारणत्वमावश्यकमित्याह।
महतीति चेति। आर्द्रेन्धनस्य वह्निसामान्यस्य च प्रकर्षो न धूमप्रकर्ष-

प्रयोजक इत्यादिना महदार्द्रेन्धनमहावह्न्यन्तरयोस्सत्त्वानुभावनम् । आर्द्रेन्धनवह्न्योः पृथक्कारणत्वेऽपि तयोरन्यजनकभावप्रत्यासत्तेर्धूमोत्पत्तावपेक्षितत्वेन आर्द्रेन्धनप्रभववह्निं विना धूमोत्पत्त्यापत्तेः कथञ्चिद्वारणसम्भव इत्यतोऽणीयसि तत्प्रभवे वह्नावित्युक्तम् ।

वह्नेस्तादृशस्वरूपसत्त्वाय, तद्बीजं च धूमनिष्ठप्रकर्षो महत्त्वविशेषः रूपविशेषवदारम्भकसंयोगवद्बहुतरभूयस्त्वघटितसामग्रीवशादेव धूमस्य तद्वत्त्वनिर्वाहेण तस्य न धूमजनकतावच्छेदकत्वम्, अन्यथा नीलघटत्वादेरपि नीलकपालजन्यतावच्छेदकतापातात्, भूयसां परमाणूनां पाकजरूपविशेषे धूमारम्भानुगुणसंयोगविशेषे च व्यापकवह्नेरपेक्षया तदन्वयव्यतिरेके महाधूमान्वयव्यतिरेक इति ।

(चि०) तदुत्कर्षेण साध्योत्कर्षात् । अनन्यथासिद्धान्वयव्यतिरेकतो वैयर्थ्यात्कारणत्वावगमेन घटोन्मज्जनप्रसङ्गेन साध्यव्यापकतानिश्चयात् ।

(दी०) तदुत्कर्षेणेति । आर्द्रेन्धनप्रभववह्निसामान्यं विना धूमसामान्यस्य प्रकृष्टतादृशवह्निं विना प्रकृष्टधूमस्यानुत्पादनियमादार्द्रेन्धनप्रभववह्नेरेव धूमोपधायकत्वम्, तत्रार्द्रेन्धनप्रभववह्नित्वं कारणतावच्छेदकमधिकांशसम्पन्नं नान्तरीयकमेवास्तु, फलतो न कश्चिद्विशेष इति भावः । अनन्यथेति । तादृशान्वयव्यतिरेकाभ्यामुद्भूतरूपस्य तद्वतो द्रव्यस्यैव वा कारणत्वम्, उभयथापि व्यापकत्वम्, उद्भूतरूपत्वेन तत्त्वं पुनरुपवर्णितमेव । घटोन्मज्जनेति । ध्वंसप्रागभावानधिकरणकालस्य प्रतियोग्यधिकरणत्वनियमात् । न च प्रागभावस्य ध्वंसप्रतियोगिध्वंस इव तद्ध्वंसोऽपि प्रतियोगिनो ध्वंस इति वाच्यम् । अप्रामाणिकध्वंसतत्कारणधाराकल्पनातो ध्वंसानन्तत्वकल्पनाया एवोचितत्वादिति भावः ।

(गा०) पूर्वोक्तमाशयं प्रकाशयन् तदुत्कर्षेणेत्यादिमूलं धूमत्वाद्यवच्छिन्नं प्रत्यार्द्रेन्धनप्रभववह्नित्वादीनामकारणत्वेऽपि सङ्गमयति ।

तदुत्कर्षेणेतीति । अर्थवशसम्पन्नं नान्तरीयकमिति । तेन रूपेणाहेतुत्वेऽपि प्रत्येककारणतानिर्वाह्यव्यापकतावच्छेदकताकमित्यर्थः । वाय्वादेः प्रत्यक्षवारणाय उद्भूतरूपस्यापि प्रत्यक्षे हेतुतां प्राञ्चो न स्वीकुर्वन्ति अपि तु विषयनिष्ठतद्धेतुतायामवच्छेदकत्वमेव तस्येति तथाऽपि न प्रकृतक्षतिरित्याह । अनन्यथेतीति । अनन्यथासिद्धत्वं च कारणत्वं तदवच्छेदकत्वं च विनाऽनुपपद्यमानत्वम् । अन्वयव्यतिरेकाभ्याम । उद्भूतरूपान्वयव्यतिरेकाधीनप्रत्यक्षविशेषान्वयव्यतिरेकाभ्याम् । उद्भूतरूपस्य समवायेन तद्वतो द्रव्यस्यैव वा तादात्म्येन कारणत्वम । तत्त्वं पुनरिति । विषयस्य सामान्यतः प्रत्यक्षं विषयत्वेन तद्व्यक्तिप्रत्यक्षं तद्व्यक्तित्वेन हेतुना, बहिर्द्रव्यादिप्रत्यक्षे च बहिर्द्रव्यादिरूपविषयस्य कारणत्वान्तरं निष्प्रमाणमेव, कुत उद्भूतरूपस्यावच्छेदकत्वम् ।

न च वाय्वादेः प्रत्यक्षवारणान्यथानुपपत्तिरेव बहिर्द्रव्यप्रत्यक्षे उद्भूतरूपवत्त्वेन विषयहेतुतायां प्रमाणमिति वाच्यम् । उद्भूतरूपत्वेन लघुना हेतुनैव तद्वारणसम्भवेन अन्यथानुपपत्त्यनवकाशात् ।

वस्तुत उद्भूतरूपत्वेनापि न हेतुना, उद्भूतत्वस्य दुर्वचत्वात् । न च तद्रूपत्वव्याप्यजातिविशेषः, नीलत्वादिजात्या सङ्करात् । न च नीलत्वादिव्याप्यं नानैवोद्भूतत्वम्, कारणतावच्छेदकाननुगमेन व्यभिचारात् ।

न च नीलादिप्रत्यक्षत्वं नीलत्वादिव्याप्योद्भूतत्वाद्यवच्छिन्नजन्यतावच्छेदकमिति न व्यभिचारः, नीलादिरूपस्य विषयोपलक्षणत्वे न्यायमते पाकरक्तघटादिप्रत्यक्षे व्यभिचारात्, तद्विशेषणत्वे निर्विकल्पकासङ्ग्रहात्, स्वविषयनीलादिमत्त्वविशिष्टविषयतासम्बन्धेन शुक्लप्रत्यक्षत्वावच्छिन्नस्य नीलादिजन्यतेत्युक्त्या निर्विकल्पकसङ्ग्रहेऽपि नीलाद्यभिभवकालीनतदाश्रयप्रत्यक्षस्य दुस्सङ्ग्रहत्वात्, नापि लौकिकप्रत्यक्षविषयत्वमुद्भूतत्वम्, गुणादेः लौकिकप्रत्यक्षविषयतायां सन्निकृष्टाश्रयनिष्ठलौकिकप्रत्यक्षविषयतायाः प्रयोजकत्वादन्योन्याश्रयेणाश्रयप्रत्यक्षतायां तस्याः प्रयोजकत्वासम्भवात् ।

अनुद्भूतत्वं जातिः नीलत्वादिव्याप्या नानैव, तदवच्छिन्नभेदकूट एवोद्भूतत्वमिति चेत् ? तर्हि तेन रूपेण रूपस्य हेतुत्वे ताव-

च्छेदानां मिथो विशेषणविशेष्यभावे विनिगमनाविरहेण कारणतायां बाहुल्यस्य अवच्छेदकगौरवस्य च प्रसङ्गाद्रूपत्वेन तत्त्वावच्छिन्नस्य अनुद्भूतत्वावच्छिन्नात्यन्ताभावत्वेन च पृथक्कारणत्वकल्पनमेवोचितम्, तावता उद्भूतरूपत्वावच्छिन्नस्य बहिर्द्रव्यप्रत्यक्षत्वावच्छिन्नव्यापकत्वमव्याहतमेव।

यदि च अनुद्भूतत्वं शुक्लत्वव्याप्यं भास्वरत्वविरुद्धमेव, रसनेन्द्रियादिरूपस्य शुक्लतया घ्राणेन्द्रियादावपि शुक्लरूपस्यैव कल्पनादित्युच्यते, तदा तदवच्छिन्नाभावस्य पृथक्कारणत्वमेवोचितम्। अन्यथा तदवच्छिन्नभेदरूपत्वयोर्विशेष्यविशेषणभावे विशेष्यविशेषणतावच्छेदकभावे वा विनिगमनाविरहेण कारणताद्वयस्याऽऽवश्यकत्वात्, अवच्छेदकगौरवाधिक्यादित्यादिकमनुपवर्णितप्रायमित्यर्थः।

उच्छृङ्खलास्तु पृथिव्यादित्रयनिष्ठजातिविशेष एव बहिर्द्रव्यप्रत्यक्षजनकतावच्छेदकतया स्वीक्रियते, तदभावादेव न वाय्वादीनां प्रत्यक्षता।

न च तादृशजातेः पृथिवीत्वादिना सङ्करभयेन घ्राणेन्द्रियादाववश्योपेयतया तत्प्रत्यक्षवारणायानुद्भूतरूपप्रतिबन्धकताया आवश्यकत्वेन रूपत्वेन हेतुतयैव नीरूपप्रत्यक्षवारणसम्भवे किमुक्तजात्येति वाच्यम्। रूपत्वेन हेतुत्वे नानाजातीयरूपवदारब्धद्रव्ये अतिरिक्तचित्ररूपस्य नीलपीतादीनां वा कल्पनीयतया गौरवात्। एतन्मते तत्र विजातीयसंवलनप्रतिबन्धेन रूपानुत्पादस्यैवोपगमात्।

अथ वा उद्भूतत्वमनेकत्वमेव प्रत्यक्षजनकम्, तद्गतमुद्भूतत्वं चैकैव जातिः, सङ्करानवकाशात्। घ्राणेन्द्रियाद्येकत्वव्यावृत्तैव सा जातिः, अतो न तत्प्रत्यक्षता। न च प्रभायाश्चाक्षुषानुरोधेन तदेकत्वे तादृशजातेरावश्यकतया तस्य स्पार्शनापत्तिरिति वाच्यम्। स्पार्शनप्रत्यक्षेऽनुद्भूतस्पर्शविशेषस्य प्रतिबन्धकतां स्वीकृत्य तस्य वारणीयत्वात्। अस्तु वा स्पार्शनप्रत्यक्षप्रयोजकमपि प्रभैकत्वव्यावृत्तं चाक्षुषप्रयोजकजातिव्याप्यं जात्यन्तरम्, न्यायादिमते वायोरिवोष्मणोऽप्यतीन्द्रियतया तदेकत्वे स्पार्शनप्रयोजकजातेरप्यनभ्युपगमेन तद्वाप्यतानिर्वाहादित्याहुः।

मूले वैद्यकादिति। वैद्यकशास्त्रतः शाकाद्याहारपरिणामजन्यत्वस्य नरश्यामरूपप्रयोजकत्वावगमेनेत्यर्थः। जाठरानलेनाभ्यवहृ-

तथा शाकाद्यारम्भकेष्ववयवेषु शरीरगतश्यामरूपसजातीयं रूपमुत्पाद्यते, तैश्चावयवैरदृष्टविशेषप्रेरिताभ्यन्तरसमीरणसञ्चारितैर्गर्भाशयं प्रविश्य परस्परसंयुक्तैश्शरीरमारभ्यते इति तत्रावयवश्यामरूपात्तज्जातीयं रूपमुत्पद्यते, तत्र शरीरगतशाकपाकजत्वस्य शाकपाकजत्वेन शरीरस्य वा हेतुतायां निष्प्रमाणकत्वेऽपि जाठरानलपाकाधीनरूपविशेषशाकाद्यवयवस्य वा तन्निष्ठविजातीयाग्निसंयोगस्य वा हेतुतयाऽपि शाकेतरभुक्तद्रव्ये तादृशरूपस्य जाठरानलेन जनयितुमशक्यत्वाच्छाकावयवजन्यत्वस्य मित्रातनयशरीरे श्यामविशेषोत्पादप्रयोजकताया वैयक्त्योचिताया आवश्यकत्वेन तदनुपपत्त्या तस्यै मित्रातनयश्यामत्वव्यापकतानिश्चयो निर्वहत्येवेति ध्येयम् । घटोन्मज्जनेति । तद्घटोत्तरकाले तद्घटसत्त्वापत्त्येत्यर्थः । आपत्तिश्च जन्यत्वविशिष्टं विनाशित्वं यद्यत्यन्ताभावाद्यवृत्तित्वे सति भावत्वव्यभिचारि स्यात् ध्वंसवृत्ति स्यात् ध्वंसत्ववदित्याकारा भावत्वोपाधौ विशिष्टसाध्यव्यापकतां ग्राहयति, विशेषणवत्त्वेन निश्चिते पक्षे विशिष्टापादकतर्कस्य विशेष्यशङ्कानिवर्त्तकत्वात् जन्यत्वविशिष्टे विनाशित्वे अत्यन्ताभावाद्यवृत्तित्वविशेषणस्य निश्चयादुक्ततर्के सति जन्यत्वविशिष्टे विनाशित्वे भावत्वव्यभिचारशङ्कानिवृत्तेः, तादृशापत्तिपरिपन्थिन्या विनाशित्वे ध्वंसवृत्तित्वस्येष्टापत्तिशङ्काया निवृत्त्यर्थमेव तर्कः घटादिध्वंसो यदि किञ्चित्कालवृत्तिध्वंसप्रतियोगी स्यात् स्वानधिकरणतत्कालः स्यात्, तद्घटप्रागभावानधिकरणतया निश्चितस्य कालस्य तद्घटध्वंसानाधिकरणत्वे इष्टापत्तिशङ्कायां च स कालस्तद्घटप्रागभावानधिकरणत्वे सति यदि तद्घटध्वंसानधिकरणकालः स्यात् तद्घटाधिकरणं स्यादिति घटोन्मज्जनप्रसङ्गो विरोधिपरम्परया साध्यव्यापकताया ग्राहकः ।

उक्ततर्के मूलशैथिल्यशङ्कानिरासाय सामान्यतो व्याप्तिं घटयति दीधितौ । ध्वंसेति । तदीयकादाचित्काभावानधिकरणकालत्वस्य तदधिकरणत्वव्याप्यत्वादित्यर्थः । तदधिकरणत्वं कालिकसम्बन्धेन, अतो विश्वविषयकज्ञानध्वंसस्य ध्वंसाधिकरणत्वेनाभ्युपगते काले विषयतया तज्ज्ञानवति तज्ज्ञानोन्मज्जनप्रसङ्गे नेष्टापत्त्यवसरः । गगनादौ व्यभिचारवारणायाऽऽद्यके कालत्वप्रवेशः । यत्र काले यद्घटध्वंसादिध्वंसो येनाभ्युपेयते तेनापि तत्र काले तद्घटध्वं-

सानधिकरणत्वं नोपगम्यते इति कथमुक्तापत्तिः, विपर्ययानुमाने सिद्धसाधनादिति शङ्कते । न चेत्यादिना । प्रागभावस्य प्रतियोगिध्वंस इवेति । यथा प्रागभावप्रतियोगिनो घटादेर्ध्वंसोऽपि तत्प्रागभावप्रतियोगिकः स्वीक्रियते इत्यर्थः । अन्यथा प्रतियोगिध्वंसकाले प्रागभावोन्मज्जनप्रसङ्गात्, प्रागभावप्रागभावाप्रसिद्ध्या तत्प्रागभावानधिकरणत्वगर्भापादकाप्रसिद्धावपि काशचित्काभावत्वेनोभयसङ्ग्राहकापादकप्रसिद्धिसौलभ्यादिति भावः । तद्ध्वंसोऽपि । प्रतियोगिध्वंसध्वंसोऽपि । प्रतियोगिनो ध्वंसः । प्रतियोगिप्रतियोगिकः । उपेयत इति शेषः । तथा च तद्ध्वंसध्वंसाधिकरणकालस्यापि तत्प्रतियोगिकध्वंसाधिकरणत्वमेवेति भावः । एवं कल्पनया घटोन्मज्जनप्रसङ्गोद्धारेऽपि लाघवेन ध्वंसस्याविनाशित्वासिद्ध्या भावत्वस्य जन्यानित्यत्वव्यापकत्वं सुघटमेवेत्याह । अप्रामाणिकेति । ध्वंसतत्कारणधाराकल्पनात इति । ध्वंसप्रतियोगिकध्वंसपरम्परायास्तत्कुले तत्तत्प्रतियोगिपरम्परायाः प्रतियोगितानियामककारणतानां च कल्पनामपेक्ष्येत्यर्थः । अन्यत्वम् । अविनाशित्वम् । उचितत्वादिति । लाघवेनेत्यादिः ।

अथ विनाशं प्रति जन्यभावत्वेन एककारणत्वस्य जन्यत्वेन भावत्वेन कारणताद्वयस्य च कल्पनातो लाघवात् जन्यत्वमात्रेण प्रतियोगिनां कारणत्वकल्पनेन तदवच्छिन्नमात्रस्य च लाघवात् ध्वंसप्रतियोगितानियामकत्वसिद्धौ ध्वंसेऽपि तादृशसामग्र्याः प्रामाणिकत्वात् ध्वंसप्रतियोगिकध्वंसधारायाः प्रामाणिकत्वमेवेत्यप्रामाणिकेत्यसङ्गतम् ।

अत्र वदन्ति प्रागभावप्रतियोगित्वरूपजन्यत्वापेक्षया लघीयसा जातिरूपसत्त्वेनैव प्रतियोगितासम्बन्धेन ध्वंसं प्रति तादात्म्यसम्बन्धेन हेतुता कल्प्यते, तदवच्छिन्नघटिता च सामग्री न ध्वंसे, कालिकसम्बन्धेन सत्त्वं कारणतावच्छेदकं समवायेन वेत्यत्र विनिगमनाविरहेऽपि समवायेन तदवच्छिन्नहेतुताया निष्प्रत्यूहतया ध्वंसे सामग्रीविरहस्य सूपपादत्वात् ।

न च समवायसम्बन्धेन सत्त्वावच्छिन्नस्य हेतुत्वे नित्यानां द्रव्यगुणानां नाशः स्यादिति, कालिकसम्बन्धेन सत्तावत्त्वेन जन्यमात्रस्य कालोपाधित्वाभावे च प्रागभावप्रतियोगित्वेन हेतुता वाच्येति ध्वंसेऽपि तत्सत्त्वेन तस्यापि नाशो भवेदिति

वाच्यम् । प्रतियोगिमात्रस्य प्रतियोगितासम्बन्धेन कार्योत्पादकसामग्रीत्वेन जन्यत्वेन प्रतियोगिनो हेतुत्वेऽपि द्वितीये तृतीये वा क्षणे घटादेर्नाशः स्यादिति द्रव्यादिनाशे विशेषसामग्र्यन्तरस्याऽऽवश्यकतया तदभावादेव नित्यद्रव्यादीनां नाशवारणसम्भवे समवायेन सत्ताया अपि प्रतियोगिनिष्ठकारणतावच्छेदकत्वसम्भवात् तथा हि आश्रयनाशानाश्यद्रव्यस्य नाशेऽसमवायिकारणविजातीयसंयोगनाशो विशेषसामग्री, आश्रयनाशजन्यद्रव्यनाशे व्यभिचारवारणाय आश्रयनाशानाश्यत्वं कार्यतावच्छेदके नाशप्रतियोगिविशेषणम्, आश्रयनाशानाश्यत्वं च स्वप्रतियोगिसमवेतत्वकालिकविशेषणत्वोभयसम्बन्धेन नाशविशिष्टान्यत्वम्, शिरोमणिमते द्रव्यनाशत्वमेव कार्यतावच्छेदकम्, तन्मते सर्वत्रासमवायिकारणनाशादेव द्रव्यनाशम्, कारणतावच्छेदकप्रत्यासत्तिः स्वप्रतियोगिजन्यत्वम्, तेन च सम्बन्धेनासमवायिकारणनाशस्य गगनादौ अभावान्न तन्नाशापत्तिः, आश्रयनाशकालस्थायिगुणकर्मणोर्विनाशे च आश्रयनाशो हेतुः, विभागसंयोगादिजन्ये संयोगविभागकर्मादिनाशे व्यभिचारवारणाय आश्रयनाशकालस्थायित्वं कार्यतावच्छेदककोटौ प्रतियोगिविशेषणम्, तदर्थश्च स्वप्रतियोगिसमवेतत्वकालिकविशेषणत्वोभयसम्बन्धेन नाशविशिष्टत्वम्, आश्रयनाशस्य नाशत्वेनैव हेतुता, स्वप्रतियोगिसमवेतत्वं प्रत्यासत्तिः, तादृशसम्बन्धेन नाशश्च न नित्यगुणे, तदाश्रयस्यापि नित्यत्वेन नाशाप्रतियोगित्वात्, आश्रयनाशानाश्यरूपरसगन्धस्पर्शनाशे विजातीयतेजस्संयोगरूपः पाको हेतुः, कारणतावच्छेदकसम्बन्धः सामानाधिकरण्यम्, तेन सम्बन्धेन तस्य पार्थिवपरमाण्वेकत्वादिषु सत्त्वेऽपि रूपादिनाशे तादात्म्यसम्बन्धेन रूपत्वादिनापि हेतुत्वात्तेन सम्बन्धेन तेषामेकत्वादिष्वसत्त्वान्न पाकघटितसामग्रीबलात्तद्विनाशापत्तिः रूपाद्यात्मकप्रतियोगिनां पाकसहकारित्वानुपगमे जन्यत्वेन प्रतियोगिनां हेतुत्वेऽपि पाकाद्रूपादिनाशसमये तत्समानाधिकरणविभागादिरूपजन्यगुणानां विनाशप्रसङ्गात्, आश्रयनाशानाश्यसंयोगादिनाशे स्वावच्छेदकावच्छिन्नत्वस्वव्यापकत्वोभयसम्बन्धेन विभागो हेतुः, तादृशसम्बन्धेन विभागो न नित्यगुणे न वा तत्र तत्सहकारिसंयोगरूपप्रतियोगी तादा-

त्वसम्बन्धेन प्रत्यासन्नः, एवं विभागनाशे स्वजनकसंयोगनाशजनकत्वसम्बन्धेन संयोगो हेतुः, कर्मनाशेऽपि जनकत्वसम्बन्धेन संयोगो हेतुः पूर्वसंयोगनाशोत्तरसंयोगजनकत्वस्येश्वरज्ञानादिसाधारण्यवत् तदाश्रयजन्यद्रव्यसाधारण्यात् तदुत्तरसंयोगात्तन्नाशवारणाय तत्रापि विभागकर्मरूपप्रतियोगिनोः सहकारितायाः आवश्यकत्वात्तत एवेश्वरज्ञानादिष्वातिव्याप्तिः। अपेक्षाबुद्धिजन्यगुणनाशे अपेक्षाबुद्धिनाशः स्वप्रतियोगिजन्यत्वसम्बन्धेन हेतुः, नित्ये तेन सम्बन्धेन नाशासत्त्वान्नातिप्रसङ्गः, शब्दज्ञानादिरूपयोग्यविभुविशेषगुणनाशे स्वपूर्वत्वस्वसामानाधिकरण्योभयसम्बन्धेन विशेषगुणत्वेन हेतुता, स्वपूर्वत्वं च कालिकसम्बन्धेन स्वप्रागभावाधिकरणत्वम्, गगनैकत्वादौ शब्दादिरूपविशेषगुणस्य सामानाधिकरण्यसत्त्वेऽपि कालिकसम्बन्धेन न तत्प्रागभाववत्त्वम्, महाकाले तत्सत्त्वेऽपि न सामानाधिकरण्यमिति न तद्बलात्तन्नाशापत्तिः।

वस्तुतस्तु तत्रापि तादात्म्येन तादृशप्रतियोगिनां सहकारित्वमावश्यकम्, अन्यथा संयोगादिनाशादावपि तज्जन्यतावच्छेदकावच्छिन्नापत्तेः, तथा च नित्यैतद्विशेष्यादावपि तद्घटितसामग्रीविलम्बः।

एतेनापेक्षाबुद्धेरपि तृतीयक्षणे विनाशस्य शिरोमणिना स्वीकृतत्वात् शब्दादिनाशे च तत्समानकालीनपदार्थनाश एव नाशत्वेन हेतुः, कालिकसम्बन्धेन प्रतियोगिमत्त्वं प्रत्यासत्तिः, नाशत्वमेव जन्यतावच्छेदकम्, जन्यमात्रस्य कालोपाधितया सर्वत्रैव नाशप्रतियोगिनि तादृशकारणसत्त्वेन व्यभिचारानवकाशात्, तथा च तादृशकारणबलान्महाकालस्य नाशापत्तिरिति परास्तम्। घटादावपि समकालपदार्थनाशस्योक्तसम्बन्धेन तद्द्वितीयक्षणे सत्त्वात् तृतीयक्षणे तन्नाशापत्तिवारणाय शब्दादीनां तादात्म्यसम्बन्धेन तत्सहकारिताया आवश्यकत्वात् तत एवानतिप्रसङ्गनिर्वाहात्।

न चैवं सत्त्वेन हेतुत्वमप्यनर्थकम्, सत्ताशून्यानां जात्यादीनां नाशस्योक्तविशेषसामग्र्यभावादेव वारणसम्भवादिति वाच्यम्। तत्र स्वप्रतियोगिसमवेतत्वसम्बन्धेन नाशहेतुभूताश्रयनाशस्य एकत्वपरिमाणादाविव जातावपि सत्त्वेन तादृशविशेषसामग्रीबलात् तस्या नाशवारणाय सत्त्वेन तादृशप्रतियोगिनां कारणत्वस्याऽऽवश्यकत्वात्। एकत्वादिनाशे एकत्वादीनां विशिष्य कारणताया अ-

नावश्यकत्वात्, नाशप्रतियोगिनां सर्वेषां स्वनाशे विशिष्य हेतुत्वेऽपि यद्विशेषयोरिति न्यायबलात् सत्त्वेन तेषां सामान्यहेतुताया आवश्यकत्वाच्च अन्यथा तत्ताद्दशसामग्रीविरहकूटस्य जात्यादौ प्रतियोगितया नाशसामान्यानुत्पादप्रयोजकत्वकल्पनायां गौरवात्, अन्यथा तत्तद्व्यक्तिस्थलीयविशेषसामग्र्यभावेन सर्वत्र सामान्यकार्यातिप्रसङ्गवारणसम्भवेन सामान्यकारणमात्रोच्छेदप्रसङ्गात् ।

अथ नाशत्वावच्छिन्नं प्रति स्वप्रतियोगिसत्त्वसम्बन्धेन नाशत्वेन हेतुतामते तादृशसामान्यकारणाभावादेव न जात्यादावाश्रयनाशघटितसमग्रीतो नाशापत्तिः, यद्विशेषयोरित्यादिनियमश्चाप्रयोजक इति चेन्न । प्रागभावस्य कालोपाधित्वाभावेन तत्र कालिकसम्बन्धेन प्रतियोगिसत्त्वाभावात्तन्नाशे व्यभिचारवारणाय समानकालीनपदार्थनाशस्य स्वप्रतियोगिवृत्तित्वसम्बन्धेनैव नाशत्वावच्छिन्नं प्रति हेतुताया वक्तव्यतया प्रागभावेऽपि तादृशसम्बन्धेन तस्य सत्त्वाच्च व्यभिचार इति जातावपि तादृशसम्बन्धेन तस्य सत्त्वात् सत्त्वेन हेतुतां विना तन्नाशापत्तिवारणासम्भवात् । यदि चासमवायिकारणनाशस्यैव द्रव्यनाशकतामतेऽवयवनाशादसमवायिकारणसंयोगनाशोत्पत्तिक्षण एव द्रव्यनाशस्य वारणाय गुणकर्मणोर्द्रव्यान्यत्वेन कारणतां कल्पयित्वा तदेव तद्वृत्त्याश्रयनाशसहकारिता वाच्या, तथा सति कारणतावच्छेदकगौरवाल्लाघवेन गुणकर्मणोर्द्रव्यावृत्तिजातिविशेषमङ्गीकृत्य तेन रूपेण तयोराश्रयनाशसहकारित्वमुचितम्, तादृशसहकारिविरहादेव न जातेर्नाशापत्तिरिति विभाव्यते, मा भूत् तदा सत्त्वेन हेतुत्वम्, ध्वंसध्वंसापादकसामग्रीदुर्भिक्षं दुर्वारमेव, चरमसंयोगानां विनाशेऽदृष्टविशेषनाशस्य कालिकसम्बन्धेन हेतुत्वात्, तस्य च ध्वंसेऽपि सत्त्वात् तद्बलाद् ध्वंसध्वंसापत्तिरिति चेन्न । विजातीयसत्त्वावच्छिन्नस्यैव तत्सहकारितोपगमेन तदापत्त्यभावात्, चरमध्वंसातिरिक्तस्य ध्वंसस्य कालोपाधिताया निर्युक्तिकतया तत्र कालिकसम्बन्धेनादृष्टविशेषनाशासत्त्वाच्च, चरमध्वंसे च चरमध्वंसवृत्तिपदार्थनाशरूपकारणाभावेन तन्नाशापत्तेरयोगादिति कृतं पल्लवितेन ।

(चि०) तत् किं कार्यकारणयोरेव व्याप्तिः, तथा च

बहुधा व्याकुली स्यादिति चेन्न । तदुपजीव्यान्येषामप्यनुकूलतर्केण व्याप्तिग्रहात् । यत्र साध्योपाध्योर्हेतुसाध्ययोर्वा व्याप्तिग्राहकसाम्यान्नैकत्र व्याप्तिनिश्चयस्तत्र सन्दिग्धोपाधित्वम्, व्यभिचारसंशयोपधायकत्वात् । यदा च तादृशैकत्रानुकूलतर्कावतारस्तदा हेतुत्वमुपाधित्वं वा निश्चितम् । पक्षेतरस्य स्वव्याघातकत्वेन न हेतुव्यभिचारसंशायकत्वम्, अतो न सन्दिग्धोपाधिरपि सः । यत्तु पक्षेतरस्य यथा साध्यव्यापकत्वं तथा साध्याभावव्यापकत्वमपि, ग्राहकसाम्यात्, तथा चोभयव्यापकनिवृत्त्या साध्यतदभावाभ्यां पक्षे निवर्तितव्यम्, न चैवम्, तथा च पक्षेतरस्साध्यव्यापकतासंशयेन सन्दिग्धः कथं परं दूषयेदिति, तन्न । तथापि हि साध्यव्यापकतापक्षपातस्य हेतुव्यभिचारसंशयाधायकत्वेन दूषणं स्यादेव । ननु यत्रोपाधिस्तत्रानुकूलतर्को यदि नास्ति तदा तदभावेनैव व्याप्त्यग्रहः, अथास्ति तदा साध्यव्याप्यव्यापकत्वेनोपाधिः साध्याव्यापकत्वनिश्चयान्नोपाधिरित्युभयथापि नोपाधिर्दूषणम् । न च व्याप्त्याभावव्याप्यमुभयमत उपाधिरपि तदभावोन्नयनेन दोष इति वाच्यम् । उपाधेरात्मलाभार्थमनुकूलतर्काभावोपजीवकत्वेन तस्यैव दोषत्वादिति चेन्न ।

(दी०) कार्यकारणयोरेव । कार्यकारणभावग्राहकप्रमाणक्रोडीकृतयोरेव ।

(गा०) ययोर्न मिथः कार्यकारणभावस्तयोरपि साध्योपाध्योः प्रदर्शितत्वात् कार्यकारणयोरेवेति मूलाशङ्काया असङ्गतिः । तथा हि द्या-

मरूपे शाकारम्भकावयवसमवेतत्वरूपशाकपाकजत्वं न कारणमपि तु तादृशावयवरूपमेव प्रत्यक्षविषयत्वरूपं, प्रत्यक्षत्वमपि नोद्भूतरूपकार्यमपि तु मतविशेषे प्रत्यक्षमेव तत्कार्यम्, परन्तु प्रदर्शितेषु धूमार्द्रेन्धनप्रभववह्न्यादेरेव कार्यकारणभावः, तादृशवह्नेः तादृशवह्नित्वेन वह्नित्वेन वा कारणत्वमित्यन्यदेतत्, इत्यतः कार्यकारणयोरिति व्याचष्टे । कार्यकारणयोरेवेति । प्रमाणकोडीकृतत्वम् । प्रमाणविषयत्वम्, तथा च एककारणताप्रविष्टविषयान्तःपातिप्रमाविषयताश्रयीभूतयोरेवेत्यर्थः । तेन कार्यकारणभावाविषयकसम्भूतालम्बनप्रमाविषयत्वस्य केवलान्वयित्वेऽपि न व्यवच्छेद्याप्रसिद्धिः । तथात्वं च कार्यकारणयोः कार्यत्वकारणतावच्छेदकत्वयोः कारणतावच्छेदककार्यतावच्छेदकयोश्चेति दर्शितसकलोपाधिसङ्ग्रहः । वह्निधूमयोः कारणकार्योभयरूपत्वात्, विनाशप्रतियोगित्वस्य भावत्वावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकसम्बन्धत्वात्, सम्बन्धरूपावच्छेदकस्यापि कारणताघटकव्यापकताप्रविष्टत्वेन निरुक्तप्रमाविषयतावत्त्वात्, शाकारम्भकावयवसमवेतत्वस्य चावयवश्यामरूपनिष्ठकार्यतानिरूपितश्यामरूपकारणतावच्छेदकसम्बन्धत्वात्, प्रत्यक्षविषयत्वस्य च रूपस्य रूपवतो वा कार्यतावच्छेदकसम्बन्धत्वादिति ध्येयम् ।

मूले बहुधा व्याकुली स्यात् । द्रव्यत्वपृथिवीत्वादेर्व्यभिचारित्वेऽनुपपत्तिरस्यादित्यर्थः । तदुपजीव्येति । कार्यकारणभावग्राहकप्रमाणपरम्परयोपजीव्येत्यर्थः । अन्येषाम् । द्रव्यत्वपृथिवीत्वादीनाम् । अनुकूलतर्केति । पृथिवीत्वं यदि द्रव्यत्वशून्यवृत्ति स्यात् जन्यगुणशून्यवृत्ति स्यादिति तर्कः पृथिवीत्वादौ द्रव्यत्वादिव्याप्तिग्राहकः, तत्र द्रव्यत्वशून्याऽपि पृथिवी जन्यगुणशून्या न भविष्यतीत्यादिव्यभिचारशङ्का विरोधिनी, तां च जन्यगुणा यदि द्रव्यत्वव्यभिचारिणः स्युः द्रव्यत्वावच्छिन्नसमवायिकारणजन्या न स्युरित्यादितर्को विरुणद्धि, तत्र चेष्टापत्तिशङ्काविरोधितया जन्यसत्त्वद्रव्यत्वादिना कार्यकारणभावग्राहकप्रमाणमुपयुज्यते, प्रथमतर्के च नेष्टापत्तिसम्भवः, पृथिव्यादेस्संयोगादिरूपगुणशून्यत्वे मूर्तत्वानुपपत्तेः, मूर्तत्वादेः विभुसंयोगादिव्याप्यत्वादिति । एवमन्यत्रापि कार्यकारणभावस्योपयोगित्वमूह्यम । कार्यकारणभावग्रहोपजीवनं प्रायिकं बोध्यम् ।

(दी०) पक्षेतरस्येत्यादि । ननु सन्दिग्धोपाध्यन्तरव-

त्पक्षेतरोऽपि व्यभिचारशङ्कामादधानः केन वारणीयः, स्वव्या-घातकत्वं च निराकृतमेव ।

(गा०) पक्षेतरस्य स्वव्याघातकत्वेन न हेतुव्यभिचारसंशायकत्वमिति न सन्दिग्धोपाधिरपि स इति मूलस्य यथाश्रुतार्थमाक्षिपति । नन्वित्यादिना । सन्दिग्धोपाध्यन्तरवदिति । व्यभिचारशङ्काधायकत्वे दृष्टान्तः । साध्यव्यापकत्वेन सन्दिग्धं साधनाव्यापकधर्मान्तरमेवेत्यर्थः । व्यभिचारशङ्कामादधान इति । व्याप्यत्वसंशयात्मकसाध्यधर्मिकसाधनाव्यापकव्याप्यत्वसंशयद्वारा साध्ये साधनाव्यापकत्वशङ्कां साध्यव्यापकत्वसंशयाधीनमाधेनधर्मिकसाध्यव्यापकतावच्छेदकावच्छिन्नाभाववद्वृत्तित्वसंशयरूपव्याप्यसंशयद्वारा साधनधर्मिकसाध्याभाववद्वृत्तित्वशङ्कां वा जनयन्नित्यर्थः । तादृशशङ्काया जनने स्वव्याघातकत्वं मूलोक्तबाधकमुद्भरति । स्वव्याघातकत्वं चेति । निराकृतमेवेति । तच्च न सर्वानुमानसाधारण्यमित्यादिनेति शेषः ।

(दी०) अथात्र कश्चिदुपाधिर्भविष्यतीति शङ्का शङ्कापिशाचीत्वाद्यथा न व्यभिचारशङ्काधायिका, तथा पक्षेतरस्योपाधित्वशङ्काऽपि, तदाहिताऽपि च व्यभिचारशङ्का पक्षे व्यभिचारशङ्केव न प्रतिबन्धिका, अन्यथा निरुपाधिकसहचारभङ्गप्रसङ्गमात्रबलप्रवृत्तानामनुमानानां विलयप्रसङ्गादिति चेन्न । सन्दिग्धोपाध्यन्तरसाधारणव्यभिचारशङ्काधीनप्रयोजकरूपवत्ता पक्षेतरेण तदाधाने प्रयोजनक्षतेः प्रतिबन्धकत्वासम्भवात् । व्यभिचारज्ञानत्वेन च प्रतिबन्धकतायां कारणविशेषजन्यत्वादिकं न निविशते गौरवात् मानाभावाच्च । कथमन्यथा करवह्निसंयोगः सर्वः संयोगो वा प्रत्यक्षसंयोगधर्मातिरिक्तधर्मसमवायी समवायित्वादित्यादितो न शक्त्यादिसिद्धिः ? निरुपाधित्वेऽप्यप्रयोजकत्वादिति चेन्न । निरुपाधित्वस्यैव प्रयोजकत्वात् । तथात्वेऽपि चाप्रयोजकत्वे निरुपाधित्वाभिमतानामितरेषामपि तथात्वात् ।

(गा०) अत्र कश्चिदुपाधिर्भविष्यतीति शङ्कते। विशेषत उपाधितावच्छेदकमनुल्लिख्य एतत्साध्यव्यापक एतत्साधनाव्यापको न वा, एतत्साधनाव्यापक एतत्साध्यव्यापको न वेति शङ्कत इत्यर्थः। शङ्कापिशाचीत्वात्। दुरुच्छेदशङ्कात्वात्। पक्षेतरस्योपाधित्वशङ्काऽपीति। शङ्कापिशाचीत्वाच्च व्यभिचारशङ्काधायिकेत्यनुपपद्यते। अत्र व्यभिचारशङ्कासामग्र्याः स्थलान्तरे क्लृप्ताया अपि सत्त्वे तच्छङ्काया अनुत्पादोऽनुभवविरुद्ध इत्यनुशयानो न हेतुव्यभिचारसंशयाधायकत्वमित्यस्यानुमितिविरोधिव्यभिचारशङ्कानाधायकत्वाशयेन प्रकारान्तरेण पक्षेतरस्यादूषकत्वं शङ्कते। तदाहिताऽपि चेति। तस्योपाधित्वशङ्काहिता चेत्यर्थः। पक्ष व्यभिचारशङ्केति। पक्षे साध्यसन्देहदशायामप्यनुमित्युत्पत्त्या पक्षान्तर्भावेण व्यभिचारशङ्का यथा न प्रतिबन्धिकेत्यर्थः। न प्रतिबन्धिका। नानुमितिप्रतिबन्धिका। एतच्चानुमितिं प्रत्येव साक्षात्संशयसाधारणव्यभिचारग्रहः प्रतिबन्धकः, व्याप्तिज्ञाने तु व्यभिचारनिश्चय एवेति मतेन, व्याप्तिज्ञानविघटनद्वारा व्यभिचारसंशयस्यानुमितिविरोधित्वमते व्याप्तिज्ञानप्रतिबन्धकतायाः पक्षविशेषनियन्त्रितत्वाभावेन तत्र पक्षीयव्यभिचारसंशयस्यानुमितिविरोधित्वव्यावर्त्तनायोगात्, सामान्यतः पक्षत्वस्य केवलान्वयित्वात्। अन्यथा। उक्तव्यभिचारशङ्काया अपि प्रतिबन्धकत्वे। निरुपाधिकेति। पक्षेतरत्वतत्समशीलातिरिक्तोपाधिविरहविशिष्टसहचारभङ्गापत्तिमात्रबलेन प्रवृत्तानां गगनं परिमाणवत् द्रव्यत्वाद् घटादिवदित्यनुमानानामुच्छेदापत्तेरित्यर्थः। तत्र पक्षे साध्यसन्देहेन तदन्तर्भावेण व्यभिचारशङ्कायां पक्षेतरत्वोपाधित्वशङ्काहितव्यभिचारशङ्कायाश्च सम्भवादित्यर्थः।

न च तत्र व्यभिचारापादकनिरुपाधित्वभङ्गप्रसङ्ग एव व्यभिचारशङ्कानिवर्त्तक इति नोक्तानुमानविलयप्रसङ्ग इति वाच्यम्। अनौपाधिकत्वस्य दुर्निश्चयतया तद्भङ्गापत्तेरयोगात्। बलान्तेन च उपाध्यन्तराग्रहसहितव्यभिचारग्रहमात्रसमाधानस्यैव विवक्षिततया तत्सङ्गतेश्च।

प्रथमपक्षं दूषयति। सन्दिग्धेति। रूपवत्तेति। साध्यव्यापकतासंशयविषयत्वधर्मवत्तेत्यर्थः। प्रतिबन्धकत्वासम्भवादिति। न हि प्रयोजनक्षतिभिया सामग्री कार्यं न जनयतीति न्यायादिति भावः।

द्वितीयपक्षं दूषयति । व्यभिचारज्ञानेनेत्यत्र चेति । कारणविशेषजन्यत्वाजन्यत्वादिकमिति । पक्षेतरत्वोपाधित्वसंशयाघटितसामग्रीजन्यत्वादिकं तत्संशयाजन्यत्वादिकं चेत्यर्थः । आदिपदात्साध्याभावांशे संशयान्यत्वपक्षीयव्यभिचारसंशयान्यत्वपरिग्रहः ।

ननु द्रव्यत्वादौ पक्षान्तर्भावेण व्यभिचारसंशयेऽपि तस्य परिमाणाद्यनुमापकतया तदन्यथानुपपत्तिरेव तादृशसंशयान्यत्वस्य प्रतिबन्धकतावच्छेदककोटिप्रवेशे मानमित्यत आह । कथमन्यथेति । अन्यथा । साध्याभावांशे संशयरूपस्य व्यभिचारसंशयस्य पक्षान्तर्भावेण व्यभिचारेण संशयस्य वाऽप्रतिबन्धकत्वे । साध्याभावांशे संशयान्यत्वस्यैव निवेशे करवह्निसंयोगमात्रपक्षकानुमानादपि शक्तिसिद्ध्यापत्तिः, संयोगान्तरेऽपि कार्यान्तरानुकूलशक्तेः सन्दिग्धतया साध्याभावांशे निश्चयरूपव्यभिचारज्ञानासम्भवात्, पक्षीयव्यभिचारसंशयान्यत्वनिवेशे च न तदापत्तिः, पक्षभिन्नसंयोगान्तरे व्यभिचारसंशयस्य प्रतिबन्धकत्वसम्भवादित्याशयेनाऽऽह । स्वतः संयोगो वेति । संयोगे संयोगधर्मानतिरिक्तधर्मस्य बाधात् प्रत्यक्षत्वमतिरिक्तत्वप्रतियोगिविशेषणम्, तथा सति शक्तेरतीन्द्रियतया तत्र विशिष्टभेदसत्त्वेन तत्समवायितायाः सन्दिग्धत्वान्न बाधः पक्षातिरिक्तघटरूपादौ व्यभिचारस्य तत्संशयस्य वारणाय संयोगधर्मेति । कालिकादिसम्बन्धेन प्रसिद्धातीन्द्रियधर्मवत्तया सिद्धसाधनवारणाय समवायीति । इत्यतः । अनुमानात् । न शक्त्यादिसिद्धिरिति । पक्षेतरत्वाद्यतिरिक्ते तत्रोपाधित्वाग्रहेण त्वन्मतसिद्धप्रतिबन्धकताकव्यभिचारज्ञानाभावादिति भावः ।

शङ्कते । निरुपाधित्वेऽपीति । अप्रयोजकत्वात् । हेतोर्गमकतौपयिकरूपशून्यत्वात् । निरुपाधित्वस्येति । त्वदभिमतस्येत्यादिः, स्वमते पक्षेतरत्वादेरेवोपाधितासम्भवाद्यथाश्रुतासङ्गतेः । तथात्वेऽपि । तादृशनिरुपाधित्वसत्त्वेऽपि । अप्रयोजकत्वे । अप्रयोजकत्वस्य त्वयाऽपि स्वीकारे । इतरेषाम् । द्रव्यत्वादिहेतुकपरिमाणादिसाध्यकानुमानानाम् । तथात्वात् । अप्रयोजकताया आवश्यकत्वात् । तथा च तादृशानुमानोपपत्तये व्यभिचारज्ञानप्रतिबन्धकतायां विशेषणान्तरप्रवेशस्यापि सम्भव इति भावः ।

(दी०) अत्र च कुत्र पक्षातिरिक्ते व्यभिचारशङ्का कश्चायं

व्यामोहो यद्व्याप्तिग्राहकदृढतरप्रमाणविरहिणां निरुपाधित्वमिति, यतस्तत्र तत्रान्ततः पक्षसपक्षैकदेशवृत्तिधर्मावच्छिन्नसाध्यव्यापकानां सपक्षैकदेशवृत्तिधर्माणामुपाधित्वं सम्भाव्यते । इत्थं च यथा नातिप्रसङ्गस्तथा तत्र तत्र वक्ष्याम इति । सत्यम्, कथकसम्प्रदायानुरोधात् कथायां सन्दिग्धोपाधित्वेन पक्षेतरो नोद्भाव्य इत्येवम्परोऽयं ग्रन्थ इत्याहुः ।

(गा०) उक्तशक्तिसाधकानुमाने सिद्धान्तिमतसिद्धप्रतिबन्धकताकव्यभिचारशङ्काविरहं स्पष्टयति । अत्र चेति । कुत्र पक्षातिरिक्ते इति । पक्षातिरिक्तकिधर्म्यन्तर्भावेणेत्यर्थः । संयोगातिरिक्ते सर्वत्रैव समवायिनि संयोगधर्मातिरिक्तधर्मिसमवायितारूपसाध्यस्य निश्चितत्वादिति भावः । पक्षेतरत्वादेरनुपाधित्वेऽपि सिद्धान्तिनां गगनं परिमाणवत् द्रव्यत्वादित्याद्यनुमानस्य निरुपाधित्वाभिमानं निराकरोति । कश्चायमिति । कः । कुत्सितः । व्यामोहः । भ्रमः । दृढतरेति । सत्तर्केत्यर्थः । पक्षसपक्षैकदेशवृत्तिधर्मेति । गगनघटान्यतरत्वादीत्यर्थः । सपक्षैकदेशवृत्तिधर्माणाम् । घटत्वादीनाम् । उपाधित्वम् । सन्दिग्धोपाधित्वम् । पक्षे साध्यव्यापकत्वसंशयस्य दुर्वारत्वात् ।

ननूक्तव्यभिचारशङ्कायाः प्रतिबन्धकत्वे पर्वतो वह्निमान् धूमादित्यादावपि वह्न्यादिसिद्ध्यभावप्रसङ्ग इत्यत आह । इत्थं चेति । तत्र तत्र । व्यभिचारादिग्रन्थे । वक्ष्याम इति । प्रकृतहेतुसाध्ययोर्व्याप्तिग्राहकतर्कसत्त्वेन धूमादौ वह्न्यादिव्याप्तिनिश्चयात्तत्र तस्य व्यभिचारसंशयायोगः, तादृशतर्कस्य व्याप्तिनिश्चयस्य च तत्संशयप्रतिबन्धकत्वादिति वक्ष्याम इत्यर्थः । आहुरित्यनेन सम्प्रदायाननुरोधेन तदुद्भावनं दुर्वारमित्यस्वरसः सूचितः ।

(चि०) सोपाधावेकत्र साध्यतदभावसम्बन्धस्य विरुद्धत्वादवच्छेदकभेदेन तदुभयसम्बन्धो वाच्यः, तथा च साधने साध्यसम्बन्धितावच्छेदकरूपमनुकूलतर्काभावोपजीवकमन्तरेणोपाधिरावश्यकः तथाऽनुकूलतर्काभावोऽप्यावश्यक इति उभयोरपि विनिग-

मर्काभावाद् दूषकत्वम् ।

(दी०) सोपाधावेकत्रेत्यादि । उपलक्षणमेतत् । व्यभिचारिण्युपाधेरवश्यम्भावमात्रे तात्पर्यम् । उपजीव्योपजीवकभावो हि न कार्यकारणभावः, असम्भवात्, व्याप्यव्यापकभावस्त्वकिञ्चित्कर एव, विशेषतस्तु ज्ञायमानदूषकतायामेकस्याविज्ञायाऽप्यन्यतरज्ञानाच्च न ज्ञाप्यज्ञापकभावः, न चानुकूलतर्कविरहादेव व्याप्तेरग्रहे कृतमुपाधिज्ञानेन, विनाऽप्यनुकूलतर्कं व्यभिचाराग्रहे व्याप्तिग्रहसम्भवादिति भावः ।

(गा०) अनुकूलतर्काभाव उपाधिज्ञानोपजीवक इति तद्दूषकतयैवोपपत्तौ उपाधेर्दूषकत्वं निर्युक्तिकमिति पूर्वपक्षे सोपाधावेकत्रेत्यादिना मूलकृत उपाधेर्दूषकताव्यवस्थापनं न सङ्गच्छते, व्यभिचारिणि साध्यतदभावसहचारयोरविरोधेनोपाधेरवश्यसत्ताया दूषकत्वाव्यवस्थापकत्वादित्यत आह । उपलक्षणमेतदिति । युक्त्यन्तरस्यैव उपाधेर्दूषकत्वसाधकत्वपरमेतदित्यर्थः ।

ननु यथाश्रुते उपाधेरवश्यम्भावस्य तद्दूषकतासाधकत्वेऽस्य तात्पर्यमित्याह । व्यभिचारिणीति । अवश्यम्भावमात्रेति । मात्रपदेन तद्दूषकतासाधकत्वव्यवच्छेदः । अनुकूलतर्काभावे उपजीव्यतायाः तद्दूषकतायां विनिगमकत्वेनोक्तत्वात् तां निराकृत्य उपाधेर्दूषकतां व्यवस्थापयति । उपजीव्योपजीवकभावो हीति । प्रकृते इति शेषः । असम्भवात् । अनुकूलतर्काभावस्याऽऽर्द्रेन्धनादिकारणत्वासम्भवात् । आकिञ्चित्करः । सम्भवन्नपि दूषकताया अविनिगमकः । उभयोरेव प्रत्येकमपरव्यापकत्वादिति भावः । विपर्ययस्य व्याप्यव्यापकभावेऽपि व्यापकस्याज्ञानदशायां व्याप्यज्ञानसत्त्वेऽनुमित्यनुत्पादनिर्वाहाय व्याप्यज्ञानस्यापि दूषकताया आवश्यकत्वादुपाध्यनुकूलतर्काभावयोर्ज्ञायमानयोर्विरोधित्वे तयोर्व्याप्यव्यापकभावः सुतरामविनिगमक इत्याह । विशेषतस्त्विति । दूषकतायामित्यत्राकिञ्चित्कर इत्यनुपपद्यते । ज्ञानाच्चेति चस्त्वर्थः । अनुकूलतर्काभावः स्वरूपसत्त्वे व्याप्त्यग्रहप्रयोजकः, उपाधिस्तु ज्ञायमानः; एवं चोपाधित्वज्ञानदशायामनुकूलतर्काभावस्य स्वरूपसतो नियततया तत

एव व्याप्तिग्रहनिर्वाहे उपाधेर्न तत्प्रयोजकत्वमित्याशङ्कां निराकरोति । न चेत्यादिना । विनाऽप्यनुकूलतर्कमिति । तथा चानुकूलतर्काभावो न स्वतो व्याप्तिग्रहप्रयोजकोऽपि तु व्यभिचारग्रहद्वारा, स च सोपाधित्वज्ञानमपेक्षत इति तद्द्वारोपाधेर्दूषकत्वं निराबाधमेवेति भावः ।

(चि०) अन्ये तु यद्व्यावृत्त्या यस्य साधनस्य साध्यं निवर्तते स धर्मस्तत्र हेतावुपाधिः, स च धर्मो यस्याभिमतपक्षे साध्यसाधनसम्बन्धाभावः; यथा आर्द्रेन्धनवत्त्वम् । व्यावर्तते हि तद्व्यावृत्त्या धूमवत्त्वमयोगोलके । अत एव तत्र साध्यसाधनसम्बन्धाभावः पक्षे । एवं भावत्वव्यावृत्त्या ध्वंसे जन्यत्वानित्यत्वयोस्सम्बन्धो निवर्तमानः पक्षधर्मताबलादनित्यत्वाभावमादाय सिद्ध्यति, तथा वायावुद्भूतरूपवत्त्वं निवर्तमानं बहिर्द्रव्यत्वे सति प्रत्यक्षत्वं निवर्तयत् प्रत्यक्षत्वाभावमादाय सिद्ध्यति, तथा चोभयत्रापि पक्षे साध्याभावसिद्ध्या साध्यसाधनसम्बन्धाभावोऽस्तीति । अत एव बाधानुन्नीतपक्षेतरस्यानुपाधित्वं स्वव्याघातकत्वेन तद्व्यतिरेकस्य साध्याव्यावर्तकत्वादिति ।

(दी०) यद्व्यावृत्त्येति । अत्र पक्ष इति पूरणात्पक्षनिष्ठसाध्यव्यावृत्त्युन्नायकव्यावृत्तिप्रतियोगित्वमर्थः । सत्प्रतिपक्षोन्नायकत्वं चात्र दूषकताबीजम् । तत्र चाप्रयोजकत्वात्साधनाव्यापकत्वं नोक्तम् । साधनस्य सोपाधित्वव्युत्पादनायैव केवलं यस्य साधनस्येति । यद्वा साधनस्येत्यनन्तरमधिकरणे इति पूरणात् साधनवन्निष्ठसाध्यव्यावृत्त्युन्नायकव्यावृत्तिप्रतियोगित्वमर्थः, तथा च यद्व्यभिचारित्वेनेत्यादेरुपदर्शितार्थनिष्कर्ष

एवायम् । शुद्धस्य साधनावच्छिन्नस्य च साध्यस्य व्यापकानामुपाधीनां पक्षे क्वचित्साधनवति वा साध्याभावस्यानुमापनप्रकारमाह । स चेत्यादि । साधनवत्त्वेन ज्ञायमाने पक्षे साध्यसाधनसम्बन्धाभावासिद्ध्यनपक्षधर्मताबलात्साध्याभावमादायैव पर्यवस्यति ।

(गा०) पर्वतो वह्निमान् धूमादित्यादौ ह्रदादौ साध्याभावोन्नायकव्यतिरेकप्रतियोगिनि वह्निसामग्र्यादावतिव्याप्तिवारणाया-ऽऽह । अत्रेति । पक्षे यद्व्यावृत्त्या साध्यं निवर्तेत इत्यत्र निवृत्तिरुन्नयनं विषयोऽभावः, प्रतियोगित्वमाख्यातार्थः, तृतीयायाः स्वरूपयोग्यत्वमर्थः, तथा च यदभावप्रयुक्तपक्षविशेष्यकोन्नयनविषयाभावप्रतियोगि साध्यम्, पक्षविशेष्यकसाध्याभावोन्नयनयोग्याभावप्रतियोगी य इत्यर्थः पर्यवसितः, तादृशयोग्यता च पक्षवृत्तित्वघटितेत्याशयेन व्याचष्टे । पक्षनिष्ठेति । पक्षनिष्ठत्वमुन्नायकव्यावृत्तिविशेषणम्, उन्नायकत्वं च व्याप्यत्वमेव, तथा च पक्षवृत्तितावच्छेदकरूपेण साध्याभावव्याप्यो योऽभावस्तत्प्रतियोगित्वमित्यर्थः, तेनायोगोलकं धूमवद्वह्निरित्यादौ पक्षनिष्ठसाध्याभावस्य ह्रदादावुन्नायकव्यतिरेकप्रतियोगिनि वह्न्यादौ नातिव्याप्तिः, न वा पर्वतो वह्निमान् धूमादित्यादौ ह्रदादिवृत्तित्वविशिष्टत्वेन वह्न्याद्यभावव्याप्यव्यतिरेकस्य प्रतियोगिनि महानसत्वादौ । अत्र साधनाव्यापकत्वानुपादानात् साध्यसाधनोभयव्यापकपक्षावृत्तावतिप्रसङ्ग इत्याशङ्कां तस्य लक्ष्यत्वेन परिहरति । सत्प्रतिपक्षेति । यस्य साधनस्येति भागस्य लक्षणाप्रवेशेऽपि तदुक्तिं सार्थकयति । साधनस्येति । सोपाधित्वेति । सोपाधिव्यवहारविषयत्वप्रयोजकोपाधिसम्बन्धलाभायेत्यर्थः । साध्यसाधनसम्बन्धकथनेन तदभावसाधकव्यतिरेकप्रतियोगिन्युपाधावपि तस्य परम्परासम्बन्धलाभादिति भावः । तदंशस्य लक्षणप्रवेशनिर्वाहाय कल्पान्तरमनुसरति । यद्वेति । साधनवन्निष्ठेत्यादिरुक्तरीत्याऽर्थो निष्कर्षणीयः । उपदर्शितेति । वस्तुतस्तु इत्यादिनाऽस्मद्दर्शितनिष्कृष्टार्थ इत्यर्थः । तथा च न पौनरुक्त्यदोषः, अस्य यथाश्रुतपरित्यागेन तल्लक्षणविवरणरूपत्वादिति भावः ।

शुद्धसाध्यव्यापकार्द्रेन्धनोपाधेः साक्षात्साध्याभावोन्नायकतयैव ल-
क्षणसमन्वये अत एवेत्यादिना शुद्धसाध्याभावसाधकतया
साध्यसाधनसम्बन्धाभावोन्नायकत्वसम्पादनं व्यर्थमित्याशङ्कां नि-
रस्यति । शुद्धस्येति । साधनावच्छिन्नस्येति । पक्षधर्माव-
च्छिन्नसाध्यव्यापकस्याभावात् साध्यसाधनसम्बन्धाभावनिश्चयास-
म्भवेन वक्ष्यमाणप्रकारेण साध्याभावोन्नायकत्वं न तस्येति साध-
नावच्छिन्नस्येत्युक्तम् । सत्प्रतिपक्षोन्नायकतया उपाधितापक्षे पक्षा-
व्यापकविपर्ययस्य उपाध्याभासतया पक्षतावच्छेदकसामानाधिक-
रण्येन साध्यसिद्धेरुद्देश्यत्वे पक्षतावच्छेदकावच्छेदेन साध्याभा-
वोन्नयनमेवोपाधितानिर्वाहकमतः पक्ष इति सामान्यत उक्तम् । व्य-
भिचारोन्नायकतया उपाधितापक्षे साधनवत्त्वावच्छेदेन साध्याभा-
वोन्नयनमप्रयोजकम्, यत्किञ्चित्साधनवति साध्याभाववत्त्वस्यैव
व्यभिचारत्वादतः क्वचित् साधनवतीत्युक्तम् । एकमुन्नयनप्रकारम् ।
साध्यसाधनसम्बन्धाभावं साध्यमाने पक्षधर्मताबलात् साध्याभाव-
साधकत्वरूपम् ।

मूले साध्यसाधनसम्बन्धाभावः साध्यसाधनयोरेकविशिष्टाप-
राभावः । पक्ष इत्यस्य उत्तरकल्पे साधनवतीत्येवार्थः । एवमग्रेऽपि ।

साध्यसाधनसम्बन्धाभावसाधकतयाऽपि कथं साध्याभावसा-
धकत्वमित्यत आह दीधितौ । साधनवत्त्वेनेति ।

(दी०) ननु शुद्धसाध्याभावोन्नायकस्यार्द्रेन्धनवत्त्वादेः
कथं साध्यसाधनसम्बन्धाभावोन्नायकत्वमत आह । आर्द्रेन्धने-
ति । अत एवेति । साध्याभावसत्त्वे साध्यसाधनसम्बन्धाभाव-
स्याऽऽवश्यकत्वात्तदुन्नायकत्वमक्षतमिति भावः । द्रव्यत्वे इति ।
द्रव्यत्वस्य हेतुत्वाभिप्रायेण । अयञ्च प्रायशस्सम्भवतीत्यभिहितः ।
वस्तुतः प्रकारभेदेऽपि न क्षतिः । तथा च शुद्धसाध्यव्यापको-
पाधिस्थले शुद्धसाध्याभावः अवच्छिन्नव्यापकस्थले त्ववच्छे-
दकवत्त्यवच्छिन्नसाध्याभावोऽवच्छेदकवत्त्वविशेषितेन चोपाधि-
विरहेण शुद्धसाध्याभावस्साधनीयः, अत एव गगनादौ स्पर्श-

वत्त्वेन प्रमेयत्वेन च प्रत्यक्षत्वे साध्ये बहिर्द्रव्यत्वावच्छिन्नसाध्यव्यापकस्योद्भूतरूपस्य तादृशसाध्याभावोन्नयनहेतुत्वमिति । पक्षे यद्व्यावृत्त्या यस्य साधनस्य सम्बन्धि यत्साधनाविशिष्टं साध्यं निवर्तते इत्यर्थस्तु यथाश्रुतग्रन्थस्वरससिद्धः, तत्र दूषकताबीजं यदि सत्प्रतिपक्षोन्नायकत्वं तदा साधनानुप्रवेशो व्यर्थः, जलं द्रव्यं गन्धवत्त्वादित्यादौ पृथिवीत्वादावतिव्याप्तिश्च ।

(गा०) शुद्धसाध्यव्यापकाभावस्य नावच्छिन्नसाध्याभावसाधकत्वमित्यभिमानविजृम्भितशङ्कावारकतया यथाऽऽर्द्रेन्धनवत्त्वमित्यादिग्रन्थमवतारयति । नन्विति । अत एवेत्यादिना साध्याभावस्य साध्यसाधनसम्बन्धाभावप्रयोजकत्वमुक्तम्, तावता तत्सत्त्वे तत्सत्त्वावश्यकत्वलाभादुक्तशङ्कानिराकरणमिति स्फुटयति । अत एवेतीति । तदुन्नायकत्वमित्यस्य बाधव्यभिचारयोरप्रसक्त्येत्यादिः । द्रव्यत्वे सति प्रत्यक्षत्वं निवर्तयदित्यस्य साध्यसाधनोभयसम्बन्धाभावसाधनपरत्वाभावे साध्याभावसिद्ध्या साध्यसाधनसम्बन्धाभावोऽस्तीत्यग्रिममूलस्य यदभावात् पक्षे साध्यसाधनसम्बन्धाभाव इत्यस्य च विरोधः, प्रत्यक्षस्पर्शाश्रयत्वस्य हेतुत्व च तत्परत्वासम्भव इत्यतो द्रव्यत्वस्येति ।

मूलकृता तथा चेत्यादिना तदुभयसम्बन्धाभावस्याबाधो दर्शितः । साध्याभावसिद्ध्या । साध्याभावस्य प्रमितत्वेन ।

मूलकृतोऽप्युन्नयनप्रकारैक्ये निर्बन्धमाह । अयं चेति । सत्प्रतिपक्षोन्नायकस्य उपाधितामते पक्षे साधनस्यासत्त्वे तत्र साधनवत्त्वानिश्चयादुपाध्यभावेनोभयसम्बन्धाभावसाधने साध्याभावपर्यवसानासम्भवात् प्रायश इत्युक्तम् । प्रकारभेदं दर्शयति । तथा चेति । उक्तप्रकारसम्भवस्थलं दर्शयति । अत एवेति । स्पर्शवत्त्वेन प्रमेयत्वेन चेति । प्रथमे उपाध्यभावेन साध्यसाधनसम्बन्धाभावसाधने शुद्धसाध्याभावापर्यवसानम्, स्पर्शरूपसाधनाभावाबाधेन पक्षधर्मताबलाभावात्, द्वितीये तद्व्याप्तिविरहेण साध्यसाधनसम्बन्धे प्रवेश्य उक्तलक्षणव्याख्यानं दूषयितुमाह । पक्ष इति । गौरत्वाभाववान् मिश्रातनयत्वादित्यादौ शाकपाकजत्वासु-

पाधेः साधनसामानाधिकरण्योपलक्षितसाध्यव्यापकतया न स्वव्यतिरेकेण तादृशसाध्याभावसाधकत्वम्, अतो यत्साधनविशिष्टमिति वर्णितम्। सत्प्रतिपक्षोन्नायकत्वम् तदुन्नायकतामात्रम्। लक्ष्यतानियामकमिति शेषः। साधनानुप्रवेशो व्यर्थ इति। शुद्धसाध्याव्यापकस्यापि पक्षे उक्तरीत्या शुद्धसाध्याभावोन्नायकतया तदनन्तर्भावेऽपि लक्षणसमन्वयसम्भवादिति भावः। अतिव्याप्तिरिति। पक्षे साध्यसत्त्वेन सत्प्रतिपक्षानुन्नायकत्वात् साधनावच्छिन्नसाध्यव्यापकतया यथोक्तलक्षणसत्त्वाच्चेति भावः।

(दी०) अथासिद्ध्युन्नायकत्वं तदा साध्यानुप्रवेशो निरर्थकः, जलं गन्धवत् द्रव्यत्वादित्यादौ पृथिवीत्वादावतिप्रसङ्गश्च। अथ यथासम्भवमसिद्धिसत्प्रतिपक्षस्य चोन्नायकत्वं तदा वायुः स्नेहवान् गन्धवत्त्वादित्यादौ जलत्वपृथिवीत्वादावतिव्याप्तिः, साधनविशिष्टसाध्याप्रसिद्धेः। साध्यसाधनवत्त्वप्रकारकबोधविरोधिबुद्धिकाभावोन्नायकत्वमर्थः, विरुणद्धि चैकैकाभावबुद्धिरुभयवत्ताबोधम्, विरुद्धस्थले तु भ्रमादिरूपतथाविधबोधप्रसिद्ध्या समन्वय इत्यपि वदन्ति।

(गा०) असिद्ध्युन्नायकत्वम्। असिद्ध्युन्नायकतामात्रम्। एवं सति साधनानुप्रवेशसार्थक्यं भवति, उक्तस्थलीयपृथिवीत्वादेः स्वरूपासिद्ध्युन्नायकतया लक्ष्यस्य सङ्ग्राहकत्वात्। साध्यानुप्रवेश इति। आत्मा प्रत्यक्षः स्पर्शाश्रयत्वादित्यादौ शुद्धसाधनाव्यापकस्योद्भूतरूपादेरभावेन पक्षधर्मविभुत्वादिविशिष्टेन साधनाभावोन्नयनसम्भवेन तदनन्तर्भावेऽपि लक्षणसमन्वयसम्भवात्, पृथिवीत्वादौ पक्षे साधनसत्त्वेन स्वरूपासिद्ध्यनुन्नायकतयाऽलक्ष्ये साधनावच्छिन्नसाध्यव्यापकतया यथोक्तलक्षणसत्त्वेनातिप्रसङ्गः। प्रत्येकोन्नायकेऽपि यथोक्तलक्षणसत्त्वादुभयोन्नायकत्वस्य लक्ष्यतानियामकत्वेऽतिव्याप्तिरिति यथासम्भवमित्युक्तम्, तथा चैकोन्नायकतयैव लक्ष्यतया नोक्तातिव्याप्तेरवकाशः, तदुपाधिसङ्ग्राहकतया चोभयानुप्रवेशसार्थक्यमिति भावः। जलत्वपृथिवीत्वादाविति। प्रथमस्य सत्प्रतिपक्षोन्नायकतया द्वितीयस्यासिद्ध्युन्नायकतया ल-

ध्यत्वात् इति भावः । साधनविशिष्टसाध्यस्याभावो न प्रविष्टः, अपि तु द्वयोरभावद्वयमनुगतरूपेणेति नोक्ताऽव्याप्तिरिति वदतां मतमाह । साध्येति । साध्यसाधनोभयप्रकारकबोधविरोधिनी बुद्धिर्यस्य तादृशाभावोन्नायकत्वमित्यर्थः । यत्किञ्चिदेकधर्मिकतादृशोभयप्रकारकलौकिकसन्निकर्षाद्यजन्यज्ञानसामान्यप्रतिबन्धकतावच्छेदकतद्धर्मिविशेष्यतानिरूपकप्रकारताश्रयाभावोन्नायकत्वं विवक्षितम् । पदार्थान्तरसहिततदुभयप्रकारकबोधविरोधितावच्छेदकत्वमन्याभावेऽपीति तदुन्नायकेऽतिव्याप्तिवारणाय सामान्येत्युक्तम् । नानाधर्मिकोभयप्रकारकज्ञानसामान्यप्रतिबन्धकतावच्छेदकत्व विशेष्यभेदभिन्नाया न कस्या अपि साध्याभावादिप्रकारताया इति प्रतिबध्यज्ञाने यत्किञ्चिदेकधर्मिकत्वनिवेशः । विशिष्टवह्न्यादेर्यत्र साध्यता साधनता वा तत्र साध्यादौ तद्विशेषणाभावग्रहस्यापि विशिष्टसाध्यादिप्रकारकज्ञानविरोधितया प्रकृतपक्षे तदुन्नायकस्य वारणाय तद्धर्मिविशेष्यतानिरूपकत्वं प्रकारताविशेषणम् । प्रकृतपक्षे तादृशाभावोन्नायकत्वविवक्षयाऽन्यत्र तदुन्नायकेऽनुपाधौ नातिप्रसङ्गः ।

ननु उभयवत्ताज्ञानप्रतिबन्धकमुभयाभावज्ञानम्, तथा सति च यत्र एकसम्बन्धेनैव साध्यसाधनभावः तत्र तत्सम्बन्धेनोभयप्रकारकज्ञानविरोधितत्सम्बन्धावच्छिन्नोभयाभावोन्नायकतया सत्प्रतिपक्षानुन्नायकसङ्ग्रहेऽपि यत्र भिन्नसम्बन्धेन तथात्वं तत्र विभिन्नतत्सम्बन्धेन साध्यसाधनोभयप्रकारकज्ञानं प्रति नैकसम्बन्धावच्छिन्नोभयाभावज्ञानं प्रतिबन्धकमिति कीदृशाभावोन्नायकतया लक्षणं सङ्गमनीयमित्याशङ्कां निराचिकीर्षुः साध्यसाधनोभयस्य विभिन्नतत्सम्बन्धावगाहिज्ञानस्याधिकं त्विति न्यायेन प्रत्येकसम्बन्धावच्छिन्नप्रत्येकाभावज्ञानप्रतिबध्यत्वमपीति तदुन्नायकत्वमेवोभयविरोध्यनुगमकम्, अत उभयत्वाप्रकारकोभयज्ञाने उभयाभावज्ञानस्याविरोधित्वेऽपि न क्षतिरिति समाधत्ते । विरुणद्धीति । विरुद्धसाध्यसाधनयोरेकधर्मिणि प्रमारूपज्ञानासम्भवेऽपि भ्रमरूपस्य संशयरूपस्य वा उभयज्ञानस्य विरोधित्वेनैव तत्राभावद्वयानुगम इत्याह । विरुद्धस्थले चेति । अत्र च यादृशविरुद्धस्य न कुत्रापि धर्मिणि भ्रमः संशयो वा प्रसिद्धस्तदेकतरसाध्यकापरहेतुकोपाध्यावव्याप्तिः, यत्किञ्चिदेकधर्मिणि साध्यप्रकारकं यत्किञ्चिदेकधर्मिणि च साधनप्रकारक-

मिति रीत्या निवेशे भिन्नधर्मिकतदुभयप्रमामादाय वृत्तिमत्साध्यसाधनकोपाधिसङ्कहेऽपि साध्यतावच्छेदकादिसम्बन्धेनावृत्तिसाध्यादिके तेन तेन सम्बन्धेनोभयप्रकारकस्य भिन्नधर्मिकस्यापि प्रमारूपज्ञानस्याप्रसिद्ध्या तत्र भ्रमाप्रसिद्ध्याऽव्याप्तिः, एवं साध्याभावोन्नायकताया एव मूलकृतोपादानादसिद्ध्युन्नायकस्य लक्ष्यत्वं न तदभिप्रेतमित्यादिकमस्वरसबीजम् ।

(दी०) यत्तु साध्यावृत्तित्वे सति साधनावृत्तिर्यस्तच्छून्यत्वेन साध्यसाधने अनुगमय्य तदभावोन्नायकत्वं वाच्यमिति तन्न । यत्र भिन्नाभिन्नसम्बन्धेन साध्यसाधनभावस्तत्र सद्धेतुके हेतुतासम्पादकेन सम्बन्धेन साध्यस्य साध्यतासम्पादकेन च हेतोरन्यत्रापि च यथा कथञ्चित्सम्बन्धेनोभयस्याभावोन्नायकेऽतिव्याप्तेः । किञ्च तादृशधर्मशून्यत्वेन रूपान्तरेण वा तदभावस्योन्नायकत्वमभिमतम् ? नाद्यः, साध्यसाधनान्यतरवति तदसम्भवात् । नान्त्यः, धूमेन पर्वते वह्नौ साध्ये महानसीयवह्नित्वाद्यवच्छिन्नाभावोन्नायकमहानसत्वादावतिव्याप्तेः ।

(गा०) साध्यसाधने अनुगमय्य तदभावत्वेनाभावद्वयानुगमनं दूषयितुमुपन्यस्यति । यत्त्विति । यत्र प्रमेयमात्रस्य साध्यता साधनता वा तत्र साध्यसाधनयोस्तदन्यान्यत्वेनानुगमो न सम्भवति, प्रमेयभिन्नाप्रसिद्धेरिति तत्तद्वृत्तिशून्यत्वेनानुगमः । प्रमेयावृत्ति चावृत्त्येव प्रसिद्धम् । यत्रेति । पर्वतो वह्निमान् धूमसंयोगादित्यादावित्यर्थः । सद्धेतुक इति । अभावोन्नायक इत्यनेनान्वितम् । हेतुतासम्पादकेन सम्बन्धेनाभावस्य विवक्षणे तादृशेन समवायादिना साध्यस्य वह्न्यादेरभावस्योन्नायके वह्न्यवयवत्वादौ, साध्यतासम्पादकेन सम्बन्धेनाभावस्य विवक्षणे तादृशेन संयोगादिना हेतोर्धूमसंयोगादेरभावस्योन्नायके महानसत्वादौ, यत्किञ्चित्सम्बन्धेनाभावस्य विवक्षणे च तत्तत्सम्बन्धेन तत्तदभावस्योन्नायके तत्र तत्रैवातिव्याप्तिरित्यर्थः । अभावस्य प्रतियोगितावच्छेदकं विकल्प्यापि दूषयति । किञ्चेति । तादृशधर्मेति । धर्मपदं स्वरूपार्थकम्, तादृशान्यतरत्वावच्छिन्नप्रतियोगिताकस्य तादृशान्यतरत्वाभयप्रतियोगिताक-

स्य वाऽभावस्योन्नायकत्वं विवक्षितमित्यर्थः । अन्यतरत्वाविति । पक्षे । तदसम्भवात् । अन्यतरत्वावच्छिन्नाभावस्य बाधेनोन्नायकत्वासम्भवात् । तथा च ह्रदो वह्निमान् द्रव्यत्वादित्यादौ वह्निसामग्र्यादेः, पर्वतो वह्निमान् महानसत्वादित्यादौ च व्यञ्जनवत्त्वादेः सत्प्रतिपक्षस्यासिद्धेश्च उन्नायकस्यासङ्ग्रह इति भावः ।।

(दी०) यत्र पक्षावृत्तित्वे सति ये साधनवदवृत्तयस्तच्छून्यत्वेन पक्षसाधनवन्ताविति प्रमाविशेष्यत्वेन वा द्वावनुगतीकृत्य तत्र साध्यव्यावर्त्तकत्वमर्थमाहुः । तत्र यदि सत्प्रतिपक्षव्यभिचारयोरन्यतरमात्रोन्नायकत्वं दूषकताबीजम् तदा द्वयोरनुगमनमफलम् । अथ यथासम्भवमुभयोरुन्नायकत्वम् तदाऽवृत्तिहेतुके सत्प्रतिपक्षोन्नायकेऽतिव्याप्तिः ।

(गा०) सत्प्रतिपक्षव्यभिचारयोरुन्नायकसङ्ग्रहाय उन्नयनपक्षभूतपक्षसाधनवृत्त्योरनुगतरूपेणान्तर्भावं दर्शयति । यत्रेत्यादिना । प्रमेयत्वस्य यत्र पक्षतावच्छेदकता साधनता वा तत्राप्रसिद्धिभयेन तत्तदन्यान्यत्वोपेक्षा । पक्षसाधनवन्ताविति । इतरविशेष्यकसमूहालम्बनव्यावृत्ततद्व्यक्तित्वेन प्रमाया निवेशो बोध्यः, अतः पूर्वापेक्षया लाघवम्, तादृशसमूहालम्बनव्यावृत्तस्य पूर्वापेक्षया लघुरूपान्तरस्य दुर्वचत्वात् । साध्यव्यावर्त्तकत्वम् । साध्याभावोन्नायकत्वम् । अर्थम् । उक्तलक्षणस्यैवेति शेषः । सत्प्रतिपक्षेति । सत्प्रतिपक्षोन्नायकत्वमात्रम् । व्यभिचारोन्नायकत्वमात्रमित्यर्थः । अवृत्तिहेतुके इति । ह्रदो वह्निमान् गगनादित्यादिस्थले वह्निसामग्र्यादावित्यर्थः । अव्याप्तिः, साधनवतोऽप्रसिद्ध्या ।

(दी०) यदपि च पक्षतावच्छेदके साधने च न वर्तते यत्तच्छून्यस्य पक्षतावच्छेदकसाधने इति प्रतीतिविशेष्यस्य वाऽऽश्रये साध्यव्यावर्त्तकत्वमर्थमाहुः । तत्रापि किं येन सम्बन्धेन हेतुता तेन, अथ येन पक्षतावच्छेदकं पक्षे वर्तते तेन, उत येन केनचित् तादृशधर्माश्रये साध्यव्यावर्तकत्वमभिमतम् ? नाद्यः, जलं वह्निमद्धूमादित्यादौ जलपक्षकवह्निसाध्यके संयोगसम्बन्धेन

साधने धूमादौ वह्निसामग्र्यादावव्याप्तेः; पक्षतावच्छेदकस्य संयोगेनावृत्तेः, संयोगेन धूमवतश्च वह्निमत्त्वनियमात् । न द्वितीयः, घटो जातिमान्मेयत्वादित्यादौ समवायित्वादावव्याप्तेः, वह्निमत्पर्वतपक्षके पर्वतो वह्निमान् धूमादित्यत्र धूमावयवे वह्निव्यावर्तके वह्निसामग्र्यादावतिव्याप्तेश्च । अत एव नेतरोऽपि, इत्यादि स्वयमूहनीयमिति कृतं पल्लवितेन ।

(गा०) साधनपक्षतावच्छेदकान्यतराश्रयत्वेनोभयोर्निवेशे साधनवतोऽप्रसिद्धावपि नान्यतराश्रयाप्रसिद्धिरित्याशयेन तत्र साध्याभावोन्नायकत्वार्थकत्वेन तल्लक्षणव्याख्यामुपन्यस्य दूषयति । यद्यपीत्यादि । पक्षतावच्छेदकमिति । प्रमेयमात्रस्य यत्र पक्षतावच्छेदकता साधनता वा तत्सङ्ग्रहानुरोधेन तदन्यान्यत्वमुपेक्षितम् । पक्षतावच्छेदकसाधने इति प्रथमाद्विवचनम् । तेनेति । द्वयं तादृशधर्माश्रय इत्यन्वयि । येन पक्षतावच्छेदकमिति । येन सम्बन्धेन पक्षतावच्छेदकावच्छिन्नं साध्यं साधनीयमित्यर्थः । वह्निसामग्र्यादौ । सत्प्रतिपक्षोन्नायके । संयोगेनावृत्तेरिति । तथा च जलरूपपक्षस्य साधनशून्यस्यान्यतराश्रयत्वेनोपादानासम्भवात् तत्र साध्याभावोन्नायकतया न लक्षणगमनसम्भव इति भावः । साधनतावच्छेदकसम्बन्धेन साधनवतः प्रसिद्धावपि साध्याभावस्य तत्र बाधेनोन्नायनं न सम्भवतीत्याह । संयोगेन धूमवतश्चेति । समवायित्वादौ । व्यभिचारोन्नायके । अव्याप्तेरिति । पक्षतावच्छेदकताघटकसमवायेन मेयत्वाश्रयाप्रसिद्धेः, पक्षतावच्छेदकघटत्वाश्रयस्य च साध्यवत्त्वनियमादिति भावः । अतिव्याप्तिमप्याह । वह्निमदिति । पक्षस्य साध्यशून्यत्वे वह्निसामग्र्यादिः सत्प्रतिपक्षोत्थापकतया लक्ष्य एव स्यादिति वह्निमत्पर्वतपक्षक इत्युक्तम् । धूमावयवे । पक्षतावच्छेदकताघटकसमवायेनान्यतरान्तर्गतसाधनाश्रये । अत एव । यत्किञ्चित्सम्बन्धेन धूमावयवादेर्धूमाद्याश्रयतया तत्र साध्यव्यावर्त्तकवह्निसामग्र्यादावतिव्याप्तेरेव ।

(चि०) यत्तूपाधिमात्रस्य लक्षणं व्यतिरेकिधर्मत्वं पक्षेतरोऽपि क्वचिदुपाधिः, तत्तदुपाधेस्तु

तत्तत्साध्यव्यापकत्वे सति तत्तत्साधनाव्यापकत्वम् । न च वह्निधूमसम्बन्धोपाधिः पक्षेतरत्वं स्यादिति वाच्यम् । आपाद्याप्रसिद्धेरिति । तन्न । अनुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकमुपाधित्वमिह निरूप्यम् । तच्च न व्यभिचारितत्वम्, अतिप्रसङ्गात्, विशेषलक्षणत्वे तु वह्निधूमसम्बन्धे पक्षेतरत्वस्योपाधित्वप्रसङ्गाच्च ।

(गा०) मूले व्यतिरेकिधर्मत्वमिति । तत्सम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकत्वे सति तत्सम्बन्धावच्छिन्नवृत्तिमत्त्वावच्छेदको यो धर्मस्तद्वत्त्वं तेन सम्बन्धेन तद्रूपेणोपाधित्वमित्यर्थः, अतो द्रव्यत्वाद्यवच्छिन्नव्यतिरेकप्रतियोगित्वस्य यत्किञ्चित्सम्बन्धावच्छिन्नतत्प्रतियोगित्वस्य वा ऽव्यावर्त्तकत्वेऽपि न क्षतिः । संयोगादिसम्बन्धेन गुणत्वगुणघटोभयत्वाद्यवच्छिन्नस्योपाधितावारणाय विशेष्यदलम् । तत्त्वुपाधेस्तु । तत्तद्रूपावच्छिन्नहेतुकोपाधेस्तु । लक्षणमित्यनुषज्यते । तत्तत्साध्येति । तत्तद्रूपावच्छिन्नसाध्यसाधनव्यापकत्वाव्यापकत्वावच्छेदकरूपवत्त्वमित्यर्थः । पक्षेतरत्वं वह्निधूमसम्बन्धोपाधिः स्यादिति योजना । वह्निधूमसम्बन्धोपाधिः । वह्नित्वावच्छिन्नसाध्यकधूमत्वावच्छिन्नहेतुकोपाधिः ।

(दी०) आपाद्याप्रसिद्धेः । आपाद्यस्य वह्निव्यापकत्वे सति धूमाव्यापकत्वस्य अप्रसिद्धेः । अनुमितीति । अस्मदुक्तं व्यभिचारोन्नायकत्वं तदुन्नयनस्वरूपयोग्यत्वं तद्व्याप्तिपक्षधर्मतारूपम् पर्यवसितसाध्यव्यापकत्वादिकं चानुमितिप्रबन्धकज्ञानविषयतावच्छेदकमेवेति भावः । ननु सामान्यलक्षणमितरव्यावृत्त्योपयिकम्, विशेषलक्षणं तु दूषकतायामुपयुज्यते इत्यत्राऽऽह । विशेषेति ।

(गा०) तत्तत्साध्यव्यापकत्वे सति तत्तत्साधनाव्यापकत्वस्य तत्तत्साध्यसाधनकोपाधिव्यवहारविषयतावच्छेदकत्वमुपगच्छता वह्निव्यापकत्वे सति धूमाव्यापकत्वस्य वह्निसाध्यकधूमसाधनकोपाधिव्यवहारविषयतावच्छेदकत्वोपगमात् तस्य तद्व्याप्यतया वह्नि-

व्यापकत्वे सति धूमाव्यापकत्वेन तथाविधोपाधिव्यवहारविषयतावच्छेदकवत्त्वापत्तिरभिमता, एकस्यैव भिन्नरूपेणापाद्यापादकभावाविरोधादित्याशयेनापाद्याप्रसिद्धिं दीधितिकृद्याचष्टे । आपाद्यस्येति । धूमाव्यापकत्वस्य । धूमाव्यापकत्वरूपतादृशव्यवहारविषयतावच्छेदकस्य । अप्रसिद्धेः । तादृशावच्छेदकत्वेनापि क्वचित् प्रसिद्धिविरहात् ।

मूले आपाद्येत्युपलक्षणम्, उक्तधर्माप्रसिद्ध्या आपादकाप्रसिद्धिरपि द्रष्टव्या । तादृशव्यवहारविषयत्वापादनेऽपि उक्तस्यापादकत्वे आपादकाप्रसिद्धिः । भ्रान्तस्य तथा व्यवहारादिष्टापत्तिः । यथार्थतादृशव्यवहारविषयत्वापादने आपाद्याप्रसिद्धिरपि । व्यवहारस्य याथार्थ्यापादने वह्निव्यापकत्वसहितधूमाव्यापकत्वरूपव्यवहारविषयतावच्छेदकत्वाक्षिपकत्वस्यैवापादकत्वेनोपगन्तव्यतया आपादकाप्रसिद्धिर्दुर्वारेत्यवधेयम् । एतेन पक्षेतरत्वे वह्निव्यापकत्वे सति धूमाव्यापकत्वरूपस्याऽऽपादकस्यापि उक्तलक्षणकर्त्राऽनुपगमात्तस्याऽऽपत्त्यप्रसक्त्याऽऽपाद्याप्रसिद्ध्या तन्निराकरणासङ्गतिरिति परास्तम् ।

ननु व्यतिरेकिधर्मत्वस्यैव सिद्धान्तिनिरुक्तव्यभिचारोन्नायकत्वादिज्ञानस्यापि स्वतो व्यभिचारज्ञानद्वारा वाऽनुमित्यप्रतिबन्धकत्वेन सिद्धान्तिनिरुक्तरूपस्यापि न यथोक्तरूपतेति तुल्यानुयोग इत्यत आह । अस्मदुक्तमिति । तच्च व्याप्तिपक्षधर्मतारूपम् । साध्यव्यभिचारव्याप्यत्वे सति साधनरूपपक्षवृत्तितारूपम् । अनुमितिप्रतिबन्धकेत्यादिनाऽन्वयः । तस्य तथात्वं च व्यभिचारानुमितिजनकज्ञानविषयत्वावच्छेदकतया पर्यवसितसाध्यव्यापकताघटितोक्तरूपस्यापि उपाधिव्यभिचारे पर्यवसितसाध्यव्यभिचारव्याप्त्यादिग्राहकज्ञानविषयतावच्छेदकतया पर्यवसितसाध्यव्यभिचारासिद्धेरेव पक्षधर्मताबलेनानुमितिविरोधिशुद्धसाध्यव्यभिचारसिद्धिरूपत्वादित्यवधेयम् ।

नन्वस्यापि वादिनो विशेषलक्षणमनुमितिविरोधिज्ञानविषयतावच्छेदकमित्येतन्मतेऽपि न दोष इत्याशङ्कायां विशेषलक्षणे दोषमवतारयति । नन्वित्यादि । दूषकतायाम् । अनुमितिप्रतिबन्धकव्यभिचारज्ञानजनने ।

मूले विशेषलक्षणत्वे इति । उक्तविशेषधर्मस्य लक्षणत्वे । अनु-

मितिप्रतिबन्धकज्ञानविषयतावच्छेदकत्वे स्वीकृते चेत्यर्थः । वह्नि-धूमेति । पक्षेतरत्वे वह्निसाध्यकधूमहेतुकानुमितिप्रतिबन्धकज्ञान-विषयतावच्छेदकरूपत्ववत्त्वापत्तेरित्यर्थः ।

(दी०) यथाश्रुते ऽवच्छिन्नसाध्यव्यापकोपाध्यव्याप्त्या यत्किञ्चिद्रूपावच्छिन्नसाध्यव्यापकत्वमेव वक्तव्यम्, तथा च वह्निना धूमस्य धूमेन वह्नेर्वा साधने पक्षेतरस्य तद्रूपज्ञानादनुमितिप्रतिबन्धापत्तिरित्यर्थः । व्यवहारौपयिकत्वे च तत्रोपाधिव्यवहारापत्तिः, पर्यवसितेत्याद्यभिधाने चास्य न प्रवेश इति भावः । व्यवहारौपयिकम् । स्वव्यभिचारेण साध्यव्यभिचारोन्नायकत्वम् । लक्षणं तु तत्तत्साध्यसमानाधिकरणत्वे सति तत्तत्साधनाव्यापकत्वं साध्यसाधनभेदभिन्नमेव । वस्तुतो व्यभिचारिणस्साधनस्यैवानुप्रवेशाच्च नातिप्रसङ्गः । न च रूपेण गुरुत्वे साध्ये पृथिवीत्वाभावादेरुपाधितापत्तिः, गुरुत्वव्यभिचारिरूपव्यक्तेस्तत्साध्यत्वात् तदव्याप्यरूपव्यक्तेश्च गुरुत्वाव्यभिचारादिति । दूषणतौपयिकं तु यथासम्भवमननुगतमेवेति मतमिदं परे परिष्कुर्वन्ति । तन्न । तथा हि साध्यसाधनव्यक्तिस्वरूपगर्भं नोपाधित्वम्, अपि तु साध्यतावच्छेदकसाधनतावच्छेदकधर्मगर्भम्, तत्तद्गुणत्वेन सकलगुणव्यक्तिषु सोपाधेरपि द्रव्यत्वस्य गुणत्वेन सकलगुणेष्वेव निरुपाधित्वात्, गुणत्वेन गुणे साध्ये सत्तात्वेन रूपेण सोपाधेरपि सत्ताया गुणकर्मान्यत्वविशिष्टसत्तात्वेन निरुपाधित्वात् । तथा च तद्रूपावच्छिन्ने साध्ये तद्रूपावच्छिन्ने साधने च क उपाधिरित्यत्र तद्रूपावच्छिन्नसाध्यसमानाधिकरणत्वे सति तद्रूपावच्छिन्नसाधनाव्यापकत्वमनुगतं लक्षणं वाच्यम्, न तु तद्रूपावच्छिन्नतत्तत्साधनव्यक्त्यव्यापकत्वम्, अननुगमात्, तथा च गुरुत्वत्वावच्छिन्नसमानाधिकरणस्य रूपत्वावच्छिन्नाव्यापकस्य

पृथिवीत्वाभावादेरुपाधित्वं दुर्वारम् । व्यभिचारित्वेन साधनविशेषणं तूपदर्शितमेवेति सङ्क्षेपः ।

(गा०) अत्रापि तादृशरूपाप्रसिद्ध्या पूर्ववदापत्त्यसम्भव इति तत्सम्भवं दीधितिकृदुपपादयति । यथाश्रुते इति । शुद्धसाध्यव्यापकत्वान्तर्भावे इत्यर्थः । तद्रूपवत्ताज्ञानादनुमितिप्रतिबन्धापत्तिरिति । यद्यपि नेयमापत्तिर्यथाश्रुतमूलतो लभ्यते, तथापि पक्षेतरत्वेऽनुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकरूपवत्त्वापत्तौ पक्षेतरत्वनिष्ठपर्यवसितसाध्यव्यापकताघटितरूपेऽनुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकत्वापत्तिः पर्यवस्यति, तस्याश्च पर्यवसाने तद्रूपावच्छिन्नविषयकज्ञानस्यानुमितिप्रतिबन्धकत्वापत्ताविति न विरोधः ।

उक्तरूपस्य व्यवहारमात्रौपयिकत्वेऽपि न निर्वाह इत्याह । उपाधिव्यवहारापत्तिरिति । वह्निसाध्यकधूमहेतुकोपाधिव्यवहारस्य यथार्थतापत्तेरित्यर्थः । अतो न पूर्वोक्तव्यवहारापत्तिदूषणावसरः । अत्रापादकं पूर्वोक्तव्यवहारविषयतावच्छेदकवह्निविषयकत्वमेव तच्च रूपं नेदानीमप्रसिद्धमित्यवधेयम् ।

ननु निरुक्तपर्यवसितसाध्यव्यापकताघटितमेव लक्षणमेतन्मतेऽपि विवक्षणीयम्, अतो नावच्छिन्नसाध्यव्यापकासङ्ग्रहः, न वा पक्षेतरातिव्याप्तिरित्यत आह । पर्यवसितेत्यादीति । एतन्मतं परिष्कुर्वतां मतमुपन्यस्यति । व्यवहाराविति । व्यवहारौपयिकम् । उपाधिव्यवहारौपयिकम् । लक्षणम् । इतरभेदानुमापकम् । तत्तत्साध्येति । अवच्छिन्नसाध्यव्यापकोपाधिसङ्ग्रहाय लाघवाय च व्यापकत्वमुपेक्ष्य सामानाधिकरण्यनिवेशः । साध्यविरुद्धवारणाय साध्यसामानाधिकरण्यावच्छेदकसाधनाव्यापकतावच्छेदकरूपवत्त्वविवक्षया धूमवान् वह्नेरित्यादौ ह्रदवृत्तित्वविशिष्टद्रव्यत्वादिकं वारणीयम् । साध्यसाधनयोर्वैशिष्ट्य निवेशस्याऽऽवश्यकतया तद्भेदादुपाधिभेद इष्ट एवेत्याह । साध्येति । सद्धेतौ सपक्षैकदेशवृत्तिधर्मेऽतिव्याप्तिं वारयति । वस्तुत इत्यादि । वस्तुतः । वस्तुगत्या । व्यभिचारिणि इति । साध्यसाधनयोर्वैशिष्ट्य प्रवेशाद्यत्साध्यस्य यत्साधनं व्यभिचारि तदुभयघटितमेव लक्षणं कर्त्तव्यम्, तथा च यस्य यद्व्यापकं तदुभयघटितं नोपाधित्वमिति नातिप्रसङ्ग इत्यर्थः । गुरुत्व-

व्यभिचारीति । तैजसरूपव्यक्तीनां पृथिवीत्वाभावव्याप्यत्वादित्यर्थः । तथा च तत्तद्व्यक्तित्वेनैव साध्यसाधनयोर्निवेशनीयतया तैजसरूपहेतुकगुरुत्वसाध्यकोपाधिलक्षणप्रविष्टतद्रूपाव्यापकत्वस्य पृथिवीत्वाभावेऽसत्त्वान्नातिप्रसङ्ग इत्यर्थः । तद्रूपघटितलक्षणस्य तत्रातिव्याप्तिविरहेऽपि पार्थिवरूपात्मकहेतुघटितलक्षणातिव्याप्तिरेवेति शङ्कामुद्धरति । तदव्याप्येति । पृथिवीत्वाभावो यदव्यापकस्तद्रूपेत्यर्थः । गुरुत्वाव्यभिचारादिति । तथा च गुरुत्वतद्रूपोभयघटितलक्षणमेव नास्ति, क्वातिप्रसङ्ग इति भावः ।

ननु उक्तरूपज्ञानं व्यभिचारानुमानानुपयोगि, व्यापकत्वाघटितत्वात्, नापि साध्यव्यापकत्वघटितम्, अवच्छिन्नसाध्यव्यापकासङ्ग्रहात्, नापि साधनपक्षधर्मावच्छिन्नसाध्यव्यापकताघटितम्, अननुगमादित्यस्मदुक्तरीतिरेवाऽऽदरणीयेत्यत आह । दूषणतेति । दूषणता । व्यभिचारोन्नायकता । अननुगतमेव । शुद्धसाध्यतत्तद्धर्मावच्छिन्नसाध्यव्यापकत्वाघटितमेव, तदननुगमस्यादोषत्वादिति भावः । स्वरूपगर्भम् । स्वरूपमात्रगर्भम् । मात्रपदेन साध्यतावच्छेदकगर्भताव्यवच्छेदः । धर्मगर्भमिति । तत्कुत इत्यपेक्षायामाह । नत्तदिति । गुणव्यक्तिषु । साध्यीभूतासु । घटत्वाद्युपाधिना, सोपाधेरपि । द्रव्यत्वस्य निरुपाधित्वादिति । तथा च साध्यस्य रूपभेदानिवेशे रूपभेदेन एकसाध्यके सोपाधिनिरुपाधिभेदानुपपत्तिरिति भावः । साध्यस्य रूपभेदान्तर्भावफलमुक्त्वा साधनस्य रूपभेदान्तर्भावफलमाह । गुणत्वेनेति । रूपभेदान्तर्भावेन यादृशं लक्षणं तद्दर्शयति तथा चेति । रूपभेदपक्षे हेतुभूतधर्मिणोऽपि विशिष्टान्तर्भावे रूपेण गुरुत्वे साध्ये पृथिवीत्वाभावस्योपाधितावारणं सम्भवतीति तदन्तर्भावं निराकरोति । न त्विति । अनुगमादिति । हेतुव्यक्तिभेदेनोपाधिताभेदस्य निष्प्रयोजनकत्वादित्यर्थः । धूमादौ साध्ये वह्नित्वाद्यवच्छिन्नमहानसीयवह्न्यादिहेतावप्यार्द्रेन्धनादेरनुपाधित्वानुपगमादिति भावः । तावता लक्षणे को दोष इत्यपेक्षायामाह । तथा चेति । पृथिवीत्वाभावादेरिति । रूपत्वावच्छिन्नतैजसरूपव्यक्त्यव्यापकताशून्यस्यापीति शेषः ।

ननु साध्यव्यभिचारिसाधनाव्यापकत्वनिवेशो नायं दोषो वारणीय इत्यत आह । व्यभिचारित्वेनेति । तथा चास्मन्मत एव प्रवेश

इति भावः ।

(चि०) केचित्तु साधनव्यापकोऽप्युपाधिः क्वचिद् यत्र पक्षावृत्तिर्हेतुः । यथा करका पृथिवी काठिनसंयोगादित्यत्रानुष्णाशीतस्पर्शवत्त्वम् । न चात्र स्वरूपासिद्धिरेव दोषः, सर्वत्रोपाधेर्दूषणान्तरसङ्करादित्याहुः ।

(दी०) उपाधिलक्षणे साधनाव्यापकत्वं न विशेषणम्, दूषकतायामनुपयोगात्, अव्याप्तिकरत्वाच्चेति सत्प्रतिपक्षोन्नायकत्वेनोपाधेर्दूषकतावादिनामभिप्रायं प्रकाशयति केचित्त्विति ।

(गा०) ननु साधनाव्यापकत्वघटितस्यैवोपाधिलक्षणस्योक्तत्वात् करका पृथिवी काठिनसंयोगादित्यत्र साधनाव्यापकस्य कथमुपाधित्वस्वीकार इत्याशङ्कां निराकरोति । उपाधिलक्षण इति । दूषकतायाम् । सत्प्रतिपक्षोत्थापकतायाम् । व्यभिचारिणि साधने साध्यस्यापि निरुक्तोपाधिलक्षणाक्रान्ततयोपाधित्वे व्यभिचारसाधने तद्व्यभिचाररूपसाधनस्य साध्याविशेषादिदोषस्याकिञ्चित्करतया साध्यं च नोपाधिरिति मूलासङ्गतिपरिजिहीर्षया परं प्रत्युद्भाव्य इति पूरयिष्यन् साध्यतावच्छेदकावच्छिन्नसाध्यस्योपाधितयोद्भावने वक्ष्यमाणसाध्याविशेषादिदोषानवकाशात् तद्रूपावच्छिन्नोद्भावनखण्डनायोगात् साध्यविशेषणं पूरयति । साध्यतावच्छेदकावच्छिन्नमिति । साध्याविशिष्टत्वादिति मूलं धारयन् साध्याविशिष्टताया दूषकताबीजं पूरयति । पक्षे इति । पक्षे साधनरूपे । साधनस्य । साध्यात्मकोपाधिव्यभिचारस्य । अनुमानस्य । सिषाधयिषया सम्भवेऽपि वैयर्थ्यात् । हेतुनिश्चयेनैव व्याप्तिविज्ञानाविघटनात् । अनिश्चये । पक्षे साधनस्येत्यनुषज्यते । तस्य । अनुमानस्य । यद्यप्युपाध्यन्तरव्यभिचारलिङ्गकव्यभिचारानुमापकपरामर्शस्यापि व्याप्तिज्ञानं प्रति व्यावर्तकधर्मदर्शनत्वेन विरोधितया सर्वत्रैव व्यभिचारानुमितिवैयर्थ्यम्, तथाप्युपाध्यन्तरोद्भावने तादृशपरामर्शसम्पादकतयैवोपयुज्यते, साध्यस्य च साध्याव्यापकताघटितोपाधितयोद्भावनम-

नुपयुक्तम्, उपाधिव्यभिचारे साध्यव्यभिचारव्याप्तिनिश्चयस्यैवोपाधौ साध्यव्यापकतोपदर्शनफलत्वात्, साध्यव्यभिचारे तु साध्यव्यभिचारव्याप्तिग्रहस्यानुपयुक्तत्वात्, तद्ग्रहमन्तरेणापि हेतौ तद्ग्रहस्य स्वतो व्याप्तिज्ञानप्रतिबन्धकत्वादित्यत्र तात्पर्यम्। हेतौ साध्यग्राहकतर्कसद्भावे सन्दिग्धोपाधेर्नानुमानोच्छेदकत्वम्, अतः साध्यस्य सन्दिग्धोपाधितया उद्भावनं स्वयं निराकरोति। हेतावितीति। कृतं सन्दिग्धोपाधिनेति। तत्कर्तव्यस्य व्यभिचारसंशयान्तरस्यानपेक्षणात् साध्ये उपाधित्वसंशयस्यैव साध्ये साधनाव्यापकत्वसंशयरूपत्वादिति भावः। कथमिति। साध्ये साध्यव्यापकत्वसंशयायोगेन साधने तद्व्यभिचारसंशयरूपेण तत्र साधनाव्यापकत्वसंशयेनैव सन्दिग्धोपाधित्वानिर्वाहादिति भावः।

(चि०) साध्यं च नोपाधिः, व्यभिचारसाधने साध्याविशिष्टत्वात्, अनुमितिमात्रोच्छेदप्रसङ्गाच्च। स चायं द्विविधः निश्चितः सन्दिग्धश्च। साध्यव्यापकत्वेन साधनाव्यापकत्वेन च निश्चितो व्यभिचारनिश्चयाधायकतया निश्चितोपाधिः। यथा वह्निमत्त्वेन धूमवत्त्वे साध्ये आर्द्रेन्धनप्रभववह्निमत्त्वम्। यत्र च साधनाव्यापकत्वसन्देहस्साध्यव्यापकत्वसंशयो वा तदुभयसन्देहो वा तत्र हेतुव्यभिचारसंशयाधायकतया सन्दिग्धोपाधिः।

(गा०) मूले स चेति। उपाधित्वग्रहेणानुमानदूषकश्चेत्यर्थः, ईश्वरसाधकसदनुमानेऽपि सन्दिग्धोपाधेरुदाहरणीयतया तस्य चानुपाधित्वेन एतद्ग्रन्थस्य वास्तवोपाधिविभाजकत्वायोगात्। निश्चितः। उपाधित्वनिश्चयविषयः। सन्दिग्धः। तत्संशयविषयः। निश्चितोपाधिः। निश्चयविषयतयाऽनुमानदूषकः। तथा दूषकत्वे हेतुः व्यभिचारनिश्चयाधायकतयेति। यत्र चेति। यत्र धर्मे इत्यर्थः। तत्र धर्मे। सन्दिग्धोपाधिरिति भावप्रधानम्। तथा च संशयविषयतया दूषकत्वमित्यर्थः। तथात्वे हेतुव्यभिचारसंशयाधायकतयेति। शाकपाकजत्वादावुपाधित्वसंशयस्य साधने सोपाधित्वसंशयपर्यवसिततया

तत्र साध्यव्यभिचारसंशयाधायकतयेत्यर्थः ।

(दी०) साध्यतावच्छेदकावच्छिन्नस्य साध्यं च नोपाधिः परं प्रत्युद्भाव्यः, साध्याविशिष्टत्वात् पक्षे साधनस्य निश्चयेऽनुमानस्य वैयर्थ्यात् अनिश्चये च तस्यायोगात् । सन्दिग्धोपाधित्वेनापि न तदुद्भावनमित्याह । अनुमितीति । हेतौ साध्यव्यभिचारस्सन्दिग्धश्चेत्कृतं सन्दिग्धोपाधिना ? असन्दिग्धश्चेत्कथं तस्य सन्दिग्धोपाधित्वमिति तु तत्त्वम् । हेतुव्यभिचारेति । व्याप्यसंशयस्य व्यापकसंशयहेतुत्वादिति भावः ।• न च तत्र मानाभावः, कोटिस्मरणादित एव तदुपपत्तेः, क्वचित्तदनुविधानस्यापि व्याप्यतदभावयोर्व्यापकतदभावसाहचर्यस्य गृहीतत्वेन तत्स्मरण एवोपक्षीणत्वात् । तदग्रहे तु तत्संशयाद्व्यापकसंशयाभावादिति वाच्यम् । महानसे हुताशनो न जलह्रदे इति स्मरतां पर्वतादिकमपि पश्यतां धूमादिसंशयभावाभावाभ्यां हुताशनसंशयभावाभावदर्शनात्तस्यापि तद्धेतुत्वात् । अत एवोत्कटकोटिकाद्व्याप्यस्य संशयाद्व्यापकस्याप्युत्कटकोटिकः संशयः, कारणोत्कर्षेणैव कार्योत्कर्षात् । समानेत्यादिसूत्रं तूपलक्षणपरम्, चश्चकारो वाऽनुक्तसमुच्चयार्थ इति वदन्ति ।

(गा०) तत्संशयस्य व्यभिचारसंशायकत्वमेव कथमित्यत आह दीधितौ । व्याप्यसंशयस्येति । तथा च व्याप्यसंशयविधया व्यभिचारव्याप्यसोपाधित्वसंशयस्य तत्संशयाधायकत्वमिति भावः । तत्र । व्याप्यसंशयस्य व्यापकसंशयहेतुत्वे । तस्य तदहेतुत्वे तद्दशायां तदुत्पादः कुतः कारणादित्यपेक्षायामाह । कोटिस्मरणादित इति । अवश्यकल्प्यहेतुभावादित्यादिः । तदुपपत्तेः । व्यापकसंशयोपपत्तेः । व्याप्यसंशयासत्त्वे क्वचिदनुत्पन्नस्य व्यापकसंशयस्य तदनन्तरमुत्पत्तेस्तद्धेतुत्वसिद्धिः स्यादित्यत आह । क्वचिदिति । तदनुविधानस्य । अन्वयव्यतिरेकानुविधानस्य । तत्स्मरणे एव । व्यापकतदभावरूपकोटिस्मरणे एव । उपक्षीणत्वात् । उपयोगितया चरितार्थ-

स्यात्। व्याप्यतदभावयोर्व्यापकतदभावसाहचर्यग्रहस्थले व्याप्य-
संशयस्य व्यापकतदभावास्मारकतया न कोटिद्वयोपस्थापकत-
या उपयोगित्वमित्यत आह। तदिति। तद्ग्रहे। साहचर्यग्रहे।
तत्संशयात्। व्याप्यसंशयात्। व्यापकसंशयाभावात्। तादृशका-
रणाभावेनानुत्पादात्। प्रकारान्तरेण कोटिद्वयोपस्थितिस्थले इतर-
सकलकारणसत्त्वे व्याप्यसंशयान्वयव्यतिरेकाभ्यां व्यापकसंशया-
न्वयव्यतिरेकतस्तत्र तद्धेतुत्वं दुरपवादमेव, अन्यथा साधारण-
धर्मदर्शनादेः कोटिस्मरणादिनाऽन्यथासिद्धिः स्यादिति समाधत्ते।
महानस इति। पर्वतादिकमपि पश्यतामित्यनेन धर्मिज्ञानसत्त्वं दर्शि-
तम्। भावाभावाभ्यां भावाभावदर्शनादिति यथासङ्ख्यमन्वयः। अत
एव। तस्य तद्धेतुत्वादेव। उत्कटकोटिकात्। व्याप्यांश तदभावांश
वा उत्कटात्। उत्कटकोटिकः। व्याप्यांशे तदभावांशे वा
उत्कटः। औत्कट्यं चाव्याप्यवृत्तिजातिविशेषो विषयताविशेषो वा।
कारणोत्कर्षेणेति। कारणोत्कर्षस्यैव कार्योत्कर्षप्रयोजकत्वात्, त-
स्याकारणत्वे कोटिस्मरणादिरूपकारणस्याविशेषेण व्यापकसंश-
यौत्कट्यस्याकस्मिकतापत्तेरित्यर्थः। व्याप्यसंशयस्य साधारणध-
र्मदर्शनादितुरीयत्वे समानानेकधर्मोपपत्तेरित्यादिसूत्रविरोधः, सं-
शयहेतुसाधारणधर्मदर्शनादित्रयस्यैव परिगणनादित्यत आह।
समानेत्यादीति।

तत्सूत्रं तु समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्य-
व्यवस्थातश्च विशेषापेक्षो विमर्शः संशय इति। अस्यार्थः समान
एको योऽनेकेषां तत्कोटितदभावकोटिमतां धर्मः तत्तदभावसह-
चरितत्वेन तत्तदभावसहचरितवृत्तिधर्मवत्त्वेन वा गृहीतो गृह्य-
माणो वा यो धर्म इति यावत्, तदुपपत्तेः धर्मिणि तद्वत्ता-
ज्ञानात्, तादृशज्ञानस्य कोट्युपस्थितिद्वारा साक्षादेव वा
हेतुत्वमिति हेत्वाभासे व्यक्तीभविष्यति। विप्रतिपत्तिः।
एकधर्मिणि विरुद्धकोटिद्वयप्रतिपत्तिजनकं वाक्यद्वयं शब्दो
नित्यो न वेत्यादिरूपम्, ततः तादृशवाक्ययोर्मिथो विरोधेन
शाब्दबोधानुपधायकयोर्धर्मिणि कोटिद्वयोपस्थितिद्वारा मानससं-
शयजनकत्वम्, तादृशवाक्यज्ञानस्य तत्तद्धर्मिकतत्तत्कोटिसंशये त-
त्तद्धर्मिवाचकपदसाकाङ्क्षतत्तत्कोटिवाचकपदज्ञानत्वेन हेतुता, त-

द्रूपावच्छिन्नजन्यत्वेऽपि संशयस्य न शाब्दत्वापत्तिः, विरोधिकोटिगोचरशाब्दसामग्रयभावादिघटितसामग्रयजन्यत्वात्, तज्जन्यत्वस्यैव शाब्दत्वप्रयोजकत्वात् । तत्तत्कोटिप्रत्यक्षे तुल्यबलायास्तद्विपरीतकोटिप्रत्यक्षसामग्र्या इव तच्छाब्दबोधे विपरीतकोटिशाब्दसामग्र्या अपि प्रतिबन्धकत्वे मानाभावात् तत्र संशयाकार एव शाब्दबोध इत्येकदेशिनः । उपलब्धिः । तत्कोटिनिश्चयः । अनुपलब्धिः । तत्कोट्युपलब्धिविरोधिनी तदभावोपलब्धिः । तदव्यवस्था । धर्मिणि तद्विषयत्वव्याव्यावृत्तधर्मवत्त्वधीः, ततश्च तत्कोटिव्यावृत्तत्वविशिष्टत्वाज्ञानस्य, तत्कोटिविशिष्टत्वाद्विरोधितया कोटिद्वयविशिष्टधीरूपसंशयजनकत्वासम्भवात् तत्तत्कोटिमत्त्वमुपेक्ष्य स्वरूपसत्तत्कोटिनिश्चयविषयत्वं धर्मिणि विशेषणतयोपात्तम् । अत्र च तत्तत्कालसहकृतस्य तत्तत्कालीनतत्तत्पुरुषीयतत्तत्कोटिनिश्चयविषया ये ये तत्तद्धर्मिव्यावृत्तत्वज्ञानस्य संशयजनकत्वे तत्तद्धर्मिव्यावृत्तत्वज्ञानाभावविशिष्टतत्तद्धर्मिकतत्तत्कोटिनिश्चयस्य संशयप्रतिबन्धकत्वे वा गौरवमित्यालोच्य तत्तत्कोटिसहचरिताभावप्रतियोगित्वमेव ज्ञानागर्भमसाधारण्यं संशयप्रयोजकमिति दीधितिकृता वक्ष्यते । निरुक्तसाधारणधर्मदर्शनादित्रयस्य प्रत्येकमेव संशयोपधायकता, तृणारणिमणीनां वह्न्युपधायकतावत्, चाक्षुषत्वादिभिः सङ्करेणेह प्रकृते जनकतावच्छेदकजातिकल्पनासम्भवाद्व्यभिचारः प्रकारान्तरेण वारणीयः । साधारणधर्मदर्शनादीनां संशयहेतुत्वेऽपि तदसत्त्वे कोटिस्मरणादिघटिततुल्यबलकोटिभासकसामग्रीभ्यां विरोधग्रहसत्त्वेऽपि स्वस्वकार्यजनने बाधकाभावात् संशयो दुर्वारः, तादृश्योरपि प्रत्यक्षसामग्र्योः परस्परप्रतिरोधकत्वे साधारणधर्मदर्शनादिसत्त्वेऽपि संशयविलोपप्रसङ्ग इति संशयत्वस्य विषयताविशेषरूपतायामेव निर्वाहः, तथा सति तादृशविषयताभिन्नविषयताया एव विरोधिकोटिग्रहसामग्रीप्रतिबध्यतावच्छेदकत्वोपगमात् तादृशविषयताप्रयोजकसाधारणधर्मदर्शनादितः संशयनिर्वाहः, विरोधग्रहेण तद्ग्राहकसामग्र्या वा सहिताया एव विरोधिकोटिभासकसामग्र्याः प्रतिबन्धकत्वाच्च कोटिद्वयसमुच्चयानुपपत्तिरित्यादि बोध्यम् ।

साधारणधर्मदर्शनादिकमन्तरेणापि तुल्यबलसामग्रीभ्यां संश-

यो जन्यते, साधारणधर्मदर्शनादेः कोटिद्वयोपस्थापकतयैवोपयोग इति संशयत्वादेः कार्यतावच्छेदकत्वविद्वेषिणो नव्याः, तन्मते संशयत्वं न विषयताविशेषः, परन्तु एकधर्मिकभासमानविरोधिकोटिद्वयज्ञानत्वं तत्तत्सामग्रीसमाजप्रयोज्यमेवेति । विशेषापेक्ष इति विशिष्यते व्यावर्त्यते विशेषदर्शनविषयो ऽनेनेति विशेषो विशेषदर्शनम्, तदपेक्षस्तज्जन्यः, तादृशविशेषापेक्षत्वं संशयसामान्यस्यैव । विमर्शः । एकधर्मिणि विरुद्धकोटिद्वयज्ञानम् , तच्च संशयलक्षणमिति ।

साधारणधर्मदर्शन एव व्याप्यसंशयस्यान्तर्भावनीयतया तस्य स्वतन्त्रतायामस्वरसो वदन्तीत्यनेन सूचितः ।

. (दी०) कोटिद्वयसहचरितधर्मवत्तया धर्मिज्ञानं हेतुः, धर्मस्यैकत्वं ज्ञानस्य च निश्चयत्वं नोपयुज्यते गौरवात्, अवगाहते च लिङ्गसन्देहो लैङ्गिकतदभावसहचरितौ लिङ्गतदभावौ धर्मिणः, तथा च साधारणधर्म एव तस्यान्तर्भाव इति तु नव्याः ।

(गा०) नव्यमतमाह । कोटिद्वयेति । तत्तत्कोटिसहचरितधर्मवद्धर्मिज्ञानत्वेन साधारणधर्मवत्ताज्ञानं संशयहेतुरित्यर्थः । अत्र तत्तत्कोटिसहचरितधर्मयोः पृथगन्तर्भावेन कारणताद्वयम्, न तु कोटिद्वयसाहचर्यावच्छिन्नत्वद्वयं धर्मस्यैकविषयतायां निवेश्यैककारणत्वं कल्प्यते, येनोभयसहचरितधर्मभेदादेकस्यापि धर्मस्य विषयतायां साहचर्यावच्छिन्नत्वद्वयासत्त्वेन कोटिद्वयसहचरितव्याप्याभावोभयावगाहिसंशयो न सङ्गृहीतः स्यादित्याह । धर्मस्यैकत्वमिति । निश्चयत्वेन हेतुत्वे संशयासङ्ग्रहात् तत्परित्यागमपि स्फुटयति । ज्ञानस्य च निश्चयत्वमिति ।

न च ज्ञानस्य निश्चयत्वाविवक्षणे कारणतावच्छेदकाभावप्रतियोगित्वप्रामाण्यग्रहे निश्चयत्वस्य निवेशनीयतया गौरवमिति वाच्यम् । भवतामप्रामाण्यनिश्चयाभावविशिष्टत्वेन व्याप्यसंशयस्य हेतुत्वान्तरकल्पनेन महागौरवात् ।

एतेन तत्तत्कोटिसहचरितधर्मवत्ताज्ञानस्य हेतुतायां तत्तद्धर्मविषयता अवश्यं विशिष्य निवेश्याः, साहचर्यावच्छिन्नविषयतात्वेन सकलधर्मविषयतानामनुगमे सकलधर्मस्यैव घटितभ्रमत्वग्रहाणामभावकूटस्यैकत्र निवेशनीयतया एकधर्मघटितभ्रमत्वग्रहविषयधर्मा-

न्तरग्रहस्य संशयाजनकत्वापत्तेः, तथा च तत्कोटिसहचरिततद्धर्मवत्ताज्ञानस्य तदभावसहचरिततद्धर्मवत्ताज्ञानसहकारेणैव फलोपधायकत्वमुपेयते, न तु तादृशधर्मान्तरज्ञानसहकारेण गौरवादिति धर्मस्य एकत्वापेक्षत्वादि परास्तम् । व्याप्यसंशयस्य पृथक्कारणत्वादिकल्पनापेक्षया लाघवेन तत्कोटिसहचरितैकधर्मवत्ताज्ञानेन फलजनने तदभावसहचरितधर्मान्तरवत्ताज्ञानस्यापि फलप्रकारणताकस्य सहकारित्वोपगमात् ।

यत्तु तत्तत्कोटिसहचरितधर्मवत्तानिश्चयजन्यसंशये तादृशधर्माणामपि धर्मितावच्छेदकतया भानमुपेयते, तथा च तत्र विशेष्यतावच्छेदकज्ञानविधयैव तादृशधर्मवत्तानिश्चयस्य हेतुत्वात् संशये न तस्य स्वतन्त्रहेतुत्वमिति व्याप्यसंशयस्य पृथक्कारणत्वमावश्यकमिति तदपि न । तत्कोटिसंशये तद्व्याप्यतद्व्याप्याभावोभयप्रकारकज्ञानत्वरूपव्याप्यसंशयत्वेन हेतुत्वे व्याप्यतदभावप्रकारकत्वयोर्विशेषणविशेष्यभावे विनिगमनाविरहात्, सामानाधिकरण्यापेक्षया गुरुशरीरस्य व्याप्यत्वस्य निवेशे गौरवाच्च तत्तत्कोटिसहचरितधर्मवत्ताज्ञानत्वेन पृथक् पृथक् कारणत्वान्तरकल्पनाया एवोचितत्वात् । व्याप्यसंशयस्य कोटिद्वयसहचरितधर्मावगाहितां स्फुटयति । अवगाहते चेति । लिङ्गम् । व्याप्यम् । लैङ्गिकम् । व्यापकम् । लिङ्गतदभावयोर्लैङ्गिकतदभावसहचरितत्वस्य यथासङ्ख्यमन्वयः । व्याप्यसंशयदशायां व्याप्य व्याप्तिघटकसहचरितत्वस्य ग्रहनियमेऽपि तदभावे व्यापकाभावसहचारग्रहो न नियत इति चेत् ? एवमेव, परन्तु यदा व्यापकसंशयस्तदा तद्ग्रहोऽपि फलबलात् कल्प्यते, यत्र च तदग्रहस्तत्र व्यापकसंशयस्यैवापलाप इति भावः ।

(दी०) लिङ्गतदभावयोः प्रत्येकमेकैककोटिसाधारण्येऽपि मिलितयोरसाधारण्यम्, सत्प्रतिपक्षस्थले विरुद्धयोरिव हेत्वोरिति तु टीकाकारानुयायिनः ।

(गा०) सत्प्रतिपक्षस्थले विरुद्धहेतुद्वयज्ञानस्यासाधारणधर्मवत्ताज्ञानविधया साध्यसंशायकत्वम्, तदभावव्याप्यवत्ताग्रहप्रतिबन्धकतायां तद्व्याप्यवत्ताज्ञानस्योत्तेजकतया तु हेतुरूपपरामर्शस्य संशयप्रतिबन्धकत्वमिति टीकाकारमतमनुसृत्य व्याप्यसंशयस्या-

व्यसाधारणधर्मज्ञानान्तर्भावं वदतां मतमाह । लिङ्गेति । कोटिसाधारण्येऽपि । कोटिसहचरितत्वेऽपि । मिलितयोरिति । उभयत्वावच्छिन्नयोरित्यर्थः । असाधारण्यम् । तत्तदभावव्यापकाभावप्रतियोगित्वम् । उभयत्वावच्छिन्नाभावस्य तत्तत्कोटिव्यापकत्वग्रहे च व्यापकसंशयोऽपलपनीय एवेति भावः । हेत्वोरित्यत्र प्रत्येकमित्यादिकं सर्वमनुपपद्यते ।

अत्रेदमस्वरसबीजम्, शब्दत्वादेः शब्दत्वत्वादिना नित्यत्वादिमद्व्यावृत्तत्वस्य जातित्वादिना च धर्मिवृत्तित्वस्य ग्रहे संशयानुदयात् येन रूपेणासाधारण्यग्रहस्तेनैव रूपेणासाधारणधर्मस्य धर्मिणि धीः संशयहेतुरुपेया, धूमादिसंशयस्य च धूमधूमाभावाद्युभयत्वेन उभयाविषयकतया कथं संशायकता ? विरुद्धतया गृह्यमाणयोरेकविशिष्टेऽपरप्रकारकमिवोभयत्वेनोभयप्रकारकमपि, ज्ञानमनाहार्यमनुभवविरुद्धमिति न संशयस्य तथात्वसम्भवः ।

यदि च तत्तद्रूपावच्छिन्नोभयत्वेनासाधारण्यग्रहसहिततत्तद्रूपावच्छिन्नोभयवत्ताज्ञानस्य हेतुतायां तत्तद्रूपावच्छिन्नप्रकारकत्वमेवावच्छेदकं न तूभयत्वसहिततत्तद्रूपावच्छिन्नप्रकारताकत्वं गौरवादित्युच्यते, तथापि उभयत्वेनासाधारण्यग्रहसहितस्य भावाभावोभयवत्ताज्ञानस्यान्यत्र संशयहेतुताया अक्लृप्तत्वात्तामवलम्ब्य व्याप्यसंशयत्वेन पृथक्कारणताखण्डनानुपपत्तिः, उभयत्वेन तत्तदभावव्यापकाभावप्रतियोगित्वज्ञानसाहित्यं निवेश्य भावाभावोभयप्रकारकज्ञानहेतुतापेक्षया धूमादौ वह्न्यादिव्याप्यत्वग्रहसहितधूमादितदभावप्रकारकज्ञानत्वरूपसंशयत्वेन हेतुतायामेव लाघवात्,

यदि चोभयत्वेनासाधारण्यग्रहसहितभावाभावोभयप्रकारकज्ञानहेतुता तदुभयसमुच्चयस्थले क्लृप्तेत्युच्यते, तथाप्येतन्मते संशयमात्रीयकोटिद्वयमात्रस्यैव मिलितस्यासाधारणतया व्यभिचारिजलत्वादिसंशयाद्व्याप्यधूमादिसंशयस्याविशेषः ।

न च साधारणधर्मदर्शनान्तर्भावमतेऽपि जलत्वादेर्वह्न्यादावभावस्य जलत्वाद्यभावस्य च वह्न्यादेः सहचरिततया तत्संशयविशेष इति वाच्यम् । व्याप्यत्वस्य व्यापकसामानाधिकरण्यनियततया व्याप्याभावत्वस्य च व्यापकाभावसामानाधिकरण्यनियततया तत्तत्कोटिसाधारण्यग्राहकत्वेन संशयोपयोगितया तन्मते व्याप्यसंशय-

स्य संशयान्तरो विशेषात्, असाधारण्यग्रहे च व्याप्त्यादिग्रहस्यानुपयोगात्, एवमेकसम्बन्धेन तत्तत्कोटिसह्यावृत्तस्य सम्बन्धान्तरेण धर्मिणि ग्रहे संशयानुत्पत्त्या सम्बन्धैक्यमवश्यमपेक्षणीयम्, धूमतदभावयोश्च मिलितयोः संयोगेन विशेषणताविशेषेण वा व्यावृत्तत्वग्रहेऽपि धूमादिसंशये तादृशेन केनापि सम्बन्धेन धर्मिण्युभयप्रकारकताविरहेण कथं संशायकता ?

यत्तु अन्यतरसम्बन्धेन भावाभावोभयस्य व्यावृत्ततया तेन सम्बन्धेन च संशयस्योभयप्रकारकतया संशायकत्वमिति तदसत् । यद्रूपावच्छिन्नसम्बन्धेन उभयत्वावच्छिन्नस्यासाधारण्यग्रहः अन्यतरत्वरूपतद्रूपावच्छिन्नस्य संसर्गतया संशयेऽभानात् । यद्रूपावच्छिन्नसम्बन्धघटितासाधारण्यग्रहस्तद्रूपाश्रयसम्बन्धेन धर्मिण्यसाधारणधर्मग्रहमात्रस्य संशायकत्वे शब्दत्व नित्यसम्बन्धेनोभयव्यावृत्तमिति ग्रहदशायां समवायस्यानित्यत्वभ्रमेऽपि अखण्डोपाधिरूपसमवायत्वावच्छिन्नसम्बन्धेन शब्दत्वज्ञानस्य नित्यत्वादिसंशायकतापातादित्यायुहनीयम् ।

(दी०) इत्थं च साधनाव्यापकत्वसंशये साध्यव्यापकव्यभिचारसंशयात्साध्यव्यभिचारसन्देहो हेतौ स्फुट एव । साध्यव्यापकत्वसन्देहे तु साधनाव्यापकव्याप्यत्वसंशयात्साध्ये साधनाव्यापकत्वसन्देहो बोध्यः । उपाधेस्साध्यव्यापकत्वसन्देहेनाऽऽहितात्साधने साध्यव्यापकव्यभिचारसन्देहात् साध्यव्यभिचारसन्देह इत्थमेव च दलद्वये संशयस्थले व्यभिचारसंशयस्योक्तिसम्भव इत्यपि वदन्ति ।

(गा०) उपाधित्वघटकसाधनाव्यापकत्वादिसंशयस्य साध्यव्यभिचारव्याप्यसंशयपर्यवसानं दर्शयति । इत्थं चेति । साधनाव्यापकत्वसंशय इति । साध्यव्यापकतावच्छेदकतया निश्चिते शाकपाकजत्वत्वादौ साधनाव्यापकतावच्छेदकत्वसंशये सतीत्यर्थः । साध्यव्यापकव्यभिचारसंशयात् । स्वाद्गिमन् । तदव्यापकत्वस्य तस्मिन् स्वाभाववदवृत्तित्वेन तुल्यवित्तिवेद्यतया साधने साध्यव्यापकतावच्छेदकावच्छिन्नाभाववद्वृत्तित्वसंशयपर्यवसानात् । स्फुट एवे-

ति। व्यापकव्यभिचारस्य व्याप्यव्यभिचारव्याप्यत्वादिति भावः। साध्यव्यापकत्वसन्देहे इति। साधनाव्यापकतावच्छेदकत्वनिश्चयविषयधर्मे साध्यव्यापकतावच्छेदकत्वसंशये इत्यर्थः। साधनाव्यापकव्याप्यत्वसंशयादिति। व्यापकत्वव्याप्यत्वयोस्तुल्यवित्तिवेद्यतया साध्यतावच्छेदके साधनाव्यापकतावच्छेदकावच्छिन्नव्याप्यतावच्छेदकत्वरूपसाधनाव्यापकतावच्छेदकत्वव्याप्यधर्मसंशयादित्यर्थः। साध्ये। साध्यतावच्छेदके। साधनाव्यापकत्वसन्देहः। साधनाव्यापकतावच्छेदकत्वरूपव्यभिचारसंशयः। अत्र साधने उपाधिव्यभिचारस्य निश्चितत्वेन संशयायोगात् तत्र तत्संशयाधीनसाध्याभाववद्वृत्तित्वसंशयानवकाश इत्याशयः। तत्रापि हेतुधर्मिकसाध्याभाववद्वृत्तित्वरूपव्यभिचारसंशयमुपपादयतां मत आह। उपाधेरिति। उपाधेः। उपाधितावच्छेदकस्य। साध्यव्यापकत्वसन्देहेन। विशेषणीभवत्साध्यव्यापकत्वसंशयेन। आहितात्। साधने साध्यव्यापकतावच्छेदकत्वविशेषितोपाधितावच्छेदकत्वावच्छिन्नाभाववद्वृत्तित्वसंशयादित्यर्थः। अत्र च संशये साध्यव्यापकतावच्छेदकत्वस्य उपलक्षणतयैवाभावप्रतियोगितावच्छेदकतया भासमानोपाधितावच्छेदके भानम्, उपाधितावच्छेदकतया भानासम्भवात्, तादृशभाने तन्निश्चयस्यापेक्षितत्वात्।

न च व्यापकतावच्छेदकत्वमात्रेणैवोपाधितावच्छेदकभानं न तु तद्गतासाधारणरूपेणापीति तादृशसंशयस्य व्यापकतावच्छेदकत्वांशे निर्धर्मितावच्छेदकतयाऽवच्छेदकतया भानेऽपि न तन्निश्चयोऽपेक्षित इति वाच्यम्। व्यापकतावच्छेदकमेयत्वादिविशिष्टस्य केवलान्वयितया व्यापकतावच्छेदकत्वविशिष्टावच्छिन्नाभावस्याप्रसिद्ध्या संशयेनास्पर्शात्।

न च व्यापकतावच्छेदकत्वोपलक्षिततद्धर्मावच्छिन्नाभाववद्वृत्तित्वसंशयोऽपि दुर्घटः, तद्धर्मावच्छिन्नाभाववद्वृत्तित्वनिश्चयस्य तद्विरोधित्वादिति वाच्यम्। उपलक्षणीभूतव्यापकतावच्छेदकत्वमात्रपुरस्कारेणोपाधितावच्छेदकभानोपगमात् तत्तद्धर्मावच्छिन्नाभाववद्वृत्तित्वनिश्चयस्य च विशेषिततत्तद्धर्मावगाहितत्तद्धर्मावच्छिन्नाभाववद्वृत्तित्वसंशयं प्रत्येव विरोधितया व्यापकतावच्छेदकत्वमात्रेण तदवगाहिसंशयस्याप्रत्यूहत्वात्।

न च विशेषणसन्देहाद्विशिष्टसंशयो भवन् विशेषणसंशयधर्मितावच्छेदकमवश्यमुल्लिखतीति नियमः प्रामाणिकः, दण्डी पुरुष इति निश्चयदशायां पुरुषस्य दण्डो रक्तो न वेति संशयात् रक्तदण्डवान् पुरुष इत्यादिनिश्चयासत्त्वे रक्तवान् न वा पुरुष इत्यादिसंशयस्योपगमात् ।

न चाभावप्रतियोगितावच्छेदकतया तदवच्छेदकतया वा भासमाने नोपलक्षणस्य प्रकारतया भानम्, नीलो घटो नास्तीत्याद्याकारकस्य घटादिसामान्याभावग्रहस्य नीलदण्डवान्नास्तीत्याकारकस्य दण्ड्यादिसामान्याभावादिग्रहस्य वाऽननुभविकत्वादिति कथं व्यापकतावच्छेदकत्वमुपलक्षणतया साध्यतावच्छेदकेऽवगाहमानो व्यापकव्यभिचारसंशय इति वाच्यम् । प्रतियोगितया यत्र प्रतियोगिसंसर्गतया भानं तत्रैव तथा नियमात् । अत्रोपाध्यभावे उपाधितावच्छेदकावच्छिन्नप्रतियोगितायास्तादृशरूपावच्छिन्नाभाववद्वृत्तित्वाभावे तादृशाभाववद्वृत्तित्वत्वावच्छिन्नप्रतियोगितायाश्च प्रकारतयैव भानोपगमात् । इत्थमेव चेति । विशेषरूपावच्छिन्ने यत्र धर्मिणि यद्रूपं सन्दिग्धं विशेषरूपावच्छिन्नतद्रूपावच्छिन्नतद्धर्मिघटितकोटितावच्छेदकावच्छिन्नविषयकसंशयोपगमेनैवेत्यर्थः ।

दलद्वयेति । साध्यव्यापकत्वसाधनाव्यापकत्वोभयेत्यर्थः । उक्तिसम्भव इति । अन्यथा साधनाव्यापकत्वनिश्चयस्थले साध्यव्यापकत्वसन्देहे साध्ये साधनाव्यापकव्याप्यत्वसंशयात् साधनाव्यापकत्वसन्देहसम्भवेऽपि यत्र साधनाव्यापकत्वमप्युपाधौ सन्दिग्धं तत्र साध्यव्यापकत्वस्य सन्दिग्धतया साधने साध्यव्यापकोपाधिव्यभिचारस्येव साध्ये सन्दिग्धसाधनाव्यापकत्वविशेषितोपाधिव्याप्यत्वस्यापि संशयासम्भवेन व्यभिचारसंशयाधानानिर्वाहादिति भावः । साधनाव्यापकत्वनिश्चयस्थले उक्तरीत्या साध्ये साधनाव्यापकत्वसंशयस्यानुमित्यौपयिकव्यापकतानिश्चयत्वविरोधिनः सुघटतया हेतौ साध्याभाववद्वृत्तित्वसम्पादनायाय प्रयासो विफल इत्यस्वरसो वदन्ति इत्यनेन सूचितः ।

(चि०) यथा मित्रातनत्वेन श्यामत्वे साध्ये

शाकाद्याहारपरिणतिजत्वम् । न च तेनैव हेतुना शाकपाकजत्वमपि साध्यम्, तत्र श्यामत्वस्योपाधित्वादुभयस्यापि साधनेऽर्थान्तरम्। श्यामत्वमात्रे विवादो न तूभयत्र। न चैवं धूमाद्वह्न्यनुमानेऽपि वह्निसामग्र्युपाधिः स्यात्। तत्र वह्निनेव तत्सामग्र्याऽपि समं धूमस्यानौपाधिकत्वनिश्चयात्, अत्र तु मित्रातनयत्वव्याप्यश्यामसामग्र्या स्यातव्यभिचारेऽत्र कार्यकारणभावादीनां व्याप्तिग्राहकाणामभावात्। अत एव साध्यसामग्र्या सह हेतोरपि यत्र व्याप्तिग्राहकमस्ति तत्र सामग्री नोपाधिः, यत्र तु तन्नास्ति तत्र साऽप्युपाधिरित्यभिसन्धाय सामग्री च क्वचिन्नोपाधिर्न तु सर्वत्र इत्युक्तम्। यथा तुल्ययोगक्षेमयोरुपाधेर्व्यापकतासन्देहे ईश्वरानुमाने शरीरजन्यत्वाणुत्वादिः, यथा च शाकपाकजत्वस्य साध्यव्यापकतासन्देहे मित्रातनयत्वे।

(दी०) उभयेति। एकांशेऽपरस्यैकविशिष्टापरसाध्यतायान्तु एकैकस्योपाधित्वमिति तु तत्त्वम्। ईश्वरेति। वस्तुतः सद्भावेऽपि तत्त्वाग्रहदशायामुपाधिसन्देहेन व्यभिचारसन्देह इति भावः।

(गा०) परार्थस्थले सन्दिग्धोपाधितया उद्भावितस्य शाकपाकजत्वस्य साधनाव्यापकत्वसंशयनिरासाय श्यामत्वसंशयविषयमित्रातनये शाकपाकजत्वसाधने श्यामत्वस्योपाधित्वं मणिकारेणोक्तम्, युगपदुभयसाधने साध्यतया न कस्याप्युपाधित्वसम्भव इत्यभिमानेन युगपदुभयसाधनमाशङ्क्य चार्थान्तरेण तद् दूषितम्। तत्र च श्यामत्व इव शाकपाकजत्वेऽपि विवादसम्भवान्नार्थान्तरमित्यालोच्य एकदा उभयानुमानमुपाधिनैव स्वयं दूषयति।

एकांशेऽपरस्येति । उपाधित्वमित्यग्रिमेणान्वयः । साध्यं च नापोधिरिति प्रवादस्य तद्रूपावच्छिन्नसाधने तद्रूपावच्छिन्नस्य नोपाधितयोद्भावनमित्यर्थकत्वादिति भावः ।

नन्वस्तु विभिन्नरूपेणोभयसाधने एकांशे ऽपरस्योपाधित्वम्, उभयत्वेनैकविशिष्टापरत्वेन वोभयं साधनीयमित्यत आह । एकविशिष्टापरेति । उभयत्वावच्छिन्नस्याप्युपलक्षणमेतत् । एकैकस्येति । प्रत्येकरूपावच्छिन्नस्य उभयस्यैवेत्यर्थः । साध्यस्य भिन्नरूपेणोपाधितायामविवादादिति भावः ।

मूले न चैवमिति । एवम् । साध्योत्पादप्रयोजकशाकपाकजत्वस्य साधनाव्यापकत्वसंशयेन सन्दिग्धोपाधित्वे । वह्निसामग्री । वह्न्युत्पादप्रयोजिका सामग्री । उपाधिः । सन्दिग्धोपाधिः । स्यात् । अनौपाधिकत्वनिश्चयात् । व्याप्तिग्राहकतर्कसम्भवेन तन्निश्चयात् । तथा च साधनाव्यापकत्वसंशयायोगेन न तत्सामग्र्याः सन्दिग्धोपाधित्वमपीति भावः । श्यामसामग्र्या । शाकपाकजत्वेन । व्याप्य स्थातव्यम् । व्यापनीयम् । इत्यत्र । इति निश्चयविषयतयाऽभिमतयोऽर्मित्रातनयत्वशाकपाकजत्वयोः । कार्यकारणभावादीनामभावात् । अभावेन तादृशनिश्चयासम्भवात् । अत्र हेतुगर्भविशेषणं व्याप्तिग्राहकाणामिति । साध्यव्यापकतासंशयेन सन्दिग्धोपाधिमुदाहरति । यथा तुल्ययोगक्षेमयोरिति । सतोरिति शेषः । योगक्षेमयोस्तुल्यत्वे सतीत्यर्थः । साध्ये साधनस्य उपाधौ च साध्यस्य व्यापकताग्राहकसामग्रीसाम्य इति यावत् ।

नन्वीश्वरसाधकसदनुमाने कथं शरीरजन्यत्वादेरुपाधित्वमुक्तमित्यत आह । दीधितौ वस्तुत इति । वस्तुगत्येत्यर्थः । तत्वाग्रहदशायाम् । अनुकूलतर्कानवतारेण सद्धेतुत्वाग्रहदशायाम् । उपाधिसन्देहेन शरीरजन्यत्वादावुपाधित्वसंशयेन । व्यभिचारसन्देह इति । अतोऽनुपाधेरपि तस्य उपाधित्वसंशयविषयतया दूषकत्वमिति शेषः ।

उभयसंशयस्थलमुदाहरति मूले । यथा चेति । सन्दिग्धानैकान्तिकवदिति दूषकत्वमात्रांशे दृष्टान्तः । तथा च व्यभिचारसन्देहस्येव उपाधिसन्देहस्याप्युद्भावनं युज्यत एवेति भावः ।

(चि०) यत्तु उपाधिसन्देहो नोपाधिर्न वा हेत्वाभासान्तरमिति तदुद्भावने निरनुयोज्यानुयोग इति। तन्न, सन्दिग्धानैकान्तिकव्यभिचारसंशयाधायकत्वेन दूषकत्वात्।

(दी०) सन्दिग्धेति। न चानैकान्तिकत्वसन्देहः प्रतिबन्धको न तु तज्ज्ञानमिति तदर्थं तदुद्भावनमफलमिति वाच्यम्। अनैकान्तिकत्वसंशयान्मम व्याप्तिग्रहो मा भूदित्यभिप्रायेण प्राचां हेतुदोषत्वेनासाधकतासाधकतया जिज्ञासादिद्वारा परम्परया सन्देहोपयोगित्वेन च तदुद्भावनस्य साम्प्रदायिकत्वात्। उपाधित्वस्य संशये निश्चये च जायमानं यज्ज्ञानमनुमितिं विरुणाद्धि तदेवास्य दूषकताबीजमित्यभिप्रायेणाह। सन्दिग्धेति। तद्व्यतिरेकस्यं क्वचिद्व्यापकत्वेन क्वचिच्च पक्षधर्मत्वेन सन्दिग्धत्वाद् बाधोन्नीतेति।

(गा०) व्यभिचारसंशयोद्भावनमेव न घटत इत्याशङ्कते दीधितौ। न चेति। न तु तज्ज्ञानमिति। न व्यभिचारसंशयस्य विषयो हेतुरिति संशयज्ञानं प्रतिबन्धकमित्यर्थः। तदर्थम्। सन्देहज्ञानफलकम्। अफलम्। अनुपयुक्तफलम्। तथा च सन्दिग्धोपाधेर्व्यभिचारसंशयाधायकतया दूषकत्वेऽपि तत्सन्देहोद्भावनं सुतरामफलमिति भावः। मा भूत्। न भवति। इत्यभिप्रायेण। एतदर्थबोधनेच्छया। तवात्र व्याप्तिरनुमता नवेति प्रतिवादिनं प्रति मध्यस्थानुयोग उक्ताभिप्रायेण व्यभिचारसंशयोद्भावनसङ्गतावपि, तादृशानुयोगं विना तदुद्भावनमसङ्गतम्, अतस्तदपि प्रकारान्तरेण सङ्गमयति। प्राचामिति। दोषेणैवासाधकत्वसाधनं साम्प्रदायिकमते उक्तं प्राचां हेतुदोषत्वेनेति। ज्ञायमानं सद्यदनुमितिविरोधीति तस्यैव स्वमते हेतुदोषतया व्यभिचारसन्देहस्य च स्वरूपसत एव तथात्वेन न तथात्वसम्भव इत्यत उक्तं प्राचामिति। एतदनुशयेनैव प्रकारान्तरमाह। जिज्ञासादिद्वारेति। प्रतिवादिना स्वसंशयो-

द्भावने संशयप्रयोजकजिज्ञासोदयेन तत्प्रयोजकरूपप्रतिसन्धाने सति सामग्रीवशान्मध्यस्थस्यापि संशयो भवतीति संशयोद्भावनस्य संशयोपयोगित्वेन तस्य सम्प्रदायसिद्धत्वादित्यर्थः । परम्परया यदुद्भावनं संशयोपयोगि तस्याप्युद्भावने ऽन्येषामपि तथाविधानामुद्भावनप्रसङ्ग इत्याशङ्कावारणाय साम्प्रदायिकत्वादित्युक्तम् । तथा चान्येषां तथाविधानामुद्भावनमसाम्प्रदायिकत्वान्न क्रियत इति भावः ।

(चि०) उपाधेरिव व्यभिचारनिश्चयाधायकतया इदानीमुपाधेर्दूषकताबीजं निरूप्यते । नाप्यस्य व्यतिरेकद्वारा सत्प्रतिपक्षत्वेन दूषकत्वम, तदा हि सत्प्रतिपक्षे सत्प्रतिपक्षान्तरवदुपाधेरुद्भावनं न स्यात् । न च प्रतिपक्षबाहुल्येनाधिकबलार्थमुद्भावनम्, शतमप्यन्धानां न पश्यतीति न्यायात्, एकेनापि बहूनां प्रतिबन्धाच्च । व्याप्तिपक्षधर्मते हि बलम्, तच्च तुल्यमेव, न तु भूयस्त्वमपि, एकस्मादप्यनुमितिदर्शनात् । सन्दिग्धोपाधेरदूषकतापत्तेश्च, तद्व्यतिरेकस्य पक्षे सन्दिग्धत्वात् । अपि चैवं बाधोन्नीतपक्षेतरस्योपाधित्वं न स्यात्, व्यतिरेकेऽसाधारण्यात् ।

(गा०) मूले प्रतिपक्षबाहुल्येनाधिकबलार्थमिति । प्रतिपक्षः । प्रतिसाध्यसिद्धेर्विरोधी प्रकृतसाध्यसाधको हेतुः, तस्य बाहुल्यमनेकता, तदभिन्नं यदधिकबलं तदर्थमित्यर्थः । उद्भावनमित्यत्र न चेत्यस्य सम्बन्धः । अत्र हेतुः व्याप्तिपक्षधर्मते हीत्यादि । हि । यस्मात् । व्याप्तिपक्षधर्मते । तयोर्ज्ञानम् । बलम् । शतमपीति । व्याप्तिपक्षधर्मताज्ञानासत्त्व इत्यादिः । कार्यप्रयोजकस्य कस्यचिद्विरहे एकजातीयानेककारणान्तरसत्त्वेऽपि फलानुत्पत्तिरिति न्यायेन भूयोभिरपि प्रतिहेतुभिरनुमितिप्रतिबन्धरूपफलानिर्वाहादित्यर्थः । एकेनापीति । व्याप्तिपक्षधर्मताभ्यां ज्ञायमानेनेत्यादिः । प्रतिबन्धात् । कार्यस्य । व्याप्तिपक्षधर्मताभ्यां एकमात्रहेतुज्ञानस्यापरानुमितिबन्धकताप्रयो-

ज्ञकं विरोध्यनुमितिसामग्रीत्वं दर्शयति । एकस्मादपीति ।

ननु सन्दिग्धोपाधेरदूषकतापत्तेरिति मूलमसङ्गतम्, तस्य सत्प्रतिपक्षोत्थापकत्वासम्भवेऽपि व्यभिचारसंशयाधायकत्वेन दूषकत्वसम्भवादित्याशङ्क्याह दीधितौ । उपाधित्वस्येति । उपाधित्वस्य संशयो निश्चयश्चानुमितिविरोधियद्विषयकज्ञानजनकस्तद्विषयकज्ञानजनकत्वमेवास्य सन्दिग्धोपाधेर्दूषकताबीजमिति नियमाभिप्रायेणेत्यर्थः । तथा च सत्प्रतिपक्षोत्थापकत्वेन निश्चितोपाधेर्दूषकत्वमते उपाधित्वनिश्चयस्य नानुमितिविरोधिव्यभिचारज्ञानजनकत्वमिति न तत्संशायकतया सन्दिग्धोपाधेर्दूषकतासम्भवः । अस्येत्यत्रेदंशब्दस्य नोपाधिसामान्यपरत्वम्, तथा सत्युपाधित्वसंशयस्य साध्यव्यापकाभावज्ञानजनकतया दूषकत्वान्निश्चितोपाधेरपि तद्द्वारा दूषकत्वानुपपत्त्या उपाधिमात्रस्यैवादूषकतापत्त्या सन्दिग्धेत्यभिधानासङ्गतेः । सन्दिग्धोपाधेः सत्प्रतिपक्षानुत्थापकत्वे तद्व्यतिरेकस्य पक्षे सन्दिग्धत्वादिति मूलोक्तहेतुर्न साधकः, साधनाव्यापकत्वेन निश्चितस्य साध्यव्यापकत्वेन च सन्दिग्धस्योपाधेर्व्यतिरेकस्य पक्षे सन्दिग्धत्वादिति पूरयन् व्याचष्टे तद्व्यतिरेकस्येति । क्वचिदिति । साध्यव्यापकतासंशयस्थल इत्यर्थः । क्वचिच्चेति । साधनाव्यापकत्वसंशयस्थले चेत्यर्थः ।

(चि०) पक्षवृत्तिश्चोपाधिर्न स्यात्, यथा घटोऽनित्यो द्रव्यत्वादित्यत्र कार्यत्वम्, अन्धकारो द्रव्यं स्वातन्त्र्येण प्रतीयमानत्वादित्यत्राश्रावणत्वम्, तद्व्यतिरेकस्य पक्षावृत्तित्वात्, न च नायमुपाधिः, तल्लक्षणसत्त्वात्, अन्यथाऽपि दूषकत्वसम्भवाच्च, किञ्च साध्यव्यापकव्याप्यत्वेनोपाधेस्साध्याव्यापकत्वे तद्व्यतिरेकेण कथं सत्प्रतिपक्षः ? न ह्यव्यापकव्यतिरेकादव्याप्यव्यतिरेकः । नापि व्याप्तिविरहरूपतया, असिद्धत्वेनानौपाधिकत्वस्य व्याप्तित्वनिरासात् । नाप्यनौपाधिकत्वज्ञानस्य, व्याप्तिधीहेतुत्वस्य तत्त्वेन

व्याप्तिज्ञानकारणविघटकतया व्याप्यत्वासिद्धावन्तर्भावः । न ह्यन्यस्य साध्यव्यापकत्वसाधनाव्यापकत्वज्ञानमन्यव्याप्तिज्ञानं प्रति प्रतिबन्धकमित्युक्तम् ।

(दी०) ननु बाधे ऽवतीर्णे तत एव हेतोरसाधकत्वात्कृतमुपाधिना, न वाऽसाधारण्यम्, पक्षस्यैव सपक्षत्वात्, अवतीर्णे तु नोपाधित्वम्, पक्षेतरान्तरवत्साध्यव्यापकताया एवाग्रहात् अनुकूलतर्कादिना कथञ्चित्तद्ग्रहे च नासाधारण्यम् व्यतिरेकितयाऽन्वयव्याप्त्यग्रहस्य सत्प्रतिपक्षतया च सत्प्रतिपक्षान्तरस्याकिञ्चित्करत्वात्, इत्यरुचेराह । पक्षवृत्तिश्चेति । पक्षे तद्ग्रहदशायां तदभावग्रहासम्भवादिति भावः । व्याप्तिविरहरूपतां निरस्य व्याप्तिज्ञानाभावद्वारकतां निरस्यति । नापीति । अनौपाधिकत्वज्ञानस्य । औपाधिकत्वज्ञानाभावस्य । कारणाविघटकतया । कारणाभावरूपताद‍ृशज्ञानविषयतया । अनौपाधिकत्वज्ञानस्य कारणत्वं नान्वयव्यतिरेकासिद्धम्, परन्तु सोपाधित्वज्ञानस्य प्रतिबन्धकताया विना कारणीभूतज्ञानविघटनमसम्भवित्वेन कल्पनीयम्, सैव त्वसिद्धेति दूषणतात्पर्याद्यथाश्रुतमेव साधीय इत्यपि वदन्ति । व्याप्यत्वासिद्धेर्व्याप्यत्वज्ञाने । अन्तर्भावः तद्द्वारा दूषकत्वम् ।

(गा०) बाधोऽपीतीत्यादि दूषणमुद्धृत्य दूषणान्तरमवतारयति नन्वित्यादिना । बाधे वह्न्यादावनुष्णत्वादौ । निश्चित इत्यर्थः । तत एव । बाधावतारादेव । हेतोः । कृतकत्वादेः । असाधकत्वात् । अनुष्णत्वादेरसाधकत्वात् । कृतमुपाधिनेति । तथा च तदा पक्षेतरस्यादूषकत्वेऽपि क्षतिविरहादिति भावः । सपक्षत्वात् । साध्याभावरूपसाध्यवत्त्वेन निश्चितत्वात् । हेतोश्च तद्व्यावृत्तत्वाच्चेति शेषः । अनवतीर्णे त्विति । बाध इत्यनुषज्यते । नोपाधित्वम् । नैव दूषकत्वम् ।

पक्षेतरान्तरत्वादिति । पर्वतो वह्निमानित्यादिस्थलीयपक्षेतरत्व इवे-त्यर्थः । साध्यव्यापकताया एवाग्रहादिति । पक्षे साध्यसन्देहस्य व्यभिचारसंशयतया साध्यव्यापकतानिश्चयप्रतिबन्धकत्वादिति भावः । व्यापकताग्राहकानुकूलतर्कसत्त्वे व्यभिचारसंशयो ऽकिञ्चित्कर इत्यत आह । अनुकूलेति । आदिपदात् स्वतःसिद्धव्यभिचाराग्रहपरिग्रहः । नासाधारण्यम् । तदभावस्य दोष इति शेषः । व्यतिरेकितया । साध्याभावगमकतौपयिकसाध्यव्यापकतानिश्चयविषयप्रतियोगिरूपव्यतिरेकप्रतियोगितया । अन्वयव्याप्त्यग्रहस्य । असाधारण्यप्रयुक्तस्य । अकिञ्चित्करत्वादित्यग्रिमेणान्वयः । सत्प्रतिपक्षतया । प्रतिरोधमात्रफलकतया । सत्प्रतिपक्षान्तरस्य । असाधारणतया विरोधिसाध्यसिद्ध्यौपयिकव्यापकतान्तरग्रहविषयप्रतियोगित्वकस्य । पक्षवृत्तिश्चेति मूलं पक्षवृत्तितया गृह्यमाणपरमित्याशयेन तस्य दूषकत्वानुपपत्तिबीजमाह । पक्ष इति ।

मूले तल्लक्षणसत्त्वादिति । साध्यव्यापकत्वे सति साधनाव्यापकत्वरूपलक्षणसत्त्वादित्यर्थः । साधनाव्यापकत्वस्थले पक्षावृत्तित्वप्रवेशे उक्तधर्मेषु लक्षणासत्त्वनिर्वाहमालोक्य अन्यथाऽपीति । व्यभिचाराद्युन्नायकतया ऽपीत्यर्थः । दूषकत्वसम्भवादिति । तथा च नोपाधित्वानभ्युपगमसम्भव इति भावः । साध्याव्यापकत्वे । साध्याव्यापकत्वग्रहे । अव्यापकेति । अव्यापकत्वेन गृहीतेत्यर्थः । अव्याप्येति । अव्याप्यतया गृहीतेत्यर्थः ।

नापि व्याप्तिविरहरूपतयेत्यादिना व्याप्यत्वासिद्ध्यन्तर्भावशङ्काया निराकृतत्वात् । नाप्यनौपाधिकत्वेत्यादिना पुनस्तदन्तर्भावशङ्कानिराकरणस्यासङ्गतिरित्याशङ्कां निराकरोति दीधितौ । व्याप्तिविरहेति । अत्रानौपाधिकत्वज्ञानरूपव्याप्तिज्ञानकारणविघटकतयोपाधित्वज्ञानस्य व्याप्तिज्ञानप्रतिबन्धकत्वं यथाश्रुतार्थः, तदर्थपरत्वे भिन्नधर्मकतया उपाधित्वप्रकारकज्ञानस्य स्वतो व्याप्तिज्ञानप्रतिबन्धकताखण्डनमनाशङ्कितनिराकरणमित्याशङ्क्य तद्ग्रन्थं व्याप्तेरनौपाधिकत्वरूपताविरहेऽपि व्याप्तिग्रहे स्वत उपाधिज्ञानं प्रतिबन्धकमित्यर्थकतया व्याचष्टे । अनौपाधिकत्वेति । औपाधिकत्वज्ञानं साध्यव्यापकत्वसाधनाव्यापकत्वाभ्यां कस्यचिद्धर्मिणो ज्ञानम्, न तु साधनधर्मिकं स्वाव्यापकसाध्यव्यापकत्वज्ञानम्, असमानधर्मिकतया

प्रतिबन्धकताखण्डनपराग्रिममूलग्रन्थासङ्गतेः । अभावरूपकारणप्रतिबन्धकासम्भवाद्विघटकपदस्य प्रतिबन्धप्रयोजकार्थकता न सम्भवतीत्यन्यथा व्याचष्टे । कारणेति । तादृशज्ञानेति । औपाधिकत्वज्ञानेत्यर्थः । असिद्ध्यन्तर्भावनायोपाधिनिष्ठतासम्पत्तये ज्ञानविषयतापर्यन्तानिवेशनम् । यथाश्रुतेऽप्यग्रिमदूषणग्रन्थं सङ्गमयतां मतमाह । अनौपाधिकत्वज्ञानस्येति । विनाकारणीभूतज्ञानविघटनं सोपाधित्वज्ञानस्य प्रतिबन्धकताया असम्भवित्वेनेति योजना । सोपाधित्वज्ञानस्येति । भिन्नधर्मितासम्पत्तये पूर्वमध्याहार्येयम् । असम्भवित्वेनि । जनकज्ञानं विघटयत एवेत्यादिनियमादिति भावः । सैव । तस्य प्रतिबन्धकतैव । असिद्धा । भिन्नधर्मिकत्वात् । सोपाधित्वज्ञानप्रतिबन्धकताया अनौपाधिकत्वज्ञानहेतुत्वसाधकतया शङ्कितुरभिप्रेतत्वे उपाधिज्ञानस्य साक्षात्प्रतिबन्धकस्य कारणाविघटकत्वकथनासङ्गतिरिति तत्प्रतिबन्धकतायाः शङ्कितुरनभिप्रेततया तन्निराकरणानौचित्यमत्रास्वरसबीजम् । व्याप्तिग्राहकाभावानात्मकत्वे व्याप्यत्वासिद्धहेत्वाभासेऽन्तर्भावासम्भवात् व्याप्यत्वासिद्ध इत्यादिकं कथितव्याप्तिज्ञानाभावद्वारकत्वार्थकतया व्याचष्टे । व्याप्यत्वासिद्ध इति ।

(चि०) न च साध्यव्यापकाव्याप्यत्वज्ञाने विद्यमाने साधनस्य साध्यव्याप्यत्वज्ञानं नोत्पत्तुमर्हतीति वाच्यम् । न हि साध्यव्यापकव्याप्यत्वज्ञानं व्याप्तिज्ञानकारणम् , येन तत्प्रतिबन्धकं स्यात्, किन्तु साध्यव्यापकव्यभिचारित्वेन साध्यव्यभिचारित्वज्ञानद्वारा । नापि व्यभिचारोन्नायकत्वेन, यथा हि साध्यव्यापकव्यभिचारित्वेन साधनस्य साध्यव्यभिचारित्वमनुमेयं तथा साध्यव्याप्यव्यभिचारित्वेन साध्यव्यभिचारित्वमुपाधेरप्यनुमेयम् , व्याप्तिग्राहकसाम्यात् । नापि साध्यव्यापिकाव्याप्यत्वेन व्याप्तिविरहोन्नायकतया, साध्यव्याप्याव्यापकत्वेनोपाधे-

रेव साध्याव्यापकत्वसाधनात् । तस्मादुपाधिर्हेत्वाभासान्तरमिति ।

(दी०) भिन्नधर्मिकत्वं परिहरन्नाह । न चेति । न हीति । विरोधिविषयकत्वाभावेन साक्षात्प्रतिबन्धकत्वासम्भवादिति भावः । साध्यव्याप्यव्यभिचारित्वेन साध्यव्यभिचारित्वमित्युभयत्रैव बहुव्रीहिः । तस्मादित्यादेरदूषणं वेति शेषः ।

(गा०) भिन्नधर्मिकत्वापरिहारेण न चेत्यादिना उपाधिज्ञानदशायां व्याप्तिज्ञानोत्पत्त्यसम्भवकथनेन तस्य प्रतिबन्धकत्वव्यवस्थापनं न सङ्गच्छते, तद्दशायामन्यत्र व्याप्तिज्ञानानुत्पादस्य परासिद्धत्वादिति भिन्नधर्मिकत्वपरिहारेण सोपाधित्वग्रहस्य व्याप्तिग्रहानुत्पादप्रयोजकत्वप्रदर्शनपरतां तद्ग्रन्थस्याह । भिन्नेति । बाधादिबुद्धेर्विशिष्टबुद्धाविव जनकज्ञानाविरोधित्वेऽपि सोपाधित्वज्ञानस्य समानधर्मिकव्याप्तिज्ञाने प्रतिबन्धकत्वं सम्भवतीति कथं न हीत्यादिना जनकज्ञानाविरोधित्वेन तत्प्रतिबन्धकताखण्डनमित्याशङ्कानिराकरणाय प्रकृते बाधादिबुद्धिवैधर्म्यं दर्शयति । विरोधीति । ग्राह्याभावादीत्यर्थः । असम्भवादिति । ग्राह्याभावाद्यविषयकज्ञानस्य साक्षादप्रतिबन्धकत्वनियमादिति भावः ।

मूले येनेत्यस्य कारणविघटनद्वारेति शेषः । तर्हि किन्द्वारेत्याकाङ्क्षायामाह । किन्त्विति ।

तथा साध्यव्याप्यव्यभिचारित्वेन साध्यव्यभिचारित्वमिति मूलस्य यथाश्रुतासङ्गतिः, उपाधौ साध्यव्यभिचारज्ञानस्य उपाधित्वघटकसाध्यव्यापकताज्ञानाविरोधितया ऽप्रसक्तत्वात् साध्यव्याप्यव्यभिचारस्य साध्य एव साध्यव्यभिचारव्यभिचारितया तदनुमापकत्वात् , इत्यतो व्याचष्टे । उभयत्रैव बहुव्रीहिरिति । साध्यव्याप्यव्यभिचारि यस्येति बहुव्रीहिणा तृतीयान्तस्य व्याप्याव्यापकत्वेनेत्यर्थः, साध्यं व्यभिचारि यस्येति बहुव्रीहिणा चरमपदस्य साध्याव्यापकत्वमित्यर्थः । इति नोक्तदूषणद्वयावकाश इति भावः । कलङ्कदोषानन्तर्भावे उपाधेरदूषकत्वमपि सम्भवतीति उपाधिर्हेत्वा-

भासान्तरमिति निर्भरो नोपपद्यत इत्यतः पूरयति । अदूषणं वेति(१) ।

(चि०). उच्यते । आर्द्रेन्धनवत्त्वादेस्तर्कादिना साध्यव्यापकत्वसाधनाव्यापकत्वे निश्चिते दूषकताबीजचिन्तनम्, यदि हि साध्यसाधनसहचारदर्शने नोपाधौ साध्यव्यापकतानिश्चय एव नास्ति, तदोपाधित्वनिश्चयाभावाद् दूषकतैव नास्तीति क्व बहिर्भावान्तर्भावचिन्ता । किञ्च सत्प्रतिपक्षतया व्याप्यत्वासिद्धतया स्वातन्त्र्येण वा यदि दोषत्वं सर्वथा साध्यव्यापकतानिश्चयो वाच्यः, तेन विना तेषामभावात् । तस्मादुपाधिनिश्चयाद्व्यभिचारनिश्चयः तत्संशयात्तत्संशय इति व्यभिचारज्ञानद्वारा । साध्यव्यापकाव्याप्यत्वेन व्याप्तिविरहोन्नायकतया वोपाधेर्दूषकत्वम् । यद्वा साध्यव्यापकाभाववद्वृत्तितया साध्यव्यभिचारित्वमुन्नेयम् । न च साधनाभाववद्वृत्तित्वमुपाधिरिति वाच्यम् । उपाधिमात्रोच्छेदप्रसङ्गात् । सत्प्रतिपक्षे पूर्वसाधनव्यतिरेकवत् । अवृत्तिगगनादौ साध्याव्यापकत्वात् संयोगादौ हेतौ साधनव्यापकत्वाच्च ।

(दी०) दूषकताबीजचिन्तनमिति निश्चयदशामधिकृत्य । यन्निश्चयद्वारोपाधित्वनिश्चयस्य दूषकत्वं तत्संशयद्वारा तत्संशयस्यापि तथात्वमिति भावः । व्यभिचारज्ञानद्वारेति । मानसे व्यभिचारनिश्चये उपाधिज्ञानं विशेषदर्शनरूपत्वेनोपयुज्यते, व्यभिचारानुमानं पुनरग्रे वक्ष्यति ।

(१) इतः परं समाप्तिपर्यन्तं पुस्तकान्तरे पाठो न दृश्यते ।

(गा०) साध्यव्यापकतायास्साधनाव्यापकताया वा निश्चयविरहेऽपि सन्दिग्धोपाधेर्दूषकतया तन्निश्चयस्थल एव दूषकताबीजविचार इति मूलोक्तासङ्गतिमाशङ्क्याह । दूषकतेति । निश्चयदशामिति । उपाधिना दूषकत्वदशाभिप्रायेणेत्यर्थः । उपाधित्वसंशयदशायां कथं दूषकत्वमित्याकाङ्क्षापूरणाय भावं व्याचष्टे । यन्निश्चयेति । तत्संशयस्यापीति । उपाधित्वसंशयस्यापीत्यर्थः । इदानीं व्यभिचारसंशयद्वारकत्वमुपाधिसंशयस्य सामान्यतोऽभिप्रेतम्, तत्संशयात्तु तत्संशय इत्यग्रिमग्रन्थेन च विशेषतस्तदभिधास्यत इति न पौनरुक्त्यम् । व्यभिचारज्ञानद्वारेति मूले ज्ञानपदस्यानुमितिसंशयोभयपरत्वे यद्वेत्यादिना वक्ष्यमाणस्य व्यभिचारोन्नायकतापक्षस्यानेन सह पौनरुक्त्यमित्यत आह । मानस इति । उपयुज्यत इत्यत्रोक्तम्, न तु तदनुमापकत्वमिति शेषः । व्यभिचारानुमानम् । उपाधिर्व्यभिचारानुमापकम् ।

(दी०) व्याप्तीति । साध्यसम्बन्धितावच्छेदकरूपविरहः साधनतावच्छेदके साध्यसम्बन्धितानवच्छेदकत्वपर्यवसन्नः साध्यवदन्यावृत्तित्वविशिष्टसाध्यवद्वृत्तित्वविरहो वोन्नेयः, न तु स्वसमानाधिकरणात्यन्ताभावप्रतियोगिसाध्यकत्वम्, स्वत्वस्यानुगतस्याभावेन तत्तत्साधनपर्यवसाने साध्यप्रसिद्धिमात्रेणैव कृतार्थत्वात् । साध्यव्यापकोपाधिव्यभिचारित्वेन हेतौ साध्यव्यभिचारित्वं साधनाव्यापकोपाधिव्याप्यत्वेन साध्ये साधनाव्यापकत्वमनुमेयमिति तु नव्याः । व्यतिरेकिणि साधने व्याप्तिविरहस्य व्यभिचारस्य चोन्नयने उपाधिः साधनाभाववद्वृत्तित्वम् । व्यभिचारास्फुटतादशायामुपाध्यनुसरणाद्यत्राधिकरणे हेतोः साध्यव्यभिचारित्वं तदीयधर्मे नास्य साध्याव्यापकत्वग्रहः । उपाधिमात्रेति । तेनापि व्यभिचारानुमाने तत्रापि तथाविधोपाधिसम्भवादिति भावः । वस्तुतस्तु व्यापकव्यभिचारिणो व्याप्यव्यभिचारित्वे व्याप्यव्यापकभावव्याघातापत्त्या हेतोः सा-

व्यव्याप्यत्वेन साधनाभाववद्वृत्तित्वस्य साध्याव्यापकत्वान्नोपाधित्वमिति तत्त्वम् । अवृत्तीति व्याप्यत्वाभावसाधनाभिप्रायेण । साधनाव्याप्यस्योपाधित्वे च नैष दोषः ।

(गा०) व्याप्तिविरहोन्नायकतया वेत्यत्र स्वव्यापकसामानाधिकरण्यरूपव्याप्तेर्विवक्षितत्वेऽसङ्गतिः, तादृशव्याप्तेः सोपाधिसाधनघटिताया अप्रसिद्ध्या तदभावाप्रसिद्धेः,साधनान्तरघटिततादृशव्याप्तिविरहग्रहस्य च प्रकृतव्याप्तिग्रहाविरोधित्वात्, तद्वदन्यावृत्तित्वरूपव्याप्तेर्विवक्षितत्वे तदभावो व्यभिचार एवेति कल्पभेदानुपपत्तिः, अतो व्याप्त्यन्तरपरतामाह । साध्येत्यादि । तथा च धूमादावेव धूमादिरूपसाध्यसम्बन्धितावच्छेदकरूपव्याप्तेः प्रसिद्ध्या आर्द्रेन्धनादिव्यभिचारेण वह्न्यादौ तदभावसाधने न दोष इति भावः । अवच्छेदकत्वं च स्वरूपसम्बन्धविशेषः, स्वत्वघटिततया ऽननुगमेन विशिष्य साधनतावच्छेदकानां निवेशनीयतया व्यभिचारिणि प्रतियोग्यप्रसिद्ध्या साध्याप्रसिद्धेर्दुर्वारत्वात् ।

ननु द्रव्यं सत्त्वादित्यादौ सत्तादिहेतोः साध्यसम्बन्धितावच्छेदकविशिष्टसत्तात्वादिमत्त्वादुपाधिव्यभिचारेण तत्रापि तदभावसाधने बाध इत्यत आह । साधनेति । साध्यसम्बन्धितानवच्छेदकत्वेति । तथा च शुद्धसत्तात्वादिरूपसाधनतावच्छेदके उपाध्यभाववद्वृत्तितावच्छेदकत्वेन द्रव्यत्वादिसामानाधिकरण्यानवच्छेदकत्वं साधनीयम्, तत्र च न बाधावसरः, तत्तत्साधनतावच्छेदके तदवच्छेदकत्वावगाहिनो ऽनुमितिजनकज्ञानस्य विरोधितयोपपत्तेरिति भावः । स्वरूपसम्बन्धरूपावच्छेदकत्वघटितोक्तव्याप्तेर्व्याप्तिवादे स्वयं दूषितत्वादव्यभिचरितसामानाधिकरण्यरूपव्याप्त्यभावस्योन्नायकतामाह । साध्यवदिति । विरहो वेति । एतादृशव्याप्तिविरहो न व्यभिचाररूपः, अपि तु तदतिरिक्तोऽवृत्तिवृत्तिः साधनाभावरूपव्याप्त्यप्रसिद्ध्यप्रतियोगिकश्चाति सामञ्जस्यम् ।

यदि च लाघवात्साध्यवदन्यावृत्तित्वविशिष्टवृत्तिमत्त्वमेव व्याप्तिरुच्यते, तदा तदभाव एवात्र विवक्षितः । ननु स्वव्यापकसाध्यसामानाधिकरण्याभावस्याप्रसिद्ध्या साधनासम्भवेऽपि स्वाव्यापकसाध्यकत्वस्य प्रसिद्धस्य साधनं कथमुपेक्षितम्, तज्ज्ञानस्यापि

स्वहेतुकानुमितिजनकज्ञाने साध्यांशे स्वव्यापकत्वभानाविरोधित्वोपयुक्तत्वादित्यत आह । न त्विति । स्वसमानेति । स्वसमानाधिकरणाभावप्रतियोगितावच्छेदकसाध्यतावच्छेदककत्वमित्यर्थः । उन्नेयमिति विपरिणतेन सम्बन्धः । तत्तत्साधनपर्यवसाने । विशिष्य तत्तत्साधनानां साध्यविशेषणाद्यव्यापकत्वघटकतया निवेशने । कृतार्थत्वादिति । उक्तसाध्यप्रसिद्धावेव प्रकृतसाध्यविशेषणतया प्रकृतसाधनाव्यापकत्वभानेन तस्या एव प्रकृतसाध्यसाधनव्याप्तिग्रहप्रतिबन्धकतया समीहिते सिद्धे साधने उपाधिव्यभिचारेण स्वाव्यापकसाध्यकत्वानुमानवैयर्थ्यात् । साध्यवदन्यावृत्तित्वविशिष्टसाध्यसामानाधिकरण्याभावसाधनेऽपि साधने विशेष्यविशेषणभावेनापन्नाव्यभिचारसाध्यसामानाधिकरण्योभयप्रकारकानुमितिजनकज्ञानस्य विशिष्टाभावप्रकारकज्ञानाप्रतिबध्यस्य सम्भवाद्व्यभिचारिमात्रसाधनेनैव चानुमितिजनकज्ञानप्रतिबन्धकसम्भवाद्विशिष्टाभावानुमानमफलमित्यालोच्याव्यभिचाररूपव्याप्तिग्रहविघटनाय व्यभिचारः साधने साधनीयः व्यापकसामानाधिकरण्यरूपव्याप्तिज्ञानप्रतिबन्धाय परसाध्ये साधनाव्यापकत्वमेव साधनीयम्, न तु साधने स्वाव्यापकसाध्यसामानाधिकरण्यं स्वाव्यापकसाध्यकत्वं वा, येन साध्याप्रसिद्ध्यादिरिति निष्कृष्टमतमाह । साध्येति । केवलान्वयिनि साधने व्यभिचाराद्यनुमानेऽप्रसिद्ध्या साधनाभाववद्वृत्तित्वोपाधिशङ्कानवकाशाद्व्यतिरेकिसाधनपक्षकव्यभिचाराद्यनुमानपरतां शङ्काग्रन्थस्याह । व्यतिरेकिणीति । व्यभिचारानुमाने तादृशोपाधेः साध्यशून्ये ऽवृत्तौ वक्ष्यमाणसाध्याव्यापकत्वासङ्गतेर्व्यभिचारानुमान एव च तस्य सम्भवदुक्तिकोपाधिताकतया च शङ्काया उभयानुमानपरतामाह । व्याप्तीति । ननु व्यभिचारनिरूपकाधिकरणमात्रवृत्तिधर्मे साध्यव्यभिचारिणि साधनाभाववद्वृत्तित्वासत्त्वात्कथं तस्य साध्यव्यभिचाररूपसाध्यव्यापकत्वघटितोपाधित्वं ग्राह्यमित्यत आह । व्यभिचारास्फुटतादशायामिति । साधनाधिकरणे साध्याभावानिश्चयदशायामित्यर्थः । उपाध्यनुसरणात् । उपाधित्वेन व्यभिचारानुमानात् । तन्निश्चयदशायां तदनुमानवैयर्थ्यादिति भावः । अस्य । साधनाभाववद्वृत्तित्वस्य । साध्याव्यापकत्वग्रहः । साध्याव्यभिचाररूपसाध्याव्यापकत्वनिश्चयः । तादृश-

धर्मे साध्यव्यभिचाररूपसाध्यानिश्चयादिति भावः।

मूले उपाधिमात्रोच्छेदप्रसङ्गादिति। उपाधिमात्रस्यैव व्यभिचारानुमापकत्वोच्छेदप्रसङ्गादित्यर्थः।

साधनाभाववदवृत्तित्वरूपोपाधिव्यभिचारहेतुकव्यभिचारानुमानमेवास्ति कथमुपाधिमात्रोच्छेद इत्याशङ्कापरिहारायात्र हेतुमाह दीधितौ। तेनापीति। साधनाभाववदवृत्तित्वोपाधिनापीत्यर्थः। साधनाभाववदवृत्तित्वरूपोपाधिव्यभिचारेणेति यावत्। व्यभिचारानुमाने। स्वव्यभिचारद्वारा कर्त्तव्ये। तत्रापि। तादृशव्यभिचारानुमानेऽपि। तथाविधेति। उपाधिव्यभिचाररूपसाधनाभाववदवृत्तित्वरूपेत्यर्थः।

व्यभिचारानुमानासम्भवेऽपि तत्संशायकतया उक्तोपाधिदूषणं स्यादेवेत्यतस्तदनुपाधित्वनिश्चयं स्वयमुपपादयति। वस्तुतस्त्विति। व्यापकव्यभिचारिण इति। साध्यव्यापकत्वेन निश्चितस्य व्यभिचारोन्नायकोपाधेर्व्यभिचारितया निश्चितस्य प्रकृतहेतोः। व्याप्यव्यभिचारित्वे। प्रकृतसाध्याव्यभिचारित्वे। व्याप्यव्यापकभावव्याघातापत्त्या। साध्योपाध्योर्व्याप्यव्यापकभावभङ्गापत्त्या। उपाधिव्यभिचारि साधनं यदि साध्यव्यभिचारशून्यं स्यात्, उपाधिव्यभिचारशून्यवृत्तिः स्यात् इति यावत्, तदा साध्यव्यापकव्यभिचारो न स्यादित्याकारा उपाधिव्यभिचारे साध्यव्यभिचारव्यभिचारशङ्कानिवर्त्तकापत्तिर्बोध्या। हेतोः। उपाधिव्यभिचारस्य। साध्यव्याप्यत्वेन। साध्यव्यभिचाररूपसाध्यव्याप्यतया निश्चयेन। साधनाभाववदवृत्तित्वस्येति। उपाधिव्यभिचाररूपहेत्वव्यापकतया निश्चितस्येत्यादिः। साध्याव्यापकत्वात्। साध्याव्यभिचाररूपसाध्याव्यापकत्वनिश्चयात्। नोपाधित्वम्। नोपाधित्वग्रहः। नैष दोषः। नावृत्तौ साध्याव्याप्यत्वरूपसाध्याव्यापकत्वम्, उपाधेरपि तत्र सत्त्वादिति शेषः।

(दी०) साधनेति यथाश्रुताभिप्रायेण, प्रतियोगिव्यधिकरणसाधनाभाववदवृत्तित्वस्य साधनवदन्यवृत्तित्वस्य चोक्तौ तथात्वासम्भवात्। एवञ्च सत्प्रतिपक्षे निश्चितोपाधिवत्सान्दिग्धोपाधिरुद्भाव्यः। न च तत्कर्त्तव्यस्य व्यभिचारसन्देहस्य प्रति-

हेतुसमाजादेव सिद्धेः किं तेनेति वाच्यम्। परस्परसंवलनेनैवानुमित्यनुत्पादे तत्र, व्यभिचारसन्देहस्यावश्यमुत्पत्तौ मानाभावात् उपाधिसन्देहाद्विशिष्यैकत्र व्यभिचारसन्देहेन तुल्यबलत्वाभावात्। न चातुल्यबलेन सत्प्रतिपक्षो व्यभिचारादिशङ्काधानं वा, स्वरसतः सन्दिग्धव्यभिचारादिनापि तथात्वप्रसङ्गादिति। अत्र च क्वचिदुपाधेस्तुल्यबलत्वे सत्प्रतिपक्षोन्नायकतया तर्कादिसाचिव्यादधिकबलत्वे च बाधोन्नायकतयापि दूषकत्वम्, व्याप्त्यादिप्रतिसन्धाने तदुन्नयनस्य ततोऽनुमितिप्रतिरोधस्य च दुर्वारत्वात्। परन्तु सार्वत्रिकत्वं न तस्येति ध्येयम्।

(मा०) संयोगादिहेतुकव्यभिचारानुमानेऽप्युपाधेः साधनाव्यापकत्वमुपपादयिष्यन्नाह। यथाश्रुतेति। उक्तौ उपाधितयोक्तौ। तथात्वम्। साधनाव्यापकत्वम्। सत्प्रतिपक्षोत्थापकतया दूषकतापक्षे सन्दिग्धोपाध्युद्भावनप्रसङ्गस्य पूर्वपक्षे उक्तत्वात् प्रसङ्गमुद्धरति। एवं चेति। व्यभिचारज्ञानद्वारोपाधेर्दूषकत्वे चेत्यर्थः। तत्कर्तव्यस्य। सन्दिग्धोपाधिफलस्य। प्रतिहेतुसमाजादेव सिद्धेरिति। एकधर्मिगते विरुद्धभावाभावसाध्यकतयोपन्यस्तहेतुद्वये तत्तत्साध्यसाधनौपयिकव्याप्तिद्वयसत्त्वं साध्यतदभावव्याप्ययोरविरोधप्रसङ्गेनासम्भवीति प्रतिसन्धानेन सत्प्रतिपक्षसंवलनादुभयत्र हेतौ स्वसाध्यव्यभिचारसंशयस्य सिद्धेरित्यर्थः। किं तेनेति। किमुपाधिसन्देहेनेत्यर्थः। तथा च सत्प्रतिपक्षे सन्दिग्धोपाध्युद्भावनमफलमिति भावः। परस्परसंवलनेनेति। विरोध्यनुमितिसामग्र्योर्मिथो मेलनेनैवेत्यर्थः। अनुमित्यनुत्पादे। साध्यतदभावयोरनुमित्यनुत्पादोपपत्तौ। तस्य व्यभिचारसंशयाकल्पकत्वेनेति शेषः। तत्र। सत्प्रतिपक्षसंवलनस्थले। अवश्यमुत्पत्तौ। उक्तप्रतिसन्धानात्तदुत्पत्तेरावश्यकत्वे। मानाभावादिति। तथा च प्रतिहेतौ व्यभिचारसंशयार्थं सन्दिग्धोपाध्युद्भावनमुपयुक्तमेवेति भावः।

ननु तथापि सन्दिग्धोपाधिरकिञ्चित्करः, प्रतिहेतोरनुमित्यनुत्पादकतायाः सत्प्रतिपक्षसंवलनादेव सिद्धेरित्याशङ्कानिवृत्त्यर्थं प्र-

तिहेतोर्दुर्बलत्वे प्रकृते साध्यसिद्धिनिर्वाह इति तस्य हीनबलतार्थं सन्दिग्धोपाध्युद्भावनमित्याह उपाधिसन्देहादिति । एकत्रेति । उपाध्युद्भावनविषयहेतावित्यर्थः । तुल्यबलत्वाभावादिति । तस्य हेतोर्हेत्वन्तरापेक्षया हीनबलत्वादित्यर्थः । तदर्थं सन्दिग्धोपाध्युद्भावनौचित्यादिति शेषः ।

प्रतिहेतौ हीनबलत्वेन किमुपक्रियत इत्याकाङ्क्षायामाह । न चेति । न हीत्यर्थः । अतुल्यबलेन । हीनबलेन । प्रतिहेतुना । सत्प्रतिपक्षः । अनुमितिप्रतिबन्धः । तुल्यबलविरोध्यनुमितिसामग्र्या एवानुमितिप्रतिबन्धकत्वादित्यर्थः । तथा च स्वाभिमतसाध्यसिद्ध्यर्थमेव प्रतिहेतौ सन्दिग्धोपाध्युद्भावनादिति भावः । हीनबलप्रतिहेतुज्ञानस्य स्वतोऽनुमित्यप्रतिबन्धकत्वेऽपि प्रकृतहेतौ व्यभिचारशङ्कासम्पादनेनानुमितिविरोधित्वमेवेत्याशङ्कां परिहरति । व्यभिचारशङ्काधानं चेति । विनिगमकबलेन हीनबले व्याप्तिभङ्गावधारणे ऽधिकबले व्याप्तिनिश्चयादिति भावः । स्वरसत इति । उपाधिसन्देहाद्यघटितसामग्रीतोऽपीत्यर्थः । तथात्वप्रसङ्गात् । सत्प्रतिपक्षादिप्रसङ्गात् । व्यभिचारोन्नायकतया ऽव्याप्यत्वोन्नायकतया च दूषकत्वमुपाधेर्मूलकृतोक्तम्, न तु सत्प्रतिपक्षोन्नायकतया, क्वचित्तु तदुन्नायकतयाऽपि दूषकत्वसम्भवान्मूले न्यूनतेति स्वयं तदाह । अत्र चेति । ध्येयमित्यग्रिमेण सम्बध्यते । तुल्यबलत्वे इति । साध्यधर्मिकप्रकृतहेतुव्यापकताग्राहकसामग्रीतुल्यबलस्वधर्मिकसाध्यव्यापकताग्राहकतायामित्यर्थः । सत्प्रतिपक्षोन्नायकतयेति । दूषकत्वमित्यग्रिमेण सम्बध्यते । सत्प्रतिपक्षोन्नायकत्वम् । साध्यानुमितिसामग्रीतुल्यबलसाध्याभावानुमितिसामग्रीसम्पादकत्वम् । अधिकबलत्वे इति । निश्चितप्रामाण्यकसाध्यव्यापकताग्रहविषयत्व इत्यर्थः । तथा सति प्रकृतहेतौ साध्यव्याप्तिग्रहे ऽप्रामाण्यग्रहेण साध्यानुमितिसामग्र्याः साध्याभावानुमित्यप्रतिबन्धकत्वेन साध्याभावानुमापकतया । दूषकत्वम् । साध्यानुमितिविरोधित्वम् । साध्यानुमितिसामग्र्या अपूर्णतयाऽपि तदनुमित्यनुत्पादसम्भवात् सम्भेदे नान्यतरवैयर्थ्यमिति न्यायेन बाधनिश्चयस्याप्यनुमितिविरोधित्वं दुर्वारम् । व्याप्त्यादिप्रतिसन्धान इति । उपाधेः निश्चितप्रामाण्यकसाध्यव्यापकत्वज्ञाने तदभावस्य च पक्षधर्मतानिश्चये । तदुन्नयनस्य । बाधोन्नयन-

स्य । तत इति । तुल्यव्यापकत्वादिग्रहविषयोपाधित इत्यर्थः । अनुमितिप्रतिरोधस्य । प्रतिरोधकरूपसत्प्रतिपक्षोत्थापनस्य । सार्वत्रिकत्वं न तस्येति । यथा साधनाव्यापकत्वघटितोक्तलक्षणाक्रान्तस्योपाधेर्व्यभिचारस्याव्याप्यत्वस्य चोन्नायकत्वं सार्वत्रिकं तथा न बाधादुन्नायकत्वम्, पक्षे साध्यवति तदसम्भवादिति भावः ।

(चि०) अथोपाध्याभासाः । असाधारणविपर्ययो यथा अन्वयव्यतिरेकिणि साध्ये बाधोन्नीतान्यपक्षेतरत्वम् । अप्रसिद्धसाध्यविपर्ययो यथा केवलान्वयिनि साध्ये पक्षेतरत्वादिः । बाधितसाध्यविपर्ययो यथा वह्निरुष्णस्तैजसत्वादित्यत्राकृतकत्वम् । पक्षाव्यापकविपर्ययो(१) यथा क्षित्यादिकं सकर्तृकं कार्यत्वादित्यत्राणुव्यतिरिक्तत्वम् । अत्राणुव्यतिरेकस्य क्षित्यादेरेकदेशवृत्त्या भागासिद्धेः । पूर्वसाधनव्यतिरेको यथा शर्करारसोऽनित्योऽनित्यवृत्तिगुणत्वात्, रसो नित्यो रसनेन्द्रियजन्यनिर्विकल्पकाविषयत्वात् रसत्ववदित्यादौ, पूर्वसाधनतायाः प्रयोगानुरोधित्वेनाव्यवस्थितत्वात् कदाचिन्नित्यत्वसाधनव्यतिरेकस्योपाधित्वं कदाचिदनित्यत्वसाधनव्यतिरेकित्वस्येति वस्तुव्यवस्था न स्यात्, उपाधेर्नित्यदोषत्वाच्च । न हि यद्येन सोपाधिसम्बद्धं तत्तेनानुपाधित्वसम्बद्धं सम्भवति, न तु सत्प्रतिपक्षोच्छेदः पूर्वसाधनव्यतिरेकस्यानुपाधित्वे बीजम् । स्थापनाया यत्राभासत्वं तत्र पूर्वसाधनव्यतिरेकस्य साध्यव्यापकत्वेनानुपाधित्वात् । न च पूर्वहेतोरतत एवासाधकत्वात् सत्प्रतिपक्षवैयर्थ्यं

(१) पक्षाविपर्यय इति पु० पा० ।

तत्रेति वाच्यम् । अगृह्यमाणविशेषदशायां सत्प्रतिपक्षसम्भवात् । पूर्वसाधनव्याप्यव्यतिरेको यथा अकर्तृकत्वानुमाने नित्यत्वादिः । पक्षविपक्षान्यतरान्यो यथा प्रसिद्धानुमाने पर्वतजलह्रदान्यतरान्यत्वम् । पक्षेतरसाध्याभावो यथा अत्रैव पर्वतेतराग्निमत्त्वम् । न चात्र व्यर्थविशेषणत्वं दूषणम्, तत्त्वेऽप्युपाधेराभासत्वात् । तत्तुल्यश्च यथा अत्रैव पर्वतेतरेन्धनवत्त्वम् । एवं वह्निसामग्र्यादिकमूह्यम् ॥

इति तत्त्वचिन्तामणावुपाधिप्रकरणम् ॥

(दी०) असाधारणविपर्यय इति । इदं च सत्प्रतिपक्षोन्नायकत्वमभिप्रेत्य । यद्यपि व्यतिरेकेण सत्प्रतिपक्षत्वे सत्प्रतिपक्षान्तरस्यादोषत्वान्नासाधारण्यं दोषाय, तथापि सत्प्रतिपक्षोन्नयनौपयिकसाध्यव्यापकत्वग्राहकप्रमाणाभावे तात्पर्यम् ।

(गा०) ननूपाधेरसाधारणविपर्ययत्वं कथमाभासताप्रयोजकम्, तद्व्यतिरेकस्यासाधारण्येन पक्षे साध्याभावासाधकत्वेऽपि तद्व्यभिचारेण हेतौ साध्यव्यभिचारसाधने असाधारण्यानवकाशेन तत्साधकतया दूषकत्वसम्भवात्, दूषकत्वे सदुपाधिताया दुर्वारत्वादित्यत आह । इदं चेति । असाधारणविपर्ययस्याऽऽभासताधानं चेत्यर्थः । सत्प्रतिपक्षोन्नायकत्वमभिप्रेत्येति । यत्र सत्प्रतिपक्षोन्नयनार्थमुपाध्युद्भावनं तादृशस्थलाभिप्रायेणेत्यर्थः । व्यतिरेकेणेति । उपाधिव्यतिरेकहेतुनेति शेषः । सत्प्रतिपक्षत्वे । साध्याभावसाधने । असाधारण्यम्, न दोषायेत्यनेन सम्बध्यते ।

ननु व्यतिरेकिणि असाधारणफलस्यान्वयव्याप्यग्रहस्याकिंचित्करत्वेऽपि सत्प्रतिपक्षप्रयोजकतया असाधारण्यं दोष एवेत्यत आह ।

सत्प्रतिपक्षे इति । पक्षोन्नायकतयेत्यर्थः । अदोषत्वात् । अदोषतायाः व्यवस्थापितत्वात् । प्रमाणाभावे तात्पर्यमिति । असाधारणविपर्ययस्य प्रसिद्धानुमानीयपर्वततरत्वादेस्तादृशप्रमाणाभावेनादूषकत्वादुपाध्याभासत्वे तात्पर्यम् । यद्यप्येवं व्यभिचारोन्नायकत्वे व्याप्यत्वानवकाशः, तत्रातिव्यापकतानिश्चयस्यापेक्षितत्वात्, तथापि असाधारणविपर्ययतयैवोपाध्याभासतेति यथाश्रुताभिप्रायेण सत्प्रतिपक्षोन्नायकत्वाभिप्रायेणेति प्रथममुक्तम् ।

(दी०) तदयं निष्कर्षः, यत्र यद्दोषोन्नायकतया दूषणत्वमुपाधेस्तत्र तदुन्नयनौपयिकरूपवैकल्यमेवाभासत्वे प्रयोजकम्, एवं च यत्र स्थापनायां पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धिरुद्देश्या तत्र पक्षाव्यापकविपर्ययस्याभासत्वम्, तद्विरहेण पक्षैकदेशे सत्प्रतिपक्षेऽप्येकदेशान्तरे साध्यसिद्धेरप्रत्यूहत्वात्, यत्र तु पक्षतावच्छेदकावच्छेदेन तथा तत्र तादृशस्योपाधित्वमेव, एकदेशे प्रतिपक्षस्यापि तादृशसिद्धिविरोधित्वात् साध्यविपर्ययस्यासत्त्वमनुपाधित्वे प्रयोजकम्, न त्वज्ञातम्, अज्ञातस्यापि तस्य व्यापकव्यतिरेकेण सिद्धिसम्भवात् ।

(गा०) उपाधेराभासताबीजं सर्वसाधारणं निर्वक्ति । तदयमित्यादिना । दूषणत्वमुपाधेरिति । उपाधिमुद्भावयतोऽभिमतमिति शेषः । एवं सति पक्षाव्यापकविपर्ययस्य यत् उपाध्याभासत्वमुक्तं तदपि न सार्वत्रिकमित्याह । एवं चेति । सामानाधिकरण्येन। सामानाधिकरण्यमात्रेण । आभासत्वमिति । अदूषकत्वादिति शेषः । अदूषकत्वमेव विवृणोति । पक्षैकदेशे इति । सत्प्रतिपक्षेऽपि पक्षतावच्छेदकसामानाधिकरण्यमात्रेण साध्याभावव्याप्यवत्ताज्ञानसम्पादनेऽपि । तादृशोपाधिव्यतिरेकस्य पक्षतावच्छेदकावच्छेदेनावर्तमानतया तदवच्छेदेन साध्याभावव्याप्यवत्ताज्ञानासम्पादकत्वादिति भावः । एकदेशान्तरे इति । पक्षतावच्छेदकसामानाधिकरण्यमात्रेणेत्यर्थः । उपाधित्वमेव । न तु तदाभासत्वम् । दूषक-

त्वादिति शेषः। तदेव दर्शयति। एकदेश इति। तादृशसिद्धिविरोधित्वात्। अवच्छेदकावच्छेदेनानुमितौ विरोधित्वात्। अप्रसिद्धसाध्यविपर्यय इत्यत्राप्रसिद्धपदस्य तदानीमज्ञायमानत्वार्थकताभ्रमनिराकरणाय साध्यविपर्ययस्याज्ञाततत्त्वरूपमप्रसिद्धत्वं नोपाधेराभासताप्रयोजकम्, बीजाभावात्, किन्तु अत्यन्तासत्त्वरूपम्, केवलान्वयिसाध्यक एव उपाधेरत्यन्तसाध्यविपर्ययकत्वेनाभासत्वात्, तत्र विपर्ययस्यात्यन्तासत्त्वेन साधयितुमशक्यत्वादित्याह साध्यविपर्ययस्येति। साध्यविपर्ययस्यासत्त्वम्। विपर्ययत्वावच्छेदेन साध्यप्रतियोगिकत्वम्, साध्यतावच्छेदकविपर्ययप्रतियोगितानवच्छेदकत्वमिति यावत्। तस्य। साध्यविपर्ययस्य। व्यापकव्यतिरेकेणेति। साध्यव्यापकतया गृहीतस्योपाधेर्व्यतिरेकेणेत्यर्थः। सिद्धिसम्भवादिति। पृथवीत्वादिना पृथिवीतरभेदादेरिवेत्यादिः।

(दी०) अथ सिद्धसाध्याविपर्ययत्वेन चाभासत्वम्, व्यभिचारोन्नायकतया दूषकत्वपक्षे विनापि साध्यप्रसिद्धिं प्रत्येकपदार्थप्रसिद्ध्यैव घटो नाभिधेय इत्यादिप्रतिज्ञापत्तेः, व्युत्पादयिष्यते च तत्र प्रतिज्ञाविरहः, व्यापकाभावेनाप्रसिद्ध्यैव व्याप्याभावस्य सिद्ध्यभ्युपगमात्, पूर्वसाधनव्यतिरेकत्वन्तु नोपाधित्वेन नाप्यनुपाधित्वेन नियतम्, वह्निना धूमस्य स्थापनायां प्रतिहेतावार्द्रेन्धनाभावे वह्न्यभावस्योपाधितायां धूमाभावस्य चार्द्रेन्धनाभावेन स्थापनायां प्रतिहेतौ वह्नावार्द्रेन्धनस्यानुपाधितायाश्च प्रसङ्गात्। परन्तु पूर्वसाधनव्यतिरेकस्य प्रतिहेतावुपाधित्वेनोद्भावने सत्प्रतिपक्षमात्रमुच्छिद्येत, सर्वत्रैव तत्सम्भवात्। आभासत्वेऽपि स्थापनया विशेषाग्रहदशायामेव सत्प्रतिपक्षोपन्यासात्, वस्तुतः साध्याव्यापकस्यापि पूर्वसाधनव्यतिरेकस्य तदानीं तत्त्वेनाग्रहादुपन्यासासम्भवात्। अतो बलवत्तरानुकूलतर्कं विना पूर्वसाधनव्यतिरेको नोपाधित्वेनोद्भाव्य इति कथकसमयवशादेवासावुपाधित्वेन नोपन्यस्यत इति। यथा अकर्तृकत्वेति।

कादाचित्कत्वेन सकर्तृकत्वस्थापनायामजन्यत्वे प्रतिहेताविवर्थः।

इति तत्त्वचिन्तामणिदीधितावुपाधिप्रकरणम् ॥

(गा०) पूर्वसाधनव्यतिरेकत्वं नोपाध्याभासताप्रयोजकम्, क्वचित्तस्यापि सदुपाधित्वात्, परं तु सत्प्रतिपक्षस्थले कथकसम्प्रदायवशात्तस्योपाधित्वेन नोद्भावनमित्यत्रैव मूलतात्पर्यमित्याह । पूर्वेति । नोपाधित्वेन नियतमिति दृष्टान्तविधयोक्तम् । एतन्नियमेति प्रसङ्गमाह । वह्निनेति । हेतुनेति शेषः । स्थापनायाम् । वादिना प्रथमसाधने । प्रतिहेतौ । धूमाभावसाधके । वह्न्यभावस्येति । धूमाभावरूपसाध्याव्यापकतया अनुपाधेरित्यादिः । पूर्वसाधनव्यतिरेकस्येति शेषः । उपाधितायाः प्रसङ्गादित्यन्वयः । त्रिसीयानियमेऽतिप्रसङ्गमाह । धूमाभावस्येति । प्रतिहेतौ । धूमस्य साधके । आर्द्रेन्धनस्येति । प्रसिद्धोपाधेरिति शेषः । परन्त्विति । अस्य नोपाधित्वेनोद्भाव्य इत्यग्रिमेणान्वयः । असौ । पूर्वसाधनव्यतिरेकः । उपाधित्वेनानुद्भावने हेतुं वक्ष्यति कथकसमयवशादिति । तत्समयबीजमाह पूर्वसाधनव्यतिरेकस्येत्यादिना । सर्वत्रैव । प्रतिहेतुमात्र एव । तत्सम्भवात् । पूर्वसाधनव्यतिरेकस्योपाधितयोद्भावनसम्भवात् ।

नन्वयोगोलकं धूमवद्वह्नेः, तन्न धूमवदार्द्रेन्धनाभावादित्यादौ सत्प्रतिपक्षे वह्न्यभावस्य पूर्वसाधनव्यतिरेकस्य नोत्तरसाधने उपाधितयोद्भावनसम्भवः, वह्नेर्धूमाव्याप्यत्वेन तदभावत्वस्य धूमाभावाव्यापकत्वग्रहादित्यत आह । आभासत्वेऽपि स्थापनाया इति । पूर्वसाधनस्य वस्तुगत्या तत्साध्याव्याप्यत्वेऽपीत्यर्थः । विशेषाग्रहदशायामेव । तस्य तदव्याप्यत्वाग्रहदशायामेव । सत्प्रतिपक्षोपन्यासात् । साध्याभावसाधकहेतूपन्यासात् । तद्ग्रहदशायां तत एव हेतोरसाधकतया प्रतिहेतूपन्यासवैयर्थ्यादिति भावः । वस्तुनः । वस्तुगत्या । तदानीम् । विशेषाग्रहदशायाम् । तत्त्वेन । साध्याव्यापकत्वेन । उपन्याससम्भवादिति । उपाधितया पूर्वसाधनव्यतिरेकोद्भावनसम्भवादि- ...: । अतः । उक्तरीत्या सत्प्रतिपक्षोच्छेदप्रसङ्गात् । बलवत्तरेत्या-
दकत्व... व्य इत्यन्तः कथकसमयाकारः । इति कथकसमयेति । इ-
ष्ययः

त्याकारकसमयेत्यर्थः । यथाग्रेवेति । न तथाभासत्वादित्येवकारार्थः । असौ । पूर्वसाधनव्यतिरेकः ।

ननु क्षित्यादिकं सकर्तृकं कार्यत्वादित्यत्र स्थापनायां अनित्यत्वस्य प्रागभाववृत्तेः कार्यत्वाव्याप्यत्वेन नित्यत्वं पूर्वसाधनव्याप्यव्यतिरेककं न भवति, एवं क्षित्यादिकमकर्तृकं शरीराजन्यत्वात् व्योमवदित्यादौ क्षित्यादिव्योमान्यतरत्वावच्छिन्नसाध्यव्यापकत्वे सति तदन्यतरत्वावच्छिन्नसाधनाव्यापकं नित्यत्वञ्चोपाधिरेवेति कथमाभास इत्यत आह । कादाचित्कत्वेनेति । तथा च क्षित्यादिकं सकर्तृकं कादाचित्कत्वादित्यत्रानित्यत्वं कादाचित्कत्वव्याप्यम्, तद्व्यतिरेकश्च नित्यत्वमिति न पूर्वोक्तो दोषः, क्षित्यादिकमकर्तृकमजन्यत्वादिति प्रतिहेतौ क्षित्यादिव्योमान्यतरत्वावच्छिन्नाकर्तृकत्वव्यापकं यथा नित्यत्वम्, तथा तदवच्छिन्नाजन्यत्वरूपसाधनाव्यापकमपीति न स उपाधिरिति न द्वितीयोऽपि दोष इति दिक् ॥

इति श्रीमहामहोपाध्यायश्रीगदाधरभट्टाचार्यचक्रवर्त्तिकृतौ
तत्त्वचिन्तामणिदीधितिव्याख्याने

उपाधिप्रकरणम् ॥

पक्षताप्रकरणम् ।

(चि०) व्याप्त्यनन्तरं पक्षधर्मता निरूप्यते। तत्र न तावत् सन्दिग्धसाध्यधर्मत्वं पक्षत्वम् । सन्देहो हि न विशेषणं, परामर्शपूर्वं लिङ्गदर्शनव्याप्तिस्मरणादिना तस्य नाशात् । नोपलक्षणम्, अव्यावर्त्तकतापत्तेः ।

(दी०) अनुमितिलक्षणैककार्यानुकूलतासङ्गत्या पक्षधर्मतां निरूपयितुमाह । व्याप्तीति । सन्दिग्धेति । यत्र साध्यस्य यादृशसम्बन्धावगाहिनिर्णयनिवर्त्यो यः संशयस्तत्र स तादृशसम्बन्धेन साध्यानुमितौ पक्षतेत्यर्थः ।तेन न पक्षसाध्यविशेष्यकसंशयाननुगमो न वा सम्बन्धान्तरेण सन्देहेऽपि निर्णीतसम्बन्धेन पक्षत्वम्, न वा तमःप्रभृतिषु समवायेन आकाशादिसाधने तद्वैकल्यम् ।

(गा०) मूले व्याप्तिपक्षधर्मतयोः सङ्गत्यप्रदर्शनेन न्यूनतां परिजिहीर्षुस्तयोरेककार्यकारित्वरूपसङ्गतिं दर्शयन् व्याप्त्यनन्तरमित्यादिमूलमवतारयति । अनुमितीति । अनुमितिलक्षणं अनुमितिस्वरूपं यदेककार्यं तदनुकूलत्वसङ्गत्या तत्प्रयोजकत्वरूपसङ्गत्या, प्रयोजकत्वञ्च कारणतावच्छेदकस्यापीति व्याप्तिपक्षधर्मतयोः परामर्शनिष्ठकारणतायामवच्छेदकत्वेन अनुमित्यजनकत्वेऽपि न क्षतिः। यद्यपि पक्षताया न कारणतावच्छेदकघटकत्वं तामनन्तर्भाव्य पर्वतादिवृत्तित्वज्ञानत्वेनैवानुमितिजनकत्वात् तथाऽपि पक्षताया अनुमितौ स्वातन्त्र्येण कारणतया तदुपलक्षितधर्मिवृत्तितायाश्च कारणतावच्छेदकतया तद्घटितविशिष्टस्यैककार्यानुकूलत्वमक्षतमेवेति ध्येयम् ।

निरूपयितुमिति । निरूपणं प्रतिपत्त्यनुकूलो व्यापारः । एवञ्च पक्षधर्मताघटकपक्षतानिरूपणस्यापि पक्षधर्मताप्रतिपत्त्यनुकूलत्वेन तन्निरूपणत्वमक्षतमिति मूले पक्षतानिरूपणेऽपि पक्षधर्मतां निरूपयितुमित्यस्य नासङ्गतिः । पक्षे धर्मत्वं यस्या इति व्युत्पत्त्या पक्षधर्मतापदं पक्षीयधर्मविशेषरूपपक्षतापरमिति केचित् । तच्चिन्त्यम् । तथात्वे लिखनसङ्क्षेपनिर्बन्धिनो दीधितिकारस्य पक्षतां निरूपयितुमित्यस्य उपेक्षाया बीजाभावात् ।

व्याप्तीति । व्याप्तिनिरूपणानन्तरमिति मूलपाठाभिप्रायेण । व्याप्त्यनन्तरमिति पाठे च तत्रकाराभावात् प्रत्यक्षेत्यादीत्युपेक्ष्य प्रत्यक्षादित्यादि इति रीत्या प्रत्यक्षोपजीवकत्वादित्यादिग्रन्थधारकस्य तथाविधलिखनासङ्गतेः ।

तत्रेति मूले तत्पदं पक्षधर्मतापरं सप्तम्यर्थश्च घटकत्वं अन्वयश्चास्य पक्षत्वमित्यत्रेत्यवधेयम् । सन्दिग्धेत्यादिमूलग्रन्थस्य सन्दिग्धः साध्यरूपो धर्मो यत्रेति व्युत्पत्त्या विषयतया साध्यीभूतधर्मसन्देहवत्त्वं, 'तादृशसन्देहपर्यवसितं पक्षत्वमित्यर्थः । तत्र साध्यधर्मत्वनिवेशनमफलं धर्मपदस्यार्थकथनाय, स्वस्मिन् सन्दिग्धं साध्यधर्मत्वं साध्यं धर्मो यस्य इति बहुव्रीहिबलात् साध्यनिरूपितधर्मित्वपर्यवसितं पक्षत्वमित्युक्तौ, साध्यं सन्दिग्धं स्वधर्मत्वं पक्षत्वमित्युक्तौ च साध्यनिरूपितधर्मित्वस्य पक्षनिरूपितधर्मत्वस्य चाप्रसिद्धिस्थले वक्ष्यमाणानुपपत्तिप्रयोजकं तत् । एवं साध्यकोटिकसंशयस्य निवेशे साध्यं पक्षवृत्ति न वा, साध्यं पक्षनिष्ठाभावप्रतियोगि न वेति संशयासंग्रहः, तादृशसंशयोपादाने च पक्षः साध्यवान्न वेति संशयादनुमित्यनुपपत्तिरतो धर्मत्वांशं परित्यज्य केवलान्वयिग्रन्थे मणिकृतैव वक्ष्यमाणतथाविधसकलसंशयानुगमप्रकारं दर्शयति । यत्रेति । यत्र इति यद्धर्मावच्छिन्ने, सप्तम्यर्थश्च निर्णयान्वयि विशेष्यत्वम्, साध्यस्य । साध्यतावच्छेदकावच्छिन्नस्य । षष्ठ्यर्थः प्रकारत्वं, तस्यापि निर्णयेऽन्वयः । तत्र । तद्धर्मावच्छिन्ने, सप्तम्यर्थोऽनुमित्यन्वयि विशेष्यत्वम् । तादृशसम्बन्धेन साध्यानुमितौ । तादृशसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नविधेयताकानुमितौ जनकीभूतेत्यर्थः । पक्षविशेष्यकसाध्याभाववैशिष्ट्यबुद्धाविव साध्यधर्मिकपक्षावृत्तित्वपक्षनिष्ठाभावप्रतियोगित्ववैशिष्ट्यबुद्धावपि पक्षः

साध्यवानिति निश्चयस्य प्राचीनमते प्रतिबन्धकत्वात् साध्यं पक्षवृत्ति न वेत्यादिसंशयसंग्रहः। एवञ्च शुद्धपर्वतत्वावच्छिन्नोद्देश्यतानिरूपितशुद्धसंयोगावच्छिन्नशुद्धवह्नित्वावच्छिन्नविधेयताकानुमितित्वावच्छिन्नं प्रति पर्वतत्वावच्छिन्नविशेष्यतानिरूपितसंयोगसंसर्गावच्छिन्नवह्नित्वावच्छिन्नप्रकारताशालिनिश्चयत्वावच्छिन्नप्रतिबन्धकताकसंशयो हेतुरिति पर्यवसितम् । तादृशनिश्चयप्रतिबध्यतत्त्वस्य यथाश्रुतस्य घटादिविषयकसमूहालम्बनात्मकवह्निमत्त्वादिनिश्चयप्रतिबध्यघटादिसंशयसाधारणत्वात् तादृशनिश्चयत्वावच्छिन्नप्रतिबन्धकताप्रवेशः।

अवच्छिन्नत्वञ्चान्यूनवृत्तित्वं न तु स्वरूपसम्बन्धविशेषः। तेन वह्निसामान्याभावविशिष्टबुद्धौ महानसीयत्वादिविषयतामनन्तर्भाव्य वह्निमान् महानसीयवह्निमानित्यादिसकलज्ञानसाधारणवह्नित्वावच्छिन्नवत्तानिश्चयत्वेनैव प्रतिबन्धकताकल्पनान्महानसीयवह्निमान् वह्निसामान्याभाववान् वा पक्ष इत्याकारकसंशयं प्रति महानसीयवह्नित्वावच्छिन्नप्रकारकनिश्चयत्वेनाप्रतिबन्धकत्वेऽपि न तथाविधसंशयस्य महानसीयवह्नित्वावच्छिन्नसाध्यकानुमितौ पक्षतात्वानुपपत्तिः। न वा महानसीयवह्न्यभावादिविशिष्टबुद्धिप्रतिबन्धकतावच्छेदककोटौ वह्नित्वावच्छिन्नप्रकारताकत्वादेर्निविष्टत्वेऽपि वह्निमानित्याद्यनुमितौ महानसीयवह्निमान्न वा पक्ष इत्यादिसंशयस्य पक्षतात्वापत्तिः। इत्थञ्चाहार्यस्य भ्रमत्वज्ञानास्कन्दितस्य च निश्चयस्याप्रतिबन्धकतया अनाहार्यत्वं भ्रमत्वज्ञानानास्कन्दितत्वञ्च निश्चयविशेषणं देयमतो न तथाविधनिश्चयत्वान्यूनवृत्तिप्रतिबन्धकत्वाप्रसिद्धिः। पर्वतो वह्निमान्न वेत्यादेः कस्यापि संशयस्य धर्मान्तरावच्छिन्नविशेष्यताकान्यसंसर्गकान्यधर्मावच्छिन्नप्रकारकनिश्चयसाधारणसंयोगसंसर्गकवह्नित्वाद्यवच्छिन्नप्रकारकनिश्चयत्वाद्यन्यूनवृत्तिप्रतिबन्धकताकत्वं न सम्भवतीति प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितत्वादेः प्रकारताविशेषणत्वम्। उपनीतभानात्मकबाधनिश्चयस्यापि साध्यवत्तानिश्चयसामान्यनिवर्त्तनीयतया भ्रमत्वज्ञानास्कन्दितस्य च तस्यानुमित्यविरोधितया तथाविधबाधदशायामनुमित्यापत्तिरतः संशयत्वनिवेशनम्।

न च पक्षसाध्यविशेष्यकसंशयसाधारणस्यानतिप्रसक्तस्य सं-

शयत्वस्य दुर्वचतया पुनरननुगमतादवस्थ्यमिति वाच्यम् । बाधनिश्चयनिवर्त्तनीयस्यैवात्र संशयपदेन विवक्षितत्वात् केवलान्वयिनि च साध्ये पक्षनिष्ठाभावप्रतियोगित्वनिश्चय एव सुलभो बाधः, एकविधबाधोपादानेनैव विविधसंशयानुगमसम्भवात्तदननुगमो न दोषाय, अनुगमस्यापि कथञ्चित् सम्भवात् ।

यत्तु साध्यपक्षवैशिष्ट्यावगाहित्वमेव संशयपदेन विवक्षितमिति नाननुगमः । साध्यं पक्षवृत्ति न वेति साध्यविशेष्यकसंशयस्यापि तथात्वादिति, तदसत् । तथा सति साध्यपक्षवैशिष्ट्यानवगाहिनः साध्यं पक्षनिष्ठाभावप्रतियोगि न वेति संशयस्यासंग्रहात् ।

न च केवलान्वयिस्थले साध्यं पक्षवृत्ति न वेत्येतादृशसंशयादेवानुमित्युपपत्त्या तथाविधसंशयासंग्रहो न दोषाय इति वाच्यम् । प्रमेयत्वं घटनिष्ठाभावप्रतियोगि न वेति संशयस्य केवलान्वयिग्रन्थे मणिकृतैव संगृहीततया तद्विरोधात् ।

वस्तुतस्तु तादात्म्यसम्बन्धेन वाच्यसाध्यकप्रमेयपक्षकस्थले च तादृशसंशयाप्रसिद्धिः तादात्म्यसम्बन्धेन पक्षसम्बन्धित्वाभावरूपकोट्यप्रसिद्धेः । न च साध्ये पक्षनिष्ठाभावप्रतियोगित्वसंशयस्य पक्षतात्वेऽपि उक्तस्थले पक्षतावच्छेदकसामानाधिकरण्यमात्रेणानुमितेरुद्देश्यत्वे पक्षतावच्छेदकावच्छेदेन वर्त्तमानभेदप्रतियोगित्वकोटिकसंशयस्यैव सामानाधिकरण्येन साध्यवत्तानिश्चयप्रतिबध्यतया पक्षतात्वमङ्गीकर्त्तव्यं तच्च न सम्भवति प्रमेयत्वाद्यवच्छेदेन वर्त्तमानभेदाप्रसिद्ध्या कोट्यप्रसिद्धेरिति वाच्यम् । प्रमेयत्वाद्यवच्छेदेन वर्त्तमानस्य द्वित्वावच्छिन्नभेदस्यैव प्रसिद्ध्या साध्यतावच्छेदकावच्छिन्नतादृशभेदप्रतियोगित्वकोटिकसंशयस्यैव तत्र पक्षतात्वसम्भवात् । तत्र पक्षतावच्छेदकावच्छिन्नवृत्तिकाभावे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वतादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकत्वोभयत्वावच्छिन्नतदभावकोटिकसंशयस्य पक्षतात्वोपगमसम्भवाच्च । एवमप्रसिद्धसाध्यकव्यतिरेक्यनुमानस्थले पक्षसाध्यवैशिष्ट्यावगाहिसंशयानुपपत्तेस्तत्र साध्यात्मकाभावप्रतियोगिनि पक्षसम्बन्धित्वसंशयस्य पृथिवीतरत् पक्षसम्बन्धि न वेत्याकारकस्यैव पक्षतात्वेनोपगन्तव्यतया पक्षसाध्यवैशिष्ट्यावगाहित्वनिवेशासम्भवात् ।

अथ वह्निव्याप्यसाध्यकस्थले महानसीयवह्नित्वाद्यवच्छिन्नसाध्यकस्थले च वह्निमान्न वा पक्ष इत्यादिसंशयस्य पक्षतात्वप्रसङ्गः साध्यवत्तानिश्चयनिवर्त्तनीयत्वात् । न च सिद्धिकालेऽनुमितिवारणमेव पक्षताहेतुत्वकल्पनफलं एवञ्च उक्तसंशयस्यानुमितिहेतुत्वोपगमेऽपि सिद्धिदशायमनुमित्यापत्त्यसम्भवात् तस्य पक्षतात्वमिष्टमेव इति वाच्यम् । साध्यतावच्छेदकावच्छिन्नसाध्यतदभावान्यतरस्मिन् पक्षसम्बन्धावगाहिसन्देहस्यैव प्राचीनैः पक्षतात्वोपगमात् अन्यथा बाधसाधारणरूपेण पक्षतात्वोपगमेऽपि सिद्धिकालेऽनुमितिवारणसम्भवात् बाधवारकसंशयत्वनिवेशनस्यापि निष्प्रयोजनकतापत्तेः ।

न च तादृशसंशयस्य वह्निव्याप्याद्यभाववत्तानिश्चयरूपबाधाप्रतिबध्यतया नातिप्रसङ्ग इति वाच्यम् । वह्निव्याप्याभावाभाववान् पर्वतः पर्वतो वह्निमान्न वा इति संशयस्य तादृशबाधनिश्चयप्रतिबध्यतया तावताऽपि तद्वारणासम्भवात् ।

यत्तु प्रकृतसाध्यतावच्छेदकावच्छिन्नविषयताघटितधर्मावच्छिन्नप्रतिबध्यतानिवेशान्नोक्तातिप्रसङ्गः, वह्न्यभावविशिष्टज्ञानत्वावच्छिन्नाया वह्निव्याप्यवत्तानिश्चयप्रतिबध्यताया अवच्छेदककोटौ वह्निव्याप्यत्वावच्छिन्नविषयताया अनन्तर्भावादिति तन्न । वह्न्यभावादिसाध्यकस्थले वह्निमान्न वेत्यादिसंशयासंग्रहप्रसङ्गात्, वह्निविशिष्टबुद्धित्वावच्छिन्नाया वह्न्यभावादिनिश्चयप्रतिबध्यताया अवच्छेदकगर्भे वह्न्यभावत्वावच्छिन्नविषयताया अनिवेशात् यत्र च वह्निव्याप्यत्वावच्छिन्नस्यैव पक्षत्वं साध्यत्वञ्च तत्र वह्निव्याप्यो वह्निमान्न वेति संशयवारणस्याप्यशक्यत्वात् ।

यत्तु साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकविषयताघटितधर्मावच्छिन्नत्वेन प्रतिबध्यताया निवेशनीयतया वह्निव्याप्यवत्ताज्ञानं प्रति वह्न्यभावादिनिश्चयत्वेनाप्रतिबन्धकतया तद्विषयतायाः साध्यवत्त्वज्ञानप्रतिबन्धकतावच्छेदकत्वविरहेण नातिप्रसङ्गः । तदपि न । तावताऽपि महानसीयवह्नित्वावच्छिन्नसाध्यकस्थले महानसीयवह्न्यभावाभाववान् पर्वतः स वह्निमान्न वेति संशयवारणासम्भवात् ।

अत्रोच्यते, संशयत्वं स्वनिष्ठविषयताघटितधर्मावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यताशालित्वं ज्ञानभेदेन विषयताभेदाभ्युप-

गमात् संशयनिष्ठवह्निमत्पर्वतादिविषयताया अपि प्रत्येकं निश्चयवृत्तित्वात् प्रतिबन्धकतावच्छेदकघटकत्वोपपत्तिः वह्न्यभाववान् पर्वतो घटवान्न वेत्याकारकसंशयस्य तादृशधर्माक्रान्तस्य साध्यवत्त्वनिश्चयप्रतिबध्यस्य च वारणाय साध्यवत्तानिश्चयत्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकावच्छिन्नत्वेन निरुक्तसंशयत्वघटकप्रतिबध्यता विशेषणीया, घटादिमत्ताज्ञानत्वावच्छिन्नप्रतिबध्यताया अतथात्वान् नातिप्रसङ्गः। तत्र पक्षे वह्न्यभाववान्न वेति संशयस्य पक्षतात्वमिष्टमेव तस्य वह्निः पक्षनिष्ठाभावप्रतियोगी न वेति संशयसमशीलत्वात्। स्वनिष्ठविषयतायाश्च बाधप्रतिबध्यतावच्छेदकत्वं निवेशनीयन्तेन वह्निव्याप्यसाध्यकस्थले वह्निमान्न वा पक्ष इत्येतादृशसंशयस्य व्युदास तत्र वह्निव्याप्याभावाभावत्वेन व्याप्यस्य पृथग्भानेऽपि संशयत्वघटकीभूतस्वनिष्ठवह्निमत्पक्षविषयिताया वह्निव्याप्याभावनिश्चयप्रतिबध्यतावच्छेदकत्वविरहात्। एवञ्च शुद्धवह्नित्वावच्छिन्नसाध्यकस्थले वह्न्यभाववान् पक्ष इत्येतादृशबाधनिश्चयप्रतिबध्यस्य महानसीयवह्निमान्न वा पक्ष इत्येतादृशसंशयस्य पक्षतात्ववारणाय साध्यवत्तानिश्चयप्रतिबध्यतावच्छेदकावच्छिन्नत्वनिवेशनमित्यवधेयम्।

एतेनावच्छेदकावच्छेदेनानुमितौ पक्षतावच्छेदकसामानाधिकरण्यमात्रेण कोटिद्वयावगाहिनो निश्चयस्यावच्छेदकावच्छेदेन साध्यादिमत्तानिश्चयप्रतिबध्यत्वेऽपि निरुक्तसंशयत्वाभावेन न पक्षतात्वमिति संक्षेपः।

अथावच्छेदकावच्छेदेन कोटिमवगाहमानस्य कोटिद्वयावगाहिनः समुच्चयस्य पक्षतात्वापत्तिः तस्याप्युक्तरूपाक्रान्तत्वात्।

न च विरोधावगाहित्वनिवेशात्तद्वारणसम्भवः। कुत्रचित् किञ्चित्प्रतियोगिकविरोधभानस्य समुच्चयेऽप्यक्षतत्वात् साध्यतदभावादिविरोधावगाहित्वस्य प्रत्येकं सकलसंशयसाधारण्यासम्भवादिति चेन्न। संयोगादेरव्याप्यवृत्तित्वज्ञानदशायान्तद्वत्त्वग्रहविषयीभूतधर्मिणि तदभावादिग्रहोत्पत्त्या तद्वत्ताग्रहस्य तदभावग्रहप्रतिबन्धकतायामव्याप्यवृत्तित्वज्ञानस्योत्तेजकतामपेक्ष्य व्याप्यवृत्तितावगाहित्वेनैव प्रतिबन्धकतोपेयते। व्याप्यवृत्तित्वज्ञानावच्छिन्नाधारताकत्वं सर्वत्र प्रतिबन्धकज्ञाने तादृशाधारताया अन्ततः संसर्गतये-

धभानमुपेयते एवञ्च समुच्चयनिष्ठकोटिविषयिता न विपरीतधीप्रतिबन्धकतावच्छेदिका, व्याप्यवृत्तित्वाविषयित्वानिरूपितत्वात् अत उक्तसंशयत्वनिरुक्तौ स्वपदेन समुच्चयोपादानासम्भवेन तस्य पक्षतात्वापत्तिविरहात् ।

अथवा स्वघटितधर्मावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकीभूता या स्वावच्छेदकधर्मावच्छिन्ननिरूपितविरोधविषयितानिरूपिता प्रकारिता सामानाधिकरण्यसम्बन्धेन तद्विशिष्टप्रकारितैव संशयत्वं तच्च समुच्चयव्यावृत्तं समुच्चये विरोधाभानेन कोटिद्वयविषयितयोर्विरोधविषयित्वानिरूपितत्वात् संशये चान्ततः कोट्योः संसर्गतयापि परस्परविरोधभानोपगमेन सकलसंशयसंग्रहः । यदंशे संशयत्वं तत्कोटिविरोधस्यैव उक्तरूपेण उपादानसम्भवात् न वस्त्वन्तरविरोधभानमादायातिप्रसङ्गः ।

केचित्तु साध्यनिश्चयसाध्याभावनिश्चयप्रतिबध्यतावच्छेदकविशेष्यताशालित्वं समुदितार्थः संशये च धर्मिणि उभयप्रकारतानिरूपितैकविलक्षणविषयता समुच्चयवैलक्षण्यायोपगम्यते इति तादृशविषयताया विभिन्नरूपेण उभयनिश्चयप्रतिबध्यतावच्छेदकतया नासम्भव इत्याहुः । तच्चिन्त्यम् ।

प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्यतदभावकोटिकज्ञानत्वादिकमुपेक्ष्य निरुक्तरूपेण संशयनिवेशस्य प्रयोजनं दर्शयति । तेनेति । न पक्षेति । पक्षविशेष्यकस्य । पक्षः साध्यवान्न वेत्यस्य । साध्यविशेष्यकस्य । साध्यं पक्षवृत्ति न वेत्याकारकस्य संशयस्य, नाननुगमः तथा सति फलस्याविलक्षणतया व्यभिचारेण कारणता भज्येतेति भावः ।

इदमुपलक्षणम्, साध्यवत्तद्भेदकोटिकसंशयाननुगमोऽपि बोध्यः । विशिष्य सम्बन्धानिवेशनप्रयोजनं दर्शयति । न वेति । सम्बन्धान्तरेण । तत्सम्बन्धातिरिक्तसम्बन्धेन । सन्देहे । सन्देहदशायाम् । निर्णीतसम्बन्धेन । पक्षांशे साध्यीयसम्बन्धविधया तत्कालीननिर्णयविषयीभूततत्सम्बन्धेन । एतदनन्तरमनुमिताविति पूरणीयम् । तत्सम्बन्धेन संशयासत्त्वेऽपि तत्सम्बन्धेन सिद्धिशून्यकाले इष्टापत्तिसम्भवान्निर्णीतेत्युक्तं, सम्बन्धमनिवेश्य साध्यनिर्णयसामान्यनिवर्त्यत्वनिवेशेऽप्रसिद्धिप्रसङ्गात् यत्किञ्चिन्निश्चयनिवर्त्यत्वं यत्किञ्चि-

त्संसर्गकनिर्णयसामान्यनिवर्त्यत्वं वा यदि निवेश्यते तदाऽयमति-प्रसङ्गो बोध्यः। धर्मित्वांशपरित्यागप्रयोजनमाह । न वा तमःप्रभृति-ष्विति । स्वधर्मित्वसंशयविषयसाध्यकत्वं पक्षत्वमित्युक्तौ धर्मित्वानि-वेशेऽव्यवृत्तिसाध्यकघटादिपक्षकस्थले न पक्षतावैकल्यम्, घटादि-समवेतत्वस्य प्रसिद्ध्या गगनादौ तत्संशयसम्भवादिति तमःप्रभृति-पर्यन्तस्य पक्षत्वानुसरणम्, तथा च साध्ये सम्बन्धान्तरेण पक्ष-वृत्तित्वसन्देहदशायां निर्णीतसम्बन्धेनानुमितिवारणाय प्रकृतसा-ध्यतावच्छेदकसम्बन्धेन स्ववृत्तित्वसंशयस्यावश्यं निवेशनीयतया तमःप्रभृतिसमवेतत्वस्याप्रसिद्ध्या साध्ये पक्षवृत्तित्वसंशयमादाया-पि न तत्र पक्षतोपपत्तिरिति भावः । स्वरूपसम्बन्धेन तमोवृत्ति-त्वस्य प्रसिद्ध्या तेन सम्बन्धेनानुमितौ नानुपपत्तिरतः समवायेने-ति । पक्षे साध्यीयसाध्यतावच्छेदकसम्बन्धावच्छिन्नधर्मितासंश-यस्य पक्षतात्वे तमःप्रभृतिषु वृत्तिमत्साध्यसाधने नानुपपत्तिरत आकाशादीति । तद्वैकल्यम् । पक्षतावैकल्यम् ।

सन्देहोऽनुमितौ हेतुः । विशेषणतया । पक्षधर्मताज्ञाननिष्ठानुमि-तिजनकतायामवच्छेदको वा । अथ वा उपलक्षणतया तादृशजनक-तायामवच्छेदकस्तत्राद्यं पक्षद्वयं दूषयति मूले सन्देह इति । विशेष-णम् । अपेक्षणीयानुमित्यव्यवहितप्राक्सत्ताकं सत् अनुमितिकारणं विशेषणविधया कारणतावच्छेदकं वेति यावत् । परामर्शपूर्वं तस्य संशयस्य नाशादित्यन्वयः । यत्रादौ लिङ्गदर्शनं ततो व्याप्तिस्मरणं तदभिप्रायेण लिङ्गदर्शनस्य, यत्र तयोर्विपरीतक्रम-स्तदभिप्रायेण व्याप्तिस्मरणस्य नाशकत्वमभिहितं, अत एकत्र उभयोर्नाशकत्वासम्भवेऽपि न क्षतिः । आदिपदेन यत्र संशया-नन्तरक्षणे व्याप्तिस्मरणाद्यनुगुणज्ञानोत्पादस्तदनन्तरमेव व्याप्ति-स्मरणादिः तत्रत्यतादृशज्ञानसंग्रहः । द्वितीयं दूषयति । नोपल-क्षणमिति । अव्यावर्त्तकतापत्तेः । सिद्धिस्थलेऽनुमित्यवारकतापत्तेः । तत्कालीनपरामर्शस्यापि कालान्तरीयसंशयविषयधर्मिवृत्तित्वाव-गाहितया सामग्र्या अक्षतत्वादिति भावः ।

अथ साध्यसन्देहोऽनुमितौ हेतुरेव लिङ्गदर्शनादेः पूर्वोत्पन्नस्य संशयस्य तेन विनाशेऽपि तदनन्तरं परामर्शाव्यवहितप्राक्क्षण-जातसंशयान्तरादेवानुमितिरिति कल्प्यते ।

न चानुत्पन्न एव संशये यत्र स्वसामग्रीबलात् परामर्शोत्पत्तिस्तत्रानुमित्यनुदयप्रसङ्गः परामर्शकाले तदुत्तरञ्च विशेषदर्शनरूपप्रतिबन्धकवशेन संशयोत्पादासम्भवादिति वाच्यम् । फलानुरोधेन सर्वत्रैवानुमित्युपधायकपरामर्शाव्यवहितप्राक्क्षणे संशयोत्पादकल्पनात् । यत्र संशयोत्पादद्वितीयक्षण एव परामर्शसामग्री प्रमाणसिद्धा यत्र वा परामर्शसामग्रीपूर्वक्षणे संशयजनकधर्मिज्ञानाद्यभावः प्रामाणिकस्तत्र परामर्शानन्तरं साध्यस्य प्रत्यक्षनिश्चय एव उपगम्यते तत एव प्रवृत्त्याद्युपपत्तेः तत्रानुमिनोमीत्यनुव्यवसायस्याप्यगत्या भ्रमत्वमेव कल्प्यते अनुगताननुगतसिषाधयिषाभावकूटविशिष्टसिद्ध्यभावस्यानुमितिहेतुत्वापेक्षया संशयहेतुतायां लाघवात् । संशयहेतुत्वोपगमे बाधनिश्चयदशायां संशयाभावादेवानुमितिवारणसम्भवात् नानाविधबाधाभावस्यानुमितिहेतुत्वाकल्पनेनानुमितिसामग्रीप्रतिबन्धकतायां तदनिवेशेन च लाघवात् । जनकज्ञानविरोधितयैव च बाधादीनां हेत्वाभासतोपपत्तेः । संशयस्य च कार्यतावच्छेदककोटौ कारणवैशिष्ट्य निवेश्य तादृशसंशयत्वेनैव हेतुता वाच्या, अतो दीधितिकारोक्तप्रकारस्य स्वत्वघटिततया स्वत्वाननुगमेन प्रतिबध्यतादीनां स्वस्वावच्छेदकभेदेन भिन्नानामननुगमे न च शब्दानुगममात्रपर्यवसानेऽपि न क्षतिः । संशयस्य बाधसाधारणतदभाववत्ताज्ञानत्वेन कारणत्वं न तु पक्षधर्मिकसाध्यतदभावोभयज्ञानत्वरूपसंशयत्वेन गौरवात् । बाधनिश्चयदशायाञ्च नानुमित्यापत्तिसम्भवः । प्रत्यक्षादिसाधारणालौकिकविशिष्टबुद्धित्वावच्छिन्नं प्रति बाधनिश्चयस्य प्रतिबन्धकताया आवश्यकत्वादिति तु न श्रद्धेयम् । बाधनिश्चयेऽप्रामाण्यग्रहसत्त्वेऽनुमित्यापत्तेः, अप्रामाण्यग्रहाभावस्य संशयजनकतायां प्रयोजनविरहेणानिवेशात्, साध्यसन्देहेऽप्रामाण्यग्रहसत्त्वेऽप्यनुमित्युपगमे क्षतिविरहात्, संशयेऽप्रामाण्यनिश्चयेऽनुमित्युत्पादेऽपि संशये विषयसंशयस्याकिञ्चित्करत्वात्, तत्राप्रामाण्यनिश्चयत्वावच्छिन्नाभावस्यैव निवेशनीयतयाऽप्रामाण्यशङ्कास्कन्दितबाधनिश्चयादनुमित्यापत्तेर्दुर्वारतापत्तेरिति चेन्न । प्रत्यक्षादिना निर्णीतस्यापि साध्यस्यानुमित्सया अनुमितेरानुभविकत्वात् संशयस्य पक्षतात्वे तदनुपपत्तेरनुभवापलापे विशेषदर्शनमूलकप्रत्यक्षादेव सर्वत्र प्रवृत्त्यादिसम्भवे

अनुमानप्रामाण्यस्यैव विलयापत्तेः संशयानन्तरजातसिद्ध्यात्मकपरामर्शादनुमित्यापत्तेश्च इति संक्षेपः ।

(चि०) नापि साधकबाधकप्रमाणाभावः, उभयाभावस्य प्रत्येकसत्त्वेऽपि सत्त्वात् । नापि अभावद्वयं तथा, बाधकप्रमाणाभावस्य व्यर्थत्वात्, ह्रदादेः पक्षत्वेऽपि बाधहेत्वासिद्ध्यादेरावश्यकत्वेन अनुमित्यनुत्पादात । नापि साधकप्रमाणाभावः श्रोतव्यो मन्तव्य इति श्रुत्वा समानविषयकश्रवणानन्तरं मननबोधनात् । प्रत्यक्षदृष्टेऽप्यनुमानदर्शनात् । एकलिङ्गावगतेऽपि लिङ्गान्तरेण तदनुमानाच्च मन्तव्यश्चोपपत्तिभिरिति स्मरणात् ।

(दी०) संशययोग्यतां निरस्यति । नापीति । साधकबाधकमाने सिद्धिबाधौ । केवलान्वयिनि च पक्षनिष्ठाभावप्रतियोगित्वधीरेव सुलभो बाधः ।

(गा०) संशयनाशेऽपि यावन्न निर्णयस्तावत्पर्यन्तं संशययोग्यताया अनपायात् तस्या एव पक्षतात्वं सम्भवतीति तदनिराकरणे मूलस्य न्यूनता, अतो नापीति मूलमेव संशययोग्यतानिराकरणपरतया व्याचष्टे । संशययोग्यतामिति । साधकबाधकमानपदस्य सिद्धिबाधहेतुरूपयथाश्रुतार्थपरत्वे सर्वदैवानमित्यनुपपत्तिः अनुमितिपूर्वं सिद्धिबाधहेतुचक्षुरादेः सिद्धिहेतुपरामर्शस्य च सर्वत्रैव सत्त्वादतः तत्पदं सिद्धिबाधपरतया व्याचष्टे । साधकेति । यद्यपि बाधकमानपदस्य बाधजनकतत्सामग्रीपरत्वेऽपि न क्षतिः बाधसामग्र्यनन्तरक्षणे कदाप्यनुमितेरनुत्पादात् । तथाऽपि बाधजनकत्वमात्रेण तत्सामग्रीपरत्वे तदवच्छिन्नाभावस्य हेतुता लभ्येत तत्र चोक्तैवानुपपत्तिः बाधसामग्रीत्वेन तत्परत्वञ्च विना लक्षणां न निर्वहति लक्षणाया आवश्यकत्वे बाध एव लक्षणोचिता इत्यभिप्रायेण इदम् ।

ननु पक्षे साध्याभावनिश्चयस्य बाधतया केवलान्वयिनि सा-

ध्याभावाप्रसिद्ध्या बाधाप्रसिद्धिरतस्तदभावघटितपक्षतावैकल्यम् अत आह । केवलान्वयिनि चेति । पक्षानिष्ठेति । साध्य इत्यादिः । धीः । निर्णयः । सुलभो बाध इति । तथा च तादृशबाधाभावस्यैव पक्षताघटकत्वान्नानुपपत्तिरिति भावः । सुलभ इत्यनेन तत्राभावांशे साध्यीयत्वभ्रमात्मकबाधस्यापि कदाचित् कस्यचित् पुरुषस्य प्रसिद्ध्या तदभावघटितत्वमपि पक्षतायाः सम्भवतीति सूचितम् ।

(चि०) अथ सिषाधयिषितसाध्यधर्मा धर्मी पक्षः । तथा हि मुमुक्षोः शब्दादात्मावगमेऽपि मननस्य मोक्षोपायत्वेन सिद्धिविशेषानुमितीच्छया आत्मानुमानम् । अत एव 'प्रत्यक्षपरिकलितमपि अर्थमनुमानेन बुभुत्सन्ते तर्करसिकाः । न हि करिणि दृष्टे चीत्कारेण तमनुमिमतेऽनुमातारः' इति वाचस्पतिवचनयोरविरोधः अनुमित्सातद्विरहाभ्यां तदुपपत्तेरिति चेन्न । सन्देहवत्परामर्शपूर्वं सिषाधयिषाया अपि अभावात् योग्यतायाश्च अनिरूपणात्, सिषाधयिषाविरहेऽपि घनगर्जितेन मेघानुमानात् स्वकारणाधीनतृतीयलिङ्गपरामर्शबलेन अनपेक्षितानुमानदर्शनाच्चेति ।

(दी०) ननु तत्रापि पुनरनुमित्सा, ततः परामर्शान्तरं, स्मरणात्मकाद्वा परामर्शादनुमितीष्टसाधनताविषयकादनुमित्सा, ततोऽनुमितिरिति फलबलात् कल्पनीयमित्यत आह । सिषाधयिषेति । न च अनुमितिजनिकेच्छैव पक्षता । सा च क्वचित् स्वनिष्ठेव सर्वत्र ईश्वरनिष्ठेव सुलभेति वाच्यम् । तस्या नित्यत्वेन सिद्धौ सत्यामपि पक्षताप्रसङ्गात् । न च तस्यास्तदानीं न तज्जनकत्वम् । तद्धि न योग्यता, अनपायात् । न च तदुपधानम् । अनुमितेः पूर्वं तदभावात् । न च तत्सामग्रीसमवधानम् ।

कारणमात्रस्य पक्षताकुक्षिनिक्षेपप्रसङ्गाच्छेषवैयर्थ्यात् । त-
दानीं सामग्रीविरहप्रयोजकव्यतिरेकप्रतियोगिनः कारणस्य
वक्तव्यत्वापाताच्च ।

(गा०) व्याप्तिस्मरणादिना पूर्वानुमित्सानाशस्थलेऽनुमिति-
मुपपाद्य सिषाधयिषाविरहेत्यादिग्रन्थमवतारयति । नन्विति । त-
त्रापि । परामर्शपूर्वमनुमित्सानाशस्थलेऽपि । पुनरनुमित्सा । परा-
मर्शानन्तरमनुमित्सानन्तरम् ।

ननु परामर्शानन्तरोत्पन्नेन इच्छाजनकज्ञानेन इच्छाजननसमका-
ले परामर्शस्य विनाशात्तादृशेच्छातः कथमनुमितिरित्यत आह ।
ततः परामर्शान्तरमिति । विनश्यदवस्थानुमित्सयाऽनुमितिमुप-
पाद्याविनश्यदवस्थयाप्युपपादयति । स्मरणात्मकाद्वेति । चाक्षुषादि-
परामर्शस्यानुमित्यंशे इष्टसाधनताप्रकारकसमूहालम्बनत्वं नोपप-
द्यते स्वायोग्यमुख्यविशेष्यकज्ञाने बहिरिन्द्रियस्यासामर्थ्यादतस्त-
स्य तथात्वमुपेक्ष्य तन्मूलकव्याप्यवत्पक्षगोचरसंस्कारात् पूर्वानु-
मित्साजनकेष्टसाधनताज्ञानाहितसंस्कारसहकृतात्समूहालम्बनस्म-
रणात्मकपरामर्शान्तरस्यानुसरणम् । स्मरणेत्युपलक्षणम्, तथावि-
धमानसपरामर्शोऽपि बोध्यः ।

ननु कल्पकाभावान्नैतादृशकल्पनासम्भव इत्याशङ्कां परिहरति ।
फलबलादिति । सिषाधयिषारूपकारणं विना अनुमित्यात्मककार्यानु-
पपत्तिबलादित्यर्थः । सिषाधयिषाविरहेऽपीति मूलस्यानुमातुरि-
त्यादिः, तेन ईश्वरस्य सिषाधयिषायास्तत्राक्षतत्वेऽपि न क्षतिः ।
इच्छारूपपक्षताया आत्मनिष्ठप्रत्यासत्त्यैव हेतुता इत्यभिप्रायेणेदम् ।

न च तत्रापि पूर्ववत् फलबलादनुमित्सां कल्पयित्वा अनुमितिः-
शक्योपपादिका । तत्र तदभावस्यानुभवसिद्धतया कल्पनासम्भवात्,
पूर्वं कदापि यस्य मेघानुमितिर्नासीत् तेन तत्रेष्टसाधनताया अगृ-
हीतत्वेन तद्गोचरस्मरणस्य तदनुभावकस्य तदानीमभावेन त-
द्गोचरानुभवस्य चासम्भवेन तदनुमित्सासामग्र्या एव दुर्घटत्वा-
च्च विषयनिष्ठप्रत्यासत्त्यैवानुमित्साया हेतुता वाच्या इत्यभिप्रायेण
उक्तस्थले पक्षतोपपत्तिं दीधितिकृदाशङ्कते । न चानुमितीति । इ-
च्छैव । समानाधिकरणव्यधिकरणसाधारणमिच्छामात्रमेव । स्व-

निष्ठेव । अनुमातृत्वमत्रैतेव । तस्याः । ईश्वरेच्छायाः । पक्षताप्रसङ्गादिति । तथा च सिद्ध्यनन्तरमनुमित्यापत्तिरित्यर्थः । तदानीम् । सिद्धिदशायाम् । न तज्जनकत्वमिति । तथा चानुमितिजनकत्वविशिष्टेच्छात्वेनैव हेतुता, कारणतावच्छेदकविशिष्टस्य प्राक्सत्त्वमेव फलोपधाने तन्त्रमिति नातिप्रसङ्ग इति भावः । जनकत्वेन जनकत्वे आत्माश्रयसत्त्वेऽपि स्फुटत्वात्तमुपेक्ष्य दूषणान्तरमाह । तद्धीति । योग्यता । स्वरूपयोग्यता । अनपायादिति । कारणतावच्छेदकधर्मरूपयोग्यतायाः सर्वदैव सत्त्वादित्यर्थः । तदुपधानम् । तद्वैशिष्ट्यम् । तदभावात् । अनुमितिवैशिष्ट्याभावात् । तथा चानुमित्युत्पादनियामिकाया अनुमितिविशिष्टेच्छायाः प्रागसत्त्वादनुमितेरवानुपपत्तिः । इदमुपलक्षणम्, अनुमित्यनन्तरमनुमित्यापत्तिरपि द्रष्टव्या ।

नन्वनुमितिजनकतावच्छेदका यावन्तो धर्माः प्रत्येकं तदवच्छिन्नकूटविशिष्टत्वरूपतत्सामग्रीसमवधानमेव इच्छाविशेषणं देयं तच्च कार्याव्यवहितप्राक्क्षण एव इति नातिप्रसङ्ग इति शङ्कां परिहरति । न तत्सामग्रीति । कारणमात्रस्येति । तथा च परामर्शाद्यसत्त्वदशायामीदृशपक्षताविरहादेवानुमितिवारणसम्भवात् परामर्शादीनां हेतुताविलयप्रसङ्ग इति भावः ।

ननु सामग्रीसमवहितेच्छात्वेन न पक्षताया हेतुत्वमुपपद्यते सामग्रीघटकहेतूनां विशेष्यविशेषणभावे विनिगमनाविरहात् तेषां स्वतन्त्रकारणतयैवातिप्रसङ्गस्य वारितत्वात् किन्तु ईश्वरेच्छामादाय सिद्धिकाले पक्षताव्यवहारवारणाय पक्षपदप्रवृत्तिनिमित्तत्वमेव ताद्रूप्येण उपेयते अतो नायं दोष इति दूषणान्तरमाह । शेषेति । अनुमितिसामग्र्या एव पक्षतात्वसम्भवेन इच्छारूपविशेष्यभागनिवेशस्य निष्प्रयोजनकत्वादित्यर्थः । अत्रेष्टापत्ता दूषणान्तरमाह । तदानीमिति । तदानीम् । परामर्शादिसमवहितसिद्धिदशायाम्, अन्वयश्चास्य सामग्रीविरहेत्यनेन । वक्तव्यतापातात् । सामग्रीमध्यानिवेशापातात् । तथा च तादृशकारणं सिषाधयिषाविरहविशिष्टसिद्ध्यभाव एव । एवञ्च तस्यैव पक्षतात्वमस्तु अलङ्कारणान्तरस्य पक्षताकुक्षिनिवेशनेनेति सिद्धान्तलक्षण एव पर्यवसानमिति भावः ।

(चिं०) उच्यते—सिषाधयिषाविरहसहकृतसाधकप्रमाणाभावो यत्रास्ति स पक्षः। तेन सिषाधयिषाविरहसहकृतं साधकप्रमाणं यत्रास्ति स न पक्षः। यत्र साधकप्रमाणे सति असति वा सिषाधयिषा, यत्र वा उभयाभावस्तत्र विशिष्टाभावात् पक्षत्वम्। यद्यपि पक्षत्वस्य केवलान्वयित्वात् नास्य भेदकत्वं तथापि पक्षपदप्रवृत्तिनिमित्तमुक्तम्।

इति चिन्तामणौ पक्षताप्रकरणम्।

(दी०) सिषाधयिषेति। यत्र अनुमित्सानन्तरं साध्यतद्व्याप्यवत्त्वविशिष्टपक्षस्मरणम्, अनुमितीच्छाधीनतादृशविषयकतादृशस्मरणाद्वा अनुमित्सा, अनुमित्सापूर्वकालोत्पन्नविशेषणस्मरणाद्वा अनुमित्साकालोत्पन्नेन्द्रियसन्निकर्षसहितात् साध्यतद्व्याप्यविशिष्टपक्षप्रत्यक्षं तदनन्तरं च अनुमितिस्तत्र पक्षतासम्पत्तये सहकृतान्तं साधकमानविशेषणम्।

(गा०) सिद्धान्तलक्षणे सिद्ध्युत्तरक्षणे सिषाधयिषाधीनानुमितेरुपपादनाय सहकृतान्तविशेषणमुपात्तम्, तच्च तदैवोपपद्यते यदि सिद्धिसिषाधयिषापरामर्शानां त्रयाणां अनुमित्यव्यवहितप्राक्क्षणेऽवस्थितिः सम्भवति, न चैवमुपपद्यते, आत्मसमवेतयोग्यविशेषगुणानां द्विक्षणस्थायितया त्रयाणां युगपदनवस्थानात्।

न च यत्रापेक्षाबुद्ध्यात्मकपरामर्शस्य साध्यनिश्चयस्य वा प्रथममुत्पादस्तत्रैव तृतीयक्षणे त्रयाणामेवावस्थानं सम्भवति इति वाच्यम्। अपेक्षाबुद्धेः क्षणत्रयावस्थायित्वमङ्गीकुर्वाणैस्तदव्यवहितोत्तरक्षणे तदधिकरणे विशेषगुणोत्पादानभ्युपगमात्। अन्यथा स्वसमानाधिकरणस्वानन्तरोत्पन्नविशेषगुणात्मकनाशकबलात् तस्या अपि तृतीयक्षणे विनाशापत्तेरित्याशङ्कापरिजिहीर्षया सिद्ध्यात्मकसमूहालम्बनपरामर्शस्थले तादृशविशेषणप्रयोजनं दर्शयति। यत्रेत्यादिना। अनुमित्साव्यवहितोत्तरक्षणे विशिष्टपक्षप्रत्यक्षं न सम्भवति,

इच्छोत्पत्तिकाले ज्ञानानुत्पत्त्या विशेषणज्ञानघटितसामग्रीविरहात्, इच्छापूर्वक्षणे तादृशसामग्रीसमवधाने इच्छासामग्र्यपेक्षया प्रत्यक्षसामग्र्या बलवत्त्वेन तस्या एवोत्पादासम्भव इत्यतो विशिष्टस्मरणानुधावनम् । न्यूनताभङ्गाय परामर्शपूर्वोत्पन्नेच्छास्थले प्रयोजनमुक्त्वा तदनन्तरोत्पन्नेच्छास्थले तद्दर्शयति । अनुमितीति । यत्रेत्यनुषज्यते । इच्छासामग्रीसम्पत्तयेऽनुमितीष्टसाधनताविषयकेति । तादृशस्मरणात् । साध्यतद्व्याप्यविशिष्टपक्षस्मरणात् । पूर्वोक्तयुक्त्या चाक्षुषादिपरामर्शस्यानुमिताविष्टसाधनतावगाहित्वासम्भवात्, यत्र परामर्शाव्यवहितपूर्वक्षणे इष्टसाधनताज्ञानं तत्र तत्पूर्वक्षण एव फलेच्छासम्भवेन तस्याः परामर्शोत्पत्तिसमय नाशात् तदुत्तरमनुमित्साया असम्भवेनेष्टसाधनताविषयकपरामर्शस्याऽऽवश्यकत्वात् स्मरणानुधावनम् । न्यूनतापरीहाराय प्रत्यक्षात्मकपरामर्शस्थले प्रयोजनमाह । अनुमित्सापूर्वेति । अत्रापि यत्रेत्यनुषज्यते । प्रत्यक्षात्मकधूमत्वादिविशेषणज्ञानस्थले तज्जनकसन्निकर्षादिनस्तदुत्तरक्षणे विशिष्टप्रत्यक्षमेव भविष्यति न त्विच्छा । विनश्यदवस्थसन्निकर्षाद्विशेषणप्रत्यक्षानुधावने च प्रयासगौरवमतो विशेषणस्मरणपर्यन्तानुधावनम् । अनुमित्सापूर्वकाले परामर्शजनकसन्निकर्षसत्त्वे तस्या एव अनुपपत्तिरतोऽनुमित्साकालोत्पन्नेन्द्रियसन्निकर्षसहितादिति । सहकृतान्तम् । सहकृतान्तभागापरस्थाप्यसिषाधयिषाविरहविशिष्टत्वम् । तस्य अभावविशेषणत्वे सिषाधयिषादशायां तदभावविशिष्टस्य सिद्ध्यभावस्यासम्भवात् सिद्धौ सत्यामसत्याञ्चानुमित्यनुपपत्तिरतः साधकमानविशेषणमिति ।

(दी०) सिषाधयिषा च तत्साध्यविशिष्टतत्पक्षविषयकत्वप्रकारिका अनुमितिविषयिणीच्छा । यत्किञ्चिद्गोचरं ज्ञानं जायतामितीच्छायामपि सिद्धिसत्त्वे अनुमित्यनुत्पादात् अनुमितित्वाप्रकारिकायामपि प्रत्यक्षाद्यतिरिक्तं पर्वते वह्निज्ञानं जायतामितीच्छायां प्रत्यक्षाद्यनन्तरमनुमित्युत्पादाच्च

(गा०) सिषाधयिषापदस्य सिद्धीच्छासामान्यपरत्वे प्रत्यक्षत्वादिप्रकारकेच्छाबलादसत्यां प्रत्यक्षादिसामग्र्यां सिद्धिदशाया-

मनुमित्यापत्तिः, अनुमितिगोचरेच्छापरत्वे यत्किञ्चिद्गोचरं ज्ञानं जायतामितीच्छाबलात् सिद्धिकालेऽनुमित्यापत्तिः । न चानुमित्युत्पत्त्यापि तादृशेच्छाविषयसिद्धेस्तत्रानुमितिरिष्टैवेति वाच्यम् । प्रकृतानुमित्युत्पत्त्यैव यादृशेच्छाया विषयसिद्धिस्तादृशेच्छासत्त्वे एव सिद्धिकालेऽनुमितेरानुभाविकत्वात् उक्तेच्छायाश्चान्तत उपस्थितपदार्थगोचरमानसज्ञानेनापि विषयसिद्ध्या आकाङ्क्षितकरत्वादित्यतः सिषाधयिषापदार्थं व्याचष्टे । सिषाधयिषा चेति ।

घटविशिष्टपर्वतविषयकानुमितिर्जायतामित्येतादृशेच्छासत्त्वे सिद्धिसत्त्वे वह्न्यनुमित्यनुत्पादात्तत्साध्यविशिष्टेति । तत्सम्बन्धेन तत्साध्यतावच्छेदकावच्छिन्नविशिष्टेत्यर्थः । तेन कालिकसम्बन्धेन वह्निविशिष्टपर्वतविषयकानुमितिर्जायतां द्रव्यत्वावच्छिन्नविशिष्टपर्वतविषयकानुमितिर्जायतामित्येतादृशेच्छासत्त्वेऽपि सिद्धिकाले संयोगादिना न वह्नित्वावच्छिन्नस्यानुमितिः । वह्निविशिष्टमहानसविषयकानुमितिर्जायतां वह्निविशिष्टद्रव्यत्वावच्छिन्नविषयकानुमितिर्जायतामितीच्छाबलात् सिद्धिसत्त्व पर्वतो वह्निमानित्यनुमित्यनुत्पादात् तत्पक्षेति । तत्पक्षतावच्छेदकावच्छिन्नेत्यर्थः ।

न च यत्किञ्चिद्गोचरं ज्ञानं जायतामितीच्छाबलादिव आलोकवान् पर्वत इत्याद्यनुमितिसामग्रीदशायां वह्निमत्पर्वतविषयकानुमितिर्जायतामितीच्छाबलादपि सिद्धिसत्त्वे वह्निविधेयकानुमितिर्न जायते तत्कालीनसिद्ध्यप्रतिबध्यालोकाद्यनुमित्युत्पत्त्यैव तादृशेच्छाविषयवास्तववह्निमत्पर्वतविषयकानुमितिसिद्धेरित्युक्तरूपेणापि इच्छाया उत्तेजकत्वं न सम्भवतीति वाच्यम् । साध्यविशिष्टपक्षनिरूपितविलक्षणविषयिताप्रकारकत्वेनैवेच्छाया उत्तेजकत्वोपगमात् । आलोकवान् पर्वत इत्याद्यनुमितेर्वह्निविशिष्टपक्षनिरूपितविलक्षणविषयिताशून्यत्वेन तदुत्पत्त्या तादृशविषयिताप्रकारकेच्छाविषयसिद्ध्यसम्भवात् । साध्यविशिष्टपक्षनिरूपितत्वञ्च साध्यावच्छिन्नपक्षनिष्ठनिरूपकताकत्वमतो ह्रदो वह्निमानित्यादौ साध्यविशिष्टपक्षाप्रसिद्धावपि न तादृशविषयितायास्तत्प्रकारकानुमित्साया अप्रसिद्धिः । ह्रदादिनिष्ठस्य तादृशभ्रमवृत्तिविषयितानिरूपकत्वस्यापि ह्रदाद्यंशे प्रकारीभूतवह्न्यादयवच्छिन्नत्वात् ।

वस्तुतस्तु तत्साध्यविशिष्टतत्पक्षविषयकत्वस्यानेन तत्साध्यता-

वच्छेदकावच्छिन्नतत्संसर्गावच्छिन्नविधेयतानिरूपिततत्पक्षतावच्छेदकावच्छिन्नोद्देश्यताकत्वं विवक्षितं अतो वह्निमान् पर्वतो घटवानित्याद्यनुमितिसामग्रीदशायां पूर्वोक्तयुक्त्या वह्निमत्पर्वतविषयकानुमितिर्जायतामित्याकारकेच्छाबलात् पर्वतादिपक्षकवन्ह्यादिविधेयकानुमित्यनुत्पादेऽपि न क्षतिः । तादृशोद्देश्यतात्वेन च तादृशोद्देश्यताकत्वप्रकारकत्वं विवक्षणीयं तेन केवलपर्वतत्वाद्यवच्छिन्नोद्देश्यतात्वेन तादृशोद्देश्यताकत्वप्रकारकानुमित्सादशायां पर्वते अन्यानुमितिसामग्रीसत्त्वे वह्नेः सिद्धिसत्त्वे न वन्ह्यनुमित्यापत्तिः(१) । साध्यविशिष्टपक्षविषयकत्वप्रकारकत्वनिवेशप्रयोजनं दर्शयति । यत्किञ्चिदिति । यत्किञ्चिद्विषयकत्वप्रकारकत्वे निवेश्यापि यत्किञ्चिज्ज्ञानं जायतामित्यादीच्छावारणं सम्भवतीति यत्किञ्चिद्गोचरत्वप्रकारकेच्छानुधावनम् ।

न चेच्छापूर्वं यत्किञ्चिद्गोचरज्ञानस्यावश्यं सिद्धत्वात् तादृशेच्छैव न सम्भवति ज्ञानगोचरेच्छायां स्वरूपसत्याः स्वविषयसिद्धेरेव विरोधित्वात् । तदुक्तं न हि ज्ञाने जाते ज्ञानेच्छा भवतीति वाच्यम् । एतदुत्तरवर्त्ति यत्किञ्चिद्गोचरं ज्ञानं जायतामित्याद्याकारकेच्छाया विवक्षितत्वात् ।

नन्वनुमितित्वप्रकारकत्वं निवेश्यैव तथाविधेच्छावारणसम्भवे किं गुरुतरसाध्यविशिष्टपक्षविषयकत्वप्रकारकत्वनिवेशनेनेत्यत आह । अनुमितित्वाप्रकारिकायामपीति । प्रत्यक्षाद्यात्मकसिद्धिदशायां पर्वते वह्निज्ञानं जायतामित्याकारकेच्छा न सम्भवतीति तद्विषयीभूतप्रत्यक्षादिरूपसिद्धेरेव सत्त्वात्, अतः प्रत्यक्षाद्यतिरिक्तामिति । शाब्दादिरूपसिद्धौ सत्यां प्रत्यक्षाद्यतिरिक्तं ज्ञानं जायतां इत्या·

(१) एवं पक्षतावच्छेदकादिनिष्ठानवच्छिन्नत्वावगाहित्वमपि निवेशनीयं अन्यथा जातिमान् वह्निव्याप्यवानिति परामर्शकाले पर्वतो वह्निमानिति सिद्धिसत्त्वेऽनवच्छिन्नत्वानवगाहीच्छाकाले पर्वतो वह्निमानित्यनुमित्यापत्तिः, पर्वतो वह्निव्याप्यवानिति परामर्शकालीनजातिमान् वह्निव्याप्यवानिति परामर्शशून्यकालीनानवच्छिन्नत्वानवगाहीच्छानाञ्च तत्तद्व्यक्तित्वेनोत्तेजकत्वं इति बोध्यमिति पाठः क्वचित् पुस्तके दृश्यते ।

दीच्छाया उत्पादासम्भवात् । प्रत्यक्षाद्यनन्तरमिति । प्रत्यक्षादिरूपसिद्ध्यनन्तरमित्यर्थः । अनुमित्युत्पादाच्चेति । तथा चानुमितित्वप्रकारकत्वं निवेशयितुमशक्यमेव तादृशेच्छानामसंग्रहप्रसङ्गादिति भावः ।

इदमुपलक्षणम् । अनुमितित्वप्रकारकत्वनिवेशेऽपि घटाद्यनुमितिर्जायतामित्यादीच्छाकाले सिद्धिसत्त्वे वह्न्याद्यनुमितिवारणाय प्रकृतसाध्यादिविषयकत्वप्रकारकत्वनिवेशनमावश्यकम् ।

न च प्रकृतसाध्यादिविषयिणी या अनुमितिस्तद्विषयकत्वनिवेशेनापि दर्शितेच्छावारणसम्भव इति वाच्यम् । दर्शितेच्छाया अपि घटाद्यनुमितित्वेन वह्न्यादिगोचरसमूहालम्बनानुमितिविषयकत्वात् ।

न चानुमितित्वप्रकारकत्वानिवेशेऽपि अनुमितिरेव यत्र प्रत्यक्षत्वादिना इच्छाविषयस्तत्रानुमित्यापत्तिरिष्टत्वात् । अनुमितौ प्रत्यक्षत्वभ्रमदशायामेव तादृशेच्छाया उत्पादात् तस्या अनुमितित्वप्रकारकेच्छासमशीलत्वादिति हृदयम् ।

न चानुमितित्वप्रकारकत्वस्यानिवेशे पर्वते वह्नेः प्रत्यक्षतः सिद्धौ शाब्दसामग्र्याञ्च सत्यां पर्वते प्रत्यक्षाद्यतिरिक्तं वह्निज्ञानं जायतामितीच्छासत्त्वेऽनुमित्यापत्तिरिति वाच्यम् । तत्र पक्षतासत्त्वेऽप्यनुमितित्वप्रकारकेच्छाविरहविशिष्टसमानविषयकशाब्दसामग्र्याः प्रतिबन्धकत्वादेवानुमितिवारणसम्भवात् ।

अथ सिद्धिदशायां पर्वते वह्नेरन्यज्ज्ञानं जायतामितीच्छासत्त्वेऽनुमित्यापत्तिस्तस्या अप्यनुमितिविषयकत्वात् । न चेष्टापत्तिः, तदुत्तरं पर्वतो वह्निमान् इत्यादिमानसानुभवस्याऽपीच्छाविषयासत्त्वेस्तादृशेच्छाया यत्किञ्चिद्गोचरं ज्ञानं जायतामित्येतादृशेच्छातुल्यत्वात् ।

न च प्रत्यक्षेच्छाविशिष्टप्रत्यक्षसामग्रीरूपप्रतिबन्धकसत्त्वान्नापत्तिरिति वाच्यम् । प्रत्यक्षत्वादिप्रकारकेच्छाविशिष्टाया एव मानसादिसामग्र्या अनुमितिप्रतिबन्धकत्वात् । अन्यथा सिद्धिशून्यकालेऽपि तादृशेच्छासत्त्वेऽनुमित्यनुत्पादप्रसङ्गात् ।

न चोक्तयुक्त्या वह्निविधेयकत्वावगाहित्वनिवेशस्यावश्यकत्वात् वह्निप्रकारकत्वावगाहिदर्शितेच्छातत्त्वात् नानुमितिप्रसङ्गः, तद्विधेयकत्वावगाहीच्छादशायाञ्च जायत एवानुमितिः विधेयताया: प्रत्य-

क्षेऽप्रामाणिकतया तत्प्रकारकेच्छाया अनुमित्युत्पत्त्यैव विषयसिद्धेरिति वाच्यम् । विधेयतायाः प्रत्यक्षव्यावृत्तत्वे तत्प्रकारिकायाः प्रत्यक्षान्यत्वाप्रकारिकाया अपीच्छायाः प्रत्यक्षसिद्धिकाले सम्भवात् प्रत्यक्षान्यत्वप्रकारकेच्छापर्यन्तानुसरणस्य निर्बीजत्वात् ।

न च विधेयता प्रत्यक्षव्यावृत्तैव तदवगाहित्वसूचनायैवोपदर्शितेच्छाकारे प्रत्यक्षान्यत्वोल्लेख इति वाच्यम् । एवमपि वक्ष्यमाणस्य शाब्दसिद्धिकालेऽशाब्दं ज्ञानं जायतामितीच्छाबलेनानुमितिर्जायते न तु प्रत्यक्षसामग्रीकाले इत्यस्य सङ्गमयितुमशक्यत्वात् । तादृशेच्छायाः प्रत्यक्षव्यावृत्तविधेयताद्यवगाहित्वे प्रत्यक्षसामग्रीकालेऽपि तद्बलादनुमित्युत्पत्त्यौचित्यात् । तदनवगाहित्वे सिद्ध्यवस्थानुत्तेजकत्वात् ।

अत्रोच्यते । अनुमितित्वप्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छानामनुमितिविषयकेच्छात्वेनैवानुगमः । पर्वते वह्नेरन्यज् ज्ञानं जायतामित्याद्याकारकेच्छाकाले सत्यां सिद्धौ तथाविधोपनीतभानसामग्र्याश्चानुमितेर्वारणाय तथाविधेच्छाव्यक्तीनां तत्तद्व्यक्तित्वेन प्रतिबन्धकता कल्प्यते इति न दोषः ।

न च तासां तत्तद्व्यक्तित्वेनानन्तप्रतिबन्धकताकल्पनामपेक्ष्यानुमितित्वादिरूपप्रकारविशेषमन्तर्भाव्यैवानुमित्सानामुत्तेजकत्वमुचितमिति वाच्यम् । तथा सति पर्वते वह्नेरन्यज् ज्ञानं जायतामितीच्छाकाले तथाविधोपनीतभानविरोधिघटाद्यनुमितीच्छाविशिष्टतत्सामग्रीसत्त्वे सिद्धौ सत्यां वह्न्याद्यनुमित्युपपत्तये तादृशतादृशेच्छाव्यक्तीनां तत्तद्व्यक्तित्वेन सिद्ध्यनुत्तेजकत्वापत्त्या तदभावसहस्रस्य मिथो विशेष्यविशेषणभावे विनिगमनाविरहेण सिद्धिप्रतिबन्धकतानन्त्यप्रसङ्गात् ।

(टी०) यादृशयादृशेच्छासत्त्वे सिद्धौ सत्यामनुमितिस्तत्तदिच्छाभावसमुदायस्य विशेषणत्वादिच्छाया अननुगमेऽपि न क्षतिः ।

(गा०) ननु साध्यविधेयकत्वावच्छिन्नपक्षोद्देश्यकत्वप्रकारकेच्छाया उपादाने पक्षोद्देश्यकत्वावच्छिन्नसाध्यविधेयकत्वप्रकारकेच्छाया असङ्ग्रहः । एवं विषयाद्युपरक्तानुमितिविषयिण्या अनु-

मितिर्जायतामितीच्छाया अपि निरुक्तरूपेणासङ्ग्रहः । न च सा असङ्ग्राह्यैव, असिद्धसाध्यान्तरानुमितिसामग्र्यामसत्यां तद्बलादपि सिद्धस्य प्रकृतसाध्यस्यानुमितेः तदिच्छाविषयसिद्ध्यनुरोधेनावश्यकत्वादित्यत आह । यादृशयादृशेति । असत्यां सिद्धौ यत्किञ्चिद्गोचरं ज्ञानं जायतामित्यादीच्छासत्त्वेऽनुमित्युत्पादात् तासाञ्चानुत्तेजकत्वात् सिद्धौ सत्यामिति । तत्तदिच्छाभावसमुदायस्येति । साध्यविशेषविशिष्टपक्षविशेषाद्यवगाहित्वप्रकारकेच्छानां तत्तदवगाहित्वप्रकारकानुमितिगोचरेच्छात्वेनानुगमय्य प्रत्येकाभावा निवेश्यन्ते, अतथाविधानाम् अनुमितिर्जायतां प्रत्यक्षान्यज्ञानं जायतामित्याकारकेच्छानान्तु यद्यद्व्यक्तिसत्त्वे सिद्धिदशायां अनुमितिस्तत्तद्व्यक्तित्वावच्छिन्नाभावा एव निवेशनीया अन्यथा अतिप्रसङ्गात् सिद्धौ तत्कालीनसिद्धिभेदा एव वा ।

एतेन तत्कालीनसयोगाविभागादिव्यक्तिविशेषाभावनिवेशमादाय विनिगमनाविरहोऽपि निरस्तः । सामानाधिकरण्यसम्बन्धेन तदत्यन्ताभाववैशिष्ट्यनिवेशापेक्षया तत्तत्सिद्धिभेदानां विशेषणताविशेषसम्बन्धेन वैशिष्ट्यनिवेशे प्रतियोगितावच्छेदकसम्बन्धानिवेशे च लाघवम् । सिद्ध्युत्तरं तथाविधेच्छोत्पत्तिकालेऽनुमित्यापत्तिस्तु इच्छासामग्र्या अनुमितिविरोधित्वादेव न सम्भवतीति ध्येयम् ।

इदन्त्ववधेयम् । तादृशेच्छाभावसमुदायस्य न तत्समुदायत्वेन सिद्धौ विशेषणत्वं(१) किन्तु तत्तदभावत्वेनैव युगपत्तावदभावानां तथात्वं तावदभावमात्रविषयकधीविषयत्वरूपस्य तावदभावसमुदायत्वस्य तादृूप्येण निवेशे तावदभावानां तत्तदभावत्वेन नि-

(१) तादृशेच्छाभावसमुदायत्वस्य दुर्वचत्वात्, न च तावदभावमात्रविषयकधीविषयत्वं तत्, तावत्त्वस्य दुर्वचत्वात्, तावदभावविषयकबुद्धेस्तत्तदभावविषयकत्वेन निवेशे तु तत्तदभावविशिष्टसिद्धेरेव निवेशयितुमुचितत्वात् तत्तदभावानां मिथो विशेष्यविशेषणभावानापन्नानां निवेशे च प्रत्येकाभाववैशिष्ट्यस्यातिप्रसक्तत्वेनावच्छेदकत्वायोगादिति चेदेकविशिष्टापराभावत्वेनाभावानां निवेशनीयत्वात् । इति क्वाचित्कः पाठः ।

वेशनीयतया तत्तदभावत्वेन तत्तदभाववैशिष्ट्यनिवेशापेक्षया महागौरवात् । तादृश्या यत्किञ्चिद्व्यक्तित्वेन निवेशे तथाविधधीसहस्रस्य विनिगमनाविरहेण निवेशप्रसङ्गात् ।

यदि च मिथो विशेष्यविशेषणभावानापन्नेषु नानाविशेषणेषु व्यासज्ज्यवृत्तिकमवच्छेदकत्वं सिद्धान्तविरुद्धमिति मन्यते तदा एकाभावविशेषितापराभावस्यावच्छेदकत्वमुपेयम् । तत्र च विशेष्यविशेषणभावे विनिगमनाविरहेऽपि न क्षतिः गत्यन्तराभावात् । तत्तदभावमात्रविषयकधीविषयत्वेन निवेशेऽपि ज्ञाने तत्तदभावविषयितानां एकविशिष्टापरत्वेनैव निवेशनीयतया विशेष्यविशेषणभावे विनिगमनाविरहस्याऽऽवश्यकत्वादिति । इच्छाया अननुगमेऽपि । एकरूपेण सर्वासामिच्छानामुपादानासम्भवेऽपि । न क्षतिः । न सिषाधयिषाविरहविशिष्टसिद्ध्यभावस्यानुमितिहेतुत्वानुपपत्तिः । तावदभावाविशिष्टसिद्ध्यभावस्यानुगतत्वादिति भावः ।

इदं पुनरत्रावलोकनीयम् । वह्निविशिष्टपर्वतमहानसोभयानुमितिर्जायतामित्याकारकेच्छानामपि तत्साध्यविशिष्टतत्पक्षावगाहित्वप्रकारकतया पर्वते वह्नेः सिद्धिकाले महानसपक्षकानुमित्यादिसामग्र्यामसत्यां तादृशेच्छाबलात् पर्वते वन्ह्यनुमित्यापत्तिः, अनुमित्यंशे तत्साध्यविशिष्टतत्पक्षविषयकत्वान्यांकिञ्चिद्विषयकत्वाप्रकारकत्वविशेषणस्य इच्छायां निवेशे वह्निविशिष्टं पर्वतं महानसञ्चानुमिनुयामित्यादिसमूहालम्बनेच्छाया असंग्रहप्रसङ्गः । वह्निविशिष्टपर्वतविषयिणी महानसाविषयकानुमितिभिन्नानुमितिर्जायतामित्याकारकेच्छाबलात् उपदर्शितस्थलेऽतिप्रसङ्गस्याशक्यवारणतावतीच्छाविषयतावच्छेदकतायाः पर्याप्तिनिवेशनमावश्यकम् । तथा च वह्निविशिष्टपर्वतानुमितिर्भवत्वित्याद्यिच्छायास्तत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वपर्याप्तविषयतावच्छेदकताकेच्छात्वेनैव उत्तेजकत्वं पर्यवसितम्, अनुमितित्वानन्तर्भावे तादृशेच्छायास्तत्साध्यविशिष्टतत्पक्षविषयकत्वपरिसमाप्तविषयतावच्छेदकत्वाभावेनाशक्यसङ्ग्रहत्वात् । एवञ्चानुमितित्वप्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छानामनुमितिविषयकत्वरूपेण सङ्ग्रहाभिधानमसङ्गतम् ।

न च तत्कल्पं परित्यज्यैव यादृशयादृश इत्याद्यभिधानम्, इदानीमनुमितित्वप्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छानां पृथक् पृथगभा-

वनिवेशनमेवाभिप्रेतमिति वाच्यम् । पक्षान्तरसूचकवाक्याद्यभावात् ।

अथ अनुमितित्वप्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छानामनुगम एव सम्भवति, तथा हि तत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वपर्याप्तावच्छेदकताकत्वं तादृशधर्मघटकपरिसमाप्तावच्छेदकताकत्वं तत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपकविषयताकत्वमेव पर्यवसितम्, एवञ्च तत्साध्यविशिष्टतत्पक्षविषयकप्रत्यक्षान्यज्ञानत्वादिनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपकविषयताकेच्छात्वादिना प्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छानां पृथगुत्तेजकत्वापेक्षया निरुक्तधर्मघटकानुमितित्वनिष्ठावच्छेदकताभिन्नावच्छेदकतायामेव प्रत्यक्षान्यज्ञानत्वादिनिष्ठावच्छेदकताभिन्नत्वनिवेशनमुचितं लाघवात्, इत्थञ्च तादृशरूपेणैव प्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छानामपि सङ्ग्रहः सम्भवति ।

न च वह्निविशिष्टपर्वतविषयकं जायतामित्याकारकेच्छायाः सिद्ध्यधीनसंस्कारोत्पत्त्यैव चरितार्थतया वारणाय विषयतायामनुमितित्वावच्छिन्नत्वनिवेशनस्याऽऽवश्यकतया न तत्सङ्ग्रह इति वाच्यम् । समवायेन किञ्चिदवच्छिन्नत्वं निवेश्यैव तादृशेच्छावारणसम्भवादिति चेत् ? तर्हि पक्षांशे साध्यावगाहित्वेनानुमितिविषयकेच्छानामुक्तरूपसमशीलरूपान्तरेण उत्तेजकत्वापेक्षया तादृशावच्छेदकतायामेव पक्षांशे साध्यावगाहित्वीयावच्छेदकताभिन्नत्वमपि निवेश्यतां तावतैव तत्सङ्ग्रहस्यापि सम्भवात् इच्छाया अननुगमाभिधानासङ्गतिः ।

न च विषयतायां साध्यविशिष्टपक्षावगाहित्वाद्यवच्छिन्नत्वनिवेशनमावश्यकम्, अन्यथा अन्यानुमितिसामग्रीसमवहितानामनुमितिर्जायतामित्याकारकविषयविशेषानुपरक्तानुमितीच्छानां वारणासम्भवादिति, अन्यानुमितिसामग्र्यसमवहिततादृशेच्छानां तत्तद्व्यक्तित्वेनैवोत्तेजकत्वस्योपगन्तव्यतया उत्तेजकानामननुगमाभिधानसङ्गतिरिति वाच्यम् । तादृशेच्छानां तत्तद्व्यक्तित्वेन प्रतिबन्धकतयैवातिप्रसङ्गवारणसम्भवेन तासां वारणानौचित्यात् । साध्यविशिष्टपक्षावगाहित्वावच्छिन्नत्वमधिकमनुमितिनिष्ठविषयतायां निवेश्य

दर्शितसामग्र्यसमवहिततथाविधेच्छानां तत्तद्व्यक्तित्वेन उत्तेजकताकल्पने तत्तादृच्छाभावानां विशेष्यविशेषणभावे विनिगमनाविरहेण गौरवप्रसङ्गात् । अन्यानुमितिसामग्रीकालीनतादृशेच्छानां प्रतिबन्धकत्वे तत्कालीनवायुसंयोगादिव्यक्तीनां विनिगमनाविरहेण प्रतिबन्धकताप्रसङ्गवत् तादृशसामग्र्यभावकालीनतथाविधेच्छानां उत्तेजकतामतेऽपि विनिगमनाविरहेऽपि तत्तदिच्छाकालीनसंयोगविशेषाणामुत्तेजकताप्रसङ्गस्य दुर्वारत्वात् । अथ चोक्तानुगतरूपेणोत्तेजकीभूतायामिच्छायामनुमितिर्जायतामित्याकारकान्यानुमितिसामग्रीसमवहितेच्छाव्यक्तीनां भेदा एव निवेशनीया न तु तासामनुमितिप्रतिबन्धकत्वमिति, तत्तदिच्छाभेदनिवेशस्थले तत्कालीनवायुसंयोगादिभेदनिवेशनेन नोपपत्तिः, इच्छायां तत्तद्भेदस्याव्यावर्त्तकत्वात्तत्तत्संयोगाभावानां वैशिष्ट्यनिवेशे च तादृशवैशिष्ट्यस्य सामानाधिकरण्यरूपतया साक्षात्सम्बन्धेन इच्छाभेदनिवेशे लाघवस्यैव विनिगमकत्वात् ।

अत्राहुः । उक्तसकलेच्छानां निरुक्तरूपेणानुगमेऽपि एतत्क्षणानन्तरक्षणेऽनुमितिर्भवत्वित्याकारकेच्छानामेव निरुक्तरूपेणासङ्ग्रहात्तत्तद्व्यक्तित्वेन पृथगभावा निवेशनीयाः तादृशक्षणवृत्तित्वाद्यवच्छेदकताभेदं उक्तावच्छेदकतायां निवेश्य सङ्ग्रहे कालान्तरेऽपि तथाविधेच्छाबलात् अनुमित्यापत्तेः, कालान्तरे अनुमित्युत्पत्त्या च तादृशानुमितेरविषयासिद्धेरिष्टापत्त्ययोगादित्यननुगमाभिधानसङ्गतिः ।

न च कालान्तरीणतादृशेच्छानां तत्तद्व्यक्तित्वेन प्रतिबन्धकतया तादृशेच्छाबलादनुमित्यापत्तिवारणसम्भव इति वाच्यम् । उपदर्शितैकधर्मप्रकारकैकानुमितिसाव्यक्तीनां तत्तद्व्यक्तित्वेनोत्तेजकत्वापेक्षया तत्समानप्रकारककालान्तरीणबहुतरेच्छानां तत्तद्व्यक्तित्वेन प्रतिबन्धकत्वे गौरवात् ।

न चैवमपि प्राथमिकस्य साध्यविशिष्टपक्षविषयित्वप्रकारकत्वविशेषणस्याभिधानासङ्गतिर्दुर्वारैवेति वाच्यम् । अनुमितिनिष्ठविषयतायां साध्यविशिष्टपक्षविषयकत्वाद्यन्यप्रकारकत्वानवच्छिन्नत्वनिवेश एव तत्तात्पर्यात् ।

वस्तुतः साध्यविशिष्टपक्षविषयकत्वप्रकारकत्वानिवेशनमप्यावश्यकम्, अन्यथा किञ्चिज्ज्ञानं जायतां यत्किञ्चिद्गोचरं ज्ञानं जा-

यतामितीच्छावारणासम्भवात् तत्सङ्ग्रहे तादृशीनां सर्वासामिच्छानां तत्तद्व्यक्तित्वेनैव प्रतिबन्धकत्वे गौरवात् । अनुमितिर्जायतामित्यादीच्छानाञ्च पृथगनुमितित्वादिपर्याप्तविषयतावच्छेदकताकेच्छात्वेनैवोत्तेजकता अन्यानुमितिसामग्रीसमवहिततादृशेच्छानाञ्च तत्तद्व्यक्तित्वेन प्रतिबन्धकत्वमेवेति सर्वं समञ्जसम् ।

(दी०) धूमेन अनुमिनुयामितीच्छायामालोकपरामर्शादसत्यामपि सिद्धौ यदि नानुमितिस्तदा अन्यमात्रलिङ्गकानुमितीच्छा कामिनीजिज्ञासादिवत् पृथक् प्रतिबन्धिका । यदि च तत्र अनुमितिस्तदा सिद्धिसत्त्वे तत्र अनुमितेर्वारणाय तल्लिङ्गकानुमितीच्छा तदन्यमात्रलिङ्गकानुमितीच्छातिरिक्तानुमितीच्छा वा वाच्या ।

(गा०) ननु धूमेन पर्वते वह्निमनुमिनुयामित्याकारकेच्छाबलाद् धूमादिलिङ्गकानुमित्युत्पत्त्या तत्साधारणरूपेणैव सिषाधयिषाणां सिद्ध्युत्तेजकताया आवश्यकत्वात् तत्तत्सिद्धिकालेऽसत्यपि धूमपरामर्शे आलोकादिपरामर्शादनुमित्यापत्तिः पक्षताया अक्षतत्वादित्यत आह । धूमेनेति । भिन्नलिङ्गकेच्छासत्त्वेऽपि सिद्धिदशायामेव यदि नानुमितिस्तदा तादृशेच्छायाः प्रतिबन्धकत्वं न सम्भवतीत्यतोऽसत्यामपि सिद्धाविति, तत्रानुमितेः सन्दिग्धतया यदीति । तदेति । तल्लिङ्गकानुमिताविति शेषः ।

अन्यमात्रेति । तदन्यमात्रलिङ्गकत्वप्रकारकसिद्धीत्यर्थः । धूमलिङ्गकानुमितिरालोकलिङ्गकानुमितिश्च जायतामित्याद्याकारकसमूहालम्बनेच्छाकाले आलोकादिपरामर्शादनुमित्युपपत्तये मात्रेति । तदन्यमात्रलिङ्गकत्वप्रकारकत्वञ्च तल्लिङ्गकत्वाप्रकारकत्वे सति किञ्चिल्लिङ्गकत्वप्रकारकत्वम् । अतः प्रमेयसामान्यलिङ्गकस्थले तदन्याप्रसिद्धावपि न दोषः । तल्लिङ्गकत्वाप्रकारकत्वञ्च तल्लिङ्गकत्वप्रकारतानिरूपिततत्साध्यविशिष्टतत्पक्षविषयकत्वावच्छिन्नानुमितिनिष्ठविशेष्यताकान्यत्वम् । अत आलोकेनेन्धनं धूमेन तु वह्निमनुमिनुयामित्यादीच्छादशायामालोकादिलिङ्गकवह्न्याद्यनुमितेर्नापत्तिः । आ-

लोकलिङ्गकत्वप्रकारताशरीरे च वास्तवालोकादिप्रकारता न निवेशनीया किन्तु आलोकत्वाद्यवच्छिन्नप्रकारतैव, अन्यथा आलोकत्वादिना धूमत्वादिना च धूमादिकमालोकादिकमवगाहमानयोरिच्छयोरालोकलिङ्गकानुमित्यादौ प्रतिबन्धकत्वतदभावयोरापत्तेः। द्रव्येणानुमिनुयामित्यादीच्छाया आलोकादिलिङ्गकानुमित्यविरोधित्वोपपत्तये चालोकत्वाद्यवच्छिन्नत्वस्थले आलोकाद्यवृत्तित्वेनाज्ञायमानधर्मावच्छिन्नत्वमेव निवेश्यं द्रव्यत्वादेरालोकत्वादिविरुद्धत्वभ्रमदशायां तादृशेच्छाया विरोधित्वोपपादनायालोकत्वादेरालोकादिवृत्तित्वज्ञानशून्यकालीनाया आलोकेनानुमिनुयामित्यादीच्छाया अविरोधित्वोपपत्तये च वास्तवालोकादिवृत्तित्वस्य तेन रूपेण ज्ञायमानत्वस्य चोपेक्षणम् । धूमत्वादेरालोकादिवृत्तित्वग्रहदशायां धूमेनानुमिनुयामित्यादीच्छाया आलोकादिलिङ्गकानुमित्यविरोधित्वमिष्टमेव । विरोधित्वञ्च तादृशेच्छाया धूमत्वादेरालोकत्वादिविरुद्धत्वग्रहदशायामेव ।

वस्तुतस्तु द्रव्यं नालोक इत्यादिज्ञानशून्यकालीनानां आलोको द्रव्यमित्यादिज्ञानकालीनानां वा इच्छानां तत्तद्व्यक्तित्वेन भेदकूट एव स्वातन्त्र्येण प्रतिबन्धकतावच्छेदकेऽनुप्रवेशनीयः तेन उक्तकल्पे कालान्तरीणपुरुषान्तरीयज्ञानवारणाय स्वसमानकालीनत्वस्वसमानाधिकरणत्वयोर्ज्ञानविशेषणतया ध्रौव्ये स्वपदेन फलीभूतानुमित्युपादाने यादृशानुमितिदशायां क्वचिदपि धर्मे नालोकाद्यवृत्तित्वज्ञानं प्रसिद्ध्यति तत्र स्वसमानाधिकरणस्वसमानकालीनालोकत्वादिविरुद्धत्वज्ञानाविषयधर्मवल्लिङ्गकत्वप्रकारकानुमित्साभिन्नानुमित्साभावरूपकारणाप्रसिद्धिः स्वत्वाननुगमेन कार्यकारणभावस्य तत्तदनुमितिव्यक्तिविश्रामश्च । भेदप्रतियोग्यनुमित्सोपादाने चालोकेन द्रव्येण वाऽनुमिनुयामित्याद्याकारकयादृशेच्छासमानाधिकरणसमानकालीनतादृशज्ञानाप्रसिद्धिस्तादृशेच्छायास्तथाविधस्वभिन्नत्वेनालोकादिलिङ्गकानुमितिप्रतिबन्धकत्वापत्तिरिति परास्तम् ।

यद्वा आलोको द्रव्यमित्यादिज्ञानविशिष्टत्वेनालोको न द्रव्यमित्यादिज्ञानविरहविशिष्टत्वेनैव वा द्रव्यत्वादिमल्लिङ्गकत्वप्रकारकेच्छा अनुगमय्य तद्भेदा एव प्रतिबन्धकतावच्छेदककोटौ निवेशनीयाः । भेदस्य कालिकाव्याप्यवृत्तित्वोपगमात्तादृशज्ञानशून्यकाली-

नानां द्रव्येणानुमिनुयामित्यादीच्छानां विशिष्टभिन्नतया प्रतिबन्धकत्वोपपत्तिः। सामानाधिकरण्यसम्बन्धेन वैशिष्ट्यानिवेशाच्च पुरुषान्तरीणज्ञानादिकमादाय दोषः। द्रव्यत्वावच्छिन्नानुमिनुयामित्याद्याकारिकाणां द्रव्यत्वांशे लिङ्गतावच्छेदकत्वावगाहिनीनामिच्छानान्तु न द्रव्यत्वादिमद्विषयकपरामर्शजन्यत्वरूपद्रव्यत्वादिमल्लिङ्गकत्वप्रकारकत्वं विषयितायामेव तत्र द्रव्यत्वावच्छिन्नत्वाभानात् लिङ्गांशे द्रव्यत्वाद्यनवगाहनादतस्तथाविधेच्छानामालोकत्वाद्यवच्छिन्नलिङ्गकानुमितिविरोधित्वमक्षतमेव। आलोकत्वावच्छिन्नेनानुमिनुयामित्यादीच्छानां तादृशानुमित्यविरोधित्वोपपत्तये चालोकलिङ्गकत्वाद्यप्रकारकत्ववदालोकत्वाद्यवच्छिन्नलिङ्गकत्वाद्यप्रकारकत्वमप्यालोकत्वाद्यवच्छिन्नलिङ्गकानुमितिप्रतिबन्धकतायां निवेशनीयम्। पर्वते वह्निमनुमिनुयामित्याद्याकारकलिङ्गविशेषजन्यत्वानवगाहिनीनामिच्छानामविरोधित्वोपपत्तये किञ्चिल्लिङ्गकत्वनिवेशः। तदर्थश्च किञ्चिल्लिङ्गकत्वप्रकारतानिरूपिततत्तत्साध्यविशिष्टतत्पक्षविषयकत्वावच्छिन्नविशेष्यताकत्वम्। अतो धूमेन इन्धनमनुमिनुयाम इत्याद्याकारकेच्छानां नालोकादिलिङ्गकवह्न्याद्यनुमितिविरोधित्वम्।

इदमत्रावधेयम्। आलोकलिङ्गकधूमलिङ्गकानुमितिर्जायतामित्याद्याकारकेच्छाकाले केवलालोकलिङ्गकपरामर्शादनुमितिर्न जायते तथाविधानुमितेस्तादृशेच्छाया अविषयत्वात्, उभयादिलिङ्गकानुमितेरेव तद्विषयत्वात्। एवं धूमलिङ्गकवह्न्यनुमितिरालोकलिङ्गकवह्निघटोभयानुमितिश्च जायतामित्याद्याकारकेच्छाकाले घटाद्यनुमितिसामग्र्यामसत्यां आलोकपरामर्शाद्वह्न्यनुमितिर्न जायते घटाद्यविषयकानुमितेरुत्पत्त्या तादृशेच्छाविषयासिद्धेरतस्तथाविधेच्छानां तत्र तत्र प्रतिबन्धकतानिर्वाहाय तत्तल्लिङ्गकत्वतत्तत्साध्यविशिष्टतत्पक्षविषयकत्वानुमितित्वादिप्रकारताभिन्नप्रकारतानिरूपितविशेष्यताशून्यत्वमेव तल्लिङ्गकत्वाप्रकारकत्वेत्यनेन विवक्षणीयम्। उक्तस्थले चालोकलिङ्गकवह्न्यनुमितित्वादिप्रकारतानिरूपितविशेष्यता तादृशप्रकारतातिरिक्तधूमलिङ्गकत्वादिप्रकारतानिरूपितैव, समूहालम्बन एव प्रकारताभेदेन विशेष्यताभेदात्। अन्यथा समूहालम्बनेच्छातस्तादृशेच्छावैलक्षण्यानुपपत्तेः, तथा च तादृशेच्छानां तथाविधप्रकारत्वानिरूपितविशेष्यताशून्यत्वेन प्रतिबन्धकत्वनिर्वा-

हः, आलोकेनानुमितिर्जायतां धूमेन च पर्वते वह्निमनुमिनुयामित्याकारकसमूहालम्बनेच्छानां तादृशविशेष्यतांशशून्यत्वाद्विरहेऽपि आलोकलिङ्गकान्यानुमितिसामग्रीकालीनतथाविधेच्छानां तत्तद्व्यक्तित्वेन पृथक् प्रतिबन्धकत्वोपगमेन न तदानीमालोकलिङ्गकानुमित्यापत्तिः। पर्वते वह्निमनुमिनुयां धूमेन च वह्निमनुमिनुयामित्याद्याकारकसमूहालम्बनेच्छायाः प्रामाणिकत्वे तत्रालोकपरामर्शादनुमितिर्भवत्येव एवञ्च लिङ्गविशेषजन्यत्वाद्यविषयकेच्छाया विशेषणदलेनैव प्रतिबन्धकत्ववारणे धूमेन घटमनुमिनुयामित्यादीच्छावारणमेव विशेष्यदलप्रयोजनम्, तदर्थञ्च न किञ्चिल्लिङ्गकत्वप्रकारतानिरूपिततत्साध्यविशिष्टतत्पक्षविषयकत्वावच्छिन्नविशेष्यताकत्वं तथा सति धूमेनानुमिनुयामित्याद्याकारकविषयविशेषानुमितीच्छानामसंग्रहापत्तेः, किन्तु किञ्चिल्लिङ्गकत्वतत्साध्यविशिष्टतत्पक्षविषयकत्वानुमितित्वादिप्रकारताभिन्नप्रकारत्वानिरूपितविशेष्यताकत्वमेव विशेष्यदलेन विवक्षणीयम् । धूमेन घटमनुमिनुयामितीच्छावत् धूमेन वह्निघटोभयमनुमिनुयामित्यादीच्छाया अपि आलोकलिङ्गकवह्न्याद्यनुमित्यविरोधित्वमिष्टमेव, सिद्धौ तादृशेच्छाया अनुत्तेजकतया सिद्धिकाले तादृशेच्छाबलादसत्यामालोकलिङ्गकानुमितीच्छायां न तादृशानुमितिरिति दिक् ।

एकलिङ्गकेच्छाकालीनोभयलिङ्गकपरामर्शजन्यानुमितौ व्यभिचारवारणप्रकारः पुनरग्रे प्रदर्शयिष्यते ।

ननु स्वविषयसजातीयज्ञाने इच्छाया विरोधित्वमदृष्टचरमित्यत आह । कामिनीजिज्ञासादिवदिति । यथा कामिनीदिदृक्षा घटादिविषयकचाक्षुषादिप्रतिबन्धिका तथेत्यर्थः। पृथक् प्रतिबन्धिकेति । पक्षतासमवधानदशायामनुमित्यनुत्पादप्रयोजिकेत्यर्थः, तथा चोक्तस्थले पक्षतासत्त्वे क्षतिविरहात्तदिष्टमेवेति भावः ।

ननु कामिनीजिज्ञासास्थले कामिनीभिन्नविषयकज्ञानानुत्पादस्य सर्वानुभवसिद्धतया तत्र तस्याः प्रतिबन्धकत्वमस्तु, सिद्धसत्त्वे धूमादिलिङ्गकानुमित्सादशायां आलोकलिङ्गकवह्न्यनुमित्यनुत्पादस्तु नानुभविकः। तथा सति तुल्ययुक्त्या घटाद्यनुमित्साप्रत्यक्षादिगोचरेच्छादशायामपि तदनुत्पादस्य तथात्वप्रसक्तेः। न ह्येकमपि विशेषमीक्षामहे इत्यभिसन्धाय उक्तापत्तिवारककल्पान्तरमनुसर-

ति । यदि चेति । तथा चान्यलिङ्गकानुमित्सायाः प्रतिबन्धकत्व-
मसम्भावितमेवेति भावः । तत्रेति । अन्यलिङ्गकानुमित्सास्थले
इत्यर्थः । तल्लिङ्गकानुमितीच्छा । तल्लिङ्गकत्वप्रकारतानिरूपिततत्सा-
ध्यविशिष्टतत्पक्षविषयकानुमितित्वाद्यवच्छिन्नविशेष्यताकेच्छा सि-
षाधयिषापदेन विवक्षणीयेत्यर्थः ।

नन्वेवं लिङ्गविशेषानुपरक्तानुमित्साकाले सिद्धौ सत्यामनुमि-
मित्यनुपपत्तिरत आह । तदन्यमात्रलिङ्गकेति । धूमेनालोकेन चा-
नुमिनुयामित्यादिसमूहालम्बनेच्छाकाले आलोकादिलिङ्गकानुमि-
त्युपपत्तये मात्रेति । तथा च तल्लिङ्गकतत्साध्यविशिष्टतत्पक्षविषय-
कानुमितित्वाप्रकारिका सती या किञ्चिल्लिङ्गकतत्साध्यविशिष्टतत्प-
क्षविषयकानुमितित्वप्रकारिकेच्छा तदन्यतत्साध्यविशिष्टतत्पक्ष-
विषयकानुमितित्वादिप्रकारिकेत्यर्थः ।

लिङ्गविशेषोपरक्तानुमितीच्छासंग्रहाय सत्यन्तम् । आलोकेने-
न्धनमनुमिनुयां धूमेन च वह्निमनुमिनुयामित्याद्याकारकेच्छाबला-
दालोकलिङ्गकवह्न्याद्यनुमित्यापत्तिवारणाय तत्र साध्यादिनिवेशः ।
लिङ्गविशेषानुपरक्तानुमितीच्छाकाले पर्वते वह्निमनुमिनुयां धूमेने-
न्धनमनुमिनुयामित्याद्याकारकसमूहालम्बनेच्छाकाले चालोकलि-
ङ्गकानुमित्युपपत्तये तद्विशेष्यदलम् । यत्किञ्चिद्गोचरं ज्ञानं जायता-
मित्यादीच्छावारणाय चरमदलम् ।

यद्यपि आलोकधूमोभयलिङ्गकवह्निविशिष्टपर्वतविषयकानुमिति-
र्जायतामालोकेन वह्निघटोभयविशिष्टपक्षविषयकानुमितिर्धूमेन व-
ह्निविशिष्टपर्वतमहानसोभयविषयकानुमितिश्च जायतामित्यादीच्छा-
वारणाय तल्लिङ्गकत्वतत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वादिप्र-
कारताभिन्नप्रकारतानिरूपितविशेष्यताकान्यत्वमेव सत्यन्तदलेन
विवक्षणीयम् । तथा च लिङ्गविशेषानुपरक्तानुमितीच्छानां तादृश-
विशेष्यताकान्यत्वविरहात्किञ्चिल्लिङ्गकत्वादिप्रकारतानिवेशनमफल-
मेवेति तथाविधविशेष्यताशालित्वेनैवेच्छाया उत्तेजकत्वमुचितं,
तथापि तादृशविशेष्यताशालीच्छायामेव तदन्यमात्रेत्यादिग्रन्थता-
त्पर्यमिति । शेषं पूर्वोक्तदिशाऽवसेयम् ।

(दी०) लिङ्गविशेषेणापि च नियन्त्रितं पक्षत्वम् । तल्लि-

ङ्गकानुमितीच्छाविरहविशिष्टान्यलिङ्गकानुमितीच्छा एव वा प्रतिबन्धिका ।

(गा०) नन्वेवं धूमालोकादिलिङ्गकानुमितिसाधारणैकपक्षत्वासम्भव इत्यत्र इष्टापत्तिमाह । लिङ्गविशेषणापीति । लिङ्गभेदेनापि पक्षत्वं भिन्नमेवेत्यर्थः । अपिः साध्यादिभेदसमुच्चायकः । तत्प्रदर्शनञ्च दृष्टान्तार्थम् । तथा च साध्यादिभेदेनेव लिङ्गभेदेनापि पक्षताभेदो न क्षतिकर इति भावः ।

नन्वेवं लिङ्गभेदेन पक्षताया अननुगमात् तस्या व्यभिचारेणानुमितिरूपानुगतकार्ये हेतुत्वासम्भवः । न च तत्तत्साध्यकत्वादिवत्तत्तल्लिङ्गकत्वस्यापि कार्यतावच्छेदके निवेशान्न व्यभिचार इति वाच्यम् । तावताप्यालोकादिलिङ्गकानुमितीच्छाधीनधूमालोकोभयादिविषयकसमूहालम्बनपरामर्शजन्यानुमितौ धूमादिलिङ्गकानुमितीच्छाविरहविशिष्टसिद्ध्यभावव्यभिचारस्य दुर्वारत्वात्तादृशानुमितावपि धूमादिलिङ्गकपरामर्शजन्यत्वरूपधूमलिङ्गकत्वस्याक्षतत्वात् ।

न च यत्र धूमलिङ्गकानुमितीच्छाया उत्तेजकता तत्रालोकलिङ्गकानुमितीच्छानामपि तत्तल्लिङ्गकपरामर्शविशिष्टानामुत्तेजकत्वोपगमान्नोक्तस्थले व्यभिचार इति वाच्यम् । तथा सति तत्र धूमलिङ्गकेच्छाया अपि धूमलिङ्गकपरामर्शविशिष्टाया एवोत्तेजकत्वौचित्यात्, सर्वसाधारणैकपक्षताया एव सुवचतया लिङ्गविशेषणापीति ग्रन्थासङ्गतिरिति चेन्न । धूमलिङ्गकेच्छाविरहविशिष्टसिद्धिविशिष्टान्यानुमितित्वमेव तादृशसिद्ध्यभावजन्यतावच्छेदकम् । तादृशसिद्धिविशिष्टत्वञ्च, स्वसामानाधिकरण्यावच्छिन्नस्वाव्यवहितोत्तरोत्पत्तिकत्वसम्बन्धेन, उक्तसमूहालम्बनस्थलीयानुमितिस्तथाविधसिद्धिविशिष्टैवेति तत्र न व्यभिचारः । सिद्धिकालेऽसत्यां तल्लिङ्गकसिषाधयिषायामुक्तस्थल इव न धूमपरामर्शादनुमित्यापत्तिः, धूमादिलिङ्गकेच्छाविरहविशिष्टसिद्ध्यभावादिघटितस्यैव धूमादिपरामर्शघटितकारणस्तोमस्य कार्योत्पत्तिप्रयोजकत्वोपगमात् । समूहालम्बनस्थले आलोकपरामर्शादिघटितसामग्रीत एव कार्योत्पत्तिनिर्वाहात् ।

अथाव्यवहितोत्तरत्वमवश्यं तृतीयक्षणसाधारणं, स्वध्वंसा-

धिकरणकालध्वंसानधिकरणत्वे सति स्वाधिकरणकालध्वंसाधिकरणत्वरूपं वाच्यम् । अन्यथा यत्र क्रमेण सिद्ध्यात्मकधूमालोकोभयलिङ्गकपरामर्शालोकलिङ्गकेच्छानुमितयस्तत्रानुमित्युत्पत्त्यधिकरणक्षणस्य धूमलिङ्गकेच्छाविरहविशिष्टसिद्ध्यधिकरणक्षणध्वंसाधिकरणक्षणध्वंसाधिकरणत्वेन तदुत्पत्तिकानुमितेरुक्तसम्बन्धेन तादृशसिद्धिविशिष्टान्यत्वात् तादृशसिद्ध्यभावस्य व्यभिचारतादवस्थ्यात् । एवञ्च यत्र क्रमेण सिद्ध्यात्मकधूमपरामर्शधूमलिङ्गकेच्छानुमितयस्तत्रत्यानुमितेर्धूमलिङ्गकेच्छाविरहविशिष्टसिद्धिविशिष्टत्वेन पक्षताकार्यत्वानुपपत्तिरिति चेन्न । तादृशसिद्धिविशिष्टत्वं स्वाधिकरणक्षणध्वंसोत्पत्त्यधिकरणक्षणोत्पत्तिकत्वसम्बन्धेन वाच्यम । उक्तसमूहालम्बनस्थले अनुमित्यव्यवहितपूर्वक्षणस्यापि धूमलिङ्गकेच्छाविरहविशिष्टसिद्ध्यधिकरणत्वात्तादृशक्षणध्वंसोत्पत्त्यधिकरणोत्पत्तिकत्वमनुमितेरिति न व्यभिचारः । एवं सिद्ध्यात्मकधूममात्रपरामर्शजन्यानुमितेर्धूमलिङ्गकेच्छाविरहविशिष्टसिद्ध्यधिकरणप्रथमक्षणध्वंसोत्पत्त्यधिकरणक्षणोत्पत्तिकत्वाभावात् पक्षताकार्यत्वनिर्वाहः ।

अथ वा स्वाव्यवहितपूर्वकालावच्छिन्नतल्लिङ्गकेच्छाविरहविशिष्टसिद्ध्यभावाधिकरणताविशिष्टसमवाय एव तादृशसिद्ध्यभावकार्यतावच्छेदकसम्बन्ध इति न कोऽपि दोषः ।

अथ वा स्ववृत्तिकृतिमत्त्वस्ववृत्तिप्रागभावप्रतियोगित्वस्वसामानाधिकरण्यैतादृशत्रितयसम्बन्धेन तादृशसिद्धिविशिष्टान्यत्वं तादृशसिद्ध्यभावजन्यतावच्छेदकमिति न कोऽपि दोषः ।

अथ वा तादृशसिद्धिविशिष्टत्वं तादृशस्वाधिकरणक्षणत्वावच्छिन्नध्वंसाधिकरणध्वंसानधिकरणं यस्तादृशस्वाधिकरणक्षणध्वंसाधिकरणक्षणस्तदुत्पत्तिकत्वसम्बन्धेन वाच्यम् । उक्तसमूहालम्बनस्थले च तादृशसिद्ध्यधिकरणक्षणत्वावच्छिन्नध्वंसाधिकरणमनुमित्युत्पत्तिक्षण एवेति तद्ध्वंसानधिकरणक्षणोत्पत्तिकत्वमनुमितेरिति न व्यभिचारः । सिद्ध्यात्मकधूममात्रपरामर्शजन्यानुमितेर्धूमलिङ्गकेच्छाविरहविशिष्टसिद्ध्यधिकरणक्षणत्वावच्छिन्नध्वंसाधिकरणद्वितीयक्षणध्वंसानधिकरणक्षणोत्पत्तिकत्वविरहात्, विशिष्टसिद्धिविशिष्टान्यत्वमव्याहतमिति । एवं यत्र धूमपरामर्शस्तदुत्तरं त-

दप्रामाण्यानवगाही आलोकपरामर्शस्तदुत्तरमनुमितिस्तत्रानुमितेरप्रामाण्यज्ञानाभावविशिष्टधूमपरामर्शविशिष्टत्वरूपाप्रामाण्यज्ञानाभावविशिष्टधूमपरामर्शजन्यतावच्छेदकाक्रान्तत्वात्, अव्यवहितपूर्वक्षणे चाप्रामाण्यज्ञानाभावविशिष्टधूमपरामर्शासत्त्वेन प्रसक्तस्य व्यभिचारस्य एतादृशैर्बहुभिः प्रकारैरेव वारणमवसेयम् । लिङ्गोपधानमते च न काचिदनुपपत्तिः । तन्मते धूमविशिष्टपर्वतत्वाद्यवच्छिन्नविशेष्यताकवह्न्यनुमितित्वादेरेव धूमलिङ्गकेच्छाविरहविशिष्टसिद्ध्यभावादिजन्यतावच्छेदकत्वादुक्तसमूहालम्बनस्थले चालोकवान् पर्वतो वह्निमानित्याद्याकारकानुमितेरेवोपगमेन व्यभिचारानवकाशादिति । धूमेनानुमिनुयामालोकेनानुमिनुयामित्यादिसकलेच्छासाधारणरूपेणैव सिषाधयिषाणां सिद्ध्युत्तेजकत्वम् । तथा च धूमालोकादिलिङ्गकानिखिलानुमितिसाधारणी एकैव पक्षता । उक्तस्थलेऽतिप्रसङ्गभङ्गाय च प्रतिबन्धकान्तरमेव कल्प्यत इत्याशयेनाह । तल्लिङ्गकेति । असत्यां सिद्ध्यावन्यलिङ्गकानुमितीच्छासत्त्वेऽनुमित्युपपत्तये, सिद्धिकालीनेति । सामानाधिकरण्यसम्बन्धेन सिद्धिविशिष्टेत्यर्थः । समूहालम्बनेच्छाकाले सिद्धिसत्त्वेऽनुमित्युपपत्तये तल्लिङ्गकानुमितीच्छाविरहविशिष्टेति । धूमलिङ्गकत्वादिप्रकारतान्यप्रकारत्वानिरूपितविशेष्यताकेच्छाविरहविशिष्टेत्यर्थकम् । तेन न धूमालोकोभयलिङ्गकवह्न्यनुमितिर्जायतामित्याकारकेच्छाबलात् सिद्धिकाले केवलालोकलिङ्गकानुमितिप्रसङ्गः । न वाऽऽलोकेन वह्निघटोभयानुमितिर्धूमेन वह्न्यनुमितिर्जायतामित्येतादृशेच्छाकाले सिद्धिसत्त्वे केवलालोकादपरामर्शात् केवलवह्न्याद्यनुमित्यापत्तिः ।

यद्यपि तादृशप्रकारत्वानिरूपितविशेष्यताकान्यत्वस्य इच्छाविशेषणत्वोपगम एव समूहालम्बनेच्छास्थलेऽनुमितिरुपपादयितुं शक्यते, तथापि ज्ञानेच्छयोर्युगपदुत्पादमङ्गीकुर्वतां नवीनानां मते यत्र सिद्ध्युत्पत्तिकाले धूमादिलिङ्गकानुमितीच्छायास्तद्द्वितीयक्षणे चालोकलिङ्गकानुमितीच्छाया उत्पादस्तत्रालोकलिङ्गकानुमित्युपपत्तये तादृशविशेष्यताशालीच्छाविरहवैशिष्ट्यपर्यन्तानुसरणम् । लिङ्गविशेषानुपरक्तानुमितीच्छानामपि निरुक्तोत्तेजकतावच्छेदकाक्रान्ततया तादृशेच्छायाः प्रतिबन्धकत्वाप्रसक्तेरन्यलिङ्गकेति सम्पातायातम् । सिद्धिविशिष्टेच्छामात्रस्य प्रतिबन्धकत्वे सि-

द्धिविशिष्टघटतदनुमित्यादिगोचरेच्छाकालीनाननुगतेच्छाव्यक्तीनां
तत्तद्व्यक्तित्वेनाभावानां निवेशनीयतया महागौरवमिति तत्साध्य-
विशिष्टतत्पक्षविषयकत्वप्रकारकानुमितीच्छात्वेनैव विशेष्यीभूते-
च्छानिवेशो वाच्यः ।

वस्तुतस्तु तत्साध्यविशिष्टतत्पक्षविषयकत्वप्रकारकत्वमप्यन्य-
लिङ्गकानुमित्सायां न निवेश्यं घटादीच्छाकालीनाननुगतेच्छानां
भवन्मतेऽपि सिद्ध्युत्तेजकताया वक्तव्यतया तन्मते तत्र घटादीच्छा-
साधारणरूपेणैवानुमित्साया उत्तेजकत्वोपगमादुक्तस्थले पक्षता-
निर्वाहेण तादृशाननुगतेच्छानामन्यलिङ्गकेच्छायामेवोत्तेजकत्वात् ।

अत्र चैतादृशगुरुधर्मावच्छिन्नाभावस्य लिङ्गभेदेनानन्तकार-
णतानां पक्षताकारणतान्तरस्य च कल्पनामपेक्ष्य लिङ्गभेदेन तत्त-
ल्लिङ्गकानुमितीच्छाविरहविशिष्टसिद्धित्वरूपलघुधर्मावच्छिन्नाभा-
वहेतुताकल्पनस्यैव साधुत्वेन पूर्वमतस्यैव सम्यक्तया वाकारो-
ऽनिर्भरसूचनायेति वदन्ति ।

परे तु अन्यलिङ्गकत्वप्रकारकानुगतानुमित्सासमवहित-
सिद्धिदशायामननुगतानुमित्साबलात्तल्लिङ्गकानुमित्युपपत्तये सिद्धौ
तादृशेच्छाभावकूटवैशिष्ट्यनिवेशेन पूर्वमते गौरवमेतन्मते चान्य-
लिङ्गकानुगतानुमित्सारूपोत्तेजकबलादेव तत्रानुमित्युपपत्तेः सिद्धौ
तासामभावानिवेशात् ।

न चैतन्मतेऽप्यन्यलिङ्गकानुमित्साप्रतिबन्धकतायामेव तासामु-
त्तेजकत्वस्यावश्यकतया साम्यमिति वाच्यम् । यतो यथाननुग-
तसाध्यानुमित्सात्मकसमूहालम्बनरूपा एवान्यलिङ्गकानुमितीच्छा-
स्तत्रान्यलिङ्गकानुमितीच्छायां तादृशेच्छाव्यक्तिभेदा एव निवेश-
नीयाः । सिद्धौ तु सामानाधिकरण्यसम्बन्धेन तत्तदत्यन्ताभावास्तत्र
च तत्कालीनसंयोगाद्यभावानां निवेशमादाय विनिगमनाविर-
हेण गौरवम् । न च पूर्वमतेऽपि तत्तत्सिद्धिव्यक्तिभेदा एव सिद्धौ नि-
वेशनीया न तु तत्तदिच्छाभावा इति न विनिगमनाविरहावकाश
इति वाच्यम् । सिद्धेरनन्तरं यत्र तादृशसमूहालम्बनेच्छाव्यक्तीना-
मुत्पत्तिस्तत्र तादृशसिद्धिभेदानां सिद्धौ निवेशे इच्छोत्पत्तिकाले
ऽनुमित्यापत्तेः । ज्ञानेच्छयोर्युगपदुत्पादमते इच्छासामग्र्या ज्ञाना-
विरोधित्वात् । यादृशस्थले च सिद्धिजननकाले प्रतिबन्धकोत्तेज-

केच्छयारेकस्या अपरव्यक्तेश्च तत्पूर्वमुत्पत्तिः तत्र द्वितीयक्षणेऽनुमित्युपपत्तये एतन्मतेऽपि तत्तत्सिद्धिभेदा अन्यालङ्ककेच्छाविशेषणीभूतसिद्ध्यंशे निवेश्या न त्वन्यालङ्ककेच्छायां तद्विशेषणीभूतसिद्धौ वा तदिच्छात्यन्ताभावा अतो न तत्कालीनसंयोगादिव्यक्त्यभावनिवेशमादाय विनिगमनाविरहप्रसङ्ग इत्याहुः ।

(दी०) साधकमानं, साध्यवत्त्वनिश्चयः । पाषाणमयत्वादिना पर्वते तेजस्त्वादिना च वह्नेः सिद्धावपि पर्वतत्वेन तत्र वह्नित्वेन च तस्य अनुमितेर्धर्मित्वसाध्यत्वयोरवच्छेदकावनुप्रवेशनीयौ ।

(गा०) साधकमानपदस्य सिद्धिकारणपरत्वे पूर्वोक्तदोषप्रसङ्गात् तद्व्याचष्टे । साधकेति । साध्यवत्त्वनिश्चयः । प्रकृतसाध्यपक्षविशिष्टयावगाहिनिश्चयः । पाषाणमयो वह्निमान् पर्वतस्तेजस्वीत्याद्याकारकाप्रमानप्रकारकनिश्चयदशायां पर्वतो वह्निमानित्याद्याकारकानुमितेरानुभविकतया यथाश्रुते तदनुपपत्तेः प्रकारविशेषं निवेशयति । पाषाणमयत्वादिनेति । तत्र । पर्वते । तस्य । वह्नेः । धर्मित्वसाध्यत्वयोः । उद्देश्यत्वविधेयत्वयोः । अनुप्रवेशनीयावित्यस्य पक्षताशरीर इत्यादिः । तथा च पर्वतत्वावच्छिन्नोद्देश्यतानिरूपितसंयोगादिसंसर्गावच्छिन्नवह्नित्वावच्छिन्नविधेयताकानुमितिं प्रति तद्रूपावच्छिन्नविशेष्यतानिरूपिततत्सम्बन्धावच्छिन्नतद्धर्मावच्छिन्नप्रकारताशालिनिश्चयत्वावच्छिन्नस्य सिषाधयिषाविरहविशिष्टस्याभावो हेतुरिति पर्यवसितम् ।

पर्वतो वह्निमानित्यादिसिद्धिदशायां वह्निमान् पर्वतो घटवानित्याद्यनुमित्युदयात् तत्प्रतिबध्यतावच्छेदककोटौ प्रकारतामुपेक्ष्य विधेयतानिवेशनम् । विधेयता च वह्निमनुमिनोमीत्यनुव्यवसायनियामकः पक्षतावच्छेदकव्यावृत्तो विषयताविशेषः । स्वरूपतः पर्वतत्ववह्नित्वादिप्रकारकसिद्धिदशायां जातिमान् वह्निमान् पर्वतो जातिमत्त्वानित्याद्यनुमित्युत्पत्तेः शुद्धपर्वतत्ववह्नित्वादिप्रकारकासिद्धिदशायां अधिकविषयिण्याः सुन्दरः पर्वतः सुन्दरवह्निमानित्याद्यनुमितेरुत्पत्त्या च प्रतिबध्यदिशि पर्वतत्वाद्यवच्छिन्नेत्यादिना

किञ्चिद्विशेषितपर्वतत्वादिपर्याप्तावच्छेदकताकत्वमेव विवक्षणीयम् । तदर्थश्च पर्वतत्वादिनिष्ठानिरवच्छिन्नावच्छेदकताभिन्नावच्छेदकत्वानिरूपकत्वम् । पर्वतो वह्निमानित्याद्यनुमितौ जातिमान् पर्वतो जातिमत्त्वानित्यादिसिद्धेरप्रतिबन्धकतया प्रतिबन्धकादिष्वपि पर्वतत्वावच्छिन्नत्वादिना किञ्चिद्विशेषिततदवच्छिन्नत्वमेव विवक्षणीयम् । तदर्थश्च निरवच्छिन्नतद्धर्म्यवच्छेदकताकत्वमिति ध्येयम् ।

(दी०) यदि च पर्वतत्वसामानाधिकरण्येनैकत्र साध्यसिद्धावपि विनाप्यनुमित्सामन्यत्र तादृशानुमितिरानुभविकी तदा धर्म्मिविशेषोऽपि निवेश्यो नान्यथा ।

(गा०) ननु पर्वतत्वाद्यवच्छिन्नविशेष्यताकानुमितौ पर्वतत्वावच्छिन्नविशेष्यताकसिद्धेः प्रतिबन्धकत्वे पर्वतत्वेनैकपर्वतविशेष्यकसिद्धिदशायां तेन रूपेणान्यपर्वतेऽपि साध्यानुमित्यनुदयापत्तिरत आह । यदि चेति । पर्वतत्वांशेऽवच्छेदकत्वावगाहिन्याः किञ्चिद्व्यक्तिविशेष्यकसिद्धिदशायां तेन रूपेण धर्म्यन्तरेऽनुमित्यनुत्पादस्य निर्विवादतया सामानाधिकरण्येनेति । एकत्र । एकधर्म्मिणि, अनुमित्सासत्त्वे विशेषणाभावादेव विशिष्टाभावनिर्वाहात् धर्म्मिविशेषनिवेशनमफलं अतो विनाप्यनुमित्सामिति । अन्यत्र । अन्यधर्म्मिणि, धर्म्मिविशेषानन्तर्भावेऽपि वक्ष्यमाणरीत्या सामानाधिकरण्येन सिद्धिदशायां अवच्छेदकावच्छेदेनानुमितौ बाधकाभावात् तादृशेति । सामानाधिकरण्यमात्रावगाहीत्यर्थः । धर्म्मिविशेषोऽपीति । तथा च पर्वतत्वाद्यवच्छिन्नतत्पर्वतादिनिष्ठोद्देश्यताकानुमितौ पर्वतत्वाद्यवच्छिन्नतत्पर्वतादिविशेष्यकसाध्यवत्तानिश्चयत्वेन प्रतिबन्धकत्वं कल्प्यमिति भावः । अन्यथा । तदानीं तादृशानुमितेरानुभविकत्वविरहे । न धर्म्मिविशेषो निवेश्य इत्यनुषज्यते । अनुमितिर्द्विविधा पक्षतावच्छेदकसाध्ययोः सामानाधिकरण्यमात्रावगाहिनी, तयोरवच्छेद्यावच्छेदकभावावगाहिनी च, अवच्छेद्यावच्छेदकभावोऽपि कश्चित् स्वरूपसम्बन्धविशेषः, यथा मूलावच्छिन्नो वृक्षः संयोगीत्यादौ मूलादिसंयोगाद्योः । अत्र अन्यादृशस्य तस्य दुर्वचत्वात् ।

(१)क्वचिच्च व्याप्यव्यापकभावः यथा पृथिवी रूपवतीत्यादौ पृथिवीत्वरूपाद्योः । तत्र साध्यांशे पक्षविशेषणतापन्नस्य पक्षतावच्छेदकस्यावच्छेद्यतासम्बन्धेन प्रकारत्वं पक्षतावच्छेदकावच्छिन्नत्वेन तद्विशिष्टसाध्येन वा विशेषितस्य संयोगादेः पक्षांशे साध्यसंसर्गत्वमित्यन्यदेतत् । तादृशी चानुमितिः पक्षतावच्छेदकसामानाधिकरण्यमात्रावगाहिसिद्धिदशायां जायते, न्यूनविषयकसिद्धिदशायां अनुमितेः सर्वानुभवसिद्धत्वात् । अत एव यत्रावच्छेदकावच्छेदेनानुमितिरुद्देश्या तत्र नांशतः सिद्धसाधन दोप इत्यतस्तदेवोपपादयति ।

(दी०) पक्षतावच्छेदकस्य सामानाधिकरण्येनैकत्र साध्यसिद्धावपि तदवच्छेदेनानुमितिदर्शनात् पक्षतावच्छेदकावच्छेदेनानुमितिं प्रति तदवच्छेदेन सिद्धेस्तत्सामानाधिकरण्यमात्रेणानुमितिं प्रति तु सिद्धिमात्रस्य विरोधित्वम् ।

(गा०) पक्षतावच्छेदकस्येति । सामानाधिकरण्येन । सामानाधिकरण्यमात्रेण । तदवच्छेदेन । पक्षतावच्छेदकावच्छेदेन । सिद्धेः । सिद्धेरेव । सामानाधिकरण्यमात्रावगाहिसिद्धेः प्रतिबन्धकत्वमेवकारव्यवच्छेद्यम् ।

अयम्भावः । पर्वतो वह्निमानित्यादिसिद्धिदशायां पर्वतः सुन्दरवह्निमानित्याकारकानुमित्युत्पत्त्या विधेयतावच्छेदकतायाः पर्याप्तिः प्रतिबध्यतावच्छेदककोटौ निवेशनीया । एवं संयोगादिना साध्यस्य दण्डोपलक्षितपुरुषादेः सिद्धावपि विशिष्टानरूपितसंयोगादिना दण्डिपुरुषाद्यनुमित्युत्पत्त्या संसर्गतावच्छेदकताया अपि पर्याप्तिर्निवेशनीया । एवञ्चावच्छेदकावच्छेदेनानुमितौ शुद्धवह्नित्वादौ शुद्धसंयोगत्वादौ वा विधेयतावच्छेदकतायाः संसर्गतावच्छेदकताया वा अपर्याप्ततया तादृशानुमितेर्न सामानाधिकरण्यमात्रावगाहिसिद्धिप्रतिबध्यत्वमिति ।

प्राञ्चस्तु व्यापकतायाः संसर्गतया भाने मानाभावात् पक्षता-

---

(१) तदवगाहिन्यामेव चानुमितौ पक्षतावच्छेदकदेशकालावच्छेदेन बाधग्रहस्य विरोधितया बाधस्यासिद्धिव्यभिचारासङ्करं मणिकृद्व्यवस्थापयिष्यति इति क्वचित्कोऽयं पाठः ।

वच्छेदकाक्रान्तयावद्व्यक्तिविषयकानुमितिरेव पक्षतावच्छेदकावच्छेदेनानुमितिरिति ।(१)तत्र सामानाधिकरण्यमात्रावगाहिन्याः सिद्धेरविरोधितया पक्षतावच्छेदकव्यापकोद्देश्यताकान्यत्वमेव सिद्धिसामान्यप्रतिबध्यतावच्छेदककोटौ निवेशनीयम् ।

न च विषयभेदेन विषयताभेदात्पक्षतावच्छेदकावच्छेदेनानुमितेर्विषयतानामपि नानाव्यक्तिपक्षकस्थले प्रत्येकं पक्षतावच्छेदकाव्यापकत्वमेवेति तत्र पक्षतावच्छेदकव्यापकोद्देश्यताया अप्रसिद्धिरिति वाच्यम् । उद्देश्यतासम्बन्धेन पक्षतावच्छेदकव्यापकान्यत्वस्यैवानुमितिविशेषणत्वोपगमेन निर्वाहादिति वदन्ति ।

दीधितिकारस्य तु अवच्छेदकावच्छेदेनानुमितौ अवच्छेद्यावच्छेदकभावस्य स्वरूपसम्बन्धात्मकस्यैव व्याप्यव्यापकभावरूपस्यापि तस्य भानमनुमतम्भागासिद्धेर्दोषत्वनिर्वाहार्थं पक्षतावच्छेदकावच्छेदेनानुमितौ पक्षतावच्छेदकावच्छेदेन हेतुमत्ताज्ञानकारणताया आवश्यकत्वात् । शिखरविशिष्टः पर्वतो वह्निमान् धूमादित्यादौ शिखरे हेतोस्तत्सम्बन्धस्य चावच्छेदकताविरहेण हेत्वसिद्धेरावश्यकत्वेत्याशङ्क्य पक्षतावच्छेदके अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वावगाहिन्यामनुमितौ तदवच्छेदेन हेतुमत्ताज्ञानस्य हेतुताया भागासिद्धेर्दोषत्वार्थमुपगमेऽपि स्वरूपसम्बन्धरूपावच्छेदकत्वावगाहिन्यामनुमितौ पक्षतावच्छेदकावच्छेदेन हेतुमत्ताज्ञानापेक्षा नोपेयत इति समाधानस्य स्वयं अवच्छेदकत्वयोर्वस्तुतोऽभेदादित्यनेनाग्रे वक्ष्यमाणत्वात् । एवं व्यापकत्वभानस्य तदननुमतत्वे पर्वतत्वसामानाधिकरण्येनैकत्रत्यत्र एकत्र साध्यसिद्धावित्यनेनैवावच्छेदकावच्छेदेन या सिद्धिस्तदभावलाभे तल्लाभप्रयोजनकस्य सामानाधिकरण्येनेत्युपादानस्यासार्थक्याच्च ।

युज्यते चैतदेव मतम् । प्राचीनमतेऽपि उक्तयुक्त्या विधेयतावच्छेदकत्वादिपर्याप्तिनिवेशस्याऽऽवश्यकत्वात्, तादृशोद्देश्यताकान्यत्वस्याधिकस्य निवेशनीयतया गौरवात् । एवं सिद्धिसामान्यशून्यतादशायामवच्छेदकावच्छेदेनानुमितावुत्पद्यमानायां सिद्धभा-

---

(१) तन्मते मणिकारोक्तन्यायेनांशतः 'सिद्धसाधनस्यानुगतरूपावच्छिन्ननानाव्यक्तिपक्षकानुमितावदोषत्वे इति तु पाठान्तरम् ।

वबलात् तत्तत्कार्यतावच्छेदकीभूतपक्षतावच्छेदकव्यापकान्यानुमितित्वावच्छिन्नस्यापत्तेः ।

अस्मन्मते च सिद्धिसामान्याभावकालीनायामवच्छेदकावच्छेदेनानुमितौ विशिष्टवह्नित्वे विशिष्टसंयोगे वा पर्याप्तविषयताविशेष इव शुद्धवह्नित्वे शुद्धसंयोगे वा पर्याप्तो विषयताविशेषः स्वीक्रियते । एकज्ञानस्यैकत्र विषये विषयताद्वयोपगमे क्षतिविरहादिति सिद्धिसामान्याभावकार्यतावच्छेदकावच्छिन्नोत्पत्तिरिष्टैव ।

न चावच्छेदकावच्छेदेनानुमितौ व्यापकतायाः संसर्गतया भानोपगमे तादृशानुमितौ अवच्छेदकावच्छेदेन हेतुमत्ताज्ञानस्य पृथक्कारणताकल्पने गौरवम् । एतन्मते तत्तत्पर्वतोद्देश्यकानुमितौ तत्तत्पर्वतविशेष्यकपरामर्शस्य हेतुतयाऽर्थवशादेव यावत्पर्वतविशेष्यकपरामर्शात्तथाविधानुमितेरुत्पादात्, तादृशानुमितौ परामर्शस्य स्वतन्त्रहेतुत्वाकल्पनात्, व्यापकतायाश्च संसर्गविधया भानस्य क्वचिदप्यनभ्युपगमादिति वाच्यम् । यत्रैकः परामर्शः कतिपयपर्वतविषयकः, अन्यश्च तदितरयावत्पर्वतविषयकस्तत्रापि अवच्छेदकावच्छेदेनानुमितेरुत्पादापत्तेः । न चेष्टापत्तिः, अवच्छेदकावच्छेदेन हेतुमत्ताज्ञानं विनाऽवच्छेदकावच्छेदेनानुमित्यनुत्पादस्य सर्वसम्मतत्वात् । तत्र च कस्यापि परामर्शस्य भवन्मतासिद्धाया अवच्छेदकावच्छेदेन हेतुमत्तावगाहिताया असम्भवः । एवं यत्र पक्षतावच्छेदकताघटकसम्बन्धेन पक्षतावच्छेदकमवृत्ति तत्र तेन सम्बन्धेन पक्षतावच्छेदकाक्रान्ताप्रसिद्ध्या अनुमितिद्वैविध्यानुपपत्तिश्च । तन्मतेऽपि चावच्छेदकावच्छेदेनानुमितौ अवच्छेद्यावच्छेदकभावरूपाधिकविषयानवगाहने सामानाधिकरण्यमात्रेण सिद्धिदशायां तादृशानुमित्युत्पत्तौ बीजाभावः । सिद्ध्यविषयीभूतधर्मिविषयकत्वस्य तद्बीजत्वे तथाविधसिद्धिदशायां सिद्ध्यविषयीभूतकतिपयपर्वतादिविषयकानुमितेरप्युत्पादौचित्यात् ।

अथ मणिकृता पक्षतावच्छेदकैकदेशेऽंशतः सिद्धसाधनस्यादोषत्वोपगमेऽपि तदितरप्राचीनैरनुमितिमात्र एवांशतः सिद्धसाधनस्यापि दोषत्वमुपेयते, अत एव चैतेषां मतमालम्ब्य मणिकृताऽपि शब्दानित्यत्वाद्यनुमाने ध्वन्यादावंशतः सिद्धसाधनवारणाय वर्णात्मकत्वादिविशेषणं पक्षे निवेशितम् । अत एव गन्धादिपक्षताव-

च्छेदकस्य पृथिवीतरभेदादौ साध्ये हेतुता नाचार्यैरनुमन्यते । व्याप्तिग्रह एव हेतुरूपपक्षतावच्छेदकसाध्ययोः सामाधिकरण्यभानेन सिद्धसाधनात् । सकलपृथिवीविषयकानुमितेरप्ययोगात् । न चांशे साध्यसिद्धावपि अधिकधर्मिविषयतया यावत्पर्वतादिविषयकानुमित्युत्पाद उचितः । अधिकधर्मिविषयकानुमितेः सिद्धिदशायां उत्पादे वाचोऽनित्या इत्यादिसिद्धिदशायां अनित्ये वाङ्मनसीत्यादिसमूहालम्बनानुमित्युत्पादस्याप्यौचित्यात् । न हि तत्र कस्याप्यनुमितिः, नवीनैरपि पक्षतावच्छेदकैक्ये एवांशतः सिद्धसाधनस्यादोषत्वस्योपगमात् । एवञ्च नवीनमत एव अवच्छेदकावच्छिन्नत्वावगाहितदनवगाह्यनुमितिभेदेन पक्षताभेदस्य स्वीकरणीयतया गौरवम् ।

न च विशिष्टबुद्धौ धर्मितावच्छेदकव्यापकत्वभानानुपगमे पक्षतावच्छेदकसामानाधिकरण्यमात्रावगाहिबाधदशायां तत्सामानाधिकरण्येन तादृशबाधविषयधर्मिविषयिण्याः कतिपयधर्मिविशेष्यकानुमितेरिव सकलधर्मिविशेष्यकानुमितेरप्युत्पादौचित्यादवच्छेदकावच्छेदेनानुमित्युद्देश्यायामप्यंशतो बाधस्यादोषतापत्तिरिति वाच्यम् । सामानाधिकरण्यमात्रावगाहिन्यां विशिष्टबुद्धौ समानविषयकतथाविधविपरीतनिश्चयप्रतिबन्धकतायाः प्राचामनुमततयांऽशतो बाधस्य दोषतोपपत्तेः । एवञ्च यावत्पक्षविषयकानुमितौ यावत्पक्षविषयकहेतुमत्ताज्ञानापेक्षया तद्विरोधितया भागासिद्धेरपि दोषतानिर्वाहः । यत्र सकलपर्वतानां नैकपरामर्शविषयता अपि तु परामर्शद्वयविषयता तत्र यावत्पर्वतविषयकानुमितिरूपावच्छेदकावच्छेदेनानुमितिः प्राचीनमते इष्टैव । नवीनमतेऽपि तत्र तादृशानुमितेरावश्यकत्वादित्यवच्छेदकावच्छेदेनानुमितौ तादृशपरामर्शस्य हेतुत्वाकल्पनेनापि तन्मते लाघवम् । मैवम् । अवच्छेदकावच्छेदेन विशिष्टबुद्धौ व्यापकत्वभानानुपगमे व्यापकत्वभानस्य विपरीतज्ञानप्रतिबन्धकत्वप्रयोजकत्वासम्भवेन तत्प्रयोजकत्वस्य दुर्निर्वचतापत्तेः ।

न चैकरूपेण समानधर्मिविषयकत्वमेव विपरीतज्ञानविरोधित्वे बीजम् । तथा सति पार्थिवगन्धत्वावच्छेदेन जलावृत्तित्वादिनिश्चयस्यापि शुद्धगन्धत्वावच्छेदेन तन्निश्चयस्येव गन्धो जलवृत्तिर्न वे-

त्यादौ 'गन्धत्वादिसामानाधिकरण्यमात्रेण जलवृत्तित्वादिसंशये विरोधिताप्रसङ्गात् । उभयोरेव निश्चययोर्गन्धत्वाश्रययावद्धर्मिणि ग्राह्याभावाग्रगाहितयाऽविशेषात् । विरोधिविषयकत्वाविशेषे धर्मितावच्छेदककोटावाधकभानस्याविरोधितावीजत्वाभावात् ।

नव्यमते उभयनिश्चयविषयव्यापकतयोर्भेदाद्विशेषसम्भवात् । एतेनावच्छेदकावच्छेदेनानुमितौ व्यापकत्वभानापेक्षया लाघवाद्यावद्धर्मिवृत्त्यखण्डैकविषयत्वाभ्युपगम एवोचितः । तदन्यविषयतैव सिद्धिसामान्यप्रतिबध्यतावच्छेदिका, सिद्धिसामान्याभावकालीनानुमितावेतादृश्यैकैकधर्मिविषयता अपीष्यत इति परास्तम् ।

पक्षतावच्छेदकसामानाधिकरण्येन तदवच्छेदेन च सिद्धिदशायां सामानाधिकरण्यमात्रावगाहिन्यनुमितिर्न जायते, उभयोरेव सिद्ध्योः पक्षतावच्छेदकवति साध्यसम्बन्धरूपतदुभयसामानाधिकरण्यावगाहितया तादृशानुमितेस्तदतिरिक्तानवगाहित्वात्, अतस्तथाविधानुमितौ उभयविधसिद्ध्योरेव प्रतिबन्धकत्वं दर्शयति । तत्सामानाधिकरण्येनेति । तत्सामानाधिकरण्यमात्रेण । पक्षतावच्छेदकसामानाधिकरण्यमात्रेण । अवच्छेदकावच्छेदेनानुमितावपि सामानाधिकरण्यावगाहितया तद्व्यावर्त्तनायावच्छेद्यावच्छेदकभावावगाहित्वव्यवच्छेदार्थं मात्रपदम् । अवच्छेद्यावच्छेदकभावानवगाहित्वञ्च न सिद्ध्यभावजन्यतावच्छेदककोटौ निवेशनीयम् । उक्तदिशा आपत्तिसम्भवात्, पर्याप्तिनिवेशादेवोपपत्तेर्वैयर्थ्याच्चेत्यवधेयम् ।

सिद्धिमात्रस्येति । मात्रपदं कृत्स्नार्थकम् । तथा च पक्षतावच्छेदकसामानाधिकरण्येन तदवच्छेदेन च सिद्धेरित्यर्थः । प्रतिबन्धकता चोभयविधसिद्ध्योः संसर्गादीनां पर्याप्तिमनिवेश्यैकरूपेणैव यदुभयसाधारणं निश्चयत्वं शक्यते निर्वक्तुं, अन्यथा पुनः पृथक् पृथगेवेति ध्येयम् ।

यत्तु सामानाधिकरण्येनानुमितौ तथाविधसिद्धेरवच्छेदकावच्छेदेन सिद्धिव्यावृत्तरूपेण प्रतिबन्धकत्वेऽपि तत्रावच्छेदकावच्छेदेन सिद्धेर्न प्रतिबन्धकताधिक्यं अवच्छेदकावच्छेदेनानुमितौ तस्याः प्रतिबन्धकत्वे कल्पनीये अवच्छिन्नसंयोगादिपर्याप्तसंसर्गताकत्वस्य प्रतिबध्यतावच्छेदकेऽवश्यं निधानीयतया अवच्छिन्नत्वातिरिक्तधर्मानवच्छिन्नसंयोगादिनिष्ठसंसर्गताकत्वस्यैव च तदर्थतया तस्य

शुद्धसंयोगादिसंसर्गकानुमितिसाधारण्येन तादृशप्रतिबन्धकतयैवो-पपत्तेरिति। तदसत्; सामानाधिकरण्येनानुमिनुयामवच्छेदकावच्छे-देनानुमिनुयामित्याद्याकारकेच्छानां पृथक् पृथगुत्तेजकताया वक्ष्य-माणतया पृथक् पृथक् प्रतिबन्धकताकल्पनस्याऽऽवश्यकत्वात् ॥

(दी०) इत्थञ्च लिङ्गभेदन्यायो ऽनुसरणीयः। साध्य-विशेष्यकसिद्ध्यनन्तरं पक्षविशेष्यकानुमितेः प्रामाणिकत्वे तां प्रति पक्षविशेष्यिकैव सिद्धिर्विरोधिनी।

(गा०) ननु तादृशसिद्धिदशायां पक्षतावच्छेदकावच्छेदेनानुमि-नुयामित्याकारकसिषाधयिषासत्त्वेऽसति चावच्छेदकावच्छेदेन हे-तुमत्तापरामर्शे सामानाधिकरण्यमात्रावगाहिपरामर्शात्तादृशानुमि-तेरापत्तिः, तथाविधसिषाधयिषासत्त्वेन पक्षताया अक्षतत्वादित्यत आह। इत्थञ्चेति। इत्थञ्च। तुल्ययुक्त्या पक्षतावच्छेदकावच्छिन्नत्व-तत्सामानाधिकरण्यमात्रावगाह्यनुमित्योः सिद्धेः पृथक् पृथक् प्रति-बन्धकत्वे च। लिङ्गभेदन्यायं इति। यथा तत्तल्लिङ्गकानुमितौ सिद्धेः प्रतिबन्धकतायां तत्तल्लिङ्गकानुमितीच्छैवोत्तेजिका, न त्वन्यलिङ्गका-नुमितीच्छापि, तथा पक्षतावच्छेदकसामानाधिकरण्यमात्रावगाहि-नीमनुमितिं प्रति सिद्धेः प्रतिबन्धकतायां तादृशानुमितीच्छैवोत्ते-जिका न त्वन्यविधानुमितीच्छेति स्वीकरणीयमिति नातिप्रसङ्ग इत्यर्थः। यदि पर्वते वह्निरित्याद्याकारकसाध्यनिश्चयानन्तरं पर्वतो वह्निमानित्याद्याकारकानुमितिर्जायते तदा साध्यविशेष्यकानुमितौ साध्यविशेष्यकसिद्धेरेव प्रतिबन्धकत्वेन सामान्यतः साध्यपक्षवैशि-ष्ट्यावगाह्यनुमितौ तादृशसिद्धित्वेन नैकं प्रतिबन्धकत्वं कल्पनीयम् अपि तु विशिष्यैव प्रतिबन्धकताद्वयम्, अगत्या गौरवस्यादोषत्वा-दित्याशयवानाह। साध्यविशेष्यकेति। द्वयोः समानविषयकत्वे वि-शेष्यविशेषणभाववैपरीत्यमकिञ्चित्करमित्यभिप्रायेणानिर्भरसूचनाय प्रामाणिकत्वे इत्युक्तम्। पक्षविशेष्यकैवेति। तथा च प्रकारताविशे-ष्यते निवेश्यैव प्रतिबध्यप्रतिबन्धकभावः कल्पनीय इति भावः। त-त्र तादृशानुमित्यभावस्य प्रामाणिकत्वे तु उभयविधज्ञानसाधारण-पक्षसाध्यवैशिष्ट्यावगाहिनिश्चयत्वस्यानतिप्रसक्तस्य सुवचत्वे उ-

भयविधसिद्धोरनुगतरूपेणैव प्रतिबन्धकता, प्रतिबध्यतावच्छेदकन्तु पक्षविशेष्यकसाध्यप्रकारकानुमितित्वादिकमेव न त्वनुगतम् । पक्षविशेष्यकसाध्यप्रकारकानुमितिर्जायतां साध्यविशेष्यकपक्षप्रकारकानुमितिर्जायतामित्याकारिकयोरिच्छयोः पृथक् पृथगुत्तेजकत्वानुरोधात् ।

(दी०) एवञ्च पक्षविशेष्यकसिद्ध्यनन्तरमपि साध्यविशेष्यकानुमितिर्जायते तुल्यन्यायात्, समानाकारायाः सिद्धेः प्रतिबन्धकत्वे पर्यवसानात् । तादृशानुमितिं प्रति सिद्धिमात्रं विरोधि साध्यप्रसिद्धिरेव वा । अत एव प्रसिद्धसाध्यकस्थले पक्षविशेष्यकैवानुमितिरनुभूयते इति ।

(गा०) एवञ्च । साध्यविशेष्यकसिद्ध्यनन्तरं पक्षविशेष्यकानुमित्युत्पत्तेः प्रामाणिकत्वे च । तुल्यन्यायादिति । पर्यवसानादित्यन्तस्य हेतुः । समानाकारायाः सिद्धेरिति । अन्यूनाकारसिद्धेरित्यर्थः । पर्वतः सुन्दरवह्निमानित्यादिसिद्धिदशायामपि न्यूनविषयिण्याः पर्वतो वह्निमानित्याद्यनुमितेरनुत्पादात् । अधिकविषयकसिद्धेरविरोधित्वेऽवच्छेदकावच्छेदेन सिद्धेः सामानाधिकरण्येनानुमितौ प्रतिबन्धकतालिखनस्यासङ्गतेः । एवं जातिशक्तिवादे गोत्वत्वेन गोवृत्तित्वानुमानं सिद्धसाधनान्न सम्भवतीति अविशिष्टहेतुना विशिष्टसाध्यसाधन एव सिद्धसाधनानवकाशो न तु विशिष्टेनाविशिष्टसाधनेऽपीति जात्या व्यक्त्यनुमानपक्षमाक्षिप्य मिश्रा अर्थापत्त्या वा तत्सिद्धिरिति मूलमवतारयामासुः ।

ननु साध्यविशेष्यकानुमितिस्तावन्न सर्वानुभवसिद्धा पर्वतो वह्निमानित्याद्याकारिकाया एवानुमितेरनुभवात् किन्त्वप्रसिद्धसाध्यकस्थले विशेषणज्ञानादिविरहेण साध्यविशेषणकानुमितेरनुपपत्त्या साध्यविशेष्यकानुमितिरुपेयते एवञ्च पक्षविशेष्यकसिद्धिदशायामपि तादृशानुमितेरप्रामाणिकतया तदनभ्युपगमे ऽपि क्षतिविरहात् । तां प्रति साध्यपक्षवैशिष्ट्यावगाहिज्ञानत्वेनोभयविधसिद्धिसाधारणेनापि प्रतिबन्धकत्वं सम्भवतीत्यभिप्रेत्य मतान्तरमाह । तादृशानुमितिमिति । साध्यविशेष्यकानुमितिमित्यर्थः ।

सिद्धिमात्रम् । पक्षविशेष्यिका साध्यविशेष्यिका च सिद्धिरित्यर्थः ।

ननूच्छृङ्खलसाध्यज्ञानदशायामपि साध्यविशेष्यिकाऽनुमितिरप्रामाणिकी, तत्र साध्यविशेषणकानुमितेरेव सम्भवादिति, तादृशानुमितिप्रतिबन्धकतायां पक्षादिविषयतायाः सिषाधयिषाविरहस्य निश्चयत्वस्य च निवेशनं गौरवायेत्यभिसन्धायाऽऽह । साध्यप्रसिद्धिरिति । साध्यतावच्छेदकप्रकारकज्ञानमित्यर्थः । तेनेतरव्यापकीभूताभावप्रतियोगिपृथिवीत्ववती पृथिवीत्यादिपरामर्शाद्भेदत्वादिना साध्यज्ञानसत्त्वेऽपि पृथिव्यामितरभेद इत्याद्याकारकानुमितेर्नानुपपत्तिः । न च तत्र पृथिवी इतरभिन्ना इत्येतादृशानुमितेः सम्भवः, विशेषणतावच्छेदकीभूतेतरभेदत्वादिप्रकारकज्ञानविरहात् ।

अथेतरभेदत्वादिप्रकारकज्ञानस्य यदीतरभेदत्वाद्यवच्छिन्नमुख्यविशेष्यकज्ञानत्वं प्रतिबध्यतावच्छेदकं तदा तथाविधज्ञानदशायां इतरभेदादिपक्षकप्रमेयत्वाद्यनुमितेरनुपपत्तिः । तद्धर्मावच्छिन्नविधेयकत्वस्याधिकस्य निवेशेऽपि इतरभेदः प्रमेयः पृथिवी इतरभिन्नेत्यादिसमूहालम्बनानुमितेर्गोत्वाभावो गोत्वाभाववानित्याद्यनुमितेश्चानुपपत्तिः ।

अत्र केचित् । पृथिवी इतरभिन्नेत्यादिसाध्यविशेषणकानुमितौ तथाविधप्रत्यक्षादिसाधारणी विशेष्यत्वाद्यवच्छेदकताभिन्ना प्रकारतैव विधेयता, साध्यविशेष्यकानुमितौ च ततोऽन्या, तथा च प्रकारताभिन्नविधेयतैव साध्यप्रसिद्धिप्रतिबध्यतावच्छेदिकेति नानुपपत्तिरित्याहुः । तन्न । प्रकारताविशेषस्य विधेयतात्वोपगमे जलभेदे तेजोभेदः इत्याद्याकारकतेजोभेदादिसाध्यविशेष्यकानुमितेर्जलभेदादिविधेयकत्वापातात् । न चाधेयतासम्बन्धावच्छिन्नप्रकारताव्यावृत्तं तदिति वाच्यम् । तथा सत्याधेयतासम्बन्धेन जलभेदादिसाध्यकतादृशानुमितेरपि तद्विधेयकत्वानुपपत्तेः । यदि च यत्राधेयत्वं साध्यतावच्छेदकसम्बन्धस्तत्र विधेयत्वमतिरिक्तमित्युच्यते, तदा तत्सम्बन्धेन जलभेदसाध्यकानुमितौ प्रकारताभिन्नविधेयताशालिन्यां साध्यप्रसिद्ध्यभाववद्व्यभिचारो दुर्वारः ।

वस्तुतस्तु तद्धर्मावच्छिन्नाप्रकारकत्वे सति तद्धर्मावच्छिन्नविधेयकानुमितित्वमेव तद्धर्मप्रकारकज्ञानप्रतिबध्यतावच्छेदकं, साध्य-

प्रसिद्धिस्थले च साध्यप्रकारिका एवानुमितिर्जायते न तु तद्प्रकारिकेति न तत्र व्यभिचारः । अत एव । साध्यविशेष्यकानुमितौ साध्यप्रसिद्धेः प्रतिबन्धकत्वादेव । प्रसिद्धसाध्यकस्थले । अभावरूपसाध्यप्रसिद्धिस्थले न तु भावसाध्यकस्थले इत्यर्थः । तत्र परामर्शस्य नियमतः साध्यघटितव्याप्तिविषयकतया साध्यविशेष्यकानुमितेरप्रसिद्ध्या साध्यप्रसिद्धिप्रतिबन्धकतायाः कल्पयितुमशक्यत्वात् उपष्टम्भकत्वासङ्गतेः, स्वनिरूपितप्रकारतानवच्छेदकत्वविशिष्टविधेयतावच्छेदकतापर्याप्त्याश्रयत्वसम्बन्धेनानुमितिं प्रति विषयतावच्छेदकतारूपविषयनिष्ठप्रत्यासत्त्या ज्ञानस्य सर्वसाधारण्येन प्रतिबन्धकतया आपातत उक्तिसम्भवेऽपि साध्यघटितव्यतिरेकव्याप्तिविषयकपरामर्शघटितसामग्र्या एव साध्यविशेष्यकानुमित्युत्पादप्रयोजकतायाः क्लृप्तत्वाद्भावसाध्यकस्थले साध्यविशेष्यकानुमितेरप्रसक्त्या अनुमितेः साध्यविशेष्यकत्वे तादृशप्रतिबन्धकताया अप्रयोजकत्वात् उपष्टम्भासङ्गतितादवस्थ्यात् ।

यत्तु यत्र महानसीयवह्निमात्रविषयकः परामर्शः तत्र पक्षधर्मताबलात् पर्वते पर्वतीयवह्निर्भासमानः विशेषणज्ञानविरहेण विशेष्यतयैव भासत इति भावसाध्यकस्थलेऽपि साध्यविशेष्यकानुमितिसम्भव इति तत्तुच्छम् । सामान्यलक्षणायाः प्रत्यासत्तित्वमते महानसीयवह्निविषयकपरामर्शे पर्वतीयवह्निभानप्रयोजकस्य दुर्लभत्वात् । न च स्मरणात्मकपरामर्शे कदाचिदुद्बोधकविरहात्तदभानसम्भव इति वाच्यम् । उद्बोधकस्य फलबलकल्प्यत्वाद्विशिष्टविशेषणकबुद्धौ विशेषणज्ञानहेतुताया निर्युक्तिकत्वात्, विशेष्यतावच्छेदकप्रकारकज्ञानस्य चाक्षतत्वात्, पर्वतीयवह्नित्वविषयकपरामर्शादपि वह्नित्वेन तद्वह्निविशेषणकानुमितिसम्भवाच्च ।

इदमत्रावधेयम्, साध्यप्रसिद्धिप्रतिबन्धकतायामपि साध्यविशेष्यकानुमितित्वप्रकारकेच्छाया उत्तेजकत्वमावश्यकम्, अन्यथा पक्षविशेष्यकसिद्धिदशायां तादृशेच्छासत्त्वे साध्यविशेष्यकानुमित्यपलापापत्तेः । सिद्ध्यसमवहितसाध्यप्रसिद्धिदशायां साध्यविशेषणकानुमितेः सम्भवेन तत एव उद्देश्यसंशयनिवृत्त्यादिसम्भवे साध्यविशेष्यकानुमित्यनभ्युपगमोऽपि न क्षतिकर इत्यभिप्रेत्यैव साध्यप्रसिद्धेस्तद्विरोधित्वमुररीकृतं ग्रन्थकृता । प्रकृते च साध्य-

विशेषणकानुमित्यपलापानौचित्यात् । तथा च यत्र सिद्ध्यसमवहिता साध्यप्रसिद्धिरथ चानुमित्सा तत्र व्यतिरेकिपरामर्शात् साध्यविशेष्यका तद्विशेषणिका चानुमितिरापद्येत । न ह्येकविधादेव परामर्शादेकदा द्विविधाऽनुमितिरानुभविकी तस्माद्व्यतिरेकिपरामर्शात् साध्यप्रसिद्धिदशायामपि साध्यविशेष्यकाया एवानुमितेः स्वीकारः समुचितः। सिद्धिप्रतिबन्धकतापेक्षया साध्यप्रसिद्धिप्रतिबन्धकतायामवच्छेदकलाघवमप्यकिञ्चित्करमेव, व्यतिरेकिपरामर्शात् क्वचित्साध्यविशेषणकानुमितिस्वीकारे तादृशानुमितिं प्रति व्यतिरेकिलिङ्गकत्वान्वयिलिङ्गकत्वप्रकारकानुमित्सां पृथगुत्तेजकीकृत्य सिद्धेः प्रतिबन्धकताद्वयेनैव गौरवात् ।

परे तु अप्रसिद्धसाध्यकस्थलेऽपि साध्यविशेषणिकैवानुमितिर्जायते इतरभेदत्वादिरूपविशेषणतावच्छेदकप्रकारकज्ञानविरहेऽपि विशेष्ये विशेषणं तत्र च विशेषणान्तरमिति न्यायेनैव पृथिवीतरभिन्नेत्याद्यनुमितिसम्भवात् ।

न च लाघवानवकाशः तादृशानुमितिं प्रत्येव साध्यप्रसिद्धिप्रतिबन्धकताया अवश्यकल्पनीयत्वादिति वाच्यम् । तथाविधानुमितौ यादृशी विषयता तस्याः साध्यप्रसिद्धिकालीनविशिष्टवैशिष्ट्यावगाह्यनुमितिसाधारण्योपगमात्, साध्यविशेष्यकानुमित्यनुपगमेन साध्यप्रसिद्धिप्रतिबन्धकताया एव कल्पनात् ।

न च सिद्धिकाले तथाविधानुमितेर्वारणाय तत्र सिद्धेः प्रतिबन्धकताकल्पनाधिक्यमावश्यकमिति वाच्यम् । विशिष्टवैशिष्ट्यावगाह्यनुमितिस्थलीयसिद्धिप्रतिबन्धकतयैवोपपत्तेः । इतरभेदत्वादिना इतरभेदादिविधेयकानुमितित्वस्य तत्स्थलीयप्रतिबध्यतावच्छेदकस्योभयसाधारणत्वादिति ।

यत्तु विशिष्टवैशिष्ट्यावगाह्यनुमितौ विशिष्टवैशिष्ट्यावगाहिनी सिद्धिरेव विरोधिनी न तु केवलं विशेष्ये विशेषणम् तत्र च विशेषणान्तरमिति रीत्या जायमानापि सा तथा तस्याः संसर्गांशे विशिष्टनिरूपितत्वानवगाहितया न्यूनविषयकत्वात् । एवञ्च केवलं विशेष्ये विशेषणमिति न्यायेनानुमित्युपगमे तादृशसिद्धिदशायां तस्या वारणाय तत्र तादृशसिद्धेर्विरोधित्वकल्पनाधिक्यमावश्यकमेवेति किमपराद्धं साध्यविशेष्यकानुमितिस्वीकारेण । विशिष्टवैशिष्ट्यान-

वगाहिसाध्यविशेषणकानुमितेरभ्युपगमेन प्रतिबध्यप्रतिबन्धकभावसाम्यादिति । तदपि तुच्छम् । विशिष्टवैशिष्ट्यभानमात्रविरोधिबाधादिकाले केवलं विशेष्ये विशेषणमित्यादिन्यायेनानुमितेः सर्वसंमततया तत्र तादृशासिद्धेः प्रतिबन्धकताया आवश्यकत्वेन साध्यविशेष्यकानुमितिस्वीकर्त्तुराधिकप्रतिबन्धकताकल्पनस्य दुर्वारत्वादिति । यदि च विशिष्टप्रातियोगिकविलक्षणवैशिष्ट्यानवगाहिन्यपि विशिष्टविशेषणज्ञानमपेक्षितं तदा तुल्ययुक्त्या विशिष्टविशेष्यकज्ञानेऽपि विशिष्टविशेष्यज्ञानहेतुतया साध्यतावच्छेदकविशिष्टविशेष्यकानुमितिरप्रसिद्धसाध्यकस्थले न सम्भवति ।

न च विशेष्यज्ञानस्य विशिष्टबुद्धावहेतुतया तद्विशेषस्यापि न तद्विशेषहेतुतेति वाच्यम् । सामान्यप्रत्यासत्तिजन्यज्ञाने विशेष्यज्ञानस्य व्यभिचारेण सामान्यहेतुत्वासम्भवेऽपि तुल्यरूपोभयविशेषणावगाहिज्ञानस्यान्यकविशिष्टापरविशेषणकत्ववारणाय विशेषहेतुताया आवश्यकत्वात्, अन्यथा विशेषणज्ञानस्यापि विशेषहेतुताया उच्छेदात । अत एव विशिष्टवाक्यार्थविशेष्यकशाब्दबोधे अवान्तरवाक्यार्थज्ञानापेक्षा । न च साध्यविशेष्यकानुमितौ तुल्यरूपयोरेव पक्षविधेयतावच्छेदकयोः साध्यांशे प्रकारता न त्वेकविशिष्टांशेऽपरस्येति न विशिष्टसाध्यज्ञानापेक्षेति वाच्यम् । निर्विशेष्यतावच्छेदकानुमितेरनुभवविरुद्धत्वात् प्रत्यक्षस्य च निर्धर्मितावच्छेदककस्याभ्युपगमात् प्राथमिकाभावप्रत्यक्षे प्रतियोग्यधिकरणयोरभावविशेषणतया भानोपपत्तेः । तथा च साध्यविशेष्यकानुमितिर्निर्युक्तिकैवेति वदन्ति ।

अथ जलव्यापकीभूताभावप्रतियोगिपृथिवीत्ववती पृथिवीत्यादिपरामर्शाद्भेदत्वरूपविशेषणज्ञानं विना स्वरूपतस्तत्प्रकारिका पृथिव्यां जलभेद इत्याद्याकारिका अनुमितिरेव कथमुत्पद्यत इति चेन्न । कथञ्चित्तत्र जलीयत्वादिमात्रपुरस्कारेणैवाभावानुमित्युपगमादिति कृतं पल्लवितेन ।

(दी०) अत्र च व्याप्तिस्मरणादिना पूर्वानुमित्सानाशे परामर्शकाले च सिद्धिसत्त्वेऽनुमित्सान्तरोत्पत्त्यैव अनुमितिस्तथैव कारणीभूतस्य विशिष्टाभावस्य सम्पत्तेरित्युपाध्यायाः ।

(गा०) ननु सिषाधयिषाविरहविशिष्टसिद्ध्यभावस्य पक्षतात्वेऽपि सन्देहवत्परामर्शपूर्वमित्यादिग्रन्थेन सिषाधयिषापक्षतापक्षोक्तस्य व्यभिचारस्य सिद्धिकालीनानुमितिस्थले तादवस्थ्यम् । सिषाधयिषानाशे विशिष्टप्रतिबन्धकस्यानुमित्यव्यवहितप्राक्कालेऽक्षतत्वादित्याक्षेपे यथाश्रुतिसमाधानमाह । अत्र चेति । व्याप्तिस्मरणादीत्यादिनाऽनुमित्साद्वितीयक्षणे यत्र पक्षधर्मताज्ञानं तत्स्थलीयतादृशज्ञानपरिग्रहः । पूर्वेति । व्याप्तिस्मरणादिपूर्वकालीनेत्यर्थः । परामर्शदशायामसत्यां सिद्धौ विशेष्याभावादेव विशिष्टाभावनिर्वाहेण नानुमित्यनुपपत्तिरतः परामर्शकाले च सिद्धिसत्त्वे इति । अनुमित्सान्तरेति । परामर्शद्वितीयक्षणे तदव्यवहितप्राक्क्षणे वेत्यादिः, तदुत्पत्तिप्रकारश्चाधस्ताद्दर्शितः । एवञ्च सिषाधयिषापक्षतापक्षः सिषाधयिषाविरहेऽपीत्यादिदोषादेव हेय इति भावः ।

ननु सर्वत्र पुनरनुमित्सोत्पत्तौ मानाभाव इत्यत आह । तथैवेति । अनुमित्सान्तरोत्पत्त्यैवेत्यर्थः । कारणीभूतस्येति । तथा च तादृशविशिष्टाभावात्मककारणं विनानुपपत्तिरेव सिद्धिस्थलीयविशिष्टाभावनिर्वाहकानुमित्सान्तरोत्पत्तौ मानमिति भावः । एतन्मते एव दीधितिकृतोऽपि निर्भरः मिश्रादिमतस्य गौरवकवलितत्वादिति ध्येयम् ।

(दी०) अन्ये तु द्वित्रिक्षणान्तरितायामपि अनुमित्सायामनुमितिदर्शनात् अनुमित्सायोग्यता वाच्या । सा च न स्वोत्पत्त्यनन्तरं स्वविषयसिद्ध्यनुत्पादः । अनुमित्सानन्तरमन्तराऽनुमित्यनुत्पादे दिवसादिविलम्बेनेन्द्रियादिना निर्णीतेऽपि साध्ये लिङ्गपरामर्शादनुमितिप्रसङ्गात् । किन्तु अनुमित्सानन्तरं लिङ्गदर्शनादिक्रमेण यावता कालेन उत्सर्गतः परामर्शो जायते तावानेव कालः, फलबलेन तथा कल्पनात् ।

(गा०) मिश्रमतमाह । अन्ये त्विति । द्वित्रिक्षणान्तरितायामपीति । द्विक्षणव्यवहितायां क्षणत्रयव्यवहितायाञ्चेत्यर्थः । अनुमित्सायाम् । अनुमित्सोत्पत्तौ । तेन एकक्षणान्तरितायामप्यनुमित्सायां यत्रानुमितिस्तत्राप्यनुपपत्तिसत्त्वेन तदनभिधाने न्यूनता । एवं प्रथमकल्पे सिषाधयिषोत्पत्तिक्षणमारभ्य क्षणचतुष्टयात्मककालस्यैव

विवक्षणीयतया त्रिक्षणान्तरानुमित्सास्थलेऽनुमित्यनिर्वाहश्चेति दूषणद्वयानवकाशः । एवञ्चानुमितिदर्शनादित्यस्यानुमित्सोत्पत्तेश्चतुर्थक्षणे पञ्चमक्षणे वा अनुमितिदर्शनादित्यर्थः । वाच्या । सिषाधयिषापदेन विवक्षणीया । सा च । योग्यता च । स्वोत्पत्त्यनन्तरमिति । स्वप्रागभावोत्तरमित्यर्थः । स्वस्योत्पत्तिर्यस्मादिति व्युत्पत्त्या स्वोत्पत्तिपदस्य प्रागभावपरत्वात्, अन्यथा सिषाधयिषोत्पत्तिकाले योग्यतानुपपत्त्या तद्द्वितीयक्षणे अनुमितेरनिर्वाहात् । सिद्ध्यनुत्पादः । सिद्धिप्रागभावः । तथा च स्वप्रागभावध्वंसविशिष्टस्वविषयसिद्धिप्रागभाव एवानुमित्सायोग्यतेति पर्यवसितम् । अनुमित्सापूर्वं तद्विषयीभूतसिद्ध्यनन्तरञ्चानुमितिवारणाय दलद्वयोपादानम् ।

न चानागतानां यावदनुमितीनामेवानुमित्साविषयत्वसम्भवात् स्वविषयीभूतैकानुमितावुत्पन्नायामपि भाविव्यक्त्यन्तरप्रागभावमादाय योग्यताप्रसङ्ग इति वाच्यम् । स्वविषयसिद्धित्वावच्छिन्नप्रागभावस्य विवक्षितत्वात् । अत एव स्वविषयेत्युक्तम्, यत्किञ्चिद्विशेषध्वंसवति काले सामान्यधर्मावच्छिन्नप्रागभावासम्भवेन सिद्धित्वावच्छिन्नप्रागभावस्य कदाऽप्यसत्त्वात् । सामान्यधर्मस्य प्रागभावप्रतियोगितावच्छेदकत्वानङ्गीकारे पुनः स्वविषयसिद्ध्यसमानकालीनत्वमेव प्रागभावे विशेषणं देयम् । वह्न्यनुमितिर्घटानुमितिश्च जायतामित्यादीच्छानन्तरं घटानुमित्यादिरूपविषयसिद्धावपि वह्न्याद्यनुमित्युत्पत्त्या सिद्धीति, प्रकृतसाध्यपक्षवैशिष्ट्यावगाहिनिश्चयार्थकम् । अनुमित्सोत्तरं दिवसादिविलम्बेनाप्यनुमितिप्रसङ्गादित्यन्वयः । अन्तराऽनुमित्युत्पादे स्वविषयसिद्धित्वावच्छिन्नप्रागभावासत्त्वेन योग्यताक्षतेर्नापत्तिसम्भव इत्यतोऽन्तराऽनुमित्यनुत्पाद इति । द्वित्रिक्षणादिविलम्बेनानुमितेरिष्टत्वात्, दिवसादिविलम्बेनेति । सिद्ध्यसत्त्वे अनुमितेरिष्टत्वादिन्द्रियादिना निर्णीत इति । लिङ्गेन निर्णीते साध्येऽन्तराऽनुमित्यनुत्पाद एव न सम्भवतीत्यत इन्द्रियादिनेति । आदिना शब्दादिपरिग्रहः । अनुमित्सेति । अनुमित्साधिकरणक्षणाव्यवहितोत्तरक्षणे क्रमेण पक्षविषयकलिङ्गज्ञानव्याप्तिस्मरणयोरुत्पत्तौ सत्यामुत्सर्गतो यावता कालेन परामर्शोत्पत्तिः अनुमित्सोत्पत्तिक्षणमारभ्य तत्क्षणपर्यन्तं यावन्तः क्षणा यो वा तावदधिकक्षणानवस्थायी

स्थूलकालः तत्समुदाय एव सेत्यर्थः। एवञ्च क्षणचतुष्टयं तदाधिकक्षणानवस्थायिनः स्थूलसमयाश्च योग्यतेति पर्यवसितम्। तदनुगमश्च स्वप्रागभावानधिकरणत्वस्वनाशाधिकरणसमयध्वंसानधिकरणत्वोभयसम्बन्धेन सिषाधयिषावत्कालत्वेन न तु अननुगतेन तत्तत्कालत्वेन गौरवात्, तत्तत्कालोत्तेजकत्वापेक्षया तत्तत्सिद्धिव्यक्तिभेदानामेव निवेशनौचित्यात्। योग्यताया उत्तेजकत्वकल्पनेऽपि वक्ष्यमाणायाः पूर्वानुमित्साबलादनुमित्युत्तरमनुमित्यापत्तेरसङ्गत्यापाताच्च तत्रानुमितिक्षणस्योत्तेजकताकल्पकाभावादिति विभावनीयम्। अनुमित्सोत्तरं यत्र विलम्बेन लिङ्गदर्शनादिकं ततश्च परामर्शः तत्रानुमित्सोत्पत्तिक्षणमारभ्य परामर्शोत्पत्तिक्षणपर्यन्तस्थायी दण्डादिरपीति तद्वारणाय लिङ्गदर्शनादेरनुमित्साक्षणाव्यवहितोत्तरक्षणोत्पत्तिकत्वमनुसृतम्। यत्रानुमित्सोत्पत्तिद्वितीयक्षणे पक्षलिङ्गव्याप्तिविषयकमेकं स्मरणम्, तदनन्तरक्षणे परामर्शोत्पत्तिस्तत्र क्षणत्रयमध्ये एव परामर्शोत्पत्त्या तदनतिरिक्तकालमात्रस्य तथात्वभ्रमवारणाय क्रमेणेति। अनुमित्सोत्पत्तिद्वितीयक्षणतृतीयक्षणयोर्लिङ्गदर्शनव्याप्तिस्मरणयोः क्रमेणोत्पत्तावपि कुतश्चित्प्रतिबन्धकात् यत्र विलम्बेन परामर्शोत्पत्तिस्तत्राधिकक्षणानामपि तथाविधतया तद्वारणाय उत्सर्गेत इति। तादृशव्याप्तिस्मरणानन्तरक्षण परामर्शोत्पत्त्यावसति विरोधिनीत्यर्थः। अनुमित्यननुगुणक्षणव्यवधानविरहेण पञ्चमक्षणेऽनुमितिरुत्पद्यते न तु तदग्रेऽपि तथाविधक्षणव्यवधानादित्येतत्सूचनाय भङ्ग्या तादृशकालविशेषोपादानमित्यवधेयम्। ननु तथाविधकालस्योत्तेजकत्वे गौरवमित्यत आह। फलबलेनेति। अनुमित्सानाशे अनुमित्यात्मककार्योत्पत्त्यनुरोधेनेत्यर्थः। तथा कल्पात्। तादृशकालस्योत्तेजकत्वकल्पनात्।

(दी०) अथ वा अनुमित्सोत्पत्त्यनन्तरमनुमित्सानाशेऽपि सिद्धौ सत्यां यावत्कालमध्ये ऽनुमितिर्जायते तावानेव कालोऽनुमित्सया उपलक्षितः। यदि च सिद्ध्यनन्तरं तन्नाशेऽपि द्वित्रिक्षणमध्ये विना अनुमित्सामनुमित्यनुत्पादोऽनुभवसिद्धस्तदा सिद्ध्याऽपि तावानेव समय उपलक्षणीयः।

विशिष्य क्षणनियमस्त्ववहितैः करणीय इति वदन्ति ।

(गा०) यत्र तथाविधपरामर्शोत्पत्तिक्षणे अनुमितिप्रतिबन्धकबाधादिसमवधानमासीत्, तदपगमश्च तद्द्वितीयक्षणे तत्र सिद्धौ सत्यां तदनन्तरञ्चेदनुमितिः प्रामाणिकी । एवं यत्रानुमित्साद्वितीयक्षणे लिङ्गदर्शनसामग्रीसमवधानं, तदनन्तरं लिङ्गदर्शनादिक्रमेण परामर्शोत्पत्तिस्तत्र सिद्धौ सत्यामनन्तरक्षणे अनुमितिर्वा, तदा उक्तापेक्षया अधिकस्य कालस्योत्तेजकत्वमावश्यकमित्याशयेनाह । अनुमित्सोत्पत्त्यनन्तरमिति । अनुमित्सोत्पत्तिक्षणमारभ्य तदुत्तरमित्यर्थः । यावत्कालमध्ये अनुमितिर्जायते इत्यग्रेतनेनान्वयः । अनुमित्सोत्तरमनुमित्सान्तरोत्पत्त्या दिवसादिविलम्बेनापि सिद्ध्यनन्तरमनुमित्युत्पत्त्या तावत्कालस्य चानुत्तेजकत्वादनुमित्सानाशेऽपीति । प्रागनुमित्सायामसत्यामपीत्यर्थः । असत्यां सिद्धौ अनुमित्सोत्तरं दिवसादिविलम्बेनाप्यनुमित्युदयात्, सिद्धौ सत्यामिति । प्रागित्यादिः । यावत्कालमध्ये । यावत्क्षणानन्तरक्षणे । तावानेव कालः । तावत्क्षणाधिकक्षणानवस्थायी स्थूलकालः । अनुमित्सया । अनुमित्सार्थकसिषाधयिषापदेन । उपलक्षितः । विवक्षितः ।

अनुमित्सायोग्यताया उत्तेजकत्ववत् तुल्ययुक्त्या सिद्धियोग्यताया अपि प्रतिबन्धकत्वमुचितमित्याशयेनाह । यदि चेति । सिद्ध्यनन्तरमिवेति शेषः । तेन नास्य वैयर्थ्यम् । द्वित्रिक्षणमध्ये इति । द्विक्षणमध्ये त्रिक्षणमध्ये वेत्यर्थः । सिद्धेश्चतुर्थक्षणे पञ्चमक्षणे वेति फलितम् । सिद्ध्याऽपि । सिद्धिपदेन । तावान् । तन्नाशानन्तरमपि द्विक्षणस्थायी त्रिक्षणस्थायी वा । उपलक्षणीयः । विवक्षणीयः ।

ननु सिद्ध्युत्तरं कियत्क्षणमध्ये अनुमितिर्न जायते कियत्क्षणानन्तरं वा जायत इत्यस्य विशिष्य निर्णेतुमशक्यतया कालस्य प्रतिबन्धकत्वकल्पनमसम्भवि । एवमुत्तेजककालस्यापि विशिष्य निर्णेतुमशक्यतया तदुत्तेजकत्वमपि तथेत्यत आह । विशिष्येति । अवहितैः । सावधानैः । नियमः । निर्णयः । तथा च येषां विशिष्य तावत्कालनिर्णयो भवति तेषामेव तत्र विशिष्य प्रतिबन्धकत्वावगमो भविष्यति अन्येषां तु सामान्यत एवेति भावः ।

केचित्तु ननु कालविशेषाणां सिद्धिसिषाधयिषाधिकरण-

कालत्वेन चेत्प्रतिबन्धकोत्तेजकभावः तदा अधिकाधिककालस्यापि तथात्वप्रसङ्गः, अननिप्रसक्तानुगतधर्मान्तरञ्च दुर्वचमेवेत्यत आह। विशिष्येति। अनतिप्रसक्तानुगतविशेषणविशेषं निवेश्येत्यर्थः। क्षण-नियमः। कतिपयक्षणानामेव तथात्वं न त्वधिकाधिकक्षणानामिति नियमनिर्वाहः। अर्वाहतेः। निरुक्तिकुशलः। सिद्ध्याद्युत्पत्तिक्षण-मारभ्य क्षणचतुष्टयादेः स्वप्रागभावानधिकरणत्वस्वनाशाधिकरण-समयनाशाधिकरणसमयनाशानधिकरणत्वोभयसम्बन्धेन सिद्ध्यादि-मत्त्वमेवानुगमकमनतिप्रसक्तञ्चेति भावः। इति व्याचक्षते।

वदन्तीत्यस्वरससूचनाय। स च उक्तपरम्परायाः सम्बन्धत्वे मानाभावात् तत्तद्व्यक्तित्वेन उत्तेजकत्वाभ्युपगमे च उक्तदोषापा-तादिति।

(दी०) अत्र च यत्र साध्यनिर्णयेच्छानन्तरं पूर्वोक्त-न्यायेन साध्यतद्व्याप्यविशिष्टपक्षस्य प्रत्यक्षं स्मरणं वा। यत्र वा साध्यतद्व्याप्यधर्मतादृशव्याप्यधर्मान्तरविशिष्टपक्षस्य . त-त्पक्षकसाध्यतद्व्याप्यवत्त्वानुमित्योरिष्टसाधनतायाश्चैकं स्मरणं, ततस्तयोरनुमितता, ततः साध्यतद्व्याप्यवत्त्वानुमितिस्तत्र तद-नन्तरमनुमितिप्रसङ्गः। योग्यताविवक्षणे तु सुतरामेवेति त-दिच्छाविषयासिद्ध्यनुपहितत्वं तद्विशेषणम्।

(गा०) इच्छाया विषयासिद्धौ सत्यां चरितार्थतया नोत्तरका-लमनुमितिर्जन्यत इति तद्वारणाय स्वविषयसिद्ध्यनुपहितत्वेने-च्छा विशेषणीया। तत्र तद्विषयसिद्धिदशायाम् परामर्शा-नुमित्यासमवधानसम्भव एव तद्विशेषणमर्थवद्भवति, तच्च आपाततो न घटते इच्छापरामर्शयोर्युगपदुत्पादासम्भवे-नानुमितिकाले एकतरविनाशावश्यकत्वादित्यतस्तद्घटयति। अत्र चेति। सिद्धिप्रतिबन्धकतावच्छेदककोटौ चेत्यर्थः। तदिच्छा-विषयसिद्ध्यनुपहितत्वं तद्विशेषणमित्यग्रिमेणान्वयः। निर्णयेच्छा। निर्णयत्वप्रकारकेच्छा। अनुमितित्वप्रकारकेच्छायाः प्रत्यक्षाद्यात्म-कसिद्ध्या अचरितार्थतया तद्बलात्तादृशसिद्ध्युत्तरमप्यनुमित्युत्प-त्तेः सा नोपात्ता। अनुमित्सोत्पत्तिकाले विशेषणज्ञानोत्पत्त्यसम्भ-

वेन तत्पूर्वमेव तद्घटितविशिष्टपक्षप्रत्यक्षसामग्रीसमवधानस्य वा-च्यतया प्रत्यक्षसामग्र्या बलवत्त्वेनेच्छोत्पत्तिरेव न सम्भवतीत्य-तः पूर्वोक्तन्यायेनेति । अनुमित्सापूर्वकालोत्पन्नेत्यादिप्रकारेणेत्यर्थः । स्मरणे विशेषणज्ञानापेक्षाविरहादुक्तप्रयासं विनैवेच्छाद्वितीयक्षणे विशिष्टपक्षस्य स्मरणं निर्वहतीत्यभिसन्धायाऽऽह । स्मरण वेति । अनुमितित्वप्रकारकेच्छायामपि तद्विशेषणदानस्य सप्रयोजनकत्वा-दाह । यत्र वेति । साध्यव्याप्यविशिष्टपक्षस्य स्मरणानन्तरमनुमि-तिरेव भविष्यति न त्विच्छेत्यतोऽनुमितिसामग्रीविघटनाय तथा-विधस्मरणस्य साध्यविशिष्टपक्षविषयकत्वानुसरणम् । तृतीयक्षणे साध्यस्य तद्व्याप्यस्य च अनुमितेर्द्वितीयक्षणे साध्यतद्व्याप्ययोरनुमि-त्सायाश्च निर्वाहाय साध्यतद्व्याप्यतदुभयानुमितीनिष्टसाधनता-विषयकत्वानुसरणम् । साध्यानुमितेस्तदनन्तरं पुनस्तदनुमित्या-पत्तेश्च सम्पादनाय साध्यानुमित्सायाः, साध्यव्याप्यस्यापि निश्चित-तया तदनुमितेः सम्पादनाय च साध्यव्याप्यानुमित्सायास्ततस्तयो-रित्यादिनाऽनुसरणम् । अनुमित्साद्वितीयक्षणे साध्यस्यानुमितौ तदनन्तरं तदनुमितिरिष्टैवेति, साध्यव्याप्यस्यानुमितौ च परा-मर्शाभावान्नापत्तिसम्भव इत्यतस्तदनन्तरमुभयानुमित्यनुसरणम् ।

अनुमित्सोत्पत्तिक्षणावधिकक्षणचतुष्टयादिरूपयोग्यताया उत्ते-जकत्वमते यत्र पर्वते वह्निमनुमिनुयामितीच्छा ततो वह्निव्याप्यवान् पर्वत इति परामर्शस्तदनन्तरञ्च पर्वतो वह्निमानित्यनुमितिस्तत्रापि तादृशानुमित्यापत्तिः सम्भवतीत्याह । योग्यतेति । तदिच्छाविष-यसिद्ध्यनुपहितत्वं तदिच्छायां विशेषणं देयमिति शेषः । प्रत्यक्षा-द्यात्मकसिद्धिसमभिव्याहितानुमितित्वप्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छा-बलादेवानुमित्युत्पत्त्या तदिच्छाविषयेति सिद्धिविशेषणम्, विशेष्य-तयाऽभिमता या इच्छा तद्विषयेत्यर्थः ।

अथ तादृशेच्छाया उत्तेजकीभूतसकलेच्छासाधारणेनानुमिति-गोचरेच्छात्वेन निवेशे प्रत्यक्षाद्यात्मकसिद्धेरपि निर्णयत्वादिप्रकार-कानुमित्साविषयतया विषयान्तस्याव्यावर्तकतापत्तिः । तत्तद्व्यक्ति-त्वेन विवेशे च उत्तेजकीभूतेच्छाव्यक्तिसमसंख्याकाभावानां सिद्धौ विशेषणतया गौरवम् । तत्तदिच्छाविषयसिद्ध्यनुपहिततत्तदिच्छा-त्वेनोत्तेजकतामपेक्ष्य लाघवात् तत्तत्क्षणावच्छिन्नेच्छात्वेन तथात्व-

कल्पनाप्रसङ्गश्चेति चेन्न । प्रागुक्तयुक्त्या इच्छाविषयतावच्छेदकतायाः प्रकृतसाध्यविशिष्टप्रकृतपक्षविषयकानुमितित्वादिपर्याप्तिनिवेशनस्याऽऽवश्यकतया इच्छाविषयतावच्छेदकतापर्याप्त्यधिकरणरूपभेदेनेच्छायाः पृथक् पृथगुत्तेजकताया आवश्यकत्वात् । तत्तद्धर्मावच्छिन्नानुपहितत्वं तत्तद्धर्मप्रकारकेच्छायां निवेशनीयमित्यत्रैव तात्पर्यात् । अत एव चानुमितिद्वयं जायतामित्येतादृशेच्छाबलात् क्रमिकानुमितिद्वयमुत्पद्यते, एकानुमित्युपधानदशायामपि द्वित्वावच्छिन्नानुपहितत्वस्याक्षतत्वात् ।

अथ वा स्वविषयकत्वस्वसामानाधिकरण्योभयसम्बन्धेन प्रकृतपक्षधर्मिकप्रकृतसाध्यनिश्चयविशिष्टान्यत्वमेवानुपहितत्वान्तार्थः । भेदस्याव्याप्यवृत्तितया अनुमितिदशायामिच्छायाः सिद्धिविशिष्टत्वेऽपि तत्पूर्वं विशिष्टान्यत्वमप्यव्याहतं प्रकृतपक्षकप्रकृतसाध्यकानुमितिविषयकसमूहालम्बनेच्छायां यत्रान्यपक्षकानुमितेरन्यसाध्यकानुमितेर्वा विषयता तत्र तद्बलादन्यानुमित्यनन्तरं प्रकृतानुमितिनिर्वाहाय प्रकृतपक्षप्रकृतसाध्यावगाहित्वं निश्चयविशेषणम् । एतद्विशेषणमनन्तर्भाव्य द्वित्वादिप्रकारकेच्छायाः पृथगुत्तेजकत्वाङ्गीकारान्न तादृशेच्छाबलादनुमित्यनन्तरमनुमित्यनुपपत्तिः । द्वित्वप्रकारकेच्छाबलाच्च नानुमितिद्वयानन्तरमनुमित्यन्तरं तावत्पर्यन्तमिच्छाया एवानवस्थानात् । योग्यताया उत्तेजकतामते च द्वित्वादिप्रकारकेच्छायोग्यताया द्वित्वाद्यवच्छिन्नानुपहितत्वेन एव पृथगुत्तेजकता वाच्या इति कृतं विस्तरेण ।

(दी०) पक्षसाध्यभेदेन च पक्षताया भेदात् पृथक् पृथगेव कार्यकारणभावः । तथा च यत्र सिद्ध्यनन्तरं कदाऽप्यनुमितिर्न जाता तत्र सिद्ध्यभावमात्रं कारणं न तु तत्र इच्छानिवेशोऽपि गौरवात् प्रयोजनाभावाच्च । तेन यत्पक्षयत्साध्यकानुमितौ कस्यापि इच्छा न जाता तत्र उक्तिसाधारण्यमात्रसम्पादनाय ईश्वरेच्छानिवेशनायासो नोपादेयः ।

(गा०) नन्विच्छाया इच्छाघटितनिरुक्तयोग्यताया वा अभावेन विशिष्टायाः सिद्धेरभावस्य पक्षतात्वे यत्साध्यकयत्पक्षकस्थले कदाचिदपि कस्यचिदिच्छा न जाता तत्र पक्षत्वाप्रसिद्धिरित्याश-

ङ्कायां विश्वविषयिणीं भगवदिच्छामादाय केषाञ्चित् समाधानमाक्षेप्तुं तादृशस्थले इच्छाविरहाविशेषितः सिद्ध्यभाव एव पक्षतेति समाधत्ते । पक्षसाध्येति । पक्षतावच्छेदकसाध्यतावच्छेदकादिभेदेनेत्यर्थः । पक्षताभेदादिति । सिद्धिपदार्थस्य प्रकृतपक्षतावच्छेदकादिघटितत्वादिति भावः । यत्रेति । यादृशपक्षकयादृशसाध्यकस्थले इत्यर्थः । सिद्ध्यनन्तरं कदाप्यनुमितिर्न जातेति । सिद्धिकाले परामर्शादिसत्त्वेऽनुमित्साया असमवधानादिति भावः । सिद्ध्यभावमात्रमिति । इच्छाभावाविशेषिताया एव सिद्धेरभाव इत्यर्थः । सिद्धिकालीनानुमित्यनुरोधेनैव विशिष्टसिद्ध्यभावस्य पक्षतात्वोपगमादिति भावः । तेनेति । यत्रानुमित्सोत्पात्तरप्रसिद्धा प्रसिद्धाऽपि वा नानुमित्युत्पादोपयोगिनी तत्र विशिष्टाभावस्य पक्षतात्वस्वीकारप्रयोजनविरहेणेत्यर्थः । उक्तिसाधारण्येति । सर्वत्रैव पक्षतायाः सिषाधयिषाविरहविशिष्टसिद्ध्यभावपदार्थत्वसम्पादनायेत्यर्थः । नोपादेय इति । शब्दैक्यस्यानुपादेयतया कारणतावच्छेदकगौरवसहिष्णुताया अन्याय्यत्वादिति भावः ।

(दी०) यत्तु सिषाधयिषाविरहविशिष्टस्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्ना या सिद्धिः सिषाधयिषाविरहविशिष्टायास्तस्या अभावः पक्षता ।

(गा०) परामर्शपूर्वकालोत्पन्नानुमित्सानाशेऽनुमित्सान्तरमकल्पयित्वा योग्यतायाश्चोत्तेजकत्वमनादृत्यानुमितिमुपपादयतः सार्वभौमस्य मतमाह । यत्त्विति । सिषाधयिषानाशे सति यादृशसिद्ध्यनन्तरमनुमितिस्तस्याः सिषाधयिषाविरहविशिष्टस्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकतया भिन्नान्तनिवेशात्तदप्रतिबन्धकत्वोपपत्तिः । सिषाधयिषाविरहविशिष्टत्वं स्वक्षणस्य स्वाधिकरणदेशावच्छेदेन बोध्यम् । तेन सिषाधयिषावतोऽपि कालस्य सिषाधयिषानधिकरणदेशावच्छेदेन सिषाधयिषाविरहविशिष्टतया यत्र क्रमेण सिषाधयिषासिद्धिपरामर्शानुमितयस्तत्र सिषाधयिषाविरहविशिष्टत्वविशेषणेनोपपाद्यस्यानुमित्युत्पत्तिक्षणाव्यवधानस्यैवानुपपत्तितादवस्थ्यं निरस्तम् । स्वपदेनापि भेदप्रतियोगिनी सिद्धिरेवोपादेया । प्रतियोगिवैयधिकरण्यस्याभावविशेषणतामादृत्य सिषा-

धयिषाधिकरणक्षणवारणं पुनरनुपादेयम् । प्रतियोगिपदेन सि-
षाधयिषाविरहप्रतियोगिन एव विवक्षणीयतया सिषाधयिषायाः
सिषाधयिषात्वेन निवेशनमुपेक्ष्य सिषाधयिषाविरहप्रतियोगि-
त्वेन निवेशस्य शिरोवेष्टनेन नासिकास्पर्शतुल्यत्वात् । सि-
षाधयिषानधिकरणत्वनिवेशने च सिषाधयिषाविरहांशवैयर्थ्या-
द्वक्ष्यमाणक्षणत्वनिवेशनव्यावृत्त्यसङ्गतेः । सर्वेषामेव क्षणानां सि-
षाधयिषाविरहविशिष्टपूर्वपूर्वक्षणध्वंसाधिकरणक्षणध्वंसाधिकरण-
तया तादृशध्वंसानधिकरणत्वरूपाव्यवहितत्वाश्रयक्षणाप्रसिद्धि-
रतः सिषाधयिषाविरहविशिष्टक्षणे स्वाधिकरणत्वनिवेशः । स्वप-
दं भेदप्रतियोगितत्तत्सिद्धिव्यक्तिपरम् । सिद्धिसामान्यपरत्वे पूर्व-
सिद्ध्यधिकरणकालध्वंसानधिकरणकालतया पूर्ववदप्रसिद्ध्यापत्तेः ।
इच्छाविरहविशिष्टे स्वक्षणाव्यवहितोत्तरत्वनिवेशे ज्ञानेच्छयोर्यु-
गपदुत्पादमते यत्राऽनुमित्सातृतीयक्षणे घटेच्छासिद्ध्यात्मकपराम-
र्शौ तदुत्तरञ्चानुमितिस्तत्र तादृशसिद्धेरिच्छाविरहविशिष्टस्वा-
धिकरणक्षणाप्रसिद्ध्या इच्छाविरहविशिष्टस्वाधिकरणक्षणाव्यवहि-
तोत्तरक्षणोत्पत्तिकानुमितिकभिन्नैव सा सिद्धिः, अनुमित्साविरह-
विशिष्टतदभावस्य परामर्शक्षणेऽसत्त्वात्तदुत्तरमनुमित्यनुपपत्तिरतः
सिषाधयिषापर्यन्तानुसरणम् ।

अथ वा ज्ञानेच्छयोर्यौगपद्यानभ्युपगमे इच्छात्वसामान्यनिवेशे
यत्र घटेच्छानन्तरक्षणे सिद्ध्यात्मकपरामर्शस्तदनन्तरक्षणे सिद्धा-
वप्रामाण्यग्रहस्तदनन्तरमनुमितिः सिद्धेरप्रामाण्यज्ञानानास्कन्दि-
ताया एवानुमितिप्रतिबन्धकत्वात्तत्र तादृशानुमित्युत्पत्तिक्षणस्य
सिषाधयिषाविरहविशिष्टसिद्धिद्वितीयक्षणाव्यवहितोत्तरतया सिद्धेः
स्वपदेनोपादानसम्भवेनाविरोधितयाऽप्रामाण्यग्रहकालेऽनुमितिवार-
णाय सिषाधयिषापदम् । तथा सति अनुमित्युत्पादक्षणस्य सिषा-
धयिषाविरहविशिष्टसिद्ध्युत्पादक्षणाव्यवहितत्वानापत्तिः ।

ज्ञानेच्छयोर्यौगपद्यानुपगमे यत्रानुमित्साद्वितीयक्षणे सिद्ध्यात्मक-
परामर्शस्तदनन्तरं घटेच्छा तत्र तादृशसिद्ध्यधिकरणस्य कस्यापि
क्षणस्येच्छाविरहविशिष्टत्वाभावात् स्वपदेनोपादातुमशक्यतया
सिषाधयिषाविरहविशिष्टतदभावे 'नानुमित्यव्यवहितपूर्वक्षणे इति
तत्रानुमितिनिर्वाहाय इच्छासामान्योपेक्षणम् इति तु न साधी-

यः । घटेच्छोत्पत्तिर्यत्र क्षणे दर्शिता तत्पूर्वमनुमितिसामग्रीसत्त्वे तदानीमनुमित्यनुत्पादबीजस्य दुर्घटत्वात् । न चानुमित्सापूर्वकालोत्पन्नापेक्षाबुद्ध्यात्मकबाधादिवशात्तदानीमनुमित्यनुत्पादसम्भवः । अपेक्षाबुद्ध्यनन्तरक्षणे विशेषगुणानुत्पत्तावेव तस्याः क्षणत्रयावस्थानसम्भवात् ।

यत्तु यत्रानुमित्सानन्तरं घटेच्छा तदनन्तरं सिद्ध्यात्मकपरामर्शस्तदनन्तरञ्चानुमितिस्तत्रानुमित्युत्पादक्षणा नेच्छाविरहविशिष्टसिद्ध्यधिकरणक्षणाव्यवहितोत्तर इति तादृशसिद्धेस्तदनुमित्यप्रतिबन्धकत्वाय सिषाधयिषापर्यन्तानुसरणमिति । तदप्यसत् । इच्छाविरहविशिष्टस्वक्षणाव्यवहितोत्तरत्वशरीरेऽव्यवधानप्रतियोगिस्वक्षण एवेच्छाविरहविशिष्टत्वनिवेशस्य प्रयोजनवत्तया तदुत्तरत्वप्रतियोगिनि स्वक्षणे तद्विशिष्टत्वस्यानिवेशनीयतया उक्तानुमित्युत्पत्तिक्षणस्य इच्छाविरहविशिष्टतत्सिद्ध्यधिकरणक्षणाव्यवहिततया तादृशसिद्ध्युत्पादक्षणोत्तरतया च तादृशसिद्धेरिच्छाविरहविशिष्टस्वक्षणाव्यवहितोत्तरक्षणोत्पन्नानुमितिकतया अनुमित्यनिर्वाहविरहात् ।

प्रथमविशिष्टान्तव्यावृत्तिस्थले सिषाधयिषापूर्वस्थायिनः कस्यचित् स्थूलकालस्य परामर्शोत्पत्तिकाले विनाशे पूर्वकालावच्छेदेन सिषाधयिषाविरहविशिष्टसिद्ध्यधिकरणतादृशकालध्वंसाधिकरणपरामर्शोत्पत्तिक्षणध्वंसाधिकरणस्यानुमित्युत्पत्तिक्षणस्य सिषाधयिषाविरहविशिष्टसिद्ध्यधिकरणकालाव्यवहितोत्तरत्वानुपपत्तिरतः कालपदमुपेक्ष्य क्षणपदोपादानम् ।

न च सिषाधयिषाविरहविशिष्टस्वनिरूपिताधिकरणत्वनिवेशेऽपि उक्तस्थूलकालस्य विभिन्नक्षणावच्छेदेन सिषाधयिषाविरहसिद्ध्युभयाधिकरणत्वेऽपि सर्वदैव विशेष्याभावविशेषणाभावान्यतरप्रयुक्तविशिष्टाभाववत्तया विशिष्टाधिकरणत्वासम्भवात् क्षणत्वनिवेशमन्तरेणैव व्यावृत्ति सम्भवतीति वाच्यम् । सिषाधयिषापूर्वक्षणादेः सिद्धिक्षणादेश्च प्रत्येकं विशिष्टाभावावच्छेदकत्वेऽपि तदुभयानुगमकान्यतरत्वावच्छिन्नस्य एकक्षणावच्छिन्नत्वाविशेषितसामानाधिकरण्यसम्बन्धेन सिषाधयिषाविरहविशिष्टायाः सिद्धेरधिकरणतावच्छेदकत्वे बाधकाभावात् । एकरूपावच्छिन्नस्यैव

विरुद्धद्वयावच्छेदकत्वविरहात् ।

न च सिद्ध्यनधिकरणस्य स्थूलकाले सिद्धिवृत्तौ नावच्छेदकतासम्भवः। देशे वृत्तौ कालस्येव काले वृत्तावप्यवान्तरकालस्याप्यधिकरणीभूतस्यैवावच्छेदकत्वात् । तथा च विशेष्यीभूतसिद्ध्यनवच्छेदकस्य विशिष्टसिद्ध्यनवच्छेदकतया तत्साधारणरूपावच्छिन्नावच्छेदेन स्थूलकालस्य विशिष्टाधिकरणत्वं न सम्भवतीति वाच्यम् । एवं सति विभिन्नावच्छेदेन उभयवति काले उभयत्वविशिष्टवत्ताया अपि दुर्घटत्वापत्तेः । प्रत्येकाधिकरणक्षणस्य उभयत्वविशिष्टानधिकरणत्वेन उभयत्वविशिष्टावच्छेदकत्वासम्भवात्, प्रत्येकाधिकरणक्षणयोरनुगतरूपेणाप्यवच्छेदकत्वानुपपत्तेः । न हि एकरूपावच्छिन्नस्य तस्याधिकरणं रूपान्तरावच्छिन्नस्य तस्यानधिकरणमप्यवच्छेदकं भवितुमर्हति, दण्डाद्यनधिकरणपुरुषाद्यधिकरणदिवसाद्यवच्छेदेन मासादौ दण्डविशिष्टपुरुषत्वाद्यवच्छिन्नस्यावृत्तित्वात् । यदि चागत्या उभयत्वविशिष्टानधिकरणयोरपि प्रत्येकाधिकरणयोरनुगतरूपेण उभयत्वविशिष्टावच्छेदकत्वमुपेयते तदा उक्तस्थले सिषाधयिषाविरहक्षणसिद्धक्षणोभयान्यतरावच्छेदेन सिषाधयिषाविरहसिद्ध्युभयाधिकरणतावतः स्थूलकालस्य तदवच्छेदेन सिषाधयिषाविरहविशिष्टसिद्ध्यधिकरणत्वमनपवादमेव, उभयाधिकरणत्वस्यैव लाघवेन एकविशिष्टापराधिकरणतारूपत्वोपगमात् । अत्र विभिन्नकालावच्छेदेन उभयाधिकरणे विशेष्यमात्रसत्त्व एव न केवलसामानाधिकरण्यसम्बन्धेन एकविशिष्टापराभावोऽपि तु एकक्षणावच्छिन्नसामानाधिकरण्यसम्बन्धेन एकविशिष्टापराभावः, अत एकक्षणावच्छिन्नैकात्मवृत्तित्वं सिषाधयिषाभावस्य सिद्धौ वैशिष्ट्यमित्यग्रिमदीधितिकारोक्तिरपि सङ्गच्छते । एकक्षणावच्छिन्नत्वनिवेशेनैव सिषाधयिषाकाले सिद्धिसत्त्वे सिषाधयिषाभावविशिष्टसिद्ध्यभावनिर्वाहात् ।

न चैवं विशिष्टाभावस्यानतिरिक्ततामते केवलसामानाधिकरण्यसम्बन्धेन एकविशिष्टापराभावस्य विशेषणाभावसत्त्वेऽप्यसत्त्वादसौ विशेष्याभावरूप एव वाच्यः । तथा च तादृशसम्बन्धेन रूपादिविशिष्टद्रव्यत्वाद्यभावः, पवनादौ मा वर्त्तिष्ट विशेष्याभावासत्त्वादिति वाच्यम् । तादृशद्रव्यत्वाभावस्यानतिरिक्तत्वमतेऽपि तस्य रू-

पादिमन्निष्ठद्रव्यत्वाद्यधिकरणत्वाभावरूपताया एवोपगमेन नीरूपद्रव्यादौ तत्सत्त्वनिर्वाहात् । एवञ्च उक्तस्थूलकाले केवलसामानाधिकरण्यसम्बन्धेन सिषाधयिषाविरहविशिष्टसिद्ध्यभावासत्त्वात्, विशिष्टसिद्धिसत्त्वमव्याहतमेव । एकक्षणावच्छिन्नसामानाधिकरण्यसम्बन्धेन विशिष्टस्याधिकरणत्वनिवेशापेक्षया च सिषाधयिषाविरहविशिष्टे सिद्ध्यधिकरणकाले क्षणत्वनिवेशनमेव सम्यगित्यपि प्रतिभाति ।

यद्यपि सिषाधयिषाविरहवैशिष्ट्यावच्छेदेन स्वाधिकरणत्वनिवेशेऽपि तादृशकाले कालान्तरीणसिषाधयिषाविरहवैशिष्ट्यस्य तन्निष्ठसिद्ध्यधिकरणतानवच्छेदकत्वादितादृशकालमादाय उक्तदूषणस्यानवकाशस्तथाऽपि सिषाधयिषाविरहवैशिष्ट्योपलक्षिते सिद्ध्यधिकरणत्वनिवेशाभिप्रायेण क्षणत्वोपादानम् ।

यद्यपि क्रियादिरूपतादृशस्थूलकालस्याप्यन्त्यक्षणावच्छिन्नस्य क्षणतया क्षणत्वनिवेशेऽपि तद्दोषतादवस्थ्यम् । तथाऽपि स्ववृत्तियावद्धर्मविशिष्टत्वरूपक्षणत्वावच्छेदेन सिषाधयिषाविरहविशिष्टत्वनिवेशनान्न दोषः । सिषाधयिषाविरहविशिष्टक्षणे स्वाधिकरणत्वमवश्यं सिषाधयिषाविरहवैशिष्ट्यावच्छिन्नम्, स्थूलकाले स्वाधिकरणत्वस्य च न तदवच्छिन्नत्वनियम इति सिषाविरहवैशिष्ट्यावच्छेदेन स्वाधिकरणत्वलाभायैव क्षणपदोपादानं न तु क्षणत्वमपि निविष्टमिति तु तत्त्वम् ।

अव्यवहितोत्तरक्षणोत्पत्तिः स्वाधिकरणावच्छेदेन बोध्या । अनुमितिपदं वा स्वसमानाधिकरणानुमितिपरम् । तेन महाप्रलयानभ्युपगमे सकलसिद्धीनामुत्तरमेवासंख्यानामात्मनां कस्मिंश्चिदवश्यमनुमित्युत्पत्त्या सिषाधयिषाविरहविशिष्टतादृशक्षणानन्तरक्षणोत्पन्नानुमितिकभिन्ना सिषाधयिषाद्वयोत्पत्तिमध्यमक्षणोत्पन्ना ईश्वरीया च सिद्धिरेव, सिषाधयिषाविरहविशिष्टतदधिकरणक्षणाप्रसिद्ध्या स्वपदेन तस्या एवोपादातुमशक्यत्वात्तस्याश्च सिषाधयिषाविरहविशिष्टत्वाभावात्, सिषाधयिषाविरहविशिष्टनिरुक्तसिद्धिभिन्नसिद्धेरप्रसिद्धेः महाप्रलयस्य प्रामाणिकत्वे तु यदुत्तरमनुमितिः काचिदपि नोत्पत्स्यते । तादृश्याश्चरमसिद्धेरेव प्रतिबन्धकत्वं न त्वन्यस्या इत्यनुपपत्तेर्नावकाशः ।

अव्यवधानांशनिवेशात् प्रतिबन्धकसिद्धिनाशोत्तरं, तदधिकरणे अनुमित्युत्पत्तावपि न तस्याः प्रतिबन्धकत्वानुपपत्तिः। स्वपूर्वसकलक्षणानामेव स्वाधिकरणक्षणध्वंसाधिकरणक्षणध्वंसानधिकरणत्वरूपस्वक्षणाव्यवहितत्वाक्रान्ततया अनादौ संसारे सर्वासामेव सिद्धीनां पूर्वं कदाचित् स्वाधिकरणे ऽनुमित्युत्पत्त्या सिषाधयिषयोरन्तरोत्पन्नसिद्धिरेव सिषाधयिषाविरहविशिष्टस्वक्षणाव्यवहितक्षणोत्पन्नानुमितिकाभिन्ना, तस्याश्च सिषाधयिषाविरहविशिष्टत्वाभावादप्रसिद्धिरत उत्तरेति, स्वाधिकरणक्षणध्वंसाधिकरणार्थकम्।

सकलसिद्धीनामेव स्वक्षणाव्यवहितोत्तरत्वाक्रान्तस्वतृतीयक्षणविनष्टानुमित्युत्पत्तिक्षणपर्यन्तस्वपूर्वस्थायिस्थूलकालोत्पन्नानुमितिकतया पूर्ववदप्रसिद्धिरिति द्वितीयक्षणपदम्। अनुमित्यात्मकसिद्धीनां स्वाव्यवहितोत्तरक्षणवृत्तिस्वात्मकानुमितिकतया अप्रतिबन्धकत्वापत्तिरत उत्पत्तिनिवेशः।

यद्यपि स्वान्यत्वस्यानुमितिविशेषणत्वेऽप्येतद्दोषवारणसम्भवः। तथाऽप्यपेक्षाबुद्धेः क्षणत्रयावस्थायित्वस्य तदुत्तरं समानाधिकरणविशेषगुणान्तरोत्पादस्य चोपगमे यत्रापेक्षाबुद्ध्यात्मकानुमितिद्वितीयक्षणे तादृशी प्रत्यक्षादिरूपसिद्धिस्तस्याश्चतुर्थक्षणेऽनुमित्युत्पादवारकं तत्प्रतिबन्धकत्वं नोपपद्येतेति गुरुशरीरायाः अप्युत्पत्तेर्निवेशनम्।

अथानुमित्यव्यवहितपूर्वक्षणवृत्तिसिद्धिभिन्नत्वं निरुक्तक्षणोत्पत्तिकानुमितिकसिद्धिभिन्नत्वापेक्षया लघीयः कथमुपेक्षितमिति चेत्? तथा सति यत्र क्रमेण सिद्धिसिषाधयिषानुमितयस्तत्र इच्छाजनकसामग्र्या अनुमितिप्रतिबन्धकत्वेनैव इच्छोत्पत्तिक्षणेऽनुमितिवारणसम्भवादव्यवहितपूर्वत्वघटकानुमित्युत्पत्तिक्षणे तदव्यवहितप्राक्क्षणे वा सिषाधयिषाविरहविशिष्टत्वस्य तद्वारणानुरोधेन निवेशवैयर्थ्यात्। तादृशस्थलीयसिद्धेस्तृतीयक्षणेऽनुमित्युत्पत्त्यविरोधितायाः सिद्धौ सिषाधयिषाविरहविशिष्टत्वानिवेशनमन्तरेणैवोपपत्तेः मूलोपात्तं सिद्धिविशेषणं सहकृतान्तं निष्प्रयोजनकं स्यादिति मूलविरोधः। तथा चेच्छाजनकसामग्र्या अनुमितिप्रतिबन्धकत्वमतेऽपि मूलाविरोधोपपादनायोक्तगुरुरीतेरादरः। अत्र क-

त्वे वक्ष्यमाणानुपपत्तिं तृतीयक्षणसाधारणाव्यवहितोत्तरत्वं विनिवेश्योद्धर्तुकामस्तत्रगत्या इच्छासामग्र्या अनुमित्यप्रतिबन्धकत्वमतमाश्रित्यैव मूलोपात्तं सहकृतान्तं सार्थकयिष्यतीत्यवधेयम् ।

अनुमितेर्व्यवहितपूर्वोत्पन्नस्याव्यवहितपूर्वस्थायिनो घटज्ञानादेरविरोधित्वोपपत्तये सिद्धिपदम् ।

(दी०) अथ तृतीयक्षणव्यवधायकाद्द्वितीयक्षण एव अव्यवहितत्वपर्यवसानाद् यत्र अविरलक्रमेण सिद्धिसिषाधयिषानुमितयस्तत्र द्वितीयक्षणे पक्षतासम्पत्तये द्वितीयः सिषाधयिषाविरहो विशेषणमस्तु सिद्धेः, प्राथमिकस्तु स्वक्षणस्य किमर्थमिति चेत् ? यत्र क्रमेण सिषाधयिषाप्रात्यक्षिकसिद्धिपरामर्शानुमितयस्तत्र तृतीयक्षणे पक्षतासम्पत्त्यर्थमिति । तन्न । यत्र अनुमित्सानाशकाले प्रात्यक्षिकी सिद्धिरथ च परामर्शानुमिती तत्र पक्षताविरहप्रसङ्गात् ।

(गा०) अवगतद्वितीयसिषाधयिषाविरहविशेषणप्रयोजनं तत्र सम्प्रतिपत्तिं प्रदर्शयन् प्रथमसिषाधयिषाविरहविशेषणप्रयोजनं पृच्छति । अथेति । तृतीयक्षणे स्वाधिकरणकालध्वंसाधिकरणकालध्वंसाधिकरणत्वसामान्याभावरूपाव्यवधानाभावस्फुटीकरणाय तृतीयक्षणव्यवधायकत्वं द्वितीयक्षणस्याभिहितम् । तृतीयक्षणव्यवधायकत्वम् । तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वे सति स्वाधिकरणक्षणध्वंसाधिकरणत्वम् । सिद्धिनाशक्षणे सिषाधयिषोत्पत्तौ सिद्ध्युत्तरसिषाधयिषानाशक्षणेऽनुमित्युत्पत्तौ वा विशेष्याभावादेवानुमितेः पूर्वं पक्षता निर्वहति अतोऽविरलेति । पक्षतासम्पत्तये इति । सिद्धौ सिषाधयिषाविरहस्याविशेषणत्वे उक्तस्थले सिद्धाद्वितीयक्षणेऽनुमित्यनुत्पत्त्या तस्याः स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नत्वेन सिषाधयिषोत्पत्तिक्षणेऽपि च तादृशसिद्धिसत्त्वेन तदभावरूपपक्षताया अनिर्वाहादिति भावः । प्राथमिकस्त्विति । सिषाधयिषाविरह इत्यनुषज्यते । स्वक्षणस्येति । विशेषणमित्यनुषज्यते । उत्तरयति । यत्रेति । ज्ञानेच्छयोर्युगपदुत्पा-

वमते सिषाधयिषोत्पत्तिकाले सिद्ध्युत्पादे सिद्धेर्वा परामर्शरूपत्वे परामर्शोत्पत्तिकाले सिषाधयिषासत्त्वादेव विशिष्टाभावो निर्वहतीति क्रमेणेति। अविरलक्रमेणेत्यर्थः। सिषाधयिषासिद्ध्योरन्तरा क्षणैकाविलम्बे सिषाधयिषाविरहेण क्षणं विशिष्यापि पक्षतानिर्वाहस्य वक्ष्यमाणत्वात्। सिद्धिपरामर्शयोः परामर्शानुमित्योर्वा कालव्यवधानेनोत्पत्तौ विशेष्याभावादेव विशिष्टाभावसम्पत्तेश्च। सिषाधयिषा। अनुमितित्वप्रकारिकेच्छा। अनुमित्यात्मकसिद्धाविच्छायाः स्वविषयसिद्ध्युपहितत्वात् तदुत्तरमनुमित्यन्तरोत्पत्तिरेव न सम्भवतीति प्रात्यक्षिकेति। पक्षतासम्पत्त्यर्थमिति। सिषाधयिषाविरहस्य क्षणविशेषणस्यानुपादाने तत्रानुमित्युत्पादक्षणस्य सिद्धिक्षणध्वंसाधिकरणपरामर्शोत्पत्तिक्षणध्वंसाधिकरणत्वेन सिद्धिक्षणाव्यवहितत्वविरहात्तादृशसिद्धेरपि प्रतिबन्धकतापत्त्या पक्षतानुपपत्तिः। तद्विशेषणोपादाने च सिद्ध्युत्पत्तिक्षणस्य सिषाधयिषाविरहविशिष्टस्वक्षणः परामर्शोत्पत्तिक्षण एव, तद्ध्वंसाधिकरणकालध्वंसानधिकरणत्वरूपमव्यवधानमनुमित्युत्पादक्षणस्याक्षतमेवेति पक्षतोपपत्तिरिति भावः। यत्र परामर्शात्मकसिद्ध्यनन्तरं घटेच्छा तत्रानुमितिवारणाय इच्छासामान्यमुपेक्ष्य द्वितीयसिषाधयिषाया उपादानम्। पक्षताविरहेति। सिद्ध्युत्पादक्षणस्यापि सिषाधयिषाविरहविशिष्टतयाऽनुमित्युत्पादक्षणस्य तादृशक्षणध्वंसाधिकरणकालध्वंसाधिकरणतया तत्सामान्याभावात्मकतादृशक्षणाव्यवधानविरहादिति भावः।

यद्यपि सिषाधयिषाविरहविशिष्टानुमित्यव्यवहितपूर्वक्षणवृत्तिसिद्धिभिन्नत्वविशिष्टसिद्ध्यभावस्य पक्षतात्वमङ्गीकृत्याप्युक्तानुपपत्तिः शक्यते वारयितुं तथाऽपि अव्यवहितोत्तरक्षणोत्पत्तिघटितपक्षतापक्षस्याक्षिप्तत्वात्तत्रैव दोषोद्धारः।

(दी०) अथ प्रथमक्षणमपेक्ष्य द्वितीयस्येव द्वितीयमपेक्ष्य तृतीयस्यापि अव्यवहितोत्तरत्वम्। स्वध्वंसाधिकरणकालध्वंसानधिकरणत्वे सति स्वाधिकरणकालध्वंसाधिकरणत्वं वा तादृशाव्यवहितोत्तरत्वं वाच्यम्। तथा च यत्र क्रमेण सिद्धिसि-

षाधयिषानुमितयस्तत्र, प्रथमक्षणे पक्षतावारणाय उत्तरक्षणस्य विशेषणं प्रथमं विशिष्टान्तं । द्वितीयन्तु सिद्धेस्तत्रैव द्वितीयक्षणे पक्षतासम्पत्तये । यदि पुनरिच्छाजनिका सामग्री प्रतिबध्नात्यनुमितिं तदाऽनुमित्यव्यवहितपूर्ववर्त्तिसिद्धिभिन्नासिद्ध्यभावमात्रं पक्षतेति चेत् ? ।

(गा०) तृतीयक्षणसाधारणमव्यवधानं निवेश्य शङ्कते । अथेति । तृतीयस्यापि क्षणस्याव्यवहितोत्तरत्वमिति क्षणद्वयानुगमकस्वक्षणत्वेन स्वक्षणमनन्तर्भाव्य प्रातिस्विकरूपेण स्वक्षणस्याव्यवधानशरीरे निवेशनीयत्वात् । तृतीयक्षणे च स्वोत्पत्तिक्षणध्वंसाधिकरणद्वितीयक्षणध्वंसाधिकरणत्वेऽपि स्वाधिकरणद्वितीयक्षणध्वंसाधिकरणकालध्वंसानधिकरणत्वेन स्वक्षणाव्यवधानस्याक्षतत्वामिति भावः । द्वितीयतृतीयक्षणसाधारणस्वक्षणध्वंसाधिकरणकालध्वंसाधिकरणकालध्वंसानधिकरणत्वरूपानुगताव्यवधाननिवेशनं न सम्भवति । अपेक्षाबुद्ध्यात्मकसिद्धिचतुर्थक्षणसिषाधयिषापञ्चमक्षणोत्पन्नानुमितौ (१)व्यभिचारतादवस्थ्यात् । चतुर्थक्षणसाधारणानुगताव्यवहितोत्तरत्वस्य कथञ्चिन्निवेशे चतुर्थक्षणोत्पन्नानुमितिकापेक्षाबुद्ध्यात्मकसिद्धेरप्रतिबन्धकत्वापत्तेरिति ध्येयम् ।

अपेक्षाबुद्धिद्वितीयक्षणावधिकक्षणत्रयतदितरबुद्धिद्वितीयतृतीयक्षणसाधारणमनुगताव्यवहितोत्तरत्वं प्रकारान्तरेण निर्वक्ति । स्वध्वंसेति । उभयत्र कालपदं कालिकसम्बन्धेन स्वध्वंसवत्त्वलाभाय । तेन सर्वस्यैव क्षणस्य स्वनाशविषयकपूर्वपूर्वज्ञाननाशवत्वेऽपि न सत्यन्ताप्रसिद्धिः । न वा स्वपूर्वकालस्य तत्पूर्वकालीनस्वविषयकज्ञाननाशवत्वेऽप्युत्तरत्वस्य तत्साधारण्यप्रसङ्गः । एवं सति यत्र सिषाधयिषासिद्धिपरामर्शानुमितीनां क्रमेणोत्पादस्तत्रत्यसिद्धेस्तत्क्षणे सिषाधयिषाविरहविशेषणमन्तरेणापि अव्यवहितोत्तरक्षणोत्पन्नानुमितिकत्वनिर्वाहादुक्तप्रथमविशिष्टान्तव्यावृत्त्यसङ्गतेः स्थलान्तरे तद्व्यावृत्तिमाह । तथा चेति । प्रथमक्षणे पक्षतावारणायेति । ता-

---

(१) तृतीयक्षणसाधारणाव्यवहितोत्तरत्वकल्पे सिषाधयिषाविरह उत्तरक्षणस्यैव विशेषणमिति ध्येयम् ।

दृशसिद्धेस्तृतीयक्षणोत्पन्नानुमितिकतया निरुक्तसिद्धिभिन्नत्वविरहेण पक्षताप्रसक्तेरिति भावः। प्रथमक्षणे पूर्ववत् सिषाधयिषाविरहविशेषणसत्त्वेऽपि स्वनाशाधिकरणकालध्वंसानधिकरणत्वघटिताव्यवहितोत्तरत्वनिवेशकल्पे नोक्तातिप्रसङ्गवारणसम्भवः। अनुमित्युत्पत्तिक्षणे तत्सिद्धिनाशाधिकरणकालध्वंसानधिकरणत्वस्य सिषाधयिषाविरहविशिष्टतत्सिद्ध्यधिकरणप्रथमक्षणध्वंसाधिकरणत्वस्य च सत्त्वादतोऽव्यवहितोत्तरक्षणे तस्य विशेषणतामाह। उत्तरेति। तथा च उक्तस्थले सिद्ध्यव्यवहितोत्तरतृतीयक्षणेऽपि सिषाधयिषासत्त्वात् सिषाधयिषाविरहविशिष्टतादृशक्षणोत्पत्तिकत्वं नानुमितेरिति तादृशसिद्धेरनुमितिप्रतिबन्धकत्वानिर्वाहः।

द्वितीयविशिष्टान्तस्य यद्विशेषणत्वं यत्प्रयोजनकत्वं वा प्रागभिहितम् इदानीमपि तस्य तद्विशेषणत्वं तत्प्रयोजनकत्वं न तु प्रथमविशिष्टान्तवदन्यादृशमिति दर्शयितुं पूर्वोक्तमप्यनुवदति। द्वितीयन्त्विति। सिद्धेर्विशेषणमित्यनुपज्यते। तत्रैवेति। यत्र क्रमेण सिद्धिसिषाधयिषानुमितयः तत्रैवेत्यर्थः। द्वितीयक्षण इति। तृतीयक्षणेऽनुमितिनिर्वाहार्थमित्यादिः। पक्षतासम्पत्तय इति। विशेषणाभावेन विशिष्टाभावरूपपक्षतानिर्वाहायेत्यर्थः। अन्यथा उक्तक्रमेण तादृशसिद्धेर्निरुक्तसिद्धिभिन्नतया विशेष्यसत्त्वेन पक्षतानुपपत्तेरिति भावः।

ननु दर्शितस्थले प्रथमक्षणे पक्षतासत्त्वेऽपि न क्षतिः। सिषाधयिषाकालेऽनुमित्युत्पादस्य इच्छासामग्र्याः प्रतिबन्धेनाप्यसम्भवात्। इत्थञ्च निष्प्रयोजनकतया प्रथमविशिष्टान्तानुपादाने द्वितीयमपि निष्प्रयोजनकं, तादृशसिद्धेः स्वाव्यवहितोत्तरतृतीयक्षणोत्पन्नानुमितिकतयैवाप्रतिबन्धकत्वेन तृतीयक्षणोत्पन्नानुमितिनिर्वाहादित्याशयेन इच्छासामग्र्या अनुमितिप्रतिबन्धकत्वमते तदुभयं परित्यजति। यदि चेति। इच्छासामग्र्यपेक्षयाऽनुमितिसामग्र्या हीनबलत्वेऽपि अनुमित्साविशिष्टाया अनुमितिसामग्र्या इच्छां प्रति प्रतिबन्धकताकल्पनस्याऽऽवश्यकतया तस्या एव बलवत्त्वकल्पनमुचितम्, अन्यथा इच्छासामग्र्यपेक्षया बाधादिरूपानेकप्रतिबन्धकाभावघटिततया गुरुशरीराया अपि अनुमितिसामग्र्याः प्रतिबन्धकतायामिच्छानिवेशेन गौरवादिति युक्त्या ज्ञानेच्छयोर्यौगप-

द्यस्वीकारसम्भवेन च इच्छासामग्र्या अनुमितिविरोधिताव्यवस्थापनं न सम्भवतीत्याशयेन यदि चेत्युक्तम् । सिषाधयिषाविरहविशेषणसार्थक्यस्याशक्यत्वेऽनुमित्यव्यवहितपूर्ववर्त्तित्वं परित्यज्याव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकत्वरूपगुरुविशेषणोपादानमनुचितमित्याशयेनाह । अनुमित्यव्यवहितेति । अनुमितिपदं स्वसमानाधिकरणानुमितिपरमतो व्यधिकरणानुमित्यव्यवहितपूर्ववर्त्तिसिद्धेराश्रयेऽनुमित्यनुत्पादोपपादकतानिर्वाहः । यन्नाशानन्तरमनुमितिरुत्पत्स्यते तादृशसिद्धेरप्रतिबन्धकतावारणाय अव्यवहितत्वोपादानम् । तच्चानुमितिपूर्वकालीनध्वंसाप्रतियोगित्वरूपं पूर्वक्षणे सिद्धावेव वा विशेषणम् । पूर्वकालीनत्वञ्च कालिकसम्बन्धेन प्रागभाववत्त्वमेव । ध्वंसस्य कालोपाधितया तदुपपत्तिः । सर्वासामेव सिद्धीनां पूर्वजातकिञ्चिदनुमितिनिरूपितनिरुक्ताव्यवधानवत्तयाऽनुमित्यव्यवहितसिद्धिभिन्नासिद्धप्रसिद्धिरतः पूर्वक्षणवृत्तित्वं विशेषणम् । पूर्वत्वं प्रागभाववत्त्वम् । अनुमित्यादिपर्यन्तावस्थायिस्थूलकालमहाकालसाधारणमित्युक्तदोषतादवस्थ्यमतः क्षणत्वपर्यन्तनिवेशः । प्रागभावावच्छिन्नवृत्तित्वनिवेशे च क्षणत्वमनुपादेयमेव । जन्यमात्रस्य कालोपाधित्वे तु कालिकसम्बन्धेन प्रागभाववत्त्वं सिद्धेरेव विशेषणं देयम् । प्रागभावानभ्युपगमे वक्ष्यमाणं तदुत्पत्तिक्षणोत्पत्ति ध्वंसप्रतियोगित्वरूपमव्यवहितपूर्वत्वमेव, क्षणविशेषणम्, तद्घटकदलानां व्यावृत्तिरग्रे व्यक्तीभविष्यति । अनुमित्यव्यवहितपूर्ववर्त्तिना मनोयोगादिस्तादृशसिद्धिभिन्नतया प्रसक्तप्रतिबन्धकतावारकद्वितीयसिद्धिपदसार्थक्याय प्रथमसिद्धिपदम् ।

न च प्रक्षालनाद्धीत्यादिन्यायेन उभयपरित्याग उचित इति वाच्यम् । तथा सति बाधबुद्ध्यादेरपि निरुक्तरूपेणैव प्रतिबन्धकतया स्वतन्त्रतत्प्रतिबन्धकताव्याघातात् ।

न च व्याहन्यतां प्रतिबन्धकत्वान्तरं न हि तत् क्षतिमावहति, किन्तु तावता लाघवमेवेति वैयर्थ्यदोषो दुर्वार एवेति वाच्यम् । एतद्दोषस्य वैयर्थ्याच्च सिद्धेरित्यनेन स्वयं दर्शनीयत्वात् ।

यद्यप्येवं प्रथमसिद्ध्यनुपादानेऽपि बाधादेश्च स्वतन्त्रप्रतिबन्धकताविलोपभीरूणां द्वितीयसिद्धिपदोपादानं न विरुध्यते, अखण्डाभावसम्पादकत्वेन लक्षणदोषासंस्पर्शादिति प्रथमतदुपादानमनु-

च्चितम् । तथाऽपि अनुमित्यव्यवहितपूर्ववर्त्तिनां स्वत्वघटितत्वेन निरुक्तरूपेणानुगमासम्भवेन तत्तद्व्यक्तित्वेन भेदकूटस्य निवेशनीयतया सिद्धौ सिद्ध्यतिरिक्तताद्दशपदार्थभेदानामव्यावर्त्तकानां निवेशे गौरवात् । सिद्धिव्यक्तीनामेव भेदा निवेशनीया इत्येतत्सूचनाय प्रथमसिद्धिपदोपादानम् । अत एव तत्तद्व्यक्तित्वेन सिद्धिव्यक्तीनां भेदनिवेशे च भेदानां विशेष्यविशेषणभावे विनिगमनाविरहेण महागौरवात् फलानुत्पादानयतसिद्धिव्यक्तीनां तत्तद्व्यक्तित्वेन प्रतिबन्धकतापक्ष एव साधीयान्, सिषाधयिषाविरहविशेषणपरित्यागश्चानुचितः । सिषाधयिषाकालीनसिद्धिव्यक्तीनां अनन्तानां तत्तद्व्यक्तित्वावच्छिन्नभेदकूटनिवेशापेक्षया तद्विशेषणदानस्यैव युक्तत्वादिति कथञ्चिदनुगमप्रकारः परिचिन्तनीय इति ।

(दी०) ताद्दशसिद्धीनां तत्तद्व्यक्तित्वेनाभावः कारणम्, निरुक्तरूपविशिष्टत्वेन वा ? नाद्यः, अनन्तकार्यकारणभावप्रसङ्गात् । ताद्दशसकलसिद्धौ अनुमित्साविरहविशेषणदानस्य वैयर्थ्यात् । तत्तत्समयसम्बन्धव्यक्तीनां तत्तत्समयावच्छिन्नतत्तन्मनोयोगादीनां वा प्रतिबन्धकत्वप्रसङ्गाच्च ।

(गा०) सिद्धेर्वैयर्थ्यमित्याशयेन वैयर्थ्याच्च सिद्धेरिति वक्ष्यति। ताद्दशसिद्धीनाम् । भिन्नान्तपरिचेयसिद्धिव्यक्तीनाम् । निरुक्तरूपेति । निरुक्तसिद्धिभिन्नत्वविशिष्टसिद्धित्वेनेत्यर्थः । अगत्या कार्यकारणभावानन्त्यमदोषायेत्यत आह । ताद्दशेति । तत्तद्व्यक्तित्वेन कल्प्यमानप्रतिबन्धकताकेत्यर्थः । याद्दशसिद्ध्युत्तरं सिषाधयिषोत्पत्तावनुमितिः सिषाधयिषोत्पत्तिक्षणेऽनुमितिवारणाय कल्पनीयप्रतिबन्धकताकताद्दशव्यक्तौ सिषाधयिषाविरहवैशिष्ट्यानिवेशस्याऽऽवश्यकतया सकलेति ।

ननु कश्चित् सिषाधयिषाविरहविशेषणस्याऽऽवश्यकतया तदभिप्रायेणैव मूलोक्ततदुपादानसङ्गतिरतो दूषणान्तरमाह । तत्तत्समयेति । तत्तदात्मनिष्ठा याः सिद्ध्यभावातिरिक्तसकलकारणसमवधानाधिकरणीभूतक्षणसम्बन्धव्यक्तयः तासां विनिगमनाविरहेण क्रमिकसिद्धिसिषाधयिषानुमित्युत्पत्तिस्थले सिषाधयिषोत्पत्तिक्षणेऽनुमिति-

वारणाय सिद्धेः सिषाधयिषाविरहविशिष्टतद्व्यक्तित्वेन प्रतिबन्धकत्वापेक्षया लाघवेन च प्रतिबन्धकतापत्तेरित्यर्थः । तथा च मूलोक्तस्य सिषाधयिषाविरहविशिष्टसिद्ध्यभावस्य पक्षतात्वव्याघात इति भावः ।

ननु तत्तत्समयैः समं तत्तदात्मनां सम्बन्धाः स्वरूपानातिरिक्ताः तथा च तत्तदात्मस्वरूपस्य तत्तत्समयस्वरूपस्य वा सम्बन्धस्य प्रतिबन्धकत्वे तत्तदात्मन्यन्यदा तत्तत्समये चान्यत्रात्मनि अनुमित्यनुपपत्तिरतोऽन्यस्य प्रतिबन्धकतां प्रसञ्जयति । तत्तत्समयेति । सिद्ध्यनन्तरं सिषाधयिषाद्वितीयक्षणेऽनुमितिस्थले इत्यादिः । सिषाधयिषाविरहविशिष्टसिद्ध्यभावेतरसकलकारणाधिकरणतत्तत्क्षणावच्छिन्नानां तत्तदात्मनिष्ठतत्तन्मनोयोगादिव्यक्तीनामित्यर्थः । सामानाधिकरण्यसम्बन्धेन सिषाधयिषाविरहावच्छिन्नायास्तत्तत्सिद्धिव्यक्तेः प्रतिबन्धकत्वापेक्षया लाघवादिति भावः ।

(दी०) नान्त्यः, सत्यपि परामर्शादौ कस्याश्चित्सिद्धेरनन्तरमनुमितिः कस्याश्चिन्नेत्यत्र नियामकाभावात् । न वा कारणतावच्छेदकावच्छिन्नसमाजाधीनकार्योत्पादादिकं कारणतावच्छेदककोटौ निविशते । तथा सति उत्पत्तिकालावच्छिन्नत्वविशेषितेन स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकस्वसमानाधिकरणानुमितिकसविषयकत्वेन, स्वसमानाधिकरणानुमित्यव्यवहितपूर्वक्षणोत्पन्नसविषयकत्वेन, स्वक्षणाव्यवहितोत्तरक्षणानुत्पत्तिकस्वसमानाधिकरणानुमितिकभिन्नसविषयकत्वेन वा । किं वा स्वसमानाधिकरणानुमित्यव्यवहितपूर्वक्षणवृत्तित्वविशिष्टज्ञानत्वादिना कारणत्वं स्यात् । अव्यवहितोत्तरश्च तृतीयक्षण एवेति नातिप्रसङ्गः ।

(गा०) नियामकाभावात् । नियामकाभावप्रसङ्गात् । सिषाधयिषाविरहविशिष्टसिद्धिसत्त्वे द्वितीयक्षणेऽनुमित्युत्पत्तिनिर्वाह्याया निरुक्तसिद्धिभिन्नसिद्ध्यभावरूपपक्षताया अनुमित्यनुत्पादनिर्वाह्यतदभावस्य चान्योन्याश्रयभियाऽनुमित्युत्पादानुत्पादप्रयोजकत्वासम्भवादिति भावः । ईदृशान्योन्याश्रयस्यादोषतावादिनं प्रतिब-

न्धया निरस्यति । न वेत्यादिना । एवार्थे वा । कार्योत्पत्तेः कारणतावच्छेदकावच्छिन्नसमवधानाधीनत्वकथनेन तस्याः कारणतावच्छेदककुक्षिनिवेशेऽन्योन्याश्रयः सूचितः । तथा सति प्रायशः कारणतावच्छेदकावच्छिन्नसमवधानस्याप्यग्रेतनकार्योत्पत्त्यधीनत्वापातात् । निविशते । निविशमानमदूषणावहम् ।

अथ वा उक्तपक्षतायाः कार्योत्पत्तिनियामकत्वमेव न वेत्यादिना निराकृतम । कारणतावच्छेदककोटावित्यादेः कार्योत्पत्तिनियामकतावच्छेदकघटकमित्यर्थः ।

यद्यपि स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकत्वं स्वत्वघटितत्वेन तत्तद्व्यक्तिविश्रान्तमिति भेदप्रतियोगितावच्छेदकगर्भे तन्निवेशानर्थक्यात्, तत्परिचयव्यक्तीनां तत्तद्व्यक्तित्वेनैव भेदाः सिद्धौ निवेशनीयाः । तथा च कारणतावच्छेदकस्य नोत्पत्तिघटितत्वम् । तथाऽपि भेदकूटनिवेशे विशेष्यविशेषणभावे विनिगमनाविरहेण कारणतानन्त्यं दुष्परिहरमेवेति भावः । कार्योत्पादादिकमित्यादिपदेन ईदृशगौरवप्रयोजकभेदकूटस्यापि सङ्ग्रहः । तस्य कारणतावच्छेदकत्व एव तृतीयप्रतिबन्ध· सङ्गतेः । अत्रान्योन्याश्रयदोषं प्रतिबन्ध्या स्वीकारयति । तथा सतीति । अनुमित्यव्यवहितपूर्वोत्पन्नपरामर्शादितोऽनुमित्युत्तरमनुमित्यापत्तेर्वारणाय उत्पत्तिकालावच्छिन्नत्वविशेषितेनेति । स्वाधिकरणसमयध्वंसवदन्यकालसम्बन्धविशेषितेनेत्यर्थः । तादृशध्वंसवत्त्वं कालिकसम्बन्धेन । तेन उत्पत्तिक्षणस्यापि प्रतियोगित्वादिसम्बन्धेन स्वाधिकरणकालध्वंसावच्छिन्नत्वेऽपि न क्षतिः । एवञ्च कालिकसम्बन्धेन तादृशध्वंसवदन्यात्मसम्बन्धविशिष्टस्य ज्ञानादेर्द्वितीयादिक्षणे सत्त्वादुक्तातिप्रसङ्गतादवस्थ्यमतः कालपदम् । ईदृशकालसम्बन्धस्य उपलक्षणविधयाऽवच्छेदकत्वे स एव दोष इत्यतो विशेषणविधया तथात्वलाभाय उत्तरत्रानुषङ्गाय चावच्छिन्नान्तस्य कर्मधारयमध्ये प्रक्षेपमुपेक्ष्यावच्छिन्नत्वविशेषितेनेत्युक्तम् । विशेषणत्वञ्चास्य सामानाधिकरण्यसम्बन्धेन बोध्यम् । धर्मिणो विशेष्यत्वात् । कालान्तरीणानुमितिसमानाधिकरणघटज्ञानादितोऽनुमित्यापत्तिवारणाय स्वक्षणाव्यवहितोत्तरक्षणोत्पन्नत्वमनुमितिविशेषणम् । तदर्थश्च स्वाधिकरणकालध्वंसाधिकरणकालध्वंसानधिकरणत्वे सति स्वाध·

करणकालध्वंसाधिकरणं यः क्षणस्तदुत्पन्नत्वम् । सत्यन्तनिवेशात् स्वोत्तरदिवसाद्यन्तरितक्षणोत्पन्नानुमितिकज्ञानादितस्तद्द्वितीयक्षणे नातिप्रसङ्गः । तादृशानुमितिकसंस्कारद्वितीयक्षणेऽनुमितिवारणाय स्वाधिकरणत्वे सतीत्युपेक्षितं तृतीयादिक्षणस्य ज्ञानाद्यनाधिकरणत्वेऽपि संस्काराद्यधिकरणत्वाक्षतेः । तादृशापेक्षाबुद्धिद्वितीयक्षणेऽनुमितिवारणानुरोधस्तु न तदुपेक्षाबीजम् । तदानीं समानाधिकरणविशेषगुणान्तरस्याप्यनुत्पत्त्या तत्प्रयोजकादेवानुमित्यनुत्पादोपपत्तेः । अपेक्षाबुद्धिद्वितीयक्षणे समानाधिकरणविशेषगुणोत्पादोपगमे त्वपेक्षाबुद्धेस्तृतीयक्षणावस्थायिताया एवानुपपत्तेः ।

वस्तुतस्त्वपेक्षाबुद्धेर्द्वितीयक्षणावस्थायितामत एवैतत्प्रतिबन्दिप्रदर्शनम् । अन्यथा सिद्ध्यादिद्वितीयक्षणोत्पन्नापेक्षाबुद्ध्यात्मकपरामर्शात्तृतीयक्षणेऽनुमित्यनुपपत्तेः । तस्यास्तृतीयक्षणपर्यन्तावस्थानमते तद्द्वितीयक्षणे विशेषगुणानुत्पत्त्या तदानीमुत्पत्तिकालावच्छिन्नसविषयकत्वस्य दुर्घटत्वादित्यवधेयम् ।

अनुमितेः स्वसमानाधिकरणानुमित्युत्तरोत्पन्नज्ञानान्तराद्वाऽनुमितिप्रसङ्गवारणायाधिकरणान्तं क्षणविशेषणम् । स्वपूर्वकालोत्पन्नानुमितेरपि स्वाव्यवहितोत्तरत्वाक्रान्तस्वद्वितीयक्षणपर्यन्तस्थायिस्थूलकालोत्पन्नतया तद्दोषतादवस्थ्यमतः क्षणत्वनिवेशः । अनुमितेः स्वक्षणाव्यवहितोत्तरक्षणवृत्तिस्वसमानाधिकरणस्वात्मकानुमितिकतया तद्वारणायोत्पत्तिनिवेशः ।

वस्तुतस्त्वपेक्षाबुद्धिद्वितीयक्षणे विशेषगुणानुत्पादेन अनुमितौ स्वान्यत्वस्य निवेशादपि उत्पत्तिनिवेशप्रयोजननिर्वाहो बोध्यः । तथा सति अपेक्षाबुद्ध्यात्मकानुमित्यनन्तरोत्पन्नज्ञानादनुमित्यापत्तेरसम्भवात् । पुरुषान्तरीयानुमित्यव्यवहितपूर्वोत्पन्नज्ञानात्तद्वतः पुंसोऽनुमितेर्वारणाय स्वसामानाधिकरण्यमनुमितिविशेषणम्, एकपुरुषीयानुमित्यव्यवहितपूर्वोत्पन्नद्वित्वादितस्तद्वतः पुरुषान्तरस्यानुमितेर्वारणाय सविषयकत्वनिवेशनम् । अनुमित्यव्यवहितपूर्वक्षणे ज्ञानोत्पत्त्यनियमाशङ्कया ज्ञानत्वमुपेक्षितम् । व्यक्तीभविष्यति चेदमुपरिष्टात् ।

बहुव्रीहिप्रतिपाद्यसम्बन्धांशस्याधिकस्यात्र निवेशाद्बहुव्रीहिं परित्यज्य लघुरूपान्तरमाह । स्वसमानाधिकरणेति । अत्राप्युत्पत्ति-

कालावच्छिन्नत्वविशेषितेनेत्यनुषज्यते । अन्यथाऽनुमित्यव्यवहितपूर्वोत्पन्नज्ञानादेरनुमित्युत्पत्त्यधिकरणक्षणेऽपि सत्त्वात् तदनन्तरमप्यनुमित्यन्तरापत्तेः ।

न चानुमित्यव्यवहितपूर्वक्षणोत्पत्तेर्विशेषणतयैव सामञ्जस्ये उत्पत्तिकालावच्छिन्नत्वस्य पृथग्विशेषणत्वमनुपयुक्तमिति वाच्यम् । अव्यवहितपूर्वक्षणोत्पत्तेर्विशेषणत्वे तद्घटकवृत्त्यंशस्य विशेषणतयैव सामञ्जस्ये लक्षणे स्वाधिकरणकालध्वंसानधिकरणरूपस्य उत्पत्तिघटकांशस्य वैयर्थ्यापातात्प्रक्षालनाद्धीति न्यायेन तदंशमपि परित्यज्य स्वसमानाधिकरणानुमित्यव्यवहितपूर्वक्षणवृत्तित्वाविशिष्टज्ञानत्वेन कारणताप्रसङ्गोऽग्रे प्रदर्शयिष्यत एव । तदनुमितौ सामानाधिकरण्यविशेषणप्रयोजनं पूर्ववत् । अनुमित्यव्यवहितपूर्वत्वं प्रागभावसत्त्वे तत्प्रागभावाधिकरणकालप्रागभावानधिकरणत्वे सति तत्प्रागभाववत्त्वम् । अनुमितिपूर्वविनष्टस्य तदुत्तरोत्पन्नस्य च घटज्ञानादेर्वारणाय दलद्वयम् । अव्यवहितोत्तरत्वघटकस्वाधिकरणकालध्वंसाधिकरणकालध्वंसानधिकरणत्वरूपसत्यन्तादेतदीयसत्यन्तस्य लघुत्वादप्येतत्कल्पे लाघवं बोध्यम् ।

प्रागभावानङ्गीकारे तदघटितवक्ष्यमाणाव्यवहितपूर्वत्वमेव निवेश्यम्, अनुमित्यव्यवहितपूर्वोत्पन्नतदुत्तरस्थायिस्थूलकाले अनुमित्युत्तरमुत्पन्नस्य घटादिज्ञानस्य वारणाय क्षणत्वनिवेशनम् । अनुमितिप्रागभावविशिष्टोत्पत्तिकत्वविवक्षणे क्षणपदं कालपरमेव । अनुमित्यव्यवहितपूर्वक्षणपर्यन्तस्थायिनस्तत्पूर्वजातघटज्ञानादितो ऽनुमितिपूर्वमनुमितेर्वारणाय उत्पन्नत्वनिवेशनम् । पूर्ववद् द्वित्वादिवारणाय सविषयकत्वनिवेशनम् । ज्ञानत्वोपेक्षाबीजमपि पूर्ववद्बोध्यम् ।

अत्रोभयत्र स्वत्वघटितत्वेन तत्तद्व्यक्तिविश्रामादननुगम इति प्रतियोगिनि स्वत्वमन्तर्भाव्यानुगतभेदकूटघटितधर्मेण कारणतां प्रसञ्जयति । स्वक्षणेति । स्वक्षणाव्यवहितोत्तरक्षणानुत्पत्तिकस्वसमानाधिकरणानुमितिकं स्वं अनुमितिसामग्र्यसमवधानक्षणोत्पन्नं घटादिज्ञानादिकमेव तदन्यसविषयकोऽनुमित्यव्यवहितपूर्वोत्पन्नतत्समानाधिकरणपरामर्शादिस्ततोऽनुमित्युपपत्तिः । तादृशादेव परामर्शादनुमित्यनन्तरमनुमित्यन्तरवारणार्थमप्युत्पत्तिकालावच्छिन्नत्वविशेषितेनेत्यनुषज्यते ।

न चैवं स्वोत्पत्तिक्षणावच्छिन्नत्वस्यानुयोगिनि निवेशेनाननुगमस्याऽऽवश्यकतया प्रयासोऽयमफल इति वाच्यम् । तत्तद्वस्तुनिष्ठतत्तदधिकरणसमयध्वंसाधिकरणसमयसम्बन्धानामभावकूटविशिष्टत्वस्यैवात्र उत्पत्तिकालावच्छिन्नत्वार्थकत्वात्, तादृशस्य चानुगतत्वात् । स्वसमानाधिकरणानुमितित्वावच्छेदेन स्वक्षणाव्यवहितोत्तरक्षणानुत्पत्तिकत्वं विवक्षणीयमतोऽनुमित्युत्पादकपरामर्शाद्यधिकरणक्षणानुत्पत्तिकत्वस्य तत्परामर्शसमानाधिकरणकालान्तरीणानुमितौ सत्त्वेऽपि न जन्यसविषयके भेदकूटाप्रसिद्धिः । स्वक्षणाव्यवहितोत्तरत्वं पूर्वनिरुक्तं ग्राह्यम् । तत्पुरुषीययादृशघटज्ञानाद्युत्तरं तदीयानुमितावनुत्पन्नायामेव तस्य पुंसो मुक्तिस्तादृशघटज्ञानादिकं स्वाधिकरणसमयोत्तरक्षणानुत्पत्तिकस्वसमानाधिकरणानुमितिसामान्यकमिति परामर्शाद्यसमवहितात्तदन्यघटज्ञानादितोऽनुमित्यापत्तिः, तस्य स्वपदेनोपादानासम्भवादतोऽव्यवधाननिवेशः । निरुक्ताव्यवधानस्यानुमित्यनुत्पादकघटज्ञानादेः पूर्वं कदाचिदुत्पन्नाया अप्यनुमितेरुत्पत्त्यधिकरणक्षणे अव्यवहितोत्तरत्वस्य च तादृशानुमित्युत्पत्तिमति तादृशघटज्ञानादिद्वितीयक्षणपर्यन्तस्थायिस्थूलकाले सत्त्वात् तादृशं स्वमप्रसिद्धमेव स्यादत उत्तरत्वक्षणत्वयोर्निवेशनम् । अनुमितेः स्वाव्यवहितोत्तरक्षणवृत्तिस्वात्मकानुमितिकतया स्वपदेन उपादानासम्भवात् ततोऽनुमित्यन्तरापत्तिरत उत्पत्तिनिवेशः । व्यधिकरणानुमित्यव्यवहितपूर्वक्षणोत्पन्नघटज्ञानादिवारणाय सामानाधिकरण्यमनुमितिविशेषणम् । द्वितीयकल्पेऽनुमित्यव्यवहितपूर्वक्षणोत्पत्तिमुपलक्षणीकृत्य पृथगुत्पत्तिकालस्य विशेषणतया निवेशापेक्षया तादृशक्षणोत्पत्तिघटकतादृशक्षणवृत्तित्वस्य विशेषणतया निवेशनमेवोचितम्, तावतैवातिप्रसङ्गभङ्गादित्याशयेनाह । किं वेति । पदव्यावृत्तिः स्फुटैव । यादृशपरामर्शद्वितीयक्षणे किमपि ज्ञानं नोत्पन्नं तृतीयक्षणेऽप्यनुमितिर्जाता तत्र परामर्शरूपज्ञानस्यैवानुमित्यव्यवहितपूर्वक्षणवृत्तित्वविशिष्टस्यानुमित्यव्यवहितपूर्वक्षणे सत्त्वात् ज्ञानत्वमुपेक्ष्य सविषयकत्वनिवेशनमफलमित्यतो ज्ञानत्वमेवात्र निवेशितम् । तत्रानुयोगिनि स्वत्वान्तर्भावेनाननुगमस्तु नाशङ्कनीयः । पूर्वकल्पद्वयेऽपि तत्सत्त्वात् गौरवस्य चाधिक्यात् । अननुगमासहिष्णुतायाञ्च तत्तद्वस्तुनिष्ठतत्तद्वस्तुसमानाधिकरणानुमित्यव्यवहि-

तपूर्वत्वानधिकरणक्षणसम्बन्धानामभावकूटविशिष्टज्ञानत्वेन कारणत्वप्रसक्तिर्बोध्या ८

न चापदर्शितसकलरूपापेक्षया लिङ्गपरामर्शत्वस्य लघुतया तेनैव रूपेण परामर्शहेतुत्वमुचितमिति न प्रतिबन्ध्यवकाश इति वाच्यम्। उक्तरूपेण हेतुत्वे कारणान्तरविरहदशायाम् उक्तरूपावच्छिन्नत्वविरहेणानुमितिवारणसम्भवात् कारणान्तरस्याकल्पनीयतया लिङ्गपरामर्शत्वापेक्षया तत्तच्छरीरगौरवस्याकिञ्चित्करत्वात् ।

ननु यत्र घटज्ञानादिद्वितीयक्षणे लिङ्गपरामर्शस्तदुत्तरमनुमितिस्तत्र परामर्शोत्पत्तिक्षणेऽप्यनुमितिप्रसङ्गः । प्रथमक्षणमपेक्ष्य द्वितीयस्येव द्वितीयक्षणमपेक्ष्य तृतीयस्यापि क्षणस्याव्यवहितोत्तरत्वेन तादृशघटज्ञानादेः स्वक्षणाव्यवहितोत्तरक्षणोत्पन्नानुमितिकत्वादित्यत आह। अव्यवहितोत्तरश्चेति। द्वितीयक्षण एवेति। अव्यवहितोत्तरत्वमध्ये स्वक्षणस्य न प्रातिस्विकरूपेण निवेशः किन्तु स्वाधिकरणकालत्वेन, तथा च स्वाधिकरणकालध्वंसाधिकरणत्वसामान्याभावस्य स्वतृतीयक्षणेऽसत्त्वान्न तस्याव्यवहितोत्तरत्वमिति भावः।

(दी०) न च आदिमेषु परामर्शस्थितिक्षणे यत्र विरोधिसिद्ध्यादिविनाशस्तत्र उत्तरक्षणेऽनुमितिर्न स्यात् परामर्शस्य अतथात्वादिति वाच्यम्। अनुमितिसामग्र्या विरोधिन्या विरहेण तदानीमुत्पन्नादनुव्यवसायादेरन्ततः संस्काराद्वा तत्सम्भवात्। संस्कारजन्यत्वेन स्मृतित्वस्य द्रागेव निरासात्।

(गा०) पूर्वकल्पत्रये ज्ञानत्वमुपेक्ष्य सविषयकत्वनिवेशनप्रयोजनं स्फुटयितुमाशङ्कते। न चादिमेष्विति। शेषकल्पे विनश्यदवस्थपरामर्शजन्यानुमितिस्थलेऽप्यव्यवहितपूर्वक्षणवृत्तित्वविशिष्टपरामर्शस्यैवानुमित्यव्यवहितपूर्वक्षणे सत्त्वान्नानुपपत्तिरित्यत आदिमेष्वित्युक्तम्। अतथात्वादिति। द्वितीयक्षणेऽनुमित्यनुत्पत्त्या तत्कारणतावच्छेदकानाक्रान्तत्वादुत्पत्तिक्षणावच्छिन्नस्यानुमित्यव्यवहितप्राक्क्षणेऽसत्त्वाच्चेत्यर्थः। अनुमित्युत्पत्तिक्षण इव दर्शितस्थलेऽनुमितिपूर्वमपि परामर्शेन प्रतिबन्धादनुव्यवसायादिर्नोत्पत्तुमर्हतीति

शङ्कानिरासायानुमितिसामग्र्या विरोधिन्या विरहेणेति । परामर्शमात्रं न प्रतिबन्धकम् अपि त्वनुमितिसामग्र्येव, तदानीन्तु न तत्सामग्री तद्व्याः फलाव्यवहितप्राक्क्षण एव सत्त्वादिति । तदानीम् । तादृशपरामर्शद्वितीयक्षणे । अनुव्यवसायादित्यादिना सन्निकृष्टवस्त्वन्तरज्ञानपरिग्रहः ।

ननु यत्र परामर्शोत्पत्तिकाले समानविषये लौकिकचाक्षुषादिप्रत्यक्षस्य भिन्नविषये च शाब्दबोधस्य सामग्र्यासीत्तत्र द्वितीयक्षणे विनिगमनाविरहेण किमपि ज्ञानं न जायते सकलज्ञानसामग्रीषु प्रतिबन्धकसमवधानस्य तुल्यत्वादतस्तद्वितीयक्षणे प्रत्यक्षादिसामग्रीविगमेऽपि तृतीयक्षणे नानुमितिः स्यात् । उक्तकारणतावच्छेदकाक्रान्तज्ञानाभावादित्यत आह । अन्ततः इति । कथञ्चिज् ज्ञानानुत्पादेऽपीत्यर्थः । संस्कारादिति । तस्यापि सविषयकत्वघटिततत्तत्कारणतावच्छेदकाक्रान्तत्वादिति भावः ।

न च यत्र परामर्शादिरुपेक्षात्मकस्तत्र का गतिरिति वाच्यम् । फलानुरोधेन तत्र संस्कारकल्पनाया आवश्यकत्वेन परामर्शादेरुपेक्षात्वस्यैवासिद्धेः ।

नन्वनुमितेः संस्कारजन्यत्वोपगमे तस्याः स्मृतित्वापत्तिः, संस्कारजन्यज्ञानत्वस्य स्मृतित्वप्रयोजकत्वादत आह । संस्कारजन्यत्वेनेति । निरासादिति । संस्कारत्वेन संस्कारजन्यत्वस्यैव स्मृतित्वप्रयोजकत्वात्, अन्यथा कालोपाधिविधया ज्ञानान्तरेऽपि, ज्ञायमानलिङ्गकरणतामते संस्कारलिङ्गकानुमितौ च संस्कारस्य जनकत्वेनातिप्रसङ्गादिति भावः ।

(दी०) स्याद्वा स्वसमानाधिकरणानुमित्यव्यवहितपूर्वक्षणवृत्तिभिन्नत्वेन, स्वसमानाधिकरणानुमित्यव्यवहितपूर्वत्वानधिकरणक्षणवृत्तित्वविशिष्टत्वेन वा स्वसमानाधिकरणानुमित्युत्पत्त्यनधिकरणसमयाव्यवहितपूर्वक्षणवृत्तित्वविशिष्टत्वेन वा प्रतिबन्धकत्वम् । तदव्यवहितपूर्वत्वञ्च तदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वम् ।

(गा०) प्रकृतसामग्र्याः कार्यानुत्पत्तिनिर्वाह्यतावच्छेदकरूपे-

ण प्रतिबन्धकत्वमेव प्रसञ्जयति । स्वसमानाधिकरणेति । एतद्व्यावृत्तिरनुमित्यव्यवहितपूर्ववर्तिसिद्धिभिन्नसिद्ध्यभावपक्षतावद्बोध्या ।

सिद्ध्यात्मकपरामर्शानन्तरासिषाधयिषोत्पत्तिकाले सर्वत्र तत्तदात्मसमवेतधर्मनाशस्याप्रामाणिकत्वे यत्र न तन्नाशस्तत्र प्रथमक्षणेऽप्युक्तप्रतिबन्धकतावच्छेदकावच्छिन्नस्यासत्त्वेनातिप्रसङ्गसम्भवात् कल्पान्तरमाह । स्वसमानाधिकरणेति । उक्तस्थले परामर्शादेरनुमित्यव्यवहितपूर्वक्षणवृत्तित्वेऽपि तदुत्पादक्षणस्यानुमित्यव्यवहितपूर्वत्वानाधिकरणतया तद्वृत्तित्वविशिष्टत्वेन परामर्शादेरेव प्रतिबन्धकत्वान्नात्र कल्पे तादृशस्थले सिषाधयिषोत्पादकालेऽनुमितिप्रसङ्ग इति भावः ।

अत्रानुमितेरव्यवहितपूर्वत्वं वक्ष्यमाणतदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वम् । तत्र क्षणत्वानिवेशेऽनुमित्युत्पत्त्यधिकरणमहाकालाद्युत्पत्तिकध्वंसमादायातिप्रसक्तिरिति क्षणत्वनिवेशनमावश्यकम् । एवञ्च एतदपेक्षया तादृशानुमित्युत्पत्त्यनधिकरणसमयोत्पत्तिकध्वंसप्रतियोगिक्षणवृत्तित्वविशिष्टत्वेन प्रतिबन्धकत्वमेवोचितम्, अनुमित्युत्पत्त्यनधिकरणसमयस्य क्षणत्वेनानिवेशेऽपि क्षतिविरहात् । अनुमित्युत्पत्त्यनधिकरणस्थूलकालोत्पन्नध्वंसप्रतियोगित्वस्यानुमित्यव्यवहितपूर्वक्षणभिन्नक्षण एव सत्त्वात् । चरमक्षणत्वनिवेशनञ्च उभयत्रैवावश्यकम् ।

अनुमित्यव्यवहितप्राक्क्षणेऽपि तदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वानाधिकरणमहाकालादिवृत्तित्वविशिष्टसत्त्वेनानुमित्युत्पत्त्यनधिकरणसमयोत्पन्नध्वंसप्रतियोगिस्थूलकालविशेषवृत्तित्वविशिष्टसत्त्वेन चानुमितिमात्रानुत्पत्तेरित्याशयेनाह । स्वसमानाधिकरणेति । यदि च पूर्वकल्पे क्षणत्वानिवेशेऽनुमित्युत्पत्त्युपलक्षितकालोत्पत्तिकत्वनिवेशन एवान्यकालावच्छेदेनानुमित्युत्पत्त्यधिकरणमहाकालाद्युत्पत्तिकध्वंसमादायातिप्रसङ्गः, न तु तदुत्पत्तिविशिष्टसमयोत्पत्तिकत्वनिवेशे, तथा च क्षणत्वमुत्पत्त्यधिकरणकाले न निवेश्यमेवेत्युच्यते तथाऽपि उपलक्षितोत्पत्तिकत्वापेक्षया तदुत्पत्तिकत्वविशिष्टोत्पत्तिकत्वस्य गुरुशरीरतयैव कल्पान्तरानुसरणसङ्गतिः ।

न चैतत्कल्पेऽप्यनुमित्युत्पत्त्यभावविशिष्टसमयोत्पत्तिकत्वमेव ध्वंसे निवेश्यम्, अनुमित्युत्पत्त्यधिकरणभिन्नोत्पत्तिकत्वनिवेशे यत्रानु-

मित्यात्मकपरामर्शानन्तरजातानुमित्यन्तरेच्छाबलात् पुनरनुमितिः तत्रानुमित्सोत्पादकालस्य तत्पूर्वं परतो वाऽवस्थानावश्यकतयाऽनुमित्युत्पत्त्यधिकरणत्वनियमेन प्रथमानुमित्युत्पत्तिक्षणस्यानुमित्युत्पत्त्यनधिकरणसमयोत्पन्नध्वंसप्रतियोगितायाः दुर्घटतयाऽनुमित्सोत्पत्तिकालेऽनुमित्यापत्तेः । अनुमित्युत्पत्त्यभावोपलक्षितसमयोत्पत्तिकत्वनिवेशेऽनुमित्यव्यवहितप्राक्क्षणस्यापि तदुत्पत्त्यभावाधिकरणस्थूलकालोत्पत्तिकध्वंसप्रतियोगितया तद्वृत्तिपरामर्शादेरनुमितिविरोधितापत्तेः, तथा च सामग्र्यमिति वाच्यम् । क्षणिकक्षणाभ्युपगमेऽनुमित्युत्पत्त्यनधिकरणत्वोपलक्षितसमयोत्पत्तिकत्वनिवेशेऽपि दर्शितस्थलेऽनुमित्सोत्पत्तिक्षणस्यानुमित्युत्पादानधिकरणतयोक्तदोषानवकाशेन तत्कल्पे लाघवसम्भवात् । अनुमित्यनधिकरणत्वस्य समयविशेषणत्वेऽनुमित्युत्पत्तिक्षणस्याप्यनुमित्यधिकरणसमयविशेषं प्रत्येवाव्यवहितपूर्वतया तदुत्तरमनुमित्यापत्तिरतस्तदुत्पत्त्यनधिकरणत्वपर्यन्तनिवेशः ।

समयाव्यवहितपूर्वत्वं समयोत्पत्तिध्वंसप्रतियोगित्वमेव न तु वक्ष्यमाणतदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वम्, तदुत्पत्तिक्षणनिवेशे प्रयोजनाभावात् । प्रागभावानभ्युपगन्तृनये तदुत्पत्तिकालीनध्वंसप्रतियोगित्वं तत्पूर्वत्वम् । तथा च तदुत्पत्तिकालीनध्वंसप्रतियोगिकालवृत्तिध्वंसाप्रतियोगित्वरूपाव्यवहितत्वस्य स्वातन्त्र्येण निवेशनमफलम्, तदुत्पत्तिकालीनत्वस्थले तदुत्पत्तिकालोत्पत्तिकत्वनिवेशन एव व्यवहितपूर्वकालवारणसम्भवादित्याशयेनानुमित्यव्यवहितपूर्वत्वमनुमित्युत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वरूपमेव वाच्यमित्याह । तदव्यवहितेति । अनुमितिस्थितिकालोत्पन्नध्वंसप्रतियोगित्वमनुमित्युत्पत्तिक्षणसाधारणमतस्तद्वृत्तित्वविशिष्टस्य विरोधित्वोपपत्तये प्रथमोत्पत्तिनिवेशः । उत्पत्तिविशिष्टोत्पत्तिकत्वनिवेशे तल्लाभायैव क्षणपदम् ।

(दी०) न चात्र प्रथमे यत्र सिद्ध्यात्मकपरामर्शानन्तरं सिषाधयिषाया उत्पत्तिकाले तत्पुरुषीयस्य कस्यापि धर्मस्य न विनाशोऽनन्तरं पुनरनुमितिः, तत्र तदुत्पत्तिसमयेऽपि सा स्यात्, तत्पूर्वकालीनानां सर्वेषां तादृशपूर्ववर्त्तित्वेन अविरोधि-

त्वादिति वाच्यम् । अनवरतपरिस्पन्दमानापरिमितपवनादि-परमाणुचेतनसंयोगसन्तानान्तःपातिव्यक्तीनामविरतमेवोपरमात्, फलानुत्पादबलेनापि तादृशकल्पनासम्भवात्, कारणान्तरकल्पने गौरवाच्च अन्वयव्यभिचारसन्देहस्य च कारणत्वग्रहाविरोधित्वात् ।

(गा०) द्वितीयकल्पानुसरणबीजीभूतप्रथमकल्पदोषं कथञ्चिदुद्धर्त्तुमाशङ्कते । न चात्रेति । सिषाधयिषोत्पत्तिकाले कस्यचित्तदात्मधर्मस्य नाशे तस्यैवानुमितिपूर्ववर्त्तिभिन्नत्वेन विरोधितया न सिषाधयिषोत्पादकालेऽनुमित्युत्पत्तिसम्भव इति तदविनाशस्थलानुधावनम् । अन्यदीयधर्मनाशेऽपि तेन धर्मेणाप्रत्यासन्नतया अन्यदीयानुमितिप्रतिबन्धासम्भवात्तत्पुरुषीयस्येत्युक्तम् ।

यद्यपि परामर्शानन्तरं सिषाधयिषोत्पादस्थले परामर्शाव्यवहितक्षणे फलेच्छा अवश्यमेव स्वीकार्या, तथा च तस्या एव सिषाधयिषोत्पत्तिकाले अवश्यं विनाशस्तथाप्यपेक्षाबुद्ध्यात्मकफलज्ञानात् यदि परामर्शोत्पत्तिकाले फलेच्छा स्वीक्रियते, तदा परामर्शोत्पत्तिद्वितीयक्षणे न आत्मधर्मविनाशः सम्भवतीत्यभिप्रायेणेदम् । अनुमितौ सुखत्वभ्रमदशायां फलान्तरेच्छामन्तरेणैव सुखत्वप्रकारेणानुमित्सा सम्भवतीत्यभिप्रायेण वा ।

सिषाधयिषानन्तरमनुमित्यनुत्पादे तत्पूर्वोत्पन्नपरामर्शादेरेवानुमित्यव्यवहितपूर्ववर्त्तिभिन्नतया विरोधित्वेनापत्त्यसम्भव इत्यतोऽनन्तरमनुमितिरित्युक्तम् । अनवरतेति । अनवरतपरिस्पन्दमानानामपरिमितपवनादिपरमाणूनां चेतनेनात्मना सह यः संयोगसन्तानः संयोगधारा, तदन्तर्गतव्यक्तीनां प्रतिक्षणमेव नाशादित्यर्थः । अपरिमितानामपि घटादीनामिव स्थिरत्वे, सदागतिस्वभावानामपि एकद्व्यादिरूपत्वे प्रतिक्षणं न संयोगोत्पादविनाशसम्भव इत्यपरिमितान्तम् । प्रतिक्षणमात्मसमवेतसंयोगादिनाशस्य सम्भवेऽपि न प्रामाणिकतेत्याशङ्क्याह । फलानुत्पादेति । कल्पनासम्भवादिति । अनुमित्युत्पत्तेरुक्तकारणसत्त्वस्यावश्यकतया तदनुत्पादस्य तादृशसंयोगादिनाशमन्तरेणानुपपद्यमानत्वादिति भावः ।

ननु तत्रानुमित्यनुत्पादनिर्वाहाय सिद्ध्यभावादिरूपकारणान्तरमेव कल्प्यतां तद्विरहेणापि तत्र तदुपपत्तेरित्यत आह । कारणान्तरेति ।

ननु अनुमितिपूर्ववर्त्तिभिन्नत्वावच्छिन्नाभावस्य कारणतासिद्धौ उक्तस्थलेऽनुमित्यनुत्पादनिर्वाहाय तादृशकारणाभावोपपादकसंयोगादिविनाशः कल्पनीयः । प्रथमञ्च तादृशग्रह एव न सम्भवति उक्तस्थले तदानीं तादृशाभावरूपकारणसत्त्वस्य सन्दिग्धतया अन्वयव्यभिचारसन्देहादित्यत आह । अन्वयव्यभिचारेति । कारणत्वग्रहाविरोधित्वादिति । कारणतायाः कार्यव्यापकतागर्भाया ग्रहे ग्राह्याभावावगाहितया व्यतिरेकव्यभिचारग्रहस्यैव विरोधित्वात्, सामग्रीनिष्ठकार्यव्याप्तेश्च कार्यकारणभावाघटकतया तादृशव्याप्तिविरोध्यन्वयव्यभिचारग्रहस्य कार्यकारणभावग्रहविरोधित्वे मानाभावादिति भावः ।

(दी०) उपादीयन्तां वा तत्तदात्मसमयविशेषसम्बन्धा एव तादृशपूर्ववर्त्तिभिन्नाः । भवेद्वा तत्तत्पुरुषीयानुमितिं प्रति तत्तदीयानुमित्यव्यवहितपूर्वक्षणत्वादिना तादृशक्षणवर्त्तित्वविशिष्टत्वादिना वा कारणत्वम् । तथा च उपमानादेः प्रमाणान्तरत्वं भज्येत सर्वत्र अनुमितिसामग्रीसम्भवात् । विलीयेत च परामर्शत्वादिना कारणत्वम् बाधत्वादिना च प्रतिबन्धकत्वम् । अनयैव रीत्या कार्यान्तरेष्वपि क्लृप्तानां कारणानां प्रतिबन्धकानाञ्च अतथात्वप्रक्लृप्तानाञ्च तथात्वं प्रभज्येत । अत एव न न द्वितीयोऽपि प्रकारः वैयर्थ्याच्च सिद्धेः ।

(गा०) ननु प्रतिक्षणमात्मनि संयोगादिविनाशेऽपि यत्र दर्शितस्थले सिद्धिरनुमितिरूपा तत्र तद्वितीयक्षणविनष्टसंयोगादेरनुमितिपूर्वमपि सत्त्वेनाविरोधितया उक्तापत्तिस्तदवस्थैवेत्यत आह । उपादीयन्तामिति । प्रतिबन्धकतया स्वीक्रियन्तामित्यर्थः । समयविशेषः । यदा तत्रात्मनि अनुमितिर्नोत्पद्यते तत्क्षणाव्यवहितपूर्वक्षणरूपः । तत्सम्बन्धस्यानुमित्यव्यवहितपूर्वमभावात् । एवं सति प्र-

तिबन्धकता स्वरूपसम्बन्धेनैव वाच्या । सर्वत्र क्षणविशेषसम्बन्धस्यैव प्रतिबन्धकतासम्भवेन सिद्ध्यादिसाधारण्यविरहेऽपि क्षतिविरहात् । क्षणसम्बन्धस्य स्वरूपातिरिक्तत्वमभ्युपेत्येदम् । अनतिरिक्तत्वाभिप्रायेणानुगतेन भेदकूटाघटितलघुरूपान्तरेण कारणतां प्रसञ्जयति । भवेद्धेति । एकपुरुषीयानुमित्युत्पादक्षणे सर्वात्मन्यनुमित्यापत्तेर्वारणाय तत्तत्पुरुषीयत्वनिवेशः । क्षणस्य कारणता च यदा तादृशक्षणः तदुत्तरं कार्यमिति कालिकप्रत्यासत्त्या बोध्या । परामर्शसाधारण्यानुरोधेनाह । तादृशेति । तदीयानुमित्यव्यवहितपूर्ववर्त्तीत्यर्थः ।

यद्यप्यत्र पूर्वोपदर्शितस्वसामानाधिकरण्यस्यानुमितिविशेषणतयाप्यतिप्रसङ्गः शक्यवारणस्तथापि तत्र स्वत्वान्तर्भावेनाननुगममाशङ्क्य तत्पुरुषीयत्वघटितैतत्कल्पानुसरणं बोध्यम् ।

न चैवं पुरुषभेदेन कारणताभेदात् सामानाधिकरण्यप्रत्यासत्त्या लिङ्गपरामर्शत्वासिद्ध्यभावत्वादिना कारणताकल्पनमेवोचितमिति वाच्यम् । लिङ्गपरामर्शादेरपि लिङ्गादिभेदेन कारणताभेदस्याऽऽवश्यकत्वात् पुरुषापेक्षया लिङ्गादीनामेव भूयस्त्वात् ।

उक्तरूपेण कारणतास्वीकारे अनिष्टं प्रदर्शयति । तथा चेति । उपमानादेरित्यादिना शब्दपरिग्रहः । प्रमाणान्तरत्वम् । अनुमितिबहिर्भूतप्रमाणत्वम् । सर्वत्रैवेति । उपमानादिस्थले लिङ्गपरामर्शादिघटितानुमितिसामग्र्यनियमात् तत्र प्रमित्यन्तरमुपेयते अत उपमानादेः प्रमाणान्तरता अनुमित्युत्पत्तिमात्रनिर्वाह्यस्य उक्तकारणस्यानुमितिसामग्रीत्वे तु तस्याः सर्वत्रैव सम्भवेनोपमित्यादिरूपविलक्षणप्रमितेरेवासिद्ध्यापत्तेरिति भावः ।

ननु सर्वत्रैकजातीयप्रमितिसामग्रीसम्भवेऽपि उपमिनोमि शाब्दयामि अनुमिनोमीत्यनुभवसाक्षिकं प्रमितिवैलक्षण्यं दुरपह्नवमेवेति नोपमानादेः प्रमाणान्तरताभङ्ग इत्यतोऽन्यदोषमाह । विलीयेतेति । उक्तरूपेण परामर्शादेरपि कारणत्वात् परामर्शत्वादिनेति । अनुमित्यव्यवहितपूर्ववर्त्तिभिन्नत्वादिना बाधादेरपि प्रतिबन्धकत्वात् बाधत्वादिनेति । कार्यान्तरेषु । प्रत्यक्षादिषु । कारणानाम् । सर्ववादिसिद्धकारणतावच्छेदकेन्द्रियसन्निकर्षत्वाद्यवच्छिन्नानाम् । प्रतिबन्धकानाम् । सर्वसम्मतप्रतिबन्धकतावच्छेदकदोषविशेषत्वाद्यवच्छि-

ज्ञानाम् । अतथात्वम् । अकारणत्वमप्रतिबन्धकत्वञ्च । अक्लृप्तानाम् । अकारणत्वादिना सर्वानुमतानां कार्याव्यवहितपूर्ववर्त्तितद्भिन्नाना-मुदासीनवस्तूनाम् । तथात्वम् । कारणत्वादिकम् । प्रसज्येत । ते-षामप्युक्तकारणतावच्छेदकादिरूपाक्रान्तत्वादिति भावः ।

अत एवेति । अनुमित्यव्यवहितपूर्ववर्त्तिसिद्धिभिन्नसिद्धीनां तत्तद्व्यक्तित्वावच्छिन्नाभावस्य हेतुत्वेऽनन्तकारणताप्रसङ्गात्, तादृश-सिद्धिभिन्नसिद्धित्वावच्छिन्नाभावहेतुत्वे तस्यानुमित्युत्पत्त्यधीनतया अन्योन्याश्रयात्, तत्तत्सिद्धिभेदकूटवत्सिद्धित्वावच्छिन्नाभावहेतु-त्वे भेदानां विशेष्यविशेषणभावे विनिगमनाविरहादेवेत्यर्थः । एत-न्मते अधिकदूषणमाह । वैयर्थ्याच्चेति । अनुमित्यव्यवहितपूर्ववर्त्तिभि-न्नत्वावच्छिन्नाभावस्यैव कारणत्वसम्भवात्, बाधबुद्ध्यादेरभावस्य परामर्शादेश्च कारणतान्तरताविलयप्रसङ्गस्येष्टत्वादिति भावः । एत-न्मते इव दर्शिततृतीयक्षणसाधारणाव्यवहितोत्तरत्वघटितस्वक्षणा-व्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नसिद्ध्यभावरूपपक्षतापक्षेऽपि पूर्वोक्तसिद्धिपदव्यावृत्त्यसङ्गतेस्तद्वैयर्थ्यं बोध्यम् ।

न च ज्ञानेच्छयोर्यौगपद्ये सिषाधयिषाकालोत्पन्नानुमितिपूर्वव-र्त्तिपरामर्शादेः सिषाधयिषाविरहविशिष्टाव्यवहितोत्तरक्षणोत्पन्ना-नुमितिकभिन्नतया पूर्वं सिषाधयिषाविरहविशिष्टतया चानुमितिवि-रोधिता स्यादिति तत्सार्थकता इति वाच्यम् । ज्ञानेच्छयोर्यौगपद्ये सिद्ध्युपादानेऽपि यत्र पूर्वोत्पन्नसिषाधयिषाचतुर्थक्षणे सिद्ध्यनन्तरं पुनः सिषाधयिषा अनुमितिश्च युगपत्तत्र सिद्धिविरोधितापत्तेर्दु-र्वारत्वात् ।

न च तत्र सिद्ध्यनुपादाने सिषाधयिषाविरहविशेषणस्यापि वै-यर्थ्यमापतितं यत्र क्रमेण सिद्धिसिषाधयिषानुमितयस्तत्र सिद्धेर-नुमित्यविरोधित्वेऽपि सिषाधयिषोत्पत्तिकालविनष्टफलेच्छादीनां विरोधितयैव सिषाधयिषोत्पत्तिक्षणेऽनुमितिवारणसम्भवादिति वा-च्यम् । सिद्धेरनुमितिरूपत्वे इच्छाकालविनष्टफलेच्छादेरनुमित्यव्य-वहितपूर्ववर्त्तितया विरोधित्वासम्भवादिति ।

(दी०) सिषाधयिषाविरहविशिष्टस्य सिद्ध्यनुमानाति-रिक्तसाधकमानयोरन्यतरस्याभावः कारणमिति तु केचित्तन्न ।

साधकं हि मानं सिद्धिस्वरूपयोग्यं तदुपहितं तत्सामग्री वा ? नाद्यः, चक्षुरादिसत्त्वे विनाऽनुमित्सामनुमित्यभावप्रसङ्गात् । न द्वितीयः, सिद्धेः पूर्वं तदुपहितत्वाभावेन प्रत्यक्षसामग्रीसत्त्वेऽप्यनुमित्यापत्तेः, अनुमानातिरिक्तेत्यस्य वैयर्थ्याच्च । न तृतीयः, अनुमितिसामग्र्यभावत्वेन प्रत्यक्षकारणत्वम् अनुमित्साविरहविशिष्टप्रत्यक्षसामग्र्यभावत्वेन चानुमितिकारणत्वमित्यन्योन्याश्रयात् । स्थाणुत्वाभावव्याप्यदर्शनक्षणे प्रतियोग्यारोपविरहेणाभावप्रत्यक्षसामग्रीविरहात् पक्षतासत्त्वे स्थाणुत्वारोपक्षणे तदभावानुमित्यापत्तेरित्यपि कश्चित् ।

(गा०) समानविषयकप्रत्यक्षसामग्रीकाले पक्षताविरहेणानुमितिं वारयतो मूलस्थसाधकमानपदं सिद्धिसाधकमानविशेषान्यतरपरतया वर्णयत उपाध्यायस्य मतमाह । सिषाधयिषेति ।

सिद्धाविव साधकमानेऽपि अनुमित्साया उत्तेजकत्वात् प्रत्येकं तदभावविशेषणत्वे गौरवमित्यन्यतरत्वावच्छिन्ने सकृद्विशेषणतालाभाय समास उपेक्षितः । अनुमितिपूर्वमनुमानरूपस्यैव साधकमानस्य नियमेन सत्त्वात् सिषाधयिषां विना कदाऽप्यनुमितिर्न स्यादित्यनुमानातिरिक्तत्वं साधकमानविशेषणम्, साधकमानपदार्थघटकसिद्ध्यनुमित्यन्यत्वविशेषणं पर्यवसितम, इदञ्च लाघवमाशङ्क्याग्रे निराकार्यम् । साधकमानपदार्थं वितर्क्य दूषयति । साधकं हीति । तदुपहितम् । स्वजन्यसिद्धिविशिष्टम् । तत्सामग्री । सिद्धेः कारणसमुदायः । अनुमित्सासत्त्वे तदभावविशिष्टसाधकमानाभावस्याक्षतत्वाद्विनाऽनुमित्सामिति । अनुमित्यभावप्रसङ्गादिति । कालिकप्रत्यासत्त्या प्रतिबन्धकत्वाभिप्रायेण । समवायेन प्रतिबन्धकत्वे आत्मनि सर्वदैव चक्षुरादिप्रमाणाभावादतिप्रसङ्गो बोध्यः । प्रत्यक्षसामग्रीसत्त्वे अनुत्पन्ने प्रत्यक्ष इति शेषः ।

ननु तत्रानुमितिवारणायान्यस्यैव प्रतिबन्धकमास्थेयं सिद्ध्यभावपक्षतामतेऽपि तदावश्यकत्वादित्यत आह । अनुमानातिरिक्तेति । तथा सति पक्षताशरीरेऽनुमानातिरिक्तसाधकमानान्तर्भावस्य निष्फल-

त्वादित्यर्थः । सिद्ध्यसमवहितप्रत्यक्षादिसामग्रीदशायां अनुमितिवारणस्यैव तत्फलत्वात्, साधकमानपदेन सिद्ध्युपहितविवक्षणे च तदनिर्वाहादिति भावः ।

केचित्तु यथाश्रुतानुरोधेनानुमानातिरिक्तेति तन्मात्रपरमेव ।

न च सामग्र्याः पृथक् प्रतिबन्धकत्वे साधकमानपदार्थस्य सिद्ध्युपहितस्यापि निवेशनमफलमेवेति वाच्यम् । यत्र विषये प्रत्यक्षादृग्युपहितसन्निकर्षादिघटितप्रत्यक्षादिसामग्रीदशायामेव परामर्शादिसमवधानं तत्रानुमितिवारणाय तादृशसाधकमानस्यैव पक्षतायां निवेशयितुमुचितत्वात् ।

न च तत्रापि सिद्धिप्रतिबन्धकतयैव उपपत्तौ सिद्ध्युपहितनिवेशनमफलमिति वाच्यम । शाब्दसिद्धिकाले अशाब्दं ज्ञानं जायतामितीच्छाबलादनुमित्युपपत्तये सिद्धौ तादृशेच्छाया अवश्यमुत्तेजकत्वोपगमात् । तथाविधेच्छाबलादुपदर्शितप्रत्यक्षसामग्र्यनन्तरमनुमितेर्वारणाय साधकमानान्तर्भावसार्थक्यात् ।

न च सिद्ध्युपहितचक्षुःसंयोगादिसत्त्वे आलोकसमवधानासत्त्वे तादृशेच्छाबलात् अनुमित्युत्पत्त्या साधकमानेऽपि तादृशेच्छाया उत्तेजकताया आवश्यकत्वात् पक्षतायां तदन्तर्भावेऽपि उक्तापत्तिवारणासम्भव इति वाच्यम् । यत्र प्रत्यक्षोपहितचक्षुःसंयोगादिसत्त्वे इतरकारणसमुदायसत्त्वे एवाशाब्दं ज्ञानं जायतामितीच्छा न तु इतरकारणाभावविशिष्टचक्षुःसंयोगादिसत्त्वे तत्र तादृशेच्छाभावस्य प्रत्यक्षोपहितचक्षुःसंयोगादिरूपसाधकमानविशेषणत्वानुपगमात् तादृशविषयविशेषीयपक्षतायामेव तथाविधसाधकमानान्तर्भावस्य सार्थकत्वादित्याहुः ।

अनुमितिसामग्र्यभावत्वेन प्रत्यक्षकारणत्वमिति । अन्यथा अनुमित्साधीनानुमित्युत्पत्तिकाले प्रत्यक्षापत्तेरिति भावः । प्रत्यक्षसामग्र्यभावत्वेन । सिद्धिप्रत्यक्षसामग्र्यन्यतराभावत्वेन । अन्योन्याश्रयादिति । अनुमितिसामग्र्यभावं प्रत्यक्षकारणकलापान्तर्गतमज्ञात्वा प्रत्यक्षसामग्र्या अज्ञानात् तदज्ञाने च तदभावघटितानुमितिसामग्र्या अज्ञानात् तदभावादिज्ञानाभावादिति भावः ।

अथ वा कारणसमुदायत्वेन सामग्र्या निवेशे समुदायभेदस्य प्रत्येकं सकलकारणेष्वेव सत्त्वात् व्यासज्यवृत्तिधर्मावच्छिन्नानुयो-

गिताकाभावानुगमे सामग्र्यां(१) सामग्रीभिन्नभिन्नत्वं दुर्घटमिति कार्याव्यवहितप्राक्क्षणावच्छिन्नत्वेनैव सा निवेश्या, अव्याप्यवृत्तिधर्मावच्छिन्नभेदस्याव्याप्यवृत्तितामभ्युपेत्य अन्यदा कार्याव्यवहितपूर्वक्षणावच्छिन्नभेदवत्त्व, कार्याव्यवहितप्राक्क्षणे च तादृशभेदावच्छिन्नभेदवत्त्वं फलोपधायकस्योपपादनीयम्। तथा च परामर्शसत्त्वे प्रत्यक्षोत्पत्तिकालेऽनुमित्यनुत्पादः प्रत्यक्षात्पादनिर्वाह्यः उक्तानुमितिप्रतिबन्धकत्वस्य प्रत्यक्षोत्पत्तिमन्तरेणानिर्वाहात् प्रत्यक्षोत्पत्तिरपि अनुमित्यनुत्पादमपेक्षते, तदुत्पादे अनुमित्यव्यवहितप्राक्क्षणावच्छिन्नस्य प्रत्यक्षप्रतिबन्धकस्यावश्यं सत्त्वादित्यन्योन्याश्रय इति भावः।

अत्रैव कल्पे अन्येषां दूषणमुपन्यस्यति स्थाणुत्वाभावेति।

स्वोक्तदोषस्याप्येतदनुमततया चकारसङ्गतिः (२) यत्र विशेषदर्शनानन्तरक्षणजातप्रतियोग्यारोपात् स्थाणुत्वाद्यभावप्रत्यक्षं तत्रेत्यादिः। तदभावानुमित्यापत्तेः। स्थाणुत्वाभावानुमित्यापत्तेः। तथा चानुमित्यन्यासिद्धिसामग्र्यभावस्य कार्यकालवृत्तितया पृथगेव कारणत्वमावश्यकमिति भावः।

न च प्रतियोग्यारोपस्याभावप्रत्यक्षकारणतामते यत्र विशेषदर्शनकाले तत्पूर्वं वा प्रतियोग्यारोपस्तत्रैव विशेषदर्शनाधीनमभावप्रत्यक्षं न तु विशेषदर्शनोत्तरप्रतियोग्यारोपानन्तरमिति वाच्यम्। प्रतियोग्यारोपस्याहेतुतामते विशेषदर्शनपर्यन्तं प्रतियोग्यारोपानुत्पादस्थले विशेषदर्शनोत्तरमभावप्रत्यक्षोत्पत्त्या फलसाम्याय तद्धेतुतामतेऽपि क्षणैकव्याजेनाभावप्रत्यक्षस्वीकारस्याऽऽवश्यकत्वेत्याशयात्।

न च विशेषदर्शनानन्तरमाहार्य एव प्रतियोग्यारोपो भविष्यति तत्सामग्र्याश्चेच्छाघटिताया बलवत्त्वान्नोक्तस्थलेऽनुमित्यापत्तिरिति वाच्यम्। धर्मितावच्छेदकसामानाधिकरण्यमात्रावगाहिविशेषदर्शनोत्तरमिच्छां विनैव प्रतियोग्यारोपसम्भवात्(३)। प्रतियो-

---

(१) "सामग्र्या" मिति पाठोऽन्यस्मिन् पुस्तके नास्ति।

(२) दीधितौ "इत्यपि" इत्यत्र "इति च" इति पाठः क्वचित् पुस्तके स्यादिति भाति।

(३) "न च प्रतियोग्यारोपस्ये" त्यादिः "प्रतियोग्यारोपसम्भवा" दित्यन्तः पाठस्तु सर्वस्मिन् पुस्तके न दृश्यते।

ग्यारोपकारणतायाः स्वासम्मततया "केचिदिति" (१)।

(दी०) वस्तुतस्तु स्वतन्त्रान्वयव्यतिरेकशालित्वान्नियमेन प्रथमोपस्थितत्वाल्लाघवाच्च प्रत्येकमेव तथात्वमन्यथा बाधादेरपि अत्रैवान्तर्भावप्रसङ्गात्, न चानुमित्साविरहस्य प्रत्येकविशेषणत्वे गौरवं शाब्दसिद्धौ सत्यामशाब्दं ज्ञानं जायतामितीच्छायामनुमितेरुत्पादात् सिद्धावनुमितिविषयकेच्छाविरहस्य, प्रत्यक्षसामग्रीसत्त्वे च तादृशेच्छायामप्यनुमित्यनुत्पादात् साधकमाने अनुमितित्वादिप्रकारकेच्छाविरहस्य पृथगेव विशेषणतायास्त्वयाऽपि वाच्यत्वात् ।

(गा०) ननु पक्षताघटकप्रत्यक्षसामग्री नानुमितिसामग्र्यभावघटितकारणसमुदायरूपा, अपि तु तदतिरिक्ता प्रत्यक्षासाधारणकारणसमुदायरूपैव वाच्या, अनुमित्साविशिष्टसमानविषयकानुमितिसामग्रीदशायां सिषाधयिषारूपोत्तेजकबलादेवानुमित्युपपत्तेः। एवं प्रत्यक्षं प्रत्यनुमितिसामग्रीप्रतिबन्धकतायामपि निरुक्तपक्षता न निवेश्यते, अपि तु लाघवादनुमित्सावैशिष्ट्यमेव, असत्यामनुमित्सायां समानविषये प्रत्यक्षोत्पत्तेरावश्यकत्वात्तत्सत्त्वे च पक्षताया अपि आवश्यकत्वात् । तथा च न प्रथमोक्तान्योन्याश्रयावकाशः, एवं सामग्र्याः कार्याव्यवहितप्राक्क्षणावच्छिन्नत्वेन प्रतिबन्धकत्वेऽपि समानविषयकप्रत्यक्षं प्रति प्रतिबन्धकतायामनुमित्सावैशिष्ट्यं निवेश्यते। तथा चोक्तस्थले प्रत्यक्षोत्पत्तिर्नानुमित्यनुत्पादमुपजीवति अनुमित्युत्पादेऽप्यनुमित्साविरहेण प्रत्यक्षप्रतिबन्धकासत्त्वात् अपि तु अनुमित्साविरहमेवेति नापरोऽप्यन्योन्याश्रयः। अन्यथा सामग्र्याः पक्षतायामनन्तर्भावेऽपि पृथक् प्रतिबन्धकताया आवश्यकत्वेनानिस्तारादित्यत आह। वस्तुतस्त्विति ।

स्वतन्त्रान्वयव्यतिरेकशालित्वं सिद्धित्वादिरूपप्रत्येकवृत्तिधर्मावच्छेदेन कार्यानुत्पादं प्रत्यन्वयव्यतिरेकानुविधायित्वम् ।

ननु अन्यतरत्वेन प्रतिबन्धकत्वेऽपि तन्नियतसिद्धित्वाद्यवच्छि-

---

(१) दीधितौ "कश्चित्," इत्यस्य स्थाने केचिदित्येव पाठो भट्टाचार्यसम्मत इत्यतः केचिदितीत्युक्तम् ।

[illegible]स्य कार्यानुत्पादान्वयनियतत्वं तदवच्छिन्नव्यतिरेकस्य च कारणान्तरपरामर्शादिसहितस्य कार्योत्पादनियतत्वं सम्भवति इति न तावता सिद्धित्वादिना प्रतिबन्धकतासिद्धिरित्यतो हेत्वन्तरमाह। नियमेनेति। प्रथमोपस्थितत्वात्। प्रत्येकरूपावच्छिन्नस्य तदवच्छिन्नान्यतरत्वापेक्षया प्रथममुपस्थितत्वात्। उपस्थितिलाघवमुक्त्वा शरीरलाघवमाह। लाघवादिति। उक्तरूपद्वयमपेक्ष्य तदुभयघटितस्याधिकभेदादिघटिततया गुरुत्वादिति भावः। प्रत्येकम्। सिद्धित्वादिना। तथात्वम्। प्रतिबन्धकत्वम्। अन्यथा। प्रतिबन्धकत्वैक्यानुरोधेन नानाधर्मावच्छिन्नानां तत्तदवच्छिन्नाभिन्नाभिन्नत्वेन प्रतिबन्धकत्वे। बाधादेरित्यादिना सत्प्रतिपक्षादिग्रहपरिग्रहः। (१) अत्रैव। पक्षतायामेव। अन्तर्भावप्रसङ्गात्। घटकताप्रसङ्गात्। सिद्धिबाधसामग्रीविशेषाद्यन्यतमत्वावच्छिन्नाभावस्य पक्षतात्वप्रसङ्गादिति समुदायार्थः। अन्यथा बाधबुद्ध्याद्यभावस्य कारणतान्तरकल्पनापत्तेरिति भावः।

न च वह्न्यादिनिश्चयाप्रतिबन्ध्यायामपि वह्निमान् पर्वतो घटवानित्याद्यनुमितौ वह्न्यभावादिनिश्चयस्य प्रतिबन्धकतया वह्न्यादिप्रकारताघटितरूपावच्छिन्नं प्रति वह्न्यभावादिनिश्चयस्य प्रतिबन्धकतान्तरकल्पनमावश्यकमिति कथं साध्यतदभावादिनिश्चयानामेकरूपेण प्रतिबन्धकताप्रसक्तिरिति वाच्यम्। वह्न्यादिप्रकारकानुमितौ वह्न्यभावादिनिश्चयस्य पृथक् प्रतिबन्धकत्वेऽपि वह्निमान् पर्वतो घटवान् इत्याद्यनुमितिहेतुपक्षतायामाश्रयासिद्ध्यादिनिश्चयान्तर्भावेणैव तादृशनिश्चयदशायां तथाविधानुमितिवारणसम्भवात्, अवच्छेदकगौरवस्य तावतैवाप्रयोजकीकृतत्वात्।

न च तथाऽपि बाधकाले प्रत्यक्षादेरप्यनुत्पत्त्या विशिष्टबुद्धिसामान्यं प्रति बाधबुद्धेः प्रतिबन्धकतान्तरकल्पनमावश्यकमिति पक्षतायां तदन्तर्भावो निरर्थक इति वाच्यम्। तत्रापि भिन्नविषयकानुमितिसामग्र्यादीनामवश्यकल्पनीयप्रतिबन्धकतायां बाधसाधारणान्यतरत्वादेरवच्छेदकतयैवोपपत्तेर्बाधबुद्धेः सामान्यप्रतिबन्धकत्वासिद्धेः, प्रत्यक्षस्थले इच्छानामुत्तेजकतयापि तदसिद्धेः।

---

(१) स प्रतिपक्षादिपरिग्रह इत्यपि क्वाचित्कः पाठः।

केचित्तु । अत्रैव । ईदृशप्रतिबन्धकतायामेव । प्रतिबन्धकान्तरसाधारणान्यतरत्वावच्छिन्नप्रतिबन्धकतायामेवेति यावत् । अन्तर्भावप्रसङ्गात् । अवच्छेदकघटकताप्रसङ्गात् । तदभाववद्व्याप्यवत्ताज्ञानादिसाधारणान्यतरत्वेनैव बाधादेः प्रतिबन्धकताप्रसङ्गादिति समुदायार्थः । तथा च पक्षतायां बाधान्तर्भावपरत्वाभावाच्चोक्तासङ्गतिरिति व्याचक्षुः ।

कान्तस्तु तदभावनिश्चयदशायां यादृशाङ्कुरविशेषधर्मितावच्छेदककाद्यनुमितेः कारणान्तरविरहादेव नियमतोऽनुत्पादस्तत्साध्यकत्वलाभप्रयोजकोऽयं ग्रन्थ इत्याहुः ।

ननु सिद्धिसामग्रीविशेषयोरुभयोरेवानुमित्साया उत्तेजकतया तयोरनुगतरूपेण प्रतिबन्धकत्वे अनुमित्साविरहस्यान्यतरत्वावच्छिन्ने सकृद्विशेषणतया लाघवम्, अनुमित्साविरहविशिष्टसिद्धिसामग्र्यन्यतरत्वापेक्षया तद्विशिष्टसिद्धित्वतद्विशिष्टसामग्रीत्वयोरेकस्यापि विशेषणस्य द्विधा निवेशेन गौरवात्, अन्यतरत्वघटकांशापेक्षया सिषाधयिषाविरहांशस्य गुरुतायाः स्फुटत्वात् । अत एव बाधाद्यन्तर्भावप्रतिबन्धेऽपि नावकाशः । बाधसिद्धितद्विशेषसामग्र्यन्यतमत्वेन प्रतिबन्धकत्वे अनुगतरूपावच्छिन्नांशे सिषाधयिषाविरहविशेषणतायां सिद्ध्यादिकाल इव बाधकालेऽपि अनुमित्साबलादनुमित्यापत्तेः, सिद्धित्वाद्यवच्छिन्न एव पृथक् तद्विशेषणतया उक्तलाघवानवकाशात् । विशिष्टबुद्धिसामान्ये बाधतदभाववद्व्याप्यवत्ताज्ञानादीनामेकरूपेण प्रतिबन्धकत्वे उक्तदिशा लाघवासम्भवेनावच्छेदकगौरवस्य दुष्परिहरत्वात् ।

न च प्रत्यक्षस्थले बाधबुद्धौ तदभावव्याप्यवत्ताबुद्धौ च इच्छाया उत्तेजकतया तत्रानुगतरूपेण तयोः प्रतिबन्धकत्वे इच्छाविरहस्य सकृद्विशेषणतया लाघवपक्षक्षुण्णमेवेति वाच्यम् । बाधादौ प्रत्यक्षेच्छाया उत्तेजकत्वे नानाप्रतिबन्धकताप्रसङ्गेन तदनभ्युपगमात्, अनाहार्यत्वस्य प्रतिबध्यतावच्छेदकत्वमङ्गीकृत्यैव बाधादिसमये आहार्यप्रत्यक्षस्योपपादनीयत्वादित्याशङ्कां निरस्यति । न चेत्यादिना । गौरवमित्यन्तेनाशङ्का । अनुमितेरुत्पादादिति । प्रत्यक्षसामग्रीसत्त्वेऽनुमित्युत्पत्तेरेव तादृशेच्छाविषयासिद्धेरिति भावः । अनुमितिविषयकेच्छाविरहस्य । अनुमितित्वप्रकारकतादृशेच्छा-

साधारणानुगतरूपावच्छिन्नविरहस्य । तादृशञ्च रूपं प्रागेवावेदितम् । अनुमित्यनुत्पादादिति । प्रत्यक्षोत्पत्त्या तादृशेच्छाविषयसिद्धेरिति भावः । अनुमितित्वादिप्रकारकेच्छाविरहस्य । अनुमितित्वप्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छाविरहस्य । पृथगेव । यथायोगं सिद्धित्वप्रत्यक्षसामग्रीत्वाद्यवच्छिन्न एव ।

(दी०) स्वनिवर्त्तकप्रत्यक्षादिसामग्रीसमवहितान्यत्वादिना च तादृशेच्छयोरनुगमेऽतीव गौरवम्, अन्यतरत्वघटकयोरन्योन्याभावयोर्मिथोविशेषणविशेष्यभावे विनिगमकाभावश्च । आत्मनिष्ठश्च समवायेन सिद्धेरभावः कारणम्, भिन्नभिन्नेन च सम्बन्धेन तत्तदसाधारणकारणरूपायास्तत्सामग्र्याः, मणिविशिष्टस्य वह्नेरिव इतरविशिष्टस्य मनोयोगादेः प्रतिबन्धकत्वायोगात् । तथा च कथमनुगतरूपेण तयोरभावः कारणम् ।

(गा०) ननु अनुमितित्वादिप्रकारकेच्छातत्प्रकारकेच्छानामनुगतरूपावच्छिन्नाभाव एवान्यतरत्वावच्छिन्ने विशेषणं वाच्यम्, प्रत्यक्षादिसामग्रीदशायामुक्तेच्छाबलादनुमितेर्वारणाय चानुमितिभिन्नालौकिकप्रत्यक्षान्यस्वविषयतावच्छेदकावच्छिन्नसामग्रीसमवहितान्यत्वेनेच्छा विशेषणीया । अनुमितिसामग्र्या, उपनीतभानसामग्र्या च समवहिताया इच्छायाः सङ्ग्रहाय भेदद्वयमवच्छिन्नान्तविशेषणम् । अनुमितित्वादिप्रकारिकायाः प्रत्यक्षादिसामग्रीसमवहितेच्छायाः संग्रहायावच्छिन्नान्तम्, एवञ्चोक्तलाघवमक्षुण्णमेवेत्यत आह । स्वनिवर्त्तकेति ।

निवर्त्तकत्वं विषयतया बोध्यम् । अतीव गौरवमिति । अतिगुरुशरीरतादृशेच्छाविशेषणस्याधिकस्य निवेशादिति भावः ।

नन्वेवमपि प्रतिबन्धकतैक्यनिबन्धनं लाघवं दुर्वारमेव, प्रतिबन्धकत्वान्तराकल्पने एकत्रावच्छेदकगौरवस्याकिञ्चित्करत्वात् । अनेकत्र पक्षताहेतुतायाम् एकैकविधवह्न्यभावादिनिश्चयानामन्तर्भावेऽनन्तस्थले अवच्छेदकगौरवात् स्वातन्त्र्येण एकैकप्रतिबन्धकताकल्पनस्योचिततया बाधादेः पक्षतान्तर्भावप्रतिबन्ध्यनवकाशात् । प्रतिबन्धेरनुत्तरत्वाभेत्याशयेनान्यतरत्वेन प्रतिबन्धकत्वमतेऽपि

विनिगमनाविरहेण प्रतिबन्धताद्वयमापादयति । अन्यतरत्वेति । अन्योन्याभावयोः । सिद्धिभेदसामग्रीभेदयोः । तथा च सिद्धिभेदविशिष्टसामग्रीभेदावच्छिन्नभेदः सामग्रीभेदविशिष्टसिद्धिभेदावच्छिन्नभेदश्च विनिगमनाविरहात् प्रतिबन्धकतावच्छेदक इत्यवच्छेदकभेदात् प्रतिबन्धकताभेद आवश्यकः ।

न च तादृशभेदयोः समनियतयोरभेदान्नावच्छेदकभेद इति वाच्यम् । तादृशभेदाभेदेऽपि तस्य सिद्धिभेदविशिष्टसामग्रीभेदावच्छिन्नभेदत्वेन सामग्रीभेदविशिष्टसिद्धिभेदावच्छिन्नभेदत्वेन च विनिगमनाविरहेणावच्छेदकतायाः स्वीकरणीयतया विशिष्टस्यावच्छेदकस्यावश्यं भेदात् ।

न चाखण्डस्य तस्य स्वरूपत एवावच्छेदकतासम्भवादुक्तविशेषणपुरस्कारेण नावच्छेदकत्वमिति कथं विनिगमनाविरह इति वाच्यम् । अभावस्याखण्डत्वेऽपि स्वरूपतोऽवच्छेदकतायाः सिद्धान्तविरुद्धत्वात्, यस्य स्वरूपतो भानं तस्यैव तथाऽवच्छेदकतायाः सिद्धान्तसिद्धत्वात्, विशेषणपुरस्कारेणोपस्थितेऽवच्छेदकत्वग्रहस्य विशेषणावच्छिन्ने अवच्छेदकतावगाहित्वनियमात् स्वरूपतो (१)ऽभासमाने स्वरूपतोऽवच्छेदकत्वस्य प्रमाणेनास्पर्शाच्च ।

न च तद्व्यक्तित्वेनैव भेदस्यावच्छेदकत्वं स्वीकरणीयं न तु स्वरूपतः, तथा च नोपदर्शितविनिगमनाविरहावकाश इति वाच्यम् । भेदनिष्ठतद्व्यक्तित्वस्य भेदस्वरूपातिरिक्तस्य दुर्वचत्वात्, भेदरूपस्य च तस्य स्वरूपतो विशेषणत्वासम्भवात् ।

एतेनाखण्डस्यान्यतरत्वावच्छिन्नाभावस्य तद्व्यक्तित्वेनैव हेतुत्वमित्यपि परास्तम् ।

यत्तु सिद्धिभेदसामग्रीभेदयोः सामानाधिकरण्येन मिथो विशेष्यविशेषणभावापन्नयोर्न भेदप्रतियोगितावच्छेदकत्वं येन विनिगमनाविरहः स्यात्, अपि तु धर्मिविशेषणतापन्नयोरेव व्यासज्यवृत्त्यवच्छेदकत्वं तथाविधयोरेव्यवच्छेदकतापर्याप्तेर्महानसीयवह्निर्नास्तीति प्रतीत्याऽवगाहनादिति, तदपि न । महानसीयवह्निर्नास्तीत्यादिबुद्धौ वह्नित्वाद्येकधर्मितावच्छेदकावच्छिन्न एव महानसीयत्वाद्यपरविशेषणभाननियम इत्येकत्रानेकेषामवच्छेदकत्वे ग्राह्ये ध-

---

(१) किञ्चिद्रूपेण भासमान इत्यपि पुस्तकान्तरे पाठः ।

र्मितावच्छेदकावच्छिन्नविशेषणतापन्नस्यैवावच्छेदकत्वग्रहो न तु धर्मितावच्छेदकावच्छिन्नविशेषणतानापन्नस्यावच्छेदकताग्रह इति नियमेन प्रकृते कस्य धर्मितावच्छेदकतापन्नस्य कस्य वा तदवच्छिन्नविशेषणतापन्नस्यावच्छेदकत्वमित्यत्र विनिगमनाविरहेणावच्छेदकताभेदस्याऽऽवश्यकत्वादवच्छेदकविषयताविलक्षणस्यावच्छेदकताविलक्षणनियतत्वादित्यन्यत्र विस्तरः। अन्यतरत्वेन उभयोरनुगमेऽपि प्रतियोगितावच्छेदकसम्बन्धाननुगमान्न तयोरेकाभावस्य कारणतासम्भव इत्याह। आत्मनिष्ठेति। समवायसम्बन्धावच्छिन्नप्रतियोगिताकाभाव आत्मप्रत्यासन्नतया कारणम्, प्रत्यक्षासाधारणकारणचक्षुःसंयोगादिरूपसामग्र्यास्तु स्वाश्रयसंयुक्तमनःसंयोगादिरूपपरम्परात्मकाभिन्नसम्बन्धावच्छिन्नाभाव आत्मप्रत्यासन्नतया कारणं वाच्यमित्यर्थः। विषयचक्षुःसंयोगादेः समवायेनाभावस्य सर्वदैवात्मनि सत्त्वात्। तादृशाभावकारणताया अतिप्रसङ्गावारकत्वादिति(१) भावः।

ननु विषयचक्षुःसंयोगादेर्न प्रतिबन्धकत्वं स्वीक्रियते येन सम्बन्धाननुगमः स्यात्, किन्तु चक्षुःसंयोगादिविशिष्टस्य मनोयोगस्यैव समवायेन प्रतिबन्धकत्वं वाच्यमित्यत आह। मणीति। वह्नेरित्यनन्तरं प्रकृते इति, पूरणीयम्। प्रतिबन्धकत्वायोगादिति। मनोयोगस्यानुमितावपि हेतुत्वात् कारणस्य प्रतिबन्धकत्वायोगादिति भावः।

यद्यपि कारणस्यापि रूपान्तरेण प्रतिबन्धकत्वे क्षतिविरहः, दाहप्रतिबन्धकत्वे वह्नेः प्रयोजनविरहादेवानिवेशः, प्रकृते तु सम्बन्धैक्यानुरोधादेव मनोयोगादेरनुप्रवेश इत्यकिञ्चित्करमेतत्, तथाऽपि मनोयोगस्याधिकस्य निवेशनीयतया गौरवमेव बाधकं बोध्यम्।

न च सामग्र्याः स्वतन्त्रप्रतिबन्धकतामतेऽप्यात्मनिष्ठतासम्पत्तये चक्षुःसंयोगादेः सम्बन्धतया मनोयोगादिप्रवेशस्याऽऽवश्यकत्वान्नाधिक्यमेतन्मतेऽपि, कालनिष्ठतया सामग्र्यभावहेतुत्वे तत्तत्पुरुषीयत्वनिवेशस्यावश्यकतया गौरवादिति वाच्यम्। तथाऽपि मनोयोगादिसम्बन्धस्याधिकस्य निवेशनीयतया गौरवस्य दुर्वारत्वात्, विषयभेदेन प्रतिबन्धकताभेदाविरहानुरोधेन विषयप्रत्या-

(१) अतिप्रसङ्गबोधकत्वादित्यपि पुस्तकान्तरे पाठः।

सन्नतया चक्षुःसंयोगादिप्रतिबन्धकतापक्षस्यैव स्वतन्त्रसामग्रीप्रतिबन्धकतावादिभिराश्रयणीयतया तत्र मनोयोगादेर्निवेशाभावाच्च । तथा चेति । एवं रीत्या प्रतिबन्धकतावच्छेदकसम्बन्धभेदस्याऽऽवश्यकत्वे च इत्यर्थः ।

(दी०) एवं सिद्धेः सिषाधयिषाविरहेण वैशिष्ट्यमेककालावच्छेदेनैकात्मवृत्तित्वं प्रत्यक्षादिकारणचक्षुःसंयोगादेस्त्वन्यादृशमिति सामग्रीविशेषाभावस्य हेतुत्वेऽपि लाघवात् सिद्ध्यभाव एव पक्षव्यवहारनिमित्तम्, एतदेवाभिसन्धाय प्रवृत्तिनिमित्तमुक्तमिति वक्ष्यति ।

(गा०) पूर्वं प्रतियोगितावच्छेदकभेदेन सिद्धिसामग्रीविशेषणयोः सिषाधयिषाविरहपदार्थयोर्भेदात्तद्विशेषणप्रवेशपार्थक्यं व्यवस्थापितं इदानीं सम्बन्धभेदेन तद्विशेषणताभेदं व्यवस्थापयति । एककालेति । एकक्षणावच्छिन्नमेकात्मसमवेतत्वमित्यर्थः ।

यद्यपि सम्बन्धगर्भे एकक्षणावच्छिन्नत्वानन्तर्भावेऽपि सिषाधयिषाकाले तद्विरहरूपविशेषणाभावाद्विशिष्टाभावोऽक्षत एव ।

न च तत्र कालानन्तर्भावे सिषाधयिषाकालेऽपि सिद्धौ कालान्तरावच्छिन्नतद्विरहवत्यात्मनि वृत्तित्वरूपवैशिष्ट्यं वर्त्तते, अन्यात्मनि घटादौ च तादृशविशेषणसत्त्वे विशिष्टसिद्धिसत्त्वमव्याहतमिति कथं विशिष्टाभावेन वर्त्तितव्यं कालान्तर्भावे तु तादृशकालाभावान्न तदानीं तद्घटितवैशिष्ट्यमिति विशिष्टाभावोऽक्षत इति वाच्यम् । सिषाधयिषाकालस्य तदधिकरणनिष्ठतदभावाधिकरणतानवच्छेदकतया तादृशाधिकरणताघटितसामानाधिकरण्यरूपतदिच्छासमानाधिकरणसिद्धिनिष्ठवैशिष्ट्येऽप्यनवच्छेदकत्वात् तत्तत्कालावच्छेदेन सिद्धिमत्यपि तदिच्छाधिकरणे इच्छाविरहविशिष्टसिद्धिसत्त्वानुपपत्तेः । अन्यथा स्वाधिकरणकालावच्छिन्नत्वस्य स्वाधिकरणवृत्तिताविशेषणत्वेऽपि तत्कालस्याप्यन्याधिकरणावच्छिन्नस्वाधिकरणतया कालविरहप्रयुक्तवैशिष्ट्यविरहस्यानिर्वाहात् । विशेष्यीभूततत्सिद्ध्यधिकरणावच्छिन्नस्वाधिकरणकालत्वेन कालस्य सम्बन्धघटकत्वे चाननुगमादिति । तथापि विभिन्नकाले विशे-

षणविशेष्ययोः सामानाधिकरण्यसत्त्वेऽपि एकक्षणावच्छेदेन सामानाधिकरण्यस्यैव विशिष्टसत्त्वनिर्वाहकत्वमित्येतत्सूचनायैव एककालावच्छिन्नत्वकथनम् ।

केचित्तु कालस्य विशिष्टाभावप्रतियोगितावच्छेदकत्वघटकसम्बन्धाघटकत्वे तदुपलक्षिताभावात्तद्विशिष्टाभाववैलक्षण्यानिर्वाहः, प्रतियोगितावच्छेदकादवैलक्षण्यात् सर्वदा दण्डरहितपुरुषाधिकरणक्षणे दण्डोपलक्षितपुरुषाभावस्य सत्त्वेन पुरुषत्वादिमात्रस्य तत्प्रतियोगितावच्छेदकत्वासम्भवात् तादृशपुरुषान्तरव्यावर्त्तकानुगतधर्मान्तरविरहेण, सत्त्वे वा प्रतियोगिकोटौ तस्याभानेन, प्रतियोगितावच्छेदके तदन्तर्भावासम्भवादित्याहुः । तच्चिन्त्यम् ।

अन्यादृशमिति । स्वाश्रयीभूतात्मन्युक्तपरम्परासम्बन्धेन सम्बद्धत्वरूपमित्यर्थः ।

ननु पक्षताशरीरे प्रत्यक्षादिसामग्र्यनन्तर्भावे तदभावस्यानुमितौ स्वतन्त्रहेतुताकल्पनमावश्यकं, तथा च तस्यैव पक्षपदप्रवृत्तिनिमित्तता स्वीक्रियतां न तु सिद्ध्यभावस्य, तथा च पक्षपदप्रवृत्तिनिमित्तमिदमिति मूलविरोध इत्यत आह । सामग्रीति । हेतुत्वेऽपि । अनुमित्यंसाधारणकारणत्वेऽपि । लाघवात् । लघुशरीरत्वात् ।

(दी०) फलानुपहितसिद्धीच्छाविरहाविशिष्टसिद्ध्यभावापेक्षया बाधाभावस्य लघुत्वेऽपि सिद्धसाधनस्थले पक्षव्यवहारविरहेण तादृशसिद्ध्यभावस्याऽऽवश्यकत्वे बाधाभावो न निविशते गौरवात् । विशिष्टसिद्ध्यभावस्य चाऽऽत्मनिष्ठस्यैवानुमितिहेतुत्वेऽपि तस्य परम्परासम्बन्धादेव पर्वतादौ पक्षव्यवहार इति ध्येयम् ।

(गा०) ननु लाघवस्य पक्षपदप्रवृत्तिनिमित्ततोपष्टम्भकत्वे बाधाभावस्यैव तथात्वमुचितं तत्र सिषाधयिषाविरहाप्रवेशात् , यदि च सिद्धसाधनस्थले पक्षव्यवहारो नास्तीति सिद्ध्यभावस्य तथात्वमुच्यते, तदा बाधदशायामपि तद्विरहात् सोऽपि निविशतामित्यत आह । फलानुपहितेति । स्वविषयसिद्ध्यनुपहितेत्यर्थः । एतच्चाति-

गौरवसूचनाय । सिद्धसाधनस्थले । साध्यनिश्चयदशायाम् । पक्षव्यवहारविरहेण । पक्षव्यवहारविरहस्य सर्ववादिसिद्धत्वेन(१) । गौरवादिति । बाधस्थले पक्षव्यवहारस्य सविवादतया गौरवसहिष्णुताया अन्याय्यत्वादिति भावः ।

ननु समवायसम्बन्धावच्छिन्नसिद्ध्यभावस्यात्मप्रत्यासन्नतयैवानुमितिहेतुतया तस्य पक्षपदप्रवृत्तिनिमित्तत्वे आत्मन्येव पक्षव्यवहारप्रसङ्ग इत्यत आह । विशिष्टेति । सिषाधयिषाविरहविशिष्टेत्यर्थः । एतदभिधानञ्च सिद्धेः पक्षनिष्ठाया उद्देश्यतासम्बन्धेनानुमितिं प्रति प्रतिबन्धकत्वासम्भवप्रदर्शनाय, पर्वते वह्निमनुमिनुयां महानसे वह्निमनुमिनुयामित्याकारिकाणामनुमितीनामेकत्रोत्तेजकत्वेऽतिप्रसङ्गेन पृथगुत्तेजकतया प्रत्येकं कारणताभेदस्याऽऽवश्यकतया आत्मनिष्ठप्रत्यासत्तेरेवोचितत्वात् । अन्यथा पुरुषविशेषाणामन्तर्भावनीयतापत्त्या गौरवात् समानप्रकारिकाया असमानविशेष्यकसिद्धेरनुमितिप्रतिबन्धकतयाऽपि पक्षनिष्ठप्रत्यासत्त्यसम्भवो बोध्यः(२) । परम्परासम्बन्धादिति । स्वप्रतियोगितावच्छेदककोटिप्रविष्टविशेष्यतावच्छेदकवत्त्वरूपादित्यादिः ।

न च सिद्धिकालेऽपि एतादृशसम्बन्धेन पक्षे सिद्ध्यभावो वर्त्ततेऽत्यन्ताभावस्य नित्यत्वादित्यतिप्रसङ्ग इति वाच्यम् । तत्तदात्मवृत्तित्वविशिष्टस्यैव सिद्ध्यभावस्य तादृशसम्बन्धेन तत्पुरुषं प्रति पक्षव्यवहारनियामकत्वात् ।

(दी०) एकस्य पुंसोऽनुमित्सासत्त्वेऽपि अन्यस्य तद्विरहिणः प्रत्यक्षादिसामग्रीसत्त्वेऽनुमित्यनुत्पादात् तत्पुरुषीयानुमितिं प्रति तत्पुरुषीयानुमित्साविरहकालीनतत्पुरुषीयसिद्धिसामग्रीविशेषविरहोऽनन्यगतिकत्वेन हेतुरुपेतव्य इति वदन्ति ।

(गा०) ननु विषयचक्षुःसंयोगादिरूपायाः प्रत्यक्षसामग्र्या आत्मनिष्ठप्रत्यासत्त्या न प्रतिबन्धकतासम्भव उक्तपरम्पराया अति-

(१) पक्षव्यवहारस्य सर्ववाद्यसिद्धत्वेनेत्यपि पुस्तकान्तरे पाठः ।

(२) सामानाधिकरण्येनानुमितौ धर्म्यन्तरविशेष्यकसिद्धेरपि प्रतिबन्धकत्वादिति भावः ।

प्रसक्तत्वात् सम्बन्धत्वे मानाभावाच्च, तथा च यदा तादृशसामग्री तदुत्तरक्षणे नानुमितिरिति कालिकप्रत्यासत्त्यैव प्रतिबन्धकत्वकल्पनीयम्, तथा च पुरुषान्तरीयप्रत्यक्षसामग्र्यापि पुरुषान्तरीयानुमितिप्रतिबन्धः स्यात्, एवं कालिकसम्बन्धावच्छिन्नानुमित्साविरहस्यैव दैशिकसम्बन्धघटितसामानाधिकरण्यसम्बन्धेन सामग्र्यां विशेषणत्वं स्वीकार्यम्, तथा च पुरुषान्तरीयानुमित्साकालीनाया अपि पुरुषान्तरीयप्रत्यक्षसामग्र्यास्तदीयानुमितिप्रतिबन्धकत्वापत्तिरित्याशङ्कां नञ्जुःस्वयमागादौ तत्पुरुषीयत्वमन्तर्भाव्य निराकरोति। एकस्येति।

अनुमित्यनुत्पादादित्यन्तमुपलक्षणम्, अन्यस्य प्रत्यक्षसामग्रीसत्त्वेऽन्यस्य वह्निविरहेणाऽनुमित्युत्पादाच्चेत्यपि द्रष्टव्यम् (१)। तत्पुरुषीयानुमित्सायाः कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य दैशिकसम्बन्धेनाधिकरणं यः कालस्तत्र कालिकसम्बन्धेन वर्त्तमानत्वं कालीनान्तार्थः सामग्रीविशेषणम्।

अथ वा समवायसम्बन्धावच्छिन्नप्रतियोगिताकतदात्मवृत्तित्वविशिष्टाभावावच्छेदकक्षणे कालिकसम्बन्धेन वृत्तित्वमेव तदर्थः। तेन तत्पुरुषीयानुमित्साक्षणस्यापि अन्यदेशावच्छेदेन दैशिकसम्बन्धेन कालिकसम्बन्धावच्छिन्नतदिच्छाभाववत्त्वेऽपि न क्षतिः। तत्पुरुषीयसिद्धिसामग्रीविशेषविरहेति। कालिकसम्बन्धावच्छिन्नप्रतियोगिताकः पक्षनिष्ठतदीयेन्द्रियसन्निकर्षादिविशिष्टसाध्यनिष्ठतदीयेन्द्रियसन्निकर्षादिविरह इत्यर्थः। वैशिष्ट्यमेककालीनत्वमेव। विशेष्यविशेषणभावे विनिगमनाविरहान्नानाकारणताकल्पनमगत्या न दोषाय। यावत्त्वेन तदसाधारणकारणसमुदायस्य प्रतिबन्धकत्वं पुनरनुपादेयमेव यावत्त्वस्य दुर्वचत्वात्। पर्वतो वह्निमानित्याद्यनुमितिसमानविषयचाक्षुषादिसामग्र्याः प्रतिबन्धकतायां रूपादिकं नान्तर्भावनीयं तत्र साध्यपक्षयो रूपादिमत्त्वानियमेन तन्निवेशे प्रयोजनाभावात्, किन्तु पर्वतो द्रव्यवान्, द्रव्यं वह्निमत्, द्रव्यं द्रव्यवदित्याद्यनुमितौ वाय्वादीन्द्रियसन्निकर्षस्यावि-

(१) "अन्यथा प्रत्यक्षसामग्रीसत्त्वे अन्यस्य वह्निरहेणानुमित्युत्पादाच्चेत्यपि द्रष्टव्य"मिति पुस्तकान्तरे पाठः।

रोधितोपपत्तये यथायोग्यं साध्यपक्षादौ रूपादिसत्त्वं निवेशनीयम् ।

अथ प्रतिबन्धकसामग्रीसत्यपि काले तदनधिकरणदेशावच्छेदेन तदभावस्य सौलभ्यादनुमित्यापत्तिः ? न च प्रतिबन्धकसत्तायाः कार्यानुत्पादप्रयोजकत्वात् तत्सत्त्वे कथं कार्योत्पत्ति(१)रिति वाच्यम् । सामग्र्याः कार्योत्पत्तिप्रयोजिकायाः प्रतिबन्धकसत्त्वेऽपि तदभावसत्त्वेनाक्षतत्वे कार्योत्पत्तेर्दुर्वारत्वादिति चेन्न । यादृशकारणताघटकनियमे देशान्तरावच्छेदेन कार्यसमानाधिकरणकारणाभावव्यावर्त्तकं देशभेदानवच्छिन्नत्वमन्यद्वा विशेषणमस्ति तन्निविशते यथा समवायादिसम्बन्धावच्छिन्नसंयोगज्ञानादिनिष्ठकारणताघटकनियमे तदन्यकारणतावच्छेदकावच्छिन्नस्य देशभेदानवच्छिन्नवृत्तिरेवाधिकरणे कार्योत्पत्तिप्रयोजिका उक्तप्रतिबन्धकाभावस्य च कारणता न तादृशी, किञ्चिदवच्छेदेन तत्प्रतिबन्धकसत्त्व एव तत्र कार्यानुत्पत्त्या तादृशाभावे विशेषणप्रवेशे प्रयोजनाभावात्, तथा च देशभेदावच्छिन्नप्रतिबन्धकाभावबलान्नानुमित्यापत्तिः ।

एतेनात्मनि शरीरविशेषावच्छेदेन सिद्ध्यादिरूपप्रतिबन्धकसत्त्वे घटाद्यवच्छिन्नतदभावबलादनुमित्यापत्तिरपि निरस्ता ।

न च सिद्ध्यादिमत्यात्मनि तत्काले घटाद्यवच्छिन्ना या तदभाववृत्तिस्तदन्यदेशभेदानवच्छिन्नतद्वृत्तेरप्रामाणिकतया सिद्ध्यादिसत्त्वेऽप्यनुमित्यनुपपत्तिरिति वाच्यम् । तादृशवृत्त्यनभ्युपगमे सिद्ध्याद्यसत्त्वदशायां तदभावस्यात्मनि दैशिकाव्याप्यवृत्तितायाः सर्वानुभवसिद्धाया अनुपपत्तेः ।

यदि च कायव्यूहस्थले एकत्रात्मनि शरीरान्तरावच्छेदेन सिद्ध्यभावाद्यभावस्य सिद्ध्यादेः सत्त्वेऽपि अन्यशरीरावच्छेदेनानुमित्याद्युत्पत्तिः प्रामाणिकी तदा सिद्ध्याद्यभावनिष्ठकारणताघटकनियमशरीरेऽभावांशे उक्तविशेषणप्रवेशस्याऽऽवश्यकत्वात् घटाद्यवच्छिन्नसिद्ध्यभावबलात् सिद्ध्यादिदशायामनुमित्यापत्तेर्वारणाय गत्यन्तरमेवानुसरणीयमिति दिक् ।

(दी०) अथ सिद्ध्युत्तरानुमितौ सिषाधयिषा हेतुरस्तु ? न चैवं मण्यादिस्थलीयदाहं प्रति उत्तेजकस्य हेतुत्वापत्तिः, उत्ते-

(१) कार्योत्पत्तिरित्यपि पुस्तकान्तरे पाठः ।

जकानामननुगतत्वात्, तावदभावविशिष्टमण्याद्यभावस्य चानुगतत्वादिति चेत्? इहापि दर्शितोऽननुगमः सिषाधयिषायाः।

(गा०) उत्तेजकत्वा(१)भिमतसिषाधयिषाकारणतां स्वीकृत्य सिद्ध्यभावस्य कारणतामाक्षिपति अथेत्यादिना, चेदित्यन्तेन।

एतावतैव विना सिषाधयिषां सिद्ध्यनन्तरमनुमितिवारणसम्भवादिति भावः। प्रतिबन्धमाशङ्कते। न चैवमिति। उत्तेजकस्य। मन्त्रौषधिविशेषादेः। प्रतिबध्यमुद्धरति। उत्तेजकानामिति। मण्यादिस्थलीयोत्तेजकमन्त्रौषधिविशेषादीनामित्यर्थः। अननुगतत्वादिति। तथा चानुगतकार्यं प्रति व्यभिचारेण कारणत्वासम्भवादिति भावः। इहापि। सिद्धिस्थलेऽपि। दर्शित इति। यादृशयादृशेच्छासत्त्व इत्यादिनेत्यादिः। सिषाधयिषाया इति। उत्तेजकीभूताया इत्यादिः। तथा च तुल्ययुक्त्या उत्तेजकाभावकूटविशिष्टायाः सिद्धेरभाव एव दाहादौ मण्याद्यभाववद्धेतुर्भविष्यतीति भावः।

(दी०) सिद्ध्युत्तरानुमितित्वञ्च अनुगतानतिप्रसक्तं दुर्वचम्, सिद्धिस्थितिकालीनां स्वेतरसिद्धिकालीनां वाऽनुमितिं प्रति हेतुत्वकल्पने च विनाऽपि सिषाधयिषां सिद्धिनाशकालेऽनुमित्युत्पादो दुर्वारः, एकस्य च पुंसः सिद्धिसत्त्वेऽन्यस्य सिषाधयिषाशून्यस्यानुमित्यनुत्पादप्रसङ्गः, तत्तत्पुरुषीयतादृशानुमितिं प्रति तत्तत्पुरुषीयसिषाधयिषाया हेतुत्वेऽनन्तकार्यकारणभावप्रसङ्गः। अपि च सिद्धौ सत्यां विनाऽपि सिषाधयिषां सामान्यसामग्रीतोऽनुमितिसामान्योत्पत्तिप्रसङ्गात्।

(गा०) ननु तावदभावकूटविशिष्टसाध्यनिश्चयाभावत्वापेक्षया लघीयसा अन्ततस्तावदन्यतमत्वेनैवा(२)नुगमः सम्भवति सिषाधयिषाणामित्यत आह। सिद्ध्युत्तरानुमितित्वञ्चेति।

अनुगतस्य तस्य सिद्धिसमानकालीनप्रागभावप्रतियोगित्वरूप-

(१) प्रतिबन्धकतावच्छेदकीभूताभावप्रतियोगित्वम् उत्तेजकत्वम्।

(२) तावदन्यत्वेनैवेत्यपि क्वचित् पाठः।

स्यानतिप्रसक्तस्य च तत्तत्सिद्धिनाशकालीनप्रागभावाप्रतियोगि-
त्वे सति तत्तत्सिद्धिसमानकालीनप्रागभावप्रतियोगित्वात्मकस्यैव
सम्भवादनुगतानतिप्रसक्तेत्युभयमुपात्तम्, तथा च प्रथमधर्मस्य का-
र्यतावच्छेदकत्वे सिषाधयिषामन्तरेण सिद्धिनाशोत्तरकाले जायमा-
नायामनुमितौ सिषाधयिषाव्यभिचारः, उत्तरस्य तथात्वे चानन्त-
कार्यकारणभावप्रसङ्ग इति भावः । सिद्धिसमानकालीनामिति ।
स्वक्षणवृत्तिप्रागभावप्रतियोगित्वस्वक्षणवृत्तित्वोभयसम्बन्धेन सि-
द्ध्यवच्छिन्नामित्यर्थः । लाघवादाह । स्वेतरेति । स्वाभिन्नत्वस्वक्षणवृ-
त्तित्वोभयसम्बन्धेन सिद्ध्यवच्छिन्नामित्यर्थः । दलद्वयप्रयोजनन्तु
स्फुटमेव । सम्बन्धविधया स्वक्षणवृत्तित्वादीनां निवेशाच्च स्वाननु-
गमनिबन्धनो दोषः, सम्बन्धमध्ये स्वपदार्थानिवेशेऽप्यन्याधिकर-
णवृत्तित्वादेरन्यसम्बन्धत्वाभावेनातिप्रसङ्गविरहात्(१) । यदि च
उत्पत्तिमध्ये स्वपदार्थारोपणान्तर्भावस्याप्रसिद्धिवारणायावश्यक-
तया अननुगमः शङ्क्यते, तदा स्ववृत्तिप्रागभावप्रतियोगित्वस्वक्ष-
णवृत्तित्वोभयसम्बन्धेन सिद्धिविशिष्टत्वम् अनुमितौ प्रवेश्यम्(२) ।
नाशकाले । नाशोत्पत्तिक्षणे । अनुमित्युत्पादो दुर्वार इति । सि-
द्धिनाशसमयोत्पन्नाया अनुमितेः उक्तसिषाधयिषाकार्यतावच्छेद-
कानाक्रान्तत्वादिति भावः ।

ननु स्वक्षणवृत्तिप्रागभावप्रतियोगित्वस्वनाशक्षणवृत्तिप्रागभावा-
प्रतियोगित्वोभयसम्बन्धेन सिद्ध्यवच्छिन्नानुमितित्वमेव सिषाध-
यिषाजन्यतावच्छेदकं वाच्यम् ? एतच्च सिद्धिनाशकालोत्पन्नानु-
मितिसाधारणमेवेति नातिप्रसङ्गः ।

न च सामान्यतो नाशक्षणवृत्तिप्रागभावाप्रतियोगित्वं अन्यसा-
प्यस्यैव न सम्भवतीति यदधिकरणक्षणवृत्तिप्रागभावप्रतियोगित्वं
तद्व्यक्तिनाश एव विशिष्य निवेश्य इत्यननुगमतादवस्थ्यमिति वा-
च्यम् । सम्बन्धाननुगमस्यादोषत्वात्, स्ववृत्तिप्रागभावप्रतियोगि-

(१) अन्यसम्बन्धत्वाभावेनातिप्रसङ्गविरहादित्यपि पुस्तकान्त-
रे पाठः ।

(२) यदि चेत्यादिः प्रवेश्यमित्यन्तः पाठस्तु सर्वेषु पुस्तकेषु
न दृश्यते ।

न्यस्ववृत्तिकृतिमत्त्वोभयसम्बन्धेन सिद्धिविशिष्टत्वेन कथञ्चिदनुगमस्यापि सम्भवाच्चेत्यतो दोषान्तरमाह । एकस्येति । सिद्धिसत्त्व इति । अव्यवहितपूर्वकाले इत्यादिः । अनुमित्यनुत्पादप्रसङ्ग इति । पुरुषान्तरीयसिद्ध्यव्यवहितोत्तरोत्पन्नपुरुषान्तरीयानुमितेरप्युक्तसिषाधयिषाजन्यतावच्छेदकधर्माक्रान्तत्वादिति भावः । सामानाधिकरण्यस्याधिकस्य दर्शितकार्यतावच्छेदकताघटकसम्बन्धमध्ये निवेशेन पुरुषान्तरीयसिद्ध्यनन्तरोत्पन्नानुमितौ सिषाधयिषाया व्यभिचारवारणसम्भवात् दोषान्तरमाह । अपि चेति । सामान्यसामग्रीतः । अनुमितिसामान्यहेतुभूतपरामर्शादितः ।

(दी०) न हि ईदृशविशेषसामग्रीं विना सामान्यसामग्र्या अनुमितिजनकत्वं नास्ति, न चान्यत्रापि विशेषसामग्र्यन्तरमस्ति तत्कल्पने चातिगौरवम् । इह जायमाना सा सिद्ध्युत्तरैव स्यात्, सा च न जायते कारणाभावादिति चेत्? सा मा जनिष्ट अनुमितिसामान्यन्तु स्यादेव, कार्यानुत्पादस्य विना कारणविरहमसम्भवात् ।

(गा०) ननु विशेषसामग्रीसहिताया एव सामान्यसामग्र्याः कार्योत्पादकत्वान्नापत्तिसम्भव इत्याशङ्कायामाह । न हीति । ईदृशेति । सिषाधयिषारूपेत्यर्थः । जनकत्वम् । उपधायकत्वम् । नास्तीति । न हीत्यन्वयः । सिद्ध्यसत्त्वे सिषाधयिषां विनापि परामर्शादेरनुमित्युत्पादकत्वादिति भावः । तथा च तत्रैव सिद्धिदशायामपि परामर्शादिसत्त्वे सिषाधयिषाविरहो नानुमित्यनुत्पादप्रयोजको भवेदिति पर्यवसितम् ।

ननु विशेषसामग्रीविरहकूट एव सामान्यसामग्रीदशायां सामान्यकार्यानुत्पादप्रयोजकः, सिद्ध्यसत्त्वस्थलीयविशेषसामग्रीविरहघटितस्य कूटस्य च सिषाधयिषाविरहसहकृतसिद्धिस्थल एव सत्त्वं न तु सिद्ध्यसत्त्वस्थले इति न दोष इत्यत आह । न चेति । अन्यत्रापि । सिद्ध्यसत्त्वस्थलेऽपि । विशेषसामग्र्यन्तरमिति । सिद्ध्यभावस्यैतन्मतेऽहेतुत्वादिति भावः । तत्तदनुमितिव्यक्त्युत्पादकतत्तत्परामर्शव्यक्तीनां विशेषसामग्रीत्वेऽपि अनुमित्युत्पत्तिकालेऽपि

सत्त्वेन तदनन्तरमनुमित्यनुत्पादे प्रयोजकविरहः, तत्तद्व्यक्तिविरहाणामनन्तानां सामान्यकार्यानुत्पादप्रयोजकत्वे गौरवञ्च, अन्यथा बहुतरसामान्यकारणताया उच्छेदप्रसङ्ग इत्याशयः ।

अत्राहुः, सिद्ध्यनुत्तरानुमितौ सिद्ध्यभावस्य हेतुत्वान्तरकल्पनयैव ईदृशातिप्रसङ्गवारणसम्भवात् विशिष्टसिद्ध्यभावहेतुत्वमयुक्तम्, सिद्धिसिषाधयिषाविरहयोर्विशेषणविशेष्यभावे विनिगमनाविरहेण प्रतिबन्धकताद्वयस्य तन्मतेऽप्यावश्यकत्वात्, प्रतिबन्धकतावच्छेदकगौरवस्याऽऽधिक्यात् ।

न च सिषाधयिषाहेतुतापक्षेऽपि कार्यतावच्छेदककोटौ अव्यवहितोत्तरत्वादिनिवेशाधिक्येन गौरवमित्याशङ्क्यम् । तल्लिङ्गकेच्छाविरहविशिष्टसिद्ध्यभावस्य पूर्वोपदर्शितसमूहालम्बनजन्यानुमितौ व्यभिचारवारणायाऽव्यवहितोत्तरत्वसम्बन्धेन तादृशसिद्ध्यवच्छिन्नानुमितिं प्रत्येव हेतुताया भवताऽपि वाच्यत्वादिति सिद्धिस्थले विनापि सिषाधयिषां सामान्यकार्योत्पत्तावपि तादृशकार्यस्योक्तविशेषसामग्रीकार्यतावच्छेदकाक्रान्तता स्यात् तथा च विशेषसामग्रीं विना तदुत्पत्तौ तस्याव्यभिचारात् कारणतैव व्याहन्यत इति न तत्र तदुत्पत्त्यापत्तिरिति शङ्कते । इहेति । कार्योत्पादप्रयोजकसामग्रीसत्त्वे प्रयोजनक्षतिर्न कार्योत्पत्तिं विरुणद्धि, तथा च प्रकृते सिषाधयिषाऽघटितायाः सामान्यकार्यप्रयोजकसामग्र्याः सिद्धिकालेऽपि सत्त्वं विशेषसामग्रीविरहेण तत्कार्यतावच्छेदकावच्छिन्नापत्त्यसम्भवेऽपि सामान्यधर्मावच्छिन्नापत्तिर्दुर्वारैवेत्यत आह । सा मा जनिष्टेति । सा । सिद्ध्युत्तरानुमितिः । कार्यानुत्पादस्य । तद्धर्मावच्छिन्नानुत्पादस्य । विना कारणविरहम् । तद्धर्मावच्छिन्नोत्पादप्रयोजकसामग्रीविरहं विना ।

(दी०) करणव्यापारत्वेनावश्यककारणभावस्य परामर्शस्य कारणतावच्छेदिका पक्षता न कारणमिति तु भ्रमः, प्रतिबन्धकान्तराभाववदन्वयव्यतिरेकशालित्वेन हेतुत्वात् । अन्यथा यथासम्भवं निमित्तकारणस्य समवायिकारणत्वाद्यवच्छेदकत्वप्रसङ्गात् ।

(गा०) अनुमितिं प्रति पक्षतासाहितपरामर्शत्वेन हेतुता, न तु पक्षतापरामर्शयोः पृथक्कारणताद्वयं गौरवात् ।

न च विशेषणविशेष्यभावे विनिगमनाविरहः । परामर्शस्याहेतुत्वे तस्य व्याप्तिज्ञानरूपकरणव्यापारत्वासम्भवात्, व्यापारतायाः फलजनकतागर्भत्वात् इत्यस्यैव विनिगमकस्य सम्भवादिति केषाञ्चिन्मतं दूषयति । करणेत्यादिना ।

परामर्शस्येति षष्ठ्यर्थो वृत्तिस्तस्याः कारणतायामन्वयः । निमित्तकारणस्य दण्डादेः । समवायिकारणत्वात् । कपालादिनिष्ठघटत्वाद्यवच्छिन्नकारणतेत्यर्थः । समवायनियमाय तत्कारणताया आवश्यकत्वादिति भावः । अन्यसत्त्वाद्यवच्छिन्नानरूपितायाश्च समवायिकारणतायां दण्डादेर्व्यभिचारेण प्रवेशासम्भवाद्यथासम्भवमित्युक्तम् । कारणतातदवच्छेदकत्वयोरुक्तविनिगमकत्वेन नियतत्वेऽपि सिद्ध्यभावसाहित्यपरामर्शत्वयोरेकविशिष्टस्यैव एकविशेष्यतावच्छेदकतापन्नस्यैव वाऽपरस्यावच्छेदकत्वं वाच्यम्, तत्र विनिगमनाविरहो दुर्वार इति तु तत्त्वम् ।

(दी०) अथानुमितिसाधारणसिद्धेः प्रतिबन्धकत्वे तदभावस्य मण्याद्यभाववत् प्रतिबन्धकाभावत्वेन कार्यकालवृत्तेरेव हेतुत्वात् अनुमितिकाले च तदसम्भवात् सा नोत्पद्येतेति चेत् ? न, यस्य मण्याद्यभावादेः कार्यसमकालतया अन्वयव्यतिरेकित्वं तस्यैव तथात्वेन हेतुत्वं न तु सर्वस्य गौरवात् । अन्यथा समवायिकारणस्य कार्यसहभूतस्यैव हेतुत्वात् कारणतामात्रस्य तथात्वप्रसक्तौ प्राभाकरा एव विजयेरन्निति ।

(गा०) ननु सिद्ध्यभावस्यानुमितिहेतुत्वेऽनुमितिं विना कदाप्यनुमितिर्नोपपद्येत मणिसमवधानोत्पत्तिकाले दाहानुत्पत्त्या प्रतिबन्धकाभावस्य कार्यकालसत्तायाः फलोपधानप्रयोजकत्वात्, अनुमितिकाले च सिद्ध्यभावासत्त्वादित्यगत्या तस्य कारणतावच्छेदकत्वमेव, न तु कारणत्वमिति शङ्कते । अथेति ।

कार्योत्पत्तिक्षणावच्छेदेनापि कार्याधिकरणे नियतसत्त्वं यत्कारणताघटकं तत्कारणमात्रस्यैव कार्योत्पत्तिक्षणसत्त्वं कार्योत्पत्ति-

प्रयोजकं यथा मण्यभावादेः सिद्ध्यभावस्य च प्रतिबन्धकाभावरूपत्वे-ऽपि नियतप्राक्सत्त्वमेव कारणताघटकं न तूक्तमपीति तस्य स्वप्राक्सत्त्वमात्रं फलोत्पत्तौ तन्त्रमिति नानुपपत्तिरिति समाधत्ते । यस्येति । अन्यथेति । सहचारदर्शनमात्रेणैव प्रतिबन्धकाभावे कार्यसहभावेन हेतुतासिद्धौ इत्यर्थः । प्राभाकरा इति । सहवर्त्तिन एव कारणतावादिन इत्यादि ।

यत्तु अनुमितौ प्रत्यक्षसामग्र्याः प्रतिबन्धकान्तरकल्पने गौरवात् तत्सामग्रीदशायाम् अनुमित्यापत्तिवारणायानुमित्यन्यसिद्ध्यभावस्य कार्यकालवृत्तितया हेतुत्वमेव युक्तम् अनुमित्यभावस्य प्राक्सत्त्वमात्रेण हेतुत्वान्तरं कल्प्यताम् इति, तदसत्, सिषाधयिषानन्तरजातसिद्धेर्द्वितीयक्षणेऽनुमित्यनुत्पादप्रसङ्गात्, कार्यकालेऽनुमित्सानाशेन तदभावविशिष्टसिद्धिसत्त्वात् । प्रत्यक्षादिसिद्धिसत्त्वेऽसत्याश्च तत्सामग्र्यां वह्निज्ञानान्तरं जायतामितीच्छाबलादनुमित्युत्पत्त्या अनुमित्यन्यसिद्धौ तादृशेच्छाया उत्तेजकत्वात्, तादृशेच्छाबलात् प्रत्यक्षसामग्र्यनन्तरं प्रत्यक्षानुत्पादसमयेऽप्यनुमित्यापत्तेः, सिद्धावप्रामाण्यग्रहसत्त्वे प्रत्यक्षानुत्पादसमयेऽनुमित्यापत्तेश्च इति ।

(दी०) प्राभाकरास्तु विनाप्यनुमित्सां क्वचित् परामर्शानुमितिप्रवाहस्याविरलग्नस्याऽऽनुभविकत्वात् कालभेदकल्पनायाञ्च मानाभावात् मानाभावाच्च पक्षता नानुमितिहेतुः । परार्थानुमाने तु सिद्धसाधनमर्थान्तरविषया दूषणमित्याहुः ॥

इत्यनुमानचिन्तामणिदीधितौ पक्षतानिरूपणं समाप्तम् ॥

(गा०) पक्षताया अनुमितिहेतुतामनङ्गीकुर्वतां गुरूणां मतमाह । प्राभाकरास्त्विति ।

अनुमित्सायोग्यताया उत्तेजकत्वे द्वित्वत्रित्वादिप्रकारकेच्छाबलात् अनुमितिद्वितीयक्षणोत्पन्नपरामर्शात् तृतीयक्षणेऽनुमित्यन्तरोत्पादस्य पक्षतामतेऽप्युपपत्तेर्विनाऽनुमित्सामिति । क्वचित् । प्रतिबन्धकान्तरासत्त्वस्थले । परामर्शानुमितिप्रवाहस्य । क्रमोत्पन्नपरामर्शानुमितिप्रवाहस्य । अपलापनिराकरणाय समूहपर्यन्तानुसर-

णम् । पूर्वपूर्वानुमितिनाशे द्वितीयादिपरामर्शादनुमित्यन्तरोत्पत्तौ बाधकाभावादाह । अविरलेति ।

ननु तत्रागत्या एकैकक्षणविलम्बेनैवानुमितिः स्वीकार्या इत्यत आह । कालभेदेति । मानाभावात् । पक्षताया हेतुत्वस्यासिद्ध्या गत्यन्तरविरहस्यैवासिद्धेरिति भावः ।

नन्वेवं सिद्धसाधनस्यादूषणतया परार्थस्थले तदुद्भावनानुपपत्तिरित्यत आह । परार्थेति । अर्थान्तरेति । सिद्धेऽर्थे आकाङ्क्षाविरहादिति भावः ।

न च पक्षताया अनुमित्यहेतुत्वेऽनुमित्यनन्तरं जातव्यक्तिरेव कथं नोत्पद्यते ? तद्वारणाय तत्तद्व्यक्तौ तत्तत्प्रागभावव्यक्तीनां विशिष्यानन्तहेतुताकल्पने गौरवमिति वाच्यम् । तत्तदनुमितिव्यक्तेः पूर्वं तन्नाशात् परतो वा कदाचित् तत्समानविषयकानुमित्यन्तरोत्पादसमये तद्व्यक्त्यापत्तिवारणाय तत्र परामर्शव्यक्तीनां विशिष्य हेतुताया आवश्यकत्वात्, तत एव तद्व्यक्तीनां पुनरुत्पादवारणसम्भवात् ।

न च परामर्शानां तत्तद्व्यक्तित्वेन तत्तदनुमितिव्यक्तिहेतुत्वेऽपि विनश्यदवस्थात्तदनुमित्यव्यवहितपूर्वोत्पन्नपरामर्शात् पुनस्तदनुमितिप्रसङ्ग इति वाच्यम् । एतन्मते कार्यासहवर्त्तिनः फलाजनकत्वात् अनुमितित्वावच्छिन्नाभावहेतुतयाऽपि तादृशापत्तिवारणसम्भवात् तदनुरोधेन गुरूणां प्रत्यक्षादिसाधारणनिश्चयत्वेन प्रतिबन्धकत्वासिद्धेः ।

अत्र केचित् पक्षताया अनुमित्यहेतुत्वमते विनापि वह्न्यादिलिङ्गकवह्न्याद्यनुमित्सां तादृशानुमित्युत्पत्त्या तादृशानुमितौ तादृशानुमित्साविरहविशिष्टप्रत्यक्षादिसामग्र्यभावस्य कारणताधिक्यात् गौरवं पक्षताहेतुत्वमते तादृशानुमितेरिच्छानियततया तत्रेच्छाया लघीयस्या हेतुतयैवोपपत्तेः पक्षतापि तत्रेच्छैवेत्याहुः ॥

इति श्रीगदाधरभट्टाचार्यचक्रवर्तिविरचितायामनुमानचिन्तामणिदीधितिगादाधर्यां पक्षता-

निरूपणं समाप्तम् ॥

परामर्शप्रकरणम् ।

(चि०) पक्षधर्मस्य व्याप्तिविशिष्टज्ञानमनुमितिहेतुः । ननु व्याप्यतावच्छेदकप्रकारेण व्याप्तिस्मरणं पक्षधर्मताज्ञानं तथा, लाघवात्, परामर्शहेतुत्वेनावश्यकत्वाच्च ।

(दी०) लक्षणोपोद्घातेन विशिष्टज्ञानस्य कारणत्वं व्यवस्थापयति । पक्षेत्यादि । व्याप्तिस्मरणमिति । स्मरणत्वमविवक्षितमव्यापकत्वात् । लाघवात् । प्रथमोपस्थितत्वलाघवात् । कल्पनालाघवमाह । परामर्शेति । परामर्शहेतुत्ववादिनाऽप्यनुमितेः पूर्वं तादृशज्ञानमवश्यं मन्तव्यम् । तथा चातिरिक्तधर्मिणस्तत्रानन्यथासिद्धत्वनियतपूर्ववर्त्तित्वयोः कल्पनामपेक्ष्य उभयवादिसिद्धनियतपूर्ववर्त्तिनोऽनन्यथासिद्धत्वमात्रकल्पना लघीयसीति भावः ।

(गा०) पक्षतां निरूप्य विशिष्टपरामर्शत्वेन हेतुता ज्ञानद्वयकारणतावादिमीमांसकविप्रतिपत्तिं निरस्य मणिकारेण व्यवस्थापिता तत्र सङ्गतिं दर्शयति । लक्षणोपोद्घातेनेति । विशिष्टपरामर्शत्वावच्छिन्नकारणताघटितानुमितिलक्षणोपपादकतयेत्यर्थः । विशिष्टज्ञानस्य । विशिष्टपरामर्शत्वावच्छिन्नस्य । कारणत्वं व्यवस्थापयति । अनुमितिकारणत्वे युक्तिमभिधातुं प्रतिजानीते । तादृशयुक्तेरनुमितिलक्षणघटककारणतानिष्ठविशिष्टपरामर्शत्वावच्छिन्नत्वसाधकतया लक्षणोपपादकत्वं बोध्यम् । इदानीमपि विशिष्टपरामर्शत्वस्यानुमितिकारणतावच्छेदकत्वे मीमांसकविप्रतिपत्त्यवतारणेनाप्रामाणिकत्वशङ्कया(१) तदुपपादकप्रमाणाकाङ्क्षासम्भवेन तदुपपा-

---

(१) अवतारवशेनाप्रामाणिकत्वशङ्कया इति पाठोऽप्यत्रास्ति ।

दकत्वस्य लक्षणनिरूपितसङ्गतित्वम् ।

मूले । पक्षधर्मस्येति । हेतुतावच्छेदकसम्बन्धेन पक्षविशेषणतापन्नस्येत्यर्थः । व्याप्यविशेष्यकपरामर्शस्य सङ्ग्राह्यत्वे विशेषणतेत्यत्र विशेष्यताऽप्यन्तर्भाव्या । व्याप्तिविशिष्टज्ञानं व्याप्तिप्रकारकज्ञानम् । तथा च पक्षविशेषणतापन्नहेतुविषयकत्वावच्छेदेन व्याप्तिप्रकारकत्ववज्ज्ञानत्वस्य पक्षतावच्छेदकत्वलाभः, उद्देश्यतावच्छेदकविधेयभावमहिम्ना तादृशहेतुविषयकत्वव्याप्तिप्रकारकत्वयोरवच्छेद्यावच्छेदकभावलाभात् । पक्षतावच्छेदकतादृशज्ञानत्वांशे कारणत्वरूपसाध्यस्य स्वरूपसम्बन्धरूपावच्छेदकतासिद्धिरप्युद्देश्या, अतो व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वादिना विशिष्टपरामर्शस्याप्यनुमितिहेतुताया मीमांसकसंमतत्वेऽपि न सिद्धसाधनावकाशः ।

व्याप्तिस्मरणमित्यत्र स्मृतित्वस्य हेतुतावच्छेदकत्वाभिमानं निराकरोति । स्मरणत्वमिति । अविवक्षितमिति । हेतुतावच्छेदकत्वेनेत्यादिः । अविवक्षाबीजमाह । अव्यापकत्वादिति । हेतुत्वाव्यापकत्वादित्यर्थः । व्याप्त्यनुभवस्यापि हेतुत्वादिति भावः । अवच्छेदकलाघवस्य नैयायिकमत एव सत्त्वात् कल्पनालाघवस्याग्रे वाच्यत्वाल्लाघवादिति ग्रन्थस्य तत्परत्वायोगात्तमन्यथा व्याचष्टे । लाघवादिति । प्रथमोपस्थितत्वेति । ज्ञानद्वयस्य विशिष्टपरामर्शापेक्षया प्रथममुत्पन्नतया स्वप्रकाशवादिनां गुरूणां ज्ञानद्वयस्यैव ज्ञानद्वयोपस्थितिरूपतया तस्य प्रथमोपस्थितत्वमिति भावः ।

ननु परामर्शहेतुतया ज्ञानद्वयस्याऽऽवश्यकत्वमनुमितिहेतुताकल्पनेऽनुपयुक्तमित्याशङ्कां निराचिकीर्षुराह । कल्पनालाघवमिति । परामर्शहेतुत्वेनाऽऽवश्यकत्वाच्चेति मूले परामर्शहेतुत्वेनेत्यनन्तरं तथापीति पूरणीयमित्याशयेन तदर्थमाह । परामर्शहेतुत्वेति । तादृशज्ञानम् । व्याप्यतावच्छेदकप्रकारकव्याप्त्यादिज्ञानम् । मन्तव्यमिति । अन्यथा कारणविरहेण परामर्शस्यैवानुदयापत्तेरिति शेषः ।

यद्यपि धूमवान् पर्वत इति ज्ञानं विनापि धूमो वह्निव्याप्य इति ज्ञानेन पर्वतत्वरूपविशेषणज्ञानसहकृतेन वह्निव्याप्यधूमवान् पर्वत इति विशिष्टवैशिष्ट्यबोधजननसम्भवात् परामर्शहेतुतया पक्षधर्मताज्ञानस्य नाऽऽवश्यकता, तथाऽपि पर्वते धूमदर्शनात्मकोद्बोधकाद्

धूमो वह्निव्याप्य इति स्मरणं ततः परामर्श इति क्रमस्यौत्सर्गिकतया इदानीं तादृशरीत्यैव परामर्शोत्पत्तिः सर्वत्रेत्यभिमानेन ज्ञानद्वयस्य परामर्शहेतुतया आवश्यकत्वं मूलकृताभिहितम्, एतदभिमानेनैवानुमितिपूर्वं विशिष्टपरामर्शस्यासिद्धिः । परामर्शार्थं ज्ञानद्वयोपगमे अनुमितिसामग्रीसत्त्वेन परामर्शोत्पत्त्यसम्भवादित्यभिधायाग्रे परामर्शहेतुतायामवच्छेदकलाघवमप्रयोजकीकरिष्यते । एतादृशाभिमानश्च नैयायिकमतमालम्ब्य । अथ वह्निव्याप्यो धूम इत्यादिना निराकृत्यानुमितिपूर्वं विशिष्टपरामर्शासिद्धिरुपपादनीया, तावता च परामर्शहेतुतया ज्ञानद्वयस्यावश्यकत्वनिराकरणेऽपि वह्निव्याप्यधूमवान् पर्वत इति परामर्शस्यैव व्याप्यतावच्छेदकप्रकारकव्याप्तिज्ञानत्वतत्प्रकारकपक्षधर्मताज्ञानत्वाक्रान्ततया तत्तद्रूपावच्छिन्नस्य नियतपूर्ववर्त्तितया उभयसिद्धत्वेन कल्पनालाघवमक्षुण्णमेव । अत एव तदुत्तरं व्याप्यतावच्छेदकानवगाहिशाब्दपरामर्शादनुमित्युत्पादाभिधानमेव दीधितिकृता एतादृशकल्पनालाघवनिराकरणपरतया व्याख्यास्यते ।

केचित्तु परामर्शहेतुतयेति मूलस्य परामर्शस्यानुमितिहेतुतयाऽपि व्याप्यतावच्छेदकप्रकारकव्याप्तिज्ञानत्वाद्यवच्छिन्नस्य न्यायमतसिद्धनियतपूर्ववर्त्तितावत्त्वादित्यर्थः । परामर्शेन स्वार्थं व्याप्यतावच्छेदकप्रकारकव्याप्त्यादिविषयकज्ञानान्तरमपेक्ष्यतां मा वा परामर्श एव तादृशज्ञानात्मक इत्यतोऽपि परामर्शस्य नियतपूर्ववर्त्तितावादिनाऽपि तत्तद्रूपावच्छिन्नस्य नियतपूर्ववर्त्तित्वमनुमतमेवेति भाव इत्यप्याहुः ।

तदसत् । यत्र धूमत्वसामानाधिकरण्येन वह्निव्याप्यत्वावगाहिविशिष्टपरामर्शस्तत्र व्यभिचारेण मीमांसकमतसिद्धकारणतावच्छेदकद्वयस्य विशिष्टपरामर्शत्वव्यापकत्वाभावात्, द्रव्यत्वादिसामानाधिकरण्यमात्रेण वह्न्यादिव्याप्तिज्ञानात् द्रव्यत्वादिना च जलादेर्ह्रदवृत्तिताज्ञानादन्यथाख्यात्यापत्तिभयेन धूमत्वावच्छेदेन व्याप्तिप्रकारकज्ञानस्यैव तन्मते हेतुत्वादिति ।

न चैतत्समशीलदोषस्य व्याप्यतावच्छेदकानवगाहिशाब्दपरामर्शस्थले मणिकृतैव दास्यमानत्वान्न दोष इति वाच्यम् । एवं सत्येतद्व्याख्यापक्षेऽपि मीमांसकमतसिद्धकारणतावच्छेदकद्वयस्य वि-

शिष्टपरामर्शत्वव्यापकत्वमित्यभिमानस्यानुस्मरणीयतया तादृशज्ञानद्वयस्य विशिष्टपरामर्शहेतुत्वमित्यभिमानमूलकत्वमेव सम्यक् ।

केचित्तु निश्चयत्वानिवेशप्रयुक्तलाघवानुरोधेन वह्निव्याप्यधूमवत्पर्वतवानित्यादिविशिष्टवैशिष्ट्यावगाहिज्ञानमेव नैयायिकमतेऽनुमितिकारणम्, तत्र च धूमवान् पर्वत इति ज्ञानस्य विशेषणतावच्छेदकप्रकारकज्ञानविधया हेतुत्वम् । पक्षमुख्यविशेष्यकज्ञानस्यैव हेतुत्वे वह्निव्याप्यधूमवत्पर्वतात्मिन्नः पर्वत इत्याकारज्ञानस्यैव हेतुत्वमित्यभिप्रायकतया परामर्शहेतुत्वेनावश्यकत्वादिति मूलं वर्णयन्ति ।

परे तु मानसत्वव्याप्यपरामर्शत्वमते उपनीतभानात्मकपरामर्श एवानुमितिहेतुः, यो यत्र पूर्वमवगत इति नियमोऽप्यस्ति तादृशनियमबलात् वह्निव्याप्यधूमवान् पर्वत इति ज्ञाने धूमवान् पर्वत इति ज्ञानस्यापि हेतुत्वमित्यभिप्रायकतया परामर्शहेतुत्वेनेत्यादिकं वर्णयन्ति ।

तदसत्, तादृशनियमवादिमते धूमवान् पर्वत इति ज्ञानस्य यदा कदाचिदपेक्षितत्वेऽप्यव्यवहितप्राक्कालेऽनपेक्षणात् ।

न च तादृशनियमनिर्वाहाय तत्प्रकारकतद्विशेष्यकज्ञानस्य संस्कारद्वारा हेतुत्वं तादृशसंस्कारस्य वा हेतुत्वं कल्पनीयं, तत्प्रकारकोपनीतभाने तद्विषयकज्ञानस्य साक्षाद्धेतुत्वं कल्पनीयमिति गौरवम्, तथा च लाघवात्तत्प्रकारकतद्विशेष्यकोपनीतभाने तत्प्रकारकज्ञानस्य साक्षादेव हेतुत्वं तादृशनियमनिर्वाहाय कल्पयितुमुचितमिति वाच्यम् । तादृशनियमवादिमते यदा कदाचित् तत्प्रकारकतद्विशेष्यकज्ञानसत्त्वैव तत्प्रकारकतद्विशेष्यकोपनीतभाननिर्वाह इत्यनुभवमपलप्य लाघवानुसरणे गतं तादृशनियमेन, तत्प्रकारकोपनीतभाने तद्विषयकज्ञानत्वेनैव हेतुत्वस्यौचित्यात्, तादृशनियमस्यापूर्वधर्मिकसंशयान्यथानुपपत्त्या दीधितिकृता दूषितत्वाच्चेति । कारणतायाः स्वरूपसम्बन्धादिरूपत्वे कल्पनालाघवासम्भवादनन्यथासिद्धनियतपूर्ववर्त्तित्वं कारणत्वम् इत्यभिप्रायकतया कल्पनालाघवमुपपादयितुं भावमाह । तथा चेति । अतिरिक्तधर्मिणः ज्ञानद्वयानन्तरमुभयवाद्यसिद्धविशिष्टपरामर्शस्य कल्पनामित्यनेनान्वयः । तत्र । विशिष्टपरामर्शत्वावच्छिन्ने ।

(चि०) एवं धूमो वह्निव्याप्यो धूमवांश्चायमिति ज्ञानद्वयादेवानुमितिरस्तु ? न चानुमितिं प्रति व्याप्यत्वज्ञानमेव हेतुर्लाघवादावश्यकत्वाच्चेति वाच्यम् । तस्यानुमितेः पूर्वमसिद्धौ युगपदुपस्थित्यभावात् ।

(दी०) ननु धूमत्वावच्छेदेन व्याप्तेरालोकत्वेन च पक्षधर्मताया ग्रहेऽप्यनुमितिः स्यादित्यत आह । एवमिति । यद्धर्मावच्छेदेन व्याप्तिज्ञानं तेन रूपेण पक्षधर्मताज्ञानं हेतुरिति नातिप्रसङ्गः । ज्ञानद्वयादिति । द्वित्वमविवक्षितम् । लाघवात् । अवच्छेदकलाघवात् । आवश्यकत्वात् । व्याप्यतावच्छेदकप्रकारकव्याप्तिज्ञानस्य हेतुत्वे व्याप्तिज्ञानहेतुताया आवश्यकत्वात् । क्वचिदुपजीव्यत्वादिति पाठः । उपजीव्यत्वञ्च व्याप्तिज्ञानं विना यद्धर्मावच्छेदेन व्याप्तिज्ञानं तत्प्रकारकपक्षधर्मताज्ञानस्यासम्भवात् । एवञ्च सिद्धे व्याप्तिज्ञाने हेतावतिप्रसङ्गभङ्गाय पक्षधर्मताविषयकत्वमवच्छेदकं कल्प्यते लाघवात् न तु करणान्तरं गौरवादिति भावः । सिद्धस्य व्याप्तिज्ञानस्य न पक्षधर्मताविषयकत्वमित्याशयेनाह । तस्येति ।

(गा०) व्याप्यतावच्छेदकप्रकारकज्ञानत्वेन सामान्यतो हेतुत्वे विभिन्नव्याप्यतावच्छेदकप्रकारकव्याप्तिपक्षधर्मताज्ञानाभ्यामनुमितिप्रसङ्ग इत्याशङ्कानुद्धारे मूलस्य न्यूनतेति तन्निराकरणपरतया एवमित्यादिमूलमुत्थापयति । नन्विति । अनुमितिः स्यादिति । तत्रापि ज्ञानद्वयघटितसामग्रीसत्त्वादिति भावः । एवञ्चैवमित्यादिमूलस्य धूमत्वाद्यवच्छेदेन व्याप्तिज्ञानं तत्प्रकारकपक्षधर्मताज्ञानञ्च मिलितमनुमित्युत्पादप्रयोजकसामग्री, न तूक्तं ज्ञानद्वयं तथेत्यर्थः । सामान्यरूपेण हेतुत्वे विशेषरूपेण सामग्रीप्रवेशो न सम्भवति कारणतावच्छेदकावच्छिन्नस्तोमस्यैव सामग्रीत्वादित्याशङ्क्य विशेषरूपेण हेतुतामाह । यद्धर्मावच्छेदेनेति । व्याप्तिज्ञानं यत्रानुमितौ हेतुस्तत्रेति, विद्यत इति वा, पूरणीयम् । द्रव्यत्वादिसामानाधिकरण्येन

वह्न्यादिव्याप्तिज्ञानात् द्रव्यत्वादिना च जलादिह्रदादिवृत्तिताज्ञाना-दन्यथाख्यात्यात्मकानुमित्यापत्तेर्वारणाय यद्धर्मप्रकारेणेत्युपेक्ष्य यद्धर्मावच्छेदेनेत्यभिहितम्। अन्यथाख्यातिमनङ्गीकुर्वतां द्रव्यत्वाद्यवच्छेदेन व्याप्तिज्ञानाप्रसिद्ध्या नोक्तापत्तिसम्भवः। द्वित्वस्य फलोपधायकतावच्छेदकत्वे उभयविषयकैकज्ञानादनुमित्यनिर्वाहः, सर्वत्र भेदाभेदसाधारणं कारणस्य मेलनमेव कार्योत्पत्तिप्रयोजकं न तु भेदनियतं तद्द्वित्वमपि क्वचित्तथेति, द्वित्वस्य तथात्वमसम्भवदुक्तिकञ्च, (१)इत्यभिसन्धाय ज्ञानद्वयादित्यत्र द्वयपदं व्याप्तिपक्षधर्मताज्ञानयोरभेदानपेक्षामात्रसूचकतया व्याचष्टे। ज्ञानद्वयादितीति। कल्पनालाघवस्याऽऽवश्यकत्वादित्यनेन वाच्यतया पौनरुक्त्यं निराचिकीर्षुर्व्याचष्टे। लाघवादिति। अवच्छेदकलाघवादिति। व्याप्यतावच्छेदकप्रकारकव्याप्तिज्ञानत्वापेक्षया व्याप्तिप्रकारकज्ञानत्वरूपावच्छेदकस्य लघुशरीरत्वादिति भावः। व्याप्तिज्ञानस्येति धर्मपरम्। हेतुत्वे। कारणतावच्छेदकत्वे। व्याप्तिज्ञानहेतुतायाः। व्याप्तिज्ञानत्वस्य कारणतावच्छेदकतायाः। आवश्यकत्वादिति उभयसिद्धत्वादित्यर्थः। तस्य तदन्तर्गतत्वादिति भावः। व्याप्यतावच्छेदकप्रकारकव्याप्तिज्ञानादेर्व्याप्तिप्रकारकज्ञानानुपजीवकत्वात्।

क्वाचित्के उपजीव्यत्वादिति पाठे असङ्गतिरिति उपजीव्यपदं विशिष्टसत्तानिर्वाहकपरमित्याशयेन विशिष्टसत्तानिर्वाहकत्वमुपपादयति। उपजीव्यत्वञ्चेति। असम्भवात्। सत्तानुपपत्तेः। विशिष्टसत्ताया विशेषणव्याप्तिज्ञानसत्त्वनियतत्वादिति भावः। एतावतापि कल्पनालाघवमित्यवधेयम्।

ननु व्याप्तिप्रकारकज्ञानत्वेन हेतुत्वे सिद्धेऽपि व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वरूपपरामर्शत्वस्य हेतुतावच्छेदकत्वासिद्ध्या नैयायिकानां नाभिमतसिद्धिरित्यत आशयं पूरयति। एवञ्चेति। व्याप्तिज्ञाने। व्याप्तिज्ञानत्वावच्छिन्ने। अतिप्रसङ्गभङ्गाय। पक्षधर्मताधीशून्यकाले अनुमितिवारणाय। व्याप्तिज्ञानकारणतायामेव पक्षधर्मताविषयकत्वमवच्छेदकम् अन्यथानुपपत्त्या कल्प्यते।

यद्यपि व्याप्तिज्ञानत्वावच्छिन्नहेतुतायां पक्षधर्मताविषयकत्व-

(१) व्यासज्यवृत्तिधर्मस्य कारणतानवच्छेदकत्वादिति भावः।

स्यावच्छेदकत्वोपगमे प्रस्थितमवच्छेदकाघवादिना, तथाऽप्यतिप्रसङ्गानवतारदशायां व्याप्तिज्ञानत्वस्य लाघवात् प्रथमतोऽवच्छेदकत्वासिद्धिरुत्तरकालमवच्छेदकाभिवृद्धिश्च निष्प्रत्यूहैवेति भावः ।

ननु पक्षधर्मताधीत्वेन कारणत्वान्तरकल्पनयाऽप्यतिप्रसङ्गभङ्गेनान्यथानुपपत्त्या अवच्छेदकाभिवृद्धिकल्पनं कथमित्यत आह । लाघवादिति । कारणतान्तरकल्पनापेक्षया लाघवादित्यर्थः । अनतिप्रसङ्गोपपादकत्वाविशेषेऽपि गौरवादेव न कारणत्वान्तरसिद्धिरित्याह । न त्विति । व्याप्तिज्ञानत्वावच्छिन्नमनुमितेः पूर्वमुभयवादिसिद्धमेवेति तस्यानुमितेः पूर्वमसिद्धावित्यग्रिममूलासङ्गतिरतस्तदाशयं व्याचष्टे । सिद्धस्येति । न पक्षधर्मताविषयकत्वामिति । तथा च कल्प्तहेतुतायां तदवृत्तेः पक्षधर्मताविषयकत्वस्यावच्छेदकत्वमग्रेऽपि कल्पयितुमशक्यमिति भावः ।

(दी०) यद्वा व्याप्यत्वज्ञानं व्याप्यत्वप्रकारकं पक्षधर्मताज्ञानमित्यर्थः । ननु विशिष्टज्ञानान्यथानुपपत्त्या ज्ञानद्वयस्यावश्यं वाच्यतया तस्यैव हेतुत्वं युक्तं तदिदमुक्तमावश्यकत्वादित्यत आह । उपजीव्यत्वादिति । विशिष्टज्ञानस्यान्यथानुपपत्त्या तत्कल्पने विशिष्टज्ञानस्योपजीव्यत्वादित्यर्थः । स्वसंवेदनासिद्धमेव ज्ञानद्वयम् आवश्यकत्वञ्च तस्योभयवादिसिद्धत्वमित्याशयेनाह । तस्येति ।

(गा०) आशयमपूरयित्वाऽपि व्याप्यत्वज्ञानमित्यादिमूलं व्याकरोति । यद्वेति । एतन्मतेऽपि लाघवादित्यस्यावच्छेदकलाघवादित्यर्थः । धूमत्वादौ व्याप्तेरनतिरिक्तवृत्तित्वरूपावच्छेदकत्वावगाहितया मीमांसकैः कारणतावच्छेदके निवेशनीयतया तन्मते ऽवच्छेदकगौरवादिति भावः ।

अवच्छेदकगौरवेऽपि मीमांसकमते दर्शितकल्पनालाघवमक्षुण्णमिति शङ्कायामुपजीव्यत्वादिति मूलमवतारयति । नन्विति । विशिष्टज्ञानान्यथानुपपत्त्येति । तथा च ज्ञानद्वयकल्पकतया विशिष्टज्ञानमप्यनुमितेः पूर्वं मीमांसकमतसिद्धमिति न नैयायिकमते कल्पनागौरवमिति भावः ।

ननु मूलकृता अनुमितिपूर्वं विशिष्टज्ञानस्यासिद्धिमुद्भाव्य यदवच्छेदकलाघवमप्रयोजकीकृतं तन्न सङ्गच्छते विशिष्टपरामर्शासिद्धौ कल्पकविरहेण ज्ञानद्वयस्याप्यसिद्धिप्रसङ्गादतस्तदाशयं प्रकाशयति। स्वेति। स्वात्मकं यत् संवेदनं प्रत्यक्षं (१)तत्सिद्धमित्यर्थः, तथा च न तत्कल्पकतया विशिष्टपरामर्शस्य तदभ्युपगतत्वमिति भावः।

नन्वेवं तेषां ज्ञानद्वयस्यावश्यकत्वाभिधानविरोधः ? विशिष्टज्ञानान्यथानुपपत्त्या अवश्यकल्पनीयत्वस्यैवावश्यकत्वपदार्थत्वादित्यत आह। आवश्यकत्वञ्चेति। उभयवादिसिद्धत्वमिति। तथा च नोक्तरूपमावश्यकत्वमिति न तदभिधानविरोध इति भावः।

(चि०) अथ यथा तत्ताविशिष्टस्मरणे सतीन्द्रियसन्निकृष्टे स एवायमित्यभेदप्रत्ययो भवति तथेन्द्रियसन्निकृष्टे धूमे वह्निव्याप्यधूमस्मरणे धूमत्वसाधारणधर्मदर्शनात् व्याप्योऽयमित्यभेदप्रत्ययः स्यात् सामग्र्या वृत्तत्वादिति स एवानुमितिहेतुरिति चेन्न। प्रत्यक्षसामग्रीतोऽनुमितिसामग्र्या बलवत्त्वादनुमितिरेवोत्पद्यते न तु व्याप्याभेदप्रत्यक्षम्, (२)अन्यथा तत्रापि परामर्शानन्तरं तदनुव्यवसायो वा भवेन्न त्वनुमितिरेव।

(दी०) असिद्धिं परिजिहीर्षुराशङ्कते अथेति। अयम्। पक्षवृत्तिः। हेतुरिति। लाघवादिति शेषः। अनुमितिसामग्र्या इति। स्मृतिहेतुतावादिनां नये दूषणमिदं, न तु संस्कारकारणतावादिनां प्राचामिति।

(गा०) अथ यथेत्यादिना मूलकृतो विशिष्टपरामर्शसामग्रीप्रदर्शनस्य प्रकृतोपयोगितां दर्शयति। असिद्धिमिति। मीमांसकोद्भावितां विशिष्टपरामर्शस्यासिद्धिमित्यर्थः। व्याप्योऽयमित्यभेदप्रत्यय·

---

(१) प्रत्यक्षमिति पाठः क्वचिन्न दृश्यते।

(२) व्याप्याभेदप्रत्ययमिति मथुरानाथसम्मतपाठोऽप्यत्रास्ति।

स्य विशिष्टपरामर्शत्वं स्फुटीचिकीर्षुरयामित्यस्यार्थं व्याचक्षाणः पक्षवृत्तितावगाहितां स्पष्टयति। अयमिति। स एवानुमितिहेतुरित्यत्र न्यूनताभङ्गाय हेतुं पूरयति। लाघवादितीति। संस्कारसाधारणेन सविषयकत्वेनोपनायकतामते व्याप्त्युपनये तत्स्मरणपर्यन्तस्यानपेक्षिततया न विशिष्टपरामर्शपूर्वमनुमितिसामग्रीनैयत्यं संस्कारस्यानुमितावहेतुत्वादिति ज्ञानत्वेनोपनायकत्ववादिनयेऽनुमितिसामग्रीनिबन्धनपरामर्शासम्भवरूपदूषणं सङ्क्रमयति। स्मृतीति। स्मृतिहेतुतावादिनाम्। संस्कारस्यानुपनायकतया उपनयानुरोधेन स्मृतिं कल्पयताम्(१)।

(चि०) अथ वह्निव्याप्यो धूम इति स्मरतः पर्वतीयधूमेन्द्रियसन्निकर्षेण प्रथमत एव व्याप्तिधूमत्वयोर्वैशिष्ट्यं यत्र भासते विशेषणज्ञानस्य पूर्वं वृत्तत्वात् तत्र, यत्र वाऽऽप्तवाक्याद्वह्निव्याप्यवानयमिति ज्ञानं तत्रोभयत्रापि लाघवात् पक्षधर्मव्याप्यत्वज्ञानस्य हेतुत्वकल्पनादन्यत्रापि तथेति चेन्न। इन्द्रियासन्निकृष्टेऽतीन्द्रिये च लिङ्गे प्रत्यक्षविशिष्टज्ञानसामग्रीविरहात्, तेन विना अनुमित्यनुत्पादापत्तेः, अस्मदुक्तसामग्र्याश्च तत्रापि सत्त्वात्। न चानुमानादिना तत्र परामर्शः, अनवस्थानात्।

(दी०) अथेत्यादि। अत्र यत्र प्रथमं पक्षाग्रहे गृहीतधूमे स्मृतव्याप्तिवैशिष्ट्यभानमनन्तरञ्च गृहीते पक्षे तादृशविशिष्टधीस्तत्रेत्यपि द्रष्टव्यम्। प्रथमत इति। विशिष्टज्ञानात् पूर्वमनुमितिसामग्रीविरहदर्शनाय। एवञ्च सिद्धे पूर्ववर्त्तिनि विशिष्टज्ञाने तत्त्वेन हेतुत्वं गुरुधर्मद्वयावच्छेदेनानन्यथासिद्धत्वकल्पनामपे-

(१) तद्धेतुतया कल्पयतामित्यपि क्वचित्कः पाठः। उपनयहेतुतया कल्पयतामिति तदर्थः।

क्ष्य लघ्वेकरूपावच्छेदेन नियमानन्यथासिद्धत्वकल्पनाया एव न्याय्यत्वात्, गृह्यमाणव्याप्त्यवच्छेदकताकधर्मप्रकारकपक्षधर्मताज्ञानत्वेन पक्षधर्मताग्रहप्रकारीभवद्धर्मावच्छिन्नव्याप्तिज्ञानत्वेन वा एकरूपेण कारणत्वे चातिगौरवात्, विनिगमकाभावाच्च। तथापि च नियतपूर्ववर्त्तित्वं कल्प्यमित्याह। यत्र वेति। तेन विनेति। तथा च व्यभिचारात् कारणत्वं बाधितमिति भावः। स्वतो व्यभिचारं निरस्यति। अस्मदुक्तेति। अनवस्थानादिति। न च धूमान्तरसन्निकर्षे तत्तद्व्यक्तिवृत्तिधूमत्वं वह्निव्याप्तिव्याप्यमिति लिङ्गविशेष्यकपरामर्शाद्व्याप्त्यनुमितिसम्भवः, धूमगात्रासन्निकर्षेऽपि तत्र वह्न्यनुमानात् तद्व्यक्तिवृत्तित्वधूमत्वत्ववैशिष्ट्यग्राहकविरहाच्च।

(गा०) यत्र पक्षीयधूमदर्शनात् प्रागेव उद्बोधकान्तराद्व्याप्तिस्मरणं तत्र तदुत्तरं पक्षधर्मताग्रहस्यैव विशिष्टपरामर्शरूपता मूलकृतोक्ता, तत्र न्यूनताभङ्गाय पक्षधर्मत्वाविषयकपक्षीयहेतुदर्शनोद्बोधितव्याप्तिस्मृतिस्थलेऽपि विशिष्टपरामर्शमुपपादयति। अत्रेति। तत्रेत्यपि द्रष्टव्यमित्यन्वयः। प्रथमं पक्षग्रहे पक्षधर्मताग्रहोत्पत्त्या विशिष्टपरामर्शपूर्वमनुमितिसामग्री सम्भवतीति पक्षाग्रह इत्युक्तम्। सामान्यलक्षणानुपगमे व्याप्तिस्मरणस्य पक्षीयधूमाविषयकतया विशेषणतावच्छेदकविशिष्टविशेषणज्ञानविरहेण विशेषणतावच्छेदकविशिष्टधूमवैशिष्ट्यज्ञानं पक्षे न सम्भवतीति अन्तरास्मृतव्याप्तेः पक्षीयधूमे विशिष्टज्ञानस्वीकारः। पक्षविशेष्यकेऽपि परामर्शे पक्षग्रहस्य पक्षतावच्छेदकरूपविशेषणविषयतया विशिष्टविशेष्यकज्ञाने विशेष्यतावच्छेदकप्रकारकधीहेतुत्वे तत्त्वेन वा उपयोगात् गृहीते पक्ष इत्युक्तम्। तादृशविशिष्टधीरिति। तादृशस्य व्याप्तिविशिष्टस्य हेतोर्विशिष्टधीरित्यर्थः। मूले प्रथमत इत्यनन्तरं पक्षधर्मतया भासमान इति पूरणीयम्।

ननु उक्तरीत्या जायमानस्य विशिष्टपरामर्शस्य व्याप्तिस्मरणपक्षधर्मताज्ञानापेक्षया प्राथम्याभावात् प्रथमत एवेत्युक्तमसङ्गतम-

त आह । प्रथमत इतीति । विशिष्टज्ञानात् पूर्वमिति । तथा च प्रथमत एवेत्यस्यानुमितिसामग्र्यामसम्पन्नायामेवेत्यर्थ इति भावः ।

नन्वेवं क्वचिद्विशिष्टपरामर्शसिद्धावपि विशिष्टपरामर्शत्वरूपावच्छेदकस्य लघुत्वेऽपि च तेन रूपेण हेतुतामते तद्रूपावच्छिन्नस्य नियमकल्पनाया आधिक्येन गौरवं दुर्वारमेवेत्यत आह । एवञ्चेति । गुरुधर्मद्वयावच्छेदेनेति ।

यद्यपि व्याप्तिविशिष्टवैशिष्ट्यज्ञानत्वापेक्षया धूमत्वाद्यंशे अवच्छेदकत्वावगाहिव्याप्तिनिश्चयत्वम् गुरुत्वेऽपि धूमत्वादिप्रकारकपक्षधर्मताज्ञानत्वस्यातथात्वाद्धर्मद्वयस्य गौरवाभिधानमसङ्गतम्, तथापि गुरुधर्मद्वयेत्यस्य गुरुधर्मघटितद्वयेत्यर्थकत्वान्न दोषः ।

न्याय्यत्वादिति । न्यायमते कल्पनीयस्य द्वित्वं परमते कल्पनाधर्मिणां द्वित्वमिति कल्पनासाम्येऽपि न्यायमतेऽवच्छेदकलाघवादिति भावः । परमते एकमेव ज्ञानं कारणमन्यदवच्छेदकमिति न धर्मद्वयावच्छेदेन कारणताकल्पनमिति शङ्कां निराकरोति । गृह्यमाणेति । गृह्यमाणव्याप्यत्वावच्छेदकताकत्वञ्च वर्त्तमानव्याप्यत्वावच्छेदकत्वग्रहविषयत्वम् । पक्षधर्मताग्रहप्रकारीभवदिति विद्यमानपक्षधर्मताग्रहप्रकारार्थकम् । अतिगौरवादिति । तत्तत्कालाविद्यमानत्वप्रवेशेन कालभेदेनानन्तकार्यकारणभावप्रसङ्गादिति भावः ।

ननु कारणतावच्छेदकविशिष्टकारणस्य प्राक्सत्तायाः प्रकृते फलोपधानप्रयोजकत्वोपगमे विद्यमानत्वनिवेशं विनाप्यतिप्रसङ्गः शक्यवारणः ।

न चैवमपि समानप्रकारकपुरुषान्तरीयव्याप्तिज्ञानकालीनपक्षधर्मताज्ञानादितोऽनुमित्यापत्तिवारणाय तत्तत्पुरुषीयानुमितिजनकतायां तत्तत्पुरुषीयज्ञानमेवावच्छेदकं वाच्यमिति पुरुषभेदेन कारणताभेदो दुर्वार एवेति वाच्यम् । स्वसामानाधिकरण्यस्वविषयधर्मप्रकारकत्वोभयसम्बन्धेन व्याप्यत्वावच्छेदकताग्रहविशिष्टपक्षधर्मताज्ञानत्वेन, स्वसामानाधिकरण्यस्वप्रकारधर्मविषयकत्वोभयसम्बन्धेन पक्षधर्मताग्रहविशिष्टव्याप्यत्वावच्छेदकत्वग्रहत्वेन वा हेतुत्वोपगमे व्यधिकरणज्ञानद्वयादनुमितिवारणस्य तत्तत्पुरुषीयत्वनिवेशमन्तरेणैव सम्भवादित्यत आह । विनिगमकाभावाच्चेति । दर्शितरूपयोरेकतरस्य हेतुतावच्छेदकत्व इत्यादिः । तथा च वि-

निगमनाविरहाद्धर्मद्वयावच्छेदेनानन्यथासिद्धत्वकल्पनमावश्यकमेवेति भावः। वह्निव्याप्यवानयमिति शाब्दपरामर्शस्थले व्याप्यतावच्छेदकप्रकारकपक्षधर्मतादिग्रहविरहेण परमतेऽनुमित्यनुत्पादात्तादृशानुमितिपूर्वं विशिष्टपरामर्शस्यावश्यवादिसिद्धान्तास्थलमिति व्याप्यतावच्छेदकप्रकारकव्याप्तिपक्षधर्मताग्रहस्यानुमितिनियतपूर्ववर्त्तितायाः कथितोभयसिद्धत्वात्सम्भवप्रदर्शनपरतया यत्र वेत्यादिमूलं सङ्गमयति। तथापि चेति। तव। मीमांसकस्य। मूले तेन विनेति। विशिष्टपरामर्शाभावेनेत्यर्थः। विशिष्टपरामर्शशून्यकालेऽनुमित्यनुत्पादापत्तिर्विशिष्टपरामर्शहेतुतायां किंविधया बाधिकेत्याकाङ्क्षायामाह दीधितौ। तथा चेति। अनुमित्यनुत्पादापत्तौ चेत्यर्थः। व्यभिचारादिति। अनुमित्यनुत्पादापत्तिकथनादर्थतोऽनुमित्युत्पादलाभेन मूलग्रन्थाद्व्यतिरेकव्यभिचारलाभः। स्वमतसिद्धानुमितिसामग्रीसत्त्वकथनप्रयोजनं स्फुटयति। स्वत इति। स्वतः स्वमते। यदा चातीन्द्रियादिहेतुकं शब्दादिजन्यज्ञानद्वयघटितसामग्र्यपि नास्ति तदाऽनुमितिर्न केनाप्यनुमन्यते इति न मीमांसकमते व्यभिचारावकाश इत्यवधेयम्।

मूले अनवस्थानादिति। अनुमित्यात्मकपरामर्शार्थमपि प्रत्यक्षसामग्रीविरहेणानुमानादेव परामर्शान्तरस्याभ्युपगन्तव्यत्वादिति भावः।

पक्षतद्वृत्तिहेतोरसन्निकर्षेऽपि तद्वृत्तिधूमो वह्निव्याप्य इति व्याप्तिसाध्यकानुमित्यात्मकविशिष्टपरामर्शे प्रत्यक्षात्मकपरामर्शानुपपाद्य अनवस्थापरीहारशङ्कां निरस्यति दीधितौ। न चेति। विशेष्यसन्निकर्षविरहेण पक्षीयधूमरूपपक्षविशेष्यकव्याप्तिव्याप्यवत्तापरामर्शासम्भवाद्व्याप्यविशेष्यकपरामर्शानुधावनम्। धूममात्रासन्निकर्षेऽपीति। तथा च तदानीं धूमत्वासन्निकर्षेण तद्विशेष्यकोक्तपरामर्शस्याप्यसम्भव इति भावः। विशेष्यसन्निकर्षवद्विशेषणसन्निकर्षोऽपि विशिष्टप्रत्यक्षे हेतुरित्याशयेन धूमान्तरसन्निकर्षस्थलेऽपि पर्वतीयधूमरूपविशेषणसन्निकर्षविरहेण धूमत्वे तद्वृत्तित्वावगाहिदर्शितपरामर्शासम्भवमाह। तद्व्यक्तीति।

यद्यपि विशेषणसन्निकर्षस्य प्रत्यक्षहेतुत्वेऽपि पक्षीयधूमादिसन्निकर्षस्थलेऽपि साध्यासन्निकर्षे ज्ञानप्रत्यासत्तिं विना विशिष्टपरामर्शासम्भवादसन्निकृष्टहेतुकस्थलानुधावनमफलं ज्ञानप्रत्यासत्ति-

सत्त्वे च तत्रापि विशिष्टपरामर्शसम्भवस्तथापि चाक्षुषादिज्ञाने उपनीतस्य भानोपगमे मनोभिन्नप्रमाणासहकारित्वघटितापादककवक्ष्यमाणप्रमाणान्तरतापत्तेः । प्रत्यक्षप्रमासामग्रीविरहकालीनप्रमोत्पादकत्वापादककप्रत्यक्षविजातीयप्रमोपधायकतापत्तेश्चानवकाशात् । यत्र मानसान्योपनीतभानासम्भवस्तादृशस्थलानुधावनमित्यवधेयम् ।

(चि०) अथ यथा स देवदत्तो गौरो न वा परमाणुर्गुरुत्वाधिकरणं(१) न वेति संशयो बहिरस्वातन्त्र्येणापि मनसा कोटिस्मरणविशेषादर्शनादिसहकारिवशाज्जन्यते, यथा वा निद्रासहकारेण बाह्यस्वप्नानुभवस्तथेहापि ज्ञानान्तरोपनीतविशेष्ये व्याप्तिस्मरणसहकृतेन मनसा परामर्शो जन्यते, तदनन्तरमनुमितिदर्शनादिति चेन्न । व्याप्तिस्मरणादेः प्रमाणान्तरतापत्तेः । तदेव हि प्रमाणान्तरं यदसाधारणं सहकार्यासाद्य मनोबहिर्गोचरप्रमां जनयति, यथेन्द्रियादि ।

(दी०) असाधारणमिति शरीरादिव्युदासाय । आलोकादिवारणाय प्रमाणान्तरासहकारीति वाच्यम् । तदपि प्रमाणान्तरं भवत्येव प्रत्यक्षादिप्रमाकरणत्वेन विभागान्न तत्राघात इत्यपि काश्चित् । यद्वा असाधारणमसमवहितं, तथा च यज्जातीयप्रमाया मनोन्यकरणेनासमवहितं सत् यद्बहिर्विषयकप्रमोत्पादकं, यज्जातीयप्रमासामग्रीविरहे वा यत्प्रमोत्पादकं, तद्विजातीयप्रमाहेतुरित्येव व्याप्तिस्ततः सिद्धायां विलक्षणप्रमायां विलक्षणे च तत्करणे कल्पनीये आवश्यकत्वात् बाधकाभावाच्च तस्यैव तथात्वं पर्यवस्यतीति ।

(गा०) मूले यदसाधारणमिति । मनसा बहिर्गोचरप्रमाजनने

---

(१) परमाणू रूपाधिकरणमिति पाठोऽप्यत्रास्ति ।

यदसाधारणं सहकारि भवतीत्यर्थः। तेन बहिर्गोचरप्रमायामसाधारणकारणत्वमापादकमिति फलितम्। सुखादिगोचरप्रमाजनके सुखादिनिष्ठमनःसन्निकर्षे व्यभिचारवारणाय बहिर्गोचरेति। बहिष्ट्वञ्च लौकिकमानसाविषयत्वम्। स्मृतिजनकसंस्कारादौ व्यभिचारवारणायानुभवार्थकं प्रमापदम्। असाधारणपदप्रयोजनमाह। दीधितावसाधारणमितीति।

शरीरादीत्यादिपदात् आत्ममनोयोगादिपरिग्रहः। शरीरादेर्बहिर्गोचरप्रमाजनकत्वेऽपि जन्यज्ञानसामान्यं प्रत्येव तेषां हेतुतया तादृशप्रमां प्रत्यसाधारणकारणत्वविरहादिति भावः। अत्र तादृशप्रमाऽसाधारणकारणत्वं यदि स्मरणावृत्तितादृशप्रमावृत्तिकार्यतानिरूपकत्वं तदा स्मृतिजनकसंस्कारादवारकप्रमात्वनिवेशवैफल्यम्, विशिष्टवैशिष्ट्यानुभवत्वावच्छिन्नहेतुभूतविशेषणतावच्छेदकप्रकारकज्ञानादौ व्यभिचारश्च। अत एव जन्यज्ञानत्वानवच्छिन्नतादृशप्रमावृत्तिकार्यतानिरूपकत्वं तदित्यपि निरस्तम्।

यदि चानुभवत्वव्यापकजातिघटितधर्मावच्छिन्नकार्यतानिरूपकत्वे सति तादृशप्रमाजनकत्वं तत्, तदाऽनुभवत्वस्याप्यनुभवत्वव्यापकतया तदवच्छिन्नजनकविशेषणतावच्छेदकप्रकारकज्ञाने व्यभिचारवारणसम्भवेऽपि जन्यसत्त्वावच्छिन्नं प्रति द्रव्यत्वेन हेतौ चक्षुरादावापादकासत्त्वेन इन्द्रियादिवदिति दृष्टान्तासङ्गतिः। रूपावृत्तित्वेन सत्त्वान्यत्वेन वा तादृशजातिं विशिष्यैतद्दोषोद्धारेऽपि व्याप्तिविशिष्टवैशिष्ट्यानुभवत्वाद्यवच्छिन्नं प्रति विशेषणतावच्छेदकप्रकारकज्ञानमुद्रया व्याप्तिस्मरणादेर्हेतुतायाः सर्वमतसिद्धतया तत्रापादकासिद्धिर्दुर्वारैवेति अनुभवत्वव्याप्यजातिघटितधर्मावच्छिन्ना या तादृशप्रमावृत्तिकार्यता तन्निरूपकत्वमेव तादृशप्रमाऽसाधारणकारणत्वं वाच्यम्। अनुभवत्वव्याप्यत्वञ्च अनुभववृत्तिभेदप्रतियोगितावच्छेदकत्वं, तच्च ज्ञानत्वादेरिवानुभवत्वादेरपि व्यावृत्तमतो न विशेषणतावच्छेदकप्रकारकज्ञाने व्यभिचारः। एवं तादृशधर्मस्य स्मृतित्वेऽप्यक्षततया तदवच्छिन्नहेतुभूतसंस्कारादौ व्यभिचारवारणाय प्रमात्वनिवेशस्याप्यावश्यकता। व्याप्तिस्मरणादेर्विशिष्टवैशिष्ट्यानुभवत्वावच्छिन्नजनकत्वेऽपि नैयायिकैः सन्निकर्षविधया अलौकिकप्रत्यक्षत्वावच्छिन्नं प्रति तस्य कारणतान्तरोपगमाच्च तत्रा-

पादकासिद्धिः, तन्निरूपितताया अलौकिकप्रत्यक्षत्वावच्छिन्नकार्यताया एवानुभवत्वव्याप्यजातिघटितधर्मावच्छिन्नत्वात्तामादायैवापादकसत्तायास्तत्रोपपादनीयत्वात् । अलौकिकप्रत्यक्षत्वस्योपाधितया तदवच्छिन्नजन्यताया जात्यवच्छिन्नत्वविरहादापादकासिद्धिः स्यादतो जातिघटितेत्युक्तम् । तादृशजातावच्छेदकतापर्याप्त्यनिवेशस्फोरकमेवात्र घटितपदं न तु विवक्षितार्थकमित्यवधेयम् ।

आलोकादेरपि अनुभवत्वव्याप्यचाक्षुषत्वादिजातिघटितधर्मावच्छिन्नजनकतया निर्वाच्यप्रमाणान्तरत्वरूपापाद्यविरहेण च व्यभिचार इति तद्वारणायापादककोटौ विशेषणान्तरं पूरयति । आलोकादीति । आदिना सन्निकर्षादिपरिग्रहः । प्रमाणान्तरासहकारित्वमिति । मनोभिन्नप्रमाणासहकारित्वमित्यर्थः । स्वभिन्नतज्जन्यजनकत्वमेव तत्सहकारितापदार्थ इति चक्षुरादेः स्वात्मकप्रमाणजन्यजनकत्वसत्त्वेऽपि न दृष्टान्तासिद्धिः ।

न च चक्षुरादेः स्वभिन्नचक्षुरादिव्यक्त्यन्तरजन्यतावच्छेदकचाक्षुषत्वाद्यवच्छिन्नजनकत्वसत्त्वात् स्वभिन्नत्वविशेषणदानेऽप्यनिस्तार इति वाच्यम् स्वभिन्नत्वरूपप्रमाणविशेषणं परित्यज्य प्रमाणजन्यतायां स्वानिरूपितत्वस्य विशेषणतयैव तद्दोषानवकाशात् । उपनायकज्ञानस्य मनोरूपप्रमाणसहकारितया आपादकासिद्धिरतो मनोभिन्नेति ।

अथ सहकारित्वमत्र न तज्जन्यजनकत्वं, तथा सति चक्षुरादेरपि त्वगादिजन्यचक्षुस्त्वगाद्युभयवृत्तिद्वित्वादिजनकतया दृष्टान्तासिद्धेः । नापि तज्जन्यज्ञानजनकत्वम्, चक्षुरादेरपि इन्द्रियत्वेन त्वगादिजन्यप्रत्यक्षादिस्वरूपयोग्यतया तद्दोषतादवस्थ्यात् । फलोपहितजनकत्वादीनां तद्धर्मनिवेशनेनैतद्दोषोद्धारेऽपि शरीरादेरपि निरुक्तप्रमाणान्तरसहकारित्वसत्त्वेन तद्वारकमूलोक्तासाधारणपदवैयर्थ्यमतस्तज्जन्यतावच्छेदकजातिघटितधर्मावच्छिन्नजन्यतानिरूपकत्वमेव तत्सहकारित्वं वाच्यम् । तथा च मनोभिन्नत्वरूपप्रमाणविशेषणवैयर्थ्यम्, उपनायकज्ञानजन्यताया मनोजन्यतावच्छेदकमानसत्वघटितधर्मानवच्छिन्नत्वात्, नैयायिकैर्बहिरिन्द्रियजन्योपनीतभानसाधारणालौकिकप्रत्यक्षत्वावच्छिन्नं प्रत्येव उपनायकज्ञानहेतुत्वोपगमात् ।

न च प्रत्यक्षत्वजातिरपि मनोजन्यतावच्छेदिका प्रत्यक्षत्वावच्छिन्नं प्रति इन्द्रियत्वेन सामान्यकारणतासत्त्वादिति वाच्यम् । तादृशसामान्यकार्यकारणभावस्य प्रामाणिकत्वे (१)मनोभिन्नत्वविशेषणोपादानेऽपि तथाविधचक्षुरादिप्रमाणजन्यतावच्छेदकप्रत्यक्षत्वमादायैतद्दोषप्रसङ्ग इति निरुक्तसहकारिताघटकजातौ प्रत्यक्षनिष्ठभेदप्रतियोगितावच्छेदकत्वानिवेशनस्याऽऽवश्यकतया मनोभिन्नत्वानिवेशेऽप्युक्तदोषाभावात् ।

न च न देयमेव मनोभिन्नत्वरूपं प्रमाणविशेषणं दीधितिस्थान्तरपदस्य स्वभिन्नपरतयैव सार्थकत्वादिति वाच्यम् । मनोभिन्नत्वानुपादाने मनःसहकारिसुखादिमनःसन्निकर्षे व्यभिचाराप्रसक्तेः मूलस्थबहिःपदवैयर्थ्यापत्तेरिति ।

मैवम्, उपनायकज्ञानस्य जन्यतावच्छेदकं मानसत्वमेव बहिरिन्द्रियजन्यज्ञाने उपनीतस्य विशेषणतया तत्र विशेषणज्ञानविधयैवोपनायकज्ञानस्य हेतुत्वात्तत्साधारणधर्मस्य तज्जन्यतानवच्छेदकत्वेऽपि क्षतिविरहात्, तथा च निरुक्तमनःसहकारित्वमुपनायकज्ञानस्याक्षतमेवेति मनोभिन्नत्वरूपप्रमाणविशेषणमावश्यकम् ।

अथ वा मनोभिन्नत्वेन न प्रमाणं विशेषणीयमपि तु इन्द्रियत्वावच्छिन्ननिरूपिततज्जन्यतामादायोक्तदोषस्य वारणाय निरुक्तजातिविशेषणं परित्यज्य प्रमाणजन्यतायां मनोऽनिरूपितत्वमेव निवेश्यम्, तावतैव बहिःपदसार्थक्यादिति । आलोकादिसहकारितया चक्षुरादावसिद्धिरतः प्रमाणेति । प्रमाणत्वञ्चात्रानुभववृत्तिजातिपर्याप्तकार्यतावच्छेदकताकत्वम् । चक्षुरादेश्चक्षुष्ट्वादिना शुद्धचाक्षुषत्वाद्यवच्छिन्नं प्रत्येव सामान्यतो हेतुतासत्त्वात्तत्रेदमक्षतमेवेति । आलोकस्य च भावचाक्षुषत्वं द्रव्यचाक्षुषत्वादिकं वा जन्यतावच्छेदकम्, चक्षुःसंयोगादिरूपविषयेन्द्रियसन्निकर्षस्यापि द्रव्यचाक्षुषत्वादिकमेव तथा, न तु शुद्धचाक्षुषत्वादिकमिति न तत्सहकारितामादाय चक्षुरादावसिद्धिः । न चैवमपि चक्षुर्मनोयोगादिजन्यतावच्छेदककोटौ विषयादिनिवेशे प्रयोजनविरहेण शुद्धचाक्षुषत्वादिकमेव तज्जन्यतावच्छेदकमुपेयते एवञ्च तेषामपि निरुक्तप्रमाणत्वशालित्वेन तत्सहकारितामादाय इन्द्रियेष्वसिद्धिरिति वाच्यम् । संयोगा-

(१) प्रमापकत्वे इत्यपि क्वचित् पाठः ।

न्यत्वस्यापि प्रमाणत्वशरीरेऽन्तर्भावनीयत्वात् ।.

न चोक्तप्रमाणान्तरासहकारित्वनिवेशेऽपि उद्भूतरूपे व्यभिचारस्तस्य मूर्त्तप्रत्यक्षत्वावच्छिन्नं प्रत्येव जनकतया चक्षुरादिजन्यतावच्छेदकावच्छिन्नजन्यताकत्वरूपतत्सहकारित्वाभावादिति वाच्यम्। मीमांसकैर्वायोः प्रत्यक्षत्वाभ्युपगमेन मूर्त्तचाक्षुषत्वस्यैव तज्जन्यतावच्छेदकत्वोपगमे तस्य चक्षुःसहकारितया अक्षतत्वात्। एवं महत्त्वस्यापि द्रव्यचाक्षुषत्वमेव जन्यतावच्छेदकं न तु द्रव्यप्रत्यक्षत्वमतो न व्यभिचारः। त्रुटेरस्पार्शनत्वोपपत्तये द्रव्यस्पार्शनं प्रति त्रुटिमहत्त्वव्यावृत्तविजातीयमहत्त्वेन हेतुत्वान्तरस्याऽऽवश्यकतया चाक्षुषत्वस्य महत्त्वजन्यतावच्छेदकत्वेऽपि न परमाणुद्व्यणुकस्पार्शनापत्तिः, विषयस्य च हेतुत्वमप्रामाणिकमेवेति न तत्र व्यभिचारः।

अथ व्याप्तिस्मरणस्यापि योग्यताज्ञानविधया शब्दप्रमाणसहकारितया तत्रापादकासिद्धिरिति चेन्न । सहकारिताशरीरे चरमजन्यतायाः फलोपधानरूपाया एव विवक्षणीयत्वात्, शाब्दफलानुपधायकव्याप्तिज्ञानस्यैव पक्षत्वेन आपादकासिद्ध्यनवकाशात्।

इदन्त्ववधेयम्। प्रमाणान्तरासहकारित्वस्य निरुक्तस्य स्वातन्त्र्येणापादककोटौ न निवेशो गौरवात् अपि त्वनुभवत्वव्याप्यजातिघटितधर्मावच्छिन्नबहिर्गोचरप्रमानिष्ठकार्यतानिरूपकत्वात्मकतादृशप्रमासाधारणकारणताघटकजातावेव प्रमाणान्तरजन्यतानवच्छेदकत्वं निवेशनीयं, तच्च स्वानिरूपिता मनोऽनिरूपिता च या जन्यता तदवच्छेदकतापर्याप्त्यनधिकरणत्वम्। पर्याप्तिनिवेशात् चाक्षुषत्वादेरालोकादिजन्यतावच्छेदकघटकत्वेऽपि न दृष्टान्तासिद्धिः। मनोऽनिरूपितेत्यस्य मनस्त्वघटितधर्मावच्छिन्नानिरूपितार्थकतया मनस्त्वघटितचक्षुर्मनोयोगत्वाद्यवच्छिन्नजन्यतामादायोक्तदोषस्यानवकाशः। एवञ्च स्वानिरूपिता मनस्त्वघटितधर्मावच्छिन्नानिरूपिता च या जन्यता तदवच्छेदकतापर्याप्त्यनधिकरणं या अनुभवनिष्ठभेदप्रतियोगितावच्छेदकजातिस्तद्घटितधर्मावच्छिन्ना या बहिर्विषयकानुभवनिष्ठकार्यता तन्निरूपकत्वमापादकदलसमुदायार्थः। आपाद्यं प्रमाणत्वं प्रमाया असाधारणकरणत्वम्। असाधारणकरणत्वञ्च व्यापारवदसाधारणफलोपहितकारणत्वम्। व्यापारनिवेशात् प्रतीकान्तरवत्युपनायकज्ञाने

आपाद्यविरहनिर्वाहः । असाधारण्यप्रवेशादापादके शरीरादिवारकासाधारण्यविशेषणसार्थक्यम् । फलोपधाननिवेशाद्व्याप्तिज्ञानस्यानुमित्यात्मकप्रमास्वरूपयोग्यतामादाय नेष्टापत्तिः अनुमित्यनुपधायकस्य तस्य पक्षत्वात् ।

वस्तुतः प्रमाणव्यवहारविषयत्वमेवापाद्यं दीधितिकृतोऽभिप्रेतम्, अन्यथा आलोकेऽप्युक्तापाद्यसत्त्वेन आलोकादिवारणायेत्यादितद्ग्रन्थासङ्गतिः । प्रमाणव्यवहारविषयतावच्छेदकञ्च प्रमाणान्तरासहकारित्वगर्भम, आलोकादौ व्यापारवत्यपि प्रमाणव्यवहारविरहात्, अतो व्यवहारापादनपक्षे "आलोकस्य वारणीयत्वाभिधानसङ्गतिः । वह्निव्याप्यधूमवान् पर्वत इत्यादिविशिष्टपरामर्शात्मकवह्निविषयकप्रमायां व्याप्तिज्ञानस्य कारणत्वे तत्पञ्चममेव प्रमाणं स्यात्, तादृशप्रमायां साक्षात्त्वाग्रहेण तदसिद्ध्या तत्करणस्य प्रत्यक्षप्रमाणानन्तर्भावाद् अत इष्टापत्तिर्न सम्भवतीति सूचनाय अन्तरपदं न तु तदर्थस्यापाद्यकोटिप्रवेशः ।

एतेन प्रमाणान्तरत्वं यदि क्लृप्तप्रमाणभिन्नप्रमाणत्वं तदा आपाद्याप्रसिद्धिः, यदि प्रत्यक्षप्रमाणभिन्नप्रमाणत्वं तदापि चक्षुरादेर्दृष्टान्ततयोपन्यासविरोधः, यदि च मानसान्यप्रमाकरणत्वं तदापि मानसान्यत्वस्य वैयर्थ्यम् इति परास्तम् । प्रमाणव्यवहारविषयत्वस्यैवाभिप्रेततया तन्मात्रापादनेनैवोद्देश्यसिद्धेः ।

न च मानसजनके उपनायकज्ञाने मानसप्रमाकरणत्वं तत्करणव्यवहारश्चेष्ट इति इष्टापत्तिवारकतया तत्सार्थक्यम्, करणत्वस्य व्यापारगर्भतया इष्टापत्तेरनवकाशात् ।

न चास्तु करणत्वं व्यापारगर्भं तथापि प्रकृते तमनन्तर्भाव्य मानसान्यप्रमाऽसाधारणफलोपहितकरणत्वस्यापादनसम्भवेन तदेव मूलाभिप्रेतमस्त्विति वाच्यम् । तथा सति सिद्धान्ते व्यापाराभावेन प्रमाया करणत्वाभिधानस्य मूलकृतोऽलग्नकतापत्तेः । आलोकादौ व्यवहारमभ्युपगम्य प्रमाणान्तरासहकारित्वविशेषणमन्तरेणैव तत्र व्यभिचारं वारयतः कस्यचिन्मतमाह । तदपीति ।

ननु प्रमाणव्यवहारविषयस्यालोकादेः प्रत्यक्षानुमानेत्यादिसूत्रेऽपरिगणनात्तद्विरोध इत्यत आह । प्रत्यक्षेति । विभागात् । आलोकादीनामपि विभक्तत्वात् । तद्व्याघातः । विभाजकसूत्रविरोधः ।

अत्रेदमरुचिबीजम्; आलोकस्य सव्यापारस्य प्रमाकरणत्वोपगमसम्भवेऽपि निर्व्यापारस्य तत्संयोगादेस्तदुपगमासम्भवेन उक्तविशेषणप्रक्षेप आवश्यकः, अन्यथा शरीरादेरपि प्रमाणत्वोपगमसम्भवेनासाधारण्यविशेषणस्यापि परित्यागापत्तेः । तान्त्रिकाणां प्रमाणव्यवहारश्च तुल्य एवेति प्रमाणान्तरासहकारित्वविशेषणपूरणं विनैव निर्वाहाय प्रकारान्तरेण व्याप्तिं व्याचष्टे । यद्वेत्यादि । यज्जातीयेति । यज्जात्यवच्छिन्नेत्यर्थः । तद्भिन्नजातीयेति । तज्जातिमदवृत्तिजातिमदित्यर्थः । ईदृशव्याप्तिबलाच्चानुमित्याद्यनुपधायकव्याप्तिज्ञानादौ प्रत्यक्षत्वविरुद्धजातिमत्प्रमाहेतुत्वमापादनीयम् । यत्प्रमाया मनोन्यकरणेनासमवहितं सत् यद्बहिर्विषयप्रमोत्पादकं तत्तदवृत्तिजातिमत्प्रमाहेतुरित्युक्तौ मानसप्रमाया मनोन्यकरणाप्रसिद्ध्या यत्पदेन चाक्षुषादिप्रमाया एवोपादेयतया मानसप्रमाहेतावुपनये तदवृत्तिजातिमद्धेतुत्वमेवापाद्यम्, मानसप्रमायाः तदवृत्तिजातिमत्त्वात्तत्रेष्टापत्तिरिति यत्त्वनत्वेन जातरुपादानम्, तथा च सति यत्पदेन प्रत्यक्षत्वजातिमादाय तद्विरुद्धजातिमत्प्रमाहेतुत्वापादनेन नेष्टापत्त्यवसरः । प्रकृते प्रमानिष्ठजातिमादायैवापादनमित्येतत्सूचनाय प्रमाया इति । तज्जातीयप्रमाविजातीयप्रमाहेतुत्वमेवापाद्यं, एवञ्च यज्जातीयेत्यनेन स्मृतित्वाद्युपादाने तत्तत्प्रमाया असिद्ध्या सामान्यव्याप्तिभङ्ग इत्यतः प्रमाया इति इति केचित् ।

प्रत्यक्षकरणमनःसहकारेणैवोपनयस्य प्रमोत्पादकत्वोपगमाद्दापादकासिद्धिवारणाय मनोन्येति । मनोभिन्नप्रत्यक्षकारणमनोयोगादिसमवधानस्यावश्यकत्वादसिद्धिरिति करणेनेति । तदसमवहितं सत्प्रमोत्पादकम्, । तदजन्यप्रमोत्पादकम् । बहिर्विषयकत्वनिवेशव्यावृत्तिः पूर्ववत्, मनोन्यकरणेनासमवहितस्याप्युपनयस्य मनःसहकारेण बाह्यविषयकप्रत्यक्षजनकत्वे बाधकाभावादप्रयोजकत्वशङ्का स्यादित्याशङ्क्य कल्पान्तरमाह । यज्जातीयेति । तज्जातीयसामग्रीविरहे तज्जातीयोत्पत्तेरप्रसक्त्या प्रमायां जन्यमानायां विजातीयैव सा जनयितुं शक्येति नात्राप्रयोजकत्वशङ्का ।

न च नैयायिकैरुपनीतभानस्थले उपनयघटितायाः प्रत्यक्षसामग्र्या उपगमाद्दापादकासिद्धिरिति वाच्यम् । उपनीतविषयोपरा-

गेण (१)साक्षात्त्वस्याग्रहात्तदभावग्रहात् तादृशविषये द्रव्यादिप्रत्यक्षहेतुभूतेन्द्रियसंयोगादिविरहाच्चोपनयजन्यज्ञाने प्रत्यक्षत्वासम्भवेनापादकस्य प्रसाध्यत्वात्।

अत्र च बाह्याभ्यन्तरप्रत्यभिज्ञादौ (२)लौकिकसन्निकर्षवद्विषयोपरागेण साक्षात्त्वस्य उपनीतविषयोपरागेण च तदभावस्य ग्रहात् साक्षात्त्वं विषयताविशेष एव न तु प्रत्यक्षत्वजातिः, स एव लौकिकसन्निकर्षजन्यतावच्छेदकः, एवञ्चोपनीतभानस्य प्रत्यक्षत्वे न किञ्चिद्बाधकं बाधकविरहेऽपि साधकविरहाच्च सर्वांशोपनीतज्ञाने प्रत्यक्षत्वजातिरिति नाशङ्कनीयम्। लौकिकान्यप्रत्यक्षत्वस्यैवोपनायकज्ञानजन्यतावच्छेदकतया तत्र तत्सिद्धेः, लौकिकान्यज्ञानत्वस्य तथात्वे अप्रसिद्धसाध्यकानुमितौ स्मृतौ च व्यभिचारप्रसङ्गात्।

न च प्रत्यक्षत्वविरुद्धं जात्यन्तरमेव तथाऽस्त्विति वाच्यम्। आंशिकोपनीतभानासङ्ग्रहात्, तत्र तादृशजातिस्वीकारे तस्याः प्रत्यक्षत्वसामानाधिकरण्येन व्याप्यव्यापकभावस्यावश्यकत्वात्, आंशिकोपनीतभाने च चाक्षुषत्वमानसत्वादीनां प्रत्यक्षत्वसाधकत्वात्, इत्यादयो नैयायिकसिद्धान्तप्रकाराः अग्रे ग्रन्थकारेणैव स्फुटीकरणीयाः।

नन्वायातूक्तव्याप्तिबलात् विजातीयप्रमा, तत्करणमन्यदेवास्तां कुतो व्याप्तिस्मरणादेः प्रमाणान्तरतेत्यत आह। तत इति। ततः। उक्तव्याप्त्यनुरोधतः। सिद्धायाम्। स्वीकृतायाम्। आवश्यकत्वात्। अवश्योपेयकारणताकत्वात्। बाधकाभावादिति। अकरणत्व इत्यादिः। तस्यैव। व्याप्तिस्मरणादेरेव। तथात्वम्। तादृशप्रमाकरणत्वम्।

(चि०) संशयस्वप्नौ तु न प्रमे इति न निद्रादेः प्रमाणान्तरत्वम्। न च कथं तथापि स धूमो वह्नि-

---

(१) उपनीतविषयोपधानेन- इति पाठान्तरमप्यत्रास्ति।

(२)सोऽयं चैत्र इति बाह्यप्रत्यभिज्ञा, आभ्यन्तरप्रत्यभिज्ञा तु सुखी सोऽहमधुना दुःखीत्याकारिका।

व्याप्य इति व्यवहारस्तदानीं तद्व्याप्यत्वानुभावका- भावादिति वाच्यम् । तत्र स्मृतधूमे धूमत्वेन वह्नि- व्याप्यत्वानुमानात् । न च त्वन्मते धूमत्वेन व्याप्य- त्वानुभवः सम्भवति । अत एव यो वह्निव्याप्यवान् सोऽवश्यं वह्निमानिति व्याप्तिज्ञानवतोऽनुमितिर्ना- न्यथा ।

(दी०) संशयस्वप्नौ च भ्रमविशिष्टानुभवरूपौ येनोपन- यादिवशाद्बहिर्विषयानुभवजनने क्लृप्तशक्तिकेन मनसा दोषवशा- द्भ्रममेव तदभावादिवशात् प्रमाऽपि जनयितव्येत्याशङ्क्येत, कि- न्तु धर्मिज्ञानकोटिस्मरणादिरूपौ, धर्मिज्ञानं पुनरनुभवरूपं यथासम्भवमक्ष्यादेः, स्मरणञ्च संस्कारादित्याशयेनाह संशयेति । व्याप्यत्वानुमानादिति । धूमत्वादौ वह्निव्या- प्तिव्याप्यत्वं जानतो धूमवत्त्वादिना तद्वत्तानिश्चयदशायां अ- न्यदा त्वसंसर्गाग्रहादेवेति अतीन्द्रियादौ लिङ्गे व्याप्यत्वप्रकार- कज्ञानस्य सम्भवेऽप्यनुमितेः सर्वानुभवसिद्धतया तस्य कारण- त्वे बाधिते परिशेषाद् गुरोरपि व्याप्यतावच्छेदकप्रकारकज्ञान- स्य हेतुत्वे सिद्धे शाब्दव्याप्यवत्ताबोधस्थलेऽपि कल्प्यते, कार- णं विना कार्योत्पत्तेरसम्भवात् । तेन विना तत्रानुमितेरप्रसिद्ध- त्वात् न तस्यापि हेतुताबाधः । तत्रातीन्द्रियलिङ्गादौ सर्वानुभ- वसिद्धाया अप्यनुमितेः सर्वथैवापलापः, मम क्वचित् कालविल- म्बादिमात्रकल्पनमित्याशयेनाह । अत एवेति ।

(गा०) ननु संशयस्वप्नौ तु न प्रमे इति मूलमसङ्गतम् ? तयो- रप्यबाधितविषये प्रमात्वात् । अथ सर्वांशे प्रमात्वमत्र विवक्षितम्, स्वप्नस्य किञ्चिदंशे भ्रमत्वं नियमतः स्वीक्रियत इति चेत् ? मा भूत सर्वांशे तयोः प्रमात्वं, तथाऽपि तत्र इन्द्रियसंयोगादिरूपप्रत्या-

सत्तिशून्यविषयभानार्थं ज्ञानस्य प्रत्यासत्तित्वमावश्यकमिति तस्य प्रमाणत्वं दुर्वारमेवत्यतो मूलस्याऽऽशयं व्याचष्टे । संशयेति ।

न विशिष्टानुभवरूपो । न योग्यतासहितेन्द्रियसंयोगादिशून्यवस्तुसंसर्गविषयकप्रत्यक्षरूपौ । तथात्वे किमनिष्टमित्याकाङ्क्षायामाह । येनेति । येन इत्याशङ्क्यतेत्यन्वयः । तदभावादीत्यादिपदाद्विषयाबाधपरिग्रहः । प्रमापि जनयितव्येति । अप्रमाया अप्यबाधितविषये प्रमात्वस्यावर्ज्जनीयत्वादिति शेषः । तथा च तस्य (१)प्रमाणत्वापत्तिदुर्वारैवेति भावः । धर्मिज्ञानकोटिस्मरणादिरूपाविति । धर्मिणि लौकिकसन्निकर्षादिसत्त्वेऽनुभवात्मकेन अन्यदा च स्मरणरूपेण तज्ज्ञानेन सहितं यत् तदगृहीतासंसर्गकस्य पूर्ववत् कदाचित् स्मरणरूपं कदाचिच्चानुभवात्मकं ज्ञानं तद्रूपावित्यर्थः । धर्मिज्ञानमित्यत्र धर्मिपदं धर्म्मस्याप्युपलक्षणम्(२) । अक्षादेः । लौकिकप्रत्यासत्तिसहकृतेन्द्रियादेः । आदिना अनुमानादिपरिग्रहः । संस्कारादिति । अतो नोपनयोपयोग इति शेषः । असन्निकृष्टे धूमे धूमत्वेन हेतुना व्याप्त्यनुमानं धूमत्वेन व्याप्तिव्याप्यत्व–पक्षधर्म्मताज्ञानं विना न सम्भवतीति अनुमानात् विशिष्टव्यवहारोपपादनं मूलकृतस्तादृशज्ञानदशाभिप्रायकतयोपपादयन् न्यूनताभङ्गायान्यदा व्यवहारमन्यथोपपादयति । धूमत्वादावित्यादिना ।

असंसर्गाग्रहादेवेत्येवकारेण विशिष्टज्ञानव्यवच्छेदः । यद्यपि तन्मते विशिष्टज्ञानस्थलेऽप्यसंसर्गाग्रह एव विशिष्टव्यवहारहेतुर्न तु विशिष्टज्ञानं, तथाऽपि विशिष्टज्ञानस्यापि विशिष्टविषयकत्वमपुरस्कृत्य तत्तत्पदार्थविषयकत्वेनासंसर्गाग्रहनिष्ठकारणतायामवच्छेदकत्वाद्विशिष्टविषयकानुमानस्य व्यवहारप्रयोजकत्वोक्तेर्नासङ्गतिः ।

अत एवेत्यादिमूलेन व्याप्यतावच्छेदकधूमत्वाद्यनवगाहिशाब्दादिपरामर्शस्थले तादृशपरामर्शप्रकारीभवद्व्याप्यत्वावच्छेदेन व्याप्त्यग्रहदशायामनुमितिर्न भवतीत्यभिहितम् । तत्र च नैयायिकानामप्यतीन्द्रियादिहेतुकस्थलेऽनुमितिर्न भवतीत्युक्तिसम्भवात्

---

(१) व्याप्तिस्मरणादेरित्यर्थः ।

(२) स्वप्रतिपादकत्वे सति स्वेतरप्रतिपादकत्वमुपलक्षणत्वम् ।

तुल्यत्वशङ्कां परिजिहीर्षुराशयं व्याचष्टे । अतीन्द्रियेति । व्याप्यत्वप्रकारकज्ञानस्य । व्याप्यत्वप्रकारकपक्षधर्मताज्ञानस्य । सर्वानुभवसिद्धतया इत्यनेन दुरपह्नवत्वं दर्शितम् । बाधित इत्यस्य व्यभिचारनिश्चयेनेत्यादिः । व्याप्यतावच्छेदकप्रकारकज्ञानस्य । व्याप्यतावच्छेदकप्रकारकव्याप्तिपक्षधर्मताज्ञानत्वावच्छिन्नस्य । तद्व्याप्त्यवच्छेदेन व्याप्तिप्रकारकज्ञानं कल्पनीयं, कल्पनाबीजमाह । कारणं विनेति ।

ननु तत्र तदभावेऽप्यनुमित्युत्पत्त्या तस्य हेतुतैव किं न बाध्यते इत्यत आह । तेन विनेति । तत्र । शाब्दव्याप्यवत्ताज्ञानस्थले । नन्वेवं फलापलापोऽविशिष्ट इत्यत आह । नवेति । सर्वथैवापलाप इति । कालविलम्बेनापि विशिष्टपरामर्शासम्भवादिति भावः । कालविलम्बादीति । व्याप्त्यवच्छेदेन व्याप्तिज्ञानोत्पत्त्या कालविलम्बेनानुमितिसम्भवादिति भावः । उपनीतभानानङ्गीकर्तॄणां व्याप्त्यवच्छेदेन व्याप्तिज्ञानं तत्रानुमितिरूपं स्मृतिरूपं वेति हृदयम् ।

(चि०) अथ पर्वतीयधूमे धूमत्वेन ज्ञाने वह्निव्याप्योऽयं न वेति संशयेऽप्यनुमितिः स्यादिति चेन्न । धूमो वह्निव्याप्य इति स्मरणे विद्यमाने धूमत्वज्ञानस्य विशेषदर्शनत्वेन संशयाभावात् । अन्यथा परामर्शोऽपि कुतो न स्यात्? संशयेन प्रतिबन्धादिति चेत्? तुल्यम् । न च सामान्यनिश्चयस्य सामान्यसंशयनिवर्त्तकत्वात् धूमसामान्ये संशयो मा भूत् विशेषसंशयस्तु विशेषनिश्चयनिवर्त्तनीय इति धूमविशेषे संशयनिरासार्थं पृथग् व्याप्तिनिश्चयो वाच्य इति वाच्यम् । यत्र हि यद्व्यावर्त्तकधर्मदर्शनं तत्र न तत्संशयः तच्च सामान्ये विशेषे वेति । वस्तुतस्तु धूमत्वपुरस्कारेण व्याप्तिस्मरणे पक्षधर्मताज्ञाने चानुमितिर्भवत्येव ।

(दी०) तुल्यमित्यभ्युपगमवादः । यत्र । यदवच्छिन्ने । यथा हि तदभावेन तदभावव्याप्यतया गृहीतेन वा विशिष्टे न तत्संशयः, तथा, यदवच्छेदेन तद्व्यावर्त्तकधर्मदर्शनं तद्विशिष्टेऽपि अनुभवबलात् । व्यावर्त्तकश्च तदभावो यदवच्छेदेन वा तदभावोऽवगतः, यो वा तदभावव्याप्यत्वेन गृहीतः । यथा स्थाणुत्वाभावस्य पुरुषत्वावच्छेदेन ग्रहे पुरुषत्वस्य स्थाणुत्वाभावव्याप्यत्वेन गृहीतस्य करादेर्वा इदन्त्वावच्छेदेन ग्रहे पुरुषोऽयं स्थाणुर्न वेति न संशयः । तदभावादिवच्च तद्वदन्योन्याभावादिः, तादात्म्येन तत्संशये च तदन्योन्याभावादिरपि द्रष्टव्यः । एवं तद्भ्रमोऽपि न, विशेषदर्शनस्य विपरीतज्ञानमात्रविरोधित्वादित्यग्रे स्फुटीभविष्यति ।

(गा०) तुल्यमित्यनेन मूले पक्षधर्मे व्याप्तिसंशयस्य प्रतिबन्धकत्वमुक्तं(१), तन्न युक्तं, विशेषदर्शनेन ज्ञानद्वयानन्तरं संशयानुत्पादेन तत्प्रतिबन्धकतायां मानाभावादित्यत आह । तुल्यमितीति ।

अभ्युपगमवादः । ज्ञानद्वयानन्तरं संशयोत्पादाभ्युपगमेनोक्तिः । तथा च संशयस्यानुमितिप्रतिबन्धकतायां न निर्भरः किन्तु विशेषदर्शनात् संशयानुत्पत्तावेव । अत एवाग्रे संशयोत्पत्त्या शङ्कापि सङ्गच्छत इति भावः ।

मूले सामान्यनिश्चयस्येति । सामान्यधर्मपुरस्कारेण विरोधिनिश्चयस्येत्यर्थः । धूमसामान्ये संशयः, शुद्धधूमत्वपुरस्कारेण व्याप्यत्वसंशयः । मा भूदिति । तत्प्रकारेण व्याप्तिनिश्चयसत्त्वादिति भावः । विशेषसंशयः । विशेषधर्मावच्छेदेन तद्वत्तासंशयः । विशेषनिश्चयनिवर्त्तनीयः । विशेषधर्मपुरस्कारेण विरोधिनिश्चयमात्रानिवर्त्तनीयः । धूमविशेषे संशयनिरासार्थम्, पर्वतीयधूमत्वपुरस्कारेणाव्याप्यत्वसंशयस्थलेऽनुमितिनिरासार्थम् ।

---

(१) अनुमितिं प्रतीत्यादिः ।

पृथग् व्याप्तिनिश्चयः । पर्वतीयधूमत्वपुरस्कारेण व्याप्तिनिश्चयः । वाच्यः । अनुमितिहेतुतया स्वीकार्यः ।

यद्यपि पूर्वं धूमत्वदर्शनस्यैव व्यावर्त्तकधर्मदर्शनविधया संशयविरोधित्वमुक्तं न तु व्याप्तिनिश्चयस्येति धूमसामान्ये व्याप्तिनिश्चयात्तत्सामान्ये संशयानुत्पादोपगमेन विशेषसंशयोपपादनं न युज्यते, तथाऽपि पर्वतवृत्तित्वसामानाधिकरण्येन धूमत्वदर्शनात्तदवच्छेदेन व्याप्त्यभावसंशयनिवृत्तावपि पर्वतीयधूमत्वावच्छेदेन व्याप्त्यभावसंशयो दुर्वारः पर्वतीयत्वावच्छेदेन धूमत्वानिश्चयासम्भवादिति शङ्काया धूमत्वज्ञानस्य विशेषदर्शनत्वेनेत्यादिसिद्धान्तोपरिसम्भवाद् धूमत्वपुरस्कारेण व्याप्तिनिश्चयस्य पर्वतीयधूमत्वावच्छेदेन तदभावसंशयनिवर्त्तकत्वमपि तादृशग्रन्थतात्पर्यविषयस्तन्नैवेयं शङ्का ।

अथ पर्वतवृत्तित्वावच्छेदेन तत्सहितधूमत्वावच्छेदेन वा व्याप्तिविरहशङ्का नैयायिकसिद्धानुमितिहेतुताकस्य व्याप्तिविशिष्टे धूमे पक्षधर्मतावैशिष्ट्यावगाहिनिश्चयस्याप्यनिवर्त्या, असमानधर्मितावच्छेदकत्वात्पक्षधर्मताविशिष्टे व्याप्तिनिश्चयश्च तच्छङ्कानिवर्त्तकोऽपि नानुमितिहेतुः, व्याप्तिविशिष्टवैशिष्ट्यबोधस्यैवानुमितिहेतुताया वक्ष्यमाणत्वात् । उभयविधपरामर्शस्य तथात्वेऽपि व्याप्तिविशिष्टवैशिष्ट्यबोधघटितानुमितिसामग्रीदशायां तादृशशङ्काया दुरुच्छेदतया तत्सत्त्वे नैयायिकैरनुमितिस्वीकारे मीमांसकानामपि ज्ञानद्वयसत्त्वे तच्छङ्कासत्त्वेऽप्यनुमितावविघ्नापत्तिसम्भवेन तादृशशङ्कोच्छेदोपायानुसरणप्रयासवैयर्थ्यात् ।

यत्तु व्याप्तिविशिष्टधूमे पर्वतवृत्तित्वशङ्कादशायां मीमांसकमतेऽनुमित्यापत्तिपरतया मूलशङ्कावर्णनेनोक्तापत्तिसमाधानं 'पृथग्व्याप्तिनिश्चयो वाच्य' इत्यस्यापि व्याप्तिविशिष्टधूमे पक्षधर्मतानिश्चयस्यानुमितिहेतुत्वस्वीकारपरतया वर्णनम्, तदशुद्धम्, मीमांसकमते धूमत्वावच्छेदेन पक्षधर्मत्वासत्त्वेनान्यथाख्यातिस्वीकारप्रसङ्गभयेन धूमत्वसामानाधिकरण्येनैव पक्षधर्मतानिश्चयहेतुताया वाच्यतया विशिष्टधूमत्वावच्छेदेन पक्षावृत्तित्वशङ्कायाः शुद्धधूमत्वसामानाधिकरण्येन पक्षधर्मतानिश्चयाप्रतिबध्यतया मीमांसकानामनुमितिजनकपक्षधर्मतानिश्चयस्य तादृशशङ्कोच्छेदकत्वाभिधाने·

न समाधानासङ्गतिरिति चेन्न । पक्षवृत्तिधूमत्वविशिष्टे व्याप्तिज्ञानमात्रस्यानुमितिहेतुत्वेऽपि नैयायिकानामुद्देश्यसिद्धेस्तदभ्युपगमेनैव तादृशपरामर्शप्रतिबध्यायाः पक्षवृत्तित्वावच्छेदेनाव्याप्यत्वशङ्काया ज्ञानद्वयसम्भवशङ्कनसङ्गतेः ।

वस्तुतः पक्षवृत्तिधूमत्वावच्छेदेन व्याप्तिविरहशङ्कायां व्याप्तिविशिष्टे पक्षधर्मतानिश्चयो विरोधी, यज्ज्ञानं यदुभयधर्मसामानाधिकरण्यमवगाहते तस्य तदेकतरावच्छेदेनापरधर्माभावशङ्कानिवर्त्तकताया अनुभवसिद्धत्वात्, पक्षवृत्तिधूमत्वस्य उक्तपरामर्शधर्मितानवच्छेदकत्वेऽपि तदवच्छेदेनाव्याप्यत्वशङ्कायाः पक्षवृत्तिधूमत्वव्याप्यत्वसामानाधिकरण्यावगाहिकथितपरामर्शसत्त्वे उत्पत्त्यसम्भवादित्यभिप्रायकतया यथाश्रुतप्रकृतमूलसङ्गतिः । सामान्यघटितविशेषधर्मपुरस्कारेण संशये सामान्यधर्मसामानाधिकरण्यमात्रावगाहिनिश्चयस्याविरोधित्वेऽपि सामान्यधर्मावच्छेदेन विरोधिनिश्चयस्य विरोधित्वमावश्यकमवच्छेदकावच्छेदेन विपरीतज्ञानप्रतिबध्यतावच्छेदककोटौ तद्धर्मितावच्छेदकपर्याप्तधर्मितावच्छेदकत्वपर्यन्तानिवेशादित्यभिप्रायेण समाधत्ते । यत्र हीति । व्यावर्त्तकधर्मदर्शनस्य धर्मितावच्छेदकावच्छिन्नत्वावगाहितां स्फुटयितुं व्याचष्टे दीधितौ । यत्र यदवच्छिन्ने इति ।

परं तु धूमसामान्ये संशयो मा भूदिति । व्यावर्त्तकधूमत्वेन निश्चिते पर्वतीयत्वसामान्यधर्मविशिष्टे तदवच्छेदेनाव्याप्यत्वसंशयो मा भूदित्यर्थः । विशेषसंशयस्त्वित्यादेः पूर्व एवार्थः । समानविषयकत्वमेव विरोधितायां तन्त्रं न तु समानप्रकारकत्वमपीत्याशयेन समाधत्ते । यत्र हीति । यथाश्रुतार्थक्रमेणाह । तत्र । समानधर्मिकव्यावर्त्तकधर्मदर्शनञ्च । सामान्ये । सामान्यधर्मविशिष्टविशेष्यकम् । विशेषे वा । विशेषधर्मविशिष्टविशेष्यकं वा । तथा च पर्वतीयधूमे पर्वतीयत्वमात्रेण धूमत्वनिश्चयेऽपि पर्वतीयधूमत्वपुरस्कारेण न संशयसम्भव इति भावः ।

यद्यपि धूमत्वे व्याप्त्यवच्छेदकत्वावगाहिनिश्चयस्य धूमत्वघटितधर्मावच्छिन्नविशेष्यताकसंशयप्रतिबन्धकत्वात्तादृशनिश्चयादपि प्रकृते संशयनिवृत्तिः सम्भवति तथापि शुद्धपर्वतीयत्वाद्यवच्छेदेनाव्याप्यत्वशङ्कानिरासार्थम् धूमत्वनिश्चयस्यादरणीयतया तत एव

पर्वतीयधूमत्वावच्छिन्नविशेष्यकसंशयनिवृत्तिरुपपादिता, समानविषयकत्वेन विरोधितावादिनां धर्मितावच्छेदकेऽवच्छेदकत्वावगाहिनोऽपि भिन्नधर्मिकज्ञानस्याविरोधित्वाभिप्रायेण वेति स्वातन्त्र्येण मूलं वर्णयन्ति ।

सामान्यप्रत्यासत्तिमनङ्गीकुर्वतां व्याप्तिनिश्चयस्य पर्वतीयधूमाविषयकतया धूमत्वे व्याप्त्यवच्छेदकत्वावगाहित्वेऽपि धूमत्वघटितधर्मावच्छिन्नपर्वतीयधूमधर्मिकसंशयविरोधित्वे विवादः सम्भवतीति दृष्टान्तेनानुभवं द्रढयंस्तं निराकुरुते । यथा हीति । तदभावेन विशिष्टे न तत्संशय इति योजना । धर्मिविशेषणत्वञ्च तदभावादीनां धर्मितावच्छेदकताख्यं विषयत्वम् । स्थाणुत्वाभावव्याप्यं करादीति स्वतन्त्रज्ञानदशायामपि शुद्धकरत्वाद्यवच्छिन्नं धर्मितावच्छेदकीकृत्य स्थाणुत्वादिसंशयानुदयाद् व्याप्तिविशिष्टेनेत्युपेक्ष्य 'व्याप्यतया गृहीतेन' इत्युक्तम् । तदव्यवहितप्राक्क्षणे तत्क्षणे वा तस्य पुंसो व्याप्यतया निश्चयविषयेणेत्यर्थः । तदभावेन तदभावव्याप्तिविशिष्टेन च विशिष्टे तद्वत्त्वज्ञानमाहार्यमेव प्रसिद्धमिति तादृशज्ञाने इच्छाया एव हेतुत्वात्तदभावादेव नाहार्यतादृशसंशयप्रसङ्गः । करादिमान् स्थाणुर्न वेति संशयश्च करत्वाद्यवच्छिन्ने स्थाणुत्वाद्यभावव्याप्तिनिश्चयशून्यकाले इच्छां विनापि प्रसिद्ध इत्यनाहार्यतादृशज्ञाने तथाविधव्याप्तिनिश्चयत्वेन प्रतिबन्धकतां कल्पयित्वा तादृशनिश्चयदशायामसौ निरसनीयः । तथेत्यादि । तद्विशिष्टेऽपि न तत्संशय इत्यनुषङ्गेणान्वयः । यदवच्छेदेन तदभावादिनिश्चयस्तस्यापि तदभावादितुल्यत्वादिति भावः । अनुभवबलादित्यग्रिमहेत्वन्वयानुरोधेन 'इत्यविवाद' इति पूरणीयम् ।

ननु धूमत्वाद्यवच्छेदेन व्याप्त्यभावव्यावर्त्तकधर्मः प्रकृते न गृहीतः अपि तु तदभावो व्याप्तिरेवेति व्यावर्त्तकपदस्य तदभावावच्छेदकमात्रपरत्वाभिमानिनामाशङ्कां निराकरोति । "व्यावर्त्तकश्चेति" । स्थाणुत्वाभावव्याप्यः करः करवांश्चायमिति ज्ञानद्वयस्यापि अयं स्थाणुर्न वेति संशयविरोधितया व्याप्तिविशिष्ट इत्युपेक्ष्य व्याप्यतया गृहीत इत्युक्तम् ।

अथ यदवच्छेदेन तदभावोऽवगत इत्यस्य यस्तदभावावच्छेदकत्वेनावगत इत्यर्थः अवच्छेदकत्वञ्चानतिरिक्तवृत्तित्वमेव न तु

स्वरूपसम्बन्धविशेषः, पुरुषत्वादौ स्थाणुत्वाभावादेस्तादृशावच्छेदकताया अप्रामाणिकत्वात्, मीमांसकानामपि धूमत्वादौ व्याप्यत्वानतिरिक्तवृत्तित्वज्ञानमेवानुमितिहेतुत्वेनोपगतमित्यभिप्रायेण मूलं सङ्गमनीयम्, एवञ्चानतिरिक्तवृत्तित्वस्य व्याप्तिरूपतया व्याप्यतया गृहीत इत्यनेन पौनरुक्त्यम्।

न च यदवच्छेदेनेत्यादेर्यत्र यदभावस्य व्याप्तिः संसर्गतयाऽवगतेति व्याप्यतयेत्यस्य व्याप्तिप्रकारेणेत्यर्थ इति भेदः। पुरुषो न स्थाणुरित्याकारके पुरुषत्वावच्छेदेन स्थाणुत्वाभावग्रहे च पुरुषत्वांशे व्याप्तिः संसर्गतयैव भासते न तु प्रकारतया तद्विशिष्टवाचकपदानुल्लेखात् संसर्गतया प्रकारतया च भानस्य पृथक्कथनं प्रतिबन्धकताया भेदसूचनाय तत्प्रकारकज्ञानस्य तदीयसंसर्गाविशेषावगाहित्वेनैव प्रतिबन्धकताया अनतिप्रसङ्गाय कल्पनीयतया तत्संसर्गकज्ञानस्य च तदीयसंसर्गानवगाहितया तेन रूपेणासङ्ग्रहादिति वाच्यम्। संसर्गतासंसर्गविशेषावच्छिन्नप्रकारतयोः संसर्गविशेषानवच्छिन्नप्रकारतान्यविषयतात्वेनानुगमेनातिप्रसङ्गविरहादिति चेन्न।

अवच्छेदकावच्छेदेन स्थाणुत्वाभावादिज्ञाने अवच्छेदकांशे व्याप्तिः संसर्गतयाऽपि न भासते, पुरुषो न स्थाणुरित्यादिज्ञानस्य पुरुषत्वाद्यंशे निष्प्रकारकतया अनुभवसिद्धत्वात्, किन्तु धर्मितावच्छेदकपुरुषत्वादिव्यापकताविशिष्टविशेषणतैव स्थाणुत्वाभावादेः पुरुषादौ संसर्गतया भासते, एवञ्च यद्व्यापकताविशेषणतासंसर्गेण तदभावो धर्मिण्यवगत इत्येव यदित्यादेरर्थ इति न पौनरुक्त्यम्।

यदि च विशेषणतात्वादिना व्यापकतायाः संसर्गघटकत्वे प्रमेयत्वाद्यवच्छेदेन स्थाणुत्वाभावादिज्ञानमपि प्रमा स्यादिति स्थाणुत्वाभावीयविशेषणतात्वेन व्यापकत्वमेव तथा वाच्यम् तथा च स्थाणुत्वाद्यभावस्यापि संसर्गान्तःपातित्वे तदंश एव व्यापकत्वभानमुचितम्। तथा सति स्थाणुत्वाभावः पुरुषत्वनिष्ठाभावाप्रतियोगी अयञ्च पुरुष इत्यादिज्ञानस्य स्थाणुत्वाभावादिधर्मिकपुरुषत्वव्यापकताग्रहसहितपुरुषत्वादिप्रकारकनिश्चयत्वेन प्रतिबन्धकताया अयं स्थाणुर्न वेति संशयं प्रति क्लृप्तत्वात् पुरुषो न स्थाणुरयञ्च पुरुष इत्यादिज्ञानस्य तद्रूपाक्रान्ततया न पृथक् प्रतिबन्धकत्वं, उक्त-

ज्ञानप्रतिबन्धकतायां व्यापकत्वीयसंसर्गविशेषावगाहित्वनिवेशेऽपि न क्षतिः, व्यापकताविशिष्टघटितसंसर्गकज्ञानेऽपि विशिष्टघटकस्य वैशिष्ट्यस्यावश्यं भानादिति मन्यते तदा यदित्यादेरपि यद्व्यापकतया तदभावोऽवगत इत्येवार्थः ।

न च व्याप्तिघटकसामानाधिकरण्यांशभानस्याप्रयोजकतया यो वेत्यादेरपि उक्त एवार्थ इति पौनरुक्त्यं दुर्वारमेवेति वाच्यम् । व्याप्तिपदेन तद्वदन्यावृत्तित्वस्यैवाभिहितत्वात्, व्यापकसामानाधिकरण्यज्ञानस्य यदवच्छेदेनेत्याद्यन्तर्भावेऽपि क्षतिविरहात् ।

वस्तुतस्तु ग्राह्याभावांशे तद्धर्मव्यापकतायाः संसर्गघटकविशेषणविधया भानमात्रं न विरोधितायां प्रयोजकम्, तथा सति यत्र पुरुषो न स्थाणुरित्यादिज्ञाने करादिव्यापकताविशिष्टस्थाणुत्वाद्यभावीयविशेषणतादेः संसर्गतया भानम्, तादृशज्ञानसहितस्य करादिमानयमित्यादिज्ञानस्याप्ययं स्थाणुर्न वेत्यादिज्ञानविरोधिताप्रसङ्गात् । अतस्तद्धर्मविशिष्टे ग्राह्याभावावगाहित्वसहितमेव तद्धर्मव्यापकतायास्तथा भानं विरोधिताप्रयोजकमित्युपेयम्, तथा च ग्राह्याभावांशे तद्धर्मव्यापकताप्रकारकस्य तद्धर्मविशिष्टे ग्राह्याभावाप्रकारकस्यापि ज्ञानस्य तद्धर्मवत्ताज्ञानधर्मितावच्छेदकविशिष्टविशेष्यकज्ञानविरोधितया न तदभावव्याप्यतदभावावच्छेदकधर्मदर्शनयोरेकरूपेण प्रतिबन्धकतासम्भवः ।

न च ग्राह्याभावांशे तद्धर्मव्यापकताप्रकारकस्यैव संसर्गघटकतया तद्विषयकस्यापि तद्धर्मविशिष्टे ग्राह्याभावानवगाहिनो विरोधित्वमिष्टमेव संसर्गघटकविशेषणविषयतायाः प्रकारतातुल्यत्वादिति वाच्यम् । तथा सति पुरुषत्वाद्यवच्छेदेन स्थाणुत्वाद्यभावावगाहिनः पुरुषः स्थाणुर्न वेत्यादिसंशयस्यापि स्थाणुत्वाद्यभावांशे पुरुषत्वादिव्यापकत्वविषयकतया तत्सहितपुरुषत्वादिप्रकारकज्ञानस्य स्वसमानधर्मितावच्छेदककस्थाणुत्वादिविशिष्टज्ञानाविरोधिताया निर्बीजतापातात् । न हि त्वन्मते तादृशसंशयस्य संशयत्वमेवाविरोधिताबीजमिति सम्भवति, पुरुषत्वादिविशिष्टे स्थाणुत्वाभावावगाहिताया विरोधितायामप्रयोजकत्वेन स्थाणुत्वाभावांशे संशयत्वस्य घटादिरूपोदासीनविषयांशे संशयत्वतुल्यत्वात् ।

एतेन पुरुषत्वादिसामानाधिकरण्येन स्थाणुत्वादिविशिष्टबुद्धौ पुरुषत्वाद्यवच्छेदेन तद्विपरीतनिश्चयस्य विरोधितायामभावांशे पुरुषत्वादिव्यापकतावगाहित्वमेव बीजं न तु पुरुषत्वादिविशिष्टे अभावावगाहित्वमपि, तत्र तदनवगाहिनोऽपि स्थाणुत्वाभावव्याप्यं पुरुषत्वं पुरुषत्वव्यापकः स्थाणुत्वाभाव इत्यादिव्यापकताप्रकारकज्ञानस्य पुरुषः स्थाणुरित्यादिधीविरोधित्वात् । तथा च तादृशव्यापकताप्रकारकज्ञानस्य तादृशव्यापकताविषयकत्वेनैव प्रतिबन्धकतासम्भवादवच्छेदकावच्छेदेन बाधबुद्धेः पृथक् प्रतिबन्धकतायां मानाभावः तस्या अपि उक्तरूपाक्रान्तत्वात् । एवं धर्मितावच्छेदकसामानाधिकरण्येनाभावविशिष्टबुद्धेर्धर्मितावच्छेदके प्रतियोगिव्यभिचारधीरूपतया अवच्छेदकावच्छेदेन प्रतियोगिविशिष्टज्ञानस्य तत्प्रतिबध्यत्वे प्रतियोगिन्यवच्छेदकव्यापकतावगाहित्वमेव बीजम्, तथा च व्यापकताप्रकारकतत्संसर्गकज्ञानसाधारणानुगतरूपेणैव तत्प्रतिबध्यताकल्पनसम्भवादवच्छेदकावच्छेदेन विशिष्टबुद्धाववच्छेदकसामानाधिकरण्यावगाहिबाधबुद्धेरपि पृथक् प्रतिबन्धकत्वे मानाभावः । न च तादृशव्यभिचारज्ञानस्य व्यापकताज्ञानविरोधित्वमेव नास्तीति वाच्यम् । लाघवेनैव तद्विरोधितास्वीकारौचित्यात् प्राचीनासिद्धान्तासिद्धत्वाच्च इति परास्तम् ।

संसर्गतया व्यापकतामात्रावगाहित्वस्य विरोधिताबीजत्वे ऽवच्छेदकावच्छेदेनाभावावगाहिनः पुरुषः स्थाणुर्न वेत्यादिसंशयस्य पुरुषः स्थाणुर्न वेति ज्ञानाविरोधितया निर्बीजत्वापातात् । तादृशव्यापकतावगाहित्वस्य व्यापकतानिरूपकधर्मविशिष्टे ग्राह्याभावावगाहित्वस्यैव विरोधिताबीजतया करादिव्यापकताविशिष्टस्थाणुत्वाद्यभावं संसर्गघटकतयाऽवगाहमानस्य पुरुषो न स्थाणुरित्यादिज्ञानस्य करादिमान् स्थाणुरित्यादिज्ञानाप्रतिबन्धकत्वनिर्वाहाय तद्धर्मावच्छिन्नविशेष्यकग्राह्याभावावगाहिज्ञानत्वेन बाधबुद्धेर्ग्राह्याभावांशे व्यापकताप्रकारकबुद्धेश्च व्याप्यधर्मधर्मितावच्छेदककबुद्धौ तादृशव्यापकताप्रकारकत्वेन पृथक् प्रतिबन्धकताया आवश्यकत्वात् व्यभिचारधियो . व्यापकताग्रहविरोधित्ववादिनां प्राचां तत्संशयस्यापि तद्विरोधितायाः अनुमततया संसर्गविधया

व्यापकतांवगाहित्वस्य तत्प्रतिबध्यताबीजत्वे पुरुषः स्थाणुर्न वे-त्यादिसंशयेऽवच्छेदकावच्छेदेन स्थाणुत्वाद्यभावावगाहिताया एवानुपपत्तेश्चेति ।

यदि चावच्छेदकसामानाधिकरण्यमात्रेण तदवच्छेदेन विशेष-णमवगाहमानयोर्बुद्ध्योर्वैलक्षण्यनिर्वाहायावच्छेदकावच्छेदेन बुद्धौ व्यापकतायाः संसर्गघटकतया भानमुपेयते पुरुषत्वादिधर्मिता-वच्छेदककबुद्धौ च करादिव्यापकतायाः संसर्गघटकतया भानमप्रा-माणिकं तदा पुरुषो न स्थाणुरित्यादिधीसहितस्य करादिमत्ता-ज्ञानस्य स्थाणुत्वादिविशिष्टधीविरोधित्वाप्रसक्तेरनुगतरूपेणैव ग्राह्याभावांशे तद्धर्मव्यापकताप्रकारकज्ञानस्य तद्धर्मावच्छे-देन ग्राह्याभावज्ञानस्य च तद्धर्मदर्शनप्रतिबन्धकतायां निवेशः पुरुषः स्थाणुर्न वेत्यादिसंशयकालीनपुरुषत्वादिग्रहस्य चाविरो-धितोपपत्तये व्यापकताज्ञाने पुरुषत्वाद्यवच्छिन्नविशेष्यकस्थाणु-त्वादिसंशयभेदो निवेशनीयः । स्थाणुत्वाद्यभावांशे व्यापकताप्र-कारकनिश्चयश्च तादृशस्थाणुत्वादिसंशयरूपो नास्त्येव तादृशनि-श्चयस्य स्वकालेऽपि तादृशसंशयविरोधित्वादतो न तादृशसंशय-रूपव्यापकताप्रकारकनिश्चयासङ्ग्रहभयेन तादृशसंशयभेदस्य प्रतिब-न्धकत्वावच्छेदकत्वासम्भवस्यावकाशः । एवं तादृशसंशयभेदं नि-वेश्य पुरुषत्वाद्यवच्छेदेन स्थाणुत्वाद्यभावनिश्चयसाधारणेन रूपे-ण स्थाणुत्वाद्यभावः पुरुषत्वादिव्यापक इति बुद्धेः पुरुषः स्था-णुरित्यादिधीप्रतिबन्धकतासम्भव इति ध्येयम् ।

अत्रापि ज्ञानजन्तमुपेक्ष्य अवगतो गृहीत इति क्तान्तप्रयोगौ यदा संशयानुत्पादो निर्वाह्यः तदव्यवहितप्राक्क्षणे तज्ज्ञानस-त्त्वमपेक्षितं न तु तदेव इति लाभाय ।

एतेन चिरविनष्टज्ञानजोद्बुद्धसंस्कारसत्त्वेऽपि संशयानुत्पाद-लाभाय तथाऽभिधानमिति हेयम् । उद्बुद्धसंस्कारज्ञानयोरनुग-मासम्भवेन पृथक् पृथक् प्रतिबन्धकताया वाच्यतया गौरवात्, उद्बुद्धसंस्कारात् स्मरणस्याऽऽवश्यकतया तेनैव कार्यकालवर्त्ति-ना संशयप्रतिबन्धसम्भवाच्च ।

यदवच्छेदेन व्यावर्त्तकधर्मदर्शनं तद्धर्मविशिष्टे न संशय इत्यु-क्तमेव विशेष्य दर्शयति । यथेति । स्थाणुत्वाभावस्य पुरुषत्वाव-

च्छेदेन ग्रहे पुरुषोऽयं स्थाणुर्न वेति न संशय इत्येकोऽन्वयः। एवं स्थाणुत्वाभावस्य पुरुषत्वावच्छेदेन पुरुषत्वस्य चेदन्त्वावच्छेदेन ग्रहे अयं स्थाणुर्न वेति न संशय इत्यपरः। चरमः स्फुट एव। तद्व-दन्योन्याभावादिरित्यस्य व्यावर्त्तकतया बोद्धव्य इत्यर्थकेनाग्रि-मेण द्रष्टव्य इत्यनेन सम्बन्धः। सर्वपदेन तदवच्छेदकतद्व्याव-र्त्तकयोः परिग्रहः। तत्पदं सर्वत्र ग्राह्यम्। संशयत्वस्य व्यावर्त्त-कदर्शनप्रतिबध्यतावच्छेदकत्वभ्रमं निराकरोति । एवमिति। तद्-भ्रमोऽपीत्यस्य व्यावर्त्तकधर्मदर्शनदशायामित्यादिः। तथा च सं-शयनिश्चयसाधारणज्ञानत्वमेव एतत्प्रतिबध्यतावच्छेदकमिति भा-वः। विशेषदर्शनस्य। तद्व्यावर्त्तकदर्शनस्य। विपरीतज्ञानमात्रेति। तज्ज्ञानसामान्येत्यर्थः। अग्रे। धूमत्वपुरस्कारेणेत्यादौ।

(चि०) ननु भावोऽभावो वा उभयथाऽपि प्र-मेयम् इत्यत्र भावत्वाभावत्वयोर्व्याप्यतावच्छेदक-योरग्रहादनुमानं न स्यात् तदन्यान्यत्वरूपस्यान्यतर-त्वस्य लिङ्गत्वाभावादिति चेन्न। भावत्वाभावत्वा-न्यान्यधर्मवत्त्वस्य लिङ्गत्वात्। एवं धूमालोकान्यतर-त्वमपि लिङ्गम्।

(दी०)नन्वित्यादि। इदं नीलत्वेन प्रतीयमानं भावोऽभावो वा। भावत्वाभावत्वयोः। तत्त्वयोरित्यर्थः। लिङ्गत्वाभावात्। अप्रसिद्धत्वेन तत्त्वासम्भवात्। भावत्वाभावत्वेत्यादिकं केव-लान्वय्यनुमानमतिरिक्ताभावमभ्युपेत्य। केवलान्वयिनः सा-ध्यस्य धर्ममात्रमेव व्याप्यमिति तु मन्तव्यम्। एवमिति। लि-ङ्गं व्याप्यत्वे, लिङ्गतावच्छेदकं वा वह्नौ।

(गा०) प्रमेयमित्यस्य समानलिङ्गं पक्षरूपविशेष्यवाचकपदं पूरयति। इदमिति। इदन्त्वस्य तेजोऽभावत्वात्मकत्वे तदवच्छिन्ने भावत्वसंशयायोगात्तद्विवृणोति। नीलत्वेनेति। मूलेऽनुमानम्। अ-नुमितिः। उभयथाऽपीत्यनेनेदं प्रमेयमिति ज्ञानस्यावधारणत्वला-

भात्तादृशज्ञानस्यानुमितिहेतुत्वावश्यकत्वं लभ्यते, तथा च इदं भावोऽभावो वेति संशयस्थले जायमानमिदमुभयथाऽपि प्रमेयमित्यनुमितिस्तव नये न स्यादित्यर्थः । अनुमित्यनुपपत्तौ हेतुरग्रहादित्यन्तम् । अग्रहादित्यस्य पक्षधर्मतानिश्चयप्रकारतयेत्यादिः । अग्रे तादात्म्यसम्बन्धेनान्यतरवतो लिङ्गत्वमुपेक्ष्यान्यतरस्य धर्मस्य लिङ्गतायां सिद्धान्तयिष्यमाणतया अत्रापि भावत्वादिधर्मवृत्तेरेव लिङ्गतावच्छेदकस्याग्रहे मूलतात्पर्यमवगम्यते इत्यभिसन्धाय भावत्वादिपदं भावत्वत्वादिपरतया व्याचष्टे दीधितौ । भावत्वेति । अप्रसिद्धानुयोगिकाभावस्य दुर्निरूपतया लिङ्गत्वाभावादित्यसम्भवपरतया हेतुं पूरयन् व्याचष्टे । अप्रसिद्धत्वेनेति । भावभेदवैशिष्ट्यस्याभावभेदावृत्तितया तद्विशेषणतया लिङ्गतावच्छेदकबाधकत्वासम्भवादिति पर्यवसितोऽर्थः ।

ननु मीमांसकैः केवलान्वय्यनुमानानङ्गीकाराद्भावभिन्नपदार्थानङ्गीकाराच्च भावभिन्नत्वरूपाभावत्वघटितान्यतरत्वावच्छिन्नलिङ्गकप्रमेयत्वानुमानोपपादनं विरुद्धमित्यत आह । भावत्वाभावत्वेत्यादिकमिति । अतिरिक्तश्चेति ।

यद्यप्यभावस्याधिकरणरूपत्वेऽपि स्वरूपसम्बन्धादिरूपाभावत्वघटितान्यतरस्य हेतुत्वसम्भवस्तथापि दर्शितसंशये भावभेदस्य कोटितया तद्घटितान्यतरस्य हेतुत्वं मूलाभिप्रेतमित्याशयेनेदम् । साध्यस्य केवलान्वयित्वज्ञानकाले यत्किञ्चिद्रूपावच्छिन्नस्यैव वृत्तिमतो लिङ्गता सम्भवतीति मूले तदकथनात् न्यूनताभङ्गायाह । केवलान्वयिन इति । अयमालोको धूमो वेति सन्देहे धूमालोकान्यतरत्वस्यानुमापकत्वरूपं लिङ्गत्वमुक्तं वह्नौ साध्ये व्यधिकरणतया न सम्भवतीति साध्यं पूरयति । व्याप्यत्व इति । वह्न्यादिव्याप्यत्वे साध्य इत्यर्थः । लिङ्गपदस्यात्रैव लिङ्गतावच्छेदकपरत्वे वह्न्यादिसाध्यपरतया मूलसङ्गतिरित्याह । लिङ्गतावच्छेदकं वेति ।

(चि०) अथ यद्व्यतिरेकज्ञानं यदुत्पत्तिप्रतिबन्धकं तत् तन्निश्चयसाध्यम्, तथा च पक्षधर्मस्य व्याप्यभेदज्ञानमनुमितिप्रतिबन्धकम्, अतो व्याप्याभेदज्ञानं तद्धेतुः सिध्यतीति चेन्न । धूमत्वपुरस्कारेण

व्याप्तिस्मरणपक्षधर्मताज्ञाने सति विशेषदर्शनान्न धू व्याप्यभेदज्ञानम् , किन्त्वनुमितेरेव तत्रोत्पत्तिः त त्सामग्रीसत्त्वात् । अतो न व्याप्यभेदज्ञानम् अनुमि तिप्रतिबन्धकं येन व्याप्याभेदज्ञानं तद्धेतुः स्यात् न च धूमत्वपुरस्कारेण व्याप्तिस्मरणपक्षधर्मताज्ञाने इयं धूमव्यक्तिर्वह्निव्याप्या नेति भ्राम्यतोऽनुमित्याप-त्तिरतो विशिष्टज्ञानं तद्धेतुरिति वाच्यम् । धूमत्वस्य विशेषस्य दर्शनेन तादृशभ्रमानुत्पत्तेः तत्रानुमिति-सद्भावादेव । अन्यथा निश्चयसामग्र्यां सत्यां भ्रमानन्तरं परामर्श एव कुतो न भवति ।

(दी०) यद्व्यतिरेकेति । यत्संशयव्यतिरेकानिश्चयाविस-त्र व्याख्याततत्त्वमेतत् । यद्वा यद्व्यतिरेकनिश्चये कार्यानुत्पत्तौ तद्व्यतिरेकानिश्चयाभावस्य कारणतामपेक्ष्य तन्निश्चयस्यैव कारणत्वं युक्तं लाघवादित्यभिप्रायकमिदम् । अत एव क्लृप्तनियतपूर्वभाववतया भेदग्रहाभाव एवानुमितिहेतुरित्यभिप्रेत्य अस्तु वेत्यादि वक्ष्यति । सामान्यतो विशेषदर्शनात् सामान्यतो भ्रमो न स्यात् विशेषतस्तु स्यादेवेत्यभिप्रायि-कामाशङ्कां निरस्यति । न चेति ।

(गा०) ननु यद्धर्मिकयद्व्यतिरेकज्ञानप्रतिबध्यं तद्धर्मिकतन्नि-श्चयत्वावच्छिन्नजन्यमित्येतादृश्यां पक्षीयधूमधर्मिकसाध्यव्याप्ति-निश्चयत्वेनानुमितिहेतुत्वसाधिकायां मूलोक्तव्याप्तौ ग्राह्यव्यति-रेकानिश्चयप्रतिबध्ये घटज्ञानादौ व्यभिचारज्ञानसामान्यप्रतिबध्ये व्यभिचारज्ञाने च व्यभिचार इत्याशङ्क्याह । यत्संशयेति ।

व्याख्याततत्त्वमिति । तच्च तत्त्वं संशयसाधारणव्यतिरेकज्ञा-नत्वेन प्रतिबन्धकत्वं व्याप्तिघटकम्, ग्राह्यसंशयस्य सर्वत्रैवाप्रति-बन्धकत्वोपगमात् । अव्यभिचारग्रहेऽपि व्यभिचारनिश्चयत्वेनैव प्रतिबन्धकत्वमिति । अथेत्यादिशङ्काया व्याप्तिपरत्वे स्वयमनुप-

पक्षेर्वक्ष्यमाणतया फलानुत्पत्तिनियतत्वरूपप्रतिबन्धकत्वनिवेशनेन मूले वक्ष्यमाणस्वरूपासिद्धेः परिहारसम्भवेन समाधानासङ्गतेः लाघवेन विशिष्टपरामर्शकारणताव्यवस्थापनपरतया तां व्याचष्टे । यद्वेति । व्यतिरेकसंशये कार्यानुत्पत्त्यनुरोधेन निश्चयत्वेन हेतुतायाः पूर्वमाशङ्कितत्वात् पौनरुक्त्याशङ्कायाः परिहाराय मूलस्थव्याप्यभेदज्ञानपदस्य निश्चयपरतां स्फुटयितुं व्यतिरेकज्ञानसामान्यमुपेक्ष्य तन्निश्चयकथनम् । कार्यानुत्पत्तौ । कार्यानुत्पत्तिनियमे । इत्थञ्च मूले यदुत्पत्तिप्रतिबन्धकम् इत्यत्र प्रतिबन्धकत्वं गुरुधर्मावच्छिन्नभेदाग्रहकारणताप्रसञ्जकं कार्यानुत्पत्तिनियतत्वरूपमेवेति बोध्यम् । लाघवात् । अवच्छेदकलाघवात् । संशयसाधारणज्ञानत्वावच्छिन्नाभावहेतुत्वेऽप्यप्रामाण्यनिश्चयत्वावच्छिन्नाभावस्य विशेषणत्वाद्गौरवं बोध्यम् । अत एव । उक्तग्रन्थस्य लाघवप्रदर्शनपरत्वादेव । अनुमितिहेतुः । कल्पनालाघवादिति शेषः । वक्ष्यतीति । उक्तग्रन्थस्य व्याप्तिपरत्वे भेदग्रहाभावस्य हेतुत्वेऽपि व्याप्तिबलाद्विशिष्टपरामर्शकारणतासिद्धेरावश्यकत्वात् तामनिराकृत्य भेदाग्रहकारणत्वोपगमस्यासङ्गत्यापत्तेरिति भावः । एवञ्च समाधाने अनुमितिप्रतिबन्धकमित्यस्य मयोच्यत इति शेषः । येन । यदपेक्षया लाघवेनेत्यर्थः । विशेषदर्शनाद् भ्रमोत्पत्त्यभावस्य प्रागुक्तत्वाच्चेत्याद्याशङ्कानुत्थितेस्तदाशयं प्रकाशयति । सामान्यत इति ।

धूमत्वस्य विशेषस्य दर्शनेनेति मूलस्य उक्तभ्रमे ग्राह्याभावावच्छेदकतया भातस्य धूमत्वस्य धर्मितावच्छेदकतया स्फुरणेनेत्यर्थो दीधित्यनुसारेण बोध्यः ।

(चि०) अस्तु वा व्याप्यतया पक्षधर्मतया चावगतस्य भेदाग्रह एवानुमितिहेतुः, परामर्शहेतुतया तस्याऽऽवश्यकत्वात् । अत एवासन्निकृष्टधूमज्ञानादप्यनुमितिः । न चैवं गौरवम्, तदा विशिष्टज्ञानानुपस्थितेः । न च जनकज्ञानाविरोधिनो ज्ञानस्याप्रतिबन्धकत्वात् भेदग्रहो न प्रतिबन्धक इति वाच्यम् । अभेदज्ञान-

स्याजनकत्वात् त्वयाऽपि लिङ्गपरामर्शे तादृशस्य प्रतिबन्धकत्वस्वीकाराच्च । अथ गोत्वं मधुरत्वावान्तरजातिर्वा लिङ्गं न स्यात् तद्गतधर्मान्तरस्याभावात्, अत एव तस्य विलक्षणत्वात् इति चेन्न । व्यक्तेरेव तत्र प्रकारत्वात्, न हि गौर्गोत्वमिति ज्ञानयोरविशेषः, अन्यथा गोत्वमिति ज्ञानस्य निर्विकल्पकत्वापत्त्या व्याप्यत्वग्रहे परामर्शे चानुपयोगात् गवेतरावृत्तित्वे सति सकलगोवृत्तित्वं गोत्वत्वमित्यनुभवाच्च । न चैवमनवस्था, तदितरावृत्तित्वे सति तद्वृत्तित्वस्यानुभवेनापलापासम्भवात् ।

इति परामर्शपूर्वपक्षचिन्तामणिः ।

(दी०)अस्तु वेत्यभ्युपगमवादः । न चेत्यादि । अभेदज्ञानस्याहेतुत्वे भेदग्रहो न प्रतिबन्धको भवितुमर्हतीत्यर्थः । अभेदेति । तथा चातथाभूतस्यापि प्रतिबन्धकत्वमनायत्या वक्तव्यमिति भावः । अतथाभूतत्वस्य सन्दिग्धत्वे व्यभिचारमाह । त्वयापीति । विशेषणान्तरदाने चाप्रयोजकत्वमिति भावः । गोत्वे गोपदशक्यतावच्छेदकत्वमविशेषितं विशेषितं वा तदस्तीत्यतः मधुरत्वेति । मधुरत्वव्याप्यो धर्मो जातिरखण्डोपाधिर्वेति फलतो न विशेषः । गौरिति ज्ञाने गोत्वप्रकारकत्वं विशेषमाशङ्क्याह । अन्यथेति । व्यक्तेः प्रकारत्वेऽपि लिङ्गतावच्छेदकत्वासम्भवादाह । गवेतरेति । गोत्वत्वस्यावाप्रवेशान्नात्माश्रयः, अत्र च यथासाध्यं गवेतरसमवेतत्वादिकमेवोपादेयं कालादौ व्यभिचारवाणाय समवायेन सम्बन्धेन हेतुत्वस्यावश्यवाच्यत्वेनाभावादिसाधारण्येऽप्यदोषात्, व्यतिरेकेऽपि रूपान्तरेण सम्ब-

न्धान्तरेण च गोत्वाभावस्यापि व्यभिचारितया गवेतरासमवेतस्य तत्त्वेन समवायसम्बन्धेनाभावस्यैव गमकत्वात् ।

इति परामर्शपूर्वपक्षदीधितिः ।

(गा०) विशेषदर्शने संशयवद् भ्रमस्यापि न सम्भव इति भेदाग्रहहेतुत्वाभिधानासङ्गतिरत आह । अस्तु वेति । ननु व्याप्यपक्षधर्मयोर्भेदाग्रहस्यानुमितिहेतुत्वे तेषां कारणबाधेनानुमित्यात्मकान्यथाख्यातिनिराकरणं विरुध्यते ह्रदवृत्तिबाष्पादौ वह्निव्याप्यधूमादेर्भेदाग्रहेण ह्रदादौ वह्न्याद्यनुमितेर्दुर्वारत्वात् । न च फलासिद्ध्या ह्रदादिपक्षं वह्न्यादिरूपसाध्यञ्चान्तर्भाव्य कारणत्वाकल्पनान्नापत्तिरिति वाच्यम् । पक्षमनन्तर्भाव्य पक्षनिष्ठप्रत्यासत्त्या कारणत्वकल्पनेनापत्तिसम्भवादिति चेन्न । एतन्मतानिर्भरेणतद्दोषस्याकिञ्चित्करत्वात् । व्याप्यतावच्छेदकप्रकारकस्यैव पक्षधर्मताज्ञानस्य भेदाग्रहहेतुतावच्छेदकत्वोपगमेनान्यथाख्यातिवारणसम्भवाच्च[१] इतरसकलकारणसत्त्वे यत्सत्त्वे कार्यानुत्पादस्तस्यैव प्रतिबन्धकतायाः आवश्यकत्वादिति भाव । न च जनकज्ञानेत्यादिमूलशङ्काया भेदग्रहे नैयायिकानामनुमित्यप्रतिबन्धकत्वसाधनपरत्वेऽसङ्गतिः जनकज्ञानाप्रतिबन्धकस्यैव हेतुतायाः स्वीकरणीयत्वात् तस्य च स्वमतेऽसिद्धत्वात् इत्यतस्तस्या आपत्तिपरत्वं स्फुटीकरोति । अभेदज्ञानस्येति । मूले 'अभेदज्ञानस्याजनकत्वात्' अतीन्द्रियहेतुकानुमितावुक्तक्रमेण व्यभिचारेण जनकत्वासम्भवात् तथा च विपर्ययानुमाने बाध इति भावः । नन्वेवमप्युक्तव्याप्तिविरोधाद्भेदग्रहस्य प्रतिबन्धकत्वानुपपत्तिर्दुर्वारैवेत्यत आह दीधितौ । तथा चेति । अतथाभूतस्यापि । जनकज्ञानाविरोधिनोऽपि । भेदग्रहस्येति शेषः । अनायत्या वक्तव्यमिति । अन्यथा भेदग्रहदशायां अनुमित्यापत्तेरिति शेषः । तथा च तादृशव्याप्तिरेव

---

[१] पक्षमनन्तर्भाव्य पक्षनिष्ठप्रत्यासत्त्या कारणत्वकल्पनेनापत्तिसम्भवादित्यभिसन्धायास्तु वेत्यादिकल्पे अनिर्भरमाह अस्तु वेत्यादि—इति पु० पा० ।

बाधितेति भावः। सन्दिग्धत्व इति। नैयायिकैरतीन्द्रियादिहेतुकस्थले मानसविशिष्टज्ञानोपगमेन व्यभिचारानिर्णयादिति भावः।

ननु लिङ्गपरामर्शे भेदग्रहस्य जनकज्ञानाविरोधिनः प्रतिबन्धकत्वेऽपि न व्यभिचारः ग्राह्याभावानवगाहित्वविशिष्टस्य जनकज्ञानाविरोधित्वस्याप्रतिबन्धकत्वव्याप्यत्वोपगमादित्यत आह। विशेषणान्तरदाने चेति।

ननु गोपदवाच्यत्वे साध्ये गोपदशक्यतावच्छेदकत्वस्य लिङ्गतावच्छेदकत्वसम्भवेऽपि सास्नादिसाध्यकस्थले न तथात्वसम्भवः गोपदस्य नानार्थतया अन्यत्रापि तच्छक्यतावच्छेदकसत्त्वात् इत्यत आह। विशेषितं वेति। सास्नादिमद्वृत्तित्वादिविशेषितं वेत्यर्थः। वाकारो व्यवस्थितविकल्पे।

ननु गुणगतजातिमनङ्गीकुर्वतां मधुरत्वव्याप्यरसगतजातेरभावात्तल्लिङ्गतानुपपत्तिरित्यत आह। मधुरत्वेति। फलत इति। तादृशधर्मस्य क्षीररसत्वाद्यनुमापकतायाः सर्वसम्मतत्वादिति भावः। गोत्वप्रकारकत्वं विशेषमिति। गोत्वमिति ज्ञाने तदभावादिति भावः। मूले अन्यथेति। गोत्वमिति ज्ञाने व्यक्तेरप्रकारत्वे अनुपयोगात्। उपयोगानुपपत्तेः। अवच्छेदकप्रकारकज्ञानविधयैव तस्यावच्छेद्यव्याप्तिग्रहे सम्बन्धितावच्छेदकप्रकारकज्ञानविधया व्याप्तिस्मारकत्वेनैव च तस्य परामर्शे उपयोगादिति भावः। दीधितौ लिङ्गतावच्छेदकत्वासम्भवादित्यस्य गोपदप्रवृत्तिनिमित्तत्वादिसाध्यके तादात्म्येन गोत्वादिहेतावित्यादिः। आधेयतया गोविशिष्टस्य गवाधेयत्वविशिष्टस्य च द्रव्यत्वादेरपि गोमात्रवृत्तितया सास्नादिसाध्यकस्थले व्यक्तेर्लिङ्गतावच्छेदकत्वं सम्भवत्येव इत्यवगन्तव्यम्।

ननु उक्तगोत्वशरीरेऽपि भेदप्रतियोगितावच्छेदकमुद्रया गोत्वस्यानतिप्रसक्तगोत्वत्वेनैव निवेशनीयतया आत्माश्रय इत्यत आह। गोत्वत्वस्येति। अप्रवेशादिति। स्वरूपत एव तत्प्रवेशसम्भवादिति भावः। मूले न चैवमिति। स्वतो व्यावृत्ते गोत्वादावपि धर्मान्तरस्वीकारे। अनवस्था। अविश्रान्तधर्मधाराप्रसङ्गः। प्रामाणिकत्वादनवस्था न दोषायेति समाधत्ते। तदितरेति। सास्नादौ साध्ये गोत्वत्वघटकसकलगोसमवेतत्वांशस्य वैयर्थ्यात् तत्र तं परित्यजाति

दीधितौ। अभावेति। अत्र एतद्घटकं यथासाध्यमिति। सास्नादौ साध्ये गवेतरासमवेतत्व विशेषणीभूतं गोसमवेतत्वञ्च, सास्नाव्यापकजातित्वादौ साध्ये तादात्म्येन हेतुतायां सकलगोसमवेतत्वं केवलं व्याप्यतावच्छेदकं वाच्यं न तु विशिष्टं, विशिष्टन्तु(१) गोपदप्रवृत्तिनिमित्तत्वादिसाध्यके तादात्म्येन गोत्वे हेतावित्यर्थः।

ननु गवेतरासमवेतत्वस्याभावमेयत्वादावपि सत्त्वात् सास्नादिव्यभिचारितया सास्नादिसाध्यक एव कथं तद्व्याप्यतावच्छेदकं इत्यत आह। कालादाविति। सम्बन्धसामान्येन हेतुत्वे सकलगोसमवेतत्वांशनिवेशेऽपि गोत्ववति सास्नादिशून्ये कालादौ व्यभिचारस्याऽऽवश्यकतया समवायेन हेतुत्वस्यावश्यं स्वीकरणीयत्वात् गवेतरासमवेतत्वस्याभावादिसाधारणस्यापि समवायेन व्यभिचारितायामनवच्छेदकत्वादित्यर्थः(१)। एतच्च साध्याभाववदवृत्तित्वमेव व्याप्तिरित्यभिप्रायेण। यदि च हेतुतावच्छेदकसम्बन्धेनावृत्तिव्यावृत्तं तेन सम्बन्धेन वृत्तिमत्त्वमपि तत्र निवेश्यते, तदा अवच्छेदकस्यानतिप्रसक्तत्वनियमेन गवेतरासमवेतत्वमात्रस्य समवायसम्बन्धेन वृत्तिमत्त्वमात्रघटितव्याप्तेरतिप्रसक्ततयाऽनवच्छेदकत्वात् समवेतत्वांशोऽपि तद्विशेष्यविधया हेतुतावच्छेदककोटौ निवेश्य इति ध्येयम्। सास्नाभावसाध्यकगोत्वाभावादिहेतुकस्थलेऽपि समवायसम्बन्धावच्छिन्नगवेतरासमवेतत्वावच्छिन्नप्रतियोगिताकाभावत्वमेव व्याप्यतावच्छेदकं न तु सकलगोसमवेतत्वमपि हेतुभूताभावप्रतियोगितावच्छेदके निवेश्यं वैयर्थ्यात् (२)।

न च गवेतरासमवेतत्वस्य प्रतियोगितावच्छेदकतया निवेशे तद्वैयर्थ्येऽपि प्रतियोगित्वसमानाधिकरणतया निवेशे न तथात्वं गवेतरासमवेतद्रूपाद्यभावस्य गोसाधारणत्वेन व्यभिचारित्वादिति शङ्क्यम्। सकलगोसमवेतगोत्वस्यापि द्वित्वादिना अभावस्य गोसाधारणत्वात् सकलगोसमवेतत्वनिवेशेऽपि तादृशरूपावच्छिन्नाभावस्यैव हेतुताया वाच्यतया तदंशवैयर्थ्यस्य दुर्वारत्वात्। विशिष्टस्य गौरवेणाभावप्रतियोगितायामप्यनवच्छेदकतया तदव-

(१) गवेतरावृत्तित्वविशिष्टं सकलगोवृत्तित्वमित्यर्थः।

(२) समवायेनाव्यभिचारितायामवच्छेदकत्वादित्यर्थ इति पु०पा०।

च्छिन्नाभावाप्रसिद्धेश्चेत्यत आह। व्यतिरेकेऽपीति । सम्बन्धान्तरेण गोत्वाभावस्य व्यभिचारितया समवायेति दृष्टान्तविधयोक्तम् ।

यत्तु गवेतरासमवेतस्य मेयत्वादेः केवलान्वयितया सम्बन्धसामान्येन तत्त्वावच्छिन्नाभावाप्रसिद्धिरतः समवेतत्वं निवेश्यमेवेत्याशङ्कानिराकरणाय तदिति तत्तुच्छम् । सम्बन्धसामान्येन गवेतरासमवेतसमवेताभावस्याव्यभिचारितयोक्तग्रन्थस्य यत्किञ्चित्सम्बन्धावच्छिन्नाभावहेतुतायामेव व्यभिचारप्रदर्शनपरतया तद्धेतुतायाञ्चाप्रसिद्धिविरहेण तामादाय समवेतत्वांशसार्थक्यशङ्कानवतारेण तत्र व्यभिचारप्रदर्शनस्यानौचित्येनासङ्गतेः सम्बन्धान्तरेण सम्बन्धसामान्येन गोत्वाभावस्यापि व्यभिचारितया कालादेः पक्षत्वे स्वरूपासिद्धतयेति व्याख्यायामुदक्षरत्वात् ।

इति परामर्शपूर्वपक्षविवृतिः समाप्ता ।

(चि०) अत्रोच्यते, अयमालोको धूमो वा उभयथापि वह्निव्याप्य इति ज्ञानं ततोऽनुमितिः । न च धूमत्वेनाऽऽलोकत्वेन वा तत्र निश्चयः। अथ तदन्यान्यत्वमेव तत्र लिङ्गम् । न च तद्ज्ञानदशायामनुमितिदर्शनात् न तथेति वाच्यम् । धूमालोकान्यान्यत्वज्ञानं विना तथापि तत्र व्याप्यत्वानिश्चयेन तदर्थं तद्बोधावश्यकत्वादिति चेन्न। न हि धूमालोकान्यान्यत्वं धूमान्यान्यत्वं वा व्याप्यतावच्छेदकं गौरवात् व्यभिचारावारकविशेषणवत्त्वाच्च किन्तु धूमत्वादिकं तच्च तत्र सान्दिग्धमेव । ननु तदन्यान्य-

(१) तदा अवच्छेदकस्यानतिप्रसक्तत्वनियमेन गवेतरासमवेतत्वे सति समवेतत्वमेव साक्षाद्व्याप्यतावच्छेदकं वाच्यं गोत्वाभावे साक्षाभावादिसाध्यकेऽपि प्रतियोगिविशेषणतया गवेतरासमवेतत्वस्यैव निवेशो न तु सकलगोसमवेतत्वस्यापि वैयर्थ्यात् इति पु०पा० ।

वह्निव्याप्यमेव व्यभिचाराभावेन व्याप्तिविरहसाधनस्य बाधितत्वात् पुरुषस्तु तत्र नीलधूमवत्त्वादित्यत्रैवाधिकेन निगृह्यते न तु व्याप्यत्वासिद्ध्येति चेन्न । तदन्यान्यद् धूमालोकस्वरूपमेव तच्च व्याप्यमिति सत्यम्, न च वस्तुगत्या व्याप्यज्ञानादनुमितिः अतिप्रसङ्गात् किन्तु व्याप्यतावच्छेदकप्रकारकज्ञानात् । न च तदन्यान्यत्वं वह्निव्याप्यतावच्छेदकमित्युक्तम् ।

(दी०)लिङ्गम् । लिङ्गतावच्छेदकम्, तथा च न व्यभिचारः । न तथा । न तेन व्यभिचारवारणम् । न हीति । धूमान्यान्यत्वमिति दृष्टान्तार्थम् । न चैकधर्मस्यावच्छेदकत्वापेक्षया धर्मद्वयस्य तत्त्व एव गौरवमिति वाच्यम् । तादृशैकधर्मघटकानेकभेदादिघटकतया धर्मद्वयस्यैव प्रथमोपस्थितत्वेन चावच्छेदकत्वौचित्यात् । अन्यथा वह्न्यादीनामपि व्याप्यतया तावदन्यतमत्वस्यैवावच्छेदकत्वं स्यात् ।

(गा०) मूले अयमिति । पर्वतवृत्तिरित्यर्थः । आलोको धूमो वेति । स्वरूपतो धूमत्वालोकत्वयोरत्र कोटिता न तु धूमत्वालोकत्वत्वावच्छिन्नयोः, तथा सत्युक्तसंशयस्य स्वरूपतो धूमत्वादिप्रकारेण पक्षधर्मतानिश्चयाविरोधितया असङ्गतेः । न च संशयस्य भावद्वयमात्रकोटिकस्यानभ्युपगमे धूमत्वाभावालोकत्वाभावयोरत्र कोटितायाः स्वीकरणीयत्वात् तत्प्रतियोगितावच्छेदकधूमत्वत्वादेरपि भानमावश्यकं इति वाच्यम् । धूमत्वाद्यभावस्येव धूमादिभेदस्यापि कोटितया धूमत्वादिसंशयनिर्वाहात् धूमादिभेदज्ञाने च धूमत्वत्वादिभानानावश्यकत्वात् । न च धूमत्वादौ धूमादिभेदविरोधभाने तद्धर्मितावच्छेदकतया धूमत्वत्वादिभानमावश्यकमिति धूमत्वधूमादिभेदकोटिकसंशयेऽपि धूमत्वत्वादिनैव धूमत्वादेः कोटित्वमावश्यकं संशये कोटिविषयताया विरोधग्रहप्र-

कारावच्छिन्नत्वनियमादिति वाच्यम् । संशयस्थले कोट्योः परस्परविरोधभानानियमात् धूमभेदादौ धूमाद्यवृत्तित्वरूपधूमत्वादिविरोधभानेन स्वरूपतो धूमत्वादिकोटिकसंशयनिर्वाहात्, स्वरूपतो भासमानधूमत्वाद्यवच्छेदेन धूमादिभेदाभावज्ञानस्यापि धूमत्वादौ धूमादिभेदविरोधज्ञानतया तादृशविरोधज्ञानेऽपि धूमत्वत्वादिभानानियमाच्च ।

अथैवमपि पर्वतवृत्तित्वविशिष्टे धूमत्वादिसन्देहः पर्वतवृत्तित्वविशिष्टे धूमत्वादिनिश्चयस्यैव विरोधी न त्वनुमितिजनकतया अभिमतस्य धूमत्वादिविशिष्टे पर्वतवृत्तित्वनिश्चयस्यासमानधर्मितावच्छेदकत्वात् ग्राह्याभावानवगाहित्वाच्चेति न तादृशसंशयदशायामनुमित्यनुपपत्तिः, एवं न्यायमतसिद्धपरामर्शनिर्वाहाय 'उभयथापि वह्निव्याप्यं' इति इदम्पदार्थे व्याप्तिनिश्चयाभिधानमसङ्गतं पक्षवृत्तित्वविशिष्टे व्याप्तिनिश्चयस्यानुमितिहेतुत्वे व्याप्तिविशिष्टवैशिष्ट्यज्ञानस्य व्याप्तिप्रकारकज्ञानरूपकरणव्यापारस्य उपसंहारग्रन्थेऽनुमितिहेतुत्वाभिधानविरोधादिति चेन्न । पक्षवृत्तित्वावच्छिन्ने धूमत्वादिरूपविशेषणसन्देहे पक्षे धूमत्वादिविशिष्टकोटिकसंशयस्यौचित्यावर्जिततया पक्षे व्याप्यतावच्छेदकविशिष्टप्रकारकनिश्चयो न सम्भवति पक्षविशेष्यकनिश्चय एव पक्षविशेष्यिकायामनुमितौ हेतुरित्याशयेन धूमत्वादिसंशयाभिधानस्य पक्षवृत्तित्वावच्छिन्ने व्याप्यत्वाभावावगाहिविशेषणसन्देहे च पक्षे व्याप्तिविशिष्टकोटिकसंशयस्यैवौचित्यावर्जिततया पक्षविशेष्यकव्याप्तिविशिष्टप्रकारकानुमितिहेतुनिश्चयासम्भवेन तादृशविशेषणसंशयविरोधिपक्षवृत्तित्वविशिष्टविशेष्यकव्याप्तिनिश्चयाभिधानस्य च सङ्गतेः ।

वस्तुतः पक्षवृत्तिर्धूमो न वेति संशयस्य पक्षवृत्तिर्धूम इति निश्चय इव धूमत्वविशिष्टधर्मिकपक्षवृत्तितानिश्चयेऽपि विरोधित्वं दुरपह्नवं धूमत्वावच्छेदेन पक्षावृत्तित्वस्य पक्षवृत्तित्वावच्छेदेन धूमभेदनिर्वाह्यतया तदवच्छेदेन धूमभेदसंशयाद् धूमत्वावच्छेदेन पक्षावृत्तित्वसंशयस्यौचित्यावर्जितत्वात् । एवं पक्षवृत्तित्वविशिष्टे व्याप्यत्वनिश्चयो व्याप्तिविशिष्टे पक्षवृत्तित्वनिश्चये व्याप्तिविशिष्टे पक्षवृत्तित्वसंशायकपक्षवृत्तित्वावच्छिन्नधर्मिकव्याप्त्यभावसंशय—

विरोधितयोपयुज्यते इति पक्षवृत्तिधर्मिकधूमत्वादिसंशये व्याप्तिनिश्चयाभिधानसङ्गतिः ।

केचित्तु' व्याप्तिसम्बन्धेन वन्हिसाध्यकपुरोवर्त्तिधूमादिपक्षकस्थले तादात्म्यसम्बन्धेन धूमादेर्हेतुत्वे तादात्म्यसम्बन्धेन धूमत्वादिरूपव्याप्यतावच्छेदकावच्छिन्नस्य यत्र पक्षे संशयस्तत्र व्याप्यत्वेन धूमादेः पक्षे तादात्म्यसम्बन्धेन निश्चयादनुमित्युत्पत्त्या व्याप्यतावच्छेदकप्रकारकपक्षधर्मतानिश्चयस्य व्यभिचारप्रदर्शनपरतया एतन्मूलमुक्तानुपपत्तिशङ्काव्याकुलचेतसो वर्णयन्ति तें पुनः प्रसिद्धस्थले पर्वते धूमत्वाद्यवच्छिन्नवत्तासंशयस्थलीयव्याप्तिविशिष्टवत्तानिश्चयजन्यानुमितौ व्याप्यतावच्छेदकप्रकारकपक्षधर्मतानिश्चयव्यभिचारोपेक्षाबीजं सम्यगपश्यन्तः कथं निर्वृतिभाजो भवन्तीति चिन्त्यम् ।

मूले 'उभयथापि वह्निव्याप्य' इति निश्चयकथनं स्वमते हेतुरक्षणाय । अत्र वह्नेः साध्यस्योपादानाद् धूमालोकान्यतरत्वं लिङ्गमित्यत्र लिङ्गपदस्य यथाश्रुतार्थकत्वानुपपत्तेस्तद्व्याचष्टे । लिङ्गमिति । व्यभिचारवारणस्याप्रक्रान्तत्वे 'न तथे' त्यत्र तथापदस्य वक्ष्यमाणतदर्थकत्वानुपपत्तेः पूरयति । तथा च न व्यभिचार इति । न तथेत्यस्य न लिङ्गतावच्छेदकमिति नार्थो युज्यते धूमत्वादेरज्ञाने आलोकत्वाद्यवच्छिन्नेनानुमितावपि तस्य लिङ्गतावच्छेदकतया इव तदन्यान्यत्वस्य लिङ्गतावच्छेदकत्वसम्भवेन हेत्वसङ्गतेः अतो व्याचष्टे । न तेनेति । तेन । तस्य लिङ्गतावच्छेदकत्वेन । प्रकृते धूमत्वस्येव धूमान्यान्यत्वस्यापि सन्दिग्धतया तस्य व्याप्यतावच्छेदकत्वखण्डनमनुपयुक्तमित्यत आह । धूमान्यान्यत्वमितीति । एकधर्मस्य । अन्यतरत्वरूपस्य । धर्मद्वयस्य । धूमत्वालोकत्वरूपस्य । तत्त्वे । व्याप्यतावच्छेदकत्वे । तथा च गौरवस्य व्याप्यतावच्छेदकताबाधकत्वे वैपरीत्यमेव स्यादिति भावः । एकस्यातिगुरुशरीरत्वेन लघुशरीरावच्छेदकयोर्द्वित्वमबाधकमित्याशयेनाह । तादृशैकेति । धर्मद्वयस्यैवावच्छेदकतौचित्यादित्यन्वयः । शरीरलाघवमुक्त्वा उपस्थितिलाघवमप्याह । प्रथमोपस्थितत्वेन चेति । तावदन्यतमत्वस्य । वह्निधूमालोकान्यतमत्वस्य । अवच्छेदकत्वं स्यात् । न तु धूमालोकान्यतरत्वस्य, तथा च कुतो वैपरीत्या-

पादनमिति भावः ।

अन्यतरत्वाश्रये व्याप्तिरेव नास्ति अत एव तेन रूपेण हेतुप्रयोगे व्याप्यत्वासिद्ध्यादिना वादिनो निग्रह इत्येवान्यतरत्वस्य व्याप्यतानवच्छेदकत्वबीजं तदाश्रयस्य व्याप्यत्वे तस्यावच्छेदकताया आवश्यकत्वादित्यभिप्रायोऽन्यतरत्वस्य व्याप्यतावच्छेदकतानिराकर्त्तुरिति भ्रमेण शङ्कते मूले । न त्विति । भ्रमं निराकरोति । तदन्यान्यदिति । न च तदन्यान्यत्वं वह्निव्याप्यतावच्छेदकं इत्युक्तमिति, अन्यतरनिष्ठयोर्विभिन्नव्याप्त्योर्धूमत्वालोकत्वाभ्यामेवावच्छेदात् प्रत्येकानवच्छेद्यान्यतरत्वावच्छेद्यतया साधारणातिरिक्तव्याप्त्यनभ्युपगमात् इति भावः ।

(चि०) न चैवं तदन्यान्यत्वाद्वह्निव्याप्यत्वमपि तत्र नानुमेयं व्यर्थविशेषणत्वादिति वाच्यम् । प्रत्यक्षं हि तदन्यान्यत्वविशेषदर्शनाद्व्याप्यत्वज्ञानं जनयति, विशेषणज्ञानविशेषणविशेष्यसम्बन्धविशेषणविशेष्येन्द्रियसन्निकर्षतदसंसर्गाग्रहविशेष— दर्शनानां सत्त्वेन वह्निव्याप्यत्वप्रत्यक्षसत्त्वात् । नचैवं न प्रत्यक्षेऽपि तदन्यान्यत्वज्ञानं सहकारीति वाच्यम् । अन्वयव्यतिरेकाभ्यां गुरोरपि तस्य विशेषदर्शनत्वेन प्रत्यक्षसहकारित्वात् तस्मात्तदन्यान्यत्वज्ञानं तत्र व्याप्यताज्ञानोपक्षीणं न तु साक्षादनुमितिहेतुरिति ।

(दी०) अन्वयेति । विशेषदर्शनं हि विपरीतज्ञानविरोधितया प्रत्य० उपयुज्यते तत्त्वञ्चान्यतरत्वदर्शनस्यापि व्यावर्त्तकधर्मदर्शनत्वेनाक्षतम्, अत्र च तदन्यान्यत्वस्यातिरिक्तत्वे धूमत्वत्वादेस्तदघटितत्वात् धूमत्वादिरूपत्वेऽपि च धूमत्वत्वादेरप्रवेशाल्लिङ्गत्वेऽपि न वैयर्थ्यमित्यपि द्रष्टव्यम् । एवञ्चान्यतरत्वस्य व्याप्त्यनवच्छेदकत्वे स्थिते तदवच्छेदेन तद्ग्रहोपगमे

तथाप्यन्यथाख्यातिस्वीकारप्रसङ्गः ।

(गा०)व्यर्थविशेषणघटितधर्मस्य व्याप्यतानवच्छेदकत्वे धूमालोकाभिन्नभेदवत् तत्त्वमपि न व्याप्यतावच्छेदकं तथा च व्याप्तेरवच्छिन्नत्वनियमात् तादृशभेदे वह्निव्याप्तिनिरूपिता व्याप्तिरेव न सम्भवतीति तेन वह्निव्याप्यत्वमपि नानुमातुं शक्यते वह्निव्याप्तिव्याप्यत्वेन पक्षधर्मतानिश्चयस्याप्ययोगात् इति भवन्मते वह्निव्याप्तिप्रकारकपक्षधर्मतानिश्चयोऽपि तत्र दुर्घट इत्याशङ्कते । न चैवमिति ।

ननु विशेषदर्शनसहकृतं प्रत्यक्षं तत्र व्याप्तिनिश्चायकं इत्ययुक्तं तदन्यान्यत्वस्याप्यव्याप्यतया तज्ज्ञानस्य विशेषदर्शनत्वासम्भवादिति पुनः शङ्कते । न चैवमिति । विशेषदर्शनत्वेन प्रत्यक्षसहकारित्वादिति समाधौ विशेषदर्शनत्वेनेत्यस्य व्याप्यदर्शनत्वेनेत्यर्थकतोक्तक्रमेण न सम्भवतीति व्याप्यदर्शनसाधारणविपरीतज्ञानविरोधित्वेनेत्यर्थकतां तस्याह दीधितौ । विशेषदर्शनमिति । व्यावर्त्तकधर्मदर्शनत्वेनेति । ग्राह्यविरोधिधर्मदर्शनत्वेनेत्यर्थः । स्वसमानाधिकरणव्याप्यतावच्छेदकान्तरघटितमेव न व्याप्यतावच्छेदकमित्याशयेनान्यतरत्वत्वस्य व्याप्तिव्याप्यतावच्छेदकत्वं स्वयं व्यवस्थापयति । अत्र चेति । अन्यतरत्वस्य धूमत्वादिरूपत्वे तत्त्वस्यानवच्छेदकत्वेऽपि धूमत्वत्वादिना व्याप्यतया व्याप्तिप्रकारकपक्षधर्मताधीहेतुतावादिनां व्याप्त्यनुमानं निराबाधमित्यपि बोध्यम् । अन्यतरत्वस्य व्याप्त्यनवच्छेदकत्वेऽपि तदवच्छेदेन तद्भ्रमादनुमितिर्भविष्यतीति शङ्कां निराकुरुते । एवञ्चेति ।

ननु गौरवमात्रं न व्याप्त्यवच्छेदकत्वे बाधकं तथा सति सास्नादिना गवादेर्हेतुताविलयप्रसङ्गः किन्तु व्यर्थविशेषणघटितत्वमेव धूमत्वादेश्च प्रत्येकमुभयासंग्राहकत्वात् उभयसंग्रहप्रयोजकस्य धर्मस्य न वैयर्थ्यम् । वस्तुतस्तु अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वाद्यगाहिज्ञानमेव कारणं अत एवानुमितिजनकतया तन्मतसिद्धज्ञानद्वयकाले धूमत्वदर्शनस्यावच्छेदकदर्शनतया अयं धूमो वह्निव्याप्यो न वेति शङ्काविरोधित्वमप्युपपद्यते गुरोरपि च तादृशावच्छेदकत्वमक्षतमेवेति ।

(चि०) किञ्च वह्निव्याप्यवानयमिति शाब्दज्ञाने व्याप्यत्वज्ञानं कारणमित्यन्यत्रापि तथा। अथ वह्निव्याप्यत्वमपि वह्निव्याप्यतावच्छेदकं तथा हि वह्निनिरूपिता धूमादिप्रत्येकवृत्तिरेव व्याप्तिर्व्याप्तित्वेन सकलधूमादिवृत्तिव्याप्त्यवच्छेदिका आश्रयभेदेनावच्छेदकभेदेन च व्याप्तिभेदादिति चेन्न। सकलधूमादिवृत्तिव्याप्तौ मानाभावात् यत्र वह्निव्याप्यस्तत्र वह्निरिति व्याप्तिबुद्धौ शाब्दव्याप्यत्वबुद्धौ च प्रत्येकवृत्तिव्याप्त्याश्रयत्वस्यैव विषयत्वात् प्रत्येकवृत्तिव्याप्तिज्ञानं विना तद्बोधाभावात् ।

(दी०) अस्तु वा गुरुरपि धर्मोऽवच्छेदकस्तथापि शुद्धव्याप्तिप्रकारकज्ञानस्थले व्यभिचारान्न तस्य हेतुत्वमित्याह। किञ्चेति।वह्नीत्यादि। व्याप्तेर्व्याप्त्यनवच्छेदकत्वादिति भावः। मानाभावादिति।वस्तुतो विशेषव्याप्त्यवच्छिन्ना महाव्याप्तिरतिरिच्यतां किं तेन ? न हि वस्तुतो व्याप्त्यवच्छेदकप्रकारकं पक्षधर्मताज्ञानं हेतुरतिप्रसङ्गात् परन्तु यदवच्छेदेन व्याप्तिर्गृह्यते तत्प्रकारकम्। न च तदानीं व्याप्त्यवच्छेदेन व्याप्तिर्गृह्यते। न च तदग्रहेऽनुमितिरपलपनीया, मानाभावात् कल्प्यत्वाविशेषे लघुरूपावच्छिन्नस्यैव नियतपूर्ववर्तितायाःकल्पयितुं युक्तत्वात्।

(गा०) अयमालोको धूमो वेत्यादिसन्देहदशायां नानुमित्यनुपपत्तिरित्याशङ्कायाः प्रथमकल्पे सत्त्वात तदेव 'किञ्चेत्यादिदूषणान्तरानुसरणे बीजमिति सूचयितुं प्रथमदोषाभावाभ्युपगमं प्रकाशयन् 'किञ्चेत्यादेर्व्याप्यतावच्छेदकप्रकारकज्ञानहेतुत्वासम्भवपरतां स्फुटयति। अस्तु वेत्यादिना। एवञ्च मूले 'व्याप्यत्वज्ञानमित्यस्यावधारणपरतया व्याप्तिप्रकारकपक्षधर्मताज्ञानमेवेत्यर्थः। कारणम्। फलोधायकम्,तथा च व्याप्यतावच्छेदकप्रकारकज्ञानव्य-

वच्छेदात् तद्धेतुतायां व्यभिचार इत्यर्थो लभ्यते व्याप्तेर्व्याप्यत्ववच्छेदकत्वोपगमेनैतद्दोषस्य प्राक् समाहितत्वात् तस्यास्तथात्वमनिराकृत्य प्रथमत एव तद्दोषदानमयुक्तं इत्यत आशयं पूरयति । व्याप्तेरिति । आत्माश्रयेणेत्यादिः, एतच्च स्वरूपसम्बन्धरूपावच्छेदकत्वाभिप्रायेण, तदभिप्रायेणैव सामान्यविशेषव्याप्त्योर्भेदं व्यवस्थाप्य अथेत्यादिमूले तयोरवच्छेद्यावच्छेदकभावशङ्का । मूले सकलधूमादिवृत्तिव्याप्तौ मानाभावादिति । विशेषव्याप्तीनां धूमव्यापकवह्निसमानाधिकरणवृत्तिधूमत्वादीनां अनुगमकस्य व्याप्तित्वस्य दुर्निर्वचतया तासां व्याप्त्यन्तरावच्छेदकत्वासम्भवादिति भावः ।

ननु व्यभिचारधीविरोधित्वमेव सकलविशेषव्याप्तीनामनुगमकं व्याप्तित्वं वह्निव्याप्यवानयमित्यादिशब्देनापि तादृशव्याप्तित्वेन व्याप्तयः पक्षधर्मांशे प्रकारतया प्रत्याय्यन्ते, एवं साध्याभाववदवृत्तित्वमपि स्वविशिष्टव्यापकताघटितव्याप्तेरवच्छेदकमिति तेन रूपेण यत्र शब्दाद्व्याप्त्यवगतिस्तत्राप्यनुमितिरुपपद्यत एव । एवं अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्य स्वसाधारणतया तदनुसरणे न काचिदप्यनुपपत्तिरित्याशङ्क्य व्याप्तेर्व्याप्यतावच्छेदकत्वमभ्युपेत्यापि शाब्दपरामर्शजानुमितौ व्यभिचारमुपपादयति । वस्तुत इति । अतिरिच्यतामित्यस्य स्वसाधारणमनतिरिक्तवृत्तित्वरूपमवच्छेदकत्वमाश्रीयतामिति शेषः । अतिप्रसङ्गात् । धूमत्वावच्छेदेन व्याप्तिज्ञानरहितस्यापि धूमवानयमिति ज्ञानादनुमितिप्रसङ्गात् । गृह्यते । तत्कालीनग्रहविषयः । न च तदानीमिति । यदा वह्निव्याप्यवानयमिति शब्दः श्रूयते इत्यर्थः, गृह्यत इत्यस्य पक्षधर्मताग्रहकाले व्याप्तौ व्याप्यतावच्छेदकत्वग्राहकशब्दाभावादिति शेषः । अनुमितिरपलपनीयेति । अनुमित्यभावः कल्पनीय इत्यर्थः । मानाभावात् । तत्कल्पकाभावात्, उक्तरूपेण कारणताया अप्रसिद्ध्या कारणाभावासिद्धेरिति ।

ननु तत्रापि स्मरणादिरूपतादृशव्याप्तिज्ञानसम्भवात् न व्यभिचारनिश्चय इत्यत आह । कल्पयत्वेति । 'लघुरूपं' व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वं, अयञ्च अपि चेत्यादिमूलस्यैवार्थः, इति तत्कल्प एव निर्भरो दर्शितः ।

(दी०) एतेन व्याप्तिग्रहविषयधर्मिमात्रवृत्तिधर्मप्रकारकं पक्षधर्मताज्ञानं हेतुरित्यपास्तम् । सामान्यलक्षणानङ्गीकारे धूमत्वादेरपि तथात्वायोगात् वह्निव्याप्यं सर्वं प्रमेयं धूमवान् पर्वत इति ज्ञानादप्यनुमितिप्रसङ्गाच्च । व्याप्तिसमानाधिकरणत्वेन तादृशधर्मभानोक्तौ च सा धूमव्यक्तिर्वह्निव्याप्येति ज्ञानसहितादुक्तज्ञानात्तत्प्रसङ्गो वह्निव्याप्यवानिति शाब्दज्ञानासंग्रहः ।

(गा०) एतेन । कारणीभूतसकलपक्षधर्मताज्ञानासंग्राहकत्वेनातिप्रसक्तत्वेन च । व्याप्तिग्रहेति । एतादृशश्च धर्मो व्याप्यतावच्छेदकधूमत्वादिरिव व्याप्तिरपीति न शाब्दपरामर्शासंग्रह इति भावः । धूमो वह्निव्याप्य इति निश्चयसहितात् द्रव्यवानिति ज्ञानादनुमितिवारणाय मात्रेति । प्रमेयसामान्यहेतुकवाच्यत्वाद्यनुमितिस्वीकारे स्वव्यापकतद्ग्रहविषयताकत्वमेव तद्विषयमात्रवृत्तित्वं, केवलान्वय्यनुमानानभ्युपगमे तु तद्विषयान्यावृत्तित्वमेव, यादृशरूपेण व्याप्तिग्रहाविषयतानियतत्वं तादृशनिष्ठावच्छेदकत्वान्यावच्छेदकत्वानिरूपकत्वं प्रकारतायां निवेश्यं अतो न धूमो वह्निव्याप्य इति ज्ञानदशायां जातित्वादिना धूमत्वादिप्रकारकज्ञानान्नातिप्रसङ्गः । स्वरूपतो धूमत्वादिप्रकारकज्ञानसंग्रहाय तादृशरूपावच्छिन्नत्वमुपेक्षितम् । तथात्वायोगात् । वह्न्यादिव्याप्तिग्रहविषयमात्रवृत्तित्वासम्भवात्, सामान्यप्रत्यासत्तिं विना सकलधूमादीनां व्याप्तिग्रहे भानासम्भवादिति भावः । आदिपदेन सकलधूमादिवृत्तिव्याप्तेरपि परिग्रहः, एतावता धूमत्वादिप्रकारकस्य व्याप्तिप्रकारकस्य च पक्षधर्मताग्रहस्यासंग्रहो दर्शितः ।
अतिप्रसङ्गं दर्शयति । वह्निव्याप्यमिति । धूमत्वे व्याप्तिग्रहाविषयतानियतत्वनिर्वाहकस्य व्याप्तिग्रहे सकलवह्निव्याप्यविषयकत्वस्य लाभाय सर्वमिति । एतच्च ज्ञानमनुमित्यादिरूपं, सामान्यप्रत्यासत्तिमनङ्गीकुर्वतां तेषां प्रत्यक्षे सकलवह्निव्याप्यभानासम्भवात् ।

सामान्यप्रत्यासत्त्यभ्युपगमपक्षे वा दूषणमिदं, अन्यथाख्यातिमनङ्गीकुर्वतां सर्वस्मिन् वह्निव्याप्तिविषयकज्ञानासम्भवात् ।

अन्यथाख्यातिस्वीकारे च तादृशान्यथाख्यातिकाले धूमवान् पर्वत इत्यादिज्ञानादनुमितेरिष्टत्वात् । वह्निव्याप्यत्वस्य स्वसमानियत-सर्वत्वधर्मितावच्छेदकतापन्नस्य उद्देश्यतावच्छेदकत्वं सूचयितुं प्रमेयमिति विधेयवाचकपदान्तरानिर्देशः, धूमत्वावच्छेदेन व्याप्तिज्ञानदशायां तज्ज्ञानादनुमितेरिष्टत्वात् धूमत्वांशे व्याप्तेः सामानाधिकरण्यमात्रावगाहितां सूचयितुं धूम इत्यनभिधाय सा धूमव्यक्तिरिति । शाब्दज्ञानासंग्रह इति । वह्निव्याप्यवानित्यादिशब्दस्य व्याप्तौ व्याप्तेरवच्छेदकताया इव सामानाधिकरण्यस्याप्यबोधकत्वादिति भावः ।

(दी०) अत एव व्याप्तिभानांशे प्रकारतया यस्तादृशो धर्म्मो भासते तत्प्रकारकं पक्षधर्मताज्ञानं हेतुः वह्निव्याप्यवानित्यत्र च वह्निव्याप्यत्वमेव तथा, धूमवानित्यादौ च धूमत्वादिकं धूमसमानाधिकरणेत्यादिव्याप्तिज्ञाने तस्यापि प्रकारत्वादिति परास्तम् । धूमसमानाधिकरणवह्निव्याप्यं सर्वं प्रमेयं धूमवानयं प्रमेयत्वव्याप्यं सर्वमभिधेयं समानाधिकरणवांश्चायमित्यादिज्ञानादप्यनुमित्यापत्तिः । न च धूमत्वादेरतिरिक्तवृत्तित्वग्रहे स एव प्रतिबन्धकस्तदग्रहे त्वनुमिताविष्टापत्तिरिति वाच्यम् । एवंविधेष्टापत्त्यैव सर्वत्र प्रतीकारे विशेषणानुसरणवैयर्थ्यात् व्यभिचाराग्रहपक्षधर्मताज्ञानयोरेव हेतुत्वस्य सुवचत्वात् ।

(गा०) अत एव । अतिप्रसङ्गस्य दुर्वारत्वादेव । व्याप्तिभानांशे इत्यादिर्व्याप्तिप्रकारतान्तर्गतप्रकारताश्रयो यो व्याप्तिग्रहविषयतानियतो धर्म इत्यर्थः । वह्निव्याप्यं सर्वं प्रमेयं धूमवान् पर्वत इत्युक्तज्ञानवारणाय निरुक्तप्रकारताश्रयत्वं धर्मविशेषणम्, धूमो वह्निव्याप्यः अभाववानयमित्यादिज्ञानवारणाय च व्याप्तिग्रहविषयतानियतत्वं उपात्तम् । तथा । तादृशो धर्मः, व्याप्तिप्रकारतान्तर्गतत्वस्य भेदाभेदसाधारणत्वादिति भावः । 'धूमत्वादिकं' 'तथे'त्यनुषङ्गेणान्वयः । धूमसमानाधिकरणेत्यादीति । साध्याभाववदवृत्तित्वरूपव्याप्तिग्रह-

स्थले च ज्ञानद्वयादनुमितिर्मयापि न स्वीक्रियते इति भावः। वह्निव्याप्यं सर्वमित्यत्र तदभाववदवृत्तित्वरूपव्याप्तिज्ञानमेव विवक्षितं धूमव्यापकवह्निसमानाधिकरणवृत्तिधूमत्वादिरूपव्याप्तिभाने धूमत्वादिप्रकारकपक्षधर्मताज्ञानादनुमितेरिष्टत्वात्, तथा च वह्नित्वमात्रस्य साध्यतावच्छेदकत्वे धूमत्वादेर्न व्याप्तिप्रकारतान्तःपातिप्रकारताश्रयत्वमतो धूमसमानाधिकरणवह्नित्वावच्छिन्नस्य साध्यत्वानुधावनम् ।

साध्यतावच्छेदकप्रकारतानन्तःपातित्वेन व्याप्तिप्रकारताविशेषणे उक्तस्थले दोषाभावादाह। प्रमेयत्वव्याप्यमिति । अत्र चाभिधेयत्वाद्यवच्छिन्नव्यापकप्रमेयत्वसमानाधिकरणाभिधेयत्वरूपव्याप्तिरभिप्रेता न तु साध्याभाववदवृत्तित्वविशिष्टसाध्यसामानाधिकरण्यरूपा साध्याभावस्याप्रसिद्धेर्मीमांसकैरन्यथाख्यात्यनभ्युपगमात् भ्रमात्मकतादृशव्याप्तिज्ञानमादाय तन्मतेऽतिप्रसङ्गाभावात् न वा समानाधिकरणत्वावच्छिन्नव्यापकसाध्यसामानाधिकरण्यरूपा तादृशव्यापकताग्रहदशायां(१) समानाधिकरणत्वप्रकारकज्ञानादनुमितेस्तेषामिष्टत्वात्। अतिरिक्तवृत्तित्वग्रहे । व्याप्तिशून्यवृत्तित्वग्रहे। अनुमिताविति । वह्निव्याप्यं सर्वं प्रमेयं धूमवान् पर्वत इत्यादिज्ञानादित्यादिः । एवंविधेष्टापत्त्यैवेति । व्याप्तिग्रहविषयधर्मिवृत्तिधर्मप्रकारकपक्षधर्मताज्ञानत्वेनैवानुमितिहेतुना वह्निव्याप्यो धूमो द्रव्यवान् पर्वत इत्यादौ द्रव्यत्वादावतिरिक्तवृत्तित्वग्रहे स एव प्रतिबन्धकः तदग्रहेऽनुमिताविष्टापत्तिरित्यपि वक्तुं शक्यतया व्याप्तिग्रहविषयधर्मिमात्रवृत्तिधर्मप्रकारकत्वादिविशेषणवैयर्थ्यापातादित्यर्थः ।

अत्रेष्टापत्तौ प्रतिबन्ध्यन्तरमाह । व्यभिचाराग्रहेति । एवकारेण व्याप्तिज्ञानहेतुताव्यवच्छेदः । व्याप्तिज्ञानशून्यतादशायां व्यभिचाराग्रहे तद्देशानुमिताविष्टापत्तिसम्भवात् । यदि च व्यभिचाराव्यभिचारयोर्द्वयोरेव यत्राग्रहस्तत्रानुमितेरनुभवविरुद्धत्वान्न तत्रेष्टापत्तिः सम्भवतीत्युच्यते तदा प्रमेयत्वव्याप्यं सर्वमित्यादिज्ञानादप्यनुमितेरनुभवविरुद्धत्वात् प्रकृतेऽपीष्टापत्तिर्न सम्भवतीति भावः ।

---

(१) तादृशव्याप्तिग्रहदशायामिति पु० पा० ।

(दी०) किञ्च पुरुषान्तरस्य तस्यैव वा कालान्तरे वर्त्तमानं व्याप्तिग्रहमादायातिप्रसङ्गस्य भङ्गाय स्वसमानकालीनस्वसमानाधिकरणव्याप्तिग्रहविषयधर्मिमात्रवृत्तिधर्मप्रकारकं पक्षधर्मताज्ञानं वाच्यं तथा च स्वत्वस्याननुगतत्वात्कारणतावच्छेदकस्य तत्तद्व्यक्तिमात्रपर्यवसायित्वे मिथो व्यभिचारः तत्तत्पक्षधर्मताज्ञानत्वेनैव हेतुत्वसम्भवेऽधिकवैयर्थ्यञ्च ।

(गा०) ननु व्याप्तिप्रकारतानिरूपिता या संसर्गता तन्निरूपिता या विशेष्यवृत्तिविषयता तन्निरूपिता या विषयता तन्निरूपकीभूतो यो व्याप्तिग्रहविषयमात्रवृत्तिधर्मस्तत्प्रकारकपक्षधर्मताज्ञानत्वेन हेतुता वाच्या तादृशधर्मो व्याप्तिः धूमव्यापकवह्निसमानाधिकरणधूमत्वादिरूपव्याप्तौ हेतुतावच्छेदकीभूतधूमत्वादिश्च न तु तद्घटकसामानाधिकरण्यादिकम्, साध्याभाववदवृत्तित्वादिरूपव्याप्तिघटकाभावमादायातिप्रसङ्गभङ्गाय व्याप्तिग्रहविषयमात्रवृत्तित्वोपादानमिति नोक्तापत्तीनामवकाश इत्यतो दूषणान्तरमाह । किञ्चेति । कालान्तर इति । कारणतावच्छेदककोटिप्रविष्टलिङ्गादीनां अतीतत्वदशायामपि अनुमितेरुत्पत्त्या प्रकृते कारणतावच्छेदकविशिष्टप्राक्सत्तायाः कार्यजनने नियामकत्वासम्भवादतिप्रसङ्गो बोध्यः । स्वसमानकालीनेति । स्वक्षणवृत्तीत्यर्थः । स्वपदं फलोपधायकत्वेनाभिमततत्तत्पक्षधर्मताज्ञानव्यक्तिपरम् । वाच्यमिति । हेतुतया स्वीकार्यमित्यर्थः । तादृशपक्षधर्मताज्ञानत्वेनेत्यादिः व्याप्तिज्ञानोत्पत्तिद्वितीयक्षणोत्पन्नपक्षधर्मताज्ञानात् व्याप्तिज्ञाननाशेऽपि अनुमितिरेतन्मते स्वीक्रियते इति बोध्यम् । तत्तत्पक्षधर्मताज्ञानत्वेन हेतुत्वसम्भव इति । फलोपधायकीभूतपक्षधर्मताज्ञाननिष्ठानां तत्तद्व्यक्तित्वानां किञ्चिदविशेषितानामेव हेतुतावच्छेदकत्वसम्भव इत्यर्थः । यथाश्रुते तत्तद्व्यक्तित्वनिवेशस्याऽऽवश्यकत्वे पक्षधर्मताज्ञानत्वनिवेशे प्रयोजनविरहादसङ्गतेः । अधिकवैयर्थ्यञ्चेति । तादृशधर्मप्रकारकत्वादिविशेषणवैयर्थ्यञ्चेत्यर्थ । इदमुपलक्षणम्, तादृशरूपेण हेतुत्वेऽनन्तकार्यकारणभावप्रसङ्गेन महागौरवमपि बोध्यम् ।

(दी०) एतेन गृह्यमाणव्याप्त्यवच्छेदकताकेत्याद्युपदर्शितप्रकारद्वयमपि प्रत्युक्तं वेदितव्यम् । एवं यद्धर्मावच्छेदेन व्याप्तिज्ञानं तद्धर्मप्रकारकं पक्षधर्मताज्ञानं हेतुरित्यपि परास्तम् । तत्तद्धर्मविश्रान्तमूर्त्तिकत्वेनाप्यननुगतत्वाच्च ।

(गा०) एतेन । उक्तरीत्या कारणतावच्छेदकस्य तत्तद्व्यक्तिमात्रपर्यवसायितापातेन । एवमिति । स्वसमानकालीनत्वस्वसमानाधिकरणत्वयोरन्यतरप्रवेशस्यावश्यकतया अननुगमेनेत्यर्थः । यद्धर्मावच्छेदेनेति । तद्धर्मावच्छिन्नव्याप्तिज्ञानसहिततद्धर्मप्रकारकपक्षधर्मताज्ञानत्वावच्छिन्नमित्यर्थः । परास्तमिति । साहित्यस्य समानकालीनत्वात्मकत्वे स्वसमानाधिकरणत्वस्य सामानाधिकरण्यरूपत्वे स्वसमानकालीनत्वस्य व्याप्तिज्ञानेऽवश्यं निवेशनीयत्वादिति भावः । एकक्षणावच्छिन्नैकात्मवृत्तित्वसम्बन्धेन तद्व्यं यदि तत्साहित्यं तदा नैतादृशाननुगम इत्यतः प्रकारान्तरेणाननुगममाह । तत्तद्धर्मेति । विशिष्य तत्तद्धर्मघटितत्वेनेत्यर्थः । अननुगतत्वादिति । तथा च धूमत्वादिप्रकारकपक्षधर्मताज्ञानस्यालोकत्वाद्यवच्छिन्नलिङ्गकानुमितौ व्यभिचारः तत्तद्धर्मावच्छिन्नलिङ्गकानुमितित्वस्य कार्यतावच्छेदकत्वोपगमेऽपि हेतुतावच्छेदकभेदेन कारणताबाहुल्यमिति भावः ।

यद्यपि हेतुतावच्छेदकघटितव्यापकसामानाधिकरण्यरूपव्याप्तिज्ञानस्यैव हेतुतायाः केवलान्वयिसाधारण्यानुरोधेन वक्तव्यतया तस्य च हेतुतावच्छेदकमनन्तर्भाव्य कारणताया दुष्कल्पघतया नैयायिकमतेऽपि हेतुतावच्छेदकभेदेन परामर्शकारणताभेद आवश्यकः व्याप्यतावच्छेदकानवगाहिशाब्दपरामर्शादनुमित्यनुत्पादश्च समानः, तथाऽपि निरुक्तधर्मापेक्षया व्याप्तिप्रकारकपक्षधर्मतानिश्चयत्वस्य लघुतया तेन रूपेण कारणताकल्पनमेवोचितमित्यत्र तात्पर्यम् ।

(चि०) अपि च यत्र धूमत्वव्याप्त्योर्वैशिष्ट्यं प्रथममेव प्रत्यक्षेण युगपत्पक्षधर्मे भासते तत्र लाघ-

वात् व्याप्यत्वज्ञानत्वमेव कारणतावच्छेदकम् । न चैवमतिरिक्तविशिष्टज्ञानकारणत्वे गौरवं दोषाय, सप्रमाणकत्वात्, कारणताग्रहदशायां फलमुखगौरवस्य सिद्ध्यसिद्धिभ्यामदोषत्वात् ।

(दी०) यत्रेच्छा तत्साधनताज्ञानस्येच्छाहेतुत्वेऽपि समानमिति चेत्? सत्यम्, प्रतिवक्ष्यते हि तत्र लघुगुरुरूपाभ्यां युगपदुपस्थितौ लघुरूपावच्छेदेनैव कारणत्वं कल्प्यते लाघवात् नियमादेकतररूपावच्छेदेनाप्यक्लृप्तत्वात् इत्याशयवानाह । अपि चेति । ननु स्वसमानाधिकरणाभावेत्यादिव्याप्तौ स्वपदार्थस्यैकस्याभावेन धूमादिकमेव विशिष्य उपादेयं तत्र च धूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नवह्निसमानाधिकरणेन्धनवानयमिति ज्ञानादप्यनुमितिप्रसङ्गेन तादृशवह्निसमानाधिकरणधूमत्वं व्याप्तिस्तत्प्रकारकमेव च पक्षधर्मताज्ञानमननुगतमपि हेतुरिति वक्तव्यं तथा च यद्धर्मविशिष्टसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वं साध्यतावच्छेदके गृह्यते तत्प्रकारकपक्षधर्मताज्ञानत्वेनैव हेतुत्वम् अथ वह्निव्याप्यवान् धूमो वह्निव्याप्योऽयं धूमवान्, वह्निर्धूमव्यापकोऽयं धूमवानित्यादिसकलवित्तिव्यापकत्वात् न तूपदर्शितव्याप्तिप्रकारकज्ञानत्वेनाव्यापकत्वात् ।

(गा०) ननु यत्त्वतत्त्वाननुगमस्य दोषत्वे इष्टत्वेन फलसाधनताज्ञानस्य उपायेच्छाद्यहेतुत्वेन यत्रेच्छा तत्साधनताज्ञानं हेतुरितीष्टसाधनताज्ञानहेतुतापरिष्कारो मणिकृतां विरुध्येत इत्याशङ्कते । यत्रेच्छेति । प्रतिवक्ष्यत इति । तत्र गत्यन्तरविरहेण सुखदुःखाभावत्वादिप्रकारकफलगोचरेच्छायास्तदवच्छिन्नसाधनताज्ञानस्य चाननुगतेनापि तादृशेच्छात्वेन तादृशज्ञानत्वेन च हेतुता स्वीक्रियते कार्यतावच्छेदककोटौ चाव्यवहितोत्तरत्वसम्बन्धेन तत्तत्कारण-

तावच्छेदकावच्छिन्नवैशिष्ट्यं निवेश्य व्यभिचारो वारणीयः, इच्छ
गता जातिविशेषा एव वा तत्तत्फलेच्छाजन्यतावच्छेदकत
स्वीक्रियन्ते नानाफलगोचरेच्छास्थले च नानैवेच्छाव्यक्तयः स्व
क्रियन्ते प्रयत्नवदिच्छायौगपद्यस्वीकारेऽपि क्षतिविरहात् इति भाव

ननु पर्वतवृत्तिधूमत्ववह्निव्याप्त्योर्वैशिष्ट्यं यत्र युगपदेव पक्ष धर्मे भासते तत्र विशिष्टपरामर्शत्वावच्छिन्नस्यैव व्याप्यतावच्छेद कप्रकारकपक्षधर्मताज्ञानत्वावच्छिन्नस्याप्युपस्थितिरस्ति तथा च तेन रूपेणैव किन्न हेतुत्वमुपेयते, एतन्मतेऽवच्छेदकलाघववत् त न्मतेऽपि नियमांशाकल्पनेन लाघवसत्त्वात् इत्याशङ्कां परिजिही र्षुः अपिचेत्यादिमूलाशयमाह। लघ्वित्ति। नियमादेरिति। आदिना अनन्यथासिद्धत्वपरिग्रहः। एकतररूपेति। उक्तशाब्दपरामर्शस्थले यद्धर्मावच्छेदेन व्याप्तिज्ञानं तद्धर्मप्रकारकपक्षधर्मताज्ञानस्य नैया-यिकमतासिद्धत्वादिति भावः। हेतुतावच्छेदकभेदेन कारणताभेदं नैयायिकमतेऽप्याशङ्क्य मीमांसकमते लाघवमाशङ्कते। नन्वित्यादि-ना। विशिष्य। धूमत्वादिना।

ननु धूमत्वादीनां विशिष्य व्याप्तिघटकत्वेऽपि किञ्चिद्धर्माव-च्छिन्नविषयतात्वेनैव सामान्यतस्तद्विषयता कारणतावच्छेदकको-टौ निवेशनीयेति न कारणतावच्छेदकाननुगम इत्यत आह। तत्र चेति। धूमादिविषयतानां विशिष्य कारणतावच्छेदकेऽनिवेशे चेति शेषः। धूमादिविषयतानां विशिष्य निवेशेऽपि व्याप्तिशरीरे सामा-नाधिकरण्यानुयोगितावच्छेदकतया धूम-त्वादीनामनिवेशे उक्त-ज्ञानादनुमितिप्रसङ्गो दुर्वार एवेति तत्र धूमत्वादिकं तथा निवेश्य विशिष्य तत्प्रकारकत्वेन हेतुतां दर्शयति। तादृशेति। यद्धर्मविशिष्टे-त्यादि। तद्धर्मावच्छिन्नलिङ्गकानुमितौ तद्धर्मविशिष्टव्यापकताव-च्छेदकताविशिष्टसाध्यतावच्छेदकविषयताशालिग्रहविशिष्टतद्धर्म-प्रकारकपक्षधर्मताज्ञानत्वेनैवेत्यर्थः। सकलवित्तिव्यापकत्वादिति। तथा च तद्धर्मावच्छिन्नस्य नियतपूर्ववर्त्तित्वमुभयमतासिद्धमेवेति एतन्मते कल्पनालाघवमक्षुण्णमेव, व्याप्यतावच्छेदकानवगाहिशा-ब्दज्ञानादनुमितिश्च नैयायिकानामप्यसिद्धैवानुमितिप्रयोजिकाया उक्तव्याप्तेर्व्याप्यतावच्छेदकंघटितत्वादित्यभिप्रायः।

(दी०) किञ्चान्यथाख्यातिवादिभिर्धूमादिसमानाधिकरणात्यन्ताभावाप्रतियोगिगगनसमानाधिकरणधूमादिमानयमिति ज्ञानादनुमित्यङ्गीकारादखण्डव्याप्तेश्चाप्रसिद्धतया प्रकारत्वासम्भवात् साध्ये साधनव्यापकत्वग्राहकमधिकरणादौ च साध्यीयत्वाद्यवगाहि पक्षे च तादृशसाधनवत्त्वावगाहि यज्ज्ञानं तत्त्वेन कारणत्वं वाच्यम् तथा च लाघवात्तादृशव्यापकत्वपक्षधर्मत्वावगाहितयोरेव कारणतावच्छेदकत्वमवृत्तिहेत्वनुरोधेन व्यापकत्वस्यापि खण्डशो निरुक्तिस्तेषां परमातिरिच्यते, यथा च सामानाधिकरण्यज्ञानस्य हेतुत्वेऽपि न क्षतिस्तथा वक्ष्यते इति चेन्न । गृह्यमाणव्याप्यतावच्छेदकताकेत्यादिप्रकारद्वयोक्तदूषणग्रस्तत्वात् वह्न्यत्यन्ताभाववद्वृत्तिधर्मवानयमित्यादिज्ञानादप्यनुमित्युदयाच्च व्यभिचारज्ञानाविरोधिज्ञानाविषयत्वेनैव व्याप्तीनामनुगमात् ।

(गा०)अत्र च कारणतावच्छेदकावच्छिन्नाव्यवहितोत्तरत्वघटितधर्मस्यैव जन्यतावच्छेदकत्वापगमात् , तदवच्छिन्ननियतपूर्ववर्त्तिताविशिष्टपरामर्शत्वावच्छेदेनाप्युभयवादिसिद्धेव ज्ञानद्वयस्थलेऽतिरिक्तविशिष्टपरामर्शकल्पनागौरवस्य फलमुखत्वेनादोषत्वं मूलकृतैव वाच्यमित्याशङ्क्य मीमांसकमते कारणतावच्छेदकलाघवप्रणालीमाह। किञ्चेति । अखण्डव्याप्तेरिति । उक्तविशिष्टपदार्थरूपाया व्याप्तेरित्यर्थः।प्रकारत्वासम्भवादिति।तथा च विशिष्टव्याप्तिप्रकारकत्वेन कारणतापि न सम्भवतीति भावः। साध्ये। साध्यतावच्छेदके ।व्यापकत्वग्राहकम् । व्यापकतावच्छेदकत्वावगाहि । तादृशव्यापकत्वपक्षधर्मत्वावगाहितयोरेवेति । हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वविशिष्टसाध्यतावच्छेदकरूपव्यापकत्वावगाहित्वहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टपक्षावगाहित्वयोरेवेत्यर्थः।एवकारेणाधिकरणाद्यंशे साध्याद्यवगाहित्वव्यवच्छेदः, कारणतावच्छेदकत्वम्। उचितमिति शेषः ।

यद्यपि वह्न्यादिसाध्यकधूमादिहेतुकस्थलेऽखण्डव्याप्तेः प्रसिद्ध्या व्याप्तिविशिष्टहेतुमत्ताज्ञानत्वेन कारणत्वं सुवचमेव साध्यसाधनभेदेन कारणभेदस्यावश्यकत्वात् । न चैवमपि साध्यसामानाधिकरण्यांशस्य व्याप्तिघटकतया कारणतावच्छेदककोटौ निवेशाधिक्येन गौरवं दुष्परिहरमेवेति वाच्यम् । भवन्मतेऽपि एकक्षणावच्छिन्नसामानाधिकरण्यसम्बन्धेन एकज्ञानवैशिष्ट्यस्यापरज्ञानांशे निवेशाधिक्यात् अन्यथा अखण्डव्याप्तिप्रकारकत्वेन हेतुत्वेऽपि गौरवात् तत्प्रतिक्षेपस्य अनुचितत्वात् । तथापि अन्यथाख्यातिवादिनां वह्न्याद्यधिकरणत्वादिना तदनधिकरणादिमात्रविषयकज्ञानादप्यनुमित्युत्पत्त्या अखण्डव्याप्तिविषयकत्वेन वह्न्यादिसाध्यकानुमितावपि न हेतुता सम्भवतीत्यभिप्रायः । व्यापकत्वस्यापीति । व्यापकतावच्छेदकत्वावगाहित्वस्यापीत्यर्थः । खण्डशो निरुक्तेरिति । अधिकरणांशे साधनावगाहि आधेयत्वांशे ऽधिकरणीयत्वावगाहीत्यादिक्रमेण कारणतावच्छेदकगर्भे निवेशनमित्यर्थः । अखण्डव्यापकत्वाप्रसिद्ध्या तदवगाहित्वस्य यथाश्रुतस्य निवेशासम्भवादिति भावः । तेषाम् । अन्यथाख्यातिवादिनां नैयायिकानामित्यर्थः । मीमांसकानां तत्र व्यापकताज्ञानासम्भवेनानुमितेरसिद्धेरिति भावः ।

न च केवलाभावत्वादिना साधनसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वादिज्ञानादनुमितिवारणायाधिकरणांशे धूमादिप्रकारकमाधेयत्वांशेऽधिकरणप्रकारकमित्यादिक्रमेण व्यापकताज्ञाननिवेशनं मीमांसकानामप्यावश्यकमिति वाच्यम् । हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकविशिष्टपदार्थस्य विषयतासम्बन्धेन कारणतावच्छेदकत्वोपगमात् विशेष्यविशेषणभावापन्नतावत्पदार्थानवगाहिज्ञाने विशिष्टनिरूपितविषयताविरहेण विषयतासम्बन्धेन तादृशविशिष्टवत्त्वाभावादुक्तातिप्रसङ्गासङ्गतेः, यादृशविशिष्टपदार्थस्य कारणतावच्छेदकत्वं तादृशविशिष्टाधिकरणस्यैव कार्योत्पादकत्वात् ।

नन्वत्र तन्मते साध्यसामानाधिकरण्यज्ञानस्यानुमित्यहेतुतया विरोधस्य हेत्वाभासतानुपपत्तिः अनुमितिजनकज्ञानाविरोधित्वादित्यत आह । यथा चेति । वक्ष्यत इति । व्यापकतापरामर्शविचार इति शेषः । गृह्यमाणेति । व्यापकताज्ञानविशिष्टपक्षधर्मताज्ञानत्वेन

पक्षधर्मताज्ञानविशिष्टव्यापकताज्ञानत्वेन वा हेतुत्वम् इत्यत्र विनिगमनाविरहरूपदूषणग्रस्तत्वादित्यर्थः ।

नन्वनुमितिं प्रति तद्धर्मावच्छिन्ननिरूपितव्यापकताज्ञानत्वेन तद्धर्मावच्छिन्नहेतुमत्पक्षज्ञानत्वेन च कारणता स्वीक्रियत दण्डचक्रादिवत् परस्परसहकारेण फलजननान्नातिप्रसङ्गः । न च विशिष्टपरामर्शत्वेनैककारणत्वकल्पनापेक्षया कारणत्वद्वयकल्पने गौरवमिति वाच्यम् । विशिष्टपरामर्शत्वेन हेतुतामते कारणतावच्छेदककोटिप्रविष्टस्याधिकरणाद्यंशे साध्याद्यवगाहित्वतदंशीयाप्रामाण्यज्ञानविशेषानास्कन्दितत्वरूपाधिकविशेषणस्य तथाविधविशेषणान्तरैः समं मिथो विशेष्यविशेषणभावे विनिगमनाविरहेण कारणताबाहुल्यस्य दुर्वारत्वादित्यतो दूषणान्तरमाह । वह्न्यत्यन्ताभाववदवृत्तीति । अनुमित्युदयादिति । तथा च तदसंग्राहकतया नोक्तरूपेण हेतुतासम्भव इति भावः ।

ननु तादृशज्ञानान्न जायत एवानुमितिर्नैयायिकमतेऽपि केवलान्वयिसाधारण्यानुरोधेन व्यापकसामानाधिकरण्यरूपव्याप्तिज्ञानस्यैव हेतुताया वक्तव्यत्वात् तत्रानुमित्यनुत्पादस्य तुल्यत्वादित्याशङ्कां परिहरति। व्यभिचारेति। अन्वयव्यभिचारज्ञानप्रतिबन्धकतावच्छेदकत्वेन नानाविधव्याप्तिप्रकारता अनुगमय्य कारणतावच्छेदकगर्भे प्रवेशनीया इत्यर्थः। तथा चास्माकं तत्रानुमितिर्भवत्येव इति भावः। इदन्त्वापाततः, तन्मतेऽपि तद्धर्मावच्छिन्नविशेष्यकव्यभिचारज्ञानप्रतिबन्धकत्वेन व्यापकताज्ञानस्य हेतुताया वक्तुं शक्यतया साध्याभाववदवृत्तित्वरूपव्याप्तिज्ञानस्य संग्रहसम्भवात् तादृशव्याप्यंशे निर्धर्मितावच्छेदककज्ञानन्तु नैयायिकानामपि दुःसंग्रहं तादृशज्ञानीयव्याप्तिप्रकारतायां व्यभिचारज्ञानप्रतिबन्धकतावच्छेदकताविरहात् तादृशप्रतिबन्धतावच्छेदकप्रकारितानिरूपकधर्मप्रकारतात्वेन व्याप्तिप्रकारितायाः कारणतावच्छेदकत्वे प्रमेयत्वादिना व्याप्तिप्रकारताकज्ञानादप्यनुमितिप्रसङ्गः । एवं व्यापकताज्ञानस्य साध्याभाववद्वृत्तित्वरूपव्यभिचारज्ञानं प्रति साध्याभाववदवृत्तित्वज्ञानस्य साधनव्यापकताज्ञानं प्रति विरोधित्वे मानाभावादनुगम एवासम्भवः । साध्यसामानाधिकरण्यविषयतायां व्यापकताग्रहनिष्ठप्रतिबन्धकतावच्छेदककोटावनिवेशेन व्यापकसामानाधिकरण्यरूपव्याप्तिप्रकारि-

ताया व्यभिचारज्ञानप्रतिबन्धकतावच्छेदकत्वञ्च दुर्घटम्। अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वानिवेशेऽपि च धूमव्यापकवह्निसमानाधिकरणेन्धनकालीनधूमवान् पर्वत इत्यादिज्ञानादनुमित्यापत्तेः।

यत्तु व्यापकत्वज्ञानं व्यापकत्वनिरूपकतावच्छेदकधर्मावच्छिन्नविशेष्यकव्यभिचारज्ञानं प्रत्येव प्रतिबन्धकं तत्प्रतिबन्धकतया च धूमादिव्यापकसाध्यसमानाधिकरणवृत्तिधूमत्वादिरूपव्याप्तिज्ञानधर्मितावच्छेदकधर्मान्तरावच्छिन्नविशेष्यताकव्यभिचारज्ञानस्य तादृशव्याप्तिज्ञानदशायां दुर्वारतया समानधर्मितावच्छेदकत्वप्रत्यासत्त्या व्यभिचारधियं प्रति तादृशव्याप्तिप्रकारकज्ञानत्वेन पृथक् प्रतिबन्धकत्वं कल्प्यते इति तादृशव्याप्तिप्रकारतायाः साध्याभाववदवृत्तित्वरूपव्याप्तिप्रकारतायाश्च व्यभिचारधीप्रतिबन्धकतावच्छेदकप्रकारतात्वेनानुगमय्यानुमितिकारणतावच्छेदकत्वं सम्भवति एवञ्च व्याप्त्यंशे निर्धर्मितावच्छेदकताकज्ञानीयप्रकारताया अपि तादृशरूपेण सङ्ग्रहः सम्भवति, धर्मितावच्छेदकतायाः प्रत्यासत्तित्वे धर्मितावच्छेदकतानिरूपकत्वस्य व्याप्तिप्रकारतायामनिवेशादिति। तदपि न सम्यक्। धूमादिव्यापकसाध्यसमानाधिकरणवृत्तिधूमत्वादिज्ञानदशायां तद्विशेष्यतावच्छेदकावच्छिन्ने साध्याभाववदवृत्तित्वज्ञानोपगमे क्षतिविरहादिति।

वस्तुतस्तु यदि ज्ञानद्वयहेतुतावादिना व्यापकताधीर्हेतुरुपेयते तदा व्यापकत्वमपेक्ष्यापि लघुशरीरा साध्याभाववदवृत्तित्वरूपा व्याप्तिरेवानुमितिप्रयोजिका न्यायमते स्वीकार्या तत्प्रकारकपक्षधर्मताज्ञानत्वेन हेतुतावच्छेदकधर्मानानिवेश्यैव हेतुतोपगन्तव्या तथा च हेतुतावच्छेदकभेदेन तेषां न कारणताभेदः, ज्ञानद्वयहेतुतावादिना तादृशव्याप्तेरनुमितिप्रयोजकत्वोपगमेऽपि साध्यव्याप्यो धूमः आलोकवान् पर्वत इत्यादिज्ञानद्वयादनुमितिप्रसङ्गवारणाय हेतुतावच्छेदकानां विशिष्य निवेशनीयतया तद्भेदेन कारणताबाहुल्यमिति विशिष्टपरामर्शत्वेन हेतुत्वमेव सम्यक्।

यदि च केवलान्वय्यनुमानं नैयायिकानामनुपेक्षणीयमिति व्यापकसामानाधिकरण्यज्ञानमप्यनुमितिकारणं वाच्यमित्युच्यते तदा केवलान्वय्यनुमानपदार्पणभीरुभिर्मीमांसकैः कथं तादृशव्या-

स्तिमुपेक्ष्य व्यापकताया लाघवेन तज्ज्ञानपक्षधर्मताज्ञानयोः पृथक्कारणत्वं व्यवस्थापयिष्यते इत्यादिरीत्या परमतं निराकार्यम्। आधिकमन्यत्रानुसन्धेयम ।

(दी०)नन्वत्र कारणे कार्यमेव प्रमाणं तच्च कार्यकारणभावग्रहे सति स्यात् स एव तु न सम्भवति गौरवज्ञानेन प्रतिबन्धादित्यत आह । कारणताग्रहेति । कारणतानिर्णयं विना तत्फलस्य धर्मान्तरानिर्णयस्याभावेन तद्घटितगौरवस्यानिर्णयादित्यर्थः । सम्भाव्यते तावदिदं धर्मान्तरकल्पनं विना कारणत्वस्यैवाशक्यनिर्वाहत्वादिति चेत् ? सम्भाव्यतां न तु तत् प्रतिबन्धकम् , सामान्यतः कार्यकारणभावग्रहस्य प्रायशो विलयप्रसङ्गात् । तत्र तत्र क्लृप्तनियतपूर्ववर्त्तितावच्छेदकरूपान्तरविरहेणागत्या गौरवमप्यास्थीयते इति चेदिहापि तद्विरहस्यासकृदावेदितत्वादिति कृतं पल्लवितेनेति ।

(गा०) विशिष्टपरामर्शरूपधर्मिणः सप्रमाणकत्वात् न तत्कल्पनं गौरवायेति यदुक्तं सप्रमाणकत्वादिति मूले तत्राशङ्क्य युक्त्यन्तरमवतारयति । नन्विति । तच्च । कार्यस्य प्रमाणत्वञ्च । कार्यकारणभावग्रहे सतीति । अन्यथानुकूलतर्कानवतारेण व्यभिचारशङ्कया स क्षणो विशिष्टपरामर्शवान् अव्यवहितपूर्वत्वसम्बन्धेनानुमितिमत्वादिति रीत्या अनुमित्या ज्ञानद्वयस्थले विशिष्टपरामर्शानुमानासम्भवादिति भावः । तत्फलस्य । कारणतानिर्णयाधीनस्य । तद्घटितेति । धर्मान्तरघटितेत्यर्थः । विशिष्टपरामर्शत्वावच्छेदेन कारणताग्रहे विशिष्टपरामर्शत्वधर्मिकगौरवज्ञानं विरोधि तच्च गौरवं प्रमाणान्तराप्रसिद्धतत्सदनुमित्यव्यवहितपूर्वकालीनस्वाश्रयकत्वाद्न्यत् दुर्वचमेवेति गौरवस्य तादृशधर्मिघटितत्वमित्यभिप्रायः(१) । गौरवनिर्णयासम्भवेऽपि गौरवसन्देहेन प्रतिबन्धात् न कारणताग्रहः सम्भवतीति आशङ्कते। सम्भाव्यत इति । सन्दिह्यत इत्यर्थः। इदम् ।

---

(१) तादृशधर्मान्तरघटितत्वमित्यभिप्राय इति पु० पा० ।

गौरवम् । संशयप्रयोजकमाह । धर्म्यन्तरेति । अशक्यनिर्वाहत्वादिति । तथा च कारणतासंशयात्तदुपपादकधर्मिणोऽपि संशयो भविष्यति, तत्संशयाहितगौरवसंशयेन प्रतिबन्धाच्च न कारणतानिर्णयः सम्भवतीति भावः । तत् । सम्भावनम् । सामान्यतः । घटत्वदण्डत्वादिसामान्यरूपेण । कार्यकारणभावग्रहस्येति । तन्निर्णयस्येत्यर्थः । प्रायशो विलयप्रसङ्गादिति । यत्र दण्डादिरूपकारणं कार्यान्वयं तत्स्थलीयधर्मिघटितगौरवसंशयेन प्रतिबन्धसम्भवादिति भावः । यत्र च कार्याव्यवहितपूर्वकाले कारणतावच्छेदकावच्छिन्नसत्त्वं प्रमाणान्तरसिद्धं तत्र तादृशगौरवाभावात् प्रायश इत्युक्तम् । तत्र तत्रेति । घटत्वदण्डत्वादिना कार्यकारणभावस्थल इत्यर्थः । गौरवमप्यास्थीयते । गौरवसन्देहोऽविरोधितया स्वीक्रियते ।

(चि०) न चासन्निकृष्टे धूमे तदभावः, भवन्मतानुमितिहेतुव्याप्तिस्मरणधूमत्वज्ञानसहितेन मनसा तदुत्पादात्, यथा परमाणुर्निरवयवद्रव्यं नित्यपरिमाणवत्त्वात् आकाशवदित्यादौ प्रत्यक्षानुमानोपनीतातीन्द्रियसाध्यसाधनयोराकाशवृत्तितया स्मरणे व्यभिचाराज्ञाने मनसा व्याप्त्यनुभवः, अनुमानयोः प्रत्येकतदुभयसहचाराविषयत्वेन व्याप्त्यग्राहकत्वात् । न चातीन्द्रियव्याप्यत्वमतीन्द्रियेऽनुमेयम् । तत्रापि व्याप्तिग्राहकाभावात् । न च तदुपनयसहितस्य मनसो बहिरर्थप्रमाहेतुत्वे उपनयस्य प्रमाणान्तरत्वम्, इन्द्रियादेः सन्निकर्षवदुपनयस्य नियतव्यापाराभावेन प्रमायामकरणत्वात् सहकारिता च तदभावेऽपि भवति बहिरिन्द्रियलिङ्गसादृश्यादिव्यापारं विनापि चिन्तोपनीतपदार्थानां बाधकानवतारे मनसा संसर्गानुभवस्य सकलजनसिद्धत्वात् कथमन्यथा कविकाव्यादिकमिति ।

(दी०) व्यभिचारनिर्णयेन कारणत्वग्रहासम्भवं निरस्यति । न चेति । अनुमानयोरिति । अनुमितैकसाध्यविशिष्टे साध्यान्तरानुमित्या सहचारग्रहोपगमेऽपि नियमांशग्रहासम्भवादिति भावः । नियतव्यापारेति । एकसम्बन्धिज्ञानाधीनसम्बन्ध्यन्तरस्मरणादितः क्वचिद्विशिष्टज्ञानोत्पत्तावपि नियतत्वेन न तस्य व्यापारत्वं, यं जनयित्वैव यस्य यज्जनकत्वं तस्यैव तत्र तद्व्यापारत्वादित्यर्थः । वस्तुतस्तु तदुपनयव्यक्त्यादेस्तत्प्रमाव्यक्तिं प्रति कारणत्वेऽपि न क्षतिः प्रमावैजात्यस्यैवात्र प्रमाणान्तरनिमित्तत्वात् ।

(गा०) विशिष्टपरामर्शत्वेन हेतुत्वसिद्धये न चेत्यादिना असन्निकृष्टधूमादौ विशिष्टपरामर्शासम्भवशङ्कानिराकरणस्य(१) तत्सिद्ध्युपयोगितामाविष्करोति । (२)व्यभिचारनिर्णयेनेति । सति लाघवे व्यभिचारसंशयस्याकिञ्चित्करत्वान्निर्णयोपादानम् ।

ननु निरवयवद्रव्यत्वानित्यपरिमाणयोरेकतरं दृष्टान्ते प्रसाध्य तद्विशिष्टेऽपरानुमित्या तदुभयसामानाधिकरण्यावगाहनं सुघटमेव, अनुमितेः पक्षतावच्छेदकसामानाधिकरण्यावगाहित्वस्य नियमादित्यनुमानयोरित्यादिमूलासङ्गतिरित्यत आह । अनुमितैकेति । उपगमेऽपीत्यनेन व्याप्तिप्रकारकधियोऽनुमितिहेतुतया संसर्गमर्यादया तादृशसामानाधिकरण्यावगाहिग्रहस्यानुमित्यनुपयोगित्वं सूचितम् ।

एतेन पक्षतावच्छेदकसाध्ययोरवच्छेद्यावच्छेदकभावस्यानुमितौ संसर्गतया भानोपगमेऽपि न निर्वाहः, व्यापाराभावेन उपना-

---

(१)विशिष्टपरामर्शाभावशङ्काया निराकरणस्येति पु० पा० ।

(२) विशिष्टपरामर्शत्वेन हेतुतामते लाघवेन व्यवस्थापिताया मूलोपदर्शिताया असन्निकृष्टधूमादौ विशिष्टपरामर्शाभावशङ्काया अकिञ्चित्करत्वं परिजिहीर्षुराहेति पु० पा० ।

यकज्ञाने प्रमाणत्वतद्व्यवहारयोर्विरहेऽपि उक्तापादकसत्त्वाद्यविरोधाद्यभिचारेण व्याप्त्यसिद्धिरित्याशयेन पूर्वग्रन्थोपदर्शितापत्तिमुद्धरति मूले नचैवमित्यादिना । नियतव्यापाराभावेनेति मूलमसङ्गतं नियतव्यापारत्वपर्यन्तस्य करणलक्षणेऽप्रवेशादतो व्यापाराभाव एवात्र विवक्षितः । व्यापारत्वन्तु नियतत्वनिर्वाह्यमित्यान्तरालिकस्य कुत्रचित्सम्भवेऽपि न तस्योपनीतप्रमात्वावच्छिन्ने उपनयेन जननीये व्यापारतेत्येतत्सूचनाय मूले नियतपदमिति सूचयितुं व्याचष्टे । एकसम्बन्धीति । हस्त्यादिज्ञानतज्जन्यहस्तिपकस्मरणाभ्यां हस्तिपकादिविशिष्टहस्त्यादिविषयकोपनीतज्ञानजननेऽपीत्यर्थः। तस्य मध्यवर्त्तिनः स्मरणस्य अनियतत्वेऽपि कथं न व्यापारतेत्यत आह । यमिति । यं यद्रूपावच्छिन्नम् । यस्य । यद्रूपावच्छिन्नस्य । यज्जनकत्वम् । यद्रूपावच्छिन्नजनकत्वम् । तस्यैव । तद्रूपावच्छिन्नस्यैव । तद्व्यापारत्वात् । तद्रूपावच्छिन्नजनने तद्रूपावच्छिन्नव्यापारत्वात् । एतावतापि , तत्तदुपनयव्यक्तेस्तत्तदुपनीतभानव्यक्तित्वावच्छिन्नजनने तन्नियततत्तत्स्मरणादिव्यक्तिव्यापारकत्वं दुर्वारमेवेत्यालोच्योपनयस्य प्रमाकरणत्वमभ्युपेत्य प्रमाणान्तरत्वं निराकरोति । वस्तुतस्त्विति । न क्षतिरिति । प्रत्यक्षप्रमाण एव तदन्तर्भावेण प्रमाणचातुर्विध्याव्याघातादिति भावः ।

नन्विन्द्रियात्मकप्रत्यक्षप्रमाणे तदनन्तर्भावात् प्रमाणान्तरत्वं तस्य दुर्वारमेवेत्यत आह । प्रमावैजात्यस्यैवेति । एवकारेण प्रमाकरणतावच्छेदकभेदव्यवच्छेदः । प्रमाणान्तरत्वनिमित्तत्वात् । विभिन्नप्रमाणव्यवहारप्रयोजकत्वात् ।

(दी०)न चात्र(१) प्रमावैजात्यम् , अनुपलम्भबाधितत्वात् मानाभावाच्च, उपनयस्य च विशिष्टज्ञाने विशेषणज्ञानत्वेन प्रत्यक्षे च सन्निकर्षविधयोपयोगितया जात्यव्यवस्थापकत्वात् । अत एव बाह्याभ्यन्तरप्रत्यभिज्ञासादृश्याभावादिप्रत्यक्षाणां तत्तात्प्रतियोग्यादिविषयत्वमन्यथा जातिसङ्करप्रसङ्गात् , ज्ञानद्वयकल्पने

---

[१] न चात्रापीति पाठान्तरं , तत्तु न भट्टाचार्यसम्मतमिति अत्र प्रमावैजात्यमितीति पाठधारणेनानुमितम् ।

च स्थैर्यमात्रमुच्छिद्येत, व्यवस्थापितश्च विशिष्टज्ञानस्य व्यवहारहेतुत्वम् । न च *प्रमाणान्तरासहकृतोपनयजन्यतावच्छेदकतया वैजात्यसिद्धिः,* इतरासहकृतत्वेनाजनकत्वात् असिद्धेश्च, उपनयात्मकसन्निकर्षवशेन मनसा प्रत्यक्षजननस्यैवोपगमात् ।

(गा०) ननु उपनयहेतुतावादिनां तज्जन्यज्ञाने तज्जन्यतावच्छेदकधर्मस्वीकार आवश्यकः स च लाघवाज्जातिविशेषरूप एवेति प्रमावैजात्यं दुर्वारमित्यत आह । न चेति । अत्र प्रमावैजात्यमिति । उपनीतज्ञाने प्रत्यक्षव्यावृत्ता जातिरित्यर्थः । सम्भवतीति शेषः । युक्तिसत्त्वे योग्यायामपि व्यक्तौ व्यञ्जकविरहेण उपपद्यमानो जात्यनुपलम्भो न जातिबाधकः, अन्यथा संयोगादौ क्रियादिजन्यतावच्छेदकजातेरपि विलयप्रसङ्गादित्याशङ्क्य उपनयस्य जात्यन्तराव्यवस्थापकत्वं व्यवस्थापयन् युक्त्यभावमेव बाधकं दर्शयति । मानाभावादित्यादिना । विशेषणज्ञानत्वेति । उपयोगितयेत्यग्रिमेणान्वयः । तथा च विशिष्टज्ञानत्वं तज्जन्यतावच्छेदकं न तु जात्यन्तरमिति भावः । उपनेयविशेष्यकमानसानुरोधेन कल्प्यकारणत्वान्तरानिरूपितकार्यतावच्छेदकतया जात्यन्तरसिद्धेरावश्यकतेत्याशङ्क्याह । सन्निकर्षविधयेति । तथा च प्रत्यक्षत्वमेतज्जन्यतावच्छेदकमिति भावः ।

ननु संयोगज्ञानादिसाधारणं सन्निकर्षत्वमनुगतानातिप्रसक्तं दुर्वचमिति विशिष्यैव हेतुता वाच्या तथा च ज्ञानजन्यतावच्छेदकं यदि प्रत्यक्षत्वमात्रमुच्यते तदा लौकिकप्रत्यक्षे व्यभिचार इति संयोगाद्यजन्यप्रत्यक्षत्वमेव तथा वाच्यम् एवञ्च संयोगाद्यजन्यत्वानिवेशप्रयुक्तलाघवेन वैजात्यसिद्धिर्दुर्वारैवेत्यत आह । अत एवेति । उपनयस्य जातिविशेषावच्छिन्नाजनकत्वादेवेत्यर्थः । बाह्यप्रत्यभिज्ञा । स एवायं चैत्र इत्यादिका । आभ्यन्तरप्रत्यभिज्ञा । स एवाहमित्यादिरूपा । आदिपदाभ्यां ज्ञानादिविषयादिपरिग्रहः, यथायोगमन्वयः । अन्यथा । उपनयस्य जातिविशेषावच्छिन्नजनकत्वे । जातिसङ्करेति । किञ्चिद्विषये चक्षुःसंयोगादिजन्यतया तत्र चाक्षुषत्वादेरेवावश्यकत्वात्तेन च समं उपनयजन्यतावच्छेदकजातेर्व्या-

प्यव्यापकभावासम्भवादिति भावः। जातेरनांशिकतया विशेष्यीभूततत्ताद्विषयकज्ञानस्य प्रत्यभिज्ञादौ व्यभिचारप्रसङ्गाच्चेत्यपि बोध्यम्। नत्तेदन्त्वादिविशिष्टविषयकं तत्र ज्ञानद्वयमेव भेदाग्रहसहकृतं विशिष्टव्यवहारादिनिमित्तं न त्वेकं ज्ञानं अतो न जातिसङ्करादिप्रसङ्ग इत्यत आह। ज्ञानद्वयेति। स्थैर्यमात्रमिति। तस्य पूर्वगृहीतानुभूयमानयोरभेदप्रत्यभिज्ञैकप्रमाणकत्वादिति भावः। अनुमानादपि कुतश्चित् स्थैर्यसिद्धिसम्भवादाह। व्यवस्थापितश्चेति। अन्यथाख्याताविति शेषः। प्रत्यक्षसामग्र्यसमवहितज्ञानजन्यतावच्छेदकं वैजात्यन्तु न प्रत्यभिज्ञानादाविति न सङ्कर इत्याशङ्कते। न चेति। अजनकत्वादिति। प्रत्यभिज्ञादौ तत्तादिभानार्थं चक्षुःसंयोगादिजन्यप्रत्यक्षे ज्ञानस्य स्वतन्त्रहेतुताया आवश्यकत्वात् तत एव सर्वांशोपनीतभानस्योपपत्तेरुक्तरूपेण हेतुत्वे मानाभावादिति भावः।

ननु तदानीमिन्द्रियसंयोगादिघटितप्रत्यक्षसामग्र्या अभावात् सर्वांशोपनीतभाने प्रत्यक्षत्वं न सम्भवतीति यज्जातीयप्रमासामग्रीविरहे इत्यादिव्याप्तिबलात् प्रमात्वे जात्यापत्तिर्दुर्वारैव। न च तादृशव्याप्तौ मानाभावः, तादृशोपनीतभाने प्रत्यक्षत्वासम्भवात्तत्रोपनायकज्ञानस्य स्वतन्त्रहेतुताया आवश्यकत्वाज्जन्यतावच्छेदकधर्मं विना तदनुपपत्तेरेव मानत्वात् ज्ञानस्य जनकतायामेव प्रत्यक्षादिसामग्र्यसमवहितत्वमवच्छेदकं भवतु तत्सहकारि वेत्यन्यदेतदित्यत आह। असिद्धेश्चेति। उपनीतभानस्थले प्रत्यक्षादिसामग्र्यभावस्यैवेत्यादिः। असिद्धिमेव विवृणोति। उपनयेति। लौकिकसन्निकर्षस्य विषयिताविशेषावच्छिन्नं प्रत्येव जनकतया उपनीतभाने तादृशविषयिताविशेषानभ्युपगमेन न व्यभिचार इति भावः। न चांशिकोपनीतभाने उपनीतस्य प्रकारतयैव भानोपगमाद्विशेषणज्ञानविधयैव तत्रोपनयज्ञानस्य हेतुत्वात् सर्वांशोपनीतभाने जातिविशेषस्यैव तज्जन्यतावच्छेदकतया कल्पनमुचितम् अलौकिकप्रत्यक्षत्वस्य गुरुत्वात् तथा च प्रत्यक्षत्वं तत्र निर्युक्तिकमिति वाच्यम्। सुरभि चन्दनमित्यादौ मानससर्वांशोपनीतभाने विशेष्यचन्दनादेस्तादात्म्यसम्बन्धेन स्वांशे प्रकारताया अभ्युपगमेन विशिष्टबुद्धौ विशेषणज्ञानहेतुतयैव निर्वाहादुपनीतभाने उपनायकज्ञानस्य स्वातन्त्र्येण हेतुताया अक-

ल्पनात् । सिध्यतु वा सर्वांशोपनीतभाने जातिविशेषः सोऽपि प्रत्यक्षत्वव्याप्य एव न तु तद्विरुद्ध इति नोपनयस्य प्रमाणान्तरता । न च तादृशज्ञाने प्रत्यक्षत्वमप्रामाणिकम् । प्रत्यक्षत्वादन्यस्या अनुभवत्वजातेरप्रामाणिकतया तत्प्रकारकज्ञानत्वस्य स्मृतिसाधारण्येन व्यभिचारात् प्रत्यक्षत्वस्यैव विशेषणज्ञानजन्यतावच्छेदकतया तत्र प्रत्यक्षत्वानुपगमे तस्य विशेषणज्ञानजन्यत्वानुपपत्तेः । न चोपनयविधयैव तत्र विशेषणज्ञानस्यापेक्षणीयतया विशिष्टप्रत्यक्षत्वावच्छिन्नाया विशेषणधीजन्यतायास्तत्रासत्त्वेऽपि न क्षतिरिति वाच्यम् । स्वरूपतो घटत्वादिप्रकारकोपनीतभाने घटत्वादिविषयकज्ञानस्य उपनायकविधयाऽपेक्षायामपि स्वरूपतस्तत्प्रकारकज्ञानपर्यन्तानपेक्षायां जातित्वादिना घटत्वादिज्ञानात् घट इत्येतादृशोपनीतभानापत्तेः स्वरूपतस्तद्विषयकज्ञानजन्यतावच्छेदकस्य स्वरूपतस्तत्प्रकारकप्रत्यक्षत्वस्य (१)स्वरूपतस्तत्प्रकारकोपनीतभानसाधारणताया आवश्यकत्वात् ।

अथ स्वरूपतो घटत्वादिविषयकं यत्र निर्विकल्पकं जातित्वादिना घटत्वज्ञानञ्च तत्र स्वरूपतो घटत्वादिप्रकारकोपनीतभानवारणाय तादृशोपनीतभाने स्वरूपतस्तत्प्रकारकज्ञानहेतुत्वमावश्यकं तथा च तस्य प्रत्यक्षसाधारणविशेषणज्ञानजन्यतावच्छेदकानाक्रान्तत्वेऽपि न क्षतिः । न च तादृशस्थले तथाविधोपनीतभानमिष्टमेवेति वाच्यम् । येन रूपेण यस्य ज्ञानं तेन रूपेणैव तस्योपनयः न तु तदविशेषितस्येति नियमादिति चेत्तर्हि, स्वरूपतस्तत्प्रकारकोपनयस्यापि स्वरूपतस्तत्प्रकारकालौकिकप्रत्यक्षत्वमेव जन्यतावच्छेदकं वाच्यं न तु सर्वांशोपनीतभानवृत्तिवैजात्यं तथासत्युक्तस्थले घट इत्याद्याकारकचाक्षुषाद्युपनीतभानापत्तेः तथा च सर्वांशोपनीतभानस्यापि तादृशोपनयजन्यतावच्छेदकाक्रान्तत्वनिर्वाहायैव तत्र प्रत्यक्षत्वस्वीकार आवश्यकः । वस्तुतो येन रूपेणेत्यादिनियमो निर्विकल्पकस्य अनुपनायकतामते, निर्विकल्पकस्य उपनायकतामङ्गीकुर्वतान्तु न तादृशनियम इत्युक्तस्थले दर्शितोपनीतभानमिष्टमेवेति

(१) स्वरूपतो घटत्वादिप्रकारक-घट-इत्येतादृशोपनीतभानापत्तेरिति पु० पा० ।

कृतं पल्लवितेन ।

(चि०) स्यादेतत् पक्षधर्मस्य व्याप्यताज्ञानं नेन्द्रियेण वह्नेरसान्निकर्षे तन्नियतसामानाधिकरण्यस्य व्याप्यत्वस्यायोग्यत्वात् । न च धूमत्वेन सकलधूमव्याप्यतावगमात् धूमविशेषे संस्कारात् स्मरणाद्वोपनीतव्याप्याभेदग्रहः प्रत्यभिज्ञाने तत्ताविशिष्टस्येवेति वाच्यम् । एवं हि धूमवत्त्वेन वह्निमत्त्वज्ञानात् धूमवद्विशेषे पर्वते संस्कारवशात् प्रत्यक्षेण व्याप्तिज्ञानापेक्षेण वह्निमदभेदग्रहो वह्निमत्त्वसंसर्गग्रहो वाऽस्तु किमनुमानेन । पृथक् वह्निमत्त्वस्मरणं तत्र नास्ति किन्तु व्याप्त्यवच्छेदकतयेति चेन्न, वह्निमान्न वेति संशयानुरोधेन स्वतन्त्रवह्निमत्त्वस्मरणात् । न च विशिष्टज्ञाने स्वतन्त्रविशेषणज्ञानत्वेन हेतुत्वम्, गौरवात् ।

(दी०) पृथगिति । न चैवं धारावाहिकोच्छेदः, इतरमात्राविशेषणत्वेनोपस्थितेरेव तन्त्रत्वात्, कोटिस्मरणस्य संशयेन तस्य च व्याप्तिस्मरणादिना नाशात् विशेषदर्शनकाले च संशयायोगादाह । न चेति । गौरवादिति । न चैवमभावविशेषणत्वेनोपस्थितस्यापि भावस्य ग्रहापत्तिः, अभावग्राहकसामग्र्या बलवत्या प्रतिबन्धात्, अभावाविशेषणत्वेनोपस्थितिस्तन्त्रमित्यपि कश्चित् । वस्तुतस्तु स्वतन्त्रविशेषणज्ञानस्य विशिष्टधीहेतुत्वेऽनुमित्यर्थमेव त्वयाऽपि तत्स्वीकरणीयं, न हि विशिष्टप्रत्यक्षं प्रत्येव तथात्वम्, मानाभावात् ।

(गा०) किञ्चिदंशे तदप्रकारकं विशेषणज्ञानमेव पृथग्विशेषणज्ञानमित्याशयेन शङ्कते । न चैवमिति । धारावाहिकोच्छेद इति । विशिष्टबुद्धिधारान्तःपातितृतीयादिविशिष्टबुद्ध्यनुपपत्तिरित्यर्थः । तत्पू-

षे निर्विकल्पकात्मकस्य विशेषणज्ञानस्य विनाशाद्विशिष्टबुद्धिरूपस्य तस्य विशेषणप्रकारकतया स्वातन्त्र्यविरहादिति भावः । समीधत्ते । इतरमात्रेति । तत्तदितरोभयांशे तत्प्रकारकज्ञानात्तदंशे तद्विशिष्टज्ञानोपपत्तये मात्रपदम्, तेन यद्धर्म्मिणि विशिष्टज्ञानं फलं तद्धर्म्मचशे तत्प्रकारकं यत् तत्प्रकारकं तदन्यतद्विषयकोपस्थितेरित्यर्थः ।

यत्तु तादितरविशेष्यतानिरूपिततत्प्रकारतान्यतद्विषयताकोपस्थितेरित्येवार्थः, विशेष्यताभेदेन प्रकारताभेदादुभयविशेष्यकविशिष्टबुद्धिसंग्रहात् । तन्न। घटौ पटावित्यादिसमूहालम्बनविलक्षणे घटपटौ द्वावित्यादिज्ञाने उभयांशे एकत्रैव द्वित्वादिविशेषणमवगाहमाने विशेष्यभेदेऽपि द्वित्वादिप्रकारताया अभिन्नतया घटादीतरपटादिविशेष्यतानिरूपितत्वसत्त्वेन तज्ज्ञानस्य घटपटौ द्वावित्यादिज्ञानान्तराजनकत्वप्रसङ्गात् (१) ।

स्वतन्त्रविशेषणज्ञानस्य विशिष्टधीहेतुत्वमभ्युपेत्य संशयार्थे स्वीकार्येण स्वतन्त्रवह्निस्मरणेन परामर्शोत्तरं पक्षे तदुपनीतभाननिर्वाहे अपरितोषबीजं दर्शयन् विशेषणज्ञानहेतुतायां स्वातन्त्र्यप्रवेशे युक्तिविरहप्रदर्शकं न चेत्यादिमूलमवतारयति । कोटीति । संशयेन नाशादित्यग्रिमेणान्वयः । स्मरणनाशेऽपि संशयात्मकतादृशविशेषणज्ञानादेव निश्चयो भविष्यतीत्याशङ्क्याह । तस्य चेति । व्याप्तिस्मरणादिना इत्यस्य परामर्शार्थमुपगन्तव्येनेत्यादिः व्याप्तिस्मरणानन्तरं पक्षधर्मताज्ञानकाले विशिष्टज्ञानकाले वा पुनः संशयो भविष्यति ततो निश्चय इत्याशङ्क्याह । विशेषदर्शनेति । विशेषदर्शनम् व्याप्यतया गृहीतस्य पक्षे निश्चयः । संशयायोगादिति । तदभावस्य कार्यसहभावेन हेतुत्वादिति भावः ।

यद्यपि परामर्शानन्तरं वह्निरित्याकारकस्मरणं कल्पयित्वा पक्षे उपनीतवह्निनिश्चयः शक्योपपादनस्तथापि तादृशकारणतायाः प्रामाणिकत्व एव तत्कल्पनमुचितं तदेव नेति वस्तुगतिम-

(१) 'तदन्यतद्विषयकोपस्थितेरित्यर्थः इति पाठादनन्तरं तदितरविशेष्यतानिरूपितप्रकारतान्यतद्विषयताकोपस्थितेरिति वा, विशेष्यताभेदेन प्रकारताभेदादुभयविशेष्यकविशिष्टबुद्धिसंग्रहात् इति पाठः कस्मिंश्चिदादर्शपुस्तके वर्त्तत इति ।

नुरुध्य तादृशकारणत्वं मूलकृता निराकृतमिति भावः । मूले न चेति । न वेत्यर्थः । युक्तिसत्त्वे उक्तकारणतायाः स्वातन्त्र्यस्याधिकस्यावच्छेदकत्वं गौरवेण दुरपवादमिति युक्तिं दीधितौ शङ्कते । न चैवमिति । एवम् । विशेषणज्ञानहेतुतावच्छेदकतायां स्वातन्त्र्यानिवेशे । भावस्य । घटादेः । ग्रहापत्तिः । भूतलं घटाभाववदित्यादिनिश्चयकाले भूतलादौ ग्रहापत्तिः । तादृशापत्तिं परिहरति । अभावग्राहकेति । बलवत्येति । तुल्यबलसामग्रीदशायां संशयोत्पत्त्या इष्टापत्तिरेवेति भावः । न च तादृशसामग्र्याः प्रतिबन्धकत्वमप्रामाणिकमिति शङ्क्यम् । स्वतन्त्रविशेषणज्ञानसत्त्वे कदाचित् (१) तथाविधनिश्चयकाले घटादिग्रहापत्तेः ।

कस्यचित् समाधानमुपन्यस्यति । अभावेति । उक्तक्रमेणैव (२) उपपत्तावभावविशेषणत्वप्रवेशे गौरवमन्याय्यं तथा सति (३) वह्न्यभाववद्वृत्तित्वरूपव्याप्तिघटकतया वह्निविषयकज्ञानाद्वह्न्युपनीतभानानिर्वाहश्चात्रास्वरसबीजम् । विशिष्टबुद्धिसामान्यहेतुतायां स्वातन्त्र्यनिवेशनं स्वतन्त्रविशेषणज्ञानं विनाऽनुमितिमङ्गीकुर्वाणस्य शङ्कास्पदमपि नेति प्रत्यक्षे तन्निवेशेन कारणत्वान्तरक्लृप्तिनिर्युक्तिकमित्याह । वस्तुतस्त्वति । मानाभावादिति ।

अथ ज्ञानत्वस्य स्मरणेश्वरज्ञानवृत्तितया अनुभवत्वस्य चेश्वरज्ञानवृत्तितया जन्यतावच्छेदकत्वासम्भवात् तद्याबृत्तं विशिष्टविषयकविजातीयप्रत्यक्षत्वमेव विशेषणज्ञानजन्यतावच्छेदकं वाच्यमिति कथं मानाभाव इति चेत् ? अनुभवत्वजातेरीश्वरज्ञानवृत्तित्वे मानाभावादनुमितिसाधारणविशिष्टानुभवत्वेनैव विशेषणधीजन्यत्वोपगमात् अन्यथा अनुमितौ कारणत्वान्तरकल्पनापत्तेः प्रत्यक्षत्वस्यापि ईश्वरज्ञानवृत्तित्वे मानाभावाच्च न सङ्करप्रसङ्गः । न चेश्वरज्ञाने प्रत्यक्षत्वानङ्गीकारे तस्य जन्यमात्रं प्रति उपादानगोचरलौकिकप्रत्यक्षत्वेन हेतुत्वानुपपत्तिरिति वाच्यम् । उपादानप्रत्यक्षहेतुतायां लौकिकविषयतायाः प्रत्यासत्तित्वावश्यकत्वेन

---

(१) विशेषादर्शनकाल इत्यर्थः ।
(२) सामग्रीप्रतिबन्धकतयैवेत्यर्थः ।
(३) गौरवस्य न्याय्यत्वे ।

ज्ञानत्वस्यावच्छेदकत्वसम्भवात् भगवज्ज्ञाने प्रत्यक्षत्वानङ्गीकारेऽपि क्षतिविरहात् लौकिकाविषयतायाः प्रत्यक्षत्वव्यन्मात्रनिरूपितत्वे मानाभावादीश्वरज्ञाने प्रत्यक्षत्वव्यवहारस्य लौकिकविषयतावत्त्वनिबन्धनत्वेनौपचारिकत्वादिति ।

(चि०) अथ यो यत्र विशिष्य पूर्वमवगतः स तत्र संस्कारवशाद्यथार्थप्रत्यक्षे भासते यथा तत्ता प्रत्यभिज्ञाने । न च पर्वते विशिष्य पुरा वह्निरवगतः । यत्र चन्दने सौरभमुपलब्धं तत्र संस्कारवशाच्चक्षुषा सुरभि चन्दनमिति ज्ञानमन्यथानुमितिरिति चेत्तर्हि, पक्षधर्मधूमेऽपि न पुरा विशिष्य व्याप्तिरवगतेति कथं संस्कारवशात्तद्गतव्याप्तिबोधः प्रत्यक्षेण ।

(दी०)तर्हीत्यादि । वस्तुतो यत्र क्वचिदपि गृहीतस्य धर्मिणि साधारणधर्मदर्शनात् स्मृतस्य संशयादिसाधारणी विशिष्टधीः । इयांस्तु विशेषो यत्कोटिद्वयसहचरितधर्मदर्शनात् कोटिद्वयस्मरणे संशयोऽन्यथा त्वेककोटिनिश्चय इति । एतेन धूमत्वादिना पक्षधर्मे व्याप्तिमनुमाय वह्न्याद्यनुमितिरिति परास्तम् । धूमत्वाद्यनुपस्थित्या धूमत्वादेर्वह्निव्याप्तिव्याप्यत्वाग्रहे वह्न्यननुमितिप्रसङ्गाच्च । एतेन यद्धर्मावच्छेदेन यद्वत्त्वं गृहीतमुपनयवशात् तद्धर्मविशिष्ट एव तद्भासते धूमवत्त्वावच्छेदेन च वह्निमत्त्वग्रहाद्धूमवानेव वह्निमानिति बुद्धिः स्यात् न तु पर्वतो वह्निमानित्यपि परास्तम् । मानाभावात्, चन्दनत्वाद्यवच्छेदेन गृहीतस्य सौरभादेः पुरोवर्तिनि चन्दनत्वादिदर्शनादिदं सुरभि इत्यादिबुद्धौ व्यभिचाराच्च । यदि चावच्छेदकधर्मवैशिष्ट्यमपि तत्र भासत इति नियमोऽपि तत्र प्रामाणिकस्तदा धूमवानयं पर्वतो वह्निमानित्येव धीरस्तु; न हि लिङ्गोपधानभाने बाधक-

मन्यत्, साधकविरहात् ।

(गा०) ननु तर्हीत्यादिमूलमयुक्तं तथा हि यो यत्र विशिष्येत्यादिनियमे विशिष्यत्यस्य तन्मात्रवृत्तिधर्मप्रकारेणेति नार्थः, परन्तु फलीभूतग्रहधर्मितावच्छेदकप्रकारेणेत्येव,एवञ्च पर्वतीयधूमत्वादिना व्याप्त्यग्रहेऽपि धूमत्वेन पर्वतीयधूमे सामान्यलक्षणया व्याप्तिग्रहात् वह्निव्याप्यधूमवान् पर्वत इति परामर्शो नानुपपन्न इत्याशङ्क्य उक्तनियमे बाधकान्तरमाह । वस्तुत इति । यत्र क्वचिदपीति । फलीभूतज्ञानाविषये धर्ममात्रे इत्यर्थः । धर्मिणि । फलीभूतग्रहविषयधर्मिणीत्यर्थः । संशयादीत्यादिना निश्चयपरिग्रहः ।

नन्वपूर्वे धर्मिणि संशय एव स्वीक्रियते न तूपनीतधर्मनिश्चयः, यश्च संशय इव तत्रैव सति व्याप्यदर्शने निश्चयोऽनुभूयते स तु आनुमानिक एव व्याप्यदर्शनस्यास्माकमनुमितिहेतुत्वादिति निश्चयात्मकोपनीतभाने कथितनियमो निराबाध एवेति कदाचित् ब्रूयादिति शङ्कया यादृशसामग्र्या कोट्यन्तरभासकसामग्रीकाले संशयात्मकतत्कोटिविशिष्टधीर्जन्यते तादृशसामग्रीतः असत्यां विपरीतकोटिभानसामग्र्यां तत्कोटिनिश्चयोऽनुभवसिद्धतया दुरपह्नवः विपरीतकोटिभानसामग्रीविगमश्च विशेषदर्शनादिव तत्कोट्यस्मरणादपीति एककोटिमात्रस्मरणे व्याप्यदर्शनं विनाप्येककोटिनिश्चयोत्पत्त्या नोक्तनियमो निश्चयदशायां (१)सम्भवतीत्याह । इयांस्त्विति । तुरवधारणे । तथा चैतावानेव संशयनिश्चययोरुत्पत्तौ विशेष इत्यर्थः । एतेन । अपूर्वधर्मिविषयकसंशयादौ व्यभिचारस्य दुर्वारत्वेन । व्याप्तिमनुमायेति तथा च पर्वतीयधूमे विशिष्य प्रागगृहीताया व्याप्तेस्तत्रोपनीतभानानभ्युपगमादुक्तनियमो दुर्वार एवेति भावः । सर्वत्र व्याप्त्यनुमितिरपि न सम्भवतीति मूलोक्तदूषणं दर्शितरीत्या दुरुद्धरमित्याह । धूमत्वत्वेति । व्याप्तिव्याप्यत्वाग्रह इति । व्याप्तिव्याप्यत्वेनानिश्चयस्थले इत्यर्थः व्याप्यतावच्छेदकनिर्णयं विना व्याप्तेर्दुर्निश्चयत्वादिति भावः । वह्न्यनुमितीति । व्याप्त्यनुमानासम्भवादिति भावः । एतेन । दर्शितसंशयानुपपत्त्योक्तनियमस्यैव (२)तत्समर्शी-

(१) निश्चयमादायापीति पु० पा० ।
(२) दर्शितसंशयाद्यनुरोधेन उक्तनियमस्यैवेति पु० पा० ।

लस्य नियमान्तरस्याप्यनभ्युपगमेन । यद्यद्धर्मावच्छेदेनेति पर्वतीय-धूमे विशिष्य व्याप्त्यग्रहेऽपि धूमत्वावच्छेदेन व्याप्तेर्ग्रहान्न विशिष्टप-रामर्शानुपपत्तिरिति भावः । अवच्छेदकधर्मदर्शनाधीनोपनीतभान-मादाय नियमोपगमाद्दर्शितसंशयादावपि व्यभिचारोऽपि शक्यते वारयितुमित्याशङ्क्य अप्रयोजकतामप्याह । मानाभावादिति । अवच्छे-दकधर्मदर्शनाधीन अपूर्वधर्मितावच्छेदकविशिष्टविषयकनिश्चये व्यभिचाररूपं बाधकमप्याह । चन्दनत्वेनेति । सौरभादेः । बुद्धावित्य-ग्रिमेणान्वयः । व्याप्तिप्रकारेण चन्दनत्वादेरग्रहान्न तत्र सौरभानु-मितिसम्भव इति भावः ।

ननु तद्धर्मविशिष्ट एव तद्भासते इत्यस्य तदन्यधर्मविशिष्टे न भासते इति नार्थः, किन्तु तद्धर्माविशिष्टे न भासत इत्ये-वार्थः, एवञ्चोक्तस्थले इदं चन्दनं सुरभीत्येवोपनीतभानमुपेयते इत्यतो न व्यभिचार इत्यत आह । यदि चेति । इत्येव धीरस्त्वि-ति । उपनीतप्रत्यक्षरूपा एतादृशी धीरेवानुमितिकार्यकारिणी भ-वत्वित्यर्थः ।

ननु लिङ्गोपधानमतस्य बाधकग्रासान्न तादृशोपनीतभान-स्वीकारसम्भव इत्यत आह । न हीति । साधकविरहादिति । उप-नीतभानोपगन्तॄणां दर्शितनियम एव लिङ्गोपधाने साधक इति भावः, ।

(चि०) न च सहचारदर्शनजन्यसंस्कारसहिते-नेन्द्रियेण व्यभिचारज्ञानाभावे सति महानसीयधूम-वत् पर्वतीयधूमे व्याप्त्यवगमो वह्नेस्तु न प्रत्यक्षसाम-ग्री सन्निकर्षाभावादिति वाच्यम् । हेतुसाध्यसाक्षा-त्कारं विना प्रत्यक्षेण व्याप्त्यग्रहात् । न च पर्वते व-ह्निसाक्षात्कारः । न च पक्षधर्मस्य साध्यसामानाधिक-रण्यविशेषो व्याप्तिः पक्षे साध्यग्रहं विनेत्युक्तम् ।

उच्यते । विशेषणज्ञानं तस्य विशेष्ये सम्बन्धस्त-योरसंसर्गाग्रहो विशेषदर्शने विशेषणविशेष्येन्द्रिय-

सन्निकर्षो गौरयमित्यादियथार्थविशिष्टप्रत्यक्षकारणम्, अस्ति चात्रापि व्याप्तिस्मरणं स्मृतव्याप्तेः पक्षवृत्तिधूमे सत्त्वात् ।

(दी०) *हेतुसाध्येति । सम्बन्धिद्वयानिरूप्यपदार्थप्रत्यक्षं प्र-*ति सम्बन्धिद्वयप्रत्यक्षस्य हेतुतायाः संयोगादिस्थले त्वयैव क्लृप्तत्वात् तदनादरेऽपि साध्यघटितमूर्त्तिकव्याप्तिप्रत्यक्षस्य साध्यप्रत्यक्षसामग्रीं विना असम्भवादिति भावः । विशेषणेत्यादि । विशेषणविशेष्यसम्बन्धस्तदंशे प्रमात्वे लौकिकत्वे वा विशेषदर्शनञ्च विपरीतज्ञानप्रतिबन्धकतया क्वचित् क्वचित्सहचरितधर्मदर्शनत्वेन विशेषणस्मारकतया विशेषणस्य च ज्ञानसत्त्वेऽप्यतिरिक्तसन्निकर्षस्तदंशे लौकिकतायामुपयुज्यते ।

(गा०) व्यभिचारादर्शनसहकृतसहचारदर्शनरूपव्याप्तिग्राहकसद्भावान्महानसीयधूम इव पक्षीयधूमेऽपि सन्निकृष्टे व्याप्तेर्लौकिकप्रत्यक्षमेव स्वीक्रियते न तूपनीतभानमिति कथं यो यत्रेत्यादिनियमे सत्येव विशिष्टपरामर्शानुपपत्तिरित्याशङ्कां निरस्यति मूले, न चेत्यादिना । हेतुसाध्योभयसाक्षात्कारस्य व्याप्तिप्रत्यक्षापेक्षणीयतां मूलोक्तामुपपादयति दीधितौ सम्बन्धीति । मीमांसकमते ससम्बन्धिकवस्तुव्यवहार एव सम्बन्धिप्रत्यक्षस्य हेतुता न तु तत्प्रत्यक्षेऽतः त्वयैवेति । नैयायिकेनैवेत्यर्थः । क्लृप्तत्वादित्यस्य यत्किञ्चिदेकसम्बन्धिग्रहविरोधीन्द्रियसन्निकर्षदोषसमवधानादिदशायां प्रत्यक्षवारणायेत्यादिः ।

ननु सम्बन्धिद्वयप्रत्यक्षस्य हेतुत्वेऽपि यत्र सम्बन्धिप्रत्यक्षोत्पत्तिक्षणे तत्सामग्रीविरहस्तत्र तद्द्वितीयक्षणतृतीयक्षणयोः संयोगादिप्रत्यक्षापत्तिः सम्बन्ध्यंशे लौकिकप्रत्यक्षानात्मकस्य संयोगादिलौकिकप्रत्यक्षस्यानुभवविरुद्धतया इष्टापत्तेरयोगादिति सम्बन्धिग्राहकसामग्र्या हेतुताया आवश्यकत्वे सम्बन्धिसाक्षात्कारहेतुतायां मानाभाव इत्यपरितोषात्सम्बन्धिप्रत्यक्षसामग्र्यभावस्यैव प्रकृते व्याप्तिप्रत्यक्षविरोधितामाह । तदनादरेऽपीति । साध्यघटितमूर्त्तिके-

स्यनेन व्याप्तिप्रत्यक्षे साध्यभानानुरोधेनापि साध्यसन्निकर्षाद्यपेक्षेति सूचितम् । भ्रमात्मकविशिष्टज्ञाने विशेष्ये विशेषणसम्बन्धस्यानपेक्षणात् प्रमात्वोपयोगितया तत्परिगणनं सङ्गमयति । विशेषणेति । तदंशे । विशेषणविशेष्यसम्बन्धांशे, न तु विशेषणांशे, संयोगेन द्रव्यविशेषणकस्थले विशेष्ये विशेषणसंयोगस्य संयोगसम्बन्धेन विशेषणप्रमात्वनिर्वाहकत्वेऽपि इन्द्रियासंयुक्तविशेषणसंयोगस्य लौकिकसन्निकर्षानात्मकतया विशेषणांशे लौकिकत्वानुपयोगित्वेन लौकिकत्वे वा इत्यत्रैतदन्वयानुपपत्तेः । सम्बन्धांशे प्रमात्वञ्च सम्बन्धघटितं प्रमात्वम्, अत्र च विशेष्यविशेषणसम्बन्धस्य तदानीमविद्यमानत्वेऽपि दण्डव्यमासीदित्यादिप्रमोत्पत्तेः प्रमात्वे यदा कदाचित् सम्बन्धस्य उपयोगितापरमिदम् । विद्यमानसम्बन्धस्य उपयोगितापरत्वाभिप्रायेण कल्पान्तरमाह । [१]लौकिकत्वे वेति । उपयुज्यते इत्यग्रिमेणान्वयः । लौकिकत्वमपि सम्बन्धांशे बोध्यम् । विशेष्ये विशेषणसम्बन्धस्य सम्बन्धे विशेष्यघटितलौकिकसन्निकर्षसम्पादकतया लौकिकत्वोपयोगिता । अथ वा तदंश इत्यस्य विशेषणांश इत्येवार्थः । विशेष्ये विशेषणसम्बन्धस्य विशेषणांशे लौकिकत्वोपयोगिता तु समवायेन गुणादिविशिष्टबुद्ध्यभिप्रायेण । द्वितीयकल्पे विशेष्यपदञ्च सन्निकृष्टधर्मिमात्रपरं, अतो अनुभूयमानारोपे विशेष्यविशेषणसम्बन्धासत्त्वेऽपि विशेषणांशे लौकिकत्वादसङ्गतेर्नावकाशः । लौकिकपदस्य प्रमात्वघटकलौकिकविषयतापरतया यथाश्रुतमेव वा समर्थनीयम् । विशेषदर्शनस्य स्वमते निश्चयविशेषस्याहेतुतया उपयोगिताप्रकारमाह । विशेषदर्शनञ्चेति । क्वचिदिति । विपरीतकोटिभासकतदुपस्थित्यादिकालीननिश्चय इत्यर्थः । अत्राप्युपयुज्यत इति सम्बध्यते । क्वचिदिति । प्रकारान्तरेण यत्र न विशेषणज्ञानं तत्रत्यविशिष्टज्ञाने इत्यर्थः । दर्शनत्वेनेत्यन्तं स्मारकतायां हेतुः, स्मारकतया उपयुज्यते इति सम्बन्धः । एवञ्च विशिष्टप्रत्यक्षनिर्वाहकाणामेव कीर्त्तनमिदं न तु तत्कारणमात्रस्यैवेति भावः विशेषणज्ञानस्यै-

---

(१) दण्डव्यमासीदित्यादिप्रमोत्पत्तिरित्यपरितोषात् कल्पान्तरमाहेति पु० पा० ।

व विशेषणभास्मकसन्निकर्षत्वात् सन्निकर्षान्तरकथनं किमर्थमित्यत आह । विशेषणस्य चेति । तदंशे । विशेषणांशे । लौकिकतायामिति । इत्थञ्च मूले सन्निकर्षपदं लौकिकसन्निकर्षपरमित्यपि बोध्यम् । व्याप्तिप्रविष्टचरमांशस्य व्याप्त्यैक्यमते धूमत्वरूपस्य सन्निकर्षादेव भानात्प्रकृते व्याप्तिविशिष्टप्रत्यक्षसामग्रीघटकत्वमपि विशेषणलौकिकसन्निकर्षस्येत्यविरोधः ।

(चि०) एकैव हि सा व्याप्तिः तयोरसंसर्गाग्रहो धूमत्वविशेषदर्शनं व्याप्तिविशिष्टधूमेन्द्रियसन्निकर्षश्च व्याप्तिविशिष्टज्ञानकारणम् । न च वह्निविशिष्टज्ञानसामग्री, वह्नेरसन्निकर्षात् । कश्चित्तु धूमत्वे परम्परासम्बन्धेन वह्निव्याप्यत्वं पूर्वं गृहीतं तथा च संस्कारोपनीतं वह्निव्याप्यत्वं परम्परासम्बन्धेन पक्षवृत्तिधूमत्वे प्रत्यभिज्ञायते तद्वृत्तित्वेन पूर्वमनुभवात् एवञ्च धूमत्वव्याप्यपरामर्शादेवानुमितिरिति प्राह ।

(दी०) एकैव हीति । वस्तुतो व्याप्तिभेदेऽपि न क्षतिः । सामान्यतो व्याप्तित्वेन गृहीतानां सकलव्याप्तीनां तथैव स्मरणसम्भवात् । वह्नेरसन्निकर्षादिति । ननूपनयात्मकसन्निकर्षेणैव नयनेन निरूप्यतां हुताशनः, न हि वह्निरिन्द्रियेण द्रव्यस्याधेयतया तद्वत्त्वस्य वा ग्रहे तत्संयोगो हेतुः दण्डी पुरुषो नास्तीत्यादौ व्यभिचारात्, कथमन्यथा पक्षधर्मे वह्निमत्त्वगर्भिता व्याप्तिरेव गृह्यते । न चाधेयतया मुख्यविशेष्यं साक्षात् द्रव्यग्रहे तत्संयोगो हेतुः अभेदारोपे च नाधेयतया रजतादिकं प्रकारो दण्डाद्यात्मकतत्तावगाहिप्रत्यभिज्ञायाञ्च तत्तावद्भेदो भासत इति दण्डादेः साक्षात्प्रकारतेति वाच्यम् । मानाभावात्, धूमवान् वह्निमानिति सामान्यलक्षणया ग्रहे व्यभिचारात् तत्तासंसर्गस्या-

पि प्रत्यभिज्ञायां भानसम्भवात् प्रकृतेऽपि वह्निपदभेदग्रहेणैव कृतार्थत्वाच्च । एतेन तत्ताकारानुपनीततादृशद्रव्यग्रहे स हेतुरिति निरस्तम् । चैत्रपदवाच्योऽयमित्यादिवत् दण्ड्ययमासीदयं दण्डीत्यादिग्रहस्यानुभविकत्वात् तत्तात्वस्यातिरिक्तस्याभावात् तच्छब्दप्रयोगजननाभावस्य च निमित्तान्तरविरहप्रयुक्तस्य जन्यतानवच्छेदकत्वात् तज्जननयोग्यतायाः प्रकृतेऽपीष्टत्वात् । अत एव तदिन्द्रियग्राह्यविद्यमानद्रव्यस्य तेन ग्रहे तत्संयोगो हेतुरिति परास्तम् । नयनादिना रजतादेरभावग्रहाभेदारोपादौ व्यभिचाराच्च ।

(गा०) एकैव हीत्यादिमूलं परमतसिद्धसामान्यप्रत्यासत्त्यभावमभ्युपेत्य, सामान्यलक्षणासत्त्वे व्याप्त्यैक्यस्यानुपयोगितां दीधितिकृदाह । वस्तुत इति । परमार्थत इत्यर्थः । एतेन यदि सामान्यप्रत्यासत्त्यभावोऽभ्युपगम्यते तदा क्षतिरेवेति सूचितम् । न च यो यत्रेत्यादिनियमोपगमेनैव पर्वतीयधूमे वह्निव्याप्तिविशिष्टप्रत्यक्षसामग्री सम्भवति न तु पर्वते वह्निविशिष्टप्रत्यक्षसामग्रीति विशेषव्युत्पादनं मूलकृत उपपद्यते नियमानभ्युपगमे ज्ञानसन्निकर्षघटितसामग्र्या उभयत्राविशेषेण विशेषोक्तेरत्यन्तासम्भवात् तथा च व्याप्तेर्धूमत्वादिरूपत्व एव पक्षीयधूमे तदंशस्य लौकिकसन्निकर्षादेव भानात् धूमत्वांशे वह्निसमानाधिकरणधूमवृत्तित्वस्यैव ज्ञानसन्निकर्षग्राह्यतया तत्र च तथाविधमहानसीयधूमवृत्तित्वस्य तन्मात्रवृत्तिधूमत्वत्वप्रकारेण पूर्वं गृहीतत्वादुक्तनियमो निर्वहति, न तु व्याप्तेः सामानाधिकरण्यरूपत्वे तथा च व्याप्तेरैक्ये मूलकृतो निर्भर एवेति दीधितिकृतां व्याप्तिभेदपक्षे क्षत्यभावाभिधानविरोध इति वाच्यम् । मूलकृता स्मृतव्याप्तेः पक्षधर्मधूमसत्त्वहेतुतया व्याप्तेरैक्याभिधानात् न क्षतिरिति ग्रन्थे क्षतिपदस्य पक्षीयधूमे स्मृतव्याप्यत्वरूपक्षतिपरतया व्याप्तेर्नानात्वे उक्तनियमभङ्गरूपक्षतिसत्त्वेऽपि तद्ग्रन्थाविरोधात् ।

केचित्तु ननु व्याप्तिभेदेऽपि सामान्यप्रत्यासत्त्या सकलव्या-

प्यनुभवात् स्मृतव्याप्तेः पक्षवृत्तिधूमे सत्त्वमुपपद्यत इति किमर्थम् एकैव हीत्युक्तमित्यनुशयस्य स्वयमेव वक्ष्यमाणत्वादाह । वस्तुत इति । वस्तुगत्येत्यर्थः । भेदेऽपीत्यनेनान्वयः । सामान्यतः । सामान्यप्रत्यासत्तिबलात् । तथैव । व्याप्तित्वेनैव । तथा च धूमनिष्ठस्वव्यापकवह्निसामानाधिकरण्यरूपैव व्याप्तिरिहाभिप्रेता, प्रतियोगितावच्छेदकादीनामैक्याच्च उपचारादेकपदप्रयोग इति व्याप्तिवादोक्तमेवानुसरणीयम् । न च प्रतियोगितावच्छेदकानामैक्यस्याकिञ्चित्करतया तत्प्रतिपादनमात्रफलस्योपचारस्य वैयर्थ्यमिति वाच्यम् । सखण्डे परम्परासम्बन्धेन अखण्डस्यैव प्रत्यासत्तितया तादृशवह्निमत्त्वादिरूपसामान्यप्रत्यासत्त्या निखिलवह्निमदादिभानेन व्याप्तित्वेन, व्याप्तिप्रत्यक्षस्य सकलव्याप्तिविषयकत्वलाभार्थं उपचारानुसरणात् अन्यथा जातिलिङ्गनावादिमनोक्तसामान्यलक्षणानुपयोगरूपदोषस्य स्वमतेऽपि सत्त्वादसङ्गत्यापत्तेः । एवञ्च सिद्धान्तलक्षणे एतन्मूलग्रन्थसङ्गतार्थतया वस्तुत इत्यादिफक्किकावर्णनं भ्रमविजृम्भितमेवेत्याहुः (१) ।

उक्तनियमसत्त्वे पक्षवृत्तिधूमासन्निकर्षदशायां धूमत्वरूपव्याप्तेरपि तत्रोपनयेनैव ग्रहस्य स्वीकरणीयतया तत्स्थलीयमानसविशिष्टपरामर्शानुरोधेन उक्तनियमोऽनुमानप्रामाण्यवादिनापि न स्वीकरणीय एवेत्याशयेन सामान्यप्रत्यासत्तिपक्षमालम्ब्य पूर्वपक्षयति । नन्विति । निरूप्यताम् । निश्चीयताम् ।

मिश्रमतं निराकरोति । न हीति । बहिरिन्द्रियेण द्रव्यस्याधेयतया ग्रहे । आधेयत्वविषयितावच्छिन्नद्रव्यविषयिताशालिबहिरिन्द्रियजन्यज्ञानसामान्ये । प्रतियोगितया उपनीतघटादिविषयके घटो नास्तीति चाक्षुषादौ व्यभिचारवारणाय आधेयतयेति । मानसे बाह्यहस्त्यश्वादिविषयकस्वप्नज्ञाने व्यभिचारवारणाय बहिरिन्द्रियेणेति । गुणादिगोचरचाक्षुषादौ तद्वारणाय द्रव्यस्येति । आधारत्वाधेयत्वयोस्तुल्यवित्तिवेद्यत्वाभावे पर्वतो वह्निमानित्यादिज्ञानसंग्रहाय तद्वत्त्वस्य चेति । द्रव्याधारत्वस्येत्यर्थः । अत्रापि बहिरिन्द्रियेण इत्यनुषज्यते । तथा चैतन्मते आधारत्वविषयिता-

---

(१) केचिदित्यादिराहुरित्यन्तः पाठः केषुचिदादर्शपुस्तकेषु नास्ति ।

निरूपितद्रव्यविषयिताशालिबहिरिन्द्रियजन्यज्ञानत्वं कार्यतावच्छेदकम्। वस्तुतस्तु त्वगिन्द्रियादिसंयोगाच्चाक्षुषाद्यनुत्पत्त्या चक्षुःसंयोगत्वादिनैव हेतुता वाच्या, तथा च चाक्षुषत्वादिकमेव कार्यतावच्छेदके निवेशनीयं न तु बहिरिन्द्रियजन्यज्ञानत्वम्। इत्यादाविति। इत्याद्युपनीतदण्डादिमत्त्वावगाहिनि तद्विशिष्टविशेषणकाभावचाक्षुषादावित्यर्थः। फलापलापमाशङ्क्य निराकरोति। कथमिति। अन्यथा। असन्निकृष्टद्रव्यवत्त्वस्य विशेषणांशेऽप्यभाने। मुख्यविशेष्ये वृत्तिनियामकसम्बन्धेन साक्षात् द्रव्यप्रकारकत्वं कार्यतावच्छेदकं वक्तव्यमतो विशेषणांशे द्रव्यवत्त्वावगाहिन्युक्तस्थले न व्यभिचार इत्याशङ्कां निराकरोति। न चेति। पक्षधर्मे व्याप्तेः प्रकारत्वे परम्परया व्याप्तिघटकवह्नेरपि प्रकारत्वात् तत्र व्यभिचारवारणाय साक्षादिति। आधेयतयेत्यस्य व्यावृत्तिमाह। अभेदारोप इति। स्मर्यमाणरजतस्याभेदेनारोप इत्यर्थः। आधेयतया। वृत्तिनियामकसम्बन्धेन। भूतले घटाभाव इत्याद्यभावचाक्षुषेऽपि व्यावृत्तिर्बोध्या।

नन्वेवमपि इदन्त्वविशिष्टमुख्यविशेष्यकदण्डाद्यात्मकतत्ताप्रत्यभिज्ञाने व्यभिचार इत्यत आह। दण्डेति। तत्तावदभेदो भासते न तु तत्तादिसंसर्ग इति शेषः। तावतापि सोऽयमित्याकारकतानिर्वाहादिति भावः। मानाभावादिति। तादृशकारणतायामित्यादिः। सामान्यप्रत्यासत्त्यजन्यत्वस्य कार्यतावच्छेदके निवेशेन सामान्यप्रत्यासत्तिजन्यप्रत्यक्षे न व्यभिचार इत्यत आह। तत्तेति। भानसम्भवात्। भाने युक्तिसम्भवात्। तदनुपगमे तत्तासंसर्गाभावसंशयनिवृत्त्यनुपपत्तेरिति भावः। यदि तत्तावदभेदग्रहोऽपि तादृशसंशयादिविरोध्युपेयते तदाह। प्रकृतेऽपीति। अनुमितिस्थलेऽपीत्यर्थः। अभेदग्रहेण। अभेदोपनीतभानेन। कृतार्थत्वात्। वह्न्यभावसंशयनिवृत्त्याद्युपपत्तेः। प्रकारान्तरेण प्रत्यभिज्ञायां व्यभिचारोद्धारं निरस्यति। एतेनेति। व्यभिचारस्य दुर्वारत्वेन। तत्ताकारानुपनीतत्वं तत्तात्वेनाभासमानत्वं, तच्छब्देनाव्यवह्रियमाणत्वं वा, आद्ये तत्तात्वाद्यनवच्छिन्नवृत्तिनियामकसम्बन्धावच्छिन्नद्रव्यविषयिताविशिष्टं चाक्षुषत्वादिकं कार्यतावच्छेदकं द्वितीये तच्छब्दप्रयोगाजनकत्वसहिततादृशसंसर्गावच्छिन्नद्रव्यवि-

षयिताविशिष्टमिति बोध्यम् । अयोग्यस्यैवासन्निकृष्टस्याप्युपनीतस्य चाक्षुषादौ भानमविशेषेण दुरपह्नवमिति सूचयितुं चैत्रपदेत्यादिदृष्टान्ताभिधानम् । दण्डवयमासीदिति ज्ञाने व्यभिचारस्यातीतत्वानवगाहित्वविशेषणेन शक्यवारणतया तदनवगाहिनि वस्तुतोऽतीतदण्डादिज्ञाने व्यभिचारमाह । अयं दण्डीति । निरुक्तकार्यतावच्छेदकयोराद्यं दूषयति । तत्तात्वस्येति । अतिरिक्तस्येति । दण्डत्ववह्नित्वाद्यतिरिक्तस्येत्यर्थः । तथा च तदनवच्छिन्नद्रव्यप्रकारतैवासिद्धेति भावः । न च तत्पदप्रतिपाद्यतावच्छेदकत्वमन्यद्वा किञ्चिदीदृशं वह्न्यादिनिष्ठतत्तात्वं न तु वह्नित्वादिकमिति वाच्यम् । तद्ग्रहेऽपि वह्नित्वादिना वह्न्यादिमत्त्वग्रहे सोऽयमिति व्यवहारात् ।

द्वितीयपक्षेऽजनकत्वं फलानुपधायकत्वं स्वरूपायोग्यत्वं वा ? तत्राद्यं दूषयति । तच्छब्देति । निमित्तान्तरविरहेति । प्रयोगेच्छाविरहेत्यर्थः । तथा च तादृशधर्मस्य कार्यतावच्छेदकत्वे यत्र जातेऽपि प्रत्यभिज्ञाने निमित्तान्तरविरहान्न तच्छब्दप्रयोगः तत्र व्यभिचार इति भावः । द्वितीयं दूषयति । तज्जननेति । प्रकृतेऽपि । वह्निमानित्यादिज्ञानेऽपि । इष्टत्वादिति । तच्छब्दस्य वह्नित्वाद्यवच्छिन्नवदर्थकतया व्यवहर्त्तव्यज्ञानविधया तत्प्रयोगे वह्नित्वादिप्रकारकज्ञानमात्रस्यैव स्वरूपयोग्यत्वादिति भावः । तथा च तदयोग्यप्रकारकज्ञानमेवाप्रसिद्धमिति भावः । अत एव । विद्यमानदण्डाद्यात्मकतत्तावगाहिप्रत्यभिज्ञायां व्यभिचारादेव । चाक्षुषाद्युपनीतप्रमादिगोचरादिस्पार्शनादौ मानसे बाह्यविषयकस्वप्नाद्यनुभवे च व्यभिचारवारणाय तदिन्द्रियग्राह्येति । तदिन्द्रियासाधारणकारणकलौकिकप्रत्यक्षयोग्यार्थकम्, घटस्पार्शनादौ चक्षुरादिसंयोगस्य व्यभिचारवारणाय तेनेति । त्वगादिसंयोगाद् घटादेश्चाक्षुषादेर्वारणाय तत्संयोग इति । एतन्मते आधेयतयेति कार्यदिश्यनिवेशादन्यत्रापि व्यभिचारं दर्शयति । नयनादिनेति ।

(दी०) अथैवं व्यवहितदण्डे पुंसि न कथं नायनो दण्डीति निश्चय इति चेत् ? क्वचित्तत्सहचरितधर्मादर्शनात् तदस्मरणात् क्वचिच्च साधारणधर्मदर्शनादिना संशयस्यैव जननात्

सति च विशेषदर्शनादाविष्टत्वात् । युक्तश्चैतत् कथमन्यथा दण्डी न वेत्यादिकः संशयः । न हि नासौ तद्विशिष्टबुद्धिः, न तन्निश्चय इति चेत्, किं तेन? उक्तं हि संशयत्वं निश्चयत्वञ्च न जन्यतावच्छेदकमिति । अस्तु वा तथा, तथापि विशेषस्यादर्शनात् संशयस्यैव दर्शनात् निश्चयस्यापि सम्भवात् । मा भूद्वा नायनादिरयं हुताशनादिनिर्णयो मानसस्तु स्यात् तत्र तादृशानियमस्यात्यन्तं बाधितत्वादिति ।

(गा०) उक्तकार्यकारणभावानभ्युपगमेऽनिष्टमाशङ्कते । अथेति । मानसनिश्चयस्य इष्टत्वात् अन्यथा उक्तकार्यकारणभावेनापि तद्वारणासम्भवात् नायन इति । संशयस्यानुभवसिद्धतया निश्चय इति । निश्चयानुत्पत्तिप्रयोजकाभिधानेनोत्तरयति । कश्चिदित्यादि । तत्सहचरितेति । दण्डसहचरितेत्यर्थः, अदर्शनादित्यन्तं तदस्मरणे हेतुः । तदस्मरणादिति । तथा च विशेषणज्ञानाभावादेव तत्प्रकारकनिश्चयाभाव इत्यर्थः । साधारणधर्मदर्शनादिना । कोटिद्वयसहचरितधर्मदर्शनादिना । कोटिद्वयस्मरण इति शेषः । संशयस्यैव जननादिति । तथा च निश्चयत्वप्रयोजकविपरीतकोटिभानसामग्रीविरहस्यासत्त्वान्न निश्चयापत्तिरिति भावः ।

ननु कोटिद्वयोपस्थितावपि यत्र विशेषदर्शनवशात् विपरीतकोटिभानसामग्रीविरहः, यत्र च तत्कोटिमात्रसहचारितधर्मदर्शनात् तत्कोटेरेवोपस्थितिः तत्र तन्निश्चयो दुर्वार इत्यत आह । सति च विशेषदर्शनादाविति । आदिना कोट्यन्तरानुपस्थित्यभावस्य विकल्पेन परिग्रहः, संशयनिश्चयसाधारणद्रव्यविशिष्टबुद्धिविशेषे इन्द्रियसंयोगहेतुतायाः संशयानुपपत्त्या उक्तसम्भवोऽपि नेत्याह । युक्तश्चैतदिति । एतत् । व्यवहितस्यापि दण्डादेः सति विशेषदर्शनादावुपनयात् निश्चयजननम्, कथमन्यथेत्यनन्तरं विशेषादर्शन इति पूरणीयम् । असौ । संशयः । तद्विशिष्टबुद्धिः । बहिरिन्द्रियजन्यद्रव्यविशिष्टबुद्धिः । निश्चयत्वं जन्यतावच्छेदके निवेश्यमित्याशयेन शङ्कते । न तन्निश्चय इति । निश्चयत्वस्यार्थसमाजग्रस्तेन जन्यतावच्छेदके प्रवेशासम्भव इति कथयिष्यन् निश्चयत्वाभावस्य व्यभिचाराभावेऽकिञ्चित्करतामाह । किन्तेनेति ।

ननु व्यभिचारवारणान्यथानुपपत्त्या अर्थसमाजग्रस्तस्यापि कार्यतावच्छेदकत्वमुपेतव्यमित्यत आह । अस्तु वेति । तथा च निश्चयत्वस्यापि जन्यतावच्छेदकत्वस्वीकारः । दर्शनादित्यत्रासमस्ततया विशेषस्येत्यनुषज्यते । सम्भवात् ।उत्पत्तेः । उक्तकार्यकारणभावस्य निर्युक्तिकत्वादिति भावः । यद्यपि प्रागेव निश्चयत्वस्येष्टत्वमुक्तं तथापि तदा युक्त्यनभिधानादनुभवकलहानिवृत्तेरिदानीं यादृशसामग्रीतो विशेषादर्शनदशायां संशयः तत एव विशेषदर्शनकाले निश्चय इत्यनुभवसिद्धं नियममवलम्ब्य निश्चयोत्पत्तिर्दृढीकृता । अभ्युपेत्याह । मा भूद्वेति । तत्र । मानसे । तादृशानियमस्य । वह्न्यादीन्द्रियसंयोगापेक्षानियमस्य ।

(दी०] उच्यते । अस्ति तावदनुमिनोमीत्यनुव्यवसायसाक्षिको ज्ञानविशेषो यत्र कारणमन्वयव्यतिरेकाभ्यां व्याप्यपरामर्शः, मानसप्रत्यक्षविशेषोऽसाविति चेत् ? कुतोऽस्य प्रत्यक्षत्वम्? अनुभवत्वादिति चेत्? किमिदमनुभवत्वमन्यत्, प्रत्यक्षत्वात्? स्मृत्यन्यज्ञानत्वमिति चेन्न । अप्रयोजकत्वात् अनुमितौ साक्षात्कारित्वग्रहप्रसङ्गाच्च । तज्जनकलौकिकसन्निकर्षादिजन्यत्वविरहान्न तथेति चेत् ? आत्मानुमितौ तस्यापि सम्भवात् वह्निमनुमिनोमि न तु साक्षात्करोमीत्यबाधितसाक्षात्कारत्वाभावग्रहाच्च, अगत्या तु सौरभं न पश्यामीत्यादावन्यथात्वकल्पनम्, सामान्यलक्षणानङ्गीकर्त्तृनये चाप्रसिद्धवह्न्यादिव्यक्तिकानुमितौ न प्रत्यक्षत्वसम्भावनाऽपि, सन्निकर्षासम्भवात् । एतेन शाब्दादिकं व्याख्यातम्, व्यवस्थापयिष्यते तावदप्रसिद्धाभावसाध्यकानुमितिः । न च साक्षात्कारिणी, तत्रोपनयस्यासम्भवात् । एवञ्च प्रसिद्धसाध्यकानुमितेरपि न साक्षात्त्वम्, जातिसङ्करप्रसङ्गादित्यपि केचित् । तत्र भेदत्वादिनोपस्थिते जलादिप्रतियोगिकत्वग्रह इत्यपरे । मानाभावादिति । तन्निष्ठावच्छेदकान्तरग्रहमन्तरेणासम्भवाच्चेत्यपि द्रष्टव्यम् ।

(गा०)ज्ञानविशेषः । प्रत्यक्षविजातीयज्ञानम् । तथा च तत्करणतया अनुमानस्य प्रमाणतेति भावः । न च व्याप्यदर्शनानन्तरजातालौकिकप्रत्यक्षत्वं तादृशानुव्यवसायविषय इति वाच्यम् । साध्यनिश्चयाद्युत्तरकालं तादृशानुव्यवसायानुदयात् । न च साध्यनिश्चयाद्यनुत्तरत्वमपि निवेशनीयमिति वाच्यम् । तदनुपस्थितावपि तथाविधानुव्यवसायोदयात् । अस्त्वनुव्यवसायबलादनुमितित्वं जातिः सा प्रत्यक्षत्वव्याप्यैवेति न तत्करणस्य प्रमाणान्तरतेति शङ्कते । मानमिति । अनुमितौ प्रत्यक्षत्वस्याप्रामाणिकतया अनुमितिः प्रत्यक्षविजातीयैवेति तत्करणं मानान्तरमिति समाधित्सुः प्रत्यक्षत्वे मानं पृच्छति । कुत इति । पूर्वपक्षी शाब्दोपमित्योरपि प्रत्यक्षत्वमङ्गीकुर्वाणो अनुभवत्वमेव प्रत्यक्षत्वे साधकं इत्युत्तरयति । अनुभवत्वादिति । अनुभवत्वप्रत्यक्षत्वयोः समनियतत्वे समनियतजातिद्वयानङ्गीकारेण अनुभवत्वं यदि जातिस्तदा प्रत्यक्षत्वमेव तदिति साध्याविशेष इति दूषयति । किमेवमिति । स्मृत्यन्यज्ञानत्वरूपोपाधिरेवानुभवत्वं प्रत्यक्षत्वसाधकमतो न साध्याविशेषः इत्याशङ्कते । स्मृत्यन्येति ।

ननु विशेषणज्ञानजन्यतावच्छेदिका अनुभवचतुष्टयसाधारणी जातिरेव साक्षात्करोमीत्यनुव्यवसायसाक्षिकं प्रत्य[illegible] न
त्वनुमित्यादित्रयव्यावृत्ता अन्यापि जातिश्च प्रामाणि[illegible] तथा च प्रत्यक्षानुमानयोर्न पृथक् प्रमाणता । न च विशे[illegible]षणज्ञानजन्यतावच्छेदकजातेरनुमित्यादिसाधारण्ये मानाभावः ग[illegible] विशेषणज्ञानासत्त्वे परामर्शादिविरहेणैवानुमित्याद्यापत्त्ययोगादिति वा[illegible]च्यम् । पृथिव्यामितरभेद इत्याकारकाप्रसिद्धसाध्यकानुमित्युत्पा[illegible]दकाले साध्यविशेषणकानुमितिवारणाय विशेषणधीजन्यतावच्छे[illegible]दकस्य तत्साधारणताया आवश्यकत्वात् ।

यदि च पृथिवीतराभिन्नेत्यनुमितिः विशिष्टे वैशिष्ट्य[illegible]विषयिणीति विशेषणतावच्छेदकप्रकारकधीविरहान्न तस्याः साध्यविशेषकानुमित्युत्पत्तिदशायामापत्तिरित्युच्यते तदापि अनुमितेर्विशेषणतावच्छेदकप्रकारकधीजन्यतावच्छेदकाक्रान्ततयैव प्रत्यक्षानुमित्योः स्मृतिव्यावृत्तैकजातीयत्वमावश्यकं स्मृतिव्यावृत्तजातेरेव तज्जन्यतायामप्यवच्छेदकत्वात् यदि चान्वयिपरामर्शरूपकारणवि-

रहादेव नाप्रसिद्धसाध्यकस्थले साध्यतावच्छेदकविशिष्टवैशिष्ट्य-विषयकानुमितिः स्वतन्त्रसाध्यतावच्छेदकप्रकारकज्ञानदशायामप्यप्रसिद्धसाध्यकव्यतिरेकिपरामर्शात् साध्यविशेष्यिकैवानुमितिरुपेयते साध्यप्रसिद्धेस्तत्र प्रतिबन्धकत्वानुपगमात् ।

यदि वा अप्रसिद्धसाध्यकस्थलेऽपि साध्यविशेष्यकानुमित्यनुपगमे क्षतिविरहात् तादृशव्यतिरेकिपरामर्शात् सर्वत्र विशेष्ये विशेषणमित्यादिरीत्या साध्यविशेषणिकैवानुमितिरुपेयते,इत्युच्यते तदापि समानविषयकशाब्दबोधचाक्षुषादिसामग्रीकाले अनुमितिधारणायानुमितित्वावच्छिन्नं प्रति तादृशसामग्र्याः पृथक् प्रतिबन्धकत्वं सिद्धान्तिना वाच्यम् अनुमितौ प्रत्यक्षविशेषत्वमते(१) मानसत्वावच्छिन्नं प्रति तादृशसामग्र्याः क्लृप्तप्रतिबन्धकतयैवोपपत्तौ न तत्कल्पनमिति लाघवादनुमितौ प्रत्यक्षत्वसिद्धिर्निष्प्रत्यूहैव। न च कथितशाब्दादिसामग्रीकाले(२) भिन्नविषयकानुमित्युत्पत्त्या अनुमितेर्मानसत्वनये समानविषयकमानसत्वमेव तादृशसामग्रीप्रतिबध्यतावच्छेदकं वाच्यं तथा च भिन्नविषयकानुमित्यन्यमानसासंग्रह इति वाच्यम् । भिन्नविषयकमानसेच्छामुत्तेजकीकृत्य भिन्नविषयकमानसस्थले पृथक् प्रतिबन्धकताया भवतोऽप्यावश्यकतया समानविषयकमानससाधारणप्रतिबध्यतया तत्संग्रहे क्षतिविरहात् ।

न चानुमित्यन्यमानसस्थलीयप्रतिबन्धकतायामनुमितित्वप्रकारकेच्छाया अतिप्रसङ्गभयेनानुत्तेजकतया अनुमितित्वप्रकारकेच्छामुत्तेजकीकृत्यानुमितिस्थले पृथक् प्रतिबन्धकत्वमुभयोरावश्यकमिति नोक्तलाघवावकाश इति वाच्यम् । यद्विषयकशाब्दादिसामग्रीकाले अनुमितित्वप्रकारेच्छया न कदाप्यनुमितिर्जाता तत्रैव दर्शितलाघवसम्भवात् ।

न च तत्र लाघवेऽपि यत्रानुमितित्वप्रकारकेच्छाबलादनुमितिर्जाता तत्स्थलीयानुमित्यन्यमानसनिष्ठप्रतिबध्यतायामनुमित्य-

---

(१) पृथक्प्रतिबन्धकत्वकल्पने गौरवमनुमितौ मानसत्वस्वीकारे इति पु० पा० ।

(२)तत्र शाब्दादिसामग्रीकाल इति पु० पा० ।

न्यमानसत्वमेवावच्छेदकं वाच्यम् अन्यथा असत्यां मानसत्वप्रकारकेच्छायां सत्याञ्च कथितशाब्दादिसामग्र्यां अनुमितित्वप्रकारकेच्छासत्त्वेऽप्यनुमित्यनुपपत्तेरिति गौरवमिति वाच्यम्। अनुमित्यन्यमानसे सर्वत्र लौकिकसन्निकर्षबलादात्मत्वभानोपगमेन लौकिकविषयितासम्बन्धेनात्मत्वस्यैवानुमित्यन्यमानसस्थलीयस्य (१)तादृशप्रतिबध्यतावच्छेदकत्वोपगमेनानुमितेरुपपादनादिति नोक्ताप्रयोजकत्वशङ्कात्यतोऽनुमितौ प्रत्यक्षत्वस्य बाधकमाह। अनुमिताविति। साक्षात्कारित्वप्रसङ्गवारणाप्रकारमाशङ्कते। तद्ग्राहकेति। सुरभि चन्दनमित्यादिचाक्षुषादेः सौरभादिसाक्षात्कारित्वेनानुव्यवसायवारणाय विशेष्यतासम्बन्धेन तत्तद्विषयधर्मितावच्छेदकतापन्नसाक्षात्कारित्वप्रकारकप्रत्यक्षं प्रति स्वरूपसम्बन्धेन तत्तद्विषयनिष्ठलौकिकसन्निकर्षादिजन्यत्वस्य हेतुत्वात्तद्विरहादनुमित्यनन्तरं न वह्निं साक्षात्करोमीत्यनुव्यवसायापत्तिरित्यर्थः। लौकिकसन्निकर्षादीत्यादिना दोषविशेषपरिग्रहः।

आत्मानुमिताविति। तस्य। आत्मनिष्ठमनःसंयोगरूपलौकिकसन्निकर्षजन्यत्वस्य। न चैवमात्मोपनीतभाने भवतामपि न कथं साक्षात्कारित्वग्रहः अनुमितेरिव तस्यापि आत्ममनोयोगासमवायिकारणकत्वादिति वाच्यम्। मानसत्वावच्छिन्नाया एव मनोयोगजन्यतायास्तद्ग्राहकत्वोपगमात् मानसज्ञाने आत्मनो लौकिकसन्निकर्षादेव भानात् चाक्षुषादावेव तस्योपनीतस्य भानात् तत्र च मानसत्वावच्छिन्नजन्यताया अभावात् अनुमितौ मानसत्ववादिनाञ्च आत्मानुमितौ तादृश्या अपि जन्यताया अनपायादिति भावः।

ननूक्तलाघवेनानुमितेर्मानसत्वसिद्धौ उक्तातिप्रसङ्गवारणाय साक्षात्कारित्वग्रहं प्रत्यनुमितिभेदस्य कारणत्वमेकं कल्पनीयमित्यतः प्रत्यक्षप्रमाणेनानुमितौ प्रत्यक्षत्वाभावं व्यवस्थापयति। वह्निमिति।

यद्यपि वह्निं न साक्षात्करोमीति प्रतीतेरात्मनिष्ठो वर्त्तमानकालावच्छिन्नो वह्निसाक्षात्काराभाव एव विषयः न त्वात्मनिष्ठवर्त्तमानवह्निज्ञाने साक्षात्कारत्वाभावः स्वरूपतो भासमानसाक्षात्त्वजातेः पदार्थतावच्छेदिकाया अभावस्य तादृशशब्दनाप्रत्यायनात्,

(१) अनुमित्यन्यमानसत्वप्रकारकेच्छास्थलीयस्येति पु० पा०।

तथाप्येकविशेषणविशिष्टाधिकरणे विशेषणद्वयविशिष्टाभावप्रतीतिः तद्विशेषणवति विशेषणान्तराभावपर्यवसन्नत्वमिति वह्निविषयकत्ववति ज्ञाने साक्षात्कारित्वरूपविशेषणाभावः प्रकृते पर्यवस्यतीत्याशयेनोक्तं साक्षात्कारित्वाभावेति ।

ननु सुरभि चन्दनमित्यादिचाक्षुषदशायां जातस्य सौरभं न पश्यामीति प्रत्ययस्यैवोक्तप्रत्ययस्यापि भ्रमत्वमस्त्वित्यत आह । अगत्येति । चन्दनं पश्यामीत्यादिप्रतीत्या सुरभि चन्दनमित्यादिज्ञाने चाक्षुषत्वादेरावश्यकतया तत्र गत्यन्तरविरहेणैव सौरभं न पश्यामीत्यादौ चाक्षुषत्वाद्यभावांशे भ्रमत्वकल्पनमित्यर्थः । अनुमितौ च साक्षात्त्वानभ्युपगमेन न साक्षात्करोमीति प्रतीतेः प्रमात्वसम्भवात् न तत्परित्यागः धियां प्रमात्वस्यौत्सर्गिकत्वादिति भावः ।

अत्र नव्याः–सौरभं न पश्यामि न साक्षात्करोमीत्यादिप्रतीतेः प्रमात्वानुरोधेन लौकिकत्वाख्यो विषयताविशेषः कल्प्यते, तद्विशिष्टचाक्षुषत्वाद्यभावो न पश्यामीत्यस्य, तदभाव एव न साक्षात्करोमीत्यस्य विषयः । न च तथापि सौरभनिरूपिततादृशविषयिताविशिष्टचाक्षुषाप्रसिद्ध्या सौरभं न पश्यामीत्यत्रागतिरेवेति वाच्यम् । चाक्षुषनिष्ठविषयितायां सौरभनिरूपितत्वाभावस्यैव तादृशप्रत्ययविषयत्वोपगमात् , अन्ध आकाशं न पश्यतीत्यादावपि कथञ्चित्प्रमात्वमुपपादनीयम् । न चातिरिक्तविषयिताऽपसिद्धान्ततया न स्वीकरणीयेति वाच्यम् । प्रतीत्यनुरोधेन तत्कल्पनेऽपसिद्धान्तभयस्याविरोधित्वात् । अत एवाभावत्वप्रतियोगित्वादीनामतिरिक्तपदार्थत्वं ग्रन्थकृतामनुमतम् । न चैवं प्रत्यक्षत्वजातिरेव प्रामाणिकी स्यात् तत्कार्यस्य लौकिकत्वेनैवोपपादनसम्भवादिति वाच्यम् । विशेषणज्ञानादिजन्यतावच्छेदकतयैव तत्सिद्धेः, विषयिताविशेषापेक्षया जातेस्तथात्वे लाघवात् सर्वांशोपनीतज्ञानस्य प्रामाणिकत्वे तदसंग्राहकतयापि लौकिकत्वस्य विशेषणतावच्छेदकप्रकारकज्ञानादिजन्यतावच्छेदकत्वासम्भवाच्च । एवञ्चानुमितेः प्रत्यक्षतामतेऽपि न तत्र साक्षात्त्वाभावग्रहानुपपत्तिरिति तस्याः प्रत्यक्षत्वाभावे युक्त्यन्तरमेवानुसन्धेयम् ।

सन्निकर्षविरहादित्यनुमानप्रामाण्यव्यवस्थापिकां मूलयुक्तिं सामान्यलक्षणानभ्युपगमपक्षे सङ्क्रमयति । सामान्येति । अप्रसिद्धवह्न्यादी-

ति । पूर्वाज्ञातपर्वतीयवह्न्यादीत्यर्थः । व्याख्यातम् । प्रत्यक्षविजातीयतया व्यवस्थापितम् । अन्येषां युक्तिमुपन्यस्यति । व्यवस्थापयिष्यत इति । केचिदित्यस्वरसोद्भावनम्, तद्वीजन्तु असन्निकृष्टस्याभावस्य साध्यतया अनुमितौ भानेऽपि तस्याः प्रत्यक्षत्वं निराबाधमेव यत्किञ्चिद्विषयसन्निकर्षजन्यतयैव प्रत्यक्षत्वनिर्वाहात्, साध्यांशे प्रकारतया भासमानस्याभावत्वादेः सामान्यस्यापि सन्निकर्षतया अज्ञातत्वमात्रेणाप्यसन्निकृष्टत्वानिर्वाहाच्च । न चाज्ञातस्य साध्यस्यानुमितौ ज्ञाने तादृशाभावविषयकोपनायकस्य तत्र व्यभिचारप्रसक्तिरेव तस्याः प्रत्यक्षत्वबाधिकेति वाच्यम् । प्रकारताया एव उपनायकज्ञानजन्यतावच्छेदकत्वोपगमेन व्यभिचारानवकाशात् । तन्मुख्यविशेष्यकमानसोपनीतभानेऽपि तस्य स्वांशे अभेदसम्बन्धेन प्रकारतोपगमेन तत्संग्रहात् । अन्यथा सामान्यप्रत्यासत्तिजन्याज्ञातविशेष्यकबोधे व्यभिचारस्य दुर्वारत्वात् ।

वस्तुतः साध्यतावच्छेदकप्रकारेणाज्ञानेऽपि अभावत्वादिना साध्यस्य सामान्यप्रत्यासत्त्यैव ज्ञानं प्राक् सम्भवतीति नोपनयस्य व्यभिचार इत्यनुसरणीयम् (१)अप्रसिद्धसाध्यकानुमितिमनभ्युपगम्य तादृशयुक्तिं दूषयतां परेषां मतमाह । तत्रेति । भेदत्वादिना । पृथिवीनिष्ठभेदत्वादिना । आदिना ह्रदे धूमात्यन्ताभाव इत्याद्यनुमितिप्रकारस्यात्यन्ताभावत्वस्य परिग्रहः । जलादिप्रतियोगिकत्वग्रहः । जलादिप्रतियोगिकत्वानुमितिः । जलादिप्रतियोगिकत्वं साध्यतया अनुमितेर्विषय इति यावत् । वृत्त्यनियामकसंसर्गस्य व्यापकताघटकत्वे तु जलादिरूपसाध्यस्य संसर्गतयाऽपि तत्प्रतियोगिकत्वं विषयः सम्भवतीति द्रष्टव्यम् । एतावतैव जलादिभेदस्य ताद्रूप्येणाज्ञानदशायां पृथिव्यादिनिष्ठजलादिभेदसिद्ध्या कृतमप्रसिद्धसाध्यकानुमितिस्वीकारेण इति भावः । जलादिप्रतियोगिकत्वानुमापकान्वयिनोऽनुपस्थितिदशायामपि व्यतिरेकिणा तद्व्यक्तित्वादिनाऽपि तदनुमानसम्भवो बोध्यः ।

अत्राप्यपर इत्यस्वरससूचनाय, तद्वीजन्तु पृथिवीनिष्ठभेदत्वादिना भेदमात्रानुपस्थितावपि जलादिव्यापकाभावप्रतियोगित्वादिना भावेन पृथिव्यादौ जलादिभेदसिद्धेरप्रसिद्धसाध्यकानुमिति-

(१) इत्यनुसन्धेयमिति पु० पा० ।

मनभ्युगम्य दुरुपपादता, तदपलापे पक्षैकदेशे जलादिभेदस्य प्रसिद्धयैव कदाचित् तत्तत्साध्यकानुमितेरप्युपपादनसम्भवात् तादृशानुमित्यैवाप्रसिद्धसाध्यकानुमानखण्डनौचित्यादिति ।

अनुमितिकारणविशिष्टपरामर्शानुपपत्तिरूपपूर्वपक्षमध्यकथितबाधकमुद्धृत्य यो यत्र विशिष्य पूर्वमित्यादिनियमं स्थापयित्वा अनुमितिस्थले पक्षे साध्योपनीतज्ञानं सामान्यप्रत्यासत्तिमतेऽपि निराकुर्वाणस्य कस्यचिन्मतं निरसितुमुपन्यस्यति मूले कश्चिदिति। परम्परासम्बधेन व्याप्यत्वम् । परम्परासम्बन्धघटितव्याप्यत्वम्।

(चि०) भवतु तावदेवं तथापि जातिरेव लिङ्गं स्यात् न तु व्यक्तिः तथा च सर्वोपसंहारेण व्यक्तौ व्याप्तिग्रहार्थं सामान्यलक्षणप्रत्यासत्तिव्युत्पादनमफलं (१)स्यात्, दृश्यते च परम्परासम्बन्धज्ञानं विना जातिव्याप्तिमविदुषोऽपि "धूमाद्वह्न्यनुमानम्, न हि व्याप्यतावच्छेदकतया भासमानस्यावश्यं व्याप्यताग्रहः,मानाभावात्,तस्मात् पक्षधर्मे व्याप्तिविशिष्टज्ञानं तदनन्तरविशिष्टवैशिष्ट्यज्ञानं पक्षे वा तृतीयलिङ्गपरामर्शः। अन्ये तु स्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं व्यापकत्वं तत्सामानाधिकरण्यञ्च व्याप्यत्वं तथा च लाघवात् व्यापकताज्ञानमनुमितिहेतुः, साध्यस्य पक्षधर्मव्यापकताज्ञानञ्च परामर्शः, न तु साध्यव्याप्तस्य पक्षधर्मताज्ञानं साध्यव्याप्यवत्पक्षधर्मताज्ञानं वा गौरवात् ।

(दी०)उपसंहरति । तस्मादिति । वाशब्दोऽनास्थायाम् उभयथापि प्रकृताक्षतेः। वस्तुतो व्याप्यपक्षयोर्वैशिष्ट्यावगाहिज्ञानत्वेन हेतुत्वम्,विनिगमनाविरहेणान्यतरविशेषणविशेष्यभावस्यातन्त्र-

(१) सामान्यलक्षणप्रत्यासत्त्युपादानमफलमिति पु० पा० ।

त्वात् । लाघवादिति । अथाव्याप्यवृत्तेर्व्यापकत्वसम्पत्तयेऽभावस्य प्रतियोग्यसामानाधिकरण्यं वाच्यं तच्च स्वप्रतियोग्यनाधिकरणवृत्तित्वम् एवञ्चावृत्तिगगनादेर्धर्ममात्रव्यापकत्वं स्यात् तादृशघटत्वाद्यभावाप्रतियोगित्वात् तदधिकरणाप्रसिद्ध्या च तदभावस्य स्वप्रतियोग्यनधिकरणवृत्तित्वासम्भवात् तथा च तद्व्यावृत्तये व्यापके हेतुसामानाधिकरण्यं वाच्यम् । न चैवं हेतोर्व्यापकसामानाधिकरण्यापेक्षया लाघवमिति चेत्! अस्तु तावदेवमापाततस्तथापि वृत्तिमत्त्वमात्रमुपादेयम् । न चैवं हेतोः साध्यसामानाधिकरण्यस्य संशये व्यतिरेकनिश्चये वा अनुमित्यापत्तिरिति वाच्यम् । संशये इष्टत्वात्, व्यतिरेकनिश्चये च पक्षधर्मत्वाग्रहे परामर्शविरहात्, तद्ग्रहे च साध्यासमानाधिकरणधर्मान्तरग्रहस्येव तस्यापि विरोधित्वात् अन्यथा त्विष्टत्वात्, पर्वतो वह्निव्याप्यधूमवान् पाषाणमयः पाषाणमयावृत्तिश्च वह्निरिति ज्ञानेन च तुल्ययोगक्षेमं पर्वतवृत्तिधूमव्यापको वह्निर्धूमवद्वृत्तिश्चेति ज्ञानम् । न च साध्याप्रतियोगिकस्वसमानाधिकरणयावदत्यन्ताभावकत्वं साध्याप्रतियोगिकत्वावच्छेदकस्वसमानाधिकरणात्यन्ताभावत्वकत्वं वा व्याप्तिः साध्यप्रतियोगिकत्वञ्च केवलान्वयिनि साध्यस्यान्योन्याभावे सम्बन्धविशेषावच्छिन्नात्यन्ताभावे वा प्रसिद्धमिति वाच्यम् । गौरवात्, व्यापकत्वाद्यनन्तर्भावेन यावत्त्वस्य दुर्वचत्वात्, प्रमाणाभावेन स्वरूपसम्बन्धविशेषरूपत्वासम्भवेनावच्छेदकत्वस्यानतिरिक्तवृत्तित्वपर्यवसायित्वाच्च । व्यापकतायाश्च प्रतियोगित्वादेः सामान्याभावस्योक्तत्वात् सम्बन्धादिनिष्ठसाध्यप्रतियोगित्वव्यक्तेरभावस्य व्यभिचारिसाधनसमानाधिकरणयावदत्यन्ताभाववृत्तितया त्वयापि तस्यावश्यं वाच्यत्वात् साधनसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वरूपव्याप-

कत्वज्ञानमपेक्ष्य साध्यवदन्यावृत्तित्वत्वज्ञानस्य लघुत्वात् ।

(गा०) सामान्यप्रत्यासत्तिव्युत्पादनम् । सामान्यप्रत्यासत्तित्वस्वीकारः । जातिमात्रस्य लिङ्गत्वोपगमेऽनुभवविरोधमप्याह । दृश्यते चेति ।

ननु धूमत्वेन धूमे व्याप्तिग्रहदशायां धूमत्वोपस्थितेरावश्यकतया तत्रापि परम्परासम्बन्धघटिता व्याप्तिः शक्यग्रहा, अधिकरणे धूमत्वावच्छिन्नवत्त्वघटितधूमव्यापकताग्रहे धूमघटितसम्बन्धेन धूमत्वस्याप्यधिकरणत्वांशे भानसम्भवेन धूमत्वव्यापकताया अपि वह्नौ भानसम्भवात् । धूमत्ववति संयोगेन वह्निमदवृत्तित्वे भासमाने धूमत्वेऽपि वह्निमतः स्वसंयोगिसमवायरूपपरम्परासम्बन्धभानसम्भवाच्चेति व्यक्तिव्याप्तिज्ञानदशायां जातिव्याप्त्यग्रह एवाप्रसिद्ध इत्यत आह । न हीति । मानाभावादिति । धर्मिणः साक्षात् सम्बन्धभाने धर्मस्य परम्परासम्बन्धभानानियमासिद्धेरिति भावः ।

अनुमित्यन्यथानुपपत्तेर्मानसत्त्वसम्भवेनात्रापरितोषात् तादृशनियमे बाधकं पूरयति दीधितौ । तन्निष्ठेति । अवच्छेदकधूमत्वादिनिष्ठम् । अवच्छेदकान्तरम् । धूमत्वत्वादि । असम्भवात् । अवच्छेदकधूमत्वादौ अनुमित्यौपयिकव्याप्तिग्रहासम्भवात् । अभावे हेतुतावच्छेदकादिविशिष्टहेतुसामानाधिकरण्यस्य व्यापकताघटकतया हेतुतावच्छेदकस्यापि तथात्वात् प्रकृते अविशेषितधूमत्वादिविशेषिताधिकरणस्य व्यापकताघटकत्वोपगमेऽपि धूमत्वत्वादिप्रकारेण व्यापकसामानाधिकरण्यप्रकारकज्ञानमेवानुमितिहेतुर्वाच्यः, सामानाधिकरण्यांशे निर्धर्मितावच्छेदककज्ञानस्यानुमित्यहेतुत्वात् तथा सति परम्परासम्बन्धेन धूमत्वादिशून्यतया निश्चीयमाने ह्रदादावपि वह्न्याद्यनुमानापत्तेः; वह्निसामानाधिकरण्यसामान्याभावस्य तत्राग्रहे केवलेन 'वह्निसमानाधिकरणत्वेन धूमत्वादेस्तदा तत्र ग्रहसम्भवात् धूमत्वत्वाद्यवच्छिन्ने सामानाधिकरण्यग्रहः कथं धूमत्वत्वाद्युपस्थितिं विना सम्भवति, साध्याभाववदवृत्तित्वरूपा व्याप्तिरपि पक्षवृत्तौ व्याप्यतावच्छेदकनिश्चयं विना प्रायशो दुर्निश्चयतया उपनीतविपरीतकोटेरपि भानसम्भवेन संशयसम्भवात्, निर्द्धर्मितावच्छेदककसंशयासम्भवेन(१) सा-

(१) संशयानुपगमेनेति पु० पा० ।

ध्याभाववद्वृत्तिमानिति निश्चयसम्भवेऽपि पक्षवृत्तित्वावच्छेदेन व्यभिचारसंशये च पक्षः साध्याभाववद्वृत्तिमानिति निश्चयोऽपि दुर्घट इति भावः। मानाभावादित्यस्य मानस्यावच्छेदके व्याप्तिप्रमितिजनकस्य तन्निष्ठावच्छेदकान्तरग्रहस्याभावात् नियमेनासत्त्वादित्यर्थसम्भवेन पूरणं विनापि निर्वाह इति द्रष्टव्यम्। तस्मादित्यादेरव्यवधानव्यवस्थापितानुमानप्रामाण्योपनयप्रत्यासत्तित्वयोरुपसंहारत्वासम्भवात् प्रागव्यवस्थापितविशिष्टपरामर्शहेतुत्वोपसंहारत्वमाविष्कर्त्तुमाह। उपसंहरतीति। मूले पक्षधर्मे व्याप्तिविशिष्टज्ञानमिति। विशेष्यतायां विशेषणतायां वा अवच्छेदिकया व्याप्त्या प्रकारेण विशेष्यस्य विशेषणस्य वा पक्षीयहेतोर्ज्ञानं प्रथमत इत्यर्थः, एतज्ज्ञानं सामान्यलक्षणाप्रत्यासत्तित्वमते स्मरणमेव अन्यथा तु महानसीयधूमादिविशेष्यकव्याप्तिस्मरणाधीनं प्रत्यक्षं तत्र च व्याप्तिपक्षधर्मतयोरेकत्र द्वयमित्यादिरीत्या भानेऽपि न तस्य व्याप्तिविशिष्टधूमे पक्षधर्मतायाः पक्षे वा तादृशधूमस्य वैशिष्ट्यावगाहित्वं सम्भवति तादृशज्ञाने व्याप्तिविशिष्टधूमज्ञानस्य विशेष्यतावच्छेदकविशिष्टविशेष्यकज्ञानविधया हेतुत्वात्। अत एव न तस्यानुमितिहेतुत्वं च, तत्साधारणेन एकत्र व्याप्तिपक्षधर्मतोभयावगाहिज्ञानत्वेनानुमितिहेतुव्याप्त्यंशे संशयादनुमितिवारणाय तदन्यत्वस्यानुमितिजनकतावच्छेदके निवेशापातात् विशिष्टवैशिष्ट्यावगाहित्वेनैवानुमितिजनकत्वोपगमादिति। तदनन्तरमिति। तदनन्तरजातमित्यर्थः। विशिष्टवैशिष्ट्यज्ञानम्। व्याप्तिविशिष्टे पक्षवैशिष्ट्यावगाहिज्ञानत्वावच्छिन्नम्। पक्षे वा तृतीयलिङ्गपरामर्शः। पक्षे व्याप्तिविशिष्टप्रतियोगिकवैशिष्ट्यज्ञानत्वावच्छिन्नं वा। अनुमितिहेतुरिति शेषः। उभयोः पक्षयोस्तुल्यतया पूर्वत्रापरितोषाभावाद्वाकारः एकपक्षानिर्भरसूचकतया व्याचष्ट दीधितौ। वेति।

ननु पूर्वमेकविधस्यैव परामर्शस्यानुमितिहेतुतायाः प्रतिज्ञातत्वादत्र विकल्पेनोभयविधस्य तद्धेतुत्वोपसंहारविरोध इत्यत आह। उभयथेति। प्रकृताक्षतेरिति। अनुमितिलक्षणनिर्वाहादित्यर्थः, यादृशस्य हेतुना तादृशपरामर्शजन्यताया एवानुमितिलक्षणे निवेश्यत्वादिति भावः। एवञ्च पक्षधर्मस्य व्याप्तिविशिष्टज्ञानम् अनुमितिहेतुरित्यस्यापि पक्षतावच्छेदकावच्छिन्नविशेष्यकं व्याप्य-

प्रकारकं व्याप्त्यवच्छिन्नविशेष्यकं पक्षप्रकारकं वा ज्ञानमनुमितिहेतुरित्येवार्थ इति नोपक्रमविरोध इत्याशयः। उक्तपरामर्शयोरेकस्मादेवानुमितिर्नान्यस्मादित्यत्र युक्तिविरहेण प्रत्येकरूपावच्छिन्नस्य न जनकत्वम् उभयासंग्राहकत्वादिति मूलोपर्यस्वरसं प्रकाशयन् उभयानुगमकं कारणतावच्छेदकमाह। वस्तुत इति। अथ वा मूलस्थवाकारः समुच्चये, तथा च प्रत्येकरूपेण हेतुत्वं न विवक्षितम् अपि तूभयोरनुगतरूपेणैवेत्याह। वस्तुत इति। विनिगमनाविरहेण। विनिगमनाभावात्, हेतुभूतयोरुभयोरसङ्ग्राहकत्वेन। अतन्त्रत्वात्। विशिष्य जनकतानवच्छेदकत्वात्।

इदमत्र बोध्यम्, व्याप्यपक्षयोर्वैशिष्ट्यावगाहित्वं न वास्तवं पक्षानुयोगिकं व्याप्यप्रतियोगिकं यद्वैशिष्ट्यं हेतुतावच्छेदकसम्बन्धः तदवगाहित्वं भ्रमस्थलासङ्ग्रहात् व्याप्त्याद्यनवगाहिज्ञानसाधारण्याच्च। नापि व्याप्यप्रतियोगिकत्वपक्षानुयोगिकत्वोभयोपरागेण तादृशसंसर्गावगाहित्वं सम्बन्धसंसर्गकज्ञानासङ्ग्रहात् संसर्गानुयोगित्वप्रतियोगित्वयोर्वैशिष्ट्यबुद्ध्यविषयत्वात्, समूहालम्बनवैलक्षण्यस्य विषयतावैलक्षण्येनैवोपपत्तेः। नापि व्याप्यपक्षोभयोपरागेण तादृशसंसर्गावगाहित्वं तत्, तच्च तदुभयनिरूपितहेतुतावच्छेदकसम्बन्धीयसंसर्गताकत्वं, भ्रमस्थले उभयांशे संसर्गाप्रसिद्धावपि संसर्गतायाः विशेष्यविशेषणोभयनिरूपितत्वान्नानुपपत्तिरिति, एवं सति पर्वतवान् व्याप्य इत्यादिज्ञानादप्यनुमित्यापत्तेः। न च तत्र संयोगरूपहेतुतावच्छेदकसम्बन्धावच्छिन्नाधारत्वं सम्बन्धः न तु संयोगस्तस्य उभयनिष्ठत्वात् तादृशबुद्धेरपि प्रमात्वप्रसङ्गात्, यत्र संयोगो व्याप्यताघटकसम्बन्धस्तत्र पक्षे संयोगावच्छिन्नाधारतया व्याप्यप्रकारकात्प्राप्ये च संयोगावच्छिन्नाधेयतया पक्षप्रकारकाज् ज्ञानान्नेष्यते एवानुमितिरपि तु संयोगमात्रेण तदेकतरांशेऽपरप्रकारकज्ञानादेवेति वाच्यम्। एवमपि यत्राधारत्वादिरेव व्याप्यताघटकम्बन्धस्तत्रोक्तज्ञानादनुमित्यापत्तेर्दुर्वारत्वात्।

अथ संयोगो यत्र हेतुतावच्छेदकसम्बन्धस्तत्रैव व्याप्यपक्षोभयवैशिष्ट्यावगाहित्वेन हेतुता स्वीक्रियते न तु संयोगावच्छिन्नाधारतादिर्यत्र हेतुतावच्छेदकसम्बन्धस्तत्रापि तत्र तेन सम्बन्धेन हेतुप्रकारकपक्षविशेष्यकपरामर्शस्यैवानुमितिहेतुतया तादृशपरा-

मर्शत्वस्यैव जनकतावच्छेदकत्वोपगमात् । न हि तत्र संयोगाव-
च्छिन्नाधेयतासम्बन्धेन व्याप्यांशे पक्षप्रकारकभानमपि हेतुः, त-
स्य हेतुतावच्छेदकसम्बन्धानवगाहित्वात् तद्धेतुत्वे उक्तरूपेण त-
त्संग्रहासम्भवाच्च इति चेत्तर्हि संयोगो यत्र हेतुतावच्छेदकसम्ब-
न्धस्तत्रापि तेन सम्बन्धेन हेतुप्रकारक एव परामर्शो हेतुर्न तु ते-
न सम्बन्धेन पक्षप्रकारकोऽपि, तथा सति हेतुनिष्ठे साध्यशून्ये-
ऽपि द्रव्ये हेतुविशेष्यकतद्द्रव्यप्रकारकयथार्थपरामर्शादनुमित्याप-
त्तेः सल्लिङ्गकपरामर्शाद् बाधितार्थविषयकलाघवज्ञानादिरूपदोषा-
समवहितात् भ्रमानुमित्युत्पत्तेः सर्वानुभवविरुद्धतया इष्टापत्त्ययो-
गात्, तथा च तत्रापि उक्तानुगतरूपेण हेतुता न युज्यत इति क्व
तथा हेतुत्वम् । न च साध्यशून्ये हेतुसंयोगसत्त्वे तेन सम्बन्धेन
व्याप्तिरेव बाधितेति कथमुक्तस्थले प्रसञ्जितभ्रमानुमितिजनकस्य
परामर्शस्य यथार्थता इति वाच्यम् । हेतुसंयोगिन्यपि हेतुवृत्तिद्र-
व्ये हेतुसंयोगानुयोगित्वविरहेण तत्र साध्याभावस्य व्याप्त्यविघ-
टकत्वात्, अन्यथा संयोगेन तद्घटादेस्तद्घटान्यत्वाद्यव्याप्यता-
प्रसङ्गात् साध्याभाववति तद्घटादौ तद्घटादिसंयोगसत्त्वात् ।

अत्र वदन्ति धूमवान् पर्वतः धूमः पर्वते इत्युभयत्रैव संयोगः स-
म्बन्धतया भासते न तु संयोगावच्छिन्नाधारत्वाधेयत्वे, तथा सति
संयोगस्य सम्बन्धताविलोपप्रसङ्गात् । एवञ्च तादृशज्ञानयोर्विषय-
ताविलक्षण्येन मिथो वैलक्षण्येऽपि धूमवान् पर्वतः धूमे पर्वत इत्यन-
योः पर्वतवान् धूमः पर्वते धूम इत्यनयोश्चाविशेषप्रसङ्गात् तस्मात्
धूमवान् पर्वत इत्यत्र धूमः पर्वते इत्यत्र च सम्बन्धस्य सम्बन्ध-
विधया धूमे प्रतियोगित्वं पर्वते चानुयोगित्वं भासत इत्युपेयम्,
धूमे पर्वतः पर्वतवान् धूमः इत्यनयोश्च धूमेऽनुयोगित्वं पर्वते प्रतियो-
गित्वं भासत इति ताभ्यां विशेषः । न च विशेषणस्यानुयोगित्व-
भाने विशेष्यस्य च प्रतियोगित्वभाने विशेषणविशेष्यभाववैपरी-
त्यप्रसङ्ग इति वाच्यम् । यतो विशेषणत्वविशेष्यत्वे न भासमानवै-
शिष्ट्यप्रतियोगित्वानुयोगित्वे, अपि तु विषयताविशेषावेव इत्या-
शयेन ग्रन्थकृता उक्तानुगमकरूपस्य कारणतावच्छेदकत्वमङ्गीकृतम्,
तथा च व्याप्यांशे सम्बन्धस्य प्रतियोगित्वं पक्षे चानुयोगित्वमव-
गाहमानतैव व्याप्यपक्षोभयवैशिष्ट्यावगाहितेति ।

वस्तुतः सम्बन्धानुयोगिनि सम्बन्धप्रतियोगिनस्तेन सम्बन्धेन विशिष्टबुद्धिः प्रमा धूमपर्वतसंयोगस्य धूमपर्वतयोः प्रतियोग्यनुयोगिभावो न विपरीतयोरिति पर्वतवान् धूम इति ज्ञानस्याधारतानवगाहित्वेऽपि न प्रमात्वप्रसङ्ग इति संयोगमात्रस्यैव सम्बन्धत्वं न त्वाधारत्वस्याधिकस्य, तस्यापि सम्बन्धत्वानुपपत्त्या क्लृप्ततायाः स्वीकरणीयतया विशेषणविशेष्ययोः तदीयप्रतियोगित्वानुयोगित्वयोः प्रमात्वनियामकतां विना भवतोऽप्यतिप्रसङ्गस्य दुर्वारत्वात्। सम्बन्धविशेषानुयोगित्वमेवाधारत्वमिति चेद्भवतु तथापि स्वरूपसत एव तस्य प्रमात्वनियामकतया न तस्य सम्बन्धिसम्बन्धतेति।

अत्र वदन्ति, संयोगमात्रस्य सम्बन्धत्वे पर्वतवान् धूमः पर्वते धूम इत्यनयोः को विशेषः? आद्ये धूमांशे पक्षस्य संयोगः सम्बन्धः परत्र च पक्षसंयोगस्य प्रतियोगित्वं तथेति चेत्? आद्ये संयोगानुयोगित्वं सम्बन्धः परत्र च संयोग एव पक्षस्य तथेत्येव किं न स्यात्? अनुयोगित्वान्यसम्बन्धस्थले विशेष्ये प्रतियोगित्वस्यापि प्रमात्वानियामकताया वक्तुं शक्यत्वात् शब्दानुगमस्यानपेक्षणीयत्वात् तस्माद् यत्र संयोग एव सम्बन्धस्तत्र प्रतियोग्यनुयोगिभावो धर्मधर्मिणोस्तत्सम्बन्धतया भासत इत्युपगमेनैव उक्तप्रत्यययोर्वैलक्षण्यमुपेयम् आधाराधेयभावस्य तुल्यवित्तिवेद्यताप्रवादोऽप्येवं सङ्गच्छते (१)। तथा च व्याप्यांशे सम्बन्धस्य प्रतियोगित्वं पक्षांशे चानुयोगित्वमवगाहमानैव व्याप्यपक्षवैशिष्ट्यावगाहितेति न कश्चिदतिप्रसङ्गः।

इदन्तु तत्त्वम्, तद्वानयमित्यत्र विशेष्ये विशेषणस्य संयोग एव सम्बन्धः, तत्रेदम् इत्यत्र च संयोगावच्छिन्नाधेयत्वमित्येव विशेषः, प्रथमे संयोगावच्छिन्नाधारत्वं परत्र च संयोगमात्रं सम्बन्ध इति वैपरीत्यस्य न प्रसक्तिः। विशेष्ये सम्बन्धानुयोगितायाः प्रमात्वनियामकतया धूमे पर्वत इत्यादिबुद्धेः प्रमात्वापातात्, एवञ्च सम्बन्धविधया भासमानसंयोगादेः प्रतियोगित्वानुयो-

(१) अथेत्यादिः सङ्गच्छते इत्यन्तः पाठः केषुचिदादर्शपुस्तकेषु नास्ति।

गित्वभानमप्रामाणिकम् । एवञ्च पक्षविशेष्यकपरामर्श एवानुमिति-हेतुर्न पर इत्यत्र विनिगमकमपि सुलभं व्याप्यविशेष्यकपरामर्शस्य संयोगावच्छिन्नाधेयतासंसर्गकत्वेनैव हेतुताया वाच्यतया तदपेक्षया पक्षविशेष्यकधियः संयोगसंसर्गकत्वेन (१)हेतुत्वे लाघवादिति । हेतुसाध्यसामानाधिकरण्याघटितत्वेन मूलोक्तव्याप्त्यपेक्षया व्यापकत्वस्य लाघवं निराकर्त्तुं व्यापकत्वे तन्निवेशयितुमाशङ्कते । अथेति । तच्च स्वप्रतियोग्यनधिकरणवृत्तित्वमिति । स्वम् । वृत्तित्वान्तविशेष्यतया विवक्षितोऽभावः । स्वप्रतियोग्यधिकरणवृत्तिर्यो यस्तद्भिन्नत्वनिवेशे संयोगि सत्त्वादित्यादावतिव्याप्तिरिति भावः । धर्ममात्रस्य व्यापकत्वं येन येन सम्बन्धेन यद्यत् क्वचिदपि सम्बद्धं तेन तेन सम्बन्धेन तत्तत् प्रति येन येन सम्बन्धेन स्वमवृत्ति तेन तेन सम्बन्धेन व्यापकत्वम् । तादृशेति । प्रतियोग्यनधिकरणवृत्तीत्यर्थः । गगनादेर्हेतुमन्निष्ठस्वाभावप्रतियोगित्वमकिञ्चित्करमित्याह । तदधिकरणेति । तदधिकरणम् । गगनाद्यधिकरणम् । तदभावस्य । गगनाभावस्य । तद्व्यावृत्तये । उक्तापत्तिवारणाय । हेतुसामानाधिकरण्यं व्यापकताघटकं वाच्यम् । न चैवम् । एवञ्च न । समाधत्ते । अस्तु तावदिति । एवम् । गगनाद्यभावस्य प्रतियोग्यसामानाधिकरण्यविशेषणेन व्यावृत्तिः, वस्तुगत्या उभयाभावघटितस्य प्रतियोग्यसामानाधिकरण्यस्य गगनाद्यभावसाधारणतया व्याप्तिवादे दर्शितत्वान्न तद्व्यावृत्तिरित्यभिप्रेत्य उक्तम् । आपातत इति । वृत्तिमत्त्वम् । व्यापकताघटकसम्बन्धेन सम्बन्धित्वं, न तु तेन सम्बन्धेन हेतुसामानाधिकरण्यपर्यन्तमिति शेषः । हेतुसाध्ययोरसामानाधिकरण्यज्ञानं जनकज्ञानाघटकत्वेनैवानुमितिविरोधि तच्च तदैवोपपद्यते यदि तयोः सामानाधिकरण्यज्ञानम् अनुमितिजनकं भवतीति शङ्कते । न चैवमिति । एवम् । हेतुसाध्यसामानाधिकरण्यज्ञानस्याहेतुत्वे । पक्षधर्मत्वाग्रहे । तदग्रहदशायाम् । परामर्शविरहात् । पक्षधर्मतया हेत्ववगाहितद्व्यापकताज्ञानरूपानुमितिकारणविरहेण तदापत्त्ययोगात् । तद्ग्रहे । तद्ग्रहदशायाम् । साध्यसमानाधिकरणधर्मान्तरग्रहस्यैवेति । साध्यासमानाधिकरणतया निश्चितजलत्वादौ पक्षधर्मताग्रहस्यैवेत्यर्थः त-

(१) संयोगविषयकत्वेनैवेति' पु० पा० ।

स्यापि । प्रकृतहेतौ पक्षधर्मताग्रहस्यापि । विरोधित्वात् । तद्वद्वृत्तित्वस्य तदभावव्याप्तिपर्यवसिततया साक्षादेवानुमितिविरोधित्वात्,

साध्यवदवृत्तितया धर्मान्तरस्य ग्रहो न साध्याभावव्याप्तित्वेन तद्व्याप्तिविषयक इति तद्विषयधर्मान्तरस्य पक्षे ग्रहेऽप्यनुमितिरिष्यत एवेति यदि तदा प्रकृतेऽपि तुल्यमित्याह । अन्यथेति । एतन्मते च विरोधः साध्याभावव्याप्यत्वं, असाधारण्यञ्चावृत्तित्वं, गगनादेरेव अनुकूलतर्कविरहेणासाधारण्यसन्देहादेव शब्दत्वादिकं शब्दादौ नित्यत्वाद्यसाधकमित्यवधेयम् ।

अस्तु हेतौ साध्यवदवृत्तित्वग्रहसहितः पक्षधर्मताग्रहो विरोधिधर्मवत्ताज्ञानविधया साक्षादनुमितिविरोधी तथापि साध्ये हेत्वसामानाधिकरण्याग्रहकाले अनुमित्यापत्तेर्दुर्वारतया साध्ये हेतुसामानाधिकरण्यधीरनुमितिहेतुरवश्यमेव वाच्येत्यत आह । पर्वत इति । ज्ञानेन तुल्ययोगक्षेममिति । ज्ञानमिति । प्रथमज्ञानकाले अनुमित्यनुत्पादे ग्राह्यविरोधितया गृह्यमाणधर्मग्रहस्यैव ग्राह्यं यद्विरोधितया गृहीतं तद्धर्मग्रहस्याप्यनुमितौ साक्षाद्विरोधितया द्वयोरेव तथात्वं, तदा अनुमित्युपगमे च प्रकृतेऽप्यनुमितिरिष्यत एवेत्यर्थः साध्यहेत्वोरसामानाधिकरण्यग्रहात् कदाचिदनुमित्यनुत्पादानुभवश्चासामानाधिकरण्यस्याव्यापकत्वव्याप्यतया तद्ग्रहदशायामसामानाधिकरण्यग्रहस्य व्यापकताधीविरोधित्वादिति भावः ।

व्याप्तिव्यापकतयोः साम्याय व्याप्तावपि न साध्यहेत्वोः सामानाधिकरण्यान्तर्भाव इति शङ्कते । न चेत्यादिना । साध्येति । साध्यतावच्छेदकावच्छिन्नप्रतियोगिकस्वावच्छिन्नसमानाधिकरणसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकयावदभावकधर्मवत्त्वमित्यर्थः। साध्यतावच्छेदकानवच्छिन्नस्वावच्छिन्नसमानाधिकरणाभावीयसाध्यतावच्छेकसम्बन्धावच्छिन्नयावत्प्रतियोगिताकधर्मवत्त्वमिति तु परमार्थः (१) अतो वह्निमान् धूमादित्यादौ हेतुमन्निष्ठस्य संयोगेन गुणाद्यभावस्य स्वरूपसम्बन्धावच्छिन्नवह्नित्वावच्छिन्नाभावसमनियततया तदभावाभिन्नत्वेऽपि न क्षतिः, अभावैक्येऽपि प्रतियोगिताभेदात् । यावदर्थस्य लघोर्दुर्वचत्वमाशङ्क्याह । साध्यप्रतियोगिकत्वेति । अत्रापि साध्यतावच्छेदकानवच्छिन्नत्वावच्छेदकस्व-

(१) इति तु फलितार्थ इति पु० पा० ।

विशिष्टसमानाधिकरणाभावीयसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितात्वकत्वमिति पर्यवसितोऽर्थः (१) अवच्छेदकत्वञ्चेदं स्वरूपसम्बन्धात्मकमनतिप्रसक्तत्वनियतम् इत्यभिमानः। बहुव्रीह्यर्थः सम्बन्धः उभयत्रैव यः कश्चन सम्बन्धत्वेन सम्बन्धविधया प्रविष्टः, प्रमेयसामान्यसाध्यकस्थले अन्योन्याभावेऽपि न साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वप्रसिद्धिरतः सम्बन्धविशेषावच्छिन्नात्यन्ताभावे वेति। संयोगादिसम्बन्धावच्छिन्नाभावे वेत्यर्थः। प्रथमे गौरवं प्रकाशयति। व्यापकत्वाद्यनन्तर्भावेनेति। तथा च तदन्तर्भाव आवश्यक इति भावः। द्वितीये गौरवं प्रकाशयति। प्रमाणाभावेनेति। प्रतियोगित्वादिभिरेव समं अनतिप्रसक्तधर्मस्य स्वरूपसम्बन्धात्मकावच्छेद्यावच्छेदकभावस्यानुभविकत्वादिति भावः। अनतिरिक्तवृत्तित्वपर्यवसायित्वात्। अनतिरिक्तवृत्तित्वरूपत्वात्। ननु व्यापकतायामपि स्वसमानाधिकरणाभावीययत्किञ्चित्प्रतियोगिकत्वाद्यभावमादाय अतिप्रसङ्गवारणाय यावत्तदभावकूटो निवेश्य इति यावत्त्वनिवेशस्तुल्य इत्यत आह। व्यापकतायाश्चेति। प्रतियोगित्वादेरित्यादिना निष्कृष्टलक्षणघटकतदवच्छेदकत्वपरिग्रहः। सामान्याभावस्य। तादृशप्रतियोगितात्वाद्यवच्छिन्नाभावस्य। इदञ्चावच्छिन्नत्वं प्रतियोगित्वे सर्वमत एव स्वरूपसम्बन्धः न तु व्यापकत्वं, अन्यथा दर्शितव्याप्तिलक्षणप्रविष्टसाध्यप्रतियोगिकत्वसामान्याभावस्यापि व्यापकतान्तरघटिततया महागौरवापत्तेरित्याह। सम्बन्धादिनिष्ठेति। आदिपदं सम्बन्धान्तरावच्छिन्नाभावपरिग्राहकम्। सम्बन्धप्रतियोगित्वाभावप्रतियोगित्वयोर्वैलक्षण्येऽप्यतिप्रसङ्गस्य दुर्वारताव्यञ्जकम्। तस्य। सामान्याभावस्य। स्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकत्वाभिधानेऽपि तादृशसाध्यतावच्छेदकीयसम्बन्धस्याधिकस्य हेतोर्द्विधा विषयतायाश्च कारणतावच्छेदके निवेशनीयतया व्याप्यवत्तापरामर्शहेतुतागौरवं दुष्परिहरमेवेति भावः। व्यापकसामानाधिकरण्यरूपव्याप्तिधीहेतुतामतेऽपि व्यापकताप्रदर्शकोदाहरणप्रयोगसङ्गतेरत एवेत्याद्युपष्टम्भासङ्गतिरत आह। साधनेति।

(चि०) अत एव यो यो धूमवान् स सोऽग्निमानि-

---

(१) इति फलितार्थं इति पु०'पा० ।

त्युदाहरणवाक्ये साध्यायोगव्यवच्छेदेन धूमव्यापकता वह्नेरुपदर्श्यते, अन्यथा वह्निमानेव धूमवानित्यन्ययोगव्यवच्छेदेनोदाहरणशरीरं स्यात् दोषोऽपि व्यभिचारादिर्न पक्षधर्मव्यापकं साध्यमित्येवोद्भाव्यः।

(दी०) तद्धेतुतावादिनं निरस्यति। अत एवेत्यादिना। वीप्सासमभिव्याहारादिवशादुद्देश्यधर्मवद्वृत्तेरत्यन्ताभावस्यान्योन्याभावस्य वा प्रतियोगित्वाभावो विधेयधर्मे तद्वति वा भासते, न तु विधेयधर्मतद्वतोरत्यन्तान्योन्याभावानधिकरणत्वमुद्देश्यधर्मवति, यद्यदभिधेयं तत्प्रमेयमित्यादावसम्भवादिति भावः। साध्येति। अयोगः। अभावप्रतियोगित्वम्, तथा च साध्ये साधनवन्निष्ठाभावप्रतियोगित्वव्यवच्छेदेनेत्यर्थः। स्यादिति। न स्याच्च केवलान्वय्यनुमानमित्यपि द्रष्टव्यम्। न पक्षेति। एतच्च विरोधस्यातिस्फुटत्वमभिसन्धाय, साध्याभाववद्वृत्तित्वबुद्धेरपि व्यापकताधीविरोधित्वादिति वदन्ति।

(गा०) ननु वीप्सावशात् उद्देश्यधर्मधूमादौ विधेयवह्निमदन्यावृत्तित्वमेव प्रतीयते, न तु विधेयधर्मे उद्देश्यगतधर्मव्यापकत्वं इत्युपेयमतो न साध्यवदन्यावृत्तित्वस्य ज्ञानहेतुतामतेऽप्युक्तोदाहरणासङ्गतिरित्यत आह। वीप्सेति। वीप्सासमभिव्याहारः। वीप्सितपदसमभिव्याहारः। उद्देश्यधर्मः। उद्देश्यगतधर्मः, स च वीप्सितयत्पदेतरोद्देश्यवाचकपदघटितवाक्ये ग्रामो ग्रामो रमणीय इत्यादौ तत्पदोपस्थाप्यो ग्रामत्वादिरूपोद्देश्यतावच्छेदकधर्म एव यत्पदवीप्सास्थले यो यो धूम

वानित्यादौ तु यत्पदार्थविधेयतया विवक्षितो धूमादिः तस्यापि यत्तद्घटितवाक्यद्वयोद्देश्यधर्मिसम्बद्धतया विवक्षितत्वात् । अन्योन्याभावघटितव्यापकताया लघुत्वादन्योन्याभावस्य चरममुपादानम् । प्रतियोगित्वाभावः । प्रतियोगितानवच्छेदकावच्छिन्नत्वम् । विधेयधर्मे । विधेयकोटिनिविष्टधर्मे । स च धर्मो ग्रामो ग्रामो रमणीय इत्यादौ यथायोगं द्विरुक्तोद्देश्यवाचकपदसमभिव्याहृतपदोपस्थाप्यो विधेयतावच्छेदकरमणीयत्वादिः विधेयो रमणीयाभेदादिश्च, यो यो धूमवान् स वह्निमान् स न ह्रद इत्यादौ च वीप्सितपदघटितवाक्यान्तरस्थपदोपस्थाप्यो वह्न्यादिरूपविधेयतावच्छेदको ह्रदभेदादिरूपो विधेयश्च विधेयधर्मतद्वतोरत्यन्तान्योन्याभावप्रतियोगित्वाभ्यां यथासंख्यमन्वयः । उद्देश्यविधेयधर्मौ वीप्सितपदघटितवाक्योपस्थाप्योद्देश्यतावच्छेदकविधेयावित्यपव्याख्यानम्, यो यो धूमवान् स वह्निमानित्यादौ धूमवद्वह्न्योर्विभिन्नवाक्योपस्थाप्ययोर्यत्तत्पदार्थांशे विधेयत्वात्, धूमादेर्वह्न्युद्देश्यतावच्छेदकत्वविरहात् ।

यत्तु यत्तत्पदयोस्तात्पर्यग्राहकत्वमेव, धूमवान् वह्निमानित्यनयोरेवोद्देश्यविधेयभावेनान्वय इति, तदशुद्धम्, यो य इच्छति स जानाति इत्याद्याख्यातार्थस्य व्युत्पत्तिविरोधेन धर्मानुपस्थित्या च उद्देश्यतावच्छेदकत्वासम्भवात् । यत्पदाभ्यां विरूपेणोपस्थितयोरपि तत्पदेन परामर्शादिति मणिकारलिखनविरोधाच्च ।

एतेन पूर्ववाक्यमेव निरर्थकं उत्तरवाक्यस्थतत्पदं धूमाद्यवच्छिन्नपरमित्यपि निरस्तम् । अप्रक्रान्तस्य तत्पदेन परामर्शायोगाच्च । विधेयधर्मतद्वतोरत्यन्तान्योन्याभावाभ्यां यथासंख्यमन्वयः । उद्देश्यधर्मवतीति । न तु भासते इत्यनेनान्वयः । धूमवति वह्नितद्वतोरत्यन्तान्योन्याभावानधिकरणत्वभान अर्थाद् धूमे वह्निमदन्याधिकरणत्वाभावरूपव्याप्तिलाभः सम्भवतीति न परानभिमतप्रतिक्षेपशङ्का । अत एव वह्निमानेव धूमवानित्यादिमूलस्यापि सङ्गतिः, वह्निमदन्यतादात्म्यव्यवच्छेदपरत्वेन धूमवत एव तादृशवाक्यात् प्रतीतिः । असम्भवादिति । विधेयधर्माद्यभावाप्रसिद्धेरित्यर्थः । इदमत्रावधेयम्, ग्रामो ग्रामो रमणीय इत्यादौ ग्रामत्वव्यापकत्वविशिष्टाभेदादेरुद्देश्ये रमणीयादिसम्बन्धत्वोपगमाद्व्यापकता-

बोधनिर्वाहः, व्यापकत्वस्यापदार्थत्वेन प्रकारत्वायोगात्।

न च द्विरुक्तग्रामपदं ग्रामत्वव्यापकताविशिष्टार्थकं तस्य चाभेदसम्बन्धेन विधेयान्वयः शक्तिग्राहकन्तु द्विरुक्तानुशासनमेवेति वाच्यम्। तथा सति उद्देश्यतया ग्रामादीनामन्वयानुपपत्तेः स्वातन्त्र्येणानुपस्थितत्वात्।

न चैकग्रामपदं उद्देश्यवाचकमपरञ्चोक्तार्थकमिति वाच्यम्। एकपदस्थाने उभयात्मकपदद्वयादेशात् (१)पदद्वयस्यैवाभावात्, द्वितीयाद्यर्थकर्मत्वादौ प्रकृत्यर्थस्याधेयतयैवान्वयस्य व्युत्पन्नतया ग्रामं ग्रामं ददातीत्यादौ वीप्सितपदस्य व्यापकतार्थकत्वे व्यापकादिकर्मकदानादेः प्रत्ययापत्तेश्च। न चोद्देश्यविधेयभावस्थले वीप्सां विनापि उद्देश्यतावच्छेदकावच्छेदेन विधेयभानाद्व्यापकताबोधार्थं द्विरुक्तप्रयोगो व्यर्थ एव यदि व्यापकताया न प्रकारतेति वाच्यम्। उद्देश्यतावच्छेदकसामानाधिकरण्यमात्रेणापि क्वचिद्विधेयबोधाद्व्यापकतापरत्वस्फुटीकरणाय द्विरुक्त्यादरात्।

अस्तु वा रमणीयादिपदस्यैव ग्रामत्वव्यापकरमणीयत्वादिना निरूढलक्षणा निरूढलक्षणाया द्विरुक्तोद्देश्यवाचकपदसमभिव्याहारनियतत्वान्न तन्निर्वचनवैयर्थ्यम्, ग्रामं ग्रामं ददातीत्यादौ कर्मत्वादिरूपविधेयवाचकविभक्तेस्तु न लक्षणा सम्भवति सुविभक्तित्वादतस्तत्र व्यापकत्वं सम्बन्ध एव, दानकर्मतात्वादिना कर्मत्वादेरनुपस्थितावपि तद्रूपावच्छिन्नव्यापकत्वं कर्मत्वादौ ग्रामादेः सम्बन्धः न तु शुद्धकर्मतात्वावच्छिन्नमतिप्रसङ्गात्। यो यो धूमवान् स वह्निमान् इत्यादौ तु द्विरुक्तयत्पदस्य व्यापकत्वमर्थः, तत्र प्रतियोगित्वेन धूमस्यानुयोगित्वेन वह्नेरन्वय इति प्रलपितमपि तुच्छम्, नामार्थयोर्भेदान्वयायोगात् यत्पदस्य धूमवत्पदसामानाधिकरण्याभावेन सामान्यतया नपुंसकतापत्तेः, यत्र यत्र धूम इत्यादौ आधारत्वरूपार्थानन्वयेन सप्तम्यनुपपत्तेश्च। यो यो धूमवानित्यादौ तु वह्न्यादिपदस्य धूमव्यापकवह्नित्वादिना निरूढलक्षणैव उद्देश्यतावच्छेदकस्य व्यापकताया एव विधेयसंसर्गघटकतया भानस्य प्रामाणिकतया पूर्वोक्तयुक्त्या च तत्र धूमादेरुद्देश्य-

(१) समुदायादेशादिति पु० पा०।

तावच्छेदकताविरहेण तद्व्यापकतायाः संसर्गघटकत्वासम्भवात् ।

प्राञ्चस्तु वीप्सास्थले व्यापकताया न शाब्दबोधः किन्तु द्विरुक्तग्रामादिपदाद् ग्रामत्वादिनोपस्थितेषु सकलग्रामादिषु, द्विरुक्तयत्पदाच्च महानसत्वमहानसान्यत्वादिना उपस्थितेषु, तत्पदेन च तेन तेन रूपेण परामृष्टेषु सकलधूमादिमत्सु विधेयसम्बन्धः शब्दात् प्रतीयते, तावता क्वचिदपि व्याप्याधिकरणे व्यापकाभावशङ्काया अभावात् [1]व्यभिचारज्ञानाभावसहकृतसहचारदर्शनसत्त्वात्, तदुत्तरकालं मानस एव व्यापकताबोधः । सकृदुच्चरितेत्यादिनियमस्य प्रामाणिकत्वेऽगत्या तस्य सङ्कोचः ।

अथ तादृशनियमासत्त्वे द्विरुक्तवैयर्थ्यमिति चेन्न । सकलव्यक्तिपरत्वग्राहकतया तदुपयोगात् यो य इत्यस्य पदद्वयभ्रमेण महानसत्वचत्वरादिरूपधर्मिद्वयमात्रपरत्वभ्रमसम्भवादतिस्फुटत्वाय न्यायातिरिक्तस्थले तत्पदेऽपि वीप्सा दृश्यते एकतत्पदेनापि धर्मिद्वयपरामर्शसम्भवात्तन्मात्रपरत्वे तत्पदान्तरवैयर्थ्यमिति प्रतिसन्धानेन तादृशभ्रमनिवृत्तिसम्भवात्, एकदा यावद्व्यक्तिप्रत्यायनेच्छैव वीप्सापदार्थः, युगपद्व्याप्तुमिच्छा वीप्सा इत्यभियुक्तैर्वारणात्, न तु व्यापकत्वप्रत्यायनेच्छा युगपदित्यस्य वैयर्थ्यापत्तेः । यो यो धूमवानित्यादौ यत्पदार्थव्यापकत्वबोधात् यत्पदं द्विर्वचनानुपपत्तेश्चेत्याहुः । अत्र व्यापकतायाः शाब्दबोधानुपगमे यत्पदेन महानसत्वादिना सकलव्यक्तिषु वह्न्यादिमत्ताबोधेऽपि धूमादिमत्त्वेन तेष्वेव वह्न्याद्यभाववत्त्वशङ्कासम्भवान्न मनसा व्यापकतानिश्चयः सम्भवतीत्यनुपपत्तिः समानविषयकत्वमात्रेण विरोधिताव्यवस्थापनमन्तरेण दुर्वारैवेति चिन्त्यम् ।

साध्यायोगव्यवच्छेदपदेन व्यापकतालाभार्थं व्याचष्टे । अयोग इति । अभावप्रतियोगित्वम् । हेतुमन्निष्ठाभावप्रतियोगित्वम्, विरोध्यर्थकनञा तदधिकरणयोगविरोधिनोऽयोगपदार्थत्वं बोध्यत इत्यभिप्रायः । साध्यस्यायोगान्वयं तन्निष्ठव्यापकत्वलाभाय व्यवच्छेदान्वयितया व्याचष्टे । तथा चेति । व्यवच्छेदेनेति । व्यापकतान्वयी अभेदस्तृतीयार्थः, न्यूनताभङ्गाय साध्यवदन्यावृत्तित्वधीहेतुतायां [2]केवलान्वय्यनुमा-

---

(१) असम्भवात् इति पु० पा० ।

(२) साध्यवदन्यावृत्तित्वधीहेतुनामत इति पु० पा० ।

मानुपपत्तिदोषमपि दर्शयति। न स्याच्चेति । हेतौ साध्यप्रतियोगिकाभावसामानाधिकरण्यरूपव्यभिचारधियः साध्ये हेतुमन्निष्ठाभावप्रतियोगित्वविषयकतया समानविषयकत्वेन विरोधितामते व्यापकताधीविरोधित्वमावश्यकमिति हेतुः साध्यव्यभिचारीत्युद्भावनस्यापि युक्तत्वाद्दोषोऽपीत्यादिमूलासङ्गतिरत आह । एतच्चेति । विरोधस्य । व्यापकताधीप्रतिबन्धकत्वस्य। (१)अतिस्फुटत्वम् । सर्ववादिसिद्धत्वं, अभिसन्धाय न तु हेतुधर्मिकव्यभिचारधियोऽविरोधित्वम् । अत्रैव हेतुमाह। साध्याभावेति। समानविषयत्वेन विरोधितामतमवलम्ब्येति भावः। स्वयं समानप्रकारकधिय एव विरोधित्वोपगमाद् वदन्तीति।

(चि०) अथ पर्वतवृत्तिधूमव्यापको वह्निरिति परामर्शो यदि तदा पर्वतीयधूमं प्रति व्यापकतायाः पर्वतधूमसामानाधिकरण्यनैयत्यात् पर्वतवह्निः परामर्शविषय एवेति किमनुमेयमिति चेत्? तर्हि पर्वतीयधूमे नियतसाध्यसामानाधिकरण्यस्य व्याप्यत्वस्य भानं साध्यसामानाधिकरण्यभाननियतमिति व्याप्यत्वभानेऽपि तुल्यम् । यदि च स्मृता व्याप्तिर्धूमेऽवगम्यते तदा व्यापकत्वेऽपि समानम् । वस्तुतस्तु व्यापकत्वं तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वं न तु धूमसामानाधिकरण्यं, व्याप्यत्वन्तु सामानाधिकरण्यविशेष इति तवैवानुमितिरफला स्यात् । न चैवं परामर्शस्य चाक्षुषत्वं न स्याद्व्यापकस्य विशेष्यस्येन्द्रियासन्निकर्षादिति वाच्यम् । इष्टत्वात्, असन्निकृष्टधूमादाविव मानस एव हि सर्वत्र परामर्शः, चक्षुरन्वयव्यतिरेकानुविधानञ्च पक्षवृत्तिधूमोपनयोपक्षीणम् ।

---

(१) 'विरोधस्य' अव्यापकताधियो व्यापकताधीप्रतिरोधस्य इति पु० पा०।

(दी०) मानस एवेति । प्रायिकत्वाभिप्रायेण, तेन क्वचिच्छब्दादिना क्वचिच्च साध्येन्द्रियसन्निकर्षात् परामर्शेऽपि न क्षतिः, पक्षे साध्यसम्बन्धस्याग्रहात् ग्रहेऽप्यनुमित्सया अनुमितिसम्भवात् ।

(गा०) मूले किमनुमेयमिति सर्व्वत्र वास्तवपक्षीयसाध्यभानमेवानुमानफलमित्यभिमानेन, स्मृता व्याप्तिः पक्षतावच्छेदकविशिष्टे साध्यसम्बन्धमगृहीत्वैव धूमेऽवगम्यते पक्षतावच्छेदकानवच्छिन्नेऽपि पक्षे साध्यसम्बन्धग्रहादनुमानवैफल्ये वैपरीत्यमेव इत्याह । वस्तुतस्त्विति । न तु धूमसामानाधिकरण्यमिति । येन पर्वतीयधूमसामानाधिकरण्यस्य वह्नौ भाने तादृशधूमाधिकरणपक्षसम्बन्धस्य तत्र भानमावश्यकमिति शङ्क्येतेति शेषः । मानस एव परामर्श इति योजना, सर्वत्र हेतुरिति शेषः । अत्र सर्वपदस्यानुमितिसामान्यार्थकत्वेऽसङ्गतिः साध्यविशेष्यकस्यापि परोक्षरूपस्य कदाचिच्चाक्षुषादिरूपस्य च परामर्शस्यानुमितिजनकत्वसम्भवादत आह दीधितौ । प्रायिकत्वाभिप्रायेणेति । इन्द्रियासन्निकृष्टसाध्यकप्रत्यक्षपरामर्शजन्यानुमितिसामान्याभिप्रायेण इत्यर्थः, साध्येन्द्रियसन्निकर्षसत्त्वे प्रत्यक्षतः साध्यसिद्धेः कथं परामर्शेनानुमितिर्जननीयेत्याकाङ्क्षायां तदुपपादकं हेतुमाह । पक्ष इति ।

(चि०) अथ जनकज्ञाने उपसर्ज्जनतया भातस्य पक्षस्य पर्वतादेरनुमितौ प्राधान्येन भानं न स्यात्, न हि जनकज्ञाने उपसर्ज्जनतयाऽवगतं जन्यज्ञाने प्राधान्येन भासते, तथा दर्शनात् । न चानुमितेस्तथात्वमसिद्धम्, पर्वतोऽयं वह्निमानित्यनुमितेर्लोकसिद्धत्वादिति चेन्न । पुरुषस्य दण्ड इति ज्ञानानन्तरं दण्डी पुरुष इति ज्ञानजन्यज्ञानदर्शनात् अन्यथा तत्रापि कथं पक्षविशेष्यकत्वनियमः, न हि कारणीभूतज्ञाने यद् विशेष्यतया भासते तत्कार्यीभूतेऽपि तथा, इह भूतले घ-

टो नास्तीति ज्ञानजन्ये घटाभाववद् भूतलमिति ज्ञाने तत्र च व्यभिचारात् तस्मात् पक्षवृत्तिलिङ्गपरामर्शस्यायं स्वभावो यत्स्वाश्रयविशेष्यिकामनुमितिं जनयति नातथाभूतामेवं ममापि तुल्यमिति।

(दी०) व्यभिचारादिति । नच यत्र यदुभयवैशिष्ट्यावगाहि ज्ञानं कारणं तत्र तदेकतरोपसर्जनस्यान्यतरस्य जन्यज्ञाने प्राधान्येन न भानमिति वाच्यम् । मानाभावात् । अत्र चेदमस्वरसबीजम्, पक्षधर्मसमानाधिकरणाभावप्रतियोगित्वत्वेनाभावज्ञानं वह्न्यादावभ्रान्तमसम्भवि तादृशप्रतियोगित्वप्रतियोगिताकाभावावगाहि चातिप्रसक्तं पक्षधर्मधूमसमानाधिकरणाभावप्रतियोगित्वत्वेन च तज्ज्ञानं न व्यापकं येन रूपेण पक्षधर्मताग्रहः तद्रूपावच्छिन्ने व्यापकताज्ञानं च मीमांसकमतनिरासेनैव निरस्तमिति । स्वर्गकामो यजेतेत्यादावन्वयबोधं शब्दमणिदीधितौ विवेचयिष्यामः ।

(गा०) जनकज्ञान इत्यादिनियमे विशेषणपूरणेन व्यभिचारोद्धारमाशङ्कते । यदुभयेति । यदुभयनिरूपितवैशिष्ट्यविषयतावच्छिन्नस्वजनकताश्रयज्ञाने तयोरेकतरांशे उपसर्जनतया भातस्य तदुभयान्यतरस्य न प्राधान्येन स्वविषयतेत्यर्थः । दण्डी पुरुष इति ज्ञाननिरूपितायां पुरुषे दण्ड इति ज्ञाननिष्ठजनकतायां च दण्डपुरुषोभयवैशिष्ट्यविषयिता नावच्छेदिका अपि तु दण्डदण्डत्ववैशिष्ट्यविषयतैवेति पुरुषे दण्ड इति ज्ञाने दण्डोपसर्जनतया भातस्यापि पुरुषस्य फलीभूत दण्डी पुरुष इति ज्ञाने प्राधान्येन भानेऽपि न क्षतिरिति भावः ।

चैत्रानुयोगिकदण्डवैशिष्ट्यज्ञानत्वेन दण्डविशिष्टचैत्रानुयोगिककुण्डलवैशिष्ट्यज्ञानजनके दण्डिचैत्रे कुण्डलमिति ज्ञानं कुण्डलांशे उपसर्जनतया भातस्य चैत्रस्य फलीभूतज्ञाने प्राधान्येन ज्ञानात् तयोरेकतरांशे इति दण्डानुयोगिकरक्तत्ववैशिष्ट्यज्ञानत्वे-

न रक्तदण्डवान् पुरुष इति विशिष्टवैशिष्ट्यबोधजनके पुरुषे रक्तदण्ड इति ज्ञाने दण्डोपसर्जनतया भातस्य पुरुषस्य फलीभूतज्ञाने प्राधान्येन भानात्तदुभयान्यतरस्येति ।

अथैवमपि व्याप्यविशेष्यकपक्षविशेषणकपरामर्शात्पक्षविशेष्यकानुमितेरुत्पत्त्या व्यभिचारः ।

यदि चानुभवे विवदमानस्तत्र साध्यविशेष्यकानुमितिमेव स्वीकरोति तथाऽपि व्याप्त्यंशे उपसर्जनतया जनकज्ञाने भातसाध्यस्यानुमितौ प्राधान्येन भानाद्व्यभिचारो दुर्वार एव यदि चानुमितेः पक्षविशेष्यकत्वनियमानुभवस्य उक्तनियमस्य चानुरोधात्पक्षविशेष्यक एव परामर्शोऽनुमितिहेतुरुच्यते तदाऽपि यत्र पक्षस्यैव हेतुता तत्र पक्षांशे उपसर्जनतया भातस्य हेतुरूपपक्षस्यानुमितौ प्राधान्येन भानाद्व्यभिचारः । अभावादिपक्षकानुमितौ प्राधान्येन भासमानस्याप्यभावादेर्जनकीभूतव्याप्तिज्ञाने प्रतियोगितांशे उपसर्जनतया भानाच्च व्यभिचारः । एवं च दण्डिचैत्रे दण्ड इति ज्ञाने दण्डांशे प्रकारीभूतस्य चैत्रस्य तज्जन्ये दण्डी चैत्रः कुण्डलीति ज्ञाने प्राधान्येन भानादपि व्यभिचार इति चेत् ? मैवम् । उपसर्जनतयेति सावधारणं तथा च तदेकतरांशे उपसर्जनतया भातस्येत्यस्य तदेकतरविशेष्यतया भातस्येत्यर्थः । विशेष्यत्वं च साक्षात्परंपरासाधारणमतोऽभावादिपक्षकानुमितिजनकपरामर्शेऽभावादिरूपपक्षस्य व्याप्त्यन्तर्गतप्रतियोगिताद्यंशे प्रकारतयैव परंपरया विशेष्यतयाऽपि ज्ञानान्न तद्विशेष्यतयाऽभातत्वरूपहेतुमत्त्वमिति न व्यभिचारः ।

न च परामर्शे तादृशपक्षस्य परम्परया विशेष्यत्वेऽपि कारणीभूतव्याप्तिज्ञाने उपसर्जनतयैव भानात् व्यभिचारस्य दुर्वारता, जनकज्ञानसामान्ये तद्विशेष्यत्वनिवेशे च व्यापकतापरामर्शहेतुतामतेऽपि क्वचित्समूहालम्बनरूपज्ञाने पक्षस्य विशेष्यतया तत्र हेतुमत्त्वदुर्भिक्षमिति वाच्यम् । फलोपधायकज्ञानसामान्ये साक्षाज्जनकयत्किञ्चिज्ज्ञाने वाऽविशेष्यकत्वस्य विवक्षणात् व्याप्यविशेष्यकपरामर्शश्च नानुमितौ हेतुरित्याशयः। पक्षस्य व्यापकतापरामर्शे पक्षतावच्छेदकांशे विशेष्यत्वेऽपि तदुभयेत्यनेन पक्षहेतूभयमुपादाय तदेकतराविशेष्यतया तस्य हेतुमत्त्वं सुघटम् ।

न चैवमपि रक्तो दण्ड इति ज्ञानं विशेषणतयैव भातस्य रक्तत्वस्य तज्जन्ये रक्तदण्डवान् पुरुषः रक्तत्वं प्रमेयमित्यादौ प्राधान्येन भानाद्व्यभिचार इति वाच्यम् । न प्राधान्येन भानमित्यस्य न तज्ज्ञानीयप्रकारतावच्छिन्नत्वे सति तद्विषयत्वमित्यर्थकत्वात् ।

यत्तु यदुभयवैशिष्ट्येति धर्मितावच्छेदकावच्छिन्नविषयतानिरूपितप्रकारतात्वेन यज्जनकतायामवच्छेदिका या स्वनिरूपितविशेष्यताव्यधिकरणप्रकारता तदाश्रयस्तज्जनकताप्रतियोगिकजनतावच्छेदकीभूता या विशेष्यता तदनाश्रय इत्यर्थः । सास्नाभावव्याप्यगोत्वाभाववान् गोत्वाभाव इति ज्ञानजन्ये गोत्वाभावः सास्नाभाववानिति ज्ञाने विशेष्यतया भासमाने गोत्वाभावे गोत्वाभावत्वावच्छिन्नविषयतानिरूपितप्रकारतात्वेन जनकतावच्छेदिका या प्रकारता तदाश्रये व्यभिचारवारणाय स्वनिरूपितविशेष्यताव्यधिकरणत्वं हेतुघटकप्रकारतायां निवेशितम् । वह्निव्याप्यः पर्वत इत्याकारकज्ञानजन्यानुमितिविशेष्ये व्याप्यत्वावच्छिन्नविषयतानिरूपितविषयतात्वेन जनकतावच्छेदिका या प्रकारता तदाश्रये व्यभिचारवारणाय प्रकारतात्वेन जनकतावच्छेदकत्वविवक्षणम् । व्याप्यपक्षविशेष्यकपरामर्शयोरनुगमरक्षार्थं उक्तपरामर्शीयपक्षविषयतायाः प्रकारतात्वेन जनकतावच्छेदकत्वानुपगमात् तथा विवक्षणे तादृशव्यभिचारानवकाशात् गोत्वाभावव्याप्यसास्नाभाववान् गोत्वाभाव इति पक्षविशेष्यकतादृशज्ञानजन्यानुमितिविशेष्ये गोत्वाभावे व्याप्तिविशिष्टसामानाधिकरण्यान्तर्गताधिकरणांशे प्रकारतायाः स्वाधिकरणविषयतानिरूपितप्रकारतात्वेन जनकतावच्छेदिकाया आश्रये व्यभिचारवारणाय धर्मितावच्छेदकावच्छिन्नविषयतानिरूपितत्वनावच्छेदकसाध्यभानस्यानुमित्यनुपयोगितया धर्मितावच्छेदकावच्छिन्नत्वनाधिकरणविषयताया अनुमितिजनकतानवच्छेदकत्वान्न तत्र व्यभिचारः । साध्ये जन्यज्ञानीयविशेष्यतामुपेक्ष्य जन्यतावच्छेदकीभूतविशेष्यतानिवेशात् दण्डी पुरुष इति ज्ञानप्रकारताश्रये दण्डपुरुषे दण्ड इति तज्जन्यज्ञानविशेष्यताश्रये दण्डे न व्यभिचारः । तादृशविशेष्यतायाः दण्डी पुरुष इति विशेषणतावच्छेदकप्रकारकज्ञानजन्यतावच्छेदकत्वाभावादिति । तच्चिन्त्यम् । पर्वतविशेष्य-

कपरामर्शजन्यपक्षीयधूमत्वावच्छिन्नलिङ्गकपर्वतपक्षकानुमितिविशेष्यपर्वते स्वनिरूपितविशेष्यतासमानाधिकरणविशेष्यतावच्छेदकीभूतधूमत्वावच्छिन्नविषयतानिरूपितप्रकारताश्रये व्यभिचारादिति।

अत्र । व्यापकतापरामर्शस्यानुमितिहेतुत्वे । पक्षधर्मेति । पक्षधर्मसमानाधिकरणाभावप्रतियोगित्वत्वावच्छिन्नाभावस्य ज्ञानं पक्षधर्मरासभादिसमानाधिकरणाभावप्रतियोगित्ववति वह्न्यादौ प्रमात्मकं न सम्भवतीत्यर्थः । तथा च तस्यानुमितिहेतुत्वेऽभ्रान्तस्याऽनुमितिः स्यादिति भावः । तादृशप्रतियोगित्वप्रतियोगिकत्वेन धूमादिसमानाधिकरणाभावप्रतियोगित्वत्वावच्छिन्नाभावज्ञानस्य हेतुतायामुक्तदोषाभावात्तत्र दोषान्तरमाह । तादृशेति । अवगाहिनेत्यत्र ज्ञानमित्यनुषञ्जनीयम् । अतिप्रसक्तमिति । व्यभिचारात् साधारणमित्यर्थः । पक्षधर्मधूमसमानाधिकरणाभावप्रतियोगित्वत्वावच्छिन्नप्रतियोगिताकत्वावगाह्यभावज्ञानहेतुतां दूषयति । पक्षधर्मेति । तज्ज्ञानम । अभावावगाहित्वम् । अव्यापकम् । विशुद्धधूमत्वादिरूपहेतुतावच्छेदकावच्छिन्नव्यापकताज्ञानासङ्ग्राहकम् । पक्षधर्मधूमत्वावच्छिन्नव्यापकतात्मकादभावाद् धूमत्वावच्छिन्ननिरूपितव्यापकतात्मकस्य सामान्याभावस्यान्यत्वादिति भावः ।

न च तादृशज्ञानासङ्ग्रहो न दोषाय सर्वत्र पक्षीयधूमादिसमानाधिकरणाभावप्रतियोगित्वत्वावच्छिन्नाभावज्ञानादेवानुमितिरुपगन्तव्येति वाच्यम् । ईदृशव्यापकताया ग्रहे यत्र पर्वतीयधूमस्तत्र वह्निरिति सहचारग्रहस्यापेक्षिततया महानसादौ सहचारदर्शनेनास्यागृहीतत्वेन पक्षीयधूमदर्शनदशायामुपनयासम्भवात् । कथञ्चित् उपनयसम्भवेऽपि पूर्वगृहीतव्यापकताया अनुपयोगितापत्त्या तज्ज्ञानादनुमितिस्वीकारेऽनुभवविरोधात् ।

न च पक्षीयधूमत्वावच्छिन्नव्यापकताज्ञानाद्भवतामपि कचिदनुमित्युत्पत्त्या तद्धेतुत्वे कथमनुभवविरोध इति वाच्यम् । पक्षीयधूमत्वेन पक्षधर्मतावगाहिन एतादृशव्यापकताघटितव्याप्तिविषयकपरामर्शस्य मयाऽनुमितिहेतुत्वोपगमात् । तेन रूपेण पक्षधर्मताज्ञानं विना तादृशव्यापकताज्ञानादनुमितेरनुभवविरुद्धोत्पादत्वात् ।

यत्तु धूमसमानाधिकरणाभावप्रतियोगित्वत्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन पक्षधर्मधूमसमानाधिकरणाभावप्रतियोगित्वत्वेन

तादृशाभावप्रतियोगित्वप्रकारकमभावज्ञानमनुमितिहेतुरिति । तदसत् । यादृशधर्मप्रकारेण प्रतियोगिनोऽभावांशे प्रकारता तादृशस्यैव प्रतियोगित्वावच्छेदकत्वभानं न न्यूनेऽधिके चेत्यनुभवेन पक्षीयत्वघटितधर्मप्रकारेण प्रतियोगिनि भासमाने पक्षीयत्वांशं परित्यज्य प्रतियोगितावच्छेदकत्वस्य विरुद्धत्वात् । न हि नीलो घटो नास्तीत्याद्याकारिका कदाचिदपि घटादिसामान्याभावबुद्धिः । मा वा तादृशं प्रतियोगितावच्छेदकत्वभानमनुभवोऽविरौत्सीत् । तथाप्युक्तज्ञानस्य तादृशज्ञानत्वरूपेणानुमितिहेतुत्वे धूमसमानाधिकरणाभावाद्यंशस्य सम्बन्धविधया विषयतायाः प्रकारत्वेन विषयतायाश्चावच्छेदकतयाऽनुप्रवेशाद्गौरवम् । व्याप्यवत्ताधीहेतुतामते च प्रतियोगितासम्बन्धेन धूमसमानाधिकरणाभावप्रतियोगित्वत्वावच्छिन्नप्रकारकस्यैव लघोरवच्छेदकत्वात् ।

न चोभयत्वाद्यवच्छिन्नप्रतियोगिताकत्वं सम्बन्धविधया धूमसमानाधिकरणाभावप्रतियोगित्वत्वं च प्रतियोगित्वांशे प्रकारतयाऽवगाहमानां बुद्धिं वारयितुं व्याप्यपरामर्शहेतुतावादिनाऽपि धूमसमानाधिकरणाभावप्रतियोगित्वत्वावच्छिन्नप्रतियोगितासंसर्गकत्वपर्यन्तं निवेश्यमिति क्व लाघवमिति वाच्यम् । प्रतियोगिप्रकारतावच्छेदकधर्मावच्छिन्नत्वोपरागेणैव प्रतियोगितायाः संसर्गत्वोपगमेनोक्तज्ञानस्यैवासिद्धेः ।

अथ व्यापकताधीहेतुतामतेऽपि प्रतियोगितासंसर्गकत्वमात्रं निवेश्यम्, शुद्धप्रतियोगित्वत्वावच्छिन्नप्रतियोगिताकत्वसंसर्गकज्ञानादनुमितिरिष्यत एव, उभयत्वाद्यवच्छिन्नप्रतियोगिताकत्वसम्बन्धेन पक्षीयधूमसमानाधिकरणाभावप्रतियोगित्वत्वावच्छिन्नप्रकारकं ज्ञानं तेनापि नेष्यते प्रतियोगिनि प्रकारीभूतो यादृशो धर्मस्तदवच्छिन्नत्वतद्घटकधर्मावच्छिन्नत्वान्यतररूपेणैव प्रतियोगितायाः संसर्गतोपगमात् इति चेत् ? माभूदेवं गौरवम्, तथाऽपि किञ्चिदंशपरित्यागेन प्रतियोगिप्रकारीभूतधर्मे प्रतियोगितावच्छेदकत्वपर्याप्त्यवगाहनोपगमे बाधादिबुद्धेः प्रतिबन्धकतायां गौरवेण तस्य हेतुतया उक्तपरामर्शहेतुत्वासम्भवस्तथा हि घटत्वाद्यवच्छिन्नविशिष्टबुद्धिं प्रति घटादिसामान्याभावज्ञानस्य तादृशज्ञानत्वेन न प्रतिबन्धकता घटादिसामान्याभावत्वेनाऽभावान्तरावगाहि-

प्रमासंग्रहात् । नाऽपि प्रतियोगितासम्बन्धेनाभावांशे शुद्धघटत्वाद्यवच्छिन्नप्रकारकज्ञानत्वेन शुद्धघटत्वाद्यवच्छिन्नप्रतियोगिताकत्वसंसर्गकनीलघटत्वाद्यवच्छिन्नप्रकारकभवन्मतसिद्धज्ञानासङ्ग्रहान्नापि शुद्धघटत्वाद्यवच्छिन्नप्रतियोगितासंसर्गेण प्रतियोगिप्रकारकाभावज्ञानत्वेन, शुद्धघटत्वाद्यवच्छिन्नतया तदनवच्छिन्नप्रतियोगित्वावगाहिभ्रमासङ्ग्रहात । किन्तु संसर्गघटकतया घटत्वाद्यंशे प्रतियोगित्वावच्छेदकत्वपर्याप्त्यवगाहिज्ञानत्वेनैव अस्मन्मते च प्रतियोगितासंसर्गकघटत्वादिपर्याप्तप्रकारतावच्छेदकताकज्ञानत्वेन स्वरूपसत्पर्याप्तिनिवेशापेक्षया च पर्याप्त्यवगाहितानिवेशमतेऽनेकविषयतानिवेशाधिक्याद्गौरवमिति सर्वत्र पक्षीयत्वविशिष्टतत्तद्धेतुनिरूपितव्यापकतापरामर्शादेवानुमितिः, तादृशव्यापकतायाः प्रागग्रहेऽपि तद्घटकप्रत्येकपदार्थज्ञानाद्विशिष्टविषयकोपनीतभानात्मकस्तद्विषयकपरामर्शः सुघटः । धूमादिसामान्यव्यापकताग्रहः पक्षीयधूमाद्यव्यापकत्वशङ्कानिरासद्वारा उक्तपरामर्शे उपयुज्यत इति तु समीचीनतया प्रतिभाति ।

ननूक्तव्यापकताज्ञानवत् स्वर्गकामो यजेतेत्यादिविधिवाक्यजन्यस्वर्गजनकताघटकव्यापकताबोधोऽपि वितर्कग्रस्त इति भवतामपि का गतिस्तथा हि तत्र स्वर्गव्यापकत्वं स्वर्गसमानाधिकरणाभावप्रतियोगित्वत्वावच्छिन्नाभावः तदा यागत्वावच्छिन्ने तद्बाधो गङ्गास्नानादिजन्यस्वर्गस्य यागव्यभिचारात् । नापि स्वर्गसमानाधिकरणाभावप्रतियोगित्वप्रतियोगिकोऽभावः अतिप्रसक्तस्य द्वित्वाद्यवच्छिन्नतदभावस्यापि तथात्वात् । नापि विजातीयस्वर्गसमानाधिकरणाभावप्रतियोगित्वत्वावच्छिन्नाऽभावः । कार्यकारणभावे गृहीत एव तदन्यथाऽनुपपत्त्या कार्यतावच्छेदकजातिकल्पनात् प्रथमं मानाभावेन तादृशजात्यनुपस्थित्या तद्घटितरूपावच्छिन्नाभावस्य विधिना बोधयितुमशक्यत्वादित्यत आह । स्वर्गेति । अयम्भावः, स्वावच्छेदकक्षणाव्यवहितोत्तरक्षणावच्छिन्नत्वस्वानुयोग्यनुयोगिकत्वोभयसम्बन्धेन तद्रूपावच्छिन्नाभावाधिकरणताविशिष्टस्वक्षणावच्छिन्नाधिकरणतानिरूपकतानवच्छेदकतद्रूपावच्छिन्ननिष्ठाऽन्यथासिद्धिनिरूपकतानवच्छेदकधर्मवत्कत्वमेव तद्रूपावच्छिन्नस्य तज्जनकत्वं ईदृशं तु यागत्वाद्यवच्छिन्नं स्वर्गादिजनकत्वं

जन्यतावच्छेदकजातेर्विशिष्यापरिचयेऽपि सुग्रहम्, केवलान्वयिनीश्वरज्ञानादावेतादृशकारणत्वासम्भवेऽपि न क्षतिः। प्रवृत्त्युपयोगिकारणताया एव निरुक्तरूपत्वात्।

अथ वा स्वरूपसम्बन्धविशेष एव कारणत्वं नत्वनन्यथासिद्धनियतपूर्ववर्त्तित्वम्, अन्यथासिद्ध्यभावकूटस्य दुर्ज्ञेयत्वात्। एवं च प्रमाणान्तरावेद्यजातिविशेषस्य यागादिनिष्ठजनकतावच्छेदकघटितस्य निरुक्तरूपस्य दुर्ग्रहत्वेऽपि न क्षतिरिति दिक्।

(चि०) एवं लिङ्गपरामर्शः कारणं न तु परामृश्यमाणं लिङ्गम्। अथ परामर्शमात्रं न हेतुरपि तु लिङ्गपरामर्शः। तथा च लिङ्गमपि हेतुः विशिष्टकारणताग्राहकमानेन बाधकं विना विशेषणस्यापि हेतुत्वग्रहात्। न च लिङ्गं परामर्शपरिचायकत्वेनान्यथासिद्धम्, परिचये विशेषणान्तराभावेन लिङ्गमेव विशेषकं तथा चानन्यथासिद्धत्वात् तदपि हेतुः अन्यथा परिचायकतया संयोगेनान्यथासिद्धमिन्द्रियमपि कारणं न स्यात्। अपि च धूमवान् वह्निमानिति धूमसमानकालवह्निविषया धूमविशेषणिकाऽनुमितिः ज्ञायमानविशेषणजन्या विशेषणसमानकालतया विशेष्यविषयेऽशाब्दविशिष्टभानत्वात् दण्डी पुरुष इति विशिष्टप्रत्ययवत्। अत एव ज्ञायमानविशेषणजन्यत्वेन विशेषणकालवृत्तितया विशेष्यभानं नैयत्यं यथा दण्डी पुरुष इति प्रत्यक्षे तेन धूमसमानकालीनवह्निसिद्धिः। अन्यथा तत्तद्धूमकालवृत्तिवह्न्यनुमानं न स्यात् समयविशेषमन्तर्भाव्य व्याप्त्यग्रहात्। किं च लिङ्गकरणत्वपक्षे परामर्श एव तद्व्यापारः परामर्शस्य तु न व्यापारान्तरमस्ति चरमकारणत्वा-

दिति न तत् करणम् ।

(दी०) परिचायकत्वं परिचेयव्यावर्त्तकत्वं तच्च नोपलक्षणतयेत्याह । परिचेय इति । विशेषणतया तत्त्वे पुनराह । तथा चेति । अवच्छेदकतामात्रेण चान्यथासिद्धावाह । अन्यथासिद्धावाह । अन्यथेति । अपि चेत्यादि । या यद्विशेषणसमानकालीनत्वेन तादृशी बुद्धिः सा ज्ञायमानतद्विशेषणजन्येति सामान्यव्याप्तौ पक्षधर्मतासम्पत्तये धूमविशेषणिकेत्यादि । तादृप्यस्यानुभविकत्वप्रदर्शनाय धूमवानित्यादि । ज्ञायमानेति च तज्ज्ञानस्यापि जनकत्वलाभाय । साध्यविशिष्टानुमितेः साध्याजन्यत्वात् विशेषणसमानकालतयेति । धूमकालीनवह्निमान् धूमध्वंसादित्यनुमितेर्धूमाजन्यत्वाद्विशेष्येति । विशेष्ये विशेषणभावापन्नं यत्समानकालीनत्वेन धर्मान्तरवैशिष्ट्यावगाहीत्यर्थः ।

(गा०) उपलक्षणस्यैव परिचायकत्वेन प्रसिद्धतया परिचायकत्वाप्रतिक्षेपेण लिङ्गमेव विशेषणमिति विशेषणत्वोपगमो मूलेऽसङ्गतः ।

न च परिचायकत्वप्रतिक्षेपक एवायं ग्रन्थः । अग्रिमस्येन्द्रियसंयोगपरिचायकत्वाभिधानस्याऽसङ्गतेः, अत एवोपलक्षणविशेषणसाधारणपरिचायकत्वपरतां प्रकृते दर्शयति । परिचायकत्वमिति । परिचायकत्वमन्यथासिद्धिप्रयोजकत्वेनाभिहितमिति तन्निराकरणमाकाङ्क्षितमिति परिचेय इत्यादेरुपलक्षणतया परिचायकत्वनिराकरणपरतामाह । तत्त्वेति ।

विशेषणमपि परिचायकत्वेनान्यथासिद्धमेवेत्याशङ्कायां अन्यथासिद्धिप्रयोजकं उपलक्षणतया परिचायकत्वमेवेति भावं स्फुटीकर्तुं तथा चेति मूलमवतारयति । विशेषणतयेति । तत्त्वे । परिचायकत्वे । अवच्छेदकतयाऽन्यथासिद्धिरुपलक्षणतयेव विशेषणतयाऽपि परिचायकस्याविशिष्टेत्याशङ्कायामन्यथेत्यादिप्रतीकमवतारयति । अवच्छेदकतेति । मात्रपदेन विशेषणत्वस्याप्रयोजकत्व-

मुक्तम् । ज्ञायमानलिङ्गजन्यत्वसाध्यकानुमाने विशेषणजन्यत्वेन सामान्यतः साध्यत्वे पक्षतावच्छेदकादिजन्यतयाऽर्थान्तरम् । अनुमितौ च व्यभिचारवारकान्यहेतुविशेषणानां च वैयर्थ्ये सर्वत्रैवानुमितौ किञ्चिद्विशेषणजन्यत्वेन साध्यसत्त्वात् धूमजन्यत्वत्वेन साध्यत्वे दृष्टान्ताभिधानविरोध इत्यतः सामान्यव्याप्त्या पक्षधर्मताबलात् धूमजन्यत्वसिद्धिरिति प्रदर्शयन् पदप्रयोजनान्याह । या यदिति । समानकालीनतयेति । विषयतारूपवैशिष्ट्यं तृतीयार्थः, तस्य च बुद्धावन्वयः । तादृशी । अशाब्दी । पक्षधर्मतासम्पत्तये । धूमजन्यत्वसिद्ध्यौपयिकविशेषणीभवद्धूमकालीनत्वावगाहित्वघटितहेतोः पक्षवृत्तित्वलाभाय । अनुमितौ धूमस्याविशेषणत्वे तत्कालीनतया वह्न्याद्यवभाने च तत्र तादृशहेतुसत्त्वानिर्वाहादिति भावः । धूमविशेषणिकेत्यादीति । आदिपदाद् धूमसमानकालवह्निविषयेत्यस्य परिग्रहः । एवञ्च धूमविशेषणिकेत्यस्य यथाहेतुव्याख्यानं विशेष्ये धूमविशेषणिकेत्यर्थकत्वमवसेयम् । तादृप्यस्य । यथाव्याख्येयधूमविशेषणकत्वस्य । आनुभविकत्वप्रदर्शनार्थेति । अन्यथा तत्र प्रमाणानुयोगानिवृत्तेरिति भावः ।

धूमवानित्यादीति । धूमवान् वह्निमान् इत्याकारकज्ञानमित्यर्थः ।

ननु साध्ये विशेषणस्य ज्ञायमानत्वकथनम् न तेन रूपेण जनकतासिद्धये प्रत्यक्षविशिष्टवैशिष्ट्यबुद्धौ विशेष्यतावच्छेदकस्य विषयविधयैव हेतुत्वस्य सर्वमतसिद्धतया ज्ञायमानत्वेन हेतुताया असिद्ध्या दृष्टान्तविरोधेन तद्रूपावच्छिन्नजन्यत्वस्य साध्यत्वासम्भवादिति तद्वैयर्थ्यमित्यत आह । ज्ञायमानेतीति । तज्ज्ञानस्य । लिङ्गज्ञानस्य । जनकत्वलाभाय । जनकत्वे एतदनुमतत्वलाभाय, न तु तद्विशिष्टजन्यत्वस्य सिद्ध्या तस्य जनकत्वसिद्धौ इत्यर्थस्तत्राविवादात् । साध्यविशिष्टानुमितेरिति ।

यद्यपि यद्विशेषणकत्वमात्रस्याशाब्दबुद्धिविशेषणत्वे पक्षतावच्छेदकादिविशिष्टविषयकानुमितिः पक्षतावच्छेदकाद्यजन्यतयाऽपि व्यभिचारः प्रसज्ज्यते तथाऽप्युद्देश्यतावच्छेदकविशिष्टे यद्विशेष्यकेत्युक्तौ न तथा व्यभिचार इति साध्यमात्रोपादानम् । धूमेति । धूमस्यातीततयाऽनुमित्यजनकत्वं सूचयितुं धूमध्वंसस्य हेतुत्वानुसरणम् ।

विशेष्यविषयकत्वस्य बुद्धिविशेषणत्वेऽपि दर्शितव्यभिचारस्य दुर्वारतया विशेष्यविषये यद्विशेषणं तत्समानकालतयेति योजनामादृत्य व्याचष्टे । विशेष्य इति । मुख्यविशेष्यतानिरूपितविशेषणतयाऽवच्छिन्ना या विशेषणान्तरांशे भासमानसमानकालीनत्वविषयतानिरूपिता यदीयविशेषणता तत्प्रतियोगीत्यर्थः । धूमवान् पर्वतो वह्निमानित्याद्यनुमितौ वन्ह्यंशे भासमानसमानकालीनत्वसम्बन्धेन विधेयांशे विलक्षणप्रकारत्वमेवासिद्धमिति कथं तस्य प्रतियोगितया हेतुभानं धर्मिपारतन्त्र्येणैव न तु स्वातन्त्र्येण धूमसमानकालीनवह्निमानित्याकारकतापत्तेः । तत्पारतन्त्र्येण भानं च तन्निष्ठविशेष्यतानिरूपितविशेषणतावच्छिन्नं विशेषणत्वमिति । तादृशानुमितेर्यत्पदोपादेयधूमघटितहेतुमत्त्वमव्याहतम् ।

यत्तु एकधर्मिपारतन्त्र्येणाऽन्यांशे विशेषणत्वं तद्धर्मिनिरूपितविशेषणत्वाभिन्नविशेषणत्वमेव, तथा चावच्छिन्नत्वस्थलेऽभेद एव निवेशनीय इति, तदसत् ।

तथा सति तुल्ययुक्त्या विशिष्टप्रतियोगिकवैशिष्ट्यबुद्धावपि विशेषणपारतंत्र्येण विशेष्यांशे परंपरासम्बन्धेन विशेषणतावच्छेदकभानस्य विशेषणनिरूपितविशेषणत्वाभिन्नविशेष्यतानिरूपितविशेषणत्वात्मकतया पर्वतो धूमकालीनवह्निमान् धूमध्वंसादित्यादिस्थलीयधूमाजन्यानुमितेः पर्वतनिरूपितप्रकारत्वाभिन्नसमानकालीनत्वविषयतानिरूपितधूमनिष्ठप्रकारताप्रतियोगित्वेन व्यभिचारस्य दुर्वारत्वापत्तेः । अस्मन्मते च तत्र मुख्यविशेष्यांशे या धूमीयप्रकारता सा विशेषणांशे धूमीयप्रकारतयाऽवच्छिन्ना न तु वैपरीत्यमिति व्यभिचारानवकाशः ।

(दी०) तदानीं धूमवान् धूमकालीनवह्निमान् धूमध्वंसादित्यादौ च विशेषणे विशेषणतापन्नस्य धूमस्य समानकालत्वं वह्नौ भासते न तु विशेष्ये तथात्वापन्नस्य, अनुभवसिद्धो ह्ययं विशिष्टबुद्धीनां विशेषणताविशेषः, विशेषणं धर्मितावच्छेदकं विशेष्यं च विधेयम् । तथा च विधेयतावच्छेदकावच्छिन्नं यद्धर्मिविशिष्टे तत्समानकालीनत्वेनावगाहते या अशाब्दी बुद्धिः

सा तद्धर्मजन्येति पर्यवसितोऽर्थः । धूमकालीनवह्निमानित्यादौ च विधेयतावच्छेदकधूमकालीनवह्नित्वावच्छिन्नं न धूमकालीनत्वेन भासते परं तु वह्नित्वावच्छिन्नम् । धूमवानयं धूमकालीनवह्निमान् पर्वतो वह्निमानालोकादित्यादौ च न धूमवत्त्वविशिष्टधूमकालीनवह्निमत्त्वं भासते किं तु तादृशविशिष्टपक्षतावच्छेदकवति वह्निमत्त्वं सम्बन्धमर्यादया यत्समानकालीनत्वमवगाहते इत्यपि वदन्ति ।

(गा०) मुख्यविशेष्यांशे या विशेषणता तत्सामानाधिकरण्यमुपेक्ष्य तदवच्छिन्नत्वनिवेशनस्य मुख्यविशेष्यतानिवेशनस्य च प्रयोजनमाह । तदानीमिति । धूमस्य मुख्यविशेष्यांशे विशेषणतामाविष्कर्तुं धूमवानित्यन्तं पक्षविशेषणम् । वर्तमानवैशिष्ट्यस्य मतुपा प्रायशो बोधनात्तदानीमित्यनुक्तौ धूमस्यानुमितिसमये विद्यमानतालाभसंभवात्तस्य तत्र जनकत्वमपि संभाव्येतेति तदुक्तिः । विशेषण इति । वह्निविषयतानिरूपितसमानकालीनत्वसंसर्गावच्छिन्ना धूमविशेषणता विशेषणीभूतकालनिरूपितविशेषणतावच्छिन्नैव न तु मुख्यविशेष्यतानिरूपितविशेषणतावच्छिन्नेत्यर्थः । इदं च विशेषणविशेषणघटितपरंपरासम्बन्धेन तद्विशेष्यांशे विशेषणत्वमित्याशयेनोक्तम् । ननु पर्वतविशेषणतापन्नस्य धूमस्य कालीनत्वसम्बन्धेन विधेयांशे विलक्षणप्रकारत्वमेवासिद्धमिति कथं तस्य हेतुघटकत्वमित्यत आह । अनुभवेति ।

अयमाशयः एकत्र द्वयमितिरीत्या दण्डकुंडलवैशिष्ट्यावगाहिज्ञानविलक्षणे तयोरेकविशिष्टेऽपरवैशिष्ट्यज्ञाने विशेष्यतावच्छेदकधर्माधिकरणतावन्निष्ठतदवच्छेदककालावच्छिन्नाधिकरणताकत्वं विधेये भासते । अत एवासमानकालीनयोरेकविशिष्टेऽपरवैशिष्ट्यज्ञानस्य भ्रमत्वम् निरुक्तरूपमेव च समानकालीनत्वमित्युच्यते यथाश्रुतस्य धर्म्येतर एव समानकाले वर्त्तमानयोरतिप्रसक्ततया तादृशयोस्तथाविधज्ञाने भ्रमत्वानिर्वाहकत्वात् निरुक्तसमानकालीनत्वभानोपगमे च तद्रूपविशिष्टविधेयवैशिष्ट्यस्य च धर्म्यन्तरे एव स-

त्वेनान्यधर्मिकज्ञानस्य तदवगाहित्वेन भ्रमत्वोपपत्तेः । समानकालीनत्वस्य नियतोपस्थितिविरहेण संसर्गतयैव भानमुपेयम् । अनुपस्थितस्य विशेषणत्वायोगात् एवं च दण्डी कुण्डलीत्यादिविशिष्टवैशिष्ट्यबोधस्य दण्डकालीनकुण्डलीत्याकारकतावारणाय प्रकारताविलक्षण्यमावश्यकम् । यदि च लाघवाद्विशिष्टवैशिष्ट्यबोधे विशेष्यतावच्छेदकाधिकरणकालावच्छिन्नाधिकरणतैव विधेयस्य सम्बन्ध इत्युच्यते तदा तदनुसारेणान्यथैव हेतुर्निर्वाच्य इति पक्षतावच्छेदकसाध्ययोः सामानाधिकरण्यमात्रमनुमितिविषयः न त्वेकविशिष्टऽपरवैशिष्ट्यमिति प्राचीनमतानुसारेण पक्षतावच्छेदकावच्छिन्नाधिकरणत्वमेतद्विशिष्टानुयोगिकवैशिष्ट्यं भासते न तु निरुक्तरूपामत्यभिप्रायेणैवेदमनुमानं नातः पक्षतावच्छेदकमादाय क्वापि व्यभिचार इत्यग्रे व्यक्तीभविष्यति ।

विशेष्याविषय इत्यस्य व्यत्यासमसहमानः प्रकारान्तरेण हेतुमुपक्रमते । विशेषणमिति । धर्मितावच्छेदकम् । स्वधर्मितावच्छेदकम् । विधेयम् । विधेयतावच्छेदकावच्छिन्नम् । विशेष्याविषय इति सप्तम्याश्च बुद्ध्यन्वयिविषयित्वार्थकतया विधेयतावच्छेदकावच्छिन्नं स्वधर्मितावच्छेदकयद्धर्मसमानकालीनतयाऽवगाहते या बुद्धिरित्यर्थो लभ्यते तत्र च धूमकालीनवह्निमान् पर्वतो वह्निमान् धूमध्वंसादित्यादौ व्यभिचारवारणायोपात्तं स्वधर्मितावच्छेदकत्वं धर्मविशेषणमव्यावर्तकं धूमादर्शनान्तर एव तस्य वह्नित्वावच्छिन्नधर्मितावच्छेदकत्वात् स्वनिरूपिततज्ज्ञानीयधर्मितावच्छेदकतानिवेशेऽपि तत्रैव धूमस्याधिकस्य पक्षतावच्छेदकप्रवेशेन व्यभिचारो दर्शयिष्यत इति स्वसमानकालीनतया विधेयतावच्छेदकावच्छिन्नभानांशे धर्मितावच्छेदकत्वं निवेशयति । तथा चेति । यद्धर्मविशिष्टे यद्धर्मं धर्मितावच्छेदकीकृत्य तत्समानकालीनत्वेन विधेयतावच्छेदकावच्छिन्नमवगाहते विधेयतावच्छेदकतापर्याप्त्यधिकरणं यद्रूपं यत्समानकालीनत्वधर्मितावच्छेदकतापन्नं तद्रूपावच्छिन्नावगाहिनी या बुद्धिरित्यर्थः । विधेयतावच्छेदकतापर्याप्त्यधिकरणे समानकालीनत्वधर्मितावच्छेदकतापन्नत्वपर्यन्तानिवेशप्रयोजनमाह । धूमकालीनेति । धूमं धर्मितावच्छेदकीकृत्य साध्यतावच्छेदकधूमकालीनत्वेन विधेयमवगाहमानायामपि धूमवानयं धूमकालीनवह्निमानित्यस्य-

लिङ्गकानुमितौ विधेयतावच्छेदकतापर्याप्त्यधिकरणधूमकालीनत्वसहितं वह्नित्वं न धूमकालीनत्वधर्मितावच्छेदकतया भासते अपि तु शुद्धवह्नित्वमेवेति न तत्र व्यभिचार इत्यर्थः ।

यद्यपि शुद्धवह्नित्वमप्यनुमित्यन्तरस्य समूहालंबनरूपधूमविशिष्टपक्षकशुद्धवह्नित्वावच्छिन्नधूमकालीनवह्नित्वावच्छिन्नोभयसाध्यकप्रकृतानुमितेश्च विधेयताया अवच्छेदकत्वपर्याप्त्याधिकरणं भवतीति व्यभिचारो दुर्वारः ।

अथ तत्कालीनत्वधर्मितावच्छेदकतापन्नपर्याप्तविधेयतावच्छेदकताकत्वनिवेशात् नायं व्यभिचारः समूहालम्बनानुमितौ धूमकालीनत्वधर्मितावच्छेदकत्वेन विधेयान्तरावच्छेदकत्वेन च शुद्धवह्नित्वस्य भाने ऽपि धूमकालीनत्वधर्मितावच्छेदकतानापन्नस्यैव तस्य विधेयत्वान्तरावच्छेदकत्वादिति चेत्?एवं सति यद्धर्मविशिष्ट इत्यस्य वैयर्थ्यं वक्ष्यमाणधूमकालीनवह्न्यवच्छिन्नपक्षकानुमितौ उद्देश्यतावच्छेदकमध्य एव धूमकालीनत्वधर्मितावच्छेदकतया वह्नित्वभानात् विधेयतावच्छेदकतया तस्मिन् भासमाने तदवच्छिन्ने समानकालीनत्वाभानेन तादृशविषयत्वस्येतरधर्मितावच्छेदकतानवच्छिन्न एव तत्र पर्याप्तिर्व्यभिचाराप्रसक्तेः ।

यत्तु विधेयत्वसमानकालीनत्वधर्मितावच्छेदकतापन्नतदवच्छेदकावच्छिन्नविषयतयोरेकविषयतानिरूपितत्वनिवेशान्नोक्तसमूहालम्बनानुमितौ व्यभिचारः । तत्र शुद्धवह्नित्वावच्छिन्नविधेयत्वधूमसमानकालीनत्वधर्मितावच्छेदकतापन्नवह्नित्वावच्छिन्नविधेयत्वनिरूपकधर्मिविषयत्वयोः परस्परपरिहारेण प्रत्येकसाध्यकानुमितिसम्बन्धयोर्भेदादिति । तदपि न साधु । धूमवान् धूमकालीनवह्निमान्पर्वतो वह्निमानिति वक्ष्यमाणानुमितावपि धूमसमानकालीनत्वधर्मितावच्छेदकतापन्नवह्नित्वावच्छिन्नविषयतानिरूपकशुद्धपर्वतत्वावच्छिन्नधर्मिविषयतातो विशेषणद्वयविशिष्टपर्वतत्वावच्छिन्नाया विधेयतानिरूपकधर्मिविषयताया भेदेन यद्विशिष्ट इत्यस्य वैयर्थ्यापरिहारात्तथापि स्वानिरूपकज्ञानानिरूपितविधेयतावच्छेदकतापर्याप्त्याधिकरणं यद्रूपं समानकालीनत्वधर्मितावच्छेदकतापन्नतदवच्छिन्नविषयतानिवेशान्नोक्तो व्यभिचारो न वा यद्विशिष्ट इत्यस्य वैयर्थ्यं समूहालम्बनरूपोक्तानुमितौ समानकालीनत्वधर्मितावच्छेदकतापन्नं

यद्वह्नित्वं यादृशविषयतायामवच्छेदकं तादृशविषयत्वानिरूपकशुद्धवह्नित्वावच्छिन्नमात्रसाध्यकानुमितिनिरूपितविधेयताया एवावच्छेदकत्वपर्याप्तिस्तत्र न तु स्वनिरूपकज्ञानमात्रीयविधेयताया इति निरुक्तहेतुत्वसत्त्वात् धूमतत्समानकालीनवह्निधर्मितावच्छेदकतापन्नपर्वतत्वावच्छिन्नपक्षकशुद्धवह्नित्वावच्छिन्नविधेयताकानुमितौ च शुद्धवह्नित्वावच्छिन्नविधेयतायाः स्वनिरूपितोद्देश्यतावच्छेदकतारूपधूमकालीनत्वावच्छिन्नवह्निविषयतानिरूपकमात्रनिरूपितत्वेन हेतुसत्त्वात्।

यद्विशिष्ट इत्यस्य प्रयोजनमाह। धूमवानयमिति। अत्र च धूमधूमकालीनवह्न्योः परस्परविशेषणविशेष्यतावच्छेदकभावानापन्नयोर्विधेयधर्मितावच्छेदकत्वमिति सूचयितुं मध्येऽप्ययमिति विशेष्यवाचकपदनिर्देशः। विशिष्टपक्षतावच्छेदकवतीति। तदुभयधर्मितावच्छेदकतापन्नपर्वतत्वावच्छिन्न इत्यर्थः। वह्निमत्त्वमिति। भासत इत्यनुपज्यते। एकधर्मावच्छिन्नविशेषणतापन्नयोर्विधेयधर्मितावच्छेदकयोरेव तथात्वं न तु क्वापि विशेषणविशेष्यतावच्छेदकभावापन्नयोरिति हृदयम्।

अथ स्नेहगंधविशिष्टस्य द्रव्यत्वस्य यत्र पक्षतावच्छेदकता तत्राश्रयासिद्धेर्दोषत्वानुरोधेनान्यतरविशिष्टद्रव्यत्वस्यान्यतरधर्मितावच्छेदकत्वमावश्यकम्, अन्यथा शुद्धद्रव्यत्वावच्छेदेनान्यतराभावस्याप्रसिद्ध्या तत्सामानाधिकरण्येनान्यतराभावस्याविरोधितया तत्र दोष एव दुलभः स्यादिति एकधर्मावच्छिन्नविशेषणतापन्नस्य विधेयधर्मितावच्छेदकत्वे एव विशेषणधर्मितावच्छेदकभाव इति नियमासम्भव इति चेत्? तादृशनियमाभावेऽपि तादृशधर्मद्वये धर्मितावच्छेदकविशेषणभावस्याप्यनियमात् यत्रातथाभूतयोरेव गंधस्नेहयोः द्रव्यत्वावच्छिन्नविशेषणविशेषणतया पक्षतावच्छेदके प्रवेशस्तत्रासिद्धेर्दुर्घटतयाऽनुभवानुरोधेन उभयत्वाप्रकारकमपि द्रव्यत्वं धर्मितावच्छेदकीकृत्य एकत्र द्वयमिति न्यायेन गंधस्नेहप्रकारकं ज्ञानं प्रति उभयाभावप्रकारकज्ञानस्य विरोधित्वमुपगम्य द्रव्यत्वावच्छेदेन तदुभयाभाववत्त्वस्यैव तत्र दोषत्वमुपपाद्यमित्युक्तनियमेऽपि सामंजस्यात्।

न चैवमपि यत्र पर्वतत्वस्यैव धूमस्यैव धूमसमानकालीनवह्निधर्मितावच्छेदकतापन्नस्य शुद्धवह्नित्वावच्छिन्नसाध्यकान्यलिङ्ग-

कानुमितौ पक्षतावच्छेदकता धूमाजन्यायां तत्र निरुक्तहेतुसत्त्वेन व्यभिचारो दुर्वार एवेति वाच्यम्। यद्धर्मविशिष्ट इत्यस्य किञ्चिद्धर्मावच्छिन्नविशेषणतापन्नयद्धर्मविशिष्ट इत्यर्थकतोपगमात्।

विशेषणसमानकालतया विशेष्यविषयकत्वं समानकालीनत्वसम्बन्धेन यद्विशेषणविशिष्टविषयकत्वरूपं विवक्षितं धूमकालीनवह्नित्वावच्छिन्नस्य यत्र साध्यता पक्षतावच्छेदकतावत् तत्र समानकालीनत्वं प्रकारो न तु संसर्गः अगत्या तल्लिङ्गकानुमितावेव तत्समानकालीनत्वस्य साध्यांशे संसर्गतोपगमात् अन्यत्र तत्संसर्गतायाः अप्रामाणिकत्वादिति केचिदाहुस्तन्मतमुपन्यस्यति। संसर्गेति। अन्यत्र समानकालीनत्वस्य न संसर्गतेत्यत्र विवादादस्वरसः उक्तकल्पे पर्वतत्वावच्छिन्नविशेषणतापन्नधूमस्य धूमसमानकालीनवह्निधर्मितावच्छेदकतापन्नस्य यत्र पक्षतावच्छेदकघटकता तत्र व्यभिचारो दुर्वारः। सुन्दरनीलपर्वतो वह्निमानित्यादौ नीलादेः सौंदर्यादिधर्मितावच्छेदकताया आनुभविकत्वेन उक्तनियमासिद्धेः। भवतु वा तथाविधज्ञानान्तरे नीलसौंदर्यादेर्विशेषणविशेष्यतावच्छेदकभावामापन्नस्यैव पर्वतत्वाद्यवच्छिन्ने प्रकारता तादृशवाक्यजन्यशाब्दबोधे तु प्रथमकर्मधारयलभ्यनीलपदार्थविशिष्टपर्वतादौ सुन्दरपदार्थस्य कर्मधारयान्तरबलादन्वये नीलादेः सुन्दरादिपदार्थधर्मितावच्छेदकतापन्नस्यैव विधेयधर्मितावच्छेदकतया भानान्न तादृशनियमः।

न चानुमितावेव किञ्चिद्विशिष्टविशेषणतापन्नैकोद्देश्यतावच्छेदकस्यापरोद्देश्यतावच्छेदकधर्मितानवच्छेदकत्वनियम इति वाच्यम्। व्याप्यवत्तापरामर्शे हेतुधर्मितावच्छेदकतया पक्षतावच्छेदकस्य यादृशं भानमनुमितावपि तस्य साध्यधर्मितावच्छेदकतया च तादृशभानमित्यनुभवस्य दुरपह्नवतया यत्र परामर्शे धूमकालीनवह्निधर्मितावच्छेदकतापन्नधूमस्य पर्वतत्वविशिष्टविशेषणतापन्नस्यालोकादिरूपहेतुधर्मितावच्छेदकता तत्रानुमितावपि धूमस्य तादृशस्यैव साध्यधर्मितावच्छेदकताया अवर्जनीयत्वात्।

न चोक्तनियमाभावेऽपि न व्यभिचारः इतरधर्मितावच्छेदकतामापन्नं यद्धर्मं धर्मितावच्छेदकीकृत्येति विवक्षणीयत्वात्। धूमस्यैव धूमकालीनवह्निधर्मितावच्छेदकतापन्नधूमावच्छिन्नपक्षकस्थले विधेयधर्मितावच्छेदकतापन्नधूमस्यैव धूमकालीनत्वेन भासमानवह्नि-

धर्मितावच्छेदकतया विवक्षणीयहेतोस्तत्रासत्त्वादिति वाच्यम् । एवं सति धूमवान् पर्वतो धूमकालीनवह्निमानालोकादित्यादौ पक्षतावच्छेदकधूमस्य हेतुधर्मितावच्छेदकतापन्नस्यैव साध्यधर्मितावच्छेदकतया व्यभिचाराभावेन विधेयतावच्छेदकावच्छिन्नत्वनिवेशस्य कथितव्यावृत्त्यसंगतेः ।

न चोक्तव्याख्यायामपि धूमकालीनवह्निधर्मितावच्छेदकतापन्नधूमवत्पर्वतादिवृत्तित्वादिना वह्न्यादेर्यत्र साध्यता तादृशानुमितावितरधर्मितावच्छेदकत्वेन धूमाभानात् तत्र व्यभिचारवारणाय विधेयतावच्छेदकावच्छिन्नत्वनिवेशनमावश्यकमिति वाच्यम् । एवमपि यत्समानकालीनतेत्यंशवैयर्थ्यस्य दुर्वारत्वात् । धूमघटितपक्षतावच्छेदकावच्छिन्ने विधेयतावच्छेदकावच्छिन्नावगाहिन्यामन्यलिङ्गकानुमितौ धूमस्य हेतुधर्मितावच्छेदकतापन्नस्यैव विधेयधर्मितावच्छेदकतया साध्यतावच्छेदकघटकधूमस्यान्यधर्मितानवच्छेदकत्वेऽपि तस्य विधेयतावच्छेदकावच्छिन्नधर्मितावच्छेदकत्वासम्भवेन व्यभिचारानवकाशादित्यनुशयेन प्रकारान्तरेण हेतुं व्याख्यातुमुपक्रमते । अथ वेति ।

(दी०) अथ वा विशिष्टत्वं व्यावृत्तत्वं तच्च तत्समानकालीनत्वग्रहाजन्यत्वं विशेषणविशेष्यपदे च धर्मद्वयमात्रोपदर्शके । तथा चैकस्मिन् धर्मे यद्धर्मसमानकालत्वग्रहाजन्या या अशाब्दी तद्धर्मसमानकालीनत्वबुद्धिः सा ज्ञायमानतद्धर्मजन्येत्यर्थः । एवं न क्वापि व्यभिचारशङ्का । साध्यस्य पक्षतावच्छेदकसमानकालीनत्वं न काप्यनुमितिविषयो मानाभावात् । नवीननये तु कालादेः पक्षतावच्छेदकत्वे तदवच्छिन्नत्वं साध्यस्य भासत इत्यन्यदेतत् । दण्डी पुरुषो गच्छतीत्यादिशाब्दधीवारणाय अशाब्देति । तुल्यन्यायतयोपनीतभानवारणाय तदन्यत्वमपि वाच्यमित्यपि वदन्ति । एतन्नये चातीतत्वाग्रहेऽप्यतीतादिलिङ्गज्ञानान्नानुमितिरिति नातीतलिङ्गकालीनत्वावगाह्यनुमितौ व्यभिचारः । कालोऽत्र वर्त्तमानो विवक्षितः तद्वैशिष्ट्यांशे च प्र-

मात्वं वाच्यं वर्त्तमानत्वं वा तादृशधर्मविशेषणमित्यपि कश्चित्। केचित्तु विशेषणं विशेष्यतावच्छेदकं तथा च वर्त्तमानविशेष्यतावच्छेदकसमानकालीनतया धर्मान्तरवैशिष्ट्यावगाह्यशाब्दज्ञानत्वादित्यर्थः। सतश्च पक्षतावच्छेदकस्य हेतुत्वमिष्टमेव। समानकालीनत्वानुसरणं तु ताद्रूप्यविषयत्वे प्रतिज्ञायमानविशेष्यतावच्छेदकजन्यत्वस्य प्रयोजकत्वसूचनायेत्याहुः। परामर्श एवेति। न च कारणतावच्छेदकस्य तस्य न व्यापारता परामृष्यमाणत्वेन परामर्शाजननादिति वाच्यम्। व्यापारं प्रति रूपान्तरेण हेतुत्वेऽपि फलं प्रति ताद्रूप्येण हेतुतायां विरोधाभावात्। लिङ्गत्वेनैवानुमितिहेतुता परामर्शस्तु व्यापारमात्रमित्यपि केचित्।

(गा०) व्यावृत्तत्वं विलक्षणत्वं धूमकालीनवह्नित्वाद्यवच्छिन्नसाध्यकान्यलिङ्गकानुमितेरपि केनचिद्रूपेण कुतश्चिद्विलक्षणतया न व्यावृत्तिसम्भव इति समानकालीनत्वग्रहजन्यानुमितिव्यावृत्तधर्मवत्त्वरूपतया तद्व्याकुरुते। तच्चेति। समानकालीनत्वेति। किञ्चिद्धर्मविशिष्टे किञ्चिद्धर्मसमानकालीनत्वग्रहाजन्यत्वमित्यर्थः। विशेषणत्वविशेष्यत्वयोर्वैयर्थ्यमाशंक्याह। विशेषणेति। धर्मद्वयोपदर्शक इति। विशिष्टपदार्थघटकधर्मयोस्तद्धर्मत्वेन बोधक इत्यर्थः।

समुदितार्थमाह। तथा चेति एकस्मिन् धर्म इति। यद्धर्मसमानकालीनत्वग्रहाजन्या या अशाब्दी तद्धर्मे तद्धर्मसमानकालीनत्वबुद्धिरित्यर्थः। आलोककालीनवह्निमानयं वह्निमान् धूमाद् धूमकालीनालोकवानयं वह्निमान् धूमादित्यादेः संग्रहाय समानकालीनत्वप्रतियोग्यनुयोगिधर्मयोर्विशेष्योपादानम्। रूपान्तरेण धूमवह्न्योर्यत्र समानकालीनतानिरूपकतया पक्षतावच्छेदकप्रवेशः धूमत्वावच्छिन्नलिङ्गकवह्नित्वावच्छिन्नसाध्यकतादृशानुमितिसंग्रहाय यद्धर्मावच्छिन्ने यद्धर्मावच्छिन्नसमानकालीनताग्रहाजन्येत्यादि विवक्षणीयम्। एवं चायं धूमकालीनवह्निमान् धूमादित्यादेरपि संग्रहः धूमकालीवह्नित्वावच्छिन्ने धूमकालीनत्वावगाहिन्यास्तादृशानुमितेस्तादृशवह्नित्वावच्छिन्ने धूमकालीनत्वग्रहाजन्यत्वात्। धूमकाली-

नवह्निमानयं पर्वतो वह्निमान् धूमादित्याद्यनुमितिस्वगतया पक्षाद्वह्निर्भावनीया । समानकालीनत्वविषयत्वाप्रयोज्यसमानकालीनत्वविषयतां निवेश्य तादृशानुमितिसंग्रहे एकस्मिन्धर्मे इत्यादेर्वैयर्थ्यात् ।

वस्तुतस्तु समानकालीनत्वविषयत्वाप्रयोज्यत्वं न समानकालीनत्वविषयकज्ञानजन्यतानवच्छेदकत्वं धूमकालीनवह्निमान् धूमादित्यादौ धूमकालीनवह्नित्वावच्छिन्नांशे धूमकालीनविषयताया अपि धूमकालीनत्वविषयकपरामर्शजन्यतावच्छेदकत्वात्तदसंग्रहापत्तेः । नापि समानकालीनत्वविषयताघटितधर्मावच्छिन्नकारणतानिरूपितविशिष्टानुभवत्वावच्छिन्नकार्यतानवच्छेदकत्वं कालीनत्वसम्बन्धेन धूमविशिष्टवह्निसाध्यकान्यलिङ्गकानुमितौ संसर्गविधया समानकालीनत्वविषयतायाः विशेषणज्ञानजन्यतानवच्छेदिकायास्तादृशत्वात्तत्र व्यभिचारापत्तेः ।

न च तादृशविषयताया अपि वह्निविशेष्यकसमानकालीनत्वसंसर्गकधूमरूपविशेषणतावच्छेदकप्रकारकज्ञानजन्यतावच्छेदकत्वान्न तादृशानुमितौ व्यभिचार इति वाच्यम् । विशेष्ये विशेषणमिति रीत्या तथाविधज्ञाने तादृशविशेषणतावच्छेदकप्रकारकधियो हेतुत्वाद्व्यभिचारस्य दुर्वारत्वात् ।

न च प्रयोज्यत्वं स्वरूपसम्बन्धविशेषः धूमकालीनवह्नित्वावच्छिन्ने हेतुभूतधूमकालीनत्वविषयतायास्तद्विषयकपरामर्शजन्यतावच्छेदकत्वेऽपि न परामर्शीयसमानकालीनत्वविषयतायाः स्वरूपसम्बन्धरूपं प्रयोजकत्वं परामर्शस्य व्यापकतावच्छेदकतया धूमकालीनत्वविषयकत्वेऽपि लिङ्गतया धूमानवगाहने साध्यतावच्छेदकावच्छिन्ने धूमकालीनत्वाभानाल्लिङ्गतया धूमविषयताया एव तादृशभानप्रयोजकत्वादिति वाच्यम् । साध्यतावच्छेदकावच्छिन्ननिरूपितव्याप्त्यादिमत्त्वरूपलिङ्गत्वविशिष्टविषयतायाः प्रयोजकत्वे तदन्तःपातिसाध्यतावच्छेदकघटकसमानकालीनत्वविषयताया अपि प्रयोजकताया दुर्वारत्वात् ।

न च वह्न्यादिपक्षकधूमादिकालीनत्वंसाध्यकान्यलिङ्गकानुमितौ वह्न्याद्यंशे धूमादिसमानकालीनत्वग्रहाजन्यायां तदंशे धूमसमानकालत्वावगाहिन्यां धूमजन्यायां व्यभिचार इति वाच्यम् । इतरविशेषणतापन्नधर्मांशे समानकालतावगाहिताया विवक्षणेन सामंजस्यात् ।

ननु गंधप्रागभावादिपक्षतावच्छेदकविशिष्टे पृथिवीत्वादिहेतुकगन्धाद्यनुमितिः कदाचित्तद्विशिष्टानुयोगिकसाध्यवैशिष्ट्यावगाहिनी कदाचित्तदुपलक्षितानुयोगिकसाध्यवैशिष्ट्यावगाहिनी जायते तयोर्वैलक्षण्यायाद्यायां विधेये पक्षतावच्छेदकसमानकालीनत्वभानोपगम आवश्यकः तथा च साध्यांशे पक्षतावच्छेदककालीनत्वावगाहिज्ञानाजन्यायां तदंशे तत्कालीनत्वावगाहिन्यां तज्जन्यत्वाभावेन व्यभिचारः।

अथ पक्षतावच्छेदकविशिष्टानुयोगिकवैशिष्ट्यावगाहिन्यामनुमितौ विशिष्टानुयोगिकवैशिष्ट्यं साध्यस्य सम्बन्धतया भासते तद्विशिष्टानुयोगिकत्वं च तदवच्छिन्नानुयोगिताकत्वं एकक्षणावच्छेदेन एकदेशवृत्तिकयोरेव परस्परावच्छिन्नाधिकरणताकत्वमिति गंधप्रागभावादेर्गंधाधिकरणतानवच्छेदकतया गंधादिसम्बन्धानुयोगितायां गन्धप्रागभावाद्यवच्छिन्नत्वबाधेन तत्र तदवगाहिन्याः सल्लिङ्गजाया अप्यनुमितेर्भ्रमत्वनिर्वाहः तथा च तस्याः साध्यांशे तत्सम्बन्धांशे .वा पक्षताच्छेदकसमानकालीनत्वानवगाहितया हेत्वसत्त्वान्न व्यभिचारः।

यदि चैकधर्मस्य तदधिकरणत्वस्य वाऽपरनिरूपिताधिकरणत्वे स्वरूपसम्बन्धरूपमवच्छेदकत्वं न कुत्रापि अत एव हेत्वाधिकरणत्वस्य स्वाधिकरणतावच्छेदकतापरतया साध्यसम्बन्धितावच्छेदकरूपवत्वं व्याप्तिरिति व्याप्तिलक्षणं व्याकुर्वतां मते न्यूनाधिकवृत्तिधर्मद्वयाधिकरणतयोर्न्यूनाधिकवृत्तित्वे तुल्यवृत्तिधर्मद्वयाधिकरणतयोश्चावच्छेद्यावच्छेदकभावे विनिगमनाविरहेण स्वरूपसम्बन्धरूपावच्छेदकभावासम्भवं दीधितिकृदाहेति मन्यते तदा पक्षतावच्छेदकविशिष्टानुयोगिकवैशिष्ट्यविषयकानुमितौ स्वसमानानुयोगिकपक्षतावच्छेदकधर्माधिकरणतावच्छेदकक्षणावच्छिन्नाधिकरणतैव साध्यसम्बन्धतया भासत इत्युपगन्तव्यम्।तादृशाधिकरणतैव विशिष्टानुयोगिकवैशिष्ट्यमिति चेत्? एवं सति लिङ्गोपधानमतेऽपि धूमाद्यवच्छिन्नं स्वसमानाधिकरणधूमाधिकरणतावच्छेदकक्षणावच्छिन्नं वाऽधिकरणत्वं वह्न्यादेः सम्बन्धः। दण्डी चैत्रो गच्छतीति प्रत्यक्षेऽपि तादृशं दंडादिविशिष्टानुयोगिकं वैशिष्ट्यं विधेयसम्बन्ध इत्येव स्यात् तदनुसारेणैव प्रकृते हेतुर्व्याख्येयः युक्तं चैतत् विधेये अनुयोगितावच्छेदकसमानकालीनत्वभानेनैवैकत्र द्वयमिति रीत्या बोधात् वि-

शिष्टानुयोगिकवैशिष्ट्यबोधवैलक्षण्यनिर्वाहोपगमे यस्मिन्धर्मिणि दण्डकुण्डलयोर्विभिन्नकालावच्छेदेनैव सत्त्वमन्यत्र वा एककालावच्छेदेन सत्त्वं तदेकतरविशिष्टतद्धर्म्यनुयोगिकापरवैशिष्ट्यबोधस्य प्रमात्वापत्तेः। तयोरेव दण्डकुण्डलयोरेककालीनतया एकावच्छेदेनैकदेशवृत्तितायाश्चाबाधितत्वात्। तथा च तद्धर्मावच्छिन्नपक्षकानुमितौ तद्धर्मघटितहेतोर्व्यभिचारो दुर्वार इत्याशंक्य धूमगन्धप्रागभावादिविशिष्टे वह्निगंधादिसाध्यकानुमितौ पक्षतावच्छेदकसमानकालीनत्वं साध्यांशे पक्षतावच्छेदकाधिकरणत्वावच्छेदककालावच्छिन्नत्वं वा साध्यसंबंधांशे कदाचिदपि न भासते अतो नानुमितौ पक्षधर्मघटितहेतुसत्त्वम्

न चानुमितौ साध्यपक्षतावच्छेदकयोरेकत्र द्वयमिति रीत्यैव भाने तादृशानुमितेः पक्षतावच्छेदकावच्छेदेन साध्याभावज्ञानाप्रतिबध्यतया गंधप्रागभावादिविशिष्टे गंधादिसाधनेऽसिद्धिव्यभिचाराभ्यां बाधस्यासंकरो मूलदर्शितो विरुद्ध इति वाच्यम्। गंधप्रागभावकालरूपपक्षतावच्छेदकविशिष्टे गंधादिसाधने तादृशकालावच्छिन्नत्वस्य गंधाद्यंशे तत्संबंधांशे वा भानोपगमेन तत्र तदवच्छेदेन साध्याभावबुद्धेर्विरोधितया तत्रैव बाधासंकरस्य निष्प्रत्यूहत्वात्। मणिकृतापि गंधप्रागभावादिपक्षतावच्छेदकस्थले एकधर्मस्य तदधिकरणतायाश्चापरधर्माधिकरणतावच्छेदकत्वेऽविवादेन एकधर्मविशिष्टेऽपरसाधने तद्धर्मस्य तदधिकरणतायाश्चावच्छेदकत्वभानानिर्वाहमाकलय्य कालावच्छिन्नपक्षकस्थले एव बाधासंकरे निर्भरः कृतः तथा च न व्यभिचारप्रसक्तिरित्याशयेन समाधत्ते। साध्यस्येति।

नन्वेवमपि धूमकालावच्छिन्नपर्वतपक्षकान्यलिंगकानुमितौ धूमकालावच्छिन्नत्वभानेन व्यभिचारो दुर्वार एवेत्यत आह। नवीननये इति। अन्यदेतदिति। हेतुसमानकालवृत्तित्वस्यानुमित्याऽनवगाहने तदवगाहित्वघटितहेतोः न तत्कालावच्छिन्नत्वावगाहिन्यामनुमितौ व्यभिचारः आधेयत्वावच्छेद्यत्वयोराधारत्वावच्छेदकत्ववद्भेदात्। यदि विशिष्टानुयोगिकवैशिष्ट्यबोधमात्र एव कालावच्छिन्नत्वं भासते तदा तल्लिंगकानुमितौ तल्लिंगकालावच्छिन्नत्वभानेऽवच्छिन्नत्वांशे तद्विशेषणकालस्य संबंधांतरं भासते धूमादिकालस्य पक्षतावच्छेदकत्वे चावच्छिन्नत्वस्य कालसंबंधतया भानात् तत्र कालसंबंधाभानेन

वैलक्षण्यान्न व्यभिचारः।

यदि च धूमादिलिंगकानुमितौ धूमाधिकरणतावच्छेदककालावच्छिन्नाधिकरणता विधेयस्य संबंधस्तदापि तत्रोत्तराधिकरणतायां प्रथमाधिकरणतासमानदेशत्वस्याप्यधिकस्य भानाद् धूमाधिकरणतावच्छेदककालावच्छिन्नपक्षकस्थले तादृशकालावच्छिन्नाधिकरणतायाः साध्यसंबंधरूपत्वे स्वाधिकरणतायां समानदेशत्वाभावेन वैलक्षण्यात् सामंजस्यमिति भावः।

ननु धूमरूपपक्षतावच्छेदकविशिष्टे साध्यवैशिष्ट्यावगाहिन्यामन्यलिंगकानुमितौ व्यभिचारः पक्षतावच्छेदकोपलक्षिते साध्यवैशिष्ट्यावगाह्यनुमितितो वैलक्षण्याय तस्यास्साध्यांशे पक्षतावच्छेदकसमानकालीनत्वभानस्यावश्योपेयत्वात्। तज्जनकज्ञाने च तदभानादित्यत आह। साध्यस्येति। मानाभावादिति। पक्षतावच्छेदकसाध्ययोरेकत्र द्वयमिति रीत्यैव भानं न तु क्वापि विशिष्टे वैशिष्ट्यमिति रीत्या तथा भानेऽपि पक्षतावच्छेदकावच्छिन्नत्वमेव तत्र भासते न तु तत्समानकालीनत्वम्। अवच्छिन्नत्वं तु समानकालीनत्वादिनियतं स्वरूपसंबंधविशेषः अतो विभिन्नकालीनपक्षतावच्छेदकविशिष्टे साध्यवैशिष्ट्यावगाह्यनुमितेर्न प्रमात्वप्रसंगोऽनुभवबलेन चानुमितेः साध्यांशे लिंगसमानकालीनत्वावगाहितासिद्धिरिति भावः।

ननु धूमकालस्य यत्र पक्षतावच्छेदकता तत्रत्यायामवच्छेदकावच्छेदेन साध्यवत्त्वावगाह्यन्यलिंगकानुमितौ व्यभिचारः साध्यांशे धूमकालावच्छिन्नत्वात्मकतत्कालीनत्वावगाहिन्यास्तादृशानुमितेस्तदंशे तद्बुद्ध्यजन्यत्वादित्यत आह। तद्विलक्षणये इति। अन्यदेतदिति। एतत्कालावच्छिन्नत्वभानं तत्कालीनत्वभानादन्यदित्यर्थः। तत्कालीनत्वघटकाधेयताताऽवच्छिन्नत्वस्य भेदादिति भावः।

शाब्दधीवारणायेति। अन्यथा दण्डादिसमानकालीनत्वावगाहिन्या अपि तादृशशाब्दबुद्धेस्तदजन्यतया व्यभिचारापत्तेरिति भावः।

यद्यपि पक्षतावच्छेदकविशिष्टे साध्यवैशिष्ट्यविषयकानुमिताविव तादृशशाब्दबुद्धावपि संसर्गतया विशेष्यतावच्छेदकसमानकालीनत्वभाने मानाभावः। मतुपा गमनादिरूपविधेयसमानकालीनत्वस्य दण्डादौ बोधनेऽपि तादृशबुद्धेस्तदंशे समानकालीनत्वावगाहियोग्यताज्ञानजन्यतया न निरुक्तहेतुमत्त्वं तथाऽपि एकपदार्थेऽपरप-

दार्थवत्त्वं न योग्यता किं तु विशेषणे विशेष्यनिष्ठाभावाप्रतियोगित्वमिति मते मतुप्जन्यसमानकालीनत्वबुद्धेर्विशेष्यांशे समानकालीनत्वग्रहाजन्यत्वात्तद्वारणायाशाब्दत्वनिवेशनमावश्यकम् ।

तुल्यन्यायतयेति । शाब्दबुद्धिवदुपनीतभानस्यापि विषयाजन्यत्वेत्यर्थः । उपनीतभानवारणाय । धर्म्यन्तरगृहीतस्य समानकालीनत्वस्यान्यत्रोपनयप्रत्यासत्तिजन्यज्ञानवारणाय । स्मरणात्मकसमानकालीनत्वभानस्य स्वसमानधर्मिकतदनुभवाधीनतया न तत्र व्यभिचार इति ध्येयम् ।

नन्वतीतादिलिङ्गज्ञानजन्यानुमितौ लिङ्गस्याव्यवहितपूर्ववर्तिताविरहेणाजनकतया व्यभिचारस्तत्रापि समानकालीनत्वभानविरोधिज्ञानासत्त्वेऽसतोऽपि तस्य भानादित्यत आह । एतदग्रे चेति । अतीतत्वाग्रहेऽपि । साध्यहेत्वोरसमानकालीनत्वाग्रहेऽपि । अपिनाऽतीतत्वग्रहे प्रतिबन्धकवशाद्यथा नानुमितिरिति दृष्टांतः सूचितः ।

नानुमितिरिति । लिङ्गरूपकारणविरहान्न समानकालीनत्वावगाहानुमितिरित्यर्थः । समानकालीनत्वानवगाहिनी पुनरनुमितिर्भवतु मा वोभयथाऽपि न प्रकृते क्षतिरिति ध्येयम् ।

तत्रानुमितिं स्वीकृत्य हेतौ विशेषणान्तरप्रक्षेपेण व्यभिचारं वारयतां मतमाह । कालोऽत्रेति । अत्र । तत्कालीनत्वशरीरे । वर्तमानः । प्रकृतबुद्ध्यव्यवहितपूर्वः ।

नन्वेवमपि अतीतादिलिङ्गाधिकरणत्वेन स्वाव्यवहितप्राक्कालविषयिण्यामनुमितौ व्यभिचारो दुर्वार एवेत्यत आह । तद्विशिष्टस्येति । तादृशकालस्य धर्मविशेषणांशे इत्यर्थः । तथा च तद्धर्मविषयतानिरूपितवास्तवतद्धर्मवद्वर्तमानकालविषयतानिरूपितवृत्तिविषयताशालित्वं हेतुघटकमिति फलितम् । प्रमात्वघटकस्य धर्मे तादृशकालवृत्तित्वस्य वास्तवस्य निवेशेनैवोपपत्तावन्यांशप्रवेशेनालमित्यत आह । वर्तमानत्वं वेति । अव्यवहितप्राक्कालवृत्तित्वं वेत्यर्थः । धर्मविशेषणम् । यत्पदोपादेयधर्मविशेषणम् । कालीनत्वघटकस्वाव्यवहितप्राक्काले वास्तवं तादृशधर्मवत्त्वं विशेषणमिति तु परमार्थः । ज्ञायमानलिङ्गकरणतामते कारणविरहेण तत्रानुमित्यसम्भवात् तद्वारकविशेषणदानं न युक्तमित्यस्वरसः ।

स्वाव्यवहितप्राक्क्षणविद्यमानधूमाद्यवच्छिन्नविशेष्यकानुमिति-

त्वमेव धूमादिजन्यतावच्छेदकमिति तदवच्छिन्नविशेष्यकतत्कालीनत्वावच्छिन्नसाध्यकान्यलिङ्गकानुमितावपि तज्जन्यत्वस्याव्याहततया तत्र व्यभिचारवारणाय विशेषणान्तरप्रवेशो व्यर्थ इति वदतां मिश्राणां मतमाह । केचित्त्विति विशेषणपदस्य यथाश्रुतपरत्वे धूमानवच्छिन्नविशेष्यकान्यलिंगकधूमकालीनवह्न्यनुमितेर्धूमजन्यतावच्छेदकोक्तरूपानाक्रांततया व्यभिचार इति तद्याचष्टे । विशेषणमिति । अतीतादिधूमावच्छिन्नविशेष्यकतत्कालीनत्वावच्छिन्नसाध्यकानुमितौ व्यभिचारवारणाय विशेष्यतावच्छेदके स्वाव्यवहितप्राक्क्षणसत्त्वमधिकं प्रवेश्य समुदितार्थमाह । तथा चेति । सतः । स्वाव्यवहितप्राक्काले सतः ।

नन्वेवं वर्तमानतद्विशेष्यतावच्छेदकावगाहित्वमेव हेतुरस्तु धूमकालीनत्वानवगाहिन्या अपि वर्तमानधूमावच्छिन्नविशेष्यकानुमितेः दर्शितधूमजन्यतावच्छेदकरूपाक्रांततया व्यभिचारानवकाशात् किं समानकालीनत्वावगाहित्वानुसरणेनेत्यत आह । समानेति । ताद्रूप्यविषयकत्वे । तत्समानकालीनत्वग्रहाजन्यानुमितेस्तदवगाहित्वे । विशेष्यतावच्छेदकेति । विशेष्यतावच्छेदकतद्धर्मेत्यर्थः । प्रयोजकत्वसूचनायेति । तथा च तल्लिङ्गकानुमितेस्तदजन्यत्वे तत्कालीनत्वावगाहितानियामकाभावेन तदवगाहितानियमो न स्यादिति विषयपरिशोधकतर्कस्फोरणायैव तदुक्तिर्न तु हेतौ तत्प्रवेश इति भावः ।

न च समानकालीनत्वविषयताया लिङ्गजन्यतानवच्छेदकत्वे तज्जन्यताया न तत्प्रयोजकत्वसम्भव इति तस्यास्तथात्वमावश्यकं तथा प्रतिबंधकवशेन विद्यमानविशेष्यतावच्छेदककालीनत्वमनवगाहमानाया अनुमितेस्तज्जन्यतावच्छेदकानाक्रांततया व्यभिचारवारणाय समानकालीनत्वावगाहिताया हेतुघटकत्वमावश्यकमिति वाच्यम् । समानकालीनत्वविषयताया लिङ्गजन्यतानवच्छेदकत्वेऽपि तद्घटितसामग्रीघटकविरोधिज्ञानाद्यभावजन्यतावच्छेदिकायां तस्यां तद्घटितसामग्रीघटकविरोधिज्ञानाद्यभावजन्यसामग्र्याः प्रयोजकत्वसम्भवात् । एतन्मते चासति विरोधिनि अविद्यमानपक्षतावच्छेदकसमानकालीनत्वमपि नियमेनानुमितिविषयः । प्रयोजकसत्त्वात्प्रमात्मकादपि परामर्शात्क्वचिद् भ्रांतानुमितिरिष्टैव ।

अत्र चैवं विशेषणपदस्य विद्यमानविशेषणमात्रपरत्वेनाप्युपपत्ते-

विशेष्यतावच्छेदकपरतयोपवर्णनमकिञ्चित्करं विद्यमानधूमादिविषयकानुमितित्वस्यैव धूमादिजन्यतावच्छेदकत्वसम्भवात् विद्यमानधूमादिसाध्यकानुमितेरपि धूमादिजन्यत्वसम्भवेन व्यभिचारानवकाशात् ।

न चैवं तत्साध्यकाद्यनुमितेरपि तत्कालीनत्वावगाहिता स्यात्तत्प्रयोजकतज्जन्यत्वसत्त्वादिति वाच्यम् । तदवच्छिन्नविशेष्यकत्वप्रयोजकतालिङ्गकपरामर्शतदवच्छिन्नविशेष्यकपरामर्शान्यतरघटितसामग्रीजन्यत्वसहितस्यैव तज्जन्यत्वस्य तत्कालीनत्वभानप्रयोजकतयाऽतिप्रसङ्गवारणसम्भवात् । एवं पक्षतावच्छेदकसमानकालीनत्वस्यानुमितिविषयत्वे धूमादेः पक्षतावच्छेदकत्वेनैव धूमकालीनवन्हिसिद्धिनिर्वाहात् लिंगोपहितभानस्य निर्युक्तिकतापत्तिरित्यस्वरसबीजम् ।

करणतावच्छेदकरूपावच्छिन्नजन्यस्यैव व्यापारतेति नियमाभिप्रायेण शङ्कते । न चेति । परामृश्यमानत्वेनेति । विषयनिष्ठयावद्धर्मस्य ज्ञानकरणतावच्छेदकत्वे मानाभावादिति भावः । नियमं निराकुर्वन् समाधत्ते । व्यापारमिति । रूपान्तरेण । विषयत्वादिना । ताद्रूप्येण । परामृष्यमाणत्वेन । विरोधाभावात् । बाधकाभावात् ।

मतान्तरमाह । लिङ्गत्वेनैवेति । एवकारेण परामर्शस्यावच्छेदकत्वव्यवच्छेदः । तर्ह्यपरामृश्यमानात्कुतो नानुमितिरित्यत आह । परामर्शस्त्विति । तथा च व्यापाराभावान्नातिप्रसङ्ग इति भावः । अत्र उक्तनियमसत्त्वे लिङ्गत्वेनापि न कारणतासम्भवः तेन रूपेणापि परामर्शहेतुताया अप्रामाणिकत्वादित्यस्वरसः ।

(चि०) अत्रोच्यते अतीतानागतधूमादिज्ञानेऽप्यनुमितिदर्शनान्न लिङ्गं तद्धेतुः व्यापारपूर्ववर्त्तितयोरभावात् । न च विद्यमानं लिङ्गान्तरमेव तद्धेतुः । तदा तस्यापरामर्शात् । परामर्शाविषयस्य कारणताग्राहकाभावात् । भाविनि पक्षे व्यक्त्यैक्यमेव वा यत्र लिङ्गं तत्र लिङ्गान्तराभावाच्च । यदि च वर्त्तमानमेव तत्र लिङ्गं तदा वर्त्तमानवह्न्यनुमानोपपत्तिः । अथ भावि भूतं वा धूमादि न लिङ्गं किन्तु तत्प्राग-

भावस्तद्ध्वंसश्च वर्त्तमान एव तयोरपि वह्निसमानदेशत्वादिति चेन्न । अतीतभाविदिनवृत्तितया निश्चिताद्वर्त्तमानतया सन्दिग्धाद् धूमादनुमितौ हि न प्रागभावध्वंसौ लिङ्गे, तयोः सन्दिग्धत्वात् । नापि धूमस्तस्यावर्त्तमानत्वात् । किञ्च भूतभाविवर्त्तमानत्वाविषयात् पर्वते धूम इति ज्ञानाद्यत्रानुमानं तत्र का गतिः ? सर्वत्र प्रागभावाद्यन्यतमवत्त्वं धूमाद्यत्यन्ताभावाभाववत्त्वं वा लिङ्गमिति चेन्न । व्यर्थविशेषणत्वेन तेषामलिङ्गत्वात् । अन्यतमत्वाज्ञानेऽपि धूमज्ञानादनुमितिसत्त्वाच्च ।

(दी०) परामर्शाविषयस्येति । विनिगमनाविरहो विशेषणत्वं वा तस्य हेतुत्वे बीजं न चेदमज्ञायमानेऽस्तीति भावः । न च विशिष्टस्य कारणत्वं गृह्णत् प्रमाणं विशेषणतावच्छेदकावच्छेदनापि तत्परिच्छिनत्ति तथा चापरामृष्यमाणस्यापि लिङ्गत्वेन हेतुत्वमविरुद्धमिति वाच्यम् । यतो हि लिङ्गत्वं न साध्यव्याप्यत्वादिकं तदप्रसिद्धावपि गगनाद्यनुमानात् । नापि परामर्शविषयतावच्छेदकत्वमात्रं तथा सति वस्तुमात्रस्यैवानुमितिहेतुतापत्तेः । न चेदं प्रामाणिकम्, तथाऽन्वयव्यतिरेकादिविरहात् । अन्यथेच्छाशाब्दबोधादिकं प्रतीष्टसाधनत्वाकाङ्क्षादिकुक्षिनिक्षिप्तस्य जगत एव हेतुतापत्तेः । न वा वास्तवो विनिगमनाविरहोऽपि, प्रमेयत्वादिना ज्ञातादपि लिङ्गादनुमित्यापत्तेः । व्याप्तिपक्षधर्मत्वेन ज्ञायमानत्वोक्तौ च लाघवात्तादृशज्ञानत्वेनैव हेतुत्वात् ।

(गा०) मूले न लिङ्गं तद्धेतुरिति । व्यभिचारेण नानुमितिहेतुरित्यर्थः । व्यापारेति । व्यापारपदं स्वव्यापारपूर्ववर्त्तितापरं पूर्ववर्त्ति-

ता च स्वस्य पूर्वकालवर्त्तिता तथा च स्वस्य स्वव्यापारस्य च नियताव्यवहितपूर्ववर्त्तिताविरहादित्यर्थः । तद्धेतुरिति । अतीतादिलिङ्गज्ञानजन्यानुमित्यव्यवहितपूर्ववर्तीत्यर्थः । तदा । उक्तानुमित्यव्यवहितपूर्वकाले । तस्य । विद्यमानलिङ्गान्तरस्य । कारणताग्राहकाभावादिति । अनुमितेरज्ञायमानलिङ्गान्तरसमानकालीनतानवगाहित्वेन हेत्वसिद्ध्या उक्तानुमानस्य तत्कारणत्वाग्राहकत्वादिति भावः ।

ननु दर्शितानुमानात्परामृश्यमानलिङ्गस्य हेतुतासिद्धौ अपरामृश्यमानसाधारणलिङ्गत्वस्यैव तत्कारणतावच्छेदकत्वोपगमादपरामृश्यमानस्यापि लिङ्गस्य कारणत्वं दुर्वारमेवेत्याशंक्य दीधितिकृत्तस्याकारणत्वं व्यवस्थापयति । विनिगमनाविरह इति । लिङ्गतत्परामर्शयोः कस्य वा कारणत्वं कस्य वा तदवच्छेदकत्वमित्यत्रेत्यादिः । विशेषणत्वम । परामर्शकारणताग्रहे विषयितया विशेषणत्वेन भासमानत्वम् । अस्य । लिंगस्य । इदम् । एतद्बीजद्वयम् । अज्ञायमान इति । तस्य विषयतया परामर्शरूपहेतुतावच्छेदकानाक्रान्ततया विशेषणत्वस्यासम्भवादिति भावः ।

यद्यपि तदा तस्यापरामर्शेऽपि विनिगमनाविरहेण परामर्शस्य हेतुतावच्छेदकत्वे कालान्तरीणपरामर्शविषयतयैव कारणत्वसम्भवः विशिष्टकारणप्राक्सत्तायाः फलोपधानप्रयोजकत्वेनातिप्रसङ्गवारणसंभवात् तत्कालीनपरामृश्यमानत्वेनाहेतुत्वात् । एवं तत्कालीनानुमित्युपधायकपरामर्शे विद्यमानताग्राहकप्रमाणविषयकालांतरीणपरामर्शे विद्यमानलिङ्गस्याविशेषणत्वेऽपि लिङ्गपरामर्शसामान्येऽनुमितिसामान्यकारणताग्राहकप्रमाणविषयकालान्तरीणपरामर्शे विद्यमानलिंगस्य विशेषणतया द्वितीययुक्त्यापि तस्य कारणत्वमावश्यकमिति तदा तस्यापरामर्शादित्यादिमूलमसङ्गतं तथापि विशिष्टस्य नियतप्राक्सत्त्वं कारणताघटकं तत्रैव विशिष्टसत्त्वं फलोत्पत्तिप्रयोजकं अत्र च न तादृशस्य प्राक्सत्त्वनियम इति न विशिष्टापेक्षणीयताप्रयोजककारणतासंभवो लिंगस्येति तत्कालपरामृश्यमानत्वेन हेतुत्वं वाच्यम् । एवं विशिष्टकारणताग्राहकप्रमाणेन विशेष्यविशिष्टस्यैव विशेषणस्य नियतपूर्ववर्तिताघटितं कारणत्वं प्रत्याय्यते तथा च 'कालान्तरीणपरामर्शविषयतामादाय न विद्यमानलिङ्गस्य तादृशकारणतानिर्वाह इत्यत्र मूलतात्पर्यम् ।

न चैवं सति परामर्शाविषयमात्रस्य कारणताग्राहकाभावकथनविरोधः, लिङ्गमात्रकारणताबाधकव्यभिचारस्यैव सत्त्वादिति वाच्यम्। कारणताग्राहकपदेनाव्यभिचारानिर्वाहकस्य तत्कारणतावच्छेदकवैशिष्ट्यस्यैव विवक्षितत्वात्। विशेषणतावच्छेदकावच्छेदेनापीति। विशेष्यवैशिष्ट्यमनन्तर्भाव्य केवलविशेषणतावच्छेदकतावच्छेदेनापीत्यर्थः। साध्यव्याप्यत्वादिकमिति। साध्यव्याप्यत्वविशिष्टपक्षधर्मतावत्त्वमित्यर्थः। तदप्रसिद्धाविति। साध्यव्याप्यत्वाप्रसिद्धावित्यर्थः। इदमुपलक्षणम्। व्याप्त्यादिभ्रमविषयादप्यनुमित्युत्पत्त्या व्याप्त्यादिविशिष्टत्वविशेषितस्य कारणत्वासम्भवेन व्याप्त्यादिविशिष्टविशेषणतायामवच्छेदकत्वासम्भवोऽपि द्रष्टव्यः।

वस्त्विति। वस्तुमात्रस्यैव परामर्शविषयतावच्छेदकाधिकरणत्वाभावत्वादिमत्त्वादिति भावः। इदमुपलक्षणम्। परामर्शाविषयतावच्छेदकवज्ज्ञानत्वेनाहेतुत्वात्तदवच्छेदकत्वस्यापि विशेषणतावच्छेदकत्वाभावो बोध्यः। इदम्। उक्तलिङ्गत्वेन हेतुत्वम्। तथा। तेन रूपेण। अन्यथा। तेन रूपेणान्वयव्यतिरेकविरहेऽपि जनकज्ञानविषयतावच्छेदकत्वेन हेतुत्वे। अतीतादिलिङ्गज्ञानादनुमित्यपलापे परामृश्यमानत्वेन हेतुता सम्भवतीत्यत आह। न चेति। परामृश्यमानत्वं ज्ञायमानत्वमात्रं व्याप्तिपक्षधर्मताभ्यां ज्ञायमानत्वं वा? आद्यं दूषयति। व्याप्तीति। लाघवात्। अवच्छेदकलाघवात्। व्याप्तिपक्षधर्मताज्ञानस्य हेतुतावच्छेदकत्वे धर्मिणोऽधिकस्य निवेशेन गौरवादिति भावः।

(दी०) किं च कालान्तरीयतादृशज्ञानविषयादपि लिङ्गादनुमितिप्रसङ्गः। कारणतावच्छेदकावलीढकारणसत्त्वस्यैव कार्योत्पत्तिनियामकत्वान्न तु तद्विशिष्टसत्त्वस्यैव गौरवात्। इतोऽपि च प्रतिबन्धकाभावादीनां न कारणतावच्छेदकत्वं परामर्शविशिष्टसत्त्वस्य चात्र प्रयोजकत्वाभिधाने लाघवादावश्यकत्वाच्च परामर्शस्यैव तथात्वं तत्र च नातिप्रसङ्गशङ्काऽपि। अथैवं संयुक्तेन्द्रियादीन्द्रियसंयोगाद्योः कारणतायामपीदमेव विनिगमकं स्यादिति चेत्? स्यादेव यदि न स्याता-

मिन्द्रियादेः स्वतन्त्रान्वयव्यतिरेकौ । स्याच्च व्यापारेण व्यापारिणोऽव्यवधानम् । न चानुमितिमात्रे तौ लिङ्गस्य, न चातीन्द्रियस्यापि तस्य परामर्शो व्यापार इति । अपि च चैत्रेण परामृश्यमानाल्लिङ्गादपरामृशतोऽपि मैत्रस्यानुमितिप्रसङ्गः । तत्तत्पुरुषीयानुमितिं प्रति तत्तत्पुरुषपरामृष्यमाणलिङ्गत्वेन हेतुत्वे चानन्तकार्यकारणभावप्रसङ्गः । इच्छाकृतिसुखदुःखस्मरणविशिष्टज्ञानशाब्दबोधादिषु ज्ञानेच्छाधर्माधर्मनिर्णयविशेषणभानपदार्थज्ञानादीनामिवानुमितौ परामर्शस्याप्येकार्थप्रत्यासत्त्या हेतुत्वान्नातिप्रसङ्गशङ्कापीति कृतं पल्लवितेन ।

(गा०):ननु व्याप्तिपक्षधर्मत्वविषयतानिरूपितविषयताविशिष्टज्ञानत्वेन हेतुत्वे विशेष्यविशेषणभावे विनिगमनाविरह इति तादृशविषयतासम्बन्धेन ज्ञानस्य कारणतावच्छेदकत्वमेवोचितमित्याशङ्कायां लिङ्गकरणतापक्षे दोषान्तरमाह । किञ्चेति । गौरवादिति । विशिष्टसत्त्वस्य विशेषणविशेष्योभयसत्त्वगर्भत्वादिति हृदयम् । इतोऽपि । कालान्तरे प्रतिबन्धकाभावविशिष्टात्प्रतिबन्धकसमवहितात्कार्यापत्तितोऽपि । न कारणतावच्छेदकत्वम् । अपि तु सहकारित्वमेव । अपिकारेण विनिगमनाविरहोऽपि सूचितः । अत्रापत्तिवारणाय विशिष्टसत्त्वमेव प्रयोजकमन्यथानुपपत्त्या वाच्यं तत्राह । परामर्शेति । तत्र च । परामर्शसत्त्वस्य प्रयोजकत्वे च । नातिप्रसङ्गशङ्कापीति । परामर्शशून्यकाले नानुमितिप्रसङ्गशङ्कापीत्यर्थः ।

एवं सति विषयेन्द्रियसंयोगस्य हेतुत्वकल्पे विषयसंयुक्तेन्द्रियस्यापि विनिगमनाविरहाद्धेतुत्वमित्यपि न स्यात्तत्रापि संयोगस्य कारणतावच्छेदकत्वे कालान्तरे संयुक्तादिन्द्रियात्संयोगविरहदशायां प्रत्यक्षापत्तिः । संयोगविशिष्टसत्त्वस्य प्रयोजकत्वाभिधाने च लाघवादावश्यकत्वाच्च संयोगसत्त्वस्यैव तथात्वमुचितमिति विनिगमकसम्भवादिन्द्रियं हेतुरेव न स्यादित्याशङ्कते । अथेति । यदि न स्यातामिति । तथा चेन्द्रियनाशे संयोगसत्त्वेऽपि प्रत्यक्षानुत्पादानुरोधेन तस्य हेतुत्वमिति भावः । इन्द्रियनाशे ततो द्विती-

यक्षणे तत्संयोगोऽपि नश्यति अधिकैकक्षणे प्रत्यक्षोत्पाद इष्यत एवेत्याशङ्क्याह । स्याश्चेति । व्यवधानम् । अन्यथासिद्धिः । तादृशीं हेतुताव्यवस्थापकयुक्तिं प्रकृते निराकरोति । न चेति । लिङ्गशून्ये धर्मिणि भ्रमात्मकपरामर्शसत्त्वेऽपि लिङ्गव्यतिरेकाद् भ्रमानुमितिव्यतिरेक इत्यनुमितिविशेषे लिङ्गस्यान्वयव्यतिरेकौ सम्भवत इति अनुमितिमात्र इत्यत्र मात्रपदोपादानम् । तौ । अन्वयव्यतिरेकौ । अतीन्द्रियस्येति । तत्परामर्शजनकेन्द्रियसंयोगरहितस्येत्यर्थः । तेनातीतादिपरिग्रहः । परामर्शो व्यापार इति । तादृशस्य परामर्शविषयीभूतस्यापि तदजनकत्वात् परामर्शस्य तदंशे लौकिकत्वाभावादिति भावः ।

ननु विशिष्टसत्त्वं विशेषणावच्छिन्नविशेष्यनिरूपितं विलक्षणाधिकरणत्वं न विशेषणसत्त्वगर्भमपि तु विशेषणसत्त्वानियतमेव तथा च विशिष्टसत्त्वस्य प्रयोजकत्वे क्वचिद्विशेषणसत्त्वस्य तदावश्यकत्वं तथा च पूर्वोक्तयुक्त्या ज्ञानस्य जनकतावच्छेदकत्वमेवोचितमित्याशङ्क्य दोषांतरमाह । चैत्रेणेति । परामर्शहेतुतामते तत्पुरुषीयत्वानिवेशेऽपि अतिप्रसङ्गमुद्धरति । इच्छेति । इच्छादिकार्यसप्तके यथासंख्यं ज्ञानादिकारणसप्तकस्यान्वयो बोध्यः । एकार्थप्रत्यासत्त्या । सामानाधिकरण्यप्रत्यासत्त्या । नातिप्रसङ्गशङ्कापीति । कारणतावच्छेदकसम्बन्धेन स्वाधिकरण एव कारणस्य कार्यतावच्छेदकसम्बन्धेन काकार्योत्पत्तिप्रयोजकत्वादिति भावः । मूले व्यक्त्यैक्यामिति । विद्यमानान्यव्यक्तिरित्यर्थः । तथा च विद्यमानपक्षे तन्मात्रवृत्तिरूपादिव्यक्तेरेव लिङ्गत्वावच्छिन्नस्य विद्यमानतासम्भवात् पक्षस्य विद्यमानतालाभेनातीतपक्षपरिग्रहः ।

(दी०) एकान्योन्याभावविशिष्टापरान्योन्याभावादिर्वर्त्तमान एव सर्वत्र हेतुः सम्भवतीत्यत आह । यदि चेति । किं तु तत्प्रागभाव इति । तस्य च विरोधिकालावच्छेदेन व्याप्यत्वग्रहान्न तत्कालीनसाध्यसिद्धिरिति भावः ।

(गा०) भाविनीत्यादिना यत्र पक्षस्य भावित्वमतीतत्वं वा तत्र तत्पक्षवृत्तित्वघटितलिङ्गत्वावच्छिन्नस्य विद्यमानत्वासम्भवोक्तेस्तत्र

विद्यमानस्य लिङ्गत्वाप्रसक्तेर्यदि चेत्यसङ्गतमतः लिङ्गत्वशरीरे न पक्षवृत्तित्वं विशेषणविधया निविष्टं किं तूपलक्षणतयेत्याशयेन उक्तविद्यमानलिङ्गासम्भवं दूषयन् यदि चेत्यादिकमवतारयति दीधितौ । एकेति । ह्रदादिभेदविशिष्टह्रदान्यानिर्वह्निभेदादिरित्यर्थः । निर्वह्न्यादिसामान्यभेदस्य वह्न्याद्यनतिरिक्ततया विशिष्टविशेषभेदानुधावनं मूले वर्तमानवह्न्यनुमित्यापत्तिरिति अपरामृश्यमानस्याहेतुत्वेन विद्यमानलिङ्गस्यापरामर्शदशायामनुमितिमपलप्य तत्परामर्शदशायामेवानुमितेः स्वीकरणीयतया तद्विशिष्टपक्षानुयोगिकसाध्यवैशिष्ट्यस्यानुमितौ भानेन तत्समानकालीनो विद्यमानो वह्निरनुमितौ भासेतेत्यर्थः । वस्तुगत्याऽतीतानागतहेतुकानुमितौ अतीतानागतलिङ्गज्ञानस्यैव जनकत्वादतीतानागतवह्निरेव सिद्ध्यति तत्र यदि व्यभिचारवारणार्थमुक्तस्य वर्तमानलिंगस्य हेतुत्वमादृतं तदा ज्ञायमानस्यैव तस्य हेतुत्वं स्वीकरणीयमिति तत्कालीनो वर्तमानोऽपि वह्निर्भासतामिति भावः । वर्तमानस्य प्रागभावादेर्लिङ्गत्वेऽपि कथितवर्त्तमानवह्न्याद्यनुमानापत्तितादवस्थ्यादर्थत्यादिशंकाया असङ्गतिरतस्तादृशापत्तिमुद्धरति दीधितौ । तस्य चेति । विरोधिकालावच्छेदेनेति । यदा यत्र धूमप्रागभावस्तदुत्तरं तत्र वह्निरिति विभिन्नकालमन्तर्भाव्य व्याप्तिग्रहादित्यर्थः । न तत्कालीनसाध्यसिद्धिः । न वर्त्तमानप्रागभावादिकालीनसाध्यस्यानुमितिरित्यर्थः । विभिन्नकालाघटितव्याप्तिविषयकपरामर्शस्यैव हेतुसमानकालतया साध्यभासकत्वादिति भावः ।

(चि०) अपि च न धूमप्रागभावादि लिङ्गं न वा तद्धीरनुमितिकारणम्, प्रागभावादीनां व्यर्थत्वात् आवश्यकधूमादिज्ञानादेवानुमितिसम्भवाच्च । किञ्च लिङ्गं नानुमितिमात्रे हेतुः, लिङ्गं विनाऽपि धूलीपटलाल्लिङ्गभ्रमेणानुमित्युत्पत्तेः । नापि लिङ्गं प्रमानुमितौ, परामर्शोऽनुमितिमात्रे हेतुः, तद्विशेषप्रमात्वाप्रमात्वाभ्यामेवानुमितितथात्वात् । यत्सामान्ये यत्सामान्यं प्रयोजकं तद्विशेषे तद्विशेषस्य प्रयोजकत्वा-

त् । अथ परामर्शस्य प्रमात्वं विद्यमानलिङ्गविषयत्वं तथा चायातं लिङ्गस्य प्रमानुमितिहेतुत्वमिति चेन्न । भाविना भूतेन वा यदा कदाचिद्विद्यमानेनापि लिङ्गेन परामर्शप्रमात्वसम्भवान्नानुमितिपूर्वसमये तत्प्रमात्वानुरोधेन लिङ्गस्य सत्त्वं कारणत्वं वा । धूमकालीनवह्न्यनुमानं च यदा यत्र धूमस्तदा तत्र वह्निरिति व्याप्तिज्ञानादेव । अथ वा धूमकालः पक्षतावच्छेदकः पक्षतावच्छेदकधर्मसमानाधिकरणं च पक्षधर्मबलात् साध्यं सिध्यतीति धूमकालीनवह्निसिद्धिः ॥

(दी०) अपि चेत्याद्यभ्युपगमवादः । नियतसामानाधिकरण्यरूपाया व्याप्तेः प्रागभावादौ दुरपवादत्वात् । धूमप्रागभावत्वादिकं नावच्छेदकमिति चेत् ? किं चातः? न चैतदपि, व्याप्तेरवच्छिन्नत्वनियमात् परिशेषेण तस्यैव तथात्वात् अन्यथा धूमादिवृत्तिव्याप्तीनामपि धूमत्वादिकमवच्छेदकं न स्यात् । अथ स्वव्यापकसमानाधिकरणं व्याप्यं व्यापकत्वं च तद्धर्मविशिष्टसमानाधिकरणाभावप्रतियोगित्वत्वावच्छिन्नप्रतियोगिताकाभाववत्त्वादिकं स च विशेषणं धर्मो व्याप्त्यवच्छेदकः ।

(गा०) धूमनिश्चयं विनाऽनुमितेरसिद्धिरतो मूले ऽतीतभाविदिनवृत्तितया निश्चितादिति । अतीतदिनावच्छेदेन भाविदिनावच्छेदेन वा पक्षवृत्तितया निश्चितादित्यर्थः । धूमस्य वर्तमानतया निश्चये प्रागभावध्वंसयोर्निश्चयसम्भवेन लिंगत्वसंभवाद्वर्त्तमानतया संदिग्धादिति । पक्षवृत्तितयाऽनिश्चितत्वेन प्रागभावादेरलिङ्गत्वमुक्त्वा पक्षवृत्तितयाऽज्ञातत्वेनालिङ्गत्वस्थलमाह । किं चेति । भूतभाविवर्त्तमानत्वाविषयात् । पर्वते वर्त्तमानध्वंसप्रागभावप्रतियोगित्वाविषयकात् तत्कालावच्छिन्नपर्वतवृत्तित्वविषयकादित्यर्थः । धूमस्यावर्त्तमानत्वलाभाय वर्त्तमानत्वाविषयकत्वाभिधानम् । तस्य वर्तमानत्वे वर्त-

मानत्वाभानस्य अनुमित्यविरोधित्वात् ।

धूमप्रागभावादेर्लिंगत्वस्य विचारासहत्वात् अपि चेत्यादिदूषणं मूलकृतोऽनिर्भरं दर्शयति । अपि चेत्यादीति । अभ्युपगमवादः । धर्मिभेदेऽपि वैयर्थ्याभ्युपगमेनोक्तिः । साध्यसामानाधिकरण्यावच्छेदकरूपायाः व्याप्तेः धूमप्रागभावत्वादेः सामानाधिकरण्यानवच्छेदकत्वे धूमप्रागभावादावसत्त्वसम्भवेनाह । *नियतसामानाधिकरण्यरूपाया इति* । शंकते । धूमप्रागभावत्वादिकमिति । नावच्छेदकमिति । गौरवेण व्याप्यतानवच्छेदकमित्यर्थः । तथा च न तदवच्छिन्नं लिंगमिति भावः । किं चेति । धूमप्रागभावत्वादेर्लिङ्गतानवच्छेदत्वेऽपि व्याप्तिपक्षधर्मतावत्त्वरूपलिंगत्वेन प्रागभावादेरनुमितिहेतुताया दुर्वारत्वादिति भावः । प्रौढ्या तत्त्वस्यापि लिंगतावच्छेदकत्वं व्यवस्थापयति । न चेतदपीति । परिशेषेण । धूमप्रागभावाद्यवृत्तिधूमत्वावच्छिन्नत्वबाधसहितावच्छिन्नत्वहेतुना प्रागभावादिनिष्ठव्याप्तौ धूमप्रागभावत्वाद्यवच्छिन्नत्वासिद्धा । तस्यैव । धूमप्रागभावत्वादेरेव । तथात्वात् । तथात्वसिद्धेर्व्याप्यतावच्छेदकत्वसिद्धेरिति यावत् । अन्यथा । व्याप्तेरवच्छिन्नत्वानियमे ।

व्याप्तिर्नाव्यभिचारितसामानाधिकरण्यं किं तु स्वव्यापकसाध्यसामानाधिकरण्यं तथा च धूमप्रागभावादिनिरूपिता व्यापकता न प्रसिद्ध्यतीति न तस्य व्याप्यतेति शंकते । अथेति । अभावत्वादिकमित्यादिना स्वसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकत्वत्वावच्छिन्नाभावपरिग्रहः । विशेषणमिति । व्यापकताघटकसामानाधिकरण्यप्रतियोगिनि विशेषणमित्यर्थः । व्याप्त्यवच्छेदक इति । व्यवह्रियत इति शेषः । एवं च व्याप्तेः स्वरूपसंबंधात्मकांकिंचिदवच्छिन्नताया अप्रामाणिकत्वेऽपि न धूमत्वादीनां व्याप्यतावच्छेदकत्वानुपपत्तिः ।

(दी०) न च धूमप्रागभावसमानाधिकरणाभावप्रतियोगितात्वादिकं प्रतियोगितावच्छेदकं, गौरवादपि तु धूमसमानाधिकरणाभावप्रतियोगितात्वादिकमेव लाघवात् । एवं च न धूमप्रागभावो व्याप्यो न वा तत्त्वं व्याप्यतावच्छेदकम् । अत एव प्रमेयधूमत्वादिकमपि नावच्छेदकमिति चेत्ऽगतं तर्हि जातिसमनि-

यतोपाधिगुणादीनां व्याप्यत्वेन, लाघवेन गोजलादिनिष्ठाभावप्रतियोगितात्वादेरवच्छेदकत्वात् न तु सास्नास्नेहादिमन्निष्ठाभावप्रतियोगितात्वादेर्गौरवात्। प्रस्थितं च गोत्वादिवृत्तिधर्माणामवच्छेदकत्वेन, आपतितं च ते नीलधूमत्वादेर्व्याप्त्यवच्छेदकत्वेन नीलधूमसमानाधिकरणाभावप्रतियोगित्वाद्यभावस्यातिरिक्तत्वात् प्रमेयधूमत्वादिना वह्न्याद्यव्यापकत्वार्थमिव स्नेहत्वादिना व्याप्यत्वार्थमपि लघुगुरुसाधारणस्यावच्छेदकत्वस्योपादाने कुतस्तद्व्युदास इति। तथा चेति। तत्रैव क्लृप्तसामान्यकारणस्य विशेषरूपेण हेतुत्वं यत्र कल्प्यकारणतावच्छेदकमपेक्ष्य न गौरवम् अन्यथा विशेषकारणकलापविलयप्रसङ्गादिति भावः। धूमकालीनेत्यादि। सामानाधिकरण्ये कालविशेषस्यापि सम्बन्धघटकतया प्रविष्टत्वादित्यर्थः। यदा यत्रेति। कालिकदैशिकव्याप्तिद्वयज्ञानात्कालदेशयोः साध्यं सिध्यदसति बाधके लाघवादेकमेव सिध्यतीत्यपि वदन्ति। पक्षतावच्छेदकेति। पक्षतावच्छेदककालाद्यवच्छिन्नमित्यर्थः।

(गा०) न चेति। धूमप्रागभावसमानाधिकरणाभावप्रतियोगितात्वादिकं च न प्रतियोगितावच्छेदकमित्यन्वयः। तथा च तादृशप्रतियोगितात्वावच्छिन्नाभावरूपव्यापकत्वस्याप्रसिद्धिरिति भावः। गौरवावधिं दर्शयति। अपि त्विति। अत एव। प्रमेयत्वविशिष्टसमानाधिकरणाभावप्रतियोगितात्वादेर्गौरवेण प्रतियोगितानवच्छेदकत्वादेव। तर्हीति। स्वसमानाधिकरणाभावप्रतियोगितात्वस्य गुरुतयाऽनवच्छेदकत्वेन स्वस्वनिष्ठधर्मयोर्व्याप्यत्वतदवच्छेदकत्वाभाव इत्यर्थः। जातिसमनियतोपाधिगुणानाम्। गोत्वजलत्वादिसमनियतानां सास्नास्नेहादीनाम्। व्याप्यत्वेन। गोत्वजलत्वादिव्याप्यत्वेन गतमित्यनेनान्वयः। गोत्वादिवृत्तिधर्माणाम्। गोत्वत्वादीनाम्। अवच्छेदकत्वेन। व्याप्यतावच्छेदकत्वेन। स्वरूपत एव गोत्वादीनां प्रतियोगितावच्छेदकशरीरनिवेशसंभवेन गोत्वत्वादीनामनिवेशात्। आ-

पतितं चेति । नीलधूमत्वाद्यवच्छिन्नेऽपि स्वयं व्याप्त्युपगमाद्आधिक्येनैव नीलधूमादिति प्रयोक्तुर्निग्रहस्य वक्ष्यमाणत्वान्नेत्युक्तम् । अस्य च वैयर्थ्यस्थले व्याप्तिमनंगीकर्तुरित्यादिः । अतिरिक्तत्वात् । धूमादिसमानाधिकरणाभावप्रतियोगितात्वावच्छिन्नाभावान्यत्वात् । तस्य न्यूनवृत्तित्वादिति भावः ।

ननु तादृशप्रतियोगितात्वादौ पारिभाषिकमभावप्रतियोगितावच्छेदकत्वं निवेशनीयं तच्च गुरुधर्मसाधारणं तथा च तादृशप्रतियोगितात्वविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छिन्नाभावत्वादिरेव पर्यवसितं व्यापकत्वमिति सास्नास्नेहादीनां व्याप्यतोपपत्तिरित्यत आह । प्रमेयेति । यथा प्रमेयधूमत्वावच्छिन्नस्य वह्न्याद्यव्यापकतार्थं प्रतियोगितानवच्छेदकेत्यत्र पारिभाषिकमवच्छेदकत्वं निवेशितं तथा प्रतियोगितात्वे तदवच्छेदकत्वे वा उक्तपारिभाषिकावच्छेदकत्वविवक्षणे इत्यर्थः । तद्व्युदासः । धूमप्रागभावादेरव्याप्यत्वव्युदासः ।

मूले लिंगं विनापि। पक्षे वह्निव्याप्यमात्रासत्त्वेऽपि । लिंगभ्रमेण । व्याप्तिभ्रमेण । परामर्शस्य प्रमात्वे विद्यमानलिङ्गविषयत्वमिति पाकरक्ते श्यामोऽयमिति धियः श्यामत्वांशे भ्रमत्वमित्यभिमानेन आयातं लिंगस्य प्रमानुमितिहेतुत्वमिति लिङ्गप्रमाया नियतपूर्ववर्त्तित्वे लिङ्गस्यापि तथात्वादिति भावः ।

ननु लिङ्गस्य नियतपूर्ववर्तित्वेऽपि यत्सामान्य इत्याद्युक्तनियमात्प्रमापरामर्श एव प्रमानुमितौ हेतुरावश्यक इति कथमेषा शङ्केति शङ्कां निरसितुं भावं पूरयति दीधितौ । तत्रैवेति ।

न च यत्सामान्ये इत्याद्युक्तनियमात्प्रमानुमितौ परामर्शस्य हेतुतासत्त्वेऽपि तस्य कारणतावच्छेदकं विद्यमानलिङ्गविषयकत्वमेवेति विशिष्टकारणताग्राहकमानेन लिङ्गस्यापि कारणत्वं ग्रहीतव्यं तथा चायातं लिङ्गस्य हेतुत्वमिति मूलस्य नासङ्गतिरिति वाच्यम् । यतो विद्यमानलिङ्गविषयकपरामर्शत्वेन न हेतुत्वं गौरवात् अपि तु लिङ्गपरामर्शत्वेन लाघवादिति मूलाभिप्रायेण दीधितिकृता भावो वर्णित इति । अन्यथा विशेषलघुरूपावच्छिन्ने कारणान्तरसम्भवेऽपि गुरुविशेषरूपेण सामान्यकारणस्यैव हेतुत्वे विशेषकारणविलयप्रसङ्गात् ज्ञानादिविशेषप्रत्यक्षानुमित्यादौ स-

न्निकर्षपरामर्शादिविशिष्टमनोयोगत्वाद्विनैव हेतुत्वापत्त्या सन्निकर्षपरामर्शादीनामहेतुत्वप्रसङ्गात् । तथा च लिङ्गत्वापेक्षया विद्यमानलिङ्गज्ञानत्वेनैव कारणतोचितेति भावः ।

मूले पक्षीयधूमकालीनत्वपर्यन्तस्य साध्यांशे भाननिर्वाहाय यदा यत्रेत्यादिसामान्यव्याप्तिरादृता तत्र यत्तत्पदार्थस्याननुगततया पर्वते यदा धूमस्तदा तत्कालावच्छिन्नो वह्निरिति सहचारस्यागृहीतत्वेन तादृशवह्निसिद्धिर्न सम्भवतीत्यालोच्याह । सामानाधिकरण्य इति । कालविशेषस्य स्वसमानाधिकरणधूमकालस्य । सम्बन्धघटकतया । साध्यसम्बन्धघटकतया । तादृशकालावच्छिन्नसंयोगः । साध्यतावच्छेदकसम्बन्ध इति भावः ।

एतादृशसम्बन्धेन पर्वते वह्निसिद्धावेव फलतः पर्वतीयधूमकालीनवह्निसिद्धिः । एतावताऽपि अतीतानागतपक्षीयधूमकालीनत्वभानमादायार्थान्तरनिरासासंभवात् तत्तद्धूमकालस्य पक्षतावच्छेदकत्वं मूलकारोऽङ्गीकरिष्यति ।

मतान्तरमाह । यदा यत्रेति । व्याप्तिद्वयज्ञानादिति । एवं च यदा धूमस्तदा वह्निर्यत्र धूमस्तत्र वह्निरिति मूलस्य योजना । कालदेशयोः पक्षीकृतयोरेतद्धूमकालपर्वतयोः कालिकदैशिकसंबन्धाभ्यामिति शेषः । एकमेव । एकत्वविशिष्टमेव । अत्र कल्पे एतत्काले वह्निसिद्धेः पूर्वं एतत्कालीनवह्नित्वावच्छिन्नस्यासिद्ध्या तद्भेदरूपमेकत्वं लाघवज्ञानादप्यनुमितिः कथं विषयीकरिष्यतीत्यस्वरससूचनाय वदन्तीत्युक्तम् । पक्षतावच्छेदकसमानाधिकरणसाध्यसिद्ध्या नोद्देश्यासिद्धिः तदसमानकालीनस्यापि तत्समानकालसंबन्धिपक्षसंबन्धितया तत्कालसामानाधिकरण्यसिद्धावपि साध्ये तत्कालीनत्वासिद्धेरतः समानाधिकरणपदमवच्छिन्नार्थकतया व्याचष्टे । पक्षतावच्छेदकेति । कालादीत्यादिना नितंबादिरूपदेशपरिग्रहः ।

(चि०) यत्तु व्यापाराभावान्न परामर्शः करणमिति तथैव किं तु व्याप्तिज्ञानं करणं परामर्शो व्यापारः । न च परामर्शस्य संस्कारो व्यापारः, परामर्शस्य चरमकारणत्वेन संस्कारोत्पादनसमये

ऽनुमित्युत्पादनात् । नापि तर्कः, व्याप्तिग्राहकस्य विषयपरिशोधकस्य वा तस्य तदजन्यत्वादिति ॥

इति परामर्शचिन्तामणिः ।

(दी०) किं तु व्याप्तीति । न च स्मरणात्मकपरामर्शस्थले तदसम्भवः । तत्र व्याप्तिविशिष्टानुभवस्य संस्कारद्वारा परामर्शहेतुत्वात, फलाजनकव्यापारस्य फलजनकव्यापारजनकत्वे विरोधाभावात् । न च विशिष्टपरामर्शत्वेन न कारणत्वं व्याप्तिज्ञानत्वेन च न तद्विशिष्टस्मृतिहेतुत्वं न वा विशिष्टस्मृतित्वेनानुमितिहेतुत्वमिति वाच्यम् । व्याप्तिविषयकज्ञानत्वस्मृतित्वाभ्यां विशिष्टविषयकतत्त्वाभ्यां वा हेतुहेतुमद्भावेऽपि व्यापारव्यापारिभावाविरोधात् । न हि द्वारद्वारिणोः फलजनकत्वं येन रूपेण तेन रूपेण तयोर्मिथो हेतुहेतुमद्भावेऽपि नियमो मानाभावात् । इन्द्रियतत्संयोगपदज्ञानपदार्थोपस्थित्यादिषु प्रत्यक्षशाब्दादिकरणव्यापारेषु व्यभिचाराच्च । न चैवं धारावहनस्थले पूर्वपूर्वेषां विशेषणज्ञानानामुत्तरोत्तरतद्द्वारा विशिष्टप्रत्यक्षं प्रति करणत्वापत्तिः । यं जनयित्वैव यस्य यज्जनकत्वं तस्यैव तत्र व्यापारत्वात् ।

(गा०) तदसंभवः । व्याप्तिज्ञानस्य कारणत्वासंभवः । अनुभवात्मकपरामर्शे प्रत्येव विशेषणतावच्छेदकप्रकारकज्ञानविधया व्याप्तिप्रकारकज्ञानस्य हेतुत्वादिति भावः । स्मरणे विशेषणतावच्छेदकविधया व्याप्तिधियोऽहेतुत्वेऽपि स्मरणस्य समानविषयकानुभवजन्यत्वात् प्राचीनानुभवात्मकपरामर्शस्य व्याप्तिज्ञानत्वेन कारणत्वमक्षतमेवेति समाधत्ते । तत्रेति ।

ननु तत्फलजनकव्यापारे तत्फलकरणव्यापारविधया तत्फलाजनकस्य न हेतुतेति नियमः । आचार्यमतेऽपि लिंगव्यापारतयाऽनुमितिजनके परामर्शेऽनुमित्यजनकस्येन्द्रियादिव्यापारस्य हेतुतया व्यभिचार इति तत्फलकरणव्यापारविधयेति । एवं चानुमित्यजनकस्य संस्कारस्यानुमितिजनकपरामर्शे कथमनुमितिकरणस्य व्या-

परितया हेतुत्वमित्याशंकानियमं प्रतिक्षिपन्निरस्यति । फलाजनकेति ।

ननु स्मरणात्मकपरामर्शद्वारा प्राचीनपरामर्शस्य कारणत्वं तदा संभवति यदि तयोर्मिथः कार्यकारणभावावच्छेदकाभ्यां विशिष्य व्याप्तिविशिष्टपक्षज्ञानत्वतत्स्मृतित्वाभ्यां करणव्यापारभावः स्यात् । स्याद्वा कारणतावच्छेदकव्याप्तिज्ञानत्वाद्यवच्छिन्ननिरूपितजन्यतायामनुमितिजनकतायां च विशिष्टस्मृतित्वमवच्छेदकं यद्द्वारा यस्य यत्कारणं तन्निष्ठतत्फलजनकतावच्छेदकावच्छिन्नतत्फलकारणताकमिति नियमस्य तावतैव निर्वाहात् तदेव नेत्याशंकते । न चेति । न कारणत्वमिति । अपि तु व्याप्तिज्ञानत्वेनैवेति शेषः । विशिष्टस्मृतिहेतुत्वम् । विशिष्टस्मृतित्वावच्छिन्नहेतुत्वम् अपि तु व्याप्तिस्मृतित्वावच्छिन्नहेतुत्वमेवेति शेषः । नानुमितिहेतुत्वमिति । व्यभिचारादिति शेषः । व्याप्तिविषयकस्मृतिज्ञानत्वाभ्याम् । व्याप्तिविषयकस्मृतित्वव्याप्तिविषयकज्ञानत्वाभ्याम् । विशिष्टविषयकतत्त्वाभ्याम् । विशिष्टविषयकज्ञानत्वविशिष्टविषयकस्मृतित्वाभ्याम् । वाशब्दोऽनास्थायाम् ।

उक्तनियमस्य प्रामाणिकत्वे विरोधोऽस्त्येवेति तं प्रतिक्षिपति । न हीति । साधकाभावमुक्त्वा नियमे बाधकमप्याह । इंद्रियेति । इंद्रियं इंद्रियत्वेन चक्षुष्ट्वादिना वा प्रत्यक्षे कारणं व्यापारीभूततत्संयोगः तत्तत्संयोगत्वेन तद्धेतुः तेन तेन च रूपेण न तयोर्मिथः कार्यकारणभावः अपि तु संयोगत्वेन द्रव्यत्वेनैव । एवं शाब्दबोधे पदज्ञानं तत्त्वेन करणं व्यापारभूता पदार्थोपस्थितिः पदज्ञानजन्यार्थोपस्थितित्वेन हेतुः तयोस्तत्सम्बन्धिज्ञानत्वेन तत्तत्स्मृतित्वेन परस्परं हेतुहेतुमद्भाव इति व्यभिचारादित्यर्थः ।

न चैवमिति । एवम् । यद्यद्रूपेण मिथो न हेतुहेतुमद्भावः तत्तद्रूपेणापि करणव्यापारभावे । धारावहनस्थले । विशिष्टबुद्ध्यनन्तरं विशिष्टबुद्ध्यन्तरोत्पादस्थले । पूर्वपूर्वेषाम् । प्रथमविशिष्टज्ञानजनकानाम् । उत्तरोत्तरतद्द्वारा । स्वस्वजन्यविशिष्टबुद्ध्यात्मकविशेषणज्ञानान्तरद्वारा । विशिष्टप्रत्यक्षं प्रति । विशिष्टबुद्धित्वेन तदुत्तरविशिष्टप्रत्यक्षं प्रति । करणत्वापत्तिः । विशेषणज्ञानत्वेन करणत्वापत्तिः ।

समाधत्ते । यमिति । यम् । यद्रूपावच्छिन्नम् । यस्य । यद्रूपावच्छिन्नस्य । यज्जनकत्वम् । यद्रूपावच्छिन्नजनकत्वम् । तस्यैव । तद्रूपावच्छिन्नस्यैव । तत्र । तद्रूपावच्छिन्ने । व्यापारत्वादिति । त-

था च विशिष्टज्ञानजनकतावच्छेदकविशेषणज्ञानत्वस्य कारणत्वाभिमततद्रूपावच्छिन्नविशेषणज्ञानजन्यतावच्छेदकत्वाभावो न तद्रूपेण व्यापारताविरहप्रयोजकः अपि तु तद्रूपावच्छिन्नमजनयित्वाऽपि तद्रूपावच्छिन्नस्य विशिष्टधीजनकत्वमेव उत्तरोत्तरविशिष्टबुद्धिव्यक्तिं प्रति पूर्वपूर्वविशिष्टबुद्ध्यात्मकविशेषणज्ञानव्यक्तिद्वारा तज्जनकविशेषणज्ञानव्यक्तीनां तत्तद्व्यक्तित्वेन कारणत्वस्य च नापत्तिः व्यवहितव्यक्तीनां तत्तद्व्यक्तित्वेन कारणताया अप्रामाणिकत्वात् अन्यथा उक्तनियमोपगमेऽप्यप्रतीकारादिति भावः ।

(दी०) यत्तु तथा नियमेऽपि न क्षतिः विशिष्टस्मृतेरपि व्याप्तिविशिष्टज्ञानतया विशेषणव्याप्तिविषयकेण पूर्वानुभवेन संस्कारेण वा जननाद्व्याप्तिविषयकत्वेनैव करणत्वादिति । तन्न । जन्यत्वविशेषितेन संशयसाधारणेन व्याप्तिविशिष्टज्ञानत्वेन तज्जन्यत्वात् नित्यसाधारणेन च व्याप्तिविशिष्टवैशिष्ट्यावगाहिपक्षनिश्चयत्वेनानुमितिहेतुत्वात् । यदि च विशिष्टव्याप्तेःप्रथममनुपस्थितावपि विशेष्ये विशेषणं तत्रापि विशेषणमिति रीत्या परामर्शादनुमितिस्तदा नियतपूर्वोपस्थितिकपदार्थोपस्थितेरेव कारणत्वं वाच्यम् । यत्तु परामर्शजनकत्वेन तत्तद्विशेषणज्ञानानां कारणत्वमिति तन्न । अन्यं प्रति पूर्ववृत्तित्वं गृहीत्वैव तथात्वग्रहेणान्यथासिद्धत्वात् । न च तत्र फलाननुगुणमन्यं प्रतीति वाच्यम्, गौरवात् । नचैवं भ्रमिजनकत्वलक्षणं दृढत्वमपि दण्डे घटजनकतावच्छेदकं न स्यादिष्टत्वात् । दण्डत्वेनैव तथात्वात् । क्वचिद्घटानुत्पादो भ्रमिरूपद्वारविरहात् । क्षुद्रचक्रभ्रमिजननसमर्थान्महाचक्रसमवहिताद्दण्डाद्घटानुत्पत्तौ तत्प्रयोजकताया आवश्यकत्वात् । भ्रमिविशिष्टत्वेन च जनकत्वे चक्रादीनामपि पृथक्कारणत्वं न स्यात् । न स्याच्च घटार्थितया दण्डे निष्कम्पा प्रवृत्तिः, प्रथमं भ्रमेरुपधानानिर्णयात् ।

(गा०)तथा नियमाभ्युपगमेऽपि व्याप्तिज्ञानपरामर्शयोः करणव्यापारभावमुपपादयतां परामर्शस्य व्याप्तिविशिष्टज्ञानत्वेन व्यापारताभिमानिनां मतमुपन्यस्यति । यत्त्विति । न क्षतिः। न प्रकृते क्षतिः। व्याप्तिविशिष्टज्ञानतयाऽनुभवेन संस्कारेण वा जननादित्यन्वयः। विशिष्टज्ञानतयेति । तृतीयार्थोऽवच्छिन्नत्वम् । अनुभवेनेत्यादौ तृतीयार्थो निरूपितत्वं जननं जन्यता तथा चानुभवादिनिरूपितविशिष्टज्ञानत्वावच्छिन्नजन्यताश्रयत्वादित्यर्थः। स्मृतिं प्रति संस्कारद्वारा अनुभवं प्रति साक्षाद्विशेषणधियः पूर्ववर्त्तितया स्मृतिसाधारणविशिष्टबुद्धित्वावच्छिन्नं प्रति विशेषणज्ञानहेतुत्वमिति मते पूर्वानुभवेनेति। तद्रूपावच्छिन्नं प्रति विशेषणविषयकत्वेन संस्काराविसाधारणेन हेतुतेति मतमनुसृत्य संस्कारेण वेति । विशिष्टबुद्धिं प्रति विशेषणविषयकत्वेन हेतुत्वे प्रकृते व्याप्तिज्ञानत्वेन करणत्वमुक्तनियमसत्त्वे न निर्वहतीत्युक्तन्मते करणतावच्छेदके ज्ञानत्वं परित्यजति । व्याप्तिविषयकत्वेनैवेति । व्यापारनिष्ठकरणजन्यतावच्छेदकेऽधिकनिवेशं दर्शयति । जन्यत्वविशेषितेनेति । जन्यनित्यसाधारणधर्मस्य जन्यतानवच्छेदकत्वादिति भावः ।

तत्र न्यूनतां दर्शयति । संशयसाधारणेनेति । तथा च निश्चयत्वानिवेशान्न्यूनता । व्याप्तिविशिष्टज्ञानत्वेनेत्यतोऽपि विशिष्टवैशिष्ट्याप्रवेशान्न्यूनता लभ्यते । तन्निष्ठानुमितिजनकतावच्छेदके न्यूनताधिक्ये दर्शयति । नित्यसाधारणेनेतिनित्यसाधारणेनेत्यनेन जन्यत्वाप्रवेशो दर्शितः। नित्यस्यापि स्वरूपयोग्यस्य सहकारिविरहात्फलानुपधायकत्वमिति भावः। व्याप्तिप्रकारकत्वेन करणत्वोपगमे विशिष्टवैशिष्ट्यावगाहितायाः परामर्शनिष्ठानुमितिजनकतावच्छेदककोटिनिवेशानेनाधिक्यं विशिष्टवैशिष्ट्यावगाहितायाः विशेषणतावच्छेदकप्रकारकत्वावच्छिन्ननिरूपितजन्यतावच्छेदकत्वादिति संशयान्यत्वनिवेशादेवाधिक्यम् । समवायघटितसामानाधिकरण्यप्रत्यासत्त्या हेतुहेतुमद्भावे पक्षविषयकत्वनिवेशाधिक्यं चेत्यवधातव्यम् ।

प्रथमम् । परामर्शपूर्वम् । विशेषणतावच्छेदकविशिष्टविशेषणज्ञानं विना विशिष्टवैशिष्ट्यबोधासंभवादाह । विशेष्ये विशेषणमिति । तादृशबोधे विशेषणज्ञानाविधया प्रत्येकपदार्थोपस्थितेरेव हेतुतया विशे-

कलितानां व्याप्तिघटकपदार्थानामुपस्थित्या परामर्शसंभवादिति भावः । व्याप्तिघटकपदार्थांशे निश्चयत्वपर्यन्तानिवेशेन लाघवाद् व्याप्तिविशिष्टवैशिष्ट्यबोधत्वेनैवानुमितिहेतुता व्याप्त्याद्यंशे संशयाकारबुद्धेश्च न तत्तद्विशिष्टवैशिष्ट्यावगाहिता तत्पूर्वं तद्विशिष्टवैशिष्ट्यबोधजनकतन्निश्चयासत्त्वनियमात् । यत्र च विशेष्ये विशेषणमित्यादिरीत्या परामर्शस्तत्र तदनंतरोत्पन्नविशिष्टवैशिष्ट्यावगाहिपरामर्शादेवानुमितिरित्युक्तिसंभवाद्यदि तदेत्युक्तम् ।

इदमापाततः । विशिष्टवैशिष्ट्यविषयितायाः कारणतावच्छेदके निवेशेऽपि व्याप्त्यभावप्रकारकं ज्ञानं जायतामितीच्छाधीनव्याप्त्यंशेऽनाहार्यसंशयात्मकविशिष्टवैशिष्ट्यावगाहिबोधस्य दुर्वारत्वात् तदंशे निश्चयत्वनिवेश आवश्यकः

न च तादृशेच्छासत्त्वे तद्घटितसामग्र्या बलवत्त्वात् व्याप्तेरेव भानासंभवात्कथं संशयः, व्याप्तिव्याप्त्यभावोभयप्रकारकं भानं जायतामितीच्छायां व्याप्तेरपि भानसंभवादिति।

नियतपूर्वोपस्थितिकेति । तादृशपदार्थाः । व्याप्तिघटकाभावत्वादयः । करणत्वम् । तत्तत्पदार्थज्ञानत्वेन वाच्यम् । परामर्शजनकत्वेनेति । अभावत्वज्ञानत्वादिना हेतुत्वे नानाकारणताप्रसंगात् विनिगमनाविरहेण एकमात्ररूपेण हेतुत्वासंभवात् । परामर्शजनकत्वस्य सर्वसंग्राहकतया विनिगमनाविरहानवकाशादिति भावः ।

अन्यं प्रति पूर्ववर्त्तित्वं गृहीत्वैवेति । परामर्शजनकत्वरूपावच्छेदकग्रहस्य परामर्शपूर्ववर्तित्वग्रहात्मकतया तं विना तेन रूपेणानुमितिपूर्ववर्तित्वग्रहासंभवादिति भावः । फलाननुगुणमिति । तथा च परामर्शस्यानुमित्यनुगुणतया तत्पूर्ववर्तित्वग्रहं विना परामर्शजनकत्वेनानुमितिपूर्ववर्तित्वाग्रहेऽपि न तेन रूपेणान्यथासिद्धिरिति भावः। एवम् । अन्यथासिद्धिशरीरे सामान्यत एवान्यं प्रतीत्युक्तौ । न स्यादिति । उक्तान्यथासिद्धिनिरूपकत्वादिति भावः । इष्टापत्त्या समाधत्ते । इष्टत्वादिति । तदा केन रूपेण घटजनकतेत्याकांक्षायामाह । दण्डत्वेनेति ।

नन्वेवं भ्रमिजननायोग्यात्कोमलादपि दंडाद्घट उत्पद्येतात आह । क्वचिदिति । कोमलदंडे घटार्थिनोऽप्रवृत्तिश्च फलानुपधाननिश्चयादिति भावः । भ्रमियोग्यत्वेन हेतुत्वेऽपि भ्रमिविरहस्य घटानु-

त्पादप्रयोजकतां दर्शयति । क्षुद्रेति । दंडात् । क्षुद्रदंडात् । तत्प्रयोजकतायाः । भ्रमिविरहस्य घटानुत्पादप्रयोजकतायाः । आवश्यकत्वात् । भवतापि स्वीकारात् ।

ननु भ्रम्युपहितत्वेन हेतुतोच्यते तथा च भ्रमिविरहस्य न घटानुत्पत्तिप्रयोजकत्वमुपेयते उक्तस्थले भ्रम्युपहितदण्डव्यतिरेकेणैव घटानुत्पादसंभवादित्यत आह । भ्रमिविशिष्टत्वेनेति । पृथक् । चक्रत्वादिना । भ्रम्युपधानसंदेहेन सकंपप्रवृत्तिसंभवादाह । निष्कंपेति । तादृशप्रवृत्तौ स्वरूपयोग्यतानिश्चयस्य हेतुत्वादिति भावः । प्रथमम् । प्रवृत्तिपूर्वम् ।

(दी०) अस्तु वा भ्रमिप्रयोजकोऽवयवविशेषादिरेव तथा, प्रथमोपस्थितत्वादावश्यकत्वाच्च । अन्यथा घटजनकत्वेनैव भ्रमिजनकतां किमिति न रोचयेः । अत एव सौवर्णवैणवादिदण्डेष्वनुगतदण्डत्वविरहेऽपि न क्षतिः । किं चैवं प्रवृत्तिं प्रति इष्टसाधनताज्ञानजनकत्वेन शब्दादीनां शाब्दबोधं प्रति च तज्जनकाकाङ्क्षादिज्ञानजनकत्वेनानुमानसंस्कारतत्तद्विशेषणज्ञानादीनां कार्यान्तरं प्रति च तज्जनकतत्तत्पदार्थकारणानां तत्तत्पदार्थकारणत्वेन हेतुत्वप्रसङ्गः । तज्जनकत्वेन हेतुत्वे तत्त्वेनैव हेतुत्वं प्रथमोपस्थितत्वादावश्यकत्वाल्लाघवाच्चेति चेत् ? किमिदं प्रकृते पाणिपिहितम् ? इदं पुनरिहावधेयम्—विशिष्टविषयकत्वेन कारणत्वे केवलविशेषणादिविषयकत्वेन न हेतुत्वं तदवच्छिन्नकार्यजनकतावच्छेदकान्तराव्यापकरूपेणैव तदवच्छिन्नं प्रति जनकत्वात् । दर्शयिष्यते हि तथाऽन्यथासिद्धत्वम्, अन्यथा घटत्वाद्यवच्छिन्नं प्रति कपालतत्संयोगादीनां जन्यत्वविशेषितेन शुद्धेन वा द्रव्यत्वगुणत्वादिना विशिष्टवैशिष्ट्यबोधं प्रति च विशेषणतावच्छेदकविषयत्वेन हेतुत्वप्रसङ्गात् । अनुमितिशाब्दबोधचिकीर्षादिकं प्रति च परामर्शाकाङ्क्षाकृतिसाध्यत्वादिज्ञानविषयविशिष्टाविशिष्टतत्तत्पदार्थविषयत्वेन हेतुत्वेऽन-

न्तकार्यकारणभावप्रसङ्गाच्च ।

(गा०) ननु सौवर्णादिदंडसाधारणं दंडत्वंऽन जातिः जातिसंकरादिति भ्रमिजनकत्वमेव तदित्यत आह । अस्तु वेति । भ्रमिप्रयोजकः । भ्रमिजनकतावच्छेदकः । अवयवसंयोगविशेषादिरिति । दार्ढ्याख्यविजातीयावयवसंयोगादिरित्यर्थः । तथा । घटजनकतावच्छेदकः । तस्य त्ववच्छेदकत्वमुभयत्रैव स्वसमवायिसमवेतत्वसंबंधेन समवायेनैव वा दंडावयवानामेव तेन रूपेण हेतुत्वोपगमात् । दंडावयविनोऽहेतुत्वेऽपि क्षतिविरहात् । यत्र च परस्परसंबद्धैर्बहुभिः कोमलदंडैर्दुश्चक्रं भ्रामयति तत्र तेषामेव संयोगे तादृशी जातिरिति । तत्र तेषां तेन रूपेण हेतुता तत्र तदवयवानामपि तादृशसंयोगस्याऽऽवश्यकत्वात् । परंपरासंबंधेन तेषां दंडादावपि सत्त्वेन तेन संबंधेन हेतुतावच्छेदकत्वपक्षेऽप्यदोषः ।

अथैवं तादृशजातेर्द्रव्यानारंभकसंयोगसाधारणतया तदारंभकतावच्छेदकजात्या संकरप्रसङ्गः । तत्र तावद्दंडे दंडांतरारंभोपगमेऽनुभवविरोधात् । दारुवेण्वाद्यारब्धस्य दारुवेण्वादित्वनियमेन दारुत्ववेणुत्वादिजातीनां संकरभिया कोमलदारुवेण्वादिसंवलनस्थलेऽवयव्यंतरोत्पादोपगमासंभवाच्च । अत एव गृहादीनां नैकावयवत्वमिति सिद्धांतः ।

एतेन कोमलदंडैकत्वव्यावृत्तैकत्वगतजातिभेद एव भ्रम्यादिप्रयोजक इत्यपि निरस्तम् । न चानारंभकसंयोगेष्वेव भ्रमिजनकघटप्रयोजिका जातिरुपेयते एकैकदण्डात्तदुत्पादस्थले च तदेकावयवापरावयवयोः संयोगस्य द्रव्यानारंभकतया तस्यैव घटाद्युत्पादप्रयोजकत्वोपगमादिति नारंभकतावच्छेदकजात्या संकरप्रसंग इति वाच्यम् । एवमपि यत्र यादृशकोमलदंडत्रयसंवलनादेव घटादुत्पत्तिर्न तु तदुभयमात्रसंवलनात्तत्र तदुभयसंवलनादपि तदुत्पादप्रसंगो दुर्वारः । व्यक्त्यंतरसंयोगसहकारेण तदुभयसंयोगात्तदुत्पादनिर्वाहाय तादृशसंयोगे जातिभेदोपगमस्यावश्यकत्वात् ।

एतेन दंडचक्रसंयोग एव तादृशी जातिस्तद्रूपत्वेन घटादिजनकतेति निरस्तम् । दंडांतरसंयोगसापेक्षयादृशचक्रदंडसंयोगाच्चक्रं भ्रामयति तन्निरपेक्षतत्संयोगव्यक्तितो घटाद्यापत्तेर्दुर्वारत्वात् । प्रथम-

तक्षकसंयोगादिमत्त्वानिश्चयाभावेन प्रवृत्त्यनुपपत्तेश्चेति चेत् ? तर्हि कोमलदंडादिसाधारणेन पृथिवीत्वेनैव भ्रम्यादिजनकता स्वीक्रियते अतिप्रसंगभंजकः सहकारिविरह एव प्रवृत्त्यतिप्रसंगमपि फलानुपधाननिश्चय एव निराकरोति। यदि च बलवता मारुतेनाभिहतमपि चक्रं भ्रांत्वा घटं जनयति तदा स्पर्शवत्त्वेन द्रव्यत्वेन वा तथात्वं मूर्तत्वजातिपक्षे तु तथैव, तत्परिग्रहायैवादिपदमुपात्तमिति बोध्यम्। एवकारेण भ्रमिजनकत्वं व्यवच्छिद्यते। प्रथमोपस्थितत्वादिति। जनकताग्रहे तदवच्छेदकग्रहस्यापेक्षणीयतया भ्रमिजनकतामपेक्ष्य तदवच्छेदकस्य प्रथममुपस्थितत्वादित्यर्थः। आवश्यकत्वादिति। नियतपूर्ववर्त्तितावच्छेदकधर्मस्यैव जनकतात्मकतया भ्रमिजनकताया घटजनकतावच्छेदकत्वे भ्रमिजनकतावच्छेदकस्य तथात्वावश्यकत्वादित्यर्थः। तथा च जनकतात्वेन तादृशधर्मस्य तथात्वापेक्षया विशिष्य तथात्वे लाघवमिति भावः।

अथागत्या भ्रमिं प्रति अत्यंताजनकसाधारणेन स्पर्शवत्त्वादिना हेतुत्वेऽपि घटं प्रति न तेन रूपेण हेतुत्वमुपपद्यते अत्यंताजनकव्यावृत्तेन भ्रम्युपधायकत्वेनैव हेतुतासंभवात् कथंचिद्भ्रम्युपधायकनिश्चयदशायामेव घटार्थिनां निष्कंपाया अन्यदा तदर्थिनां सकंपाया प्रवृत्तेरुपगंतव्यत्वादित्यत आह। अन्यथेति। अन्यथा। अत्यंताजनकव्यावृत्तये एकजनकत्वेनापरजनकत्वोपगमे। घटजनकत्वेनैवेति। विनिगमनाविरहादिति भावः। अन्योन्याश्रयेण च परस्परजनकत्वेन उभयजनकता न संभवतीति बोध्यम्।

दण्डत्वेन कथितहेतुतामतेऽनिर्भरबीजं स्वयमेवाह। अत एवेति। अनुगतदंडत्वविरहेऽपि सुवर्णत्ववेणुत्वादिजातिसंकीर्णतया साधारणदंडत्वजातिविरहेऽपीत्यर्थः। ननु अन्यं प्रतीत्याद्यन्यथासिद्धिकवलिततया घटजनकत्वेन भ्रमिजनकता न संभवति तत्र चान्यस्मिन्फलाननुगुणत्वविशेषणाद्घटं प्रति भ्रमिजनकत्वेन हेतुत्वमविरुद्धमित्याशंक्य फलाननुगुणत्वविशेषणप्रतिक्षेपाय प्रतिबंदिं दर्शयति। किं चेति। एवम्। फलाननुगुणकार्यजनकत्वेनानन्यथासिद्धत्वे। कार्यांतरम्। घटादिकम्। तत्तत्पदार्थकारणानाम्। दंडचक्रकुलालादिकारणानाम्। तज्जनकत्वेन। इष्टसाधनताज्ञानादिजनकत्वेन। हेतुत्वे।

प्रसक्तेः । तत्त्वेनैव । इष्टसाधनताज्ञानत्वादिनैव । लाघवाच्चेति । न तु तज्जनकत्वेन गुरुतया अन्यथासिद्धिनिरूपकत्वादिति शेषः । प्रकृते । दण्डघटयोर्हेतुहेतुमद्भावस्थले ।

मनसोऽनुमितिकरणतां व्यवस्थापयिष्यन्मूलोक्तव्याप्तेस्तद्घटकपदार्थानां च धियोऽनुमितिकरणत्वं निराकरोति । इदं पुनरित्यादिना । तत्तद्व्यक्त्यादिजनकतावच्छेदकतत्तद्व्यक्तित्वादिव्यापकसामान्यधर्मेण सामान्यधर्मावच्छिन्नतत्तद्व्यक्त्यादिहेतुत्वात्तदवच्छिन्नत्वद्वयं फलतः कार्यताविशेषणम् । स्वस्यापि स्वव्यापकत्वाद्वच्छेदकान्तरेति ।

न च व्याप्तिज्ञानकारणतायां विभिन्नपक्षसाधारणधूमनिष्ठतादृशव्याप्तिज्ञानाव्यवहितोत्तरवह्न्यनुमितित्वं परामर्शकारणतायां तु तत्पक्षकतत्साध्यकपरामर्शाव्यवहितोत्तरानुमितित्वं कार्यतावच्छेदकमिति कथमेककार्यतावच्छेदकावच्छिन्नं प्रति द्वयोर्जनकत्वमिति वाच्यम् । धूमनिष्ठव्याप्तिज्ञानस्य पर्वतपक्षकानुमितिं प्रत्येव नियतव्यापाराभावेनाकरणत्वात् ।

(१)न च धूमव्याप्तिज्ञानाव्यवहितोत्तरं तत्पक्षकतदनुमितित्वं तथाऽस्तु तथाऽपि नैकमुभयजन्यतावच्छेदकमिति वाच्यम् । वह्निव्याप्यो धूमो वह्निव्याप्यालोकवान् पर्वत इति समूहालंबनपरामर्शजन्यानुमितौ धूमव्याप्तिज्ञानकरणिकायां व्यभिचारात् व्यापारसंबन्धेन तदभावात् तस्माद् धूमपरामर्शाव्यवहितोत्तरपर्वतपक्षकवह्न्यनुमितित्वं परामर्शस्येव तस्यापि जन्यतावच्छेदकं वाच्यं तथा सतीदमिति भावः।

ननु जनकतावच्छेदकांतरव्यापकस्यापि नियतपूर्ववर्तितावच्छेदकत्वान्न कथं तस्य जनकतावच्छेदकत्वमित्यत आह । दर्शयिष्यते हीति । तथा । व्यापकरूपेण । अन्यथासिद्धत्वमिति । तथा चान्यथासिद्धिनिरूपकत्वान्न तस्य तथात्वमिति भावः । व्यापकरूपेणान्यथासिद्धत्वे युक्तिमाह । अन्यथेति । नित्यस्य स्वरूपयोग्यस्य फलावश्यंभावनियमपक्षमवलंब्याह । जन्यत्वविशेषितेनेति । तादृशनियमानभ्युपगमपक्षमवलंब्याह । शुद्धेन वेति । हेतुत्वप्रसंगादिति । नियतपूर्ववर्तितायाः अन्यथासिद्ध्यन्तरविरहस्य च तद्रूपावच्छिन्नेऽष्वपि सत्त्वादिति भावः ।

(१) 'न चेत्यादिर्भाव' इत्यन्तः पाठः पुस्तकान्तरे नास्ति ।

विशिष्टाविशिष्टेति । विशिष्टपदार्थोऽभावादिः अविशिष्टपदार्थोऽभावत्वादिः ।

(दी०) न चात्र करणान्तरासम्भवादगत्या परामर्शजनकज्ञानस्य तथात्वं कल्प्यते । चिकीर्षां प्रत्यपि कृतिसाध्यताज्ञानजनकज्ञानस्य तथात्वापत्तेः । तत्र मन एव करणमिति चेत् ? इहापि तदेवास्तु । मनोऽसाधारणकरणकज्ञानत्वेन मानसत्वापत्तिरिति चेत् ? चिकीर्षादिसाधारणतत्करणकत्वस्येव ज्ञानत्वविशेषितस्यापि तस्याप्रयोजकत्वात् । किं तर्हि मानसत्वे प्रयोजकमिति चेत् ? किं नाम प्रयोजकम् ? कारणं चेत् ? न किञ्चित्, कार्यं चेत् ? तत्प्रत्यक्षम् । व्यापकं चेत् ? प्रमेयत्वादि । व्याप्यं चेत् ? तत्सामग्रीजन्यत्वादि । तदवच्छिन्नोत्पत्तिनियामकं चेत् ? तत्सामग्री । करणाभेदे कथं कार्यवैजात्यमिति चेत् ? सामग्रीवैलक्षण्यात् । यथा मनःकरणकानामेव चिकीर्षासुखादीनाम्, यथा वा अग्निकरणकानां पाकजानाम् । कथं तर्हि प्रमाणविभाग इति चेत् ? करणे विशेषकक्रियावैजात्यविशेषादिति विभाव्यताम् ।

(गा०) परामर्शजनकज्ञानस्य । व्याप्त्यादिज्ञानस्य । तथात्वम् । करणत्वम् । चिकीर्षां प्रत्यपीति । तत्रापि करणांतरासम्भवादित्याशयः । चिकीर्षायां करणान्तरसम्भवमाशङ्कते । तत्रेति । इहापि । अनुमितावपि । तदेवास्तु । मन एव करणमस्तु । शङ्कते । मनोऽसाधारणेति । चाक्षुषादेरपि इन्द्रियत्वेन मनःकरणकत्वात्तद्वारणायासाधारणपदम् । मनोऽसाधारणकरणकत्वं च मनस्त्वावच्छिन्नकरणताकत्वं ज्ञानत्वनिवेशाच्चिकीर्षासुखादिव्यावृत्तिः । अप्रयोजकत्वात् । निष्प्रमाणकमानसत्वव्याप्तिकत्वात् । न किञ्चिदिति । मानसत्वस्य जातित्वेनाजन्यत्वादिति भावः । करणभेद एव कार्यवैचित्र्यमिति नियमाभिमानेन शङ्कते । करणाभेद इति । कार्यवैचित्र्यम् । अनुमितिमानसचिकीर्षादिवैजात्यम । सामग्रीभेद एव कार्यवैजात्यप्रयोजको न तु करणभेदमात्रमिति समाधत्ते । सामग्रीति । एतदेव दृष्टान्तेन

द्रढयति । यथेति । पाकजानां रूपरसादीनां करणाभेदेऽपि सामग्रीवैजात्यात् कार्यवैजात्यमित्यनुषंगेणान्वयः । तर्हि । मनसोऽनुमितिकरणत्वे । कथं प्रमाणविभागः । प्रत्यक्षप्रमाणतः पार्थक्येनानुमानप्रमाणस्य परिगणनं मनस इन्द्रियत्वेन प्रत्यक्ष एवांतर्भावादिति भावः । विशेषकेति करणताभेदकेत्यर्थः । एतच्च क्रियावैजात्यविशेषणम् । क्रियावैजात्यात् । प्रत्यक्षप्रमितितोऽनुमितिवैजात्यात् । करणताभेदस्यैव प्रमाणपार्थक्यप्रयोजकत्वादिति भावः ।

अथ वा करणविशेषकेति । करणविशेषणीभूतायाः क्रियायाः पार्थक्यादित्यर्थः । तथा च क्रियारूपविशेषणभेदेनैव विशिष्टभेदव्यपदेश इति भावः ।

(दी०) अपरे तु व्याप्तिज्ञानत्वेन विशिष्टपरामर्शत्वेन वा नानुमितिमात्रं प्रति हेतुता साध्यादिभेदेन व्याप्तेर्भेदात् किं तु पक्षज्ञानत्वेनाभावज्ञानत्वेन ज्ञानत्वेन वा । पक्षोऽपि धर्मिमात्रं पक्षताया अप्यननुगमात् । तत्तत्पक्षतावच्छेदकविशिष्टे वह्न्यनुमितिं प्रति तत्तद्विशिष्टे वह्निव्याप्यवत्तापरामर्शत्वेन हेतुताया आवश्यकत्वे वह्न्यनुमितिमात्रं प्रत्यपि न तादृशपरामर्शत्वेन हेतुता गौरवात्, किं तु वह्निव्याप्तिज्ञानत्वेन लाघवात् । वस्तुतो वह्निज्ञानत्वेनैव तथा अतिलाघवात् । एवं वह्न्यभावानुमितिं प्रत्यपि । एतेनानुमित्यन्तरं व्याख्यातमिति वदन्ति । कृतं पल्लवितेनेति ॥

इति परामर्शदीधितिः ।

(गा०) अनुमितिमात्रं प्रति । अनुमितित्वावच्छिन्नं प्रति । व्याप्तेर्भेदादिति । करणाननुगमेन व्यभिचारादिति शेषः । अभावज्ञानत्वेनेति । अभावत्वज्ञानत्वेनेत्यर्थः । तेन व्याप्तिशरीरे सर्वत्राभावत्वेन पदार्थान्तरभानस्थलेऽपि नानुपपत्तिः । न वा धर्मिनिवेशाधिक्याद्गौरवं विशेषसामग्र्या अतिप्रसंगवारणस्यावश्यकत्वे विषयनिवेशो विफल इत्याशयेनाह । ज्ञानत्वेन वेति ।

ननु पक्षज्ञानत्वस्य पक्षताघटितत्वात्तच्छरीरे च साध्यादिविशेषांतर्भावात्कथमनुगम इत्यत आह । पक्षोऽपीति । पक्षपदार्थोऽपीत्यर्थः ।

धर्मिमात्रमिति । तथा च पक्षतानन्तर्भावाज्ञाननुगम इति भावः । न चैवं धर्मित्वस्य केवलान्वयितया धर्मिविषयकत्वमव्यावर्तकं तथा च कारणतावच्छेदककोटौ निवेशानर्हमिति वाच्यम् । एतदालोक्यैव कल्पांतरानुसरणात् । ज्ञानत्वादेरनुमितिकारणतावच्छेदकपरामर्शत्वव्यापकत्वेऽपि न तेन रूपेणान्यथासिद्धिः परामर्शत्वस्याननुगततया विशेषरूपावच्छिन्नं प्रत्येव जनकतावच्छेदकतया ज्ञानत्वाद्यवच्छिन्नजन्यतावच्छेदकत्वाभिमतशुद्धानुमितित्वावच्छिन्नजनकतानवच्छेदकत्वात् एतदभिप्रायेणैव परामर्शत्वादेरनुमितिसामान्यजनकतावच्छेदकत्वनिराकरणात् ।

अथ ज्ञानत्वेनानुमितिहेतुत्वे संयोगत्वविभागत्वादिनैव कथं न हेतुता विशेषसामग्रीतोऽतिप्रसङ्गवारणस्याऽऽवश्यकतया विनिगमकस्य दुर्लभत्वादिति चेद्गत्या विनिगमनाविरहेण नानाकारणताया उपगमात् ।

यत्तु विनिगमनाविरहेण नानाकारणत्वकल्पनापेक्षया परामर्शत्वाख्यजातिविशेषं कल्पयित्वा तेनैव रूपेणा[illegible]मितिहेतुत्वकल्पनमुचितम् । तेन रूपेण हेतुत्वे च न विनिगमनाविर[illegible]वकाशः कारणतावच्छेदकतयैव तत्सिद्धेः । न च तादृशजातेश्चा[illegible]ुषत्वादिना सङ्करप्रसङ्गः । मानसज्ञान एव तदभ्युपगमात् । चाक्षुषादिपर[illegible]मर्शस्थलेऽपि तदुपनीततत्तत्पदार्थविषयकमानसपरामर्शकल्पनया क्षणकल्याजेनानुमित्युपपादनसम्भवात् । पक्षादिना समं चक्षुरादिसन्निकर्षसत्त्वेऽपि चक्षुर्मनोयोगाद्यभावस्य फलबलेन कल्पनात् चाक्षुषादिसामग्रीविरहोपपत्तेः । चाक्षुषादिपरामर्शानन्तरं तज्जन्यसंस्काराधीनस्मरणात्मकपरामर्शकल्पनेनाऽनुमित्युत्पादनासम्भवेन स्मृतित्वव्याप्यैव कथं न सा जातिरिति तु न वाच्यम् । लाघवाऽभावेऽधिकैकक्षणविलम्बस्याऽन्याय्यत्वात्, अनुमितिपूर्वं स्मृतिकल्पने उभयवाद्यसिद्धतत्तत्स्थलीयस्मृतिसामग्र्या उभयवाद्यसिद्धाया मानसं प्रति प्रतिबन्धकत्वकल्पनाधिक्येन गौरवाच्च । उद्बोधकानामननुगमेन स्मृतिसामग्र्यननुगमात् उभयासिद्धस्मृतिसामग्रीस्थलीयप्रतिबन्धकतयाऽनिर्वाहात् ।

न च परामर्शत्वस्य स्मृतित्वव्याप्यत्वे विशेषकारणतायामपि तज्जातेरवच्छेदकघटकतया तत्र संशयान्यत्वानिवेशेन लाघवं संशयरूपस्मृतेरभावेन तदनिवेशेऽप्यतिप्रसङ्गविरहादिति वाच्यम् । परामर्श-

त्वस्य मानसत्वव्याप्यतामतेऽपि संशये तदनभ्युपगमादेव ततोऽनुमितिप्रसङ्गविरहात्। तन्मतेऽपि विशेषकारणतावच्छेदकगर्भे संशयान्यत्वानिवेशादिति । तदसत् ।

ज्ञान इव संयोगादावपि अनुमितिजनकतावच्छेदकतया जातिविशेषकल्पनसम्भवेन विनिगमनाविरहाऽनुद्धारात् । परामर्शत्वावच्छिन्नस्य व्यापारविरहेण करणत्वासम्भवात् । ज्ञानत्वेन कारणताया आवश्यकत्वाच्च। अत एव विभागत्वादिकमादाय विनिगमनाविरहस्यापि नावकाशः । विभागादीनां परामर्शाजनकतया कारणत्वासम्भवात् ।

एतेन विशेषकार्यकारणतावच्छेदकेऽनुमितित्वनिवेशस्यावश्यकत्वेन तत एव तदवच्छिन्नोत्पत्तेराकस्मिकतावारणादनुमितित्वावच्छिन्नं प्रति सामान्यतो ज्ञानत्वेन हेतुत्वं निर्युक्तिकमित्यपि परास्तम् । विशेषकारणस्य परामर्शादेरनुमित्यकारणतया ज्ञानत्वेन तत्कारणताकल्पनस्याऽऽवश्यकत्वादिति कृतं पल्लवितेन ।

विशिष्य पक्षतावच्छेदकमनिवेश्य वह्न्याद्यनुमितिं प्रति वन्हिव्याप्यवत्तानिश्चयत्वेन किञ्चिद्धर्मावच्छिन्नविशेष्यकतन्निश्चयत्वेन वा सामान्यतो हेतुत्वं कस्यचिदभिमतं तद् दूषयति । तत्तत्पक्षतावच्छेदकेति । तर्हि केन रूपेण वन्ह्यनुमितित्वावच्छिन्नं प्रति हेतुतेत्याकांक्षायामाह । किन्त्विति । विशेषसामग्र्या अतिप्रसङ्गस्य वारणस्याऽऽवश्यकत्वे व्याप्तिविषयकत्वनिवेशनमफलमित्याशयेनाह । वस्तुत इति । वन्हिज्ञानत्वेनैवेति ।

न चैवं ज्ञानत्वेनैव न कथं हेतुतोपेयत इति वाच्यम । सामान्यविशेषयोरेकरूपावच्छिन्नजन्यतावच्छेदकत्वाभावनियमात् । वह्न्यभावानुमितिं प्रत्यपि वन्हिज्ञानत्वेनैव हेतुतेत्यनुषङ्गेणान्वयः । तत्पूर्वं वह्न्यभावज्ञानस्याऽऽवश्यकत्वे वन्हिज्ञानस्याप्यावश्यकत्वादिति भावः। अयं चाभ्युपगमवादः तत्तत्पक्षतावच्छेदकावच्छिन्नविशेष्यकवह्न्याद्यनुमितित्वरूपविशेषकारणकार्यतावच्छेदकगर्भे वह्न्यनुमितित्वादिनिवेशादेवोपपत्तेस्तदवच्छिन्नं प्रति हेतुत्वान्तरस्य निर्युक्तिकत्वात्, सुखादिसाधारणजन्यात्मविशेषगुणत्वावच्छिन्नं प्रति मनस्त्वेन कारणताकल्पनात्तत एवानुमितेः सकरणकत्वनिर्वाहेणाऽनुमितित्वावच्छिन्नम्प्रति ज्ञानत्वादिना हेतुत्वमपि निर्युक्तिकमित्याद्यस्वरसबीजमत्र बोध्यमिति।

इति गादाधर्यां परामर्शप्रकरणम् ॥

अथ केवलान्वयिग्रन्थः ।

(चि०) तच्चानुमानं त्रिविधं केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिभेदात् । तत्रासद्विपक्षं केवलान्वयि, तथा हि केवलान्वयिनोऽभिधेयत्वस्य न विपक्षः, अभिधानेऽनभिधाने च विपक्षत्वव्याघातात्।

(दी०) केवलान्वयीत्यादि । केवलान्वयिसाध्यकादीत्यर्थः । तत्र । तेषु मध्ये । असद्विपक्षम् अत्यन्ताभावाप्रतियोगिसाध्यकं केवलान्वयि, एवमगृहीतान्वयव्यतिरेकिसाध्यकं केवलव्यतिरेकि, गृहीतान्वयव्यतिरेकिसाध्यकमन्वयव्यतिरेकि ।

(गा०) अनुमानविभागपरमूलग्रन्थे केवलान्वयिपदस्य प्रसिद्धार्थकत्वे ज्ञानकरणतापक्षे ज्ञानस्य केवलान्वयित्वाभावादसंगतिः । लिंगकरणतापक्षेऽपि केवलान्वयिसाध्यकव्यतिरेकिहेतोरसंग्रह इति तस्य तुरीयतापत्तेः ।

अथाऽन्वयव्यतिरेकिलक्षणे व्यतिरेकिपदस्य यथाश्रुतार्थकतया गृहीतसाध्यसहचारव्यतिरेकप्रतियोगित्वमेवाऽन्वयव्यतिरेकित्वमस्तु तथा चोक्तहेतुरपि अन्वयव्यतिरेकिण्येवाऽन्तर्भवतु । न चैवमसद्विपक्षं केवलान्वयीति मूलोक्तलक्षणविरोधः । विपक्षपदस्य साध्याभाववदर्थकतया प्रसिद्धत्वेन साध्ये केवलान्वयित्वस्यैव ततो लाभादिति वाच्यम् । तथा हि केवलान्वयिनोऽभिधेयत्वस्य न विपक्ष इति लक्षणसंगमने विपक्षपदस्य साध्याभाववदर्थकत्वेऽभिधेयत्वस्यानन्वयेन तस्याऽभाववन्मात्रार्थकताया आवश्यकत्वात् लक्षणस्थतत्पदस्याऽपि तदर्थकतौचित्यात्। न च साध्यस्य केवलान्वयितायां केवलान्वय्यनुमानानंतर्भावे तत्र साध्यसंदेहरूपपक्षतायाः साध्याभावाप्रसिद्ध्याऽसंभवादनुमित्यनिर्वाहशङ्काया अग्रिमाया असंगतिरिति वाच्यम्। हेतोः केवलान्वयित्वे साध्यस्याऽपि तथात्वमावश्यकमन्यथा सद्धेतुत्वानिर्वाहादिति तदा-

शङ्कासङ्गतेरिति चेन्न। तादृशहेतोरन्वयव्यतिरेकित्वे तादृशहेतुकानुमानस्य मीमांसकैरभ्युपगन्तव्यतया तेषां साध्याभाववदवृत्तित्वस्य व्याप्तित्वाभ्युपगमे विरोधादतो व्याचष्टे । केवलान्वयीति । साध्यकादीत्यादिपदात्केवलव्यतिरेक्यन्वयव्यतिरेकिसाध्ययोः संग्रहः । तत्र व्यतिरेकित्वाविशेष्यतया साध्यानन्तर्भावे केवलान्वयिलक्षणे साध्यान्तर्भावेण केवलान्वयिसाध्यकव्यतिरेकिहेतोः केवलान्वय्यनुमानतया तत्र साध्यसहचाराग्रहदशायां केवलव्यतिरेकिलक्षणं तद्ग्रहदशायाञ्चाऽन्वयव्यतिरेकिलक्षणमतिव्याप्तं स्यादिति तदुभयलक्षणेऽपि साध्यनिवेशः ।

यद्यपि केवलान्वयिपदं केवलान्वयिसाध्यकार्थतया मूलकृतैव विवक्षणीयं मूलस्थाऽसद्विपक्षपदस्य तदर्थकतायाः असद्विपक्षं अत्यन्ताभावाप्रतियोगिसाध्यकमित्यनेन स्वयं व्याख्येयत्वात् । अत्यन्ताभावाप्रतियोगिसाध्यकत्वस्यैव केवलान्वयिसाध्यकत्वरूपत्वादित्येतद्व्याख्यानमनुपयुक्तम् । न च मूलकृतोऽव्याप्यवृत्त्यत्यन्ताभावादेरभावप्रतियोगितया केवलान्वयित्वासम्भव इत्याक्षिप्य वृत्तिमदत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वमिति साध्यनिष्ठकेवलान्वयित्वनिरुक्त्या सिद्धान्तप्रणयनं केवलान्वयिपदेन साध्यविशेषणप्रतिपादने एव सङ्गच्छते इति तदर्थमेव तादृशव्याख्यानमुचितमिति वाच्यम् । केवलान्वयिपदेन साध्यविशेषणप्रतिपादनस्य मूलेऽभावाद्दीधितिस्थतत्पदार्थनिर्वचनस्य मूलकृतोऽसम्भवात्तादृशासङ्गतेर्दुष्परिहारतया तादृशासंगतिपरिहाराय च पूर्वपक्षे न केवलान्वयीत्यस्य न केवलान्वय्यनुमाने साध्यमित्यर्थकतया वृत्तिमदत्यन्ताभावाऽप्रतियोगित्वं केवलान्वयित्वमिति सिद्धान्तग्रन्थस्य च वृत्तिमदत्यन्ताभावाप्रतियोगित्वं साध्यविशेषणतया केवलान्वयिलक्षणघटकमित्यर्थपरतया व्याख्येयत्वादिति । तथाऽपि केवलान्वयिपदन्न मुख्यार्थपरं किन्तु भाक्तमेवेति सूचयितुं केवलान्वयिसाध्यकेतिशब्देन तदर्थो व्याख्यातः ।

सप्तम्या आधारार्थकत्वासम्भवान्निर्धारणार्थकत्वमाह । तेषु मध्य इति । तत्रेत्यस्य सप्तम्येकवचनान्तत्वे एकानुमानपरामर्शकत्वभ्रमेण वर्णनीयनिर्धारणार्थकत्वानुपपत्तिशंका स्यान्निर्धारणस्य समुदायगर्भत्वादित्यतो व्याचष्टे । तेष्विति ।

यद्यपि तत्रेत्यस्य तस्मिन्नित्येकवचनान्तत्वेन वर्णनमपि संगच्छते केवलान्वय्यादित्रयस्य तत्पदपरामर्शनीयस्यैकवचनार्थैकत्वविरहेऽपि तदविवक्षया सामंजस्यात् । अत एव घटादेरामद्रव्यस्य परमाणौ पाक इति भाष्ये षष्ठ्येकवचनस्य निर्धारणार्थकतया आचार्यव्याख्यानमपि संगच्छते । तत्रानुमानमिति प्रकृतमूलेऽपि एकत्वाविवक्षया एकवचनसंगतिः । तथापि तत्राऽनुमानमित्यपेक्षया सन्निहितकेवलान्वय्यादिपदेन प्रत्येकमुपस्थापितस्याऽनुमानत्रयस्योपस्थापकं तत्पदमित्याशयेन बहुवचनादरः । उद्देश्यतावच्छेदकशून्ये सामान्यधर्मात्मकत्रितयत्वावच्छिन्ने केवलान्वयित्वव्यवच्छेदबोधकतयैव निर्धारणत्वसम्भवात् । त्रित्वार्थकबहुवचनं विना तादृशसामान्यधर्मानुपस्थितेः प्रत्येकपर्याप्तधर्मस्य सामान्यत्वाभावेन एकवचनासङ्गतेः । अत एव घटपटयोर्मध्ये घटो दण्डजन्य इत्यादौ निर्धारणानुरोधेन नियमतो द्विवचनापेक्षेति ।

असद्विपक्षमित्यत्र विपक्षेऽसत्त्वस्याऽप्रसिद्ध्या दुर्ग्रहत्वमाशङ्क्य व्याचष्टे । अत्यन्तेति । अत्यन्ताभावाप्रतियोगितत्तत्साध्यकानुमितिकरणं तत्तत्साध्यककेवलान्वय्यनुमानमित्यर्थः ।

यद्यपि विपक्षपदस्य साध्याभाववदर्थकतया तत्राऽभावाधिकरणत्वप्रवेशेन वृत्तिमदभावाप्रतियोगित्वमेव केवलान्वयित्वमिति लभ्यते । तथाऽप्याकाशरूपाभावप्रतियोगितयाऽऽकाशाभावस्य केवलान्वयित्वानुपपत्तेः पूर्वपक्षे शङ्कनीयतया तच्छंकाया विपक्षपदस्य साध्याभावमात्रपरत्वाभिमानमूलकतयैव संगमनीयतया तदाशयेनैव वृत्तिमत्त्वानन्तर्भावः । वृत्तिमदत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वमिति च सिद्धान्तग्रन्थे मूलकृता तादृशाभिमानो निराकरिष्यते ।

असत्सपक्षं केवलव्यतिरेकीति व्यतिरेकिग्रन्थे वक्ष्यमाणकेवलव्यतिरेकिलक्षणस्याऽसन्सपक्षो निश्चितसाध्यवान् यस्येति यथाश्रुतार्थेऽपि अप्रसिद्धिमाशङ्क्य प्रसंगादधुनैव तद्विवृणोति । एवमगृहीतेति । अगृहीतस्तदाऽनिश्चितः, अन्वयो हेतुसहचारो यत्र एवंभूतं व्यतिरेकप्रतियोगि प्रकृतं साध्यं यत्र तत्कालावच्छिन्नप्रकृतहेतुसहचारनिश्चयविषयत्वाभाववद्यति·

रेकप्रतियोगिप्रकृतसाध्यकानुमितिकरणमिति तु फलितार्थः । अयोगोलकमात्रे वह्निप्रसिद्धिदशायां धूमहेतुकतदनुमानस्य संग्रहाय निश्चये प्रकृतहेतुसहचाराविषयकत्वानिवेशनम् । अन्वयसहचारनिश्चयदशायामपि कालान्तरीणतन्निश्चयविषयत्वाभावमादायाऽतिप्रसङ्गवारणायाऽभावे तत्कालावच्छिन्नत्वविशेषणम् । तत्कालीनहेतुसहचारनिश्चयस्य यो विषयस्तदन्यत्वस्य च न साध्यविशेषणत्वसम्भवः । यदा कुत्राऽपि प्रकृतहेतुसहचारनिश्चयो नास्ति तदाऽप्रसङ्गात् । निश्चये तत्पुरुषीयत्वमपि निवेशनीयम् अतो व्यतिरेकितादशायामप्यन्ततो भगवतः सहचारनिश्चयस्य सत्त्वेऽपि नाऽसंभवः । कालविशेषसाध्यविशेषैरिव पुरुषविशेषैरपि नियंत्रितं व्यतिरेकित्वमिष्यत एव । न चैवं यस्य पुंसः प्रकृतहेतुसहचारनिश्चयः क्वचिदपि कदाऽपि न प्रसिध्यति तं प्रति तद्धेतुकं किमप्यनुमानं व्यतिरेकि न स्यादिति वाच्यम् । एवं सति तत्कालावच्छिन्नस्वविषयकतद्धेतुसहचारनिश्चयाभाववत्तत्पुरुषकत्वस्य साध्यविशेषणत्वोपगमात् । तादृशं च सदनुमाने साध्यमप्रसिद्धं यद्विषयकप्रकृतहेतुसहचारनिश्चयो न प्रसिध्यति, सर्वेषामेव साध्यानामन्ततो भगवतः प्रकृतहेतुसहचारनिश्चयस्यावश्यकत्वात् । एतत्कल्पे तत्कालीनतादृशनिश्चयवदन्यत्वेनापि पुरुषविशेषणं सम्भवति तत्कालीनतादृशनिश्चयस्याऽन्ततो भगवत्येव प्रसिद्धिः ।

साध्ये व्यतिरेकप्रतियोगित्वानिवेशश्चाऽन्वयसहचाराग्रहदशायामपि केवलान्वयिसाध्यकस्योक्तकेवलान्वय्यनुमानलक्षणाक्रान्ततयाऽत्राऽलक्ष्यत्वात्तद्वारणाय । न च यत्र व्यतिरेकसहचारमात्रेण व्याप्तिग्रहस्तत्केवलव्यतिरेक्यनुमानं तदुक्तं मणिकृता यत्र व्यतिरेकसहचारेण व्याप्तिग्रह इति । एवञ्च यदाऽन्वयव्यतिरेकसहचारयोर्द्वयोरेवाऽग्रहः तदाऽपि हेतोस्तज्ज्ञानस्य वा केवलव्यतिरेकितापत्तिरुक्तलक्षणसत्त्वादिति वाच्यम् । अगृहीतान्वयव्यतिरेकिसाध्यकेत्यनेनाऽन्वयसहचारग्रहानधीनव्यतिरेकिसाध्यकानुमितिफलोपहितकरणत्वस्य विवक्षणीयत्वात् । उक्तस्थले चाऽनुमित्यनुत्पत्त्या फलोपधायकताविरहेणाऽनतिप्रसङ्गात् । अनुमितेस्तद्ग्रहानधीनत्वं तद्ग्रहाधीनव्यापकताग्रहानधीनत्वम् । तेन केवलव्यतिरेकितादशोत्पन्नाया अप्यनुमितेः प्रकृतसाध्यसाधनसहचाररूपाऽन्वयसहचारगर्भव्याप्तिज्ञानप्रयोज्यत्वेऽपि न

क्षतिः। अन्वयसहचारनिश्चयः सर्वत्र सर्वज्ञस्यैव प्रसिद्धः। तदनधीनत्वं सामानाधिकरण्यप्रत्यासत्त्यवच्छिन्नजन्यताशून्यत्वम अतोऽनुमितिमात्रस्येश्वरीयान्वयसहचारग्रहाधीनत्वेऽपि न क्षतिः। यत्साध्यसाधनसहचारो नास्मदादिज्ञानविषयस्तत्र परमेश्वरीयतत्सहचारज्ञाननिरूपितनिरुक्तजन्यत्वाप्रसिद्धावपि योगिज्ञानीयनिरुक्तताद्दशजन्यतायास्तदीयज्ञानांतरे प्रसिद्ध्या सामंजस्यात्। एवं च सहचारज्ञाने तत्कालीनत्वं न निवेशनीयं कालान्तरीयान्वयसहचारज्ञानस्य केवलव्यतिरेकिताद्दशाप्रभवानुमितावप्रयोजकत्वात्। ताद्दशानुमितिमादाय लक्षणसमन्वयस्य कालानिवेशेऽपि सम्भवात्। अन्वयव्यतिरेकसहचारज्ञानयोरनुगतरूपेण व्याप्तिग्रहहेतुत्वसम्भवे केवलव्यतिरेकसहचारज्ञानं यद्व्याप्तिग्रहोपधायकं तत्र कालान्तरीणान्वयसहचारग्रहस्य स्वरूपयोग्यत्वेऽपि न क्षतिः, फलोपधानरूपप्रयोजकताया निवेशनीयत्वाम्। ज्ञायमानलिङ्गकरणतामते तत्पुरुषीयत्वमप्यनुमितौ निवेश्यमन्यथा एकस्य पुंसोऽन्वयसहचारादन्यस्य च व्यतिरेकसहचारमात्राद्यत्रैकलिङ्गकानुमितिस्तत्र तल्लिङ्गस्य व्यतिरेकसहचारमात्राधीनानुमितिमादाय द्वावेव पुरुषौ प्रति केवलव्यतिरेकितापत्तेः। हेतुज्ञानस्यानुमानतामते तत्पुरुषीयत्वमपि न निवेश्यते। तत्साध्यकत्वेन तद्धेतुकत्वेन चानुमितिर्विशेषणीया अतो वह्निधूमसहचारज्ञानानधीनान्यसाध्यकान्यहेतुकानुमितिकरणेऽन्वय्यनुमाने नातिव्याप्तिः। फलोपधानस्य विशेषणत्वोपगमात् लिङ्गकरणतापक्षे कालान्तरीणानुमितिफलोपधानमादायान्वयिताद्दशायां तस्य हेतोर्न व्यतिरेकितापत्तिः। एवं च साध्ये व्यतिरेकित्वविशेषणं यदा केवलान्वयिसाध्यकस्थलेऽभावांशे साध्यीयत्वावगाहिभ्रमात्मकव्यतिरेकसहचारग्रहादनुमित्युपधानं तदाऽतिप्रसङ्गवारणायेति बोध्यम्।

अन्वयव्यतिरेकिलक्षणस्य मूलानुक्तत्वात्स्वयं तदाह। गृहीतेति। पूर्ववद्विग्रहेण तत्कालीनतत्पुरुषीयप्रकृतहेतुसहचारनिश्चयविषयव्यतिरेकप्रतियोगिप्रकृतसाध्यकानुमितिकरणत्वमिति फलितार्थः। प्रकृतहेतुसाध्यसहचारनिश्चयाधीनव्यापकताग्रहप्रयोज्यव्यतिरेकप्रतियोगिप्रकृतसाध्यकानुमितिकरणत्वमिति तु निष्कर्षः। अत्रापि केवलान्वय्यनुमानेऽतिव्याप्तिवारणाय व्यतिरेकप्रतियोगित्वं साध्ये

विशेषणम् ।

ननु व्यतिरेकसहचारमात्रेण यत्र व्याप्तिग्रहस्तस्य केवलव्यतिरेकित्वे तुल्ययुक्त्या यत्रान्वयसहचारमात्रेण व्याप्तिग्रहस्तस्यैव केवलान्वयिसाध्यकस्य व्यतिरेकिसाध्यकस्य च केवलान्वय्यनुमानत्वमुचितमिति मूलोपदर्शितकेवलान्वयिलक्षणं तथाविधकेवलव्यतिरेकिसाध्यकाव्यापकमेव । (१)[एवं साध्ये व्यतिरेकित्वघटितं केवलव्यतिरेकिलक्षणमपि भ्रमात्मकव्यतिरेकसहचारग्रहदशायां केवलान्वयिसाध्यककेवलव्यतिरेकयादावव्यापकम् ।] एवमन्वयव्यतिरेकिलक्षणमपि व्यतिरेकिसाध्यकेऽन्वयसहचारमात्रग्रहदशायां केवलान्वयिन्यतिव्यापकमित्यन्यथैव केवलान्वयित्वादिकं निर्वक्तुमुपक्रमते । व्याप्तिग्राहकेति ।

(दी०) व्याप्तिग्राहकसहचारभेदाद्भेदे त्वन्वयसहचारमात्रगृहीतव्याप्तिकत्वं केवलान्वयित्वम् । तच्च प्रकृतव्याप्तिग्राहकज्ञानविषयसहचारत्वव्यापकान्वयसहचारत्वकत्वं तादृशसहचारत्वव्यापकप्रकृतव्याप्तिघटकसहचारत्वकत्वं वा । गृहीतव्याप्तिभेदाद्भेदे तु प्रकृतहेतुकप्रकृतसाध्यानुमितिहेतुज्ञानविषयव्याप्तित्वव्यापकप्रकृतसाध्यान्वयव्याप्तित्वकत्वं तत्त्वम् । जलं निर्गन्धं पृथिवीत्वव्यापकाभावप्रतियोगिमत्त्वादित्यादौ हेतुतावच्छेदिका च व्याप्तिर्न प्रकृतसाध्यानुमित्यौपयिकी, तद्विशिष्टपक्षधर्मताज्ञानेऽपि व्याप्त्यन्तरबोधं विना निर्गन्धत्वानुमित्यनुदयादिति नाव्याप्तिः ।

(गा०) सहचारभेदात् । सहचारस्यान्वयव्यतिरेकनिरूप्यत्वरूपवैलक्षण्यात् । भेदे । अनुमानस्यान्वयित्वव्यतिरेकित्वरूपवैलक्षण्ये । केवलान्वयितायां व्याप्तिग्राहकसहचारस्य व्याप्तेर्वाऽन्वयनिरूपितत्वाधीनत्वं मणिकारानभिमतं साध्यस्य केवलान्वयित्वनिर्वचनविरोधादिति तस्य तथात्वाभिधानं स्वातन्त्र्येणैवेत्यवधेयम् ।

अन्वयसहचारमात्रेति । लिङ्गकरणतापक्षेऽन्वयसहचारमात्रज्ञानजन्यव्याप्तिग्रहाधीनतदातनतत्पुरुषीयानुमितिकरणत्वं तदा तं पु-

---

(१) कुण्डलितः पाठः पुस्तकान्तरे नास्ति ।

रूपं प्रति केवलान्वयित्वमित्यर्थः । अन्वयव्यतिरेकिण्यतिव्याप्तिवारणाय मात्रपदम् । यत्र च पदार्थान्तरीयसहचारविषयकसमूहालंबनरूपप्रकृतसाध्यसाधनसहचारग्रहादन्यदीयव्याप्तिविषयकः प्रकृतव्याप्तिग्रहो व्यतिरेकसहचारग्रहं विनैव तत्राव्याप्तिर्नाशंकनीया प्रकृतसाध्यसाधनसहचारमात्रविषयताधीनव्याप्त्यवगाहिताप्रयोज्यतत्साध्यविषयकत्वावच्छिन्नतत्पुरुषीयानुमितिकरणत्वं तत्साध्यककेवलान्वय्यनुमानत्वमित्यस्य विवक्षितत्वात् । तत्साध्यतदितरसाध्यविषयकसमूहालम्बनानुमितिकरणत्वं यथा तत्साध्यककेवलान्वयिहेतोस्तथाऽन्यसाध्यकस्य व्यतिरेकिणः केवलान्वयिनो वा हेतोरिति तस्य तत्साध्यककेवलान्वय्यनुमानतावारणाय तत्साध्यविषयकत्वस्य करणत्वनिरूपकतावच्छेदकतया प्रवेशः ।

वस्तुतस्तु तत्साध्यीयत्वमिव तत्साधनीयत्वमपि सहचारे निवेश्यम्, तथा च तत्साधनघटितलक्षणे करणत्वविशेष्यतयाऽपि तत्साधनत्वप्रवेशादुक्तातिप्रसङ्गवारणसम्भवेन तत्साध्यकानुमानलक्षणे तत्साध्यविषयतावदनुमितिकरणमेव निवेशनीयम् । करणत्वविशेष्यतया सहचारनिरूपकतावच्छेदकतया च तत्साधनत्वनिवेश आवश्यकः । अन्यथाऽन्वयसहचारमात्रगृहीतव्याप्तिकेन हेतुना व्यतिरेकसहचारगृहीतव्याप्तिकेन हेत्वंतरेण च यत्रैकसाध्यानुमितिर्जनिता तत्र तत्साध्यविषयकत्वावच्छिन्नतदनुमितिकरणत्वमादाय व्यतिरेकिहेतावतिव्याप्त्यापत्तेः । व्याप्त्यवगाहिताप्रयोज्यविषयतायां तत्साध्यीयत्वनिवेशाद्यत्रान्वयसहचारमात्रग्रहाधीनवह्निधूमव्याप्तिग्रहाद् धूमेन वह्निव्याप्तिविशिष्टधूमस्यानुमितिर्न तु वह्नेस्तदनुमितौ व्याप्तिविशिष्टधूमविषयतायाः साध्यतावच्छेदकवह्निव्याप्तिविषयताप्रयोज्यत्वेऽपि च न तत्करणतामादाय तदानीं धूमस्य वह्निसाध्यककेवलान्वय्यनुमानता ।

व्याप्तिज्ञानस्यानुमानतापक्षे तत्साध्यसाधनसहचारमात्रविषयताप्रयोज्या या व्याप्तिविषयता तद्वत्त्वे सति तत्साध्यानुमितिकरणत्वं तत्साध्यकतद्धेतुककेवलान्वय्यनुमानत्वमित्यर्थः । फलानुपहितव्याप्तिज्ञानवारणाय विशेष्यदलम् । धूमधर्मिकवह्निव्याप्तिविषयकं यज्ज्ञानमन्यहेतुकान्यसाध्यकव्याप्तिविषयकसमूहालम्बनरूपं कारणान्तराभावेन न वह्न्यनुमितिमजीजनदपि तु अन्यानुमितिमेव तत्र

तस्य वह्निसाध्यककेवलान्वय्यनुमानतावारणाय तत्साध्यकत्वमनुमितिविशेषणम् ।

न चैवं धूमालोकयोर्वह्निव्याप्तिविषयकेण यज्ज्ञानेन सहकारिविशेषविरहाद् धूमपरामर्शो न जनितोऽपि त्वालोकलिङ्गकपरामर्श एव तस्यालोकलिङ्गकवह्न्यनुमितिकरणत्वमादाय धूमलिङ्गकानुमानत्वप्रसङ्गः । धूमलिङ्गकपरामर्शरूपव्यापारोपधायकस्यैव धूमलिङ्गकानुमानव्यवहारविषयतयेष्टापत्तेरयोगादिति वाच्यम् । स्वकरणकानुमितिनिष्ठतत्साध्यविषयकत्वप्रयोजकप्रकृतहेतुनिष्ठतादृशव्याप्त्यवगाहिताया एव निवेशनीयत्वात् । स्वमनुमानत्वेनाभिमतं ज्ञानम् । अनुमित्युपधानप्रयोजकव्याप्त्यवगाहिताकतृतीयलिङ्गपरामर्शवारणाय स्वकरणकत्वमनुमितिविशेषणम् ।

ननु मात्रपदेन व्यतिरेकसहचारत्वावच्छिन्नो यदि व्यवच्छिद्यते तदा केवलान्वयिवाच्यत्वादिसाध्यकानुमानासंग्रहः व्यतिरेकाप्रसिद्धेः । साध्यसाधनसहचारातिरिक्तसहचारत्वावच्छिन्नस्य व्यवच्छेदेऽपि प्रमेयवानभिधेयादित्याद्यनुमानाव्याप्तिर्दुर्वारैव । वस्तुमात्रसहचारस्यैव साध्यसाधनसहचारत्वात् ।

न च साध्यसाधनतावच्छेदकसम्बन्धघटितसाध्यसाधनसहचारातिरिक्तसहचारानधीनव्याप्तिग्राहकत्वविवक्षया न दोषः स्वरूपादिसम्बन्धेन प्रमेयादेः साध्यसाधनभावस्थले समवायादिना तत्सहचारस्यैव निरुक्तसहचारातिरिक्तस्य प्रसिद्धेरिति वाच्यम् । एवमपि सम्बन्धसामान्येन प्रमेयादेः साध्यतास्थलेऽतिरिक्तसहचाराप्रसिद्धेर्दुर्वारत्वात् ।

अथ यावत्सम्बन्धसाधारणं सम्बन्धतावच्छेदकं दुर्लभम्, अस्तु वा तावदन्यान्यत्वादिकं तथा, तथाऽपि व्यतिरेकसहचारघटकतावत्पदार्थानां परस्परोपरागेण या सहचारविषयता तदनधीनत्वस्य, यत्र प्रमेयाभावस्तत्राभिधेयत्वाभाव इति भ्रमासिद्धौ च साध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नोपरागेण या सहचारविषयता तदन्यसहचारविषयतानधीनत्वस्यैव तदनुरोधेन विवक्षणीयतया नानुपपत्तिः । प्रमेयवानभिधेयादित्यादौ यत्र धूमस्तत्र वह्निरित्यादिसहचारज्ञानीयसहचारविषयताया एव निरुक्तसहचारविषयतातिरिक्तायाः प्रसिद्धेरिति चेत् ? एवमपि यत्र प्रथममन्वयस-

हचारधीजन्यैका व्याप्तिधीरनन्तरं च सहचारान्तरविषयकज्ञानाधीनाऽपरा व्याप्तिधीस्ततोऽनुमितिस्तत्रान्वयसहचारमात्रज्ञानाधीनव्याप्तिधियमादायानुमानस्य केवलान्वयित्वप्रसंगः। स्वप्रयोजकव्याप्त्यवगाहितात्वव्यापकतादृशसहचारविषयतातिरिक्तसहचारविषयत्वाप्रयोज्यताकानुमितिकरणत्वविवक्षणेन तत्स्थलीयानुमितिप्रयोजकद्वितीयज्ञाननिष्ठव्याप्त्यवगाहितायां व्यतिरेकसहचारविषयत्वाप्रयोज्यताविरहेण तस्याः स्वपदेनोपादानासम्भवादतिव्याप्तिवारणेऽपि गौरवमिति मात्रपदस्य तदतिरिक्तानधीनतार्थकतां परित्यज्य व्यापकत्वान्तर्भावेण समुदितमन्यथा व्याचष्टे। तच्चेति।

प्रकृतेति। स्वनिष्ठसाध्यविधेयकत्वप्रयोजक(१) प्रकृतव्याप्त्यवगाहिताप्रयोजकसहचारविषयतात्वव्यापकान्वयसहचारविषयतात्वकानुमितिकरणत्वमित्यर्थः, स्वमनुमितिः। प्रकृतसाध्यसाधनसहचारत्वेनान्यवस्तुज्ञानस्यापि व्याप्तिग्राहकत्वात्प्रमेयत्वादिना सहचारविषयकज्ञानस्य चातथात्वादन्वयसहचारादेर्विषयस्य न व्याप्तिभानप्रयोजकतेति सहचारस्थले तद्विषयतानिवेशः। साऽपि सहचारत्वावच्छिन्नविषयतात्वेन प्रवेश्या अन्यथा सहचारत्वेन वस्त्वंतरावगाहिभ्रमाधीनव्याप्तिग्रहस्थले वास्तवसहचारविषयतायाः व्याप्तिभानाप्रयोजकतयाऽव्याप्त्यापत्तेः। अन्वयसहचारविषयतात्वमपि साध्यसाधनतावच्छेदकावच्छिन्नविषयतानिरूपितविषयतात्वरूपं बोध्यमन्यथा उक्तभ्रमस्थलस्यैवासंग्रहात्। यत्र च साध्यतावच्छेदकरूपेण साध्यादिभिन्नमेवावगाहमानात्सहचारग्रहाद्व्याप्तिधीस्तत्संग्रहानुरोधेन वास्तवसाध्यसाधनसहचारविषयतामुपेक्ष्य साध्यताद्यवच्छेदकावच्छिन्नविषयतापर्यन्तनिवेशः। अत एव सहचारघटकसम्बन्धविशेषानिवेशेऽपि समवायविषयित्वादिना प्रमेयाभिधेययोः साध्यहेतुभावस्थले व्यतिरेकसहचारे साध्यसाधनसहचारत्वसत्त्वेऽपि व्यतिरेकिणि नातिप्रसङ्गसम्भवः।

परं तु भावाभावसाधारणेनाभावत्वेन यत्र संयोगसमवायाभ्यां हेतुसाध्यभावस्तत्र व्यतिरेकिणि व्यतिरेकसहचारविषयतायामुक्तान्वयसहचारविषयतात्वसत्त्वेनातिव्याप्तेर्वारणायैव साध्यतावच्छे-

(१) स्वप्रयोजकेति पु० पा०।

दकसम्बन्धसाधनतावच्छेदकसम्बन्धयोरन्यतरः प्रवेशनीयः ।,

अत्र साध्यतावच्छेदकावच्छिन्नसाधनतावच्छेदकावच्छिन्नयोरेकतरोपरागेण सहचारविषयताया निवेशादेव व्यतिरेकसहचारविषयतायाः प्रायशो वारणसम्भवेऽपि जन्यज्ञानाविषयत्ववान् जन्यज्ञानविषयत्वाभावादित्यत्र यत्र जन्यज्ञानाविषयत्वाभावस्तत्र जन्यज्ञानविषयत्वाभावाभाव इति स्वाभावरूपहेत्वभावत्वेन सहचारप्रतियोगिसाध्याविषयकव्यतिरेकसहचारग्रहात् गृहीतव्याप्तिके कपिसंयोगाभाववान् कपिसंयोगादित्यत्र यत्र कपिसंयोगाभावाभावस्तत्र कपिसंयोगाभाव इति स्वाभावरूपसाध्याभावत्वेन सहचारप्रतियोगिहेतुविषयकव्यतिरेकसहचारग्रहाद् गृहीतव्याप्तिके व्यतिरेकिण्यतिव्याप्तिवारणायोभयोपरक्तसहचारविषयता निवेश्या । उक्तातिव्याप्तिवारणमपि विषयतापर्यन्तनिवेशनफलम् । सहचारस्य निरूपकतावच्छेदकभेदेऽपि अभेदाज्जन्यज्ञानत्वावच्छिन्नविषयत्वाभावाभावत्वाद्यवच्छिन्ननिरूपितसहचारस्यापि जन्यज्ञानविषयतात्वाद्यवच्छिन्ननिरूपिततया यथाश्रुते सहचारनिवेशेनोक्तातिव्याप्तेर्दुर्वारत्वात् ।

अथ प्रतियोगिवैयधिकरण्यावच्छिन्नयोरेव व्यतिरेकयोस्सहचारस्य व्यतिरेकव्याप्तेरिवान्वयव्याप्तेरपि ग्राहकत्वादुक्तस्थले च तादृशविशेषणावच्छिन्नव्यतिरेकसहचाराप्रसिद्धेर्न व्यतिरेकितासम्भवः । न च प्रतियोगिवैयधिकरण्यावच्छिन्नव्यतिरेकयोरनुमित्यौपयिकव्यतिरेकव्याप्तिघटकतया तादृशयोस्सहचारस्तद्ग्राहकोऽस्तु व्यतिरेकसहचारादन्वयव्याप्तिग्रहमते तु तादृशविशेषणावच्छिन्नयोरेव व्यतिरेकयोस्सहचारग्रहस्य तद्ग्राहकत्वं निर्युक्तिकमिति वाच्यम् । व्यतिरेकव्याप्तेर्गमकतापक्षे यादृशसहचारग्रहस्यानुमितावपेक्षणीयता व्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यते इति मतेऽपि फलसाम्यानुरोधेन तादृशसहचारज्ञानापेक्षाया आवश्यकत्वात् । अधिकरणविशेषे व्यभिचारज्ञानविरोधिन एव सहचारज्ञानस्य व्याप्तिग्राहकतया प्रतियोग्यधिकरणे व्यतिरेकसहचारस्यातथाभूतस्य व्याप्तिग्राहकत्वासम्भवाच्चेति चेन्न । प्रतियोगिव्यधिकरणव्यतिरेकाप्रसिद्धावपि भ्रमात्मकतादृशव्यतिरेकसहचारग्रहाधीनज्ञानविषयव्याप्तिकतया व्यतिरेकित्वसम्भवात् ।

अत्र च साधननिष्ठसाध्यसहचारसाध्यनिष्ठसाधनसहचारान्य-

तरत्वस्य तदन्यतरविषयतात्वस्य वा व्यापकत्वं विवक्षणीयमन्यथा
एकविधसहचारमात्रोपादाने ऽन्यविधसहचारगृहीतव्याप्तिकेऽव्याप्तेः।

यत्तु अन्वयव्याप्तिघटकसाधननिष्ठसाध्यसहचारस्यैवान्वयव्याप्ति-
ग्राहकतेष्यते न तु साध्यनिष्ठसाधनसहचारस्येति साधननिष्ठ-
साध्यसहचारत्वस्यैव व्यापकता विवक्षणीया । न च सह-
चारग्रहस्य व्यापकताग्रहे स्वातन्त्र्येण हेतुतामत एवेदं लक्षणम-
न्यथा व्यतिरेकसहचारस्यान्वयव्याप्त्यघटकतया तद्ग्रहस्य तद्ग्राहक-
त्वानुपपत्त्या ऽतिप्रसङ्गापातात् । तथा च साधने साध्यसह-
चारज्ञानमिव साध्ये साधनसहचारज्ञानमप्यविशेषेण व्यापकतां
ग्राहयेदिति साध्यप्रतियोगिकसाधनप्रतियोगिकसहचारद्वयान्यतर-
त्वेनानुगमय्यैवावश्यं निवेशनीयमिति वाच्यम् । उक्त-
सहचारयोरनुगमकरूपस्यागुरोर्दुर्वचतया लाघवात्साध्यप्रतियो-
गिकसहचारज्ञानत्वेनैव व्यापकताबुद्धिहेतुत्वोपगमात् । साध्यध
र्मिकसहचारग्रहस्य व्यापकत्वाग्राहकत्वात् अव्याप्त्यनवकाशात् ।
न च विनिगमनाविरहात्प्रत्येकमेव सहचारग्रहयोर्हेतुत्वं दुर्वार
मिति वाच्यम् । व्याप्तिग्रहे तद्धटकसाध्यप्रतियोगिकसहचारग्रहस्या
वश्यापेक्षणीयत्वेन साधनप्रतियोगिकसहचारबुद्धेर्व्यापकताग्राहक
त्वेऽनुमितिपूर्वं नियमतो द्विविधसहचारज्ञानकल्पने गौरवाल्ला
घवस्यैव साध्यप्रतियोगिकसहचारबुद्धेर्व्यापकताग्राहकत्वे वि
निगमकत्वादिति । तन्न । व्यापकताग्रहे साधनधर्मिकसाध्यसहचार
ग्रहस्यैव हेतुत्वेऽपि यत्र साधनसामानाधिकरण्यविशिष्टसाध्यस
क्वचिद्वैशिष्ट्यावगाही व्यापकताग्रहस्तत्र साधनधर्मिकसाध्यसह
चारग्रहस्य कल्पनीयतया विनिगमनाविरहस्य दुर्वारत्वात् ।

नन्वन्वयव्याप्तिघटकाभावनिष्ठहेतुसहचारग्रहस्य तद्विशिष्टवै
शिष्ट्यावगाहिव्याप्तिबुद्धौ हेतुतया तादृशसहचारस्यापि व्याप्तिग्राह
कतया तत्र च प्रकृतसाधनसहचारत्वासत्त्वेन न तस्य व्याप्तिग्राह
कसहचारत्वव्यापकत्वम् । एवं यत्र साध्यतावच्छेदकं साधनताव
च्छेदकं वा पदार्थान्तरसहचारघटितं तत्र पदार्थान्तरसहचारस्या
व्याप्तिग्राहकतया तत्साधारणव्याप्तिग्राहकसहचारत्वव्यापकत
नान्वयसहचारस्येत्यतो ऽभावनिष्ठसाधनसहचारसाधारणव्या
घटकसहचारत्वेनान्वयसहचारं निवेश्य लक्षणान्तरमाह । तादृशे

यद्यपि पदार्थान्तरीयव्यापकताविषयकप्रकृतव्यापकताज्ञानजनकग्रहविषयपदार्थान्तरीयसहचारवारणाय प्रकृतव्यापकत्वभानप्रयोजकसहचारोऽवश्यं विवक्षणीयः। तत्त्वं च प्रकृतव्यापकताविषयकत्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकविषयताकत्वम्।एवं चाभावादिनिष्ठहेतुसहचारमादायोक्तकल्पेऽपि न दोषावकाशस्तादृशसहचारविशिष्टवैशिष्ट्यबुद्धित्वस्यैव तादृशसहचारज्ञानजन्यतावच्छेदकत्वात् प्रकृतव्यापकत्वावगाहिताया अतथात्वात् । प्रकृतव्यापकत्वविशिष्टसाध्यवैशिष्ट्यावगाहिबोधादिनिष्ठप्रकृतव्यापकताविषयकत्वघटितधर्मावच्छिन्नकार्यतानिरूपितकारणतायां प्रकृतव्यापकताविषयकत्वावच्छिन्नायां तद्घटकाभावादिनिष्ठहेतुसहचारादिविषयताया अवच्छेदकत्वेऽपि जन्यतायां प्रत्यक्षत्वावच्छिन्नत्वं निवेश्य विशिष्टवैशिष्ट्यबोधत्वावच्छिन्ननिरूपितजनकतावच्छेदकविषयताकोक्तसहचारवारणं सुकरमेव । तथाऽपि कालांतरीणप्रकृतव्याप्तिग्रहजनकज्ञानीयव्यतिरेकसहचारविषयताया अपि इदानींतनानुमितिप्रयोजकप्रकृतव्यापकत्वविषयताशालिप्रत्यक्षत्वावच्छिन्ननिरूपितजनकतावच्छेदकत्वं दुर्वारमेव कालान्तरीणव्याप्तिज्ञानविषयताया इदानींतनव्याप्तिज्ञानविषयतातो भेदविरहात् ।

न च तदनुमितिव्यक्त्युपधायकग्रहनिष्ठा या व्यापकत्वविषयताशालिप्रत्यक्षत्वावच्छिन्नकार्यता तत्प्रतियोगिककारणतावच्छेदकत्वविवक्षया नायं दोषः। इदानींतनानुमित्युपधायकेदानींतनव्यापकताग्रहेऽन्वयसहचारमात्रग्रहाधीने कालान्तरीणव्यतिरेकसहचारग्रहकार्यताया असत्त्वादिति वाच्यम् । अन्वयव्यतिरेकसहचारज्ञानयोः प्रत्येकमुक्ततत्तत्सहचारज्ञानाव्यवहितोत्तरत्वं कार्यतावच्छेदककोटौ निवेश्य हेतुताकल्पन एव व्यतिरेकसहचारज्ञानकार्यताया अन्वयसहचारमात्रग्रहाधीनव्याप्तिग्रहावृत्तित्वोपपत्तेः । अव्यवहितोत्तरत्वानिवेशे च व्यभिचारावारकव्यापकत्वविषयकत्वादीनां कार्यतावच्छेदके निवेशस्याप्रामाणिकतया व्यापकत्वविषयकप्रत्यक्षत्वावच्छिन्नकार्यताघटितलक्षणेऽसम्भवात् । कार्यतावच्छेदकेऽव्यवहितोत्तरत्वमनिवेश्य व्यभिचारवारणायान्वयव्यतिरेकसहचारविषयत्वान्यतरवत्त्वेन सहचारज्ञानस्य व्यापकताग्राहकत्वे व्यतिरेकसहचारविषयताया

अन्वयसहचारमात्रग्रहाधीनव्याप्तिग्रहनिष्ठकार्यताप्रतियोगिककारणतावच्छेदकतायाः दुरपह्नवत्वात् अतः स्वोपधानप्रयोजकस्य व्यापकत्वविषयतासम्बन्धस्य प्रयोजकं यादृशसहचारविषयकत्वं तादृशसहचारविषयतात्वव्यापकान्वयसहचारविषयतात्वकत्वमनुमितौ विशेषणम, प्रयोजकत्वं च स्वरूपसम्बन्धविशेषः न तु पूर्वनिरुक्तमित्युपगन्तव्यम् । एवं च कालान्तरीयज्ञाननिष्ठो व्यतिरेकसहचारविषयताप्रयोज्यो व्यापकत्वविषयतासम्बन्धो नेदानींतनानुमित्युपधानप्रयोजक इति सकलकेवलान्वय्यनुमानेऽप्युक्तलक्षणनिर्वाहः, स च न सम्भवति, व्यापकत्वविषयतांतर्गतसाधनसहचारविशिष्टाभावधीविशिष्टत्वविषयतासम्बन्धप्रयोजकाभावनिष्ठसाधनसहचारादिविषयताया अपि अनुमित्युपधानप्रयोजकव्यापकत्वविषयतासम्बन्धप्रयोजकत्वादित्याशयेनान्वयसहचारत्वघटितलक्षणेऽनिर्भरः ।

तादृशसहचारः । प्रकृतव्याप्तिग्राहकज्ञानविषयसहचारः । यद्रूपावच्छिन्नप्रतियोग्यनुयोगिविषयतानिरूपितसहचारविषयता प्रकृतव्याप्तिविशिष्टहेतुतावच्छेदकावच्छिन्नविषयतांतःपातिनी तद्रूपावच्छिन्नप्रतियोग्यनुयोगिविषयतानिरूपितविषयतात्वस्य प्रकृतव्याप्तिग्राहकसहचारत्वावच्छिन्नविषयतात्वव्यापकत्वं विवक्षणीयमतो न पूर्वलक्षणोक्तदोषः । केवलान्वयिन्यपि व्याप्तिग्राहकसहचारादिज्ञानीयसाध्यविषयतायां निरुक्तविषयतात्वासत्त्वादसम्भव इति व्याप्यादिशि सहचारत्वांशानिवेशः ।

यद्रूपावच्छिन्नसहचारविषयता व्याप्तिविषयतांतःपातिनी तद्रूपावच्छिन्नविषयतात्वस्य व्यापकत्वोक्तौ व्याप्तिघटकतावच्छेदकसहचारत्वस्य व्यतिरेकसहचारज्ञानीयसहचारविषयतावच्छेदकत्वादतिप्रसङ्ग इति व्यापकत्वदिशि प्रतियोग्यनुयोगिनोर्विषयताविशेषनिवेशः । प्रतियोग्यनुयोगिनोरेकतरमात्रनिवेशे जन्यज्ञानविषयत्ववान् जन्यज्ञानविषयत्वाभावादित्याद्युक्तव्यतिरेकिणि व्यतिरेकसहचारविषयतायाः साधनताद्यवच्छेदकैकतररूपावच्छिन्नविषयतानिरूपितत्वेनातिप्रसङ्गः स्यादिति उभयरूपावच्छिन्नविषयतानिवेशः।

(१) हेतुतावच्छेदकावच्छिन्नविषयतानिरूपितसहचारविषय-

---

(१) पुस्तकान्तरे नास्त्येष पाठः ।

तात्वेन सामानाधिकरण्यान्तव्याप्तिविषयतांतःपातिताविरहेऽपि न क्षतिः हेतुतावच्छेदकविशिष्टविशेषणतापन्नतादृशप्रकृतव्याप्तिविषयतांतःपातिताया एव निवेश्यत्वात् ।

व्यापकत्वदिशि सहचारत्वनिवेशो न कार्यः प्रयोजनविरहात् । प्रतियोग्यादिनिष्ठविषयताविशेषानिरूपितविषयतात्वपर्यन्तानुप्रवेशलाभायैव चात्र सहचारपदम् ।

अथात्र लक्षणे धूमाभाववान् वह्न्यभावादित्यत्र धूमप्रमाविषयत्वाभाववान् वह्निप्रमाविषयत्वाभावादित्यत्र वा साध्याभावत्वहेत्वभावत्वाभ्यां सहचारदर्शनगृहीतव्याप्तिके व्यतिरेकिण्यतिव्याप्तिर्दुर्वारैव । अन्वयव्याप्तावप्यभावत्वावच्छिन्नसहचारत्वेन सहचारस्य प्रवेशादुक्तसहचारज्ञानीयविषयताया अपि तद्रूपावच्छिन्नत्वात् । व्याप्तिघटकतानवच्छेदकरूपानवच्छिन्नतद्रूपावच्छिन्नप्रतियोग्यादिविषयतानिवेशे च महानसीयवह्नित्वादिना सहचारदर्शनगृहीतशुद्धवह्नित्वाद्यवच्छिन्नव्याप्तिके केवलान्वयिन्यव्याप्तिः । सहचारप्रतियोगिन्यधिकस्य महानसीयत्वादेर्भानेऽप्युक्तसहचारदर्शनस्याधिकं त्वित्यादिन्यायेनोक्तव्याप्तिग्राहकताया निर्विवादत्वात् । न च प्रकृतव्याप्तिग्राहकताप्रयोजकं यद्व्याप्तिघटकतानवच्छेदकरूपावच्छिन्नत्वं तच्छून्यविषयतानिरूपितविषयतात्वस्य व्यापकत्वं विवक्षणीयम । महानसीयवह्नित्वादिना वह्न्यादेः सहचारग्रहाच्छुद्धवह्नित्वावच्छिन्नव्याप्तिग्रहस्थले प्रकृतव्याप्तिघटकतानवच्छेदकमहानसीयवह्नित्वाद्यवच्छिन्नत्वस्य व्याप्तिभानप्रयोजकसहचारप्रतियोगिविषयतानिष्ठस्य व्याप्तिग्राहकतायामनुपयोगाद्विशिष्टव्यतिरेकस्य तादृशविषयतायामक्षततयाऽव्याप्त्यनवकाशात् । दर्शिताभावसाध्यकव्यतिरेकिणि च व्याप्तिभानप्रयोजकसहचारप्रतियोगिविषयतानिष्ठस्याभावरूपसाध्यात्मकप्रतियोग्यवच्छिन्नत्वस्य व्याप्तिग्राहकतायामपेक्षणीयतया न तद्विषयतायां विशिष्टव्यतिरेक इत्यतिव्याप्तेरप्यनवकाश इति वाच्यम् । यद्रूपावच्छिन्नसाध्यसाधनयोः केवलान्वयिनोर्व्यतिरेकसहचारभ्रमः कस्यापि कदाऽपि न प्रसिद्धस्तद्रूपावच्छिन्नसाध्यसाधनकव्याप्तिग्राहकताप्रयोजकतद्व्याप्तिघटकतानवच्छेदकावच्छिन्नत्वस्याप्रसिद्ध्या तद्रूपावच्छिन्नसाध्यसाधनककेवलान्वयिन्यव्याप्तेरिति चेन्न । प्रकृतव्याप्तिघटकतानवच्छेदकरूपनिरूपितत्वप्रकृतव्या-

प्तिग्राहकताप्रयोजकत्वोभयाभाववत्त्वनिष्ठावच्छेद्यतासामान्यकप्रतियोग्यनुयोगिविषयताया व्यापकदिशि निवेशेन सामंजस्यात्। प्रकृतव्याप्तिग्रहसामान्यनिष्ठप्रतिबंधकतावच्छेदकविषयतात्वस्य वा विवक्षणीयत्वात्। तादृशप्रतिबन्धकता च प्रतियोग्यनुयोग्यनुपरागेण सहचारविषयकज्ञानावृत्तित्वेनापि विशेषणीया, तेन धूमाभाववान् वह्न्यभावादित्यादौ यत्र धूमाभावाभावस्तत्र वह्न्यभावाभाव इत्यादिसहचारज्ञानीयसहचारविषयताया आधेयत्वं नाभावाधिकरणीयमित्यादिज्ञाननिरूपितव्याप्तिज्ञानसामान्यनिष्ठप्रतिबंधकतावच्छेदकत्वेऽपि नातिव्याप्तिः। अभावाधिकरणावृत्तिरभाव इति ज्ञानस्य चाहार्यतया तत्प्रतिबन्धकतावच्छेदकत्वं व्यतिरेकसहचाराविषयताया असम्भावितमेव।

ननु व्यतिरेकिणि व्यतिरेकसहचारादेवान्वयव्याप्तिर्गृह्यते तदेव च व्यतिरेकित्वप्रयोजकमिति मतं तन्न युक्तम्। व्यतिरेकसहचारस्य स्वातंत्र्येण व्याप्तिग्राहकत्वे मानाभावादधिकरणविशेषे व्यभिचारशंकानिवर्तनद्वारैव क्वचित्तदुपयोगादन्वयसहचारग्रहं विना तद्घटिताया अन्वयव्याप्तेर्दुर्ग्रहतया केवलव्यतिरेकिविलोपापत्तेश्च।

न च विशिष्टसहचारानुपस्थितावपि तद्घटकपदार्थानां विशृंखलानामुपस्थित्याऽन्वयव्याप्तिधीर्विशेष्ये विशेषणमित्यादिन्यायेन सम्भवत्येवेति वाच्यम्। एवं सति व्यतिरेकसहचारान्वयसहचारयोरुभयोरप्यग्रहे उक्तरीत्या व्याप्तिग्रहसम्भवेन तदनुमानस्य तुरीयतापत्तेः।

अस्तु वा ऽन्यतरसहचारस्य स्वातन्त्र्येणैव व्यापकताग्राहकत्वं तथाऽपि तत्प्रत्यक्ष एव तद्धेतुतया शब्दादिना व्याप्तिग्रहे तदपेक्षाविरहात् शब्दादिजन्यप्रत्येकपदार्थोपस्थितिमूलकग्रहाविषयव्याप्तिकानुमानस्य तुरीयतापत्तिर्दुर्वारैवेति व्यतिरेकिणि व्यतिरेकव्याप्तेरेव गमकता व्याप्तेरन्वयादिनिरूप्यत्वमेवान्वयित्वादिप्रयोजकमिति मणिकारीयमतमेव साधीयः तन्मतमेवावलम्बमानः केवलान्वयित्वं निर्वक्ति। गृहीतव्याप्तिभेदात्। तत्कालीनतत्पुरुषीयानुमित्यौपयिकव्याप्तेरन्वयादिनिरूप्यत्वरूपवैलक्षण्यात्। प्रकृतहेतुकेति। प्रकृतसाध्यतावच्छेदकावच्छिन्नसाध्यविधेयकत्वघटितधर्मावच्छिन्नतत्कालीनतत्पुरुषीयानुमितिनिष्ठकार्यतानिरूपितकारणतायां यादृशरूपावच्छिन्नप्र-

कृतहेतुतावच्छेदकावच्छिन्नप्रकारताशालिनिश्चयत्वमवच्छेदकं तादृशरूपानिष्ठविषयतात्वव्यापकप्रकृतसाध्यान्वयव्याप्तित्वावच्छिन्नविषयतात्वकानुमितिकरणत्वं तद्रूपावच्छिन्नसाध्यकतद्रूपावच्छिन्नहेतुकतत्कालीनतत्पुरुषीयकेवलान्वय्यनुमानत्वमित्यर्थः। यत्र व्यतिरेकिणि महानसवृत्तित्वादिना विशिष्टस्य हेतुता तत्र साध्याभावव्यापकाभावप्रतियोगितावच्छेदकतादृशहेतुतावच्छेदकरूपव्याप्तौ धूमव्यापकवह्निसामानाधिकरण्यत्वरूपप्रकृतसाध्यान्वयव्याप्तित्वसत्त्वादतो विषयतापर्यन्तानिवेशः। हेतुतावच्छेदकावच्छिन्नस्य साध्याभावव्यापकाभावप्रतियोगित्वस्य हेतुतावच्छेदकावच्छिन्नविशेषणतापन्नस्य वा तस्य व्याप्तित्वमते एतद्दोषानवकाशेऽप्यखण्डव्याप्त्यप्रसिद्धिस्थले केवलान्वय्यनुमानसङ्ग्रहाय विषयतानिवेशनं बोध्यम्। सदनुमानस्य प्रमात्मकव्याप्तिविशिष्टलिङ्गज्ञानरूपस्यैव लक्ष्यत्वे च यथाश्रुतव्याप्तिरेव निवेश्यते। तेजोविशेषत्वादिना वह्नेर्व्यतिरेकव्याप्तेर्वह्नित्वादिना च तस्यान्वयव्याप्तेर्ग्रहादुभयरूपेण यत्र वह्न्यनुमितिस्तत्र केवलान्वयिनि वह्नित्वावच्छिन्नसाध्यकानुमाने यत्र च धूमत्वावच्छिन्नान्वयव्याप्तेर्द्रव्यविशेषत्वावच्छिन्ने च व्यतिरेकव्याप्तेर्ग्रहादनुमितिस्तत्र केवलान्वयिनि धूमत्वावच्छिन्नहेतुकानुमाने ऽव्याप्तेर्वारणाय प्रकृतसाध्यतावच्छेदकप्रकृतहेतुतावच्छेदकयोर्निवेशः।

ननु पृथिवीत्वादिव्यापकीभूताभावप्रतियोगित्वादिरूपहेतुतावच्छेदकपुरस्कारेण गृहीतान्वयव्याप्तिके तद्रूपावच्छिन्नहेतुककेवलान्वय्यनुमानेऽव्याप्तिः हेतुतावच्छेदकरूपव्यतिरेकव्याप्तावन्वयव्याप्तित्वविरहात्। तादृशहेतुतावच्छेदकावच्छिन्नहेतुमत्तानिश्चयत्वस्यापि तदनन्तरानुमितिजनकतावच्छेदकत्वात्तादृशहेतुतावच्छेदके निरुक्तप्रकृतसाध्यकानुमित्यौपयिकव्याप्तित्वस्याक्षतत्वाच्चेत्यत आह। जलमिति। तद्विशिष्टपक्षधर्मताज्ञानेऽपि। पक्षे तद्विशिष्टवत्तानिश्चयेऽपि। व्याप्त्यन्तरबोधं विना। तद्रूपावच्छिन्नविशेषणतया निर्गन्धत्वव्याप्तिभानं विना। निर्गन्धत्वानुमित्यनुदयादिति।

अयं भावः। निरुक्तनिश्चयत्वस्यावच्छेदकत्वं न स्वरूपसम्बन्धविशेषः व्याप्तित्वेन पदार्थान्तरावगाहिनिश्चयस्याप्यनुमितिजनकतया तदसङ्ग्राहकस्य व्याप्तिविशिष्टवत्तानिश्चयत्वस्य तादृशा-

वच्छेदकत्वासंभवात् किं त्वनतिरिक्तवृत्तित्वम् । एवं च निर्गन्धत्वव्याप्त्यनवगाहिज्ञानसाधारणस्य दर्शितहेतुतावच्छेदकविशिष्टवत्तानिश्चयत्वस्य निर्गन्धत्वानुमितिजनकतातिरिक्तवृत्तित्वात् तत्र च न निरुक्तव्याप्तित्वमिति ।

यद्यपि धूमत्वावच्छिन्नवत्तानिश्चयत्वस्य स्वरूपसम्बन्धरूपावच्छेदकत्वाश्रयत्वमादाय धूमत्वावच्छिन्नहेतुकान्वयिन्यपि लक्षणानुपपत्तेः व्यतिरेकव्याप्त्यवच्छिन्नहेतुकान्वयिपर्यन्तानुसरणमनुचितम् । तथाऽपि यत्किञ्चिद्व्यापकताघटितत्वरूपमन्वयव्यतिरेकव्याप्त्यन्यतरत्वरूपं वा व्याप्तित्वं यदि जनकज्ञानविषये निवेश्यते तदा धूमत्वादौ तद्विरहेण न तदवच्छिन्नहेतुकेऽनुपपत्तिरिति व्यतिरेकव्याप्त्यवच्छिन्नहेतुकस्थले दर्शितरीत्याऽनुपपत्त्युद्धारः ।

इदमुपलक्षणम् । प्रकृतसाध्यीयव्यतिरेकव्याप्त्यवच्छिन्नहेतुके तु केवलान्वयिन्यव्याप्तिवारणाय वक्ष्यमाणयाऽपि रीत्या एतद्दोषोद्धारो बोध्यः ।

ननूक्तरीत्या साध्यान्तरीयव्यतिरेकव्याप्तिहेतुतावच्छेदककेवलान्वयिन्यव्याप्तिपरिहारेऽपि वन्ह्यभाववान् वह्निव्यापकीभूताभावप्रतियोगिन इत्यादौ केवलान्वयिन्यव्याप्तिर्दुर्वारैव । तत्र हेतुतावच्छेदकरूपाया व्यतिरेकव्याप्तेरपि प्रकृतसाध्यकानुमित्यौपयिकत्वात् । तद्विशिष्टवत्ताज्ञानसत्त्वे व्याप्त्यन्तरबोधं विनाऽपि प्रकृतसाध्यकानुमित्युत्पादादत आह । वन्ह्यभाववानिति ।

(दी०) वन्ह्यभाववान् वह्निव्यापकीभूताभावप्रतियोगिमत्त्वादित्यादावन्वयव्याप्तेरवच्छेदिका व्यतिरेकव्याप्तिर्न तु सैवेति नाप्रसङ्गः । अत एवेतरव्यापकाभावप्रतियोगित्वेनाभावप्रतियोगित्वेन वा यल्लिङ्गज्ञानं न प्रकृतसाध्यानुमितिहेतुस्तत् केवलान्वयीत्यपि वदन्ति । एवं केवलव्यतिरेकित्वादिकमपि निर्वाच्यम् । अभिधेयत्वं शब्दशक्यत्वम् । विपक्षत्वव्याघातो विपक्षत्वासिद्धिः ।

(गा०) न तु सैव। व्यतिरेकव्याप्तिरेव। प्रकृतसाध्यकानुमित्यौपयिकीत्यनुषज्यते। प्रकृतहेतुतावच्छेदकविशिष्टविशेषणतापन्नयद्धर्मविशिष्टवत्ताज्ञानत्वं प्रकृतानुमितिजनकतावच्छेदकं तत्त्वमनुमित्यौपयिकत्वं प्रकृते विवक्षणीयमिति भावः।

अथ दर्शितव्यतिरेकव्याप्तिरूपहेतुतावच्छेदकविशिष्टविशेषणतापन्नमेयत्वादिविशिष्टवत्तानिश्चयत्वस्यापि प्रकृतानुमितिजनकतानतिरिक्तवृत्तित्वात् मेयत्वादौ च प्रकृतसाध्यव्याप्तित्वाभावादव्याप्तिर्दुर्वारैव। अनुमितिप्रयोजकविषयताश्रयत्वेन धर्मविशेषणे च व्यतिरेकव्याप्त्यवच्छिन्नान्वयव्याप्तेरप्यनुमित्यौपयिकत्वं दुर्घटं तदनवगाहिनोऽपि व्यतिरेकव्याप्तिविशिष्टवत्ताज्ञानादनुमित्युत्पत्त्या तद्विषयताया अनुमित्यप्रयोजकत्वात्। अन्वयव्यतिरेकव्याप्त्यन्यतरत्वेन यद्धर्मविशेषणे यत्र व्यतिरेकव्याप्तिरप्रसिद्धा तत्साध्यकानुमानाव्याप्तिरिति चेन्न। निरुक्तव्याप्तिविषयतात्वव्यापकव्यतिरेकव्याप्तिविषयतात्वाभावकत्वस्य विवक्षितत्वात्। व्यतिरेकव्याप्तेर्वाच्यत्वादिसाध्यकेऽप्रसिद्धावपि न क्षतिः। खण्डशः प्रसिद्ध्या तद्घटकपदार्थानां विषयताकूटस्य विवक्षणीयत्वात्।

वस्तुतस्तु यद्रूपावच्छिन्नप्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारकनिश्चयत्वमनुमितिकरणतानतिरिक्तवृत्ति तत्त्वमेवानुमित्यौपयिकव्याप्तित्वमित्यस्य विवक्षितत्वात्। मेयत्वादिकं च न तथा मेयत्वाद्यवच्छिन्नवह्निव्यापकाभावप्रतियोगित्वावच्छिन्नप्रकारकस्यापि व्याप्त्यन्तरानवगाहिनोऽनुमित्यजनकत्वात्। यद्धर्मावच्छिन्नाभावत्वेन व्यापकता व्यतिरेकव्याप्तिशरीरे प्रविष्टा प्रकारांशे तादृशहेतुतावच्छेदकाप्रकारकनिश्चयस्यानुमित्यजनकत्वात् तादृशनिश्चयत्वस्य जनकतातिरिक्तवृत्तित्वात्। वह्निव्यापकीभूताभावप्रतियोगित्वसहितस्य जलत्वत्वादेर्हेतुतावच्छेदकता यत्र तत्रान्वयव्याप्तेस्तदवच्छिन्नांशे भानस्यानुमितावनुपयोगात्तत्र केवलान्वयिताया एवानुपगमादपि तु जलत्वत्वाद्यवच्छिन्नलिङ्गकव्यतिरेकिताया एवोपगमात्। एवं च निरुक्तहेतुतावच्छेदकसहितवह्निव्यापकाभावप्रतियोगित्वप्रकारकनिश्चयस्यानुमित्यजनकत्वमित्याशयेनैव वह्निव्यापकाभावप्रतियोगित्वरूपहेतुतावच्छेदकस्यानुमित्यौपयिकव्याप्तित्वनिराकरणम्।

न च धूमव्यापकवह्निसमानाधिकरणरासभवानित्यादिज्ञानादनुमितिवारणाय हेतुतावच्छेदकसहितस्यैव व्यापकसामानाधिकरण्यस्य हेत्वंशे भानमनुमितावुपयुज्यतां साध्याभावव्यापकाभावप्रतियोगित्वस्य च केवलस्यैव भानमुपयुज्यतामिति वाच्यम् । तथा सति द्रव्यत्वाभावव्यापकविशिष्टसत्तात्वावच्छिन्नाभावप्रतियोगिसत्तादिमत्ताज्ञानाद् गुणादौ बाधानवतारदशायां द्रव्यत्वाद्यनुमानापत्तेः । हेतुतावच्छेदकस्य च व्याप्तिधर्मितावच्छेदकतया भानं यदि नोपयुज्यते तदा नोपयुज्यतामिति ।

एतेन केषांचिद्व्यतिरेकव्याप्तिरनुमित्यौपयिकी । न तु सैव । अन्वयव्याप्तिरेव । एवकारोऽप्यर्थे । एवं च तत्र केवलान्वयिता नाभ्युपयते एवान्वयव्याप्तिभानस्याकिञ्चित्करत्वादि(१)(त्यत्रालक्ष्यतया नाव्याप्तिरिति भावः) ति व्याकारोऽव्याकार एव । तन्मते उक्तानुमानस्य वह्निव्यापकाभावप्रतियोगित्वावच्छिन्नहेतुककेवलान्वय्यनुमानत्ववत्तदवच्छिन्नहेतुकव्यतिरेक्यनुमानत्वमपि न सम्भवति तद्रूपावच्छिन्ने व्यतिरेकव्याप्तेरग्रहेण तस्य हेतुतानवच्छेदकत्वात् ।

न च तादृशानुमानस्य वह्निव्यापकाभावप्रतियोगित्वावच्छिन्नलिङ्गकव्यतिरेकित्वासम्भवेऽपि तद्रूपशरीरे यद्रूपावच्छिन्नाभावत्वावच्छिन्नव्यापकत्वं निविष्टं तद्रूपावच्छिन्नहेतुकव्यतिरेकित्वमव्याहतमिति तदेवोपगन्तव्यमिति वाच्यम् । तथा सति ग्रन्थकृतो वह्निव्यापकाभावप्रतियोगिमत्त्वादिति हेतुनिर्देशासङ्गतेरिति चिन्तनीयम् ।

सांप्रदायिकास्तु जलं निर्गन्धमित्यादिकं प्रकृतसाध्यकेत्यस्य व्यावृत्तिप्रदर्शनपरम् वन्ह्यभाववानित्यादिकं तु प्रकृतहेतुकेत्यस्य व्यावृत्तिप्रदर्शनपरमिति वदन्ति । तदसत् । जलं निर्गधमित्यादौ हेतुतावच्छेदकीभूतपृथिवीत्वाभावानुमित्यौपयिकव्याप्तेर्वह्न्यभावसाध्यके हेतुतावच्छेदकीभूतवह्निव्यापकाभावप्रतियोगित्वरूपव्याप्तेरिव प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुकव्याप्तित्वाभावादेव वारणे तत्र प्रकृतसाध्यकत्वनिवेशव्यावृत्त्यसंगतेः ।

न च यदवच्छिन्नाभावत्वेन हेत्वभावनिष्ठा साध्याभावव्यापकता यादृशव्यतिरेकव्याप्तौ प्रविष्टा सा तद्धर्मावच्छिन्नहेतुका व्या-

(१) पुस्तकान्तरे नास्त्येष पाठः ।

प्तिः । एवं जलत्वत्वावच्छिन्नाभावत्वावच्छिन्नव्यापकताघटितव्याप्तेः पृथिवीत्वव्यापकाभावप्रतियोगित्वावच्छिन्नहेतुकत्वविरहेऽपि पृथिवीत्वव्यापकाभावप्रतियोगित्वावच्छिन्नाभावत्वावच्छिन्नव्यापकताघटितव्याप्तेस्तादृशाभावप्रतियोगित्वावच्छिन्नहेतुकतया तादृश्याः पृथिवीत्वव्यापकताघटितव्याप्तेरेव प्रकृते विवक्षणान्न प्रकृतहेतुकेत्यनेन तद्व्यावृत्तिरिति वाच्यम् । एवं सति पृथिवीत्वव्यापकाभावप्रतियोगित्वावच्छिन्नाभावत्वरूपपृथिवीत्वव्यापकतावच्छेदकस्य पृथिवीत्वव्यापकताघटितत्वेनात्माश्रयादवच्छेद्यावच्छेदकभावानुपपत्तेः ।

अवच्छेदकप्रविष्टा पृथिवीत्वव्यापकता जलत्वत्वावच्छिन्नाभावत्वावच्छिन्ना अवच्छेद्यीभूतपृथिवीत्वव्यापकाभावप्रतियोगित्वावच्छिन्नाभावत्वावच्छिन्नपृथिवीत्वव्यापकतातो भिन्नैवेति नात्माश्रय इति चेत्तर्हि हेतुतावच्छेदकीभूतपृथिवीत्वव्यापकाभावप्रतियोगित्वात्तादृशाभावप्रतियोगित्वावच्छिन्नाभावत्वावच्छिन्नव्यापकताघटितात्तद्व्यापकतावच्छेदककोटिप्रविष्टजलत्वत्वावच्छिन्नाभावत्वावच्छिन्नव्यापकताघटितं पृथिवीत्वव्यापकाभावप्रतियोगित्वमन्यदेवेति कथं हेतुतावच्छेदकीभूतव्याप्तेः प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुकव्याप्तित्वम् । तथा च प्रकृतहेतुतावच्छेदकगर्भे तदवच्छिन्नाभावत्वाद्यवच्छिन्नव्यापकतायास्तद्रूपघटितत्वेन कथंचिदपि निवेशासम्भवात् । प्रकृतहेतुतावच्छेदकरूपव्याप्तेः प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुकव्याप्तित्वं दुर्घटमेव ।

अन्ये तु वह्न्यभाववान् वह्निव्यापकीभूताभावप्रतियोगिमत्त्वादित्यादिका प्रकृतहेतुकत्वव्यावृत्तिप्रदर्शनपरा फक्किकैव प्राथमिकी तदुपरि जलं निर्गन्धं पृथिवीत्वव्यापकाभावप्रतियोगिमत्त्वादित्यादिकं प्रकृतहेतुकेत्यस्य व्यावृत्तिस्थलं किमर्थमुपेक्षितमित्याकांक्षायां चरमा, जलं निर्गन्धमित्यादिफक्किका जलं निर्गन्धमित्यादौ हेतुतावच्छेदकव्यतिरेकव्याप्तेः प्रकृतसाध्यकानुमित्यौपयिकत्वाभावादेव वारणे प्रकृतहेतुतावच्छेदकेत्यस्य न तद्वारणप्रयोजनकत्वमिति तदर्थ इत्याहुः । तदपि न सम्यक् । वह्निमान् धूमादित्यादेः केवलान्वय्यनुमानस्यैव तद्व्याप्तित्वादिना धूमादेर्व्यतिरेकितादशायां सङ्ग्रहाय प्रकृतहेतुकेत्यस्यावश्योपादेयतया तद्व्यावृत्तिस्थलान्तरानुसरणानौचित्यात् ।

गृहीतव्याप्तिभेदाङ्कदे प्राचीनसंवादमाह । अत एवेति । यल्लि-ङ्गज्ञानम् । यद्रूपावच्छिन्नलिंगविषयता । न प्रकृतसाध्यानुमितिहे-तुः । न प्रकृतसाध्यानुमितिजनकतावच्छेदकीभूता तथा चेतरव्या-पकाभावप्रतियोगित्वप्रकारतानिरूपितयद्रूपावच्छिन्नलिङ्गविषयता-सामान्यमभावप्रतियोगित्वप्रकारतानिरूपितयद्रूपावच्छिन्नलिङ्गवि-तासामान्यं वा तत्कालीनतत्पुरुषीयप्रकृतसाध्यानुमितिजनक-तावच्छेदकत्वशून्यं तादृशानुमितिकरणं तद्रूपावच्छिन्नतत्पुरुषी-यतत्कालीनप्रकृतसाध्यककेवलान्वय्यनुमानमित्यर्थः ।

इतरत्वमुपलक्षणमतो वन्ह्यभावव्यापकाभावप्रतियोगित्वरूप-व्याप्तिग्रहेणेतरत्वानवगाहनेऽपि न क्षतिः ।

यद्यपि यत्र साध्याभावातिरिक्तयत्किञ्चिद्व्यापकाभावप्रतियोगित्व-स्यान्वयव्याप्तेश्च विशेष्यविधया लिङ्गतावच्छेदकावच्छिन्नस्यैकधर्मेव समूहालंबनवैलक्षण्येन भानं तत्र केवलान्वयिन्यव्याप्तिस्तत्र तादृशा-भावप्रतियोगित्वप्रकारतानिरूपितविशेष्यताया एव अन्वयव्याप्ति-प्रकारतानिरूपिततया प्रकृतानुमित्यौपयिकत्वात् । केवलान्वयिसा-ध्यके साध्याभावाप्रसिद्ध्या प्रकृतसाध्याभावव्यापकीभूताभावप्रति-योगित्वपर्यन्तानिवेशासम्भवात् । तथाऽपि तादृशप्रतियोगित्वप्रका-रतानिरूपितलिङ्गविषयतास्थले लिङ्गविषयतानिरूपिततादृशप्रति-योगित्वप्रकारताया विवक्षणान्न दोषः । एवं चाभावप्रतियोगित्व-प्रकारतामात्रनिवेशनाप्युपपत्तेरभावविशेषणव्यापकताप्रवेशनमनर्थ-कमित्याशयेनाभावप्रतियोगित्वेन वेत्युक्तम् । साध्यसामानाधिक-रण्यरूपाया अन्वयव्याप्तेरपि साध्यसम्बन्धिनिष्ठसम्बन्धप्रतियोगि-त्वरूपतयाऽसम्भव इत्यतोऽभावोपादानम् । केवलान्वयिमेयत्वादि-हेतुकस्थले चाभावप्रतियोगित्वेन लिङ्गतावच्छेदकावच्छिन्नविषय-ताभ्रम एव प्रसिद्ध इति नाव्याप्तिरिति सर्वत्र भ्रमस्याप्रामाणिकत-या स्वयमन्यथा केवलान्वयित्वं निरुक्तमिति बोध्यम् ।

एवं केवलव्यतिरेकित्वादिकमिति । यथायथमन्वयसहचारान्व-यव्याप्तिस्थले व्यतिरेकसहचारव्यतिरेकव्याप्ती निवेश्य केवलव्यति-रेकित्वमुभयव्याप्तिं निवेश्य चान्वयव्यतिरेकित्वं निर्वाच्यमित्यर्थः ।

केवलान्वयिनोऽभिधेयत्वस्य न विपक्ष इत्यभिधेयत्वसाधक-केवलान्वय्यनुमानलक्षणसंगमनपरे मूलग्रंथे ऽभिधेयत्वं यदि श-

ब्दबोध्यत्वरूपं विवक्षितं तदा यथा आकाशशब्दाच्छब्दाश्रयत्वमनभिधेयमप्युपातिष्ठत इत्यग्रिमग्रंथविरोधः । प्राचीनमते शब्दाश्रयत्वस्याकाशपदाशक्यत्वेऽपि शब्दबोध्यत्वरूपाभिधेयत्वेऽविवादात् । अन्यथा शब्दादुपातिष्ठते इत्यस्यैव व्याघातादित्यतो व्याचष्टे । अभिधेयत्वमिति । अनभिधाने । अभिधेयत्वशून्यत्वात्मकेऽभिधेयत्वशून्यत्वरूपाभिधेयत्वविपक्षताविरहप्रसंजकत्वरूपं तद्व्याघातकत्वं न सम्भवतीति व्याघातपदमन्यथा व्याचष्टे । विपक्षत्वासिद्धिरिति । विपक्षादिपदेन विपक्षतयाऽभिमतस्यानभिधाने तत्र शब्दप्रमाणाप्रवृत्तेस्तदप्रवृत्तौ च न्यायसाध्यपरार्थानुमानस्यानवकाशात् परं प्रति तस्य विपक्षत्वासिद्धेरसम्भव इति भावः ।

(चि०) अथ यथा आकाशशब्दाच्छब्दाश्रयत्वमनभिधेयमप्युपतिष्ठते तथाऽभिधेयत्वाविपक्षस्यानभिधेयत्वेऽपि पदादुपस्थितिः स्यात् । एवं चाभिधेयत्वं कुतोऽपि व्यावृत्तं धर्मत्वात् गोत्ववदिति चेन्न । व्यावृत्तत्वस्याव्यावृत्तत्वे व्यावृत्तत्वमेव केवलान्वयि, व्यावृत्तत्वे यत एव व्यावृत्तं व्यावृत्तत्वं तदेव केवलान्वयीति धर्मत्वस्यानैकान्तिकत्वात् । एवमत्यन्ताभावप्रतियोगित्वस्यात्यन्ताभावाप्रतियोगित्वेऽत्यन्ताभावप्रतियोगित्वमेव केवलान्वयि, अत्यन्ताभावप्रतियोगित्वे यन्निष्ठात्यन्ताभावप्रतियोगि अत्यन्ताभावप्रतियोगित्वं तदेव केवलान्वयि । न चात्यन्ताभावप्रतियोगित्वं व्यावृत्तत्वं च नानेति वाच्यम् । अनुगतप्रतीतिबलेन गोत्ववत्तयोः सिद्धेः ।

(दी०) ननु व्यावृत्तत्वमन्योन्याभावप्रतियोगितावच्छेदकत्वं तच्च लघुगुरुसाधारणं गगनादिनिष्ठान्योन्याभावप्रतियोगितावच्छेदकं चेति न व्यभिचार इत्यत आह । एवमिति ।

(गा०) मूलेऽनभिधेयमिति । तच्छब्दानभिधेयमित्यर्थः । उपातिष्ठत

इति । संबन्धिस्मृतौ प्रकारांशे संबन्धग्रहस्यानपेक्षिततया शब्दाश्रयत्वस्याशक्यत्वेऽपि तत्प्रकारेण धर्मिणि शक्तिग्रहादेव तत्प्रकारेण धर्मिस्मरणस्य तद्धर्मांशे द्रव्यत्वादिव्यावर्तकानतिप्रसक्तत्वरूपशक्यतावच्छेदकत्वग्रहादेव तत्प्रकारकशाब्दबोधस्य च सम्भवादिति भावः ।

एतच्चोपलक्षणम्, लक्षणयाऽनभिधेयस्योपस्थितावपि दृष्टान्तत्वसम्भावात् शब्दादनभिधेयस्य विपक्षस्योपस्थितावपि तत्र विपक्षत्वे मानाभावः, शब्दस्य परं प्रति आप्तोक्तत्वासिद्धेः, अनुमानं च साध्याद्यप्रसिद्ध्या न सम्भवतीत्याशंकयाभिधेयत्वविपक्षसिद्धिपर्यवसायिसाध्याप्रसिद्ध्याद्यनास्कंदितमभिधेयत्वपक्षकमनुमानमाह । एवं चेति । अनभिधेयत्वेऽपि । शब्दादुपस्थितिसम्भवे चेत्यर्थः ।

एतेन विपक्षस्योक्तानुमानेऽपि सामान्यतः साध्यघटकतया शब्दादनुपस्थितौ शब्देन साध्यादेः प्रतिपादनासम्भवात्परार्थानुमानासम्भवो निराकृतः ।

प्रकृतानुमानेनैव विपक्षत्वधर्मिपर्यन्तस्य सिद्ध्ये धर्मिणमन्तर्भावयति । कुतोऽपीति । इत्यनुमानात् । विपक्षसिद्धिरिति शेषः । अव्यावृत्तत्वे । सार्वत्रिकत्वे । केवलान्वयि । व्यावृत्तत्वरूपसाध्यविरहि । एवमग्रेऽपि ।

ननु व्यावृत्तत्वस्यात्यन्ताभावप्रतियोगित्वरूपत्वे "एवमत्यन्ताभावप्रतियोगित्वस्ये"त्यादिना सह व्यावृत्तत्वस्येत्यादेः पौनरुक्त्यमतो व्यावृत्तत्वमन्यथा व्याचक्षाण एव व्यावृत्तत्वस्येत्यादिना दर्शितं व्यभिचारमुद्धृत्यात्यन्ताभावप्रतियोगित्वे व्यभिचारप्रदर्शनपरमेवमित्यादिग्रंथमवतारयति दीधितौ । नन्विति । अन्योन्याभावेति । अन्योन्याभावप्रतियोगितानवच्छेदकत्वं केवलान्वयित्वमित्याशयेन निरुक्तव्यावृत्तत्वसाधनमित्याशयः ।

लघुरूपसमनियतगुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वेऽन्योन्याभावप्रतियोगितावच्छेदकत्वरूपव्यावृत्तत्वसाध्यकानुमाने कंबुग्रीवादिमत्त्वादावेव धर्मत्वहेतोर्व्यभिचार इत्यतस्तन्निराकरणाय गुरोरप्यवच्छेदकत्वमंगीकरोति । लघ्विति ।

व्यावृत्तत्वं यतो व्यावृत्तं तस्य केवलान्वयित्वनिबंधनमुक्तव्यभिचारं निरस्यति । गगनेति । इति न व्यभिचार इत्यत्रेतिना अत-

इत्यर्थकेनोक्तोभयमेव परामृश्यते प्रथमे साध्यसत्त्वात् । गगनादौ च धर्मत्वरूपहेतुविरहाद्व्यभिचारनिरासो बोध्यः ।

मूले केवलान्वयीति । अत्यंताभावाप्रतियोगिनोऽन्योन्याभावप्रतियोगितावच्छेदकत्वरूपव्यावृत्तत्वाप्रसक्तेरिति भावः ।

नानेति । तथाचैकधर्मनिष्ठ व्यावृत्तत्वादिकं तद्रूपवद्धर्मांतराव्यावृत्तं तस्य च न केवलान्वयित्वसम्भव इत्यतो न व्यभिचार इति भावः । तयोः । अनुगतयोः । सिद्धिः ।

(चि०) तत्र न तावदव्याप्यवृत्त्यत्यन्ताभावः केवलान्वयी, तस्य प्रतियोग्यवच्छिन्नेऽप्यत्यन्ताभावात्, अत्यन्ताभावाप्रतियोगिनश्च केवलान्वयित्वात्, नापि आश्रयनाशजन्यगुणनाशात्यन्ताभावः तस्य नाशस्य सर्वत्रात्यन्ताभावादिति वाच्यम् । यत्र हि प्रतियोगिप्रागभावो वर्त्तते तत्र न तदत्यन्ताभावो वर्त्तते, तथा च नाशस्य प्रागभावो यत्र नाशप्रतियोगिसमानदेशे वर्त्तेत तत्र कथं नाशात्यन्ताभावो वर्त्तताम् । तर्हि नाशस्य तत्र वृत्तिः स्यादिति चेन्न । पूर्वं तत्र नाशप्रागभावस्यैव सत्त्वादुत्तरकाले आश्रयस्यैवाभावात् । नाप्याकाशात्यन्ताभावः केवलान्वयी, तस्यापि प्रतियोगिरूपात्यन्ताभावप्रतियोगित्वात् । अभावात्यन्ताभावस्य भावत्वात् ।

(दि०) नन्वभावप्रतियोगित्वादिकमभावादिव्यक्तिभेदान्नानैव, अनुगतव्यवहारस्तु कथंचिद्विशेषणतावच्छेदकधर्मानुगमादेवं च लक्ष्याप्रसिद्ध्या लक्षणासम्भव इत्याशंकते । तत्रेत्यादि । यत्र हीत्यादिरभ्युपगमवादः । वस्तुतस्तु भूतलादिदेशे समये च तस्य वर्त्तमानत्वादाकाशाभावतुल्यत्वाच्च ।

(गा०) ननु अव्याप्यवृत्त्यभावादेः केवलान्वयित्वाकथनात्तन्निरा-

करणं मूलेऽयुक्तम् । यदि च लक्ष्याप्रसिद्ध्या लक्षणासम्भवं दर्शयितुं यस्य यस्य केवलान्वयित्वं सम्भावितं तस्यैव तथात्वं निराकर्तुमयमुद्यमस्तथाऽपि अभावप्रतियोगित्वादेस्तथात्वस्य प्रदर्शितत्वात्तदनिराकरणेन न्यूनतेत्यत आह दीधितौ । नन्विति । प्रतियोगित्वादिकमित्यादिनाऽन्योन्याभावप्रतियोगितावच्छेदकत्वपरिग्रहः । अभावादीत्यादिनाऽवच्छेदकपरिग्रहः । विशेषणतावच्छेदकेति । स च धर्मोऽभावत्वादिकः । एवं चोक्तरीत्या ऽभावप्रतियोगित्वादेर्यन्निष्ठात्यन्ताभावप्रतियोगित्वं तस्य च न केवलान्वयित्वमिति भावः । एवं चेति । अत्यन्ताभावप्रतियोगित्वादेः केवलान्वयित्वासम्भवे चेत्यर्थः । अभ्युपगमवादः । ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वाभ्युपगमेनोक्तिः ।

ताद्दशविरोधस्य स्वयमनभ्युपगमात्प्रकारांतरेणाश्रयनाशजन्यगुणनाशात्यंताभावस्य केवलान्वयित्वं निराकरोति । वस्तुत इति । तुल्यत्वाच्चेत्यनंतरं नोक्ताभावः केवलान्वयीति पूरणीम् । देशः । स्वप्रतियोगिसमवायिघटाद्याश्रयो बोध्यः । स्वप्रतियोग्याश्रयसत्त्वदशायामुत्पन्नस्य नाशस्य स्वप्रतियोगिसमवायिनो घाऽऽश्रयनाशाधीनगुणनाशस्य स्वप्रतियोगिसमवायिनोऽधिकरणे प्रत्ययस्यानुभविकतया तत्र वर्तमानतेति भावः ।

ताद्दशप्रत्यये विवादसंभवात्समये च कालिकविशेषणताया एव सम्बन्धतया दैशिकविशेषणतासंबंधेन ताद्दशनाशाभावस्य केवलान्वयित्वाक्षतेराह । आकाशाभावतुल्यत्वाच्चेति । यथा आकाशाभावस्यावृत्तिप्रतियोगिकत्वेऽपि प्रतियोगिस्वरूपाभावप्रतियोगितया न केवलान्वयित्वं तथा तन्नाशस्यावृत्तित्वेऽपि तदभावस्य तदात्मकाभावप्रतियोगित्वान्न केवलान्वयित्वमित्यर्थः ।

(चि०) अथाभावात्यन्ताभावो न प्रतियोगिरूपस्तथा सत्यन्योन्याभावात्यन्ताभावः प्रतियोगिरूप इति प्रतियोगिसमानदेशोऽन्योन्याभावो न स्यादिति चेन्न । अत्यन्ताभावात्यन्ताभावः प्रतियोग्येव, अन्योन्याभावात्यन्ताभावस्तु प्रतियोगिवृत्तिरसाधारणो धर्म इति ।

(दी०) अभावाभावस्येति सावधारणम् । भावत्वात्, यदाहुराचार्याः 'स्वाभावविरहात्मत्वं वस्तुनः प्रतियोगिता' इति । प्रतियोग्येवेति । प्रागभावादेरत्यन्ताभावाभावरूपत्वनयेऽपि न क्षतिः, तन्मतेऽत्यन्ताभावस्यापि तदभावरूपतया तस्यापि प्रतियोगित्वात् । असाधारण इति । प्रतियोगितावच्छेदक इति तु तत्त्वम् ।

(गा०) प्रतियोगिनोऽभावाभावत्वनियममंतरेणाकाशस्य प्रतियोगितया स्वाभावाभावत्वव्यवस्थापनं न संभवतीति अभावाभावस्येति मूलमभावाभावस्यैवेत्यर्थकतया वर्णयति । अभावेति । वाच्यत्वादेः किंचिद्विशिष्टस्वाभावाभावत्वेऽपि भावत्वस्याभावाभावत्वव्याप्यत्वं निर्युक्तिकमतो भावपदं प्रतियोगिपरतया व्याचष्टे । भावत्वादिति । प्रतियोगित्वस्याभावाभावत्वनियतत्वं निष्प्रत्यूहमेवाभावाभावत्वस्यैव प्रतियोगितारूपत्वात् । अत्राऽऽचार्यसंवादमाह । यदाहुरिति ।

ननु ध्वंसप्रागभावयोरत्यंताभावविरोधितामते प्रागभावदशायामपि तदधिकरणेऽत्यंताभावविरहसत्त्वात्तस्य च प्रतियोगिरूपत्वासंभवात्प्रागभावादेरेव तद्रूपता तथा चात्यन्ताभावाभावः प्रतियोग्येवेति मूलासंगतिरत आह । प्रागभावादेरिति । तदभावरूपतया । प्रागभावाद्यभावरूपतया । तस्यापि । प्रागभावादेरपि । प्रतियोगित्वात् । अत्यंताभावप्रतियोगित्वात् । घटाद्यसाधारणधर्मरूपादिविशेषकंबुग्रीवादिमत्त्वादेर्भेदाभावत्वविरहादसाधारणो धर्म इति मूलस्य यथाश्रुतार्थासंगतेराह । प्रतियोगितावच्छेदक इति ।

(दी०) अथान्योन्याभावात्यन्ताभावसाधारणः प्रतियोगितावच्छेदकसम्बन्ध एवाभावाभावः, स च क्वचित्तादात्म्यं क्वचिच्च संयोगादिरिति चेत् ? यद्वत्त्वे हि ज्ञाते यद्वत्त्वं न प्रतीयते तदभाववत्त्वं च व्यवह्रियते तस्यैव तदभावात्मकत्वमुपेयते, प्रतियोगितदभाववत्त्वबुद्ध्योश्च मिथस्तथात्वमानुभविकम् । न च तत्सम्बन्धवत्त्वं च तद्विषयः सम्बन्धसम्बन्धवत्त्वबुद्धिवत्

क्वचित् सम्बन्धवत्त्वबुद्धिर्विशेषदर्शनतयोपयुज्यते न च स्वतो मानाभावात् । अथ सम्बन्धान्तरावच्छिन्नाभाववति सम्बन्धान्तरेण प्रतियोगिनो वृत्तेर्न तदभावविरोधित्वमिति चेत् ? प्रतियोगितावच्छेदकसम्बन्धस्याभाववति सम्बन्धान्तरेण वृत्तेर्न तथात्वम् सम्बन्धविशेषेण च विरोधित्वं तुल्यमेव । अनतिप्रसक्तये च स्वप्रतियोगितावच्छेदकसम्बन्धत्वेनाभावत्वकल्पने क्वानुगमसम्भावनाऽपीति । व्यधिकरणसम्बन्धस्यापि प्रतियोगितावच्छेदकत्वात् तद्वत्यभावविलयप्रसङ्गो भवतां तदभावविलोपप्रसङ्गो वेति ।

(गा०) प्रतियोगितावच्छेदकसंबंध एवात्यंताभावान्योन्याभावसाधारणोऽभावाभाव इति योजना । अन्योन्यात्यंताभावसाधारणः । अन्योन्यात्यंताभावयोः साधारणः । स च संबंधाविधयाऽवच्छेदकः । क्वचित् । भेदप्रतियोगितायाम् । क्वचित् । संसर्गाभावप्रतियोगितायाम् । प्रतियोगिसंबंधवत्ताज्ञानस्याभाववत्ताज्ञानाप्रतिबंधकतया न प्रतियोगिसंबंधस्याभावाभावत्वमिति समाधत्ते । यद्वत्वे हीति । ज्ञात इत्यतं न प्रतीयत इति व्यवह्रियत इत्युभयान्वयि । तथा च यदभावव्याप्यत्वादिनाऽगृहीतयद्धर्मवत्ताज्ञानं यत्प्रतीत्यनुत्पादे यदभाववत्ताव्यवहारे वा प्रयोजकमित्यर्थः । यदधिकरणे कदापि कस्यापि तदभावभ्रमो न जातस्तदभावप्रतीतेः प्रतियोगिमत्ताप्रतीत्यनुत्पादे अप्रयोजकत्वात्तस्यैव तदभावात्मकत्वमिति नियमासम्भवः अतोऽभावव्यवहारस्यापि निवेशः । व्यवहारश्च सामान्यतः सर्वत्र संभवतीति न व्यवहाराविषयत्वाभावे नियमभंग इति शंकापि ।

मिथस्तथात्वमिति । परस्परप्रतीत्यनुत्पादप्रयोजकत्वं परस्पराभाववत्ताव्यवहारप्रयोजकत्वं चेत्यर्थः । तथा च न प्रतियोग्यभावयोः परस्पराभावत्वानुपपत्तिरिति भावः । तत्संबंधवत्त्वम् । प्रतियोगिसंबंधवत्त्वम् । तद्विषयः । अभावप्रतीत्यनुत्पादादिप्रयोजकधीविषयः । ननु प्रतियोगिसंबंधप्रकारकसिद्धिसत्त्वेऽपि अभावप्रत्ययानुत्पादस्यानुभाविकतेत्यत आह । क्वचिच्चेति । विशेषदर्शनतया व्यावर्तकधर्मदर्शनतया । न स्वतः । न व्यावर्तकधर्मदर्शनमपुरस्कृत्य । न तस्याभा-

चविरोधित्वम । किं तु तत्संबन्धस्यैवेति शेषः । तत्संबंध एवं तद्भावाभावः विरोधिन एवाभावाभावत्वादिति भावः । प्रतियोगितावच्छेदकसंबंधस्य । घटसंयोगादेः । अभाववति । घटाद्यभाववति कर्मादौ । संबंधान्तरेण । कालिकादिना । न तथात्वम् । न संबंधसामान्येन विरोधित्वम् । तुल्यमेव । प्रतियोगिसाधारणमेव ।

क्वचित्प्रतियोगिनः क्वचित्तत्त्वावच्छेदकस्याभावाभावत्वकल्पने कल्पनाभेद इति कल्पनैक्यानुरोधात्संबंधस्याभावाभावत्वमित्युक्तं दूषयति । अनतिप्रसक्तये चेति । अनतिप्रसक्तये । घटसंयोगादेः पटाद्यभावाभावत्ववारणाय । अनुगमसंभावनाऽपि । अनुगमस्यैककल्पनापि । स्यान्तर्भावादिति शेषः । तद्वति । गुणाद्यभावप्रतियोगितावच्छेदकसंयोगादिसम्बन्धवति । अभावविलयप्रसङ्गः । स्वाभावसत्त्वेन तद्भावासत्त्वप्रसङ्गः । प्रतियोगिनिरूपिततादृशसम्बन्ध एवाभावाभाव इति यदुच्यते तदाह । भवतामिति । भवताम् । प्रतियोगिरूपाभावप्रतियोगितया व्यधिकरणसम्बन्धावच्छिन्नाभावस्य केवलान्वयित्वं खण्डयताम् । तदभावेति । व्यधिकरणसम्बन्धावच्छिन्नगुणाद्यभावाभावेत्यर्थः । विलोपप्रसङ्ग इति । प्रतियोगिनिरूपिततादृशसम्बन्धाप्रसिद्धेरिति भावः । तादृशगगनाद्यभावस्याभावाप्रतियोगित्वं स्वमते इष्टमेवेति भवतामित्युक्तम् ।

(चि०) उच्यते-वृत्तिमदत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वम्, आकाशात्यन्ताभावो यद्यपि प्रतियोगिरूपात्यन्ताभावप्रतियोगी तथाऽपि न स वृत्तिमान् इत्याकाशात्यन्ताभाव एव केवलान्वयी तथा प्रमेयत्वाभिधेयत्वादि केवलान्वयि वृत्तिमतोऽत्यन्ताभावस्याप्रतियोगित्वात् ।

(दी०) लक्षणं परिष्कुरुते । वृत्तिमदित्यादि । आकाशस्य तदभावाभावत्वमित्यभ्युपगममात्रम्, भाववति तदभावासत्त्वप्रतीत्या हि भावस्य स्वाभावाभावत्वं कल्प्यते न चेह तथा, अभावप्रतियोगित्वं स्वरूपसम्बन्ध एवेत्युक्तमधस्तात् । अभावप्रतियोगित्वं

चाप्रयोजकम् । एवं च यत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावाप्रतियोगित्वं यस्य तस्य तेन सम्बन्धेन केवलान्वयित्वमिति सूचयितुं वृत्तिमदिति । अत एव ज्ञानस्य ज्ञानत्वस्य च समवायेन ज्ञानविषयत्वादेश्च व्यधिकरणसमवायादिना सम्बन्धेनाभावप्रतियोगित्वेऽपि विषयतया परम्परासम्बन्धेन स्वरूपसम्बन्धेन च केवलान्वयित्वम् । संयोगाद्यभावोपसङ्ग्रहाय च प्रतियोग्यसमानाधिकरणत्वेनाभावो विशेष्यः । आकाशाभावोऽपि च यथा प्रतियोग्यसमानाधिकरणस्तथोक्तमधस्तात् । वृत्तिमतस्तादृशाभावाप्रतियोगित्वमिति वाऽर्थः । व्याप्यवृत्तित्वार्थकं वृत्तिमत्पदमभावविशेषणमित्यपि कश्चित् । तादात्म्येनाभिधेयस्य केवलान्वयित्वसम्पत्तये व्याप्तिवादखिलमालोकनीयम् ।

(गा०) पूर्वपक्षिणा लक्ष्याप्रसिद्ध्या लक्षणासम्भवस्योक्तत्वात् लक्ष्यप्रदर्शनमेवोचितं न तु लक्षणाभिधानं लक्षणस्य प्रागेवोक्तत्वादत आह । लक्षणमिति । गगनाभावादिसाध्यकानुमानानां लक्ष्यतानिर्वाहाय लक्षणे विशेषणांतरं प्रक्षिपतीत्यर्थः । आकाशादेः स्वाभावाभावत्वस्य निर्युक्तिकतया आकाशाभावादिसंग्रहायाभावे वृत्तिमत्त्वविशेषणदानमयुक्तमित्यालोच्य तत्र मूलकृतोऽनिर्भरमाह । आकाशस्येति । घटादेरिवाकाशस्यापि स्वाभावाभावत्वमविशेषात्स्यादित्याशङ्क्य तद्विशेषं दर्शयति । भाववतीति । भावो घटादिरूपः प्रतियोगी । तदभावासत्त्वप्रतीत्या । तदभावाभाववत्त्वप्रतीत्या । इह । अवृत्तिस्थले । न तथा । न प्रतियोगिमत्यत्यन्ताभावाभाववत्त्वप्रत्ययः सम्भवतीति शेषः । प्रतियोगिमत एवाप्रसिद्धेरिति भावः । अधिकरणविनिर्मोकेण च नञुल्लेखी प्रत्ययो न सम्भवति अभावादिपदोल्लेखी सम्भवन्नपि प्रकृतेऽसिद्ध इति नाधिकरणानुपरक्तगगनाभावाभावप्रत्ययबलाद्गगनस्य तथात्वमिति शंकावसरः।

ननु गगनस्य स्वाभावाभावत्वानुपगमे तस्य स्वाभावप्रतियोगित्वानुपपत्तिरित्याशंकायामाह । अभावप्रतियोगित्वं च स्वरूपसम्बन्ध एव न तु काभावाभावत्वम् । अधस्तात् । व्याप्तिवादे ।

ननु प्रतियोगित्वमभावाभावत्वानात्मकमपि तद्व्याप्यतया तत्साधयेदेवेत्यत आह । अभावप्रतियोगित्वं चेति । आकाशादेः स्वाभावाभावत्वविरहेऽपि प्राचां केवलान्वयिलक्षणे वृत्तिमत्पदोपादानं सम्बन्धविशेषनिवेशसूचकतया सङ्गमयति । एवं चेति । सम्बन्धविशेषनिवेशप्रयोजनमाह । अत एवेति । ज्ञानस्य । सर्वगोचरज्ञानस्य । समवायेनेति । सम्बन्धेनाभावप्रतियोगित्वेऽपीत्यग्रिमेणान्वयः । अवच्छेदकत्वघटितलक्षणमनुसृत्याह । ज्ञानविषयत्वादेश्चेति । विषयतया ज्ञानस्य । परम्परासम्बन्धेन । स्वसमवायिविषयत्वरूपेण ज्ञानत्वस्य, स्वरूपसम्बन्धेन च ज्ञानविषयत्वादेः । केवलान्वयित्वम् । तेषां केवलान्वयिताघटकतत्तत्सम्बन्धावच्छिन्नाभावाप्रतियोगित्वादिति भावः । प्रतियोगितायां केवलान्वयिताघटकसम्बन्धावच्छिन्नत्वनिवेशनं च प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यसामानाधिकरण्यस्य निवेशाभिप्रायेण । तत्र प्रकृतसम्बन्धनिवेशने च प्रतियोगितायां सम्बन्धावच्छिन्नत्वं न निवेश्यम् ।

ननु प्रतियोग्यसामानाधिकरण्यं यदि स्वप्रतियोगिसमानाधिकरणो यस्तदन्यत्वं तदा संयोगादेरपि केवलान्वयित्वापत्तिः संयोगाभावस्य द्रव्ये प्रतियोगिसमानाधिकरणतया तदन्यत्वाभावात् । नापि तत्तदभावनिष्ठं यत्तत्तदभावप्रतियोगिसामानाधिकरण्यं तदत्यन्ताभाववत्त्वम्, तत्सामानाधिकरण्यस्याव्याप्यवृत्तित्वानुपगमे तद्दोषस्यैव दुर्वारत्वात् । किं तु स्वप्रतियोग्यनधिकरणवृत्तित्वमेव एवं च तद्विशेषणकस्याभावस्यैव स्वपदार्थतया गगनाद्यभावप्रतियोग्यधिकरणाप्रसिद्ध्या न तदभावस्य तत्त्वमिति तथाविधाभावान्तराप्रतियोगित्वमादाय गगनादेः केवलान्वयित्वापत्तिरत आह । आकाशेति । अधस्तात् । व्याप्तिवादे । केवलान्वयितावच्छेदकसम्बन्धसामान्ये यदभावप्रतियोगिप्रतियोगिकत्वयत्किञ्चिदधिकरणानुयोगिकत्वोभयाभावस्तत्त्वम्, यत्किञ्चिदधिकरणवृत्तितानवच्छेदकावच्छिन्नप्रतियोगिताकत्वरूपप्रतियोगिवैयधिकरण्यं वा विवक्षणीयं तच्चाकाशाभावादिसाधारणमिति भावः ।

मूलोक्तविशेषणस्याप्रतियोगिविशेषणतयैव गगनादिवारणे उभयाभावघटितप्रतियोगिवैयधिकरण्यप्रवेशो गौरवादयुक्त इत्याशयेनाह । वृत्तिमत इति । वृत्तिमत्त्वं प्रकृतसम्बन्धेन बोध्यं तेन संयो-

गादिना संयोगादेर्न केवलान्वयित्वम्। तादृशाभावेति। प्रतियोग्यनधिकरणवृत्त्यभावेत्यर्थः। यादृशप्रतियोगिताश्रयानाधिकरणं किञ्चिद्वृत्तिमत्त्वे सति तच्छून्यत्वमिति फलितार्थः। अतो जगत एव किञ्चिद्देशकालादिवृत्तित्वविशिष्टतदभावात्मकप्रतियोगिमत्तया स्वरूपसम्बन्धस्य केवलान्वयिताघटकत्वस्थले प्रतियोगिवैयधिकरण्याप्रसिद्धिरिति दोषानवकाशः।

प्रकारान्तरेण संयोगाद्यभावस्य केवलान्वयित्वमुपपादयत आकाशादिकं च वारयतो वृत्तिमत्पदमपि सार्थकं कुर्वतोऽन्यस्य मतमाह। व्याप्यवृत्तित्वार्थकमिति। अभावविशेषणम्। अभावविशेषणबोधकम्। व्याप्यवृत्तित्वं चेद् यद्यवच्छिन्नवृत्तिकान्यत्वं तदा संयोगाद्यभावस्यानथात्वात्संयोगादावतिप्रसंगः यद्यनवच्छिन्नवृत्तिकत्वं तदा कालिकसंबन्धावच्छिन्नप्रतियोगिताकघटत्वाद्यभावस्य तद्धाति कालेऽपि तदनधिकरणदेशावच्छेदेन वर्तमानतया केवलान्वयिनोऽसंग्रहप्रसंगः। तदभावस्य घटत्वादेः समवायेन व्याप्यवृत्तित्वात्। येन सम्बन्धेनाभाववत्ताज्ञानं यत्प्रतियोगिमत्ताज्ञानविरोधि तेन सम्बन्धेन व्याप्यवृत्त्यभावीयतत्प्रतियोग्यन्यत्वनिवेशे च गौरवमित्यस्वरसः।

ननु तादात्म्यसम्बन्धेन प्रतियोग्यधिकरणतायाः वृत्तिमत्त्वस्य चाप्रसिद्ध्या तेन सम्बन्धेनाभिधेयत्वाद्यवच्छिन्नस्य केवलान्वयित्वानुपपत्तिरत आह। तादात्म्येनेति। अभिधेयस्य अभिधेयत्वावच्छिन्नस्य। व्याप्तिवदिति। यथा व्याप्तिशरीरेऽधिकरणत्वादिस्थले सम्बन्धित्वमात्रं निवेशितं तथाऽत्रापि तन्निवेशनीयमित्यर्थः।

(चिं०) ननु प्रमेयत्वं प्रमाविषयत्वं तच्च न केवलान्वयि प्रमाया विषयत्वस्य चाननुगमादिति वाच्यम्। प्रमात्वमेव हि परम्परासम्बन्धाद्धटादौ प्रमेयत्वमनुगतं प्रमाजातीयविषयत्वं वा। तथापि केवलान्वयिनि संशयाभावात् कथमनुमितिः? प्रमेयत्वमत्र वर्त्तते न वेति संशयश्च न प्रमेयपक्षकः किं तु प्रमेयत्वपक्षको भिन्नविषयकः। प्रमेयत्वपक्षके चास्ति-

त्वसाध्यस्यान्वयव्यतिरेकित्वम् । तथा च घटः प्रमेयो न वेति संशयो मृग्यते स च नास्त्येव ।

(दी०) प्रमाजातीयेति । तथा च तादृशाभावप्रतियोगितानवच्छेदकधर्मवत्त्वमर्थः । इत्थं च प्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरण्यमेवाभावविशेषणं तेन द्रव्यगुणभेदयोर्द्वित्वादिना न केवलान्वयित्वम् । न चैवं विरुद्धयोर्धर्मयोर्द्वित्वेन केवलान्वयित्वापत्तिः, तदवच्छिन्नाधिकरणाप्रसिद्ध्या तदवच्छिन्नाभावे प्रतियोग्यसामानाधिकरण्यस्यासम्भवादिति वाच्यम् । तादृशधर्मावच्छिन्नस्य यत्किञ्चिदधिकरणवृत्तिताया विवक्षितत्वात् क्वचिदपि तादृशोभयवत्त्वाप्रतीतेस्तस्यातथात्वात् । सन्दिग्धसाध्यवत्त्वं पक्षत्वमित्याशयेनाशङ्कते । तथाऽपीति । अस्तित्वसाध्यस्य । घटवृत्तित्वसाध्यस्य ।

(गा०) ननु प्रमाजातीयविषयत्वरूपत्वेऽपि प्रमेयत्वस्य केवलान्वयितानुपपत्तिर्दुर्वारैव अनुगतधर्मस्याभावप्रतियोगितानवच्छेदकत्वेऽपि तदवच्छिन्नव्यक्तीनां विशेषरूपेणाभावप्रतियोगित्वापत्तेरतोऽनवच्छेदकत्वघटिततया लक्षणं परिष्कार्यमिति मूलाशयं प्रकाशयति । तथा चेति । अनवच्छेदकं यद्रूपं तेन रूपेण केवलान्वयीति विवक्षणीयं तेन घटादेर्न घटत्वादिना केवलान्वयित्वं किं तु मेयत्वादिनैवेति नियमोपपत्तिः। इत्थं च । अप्रतियोगित्वस्थाने प्रतियोगितानवच्छेदकत्वनिवेशने च । अप्रतियोगित्वघटितलक्षणे द्रव्यगुणभेदयोः प्रतियोगिव्यधिकरणद्रव्यभेदत्वावच्छिन्नाभावप्रतियोगित्वेन केवलान्वयित्वापत्तिविरहात् प्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरण्यपर्यन्तनिवेशवैयर्थ्यमित्युपप्रंभसंगतिः।

द्वित्वादिना न केवलान्वयित्वमिति । उभयत्वाद्यवच्छिन्नाभावस्य प्रतियोगिसामानाधिकरण्येऽपि तदवच्छिन्नासामानाधिकरण्येन लक्षणघटकत्वादिति भावः । अन्यतरत्वेन केवलान्वयित्वस्येष्टत्वाद्द्वित्वादिनेत्युक्तम् । आदिना धर्मान्तरसाधारणत्रित्वादिपरिग्रहः । इदमुपलक्षणम् । गगनाभावादेर्घटादिवृत्तित्वविशिष्टत्वे-

न न केवलान्वयित्वमित्यपि द्रष्टव्यम् ।

तादृशधर्मावच्छिन्नस्य । प्रतियोगितानवच्छेदकधर्मावच्छिन्नस्य । अधिकरणवृत्तितायाः । अधिकरणसम्बन्धितायाः । विवक्षितत्वादिति । तथा च तादृशाभावप्रतियोगितानवच्छेदकं यत्किंचिदधिकरणनिष्ठकेवलान्वयिताघटकसम्बन्धप्रतियोगितावच्छेदकं तद्रूपवत्त्वं तेन रूपेण केवलान्वयित्वमिति लक्षणं करणीयमिति भावः । तादृशोभयेति । विरुद्धोभयेत्यर्थः । तस्यातथात्वात् । विरुद्धयोरुभयत्वस्य सम्बन्धप्रतियोगितानवच्छेदकत्वात् । सिद्ध्यभावरूपपक्षतामते साध्यसंदेहस्यानपेक्षणात् तथापीत्याक्षेपासंगतेराह । संदिग्धेति । मूले–न प्रमेयपक्षकः । न प्रमेयधर्मिकः । तर्हि किंधर्मिक इत्याशंकायामाह । किंत्विति । भिन्नविषयकः । प्रकृतानुमितिविलक्षणविषयतावान् । तथा चाविलक्षणविषयताशालिसाध्यसंदेहस्यैवानुमितिहेतुतया सोऽनुपयुक्त इत्यभिमानः । प्रमेयत्वसाध्यकानुमानासम्भवेऽपि प्रमेयत्वपक्षकास्तित्वसाध्यकानुमानमेव केवलान्वय्यनुमानं निष्प्रत्यूहमेवेति शंकां निरस्यति । प्रमेयत्वपक्षकेति । अस्तित्वस्य पदार्थसाधर्म्यरूपस्य केवलान्वयितया तत्साध्यकानुमानस्यान्वयव्यतिरेकित्वाभिधानं न घटत इत्यत आह दीधितावस्तित्वेति । घटास्तित्वम् । घटवृत्तित्वम् । केवलान्वयिनोऽस्तित्वस्य यत्र साध्यता तत्र संशयानुपपत्त्याऽनुमित्यनिर्वाहतादवस्थ्यादिति भावः ।

(चि०) अथ पक्षः साध्यवान्न वा पक्षे साध्यमस्ति न वेति संशयौ समानविषयकावेव तदस्यास्त्यस्मिन्निति मतुपो विधानादिति चेन्न । विशेषणविशेष्यभावभेदेनार्थभेदात् । मैवम् । य एव हि संशयः पक्षे साध्यसिद्धिविरोधी स एवानुमानाङ्गमावश्यकत्वात् लाघवाच्च, न तु समानविषयकत्वमपि तत्र तन्त्रं गौरवात् । प्रमेयत्वं घटनिष्ठाभावप्रतियोगि न वेति संशयश्च घटः प्रमेय इति साध्यसिद्धिविरोधी भवत्येव । यद्वा संशययोग्यतैवानुमानांगं सं-

शयस्य तदानीं विनाशात् । न च साऽपि साधकबाधकप्रमाणाभावः, प्रमेयत्वाभावासिद्धौ तत्प्रमाणासिद्धेस्तदभावासिद्धिरिति वाच्यम् । पक्षनिष्ठात्यन्ताभावाप्रतियोगित्वज्ञानस्यैव साध्यसाधकत्वेन तदभावस्यैव योग्यतात्वात् । प्रमेयत्वमत्यन्ताभावप्रतियोगीति भ्राम्यतः संशय इत्यन्ये । नन्वेकरूपविकलमिदं कथं गमकं तत्त्वे वा व्यतिरेकाविकलवद्रूपान्तराविकलमपि गमकं स्यादिति चेन्न । अन्वयव्यतिरेकव्याप्त्योरन्यतरनिश्चयेनानुमित्यनुभवात् । युगपदुभयव्याप्त्युपस्थितौ विनिगमनाभावेनोभयोरपि प्रयोजकत्वे व्यतिरेकोपासना । व्यतिरेकश्च विपक्षवृत्तित्वशङ्कानिवृत्तिद्वारा व्यतिरेकव्याप्तावुपयुज्यते, अत्र तु विपक्षाभावेन शङ्कैव नोदेति ।

इति केवलान्वयिचिन्तामणिः ।

(दि०)साध्यसिद्धिविरोधी । साध्यसिद्धिनिवर्त्त्यः । विशेषणविशेष्यभावभेदेऽपि विरोधिविषयतामात्रेण प्रतिबन्धकत्वमनुभवबलादास्थीयते, न हीदं साध्यवदत्र वा साध्यमित्येकतरनिश्चयेऽत्र साध्यं न वेदं साध्यवन्न वेति अन्यतरः सन्देह इति । पक्षनिष्ठेत्यादि । पक्षनिष्ठाभावप्रतियोगित्वज्ञानविरोधिज्ञानस्य साध्यसाधकत्वेन । कथंचित् साध्यसिद्ध्यनुगुणत्वेन पक्षनिष्ठाभावप्रतियोगित्वज्ञानाभावस्य वा साध्यस्य साधकत्वेन । तदभावस्य । तस्य साध्ये पक्षनिष्ठाभावप्रतियोगित्वज्ञानस्य साध्ये पक्षनिष्ठाभावप्रतियोगित्वावगाहिज्ञानत्वेन साध्यविशिष्टपक्षज्ञानविरोधित्वेन वा रूपेणाभावस्य योग्यतात्वात् । व्यतिरेकः । वि-

पक्षे हेतोरभावः । व्यतिरेकव्याप्तौ । साध्याभावहेत्वभावयोर्यौ व्यतिरेकौ साध्यहेतू तयोर्व्याप्तौ ।

(गा०) विषयावैलक्षण्ये विषयत्वावैलक्षण्यमित्याशयेनाशंकते । मूलेऽपेति । समानविषयकावेवेति । तथा चैकस्यानुमित्यविलक्षणविषयताकत्वेऽन्यस्यापि तथात्वमावश्यकमिति प्रमेयत्वधर्मिकसंशयादपि तत्साध्यकानुमितिर्निष्प्रत्यूहैवेति भावः । अर्थभेदात् । विषयतावैलक्षण्यात् । ग्राह्यसंदेहस्याप्रतिबंधकतया विरोधिपदं प्रतिबध्यपरतया व्याचष्टे दीधितौ । साध्यसिद्धीति । साध्यं पक्षनिष्ठाभावप्रतियोगि न वेत्यसमानविशेष्यकः संशयः कथं साध्यवत्तानिश्चयप्रतिबध्य इति शङ्कायामाह । विशेष्येति । विरोधिविषयतामात्रेणेति । ग्राह्यविरोधिधर्मे प्रकृतधर्मिसम्बन्धविषयतामात्रपुरस्कारेणानुभवं द्रढयति । न हीति । तदभावस्येत्यत्र तत्पदेन पक्षनिष्ठाभावप्रतियोगित्वज्ञानस्य परामर्शेऽप्रतियोगित्वज्ञानान्तं प्रतियोगित्वज्ञानान्तर्भावेण व्याचष्टे । पक्षेति । तज्ज्ञानप्रतिबन्धकत्वरूपं तद्विरोधित्वमेवात्राप्रतियोगित्वमित्यत्र नञर्थ इति भावः । अथ वा प्रतियोगित्वपदमेव प्रतियोगित्वज्ञानपरं प्रतिबन्धकत्वमेव नञर्थ इत्याशयः । अतस्तत्पदस्य नञर्थविरोधिप्रविष्टज्ञानपरामर्शकत्वासम्भवेऽपि न दोषः ।

अबाधितत्वज्ञानस्यानुमित्यहेतुतया साधकपदस्य सिद्धिकारणपरता न सम्भवतीत्यतस्तद्व्याचष्टे । साध्येति । कथंचित् । तादृशविरोधिनिश्चयाभावसंपादनेन । साधकपदस्य सिद्धिकारणपरत्वमुपपादयितुमन्यथा व्याचष्टे । पक्षनिष्ठेत्यादि । तत्पदस्य विशेष्यीभूताभावपरतया कर्मधारयोपगमेऽभावपदवैयर्थ्यमतः षष्ठीतत्पुरुषाभिप्रायेण व्याचष्टे । तदभावस्येति ।

केचित्तु तस्येत्यग्रिमेऽभावस्येत्यत्र सामानाधिकरण्येनान्वयि । तथा च स्वकल्पाभिप्रायेण कर्मधारय एवावलम्बनीयस्तच्छब्दस्य विशेषणपरामर्शकताया अपि बहुशो दर्शनात्तच्छङ्कानिरासायाभावपदमित्याहुः ।

अभावप्रतियोगित्वप्रकारकज्ञानत्वेन तज्ज्ञानाभावस्य पक्षताघटकत्वे साध्याभाववान्पक्ष इति निश्चयदशायां पक्षताव्यवहारप्रसङ्ग

इत्यतस्तत्साधारणप्रतियोगितावच्छेदकं दर्शयति । साध्येति । साध्यविषयतानिरूपिततादृशप्रतियोगित्वविषयताशालिनिश्चयत्वेनेत्यर्थः ।

प्रतियोगित्वानुयोगित्वयोस्तुल्यवित्तिवेद्यत्वानुपगमे साध्याभाववान्पक्ष इति ज्ञानस्य न साध्यांशे प्रतियोगितावगाहित्वं किन्त्वभावांश एव तदनुयोगितावगाहित्वमतो नोक्तरूपेण तत्सङ्ग्रहः । एवं साध्यांशे कालिकादिसम्बन्धेन प्रतियोगित्वप्रकारकधीवारणाय साध्यांशे प्रतियोगित्वप्रकारकधियः सम्बन्धविशेषावगाहित्वेनैव निवेशनीयतया प्रतियोगितासंसर्गकबुद्धौ च तदीयसंसर्गाभानादपि न तयोरुक्तरूपेणानुगमसम्भवः । एवमभावसाध्यके प्रतियोगिमत्त्वावगाहिबाधबुद्धेरसङ्ग्रहश्चेत्यतः प्रकृतपक्षधर्मिकप्रकृतसाध्यविशिष्टबुद्धिप्रतिबन्धकत्वेन तदुभयमनुगमयति । साध्यविशिष्टेति । तत्प्रतिबन्धकतावच्छेदकं चागत्याऽननुगतमेव वाच्यमिति ध्येयम् ।

सपक्षसत्त्वादिरूपगमकतौपयिकगणने व्यतिरेकपदेन विपक्षासत्त्वस्यागणनाद्व्यतिरेकाविकलवादित्यत्र व्यतिरेकोपासनेत्यत्र व्यतिरेकश्चेत्यत्र च व्यतिरेकपदस्य तद्रूपार्थकतां स्फुटयति । व्यतिरेक इति । व्यतिरेकव्याप्तेरनुमितिप्रयोजकतां व्यवस्थाप्य व्यतिरेकस्य सहचारविधया तादृशव्याप्तिग्राहकत्वेनानुमित्युपयोगित्वं व्यतिरेकोपासनेत्यंतेनाभिहितमतः पुनर्विपक्षवृत्तित्वशंकानिरासमात्रद्वारा व्यतिरेकव्याप्तिग्रहोपयोगिताभिधानं विरुध्यते व्यतिरेकव्याप्तेर्विशिष्योपादानेनैवान्वयव्याप्तिग्रहे तदनपेक्षालाभात् केवलान्वयिन्युक्तशंकानुदयेन तदनपेक्षाभिधानमप्यसंगतमतो व्यतिरेकव्याप्ताविति मूलस्यान्वयव्याप्त्यर्थकतामाह । व्यतिरेकेति ।

(दी०) अत्र वदन्ति—साध्याभाववदवृत्तित्वमेव व्याप्तिर्लाघवात् प्रायशः साधनभेदेऽप्यभेदाच्च । यत्सम्बन्धावच्छिन्नसाध्याभाववति हेतोरवृत्तित्वं गृह्यते तेन सम्बन्धेन साध्यसिद्धिः फलम् । साध्याभाववति येन सम्बन्धेन हेतोरवृत्तित्वं गृह्यते तेन सम्बन्धेन पक्षधर्मताधीः कारणमिति नातिप्रसङ्गः । आकाशादेस्तथात्वेऽपि पक्षधर्मताज्ञानविरहान्नानुमितिः । निविशतां वा तत्र सा-

ध्यसामानाधिकरण्यं वृत्तिमत्त्वं वा । अथ साध्याभाववदवृत्तित्वं तद्वृत्तिभिन्नत्वादिरूपं व्यभिचारज्ञानविरोधिज्ञानविषयत्वेनानुगमनीयं तच्च व्यापकसामानाधिकरण्यसाधारणमिति चेत् ? स्यादेवं यदि व्यापकताज्ञानं व्यभिचारबुद्धिं विरुन्ध्यात् । न चैवम्, वह्न्यभाववद्वृत्तिर्धूम इति ज्ञाने हि वह्नित्वं स्वरूपेण प्रतियोगित्वं तदवच्छेदकत्वं च सम्बन्धमर्यादया भासते । धूमसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकं वह्नित्वमित्यत्र च वह्नित्वत्वेन वह्नित्वे प्रतियोगितात्वविशिष्टतदवच्छेदकत्वत्वाविशिष्टाभाव इति विषयविरोधविरहात् । विशिष्टस्य वह्नित्वस्यावच्छेदकत्वेन प्रकारान्तरानुसरणे च सुतराम् । मणिमन्त्रादिन्यायेन च प्रतिबन्धकतायां मानाभावात् ।

(गा०)केवलान्वय्यनुमानं स्वातंत्र्येण खंडयितुमुपक्रमते । अत्र वदंतीति । व्याप्तिः । अनुमित्यौपयिकीत्यर्थः । एवकारेण केवलान्वयिसाध्यकसाधारणव्यापकसामानाधिकरण्यस्यानुमित्यौपयिकत्वव्यवच्छेदः । लाघवादिति । व्यापकसामानाधिकरण्यापेक्षया लघुशरीरत्वादित्यर्थः । व्यापकतागर्भव्याप्तौ वह्नित्वादिरूपसाध्यतावच्छेदकविशेषणहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वाभावस्य हेतुविशेषणसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वाभावतुल्यशरीरत्वेऽपि अनवच्छेदकत्वधर्मितावच्छेदकवह्नित्वत्वादेः साध्यसामानाधिकरण्यस्य चाधिकस्य निवेशेन गौरवं बोध्यम् । एवं च तादृशव्याप्तिविशिष्टहेतुमत्ताज्ञानहेतुतामतेऽधिकविषयविषयतानां द्विधा हेतुविषयतायाश्च निवेशात्कारणतावच्छेदकगौरवान्न विनिगमनाविरहेणोभयव्याप्त्योरनुमितिप्रयोजकतेति भावः

एतन्मतेऽवच्छेदकलाघवमुक्त्वा कल्पनालाघवमाह । प्रायश इति । साधनभेदेऽपीति । साधनतावच्छेदकभेदादिति भावः । तथा च धूमत्वालोकत्वाद्यवच्छिन्नलिंगकबहुविधपरामर्शानां वह्न्यभाववदवृत्तित्वावच्छिन्नप्रकारकपक्षनिश्चयत्वेन एकमेव हेतुत्वं कल्प्यते व्यापकसामानाधिकरण्यरूपव्याप्तेर्हेतुतावच्छेदकविशेषघटिततया तद-

वच्छिन्नप्रकारकज्ञानहेतुतायाश्च हेतुतावच्छेदकधूमत्वादिभेदेन भेद इति गौरवम् ।

न च व्यापकताया हेतुतावच्छेदकधूमत्वाद्यवच्छिन्नघटितत्वेऽपि व्यापकताघटकपदार्थानां विषयताकूटे निवेश्यमाने हेतुतावच्छेदकावच्छिन्नविषयतायाः सामान्यतः किञ्चिद्धर्मावच्छिन्नविषयतात्वेनैव कारणतावच्छेदककोटौ निवेशनीयतया व्यापकताज्ञानहेतुतामतेऽपि न धूमत्वालोकत्वादिभेदेन तद्भेद इति वाच्यम् । धूमव्यापकवह्निसमानाधिकरणद्रव्यवानित्यादिज्ञानवारणाय तद्धर्मावच्छिन्नव्यापकसामानाधिकरण्येन तद्धर्मेण चावच्छिन्ना या प्रकारता तत्त्वेन हेतुतायाः कल्प्यतया ऽनुगमासम्भवात् ।

स्वावच्छिन्नव्यापकसाध्यसामानाधिकरण्यावच्छिन्नत्वस्वावच्छिन्नत्वोभयसम्बन्धेन सामान्यतो धर्मविशिष्टत्वेन निविष्टपरामर्शप्रकारतानामनुगमः संभवतीति तु न सम्यक् । तादृशपरंपरायाः सम्बन्धत्वे मानाभावात् जातिविशेषत्वादिना धूमत्वावगाहिनो जातिविशेषवद्व्यापकवह्निसमानाधिकरणधूमवानित्यादिज्ञानादनुमित्यापत्तिश्चेति भावः ।

वह्न्यभाववति धूमादेः समवायादिना वृत्तेः साध्याभाववद्वृत्तित्वरूपव्याप्तावपि हेतुतावच्छेदकीभूतसंयोगादिना ऽवृत्तित्वस्य प्रवेशनीयतया एकसम्बन्धेन साध्याभाववद्वृत्तित्वमपरसम्बन्धेन पक्षधर्मत्वमवगाहमानज्ञानादनुमित्यापत्तेर्वारणाय विशिष्य सम्बन्धौ निवेश्य एकसम्बन्धघटितव्याप्तिपक्षधर्मताविषयकज्ञानस्य हेतुतायाः कल्पनीयतया विभिन्नसम्बन्धेन व्याप्येषु धूमरूपविशेषादिषु व्याप्तेर्भेदस्तद्विषयकपरामर्शकारणताभेदश्चावश्यक इति प्रायश इत्युक्तम् ।

अथ हेतुतावच्छेदकमनिवेश्य व्याप्तिप्रकारकज्ञानत्वेन हेतुत्वे व्यभिचारज्ञानकालेऽपि निर्धर्मितावच्छेदकव्याप्तिज्ञानोत्पत्त्याऽनुमित्युत्पत्तेरावश्यकतया व्यभिचारस्य हेतुदोषतानुपपत्तिरिति चेन्न । किंचिद्धर्मावच्छिन्नहेतुप्रकारक (१)निश्चयत्वेन हेतुत्वात् । वस्तुतः पक्षवृत्तित्वेन निश्चीयमानधूमत्वाद्यवच्छेदेनाव्यभिचारनिश्चयं विना

(१) किञ्चिद्धर्मावच्छिन्नधर्मिताक-इति पु० पा० ।

पक्षवृत्तित्वावच्छेदेन व्यभिचारसंशयस्यानिवृत्तेः पक्षेऽप्यव्यभिचारिसामान्याभावकोटिकसंशयस्यौचित्यावर्जितस्य सम्भवेनाव्यभिचारांशे निर्धर्मितावच्छेदककस्यापि पक्षेऽव्यभिचारिनिश्चयस्यासम्भवेन धूमत्वादिविशिष्टे व्यभिचारग्रहस्यानुमित्युत्पत्तिविरोधित्वात्

अथ धूमालोकादिपरामर्शानामेकरूपेण हेतुत्वे धूमलिंगकेच्छाविरहविशिष्टसिद्ध्यभावरूपपक्षता धूमलिंगकपरामर्शस्यैव सहकारिणी नालोकलिंगकपरामर्शस्येति नियमानुपपत्तेः । तथा च सिद्धिकाले धूमलिंगकानुमितीच्छासत्त्वे धूमपरामर्शसत्त्वे च यद्यत्कारणतावच्छेदकावच्छिन्नस्तोमात्मिका सामग्री फलं जनयति तस्यास्तदानीमसति धूमपरामर्शे सति चालोकपरामर्शेऽप्यावश्यकतया ऽनुमितेर्दुर्वारत्वादिति चेन्न । एतन्मते हि पक्षता लिंगविशेषनियंत्रिता नोपेयते अपि तु तत्तल्लिंगकपरामर्शविशिष्टतत्तल्लिंगकानुमितीच्छाविरहकूटविशिष्टसिद्ध्यभावरूपा एकैव पक्षता नानालिंगकपरामर्शसहकारिणी तत्र च नातिप्रसङ्गशंकापि । न चैवमेकत्रानंतानां परामर्शविशिष्टेच्छाभावानां निवेशे तेषां मिथो विशेष्यविशेषणभावे विनिगमनाविरहेण बहुतरकारणताधिक्यप्रसङ्ग इति वाच्यम् । सिद्धिकाले विनाऽपि धूमलिंगकेच्छामालोकलिंगकेच्छाबलाद् धूमालोकोभयलिंगकसमूहालंबनपरामर्शाद् धूमलिंगकानुमित्युत्पत्त्यां व्यभिचारेण तत्तल्लिंगकानुमितौ तत्तल्लिंगकानुमितीच्छाविरहविशिष्टसिद्ध्यभावत्वेन हेतुत्वासम्भवादुक्तरीतेः सर्वैरेवादरणीयत्वात् ।

तत्तल्लिङ्गकपरामर्शविशिष्टतत्तल्लिङ्गकानुमितीच्छानां स्वीयव्याप्तिपक्षधर्मत्वविषयतानिरूपितविषयतावच्छेदकधर्मावच्छिन्नलिङ्गकत्वप्रकारकत्वसम्बन्धेन परामर्शविशिष्टानुमितीच्छात्वेनानुगमय्यैक एवाभावः सिद्धौ विशेषणतया निवेश्य इत्यप्याहुः ।

वस्तुतस्तु यत्पक्षकयत्साध्यकस्थले सिद्धिकाले कदाऽप्यनुमितिर्न जाता तत्रेच्छाविरहविशेषितसिद्ध्यभावस्यैव पक्षतात्वम् । यत्र वा सिद्धिकाले एकलिङ्गकपरामर्शमात्रसत्त्वेऽन्यलिङ्गकानुमित्सासाधारणरूपेणैवेच्छा जाता तत्र तत्त्वेनैवेच्छाया उत्तेजकत्वसम्भवाल्लिङ्गभेदेन न पक्षताभेद इति तत्रैव परामर्शस्य साधनभेदेन कारणताभेद इत्यभिप्रायेण प्रायश इत्याद्यभिहितम । अत एव लिङ्गविशेषेणा-

पीत्यादिपूर्वग्रन्थाविरोधः । (१)

ननु धूमालोकादिपरामर्शानामेकरूपेण हेतुत्वे तदवच्छेदकनिश्चयत्वशरीरे धूमत्वालोकत्वाद्यवच्छिन्नकोटिकसकलसंशयानामनुगतेनाननुगतेनैव वा भेदस्य एकत्र निवेशनीयतया वह्निव्याप्यधूमवानयं वह्निव्याप्यालोकवान्न वेत्यांशिकसंशयादनुमित्यनुदयापत्तिः । न च संशयत्वघटकव्याप्यविषयताभिन्नत्वमनुमितिजनकतावच्छेदकव्याप्यविषयतायां निवेशनीयमित्युक्तज्ञानीयधूमादिविषयतायाः संशयत्वाघटकतया तत्संग्रह इति वाच्यम् । प्रत्येककोटिनिश्चयीयविषयतातिरिक्तविषयतायाः संशयेऽप्रामाणिकतया निश्चयीयव्याप्तिविषयताया एव विपरीतकोटिविषयतासहितायाः संशयत्वघटकत्वात् । स्वनिष्ठसंशयत्वघटकीभूतविषयतान्यव्याप्यविषयताशून्यं यद्यत्तदन्यव्याप्यवत्त्वज्ञानत्वेन हेतुत्वोपगमे तत्तत्संशयव्यक्तीनां प्रातिस्विकरूपेण भेदकूटपर्यवसानात्तावतां भेदानां विशेषणविशेष्यभावे विनिगमनाविरहेण कारणताया बाहुल्यप्रसङ्गादिति चेन्न । व्याप्यत्वावच्छिन्नाभावकोटिकसंशयभेद एव निवेशनीयो न तु धूमत्वालोकत्वाद्यवच्छिन्नाभावकोटिकसंशयानां तत्तद्रूपेण भेदकूटं धूमत्वाद्यवच्छिन्नाभावकोटिकव्याप्यान्तरानिश्चयानात्मकव्याप्यवत्तासंशये उपस्थितव्याप्यत्वावच्छिन्नाभावविषयकत्वमपि कल्प्यते तादृशाभावभानविरोधिनो व्याप्यवत्तानिश्चयस्य व्याप्यव्याप्यवत्तानिश्चयस्य वा प्राक् सत्त्वे तदुत्तरं जायमानो धूमत्वाद्यवच्छिन्नाभावकोटिकोऽपि संशयो व्याप्यत्वपर्याप्तप्रकारतावच्छेदकताकनिश्चयरूप एवेति तादृशनिश्चयसामग्र्यास्तत्राक्षतत्वादिति ततो जायत एवानुमितिरिति न कश्चिद्दोष इति ।

केचित्तु विरोधानुपस्थितिकालीनभावाभावसंशयस्य, तदुभयसमुच्चयवैलक्षण्यनिर्वाहो न विरोधिविषयकतया सम्भवति अनुपस्थितविरोधस्य प्रकारत्वासम्भवात् तत्संसर्गतायाश्चाप्रामाणिकत्वात् । एतदनुरोधेन तदुपगमे संशये ,कोटिविषयताया एव विलक्षणाया उपगंतुमुचितत्वात् । तथा च संशयत्वघटकविलक्षणकोटिविषयताभिन्नत्वमेवानुमितिजनकतावच्छेदकव्याप्यविषयतायां

(१) वस्तुतस्त्वित्यादिः पाठः पुस्तकान्तरे न दृश्यते ।

निवेशनीयम् । वैलक्षण्यं च तस्याः पदार्थान्तररूपं कल्पान्तर्गतं वेत्यन्यदेतत् । न च विरोधानुपस्थितिदशायां न भावाभावयोः संशयोऽपि तु तदुभयसमुच्चय एवेति विरोधस्य निखिलसंशये प्रकारतयैव भानमिति वाच्यम् । भावाभावयोरविरोधज्ञानमन्तरेण तदुभयसमुच्चयस्यानुभवविरुद्धत्वात् । न च तदानीं संशयसमुच्चयौ द्वावेव नाभ्युपगन्तव्याविति वाच्यम् । प्रत्येकं स्वकार्यजनने बाधकाभावात् तुल्यबलसामग्र्योः परस्परफलाप्रतिबन्धकत्वात् । अन्यथा संशयोच्छेदात् इत्याहुः ।

अन्ये तु संशये भावाभावोभयप्रकारतानिरूपिता एका विशेष्यता समुच्चये तु प्रकारताभेदेन तद्भेद इत्युभयोर्वैलक्षण्यमेवं चाभावत्वावच्छिन्नप्रकारत्वानिरूपितव्याप्यप्रकारतानिरूपितविशेष्यताकत्वमेव सर्वसाधारणव्याप्यवत्तानिश्चयत्वम् । भावद्वयकोटिकः संशयो न प्रामाणिकः धूमवान् जलत्ववान्वा ऽयमित्यत्राभावद्वयस्यापि भानोपगमात् अभावभासकसामग्र्यसत्त्वे विरोधाग्रहे समुच्चयस्यैवोपगमात् । विरोधग्रहदशायां तस्यैव विरोधिप्रकारकनिश्चयसामग्रीसहितस्य तत्प्रकारकालौकिकविषयताशालिज्ञानप्रतिबन्धकतयोभयप्रकारकज्ञानस्यैवासम्भवात् । निश्चयसामग्री च तदभावप्रकारकज्ञानसामग्र्यसमवहिततत्प्रकारकज्ञानसामग्री न तु निश्चयत्वावच्छिन्नसामग्री निश्चयत्वस्य जन्यतानवच्छेदकत्वात्तदसिद्धेः पीतत्वशङ्खत्वयोर्विरोधित्वेन ज्ञायमानयोर्दोषवशेनालौकिकसामग्रीवशादेकधर्मिण्येकनिश्चयविषयतयाऽभावद्वयकोटिकज्ञाने संशयत्वासम्भवात् । असति दोषविशेषे लौकिकसन्निकर्षादौ च उपनयवशात् एकधर्मिणि तादृशयोर्निश्चयासम्भवेन च तादृशप्रतिबध्यप्रतिबन्धकभावस्य प्रामाणिकत्वादिति वदन्ति । तदसत् । अभावत्वघटितधर्मावच्छिन्नहेतुमत्तापरामर्शस्य व्याप्यप्रकारतानिरूपितविशेष्यतायामभावत्वावच्छिन्नप्रकारतानिरूपितत्वसत्त्वेन तादृशपरामर्शस्य निश्चयत्वानुपपत्तेः । न च व्याप्यत्वावच्छिन्नप्रकारताभिन्नप्रकारतात्वेन विरोधिप्रकारतानिवेशान्नायं दोष इति वाच्यम् । यत्र विरोधिकोटेरपि साध्यव्याप्यतया भानं तादृशसंशयस्य दुर्वारत्वात् ।

एवं शुद्धपर्वतत्वावच्छेदेनाभावप्रकारकस्य नीलपर्वतत्वादिवि-

शिष्टे व्याप्यवत्तावगाहिनस्संशयस्य न्यूनाधिकधर्मावच्छिन्नयोर्भावाभावोभयप्रकारतानिरूपितविशेष्यतयोरैक्यासम्भवात् । नीलरूपवत्त्वावच्छेदेन वह्निव्याप्यवत्तानिश्चयदशायामपि तादृशसंशयोत्पत्त्या तत्र नीलपर्वतत्वावच्छिन्नविशेष्यताया वह्निव्याप्याभावप्रकारतानिरूपितत्वाभ्युपगमासम्भवात् । न च तादृशसंशय एवासिद्धः । एकधर्मपर्याप्तकोटिद्वयधर्मितावच्छेदकताकबुद्धेरेव संशयत्वादिति वाच्यम् । यदंशभानप्रयुक्तं संशयत्वं तद्भानेऽधिकस्य एकतरकोटिधर्मितावच्छेदककोटौ भानेऽप्यधिकं त्विति न्यायेन संशयत्वस्यावश्यकतया तुल्यबलसामग्रीभ्यां तादृशज्ञानजनने बाधकविरहेण तथाविधज्ञानमेव न जायत इत्युक्त्यसम्भवात् ।

संशये कोटिद्वयप्रकारतानिरूपितविशेष्यतयोरवच्छेद्यावच्छेदकभावः समुच्चये तु न तथा एवं चाभावप्रकारतानिरूपितविशेष्यतानवच्छिन्नतत्प्रकारकविशेष्यताकत्वं निश्चयत्वमित्यपि न युक्तम् । अविरुद्धतया ज्ञायमानद्वंद्वोपस्थितभावाभावोभयविशिष्टधर्मिविषयकज्ञाने विशृंखलधर्मिविषयताद्वयोपगमे ज्ञानस्य समूहालंबनतया एकवाक्यताविरहेण समासानुपपत्त्या धर्मिविषयताद्वयस्यावच्छेद्यावच्छेदकभावध्रौव्येण तादृशज्ञानस्य निश्चयत्वानुपपत्तेरिति दिक् ।

भावद्वयमात्रकोटिकोऽपि संशयोऽभावभानसामग्र्यसत्त्वेऽनुभवसिद्ध· समानबलसामग्रीसंवलनसिद्धेश्च उक्तसामग्रीप्रतिबन्धकताया अप्रामाणिकत्वात् । संशयत्वे च कोट्यंशे लौकिकविषयताविरहस्य प्रयोजकतया कथितदोषविशेषजनितनिश्चये, तदभावानर्वाहात् । लौकिकविषयता च साक्षात्त्वजातिव्यंजकविषयता सा च दोषविशेषजन्यज्ञानेऽप्यस्ति, शङ्खः पीत इत्यादिभ्रमानन्तरं पीतिमानं साक्षात्करोमीत्यनुव्यवसायोदयात् । एवं चाभावप्रकारत्वानिरूपितत्वादिना व्याप्यप्रकारकविषयताया निश्चयत्वघटकत्वेऽतिप्रसंगो दुर्वार एवेत्यपि वदन्ति ।

इदं तु बोध्यम् । संशयसमुच्चययोर्वैलक्षण्याय संशये कोटिद्वयप्रकारितयोरवच्छेद्यावच्छेदकभावः स्वीक्रियते एवं च किञ्चित्प्रकारकत्वानवच्छिन्नव्याप्यप्रकारकज्ञानत्वमेव व्याप्यवत्तानिश्चयत्वं धूमालोकादिपरामर्शसाधारणमनुमितिजनकतावच्छेदकम् तत्र च न काचिदनुपपत्तिः । अभेदेऽवच्छेद्यावच्छेदकभावविरहान्न तत्प्रकारक-

त्वस्य तत्प्रकारित्वावच्छिन्नत्वशंकाऽपि । संशयत्वं वा मानसत्वव्याप्यजातिरव्याप्यवृत्तिः सर्वत्र संशयस्य मानसताया एवोपगमात । चक्षुःसन्निकर्षादिमद्धर्मिकसंशयदशायां पर्वतं पश्यामीत्यनुव्यवसायश्च संशयस्य पूर्वं परतो वा जायमानतद्विषयकचाक्षुषादिज्ञानस्य कल्पने तद्विषयकतयैवोपपादनीयः । संशयत्वस्य चावच्छेदकं तत्तद्धर्मिविषयकत्वावच्छिन्नतत्कोटिविषयकत्वमेव । एवं च पक्षविशेष्यकत्वावच्छिन्नव्याप्यत्वावच्छिन्नप्रकारकत्वावच्छेदेन(१) संशयत्वाभाववत्त्वमेव पक्षे व्याप्यवत्तानिश्चयत्वं वाच्यम् । वह्निव्याप्यधूमवान् पर्वतो वह्निव्याप्यालोकवान्न वा पर्वतो वह्निव्याप्यधूमवान् भूतलं वह्निव्याप्यधूमवन्न वेत्यादिसंशये च पर्वतविशेष्यकत्वावच्छिन्नधूमप्रकारकत्वावच्छेदेन संशयत्वाभावोऽनुभवसिद्ध एव, पर्वते धूमं न सन्देह्मीति प्रतीतेस्तत्र सर्वानुभवसिद्धत्वादिति नानुपपत्तिः । चाक्षुषादिज्ञानस्यापि संशये सङ्करभयेन नानैव संशयत्वानि स्वीक्रियंते तदभावकूटवत्त्वमेव निश्चयत्वघटकमनंतहेतुतावच्छेदकभेदेनानंतकारणत्वकल्पनापेक्षया कतिपयसंशयत्वजात्यभावघटितनिश्चयत्वेन सर्वसाधारणकारणताकल्पने लाघवात् । जातेरव्याप्यवृत्तिता च मिश्रादिभिरपि स्वीकृतेति नापसिद्धांतभीतिः ।

भवतु वा संशयत्वजातिर्व्याप्यवृतिरेव तद्विशिष्टनिरूपितत्वं संशये कोटिविषयताया एवोपेयते । भवतु वा संशयनिश्चययोर्विषयताभेदः तं विना संशयसमुच्चययोर्वैलक्षण्यानुपपत्तेरुक्तत्वात । एवं च संशयत्वविशिष्टानिरूपितत्वस्य पक्षविषयतानिरूपितव्याप्यविषयतायां निवेशात्सर्वसामंजस्यमित्यादिकमालोचनीयम् ।

धूमत्वालोकत्वाद्यवच्छिन्नाभावघटितभ्रमत्वज्ञानाभावादीनां पृथक् पृथक् परामर्शविशेषणतायाः सहकारिताया वा अनुरोधात् साधनतावच्छेदकभेदेन परामर्शकारणताभेद आवश्यक इति केचिद्दीधितिकारानाक्षिपन्ति । तत्र विषयतासम्बन्धेन तत्तदप्रामाण्यग्रहाविशिष्टधूमादिप्रकारताभेदकूटविशिष्टत्वेन व्याप्यविषयतानां कारणतावच्छेदकत्वम् । आलोकादिविषयताया धूमाभावादिघटि-

संश

(१) पक्षविशेष्यकत्वावच्छिन्नतत्प्रकारकत्वावच्छेदेन—इति प॰पाठः ।

तभ्रमत्वग्रहे स्वातन्त्र्येण भानेऽपि तादृशभ्रमत्वग्रहविशिष्टधूमादिविषयताभेदसत्त्वात्तदानीमालोकादिपरामर्शादनुमितिः । अप्रामाण्यग्रहासत्त्वे च कालान्तरीणतद्ग्रहविषये तद्विशिष्टभेदापगमाज्ञानुपपत्तिः ।

वस्तुतस्तु कारणतावच्छेदकव्याप्यप्रकारतायां किञ्चिद्धर्मविशिष्टविषयताविशिष्टान्यत्वं निवेशनीयम् । विषयतायां धर्मवैशिष्ट्यं च स्वावच्छिन्नत्वप्रकारतानिरूपितत्वस्वावच्छिन्नाभाववद्विशेष्यतानिरूपितत्वप्रकारतानिरूपितत्वोभयसम्बन्धेन । विषयतावैशिष्ट्यं च स्वनिरूपकज्ञानसमानाधिकरणज्ञाननिरूपितत्व-स्वनिरूपकज्ञानविशेष्यीभूतज्ञाननिरूपितत्व-स्वाश्रयप्रकारतावच्छेदकावच्छिन्नत्वैतत्त्रितयसम्बन्धेन वाच्यम् । तादृशी च विषयता धूमाद्यप्रामाण्यज्ञानीयधूमादिप्रकारतानिष्ठेति ज्ञानभेदेन विषयताभेदमते न कश्चिद्दोष इति केचित्समादधति ।

परे तु जनकतावच्छेदकप्रकारतायां यद्धर्मावच्छिन्नत्वं फलोत्पादाप्रयोजकं तदवच्छिन्नाभावघटितभ्रमत्वज्ञानमकिञ्चित्करम्, एवं च हेतुतावच्छेदकानवगाहिज्ञानहेतुतावादिनां व्याप्यप्रकारतायामवच्छेदकतया धूमत्वाद्यभानेऽपि व्याप्यवानयमिति ज्ञानादनुमित्युत्पत्त्या वह्निव्याप्यधूमवानयमित्यादिज्ञानाद्धूमाभाववति धूमप्रकारकमिदं ज्ञानमित्यप्रामाण्यग्रहदशायां वह्निव्याप्यत्वावच्छिन्नाभावघटितभ्रमत्वाग्रहे जायत एवानुमितिः, यत्र नानुमितिस्तत्र तादृशभ्रमत्वग्रह एव कल्प्यते व्याप्यधर्मान्तरानिश्चयस्थले व्याप्यधूमादिनिश्चयेऽप्रामाण्यग्रहसत्त्वे व्याप्यत्वावच्छिन्नाभावस्य धर्मिणि संशयसंभवेन तद्धर्मिविशेष्यकज्ञाने तादृशाभावघटितभ्रमत्वसंशयस्यौचित्यावर्जिततया प्रायशः संभवात् । एवं च व्याप्यत्वावच्छिन्नाभावघटितभ्रमत्वज्ञानाभाव इति परामर्शस्य विशेषणं सहकारी वा न तूदासीनधूमत्वाद्यवच्छिन्नाभावघटितभ्रमत्वज्ञानाभाव इति न किञ्चिदनुपपन्नम् । यत्साध्यपक्षकस्थले व्याप्यतावच्छेदकधर्मविशेषावच्छिन्नाभावघटितभ्रमत्वग्रहदशायामितरानुमितिकारणसमुदायसत्त्वे व्याप्यत्वावच्छिन्नाभावघटितभ्रमत्वंग्रहनियमस्तत्साध्यपक्षकस्थलाभिप्रायकमेवैतल्लाघवाभिधानमिति वदन्ति ।

ननु सामानाधिकरण्यघटितव्याप्तिपक्षे सामानाधिकरण्यप्रविष्टसाध्यसम्बन्धत्वमेवानुमितौ विधेयतावच्छेदकसम्बन्धताप्रयोजकं

त्वस्य तत्प्रकारित्वावच्छिन्नत्वशंकाऽपि । संशयत्वं वा मानसत्वव्याप्यजातिरव्याप्यवृत्तिः सर्वत्र संशयस्य मानसताया एवोपगमात् । चक्षुःसन्निकर्षादिमद्धर्मिकसंशयदशायां पर्वतं पश्यामीत्यनुव्यवसायश्च संशयस्य पूर्वं परतो वा जायमानतद्विषयकचाक्षुषादिज्ञानस्य कल्पने तद्विषयकतयैवोपपादनीयः । संशयत्वस्य चावच्छेदकं तत्तद्धर्मिविषयकत्वावच्छिन्नतत्कोटिविषयकत्वमेव । एवं च पक्षविशेष्यकत्वावच्छिन्नव्याप्यत्वावच्छिन्नप्रकारकत्वावच्छेदेन(१)-संशयत्वाभाववत्त्वमेव पक्षे व्याप्यवत्तानिश्चयत्वं वाच्यम् । वह्निव्याप्यधूमवान् पर्वतो वह्निव्याप्यालोकवान्न वा पर्वतो वह्निव्याप्यधूमवान् भूतलं वह्निव्याप्यधूमवन्न वेत्यादिसंशये च पर्वतविशेष्यकत्वावच्छिन्नधूमप्रकारकत्वावच्छेदेन संशयत्वाभावोऽनुभवसिद्ध एव, पर्वते धूमं न सन्देह्मीति प्रतीतेस्तत्र सर्वानुभवसिद्धत्वादिति नानुपपत्तिः । चाक्षुषादिज्ञानस्यापि संशये सङ्करभयेन नानैव संशयत्वानि स्वीक्रियंते तदभावकूटवत्त्वमेव निश्चयत्वघटकमनंतहेतुतावच्छेदकभेदेनानंतकारणत्वकल्पनापेक्षया कतिपयसंशयत्वजात्यभावघटितनिश्चयत्वेन सर्वसाधारणकारणताकल्पने लाघवात् । जातेरव्याप्यवृत्तिता च मिश्रादिभिरपि स्वीकृतेति नापसिद्धांतभीतिः ।

भवतु वा संशयत्वजातिर्व्याप्यवृत्तिरेव तद्विशिष्टनिरूपितत्वं संशये कोटिविषयताया एवोपेयते । भवतु वा संशयनिश्चययोर्विषयताभेदः तं विना संशयसमुच्चययोर्वैलक्षण्यानुपपत्तेरुक्तत्वात् । एवं च संशयत्वविशिष्टानिरूपितत्वस्य पक्षविषयतानिरूपितव्याप्यविषयतायां निवेशात्सर्वसामंजस्यमित्यादिकमालोचनीयम् ।

धूमत्वालोकत्वाद्यवच्छिन्नाभावघटितभ्रमत्वज्ञानाभावादीनां पृथक् पृथक् परामर्शविशेषणतायाः सहकारिताया वा अनुरोधात् साधनतावच्छेदकभेदेन परामर्शकारणताभेद आवश्यक इति कांचिद्दीधितिकारानाक्षिपन्ति । तत्र विषयतासम्बन्धेन तत्तदप्रामाण्यग्रहाविशिष्टधूमादिप्रकारताभेदकूटविशिष्टत्वेन व्याप्यविषयतानां कारणतावच्छेदकत्वम् । आलोकादिविषयताया धूमाभावादिघटि-

(१) पक्षविशेष्यकत्वावच्छिन्नतत्प्रकारकत्वावच्छेदेन—इति क्वचित्पाठः ।

तद्भ्रमत्वग्रहे स्वातन्त्र्येण भानेऽपि तादृशभ्रमत्वग्रहविशिष्टधूमादिविषयताभेदसत्त्वात्तदानीमालोकादिपरामर्शादनुमितिः । अप्रामाण्यग्रहासत्त्वे च कालान्तरीणतद्ग्रहविषये तद्विशिष्टभेदोपगमान्नानुपपत्तिः ।

वस्तुतस्तु कारणतावच्छेदकव्याप्यप्रकारतायां किञ्चिद्धर्मविशिष्टविषयताविशिष्टान्यत्वं निवेशनीयम् । विषयतायां धर्मवैशिष्ट्यं च स्वावच्छिन्नत्वप्रकारतानिरूपितत्वस्वावच्छिन्नाभाववद्विशेष्यतानिरूपितत्वप्रकारतानिरूपितत्वोभयसम्बन्धेन । विषयतावैशिष्ट्यं च स्वनिरूपकज्ञानसमानाधिकरणज्ञाननिरूपितत्व–स्वनिरूपकज्ञानविशेष्यीभूतज्ञाननिरूपितत्व–स्वाश्रयप्रकारतावच्छेदकावच्छिन्नत्वेतत्त्रितयसम्बन्धेन वाच्यम् । तादृशी च विषयता धूमाद्यप्रामाण्यज्ञानीयधूमादिप्रकारतानिष्ठेति ज्ञानभेदेन विषयताभेदमते न कश्चिद्दोष इति केचित्समादधति ।

परे तु जनकतावच्छेदकप्रकारतायां यद्धर्मावच्छिन्नत्वं फलोत्पादाप्रयोजकं तदवच्छिन्नाभावघटितभ्रमत्वज्ञानमकिञ्चित्करम्, एवं च हेतुतावच्छेदकानवगाहिज्ञानेहेतुतावादिनां व्याप्यप्रकारतायामवच्छेदकतया धूमत्वाद्यभानेऽपि व्याप्यवानयमिति ज्ञानादनुमित्युत्पत्त्या वह्निव्याप्यधूमवानयमित्यादिज्ञानाद्धूमाभाववति धूमप्रकारकमिदं ज्ञानमित्यप्रामाण्यग्रहदशायां वह्निव्याप्यत्वावच्छिन्नाभावघटितभ्रमत्वाग्रहे जायत एवानुमितिः, यत्र नानुमितिस्तत्र तादृशभ्रमत्वग्रह एव कल्प्यते व्याप्यधर्मान्तरानिश्चयस्थले व्याप्यधूमादिनिश्चयेऽप्रामाण्यग्रहसत्त्वे व्याप्यत्वावच्छिन्नाभावस्य धर्मिणि संशयसंभवेन तद्धर्मिविशेष्यकज्ञाने तादृशाभावघटितभ्रमत्वसंशयस्यौचित्यावर्जिततया प्रायशः संभवात् । एवं च व्याप्यत्वावच्छिन्नाभावघटितभ्रमत्वज्ञानाभाव इति परामर्शस्य विशेषणं सहकारी वा न तूदासीनधूमत्वाद्यवच्छिन्नाभावघटितभ्रमत्वज्ञानाभाव इति न किञ्चिदनुपपन्नम् । यत्साध्यपक्षकस्थले व्याप्यतावच्छेदकधर्मविशेषावच्छिन्नाभावघटितभ्रमत्वग्रहदशायामितरानुमितिकारणसमुदायसत्त्वे व्याप्यत्वावच्छिन्नाभावघटितभ्रमत्वंग्रहनियमस्तत्साध्यपक्षकस्थलाभिप्रायकमेवैतल्लाघवाभिधानमिति वदन्ति ।

ननु सामानाधिकरण्यघटितव्याप्तिपक्षे सामानाधिकरण्यप्रविष्टसाध्यसम्बन्धत्वमेवानुमितौ विधेयतावच्छेदकसम्बन्धताप्रयोजकं

तद्घटितोक्तव्याप्तेरनुमितिहेतुत्वे च सम्बन्धभाननियामकस्य दुर्वचत्वेत्याशंकां निरस्यति यत्सम्बन्धेति । उक्तव्याप्तिघटकसाध्याभावप्रतियोगितायामवच्छेदकतया भानमेव विधेयतावच्छेदकतया सम्बन्धभाननियामकमित्यर्थः ।

ननु व्याप्तेः साध्यसाधनसामानाधिकरण्याघटितत्वे पक्षे कदाचित्संयोगेन हेतुमत्ताज्ञानादेवानुमितिः कदाचित्समवायादिनेत्यत्र किं नियामकम् ? व्याप्तेस्तद्घटितत्वे च तादृशसामानाधिकरण्यघटकसाधनीयसम्बन्धेन पक्षे साधनवत्ताज्ञानस्यानुमितिहेतुतया तन्नियम इत्यत आह साध्याभाववति येन सम्बन्धेनावृत्तित्वमिति । यत्सम्बन्धावच्छिन्नवृत्तेरभाव इत्यर्थः । नातिप्रसङ्गः—नाभ्रान्तस्य समवायेन धूमादिमति वह्न्याद्यनुमितिप्रसंगः ।

ननूक्तव्याप्तेरवृत्तिसाधारणतया तद्धेतुकाऽप्यनुमितिरभ्रान्तस्य स्यादित्यत आह आकाशादेरिति । तथात्वेपि—साध्याभाववदवृत्तित्वेपि । अभ्रान्तस्य तत्र पक्षधर्मताज्ञानविरहान्नानुमितिः ।

नन्वेवमपि व्याप्तिभ्रमं विना नावृत्तिहेतुकानुमितिरित्यनुभवो व्याहन्येतेवत्यत आह निविशतां वेति । वाशब्दोऽनास्थायाम्, उक्तानुभवस्य सविवादत्वात् । तत्र—तादृशव्याप्तावपि । साध्यसामानाधिकरण्यमिति । तथापि दर्शितलाघवाक्षतेरिति भावः ।

वृत्तिमत्त्वनिवेशेनैवोक्तानुमितिवारणसंभवे साध्याधिकरणांशनिवेशो निरर्थकः, हेतोः साध्यासामानाधिकरण्यनिश्चयदशायामनुमित्यापत्तेर्व्यापकतापरामर्शहेतुताविचारोपदर्शितरीत्या निराससंभवादित्याशयेनाह वृत्तिमत्त्वं वेति । वृत्तिमत्त्वं—व्याप्यताघटकसम्बन्धेन संबंधित्वम्, अतस्तादात्म्यसंबंधेनाकाशादेरपि द्रव्यत्वादिव्याप्यतोपपत्तिः ।

साध्याभाववद्वृत्तित्वात्यन्ताभावसाध्याभाववद्वृत्तिभेदरूप—साध्याभाववदवृत्तित्वस्य प्रत्येकं हेतुत्वेऽननुगमः । एकतरस्यैव हेतुत्वं विनिगमनाविरहात् दुर्वचम् । साध्याभाववद्वृत्तिभिन्नत्वशरीरेऽधिकस्याधिकरणस्य निवेशेन गौरवेऽपि तदहेतुत्वेऽनुभवविरोधः, अनुमितिहेतुताप्रयोजकस्य व्यभिचारज्ञानविरोधित्वस्याविशेषादिति, तादृशव्याप्त्योस्तद्विषयधियोर्वाऽनुगमे व्यापकसामानाधिकरण्यस्य तद्धियो वाऽनुगतरूपाक्रान्ततया व्यापकसामानाधिकरण्यधीर-

नुमितिहेतुः स्यादित्याशंकते अथेति । व्यभिचारधीरिति । साध्याभाववद्वृत्तित्वधीरित्यर्थः । विरोधिधीविषयत्वेनेति । उक्तरूपेण व्याप्तिद्वयमनुगमय्य तद्विषयकत्वेन ज्ञानानुगमः शिरोवेष्टनेन नासिकास्पर्शतुल्य इति व्यभिचारज्ञानविरोधित्वेन ज्ञानानुगमकरूपेण हेतुतायामेव तात्पर्यम् । व्यभिचारबुद्धिम्-साध्याभाववद्वृत्तित्वबुद्धिम् । नचैवमिति । व्यापकताधियः साध्याभाववद्वृत्तित्वधीप्रतिबन्धकत्वमेव नेत्यर्थः, मानाभावादिति भावः ।

ननु वन्ह्यभाववद्वृत्तिर्धूम इति ज्ञाने तुल्यवित्तिवेद्यतया वह्नित्वे धूमवद्वृत्त्यभावप्रतियोगितावच्छेदकत्वभानाद्वह्नित्वधर्मिकतादृशावच्छेदकत्वाभावरूपव्यापकतावच्छेदकत्वावगाहिनो ज्ञानस्य ग्राह्याभावावगाहितया विरोधित्वमविवादमेवेत्याशंक्य ग्राह्याभावावगाहिनोऽपि ज्ञानस्य विशेष्याद्यंशे समानप्रकारकस्यैव विरोधिता, जातित्वादिना भासमानवह्नित्वादौ अवच्छेदकत्वावगाहिबुद्धिं प्रति वह्नित्वत्वाद्यवच्छिन्ने तत्रानवच्छेदकत्वधियोऽप्रतिबन्धकत्वात्, एवं प्रतियोगितावच्छेदकसम्बन्धावगाहिप्रतियोगिज्ञानं प्रत्येवाभावज्ञानं विरोधि अन्यथाऽतिप्रसंगादित्याशयेन प्रतिबध्यप्रतिबंधकभावाभिमतज्ञानयोरसमानप्रकारकत्वं व्यभिचारज्ञाने ग्राह्यस्यावच्छेदकत्वस्य सम्बन्धताप्रदर्शनेन तत्सबंधानवगाहित्वं च दर्शयति वह्न्यभाववद्वृत्तिरिति । वह्नित्वं स्वरूपेणेति । भासते इत्यग्रिमेणान्वयः । स्वरूपेण भानं निष्प्रकारकभानं न तु सप्रकारकभानं वह्नित्ववदभाववृत्तिर्धूम इति वह्नित्वत्वावच्छिन्नविषयकधीविरोधित्वेनानुगमे च स्वरूपतो वह्नित्वावगाहिनो वह्न्यभाववदवृत्तिर्धूम इति ज्ञानस्यासंग्रहो बोध्यः । सम्बन्धमर्यादयेत्यनेन तदंशे निष्प्रकारकत्वमपि दर्शितम् ।

विषयविरोधिविरहादिति । विरोधिताप्रयोजकविषयताविरहादित्यर्थः । अवच्छेदकत्वतदभावरूपविषययोर्विरोधस्य निर्विवादतया यथाश्रुतासंगतेः । विशिष्टस्य-महानसीयत्वादिरूपविशेषणान्तरधर्मितावच्छेदकतापन्नस्य । अवच्छेदकत्वेन-धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वेन, तादृशप्रतियोगितानवच्छेदकत्वानुपपत्त्या । प्रकारान्तरानुसरणे-अवच्छेदकतापर्याप्त्यवच्छेदकानवच्छिन्नकिञ्चिद्धर्मपर्याप्तिमत्त्वविवक्षणे । महानसीयत्वादिसहितवह्नित्वादिपर्याप्तावच्छेदकतायाः पर्याप्त्यवच्छेदको न शुद्धवह्नित्वादिमात्रवृत्तिधर्मः स्यूनवृ-

तित्वात्। तथा च तादृशधर्मानवच्छिन्नबुद्धिविशेषविषयत्वावच्छेदकत्वादिधर्ममादाय वह्नित्वादेर्धूमादिव्यापकतावच्छेदकत्वमिति भावः। वह्नित्वादिरूपसाध्यतावच्छेदकदितरानवच्छिन्नप्रतियोगितानिवेशे वा।

न च विशिष्टपर्याप्त्यवच्छेदकतायाः वह्नित्वे प्रत्येकं ह्नित्वादिवदभावसौलभ्येन यथाश्रुतमेव साध्विति वाच्यम्। एवं सति महानसीयवह्निभिन्नवह्निमान् धूमादित्यादावतिव्याप्तेः।

साध्यतावच्छेदकघटकयोर्महानसीयवह्निभिन्नत्ववह्नित्वयोः प्रत्येकमवच्छेदकत्वपर्याप्तिविरहेण तदनातिरिक्तस्य विशिष्टस्याप्यनवच्छेदकताया दुर्वारत्वात्। सुतरामिति। विषयविरोधविरहादित्यनुषज्यते। उक्तव्यभिचारज्ञाने दर्शितरीत्या परिष्करणेऽपि व्यापकताप्रविष्टाभावस्य धर्मितत्प्रतियोगितानवच्छेदकावच्छिन्नवत्त्वाभानादिति भावः।

ननु व्यभिचारव्यापकताज्ञानयोर्मणिमंत्रादिन्यायेन परस्परविरोधिता न तु ग्राह्याभावावगाहित्वेनेति समानप्रकारकत्वमनपेक्षितमत आह मणीति। इदमुपलक्षणम्—व्यापकताज्ञानस्य व्यभिचारधीविरोधित्वेऽपि सामानाधिकरण्यविषयतायास्तन्निरूपितहेतुविषयतायाश्च प्रतिबंधकतानवच्छेदकतया पक्षविषयतानिरूपितहेतुविषयतायाः तादृशधीप्रतिबन्धकतावच्छेदकत्वेन परामर्शकारणतावच्छेदके निवेशासंभवाद्वह्निव्याप्यो धूमो धूमवान् पर्वत इत्यादिसमूहालम्बनरूपाद्व्यभिचारधीविरोधिज्ञानादनुमित्यापत्तिर्दुर्वारेत्यपि बोध्यम्।

(दी०)व्यापकताज्ञानादेवानुमितिरिति च नानुभविकं न वा यौक्तिकम्। ज्ञानत्वत्वादिना ज्ञानत्वादेर्व्यापकतावच्छेदकत्वग्रहे ज्ञानादिमानित्यनुमितेरयोगात्। अन्यथा जातित्वेनाऽनुभवत्वव्यापकगुणत्वव्याप्यजातित्वादिना वा तथात्वग्रहेऽपि तत्प्रसङ्गात्। एतेन केवलान्वयिसाध्यकत्वज्ञानमेवानुमितिहेतुरित्यपि परास्तम्। सर्वजनानुभवसिद्धानुमितिभावे धूमादिदर्शनानन्तरं जायमाने गृह्यमाणव्यतिरेकवह्न्यादिज्ञानेऽसम्भवाच्च।

प्रमेयत्वादेश्च घटादिवृत्तित्वं केवलान्वयित्वेन कथञ्चित्तद्वृत्तिधर्मव्यापकत्वेन वाऽनुमेयम्, न तु ज्ञेयत्वादिहेतुका तदनुमितिरानुभविकी ।

(गा०) ननु केवलान्वयिसाध्यकानुमितेर्भ्रमं विनोपपादनाय गुरुशरीरापि व्यापकसामानाधिकरण्यरूपा व्याप्तिरेवानुमितिप्रयोजिका वाच्येत्यत आह व्यापकतेति । ज्ञानादिमानित्यनुमितेरिति । स्वरूपतो ज्ञानत्वादिविधेयतावच्छेदकावगाह्यनुमितेरित्यर्थः । अयोगादिति । यद्धर्मावच्छिन्ने साध्यतावच्छेदके व्यापकतावच्छेदकत्वग्रहस्तेन रूपेण साध्यतावच्छेदकमनुमितिविषय इति नियमस्य भवताऽभ्युपगन्तव्यत्वादिति भावः । व्यतिरेकिसाध्यकस्थले साध्याभाववदवृत्तित्वज्ञानम् केवलान्वयिसाध्यकस्थले तु व्यापकसामानाधिकरण्यज्ञानं हेतुरित्युक्तौ वह्न्यभाववदवृत्तित्वाज्ञानात्स्वरूपतो वह्नित्वादिविषयिण्या वह्निमानयमित्याद्यनुमितेर्निर्वाहात् विषयतया केवलान्वयिनो ज्ञानस्य साध्यतानुसरणम् । वाच्यत्ववत्वादेरखंडधर्मत्वाभावेन स्वरूपतोऽभानात्तदवच्छिन्नसाध्यकोपेक्षा । निर्धर्मितावच्छेदककव्यापकतावच्छेदकत्वग्रहस्य व्यभिचारग्रहाप्रतिबध्यतया सधर्मितावच्छेदकस्य स्वरूपतो ज्ञानत्वानवगाहितया च न तस्य ज्ञानवानित्यनुमितिहेतुतासंभव इति ध्येयम ।

रूपान्तरेण व्यापकतावच्छेदकत्वावगाहिपरामर्शस्य स्वरूपतो विधेयतावच्छेदकभासकत्वोपगमे बाधकमाह अन्यथेति । तन्मात्रवृत्तिधर्मपुरस्कारेण तत्र व्यापकतावच्छेदकत्वग्रहस्य स्वरूपतस्तद्धर्मभासकत्वोपगमे । जातित्वेन-जात्यन्तरसाधारणेन, व्यापकतावच्छेदकतावच्छेदकत्वग्रहात्ज्ञातिप्रसंग इत्याशयेनाह अनुभवत्वव्यापकेति । प्रत्यक्षत्वानुभवत्वसाधारण्यवारणायानुभवत्वव्यापकेति अनुभवतदन्यवृत्तीत्यर्थकम । स्मृतित्वव्यावर्तनायानुभववृत्तित्वनिवेशः । सत्तागुणत्वव्यावर्तनाय गुणत्वव्याप्येति किञ्चिद्गुणावृत्त्यर्थकम् । तथात्वग्रहेऽपि-व्यापकतावच्छेदकत्वग्रहेऽपि । तत्प्रसंगात्-स्वरूपतो ज्ञानत्वविषयकानुमितिप्रसंगात् । न चोक्तरूपेण व्यापकतावच्छेदकत्वग्रहस्य स्वरूपतो ज्ञानत्वप्रकारकज्ञानानुमित्यजनकत्वेऽपि ज्ञानत्ववत्वेन तद्ग्रहस्य तादृशानुमितिजनकत्वमविरुद्धमिति

धाच्यत्, तथासत्यसति सिद्धिविशेषादिरूपताद‍ृशानुमितिप्रतिबं-धके ज्ञानत्ववत्वानयमित्येतावन्मात्राकारिकाया अनुमितेर्विलोपप्र-संगात् ।

यत्तु—स्वरूपतो यत्र ज्ञानत्वादिकं सामानाधिकरण्यनिरूपकताव-च्छेदकतया भासते ताद‍ृशाद्व्यापकतावच्छेदकत्ववज्ज्ञानसमानाधि-करणहेतुमानयमित्यादिपरामर्शाज्ज्ञानवानयमित्याद्यनुमितिः, यत्र च ज्ञानत्वत्वादिनैव तत्तथा भासते ताद‍ृशाद्व्यापकतावच्छेदकज्ञानत्वव-त्समानाधिकरणहेतुमानयमिति परामर्शाज्ज्ञानत्ववद्वानयमित्याका-रानुमितिरिति—कैश्चिदुच्यते । तदसत्—व्यापकतावच्छेदकजातिवि-शेषवज्ज्ञानसमानाधिकरणहेतुमानयमित्यत इव ताद‍ृशज्ञानत्वव-ज्ज्ञानसमानाधिकरणहेतुमानयमित्यतोऽपि ज्ञानवानयमित्यनुमि-तेरयोगात् । ताद‍ृशपरामर्शयोरविशेषेणैकस्मादेव ताद‍ृशानुमि-तिर्नान्यस्मादिति फलवैषम्यस्यानुभवविरुद्धत्वात्, अन्यथा वैपरी-त्यस्यापि सुवचत्वात् । ज्ञानत्ववज्ज्ञानवानयमित्याकारानुमितिर्द्विधा-ज्ञानत्वविषयिणी कदाचित् कदाचिज्ज्ञानवानयमित्यनुमितिरिति नियमस्य तावताप्यनिर्वाहाच्च ।

तद्धर्मावच्छिन्नेतरावृत्तित्वेन व्यापकतावच्छेदकत्वज्ञानात्तद्ध-र्मप्रकारेण साध्यानुमितिस्तत्रेतरत्वप्रतियोगितावच्छेदकतया तद्ध-र्मस्य याद‍ृशं भानमनुमितावपि तस्य ताद‍ृशं भानमिति नियमः । अतो व्यापकतावच्छेदकज्ञानत्ववदितरावृत्तिधर्मवत्समानाधिकरणहेतुमा-नयमित्यादिज्ञानात् ज्ञानत्ववानयमित्यनुमितिः, व्यापकतावच्छेद-कज्ञानेतरावृत्तिधर्मवत्समानाधिकरणहेतुमानयमित्यादिपरामर्शाच्च ज्ञानवानयमित्याद्यनुमितिरिति तु सूक्ष्मदर्शिनः ।

प्रतियोगिताधर्मिकसाध्यतावच्छेदकावच्छिन्नत्वघटितोभयाभा-वज्ञानमनुमितिहेतुः, तत्र साध्यतावच्छेदकस्य स्वरूपतोऽपि भानसं-भवात्तदीयसाध्यतावच्छेदकतुल्यानुमितौ तद्विषयतेति नियमान्न किञ्चिदनुपपन्नमित्यपि वदन्ति ।

तत्तद्वह्नित्वरूपेण प्रतियोगित्वेऽपि वह्नित्वरूपेण प्रतियोगित्वाभा-वमभ्युपगच्छतः प्रगल्भस्य मते साध्यतावच्छेदकावच्छिन्नऽप्रतियो-गित्वज्ञानमेवानुमितिहेतुः तत्र स्वरूपतोऽपि साध्यतावच्छेदकभा-नसंभवात्सर्वसामंजस्यमिति ध्येयम् ।

ननु साध्याभाववदवृत्तित्वज्ञानमात्रस्यानुमितिहेतुत्वे भ्रमं विना केवलान्वयिसाध्यकमनुमानं नोपेयम्, तथा च केवलान्वयिसाध्यकहेतुमत्तापरामर्श एवानुमितिहेतुरास्ताम् व्यतिरेकिसाध्यके केवलान्वयित्वभ्रमादेवानुमितिरिति विपरीतं कुतो न स्यादित्यत आह–अत एवेति । ज्ञानत्वत्वावच्छिन्ने केवलान्वयित्वावच्छेदकत्वज्ञानात् स्वरूपतो ज्ञानत्वादिप्रकारकज्ञानाद्यनुमितेरनुपपद्यमानत्वादेवेत्यर्थः । उक्तरीत्या तदुपपत्तिमाशंक्य दूषणान्तरमाह–सर्वेति । गृह्यमाणव्यतिरेकवह्न्यादीनां न मानसमेवेति शंकानिरासाय सर्वजनानुभवसिद्धानुमितित्वकथनम् । केवलान्वयित्वभ्रमासंभवाय गृह्यमाणव्यतिरेकेति ।

नन्वेवं केवलान्वयितया गृह्यमाणवाच्यत्वादेरनुमितिनिर्वाहाय व्यापकज्ञानहेतुताकल्पनमपि दुर्वारमेव । न च वाच्यत्वत्वमभावप्रतियोगितानवच्छेदकमिति ज्ञानकालेऽपि सम्बन्धविशेषाऽभावे वाच्यत्वत्वावच्छिन्नप्रतियोगिताकत्वावगाहि असमानप्रकारकं व्याप्तिज्ञानं संभवत्येवेति न व्यापकताधीहेतुतेति वाच्यम् । अभावत्वावच्छेदेनानुयोगितान्वावच्छेदेन वा स्वरूपसम्बन्धावच्छिन्नवाच्यत्वत्वावच्छिन्नप्रतियोगिताकत्वसंसर्गावच्छिन्नप्रतियोगिताकाभावज्ञानदशायां साध्याभाववदवृत्तित्वरूपव्याप्तिग्रहस्य दुरुपपादत्वात् समानप्रकारविरोधिज्ञानसत्त्वात् । स्वरूपसंबंधावच्छिन्नवाच्यत्वत्वाद्यवच्छिन्नप्रतियोगिताकत्वाप्रसिद्धावपि भ्रमात्मकबाधज्ञानसंभवात् । अभावबुद्धौ प्रतियोगितावच्छेदकस्य स्वावच्छिन्नप्रतियोगिताकत्वसंबंधेन प्रकारत्वे तादृशव्यधिकरणसंबंधावच्छिन्नवाच्यत्वाभावविषयकप्रमात्मकविरोधिज्ञानस्यापि सुलभत्वात् ।

वस्तुतस्तु स्वरूपसंबन्धेन वाच्यत्वत्वावच्छिन्नप्रकारकज्ञानादिनिष्ठवाच्यत्वविषयतायामेव तादृशप्रतियोगिताकत्वं प्रसिद्ध्यति । न च विषयतानिष्ठं सप्रतियोगिकत्वमभावादिनिष्ठन्ततोऽन्यजातीयमेव नत्वेकजातीयमिति वाच्यम्, मिथो वैलक्षण्यस्याप्रामाणिकतया एकजातीयताया आवश्यकत्वात् । अत एव संयोगसाधारण्यात्सप्रतियोगिकत्वमेवाभावत्वमित्यस्यासंभवं वक्ष्यति विरोधग्रन्थे ।

यत्तु–अभावत्वाविषयकं साध्यरूपप्रकारांशे निर्धर्मितावच्छेदककं दर्शितविपरीतज्ञानाप्रतिबध्यं साध्यीयवदवृत्तिमानित्याकारकं व्याप्ति-

ज्ञानं तदापि संभवतीति-कस्यचिन्मतम्। तदशुद्धम्-तावताऽप्यभ्रान्तस्य केवलान्वयिसाध्यकानुमितिर्दुरुपपादैव व्यापकताधीहेतुत्वमन्तरेण। एवं तद्वृत्ताज्ञानं प्रति तदीयत्वसहिताभावत्वेनाभावविषयकमनतिप्रसक्तेन तदीयत्वसहितानुयोगिताविशेषत्वेनानुयोगिताविशेषरूपाभावत्वविषयकं वा तन्नास्तीत्याकारकज्ञानमेव यथा विरोधि न तु विषयितादिसाधारणतयाऽतिप्रसक्तेन तदीयत्वादिनाऽभावमनुयोगिताविशेषं वावगाहमानं तथा हेतुमति साध्यं नास्तीत्याकारकं साध्यीयत्वाभावत्वाभ्यामभावविषयकं तदीयत्वानुयोगिताविशेषत्वाभ्यामनुयोगिताविषयकं वा व्यभिचारज्ञानमेवानुमितिजनकज्ञानविरोधि न त्वतिप्रसक्ततदीयत्वमात्रेणाभावादिविषयकम्। एवं चाभावत्वानवच्छिन्नेऽनुयोगिताविशेषत्वानवच्छिन्नानुयोगितायां वा तदीयत्वावगाहि-अभावत्वावच्छिन्नेऽनुयोगिताविशेषत्वरूपेणानुयोगितायां वाऽतदीयत्वज्ञानाप्रतिबध्यं ज्ञानं नानुमितिहेतुः संभवति तदीयत्वमात्रेणाभावविषयकसाध्याभावधर्मिकहेतुसामानाधिकरण्यज्ञानदशायामनुमित्यनुपपत्तेरिति उपदर्शितकेवलान्वयित्वग्रहेऽनुमितिर्दुरुपपादैवेत्याशंक्य तत्र केवलान्वयित्वग्रहदशायां तत्साध्यकानुमित्यसंभवेऽपि तत्र पक्षवृत्तित्वानुमित्यैव तत्कार्यस्य पक्षे साध्यसंशयनिवृत्त्यादेः संभव इत्याशयेनाह प्रमेयत्वादेरिति।

ननु केवलान्वयित्वस्य प्रमेयत्वादावग्रहदशायां घटादौ तत्संशयनिवर्तिकाऽनुमितिः कथमभ्रान्तस्योपपाद्यतामित्यत आह कथञ्चित्तद्वृत्तिधर्मव्यापकत्वेनेति। लिङ्गेनेति शेषः। व्यापकताज्ञानाद्घटादौ मेयत्वादिसाध्यकानुमितिवादिमते प्रमेयत्वादौ घटादिवृत्तित्वानुमापकोक्तलिङ्गज्ञानस्यावश्यकत्वादिति भावः।

ननु यत्र स्थले यत्र घटवृत्तिज्ञेयत्वादिर्हेतुस्तत्र प्रमेयत्वमित्यादिसहचारज्ञानाभावात् घटवृत्तित्वाद्यवच्छिन्नव्यापकता मेयत्वादौ न पूर्वं गृहीताऽपि तु यत्र ज्ञेयत्वादिहेतुस्तत्र प्रमेयत्वमित्यादिसहचारज्ञानात् ज्ञेयत्वमेयत्वाद्यवच्छिन्ननिरूपितव्यापकतामात्रं तत्र सिद्धान्तिमते घटादौ प्रमेयत्वानुमितिः संभवति न तु प्रमेयत्वादौ घटादिवृत्तित्वानुमितिरुक्तलिङ्गाग्रहादित्यत उक्तं कथञ्चिदिति। व्यापकत्वनिरूपकतया भासमाने ज्ञेयत्वत्वाद्यवच्छिन्ने उपलक्षणविधया घटादिवृत्तित्वग्रह इति रीत्याऽभावप्रतियोगिकोटावुपलक्षणतया भानस्याप्रामा

णिकत्वे तु विशिष्टव्यापकताघटकप्रत्येकयावत्पदार्थोपस्थितौ विशिष्टव्यापकताव्यावर्तकविशेष्यव्यापकत्वे निश्चीयमाने विशिष्टस्य सहचारग्रहमनपेक्ष्यैव विशिष्टव्यापकतानिश्चयस्य संभवेन तद्वृत्तिधर्मव्यापकत्वरूपलिङ्गस्य प्रमेयत्वादौ निश्चयोपपत्तेरित्यर्थः ।

(१)व्यापकताज्ञानाद्घटादौ प्रमेयत्वसाध्यकानुमितिवादिमते मेयत्वादौ घटादिवृत्तित्वानुमापकोक्तलिङ्गज्ञानस्यावश्यकत्वादिति भावः । ननु प्रमेयत्वादावुक्तलिङ्गसम्भवेऽपि तादृशलिङ्गे घटादिवृत्तित्वसहचारग्रहासत्त्वे तद्व्याप्तेर्दुर्ग्रहात्तदनुमित्यसम्भवेन केवलान्वयिसाध्यकानुमितेरावश्यकतेत्यतः कथंचिदिति । उक्तलिङ्गे विशिष्य घटवृत्तित्वादिव्याप्तिग्रहासम्भवेऽपि यद्यद्वृत्तितावच्छेदकावच्छिन्नव्यापकं तत्तद्वृत्तीति सामान्यमुखव्याप्तिग्रहः सुलभ एव । घटवृत्तितावच्छेदकावच्छिन्नव्यापकमपि घटावृत्ति स्यादित्यप्रयोजकत्वशङ्कया च नोक्तलिङ्गे घटवृत्तित्वव्याप्तिग्रह इति तु न शंक्यम् । घटवृत्त्यधिकरणघटनिष्ठाभावप्रतियोगित्वसत्त्वेन निरुक्तलिङ्गस्यैव व्याघातादिति भावः ।

इदमत्रावधेयम् । केवलान्वयिसाधारणव्याप्तेः साध्यसामानाधिकरण्यरूपाधिकांशघटिततया गौरवेण तत्साध्यकानुमानाभ्युपगमोऽनुचितः । पक्षवृत्तिहेतुव्यापकं साध्यमिति ज्ञानादेवानुमितेः स्वीकरणीयत्वात् । यदि च व्यापकताज्ञाने प्रतियोगित्वादिकं प्रकारः साध्याभाववदवृत्तित्वज्ञाने तु संसर्ग इत्यतः किमपि लाघवं स्यादिति मन्यते, तदा पक्षीयहेतुमत्तावच्छेदेन साध्यवत्तावगाहिनः साध्यांशे व्यापकतारूपसंसर्गावगाहित्वेन हेतुता किं नोपेयते ? व्यापकताज्ञाने वह्नित्वत्वादिविषयतानिवेशेन गौरवाद्बिभेषि, तदा प्रमादिरूपसाध्यतावच्छेदकांशे प्रमात्वादिरूपविशेषणावच्छिन्नव्यापकतावच्छेदकत्वावगाहिज्ञानस्य प्रमेयत्वादिसाध्यकानुमितिहेतुतां किमुपेक्षसे प्रमात्वविषयतानिवेशस्योभयमते तुल्यत्वात् । एकरूपेणावच्छेदकत्वेऽप्यन्यरूपावच्छिन्नेऽवच्छेदकत्वाभावस्य सुवचत्वात् । असर्वविषयकप्रमाव्यक्तीनां तत्तद्व्यक्तित्वेन हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वेऽपि प्रमा-

(१) इत आरभ्य भाव इत्यन्तः पाठः पुस्तकान्तरे नास्ति ।

त्वाद्यवच्छिन्ने व्यापकतावच्छेदकतायाः सुघटत्वात् । केवलान्वयिहेतुकस्थलेऽपि सर्वविषयकेश्वरीयप्रमायाः, व्यतिरेकिहेतुकस्थले तु हेतुमद्यावद्विषयकान्यतमप्रमायाश्च केनाऽपि रूपेण हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वासम्भवाच्च प्रमात्वसामानाधिकरण्येन व्यापकतावच्छेदकत्वस्याक्षतेः । विशिष्य हेतुविषयतामनन्तर्भाव्य कारणताकल्पनं व्यापकतापरामर्शहेतुतावादिनाऽपि शक्यमिति केवलान्वयिव्यावृत्तव्याप्तेः साधनभेदेऽप्यभेदोऽकिञ्चित्करः । व्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकताकाभावस्य प्रामाणिकत्वे साध्याभाववदवृत्तित्वज्ञानहेतुत्वमतेऽपि केवलान्वय्यनुमानं निराबाधमेव । साध्यतावच्छेदकविशिष्टसाध्याभावस्याप्रामाणिकत्वेऽपि [१] व्यधिकरणसमवायित्वाद्यवच्छिन्नवाच्यत्वादिमद्भेदवत् व्यधिकरणवाच्यत्वत्वविशिष्टावच्छिन्नाभावनिष्ठप्रतियोगितावच्छेदकताकाभावरूपव्याप्तेः प्रसिद्धिसम्भवात् । न च व्यधिकरणसाध्यावच्छिन्नाभाववदवृत्तित्वाभावस्य व्याप्तित्वे व्यभिचारिहेतावपि साध्यावच्छिन्नान्यदीयाभाववद्वृत्तित्वाभावमादाय सल्लिङ्कपरामर्शसम्भव इति वाच्यम् । साध्यतावच्छेदकविशिष्टसहिताभावत्वमात्रावच्छिन्नाभावनिष्ठावच्छेदकताया एव व्याप्तिघटकत्वात् धूमीयत्वादिना घटाभावादिमद्वृत्तित्वाभावीयप्रतियोगितायां अभावनिष्ठावच्छेदकतायां व्यधिकरणतया धूमादेरिव समानाधिकरणतया घटादेरप्यवच्छेदकत्वात् व्यधिकरणधर्मावच्छिन्नाभावप्रतियोगितावच्छेदकतावदेतदभावप्रतियोगितावच्छेदकतावच्छेदकताया व्यधिकरण इव समानाधिकरणेऽपि स्वीकारादिति नवीनः पन्थाः ।

अथ समवायित्वेन वाच्यत्ववान्नायमिति प्रतीतिबलाद्भेद एव व्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकताको न त्वत्यन्ताभावोऽपि तथा, अतएव दीधितिकृता प्रमेयत्वादिकेवलान्वयिधर्मावच्छिन्नहेतुकस्थले तद्रूपस्य व्यधिकरणतया प्रतियोगिताया अवच्छेदकत्वासम्भवेन साध्याभावसजातीयतद्व्यापकाभावप्रतियोगि-

---

[१] व्यधिकरणसमवायित्वाद्यवच्छिन्नवाच्यत्वत्वाविशिष्टावच्छिन्नाभावनिष्ठप्रतियोगितावच्छेदकताकाभावरूपव्याप्तेः—इतिपुस्तकान्तरे पाठः ।

तावच्छेदकत्वं निराकृत्य यथाश्रुतमिश्रलक्षणदूषणमपि सङ्गच्छते, अन्यथा समवायित्वादिना प्रमेयत्वादेरपि तादृशप्रतियोगितावच्छेदकत्वसम्भवेन तल्लक्षणनिर्वाहात् । न च तादृशाभावो व्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकताक एव न तु तादृशप्रतियोगिताकत्वेन साध्याभावसजातीय इति न तल्लक्षणघटक इति वाच्यम् । समनियताभावैक्येन व्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकताकाभावस्यापि स्वसमनियततादृशप्रतियोगिताकाभावरूपत्वादिति चेन्न, समवायितया वाच्यत्ववान्नायमिति प्रतीतिवत् समवायितया वाच्यत्ववान्नात्रेति प्रतीतेरपि दुर्वारत्वात् ।

माभूद्वा व्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकताकोऽभावस्तथाऽपि साध्यवदनिरूपितत्वावच्छिन्नाधेयत्वाभाव एव व्याप्तिः । केवलान्वयिनि साध्यवदनिरूपितत्वं किञ्चिदनिरूपितघटादौ प्रसिद्धं तदवच्छिन्नाधेयत्वाभावस्तत्र व्यधिकरणधर्मावच्छिन्नप्रतियोगिताक एव प्रसिद्धः । व्यभिचारिणि व्यभिचारनिरूपकाधिकरणाधेयत्वे प्रतियोगिनि साध्यवदनिरूपितत्वसत्त्वेन तद्रूपावच्छिन्नाधेयत्वाभावः समानाधिकरणधर्मावच्छिन्नाभाव एव तस्य हेतावसत्त्वान्नातिव्याप्तिः ।

सत्तादिनिष्ठद्रव्यगुणादिनिरूपिताधेयताः स्वस्वनिरूपकद्रव्यगुणादिरूपाधिकरणभेदाद्भिद्यन्त एव, अत एव द्रव्याद्याधेयतायाः गुणाद्यन्यत्वविशिष्टसत्तात्वाद्यवच्छिन्नत्वाद्गुणाद्याधेयतायाश्च तदनवच्छिन्नत्वात्तेन रूपेण सत्तादेर्गुणाद्यवृत्तित्वादतः सत्तादिनिष्ठगुणाद्याधेयत्वं द्रव्यत्वादिसाध्यवदनिरूपितमेव ।

परे तु साध्याभाववद्वृत्तितायाः साध्यवद्वृत्तित्वान्यवृत्तित्वत्वेन निवेशः, अन्यथाऽव्याप्यवृत्तिसाध्यकाव्याप्तेः अव्याप्यवृत्तिधर्मावच्छिन्नभेदस्याव्याप्यवृत्तितानये साध्याभावस्थले साध्यवद्भेदनिवेशेऽपि तदप्रतीकारात् । एवञ्च केवलान्वयिसाध्यकेऽप्रसिद्धिनिबन्धनाव्याप्तिवारणाय साध्यवन्निरूपितवृत्तौ हेतुनिष्ठत्वं निवेशनीयं, तथाच वाच्यं ज्ञेयत्वादित्यादौ ज्ञेयत्वादिहेतुनिष्ठं यत्साध्यवद्वृत्तित्वं तदन्यवृत्तिराकाशाभावादौ प्रसिद्ध्यति तदभावस्य ज्ञेयत्वादौ सत्त्वेन लक्षणसमन्वयः । न च तथाऽपि वाच्यं प्रमेयादित्यादौ साध्यवन्निरूपितप्रमेयनिष्ठवृत्तिभिन्नवृत्त्यप्रसिद्ध्याऽव्याप्तिर्दुर्वारैवेति वाच्यम् ।

स्वनिष्ठं यत्साध्यवद्वृत्तित्वं तद्भेदनिवेशनेन सामंजस्यात् । यदा यत्र हेतुव्यक्तौ लक्षणं संगमनीयं तदा स्वपदेन तस्यैवोपादेयतया तत्प्रमेयव्यक्तौ साध्यवन्निरूपिततत्तन्निष्ठवृत्तिभिन्नप्रमेयान्तरनिष्ठवृत्तिशून्यत्वमादाय लक्षणसमन्वयात् । अवच्छेदकभेदेनाधेयताभेदे हेतुनिष्ठत्वस्थाने हेतुतावच्छेदकावच्छिन्नत्वं निवेशनीयम्, एवं चोक्तस्थले रूपान्तरावच्छिन्नसाध्यवद्वृत्तित्व एव विशिष्टान्यत्वप्रसिद्धिः । हेतौ हेतुतावच्छेदकावच्छिन्नसाध्यवद्वृत्तित्वान्यरूपान्तरावच्छिन्नसाध्यवद्वृत्तित्वसत्त्वेऽपि न क्षतिः तादृशसाध्यवद्वृत्तित्वान्या या वृत्तिस्तदनवच्छेदकहेतुतावच्छेदकत्वस्य विवक्षणीयत्वात् । अवच्छेदकभेदेऽप्याधेयताया अभेदे हेतुतावच्छेदकनिष्ठं यत्साध्यवद्वृत्तितावच्छेदकत्वं तदन्यवृत्तितावच्छेदकताशून्यत्वं हेतुतावच्छेदके निवेशनीयमित्याहुः ।

केचित्तु साध्यतावच्छेदकत्वशून्यत्वं हेतौ निवेश्यम् । स्वावच्छिन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकाभावसामानाधिकरण्यसम्बन्धानवच्छिन्नप्रतियोगिताकसाध्यतावच्छेदकाभाववत्त्वमेव स्वावच्छिन्ननिरूपिता व्याप्तिः । वाच्यत्वत्वस्यैव तादृशसम्बन्धावच्छिन्नाभावस्तु व्यधिकरणसम्बन्धावच्छिन्नाभाव इति वदन्ति ।

(दी०) एवं साध्याभावव्यापकाभावप्रतियोगित्वमपि नानुमित्यौपयिकं गौरवात्, व्यभिचारज्ञानाविरोधित्वाच्च । वह्न्यभावसमानाधिकरणाभावाप्रतियोगी धूमाभाव इति ज्ञानं धूमाभावाभावत्वेन तत्र वह्न्यभावसामानाधिकरण्यबुद्धिं कदाचिद्विरुन्ध्यात्, न तु धूमत्वेन भिन्नप्रकारकत्वात् । व्यतिरेकव्याप्तिग्रहाधीना च धीर्नानुमितिस्तत्त्वेनाननुभवात्, क्लृप्तकारणाभावात्, सामग्रीभेदकल्पनायाश्चानुभवैकाधीनत्वात्, किन्तु विजातीया । तत्करणमपि प्रमाणान्तरमर्थापत्तिरेव । क्लृप्तप्रमाणद्वयसमाहारसमशीलं च युगपदन्वयव्यतिरेकिधर्मद्वयप्रतिसन्धानम् ।

(गा०) अर्थापत्तेः प्रमाणान्तरत्वं व्यवस्थापयिष्यन् व्यतिरेकव्याप-

कताया अप्यनुमित्युपयोगितां खण्डयति एवमिति । गौरवादिति । अस्य साध्याभाववद्वृत्तित्वापेक्षयेत्यादिः। तादृशप्रतियोगित्वज्ञानस्य विजातीयप्रमितिहेतुताया भवतोऽप्यावश्यकत्वाच्छरीरगौरवमकिञ्चित्करमत आह व्यभिचारज्ञानेति। व्यभिचारज्ञानघटितसामग्र्या अनुमितिप्रयोजकत्वे आकांक्षादिज्ञानघटितसामग्र्या अपि तथात्वापातेन शब्दादीनामपि स्वतन्त्रप्रमाणताभङ्गप्रसङ्ग इति भावः।

ननु हेत्वाभावाभावे हेतौ साध्याभावसामानाधिकरण्यग्रहरूपव्यभिचारज्ञाने हेत्वभावे साध्याभावव्यापकताधीर्विरोधिन्येव व्यापकाभिमतस्याभावे व्याप्याभिमतसामानाधिकरण्यग्रहे व्यापकताज्ञानस्य प्रतिबन्धकत्वादित्यत आह वन्ह्यभावेति। तत्र-धूमे। कदाचिद्विरुन्ध्यादिति। धूमाभावाभावत्वेन वन्ह्यभावसामानाधिकरण्यग्रहे तुल्यवित्तिवेद्यतया वन्ह्यभावसमानाधिकरणाभावप्रतियोगिताया धूमाभावे भानात्तत्र तादृशाभावाप्रतियोगित्वज्ञानस्य ग्राह्याभावावगाहित्वादिति भावः। प्रतियोगित्वस्य संसर्गविधया ज्ञाने प्रतियोगित्वाभावज्ञानस्य प्रतिबन्धकत्वं न वास्तवमित्याशयेन कदाचिदित्युक्तम्। न तु धूमत्वेनेति। तत्र वह्न्यभावसामानाधिकरण्यबुद्धिं विरुणद्धीति विपरिणतमनुषज्यते। भिन्नप्रकारकत्वादिति। धूमाभावाभावत्वप्रकारकत्वेन तुल्यवित्तिवेद्यतयाऽपि धूमाभावे प्रतियोगित्वानवगाहनादित्यर्थः।

ननु व्यतिरेकव्याप्तिज्ञानादपि पक्षे साध्यनिर्णयो भवति, तस्य च प्रत्यक्षादिरूपत्वासम्भवेनानुमितित्वमावश्यकमित्यत आह व्यतिरेकेति। तत्त्वेन—अनुमितित्वेन। अननुभवादिति। अर्थापद्यामीत्यनुव्यवसायस्यैव तत्रोत्पत्तेरिति भावः।

ननु तत्रानुमितित्वानुभवस्य सविवादत्वेऽपि अनुमितिसामग्रीजन्यतयाऽनुमितित्वमावश्यकमित्यत आह फलमेति। साध्याभाववदवृत्तित्वज्ञानस्यैव लाघवेनानुमितिहेतुतायाः फलमत्वादिति भावः। ननु व्यतिरेकव्याप्तिज्ञानघटितसामग्रीजन्यत्वमपि पृथगनुमितित्वप्रयोजकं वाच्यमित्यत आह सामग्रीभेदेति। एतस्या अपि अनुमितिसामग्र्यन्तरत्वकल्पनायाश्चेत्यर्थः। अनुभवेति। अनुमितित्वानुभवेत्यर्थः। न तु तद्वदवृत्तित्वज्ञानाजन्यस्यानुमितित्वमित्येवा-

ह किन्त्वित्यादिना । विजातीयेति । अनुमितित्वविरुद्धजातिमती-त्यर्थः । अनुमिनोमीत्यनुव्यवसायात्प्रत्यक्षविजातीयाऽनुमितिप्रमावत् शाब्दयामीत्यादिप्रतीतिबलात् शाब्दाख्यप्रमित्यन्तरवच्चार्थापयामीत्यनुव्यवसायबलादपि विजातीयप्रमासिद्धेर्दुर्वारत्वात् । तस्या अनुमितित्वाननुभवेऽपि अनुमितित्वे शाब्दादिबुद्धेरपि तथात्वप्रसङ्गाद्व्यतिरेकव्याप्तिज्ञानघटिताया इवाकांक्षादिज्ञानादिघटिताया अपि सामग्र्या अनुमितिप्रयोजकतासम्भवादिति भावः ।

नन्वेवं तत्करणस्य प्रमाणान्तरत्वप्रसङ्ग इत्यत्रेष्टापत्तिमाह तत्करणमपीति । अर्थापत्तिः प्रमाणान्तरमेवेति योजना । अर्थापत्तिः–अनुपपद्यमानो योऽर्थस्तज्ज्ञानम् ।

नन्वेवमन्वयव्याप्तिप्रकारेण साध्याभावव्यापकाभावप्रतियोगित्वप्रकारेण च पक्षे हेतुमत्ताज्ञाने ज्ञानयौगपद्यानुगमे उभयजातीयमेकज्ञानमेव स्वीकरणीयमिति जातिसंकरप्रसङ्ग इत्यत आह कल्मेति। कल्मप्रमाणद्वयसमाहारः-शब्दानुमानादिरूपप्रमाणद्वयसम्वलनम् तत्समशीलं, युगपदन्वयव्यतिरेकिधर्मद्वयप्रतिसन्धानम्–अर्थापत्त्यनुमानयोः संवलनम् तथा च यथा तत्रैकसामग्र्या बलवत्त्वान्नैकदा मिथो विजातीयद्वयसामग्रीसमावेश इति न कल्मानुमितित्वशाब्दत्वादीनां सङ्करस्तथा प्रकृतेऽपि सामग्र्या बलवत्त्वकल्पने चानुभवानुरोध एव विनिगमकः । फलसन्देहे च या सामग्री गुरुशरीरा तस्या एव बलवत्त्वं कल्प्यते, तस्या दुर्बलत्वे स्वीयफलेच्छाविशिष्टत्वेन तत्प्रतिबन्धकतायाः कल्पनीयतया इच्छया समं तत्प्रविष्टकारणानां विशेष्यभावे विनिगमनाविरहेण गुरुसामग्र्याः प्रतिबन्धकताबाहुल्येन गौरवात् । न चोभयेच्छासत्त्वे स्वभावतो बलवत्सामग्र्यैव फलजननात्तदानीमुत्तेजकबलेन स्वभावदुर्बलसामग्रीफलवारणाय स्वफलेच्छाविरहविशिष्टाया दुर्बलसामग्रीफलेच्छाया एव बलवत्सामग्र्यामुत्तेजकत्वं वाच्यं, दुर्बलसामग्र्यां च बलवत्सामग्रीफलेच्छाविरहविशिष्टा स्वफलेच्छा विशेषण वाच्यम्, तथाच दुर्बलसामग्र्यां नाधिकप्रवेश इति किं तस्या गौरवेणेति वाच्यम् । इच्छाविरहविशिष्टाया इच्छाया यत्र विशेषणत्वं तत्रेच्छातद्विरहयोर्मिथो विशेष्यविशेषणभावे विनिगमनाविरहेण प्रतिबन्धकताधिक्यम्, यत्र चेच्छाविशेषाविरहाविशिष्टेच्छाया उत्तेजकत्वं

न तु विशेषणत्वं तत्र तयोरेव मिथस्तथात्वे विनिगमनाविरह इति प्रतिबन्धकत्वस्याल्पतात्वमिति गुरुसामग्र्या एव बलवत्त्वौचित्यात् ।

वस्तुतो बलवत्याः सामग्र्याः प्रतिबन्धकतायामिच्छाविरहविशिष्टाया इच्छाया नोत्तेजकत्वं किन्तु विनिगमनाविरहभयेनेच्छामुत्तेजकीकृत्य एकप्रतिबन्धकत्वं स्वफलेच्छावैशिष्ट्यं निवेश्य चान्यप्रतिबन्धकत्वं कल्प्यते तावतैव उभयदिशीच्छादशायां दुर्बलसामग्रीफलप्रतिबन्धोपपत्तिरिति दुर्बलसामग्र्यामिच्छातद्विरहयोरेकत्र निवेशेन प्रतिबन्धकताबाहुल्यमतिस्फुटमेव । प्रकृते च व्यतिरेकव्याप्तिज्ञानघटिता सामग्री गुरुशरीरा एतादृशव्याप्तेरधिकपदार्थघटितत्वात् अधिकपदार्थांशे भ्रमत्वज्ञानाभावादिनिवेशाच्चेति दिक् ।

(दी०) अथ निर्णीते विना सिद्धीच्छाप्रयोर्पत्तेरनुत्पादात् पक्षताजन्यत्वात् साऽप्यनुमितिर्लाघवेन पक्षताजन्यत्वस्यैवानुमितित्वे प्रयोजकत्वात् । न चैवं पक्षताप्रत्यक्षस्यापि तथात्वापत्तिः । इच्छासत्त्वेऽपि कालान्तरे वा तद्विरहसत्त्वेनैककालीनत्वाद्यतीन्द्रियघटितप्रतियोगित्वेन तस्या अतीन्द्रियत्वादिति चेन्न । अनुमितावेव पक्षताया हेतुत्वस्य निरस्तत्वात् साध्यादिभेदेनाननुगतत्वात् तज्जन्यतायाअप्रयोजकत्वाच्च । प्रयोजकत्वं च न [illegible]कत्वमसम्भवात्, न व्याप्यत्वं मानाभावादित्यादेरसकृदावेदितत्वाच्च । एतेन व्याप्तिज्ञानादिजन्यत्वमनुमितित्वे प्रयोजकमित्यपि परास्तम् ।

साध्याभावव्यापकाभावप्रतियोगिधर्मत्वेन व्याप्यत्वानुमानात् प्रसिद्धसाध्यकैवानुमितिरपि केचित् ।

(गा०) साऽपि-अन्यथानुपपत्तिज्ञानजन्यधीरपि । अनुमितिरिति । तथाच न तत्करणं प्रमाणान्तरमित्यर्थः ।

नन्वन्वयव्याप्तिज्ञानाजन्यतया पक्षताजन्याऽपि सा न प्रकृतानुमितिसामग्रीजन्येति न तत्रानुमितित्वप्रयोजकरूपवत्त्वमित्यत आह लाघवेनेति । सामग्रीजन्यत्वापेक्षयेत्यादिः । परामर्शजन्यत्वस्य व्या-

ष्यवत्पक्षवैशिष्ट्यप्रत्यक्षादिसाधारणतयाऽनुमितित्वप्रयोजकत्वासम्भवात् पक्षताजन्यत्वनिवेशस्यावश्यकत्वादिति भावः। एवम्–पक्षताजन्यत्वमात्रस्य तथात्वे। तथात्वापत्तिः—अनुमितित्वापत्तिः। तत्रापि विषयतया पक्षताया हेतुत्वादिति भावः।

पक्षताया प्रत्यक्षमेव न सम्भवतीत्याह इच्छेति। एककालीनत्वादिति। एकक्षणावच्छिन्नसामानाधिकरण्यरूपातीन्द्रियानुमित्साविरहसम्बन्धघटितप्रतियोगितावच्छेदकत्वेनेत्यर्थः। तस्याः–पक्षतायाः। अनुमितिहेतुत्वमभ्युपेत्यापि संनियतस्यैव प्रयोजकत्वमित्याशयेन दूषयति साध्यादीति। व्याप्यत्वमेव प्रयोजकत्वे तन्त्रम्, अन्यथा सामग्र्या अप्यननुगमेन तज्जन्यत्वस्यापि प्रयोजकत्वासम्भवादित्याशंक्य प्रयोजकत्वस्य दुर्वचतां परामर्शग्रन्थोक्तां स्मारयति प्रयोजकत्वं चेति।

एतेन–प्रयोजकताया दुर्वचत्वेन। व्याप्तिज्ञानजन्यत्वम् अनुभवत्वन्यूनवृत्तिधर्मावच्छिन्नव्यापकताज्ञानजन्यत्वम्। अनुभवत्वन्यूनवृत्तिधर्मावच्छिन्नत्वविशेषणाद्विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षादिव्युदासः। अन्वयव्यतिरेकव्यापकतयोरनुगमासम्भवादाह–आदीति। तेनाभावज्ञानजन्यतालाभः। न चैवमप्यभावादिज्ञानानुव्यवसाये तद्विषयकत्वघटितधर्मावच्छिन्नजनकतानिरूपितजन्यताविवक्षणेऽप्यभावादिघटिताकांक्षादिज्ञानजन्यशाब्दबोधेऽतिप्रसङ्गो दुर्वार इति वाच्यम्। तज्जन्यत्वपदेन तत्करणकत्वविवक्षणात्। शाब्दबोधे च पदज्ञानत्वेनैव करणतयाऽतिप्रसङ्गविरहात्।

व्यतिरेकिस्थलेऽपि अन्वयव्याप्तिज्ञानादेव साध्यनिश्चयो न तु व्यतिरेकव्याप्तिज्ञानात्, अन्वयसहचाराभावेनान्वयव्याप्तिप्रत्यक्षानुपपत्तावपि व्यतिरेकव्याप्त्या तदनुमानसम्भवात् इति,कल्पमानुमितिरेवेति न प्रमाणाधिक्यमिति सिद्धान्तं समर्थयतां मतमुपन्यस्यति साध्याभावेति।

ननु साध्याप्रसिद्धिस्थले हेतौ साध्यव्याप्यत्वानुमानसम्भवेऽपि अप्रसिद्धाभावसाध्यकस्थले साध्यव्याप्यत्वस्यापि प्रसिद्ध्यभावेन नानुमितिः सम्भवतीत्यत आह प्रसिद्धसाध्यकैवेति। साध्याप्रसिद्धिस्थले तन्निश्चयस्यैवानभ्युपगमात्तन्निश्चयस्थले प्रतियोग्यादीनां खण्डशः प्रसिद्ध्यधीनसाध्यप्रसिद्ध्यादेः कल्पनादिति भावः। न चा-

न्वयव्यतिरेकव्याप्त्योः व्याप्यव्यापकभावाज्ञानदशायामपि व्यतिरेकिहेतुना साध्यनिश्चयस्यानुभविकत्वादनुपपत्तेः प्रमाणान्तरत्वमावश्यकमिति वाच्यम् । तद्व्याप्यव्यापकभावघटकसकलपदार्थोपस्थितिसत्त्वेन मानसतज्ज्ञानस्य प्रकृतहेतुनिष्ठप्रकृतसाध्यान्वयव्याप्तिमानसस्यापि व्यतिरेकव्याप्तिज्ञानदशायां सर्वत्र सम्भव इत्याशयात् । अनुमितिस्थले साध्यस्य मानसनिश्चयसंभवेऽप्यनुमिनोमीत्यनुव्यवसायबलादनुमानस्यैव साध्याभावव्यापकाभावप्रतियोगित्वरूपान्यथानुपपत्तिज्ञानकालीननिश्चयेऽर्थापयामीत्यनुभवबलादर्थापत्तेः प्रमाणान्तरत्वं दुर्वारमित्यस्वरसः केचिदित्यनेन सूचितः ।

(दी०) अथ वह्न्याद्यभाववति धूमादेः समवायेन तन्त्वाद्यभाववति च पटादेः संयोगेन वर्त्तमानत्वात् साध्याभाववति न संयोगेन समवायादिना वर्त्तमानस्य विशिष्यैवाभावो वाच्यः, तथा च जलं जातिमद्गुणवत्त्वात्, गुणवच्च घटादेरित्यादिकं विलीयेत–जातिगुणाभाववतोः समवेतत्वसंयोगित्वयोरप्रसिद्धेरिति चेत् । उपदर्शयैनमपि केवलान्वयिनः सरणिम्, स्वीकुरु वा स्वाधिकरणावृत्तिसाध्याभावादिकत्वमेव व्याप्तिम्, स्वत्वानुगमस्य प्रागेव स्वहास्तितत्वादिति ।

(गा०) ननु साध्याभाववद्वृत्तित्वस्य व्याप्तित्वे व्यतिरेकिसाध्यकस्थलेऽपि यत्र हेतुतावच्छेदकसम्बन्धशून्य एवाधिकरणे साध्यव्यतिरेकप्रसिद्धिस्तत्र साध्याभाववति हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्ध्या भ्रमं विना तत्रानुमितिर्विलीयेतेत्याक्षेप्तुं प्रथमतो हेतुतावच्छेदकसम्बन्धमुक्त्वा व्याप्तौ निवेशयति अथेति । विशिष्यैवाभावः–तत्तत्सम्बन्धावच्छिन्नसाध्याभाववद्वृत्तित्वत्वेन रूपेणाभावः । वाच्यः–तत्सम्बन्धावच्छिन्नव्याप्तिरूपतया स्वीकार्यः । इत्यादिकम्–समवायसंयोगादिना गुणघटादिहेतुकानुमानम् । अप्रसिद्धेरिति । न च साध्याभाववदनुयोगिकत्वाभाववत्तत्सम्बन्धप्रतियोगित्वविवक्षया नायं दोष इति वाच्यम् । वह्निमच्छून्यसंयुक्तघटादीनामपि संयोगादिना वह्न्यादिव्याप्यतापत्तेः–वह्न्यादिमदनुयोगिकतत्संयोगादौ वह्न्याद्यभाववदनुयोगिकत्वाभावसत्त्वात् । तादृशाभाववदनुयोगिकत्वाभाव-

घटस्यप्रतियोगिकसंयोगादिसामान्यकत्वानिवेशे च सामान्यपदार्थस्य व्यापकताघटिततया व्यापकसामानाधिकरण्यापेक्षयाऽपि गौरवात् ।

सामानाधिकरण्यसम्बन्धेन साध्याभावाभाव एव व्याप्तिः जात्यभावादेः समवायघटितसामानाधिकरण्याप्रसिद्धावपि तादृशव्यधिकरणसम्बन्धावच्छिन्नतदभावः सुलभ एवेति तु वृत्त्यनियामकतया सामानाधिकरण्यस्याभावप्रतियोगितावच्छेदकसम्बन्धतानुपपत्त्या हेयम्।

एतमपि–उक्तानुमानमपि। केवलान्वयिनः सरणिमिति। तथाच विशेषदर्शिनां तत्र जात्याद्यनुमितिर्नोपपद्यत एव किन्तु जात्यादाविव समवायव्यवृत्त्यभावकत्वादिना तत्र गुणादिसमवेतत्वानुमितिः, साध्याभाववत्समवेतत्वग्रहविरोधिनः साध्याभाववति समवायादिविरहग्रहस्य सत्त्वे उक्तहेतोः सुग्रहत्वादिति भावः।

स्वाधिकरणावृत्तिसाध्याभावकत्वमिति। तथाच साध्याभाववति समवायाद्यसत्त्वग्रहेऽपि साध्याभावे हेतुसमवायव्यवृत्तित्वग्रहसत्त्वाक्षोक्तानुमानानुपपत्तिरिति भावः। न चात्रापि सत्ताभाववान् जातित्वादित्यादौ हेतुमति विरोधिताघटकसम्बन्धेन वृत्तेरप्रसिद्धिग्रहदशायामनुपपत्तिर्दुर्वारैवेति वाच्यम्। तत्र साध्याभाववदवृत्तिसमवेतत्वादिज्ञानादेवानुमित्युपगमात्। व्यापकताज्ञानहेतुतावादिनाऽपि भेदत्वावच्छेदेन हेतुमदवृत्तित्वग्रहदशायां तादृशव्याप्तिज्ञानादेवानुमितेरुपगन्तव्यत्वात्। प्रतियोग्यधिकरणाभिन्नत्वाविशेषितहेत्वधिकरणघटितव्यापकतायास्तदा दुर्ग्रहत्वात्।

न च संयोगसम्बन्धावच्छिन्नघटाभावे साध्ये विषयितया घटादिहेतुकानुमाने का गतिः ? तत्र हेतुमति ज्ञानादौ साध्यरूपाभावप्रतियोगितावच्छेदकसंयोगेन वृत्तेरप्रसिद्धेः, साध्याभाववति च संयोगिनि विषयितारूपहेतुतावच्छेदकसम्बन्धाप्रसिद्धेः, उपदर्शितव्याप्तिद्वयस्यासम्भवादिति वाच्यम्। वृत्त्यनियामकसम्बन्धेन व्याप्तेः प्राचीनैरप्यनभ्युपगमेन तत्र विषयितादिहेतुकानुमानस्यैवोपगमात्।

नन्वेवं स्वत्वाननुगमात्साधनतावच्छेदकभेदेन व्याप्तेर्भेदप्रसङ्ग इत्यत्रेष्टापत्तिमाह स्वत्वेति। स्वघटितत्वादिति। स्वव्यापकसाध्यसामानाधिकरण्यरूपव्याप्तिवादिनापीत्यादिः। तथाऽप्येतन्मते प्रतियोगितावच्छेदकत्वांशस्य सम्बन्धतया निवेशेन लाघवस्यानपायादिति भावः।

(दी०) एतेन नीलेतररूपवान् नीलासमवेतत्वे सति गोत्वादित्यादिकं विलीयेत—विशेष्यस्य व्यभिचारित्वात्, विशिष्टस्य चानतिरिक्तवृत्तित्वादित्यपि परास्तम्। साध्याभावस्य विशिष्टहेत्वधिकरणावृत्तित्वात् परम्परासम्बन्धेन विशेषणविशेष्यसम्बन्धस्यैव वा तत्र हेतुत्वादिति ॥

इति केवलान्वयिदीधितिः ॥

(गा०) साध्याभाववदवृत्तित्वरूपव्याप्तिपक्षेऽप्यनुपपद्यमानायाः साध्यव्यभिचारिण्या विशेष्यव्यक्तेर्विशेषणान्तरविशिष्टत्वेन व्याप्यतायाः निर्वाहरूपमेतत्कल्पावलम्बनप्रयोजनं दर्शयति एतेनेति । नीलरूपवान् व्यक्तिष्वव्यभिचारसत्त्वेन विपरीतविशेषणविशेष्यनीलरूपवत्समवेतत्वे सति द्रव्यत्वादित्यादिकं नीलरूपाभाववति चित्ररूपवति व्यभिचारेणासदनुमानमतो नीलेतररूपसाध्यकनीलरूपवदसमवेतत्वविशिष्टगोत्वहेत्वनुधावनम् । गोत्वरूपाविशेष्यप्रवेशाद्गुणकर्मविशेषादौ गगनादौ च न व्यभिचारः । नीलान्यसमवेतत्वविशिष्टगोत्वे शुद्धगोत्वानतिरेकिणि नीलेतररूपव्यभिचारविरहस्यादुर्घटत्वेऽपि समवेतत्वस्य समवेतभेदेन भिन्नत्वे गोत्वविशिष्टत्वेन गुणादिव्यावृत्तनीलान्यसमवेतत्वव्यक्तिष्वव्यभिचारसत्त्वेन विपरीतविशेषणविशेष्यभावापन्नहेतुकानुमानमेव सुघटं तद्विशिष्टगोत्वज्ञानदशायां गोत्वविशिष्टतज्ज्ञानस्यापि सम्भवादिति विशिष्टगोत्वहेतुकानुमानविलोपे क्षतिविरह इत्यालोच्याखण्डं नीलसमवेतत्वाभावं विशेषणतयोपात्तवान् । न च साध्याभाववद्वृत्तितानवच्छेदकधर्म एव व्याप्तिर्वाच्या, नीलासमवेतत्वविशिष्टगोत्वत्वेन च गोत्वस्य न नीलगोवृत्तित्वमतो विशिष्टगोत्वत्वं तदनवच्छेदकमेवेति वाच्यम् । विशिष्टस्यानतिरेकितया साध्याभाववद्वृत्तितावच्छेदकविशेष्यीभूतगोत्वत्वे विशेषणान्तरविशिष्टेऽपि तदनवच्छेदकत्वासम्भवात् । एतदभिसंधायैव द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यत्राव्याप्तिर्नोपदर्शिता । तत्र स्वाश्रयसमवेतत्वसम्बन्धेन गुणकर्मान्यत्ववैशिष्ट्यमात्रस्य साध्याभाववद्वृत्तितानवच्छेदकतया तदादायैव विशिष्टसत्त्वस्य व्याप्यतोपपत्तेः । नीलासमवेतत्वस्य तादृशसम्बन्धेन वैशिष्ट्यं च द्रव्यत्वादिनिष्ठसाध्याभाववद्वृत्तितायामवच्छेदकमि-

ति न तन्मात्रमादायापि विशिष्टगोत्वादेर्व्याप्यत्वोपपत्तिः ।

अथैतत्कल्पेऽपि द्रव्यान्यत्वविशिष्टसत्ताभाववान् द्रव्यत्वादित्यादावव्याप्तिः साध्याभावस्य विशिष्टसत्तायाः शुद्धसत्त्वानतिरिक्ततया हेत्वधिकरणवृत्तित्वादिति चेन्न । अनुयोगिताविशेषरूपसाध्याभावत्वे स्वाधिकरणवृत्तितानवच्छेदकत्वस्य विवक्षितत्वात् । अनुयोगितायाः प्रतियोगितावच्छेदकादिभेदेन भिन्नतया शुद्धसत्ताभावादिनिरूपिताभावत्वस्य द्रव्यादिवृत्तितावच्छेदकत्वे विशिष्टाभावनिरूपिताभावत्वे तदभावसौलभ्यात् ।

एतेन जात्यभाववान् गुणत्वादित्यादौ साध्याभावस्य द्रव्यत्वादेर्हेत्वधिकरणगुणाद्यवृत्तित्वेऽपि साध्याभावसामान्यमनिवेश्यापि तदुपपत्तिः । प्रतियोगितावच्छेदकाद्यैक्येऽभावव्यक्तिभेदेनानुयोगिताभेदानभ्युपगमात्, गुणत्वादिसाधारणतया साध्यनिरूपिताभावत्वे स्वाधिकरणवृत्तितानवच्छेदकत्वस्य दुर्घटत्वात् ।

अथैवमपि सत्ताभाववान् गुणकर्मान्यत्वे सति द्रव्यान्यत्वादित्यादावगतिरेव विशिष्टहेतुमति साध्याभावप्रतियोगितावच्छेदकसमवायेन वृत्तेरप्रसिद्धेः । साध्याभाववति गुणादौ हेतुघटकविशेष्यवृत्तेर्व्याप्तिद्वयस्यैवानिर्वाहादिति चेत् । एतदभिसन्धायैव विशिष्टहेतुकस्थले विशेष्यविशेषणसम्बन्धस्य हेतुत्वमनुसृतं परंपरेत्यादिना ।

केचित्तु अभावस्यैव भावाभावस्याप्यभावत्वेन वृत्तिर्विशेषणताविशेषणैव नास्तीति प्रत्यये सर्वत्रैकजातीयसम्बन्धावगाहितया आनुभविकत्वादिति स्वाधिकरणे विशेषणताविशेषणैवावृत्तित्वमभावस्य विवक्षणीयम् । आकाशाभावादेरात्मादौ आकाशाभावत्वेनैव दैशिकविशेषणतया वृत्तिः न तु कालिकसम्बन्धावच्छिन्नस्वाभावाभावत्वेन काल एवाकाशाभावस्य कालिकसम्बन्धावच्छिन्नाभावो नास्तीति प्रत्ययात् । कालिकसम्बन्धावच्छिन्नस्वाभावस्याभावरूपाकाशाभाव आत्मनीत्याद्याधाराधेयभावे प्रत्यये तादृशाभावाभावत्वस्योपलक्षणतयैव भानोपगमादित्याकाशाभावादेः कालिकसम्बन्धावच्छिन्नाभावे साध्य आत्मत्वादिहेतौ नाव्याप्तिरिति तत्तद्विशिष्टहेतुकस्थले स्वाधिकरणेत्यादिव्याप्तिरेव निर्वहतीत्याहुः ॥

इतिश्रीगदाधरभट्टाचार्यचक्रवर्त्तिविरचितानुमानगादाधर्यां केवलान्वयिप्रकरणम् ॥

केवलव्यतिरेकिप्रकरणम् ।

(चि०) केवलव्यतिरेकी त्वसत्सपक्षः । यत्र व्यतिरेकसहचारेण व्याप्तिग्रहः ।

(दी०) व्याप्तिग्रह इति साधारणोक्तिः । तत्र केवलान्वयिन्यभावाच्च । साध्यव्याप्यत्वं तद्वदन्यावृत्तित्वादिरूपमन्ततः साध्य एव प्रसिद्धम् ।

(गा०) केवलव्यतिरेकी त्वसत्सपक्ष इति मूलम् । यथाश्रुतैतल्लक्षणं साध्यसाधनोभयवत्तया निश्चीयमानधर्मिरूपसपक्षपदार्थस्य सिद्ध्यसिद्धिभ्यां पराहतमिति तदर्थमाह यत्र व्यतिरेकसहचारेणेति । व्यतिरेकसहचारेणैवेत्यर्थः । तथाचागृहीतव्याप्तिकं केवलव्यतिरेक्यनुमानलक्षणमिति पर्यवसितम् ।

तत्र व्याप्तिपदस्यान्वयव्याप्तिपरत्वे गृहीतव्याप्तिभेदाद्भेदः व्यातिरेकिणि व्यतिरेकव्याप्तेरेव गमकतेति स्वमतसाधारण्यानुपपत्तिरत आह दीधितौ व्याप्तिग्रह इतीति । साधारणोक्तिरिति-मतभेदेनान्वयव्याप्तिव्यतिरेकव्याप्त्युभयपरमित्यर्थः । मतभेदेन लक्षणभेदात् अनुगतरूपेण व्याप्त्योरुपादानमनुचितमिति शब्दस्यैव साधारण्यमुक्तम् । स्वमते व्यतिरेकव्याप्तेरेव व्यतिरेकसहचारग्राह्यतया व्यतिरेकसहचारेण व्याप्तिग्रह इत्यस्य व्यतिरेकव्याप्तिग्रह एवानुमित्यङ्गमित्यर्थे पर्यवसानात्प्रकृतानुमित्यौपयिकव्याप्तित्वव्यापकव्यतिरेकव्याप्तित्वकत्वमित्यत्र एवं केवलव्यातिरेकित्वादिकमपि निर्वाच्यमित्यनेन सूचिते लक्षणे पर्यवसानमित्यवधेयम । पूर्वपक्षिणा मीमांसकेन केवलान्वय्यनुमानानभ्युपगमात्तेन केवलान्वयिन्यभावाच्चेत्यनेन केवलान्वय्यनुमानानुपपत्तिप्रदर्शनमसङ्गतमतस्तत्रेत्यादौ पूरयति तवेति । नैयायिकस्येत्यर्थः । तथाच नैयायिकस्य स्वमतसिद्धकेवलान्वय्यनुमानानुपपत्त्या व्यतिरेकव्याप्तिधियोऽनुमितिहेतुत्वोपगमो न युक्त इति मूलाभिप्रायः । पृथिवीत्वादिहेताावितरभेदरूपसाध्यनिरू-

पितस्वव्यापकसाध्यकरूपान्वयव्याप्तेः स्वत्वघटितायाः पक्षातिरिक्तेऽसत्त्वात् अप्रसिद्ध्या नानुमानसम्भव इति व्यतिरेकव्याप्त्यान्वयव्याप्त्यनुमानाशङ्कया असंगतिरतो व्याचष्टे साध्यव्याप्यत्वमिति । तद्वदन्यावृत्तित्वमिति । अस्यापि साध्यधर्मिकान्योन्याभावगर्भहेतुव्यापकताग्रहप्रतिबध्यव्यभिचारग्रहविरोधित्वेनान्वयव्याप्तिरूपता व्यतिरेकव्याप्तिबुद्धेश्च हेत्वभावे साध्यभाववन्निष्ठाभावप्रतियोगित्वबुद्धावेव विरोधितेत्याशयः ।

वस्तुतो यद्धर्मावच्छिन्नाभावव्यापकाभावप्रतियोगितावच्छेदकयद्रूपवान यः स तद्रूपावच्छिन्नव्यापकतावच्छेदकतद्धर्मावच्छिन्नसमानाधिकरणवृत्तितद्रूपवानिति सामान्यतो व्याप्त्या पक्षधर्मताबलादप्रसिद्धाया अपि पृथिवीत्वत्वावच्छिन्नव्यापकतावच्छेदकेतरभेदत्वावच्छिन्नसमानाधिकरणवृत्तिपृथिवीत्वत्वरूपान्वयव्याप्तेः पृथिवीत्वे ग्रहसम्भव इति मूलाशयः ।

ननु पृथिवीतराभिन्नावृत्तित्वरूपसाध्यस्य पृथिवीमात्रवृत्तिधर्मान्तरे प्रसिद्धिरुपगन्तव्या । तत्रापि चेद्व्यतिरेकव्याप्तिहेतुकानुमाना तत्प्रसिद्धिरित्युच्यते तदाऽनवस्था । मानान्तराद्यदि तत्प्रसिद्धिस्तदा पृथिवीत्वेपि सा समाना । मानान्तरं च नानुमानान्तरं तत्रापि साध्यप्रसिद्ध्यपेक्षणात् । न प्रत्यक्षं तत्र विपरीतकोटेरप्युपनीतभानसम्भवेन तन्निश्चयासम्भवादित्यत आह अंततः साध्य एवेति । साध्ये साध्यवदन्यवृत्तित्वस्य विरोधेन भानासम्भवादुपनयसहकृतेन तेन न तत्र साध्यवदन्यमात्रवृत्तित्वनिश्चयः सम्भवतीति भावः । उपस्थिताभावानामन्यत्रापि कदाचिन्मानसात्तन्निश्चयसम्भवेनांतत इत्युक्तम् ।

(चि०) ननु व्यतिरेकि नानुमानं व्याप्तिपक्षधर्मताज्ञानस्य तद्धेतुत्वात् । अत्र च व्यतिरेकिसहचारात्तत्र व्याप्तिरन्वयस्य न पक्षधर्मता । न च व्याप्तिपक्षधर्मत्वं साध्याभावव्यापकाभावप्रतियोगित्वं द्वयमनुमितिप्रयोजकमिति वाच्यम् । अननुगमात् । न चान्यतरवत्त्वं तथा, एकप्रमाणपरिशेषापत्तेः । न

च तृणारणिमणिन्यायेनानुमितिविशेषे तत्कारणत्वमिति वाच्यम् । व्यतिरेकिसाध्येऽनुमितित्वासिद्धेः—उभयसिद्धक्लृप्ततत्कारणस्याभावात् । न च साध्याभावव्यापकाभावप्रतियोगित्वमेवानुमितिप्रयोजकमिति वाच्यम् । गौरवात्, केवलान्वयिन्यभावाच्च । अथ साध्याभावव्यापकाभावप्रतियोगित्वेन साध्यव्याप्यत्वमेवानुमीयते, एवं व्यतिरेकव्याप्त्याऽन्वयव्याप्तिमनुमाय यत्रानुमितिः स एव व्यतिरेकीत्युच्यते इति । तत्रान्वयव्याप्तेर्गमकत्वे व्यतिरेकव्याप्त्युपन्यासस्यार्थान्तरतापत्तेः । अन्वयव्याप्त्यनुकूलतया च तदुपन्यासेऽन्वयव्याप्तिमनुपन्यस्य तदुपन्यासस्याप्राप्तकालत्वादिति ।

उच्यते निरुपाधिव्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यते प्रतियोग्यनुयोगिभावस्य नियामकत्वात् । न चैवं व्याप्तिग्रह एव पृथिवीतरभिन्नेति भासितं, नियतसामानाधिकरण्यरूपत्वाद्व्याप्तेरिति चेत् । सत्यम् । गन्धवत्त्वावच्छेदेनेतरभेदस्य साध्यत्वात् । अत एवाचार्यैः पक्षतावच्छेदके न हेतुत्वमनुमेने । पृथिवीत्वमितरभेदव्याप्यमिति प्रतीतावपि सर्वा पृथिवी इतरभिन्नेति पृथिवीविशेष्यकबुद्धेर्व्यतिरेकिसाध्यत्वाच्च ।

(दी०) निरुपाधीति । उपाधिज्ञानाहितव्यभिचारज्ञाननिरासाय पृथिवीत्वमिति । पृथिवीत्वमितरभेदव्याप्यमित्यत्र हि पृथिवीत्वत्वविशिष्टे पृथिवीत्वे इतरभेदसामानाधिकरण्यं भासते । पृथिवीतरभिन्नेत्यत्र शुद्धपृथिवीत्वविशिष्टे तदवच्छेदेनेतरभेद

इति न सिद्धसाधनमित्यर्थः । सर्वेति च पृथिवीत्वस्यावच्छेदकत्वस्फोरणाय । अत्र च पृथिवीत्ववत्त्वं पृथिवीतरासमवेतत्वमात्रं न तु पृथिवीवृत्तित्वघटितमित्यतोऽपि नोपनयवैयर्थ्यम् ।

(गा०) निरुपाधीति मूलं उपाधिज्ञानाभावसहितेत्यर्थकं तदभावस्य व्याप्तिज्ञानकरणतया तत्सत्त्वप्रदर्शनस्य व्यभिचारज्ञानाभावरूपकारणसमवधानप्रदर्शनपरतया सङ्गमयति निरुपाधीति । व्यभिचारज्ञाननिरासाय-व्यभिचारज्ञानाभावसाहित्यलाभाय । पृथिवीत्वरूपपक्षतावच्छेदके साध्यसामानाधिकरण्यविषयकस्य तद्धेतुकव्याप्तिग्रहस्यानुमित्यप्रतिबन्धकत्वं तदुभयविषयतावैलक्षण्याप्रयुक्तमिति पृथिवीत्वमितरभेदव्याप्यमित्यादिमूलाभिप्रेतम् । तत्रानुमितेः पृथिवीविशेष्यकत्वकथनात् व्याप्तिग्रहे पृथिवीत्वस्य विशेष्यता अनुमितौ तद्विशिष्टस्येत्येतावदेव तदभिप्रेतमिति भ्रमनिरासाय दर्शिताकारसूचितमन्यदपि वैलक्षण्यं स्पष्टयति शुद्धेति । स्वरूपतो भासमानेत्यर्थः । हेतुभिन्नसर्वत्वस्य पक्षतावच्छेदकत्वे हेतुपक्षतावच्छेदकभेदेन सिद्धसाधनपरीहारकत्वान्नास्य कल्पान्तरतासम्भव इति सूचनाय सर्वत्वस्य पक्षतावच्छेदकत्वाभिप्रायेण न सर्वपदोल्लेख इत्याह सर्वेति चेति । अवच्छेदकत्वस्फोरणायेति । अवच्छेदकत्वेन विषयतासूचनायेत्यर्थः ।

ननु पृथिवीत्वावच्छिन्नपक्षकस्थले पृथिवीत्ववत्त्वावच्छिन्नस्य हेतुत्वे पृथिवीवृत्तित्वरूपपक्षधर्मतायाः हेतौ लाभात्परार्थस्थले उपनयवैयर्थ्यम् । न च हेतुतावच्छेदकपृथिवीवृत्तित्वघटितधर्मविशिष्टे पृथिवीवृत्तित्वस्योपनयादेव भानान्न तद्वैयर्थ्यमिति वाच्यम्, तथाप्युद्देश्यतावच्छेदकविधेययोरैक्येनोपनयाधीनशाब्दबुद्धेरसम्भवादित्यत आह अत्र चेति । नोपनयवैयर्थ्यं-पृथिवीवृत्तित्वघटितधर्मविशिष्टे पृथिवीवृत्तित्वस्य निराकांक्षतयाऽन्वयासम्भवेन उपनयस्यार्थाबोधकत्वेनेत्यर्थः । पृथिवीत्ववत्त्वं पृथिवीनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वरूपसकलपृथिवीवृत्तित्वघटितमेवेत्यतोऽपि नोपनयवैयर्थ्यमिति सूचयितुमतोऽपीत्युक्तम् ।

वस्तुतो व्यभिचारावारकतया हेतुतावच्छेदकगर्भसकलपृथिवीवृत्तित्वांशस्य वैयर्थ्येन तदनिवेश एव निर्भरः ।

(चि०) यद्वा व्यतिरेकव्याप्तेरेवान्वयेन गम्यगमकभावः । साध्याभावव्यापकसाधनाभावाभावेन साधनेन पक्षे साध्याभावाभावस्य साध्यस्य साधनात् । व्यापकाभावेन व्याप्याभावावश्यंभावात् ।

(दी०) अथान्वयव्याप्तिघटकतावत्पदार्थोपस्थित्यादिकं विना न तद्ग्रहसम्भवः, तत्सत्त्वे च तत एव व्याप्तिग्रहसम्भवे व्यतिरेकसहचारज्ञानस्य हेतुत्वे मानाभावः । न च व्यभिचारशङ्कानिवर्तकत्वेनैवान्वयव्यतिरेकसहचारग्रहयोरुपयोगित्वं, तद्ग्रहेऽपि शङ्कातादवस्थ्यात् । अधिकरणविशेषे च तन्निवृत्तौ साध्यवत्त्वसाधनाभाववत्त्वयोरन्यतरग्रहस्यैव तन्त्रत्वात्, व्यतिरेकव्याप्त्युपन्यासेऽर्थान्तरादितादवस्थ्याच्च । यत्तु सहचारमात्राभायैव सर्वत्रोदाहरणोपन्यास इति । तन्न । अर्थान्तराद्यापत्तेर्दुर्वारत्वात्, यच्छब्दादिवैयर्थ्याच्च । व्युत्पादयिष्यते च तस्य व्याप्तिबोधकत्वम् । न चान्वयिन इव व्यतिरेकिणोऽप्युदाहरणात् स्वरससिद्धान्वयव्याप्तिधीरानुभविकी येन तदर्थमपि। प्रकारान्तरमास्थेयमत आह यद्वेति ।

साध्याभावेति । नन्विच्छादिसाध्ये आत्मत्वादेर्व्यतिरेकित्वं न स्यात्, स्याच्च संयोगादेरात्मत्वे तथात्वमिति चेन्न। साध्यतावच्छेदकावच्छिन्नसाध्यासमानाधिकरणत्वेन साध्याभावस्य साधनतावच्छेदकावच्छिन्नसाधनासमानाधिकरणत्वेन च साधनाभावस्य विशेषितत्वात् । संयोगाभावे साध्ये विभागाभावःकेवलान्वयी । प्रतियोगिवैयधिकरण्यावच्छिन्ने च तत्र स तादृशो व्यतिरेक्यपि । व्याप्यव्यापकभावश्च साध्याभावत्वसाधनाभावत्वाभ्यां बोध्यः, तेन न व्यभिचारिण्यतिप्रसङ्गः । साध्याभावत्वादिकं च वैज्ञा-

निकं न तु वास्तवं तेन मेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिज्ञानादनुमानम् ।

व्यापकीयत्वेनाभावस्य ज्ञानाद्व्याप्यीयत्वेनाभावस्य सिद्धिं पुनरप्रसिद्धसाध्यकसाधारणीमाह व्यापकाभावेनेत्यादि । अभावौ—अभाववत्त्वनिश्चयौ, अवश्यंभावश्चासति प्रतिबन्धके । अत्र च यद्रूपावच्छिन्नं प्रति व्यापकता गृह्यते तद्रूपावच्छिन्नीयत्वेनाभावसिद्धिः फलम् । येन रूपेण व्यापकता गृह्यते तद्रूपावच्छिन्नीयत्वेन व्यापकत्वविशिष्टतद्रूपावच्छिन्नीयत्वेन चाभाववत्ताज्ञानं हेतुरिति मन्तव्यम् ।

(गा०) यद्वेत्यादिकल्पमवतारयितुं पूर्वकल्पेऽस्वरसबीजं दर्शयति अथेत्यादिना । न तद्ग्रहसम्भवः—नान्वयव्याप्तिग्रहसम्भवः, विशेषणज्ञानाभावादिति भावः । तत्सत्त्वे—तावत्पदार्थोपस्थित्यादिसत्त्वे । तत एवेति । व्यतिरेकसहचारज्ञानसहकृतत्वव्यवच्छेदक एवकारः । मानाभाव इति । अन्वयव्यतिरेकानुविधानासिद्धेरिति भावः । व्यतिरेकसहचारेणान्वयव्याप्तिरेवेत्यत्र व्यतिरेकसहचारज्ञानस्य प्रयोजकत्वमेव विवक्षितं न तु कारणत्वमित्यभिप्रायिकामाशंकां निरस्यति न चेत्यादिना । अन्वयव्यतिरेकसहचारग्रहयोरिति । हेतुमत्त्वेन गृह्यमाणधर्मिणि साध्यवत्त्वग्रहोऽन्वयसहचारग्रहः तत्सत्त्वे तादृशे धर्मिणि साध्याभावग्रहासम्भवान्न तदात्मकव्यभिचारग्रहो भवति । एवं साध्याभाववत्त्वेन गृह्यमाणे धर्मिणि साधनाभावावगाहिनो व्यतिरेकग्रहस्य सत्त्वे तादृशधर्मिणि साधनवत्त्वावगाहिनो व्यभिचारज्ञानस्यैव न सम्भव इत्युभयोरेव व्यभिचारशङ्कानिवर्त्तकत्वम् । अत्रान्वयसहचारग्रहस्य तन्निवर्त्तकत्वं दृष्टान्तविधया दर्शितम् । अन्वयसहचारज्ञानस्यापि न स्वातन्त्र्येण व्याप्तिग्राहकता न वा विशेषणज्ञानविधया—तद्घटकपदार्थानां विशृङ्खलोपस्थितितोऽपि विशेष्ये विशेषणमित्यादिरीत्या तद्ग्रहसम्भवादिति, यथा तस्यापि व्यभिचारशङ्कानिवर्त्तकतयैव व्यापकताग्रहोपयोगिता तथा व्यतिरेकसहचारग्रहस्यापि इति पर्यवसितार्थः । उपयोगित्वमित्यत्रैव न चेत्यस्य सम्बन्धः । तद्ग्रहेपि—किञ्चिदधिकरणान्तर्भावे-

ण सहचारग्रहेऽपि, शङ्कातादवस्थ्यात्—अन्याधिकरणान्तर्भावेण व्यभिचारशङ्कासम्भवात् ।

नन्वेकाधिकरणे सहचारग्रहस्याधिकरणान्तरे व्यभिचारशङ्कानिवर्त्तकत्वाभावेऽपि तदधिकरणान्तर्भावेन व्यभिचारशङ्कानिवर्त्तकता तिष्ठत्येव तावतापि व्याप्तिग्रहोपयोगित्वमक्षतं तादृशशङ्काया अपि तद्ग्रहपरपन्थित्वादित्यत आह अधिकरणविशेष इति । साध्यवत्त्वसाधनाभाववत्त्वयोरिति । अन्वयसहचारघटकसाध्यवत्त्वांशभानस्यैव व्यतिरेकसहचारघटकसाधनाभाववत्त्वांशभानस्यैव व्यभिचारशङ्कानिवृत्त्युपयोगित्वादित्यर्थः । तथा चांशान्तरघटिततत्सहचारग्रहपर्यन्तस्य नोपयोगित्वसिद्धिरिति भावः ।

न च साधनवदिदं साध्याभाववदिति व्यभिचारग्रहप्रतिबन्धकतायां साध्यवत्त्वांशस्यैव तद्धर्मितावच्छेदकतया साधनवत्त्वांशस्यापि भानमुपयुज्यते, निर्धर्मितावच्छेदकभानस्य विपरीतज्ञानाविरोधित्वादेव साधनवदिति व्यभिचारग्रहप्रतिबन्धकतायां साधनाभावांशस्यैव तद्धर्मितावच्छेदकतया साध्याभाववत्त्वांशग्रहोऽप्युपयुज्यत इति वाच्यम् । समानविषयकत्वेन विरोधित्वमते धर्मितावच्छेदकभानस्यानुपयोगित्वात्, समानधर्मितावच्छेदकत्वेन विरोधितामते साधनादिमत्त्वसमानाधिकरणत्वमात्रेण साध्यादिमत्त्वग्रहस्य तत्सामानाधिकरण्यमात्रेण साध्याभावादिभानाविरोधितया सहचारदर्शनस्यैकाधिकरणान्तर्भावेनापि व्यभिचारग्रहविरोधित्वायोगात् । अयमेव वाऽनुशयो दूषणान्तरानुसरणबीजम् ।

एवं व्यभिचारशङ्कानिवर्त्तकत्वेन सहचारज्ञानस्य व्यापकताग्रहोपयोगित्वेऽपि कदाचित्स्वतःसिद्धव्यभिचाराग्रहाद्व्यापकताग्रहेण व्याप्तिग्राहकसहचारभेदादनुमानभेदो नोपपद्यत इत्यपि द्रष्टव्यम् ।

व्यतिरेकव्याप्तिज्ञानस्यानुमित्यजनकत्वे पूर्वपक्षोक्ता व्यतिरेकव्याप्तिबोधकोदाहरणप्रयोगानुपपत्तिरपि दुर्वारैवेत्यत आह व्यतिरेकेति । अर्थान्तरादीत्यादिना उक्ताप्राप्तकालत्वादिपरिग्रहः ।

यत्र न साध्यं तत्र न साधनमित्युदाहरणं न व्याप्तिप्रदर्शनपरं अपि तु सहचारमात्रप्रदर्शनायैव, तावता व्यभिचारशङ्कानिवृत्तौ स्वत एव मानसो व्याप्तिग्रह इति नानाकांक्षितव्यतिरेकव्याप्तिप्रदर्शनेनार्थान्तरापरस्यवकाश इति कस्यचित्समाधानमुपन्यस्यति य·

रिवति। अर्थान्तराद्यापत्तेरिति। हेतुप्रयोगानन्तरं गमकतौपयिकव्याप्तेरेवाकांक्षितत्वादिति भावः। यच्छब्दादीति। आदिना वीप्सादिपरिग्रहः। वैयर्थ्यादिति। तत्सत्त्वेपि साध्याभाववति न साधनमित्यान्वित एव सहचारलाभसंभवादिति भावः। उदाहरणस्य व्याप्तिप्रदर्शनपरत्वे तद्बोधार्थमेव तदुपयोग इत्याहुः। व्युत्पादयिष्यत इति। तस्य–यच्छब्दादेः, व्याप्तिबोधकत्वं–व्याप्तिबोधोपयोगित्वं, यत्पदार्थांशे यद्विधेयं तद्व्यापकतायास्तत्पदोपस्थापितांशे यद्विधेयं तत्र भानस्य व्युत्पत्तिसिद्धत्वादिति भावः।

नन्वेतादृशव्याप्तिज्ञानस्य व्युत्पत्तिसिद्धत्वेऽपि तस्यापदार्थत्वे शाब्दबुद्धौ भानासम्भवात साध्यवाचकपदस्य समभिव्यापकताविशिष्टस्वार्थलक्षणयैव व्याप्तिबोध उपपादनीयः, तथाच व्यतिरेक्युदाहरणादपि लक्षणया कथंचिदन्वयव्याप्तिलाभो भविष्यतीत्याशङ्क्याह न चेति। तदन्वयव्याप्तिबोधार्थं प्रकारान्तरं–तदन्तर्गतवह्न्यादिपदे हेतुव्यापकत्वादिविशिष्टे स्वार्थे निरूढलक्षणा।

व्यतिरेकव्याप्तिप्रविष्टसाध्याभावसाधनाभावयोः प्रतियोगिवैयधिकरण्यं निवेशयितुं शङ्कते नन्विति। आत्मत्वादेर्हेतोर्व्यतिरेकित्वं न स्यादिति। व्यतिरेकिलिङ्गतयाऽभ्रान्तपुरुषीयानुमितिप्रयोजकत्वं न स्यादित्यर्थः। जन्येच्छादेरव्याप्यवृत्तितया आत्मादावपि तदभावसत्त्वेन तं प्रति व्याप्यवृत्त्यात्मत्वादिहेत्वभावस्याव्यापकत्वेन व्यतिरेकव्याप्तिप्रमाया अयोगादिति भावः। संयोगादेः–व्यभिचारिहेतोः, आत्मत्वे-साध्ये, तथात्वं–व्यतिरेकित्वं, अव्याप्यवृत्तेः संयोगादेरभावस्यात्मत्वाभावव्यापकत्वादिति भावः।

यद्यप्यात्मत्वाभाववति वृक्षादौ संयोगाद्यभावस्याप्यभावसत्त्वान्न तस्यात्मत्वाद्यभावव्यापकत्वं व्यापकताव्याप्तिलक्षणप्रविष्टनञ्द्वितीयाभावे प्रतियोगिवैयधिकरण्यविशेषणस्यात्र प्रयोजनविरहेणानिवेशात्। न च तत्र तदनिवेशे द्रव्यभिन्नं संयोगिभेदादित्यत्राव्याप्तिः संयोगिभेदाभावस्य संयोगस्य साध्याभाववति द्रव्येऽभावसत्त्वेन साध्याभावव्यापकत्वासम्भवादिति वाच्यम्। संयोगादिभेदाभावस्य संयोगरूपत्वेपि संयोगिभेदाभावत्वेन व्याप्यवृत्तिताया आवश्यकत्वात्, अन्यथोत्पत्तिकाले घटादौ संयोगो नास्तीतिवत् संयोगिभेदाभावो नास्तीति प्रतीत्यापत्तिरिति, हेत्वभावत्वेन साध्याभा-

व्यापकतायाः आवश्यकत्वात् । तथापि तन्निष्ठाभावप्रतियोगितानवच्छेदकहेत्वभावत्वरूपव्यापकतानिवेशे घटाभावादिरूपे व्यभिचारिण्यतिप्रसङ्गः घटाभावाद्यभावत्वस्य समनियतघटत्वाद्यपेक्षया गुरुत्वेनाभावप्रतियोगितानवच्छेदकत्वात्, अतस्तद्व्यक्तिकिञ्चिद्व्यक्त्यवृत्तिस्वाविशिष्टसामान्यकं यद्यत्तदन्यप्रकृतहेत्वभावत्वमेव तद्व्यापकत्वं प्रकृते विवक्षणीयम् तथाच संयोगाभावादेः साध्याभावव्यक्तिकिञ्चिद्व्यक्त्यवृत्तिस्वविशिष्टसामान्यकत्वासम्भवात्तेन रूपेण व्यापकत्वमक्षुण्णमेवेति अतिव्याप्तिसङ्गतिः ।

साध्यतासाधनतावच्छेदकयोः साध्यतासाधनतावच्छेदकावच्छिन्नाभावप्रतियोगितावच्छेदकत्वेन निवेशः शिरोवेष्टनेनेत्यादिन्यायेनानुचित इत्याशयेन ताद्रूप्येणैव तन्निवेशयन् तदवच्छिन्नवैयधिकरण्यमभावद्वये निवेशयति साध्यतेति । तदवच्छिन्नासामानाधिकरण्यं—तदवच्छिन्नानधिकरणवृत्तित्वाविशिष्टत्वम्, एवञ्च साध्याभावत्वादिनिवेशवैयर्थ्यात् साध्यतावच्छेदकावच्छिन्नानधिकरणवृत्तित्वविशिष्टव्यापकतावच्छेदकसाधनतावच्छेदकावच्छिन्नानधिकरणवृत्तित्वविशिष्टत्वाश्रयप्रतियोगित्वमिति पर्यवसितार्थः । विशिष्टसत्तावान् जातेर्द्रव्यं विशिष्टसत्त्वादित्यत्रातिव्याप्त्यव्याप्त्योर्वारणाय साध्यतावच्छेदकावच्छिन्नसाधनतावच्छेदकावच्छिन्नयोर्निवेशः ।

नन्वेवं संयोगाभाववान् विभागाभावात् एतत्संयोगाभाववान् एतद्विभागाभावादित्यादौ प्रतियोगिरूपसाध्यहेतुव्यतिरेकयोर्व्याप्तिग्रहादभ्रान्तस्यानुमितिर्न स्यात्—साध्याद्यसामानाधिकरण्यरूपविशेषणावच्छिन्नव्यतिरेकाप्रसिद्धेरित्याशङ्कामिष्टापत्त्या निराकुरुते संयोगाभाव इति । अत्र संयोगाद्यव्याप्यवृत्तिमात्रप्रतियोगिकाभावो विवक्षितः, न तु संयोगत्वाद्यवच्छिन्नाभावः—तत्संयोगाद्यभावस्य साध्यत्वे व्यतिरेकित्वानुपपत्तेर्न्यूनताप्रसङ्गात्, द्विक्षणमात्रस्थायिद्रव्यस्य सत्त्वे संयोगवति तत्र विभागस्य संयोगाधीनस्यासत्त्वेन प्रतियोगिवैयधिकरण्यानवच्छिन्नयोरपि व्यतिरेकयोर्व्याप्यव्यापकभावासत्त्वेन व्यतिरेकिताया अप्रसक्त्याऽव्याप्तिशङ्काया एवानुदयाच्च । केवलान्वयीति । अभ्रान्तपुरुषं प्रति अन्वयव्याप्त्या गमक इत्यर्थः । विशेषणान्तरानवच्छिन्नयोरेव संयोगविभागाभावयोः

साध्यहेतुभावो व्यतिरेकव्याप्त्यसम्भवनियतः न तु विशेषणान्तरविशिष्टयोरपि तथाभाव इत्याह प्रतियोगीति। तत्र–संयोगाभावे साध्ये, सः–विभागाभावः,तादृशः–प्रतियोगिवैयधिकरण्यावच्छिन्नः। व्यतिरेक्यपीति। व्यतिरेकव्याप्त्यापि गमक इत्यर्थः। तत्र साध्याभावहेत्वभावयोः साध्याद्यसामानाधिकरण्यासम्भवेऽपि साध्यतावच्छेदकावच्छिन्नाद्यसामानाधिकरण्यस्य द्रव्ये सम्भवात्, तत्र साध्यतावच्छेदकप्रतियोगिवैयधिकरण्यावच्छिन्नयोस्तयोरसत्त्वात्, द्विक्षणमात्रस्थायिद्रव्यस्य प्रामाणिकत्वे अत्रापि संयोगविशेषाभावस्य साध्यता बोध्या।

यद्यपि यत्रैककपालक्रियया कपालयोरारम्भकसंयोगकाले कपालान्तरे क्रिया तदनन्तरं कपालयोर्विभागस्तदनन्तरं कपालद्वयसंयोगनाशस्तत्र घटोत्पत्तेः प्रामाणिकत्वे घटो द्विक्षणावस्थायी स्यात्, सैवाप्रामाणिकी उत्पत्तिक्षणे इन्द्रियसंयोगासम्भवेन द्वितीयक्षणे घटप्रत्यक्षासम्भवात। तृतीयक्षणे तस्यैवासत्त्वात् विषयनाशकाले प्रत्यक्षस्य सविवादत्वात्। फलसन्देहे सामग्र्या अप्यप्रामाणिकत्वेन तल्लिङ्गकानुमानस्याप्यसम्भवात्। न च कपालतत्संयोगादिघटितसामग्र्या अप्रत्यक्षेणापि ग्रहान्न फलैकप्रमाणकत्वमिति वाच्यं, विजातीयसंयोगस्यैव द्रव्यजनकतया तादृशवैजात्यस्य फलाभावेनानभ्युपगमसम्भवेन फलानिश्चये सामग्र्यासिद्धेरिति। तथापि यत्र महाघटनाशकाले तदारम्भककतिपयसंयोगा वर्त्तन्ते तत्र द्रव्यारम्भकतावच्छेदकजातेरावश्यकता, अन्यथा तद्वत्सु कपालेषु महाघट एव नोत्पद्येत, एवञ्च तत्र घटोत्पत्तिः सामग्रीबलसिद्धा। तत्र खण्डघटोत्पत्तिपूर्वकालीनैककपालक्रियया तदुत्पत्तिकाले कपालद्वयविभागो द्वितीयक्षणे च तत्संयोगनाशे तद्घटस्य तृतीयक्षणे नाश आवश्यक इति द्विक्षणमात्रस्थायिद्रव्यं प्रामाणिकं भवति। साध्याभावत्वसाधनाभावत्वाभ्यामिति। साध्यानधिकरणवृत्तित्वविशिष्टसाधनानधिकरणवृत्तित्वविशिष्टत्वाभ्यां इत्यर्थः। व्यभिचारिण्यतिप्रसङ्ग इति। धूमाद्यभावस्यापि ह्रदवृत्तित्वादिविशिष्टत्वेन वह्न्याद्यभावव्याप्यत्वाद्वह्न्याद्यभावत्वादिना धूमाद्यभावत्वावच्छिन्नव्यापकत्वादिति भावः।

नन्वभावे प्रमेयत्वादिप्रतियोगिकत्वभ्रमदशायां प्रमेयत्वाभावो-

ऽभिधेयत्वाभावव्यापक इत्यादि भ्रमात्प्रमेयत्वादिनाऽभिधेयत्वाद्यनुमितेरनुपपत्तिः साध्याभावहेत्वभावयोरप्रसिद्ध्या तत्त्वेन व्याप्यव्यापकभावग्रहरूपकारणासम्भवादित्यत आह साध्याभावत्वादिकं चेति । वैज्ञानिकमिति । साध्यीयत्वाभावत्वादिना भासमानत्वरूपतया ज्ञानघटितमित्यर्थः । तथाच साधनीयत्वधर्मितावच्छेदकतया भासमानेऽभावत्वे साध्यधर्मितावच्छेदकतया भासमानाभावत्वावच्छिन्ननिरूपितव्यापकतावच्छेदकत्वज्ञानं हेतुर्न तु वास्तवसाध्याभावत्वावच्छिन्ननिरूपितव्यापकताज्ञानमित्यर्थः ।

मूले साध्याभावव्यापकसाधनाभावाभावेनेति । साध्याभावव्यापकतया भासमानो यः साधनाभावस्तदभावतया तत्प्रतियोगितया वा पक्षे ज्ञायमानेनेत्यर्थः । साध्यभावाभावस्य–साध्याभावविरोधितावच्छेदकरूपावच्छिन्नस्य, साध्यस्य साधनात्–सिद्धेरानुभविकत्वात् । व्यापकाभावेन व्याप्याभावावश्यंभावादिति नोक्तार्थे हेतुः–यद्रूपावच्छिन्नसत्त्वे यद्रूपावच्छिन्नसत्त्वावश्यंभावस्तद्रूपाच्छिन्नज्ञानात्तद्रूपावच्छिन्नसिद्धेरनियमात् । केवलधूमत्वावच्छिन्नाज्ञानाद्वह्नित्वावच्छिन्नासिद्धेः । व्यापकाभावत्वेन निश्चितात् व्याप्याभावनिश्चयावश्यंभावादित्यस्य तदर्थत्वेपि तत्सिद्धौ तत्सिद्ध्यवश्यंभावस्य हेतुत्वासम्भवादुक्तहेतुत्वेन तदभिधानासङ्गतिः। अन्वयेन व्यतिरेकव्याप्तेर्गमयगमकभावेपि नास्य हेत्वन्तरता अस्यैवार्थस्य साधनादित्यन्तेनोक्तत्वादित्यतः पूर्वं साध्याभावत्वसाधनाभावत्वाभ्यां व्याप्यव्यापकाभावज्ञानाद्धेतुमत्त्वेन ज्ञातपक्षे साध्यसिद्धेरानुभविकत्वम् व्यतिरेकव्याप्तेर्गमकताहेतुत्वेनोक्तम् ।

इदानीमप्रसिद्धस्याप्यभावरूपसाध्यस्य प्रतियोगितावच्छेदको यो धर्मस्तदवच्छिन्नव्यापकतावच्छेदकावच्छिन्नीयत्वेनाभावरूपत्वेनाभावरूपहेतुमत्ताज्ञानात्तद्धर्मावच्छिन्नीयत्वेनाभावसिद्धेस्तथात्वमित्याह व्यापकीयत्वेनेति । अप्रसिद्धसाध्यकसाधारणीमिति । तेन पृथिवीतरभेदादिरूपसाध्यस्य पक्षमात्रवृत्तितया प्रसिध्यसम्भवात् साध्याभावत्वेन हेत्वभावव्याप्यताग्रहो न सम्भवतीति सामग्र्यन्तरकल्पनमावश्यकमिति सूचितम् ।

यद्यप्येकदेश्यनुमताप्रसिद्धसाध्यकानुमितिप्रकारस्यात्रैव मूलकाराभिप्रेतत्वे—ननु पृथिवीतरेभ्यो भिद्यते पृथिवीत्वा-

रिति व्यतिरेकिणि साध्यमप्रसिद्धमित्यादि–पूर्वपक्षानवतारः, पक्षैकदेशे साध्यप्रसिद्धिमालंब्य समाधानासंगतिश्च। तथापि साध्याभाववत्त्वहेत्वभाववत्त्वाभ्यां व्याप्तिग्रहरूपा प्रथमोक्तसामग्री तत्र न सम्भवति प्रतियोगिज्ञानं विना व्यतिरेकव्याप्तिनिरूपणासम्भवात्। द्वितीयसामग्रीतोऽपि न तत्रानुमितिसम्भवः साध्यसन्देहरूपपक्षताविरहात्। अप्रसिद्धस्य विशेषणस्य ज्ञानविरहेण प्रकारतया भानासम्भवेनानुमितेः साध्यविशेषणकत्वानुभवविरोधश्चेति पूर्वपक्षाशयेन सन्दर्भशुद्धिनिर्वाहः।

साध्यसन्देहो न पक्षता अपि तु सिद्ध्यभावः अनुमितेः साध्यविशेष्यकत्वं नानुभवविरुद्धम्। यदि चान्वयव्याप्तिबोधमन्तरेणापि पृथिवीतराभिन्नेत्याद्यनुमितिरानुभाविकी, तदाऽभावविशेष्यकानुमित्यनन्तरमेव तादृशानुमितिरुपगन्तव्या पूर्वानुमितेरेव विशेषणज्ञानत्वात्। यथा प्रतियोग्यधिकरणज्ञानसत्त्वेऽज्ञातोऽभावः प्रत्यक्षे विशेष्यतयैव भासते अनन्तरं च विशेषणतया विशेषणज्ञानस्य वृत्तत्वादित्येकदेशिमतस्याप्यन्ये त्वित्यादिना उपन्यासः सङ्गच्छत इति व्यापकाभावेनेत्यादिमूले व्यापकाभावनिश्चयाद्व्याप्याभावसिद्धिलाभायाभावपदद्वयमभावनिश्चयार्थकतया व्याचष्टे अभावाविति। व्यापकाभावनिश्चयेऽपि प्रतिबन्धकबाधबुद्ध्यादिसत्त्वे व्याप्याभावानिश्चयात्तन्निश्चयावश्यंभावकथनासङ्गतिरतःपूरयति अवश्यंभावश्चेति। व्यापकत्वावच्छिन्नप्रतियोगिताकोऽभावो व्यापकाभावनिश्चयात्सिध्यतीति मूलाशयभ्रमनिरासायाह यद्रूपावच्छिन्नं प्रतीति। यद्रूपावच्छिन्नप्रतियोगिताकत्वविषयिणीत्यर्थः।फलमिति। व्यापकभावनिश्चयफलमित्यर्थः। प्रतियोगितायां व्याप्यताघटकसम्बन्धावच्छिन्नत्वभाननियमश्च व्याप्तिवादे सिद्धान्तलक्षणव्याख्यावसरे प्रपञ्चित इति नात्र तत्कथनम्। व्यापकस्य वह्नित्वावच्छिन्नाभावनिश्चयात् व्याप्याभावासिद्धेराह येन रूपेणेति। यद्रूपे व्यापकतावच्छेदकत्वं गृह्यत इत्यर्थः। तद्रूपावच्छिन्नीयत्वेनाभाववत्ताज्ञानमिति योजना। सम्बन्धविधया तद्रूपावच्छिन्नप्रतियोगिताकत्वावगाह्यभाववत्ताज्ञानमित्यर्थः। एवं सति तद्धर्मावच्छिन्नप्रतियोगिधर्मिकव्यापकताज्ञानं पृथक् तद्धर्मावच्छिन्नाभाववत्ताज्ञानमप्यनुमितिजनकम्। विशिष्टपरामर्शस्यैवानुमितिहेतुत्वमिति नैयायिकाभिमतनियमश्चान्वयिस्थले इत्याशयः।

सर्वत्रैव तादृशनियममुपपादयितुं प्रकृतेपि विशिष्टपरामर्शं दर्शयति-व्यापकत्वविशिष्टतद्रूपावच्छिन्नीयत्वेन वेति । व्यापकतावच्छेदकत्वविशिष्टवह्नित्वाद्यवच्छिन्नप्रतियोगिताकत्वसम्बन्धेन प्रतियोगिविशेषिताभाववत्ताज्ञानं वेत्यर्थः । व्यापकत्वसहितवह्नित्वावच्छिन्नप्रतियोगिताज्ञानं हेतुरिति यथाश्रुतार्थो न साधुः-वह्नित्वव्यापकतानवच्छेदकत्वग्रहदशायामपि द्रव्यत्वादिना वह्न्यादेर्धूमादिव्यापकताग्रहाद्धूमव्यापकवह्न्यभाववानिति ज्ञानसम्भवेन धूमाद्यभावसिद्धिप्रसङ्गात्, महानसीयवह्नित्वादौ धूमादिव्यापकतानवच्छेदकत्वग्रहे धूमादिव्यापकतावच्छेदकद्रव्यत्ववन्महानसीयवह्न्यभाववान् पर्वत इत्यादिज्ञानादिव तत्र धूमाभावानुमितेरनुभवविरोधेनेष्टापत्तेरयोगात् । परामर्शोपपादनप्रकारश्च-गुरुधर्मस्य प्रतियोगितावच्छेदकत्वोपगमेन प्रदर्शितः, अन्यथा स्वरूपतो वह्नित्वादेः प्रतियोगितावच्छेदकत्वसम्भवेन व्यापकतावच्छेदकत्वविशिष्टत्वादिना वह्नित्वादेः प्रतियोगितावच्छेदकत्वानुपपत्तेः । न च व्यापकतावच्छेदकत्वादिकमुपलक्षणतया प्रतियोगितावच्छेदकवह्नित्वांशेऽवगाहमानमेव ज्ञानमनुमितिहेतुः सम्भवतीति गुरुधर्मस्य प्रतियोगितावच्छेदकत्वाभावेपि निस्तार इति वाच्यम् । प्रतियोगिनि तद्विशेषणे चोपलक्षणतया प्रकारभावानुपगमात् । एतन्मते च कारणतावच्छेदके वह्नित्वादेर्विषयिता न विशिष्य निवेश्यते किन्तु व्यापकतावच्छेदकत्वसहिततद्धर्मितावच्छेदकावच्छिन्नविषयितात्वेनैव, अतो धूमव्यापकतावच्छेदकेन्धनत्ववदभाववानित्यादिज्ञानवारणाय व्यापकतावच्छेदकत्वसहिततद्धर्मितावच्छेदकतापन्नधर्मावच्छिन्ने प्रतियोगिविषयतावच्छेदकतापर्याप्तिर्निवेश्या । यत्र व्यापकतावच्छेदकत्वधर्मितावच्छेदकतया वह्नित्वांशे पूर्वक्षणवृत्तित्वादिवैशिष्ट्यं भासते तत्रानुमितिरिष्यत एव, तत्र विशिष्टवह्नित्वादेरेव व्यापकतावच्छेदकतया भानेन वह्नित्वाद्यविशेषात् ।

(दी०) व्यापकप्रतियोगिकस्याभावस्यातिप्रसक्तत्वात् । व्यापकत्वावच्छिन्नप्रतियोगिताकस्य च सम्बन्धविशेषावच्छिन्नस्य सम्भवतोऽप्यसार्वत्रिकत्वात् । कारणानुगमः परं परिचिन्तनीयः । एवञ्च वह्निर्धूमव्यापको वह्न्यभाववांश्चायमिति ज्ञाना-

दधूमव्यापकवन्ह्यभाववानयमिति ज्ञानाद्वा निर्धूमोऽयमिति धीरिति । धूमव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववानयमिति ज्ञानादित्यपि कश्चित् ॥

(गा०) यथाश्रुतव्यापकाभाववत्ताज्ञानहेतुतां दूषयति व्यापकप्रतियोगिकस्येति । व्यापकत्वघटितधर्मावच्छिन्नप्रतियोगिविशेषितस्येत्यर्थः । अतिप्रसक्तत्वात्—अजनकविशिष्टव्यापकाभावादिज्ञानविषयत्वात् ।

ननु व्यापकत्वपर्याप्तप्रतियोगितावच्छेदकत्वावगाहिज्ञानहेतुतया विशिष्टव्यापकाभावज्ञानादनुमितिर्वारणीयेत्यत आह व्यापकत्वावच्छिन्नेति । धूमादिव्यापकत्वावच्छिन्नप्रतियोगिताकाभावस्येत्यर्थः । असार्वत्रिकत्वादिति । धूमादिसमानाधिकरणाभावप्रतियोगितानवच्छेदकद्रव्यत्वाद्यवच्छिन्नाधिकरणे ह्रदादावसत्त्वादित्यर्थः । तथाचाभ्रान्तानां ह्रदादौ वन्ह्यभावेन धूमाभावाद्यसिद्ध्या तादृशाभावज्ञानस्य न हेतुतासम्भव इति भावः । ननु सर्वत्र व्यापकतावच्छेदकप्रमेयत्वाद्यवच्छिन्नसत्त्वेन व्यापकत्वावच्छिन्नाभावः प्रसिद्ध्यत्येव न कथं तस्यासार्वत्रिकत्वाभिधानमित्यत आह सम्बन्धविशेषेति । व्यापकतावच्छेदकीभूतसंयोगादिसम्बन्धावच्छिन्नप्रतियोगिताकस्येत्यर्थः । सम्भवतोपि–गुणादौ प्रसिद्ध्यतोऽपि ।

ननु प्रथमकल्पे व्यापकतावच्छेदकधर्माणां यत्त्वतत्त्वेन निवेशात्तदननुगमेन द्वितीयकल्पेऽपि व्यापकताघटकसम्बन्धानां विशिष्य निवेशनीयतया तदननुगमेन कारणाननुगमाद्व्यभिचार इत्यत आह कारणाननुगम इति । कारणाननुगमप्रयुक्तदोषोद्धार इत्यर्थः । चिन्तनीयः—प्रयासेन कर्त्तव्यः । तथाच कारणस्यानुगमासम्भवे विशेषधर्माणां कार्यतावच्छेदकतामुपगम्य व्यभिचारो वारणीयः । विशेषधर्मश्च जातिविशेषरूपः तत्तत्कारणानन्तर्यरूपो वेति भावः । प्रथमकल्पानुसारेण जनकज्ञानाकारं दर्शयति वह्निर्धूमव्यापक इति । इति ज्ञानात्—इत्याकारकात् समूहालम्बनात् ज्ञानद्वयाच्चेत्यर्थः । द्वितीयकल्पानुसारेणाह धूमव्यापकेति । धूमव्यापकतावच्छेदकवह्नित्ववदभाववानित्यादिज्ञानादित्यर्थः । निर्धूमोयमिति । यद्यपि निर्धूमोऽयमिति बुद्धेः धूमाभावविशिष्टबुद्धितयाऽप्रसिद्धसाध्यक-

परामर्शाच्च तादृशानुमितिः प्रथमं सम्भवति । तथापि अत्र धूमाभाव इति साध्यविशेष्यकानुमित्यनन्तरोत्पन्नानुमितेरेवाकारप्रदर्शनपरमिदम्, आनुभविकसाध्यविशेषणकानुमित्यनुरोधेनैव साध्यविशेष्यकानुमितिरुपेयते न त्वनुभवसिद्धा सेति न तदाकारप्रदर्शनम् ।

अथवा विशिष्टविशेषणकेऽपि विशिष्टप्रतियोगिकविलक्षणवैशिष्ट्यानवगाहिज्ञाने न विशिष्टविशेषणज्ञानापेक्षा ज्ञानत्वादिनिर्विकल्पकानन्तरं जानामीत्याकारकज्ञानत्वादिविशिष्टप्रकारकानुव्यवसायं स्वीकृतवतो मणिकारस्याप्यनुमतमिदम् । काञ्चनमयत्वादिविशिष्टवह्नेः प्रागप्रतीत्या उपनीतकाञ्चनमयत्वविशिष्टवह्निप्रकारकानुमित्यसम्भवकथनं च तस्य विशिष्टविशेषणकज्ञानमात्र एव विशिष्टविशेषणज्ञानं हेतुरिति प्राचीनमतानुसारेण । अत एव तत्र दीधितिकृता विशिष्टप्रसिद्धिमन्तरेणापि विशेष्ये विशेषणमिति न्यायेन विशिष्टप्रकारकानुमितेः सम्भवो दर्शितः । तथाच धूमव्यापकवह्न्यभाववानित्यादिज्ञानाद्धूमाभावविशिष्टविषयकज्ञानमन्तरेणापि धूमाभाववानयमिति ज्ञानं विशेष्ये विशेषणमिति रीत्या सम्भवति अभावत्वादिसामान्यलक्षणया अभावत्वादिना कदाचिद्धूमाभावस्य ज्ञानात्तन्मूलकतत्स्मरणेन विशेषणज्ञानघटिततत्सामग्रीसम्भवात्, अनुमितिसाधारण्यात्स्वरूपतस्तदविशेषणकतद्विशिष्टबुद्धौ तज्ज्ञानहेतुताया अप्रामाणिकत्वाच्च । तथाच तन्मतानुसारेणैव निर्धूमोऽयमित्याकारप्रदर्शनम् ।

वह्नित्वेन्धनत्वद्रव्यत्वादिनानाधर्मावच्छिन्नाभावानामुपलक्षणीभूतव्यापकतावच्छेदकत्वेन भासमानं यद्वह्नित्वेन्धनत्वादि तत्पर्याप्तप्रतियोगितावच्छेदकताकत्वरूपानुगतधर्मप्रकारेण ज्ञानं व्याप्याभावानुमितौ हेतुः, प्रतियोगितासंसर्गक एव ज्ञाने प्रतियोगितावच्छेदकादावुपलक्षणधर्मभावानुपगमात्, अतो जात्यवच्छिन्नप्रतियोगिताकाभावो भूतल इति वाक्यं प्रमाणं अप्रमाणं तु जातिमान्नास्तीत्यादेवेत्युपपद्यत इति ब्रुवतां मतमाह धूमव्यापकेति ।

अत्रेदमस्वरसबीजम्–गुरुधर्मस्य प्रतियोगितावच्छेदकताया व्यवस्थापितत्वान्निरुक्तरूपेण धूमव्यापकतावच्छेदकवह्नित्ववदभाववानित्यादिप्रतियोगितासंसर्गकज्ञानकारणत्वमेवोचितं, न तूक्तप्रतियोगिताप्रकारकज्ञानहेतुत्वं तद्धेतुतावच्छेदकगर्भे प्रतियोगितावच्छेदकता-

पर्याप्त्यवगाहितानिवेशेन गौरवात्, अन्यथा महानसीयवह्नित्वाद्यवच्छिन्नाभावस्यापि धूमव्यापकतावच्छेदकवह्नित्वघटितधर्मावच्छिन्नप्रतियोगिताकतया व्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकत्वेन तादृशाभावविषयकज्ञानादभ्रान्तस्य पर्वतादौ निर्धूमत्वसिद्धिप्रसङ्गात्। प्रतियोगितासंसर्गकज्ञानहेतुतामते व्यापकतावच्छेदकत्वतद्धर्मितावच्छेदकतापन्नधर्मोभयावच्छिन्ने प्रतियोगिनिष्ठप्रकारतावच्छेदकतायाः स्वरूपतः पर्याप्तिनिवेशेनैव प्रतियोगितावच्छेदकगर्भे प्रतियोगितावच्छेदकप्रविष्टस्य वैशिष्ट्यादेरधिकस्य विशिष्टाभावादिबुद्धौ भानेन प्रतियोगिविषयतावच्छेदकतायाः उक्तोभयधर्मविशिष्टेऽपर्याप्तत्वादनतिप्रसङ्गेन प्रतियोगितावच्छेदकत्वपर्याप्त्यवगाहित्वानिवेशात्।

यत्तु महानसीयवह्नित्वावच्छिन्नाभावस्यापि धूमादिव्यापकतावच्छेदकपर्याप्तप्रतियोगितावच्छेदकताकत्वं दुरपह्नवं—तत्प्रतियोगितावच्छेदकप्रविष्टयोर्वह्नित्वमहानसीयवह्निभिन्नत्वयोरेव धूमव्यापकतावच्छेदकत्वात्, तथा चोक्तरूपेण महानसादौ तादृशाभावज्ञानान्निर्धूमत्वसिद्धिप्रसङ्गः तद्वारणाय धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणप्रकारकज्ञानभिन्नं यत्प्रकारकज्ञानं तत्त्वमेव व्यापकतावच्छेदकत्वं तदाश्रयपर्याप्तप्रतियोगितावच्छेदकताकत्वप्रकारेणाभावज्ञानमेव हेतुरुपेयते। तादृशव्यापकतावच्छेदकत्वं च यत्त्वतत्त्वगर्भतया न विशिष्टैकार्थरूपमिति न विशिष्टपरामर्शसम्भव इत्यस्वरसबीजम्।

तदसत्—एवं सति व्यापकत्वविशिष्टवह्नित्वाद्यवच्छिन्नविषयकज्ञानस्यापि विशिष्टपरामर्शत्वासम्भवात्, एवमन्वयिस्थले विशिष्टपरामर्शनिर्वाहो न स्यात्—तत्रापि धूमादिहेतुना महानसीयवह्निभिन्नवह्नित्वाद्यवच्छिन्नस्य महानसादौ सिद्धिवारणाय निरुक्तयत्त्वघटितव्यापकतावच्छेदकत्वप्रकारकसाध्यतावच्छेदकज्ञानस्यैवानुमितिहेतुताया उपगन्तव्यत्वात्। यदि च हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणापर्याप्तधर्मपर्याप्त्यधिकरणत्वमेव व्यापकतावच्छेदकत्वं मिलितयोर्महानसीयवह्निभिन्नत्ववह्नित्वयोस्तादृशप्रतियोगितावच्छेदकत्वपर्याप्त्याधिकरणयोरपर्याप्तो यो धर्मस्तत्पर्याप्त्यधिकरणतायास्तादृशयोरसत्त्वात् तादृशयोस्तदवगाहिज्ञानं भ्रम

एवंत्यभ्रान्तस्य महानसादौ तादृशसाध्यतावच्छेदकावच्छिन्नासिद्धि-प्रसङ्गो यत्त्वतत्त्वाघटितोक्तव्यापकत्वावगाहिविशिष्टपरामर्शहेतुतयापि शक्यवारण इत्युच्यते । तदा व्याप्याभावानुमितौ निरुक्तव्यापकतावच्छेदकताश्रयपर्याप्तप्रतियोगितावच्छेदकताकत्वेनाभावावगाहिनो विशिष्टपरामर्शस्य हेतुतोपगमेन महानसीयवह्निभिन्नवह्नित्वाद्यवच्छिन्नाभावेन धूमत्वाद्यवच्छिन्नाभावसिद्धिर्वारयितुं शक्यत इति ।

(चि०) अथैवं न साऽनुमितिः क्लृप्तनद्धेतुलिङ्गपरामर्शाभावात् , अन्यथाऽननुगम इति चेन्न । अनुमितिमात्रे व्याप्तिज्ञानस्य प्रयोजकत्वात् । न चैवमतिप्रसङ्गः, अनुमितिसामान्यसामग्र्यां सत्यामप्यनुमितिविरहादनुमित्यनुत्पत्तेः, विशेषसामग्रीसापेक्षाया एव सामान्यसामग्र्या जनकत्वात् ।

(दी०) व्याप्तिज्ञानस्येति । अत्र व्याप्तिपदेनान्वयव्यतिरेकव्यापकताग्रहानियतविषयताकोऽर्थोऽभिमतः । पक्षस्य पक्षतावच्छेदकस्य वा ज्ञानमनुमितिमात्रे हेतुरित्यपि वदन्ति ।

(गा०) नन्वन्वयव्यतिरेकव्यापकतासाधारणव्यापकताकत्वस्याननुगतस्य दुर्वचतयाऽनुमितिसामान्ये व्याप्तिज्ञानत्वेन हेतुत्वाभिधानं न सङ्गच्छते इत्याशङ्क्याह अत्रेति । अन्वयेति । अन्वयव्यापकत्वे व्यतिरेकव्यापकत्वे च भासमानेऽवश्यं भासते योऽर्थोऽभावत्वादिः स विवक्षित इत्यर्थः । अन्वयव्याप्तिज्ञानेऽवश्यंभासमानस्य साध्यतावच्छेदकस्याप्रसिद्धसाध्यकव्यतिरेकपरामर्शासङ्ग्राहकतया व्यतिरेकव्यापकत्वोपादानम्, साध्याभावव्यापकतात्मकप्रतियोगित्वाभावस्य व्यतिरेकव्याप्तिज्ञानेऽवश्यं भानेऽपि तद्विषयकत्वस्यान्वयव्याप्तिज्ञानासंग्राहकतयाऽन्वयव्याप्तेरुपादानम् ।

वस्तुतस्तु अभावत्वादिविषयकत्वं उभयव्याप्तिज्ञानानुगमकमित्येतत्स्फोरणाय उभयव्यापकताघटकत्वेन तादृशपदार्थोपादानम् ।

मतान्तरमाह पक्षस्येति । स्वविशेष्यस्येत्यर्थः । स्वं फलीभूता-

नुमितिः । समानविशेष्यकत्वस्यातन्त्रत्वेऽनुमितिपूर्वं तद्विशेष्यज्ञानानियमात् पक्षतावच्छेदकस्येति । स्वविशेष्यतावच्छेदकधर्मस्येत्यर्थः । अनवच्छिन्नप्रकारताश्रयस्येति परमार्थः ।

अत्र चास्वरसः स्वपदार्थान्तर्भावे तदननुगमात् । तदनन्तर्भावे च पक्षादिविषयकत्वस्याव्यावर्त्तकत्वात् वस्तुमात्रस्यैव पक्षत्वात् ।

(चिं०) अन्वयिव्यतिरेकिविशेषद्वयसामग्री च नास्त्येव ।

(दी०) अन्वयीति । अन्वयिनि ताद्रूप्येण वह्नित्वादिना, व्यतिरेकिणि तु इतरप्रतियोगिकत्वेन वह्न्यभावादिनिषेधतया सिद्धिरित्यनुभवसिद्धः कार्यगतो विशेषः कारणविशेषजन्यतावच्छेदकम् । अत एव तत्र तत्र सर्वत्र व्यतिरेकिणि तस्मान्न तथेत्येव निगमनशरीरम् ।

अन्वयिना वह्न्यभावेन धूमाभावसिद्धौ धूमाभावत्वं प्रकारः व्यतिरेकिणि तु तत्सिद्धौ प्रत्यक्ष इव प्रतियोगितया धूमः प्रकार इति वदन्ति ।

इत्थं च ह्रदो धूमाभाववान्न वा पर्वतो वह्निमान्न वेत्यादिजिज्ञासायां विप्रतिपत्तावुद्देश्यायाः साध्यतावच्छेदकरूपेण साध्यवत्त्वप्रतीतेरनुपयोगिनो व्यतिरेक्युदाहरणादेः कथमवतार इति विभावनीयम् ॥

केचित्तु अन्वयव्याप्तिज्ञानानन्तरत्वादिकमेवानन्यगतिकतया जन्यतावच्छेदकमित्याहुः ।

अन्यतरत्वेन तादृशपरामर्शयोः कारणत्वमित्यपि काश्चित् ।

इति केवलव्यतिरेकिदीधितिः ॥

(गा०) पक्षतावच्छेदकत्वाच्च विशेषसामग्रीरूपयोरन्वयव्यतिरेकव्याप्तिज्ञानयोः परस्परव्यभिचारः कार्यवैचित्र्यादेव निरसनीयः । अनुमित्योर्वैचित्र्यं न जातिविशेषाभ्यामन्वयव्यतिरेकपरामर्श-

यज्जन्यानुमितौ संकरेण तत्तत्परामर्शजन्यतावच्छेदकतया जातिद्वयक-कल्पनासम्भवात्, अतस्तादृशानुमित्योर्विधेयाविषयतावैलक्षण्येन वै-चित्र्यमुपपादयति अन्वयिनीत्यादिना । ताद्रूप्येण वह्नित्वादिना सिद्धि-रित्यग्रिमेणान्वयः ।व्यतिरेकिणि त्वितरप्रतियोगिकत्वेनेति । इतरभेद-साध्यकेऽनुयोगितासम्बन्धेनेतरप्रकारेणेत्यर्थः । न च तेन सम्बन्धेनेत-रावच्छिन्नस्य हेतुव्यापकताज्ञानादपि तादृशरूपेणानुमित्युत्पत्त्या तत्र व्यतिरेकव्याप्तिज्ञानव्यभिचार इति वाच्यम् । तादृशहेतुव्यापकता-ज्ञानादनुयोगितयेतरविशिष्टस्य वैशिष्ट्यभानाद्व्यतिरेकिपरामर्शात्सा-ध्यप्रसिद्ध्यनन्तरं केवलं विशेष्ये विशेषणमित्यादिरीत्यैवेतराविशेषि-तभेदानुमितेः, साध्याप्रसिद्धिदशायां चेतरप्रकारेण भेदविशेष्यकप-क्षप्रकारकानुमितेरुपगमेन वैलक्षण्यात् । न चेतरव्यापकीभूताभाव-प्रतियोगिमत्ताज्ञानजन्येतरभेदानुमितेरन्वयिहेतुकानुमितित उक्तरी-त्या वैलक्षण्योपपादनेऽपि इतरभेदाभावव्यापकीभूताभावप्रतियोगि-मान्पक्ष इति ज्ञानजन्येतरभेदत्वविशिष्टवैशिष्ट्यावगाहिन्या अनुमि-तेरितरभेदत्वावच्छिन्नव्यापकताज्ञानजन्यानुमितितो वैलक्षण्यं दुर्व-चमिति वाच्यम् । तत्रानुपदवक्ष्यमाणरीत्या व्याप्यतावच्छेदकतया गृहीतेतरभेदाभावत्वावच्छिन्नाभावत्वेनैवानुमित्युपगमात् । वह्न्या-दिभावसाध्यकव्यतिरेकिलिङ्गकानुमितेर्वैलक्षण्यमाह वह्न्यभावादी-त्यादिना । वह्न्यभावादिनिषेधतया-वह्न्यभावाद्यभावत्वेनेत्यर्थः । ते-न रूपेण व्यापकताज्ञानजन्यानुमितेस्तद्विशिष्टवैशिष्ट्यबोधरूपतया व्यतिरेकिणि च तद्रूपेणानुमितेस्तद्विशिष्टवैशिष्ट्यानवगाहितया विशेषो बोध्यः ।

इति श्रीमद्गदाधरभट्टाचार्यचक्रवर्तिविरचितानुमानगादाधर्यां केवलव्यतिरेकिप्रकरणम् ॥

(चि०) ननु पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वादिति व्यतिरेकिणि साध्यमसिद्धं, तथाच न व्यतिरेकिनिरूपणं न वा पक्षत्वं न वा लिङ्गजन्यसाध्यविशिष्टतज्ज्ञानं–तेषां साध्यज्ञानजन्यत्वात् । अथ साध्यं प्रसिद्धं, तदा यत्र प्रसिद्धं तत्र हेतोरवगमेऽन्वयित्वं, अनवगमे असाधारण्यम् । किञ्च इतरभेदो न स्वरूपं अधिकरणप्रतियोगिनोः पृथिवीजलाद्योरनुमानात् प्रागेव सिद्धेः । नापि वैधर्म्यं जलादिनिष्ठात्यन्ताभावप्रतियोगिमत्त्वं, तद्धि पृथिवीत्वादिकं तच्च सिद्धमेव । न च जलादिनिष्ठात्यन्ताभावप्रतियोगित्वेन पृथिवीत्वं न सिद्धमिति वाच्यम् । जलादौ पृथिवीत्वात्यन्ताभावग्रहदशायां पृथिवीत्वेऽपि तत्प्रतियोगित्वग्रहात् । अन्योन्याभावस्तु भेदो यद्यपि साध्यं सम्भवति–वैधर्म्यज्ञानसाध्यत्वादन्योन्याभावग्रहस्य, तथापि जलादिप्रतियोगिकान्योन्याभावस्य प्रसिद्धिः । न च जलादिप्रत्येकान्योन्याभावः साध्यः, असाधारण्यप्रसङ्गात् ।

बटुकनाथशास्त्रिकृतं व्यतिरेकिविवेचनम् ।

यत्कृपालेशतो मूको जायते वाग्विदांवरः ।
तं नत्वा श्रीगुरुं कुर्वे व्यतिरेकिविवेचनम् ॥

नन्विति । यद्यपीतराप्रतियोगिकभेदाभावे साध्ये विशेष्यवति विशिष्टाभावस्य विशेषणाभावपर्यवसायित्वेनेतरप्रतियोगिकभेदानुमितिर्विशेष्ये विशेषणमित्यादिन्यायेनापि विशिष्टवैशिष्ट्यनिर्वाहेण साध्यविशिष्टज्ञानस्य पक्षताघटकसदेहस्य च संभवात् व्यतिरेकिनिरूपणस्य च यादितराप्रतियोगिकभेदावच्छिन्नं तत्र पृथिवीत्वावच्छि-

न्नमित्याकारकस्य सम्भवात् इतराप्रतियोगिकभेदावच्छिन्नयोर्जला-दिघटयोः पृथिवीत्वानवच्छिन्नत्वात् एकत्र तस्यावृत्तेरन्यत्र वृत्त्या-व्यसमासेः, तादृशावच्छिन्नत्वस्य च हेतुत्वात् । तथापि विशिष्टा-भावप्रकारिकैव धीः स्यात्, न त्वितरभेदप्रकारिका । विशिष्टाभाव-स्य विशेषणाद्यभावरूपत्वेऽपि विशिष्टाभावत्वप्रकारिका धीः स्यात् । भावे वा इतराप्रतियोगिकाभावत्वं प्रकारः स्यात्, न त्वित-रप्रतियोगिकत्वमतश्चेदृशप्रतीतिरीदृशसाध्यप्रसिद्धावेवेति अवसे-यम् । अन्वयित्वमिति । तथाच अन्वयसहचारज्ञानादेव तत्र निर्वा-हे गुरुतरव्यतिरेकसहचारज्ञानस्य हेतुत्वकल्पने किं प्रयोज-नमिति भावः । नन्वनवगमे कथमसाधारण्यं ? किन्तु तद्ग्रह एवे-त्याशंकायामाह किञ्चेति । नन्वन्योन्याभावरूपो भेदः साध्य इत्यत आह अन्योन्याभावास्त्विति । असाधारण्येति । जलभेदवत्तया नि-श्चिते वाय्वादौ पृथिवीत्वस्यासत्त्वादिति भावः ।

(चि०)अथ पृथिवी तेजोभिन्ना न वेति संशयेन ते-जोभिन्नत्वेऽवगते पृथिवी तेजोभिन्ना सती जला-दिद्वादशभिन्ना न वेति संशये तेजोभिन्नत्वे सति जलादिद्वादशभिन्नत्वं प्रसिद्धं तदेव साध्यम्, एक-विशेषणविशिष्टे विशेषणान्तरबुद्धेरेव विशिष्टवैशि-ष्ट्यज्ञानात्, एवञ्च संशयप्रसिद्धं साध्यमादाय व्य-तिरेकादिनिरूपणम् । यद्वा पृथिवी जलादिभिन्ना न वे-ति प्रत्येकं त्रयोदशसंशयविषयाणां त्रयोदशान्यो-न्याभावानां समुदायः पृथिव्यामवगतो व्यतिरेका-दिनिरूपकः । न चैवं पृथिव्यामेव साध्यप्रसिद्धेर्व्यति-रेकिवैयर्थ्यम्, साध्यनिश्चयार्थं व्यतिरेकिप्रवृत्तेः । न चा-साधारण्यम्, समुदितान्योन्याभावानां साध्यत्वे सपक्षाभावादिति चेन्न ।

साध्यनिश्चये हि साध्यव्यतिरेकानिश्चयो भवत्येव

साध्यसन्देहे तद्व्यतिरेकसंशयस्य वज्रलेपत्वात्, तथा च संशयरूपा साध्यसिद्धिरिति शिष्यबन्धनम्। एतेन पृथिवी जलादिभ्यो भिन्नेति विप्रतिपत्तिरूपवादिवाक्यादाकाङ्क्षादिमतोऽपूर्वार्थप्रतिपादकत्वात् साध्यप्रसिद्धिरिति परास्तम्। वाक्यादेव पृथिव्यां साध्यसिद्धेर्व्यतिरेकिवैयर्थ्यात्। न च तद्बुद्धौ वादिवाक्यजन्यत्वेनाप्रामाण्यसंशयात् निश्चयेऽपि संशय इति तन्निश्चयार्थं व्यतिरेकीति वाच्यम्। तर्हि संशयप्रसिद्धं साध्यं, तस्य च न व्यतिरेकनिश्चायकत्वमित्युक्तत्वात्, स्वार्थानुमाने तदभावाच्च।

(वि०) ननु तेजोभेदविशिष्टं जलादिभिन्नत्वमुक्तसंशये न कथं प्रसिद्धं तेजोभिन्नत्वस्य जलादिद्वादशभिन्नत्वस्य च पृथग्भूतस्योक्तसंशयेनावगाहनेपि विशिष्टस्य पूर्वमप्रसिद्धेरत आह एकेति।

यद्वेति। पूर्वमेकसंशयविषये संशयान्तरोत्पत्तिरित्युक्तम्, अधुना समूहालंबनवदेकदैव संशये तावद्भेदाः कोटय इति भेदः। साध्यनिश्चयार्थमिति। उक्तसाध्यप्रसिद्धेः संशयरूपत्वादिति भावः। असाधारण्यमिति। अनुमितिविषयतावच्छेदकावच्छिन्नसाध्यवतः सपक्षत्वेन विवक्षितत्वान्नायमसाधारण इत्यग्रे वक्ष्यमाणत्वादिति भावः। साध्यनिश्चय इति। यद्यपि यत्र संदेहः तत्र व्यतिरेकसंदेह उपपद्यते, न ह्यन्यत्र संदेहेनान्यत्र तत्संदेहः अनुच्छेद्यतापत्तेः, तथाच पक्षे संशयेऽप्यन्यत्रास्तु व्यतिरेकनिरूपणम्, तथापि निश्चायकाभावेन संशयस्य वज्रलेपत्वमुक्तम्। न च तदभावः, क्वचिदपि निश्चयाभावेन निश्चायकाप्रसिद्ध्या तद्गर्भयोग्यानुपलंभाभावात्। न च यावदुपलम्भकगर्भा माऽस्तु प्रतियोगिसत्त्वविरोधित्वगर्भास्त्विति वाच्यम्। तत्रापि प्रतियोगिसत्त्वप्रसंजितोपलम्भप्रतियोगिकत्वमित्यग्रे वक्ष्यमाणत्वात्। न च निश्चयाप्रसिद्ध्या निश्चयापादनं भवतीति। योग्यानुपलब्ध्यभावस्याकर एव स्फुटत्वात्। न च जलं जलादित्रयोदशान्योन्याभावसमुदायाभाववत् तदेकदेशाभाववत्त्वादिति सामान्यतो दृष्टानुमानात्तन्निश्चय इति वाच्यम्। यत्तदुभयामनुगतधर्मस्य व्या·

प्यतावच्छेदकस्याभावे तादृशसामान्यतोदृष्टस्य दुष्टत्वात् । अन्यथा यद्वैधर्म्यवत्तत्तद्भिन्नमिति सामान्यतो दृष्टादर्थसिद्धेः सर्वत्र व्यतिरेकिविलयापत्त्योक्तसमर्थनस्याप्यनौचित्यात् ,प्राक् नास्तितानुमानमपि तद्वत्तयाऽस्मर्यमाणत्वे सति स्मर्यमाणत्वहेतोरन्वयाप्रतीतौ व्यतिरेकयेव तदुभयानवतारे प्राक्नास्तीतिबुद्धेरसिद्धेः । किञ्चोक्तसंशयप्रसिद्धस्यासदर्थस्यापि सिद्धिप्रसंगः । न च यद्व्यतिरेकेऽनिष्टप्रसङ्गः संशयोपस्थितस्यापि तस्यैव हेतौ व्याप्तिग्रहः, संशयोपस्थितस्य व्याप्यग्रहेण तन्मूलकानिष्टप्रसंजनाभवान् । यत्तु अनुव्यवसायोपनयेन निश्चयरूपाप्रसिद्धिरिति । तन्न । यादृशो निश्चयो व्याप्तिग्राहको अनुव्यसायस्य तथात्वाभावादिति अलं विस्तरेण ॥

(केवलव्यतिरेकिसिद्धान्तः)

(चि०)उच्यते घटादावेवेतरसकलभेदस्य प्रत्यक्षतः प्रसिद्धिः घटो न जलादिरिति प्रतीतेः । नन्वयमन्योन्योभावो न प्रत्यक्षः अतीन्द्रियप्रतियोगिकाभावत्वात् परमाणुसंसर्गाभाववत् योग्यानुपलब्धेरभावग्राहकत्वात् नयनोन्मीलनानन्तरं स्तम्भः पिशाचो न भवतीति–प्रतीतेर्बाधकबलेन वायुर्वातीतिवल्लिङ्गग्रहोपक्षीणत्वादितिचेत् । न । यो ह्यनुपलम्भोऽधिकरणे प्रतियोगिमत्त्वविरोधी सोऽभावं ग्राहयति न तु योग्यानुपलब्धिमात्रम्, अन्यथा वायौ रूपाभावप्रतीतिवत् जलपरमाणौ पृथिवीत्वाभावग्रहप्रसङ्गात् । अधिकरणे प्रतियोगिसत्त्वञ्च तर्कितं–यदि हि स्तम्भः पिशाचः स्यात् स्तम्भवदुपलभ्येत न पिशाचानुपलम्भः स्यात् । न च पृथिवीजलाद्भिन्ना जलावृत्तिधर्मवत्त्वात् तेजोवत्, एवमन्येभ्योऽपि भेदसिद्धौ द्वादशभिन्नेति विशेषणं दत्वा समवायभेदसाधनादन्वयिन एव

पृथिव्यां त्रयोदशभेदासिद्धिरिति किं व्यतिरेकिणेति वाच्यम्। जलादिभिन्ना सती समवायिभिन्नेति बुद्धावपि त्रयोदशाभिन्नेति बुद्धेर्व्यतिरेकिसाध्यत्वात्। न च घटस्यापि पक्षत्वादंशतः सिद्धसाधनम्, सर्वा पृथिवीतरभिन्नेत्युद्देश्यप्रतीतेरभावात्, पक्षतावच्छेदकनानात्वे हि तत्, अत एवानित्ये वाङ्मनसे इत्यत्रानित्या वागिति बुद्धेरुद्देश्याया असिद्धत्वादंशतः सिद्धसाधनम्, अन्यथानुमानमात्रोच्छेदात् पक्षस्य सिद्धस्यैव साध्यत्वात्। न च घटः कथं पक्षः साध्यनिश्चयेन संशयसिषाधयिषयोरभावादिति वाच्यम्। सर्वा पृथिवी इतरभिन्ना न वेति संशयस्य तत्प्रकारकसिषाधयिषायाश्च सामान्यतो घटविषयत्वात् घटत्वेन विशेषदर्शनं सिद्धिर्वा [illegible]तस्तेन रूपेण संशयसिषाधयिषे न स्तः, पृथिवी[illegible]ते भवत एव धूमवान् वह्निमानिति धूमवत्त्वे वह्निनिश्चयेपि पर्वते वह्निसंशयवत्।

(वि०)अयोग्यधर्मानवच्छिन्नयोग्यमात्रवृत्तिप्रतियोगिताकत्वमभाव-प्रत्यक्षे तन्त्रमित्याशयेनाशङ्कते नन्विति। योग्यानुपलब्धेरिति। प्रतियोगिनो योग्यस्यानुपलब्धेरित्यर्थः। तथाचाधिकरणेषु मध्ये निरुक्तनिश्चयाभावविशिष्टो यो देशः प्रतियोगिमत्त्वविरोधी—प्रतियोगितावच्छेदकसम्बन्धसंसर्गकाधिकरणत्वसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिमत्तया आपादितसाक्षात्कारकः स देशोऽभावं ग्राहयति अतीन्द्रियप्रतियोगिकस्याप्यभावस्य लौकिकप्रत्यक्षविषयत्वात् इत्यर्थः। नत्विति। तुशब्दः तत इत्यर्थे। नातो निरुक्तयोग्यतासहितैव निरुक्तानुपलब्धिरभावलौकिकप्रत्यक्षे कारणं व्यतिरेकव्यभिचारादित्यर्थः। अन्यथा—योग्यप्रतियोग्यनुपलब्धिरूपयोग्यतायाः अभावलौकिकप्रत्यक्षहेतुत्वे। प्रसङ्गादिति। उक्तयोग्यताया-

स्तम्भ सत्त्वादिति भावः ।

ननु अत्यन्ताभावादिग्रहे अधिकरणे प्रतियोगिसत्त्वमप्रसिद्धम्, तथाच कथं तद्विरुद्धगर्भानुपलब्धिः प्रसिद्धेत्यत आह अधिकरण इति । तर्कितं—प्रसञ्जनीकृतम् । तथाचाधिकरणे यत्र प्रतियोगिसत्त्वेनापादकेन प्रतियोग्युपलम्भ आपाद्यते तत्र तदभावः प्रत्यक्षः, तेन योग्यप्रतियोगिको योग्याधिकरणको वाऽन्योन्याभावः संसर्गाभावो वा यत्रैव यादृशप्रतियोगितावच्छेदकावच्छिन्नसत्त्वेनापादितेन तथोपलम्भ आपाद्यते तत्र तथाऽनुपलम्भस्तदवच्छिन्नाभावं गमयति वायौ रूपाभाववत् रूपवदन्योन्याभावस्य घटे मनोन्योन्याभाववत् मनस्त्वात्यन्ताभावस्यापि तुल्यवदाभासमानत्वात् प्रतियोगिसत्त्वप्रसञ्जितप्रतियोगिकोपलम्भाभावविषयत्वेनैवाभावस्य योग्यत्वात् । न तु योग्यप्रतियोगिकत्वेन संसर्गाभावे योग्याधिकरणत्वेनान्योन्याभावे योग्यता गौरवात् उक्ततुल्यानुभवव्याघाताच्चेति तात्पर्यम् । यदि हीति । स्तम्भः पिशाचः स्यात्—चक्षुःसंयुक्तः कश्चित् पिशाचः स्तम्भः स्यात् । उपलभ्येतेति । सोऽपि पिशाचः पिशाचस्तम्भान्तरवच्चाक्षुषः स्यादित्यर्थः । स्तम्भत्वस्य महत्त्वोद्भूतरूपवत्त्वनियतत्वादिति भावः । न पिशाचानुपलम्भः स्यात्—न सर्वः पिशाचो लौकिकसाक्षात्का[illegible]यः स्यादिति यावत् । तथाच स्तम्भत्वं न पिशाचवृत्तीति नियमोऽनिर्बाध एवेति भावः ॥ जलादिभिन्ना सतीति । विशिष्टाधिकरणकवैशिष्ट्यबुद्धौ सामानाधिकरण्यसम्बन्धेन विशेष्यतावच्छेदकस्य विधेये प्रकारत्वादित्याशयः । व्यतिरेकिसाध्यत्वादिति । यद्यपि जलावृत्तिधर्मवत्त्वादिभ्यो युगपत्समूहालम्बनरीत्या अन्वयिभ्यो तथाऽनुमितिः सम्भवत्येव, तथापि एकहेतुकयावद्भेदसाधकानुमितिर्न व्यतिरेकिणं विनेति द्रष्टव्यम् ॥ घटस्यापीति । प्रयोगे दोषोऽयम्—यत्सिद्धांशस्यापि पक्षत्वेनोपादानादंशतः सिद्धसाधनमर्थान्तरमिति यावदनाकांक्षिताभिधानात् अन्यथाऽसङ्गतेः । स्वार्थानुमितौ हि घटस्यापि पक्षत्वमित्येवासङ्गतं निश्चितस्यापि पक्षत्वेऽनुमित्युत्पत्तेः, अपक्षत्वे उदासीने इव सिद्धसाधनानवकाशात्—इति ॥ इतरेति । साध्यनिश्चयस्य न साक्षादनुमितिविरोधित्वं किन्तु पक्षताविघटनद्वारा । सा चेदस्ति किमनेन । न च सा नास्ति सिषाधयिषाविरहसहकृता यादृशी सिद्धिस्तदभावस्तत्सिद्धौ पक्ष-

तेति सामान्यतत्सिद्धौ तत्सत्त्वादिति भावः । अन्यथेति । यद्यनुमितिविषयैकदेशसिध्या सिद्धसाधनन्तदेत्यर्थः । सिद्धस्यैव–सहचारघटकतया निश्चितस्यैव, साध्यत्वात्–तादृशानुमितौ विधेयत्वात् । न च घट इति । एतच्च यथाश्रुतस्य संदिग्धसाध्यवत्त्वस्य सिषाधयिषितसाध्यवत्त्वस्य च पक्षत्वमभिप्रेत्य बोध्यम् ।

ननु घटे विशेषदर्शनासिद्धिसत्त्वेन कथं संशयसिषाधयिषयोस्तद्विषयत्वं ज्ञानादेः स्वरूपसत एव स्वविषयकेच्छाविरोधित्वादित्यत आह घटत्वेनेति । धूमवान् वह्निमानिति । यद्यप्येवं सामान्यतो निश्चिते विशेषतः संशय उपपादितः इह तु विशेषतो निश्चये सामान्यतः संशयः, स च दुरुपपादः इदंपर्वतत्वेन वह्निनिश्चये पर्वतत्वेन तत्संशयादर्शनात्, तथापि भिन्नप्रकारकनिश्चयस्यापि यत्संशयप्रतिबन्धकत्वं वाच्यम् , तत्र किमवच्छेदकं ? न तावत्समानविषयत्वं तत्रातिप्रसंगं प्रतियादयति–धूमवानित्यादि । न तु दृष्टान्तार्थं येनोक्तवैषम्यमाद्रियेत । अन्यच्च समानप्रकारकत्वमपहाय न । अत एवेदंपर्वतत्वेनापि वह्निनिश्चयेऽग्निसंशयः पर्वते भवत्येव । यदि च नास्ति तदा तदर्थं समानप्रकारकनिश्चयत्वं विशेषप्रकारकनिश्चयत्वं चोभयं प्रतिबन्धकतावच्छेदकं कल्प्यमिति गौरवम्, समानप्रकारकतामात्रं च लघ्विति तदेव कल्प्यते नान्यदिति भावः ॥

(चि०)यद्वा सर्वत्वेन रूपेण न पक्षता सर्वत्राविप्रतिपत्तेः–घटाद्येकदेशे इतरभेदस्य प्रत्यक्षसिद्धत्वात् तथा चैकदेशे विप्रतिपत्तौ सामान्ये इतरभेदसाधने अर्थान्तरम्, किन्तु सामान्येन पृथिवीत्वेन यावदेव विप्रतिपत्तिविषयस्तावतामेव पक्षता विशेष्याननुगमात् । तर्हि पृथिवी इतरभिन्ना पृथिवीत्वाद्धटवदित्यन्वयिनैवेतरभेदस्य सिद्धत्वात् किं व्यतिरेकिणा, घटसाधारणपचत्वेप्यभेदानुमानवत् पक्षस्यापि दृष्टान्तत्वाविरोधात्, पक्षान्यत्वं हि तत्रातन्त्रं किन्तु साध्यवत्तया निश्चितत्वं प्रयोजकम् । न च पृथिवीत्वाग्रहे पूर्वं गृहीतं यत्र

साध्यं पश्चात् स्मर्यते तत्र हेतुसाध्यसामानाधिकरण्याग्रहाद्व्यतिरेकस्यावतार इति वाच्यम्। हेतोरेव पक्षतावच्छेदकत्वेन घटे पृथिवीत्वग्रहदशायामितरभेदसामानाधिकरण्यग्रहावश्यम्भावादिति चेत् । सत्यम्, अन्वयितुल्यतया व्यतिरेकिणोऽपि सामर्थ्यादन्वयाप्रतिसन्धानदशायां व्यतिरेकस्योपन्यासस्यापर्यनुयोज्यत्वात्, तदुक्तम्–'आस्तां तावदयं सुहृदुपदेशः केवलव्यतिरेकिलक्षणं तावन्निर्व्यूढम् ।

(वि०)ननु यदवच्छेदेन यत्र यत्कोटिनिश्चयस्तदवच्छिन्नत्वज्ञानं तत्कोटिकसंशयविरोधि,न तु तत्प्रकारकतत्कोटिकसंशयविरोधि–गौरवात् । अत एव धूमत्वेन व्याप्तिनिश्चये धूमत्वेनोपस्थितायां धूमव्यक्तौ विशेषतोऽपि न व्याप्तिसंशयः, अन्यथा विशेषप्रकारकसंशयापत्तेः । धूमवत्त्वेन वह्निनिश्चयेऽपि पर्वते तावदेव वह्निसंशयो यावन्न धूमवत्त्वेनोपस्थितिः । तदिह घटत्वेनेतरभेदनिश्चयदशायां पृथिवीत्वेनापि नेतरभेदसंशय इत्यस्वरसादाह यद्वेति । पृथिवीत्वेन—घटादिभिन्नपृथिवीत्वेन । शङ्कते तर्हीत्यादिना चेत् इत्यन्तेन। अभेदानुमानवत्—अयं घटः तद्घटाभिन्नः तद्घटवृत्तिविलक्षणसंस्थानवत्त्वादित्यादिस्थैर्यसाधकाभेदानुमानवत । साध्यवत्तया निश्चितत्वं—साध्यवत्त्वनिश्चयावच्छेदकधर्मवत्त्वम्। अन्यथा पक्षतावच्छेदकावच्छिन्नस्यापि दृष्टान्तत्वापातात् अभेदानुमानेपि भिन्नाभिन्नावच्छेदेन पक्षदृष्टान्तत्वव्यवस्थितेरिति भावः ।न चेति ।यत्र स्थले पूर्वं गृहीतं साध्यमुद्बोधकवशात् पृथिवीत्वाग्रहे पश्चात् स्मर्यते इत्यर्थः। अन्वयेति। ननु व्यभिचाराज्ञाने साध्यसाधनोभयसहचारग्रहेऽन्वयव्याप्तिग्रहावश्यकत्वेन कथमन्वयाप्रतिसन्धानमिति चेन्न, तत्समानाधिकरणात्यन्ताभावाप्रतियोगित्वादिपदार्थानुपस्थित्याऽन्वयाप्रतिसन्धानसम्भवात् । अपर्यनुयोज्यत्वादिति । अन्वयोपन्यासदशायां अधिकेन निग्रहात् पर्यनुयोगः स्यादिति भाव. ॥ निर्व्यूढमिति । अन्वयाप्रतिसन्धानकाले

व्यतिरेकिव्याप्तिज्ञानादनुमितेरनुभवसिद्धतया तस्यापि हेतुत्वं निर्बाधमेवेति भावः ॥

(चि०)अथ वा जलादीनां त्रयोदशान्योन्याभावाः त्रयोदशसु प्रसिद्धाः पृथिव्यां साध्यन्ते, अत एवाकाशे व्यतिरेकिणा जलादिमिलितप्रतियोगिकान्योन्याभावाप्रतीतावपि त्रयोदशान्योन्याभावाः साध्या इति नान्वयित्वासाधारण्ये ।

यद्वा जलं तेजःप्रभृतिद्वादशभिन्नप्रतियोगिकान्योन्याभाववत् द्रव्यत्वात्तेजोवदित्यनुमानात्त्रयोदशभिन्नस्य सामान्यतः सिद्धौ पृथिव्यां त्रयोदशभिन्नत्वं साध्यम् । न चान्वयित्वमसाधारण्यं वा, पक्षादन्यत्र साध्याप्रसिद्धेः । वस्तुगत्या पृथिव्यामेव साध्यसिद्धेः किं व्यतिरेकिणेति चेत् । न । पृथिवी त्रयोदशभिन्नेति व्यतिरेकिणं विना अप्रतीतेः । नन्वेवं पृथिवी जलादित्रयोदशभिन्नप्रतियोगिकान्यान्योभाववती द्रव्यत्वादिति पृथिवीभिन्नतद्भिन्नादिसिद्धिः स्यादिति चेत् । न अप्रयोजकत्वात्, प्रकृते चानुभूयमानजलादिवैधर्म्यस्य पृथिवीत्वाश्रयशब्दाश्रयत्वादेरतिरिक्तं विनानुपपत्तेः । नन्वितरभेदो यद्यन्योन्याभावस्तदा भावाद्भेदो न सिद्ध्येत अभावस्याभावान्तराभावात् । यदि च तेन समं स्वरूपभेद एव साध्यः, तदाऽननुगमादनुमानाप्रवृत्तिः। भावोऽभावो न भवतीत्यबाधितप्रतीतिबलादभावस्यापि अन्योन्याभावोऽस्तीति केचित् । तन्न, अपसिद्धान्तात् । अनतिप्रसक्ताधिकरणस्वरूपमात्रेणैवाभावप्रतीत्युपपत्तौ चाधिकाभावे मानाभावाच्च

इति चेत् । न । इतरभावान्योन्याभावस्य साध्यत्वात् । न चैवमभावादविवेकनादवस्थ्यम् , तेन समं स्वरूपभेदस्यान्वयिना व्यतिरेकिणा वा साध्यत्वात् ।

(वि०)अत्राप्यथवेति न पूर्वास्वरसात् किन्तूपस्थित्यनियमेन कदाचिदयमपि कल्प इति व्यवस्थितविकल्पः। तथा चान्यत्र कल्पद्वयेऽपि यथोपस्थितिः, आकाशादौ त्वेष एवेति व्यवस्थितविकल्पार्थो बोध्यः॥ जलादिमिलितेति । आकाशेतरत्वावच्छिन्नप्रतियोगिताकान्योन्याभावानुमित्यसम्भवादित्यर्थः । आकाशस्यैकव्यक्तित्वेन तत्रैकदेशे साध्यप्रसिद्ध्यसम्भवादिति भावः ॥

त्रयोदशभेदानां त्रयोदशप्रत्येकं प्रसिद्धिमुक्त्वा एकत्रैव तत्प्रसिद्धिमाह यद्वेति । अत्र तेजःप्रभृतिद्वादशभिन्ननिष्ठभेदप्रतियोगीति साध्यार्थो विवक्षितः, यथाश्रुते पृथिव्यां साधनीयस्य त्रयोदशभेदस्यास्मात्प्रसिद्धेः जलभेदस्यैवासिद्धत्वात् । शङ्कते वस्तुगत्येति । त्रयोदशभिन्नेति । जलादित्रयोदशभिन्नेत्यर्थः । प्रकृते-यद्वा जलमित्यत्र । अनुभूयमानेति । तेजःप्रभृतिद्वादशभिन्नपृथिव्यादौ अनुभूयमानस्येत्यर्थः । पृथिवीत्वेति-तेजःप्रभृतिद्वादशभिन्नपृथिवीवृत्त्यन्योन्याभावानुमानाभिप्रायेण, शब्दाश्रयत्वेति च आकाशेतरभेदानुमानस्थले तेजःप्रभृतिद्वादशभिन्नगगनवृत्त्यन्योन्याभावानुमानाभिप्रायेण बोध्यम् । अतिरिक्तं विना-पृथिव्यादेर्जलाद्यतिरिक्तत्वं विना । अथवेति द्वितीयकल्पे शङ्कते नन्विति । अभावान्तरेति । अधिकरणातिरिक्तभेदेत्यर्थः । स्वरूपभेद इति । अधिकरणस्वरूपभेद इत्यर्थः । अननुगमादिति । अधिकरणानामनन्तत्वेन चतुर्दशत्वरूपेण साध्यत्वासम्भवादिति भावः । कस्यचिदत्र समाधानं पूर्वपक्षयति भावो न भवतीत्यादि । उत्तरयति तन्नेति । नायमेकदेशिनं प्रत्यपसिद्धान्त इत्यत आह अनतिप्रसक्तेति । समाधत्ते इतरभावेति । पूर्वोक्तयुक्त्येतरत्वेन भावस्यैव भेदसाधनादित्यर्थः । अन्वयिना व्यतिरेकिणा वेति । ननूभयमप्यसम्बद्धम्-अभावस्वरूपभेदस्य पृथिवीजलस्वरूपत्वेनाननुगमतादवस्थ्यादन्वयासम्भवात् । न चाभावभेदत्वमनुगतो धर्म इति वाच्यम् । तस्य तद्धर्मित्वान्यस्य दुर्वचत्वात् । पृथिव्यामभावभेद-

स्य पृथिवीस्वरूपत्वेन यत्र नाभावभेदः तत्र पृथिवीत्वाभाव इति व्यतिरेकस्याभावेन व्यतिरेकिणोऽप्यसंभवात्, अभावभेदाभावस्य पृथिवीविरहपर्यवसानेऽन्त्यावयव्यादौ व्यभिचारादिति चेन्न। उभयत्राप्यदोषात्—अभावभिन्नत्वबुद्धिजननयोग्यत्वस्यानुगतस्य भावात् भावत्वादेश्च योग्यतावच्छेदकस्य सत्त्वेन तद्योग्यतावच्छेदकधर्मवत्त्वस्यानुगतत्वादन्वयिनः सम्यक्त्वात्। व्यतिरेकिण्यपि व्यभिचाराभावात्, तथाहि—पृथिव्यभावभिन्नेति भेदधीर्न पृथिव्यन्तरवत्त्वेन त्वदुक्तान्त्यादौ व्यभिचारात्। स्वयमेव भेदत्वेन स्वस्मिन् वर्तते न तु स्वत्वेनेति प्रतीतिवैचित्र्यादवश्यं मन्तव्यम्। तथा चान्त्यावयव्यादेरपि स्वात्मना पृथिवीरूपाभावभेदेन तदभावाभावान्न व्यभिचार इति लक्षणस्य व्यतिरेकिणो न केवलमितरभेद एव साध्यः किं नाम पृथिवीत्वव्यधिकरणधर्मात्यन्ताभावादिरपि अविशेषादिति तत्त्वम्।

(चि०) अन्ये तु पृथिवीत्वभिन्नधर्मात्यन्ताभाव एव साध्यः जलत्वादिप्रतियोगिकास्तावन्तोऽत्यन्ताभावा वा तत्तदसाधारणतत्तद्धर्मात्यन्ताभावयोगो वा, एते चाभावा जलत्वं न घटादौ घटादि जलात्यन्ताभाववदिति प्रत्यक्षादेः क्वचित्तत्तद्धर्म्यादेव प्रसिद्धा इति नाप्रसिद्धिः। तावतामभावानां वैशिष्ट्यं न प्रसिद्धमिति चेत्। किमेतावता, न हि तावद्वैशिष्ट्यमत्र साध्यते, किन्तु जलत्वादीनां यावन्तोऽभावा इह साध्यास्ते च तत्र तत्र प्रसिद्धा एव, तावद्वैशिष्ट्यधीस्तु फलम्, अन्यथा सिद्धसाधनात्। मिलितानामपि साध्यत्वे नाप्रसिद्धिः किञ्चिदेकधर्मावच्छेदो हि बलादिवन्मेलकार्थः, स च नासिद्धः। न च हेतोरसाधारण्यम्, तावदभावयोगी ह्यत्र सपक्षो भवति, न तु तदेकदेशकतिपयाभाववान्—साध्यतायास्तावत्यपर्याप्तेः॥

यद्वा जलत्वात्यन्ताभावस्तेजस्त्वात्यन्ताभावाधिकरणवृत्तिः अत्यन्ताभावत्वात् घटत्वात्यन्ताभाववत्, एवमत्यन्ताभावान्तरसामानाधिकरण्यमपि तत्र साध्यमिति क्वाप्रसिद्धिः ॥

किञ्चेतरे तावत् प्रसिद्धा एव, ते च भेदप्रतियोगिनो मेयत्वात्, इतीतरभेदोऽपि सुग्रह एव । ननु पृथिवी नेतरभेदवती गुरुत्वादिभ्यो जलवदिति प्रतिरोध इति चेन्न । इतरभेदनिषेधो हीतराभेदः न तु तेजःप्रभृत्यभेदो जल इति दृष्टान्तस्य साध्यवैकल्यात् । चतुर्दशाभेदानां चैकत्र विरोधेनासम्भवात् । चतुर्दशभेदानां चैकत्र वृत्तौ न विरोधः । यत्तु साध्याप्रसिद्धौ पृथिवीतरभिन्ना तत्साध्याधिकरणपृथिव्यन्यतरत्वात्तदधिकरणवत् पृथिव्यां तत् साध्यमन्वयिन एव सेत्स्यतीति । तन्न । अन्यतरत्वस्यालिङ्गत्वादित्युक्तत्वात्, लिङ्गत्वे वा जलादावपि तत्सिद्धिप्रसङ्गात् । एवं तर्हि पृथिवी जलं पृथिवीत्वात् यन्न जलं तन्न पृथिवी यथा तेज इति सत्प्रतिपक्षोऽस्त्विति चेत् । न । अजलस्य घटादेः प्रत्यक्षत एव पृथिवीत्वनिश्चये व्यतिरेकव्यभिचारादस्य न्यूनत्वात्, तदनवधारणे तु सत्प्रतिपक्षत्वमिष्टमेव ॥

(वि०) ये त्वत्यन्ताभाव एव व्यतिरेकिणः साध्य इति वदन्ति तन्मतमाह अन्ये त्विति । पृथिवीत्वभिन्नेति । पृथिवीत्वव्यधिकरणेत्यर्थः । आकाशादौ उक्तप्रकाराभावादाह जलत्वादीति । तत्तदत्यन्ताभावयोगत्रयोदशाभावरूपतत्तदत्यन्ताभावमेलनमित्यर्थः । प्रत्येकप्रसिध्या समुदायप्रसिद्धेस्साध्यप्रसिद्धिमाह एते इति । शङ्कते तावतामिति । प्रत्येकसाध्यतावच्छेदकावच्छिन्नानां युगपत्तावद्व्याप्तिग्रहे तावद्व्यापकैकानुमित्युत्पादे तावतामेकाधिकरण्यरूपमेलकस्यानु-

मितिविषयतया मेलकधीः फलम् , न च मेलकेन व्याप्तिग्रह इति निर्गलितार्थः। अन्यथा—प्रत्येकमेवानुमितौ। प्रत्यक्षादिना प्रत्येकसाध्यप्रसिद्ध्यर्थमपि सिध्युपगमेन सिद्धसाधनं स्यादिति भावः। ननु संख्यारूपं तत्तदपेक्षाबुद्धिविषयत्वं वा मेलकत्वं तथाच प्रत्येकं प्रसिद्धानां तेषां एते त्रयोदशभेदा इति बुद्धिसम्भवेन मिलिततत्प्रसिद्धिरपि सुलभेवेति तृतीयकल्पमाह मिलितानामिति। तावदभावयोगीति। तावदभाववत्तया निर्णीत इत्यर्थः। अपर्याप्तेरिति। साध्यतावच्छेदकावच्छिन्नवत्तया निश्चितः सपक्ष इति भावः॥

अत्यन्ताभावत्वात्—अभावागर्भप्रतियोगिकात्यन्ताभावत्वात्, तेन तेजस्त्वव्यधिकरणधर्मात्यन्ताभावादौ न व्यभिचारः। तत्र—जलत्वात्यन्ताभावे। अप्रसिद्धिरिति। तेजस्त्वात्यन्ताभाववायुत्वात्यन्ताभावादिसमानाधिकरणजलत्वात्यन्ताभावस्य साध्यत्वादिति भावः।

अन्योन्याभावेऽप्यत्यताभाववन्मेलकप्रसिध्या कल्पान्तरमाह किञ्चेति। भेदप्रतियोगिनः-एकाधिकरणभेदप्रतियोगिनः। शङ्कते नन्विति। गुरुत्वादीत्यादिना तत्र दृष्टान्तपक्षसाधारणधर्मकथनं तेन तत्तद्भेदसाधनाच्चतुर्दशाभेदः समूहालम्बनाविषयः। प्रतिरोधः-सत्प्रतिपक्षः।

अत्र चतुर्दशाभेदत्वेन साध्यता बोध्या। न चाग्रे सर्वत्र मेयत्वादिना सत्प्रतिपक्ष इत्यनेन पौनरुक्त्यं, दोषान्तरदानाय व्यतिरेकिमात्रदोषाय च तत्राक्षेपादिति। साध्यवैकल्यं दृष्टान्ते दत्वा बाधमप्याह चतुर्दशाभेदानामिति। अभावमादाय चतुर्दशत्वं बोध्यम्। स्वमते बाधाभावं दर्शयति चतुर्दशभेदानामिति। तत्सिद्धिप्रसङ्गात्-इतरभेदसिद्धिप्रसङ्गात् , जलादावपि तत्साध्याधिकरणजलाद्यन्यतरत्वस्य लिङ्गस्य सत्त्वादिति भावः। एवं-व्यतिरेकव्याप्तिज्ञानस्य कारणत्वे। व्यभिचारादिति। असाधारण्यादित्यपि द्रष्टव्यम्। तदनवधारणे त्विति। पृथिवीत्वस्यानवधारणे त्वित्यर्थः। इदं न प्रकृतमात्रे साधनं, प्रागुक्तसत्प्रतिपक्षतामात्रेपीदं समाधानं द्रष्टव्यम्॥

(चि०) ननु जीवच्छरीरं सात्मकं प्राणादिमत्त्वात् इच्छादिकार्यवत्त्वाच्चेति व्यतिरेकिणि साध्याप्रसिद्धौ

कथं व्यतिरेकादिनिरूपणम् । नैरात्म्यञ्च घटस्य न प्रत्यक्ष-वेद्यं तस्य तत्रासामर्थ्यात् । नानुमानगम्यं, नैरात्म्या-प्रतीतावन्वयिनोऽभावात्, सात्मकत्वप्रतीतिं विना व्यतिरेकिणोऽनुपपत्तिः । अथेच्छा समवायिकारण-जन्या कार्यत्वात्, तच्च समवायिकारणं पृथिव्याद्यष्ट-द्रव्यभिन्नं पृथिव्यादित्वे बाधकसत्त्वात् इति पृथिव्या-दिभिन्नात्मसिद्धौ तद्वत्त्वं जीवच्छरीरे साध्यत इति चेत । यदि सात्मकत्वमात्मसंयोगवत्त्वं तदा घटादौ तदस्तीति ततो हेतुव्यावृत्तावसाधारण्यम् । ज्ञानसमा-नाधिकरणज्ञानकारणीभूतसंयोगाश्रयकार्यत्वं सात्म-कत्वं शरीरात्मसंयोगस्य ज्ञानकारणत्वात्, आत्म-मनसोस्तथात्वेऽपि अकार्यत्वात् इति चेत् । न । शरी-रादन्यत्राप्रसिद्धेः । तत्र प्रसिद्धौ सिद्धसाधनात् । इ-च्छाया असमवायिकारणसंयोगावच्छेदकत्वस्याभा-वो घटादौ दृष्टः तद्व्यतिरेकः शरीरे साध्यत इति चेत । न । इच्छाया असमवायिकारणसंयोगावच्छेद-कत्वस्य शरीर एव प्रसिद्धेः सिद्धसाधनात्, अन्यथा असिद्धिव्यतिरेकाद्यनिरूपणात् । अप्रसिद्धसाध्यसंस-र्गमिव साध्यमप्रसिद्धं साधयति व्यतिरेकीति चेत् । न । व्यतिरेकाद्यनिरूपणात् असाधारणधर्मेणाप्रतीतप-दार्थानुमाने घटत्वादिनापि स्वेच्छाकल्पितडित्थाद्यनु-मानप्रसङ्ग इति ॥

उच्यते इच्छाऽसमवायिकारणसिद्धाविच्छात्वं संयोगासमवायिकारणकवृत्ति नित्येन्द्रियग्राह्यविशे-षगुणवृत्तिगुणत्वसाक्षाद्व्याप्यजातित्वात् शब्दत्ववत्,

स चासमवायिकारणं संयोगः किञ्चिदवच्छिन्नः संयोगत्वात्, आत्मसंयोगमात्रस्येच्छाजनकत्वे सात्मकत्वं शरीरे साध्यते ॥

(वि०) साध्याप्रसिद्धाविति । सात्मकत्वस्य पक्षमात्रवृत्तित्वादित्यर्थः । तत्रेति । प्रत्यक्षविषयाभ्यां प्रतियोग्यधिकरणाभ्यामभावग्रहः प्रत्यक्षतो भवति । न च तदुभयग्राहीन्द्रियमस्ति मनसो घटाद्यग्राहकत्वात् इन्द्रियान्तरस्यात्माग्राहकत्वात् । न चोभाभ्यामुभयग्रहोऽभावग्रहो उभयेन्द्रियप्रवृत्तेरयौगपद्यात् इति भावः । कार्यत्वादिति । भावकार्यत्वादित्यर्थः । ज्ञानेत्यादिपूर्वपक्षः । तत्र ज्ञानकारणं चक्षुर्घटसंयोगोऽपीति ज्ञानसमानाधिकरणत्वेन संयोगो विवक्षितः । तादृशश्चात्मसंयोग एव सोऽपि घटादिसाधारण एवेति ज्ञानकारणत्वं विशेषणम् । आत्मप्राणसंयोगस्तु शरीरावच्छिन्नात्मप्राणसंयोगो वाच्यः अन्यथाऽतिप्रसङ्गादित्यावश्यकतया शरीरप्राणसंयोगेनान्यथासिद्धो न हेतुरिति द्रष्टव्यम् । कार्यत्वपदस्य व्यावृत्तिं स्वयमेवाह आत्ममनसोरिति । नेत्यादि समाधानम् । शङ्कते इच्छाया इति । अप्रसिद्धेति । कुतोऽयं व्यतिरेकिनियम इति चेत् । अन्वयिनि साध्यसाधनसहचारमूते व्याप्त्यज्ञानात् । व्यतिरेकिणि साध्यमात्रप्रसिद्ध्यैव साध्याभावसाधनाभावयोर्व्याप्तिग्रहेण साध्यसंसर्गस्यानुमित्येकविषयत्वात् इति विद्धि ॥

इच्छात्वामिति । व्यक्तिपक्षे विभागजशब्दे व्यभिचारः स्यादिति जातेः पक्षत्वमुक्तम् । नित्येन्द्रियेति । नित्येन्द्रियग्राह्यत्वं च तन्मात्रग्राह्यत्वम्, अन्यथा स्नेहवत्त्वस्यापि मनोग्राह्यत्वेन तद्व्यभिचारवारणार्थोपादानविरोधात् । तदपि गुणविशेषणं न जातिविशेषणम्, तथा सत्यात्मैकत्वे तादृशजात्यभावेन व्यभिचाराभावेन विशेषगुणोपादानविरोधात् । साक्षात्पदं शब्दमात्रवृत्तिशब्दत्वावान्तरजातौ व्यभिचारनिरासाय । जातिपदं च रूपादिभिन्नगुणत्वाद्युपाधौ व्यभिचारवारणाय स हि मनोमात्रग्राह्ये ज्ञानादावस्ति गुणत्वसाक्षाद्व्याप्यश्च गुणत्वन्यूनवृत्तिजात्यन्यूनवृत्तित्वात् । न च साध्यसत्त्वान्न व्यभिचार इति वाच्यम् । वृत्तिपदेन समवेतत्वस्योक्तत्वादिति । स चेति । अत्र किञ्चिदवच्छिन्नः संयोगोऽसमवायि-

कारणमिति उद्देश्यविधेयव्यत्यासेन व्याख्येयम्, तेन संयोगे पक्षे विशिष्टस्य जनकत्वं साध्यं लभ्यते अत एव तादृशं साध्याभावेऽनिष्टप्रसंजनमाह आत्मसंयोगमात्रस्येति । किञ्चिदवच्छिन्नसंयोगस्येत्यर्थः । अन्यथेच्छाजनकपर्यन्तस्य तर्के उपन्यासविरोधात् । न चैवं हेत्वसङ्गतिः, असमवायिकारणसंयोगत्वादिति हेत्वर्थात् । स चेत्यनेनासमवायिकारणसंयोगस्यैव परामर्शो तन्निष्ठसंयोगस्यैव हेतुत्वात् । इति भावः ।

(चि०) यद्वा आत्मनीच्छाधारता महत्संयोगावच्छेद्या जन्यविभुविशेषगुणाधारतात्वात् वाय्वादिसंयोगावच्छेद्यशब्दाधारत्ववदिति सामान्यतः सिद्धमिच्छाधारताघटकेच्छासमवायिकारणद्रव्यसंयोगवत्त्वं सात्मकत्वम् । अत एव ज्ञानसमानाधिकरणज्ञानकारणीभूतसंयोगाश्रयकार्यत्वं वा सात्मकत्वम्, स्वशरीरे प्राणादिमत्त्वस्य इच्छादिमत्त्वस्य च चेष्टावयवोपचयादिव्याप्यत्वग्रहात्, घटादौ चेष्टादिविरहेण प्राणादिमत्त्वेच्छादिमत्त्वविरहानुमानम्, इच्छादिविरहात् इच्छादिप्रयोजकेच्छाद्याधारताघटकेच्छाद्यसमवायिकारणसंयोगविरहानुमानं कार्याभाववति कारणाभावनियमात् । न च सात्मकत्वं शरीरवृत्ति शरीरे बाधकाभावात् शरीरत्ववदिति अन्वयिनैव साध्यसिद्धेः किं व्यतिरेकिणेति वाच्यम् । शरीरं सात्मकमिति शरीरविशेष्यकबुद्धेर्व्यतिरेकिणं विनाऽनुपपत्तेः । उपायान्तरस्योपायान्तरादूषकत्वाच्च ॥१२॥

यद्वा चेष्टा संयोगासमवायिकारणिका संस्काराजन्यक्रियात्वादिति चेष्टाया असमवायिकारणसंयोगसिद्धौ प्रयत्नवदात्मसंयोग एव पर्यवस्यति प्र-

यत्नान्वयव्यतिरेकानुविधायित्वात्। एवं चेष्टाया असमवायिकारणसंयोगाश्रयत्वे सति शरीरत्वं सात्मकत्वं जीवच्छरीरे साध्यं चेष्टावत्त्वादिति हेतुः। चेष्टाविरहश्च घटादौ प्रत्यक्षसिद्धः। चेष्टाविरहात्तदसमवायिकारणसंयोगविरहोऽपि सुग्रहः॥

यद्वा जीवच्छरीरं तदवयवो वा आत्मभिन्नत्वे सति आत्मविशेषगुणकारणभोगानधिकरणावृत्तिसंयोगवत् प्राणान्यत्वे सति ज्ञानकारणीभूतप्राणसंयोगवत्त्वात् यन्नैवं तन्नैवं यथा घटः, आत्मप्राणसंयोगः प्राणमनःसंयोगो वा शरीरप्राणसंयोगेनैवान्यथासिद्धो न कारणं, भोगाधारत्वं भोगसमवायिकारणातिरिक्तवृत्ति सकलभोगाधिकरणवृत्तित्वात् प्रमेयत्वादिवदिति तार्किकी रीतिः॥

(वि०) अत्राप्युपस्थितिनियमाभावात् व्यवस्थितो विकल्पः न पूर्वास्वरसेनेति न विस्मर्तव्यम्। महदिति। मनोयोगाद्यवच्छेद्यत्वेनार्थान्तरनिवृत्त्यर्थं महत्पदम्। ईश्वरज्ञानादव्याप्यवृत्तेराधारताया वारणाय जन्येति, रूपाद्याधारतावारणाय हेतौ विभिन्नेतिपदं च बोध्यम्। आत्मवृत्तित्रित्वाद्याधारतावारणाय विशेषेति। इच्छाधारताघटकेति। इच्छाधारतावच्छेदकः य इच्छासमवायिद्रव्यनिरूपितसंयोगस्तद्वत्त्वमित्यर्थः। अत एव–उक्तानुमानबलात्तादृशमहत्संयोगाश्रयस्य महतो द्रव्यस्य प्रसिद्धिसम्भवादेव। ननूक्तरीत्या सात्मकत्वसाध्यस्य प्रसिद्धावपि नैरात्म्यस्य साध्याभावस्य घटादावप्रसिध्या कथं व्यतिरेकव्याप्तिग्रह इत्यत आह स्वशरीर इति। शङ्कते नन्वेति। शरीरे बाधक इति। शरीरवृत्तित्वाभाववत्तया अप्रमितत्वादित्यर्थः। ननु सात्मत्वं शरीरवृत्तीत्यनुमानानन्तरं शरीरं सात्मकमित्यनुमानं सुकरमित्यरुचेराह उपायेति। अवधृतसामर्थ्ययोरप्यन्यतरास्फुरणदशायामन्यतरोपायानुसरणस्यापर्यनुयोगादित्यर्थः॥

(वि०)पक्षेति पूर्ववत् । वेगजक्रियायां व्यभिचारनिरासाय अजन्यान्तं हेतुविशेषणम् । न च गुरुत्वद्रवत्वजन्यक्रियायां व्यभिचारः, क्रियापदेन कर्मत्वव्याप्यपतनस्पन्दनव्यावृत्तगमनत्वरूपजातिविशेषस्य विवक्षितत्वात् । पक्षश्चेति । आत्मवारणाय शरीरत्वमिति विशेषणम् । अन्यत्स्पष्टम् ॥

आत्मभिन्नत्वे इति । सत्यन्तमिदमात्मनोऽपि साध्यवत्त्वेनासाधारण्यनिरासाय । आत्मविशेषगुणकारणपदं च मृतदेहस्यापि भोगाश्रयतया तत्राप्युक्तसंयोगसत्त्वेन सपक्षतया ततश्चेष्टावत्त्वस्य व्यावृत्ततया चासाधारण्यवारणाय बोध्यम् । न च कदाचिद्भोगाश्रयत्ववत्कदाचिच्चेष्टावत्त्वमपि तत्रास्तीति वाच्यम् । मृतशरीरव्यावृत्तस्यैव वर्तमानचेष्टावत्त्वस्य सात्मकत्वे लिङ्गत्वात् । न चात्मगुणपदेनैव तन्निर्वाहाद्विशेषपदानर्थक्यं, मृतशरीरात्मसंयोगजनकतदवयवात्मसंयोगमादाय मृतशरीरावयवे साध्यसत्त्वेनासाधारण्यप्रसङ्गवारकत्वात् । भेरीदण्डसंयोगवच्छब्दजनकं मृतशरीरे शरीरान्तरसंयोगमादाय मृतशरीरे सात्मकत्वनिरासायात्मेति । मनसः सात्मकत्ववारणाय भोगानधिकरणावृत्तीति साध्यघटकपदानां व्यावृत्तिः ॥ हेतौ प्राणे व्यभिचारवारणाय सत्यन्तम् । माङ्घादौ तद्वारणाय ज्ञानकारणीभूतेति । चक्षुरादिसंयोगमादाय तद्दोषतादवस्थ्यादाह प्राणेति । नन्वात्ममनसोरपि हेतुत्वेन व्यभिचार इत्यत आह आत्मेति । अतिप्रसङ्गेनानवच्छिन्नात्ममनसोः प्राणसंयोगस्य ज्ञानाहेतुत्वे शरीरावच्छिन्नतदुभयप्राणसंयोगो वाच्य इत्यावश्यकत्वात् तत एवान्यथासिद्धौ न तद्धेतु इत्यर्थः । नन्वेवमात्मतया शरीरस्यापि भोगानधिकरणतया तद्वृत्तिसंयोगवत्त्वं तत्र बाधितमतोऽनात्मनापि भोगाधिकरणत्वं साधयति भोगाधारत्वमिति । न च व्यर्थविशेषणत्वम् । व्याप्यतावच्छेदकविकासकविशेषणे तदभावात् संकोचकविशेषणे तथात्वादिति वक्ष्यमाणत्वात् । नन्वत्र भोगानधिकरणत्वमुपाधिः, अन्यथा रूपाधारत्वादीनामप्येवं रूपसमवायिभिन्नत्वानुमानं स्यादत आह तार्किकेति । तथा चात्र शरीरे सुखमित्यादि-तदाधारत्वानुभवो न स्यात् इत्यनिष्टप्रसङ्गात्मकतर्केण व्याप्तिग्रहसत्त्वादुपाधेः साध्याव्यापकत्वम् रूपाधारत्वे तु न तादृशतर्क इति भावः ।

(चि०) अथेच्छा अष्टद्रव्यातिरिक्तद्रव्याश्रिता अष्टद्रव्यानाश्रितत्वे सति गुणत्वात् यन्नैवं तन्नैवं यथाऽनाश्रितमष्टद्रव्याश्रितं वेति कथं व्यतिरेकी ? अष्टद्रव्यातिरिक्तद्रव्यस्य तद्वृत्तित्वस्य चाप्रतीतेर्व्यतिरेकाद्यनिरूपणात् ।

स्यादेतत् । इच्छाया द्रव्याश्रितत्वेऽनुमिते पृथिव्यादौ बाधानवतारदशायां विप्रतिपत्तिवाक्यादाश्रितत्वादिसाधारणधर्मदर्शनाद्वा तद्द्रव्यमष्टद्रव्यातिरिक्तं न वेति सन्देहेनाष्टद्रव्यातिरिक्तद्रव्योपस्थितिः । यद्वा इच्छाऽष्टद्रव्यातिरिक्ताश्रिता न वेति संशयात् इच्छाया अष्टद्रव्यातिरिक्ताश्रयोपस्थितौ पश्चादिच्छाश्रयोऽष्टद्रव्यातिरिक्तद्रव्यं न वेति संशयादष्टद्रव्यातिरिक्तद्रव्योपस्थितिः । अथवा द्रव्याश्रिता इच्छा अष्टद्रव्यातिरिक्तद्रव्यवृत्तिर्न वेति पूर्ववत् संशयादष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वं प्रसिद्धम् इच्छायाः साध्यते, संशयप्रसिद्धमपि साध्यं व्यतिरेकादिनिरूपकं साध्यज्ञानमात्रस्य कारणत्वात् । न चैवं संशयादेव पक्षे साध्यसिद्धेर्व्यतिरेकिवैयर्थ्यम्, निश्चयार्थं तत्प्रवृत्तेरिति ॥

मैवम्, संशयेन साध्यप्रसिद्धावपि तद्व्यतिरेकनिश्चयासम्भवात साध्यव्यतिरेकतद्व्याप्तिनिश्चयस्य साध्यनिश्चयसाध्यत्वात् साध्यसन्देहे तद्व्यतिरेकादिसंशयावश्यम्भावात । किञ्च संशयोपस्थितसाध्यस्य व्यतिरेकिनिरूपणं न योग्यानुपलम्भात्, साध्यनिश्चयं विना योग्यानुपलम्भास-

म्भवात् । नापि व्यापकाभावात्, साध्यनिश्चयं विना तद्व्यापकत्वनिश्चयाभावात् । न च यदीच्छा अष्टद्रव्यातिरिक्तद्रव्याश्रिता न स्यादष्टानाश्रिता सती द्रव्याश्रिता न स्यात्, रूपवदिति साध्यविपर्ययकोटौ प्रतिकूलतर्कसहकृतः साध्यसंशय एव निश्चयकार्यं करोति, अत एवैतादृशसंशयोपस्थितकल्पितडित्थादिसाधनमप्यपास्तम्, तद्विपर्यये प्रतिकूलतर्काभावादिति वाच्यम् । साध्यनिश्चयं विना साध्यव्यतिरेकनिश्चयतन्मूलतर्कानवतारात्, अन्यथा अष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वनिरूपणे तर्कादयस्तर्कोदये च तत्सहकृतसाध्यसंशयस्य साध्यव्यतिरेकनिश्चायकत्वमिति ।

(वि०) पूर्वपक्षी शङ्कतेऽथेति । सिद्धान्त्याह स्यादेतदिति । अनुमित इति । गुणत्वेनेति शेषः । आश्रितत्वादीति । आश्रयत्वादीत्यर्थः । यद्वेति । पूर्वमेकांशे निश्चयादपरांशे संशयाद्विशिष्टस्यैकज्ञानविषयतया साध्यप्रसिद्धिरत्र तु एकसंशयानन्तरमपरसंशयेनैव विशिष्टोपस्थितिरिति बोध्यम् । तृतीयेऽथवेत्यादिकल्पे विशिष्टस्य प्रथमत एव संशयविषयत्वादेकसंशयरूपैव प्रसिद्धिः कोटिप्रसिद्धिश्च केवलाष्टादिवाक्यादित्यवधेयम् । पूर्वपक्ष्याह मैवमिति । नन्वेकत्र सन्देहेऽप्यपरत्र सन्देहाभावात् इच्छायां साध्यसंशयेऽपि रूपादौ तद्व्यतिरेकनिश्चयः सम्भवति वायौ पार्थिवादिरूपसन्देहेऽपि तदभावनिश्चयस्यानुभविकत्वात् इत्यत आह किञ्चेति । व्यापकाभावात्—साध्यव्यापकाभावात् । साध्यव्यतिरेकिनिरूपणमिति शेषः । शङ्कते न चेति । साध्यविपर्ययकोटौ–अष्टद्रव्यानाश्रितत्वपक्षे । अत एव–साध्यसंशयेन निश्चयोत्पादे तद्विपर्यये प्रतिकूलतर्कस्य सहकारित्वादेव । साध्यव्यतिरेकनिश्चयेति । आपादकनिर्णयस्य तर्ककारणत्वादिति भावः । अन्यथेति । तथा च अन्योन्याश्रय इति पर्यवसितमिति पूर्वपक्षाशयः ।

(चि०) उच्यते–इच्छाश्रयद्रव्यसिद्धौ पृथिव्यादाविच्छाधारताऽभावे तद्द्रव्यं पृथिव्याद्यष्टद्रव्य-

भिन्नम् अष्टद्रव्यावृत्तिधर्मवत्त्वात् पृथिव्यादित्वे बाधकसत्त्वादित्यष्टद्रव्यातिरिक्तद्रव्यासिद्धाविच्छायामष्टद्रव्यातिरिक्तद्रव्यवत्त्वमष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वं वा साध्यते, साध्यप्रसिद्धिर्द्रव्यत्वे इच्छाविशेष्यकाष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वप्रतीतेर्व्यतिरेकिसाध्यत्वात् । तथापीच्छाऽष्टद्रव्यातिरिक्तद्रव्याश्रिता अष्टद्रव्यानाश्रितत्वे सति द्रव्याश्रितत्वात् अष्टद्रव्यातिरिक्तद्रव्यत्ववदिति साध्यप्रसिद्ध्यैव दृष्टान्तप्रसिद्धेरन्वयी हेतुः स्यादिति चेत् । न । अन्वयव्याप्त्यप्रतिसन्धाने व्यतिरेकव्याप्तिप्रतिसन्धानदशायां व्यतिरेकिसम्भवात् । न च द्रव्यत्वादेः सपक्षात् व्यावृत्तावसाधारण्यम्, तद्धि साध्यतदभावोभयसाधकत्वेन सत्प्रतिपक्षोत्थापकतया दोषावहं प्रकृते च न हेतोः साध्याभावसाधकत्वं विपक्षे बाधकाभावात् साध्यसाधकत्वे तत्सत्त्वाच्च । अत एव यावदेकत्रानुकूलतर्को नावतरति तावदेव दशाविशेषेऽसाधारण्यं दोष इत्युक्तम् । सुवर्णतैजसत्वसाधकव्यतिरेकिणि शब्दोऽनित्यः शब्दत्वादित्यादावपि तथा ॥

(वि०)सिद्धान्त्याह उच्यत इति । सिद्धाविति । इच्छा द्रव्याश्रिता गुणत्वाद्रूपवदित्यनुमित्यैवेति शेषः । प्रसिद्धिरिति । एतच्च सर्वमिच्छा द्रव्याश्रयाश्रितेति यदि सामान्यतोदृष्टानन्तरं इच्छाश्रयो द्रव्यत्वाश्रयो न पृथिवीति बाधावतारस्तदेति द्रष्टव्यम् । द्रव्याश्रितेच्छेत्यनुमाने तु द्रव्यत्वस्य प्रकारतया तदाश्रितत्वस्य वैशिष्ट्यभानेनाश्रितत्वत्वरूपसाध्यतावच्छेदकावच्छिन्नसाध्यस्य द्रव्यत्वेऽप्रसिद्धतया तत्र सिद्ध्युपदर्शनेन विरोधात् । एवं चान्वयित्वापादनमसाधारण्यापादनं चाग्रिमं विरुध्येत तयोः सपक्षत्वाभावात् । यदा तु द्रव्याश्रितेत्येवानुमानं तदा प्रसिद्धिरिच्छायां दृष्टव्या व्यति-

रेकिण इच्छाविशेष्यकानुमित्यर्थत्वमित्याकरेणैव स्फुटत्वात् । मथुरानाथस्तु-उक्तानुमानान्तरं मनसैव तादृशद्रव्यवृत्तित्वत्वेन साध्यतावच्छेदकप्रकारेण साध्यप्रसिद्धिर्द्रव्यत्वे इत्यर्थः—इत्याह । ननु तथापीच्छायां द्रव्यवृत्तित्वात् साध्यसिद्धिर्जातेति किं व्यतिरेकिणा? तत्राह इच्छेति । दृष्टान्तासिद्धेरिति । दृष्टान्ते द्रव्यत्वे साध्यप्रसिद्धेरन्वय्ययं हेतुरित्यर्थः । तथापीत्यत्रान्तरयति नेति । व्यावृत्तावेति । द्रव्यानाश्रितत्वे सति गुणत्वस्य हेतोर्व्यावृत्तावित्यर्थः । असाधारण्याभावे युक्तिमाह नह्रीति । असाधारण्यं हीत्यर्थः । विपक्षे-साध्याभावसाधकत्वाभावे । तत्सत्त्वादिति । अष्टद्रव्यानाश्रितस्य द्रव्याश्रितत्वं तदतिरिक्तद्रव्यवृत्तित्वं विनाऽनुपपन्नमिति साध्यसाधकतर्कस्याप्रतिहतत्वान्नोभयसाधकत्वेन सत्प्रतिपक्षोत्थापकतयाऽसाधारण्यमिति तात्पर्यम् । इत्युक्तमिति । आचार्येणेत्यर्थः । सुवर्णेति । सुवर्णं तैजसमसति प्रतिबन्धकेऽत्यन्ताग्निसंयोगेऽप्यनुच्छिद्यमानद्रवत्वाधिकरणत्वादिति व्यतिरेक्यनुमितावित्यर्थः । तथा-नासाधारण्यमित्यर्थः ॥

(चि०)अथाष्टद्रव्याधारत्वबाधानन्तरमिच्छादौ गुणत्वादेवाष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वं सिद्ध्यति पक्षधर्मताबलात् प्रसिद्धविशेषबाधे सामान्यज्ञानस्य तदितरविशेषविषयत्वनियमात्, अत एवाऽसर्वविषयानित्यज्ञानबाधानन्तरं क्षित्यादौ कार्यत्वेन ज्ञानजन्यत्वं सिद्ध्यन्नित्यसर्वविषयत्वं ज्ञानस्यादायैव सिद्ध्यतीति चेन्न । बाधानन्तरमष्टद्रव्यातिरिक्तद्रव्यविषयाप्यनुमितिर्द्रव्याश्रितत्वप्रकारिका स्यात्-अनुमितेर्व्यापकतावच्छेदकमात्रप्रकारकत्वनियमात्, न त्वष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वप्रकारिका-तस्य पूर्वमप्रतीतत्वेन प्रकारत्वासम्भवादिति तत्प्रकारिकाऽनुमितिर्व्यतिरेकिणैव । अनाद्यनन्तद्व्यणुकादियावत्पक्षीकरणेऽनायत्तनन्तावदुपादानगोचरापरोक्षज्ञानत्वमेव नित्यसर्ववि-

पयकत्वमेतदन्यनित्यसर्वविषयत्वं व्यतिरेकिण एव सिध्यति, पक्षधर्मताबलेनापि व्यापकतावच्छेदकप्रकारेण साध्यासिद्धिर्भवति न तु साध्यगतविशेषप्रकारिका अतिप्रसङ्गात् ।

नन्वष्टद्रव्यानाश्रितेच्छा द्रव्याश्रितेति यदि साध्यते, तदाऽष्टद्रव्यातिरिक्तद्रव्याश्रितत्वमन्तरेण प्रतिज्ञार्थ एव नोपपद्यते ।

सत्यम्, एवमप्यष्टद्रव्यानाश्रितेच्छायां द्रव्याश्रितत्वं सिद्ध्यतु तस्याष्टद्रव्यातिरेक्यं कुतः सिद्ध्येत् ॥

(वि०)शङ्कते अथेति । गुणत्वादेवेति । तथा चेच्छादौ पृथिव्याद्यष्टद्रव्यवृत्तित्वबाधसहकारेण इच्छा द्रव्याश्रिता गुणत्वादित्यन्वयिनैवाष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वसिद्धौ किं व्यतिरेकिणेति शङ्कार्थः । तत्र दृष्टान्तमाह अत एवेति । क्षितिः कर्तृजन्या कार्यत्वादित्यनुमितौ जीवानां तदुपादानगोचरापरोक्षज्ञानाद्यसम्भवात्तद्बाधे नित्यसर्वविषयज्ञानवदीश्वरस्यैव तत्कर्तृत्वसिद्धिरन्वयिनैव यथेत्यभिप्रायः । उत्तरयति नेति । बाधानन्तरमिति । बाधावतारात्पूर्वं सामान्यतोदृष्टपर्यवसाने व्यतिरेकिणं विना गत्यन्तरं नास्तीति हृदयम् । द्रव्याश्रितत्वप्रकारकत्वे हेतुमाह अनुमितेरिति । येन रूपेण व्यापकत्वज्ञानं तेनैवानुमितौ भाननियमादित्यर्थः । पूर्वमप्रतीतत्वेनेति । व्यापकतावच्छेदकतयेति शेषः । ननु तर्हि ईश्वरानुमाने नित्यत्वं सर्वविषयकत्वं च ज्ञाने कथं सिद्ध्येदत आह अनाद्यनन्तेति । एतदन्येति । ईश्वरज्ञानस्य आकाशादिनित्यसर्वविषयत्वमन्वयदृष्टान्ताभावात् व्यतिरेकिविषयोऽन्यथेश्वरस्य सर्वज्ञत्वहानिरित्यभिप्रायः । अतिप्रसङ्गादिति । तथा चेच्छायामष्टद्रव्यातिरिक्तात्मवृत्तित्वं न सिद्ध्येत् द्रव्याश्रितत्वमात्रं गुणत्वेन सिद्ध्यत्तदर्थं व्यतिरेकिस्वीकार इति भावः ।

इदमेवाशङ्क्योत्तरयति । नन्विति ।

(चि०)अथ सामान्याव्यभिचारमादाय मानान्तरोपनीतं तत्तदन्यत्वमुपजीव्याष्टद्रव्यान्यद्रव्यवृत्तित्वेच्छादेः परिच्छिद्यते, ज्ञानान्तरोपस्थापितविशेषणविशिष्टज्ञानस्य सुरभिचन्दनमित्यादौ दर्शनादिति चेत् । न । मानान्तरान्नियमेनानुपस्थितेः ।

ये चेच्छाश्रये पृथिव्यादिभिन्नत्वं न जानन्ति इच्छायाश्च पृथिव्याद्यनाश्रितत्वं न जानन्ति तेषामप्यनुमानादित्यप्याहुः ।

अथ व्यतिरेकी नानुमानं सर्वत्र प्रमेयत्वादिना सत्प्रतिपक्षग्रस्तत्वादिति चेन्न । विपक्षबाधकेन व्यतिरेकिणो बलवत्त्वात् ॥

(वि०)पुनरन्वयेनैवेच्छानुमानवादी शङ्कते अथेति । सामान्याव्यभिचारो गुणत्वनिष्ठद्रव्याश्रितत्वसामान्यव्याप्तिज्ञानम् । मानान्तरोपनीतन्तत्तदन्यत्वम्-इच्छा न पृथिवीवृत्तिरित्यादिबाधकानुमानान्तरम् । उपजीव्य-विशेषणत्वेन विभाव्य । तथा चेच्छा द्रव्याश्रिता गुणत्वात् इत्यादिप्राथमिकसामान्यतोदृष्टानुमानेनैवाष्टद्रव्यातिरिक्तात्मवृत्तित्वमिच्छायामन्वयिनैव स्यादिति शङ्कार्थः । ज्ञानान्तरोपनीतविशेषणविशिष्टज्ञाने दृष्टान्तमाह सुरभि चन्दनमिति । समाधत्ते मानान्तरादिति । उक्तबाधकानुमाने उक्तसामान्यतोदृष्टानुमानपूर्वकत्वस्यानियतत्वादुपनीतभानस्यासम्भवान्नेदं युक्तमिति समाधानार्थः । मानान्तरादित्यापाततश्च बोध्यम् । वस्तुतो बाधकानुमानैस्तदुपस्थापननियमेनापि नानुमितौ स विशेषणं व्याप्तिपक्षताभ्यामेवोपस्थितेस्तदङ्गत्वात् न तु प्रकारान्तरोपस्थितस्याप्यनुमितौ भानमिति बाधे वक्ष्यमाणत्वात् ।

अत्रैव समाधानान्तरं केषाञ्चिदाह ये चेत्यादिना । इत्यपीत्यस्वरसोद्भावनम् । तद्बीजं तु यदीच्छाश्रयस्याष्टद्रव्यभिन्नद्रव्यत्वाज्ञानं तदा साध्याप्रसिध्यैव व्यतिरेक्यनवकाश इति तत्समर्थनपरतत्तु-च्छेदकत्वेन पर्याप्तिरिति प्रकटीकृतमिति ध्येयम् ।

(ख्रि०)अन्ये तु व्यतिरेकिण्यभाव एव साध्यः स चाप्रसिद्ध एव सिद्ध्यति, यस्याभावस्य व्यापको हेत्वभावो गृहीतस्तस्याभावः पक्षे व्यापकाभावाभावरूपेण हेतुना सिद्ध्यति, व्यापकाभाववत्तया ज्ञाते व्याप्याभावज्ञानावश्यम्भावात्। तथा हि-पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वादित्यत्र इतरस्य जलादेर्व्यापकः पृथिवीत्वाभावो गृहीत इति पृथिवीत्वाभावाभावरूपेण पृथिवीत्वेन पृथिव्यामितराऽन्योन्याभावोऽप्रसिद्ध एव सिद्ध्यति प्रतियोगिज्ञानस्य सुलभत्वात् प्रत्यक्षेण भूतले घटाभाववत्। एवमन्यत्राप्यव्याप्यवृत्तीच्छायाः स्वाश्रयत्वे सिद्धे स्वाश्रये योऽत्यन्ताभावस्तदवच्छेदकं घटादि सर्वं-तदवच्छेदेनेच्छानुपलम्भात्, जीवच्छरीरन्तु न तथा-तदवच्छेदेन तदाश्रये इच्छोपलम्भात्, तथाचेच्छात्यन्ताभावाश्रयतावच्छेदकत्वरूपस्य नैरात्म्यस्य घटादौ प्राणादिमत्त्वाभावो व्यापको गृहीत इति जीवच्छरीरे प्राणादिमत्त्वेन इच्छात्यन्ताभावाश्रयत्वावच्छेदकत्वस्याभावः सात्मकत्वं साध्यते। एवं प्रामाण्यसाधकव्यतिरेकिण्यपि व्यधिकरणप्रकारावच्छिन्नत्वस्य व्यापकः समर्थप्रवृत्तिजनकत्वाभावोऽप्रमायां गृहीतोऽतो विवादाध्यासितानुभवे समर्थप्रवृत्तिजनकत्वेन व्यधिकरणप्रकारावच्छिन्नत्वस्याभावः सिद्ध्यति, व्यधिकरणप्रकारानवच्छिन्नत्वमेव-प्रमात्वम्। ननु साध्याप्रसिद्धौ कथं साध्यविशिष्टज्ञानं विशेषणज्ञानजन्यत्वाद्विशिष्टज्ञानस्येति चेत्। न। पक्षे साध्यानुमि-

(चि०)तिसामग्रीसत्त्वात्पक्षविशेषणकः साध्यविशेष्यक एव प्रत्ययो जायते भूतले घटो नास्तीत्यभावविशेष्यकप्रत्ययवत् ।

तथापि साध्याभावव्यापकाभावाभावरूपहेतुमत्तया पक्षज्ञानं व्यतिरेकिणि गमकतौपयिकम्, न च साध्यप्रसिद्धिं विनैतादृशप्रतिसन्धानं सम्भवति । न च वस्तुगत्या यः साध्याभावस्तद्व्यापकाभावप्रतियोगिमत्तया ज्ञानं मृग्यत इति वाच्यम्, व्यतिरेक्याभासानुपपत्तेरिति चेत् । न । योऽभावो यस्य भावस्य व्यापकत्वेन गृहीतः तदभावाभावेन तस्य व्याप्यस्याभावः पक्षे साध्यत इत्यनुगतानतिप्रसक्तस्य गमकतौपयिकत्वात् । अयञ्च व्यतिरेकिप्रकारः स्वार्थ एव-परं प्रति साध्याप्रसिद्ध्या प्रतिज्ञाद्यसम्भवादिति सर्वं समञ्जसम् ॥

चिन्तामणेरर्थापत्तिप्रकरणम् ।

(वि०)साध्याभावत्वेनोपस्थितसाध्याभावप्रतियोगित्वापेक्षया वास्तवसाध्याभावव्यापकाभावप्रतियोगित्वस्य लघुत्वेन प्रयोजकत्वमङ्गीकुर्वतां मतान्तरमाहान्ये त्विति । ननु अभावस्याप्रसिद्धत्वे हेत्वभावे तदभावव्यापकत्वग्रहासम्भवात्कथमनुमितिरत आह यस्येति । गृहीत इति । तथाच तत्र हेत्वभावे प्रतियोगिव्यापकताज्ञानं हेतुरित्यर्थः । अत्र दृष्टान्तमाह तथाहीत्यादिना । एवमन्यत्रापीति । प्रकृतेच्छानुमाने इत्यर्थः । तदेवाहाव्याप्यवृत्तीत्यादिना । स्वाश्रयत्वे सिद्धे-गुणत्वे द्रव्याश्रितत्वे सिद्धे । स्वाश्रये-द्रव्यत्वाश्रये घटादौ । योऽत्यन्ताभावः-इच्छात्यन्ताभावः । तदाश्रये-द्रव्यत्वाश्रये जीवच्छरीरे । साध्यत इति । तथाच व्यतिरेकिसिद्धिरिति भावः । प्रामाण्यसाधकव्यतिरेकिणि-विवादास्पदं इदं ज्ञानं प्रमा समर्थप्रवृत्तिजनकत्वात् यन्नैवं तन्नैवं यथाऽप्रमा इति व्यतिरेकिणि । सिध्यतीति ।

ततः किमत आह व्यधिकरणप्रकारेति । पक्षविशेष्यक इति । अत्र च परामर्शोऽपि पक्षविशेषणक एवेति ध्येयम् । अतएव च विश्वनाथेन मुक्तावल्यामपि द्विविधपरामर्शस्वीकारः प्रदर्शितः, अनुमितिश्च पक्षविशेषणकापि स्वीकृतेत्यवधेयम् ॥

अत्रास्वरसमाह चिन्तामणिकारः स्वयमेव तथापीत्यादिना । तद्बीजन्तु—अस्तु लाघवादुक्तप्रकारेण प्रयोजकता, तथापि यत्र वस्तुतः साध्याभावं जलतादात्म्येनोपस्थितं यत्र चेतरभेदाभावत्वेनोपस्थितं प्रति साधनाभावो व्यापको गृहीत उभयथापि उक्तप्रकारस्यात्र व्यापकत्वेन सर्वत्राभाव एव साध्य इत्यवधारणविरोधो यावता वह्न्यादेरपि व्यतिरेकिगम्यत्वात् । इयांस्तु विशेषः—तत्र साध्यप्रसिद्धिरङ्गं नान्यत्र । न चोदाहृतव्यतिरेकिण्यभाव एव साध्य इत्यवधारणार्थः—सात्मकत्वादेर्भावरूपस्याप्युक्तक्रमेण सिध्यविरोधादिति । अस्मिन्नस्वरसे शङ्कते न च वस्तुगत्येति । व्यतिरेक्याभासानुपपत्तेरिति । आधेयत्वादेः अभावाप्रसिद्धेति शेषः । अप्रसिद्धसाध्यवादी आह योऽभाव इति । पुनरपि तत्र व्यतिरेकिण्यभाव एवेत्यवधारणेऽनास्थयोत्तरमाह अयं चेति । अयमपि क्वचित्, अतो भिन्नस्य प्रकारस्य भावाभावसाधारणस्य सार्वत्रिकस्य सत्त्वादवधारणमनुपपन्नमेवेति भावः। प्रतिज्ञादीति। आदिपदेन निगमनपरिग्रहो बोध्यः ॥

इति श्रीबटुकनाथतर्कतीर्थविरचिते तत्त्वचिन्तामणिविवचने
केवलव्यतिरेकिप्रकरणम् ॥

(वि०) व्यतिरेक्यनुमानसिद्धावर्थापत्तिर्न मानान्तरं–तेनैव तदर्थसिद्धेः ।

स्यादेतत्, ज्योतिःशास्त्रात्तत्कथितलिङ्गाद्वा देवदत्तस्य शतवर्षजीवित्वमवगतं चरमं शतवर्षजीवी गृह एवेति नियमे प्रत्यक्षेणावगते पश्चाद्योग्यानुपलब्ध्या निश्चितो गृहाभावो जीवननियमग्राहकप्रमाणयोर्बलाबलानिरूपणाद्बहिःसत्त्वकल्पनं विना नियमद्वयविषयकं संशयं जनयित्वा जीवति न वेति संशयमापाद्य जीवनसंशयापनुत्तये जीवनोपपादकं बहिःसत्त्वं कल्पयतीति–यथोक्तसामग्र्यनन्तरं बहिरस्तीति प्रतीतेः, तत्रान्वयव्यतिरेकाभ्यां संशयद्वारा गृहाभावः तदुत्पादितनियमद्वयविषयकसंशयो वा करणं जीवनसंशय एव वा, करणे सव्यापारकत्वानियमात् । प्रमाणयोर्विरोधज्ञानं तदाहितसंशयद्वारा करणमिति कश्चित् । तदा जीवित्वस्य लिङ्गविशेषणस्य सन्दिग्धत्वेनानुमानासम्भवादर्थापत्तिर्मानान्तरम् ।

ननु संशयस्य कल्पकत्वे स्थाणुपुरुषसंशयादपि तदेककोटिनिर्वाहककल्पनापत्तिः । न च प्रमितसंशयः कल्पनाङ्गम्, जीवनस्य तदानीं प्रमितत्वे संशयाभावप्रसङ्गात्, जीवित्वनिश्चयेऽनुमानादेव बहिःसत्त्वनिश्चयाच्च । कदाचित् प्रमितत्वे च प्राक्प्रमितपुरुषत्वस्यान्तरा तत्संशये कल्पना स्यात् । किञ्च जीवनसंशयस्य मृतेऽपि दृष्टत्वान्न व्यभिचारेण बहिःसत्त्वगमकत्वमिति चेत् । न । यथोक्तसामग्रीप्रभवसंशयस्य

कल्पनाङ्गत्वात्। अत एव मृतत्वनिश्चयमाणयोर्गृहाभावनिश्चयो न यथोक्तसंशयमापादयतीति न बहिःसत्त्वकल्पकः।गृहाभावश्च योग्यानुपलब्धिनिश्चितो न संशय इति। अथ जीवननियमग्राहकप्रमाणयोर्यदि च तुल्यबलत्वमवगतम्, क्व तर्हि बहिःसत्त्वकल्पना? विशेषदर्शनविरहात्, कल्पने वा प्रमितजीवननिर्वाहकबहिःसत्त्ववद्गृहनियमनिर्वाहकमरणस्याप्युचितत्वेन तत्कल्पनापि स्यात्-जीवनमरणयोः संशयाविशेषात्। अथ तयोरेकं बलीयोऽपरमबलम्, तदैकेनापरस्य बाध एवेति न संशयः। तस्माद्यत्र शतवर्षजीवित्वमवधारितं गृहाभावश्च निश्चितः तत्र बहिःसत्त्वकल्पनं, न तु जीवनसंशये। एवञ्च देवदत्तो बहिः सन् जीवित्वे सति गृहनिष्ठात्यन्ताभावप्रतियोगित्वादिति व्यतिरेकिणा बहिःसत्त्वज्ञानेनार्थापत्त्या लिङ्गविशेषणजीवित्वसंशये बहिःसत्त्वकल्पना च नास्त्येव। किञ्च गृहाभावनिश्चयः प्रमाणद्वयविषयसंशयं जनयित्वा जीवनसंशयमापाद्य बहिःसत्त्वं कल्पयतीति न युक्तम्, न हि यत एव यत्संशयः स एव तन्निश्चयाय प्रभवति-अतिप्रसङ्गात्।

(वि०) अथार्थापत्तिविवेचनम्।

व्यतिरेकव्याप्तिज्ञानस्यानुमितिहेतुत्वं प्रतिपाद्य तेनैव चारितार्थ्येऽर्थापत्तिर्मीमांसकाभिमता नाङ्गीकार्येत्यभिप्रायेण प्रसङ्गसङ्गत्यार्थापत्तिनिराकरणमारभते व्यतिरेक्यनुमानसिद्धावित्यादिना। व्यतिरेक्यनुमानसिद्धौ-व्यतिरेकव्याप्तिज्ञानस्यानुमितिजनकत्वसिद्धौ। अर्थापत्तिः-अर्थापत्तिशब्दवाच्यं ज्ञानम्। न मानान्तरम्-नानुमितिभिन्नम्। तत्र हेतुमाह तेनैवेति। तथा चानुमितिसामग्रीभिन्नसामग्र्य-

जन्यत्वे सति जन्यत्वादिति हेतुरित्यर्थः। तथा चात्र-अर्थापत्तिशब्दवाच्यं ज्ञानमनुमितिभिन्नं न वेति विप्रतिपत्तिः। तत्र विधिकोटिर्मीमांसकानां निषेधकोटिर्नैयायिकानां बोध्या॥

हेतौ स्वरूपासिद्धिमाशंकते मीमांसकमतेन स्यादेतदिति। ज्योतिःशास्त्रस्य व्याप्तिग्राहकमात्रतया न देवदत्तीयशतवर्षजीवित्वनिश्चायकत्वमत आह तत्कथितेति। गृह एवेति। गृहान्यावृत्तिरित्यर्थः। निश्चितो गृहाभावो-गृहाभावनिश्चय इत्यर्थः। जीवननियमग्राहकप्रमाणयोः-जीवित्वनिश्चयगृहान्यावृत्तित्वनिश्चययोः। बलाबलानिरूपणात्-प्रामाण्याप्रामाण्यान्यतरानिश्चयात्। बहिःसत्त्वकल्पनमिति। बहिःसत्त्वनिश्चयाभावेन चेत्यर्थः। नियमद्वयविषयकमिति। नियमद्वयविषयकनिश्चयद्वयविषयकं प्रामाण्यसंशयं जनयित्वेत्यर्थः। जीवनोपपादकं-शतवर्षमध्ये गृहे सतः शतवर्षजीवित्वस्य व्यापकम्। कल्पयतीत्यत्र मानमाह यथोक्तेति। गृहाभावः-गृहवृत्तित्वेवृत्ताभावनिश्चयः। ईदृशनिश्चयस्य प्रामाण्यसंशयेऽहेतुत्वेन द्वारत्वासंभवादाह तदुत्पादितेति। तत्प्रयोज्यनिश्चयद्वयविषयकप्रामाण्यसंशय इत्यर्थः। सोऽपि न जीवने हेतुः जीवनसंशयेनान्यथासिद्धत्वात्तस्य तद्व्यापारत्वे मानाभावादत आह जीवनसंशय एवेति। ननु जीवनसंशयस्य व्यापाराभावात्कथं करणत्वमित्याशंक्याह करण इति। तथाच फलायोगव्यवच्छिन्नत्वमेवात्र करणत्वं न तु व्यापारवदसाधारणत्वमित्यर्थः। प्रमाणयोः-शतवर्षजीवित्वगृहान्यावृत्तित्वनिश्चययोः। तदाहितसंशयद्वारा-तादृशविरोधज्ञानाहितप्रामाण्यसंशयद्वारा। विरोधज्ञानं विना प्रामाण्यसंशयासंभवेनोपजीव्यत्वादिति भावः। मध्यवर्तिप्रामाण्यसंशये व्यापारत्वमप्रामाणिकमिति कश्चिदित्यनेनास्वरससूचनम्। अर्थापत्तिवादमुपसंहरति तदेति। जीवित्वे सति गृहासत्त्वस्यैव नैयायिकैर्हेतूकरणीयत्वादिति भावः॥

तत्र नैयायिक आक्षिपति ननु संशयस्येति। कदाचित् प्रमितत्वे-यदा कदाचित् निश्चितविषयकसंदेहस्यैव कल्पनाङ्गत्वे। कल्पना स्यात्-जीवनतदुपपादककल्पना स्यात्। व्यभिचारेण-अन्वयव्यभिचारेण। मीमांसकः समाधत्ते न यथोक्तेति। किञ्चेत्युक्तदोषमुद्धरति अत एवेति। यथोक्तसामग्रीजन्यसंशयस्य कल्पनाङ्गत्वादेवेत्यर्थः। यथो·

केति । यथोक्तरूपेण जीवित्वसंशयं न जनयतीति न मृतत्वेन जनिष्यमाणत्वेन निश्चितयोः गृहासत्त्वनिश्चयः बहिःसत्त्वापादक इति भावः ॥ ननु योग्यानुपलब्धिजनितगृहाभावनिश्चये प्रामाण्यसंशयात् भविष्यति गृहाभावसंशय इत्यत आह गृहाभावश्चेति । तथात्र योग्यानुपलब्धिजन्यज्ञानस्य विशेषदर्शनतया प्रामाण्यसंशयाभाव इति भावः ॥ तुल्यबलत्वमिति । सन्दिग्धाप्रामाण्यकत्वमित्यर्थः । विशेषदर्शनेति । बहिःसत्त्वव्याप्यस्य शतवर्षेषु गृहासत्त्वे सति शतवर्षजीवित्वनिश्चयस्य विरहात् कथं बहिःसत्त्वनिश्चय इति भावः ॥ यदि च संशयहेतुकार्थापत्तिस्थले व्याप्यनिश्चयो न हेतुः किन्तु व्याप्यसंशय एवेति मन्यते तदाप्याह कल्पने वेति । तत्कल्पनापीति । भवदभिमतसंशयरूपसामग्रीसत्त्वात् मरणकल्पनापि स्यादिति भावः । एकं–गृहान्यावृत्तित्वज्ञानम् । बलीयः–निश्चितप्रामाण्यकम् । अपरं–शतवर्षजीवित्वज्ञानम् । अबलं–गृहीताप्रामाण्यकम् । तदेति । तदा न शतवर्षजीवित्वसंशय इत्यर्थः । नन्वेवमेवोच्यतामत आह एवञ्चेति । व्यतिरेकेत्युपलक्षणम् । विद्यमानत्वे विशेषणेऽन्वय्यपि द्रष्टव्यः । तथा चोक्तव्यतिरेकिणैव बहिःसत्त्वज्ञानं न तु लिङ्गविशेषणजीवनसंशयेऽर्थापत्त्या बहिःसत्त्वकल्पनमिति नैयायिकाशयः । दूषणान्तरमाह किञ्चेति । अतिप्रसङ्गादिति । सर्वत्रैव तत्संशयोत्तरं तन्निश्चयापत्तेरिति भावः ॥

(चि०)मैवम् । यथोक्तसामग्रीजनितसंशयवानेवं तर्कयति योग्यानुपलब्धिगृहीतो गृहाभाव इति तन्निश्चयः सुदृढ इति जीवननियमग्राहकयोरेकं बाध्यं विरुद्धयोरप्रमाणत्वात् । तदिह मरणं कल्पयित्वा जीवनग्राहकं बाध्यतां नो वा, बहिःसत्त्वं कल्पयित्वा गृहनियमग्राहकम्, तत्र बहिःसत्त्वकल्पने गृहनियमग्राहकमात्रबाधा मरणकल्पने तु शतवर्षजीवी गृह एवेति नियमद्वयस्यापि बाधा स्यात्, तदाह–जीवनबाधे तन्नियमबाधस्यावश्यकत्वात्–इति । किञ्च अद्य जीवति श्वो

जीविष्यतीत्यादिबहुतरक्षणलवमुहूर्त्तादिसमयोपाधिनियतं जीवनमुपलब्धमिति तद्बाधे बहुतरव्याप्तिबाधः, देवदत्ततदवयवगृहसत्त्वव्याप्तिश्चाल्पा, तथाऽभावस्वरूपमरणापेक्षया बहिःसत्त्वस्य भावस्य लघुत्वम्। यदि च गृहाऽन्योन्याभावाश्रयबहिःपदार्थवृत्तिसंयोगाश्रयत्वं बहिःसत्त्वमिति तदपेक्षया मरणमेव लघु, तथापि मरणापेक्षया जीवनमात्रं लघ्विति तदेव कल्पयितुमर्हम् । ततोऽर्थापत्तिकल्पितं जीवित्वमुपजीव्यानुमानादपि बहिःसत्त्वज्ञानं भविष्यतीत्यतो व्यावर्त्तकसहकृतो यथोक्तसामग्रीप्रभवः संशयो बहिःसत्त्वं कल्पयति। न च वाच्यं–तर्काणां विपर्ययापर्यवसायित्वे आभासत्वम्, तत्पर्यवसाने च तदेवानुमानमेतत्तर्कसहायं बहिःसत्त्वमनुमापयिष्यति इति, यतो लाघवगौरवतर्काणां विपर्ययापर्यवसायिनामेव प्रमाणसहकारित्वमत एव प्रत्यक्षशब्दादावपि सहकारी सः । न च तस्यां दशायामेव प्रमाणान्तरमस्ति ततोऽर्थापत्तिसहकारित्वं तर्कस्य ।

ननु स्वकारणाधीनस्वभावविशेषात्तर्कानुगृहीतयथोक्तसंशयस्य यदि बहिःसत्त्वप्रमापकत्वं तदा मृते गृहस्थिते वा तादृशसंशयाद्यत्र बहिःसत्त्वकल्पना सापि प्रमा स्यादिति चेत् । न । यथाहि प्रमापकस्येन्द्रियस्य दोषेण प्रमाशक्तितिरोधानादैन्द्रियकभ्रमः तथा यथोक्तसंशयस्यापि दोषेण प्रमाशक्तितिरोधानादग्रहरूपभ्रमसम्भवात् । परोक्षज्ञानानां जनकज्ञानाविभ्रमत्वे यथार्थत्व-

नियम इति चेत्। सत्यम्, प्रकृतेऽपि जीवनगृहाभावनियमग्राहकप्रमाणयोरन्यतराभासत्वेनाभासत्वसम्भवात्। यद्वा दोषाभावसहकृतस्य यथोक्तसंशयस्य बहिःसत्त्वप्रमापकत्वमिति ॥

(वि०)उक्तनैयायिकाक्षेपे समाधत्ते मीमांसको मैवमित्यादिना। एवं तर्कयति–एवं लाघवगौरवतर्कमवतारयतीत्यर्थः। विरुद्धयोः–शतवर्षजीवित्वगृहान्यावृत्तित्वयोः। एतेन किमत आह तदिहेति। बाध्यतामिति। तथाच मरणसत्त्वेन जीवनज्ञानमप्रमा स्यात् बहिःसत्त्वसत्त्वेन गृहान्यावृत्तित्वनिश्चयो वाऽप्रमा स्यादित्यर्थः। बाधा–अप्रमात्वम्। नियमद्वयस्यापीति। जीवित्वगृहान्यावृत्तित्वद्वयनिश्चयद्वयेत्यर्थः। अत्रोक्तार्थे वृद्धसंमतिं प्रदर्शयति तदाहेति। देवदत्तेति। देवदत्तदवयवादि यावत् तावत्यवयवः प्रभृतिनियमसंभवेन जीवनग्राहकस्य बहुत्वं गृहनियमग्राहकस्याल्पत्वं द्रष्टव्यम्। अभावस्वरूपेति। तत्पुरुषीयशरीरसंयोगाधिकरणक्षणावृत्तितत्पुरुषीयशरीरप्राणसंयोगध्वंसरूपेत्यर्थः। गृहान्योन्याभावाश्रयेति। गृहतरभावान्योन्याभावकूटघटितत्वेन च बहिःसत्त्वं गुर्विति भावः। तथापीति। मरणापेक्षया जीवनं लघु इति तत्कल्पयित्वाऽर्थापत्तिकल्पितजीवित्वलिङ्गकानुमित्या बहिःसत्त्वं साध्यमित्यावश्यकतया गुर्वपि तदेवार्थापत्त्या कल्प्यते न मरणमिति तर्कशरीरमेवेदं द्रष्टव्यम्। तेन एतावत्तर्कसहकाराद्बहिःसत्त्वं कल्पयतीति नोपसंहारविरोधोऽन्यथाऽस्य ग्रन्थस्यार्थापत्त्या जीवित्वं कल्प्यते इत्यर्थे उपसंसंहारविरोधादित्यवधेयम्॥ बहिःसत्त्वं कल्पयतीति। मरणे च लाघवज्ञानाभावान्न तन्निश्चयं जनयतीति भावः। एतेन किञ्चेत्याद्युक्तं प्रत्युक्तं तत्संशायकमात्रस्य तन्निश्चायकत्वे एवातिप्रसङ्गात् सहकारिविशेषेण तस्य तथात्वे चातिप्रसङ्गाभावादिति भावः। शङ्कते न चेत्यारभ्य इतीत्यन्तेन। विपर्ययः–गुर्वर्थविपरीतो लाघवार्थः। तदपर्यवसायित्वे–तदनुमितिजनकसामग्र्यसहकृतत्वे। आभासत्वं–लघ्वर्थनिश्चयाजनकत्वम्। ईश्वरानुमानादौ तद्दर्शनादिति भावः। ततः किमत आह तत्पर्यवसाने चेति। समाधत्ते यत इत्यनेन। ननु लाघवज्ञानस्य प्रमाणान्तरसहकारित्वे तेनैव बहिःसत्त्वज्ञानं भवि-

ष्यति किमर्थापत्त्येत्यत आह न चेति । तस्यां दशायां-लाघवज्ञान-
दशायाम् ॥

नैयायिकः शंकते नन्विति ।

उत्तरयति न यथाहीति । ऐन्द्रियकभ्रम इति । नेत्रे कामलादि-
रोगग्रस्ते पीतः शंख इति भ्रमदर्शनादित्यर्थः । अग्रहरूपेति । धर्म-
धर्मिणोर्भेदाग्रहरूपेत्यर्थः । सत्यमिति । जीवनगृहाभावनियमग्राह-
कप्रमाणयोः-शतवर्षजीवित्वनिश्चययोग्यानुपलब्धिजनितगृहाभावनि-
श्चययोः । मृतस्थले जीवननिश्चयस्याभावसत्त्वादिति भावः । प्रमा-
पकत्वमितीति । यथा दोषेण प्रमाशक्तिनाशस्तथा दोषाभावस्य
प्रमाजनकत्वमिति यद्वेत्यादिसमाधानतात्पर्यम् ॥

इति संशयकारणकार्थापत्तिपूर्वपक्षविवेचनम् ॥

(चि०) उच्यते । अनयोरेकं बाध्यं विरुद्धार्थग्राहक-
त्वादिति सामान्यतो दृष्टादेव तर्कसहकृताद्गृहनि-
यमग्राहकबाधे लिङ्गविशेषेण जीवित्वनिश्चयेऽनुमा-
नाद्बहिःसत्त्वसिद्धिः । तथाहि-जीवनप्रमाणबाधे गृह-
नियमप्रमाणोत्थापितलिङ्गेन मरणानुमानात् प्रमा-
णत्वाभिमतयोर्द्वयोरपि बाधा स्यात् । गृहनि-
यमग्राहकबाधे च निष्परिपन्थिजीवनप्रमाणाल्लिङ्ग-
विशेषणजीवित्वनिश्चये बहिःसत्त्वानुमानादेकप्रमा-
णबाधैवेत्यादितर्कसहकृतात् सामान्यतोदृष्टादेवान-
योरेकं बाध्यमिति जायमानानुमितिः परम्पराम-
रणज्ञापकं विषयीकरोति, न तु बहिःसत्त्वपरम्प-
रासाधकं जीवनप्रमाणम् । तथा च सामान्यतोदृष्टा-
देव गृहानियमग्राहकबाधे जीवनप्रमाणाल्लिङ्गविशेष-
णजीवित्वनिश्चयेऽनुमानादेव बहिःसत्त्वज्ञानमिति
किमर्थापत्त्या ।

(वि०) अथ संशयकारणकार्थापत्तिसिद्धान्तविवेचनम् ॥

एकं बाध्यमिति । देवदत्ते शतवर्षजीवित्वगृहान्यावृत्तित्वनिश्चयद्वयान्यतरत्वं उक्तभ्रमद्वयान्यतरवृत्तिशतवर्षजीवित्वगृहान्यावृत्तित्वोभयविरोधनिरूपकाधिकरणविशेष्यकशतवर्षजीवित्वप्रकारकज्ञानवृत्तित्वे सति तद्विशेष्यकगृहान्यावृत्तित्वप्रकारकज्ञानवृत्तित्वादित्यर्थः । गृहनियमग्राहकबाधे—गृहान्यावृत्तित्वनिश्चयस्याप्रमात्वनिश्चये । अनुमानप्रकारमेवाह तथाहीत्यादिना । गृहनियमप्रमाणोत्थापितेन लिङ्गेन—गृहान्यवृत्तित्वविशिष्टगृहासत्त्वेन हेतुना । बाधा स्यादिति । मरणस्योक्तरीत्याऽनुमानसिद्धत्वात् देवदत्ते शतवर्षजीवित्वगृहसत्त्वनिश्चययोरप्रमात्वं स्यादित्यर्थः । निष्परिपन्थीति । प्रतिबन्धकाभावविशिष्टेत्यर्थः । जीवनप्रमाणात्–ज्योतिःशास्त्रगृहीतजीवित्वव्याप्तिनिश्चयात् । बहिःसत्त्वानुमानात्–बहिःसत्त्वानुमानप्रमाणसिद्धत्वात् । एकप्रमाणबाधेवेति । गृहान्यावृत्तित्वनिश्चयस्याप्रमात्वमित्यर्थः । मरणज्ञापकमिति । गृहान्यावृत्तित्वनिश्चयमित्यर्थः । एतावता किमायातं प्रकृते इत्यत आह तथाचेति । बाधे—अप्रमात्वे ।

(चि०) ननु बहिःसत्त्वज्ञानं विना जीवी गृह एवेत्यस्य ब्रह्मणापि बाधितुमशक्यत्वात् प्रथमं बहिःसत्त्वज्ञानं न तु गृहनियमग्राहकबाधानन्तरं तत्, येन निष्परिपन्थिजीवनग्राहकाज्जीवित्वनिश्चयेऽनुमानं स्यात्, न प्राथमिकबहिःसत्त्वज्ञानमर्थापत्तिं विना । न च गृहनियमग्राहिणि तुल्यबले जागरूके कथमर्थापत्त्यापि बहिःसत्त्वज्ञानमिति वाच्यम् । तर्कसहकारेणार्थापत्तेर्बलवत्त्वाद्बहिःसत्त्वज्ञानमुत्पाद्य गृहनियमग्राहकमानबाधादिति चेत् ।

न । तर्कसहकारेण सामान्यतोदृष्टस्य बलवत्त्वेन गृहनियमग्राहकबाधसम्भवात्, तस्माद्यथोक्तसंशयदशायां जीवनबाधे तन्नियमबाधस्याव-

श्यकत्वादिति तर्कानन्तरमेव बहिःसत्त्वज्ञानमित्यविवादम्। तत्र कल्पनीयप्रमाणबाधे यथोक्तसंशये तर्कस्य न सहकारित्वं गौरवात्, किन्तु नियमग्राहकबाधद्वारा बहिःसत्त्वपरम्परासाधके सामान्यतोदृष्टे लाघवात्। न च सामान्यतो दृष्टावतार एवात्र नास्तीति वाच्यम्। अनिर्द्धारितैकबाधप्राप्तौ ह्येकबाधानुकूलकल्पनायां विनिगमकस्तर्को भवति, न चैकबाधप्राप्तिः सामान्यतोदृष्टं विना। किञ्च विरोधज्ञानानन्तरमेकमप्रमाणमिति यदि धीर्नास्ति, तदा प्रामाण्यसंशयो न स्यात्, न स्याच्च जीवनसंशयः द्वयोरपि जीवनमरणनिश्चायकत्वात्।

(वि०) अत्र मीमांसकः शङ्कते नन्विति। ननु-देवदत्ते बहिःसत्त्वज्ञानम्। अत्र नैयायिकाक्षेपं प्रदर्श्य निरसितुमाह न चेत्यादिना। जीवित्वसंशयकालिकप्रामाण्यसंशयाहितगृहान्यावृत्तित्वसंशयात्मककोटिद्वयोपस्थितिसत्त्वात्कथमर्थापत्त्यापि बहिःसत्त्वज्ञानमिति आक्षेपाशयः। अर्थापत्तेर्बलवत्त्वादिति। अर्थापत्तिजनकजीवित्वसंशयस्य गृहान्यावृत्तित्वसंशयप्रतिरोधकत्वात् गृहानियमग्राहकमानबाधसंभवादिति भावः।

नैयायिकः समाधत्ते नेति। जीवनबाधे-जीवित्वनिश्चयाप्रामाण्ये। तन्नियमेति। शतवर्षजीविनि देवदत्ते गृहमात्रवृत्तित्वनिश्चयाप्रमात्वस्यावश्यकत्वादित्यर्थः। किन्त्विति। नियमग्राहकबाधद्वारा-गृहान्यावृत्तित्वनिश्चयप्रामाण्यद्वारा। सामान्यतोदृष्ट इति। पूर्वोक्त इत्यर्थः। अनिर्द्धारितैकेति। सामान्यतोऽन्यतरनिश्चयस्याप्रामाण्यनिर्णयेत्यर्थः। कल्पनायामिति। गृहान्यावृत्तित्वनिश्चयस्याप्रामाण्योत्पादकबहिःसत्त्वकल्पनायामित्यर्थः। एकबाधप्राप्तिः—सामान्यतोऽन्यतरनिश्चयस्याप्रामाण्यनिश्चयः। नन्विदमप्रमाणमिति संशयः सामान्यतोऽन्यतरनिश्चयं विनैवोक्ततर्कसहकारात् बहिःसत्त्वज्ञानमुत्पादयिष्यतीति किं सामान्यतोदृष्टेनात्रेत्याशंक्याह कि-

श्चेति। ननु माभूत् प्रामाण्यसंशयो जीवनसंशयादेव बहिःसत्त्वकल्पना स्यादत आह न स्याच्चेति। द्वयोः–जीवनग्राहकप्रमाणगृहान्यावृत्तित्वग्राहकप्रमाणयोः। जीवनमरणनिश्चायकत्वात्–जीवित्वगृहान्यावृत्तित्वनिश्चयोपस्थितत्वात्। तथा चागृहीताप्रामाण्यकजीवित्वनिश्चयस्य वर्त्तमानत्वात् कथं तत्संशय इति भावः।

(चि०) अथैकमनयोरप्रमाणमिति ज्ञानं जनयित्वा सामान्यतोदृष्टस्य पर्य्यवसितत्वात्तज्जनितनियमद्वयसंशयाहितजीवनसंशयानन्तरं तर्कावतारे बहिरस्तीति ज्ञानं जायमानं संशयस्य कारणत्वं व्यवस्थापयतीति चेत्।

न। यदेव हि विरुद्धार्थग्राहकत्वं तर्कविनाकृतमनिर्द्धारितैकाप्रामाण्यानुमितिमजीजनत्तदेव तर्कसहकृतं पुनरनुसन्धीयमानं गृहनियमग्राहकप्रमाणमित्यनुमितिं बहिःसत्त्वज्ञानानुकूलां जनयति सहकारिवैचित्र्येणैकस्यापि विचित्रफलजनकत्वात्। न च जीवनसंशयानन्तरं तदनुसन्धानमसिद्धम्, गृहनियमग्राहकस्य जीवनग्राहकविरुद्धार्थग्राहकत्वानुसन्धानं विना बहिःसत्त्वकल्पनेऽप्यबाधप्रसङ्गात्।

(वि०) आक्षिपति अथेति। पर्यवसितत्वात्–विनाशात्। व्यवस्थापयतीति। तथाचाप्रामाण्यसंशयात्पूर्वं सामान्यतोदृष्टाभावेऽपि बहिःसत्त्वज्ञाने संशयकारणकत्वं निर्विवादमेवेत्याक्षेपार्थः।

समाधत्ते नेति। अनिर्धारितेति। सामान्यतोऽन्यतरनिश्चयस्याप्रामाण्यानुमितिमित्यर्थः। पुनरिति। जीवनसंशयानन्तरमित्यादिः। एकस्य विलक्षणोभयजनकत्वे हेतुमाह सहकारीति। अबाधप्रसङ्गादिति। इदमत्राकूतम्। तर्कावतारकाले पूर्वोत्पन्नसंशयोऽपि दुर्लभः तावत्पर्यन्तमनवस्थानात्, तथाच पुनः संशयासंजननमपि। एवं च तस्य कल्प्यप्रमाणभावतया प्राप्तप्रमाणभावस्य सामान्यतोदृष्टस्यैवावतारो लाघवात्कल्प्यत इति।

(चि०) अथ यदि पर्य्यवसन्नमपि प्रमाणं पुनरनुसन्धीयमानं सहकारिविशेषात् फलान्तरजनकम्, तदेच्छा द्रव्याश्रिता कार्यत्वादिति सामान्यतोदृष्टद्रव्याश्रितत्वानुमितौ पश्चादष्टद्रव्यवृत्तित्वबाधे व्यतिरेकिणात्मसिद्धिरिति भज्येत अष्टद्रव्यवृत्तित्वबाधसहकृतात् सामान्यतोदृष्टादेव पुनरनुसन्धीयमानात् तत्सिद्धेरिति चेत् ।

न । अनुमितेर्व्यापकतावच्छेदकप्रकारकत्वनियमेन तत्प्रकारकबुद्धेर्व्यतिरेकिसाध्यत्वात्, व्यतिरेकिणोऽप्यन्यत्र सामर्थ्यावधारणेनोपायान्तरस्यादोषाच्च । अपि च देवदत्तो जीवनमरणान्यतरप्रतियोगी प्राणित्वान्मद्वदिति सामान्यतोदृष्टं लाघवसहकारेण जीवनप्रतियोगित्वं विषयीकरोति, तथा च लिङ्गविशेषणनिश्चयादनुमानादेव बहिःसत्त्वसिद्धिः ।

(वि०) आक्षिपति अथेति । अष्टद्रव्यवृत्तित्वबाधे-अष्टद्रव्यवृत्तित्वाभावनिश्चये । व्यतिरेकिणेति । इच्छा अष्टद्रव्यातिरिक्तद्रव्याश्रिताऽष्टद्रव्यानाश्रितत्वविशिष्टगुणत्वादित्युक्तव्यतिरेकिणेत्यर्थः ।

समाधत्ते नानुमितेरिति । तत्प्रकारकेति । अष्टद्रव्यातिरिक्तद्रव्यत्वप्रकारकेत्यर्थः । नन्वीश्वरानुमानादौ लाघवबाधसहकारेण व्यापकतानवच्छेदकमपि प्रकारीभूतं दृश्यते इत्यतो हेत्वन्तरमाह व्यतिरिकिणोपीति । अदोषाच्चेति । एतद्धेतुद्वयमुपलक्षणम् । सामान्यतो दृष्टस्य पुनरनवतारे व्यतिरेकिणं विना प्रकारान्तराभावादित्यपि द्रष्टव्यम् । न चैतदसिद्धम्-इच्छाया गुणत्वेन द्रव्याश्रितत्वानुमिते प्रसिद्धबाधेऽष्टद्रव्यानाश्रितत्वे आश्रितत्वस्यापि तदनाश्रितत्वे सति गुणत्वादितिवद्व्यतिरेकिलिङ्गत्वात् । न च गुणत्ववदाश्रितत्वमपि सामान्यतोदृष्टं पूर्वमुपस्थितं येन पुनरवतारे व्यतिरेकिणोऽन्यथासिद्धिः स्यात् । तद्धि सामान्यतोदृष्टस्य गुणत्वस्य साध्यं न साधनतयोपस्थितं प्रागित्यलम् ॥ ननु विरुद्धार्थग्राहकत्वप्रतिसन्धानं विना

बहिःसत्त्वनिश्चयस्यासत्त्वमसिद्धम् पुनरनुसन्धानाभावेऽपि यथोक्तसामग्रीजन्यसंशयामन्तरं लाघवाद्बहिःसत्त्वनिश्चयस्यानुभवसिद्धत्वादित्यस्वरसेनाहाऽपि चेति ।

(चि०) अथ लाघवसाचिव्यात् सामान्यतोदृष्टस्यापि विशेषविषयत्वात् नियमग्राहकप्रमाणोत्थापितलिङ्गकमरणानुमानेन जीवनग्राहकस्येवास्यापि सत्प्रतिपक्षत्वम् एकेनापि भूयसामपि प्रतिबन्धसम्भवात् । न च तर्कात्सामान्यतोदृष्टस्य बलवत्त्वम्, व्याप्तिपक्षधर्मते हि बलम्, तच्च तुल्यमेव ज्ञातं लाघवाख्यतर्कस्य विशेषमात्रपर्यवसायकत्वेन व्याप्तिग्राहकत्वस्य तुल्यत्वादिति चेत् ।

तर्हि पक्षतावलाद्विशेषसिद्धिः क्वापि न स्यात्, सर्वत्र सामान्यमुखप्रवृत्तप्रमाणस्य विशेषपर्यवसानेऽन्यसाधर्म्येण सत्प्रतिपक्षसम्भवात् । अप्रयोजकत्वान्न विपरीतसाधनमिति तुल्यं नियमग्राहकस्याप्रयोजकत्वात् । जीवनग्राहकस्य तु सामान्यतोदृष्टस्य ज्योतिःशास्त्रायथार्थत्वमेव विपक्षबाधकं व्याप्तिग्राहकमस्ति । तस्मात् सामान्यमुखप्रवृत्तस्य सहकारिविशेषाद्विशेषपरस्यानुमानस्य तद्विशेषविलक्षणग्राहकप्रमाणेन सत्प्रतिपक्षत्वम् । न च प्रमाणविरोधेनास्य तर्को न सहकारीति वाच्यम् । तर्कानवतारे विशेषपरत्वाभावेनाविरोधात्, तदवतारे तदधिकबलत्वादेव, अन्यथा तर्कानवतारे सत्प्रतिपक्षस्य तदवतारेऽपि तत्त्वं न निवर्त्तते । किञ्चैवमर्थापत्तावपि तद्विरोधेन न सहकारी स्यात् । यदुक्तं–मरणकल्पने शतवर्षावच्छिन्नजीवी गृह एवेत्यस्यापि बाध–इति, तत्र विशि-

ष्टबाधो न विशेष्यबाधात्–मरणेऽपि जीवी गृह एवे-त्यस्य विशेष्यस्याबाधात् । किन्तु विशेषणबाधात् । स च शतवर्षजीवित्वबाध एव । विशेषणाभावप्रसक्तो विशिष्टाभावोऽप्यस्तीति चेत् न । विशेष्यवति विशि-ष्टाभावस्य केवलविशेषणाभावात्मकत्वात् विशिष्ट-स्यातिरिक्तस्यानभ्युपगमात् ।

(वि०) पुनराक्षिपति अर्थेति । विशेषविषयत्वात्–जीवनविष-यत्वात् । अनुमानेनेति । देवदत्तो मरणधर्मी गृहान्यावृत्तित्वे सति गृहवृत्तित्वस्याप्रामाणिकत्वादित्यनुमानेनेत्यर्थः । जीवनग्राहकस्य–देवदत्तः शतवर्षजीवी ज्योतिःशास्त्रगृहीतव्याप्तिकत्वादित्यादेः । ननु जीवनग्राहकस्य केवलप्राणित्वादिरूपतया भूयस्त्वेन बलवत्त्वान्न सत्प्रतिपक्षितत्वमत आहकेनेति ।

विशेषपर्यवसाने-इति । लाघवादिसहकारेण विशेषप्रकारेणा-नुमित्युत्पाद इत्यर्थः । सत्प्रतिपक्षसंभवादिति । पर्वतो वह्निमानित्य-त्रापि पर्वतो न पर्वतीयवह्निमान् पर्वतीयवह्निमदन्यत्वात् इति सत्प्र-तिपक्षसंभवादित्यर्थः । अप्रयोजकत्वात्–अनुमितिप्रयोजकरूपशून्य-त्वात् । न विपरीतसाधनं–न पक्षधर्मताबललभ्यविशेषविरहव्याप्य-वत्तानिश्चयः । तुल्यमिति । गृहान्यावृत्तित्वस्य देवदत्ते सन्दिग्धत्वा-दिति भावः । अप्रयोजकत्वादिति । पूर्वोत्पन्नगृहान्यावृत्तित्वनिश्च-यस्य प्रामाण्यसन्देहादनुमित्यजनकत्वादित्यर्थः । ननु नैयायिकस्या-पि जीवित्वसहकृतगृहासत्त्वेन बहिःसत्त्वानुमितिरप्यनुपपन्ना जीवि-त्वविषयकानुमितेरपि गृहान्यावृत्तित्वनिश्चयवत् प्रामाण्यसंशयेन लिङ्गविशेषणजीवित्वसन्देहात् परामर्शासंभवादित्याशङ्कायामाह जीवनग्राहकस्येति । जीवनग्राहकस्य सामान्यतोदृष्टस्य विपक्षबाध-के ज्योतिःशास्त्रायथार्थत्वमेव व्याप्तिग्राहकमित्यन्वयः । व्याप्तिग्राहक-मस्तीति । जीवित्वलिङ्गकबहिःसत्त्वानुमाने परामर्शनिश्चायकमस्तीति भावः । ननु गृहान्यावृत्तित्वनिश्चयासत्त्वेऽपि मरणव्याप्यत्वेन धर्मान्त-रनिश्चय एव प्रतिबन्धकः स्यादित्यभिप्रायेणाक्षिपति न चेति । प्रमाणान्तरविरोधेन–मरणव्याप्यमेयत्वादिरूपधर्मान्तरनिश्चयेन । त-

था चैतादृशधर्मान्तरनिश्चयसत्त्वेऽर्थापत्तिरिति मीमांसकाशयः। अविरोधादिति। विशेषप्रकारकानुमितिजनकत्वाभावेन मरणव्याप्यवत्तानिश्चयस्याप्रतिबन्धकत्वादित्यर्थः। तदधिकबलवत्त्वादेव–तदपेक्षया सामान्यतोदृष्टस्याधिकबलवत्त्वात्। तद्विरोधिनेति। बहिःसत्त्वाभावव्याप्यत्वेन यत्किञ्चिद्धर्मस्य प्रतिबन्धकत्वेनेत्यर्थः। बाध इति। अप्रामाण्यमित्यर्थः। न विशेष्यबाधादिति। न गृहान्यावृत्तित्वाभाववति गृहान्यावृत्तित्वप्रकारकत्वादिति भावः। अबाधात्–गृहान्यावृत्तित्वांशे बाधाभावात्। किन्त्वति। शतवर्षजीवित्वाभाववति शतवर्षजीवित्वप्रकारकत्वादित्यर्थः। शतवर्षजीवित्वबाध एवेति। तथाच निश्चयद्वयस्याप्रमात्वद्वयकल्पनानवकाश इति भावः। विशेषणाभावायत्त इति। तथाच विशिष्टाभाववति विशिष्टप्रकारकत्वरूपाप्रमात्वद्वयकल्पनापत्तिरिति भावः। विशेष्यवतीति। एतच्च परमतेऽस्मन्मते विशिष्टाभावस्यातिरिक्तत्वात्। वस्तुतो लाघवं विनिगमकमेव न किन्तु ज्योतिःशास्त्रस्य प्रामाण्यमिति हृदयम्।

(चि०) अन्ये तु शतवर्षजीवी देवदत्तो जीवी गृह एव नास्तीति प्रमाणेषु द्वयोरविरोधेऽपि तृतीयमादाय विरोधज्ञानमस्ति, तत्र जीवी गृह एवेत्यप्रमाणघटितप्रमाणद्वयविरोधज्ञानजनिताप्रामाण्यसंशयाहितजीवनसंशयात् प्रमाणयोरविरोधोपपादकप्रमाणविरोधि बहिःसत्त्वं कल्प्यते। यथोक्तसंशयस्यायमेव स्वभावो यद्वस्तुगत्या अप्रमाणं तद्विरोधि कल्पयति, विरोधघटकस्य वस्तुगत्या अप्रमाणत्वमेव विनिगमकत्वमिति।

तत्तुच्छम्। अप्रमाणस्यापि प्रमाणत्वेन ज्ञानात्। तर्कादिभिर्विशेषदर्शनं विना यथोक्तसंशयानन्तरं बहिरस्तीति ज्ञानमसिद्धमतो न फलबलेन तथाऽर्थापत्तिकल्पनम्। किञ्च मृते गृहस्थिते बहिःस्थिते तादृशसं-

शयादेव बहिःसत्त्वं गृहसत्त्वं मरणञ्च कल्प्येत, कस्यचित् क्वचिद्वस्तुगत्या अप्रमाणत्वात् , अर्थापत्त्याभासश्चैवं न स्यात् ।

(वि०) मीमांसकमतान्तरमुत्थाप्य दूषयितुमाह्ाऽन्ये त्वित्यादिना । प्रमाणेषु-निश्चयत्रयेषु मध्ये । द्वयोः-शतवर्षजीवित्वशतवर्षमध्यगृहासत्त्वनिश्चययोः । तत्र-तस्मिन् (गृहे नास्तीति) तृतीयज्ञाने सति । अप्रामाण्यसंशयेति । देवदत्तवृत्तिशतवर्षजीवित्वगृहान्यावृत्तित्वनिश्चयद्वयनिष्ठाप्रामाण्यसंशयेत्यर्थः ।

एतन्मतं दूषयति तत्तुच्छमिति । फलबलेनेति । तर्कं विनापि बहिःसत्त्वज्ञानोत्पत्तिबलेनेत्यर्थः । किञ्चेत्याद्यर्थापत्त्याभासश्चैवं न स्यादित्येको ग्रन्थः । अप्रमाणत्वादित्यस्यानन्तरं इतिः पूरणीयः, तेन हेतुत्वं लभ्यते । यद्वा कल्प्येतेति पूर्वापादने यदीष्टापत्तिं कुर्यात्तदा दोषान्तरमाहाऽर्थेति ॥

इति संशयकारणकार्थापत्तिसिद्धान्तविवेचनम् ।

(चि०) स्यादेतत् माभूत् संशयः करणमर्थापत्तावनुपपत्तिस्तु स्यात्, तथाहि-जीवी देवदत्तो गृहे नास्तीति ज्ञाने सति बहिःसत्त्वं विना जीवतो गृहासत्त्वमनुपपन्नमिति ज्ञानानन्तरं बहिरस्तीति, धीरस्ति तत्रान्वयव्यतिरेकाभ्यामनुपपत्तिज्ञानं करणम् । न च देवदत्तो बहिरस्ति विद्यमानत्वे सति गृहासत्त्वात् घटवदित्यनुमानाद्विद्यमानत्वे सति यत्र यन्नास्ति तदन्यदेशे तदस्ति, यथा गृह एव कोणेऽसन्नहं मध्ये तिष्ठामीति व्याप्तिप्रभवानुमानाद्वा बहिःसत्त्वासिद्धेः किमर्थापत्त्येति वाच्यम् । हेतुसाध्ययोः सहचाराज्ञानदशायामनुपपत्तिज्ञानेऽपि बहिःसत्त्वज्ञानात् । सामान्यतो व्याप्तिश्चानुमाने उपसंहर्तुमशक्येति तदन्यदेशसिद्धिरर्थापत्त्यैव ।

अथानुपपत्तिकारणकार्थापत्तिपूर्वपक्षविवेचनम् ॥

(वि०) संशयहेतुकार्थापत्तिनिराकृत्यानुपपत्तिकरणकामर्थापत्तिमाशङ्कते स्यादेतदिति । प्रभवेति । पूर्वानुमाने सत्त्वे सति यद्गृहासत् तद्बहिःसदित्येव हेतुः, इह तु सामान्यतो व्याप्तिरिति भेदाद्विकल्प इति भावः । विशेषव्याप्तिमूलकमनुमानं दूषयति हेतुसाध्ययोरिति । सामान्यतोऽव्याप्तिमूलकानुमानं दूषयति सामान्यत इति । अशक्येति । सामान्यमुखी व्याप्तिर्नानुमितिकरणमित्यर्थः ॥

(चि०) ननु जीविनो गृहासत्त्वमनुपपन्नं किं देवदत्तबहिःसत्त्वं विना उत बहिःसत्त्वमात्रं विना ? नाद्यः-प्रथमं देवदत्तबहिःसत्त्वाप्रतीतौ तेन विनेदमनुपपन्नमिति ज्ञानाभावात् , प्रतीतौ वा किमर्थापत्त्या, अर्थापत्तित एव तत्प्रतीतावन्योन्याश्रयः, तदुक्तं-यतोन्यत्त्वं तत्सिद्धेरग्रे तदसिद्धेः-इति । नान्त्यः-अन्यदीयबहिःसत्त्वज्ञानं विनाऽनुपपत्त्यभावात्, बहिःसत्त्वमात्रसिद्धावपि देवदत्तबहिःसत्त्वासिद्धेरिति चेत् । न ।

सामान्येन हि विनाऽनुपपत्तिज्ञानं कारणं सामान्याकारेणाशेषज्ञानं फलम् , तथाहि-जीवतो बहिःसत्त्वं विना गृहासत्त्वमनुपपन्नमिति ज्ञानं यस्य गृहासत्त्वमनुपपन्नं तत्र बहिःसत्त्वं कल्पयति नान्यत्र, देवदत्तश्च तथेति सिद्धे देवदत्ते बहिःसत्त्वं कल्प्यत इति देवदत्तबहिःसत्त्वं पर्य्यवस्यति, न तु तेन रूपेण कल्पना न वा तेन विनाऽनुपपत्तिज्ञानं कारणम् , यथा वह्निमात्रव्याप्ताद्धूमात् पर्व्वते वह्निसिद्धिरेव पर्व्वतीयवह्निसिद्धिर्न तु पर्व्वतीयत्वेनैव धूमात्तत्सिद्धिः-तेन रूपेण व्यापकत्वाग्रहात् ।

(वि०) नैयायिकः शङ्कते नन्विति । ज्ञानाभावादिति । प्रतियोगिज्ञानं विना व्यतिरेकज्ञानासंभवात् इति भावः । अन्योन्याश्रय इति । अर्थापत्तितस्तत्प्रतीतौ तेन विना नानुपपत्तिज्ञानमनुपपत्तिज्ञानेऽर्थापत्तिरित्यन्योन्याश्रय इत्यर्थः । स्वोक्तदोषे श्रीहर्षसंमतिमाह तदुक्तमिति । यतोऽन्यत्वमिति । अनुपपत्तिः-अन्यथानुपपत्तिः देवदत्तबहिःसत्त्वादन्येन प्रकारेण जीविगृहासत्त्वानुपपत्तिरिति यावत् । तथाच यतो देवदत्तबहिःसत्त्वादन्यत्वं तद्बुद्धेरग्रे देवदत्तबहिःसत्त्वसिद्धेः पूर्वं तदसिद्धेरुक्तानुपपत्तिज्ञानासिद्धेः । बहिःसत्त्वमात्रपदेन यावद्बहिःसत्त्वं बहिःसत्त्वत्वावच्छिन्नत्वं वा ग्राह्यम् ! नाद्य इत्याह अन्यदीयेति । नान्त्य इत्याह बहिःसत्त्वमात्रेति ।

मीमांसकः समाधत्ते नेति । पर्यवस्यतीति । पक्षधर्मताबलादिति शेषः । तेन रूपेण-देवदत्तबहिःसत्त्वत्वरूपेण । कल्पनाज्ञानम् ॥

(चि०)अथोपपादकाभाववत्युपपाद्याभावनियमोऽनुपपत्तिर्न त्वभावमात्रमतिप्रसङ्गात् । एवञ्च व्यतिरेकव्याप्तिमत उपपाद्याद्व्यतिरेक्यनुमानमुद्रयैव साध्यसिद्धेः किमर्थापत्त्या ? तथाहि-देवदत्तो बहिः सन् जीवित्वे सति गृहासत्त्वात् यन्नैवं तन्नैवं, यथा मृतो गृहस्थितो वा । न चान्यव्याप्त्याऽन्यस्य गमकत्वेऽतिप्रसङ्गः-साध्याभावव्यापकाभावप्रतियोगित्वस्य नियामकत्वात् । न चार्थापत्तौ स्वरूपसती व्याप्तिर्लिङ्गं नानुमान इति वाच्यम् । अनुपपत्तेर्ज्ञानं विना कल्पनानुदयात्, अर्थापत्त्याभासानवकाशाच्च ।

मैवम्-अत्र हि व्यतिरेकव्याप्तिरन्वयस्य पक्षधर्मत्वामीति व्याप्तिधीजन्यमपि बहिःसत्त्वज्ञानं नानुमितिः तस्या व्याप्तपक्षधर्मताज्ञानजन्यतानियमात् । न च साध्याभावव्यापकाभावप्रतियोगित्वेन प-

क्षधर्मस्य ज्ञानमनुमितिप्रयोजकमिहाप्यस्तीति वाच्यम् । केवलान्वयिनि तदसम्भवात्, तदपेक्षया साध्यव्याप्यत्वज्ञानस्य लघुत्वाच्च ।

(वि०) नैयायिकः पुनराक्षिपति अथेति । उपपादकाभाववर्तीति । उपपादकाभावव्यापकीभूताभावप्रतियोगित्वमापाद्यस्येत्यर्थः । अभावमात्रम्-उपपाद्याभावमात्रम् । अतिप्रसङ्गादिति । केवलधूमाभावज्ञानादपि धूमस्यार्थापत्त्यापत्तिरिति भावः । अर्थापत्त्याभासेति । कथं व्यभिचारिणाऽर्थापत्तिरिति भावः ।

मीमांसकः समाधत्ते नैवमिति । व्याप्तेति । अन्वयव्याप्तिप्रकारकपक्षधर्मताज्ञानेत्यर्थः।केवलान्वयिनि तदसम्भवादिति । साध्याभावस्यैवाप्रसिद्धेरिति भावः । साध्यव्याप्यत्वेति । साध्यस्यान्वयव्याप्तिज्ञानस्येत्यर्थः ॥

(चि०) अथ व्यतिरेकसहचाराद्धेतोरेव व्याप्तिर्दृश्यते, एवञ्चान्वयस्य व्यतिरेकस्य उभयस्य वा सहचाराद्व्याप्तिग्रहत्रैविध्येऽनुमानत्रैविध्यम्, अत एव धूमो दशाविशेषेऽन्वयी व्यतिरेकी अन्वयव्यतिरेकी चेति ।

अस्तु तावदेवं तथापि जीविदेवदत्ताभावो गृहे वर्त्तमानो न बहिःसत्त्वे लिङ्गं देवदत्तावृत्तित्वात्, बहिःसत्त्वगृहनिष्ठाभावयोर्व्यधिकरणत्वेन नियतसामानाधिकरण्यरूपव्याप्त्यभावाच्च । उपरि सविता भूमेरालोकवत्त्वादित्यत्र भूमेरुपरिसन्निहितसवितृकत्वेनानुमानात् । नापि गृहनिष्ठाभावप्रतियोगित्वम्, तत्प्रतियोगित्वस्य देवदत्तधर्मतया तदसन्निकर्षे प्रत्यक्षेण ज्ञातुमशक्यत्वात् । अत एव विशेष्यासन्निकर्षान्नृतीयलिङ्गपरामर्शोऽपि न प्रत्यक्षेण । न च व्यतिरेकव्याप्तिगृहनिष्ठाभावयोर्ज्ञानं सहकार्यासाद्य मनसैव

स जन्यत इति वाच्यम् । सहकारिण एव मानान्तरत्वप्रसङ्गात् ।

अथ व्याप्तिज्ञानानन्तरं स्मर्यमाणधूमात् कथमनुमितिः ? उक्तन्यायेन तत्रापि लिङ्गपरामर्शाभावादिति चेत् । न कथञ्चित् । कथं तर्हि वह्निज्ञानम् ? पक्षधर्मधूमस्मृतिसहितात् धूमो वह्निं विना नास्तीत्यनुपपत्तिज्ञानादिति गृहाण । अत एव दृश्यमानो धूमो वह्निं विनाऽनुपपन्न इति यदा ज्ञायते तदाऽर्थापत्तिरेव, यदा त्वनुपपत्तिज्ञानं विना व्याप्यत्वेन प्रतिसन्धीयते तदाऽनुमानम्, त्वयापि त्रिविधानुमानस्वीकारात् । तस्माद्व्यतिरेकव्याप्तिमुपजीव्य जीविदेवदत्तगृहाभावो बहिःसत्त्वं कल्पयति ।

(वि०) पुनराह नैयायिकः अथेति । मीमांसक आहाऽस्तु तावदेवमिति । देवदत्तावृत्तित्वादिति । पक्षीभूतदेवदत्तस्य तदनधिकरणत्वादित्यर्थः । बहिःसत्त्वगृहनिष्ठाभावयोः–बहिःसत्त्वगृहवृत्तित्वविशिष्टाभावयोः । व्यधिकरणत्वेनेति । गृहाधिकरणदेशभेदस्यापि बहिःपदार्थघटकत्वादिति भावः । नियतेति । अत एव गृहवृत्तिदेवदत्ताभावोपि न लिङ्गं गृहमात्रवृत्तिपदार्थे तस्य सत्त्वेनाव्याप्यत्वादिति भावः । ननु भूमिनिष्ठालोकसंयोगस्योपरिदेशे संयोगसम्बन्धेन सवित्रनुमापकत्वं न संभवति पक्षावृत्तित्वादत आहोपरीति । तथाच तत्र भूमेः पक्षत्वम् सवितृसंयुक्तोपरिदेशकत्वस्य साध्यत्वम् उपर्यवच्छेदेनालोकसंयोगस्य हेतुत्वमिति नोक्तदोषः । नैयायिकस्य हेत्वन्तरमाशंक्य निराकरोति नापीति । ज्ञातुमशक्यत्वादिति । तथाच लिङ्गज्ञानाभावात् न व्याप्तिग्रह इति भावः । ननु गृहनिष्ठाभावप्रतियोगित्वं न हेतुः, किन्तु प्रतियोगितासम्बन्धेन गृहनिष्ठाभाव एव, स च देवदत्तस्यासंनिकृष्टत्वेऽपि गृहस्य संनिकृष्टतया गृहीतुं शक्य एवेत्यतो व्याप्तिग्रहाभावेऽपि देवदत्तस्यासंनिकृष्टतया न पक्षविशेष्यकपरामर्शसंभव इत्याहाऽत एवेति । मीमांसकमते च व्यतिरेकव्या-

त्तिस्मरणं जीविनो देवदत्तस्याभावनिश्चयश्चार्थापत्तिहेतुक इति बोध्यम् ॥ जन्यत इति । परामर्श इति शेषः ।

स्मर्यमाणधूमात्–पक्षवृत्तिधूमस्मरणात् । उक्तन्यायेति । विशेष्यस्यासंनिकृष्टत्वेनेत्यर्थः । धूमो वह्निं विनेति । वह्न्यभावव्यापकीभूताभावप्रतियोगी धूम इति व्यतिरेकव्याप्तिज्ञानादित्यर्थः । त्वयापीति । नैयायिकेनापीत्यर्थः । तत्र–वह्निमान्धूमादित्यत्र । त्रिविधेति । व्याप्तिभेदेनेत्यर्थः । यद्व्यतिरेक्यनुमितित्वेन नैयायिकानामभिमतं तदेव मीमांसकानामस्माकमर्थापत्तिरिति भावः । व्यतिरेकव्याप्तिमिति । व्यतिरेकव्याप्तिज्ञानं सहकार्यासाद्येत्यर्थः । कल्पयतीति । निश्चाययतीत्यर्थः, न तु व्यतिरेकपरामर्शः–विशेष्यीभूतदेवदत्तासंनिकर्षेण परामर्शासम्भवादिति भावः ॥

(चि०) उच्यते । देवदत्तासन्निकर्षेऽपि तस्य गृहनिष्ठाभावप्रतियोगित्वं प्रत्यक्षेण गृह्यते । तथाहि-गृहे देवदत्तस्याभाव इति प्रत्यक्षं देवदत्तं षष्ठ्यर्थञ्चाभावसम्बन्धं प्रतियोगित्वलक्षणं गोचरयति–सम्बन्धज्ञानस्य सम्बन्धिद्वयविषयत्वात् , प्रतियोगिना सममभावस्य सम्बन्धान्तराभावात् । गृहनिष्ठाभावप्रतियोगित्वे च प्रत्यक्षोपस्थिते स्मृतव्याप्तिवैशिष्ट्यमपि प्रत्यक्षेण सुग्रहम् । न च देवदत्तविशेष्यकं वहिःसत्वव्याप्यगृहनिष्ठाभावप्रतियोगित्वज्ञानं नास्तीति वाच्यम्। पक्षवृत्तिलिङ्गपरामर्शमात्रस्यानुमितिजनकत्वात् अधिकस्य गौरवपराहतत्वात् ।

अनुपपत्तिकारणकार्थापत्तिसिद्धान्तविवेचनम् ॥

(वि०)गृहे देवदत्तस्याभाव इति । अत्र देवदत्तस्येति प्रतियोगित्वं षष्ठ्यर्थः प्रकारो न तु नेह देवदत्त इतिवत् संसर्गमर्यादया प्रतियोगित्वज्ञानं तेन प्रतियोगित्वत्वरूपव्याप्यतावच्छेदकावच्छिन्नप्रतियोगित्वरूपलिङ्गलाभादनुमानावतारोऽन्यथा वैशिष्ट्यविधया प्रतियोगित्वलाभेऽपि व्याप्यतावच्छेदकावच्छिन्नलिङ्गानुपस्थितौ कथमनुमानं भवेत् । न चैवं यत्रैव नेह देवदत्त इत्याकारकोऽनुभवस्तत्रै-

वानुमानावतारेऽर्थापत्तिः सावकाशेति वाच्यम् । अर्थापत्तावपि बहिःसत्त्वं विना गृहनिष्ठाभावप्रतियोगित्वस्यैवानुपपन्नबुद्धिर्गमिकेति प्रतियोगित्वत्वावच्छिन्नोपस्थितिं विना तेनार्थापत्त्यनवतारानभ्युपगमात् ॥ नन्वनुपपत्तिर्न व्यतिरेकव्याप्तिः किन्तूपपादकाभावे उपपाद्याभावावश्यंभावः, स च व्यधिकरणयोरपि सुकरः । यदि देवदत्तस्य न बहिःसत्त्वं तदा गृहे सत्त्वावश्यंभावः, यदा वा गृहे देवदत्ताभावस्तदा देवदत्तबहिःसत्त्वावश्यंभाव इत्यनुपपत्तिज्ञानस्य वैयधिकरण्येऽपि सम्भवादतो न प्रतियोगित्वेऽनुपपत्तिज्ञानं कारणं येन प्रतियोगित्वधीरपेक्ष्येति । मैवम् । अवश्यंभावज्ञानस्य गमकत्वे धूमादावपि तथात्वापत्तेः धूमे सत्यवश्यं वह्निरिति ज्ञानात्, तथापि नार्थापत्तिर्मानान्तरम् अवश्यंभावेनैव गमकत्वेऽनुमानविलक्षणप्रकाराभावात् । इयांस्तु विशेषः–यदेकत्र व्यधिकरणे नानुपपत्तिरपरत्र सामानाधिकरण्येन यदधिकरणेन यदधिकरणान्तर्भावेनावश्यंभावधीस्तदधिकरणे ततः साध्यसिद्धिरित्यनुगतस्यैव गमकत्वप्रयोजकत्वात्, तस्मादवश्यम्भावज्ञानं न गमकं धूमाद्वह्नेरवश्यम्भाव इत्यस्य फलपर्यवसायितयाऽनुमितित्वाच्चानुमानत्वमिति सामानाधिकरण्यधीरेव गमिका वाच्या, सा च व्याप्यतावच्छेदकावच्छिन्नप्रतियोगित्वेन संभवतीति सुष्ठूक्तं त्वयापि तत्प्रकारिकैव धीरुपेया इति ॥ ननूक्तप्रत्यक्षस्य देवदत्तविषयकत्वे प्रमाणाभावः–देवदत्तं साक्षात्करोमीत्यनुव्यवसायाभावात् अभावं साक्षात्करोमीत्यनुव्यसायात्, किन्तु तदव्यवहितपूर्ववर्तिस्मरणस्यैव देवदत्तो विषय इत्यत आह सम्बन्धज्ञानस्येति । ननु संबन्धप्रत्यक्ष एव सम्बन्धिद्वयं विषयः प्रतियोगित्वं तु न प्रतियोग्यभावयोः सम्बन्ध इत्यत आह प्रतियोगिनेति । तथा चान्यसम्बन्धेन इदमिह नास्तीति प्रतीत्यसम्भवात् प्रतियोगित्वस्य सम्बन्धत्वमावश्यकमिति भावः । एककालीनत्वादिश्च न तन्नियामक इति विभाव्यम् । अधिकस्य–पक्षविशेष्यकत्वस्य ॥

(चि०) अथवा अनतिप्रसक्तसहकारिवशान्मनसैव स्मृतदेवदत्तविशेष्यकस्तृतीयलिङ्गपरामर्शः । यथा च न सहकारि मानान्तरं तथोपपादितमधस्तात् ।

ननु मयूरः पर्वततरे न नृत्यति नृत्यति चेति ज्ञा-

नानन्तरं पर्व्वते नृत्यतीति ज्ञानमस्ति, न च व्यतिरेकिणस्तत्सम्भवाति-पर्वतनृत्यस्य साध्यस्याप्रतीतौ व्यतिरेकव्याप्त्यनिरूपणात्। न च पर्वतनृत्याप्रसिद्धौ तेन विनाऽनुपपत्तिप्रतिसन्धानमपि नेति कथमर्थापत्तिरपीति वाच्यम्। अधिकरणं विनाऽनुपपद्यमानं नृत्यं प्रसिद्धाधिकरणबाधसहकृतं प्रसिद्धेतरमधिकरणं कल्पयतीति चेत्। न।

मयूरनृत्यं साधिकरणं नृत्यत्वादिति सामान्यतोदृष्टं प्रसिद्धाधिकरणबाधसहकृतं प्रसिद्धेतरं पर्व्वतमधिकरणमादाय नृत्यज्ञानं जनयति।

(वि०) ननु गृहनिष्ठात्यन्ताभावप्रतियोगित्वस्यापि देवदत्तधर्मतयाऽसंनिकृष्टत्वात्तद्विशेष्यकोऽपि चाक्षुषः परामर्शोऽसंभवीत्यस्वरसादाह-अथवेति।

मीमांसकः शंकते नन्विति। अधिकरणं विनेति। अनुपपद्यमानं-अनुपपन्नत्वेन ज्ञायमानम्। नृत्यं-नृत्यनित्यत्वम्॥

(चि०) यद्वा पर्व्वतेतरे न नृत्यतीतिशब्देन नृत्याभावबोधानन्तरं मयूरो नृत्यतीतिशब्दाज्जायमानं ज्ञानं पर्व्वतनृत्यं गोचरयति। प्रसिद्धविशेषबाधसहकृतसामान्यज्ञानजनकप्रमाणस्य प्रसिद्धेतरं पर्व्वतमधिकरणविशेषमादाय ज्ञानजनकत्वनियमात्। अत एव नित्यज्ञानबाधानन्तरं क्षित्यादौ ज्ञानजन्यत्वं सिद्धनित्यत्वमादाय सिद्ध्यतीत्याचार्य्याः।

यद्वा मयूरनृत्यं पर्व्वताधिकरणकं पर्व्वतेतरानधिकरणत्वे सति साधिकरणत्वात् पर्व्वतत्ववदित्यन्वयव्यतिरेकी।

(वि०) यद्वेति। नृत्याभावबोधानन्तरमिति। पर्वतेतरनृत्याभावबोधानन्तरमित्यर्थः। इतरबाधसहकारेण पदानुपस्थितमपि शाब्दबोधे प्रकटीभूय भासत इति गुरुमतेनेदम्, अन्यथा मयूरो नृत्यतीति शाब्दात् पर्वतेतराधिकरणकनृत्यबाधसहकारेण नृत्यविशेषसिद्धावपि नृत्यस्य पर्वतवृत्तित्वं तदुपस्थापकपदाभावादनुपपन्नमेव स्यादिति ध्येयम् ॥

स्वमते त्वाह यद्वेति। अन्वयव्यतिरेकी पर्वतनृत्यं गोचरयतीत्यनुषञ्जनीयम्।

(चि०) अथ वा यः सम्भाविततत्तदितरावृत्तिःसन् तदतिरिक्तवृत्तिर्न भवति न तद्वृत्तिर्भवतीति सामान्येन यत्तदर्थान्तर्भावेन व्याप्त्या नृत्यस्य पर्वतवृत्तित्वं सिद्ध्यति। एवं पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्रापि अप्रसिद्धरात्रिभोजनसाध्यपीनत्वज्ञानं रात्रिभोजनमादाय सिद्ध्यति।

(वि०)अथवेति। ननु पीनो देवदत्तो दिवा न भुंक्ते इति ज्ञानानन्तरं पीनत्वं भोजनवत्त्वं विनाऽनुपपन्नमिति ज्ञानात् दिवाभोजनबाधसहकृतात् देवदत्तो रात्रौ भुंक्त इति ज्ञानं जायते तत्रानुमानाद्यसंभवादर्थापत्तिरिष्यत इत्यत आह एवमिति। देवदत्त इति। अप्रसिद्धरात्रिभोजनदेवदत्त इत्यर्थः। रात्रिभोजनमिति। रात्रिभोजनानुमितिं जनयतीत्यर्थः॥

(चि०) अथ यथा अभोजी पीन इत्यत्रायोग्यताज्ञानं तथा पीनो दिवा न भुङ्क्ते इत्यत्रापि दिवाभोजनस्य बाधाद्योग्यताघटकरात्रिभोजनस्याप्रतीतेः, अतो योग्यताघटकोपस्थितिं विना अन्वयमलभमानमिदं वाक्यं योग्यताघटकरात्रिभोजनोपपादकं रात्रौ भुङ्क्ते इति वाक्यं कल्पयित्वा तेन सहान्वयबोधं जनयति। न चैवं लाघवाद्रात्रिभोजनमेव कल्पयितुं युक्तम्। 'शाब्दी ह्याकाङ्क्षा शब्देनैव प्रपूर्यते' इति न्यायेन शब्दो-

पस्थापितमादाय शब्दस्यान्वयबोधजनकत्वात्। एव-
ञ्च श्रूयमाणशब्दस्यान्वयबोधकत्वं योग्यताघटकोप-
स्थापकेन शब्देन विनाऽनुपपद्यमानं तं कल्पयित्वा य-
त्रान्वयबोधं जनयति तत्र श्रुतार्थापत्तिः। द्वारमित्या-
दौ पिधेहीतिशब्दकल्पनं श्रुतार्थापत्तिरेव। शब्दश्च
यद्यपि श्रूयमाणो बाधितस्तथाप्यभिप्रायस्थः कल्प्यते।
यथा गुरुमते'स्वर्गकामो यजेते'त्यत्र साक्षात्साधनता-
बाधे परम्पराघटकस्यानुपस्थित्या परम्परासाधनताज्ञा-
नविरहो योग्यताज्ञानाभावात् प्रसिद्धपदसामानाधि-
करण्यानुपपत्तिरिति योग्यताज्ञानाय परम्परासाधन-
ताघटकमपूर्व्वं लिङादिवाच्यं कल्पयति, ततः स्वर्ग-
साधनं याग इति ज्ञानं जायते, अन्यथा अपूर्व्वमपि
वाच्यं न स्यादिति।

(वि०) भट्टाभिमतां यथाश्रुतशब्देन शब्दकल्पनारूपां श्रुतार्था-
पत्तिमाशङ्कते अथेति। दिवाभोजनस्य बाधादिति योग्यताघटके-
त्यत्र हेतुः। योग्यताघटकोपस्थितिं विना-योग्यतात्मकरात्रिभोजि-
त्वोपस्थितिं विना। इदं वाक्यं-पीनो देवदत्तो दिवा न भुंक्त इति
वाक्यम्। उपपादकं-उपस्थापकम्। तेन सहेति। तदुपस्थापित-
रात्रिभोजित्वेन सहेत्यर्थः। अन्वयबोधं-पीनो देवदत्तो दिवा न
भुंक्ते किन्तु रात्रौ भुंक्त इत्यन्वयबोधम्। तन्मते योग्यतायाः शा-
ब्दबोधे भानादिति भावः। आशंकते न चेति। शब्दकल्पनेऽपि
अर्थोपस्थितेरावश्यकत्वादिति भावः। उत्तरयति शाब्दीति। तथा
च केवलार्थकल्पनया योग्यताज्ञाननिर्वाहेऽपि शब्दजन्योपस्थितिं
विना रात्रिभोजित्वरूपयोग्यतायाः शाब्दबोधे भानासंभवाच्छब्दः
कल्प्यते, तन्मते शब्दयोग्यताविषयकस्यैव शाब्दबोधस्योत्पत्तिनि-
यमादिति भावः। द्वारमित्यादाविति। एवमित्यादिः। तथा चात्रा-
पि पिधानविशेष्यकद्वारकर्मकान्वयबोधजनकत्वं पिधेहीतिशब्दा-
ध्याहारं विनाऽनुपपन्नमिति ज्ञानात् पिधेहिशब्दकल्पनं श्रुतार्थापत्ति-

रित्यर्थः। ननु पिधेहीतिशब्दस्य बाधितत्वादर्थापत्त्या द्वारमिति वाक्यं पिधेहीतिशब्दवदिति ज्ञानं कथं स्यादत आह शब्दश्चेति। बाधितः–नास्ति। अभिप्रायस्य इति। द्वारमिति वाक्यं पिधेहीति शब्देन सहान्वयबोधं जनयत्विति एतादृशाभिप्रायविषयः कल्प्यत इत्यर्थः। तथा च तादृशाभिप्रायविषयत्वसम्बन्धेन तद्वत्ताज्ञानमर्थापत्त्या जननीयमिति भावः। योग्यतावच्छेदकरूपेणोपस्थितिं विना शब्दान्वयबोध इत्यत्र प्राभाकरसंमतिमाह यथा गुरुमत इति। साक्षात्साधनताबाध इति। यागस्याशुतरविनाशित्वादिति भावः। परंपराघटकस्येति। अपूर्वस्येत्यर्थः। योग्यताज्ञानाभावादिति। यागे विध्यर्थस्येष्टसाधनत्वस्यान्वये योग्यताज्ञानाभावादित्यर्थः। साक्षादसाधने साधनत्वान्वये परंपरासाधनत्वस्य योग्यतात्वादिति भावः। प्रसिद्धेति। प्रसिद्धपदस्य विध्यर्थेन इष्टसाधनत्वेनान्वयबोधानुपपत्तिरित्यर्थः। योग्यताज्ञानाय—परम्परासाधनताज्ञानाय। अन्यथेति। योग्यताप्रकारकोपस्थितेरपि हेतुत्व इत्यर्थः॥

(चि०) उच्यते। बाधकप्रमाणाभावोऽन्वयविरोधिरूपविरहो वा योग्यता। अतो दिवा अभोजने रात्रिभोजनाप्रतीतावपि भोजनसाध्यपीनत्वाद्दिवा न भुङ्क्ते इति शब्दादृधीरुत्पद्यते न प्रतीत्यनुपपत्तिः, किन्तु प्रतीतानुपपत्त्या रात्रिभोजनं कल्प्यते अत एवापूर्वमपि न वाच्यमिति वक्ष्यते। तस्मान्नार्थापत्तिरनुमानादतिरिच्यत इति।

(वि०) वस्तुतो योग्यतावच्छेदकधर्मिणि योग्यताज्ञाने शब्दधीर्न तु तद्धर्मवत्त्वधीस्तत्र तन्त्रमित्यभिसंधाय सिद्धान्तयति बाधकेति। बाधकप्रमाणाभावः–ग्राह्याभावनिश्चयाभाव इत्यर्थः। अन्वयविरोधीति। ग्राह्याभावव्याप्यधर्मेत्यर्थः। प्रतीतानुपपत्त्येति। प्रतीतस्य दिवाऽभोजित्वे सति पीनत्वस्य रात्रिभोजित्वं विनाऽनुपपत्त्या रात्रिभोजित्वमनुमीयते इत्यर्थः॥

इति श्रीतर्कतीर्थोपाधि समलङ्कृत बटुकनाथशास्त्रिविरचितं अर्थापत्तिविवेचनम्॥

अथानुमानगादाधर्याम्

अवयवप्रकरणम् ।

(चि०) तच्चानुमानं परार्थं न्यायसाध्यमिति न्यायस्तदवयवाश्च प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि निरूप्यन्ते । तत्र न समस्तरूपोपपन्नलिङ्गप्रतिपादकवाक्यं न्यायः—अत्रैव वाक्येऽतिव्याप्तेः, किन्त्वनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकवाक्यं न्यायः । प्रतिज्ञादिपञ्चवाक्यैरेकवाक्यतया स्वार्थविशिष्टज्ञानं जन्यते तेन च विशिष्टवैशिष्ट्यावगाहिमानान्तरमुत्थाप्यते, तेन च चरमपरामर्श उत्पाद्यत इति न्यायजन्यशाब्दज्ञानस्य परामर्शप्रयोजकता ।

(दी०) उचितानुपूर्वीकं प्रतिज्ञादिपञ्चकसमुदायत्वं न्यायत्वम् । प्रतिज्ञात्वादिकं पुनरुदासीनवाक्यवारकन्यायान्तर्गतत्वशून्यमेवोपादेयमिति नाऽन्योन्याश्रयः । साध्यादिविशेषनियन्त्रिताश्च प्रतिज्ञादयो वाच्या इति न भिन्नसाध्यादिकप्रतिज्ञादिसमुदायेऽतिव्याप्तिः । व्याप्त्यादेरिव साध्याद्यननुगमादननुगमो न्यायादेरिष्यते एव । एतेन प्रतिज्ञानिगमनयोरुदाहरणावयवान्तरयोश्च न सम्भूयैकार्थप्रतिपादकत्वं प्रागेव तु पञ्चानामवयवानाम्, परन्तु प्रतिज्ञाहेत्वोः कथञ्चिदुपनयनिगमनयोरेकवाक्यताव्यवहारस्तु विशिष्टैकार्थप्रतिपत्तिपरतामात्रेण । तादृशपरामर्शप्रयोजकत्वञ्च यदि तद्विषयतत्पदार्थसार्थोपस्थापकतया तदोदाहरणोपनययोरेव तत्पर्यवस्यति । अथ तदानुकूल्यमात्रेण, तदा को वह्निमान् ? पर्वतो वह्निमान्, कुतो ? धूमवत्त्वादित्यादेरपि तथात्वमित्यादिकं समाहितम् ।

(गा०) अनुमानं निरूप्य न्यायतदवयवनिरूपणं प्रतिजानीते मूले तच्चेति। तत्-निरुक्तम्। अनुमानं परार्थ-विचारदशायां मध्यस्थस्य विवादविषयसाध्यनिश्चयरूपप्रयोजनसाधनम्। न्यायसाध्यमिति। न्यायप्रयोज्यमित्यर्थः। वादिप्रयुक्तन्यायजन्यशाब्दबोधेन मध्यस्थस्य चरमकारणलिङ्गपरामर्शरूपानुमानजननादिति भावः। ज्ञायमानलिङ्गस्यानुमानत्वेऽपि तद्विशेषणस्य परामर्शस्य न्यायाधीनत्वात्तद्विशिष्टस्य तथात्वमित्यवधेयम्। अथवा अनुमानं-अनुमितिः, परार्थ-मध्यस्थस्य साध्यसंशयनिवृत्तिरूपप्रयोजनसाधनं, परस्य प्रतिवादिनोऽर्थो निवृत्तिर्यस्मादिति तादृशानुमितिर्वा। एतेन निरूपणप्रयोजनमुपदर्शितं न्यायप्रयोगद्वारा मध्यस्थानुमितेरेव न्यायज्ञानप्रयोजनत्वात् कारणत्वम्। स्मरणप्रयोजकसम्बन्धकथनेन प्रसङ्गो वा सङ्गतिरपि दर्शिता। समस्तरूपेति। पक्षसत्त्वादिपञ्चरूपेत्यर्थः। उपनयेन पक्षसत्त्वस्य उदाहरणेन व्याप्तिघटकसपक्षसत्त्वविपक्षासत्त्वयोर्निगमनेन चाबाधितत्वासत्प्रतिपक्षत्वयोः प्रतिपादनाल्लक्षणसमन्वयः। अत्रैवेति। समस्तरूपोपपन्नं लिङ्गमित्यत्रैवेत्यर्थः। अतिव्याप्तेरिति। इदमुपलक्षणं उदाहरणादित्रिकस्यापि न्यायत्वापत्तिर्द्रष्टव्या। अनुमितिचरमकारणं यो लिङ्गपरामर्शः व्याप्तिप्रकारेण पक्षे यल्लिङ्गज्ञानं तत्प्रयोजकं यच्छाब्दज्ञानं तज्जनकं वाक्यमित्यर्थः।

अत्र प्रयोजकान्तं प्रतिज्ञादिसकलावयवार्थस्य महावाक्यार्थबोधस्य तावदर्थगोचरसमूहालम्बनबोधस्य वा परिचायकमात्रं न तु परामर्शप्रयोजकत्वेन शाब्दज्ञानस्य लक्षणघटकता किन्तु तावदर्थविषयकबोधत्वेनैव, अतो धूमवान्पर्वत इत्यादिवाक्यमात्रजन्याया बुद्धेरुपनायकज्ञानादिविधया मानसपरामर्शप्रयोजकतया तत्रातिव्याप्तिरिति निरस्तम्। तादृशयत्किञ्चिच्छाब्दबोधं प्रति यादृशयादृशधर्मप्रकारकज्ञानत्वेन शब्दज्ञानस्य कारणता प्रत्येकं तत्तद्धर्मावच्छिन्नवाक्यसमुदायत्वस्य तादृशयत्किञ्चिच्छाब्दबोधनिरूपितशाब्दज्ञाननिष्ठा या या कारणता तत्तदवच्छेदककोटिप्रविष्टयत्किञ्चिज्ज्ञानीयविषयताश्रयवर्णत्वव्यापकसमुदायत्वपर्यवसितस्य विवक्षितत्वान्नास्माकं न्यायैकदेशेऽतिव्याप्तिः। तादृशधर्माश्च प्रतिज्ञादीनामानुपूर्वीविशेषा एव पर्वतो वह्निमानित्याद्याकारके बोधे पर्वतो वह्निमान्पर्वतो दहनवानित्याकारविविधानुपूर्वीविशेषप्रकारकज्ञानानामेव हेतुतया

तथाविधैकैकानुपूर्व्यवच्छिन्नवाक्यपञ्चकस्य न्यायत्वानुपपत्तिरतो यत्किञ्चिच्छाब्दबोधनिवेशः । समानानुपूर्वीकनानावाक्यविषयतानामेवानुगतरूपेणैककारणतायामवच्छेदकत्वात्पर्वतो वह्निमानित्याद्येकैकवाक्यव्यक्तिघटितवाक्यपञ्चवृत्तिसमुदायत्वस्य न तादृशकारणतावच्छेदकाविषयताश्रयवर्णत्वव्यापकत्वमिति यत्किञ्चिज्ज्ञानीयविषयतानिवेशः । न च वाक्यान्तरसाधारणसमुदायत्वमादाय वाक्यान्तरघटितसमुदायेऽतिव्याप्तिरिति वाच्यम् । तादृशसमुदायत्वनिष्ठन्यूनवृत्तित्वानिरूपकत्वेन निरुक्तसमुदायत्वस्य विवक्षणात् । न चैवमपि व्युत्क्रमप्रयुक्तसमुदायेऽतिव्याप्तितादवस्थ्यमिति वाच्यम् । व्युत्क्रमप्रयुक्तप्रतिज्ञादिवृत्ति यद्यत्समुदायत्वं तावद्भेदकूटेन निरुक्तसमुदायत्वस्य विशेषणीयत्वात् । न चैवमपि एकैकन्यायघटकं यत्प्रतिज्ञादिवाक्यं तत्समुदायेऽतिव्याप्तिरिति वाच्यम् । स्वाश्रयीभूतयत्किञ्चित्प्रतिज्ञाद्यव्यवहितोत्तरत्वशून्यहेत्वादिवृत्तियद्यत्समुदायत्वं तदन्यत्वस्य तादृशसमुदायत्वे विशेषणीयत्वादिति दिक् ।

न्यायजन्यबोधस्य परामर्शप्रयोजकतां सङ्गमयति प्रतिज्ञादीति । एकवाक्यतयेति विशेषणे तृतीया, तथा चैकवाक्यतापन्नैरित्यर्थः । एकवाक्यत्वं च विशिष्टैकार्थप्रतिपादकत्वं तदुत्थाप्याकांक्षानिवर्त्तकत्व-तन्निवर्त्तनीयं आकाङ्क्षोत्थापकत्वान्यतरत्वं वा तेन पञ्चवाक्यजन्यमहावाक्यार्थबोधासम्भवेऽपि न क्षतिः । स्वार्थविशिष्टज्ञानं-तत्तद्वाक्यार्थविषयकज्ञानं, तच्च समूहालम्बनमन्यथा वेत्यन्यदेतत् । विशिष्टवैशिष्ट्यावगाहिमानान्तरम्-विशिष्टवैशिष्ट्यबोधात्मकपरामर्शजनकं मनः, उत्थाप्यते-स्वात्मकसहकारिसम्पन्नीक्रियते । तेन तथाविधेन मनसा परामर्श उत्पाद्यते इत्युपाध्यायः ।

अत्र च तदेव ज्ञानं परामर्शरूपं उपनयार्थविषयकत्वादित्याक्षिप्य उपनयस्य व्याप्त्यंशे न तात्पर्यं तथासति न्यायजन्यबोधे उदाहरणार्थतया उपनयार्थतया च व्याप्तिभाने पौनरुक्त्यं स्यात, किन्तु पक्षधर्मत्वमेवोपनयेन विवक्षितम्, तथाचोदाहरणार्थव्याप्तेरुपनयार्थपक्षधर्मतायाश्च विशृङ्खलमेव भानमिति न न्यायजन्यबोधस्य व्याप्तिविशिष्टवैशिष्ट्यावगाहिता व्याप्यः पक्षे वर्त्तते न वेत्याकाङ्क्षानुरोधेनैव वह्निव्याप्यादिपदघटितमुपनयवाक्यं प्रयुज्यत इति स

एव समाहितवान् ।

तत्रेदं चिन्त्यते । यदि व्याप्तिविशिष्टपक्षधर्मत्वमाकाङ्क्षितं तदा व्याप्तिविशिष्टविषयक एव बोधस्तादृशाकाङ्क्षां निवर्तयिष्यतीति तथाविधबोधे एवोपनयतात्पर्यमावश्यकम् । न चैवमप्याकाङ्क्षानिवृत्तये अवान्तरवाक्यार्थबोधस्य विशिष्टवैशिष्ट्यावगाहित्वोपगमेऽपि न्यायजन्यमहावाक्यार्थबोधे उपनयाद्व्याप्तिभानं नोपेयते उदाहरणादेव तद्भानादवान्तरवाक्यार्थधियः परामर्शरूपत्वेऽपि निगमनजन्याबाधितत्वादिप्रतिपत्तेरनुमितावपेक्षितत्वात्तावत्पर्यन्तं तदसत्त्वेन परामर्शान्तरस्यापेक्षेति वाच्यम् । अवान्तरवाक्यार्थबोधे व्याप्तिभानानुरोधेन तदंशेऽप्युपनयतात्पर्यकल्पनाया आवश्यकत्वे महावाक्यार्थबोधे तद्भानेऽपि बाधकाभावादिति ।

न्यायजन्यज्ञानस्य वादिवाक्यजन्यत्वेनाप्रामाण्यशङ्काकवलिततया अनुमितिजननायोग्यतया परामर्शान्तरस्वीकार इति मिश्राः ।

नव्यास्तु पक्षांशे व्याप्तिविशिष्टहेतुवैशिष्ट्यावगाहिज्ञानमेवानुमितिहेतुः । ननु व्याप्याभिन्नहेतुमदभिन्नज्ञानं तादृशवैशिष्ट्यावगाहि ता च न न्यायजन्यशाब्दबुद्धेः नामार्थयोः भेदेनान्वयबोधस्याव्युत्पन्नत्वात्, अतो व्याप्यत्वावच्छिन्नवाक्यसमुदायत्वस्य तादृशयत्किञ्चिच्छाब्दबोधनिरूपितशब्दज्ञाननिष्ठा या या कारणता तत्तदवच्छेदककोटिप्रविष्टयत्किञ्चिज्ज्ञानीयविषयताश्रयवर्णत्वव्यापकहेतुनिष्ठप्रकारताबोधहेतुहेतुविशेष्यकव्याप्तिरूपविशेषणतावच्छेदकप्रकारकमानसज्ञानान्मानस एव तादृशपरामर्शोऽवश्यमङ्गीकर्तव्य इत्यभिप्रायेण तेन चेत्याद्यभिहितम् । विशिष्टवैशिष्ट्यावगाहिमानान्तरं–विशिष्टवैशिष्ट्यबोधजनकं विशेषणतावच्छेदकीभूतव्याप्तिप्रकारकधूमत्वाद्यवच्छिन्नविशेष्यकज्ञानं, उत्थाप्यते–जन्यते, तेन-तादृशविशेषणतावच्छेदकप्रकारकज्ञानेन परामर्शो जन्यते इत्यर्थः । न चैवं तेन परामर्शस्य जननादिति ग्रन्थासङ्गतिः, अत्र परामर्शपदस्य व्याप्याभिन्नहेतुमदभेदबोधपरत्वादित्याहुः ।

शुद्धहेतुतावच्छेदकावच्छिन्ने पक्षधर्मत्वाकाङ्क्षया तत्र पक्षधर्मत्वबोधमात्रतात्पर्यकं व्याप्त्यर्थपदाघटितमेवोपनयवाक्यं प्रयुज्यत इति प्राचीनमताभिप्रायकमिदम्, अत एव च दीधितिकृता तन्मताभिप्रायेणैवोदाहरणोपनययोरेव तात्पर्यविषयतेत्यत्रोदाहरणान्तर्भावे-

नैव परामर्शप्रयोजकत्वपर्यवसानमुक्तं न तूपनयमात्रस्येत्यपि वदन्ति ।

अत्र परामर्शप्रयोजकत्वेन शाब्दज्ञानस्य लक्षणघटकत्वे स्वयमनुपपत्तेर्वक्ष्यमाणतया शाब्दज्ञानपदं प्रतिज्ञादिप्रतिपाद्यतत्तद्विशिष्टार्थज्ञानपञ्चकपरम्, जनकवाक्यपदं च प्रत्येकं तत्तद्बोधजनकवाक्यपञ्चकपरम्, अतः प्रतिज्ञादिवाक्यपञ्चकलाभः। प्रयोजकान्तं च बोधविशेषाणां परिचायकमात्रम् । यद्यप्येवं प्रतिज्ञादिपञ्चवाक्यैरेकज्ञानाजननेऽपि एतादृशलक्षणनिर्वाहः, तथापि प्रतिज्ञादिजन्यबोधानां परामर्शप्रयोजकतालाभायैव सम्भवाभिप्रायेण तावदर्थविषयकमेकं ज्ञानं परामर्शप्रयोजकत्वेनाभिहितमित्यभिप्रेत्य दीधितिकृत्पर्यवसितन्यायलक्षणमाह उचितेति । उचितानुपूर्वीकानि प्रतिज्ञादीनि पञ्च यत्र समुदाये तत्त्वम्, तादृशपञ्चपर्याप्तसमुदायत्वमिति यावत् । पञ्चपदं निगमनान्तानां विशिष्य निवेशलाभाय न तु पञ्चत्वेनापि तेषां निवेशः प्रयोजनाभावात् । व्युत्क्रमप्रतिज्ञादिपञ्चकेऽतिव्याप्तिवारणाय उचितानुपूर्वीकेति । उचितानुपूर्वी–प्रतिज्ञोत्तरहेतूत्तरोदाहरणोत्तरोपनयोत्तरनिगमनत्वरूपा ।

ननु किमिदमुचितानुपूर्वीकत्वं ? न तावत्तादृशानुपूर्वीघटकत्वं घटकताया दुर्निर्वचत्वात् । तद्धि न स्वाविषयकप्रतीत्यविषयतादृशानुपूर्वीकत्वम्, प्रतिज्ञाद्यविषयकप्रतीत्या शुद्धनिगमनत्वस्य विषयीकरणात् विशिष्टनिगमनत्वे तादृशप्रतीत्यविषयत्वानुपपत्तेः विशेष्यवृत्तेर्विशिष्टानुयोगिकाभावानभ्युपगमात् । नापि तादृशानुपूर्वीविषयिताव्यापकविषयिताकत्वम्, शब्दव्यक्तिभेदेन प्रतिज्ञादेर्भिन्नतया कस्याश्चिदपि प्रतिज्ञादिव्यक्तेर्विषयितायास्तादृशानुपूर्वीविषयितासामान्यव्यापकत्वासंभवात् । प्रतिज्ञादिव्यक्त्यन्तरघटितन्यायविषयकज्ञानेऽपि तादृशानुपूर्वीविषयितासत्त्वात् । यत्किञ्चित्तादृशानुपूर्वीविषयिताव्यापकत्वस्य व्युत्क्रमप्रयुक्तप्रतिज्ञादिविषयितासाधारणत्वात्तादृशप्रतिज्ञाविषयकन्यायज्ञानीयतथाविधानुपूर्वीविशेषविषयिताया एव तादृशविषयिताव्याप्यत्वात् । न च ज्ञानभेदेन विषयिताभेदानभ्युपगमान्नैवमिति वाच्यम् । तादृशप्रतिज्ञादिव्यक्तिसमानाधिकरणत्वादिना आनुपूर्वीविशेषावच्छिन्नन्यायविषयकज्ञानीयानुपूर्वीविशेषविषयितायास्तादृशप्रतिज्ञादिव्यक्तिविषयिताशून्यावृत्तित्वात्तस्यास्त-

व्याप्यत्वानपायात्। अथ निगमनपूर्वोपनयपूर्वोदाहरणपूर्वहेतुपूर्वत्वरूपानुपूर्व्याश्रयत्वेन प्रतिज्ञायास्तादृशोदाहरणपूर्वत्वे सति प्रतिज्ञोत्तरत्वादिरूपानुपूर्व्याश्रयत्वेन च हेत्ववयवादीनां निवेशान्नानुपपत्तिः। अथवा तादृशैकविधानुपूर्वीविशेषावच्छिन्नभेदप्रतियोगितावच्छेदकत्वमेव तादृशानुपूर्वीघटकत्वमिति चेत्। एवमप्येकैकन्यायघटकं यत्प्रतिज्ञाद्येकैकवाक्यं तत्समुदायेऽतिप्रसङ्गो दुर्वार एवेति चेत्।

मैवम्-स्वाश्रयीभूतप्रतिज्ञाद्यव्यवहितोत्तरत्वशून्यहेत्वादिवृत्तियद्यत्समुदायत्वं तत्तदन्यत्वस्य समुदायत्वविशेषणत्वे तात्पर्यात्। व्युत्क्रमप्रयुक्तप्रतिज्ञादिनिष्ठस्य नानान्यायान्तर्गतप्रतिज्ञादिपञ्चनिष्ठस्य च समुदायत्वस्य तत्तदन्यत्वविरहान्नातिप्रसङ्गः। एवञ्च घटमानयेत्यादिवाक्यवृत्तिसमुदायत्ववारणाय प्रतिज्ञादिवृत्तित्वरूपं समुदायत्वविशेषणमपि सार्थकमित्यवधेयम्।

प्रतिज्ञादिवृत्तित्वं च प्रतिज्ञादिपर्याप्त्यवच्छेदकयत्किञ्चिद्धर्मपञ्चकव्यापकत्वमतः प्रतिज्ञादिपञ्चकैकदेशसमुदाये नाऽतिप्रसङ्गः। प्रतिज्ञात्वादेर्व्यासज्यवृत्तित्वात्तदाश्रयैकदेशमात्रवृत्तेस्तत्पर्याप्त्यनवच्छेदकत्वात्। समुदायत्वं चानेकपर्याप्तधर्मस्तस्य च पर्याप्तिसम्बन्धेन न्यायपदप्रवृत्तिनिमित्तत्वान्नैकदेशे न्यायव्यवहारप्रसङ्ग इति तु विभावनीयम्॥

ननु प्रतिज्ञादिलक्षणे न्यायान्तर्गतत्वविशेषणस्य प्रवेशनीयतयाऽन्योन्याश्रयप्रसङ्ग इत्यत आह प्रतिज्ञात्वादिकं त्विति। उदासीनवाक्यवारकेति। न्यायानन्तर्गतवाक्यवारणमात्रप्रयोजनकेत्यर्थः। एतेन न्यायान्तर्गतप्रतिज्ञादिशरीरे तादृशविशेषणानुपादाने न क्षतिरिति सूचितम्। क्रमप्रयुक्ताविभिन्नपक्षसाध्यहेतुकप्रतिज्ञादिपञ्चकेऽतिव्याप्तिशङ्कां निराकरोति साध्यादीति। तत्तत्साध्यपक्षहेतुकन्यायलक्षणे तत्साध्यपक्षकप्रतिज्ञातत्साधनकहेतुतत्साध्यसाधनकोदाहरणतत्साध्यपक्षसाधनकोपनयतत्साध्यसाधनकनिगमनानि निवेशनीयानीत्यर्थः। नन्वेवं न्यायपदार्थस्याननुगततया न्यायपदस्य नानार्थकतापत्तिरित्यत्रेष्टापत्तिमाह व्याप्त्यादेरिवेति। व्याप्त्यादिपदार्थस्येवेत्यर्थः। साध्याद्यननुगमात्-स्वघटकसाध्यादीनां भिन्नभिन्नरूपेण निवेशनीयत्वात्। अननुगमः-अनुगमप्रवृत्तिनिमित्तविरहः। न्यायादेः-न्यायादिपदार्थस्य। आदिपदादवयवपरिग्रहः। इष्यत एवेति। गत्यन्तराभावा-

दिति भावः। यथाश्रुतमूलस्वरसलिद्धवाक्यपञ्चकजन्यमहावाक्यार्थ-बोधमादाय लक्षणसमन्वयं निराचिकीर्षुः वाक्यपञ्चकस्यैकविशिष्टार्थबोधकतां खण्डयति प्रतिज्ञानिगमयोरिति। न सम्भूयैकार्थप्रतिपादकत्वमित्यग्रेतनेनान्वयः। प्रतिज्ञार्थे वह्निमति पर्वते निगमनार्थस्य विशिष्टज्ञानज्ञाप्यसाध्यवत्त्वस्यान्वयबोधोपगमे साध्यवत्त्वांशमादाय पौनरुक्त्यप्रसङ्गात्। दण्डवान् रक्तदण्डवानित्यादाविव विधेयांशेऽधिकावगाहिनस्तादृशबोधस्य सम्भवेऽपि शुद्धपक्षतावच्छेदकविशिष्टेऽबाधितत्वादिविशिष्टसाध्यवत्तावगाहिन्याः प्रतीतेरेवोपयोगित्वेन साध्यविशिष्टपक्षे तादृशसाध्यवत्त्वान्वयबोधस्यानाकाङ्क्षिततया वादितात्पर्याविषयत्वाच्च।

यत्तु वह्निविशिष्टपर्वतोद्देश्यकबोधे वह्निमत्पदोत्तरपर्वतपदोपस्थितिरपेक्षिता नीलो घटः सुन्दर इत्यादाविव घटो नीलः सुन्दर इत्यादौ नीलान्वितघटाद्यंशे विधेयाभानादुद्देश्यतावच्छेदकवाचकपदस्योद्देश्यवाचकपदपूर्ववर्त्तिताया अपेक्षणीयत्वादतो नैतादृशान्वयबोधसम्भव इति। न च शुद्धपर्वतत्वावच्छिन्न एव शुद्धवह्निमत्त्वनिगमनोपस्थाप्यविशिष्टवह्निमत्त्वयोर्युगपद्विधेयतयाऽन्वयोपगमे नैकवाक्यत्वं निर्वहतीति वाच्यम्। "गुणानां च परार्थत्वादसम्बन्धः समत्वात्स्यादिति" न्यायेन विधेयतया भासमानयोः शुद्धवह्निमत्त्वविशिष्टवह्निमत्त्वयोरवच्छेद्यावच्छेदकभावापन्नविषयिताकत्वरूपसम्बन्धाभावेनैकवाक्यत्वानिर्वाहात्, अतएव विधेयभेदेन सर्वत्र वाक्यभेदः केवलोपनयजन्यबोधे पक्षे साध्यव्याप्यहेतुमत्त्वविधेयत्वेप्युपनयननिगमनाधीनबोधे उद्देश्यपदपूर्वनिर्दिष्टस्य व्याप्यवत्पदार्थस्योद्देश्यतावच्छेदकतयैव भानेन तद्विषयकत्वनिगमनार्थविषयकत्वयोरवच्छेद्यावच्छेदकभावात्तदुभयैकवाक्यतेति।

तन्न, तात्पर्यसत्त्वे योजनयापि तादृशबोधसम्भवात्। उद्देश्यवाचकपदस्य विधेयवाचकपदपूर्वत्वेन प्रतिसन्धानस्यापेक्षणीयतया योजनयैवोपनयेन पक्षेऽयंपदार्थे साध्यव्याप्यवत्त्वबोधनात् तात्पर्यसत्त्वे वादिवाक्ये योजनायां दूषणानर्हत्वात्तात्पर्यविरहस्यैव तत्र बीजत्वात्। इदमुपलक्षणम्। उपनयेनापि समं प्रतिज्ञाया न विशिष्टैकार्थप्रतिपादकत्वं वह्निमति पर्वते उपनयार्थस्य साध्यव्याप्यहेतुमत्पक्षस्याप्राप्ततादृशहेतुमत्त्वांशघटिततया विधेयत्वसम्भवेऽप्यनुमित्युपयोगि-

नः पक्षतावच्छेदकाविशिष्टे हेतुमत्त्वस्याकाङ्क्षयैवोपनयप्रतिपादनादनाकाङ्क्षितस्य पर्वते पर्वताभेदबोधस्य तात्पर्याविषयत्वात्। उदाहरणावयवान्तरयोरिति। उदाहरणघटकयोर्यत्तत्पदघटितभागयोरपि नैकविशिष्टार्थबोधकत्वं तत्र द्विरुक्तयत्पदेन महानसत्वमहानसान्यत्वादिनोद्देश्योपस्थापनात् तत्पदेनापि तद्रूपावच्छिन्नपरामर्शान्महानसं धूमवद्वह्निमच्च महानसान्यद्धूमवद्वह्निमच्चेति वाक्यार्थचतुष्टयविषयकसमूहालम्बनबोधस्यैवोदयात्। न च वीप्सया व्यापकत्वबोधनाद्धूमव्यापकवह्निमानित्याकारक एकविशिष्टार्थबोध एव तत्रोत्पद्यत इति वाच्यम्। यो य इत्यादेरनन्वितार्थकत्वप्रसङ्गात्। न च द्विरुक्तयत्पदस्यैव व्यापकत्वमर्थः स च साध्यांशेऽन्वेतीति वाच्यम्। नामार्थयोर्भेदान्वयभेदस्याव्युत्पन्नत्वात्। व्यापकत्वावच्छिन्नस्य तदर्थस्याभेदेनान्वय इत्यपि न सम्भवति, सुन्दरो दण्डीत्यादौ सुन्दराद्यभेदान्वयवत्समानविभक्तिकत्वाभावेन मत्वर्थीयप्रकृत्युपस्थाप्येऽर्थेऽसमस्तनामार्थाभेदान्वयस्यासंभवात्, अभेदान्वयप्रतियोगिसापेक्षतयाऽसामर्थ्येन साध्यवाचकपदोत्तरं तद्धितासम्भवाच्च, तत्पदस्य तावतापि सार्थक्यासम्भवाच्च। तस्माद्यत्पदार्थे हेतोस्तत्पदार्थे च तस्मिन्साध्यस्य विधेयतया भानमेव समूहालम्बनरूपं तत्र जायते तदुत्तरं व्यापकताबोधो मानसः स एव वा शाब्दबोधः साध्यवाचकपदस्य प्रकृतसाधनव्यापकताविशिष्टसाध्ये लाक्षणिकतया तत्पदार्थे व्यापकताविशिष्टसाध्यवत्तामवगाहत इत्युपेयम्। वीप्सासमभिव्याहारस्थले व्यापकत्वतात्पर्यस्यानादितया तादृशलक्षणाया निरूढलक्षणात्वेन वादिवाक्ये तत्स्वीकारे क्षतिविरहात्। न च व्यापकताबोधस्यावश्यकत्वे नानाहेत्वधिकरणे वह्न्यादिमत्त्वबोधनस्य प्रयोजकतया धूमादिकमुद्देश्यतावच्छेदकीकृत्य समूहालम्बनानात्मक एव व्यापकताविशिष्टशाब्दबोध उपेयताम्, यत्तत्पदं तु तादृशलक्ष्यार्थतात्पर्यग्राहकमेवास्त्विति वाच्यम्। अर्थबोधकत्वसम्भवेन तत्परित्यागायोगात् यो यो न वह्निमान्स न धूमवानित्यादौ व्यतिरेक्युदाहरणे वह्निमद्भेदादिसाधनके तादृशान्वय्युदाहरणे वा यत्तत्पदार्थाविवक्षायां प्रतियोगिवाचकपदसमानविभक्तिकपदोपस्थाप्यस्यानुयोगिनोऽप्रवेशेन नञाऽन्योन्याभावबोधनासम्भवाच्च। एवं चैत्रो जानाति कर्त्तृत्वादित्यादिन्यायान्तर्गते यो यः करोति स जानातीत्युदा-

हरणे यत्तत्पदार्थाविवक्षायां धर्मिणोऽलाभेन साध्याश्रयविकलत्वोदाहरणाभासताप्रसङ्गाच्चेति। एवं चोदाहरणसमुदायस्यावयवान्तरेण समं विशिष्टार्थप्रतिपादकत्वं सुतरामेव न सम्भवतीति भावः। एतेन हेतूदाहरणयोर्धूमवान् धूमाद्वह्निमानित्येतादृशविशिष्टार्थबोधजनकत्वसम्भवादुदाहरणावयवान्तरयोरित्यनुपपन्नमित्यपि परास्तम् ॥

द्रागेव—सुतरामेव न सम्भूयैकार्थप्रतिपादकत्वमित्यनुषज्यते। प्रतिज्ञाहेत्वोरित्यत्रापि नकारं विहाय ताभ्यां पर्वतो धूमाद्वह्निमानित्येतादृशविशिष्टज्ञानजननादिति भावः। अथ प्रतिज्ञाजन्यबोधानन्तरं कुत इति साध्यज्ञापकाकांक्षायां तन्निवर्त्तकं हेतुवाक्यं प्रयुज्यते तन्निवर्त्तकता च पक्षविशेषणतानापन्नसाध्यांशे हेतुज्ञानज्ञाप्यत्वबोधनेनापि निर्वहतीति पक्षांशे हेतुज्ञानज्ञाप्यत्वविशिष्टसाध्यवैशिष्ट्यावगाहिबोधस्यानुपयोगितया न तात्पर्यविषयत्वमिति चेन्न। पर्वते वह्निबोधानन्तरं पर्वते यद्वह्निज्ञापकं तत्रैवाकांक्षा जायते तन्निवृत्तिश्च साध्ये धूमादिज्ञानजन्यपर्वतविशेष्यकज्ञानविषयत्वप्रतिपादनेनैव धूमाद्वह्निमन्महानसमित्यादिवाक्यस्य पर्वते वह्निमत्त्वं कुत इत्याकांक्षानिवर्त्तकत्वाभावात् पञ्चमीतस्तादृशपर्वतविशेष्यकज्ञानविषयत्वभानं तु तद्विशेषणतापन्नसाध्यांश एव उक्तवाक्यान्महानसादिविशेषणतयोपस्थिते तदप्रतीतेः एकधर्मिविशेषणतापन्नेऽन्यविशेष्यकहेतुविशेषज्ञानाधीनज्ञानविषयत्वबोधकतायाः पञ्चम्या अव्युत्पन्नत्वादिति धूमाद्वह्निमान् पर्वत इत्यादिविशिष्टवैशिष्ट्यबोधस्यावश्यकत्वात्। कथंचिदिति। निगमनेऽयंपदाननुषङ्गपक्षे वह्निव्याप्यधूमवत्पर्वतादिरूपोपनयार्थे निगमनार्थधूमज्ञानज्ञाप्यवह्निमत्त्वाद्यन्वयसम्भवादिति भावः। अनुषङ्गपक्षे तु तादृशवन्ह्यादिमत्पक्षरूपनिगमनार्थमात्रबोधेनैवाकांक्षानिवृत्तेरुपनयार्थे विशिष्टपक्षे निगमनार्थीभूतविशिष्टपक्षबोधस्यानुपयुक्तस्य न तात्पर्यविषयतेति कथंचिदित्युक्तम्। इदं त्ववधेयम्। अनुषङ्गपक्षेप्युपनयैकदेशायंपदार्थपक्षमात्रे निगमनार्थान्वयमात्रेणैव कृतकृत्यतया तत्समुदायार्थविशिष्टपक्षे निगमनार्थविषयकबोधेऽपि तात्पर्यमप्रामाणिकमिति ॥

नन्वेवं प्रतिज्ञादीनां पञ्चानां कथमेकवाक्यताव्यवहार इत्यत आह एकेति। विशिष्टैकार्थप्रतीतीच्छाप्रयोज्यत्वमात्रेणेत्यर्थः। मात्रपदेन

तादृशप्रतीतिजनकत्वव्यवच्छेदः । तादृशी च प्रतिपत्तिर्निगमनरूपचरमवाक्यार्थबुद्धिरुदीच्यां वा मानसः परामर्शः तत्परता च तामजनयतोऽपि उत्तरोत्तरवाक्यप्रयोजिकामाकांक्षामुत्थापयतः प्रतिज्ञादेरिह धूम इत्यादिवचसामानुमानिकवह्न्यादिधीपरतावह्निर्वह्नित्येव तत्प्रयोजकतयैव । ननु तावद्भिरवयवैः सम्भूयैकमहावाक्यार्थबोधाजननेऽपि परामर्शप्रयोजकीभूतस्वीयतत्तद्विशिष्टार्थधीजनकतायाः सर्वावयवेष्वेव सत्त्वेन निरुक्तलक्षणसमन्वयो नानुपपन्न इत्यत आह परामर्शप्रयोजकत्वं चेति । परामर्शप्रयोजकज्ञानजनकत्वं चेत्यर्थः। तद्विषयेति । परामर्शविषयेत्यर्थः। तत्तत्पदार्थसार्थोपस्थापकतयेति अभेदे तृतीया, तथाच तदुपस्थापकत्वरूपमित्यर्थः। विवक्षितमिति शेषः । तथाच यादृशयादृशवाक्यैः परामर्शविषयसकलपदार्था उपस्थाप्यन्ते तावत्समुदायत्वं विवक्षितमिति पर्यवसितोऽर्थः । उदाहरणोपनययोरेवेति । उपनयस्य व्याप्त्यबोधकत्वमताभिप्रायेणोदाहरणान्तर्भावः। तत्-समुदायत्वं । पर्यवस्यतीति । ताभ्यामेव परामर्शविषयसकलपदार्थोपस्थापनादिति भावः। अथ यथाकथञ्चित्परामर्शानुकूलत्वं यादृशयादृशवाक्यानां तादृशवाक्यसमुदायत्वं विवक्षितमतो नोदाहरणोपनयमात्रेऽतिव्याप्तिरित्याशङ्कते अथेति । तदानुकूल्यमात्रेणेति पूर्ववदभेदे तृतीया । परामर्शप्रयोजकत्वमित्यनुषज्यते । इत्यादेः-इत्यादिसमुदायस्य, तथात्वं-न्यायत्वं, स्यादिति शेषः। को वह्निमानित्यादिवाक्यानामपि जिज्ञासाज्ञानद्वारा अवयवप्रयोजकत्वेन यथाकथञ्चित्परामर्शानुकूलत्वसम्भवादिति भावः। इत्याद्वीत्यादिपदात् व्युत्क्रमप्रयुक्तप्रतिज्ञादावतिव्याप्त्यादेः परिग्रहः ॥

(चि०) अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकवाक्यत्वमवयवत्वम् । अत एव वह्निव्याप्यधूमवानयमिति वाक्ये तदवयवे च न न्यायतदवयवलक्षणातिव्याप्तिः-तेन परामर्शस्य तदवयवेन परामर्शजनकस्य जननात् ।

यत्तु संक्षेपतः परामर्शप्रयोजकवाक्यत्वेन विशेषाभावात् सोऽपि न्याय एवेति ।

तन्न, कथायामाकाङ्क्षाक्रमेणाभिधानमिति प्रथमं विशिष्टवैशिष्ट्य आकाङ्क्षा नास्तीति तदभिधाने निग्रहादिति वक्ष्यते। अन्यथा चक्षुरादेरपि परामर्शजनकतया न्यायत्वापत्तिः आकाङ्क्षाविरहस्तुल्य एव।

अन्ये तु पञ्चावयववाक्याद्विजातीयमेव शाब्दज्ञानमुत्पद्यत इति तद्बीजनकवाक्यत्वं न्यायत्वम्। एवं प्रतिज्ञाद्यवयवादपि प्रत्येकं विजातीयं शाब्दज्ञानमिति तत्तद्धीजनकशब्दत्वमेव तत्तल्लक्षलणमिति।

तन्न, ज्ञानविशेषजनकत्वं तत्तज्ज्ञानजनकत्वं वा न्याये प्रतिज्ञादौ चानातिप्रसक्तमनुगतरूपमन्तरेण दुर्निरूपमिति तत्स्वीकारे तस्यैव लक्षणत्वात्, अन्यथा जातिसङ्करप्रसङ्गः।

(दी०) अवयवत्वन्तु न्यायान्तर्गतत्वे सति प्रतिज्ञाद्यन्यतमत्वम्, प्रतिज्ञाद्यघटकत्वे सति उभयघटकभागद्वयाघटितत्वं वा वक्तव्यम्। उभयञ्च प्रतिज्ञाहेतुहेतूदाहरणे उदाहरणोपनयावुपनयनिगमने इति विशिष्य वक्तव्यमिति। प्रतिज्ञादिप्रतिपाद्यतत्तद्विशिष्टार्थविषयकज्ञानपञ्चकान्यतमज्ञानजनकवाक्यत्वं तत्त्वमित्यपि केचित्।

तस्यैवेति। तथाच तादृशजातौ साधकाभाव इति भावः। बाधकमप्याह अन्यथेति। न्यायजन्यज्ञाने पञ्चावयवजन्यत्वात् पञ्चद्वित्र्यादिजन्ये द्वित्र्याद्या एकैकजन्यै चैकैका जातय इति सङ्कर इत्यर्थः। तत्र तत्र भिन्नभिन्नजातिकल्पने सुतरां मानाभावादिति भावः।

केचित्तु यदि चानुगतं कारणमन्तरेणापि तादृशजातिमत्त्वसम्भवस्तदा कदाचित् प्रतिज्ञादिजन्येऽपि हेत्वादिजन्यवृत्तिर्हि-

त्वादिजन्ये च प्रतिज्ञादिजन्यवृत्तिर्जातिः स्यादिति सङ्कर इत्यर्थः । एवं सर्वेषां सर्वजातीयत्वमेकजातीयत्वं वा स्यादित्यपि द्रष्टव्यमित्याहुः ।

(गा०) मूलोक्तावयवलक्षणे शाब्दज्ञानस्यानुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकत्वाभिधानं पञ्चवाक्यानामेकमहावाक्यार्थधीजनकत्वाभिमानेन प्रतिज्ञादिप्रतिपाद्यतत्तद्विशिष्टार्थगोचरशाब्दधीविशेषाणां परिचयायैव । तेषां निवेशस्तु विशिष्य तत्तदर्थविषयकशाब्दबुद्धित्वेन नतु तादृशशाब्दबोधजनकत्वेन, तथासत्येकैकावयवजन्यशाब्दबुद्धेरपि परामर्शप्रयोजकतया तज्जनकावान्तरवाक्यार्थज्ञानजनकेऽवयवावयवेऽतिप्रसङ्गस्य दुर्वारत्वात् । न च साध्यविशिष्टपक्षादिविषयकशाब्दबुद्धित्वेन बोधपञ्चकनिवेशेऽननुगमः जनकान्तस्य तत्तद्बोधजनकान्यतमत्वादिरूपानुगतधर्मावच्छिन्नपरत्वात् । न चैवं सति न्यायानन्तर्गते पर्वतो वह्निमानित्यादिवाक्येऽतिव्याप्तिः—वाक्यपदस्य न्यायान्तर्गतार्थकत्वादित्यभिप्रेत्य पर्यवसितं तल्लक्षणार्थमाह न्यायेति ।

अथ किमिदं न्यायान्तर्गतत्वम् ? न तावत्स्वाविषयकप्रतीत्यविषयन्यायकत्वम्—प्रतिज्ञाद्यविषयकप्रतीत्यापि हेत्वादिरूपन्यायैकदेशस्य विषयीकरणात्तद्घटितसमुदायात्मकन्याये प्रतिज्ञाद्यविषयकप्रतीत्यविषयत्वस्य दुर्घटत्वात्, एकदेशवृत्तेर्व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकाभावानङ्गीकारात् । नापि न्यायविषयिताव्यापकविषयिताकत्वम्—उच्चारणभेदेनैकानुपूर्व्यवच्छिन्नवाक्यानामपि भेदात्कस्याश्चिदपि प्रतिज्ञादिव्यक्तेर्विषयितायाः एकविधमपि न्यायमवगाहमानेषु सर्वेषु ज्ञानेषु वृत्त्यसम्भवात् ।

मैवम् । स्वाविषयकप्रतीत्यविषयन्यायकत्वमेव तत्, न्यायत्वसामानाधिकरण्यमात्रेण तादृशप्रतीत्यविषयत्वं विवक्षणीयम् । एकैकप्रतिज्ञादिव्यक्त्यविषयकप्रतीत्या व्यक्त्यन्तरघटितन्यायस्य तन्न्यायैकदेशहेत्वादेश्चावगाहनेऽपि न्यायत्वाधिकरणे तत्प्रतिज्ञाव्यक्तौ तत्प्रतिज्ञादिव्यक्त्यविषयकप्रतीत्यविषयत्वसत्त्वेन तासां तथात्वमव्याहतमेव । अथवा न्यायत्वाश्रयत्वमेव तथा पर्याप्त्यविवक्षया एकदेशस्यापि तथात्वोपपत्तेः । वस्तुतो न्यायत्वघटकस्य समु-

दायत्वांशस्यात्र निष्प्रयोजनकत्वेनानिवेशादुचितानुपूर्वीकत्वमात्रं विवक्षितम्। तदेव च न्यायान्तर्गतत्वं एकदेशसाधारणम्। उचितानुपूर्वीकत्वं च प्रतिज्ञोत्तरहेत्वादिघटितवाक्यपञ्चकानुपूर्वीविशेषावच्छिन्नभेदप्रतियोगितावच्छेदकत्वं विशिष्टधर्मावच्छिन्नप्रतियोगितावच्छेदकतायास्तद्घटकसमुदायपर्याप्ततया एकदेशस्यापि तदाश्रयत्वात्प्रतिज्ञादेस्तथात्वमक्षतम्। उपनयविशेषोत्तरत्वविशिष्टनिगमनत्वशरीरे च वैशिष्ट्यघटकतया निगमनस्याप्यन्तर्भावात्तत्साधारण्यमक्षतमेवोक्तधर्मस्य। विशिष्टस्यावच्छेदकतास्थले एकमवच्छेदकं अपरं च तद्विशेषणं तन्निष्ठावच्छेदकत्वावच्छेदकं न तु समुदायेऽवच्छेदकत्वं पर्याप्तमित्युपगमे च तादृशानुपूर्वीविशेषप्रकारकनिश्चयत्वसमनियतकारणतावच्छेदकाविषयिताकत्वं विवक्षणीयम्। तादृशी च तादृशानुपूर्वीविशिष्टवैशिष्ट्यबुद्धित्वावच्छिन्नकार्यतानिरूपितकारणता तदवच्छेदकत्वं च हेत्वादिनिष्ठानन्तर्यप्रकारतापन्नप्रतिज्ञादिविषयितानामप्यव्याहतं विनिगमनाविरहादितराविषयितानिरूपितत्वेन निश्चयत्वविशिष्टत्वेन च कारणीभूतज्ञानविषयसकलनिरूपितविषयितानां कारणतावच्छेदकत्वात्। प्रतिज्ञोत्तरहेत्वादिविशिष्टवैशिष्ट्यावगाहिबुद्धित्वावच्छिन्नकार्यतानिरूपितप्रतिज्ञोत्तरो हेतुरित्यादिज्ञानसाधारणकारणतां तादृशानुपूर्व्यवच्छिन्नभिन्नवाक्यत्वाद्यवच्छिन्नवैशिष्ट्यावगाहिबुद्धित्वावच्छिन्नकार्यतानिरूपिततादृशवाक्यत्वादिप्रकारकज्ञानकारणतां चादायोदासीनातिप्रसङ्गवारणाय कारणतायां तादृशधर्मव्याप्यत्वव्यापकत्वयोर्निवेशनम्। न च तादृशानुपूर्वीविशेषावच्छिन्नवैशिष्ट्यावगाहिबुद्धित्वावच्छिन्नकार्यतानिरूपितकारणताया अपि न तादृशानुपूर्वीविशेषप्रकारकनिश्चयत्वसमनैयत्यसम्भवः-प्रतिज्ञात्वादिना पदार्थान्तरावगाहितादृशानुपूर्वीप्रकारकज्ञानसमानाकारकज्ञानसाधारणत्वात्, तादृशज्ञानस्य वास्तवप्रतिज्ञाद्यविषयकत्वेन तद्घटितानुपूर्व्यप्रकारकत्वादिति वाच्यम्। प्रतिज्ञात्वाद्यवच्छिन्नप्रकारतानिरूपितहेतुत्वाद्यवच्छिन्नप्रकारतेति क्रमेण निगमनत्वावच्छिन्नविषयतापर्यन्तं निवेश्य तच्छालिनिश्चयत्वसमनैयत्यस्यैव विवक्षितत्वात्, तादृशनिश्चयत्वस्योक्तभ्रमसाधारण्येन क्षतिविरहात्। न चैवमुदासीनप्रतिज्ञाद्यानन्तर्यं हेत्वाद्यंशेऽवगाहते यो भ्रमस्तन्निष्ठतादृशप्रतिज्ञादिविष-

यताया अपि निरुक्तकारणतावच्छेदकतयाऽतिप्रसङ्गो दुर्वार इति वाच्यम्। भ्रमावृत्तिविषयितायाः एव निवेशनीयत्वादिति कृतं विस्तरेण।

अवयवैकदेशस्यावयवद्वयात्मकसमुदायस्य च वारणाय प्रतिज्ञाद्यन्यतमत्वमिति। अथ धूमादालोकवान्पर्वतो वह्निमान्धूमादित्यादिन्यायान्तर्गतप्रतिज्ञैकदेशे धूमादित्यादिभागेऽतिव्याप्तिः तस्यापि हेतुप्रतिपाद्यो यादृशविशिष्टार्थस्तन्मात्रबोधकत्वेन हेतुलक्षणाक्रान्ततया प्रतिज्ञाद्यन्यतमत्वाक्रान्तत्वात्। न च तद्धटकपञ्चम्याः प्रकृतसाध्यान्वितस्वार्थबोधकत्वाभावान्न वक्ष्यमाणहेतुलक्षणाक्रान्तत्वं तस्येति वाच्यम्। एवमपि धूमाद्वह्निमतः सधर्मा पर्वतो वह्निमानित्यादिप्रतिज्ञाघटकतादृशभागेऽतिप्रसङ्गस्य दुर्वारत्वादिति चेन्न। प्रकृतपक्षतावच्छेदकावच्छिन्नविशेषणतापन्नप्रकृतसाध्यतावच्छेदकावच्छिन्नान्वितस्वार्थबोधजनकवाक्यत्वरूपहेतुत्वस्यैव निवेशनीयतयाऽनतिप्रसङ्गात्। निगमनघटकस्य तस्मादितिभागस्य वारणाय विशेष्यदलं तज्जन्यबोधे तादृशविशिष्टविषयितावहिर्भूतव्याप्त्यादिविषयितासत्त्वेन तद्वारणात्।

ननु प्रतिज्ञाद्यन्यतमत्वं प्रतिज्ञादिभिन्नभिन्नत्वरूपं प्रतिज्ञाद्येकदेशसाधारणम् भेदस्याव्यासज्यवृत्तितया समुदायवृत्तित्वे एकदेशवृत्तिताया अपि दुर्वारत्वात्। अथ प्रतिज्ञादिभिन्नभेदानुयोगितावच्छेदकरूपवत्त्वं तत् तादृशं च रूपं प्रतिज्ञात्वादिकमेव न तु तदेकदेशपर्याप्तपर्वतपदत्वादिकं तदवच्छिन्ने व्यासज्यवृत्तिप्रतिज्ञात्वाद्यवच्छिन्नभेदसत्त्वादिति चेन्न। प्रतिज्ञाद्येकदेशे प्रतिज्ञात्वाद्यवच्छिन्नभेदसत्त्वे तादृशभेदावच्छिन्नभेदस्य प्रतिज्ञात्वाद्यवच्छिन्नेऽपि सत्त्वासम्भवात् प्रतिज्ञात्वपर्याप्त्यधिकरणसमुदायस्यैकदेशानतिरिक्तत्वात्। न हि व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताक एकदेशभेदः प्रामाणिकः—घटपटौ न घट इत्यादिप्रतीतेरसिद्धेः। प्रतिज्ञादिभेदपञ्चकानुयोगितावच्छेदकं यद्यद्रूपं तदवच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदकधर्मवत्त्वविवक्षणे च प्रतिज्ञाहेत्वादिसमुदायेऽतिव्याप्तिः—तादृशसमुदायत्वाद्यवच्छिन्ने प्रतिज्ञात्वाद्यवच्छिन्नभेदासत्त्वात्तादृशसमुदायत्वस्य निरुक्तरूपानन्तर्गतत्वेन तादृशसकलधर्मावच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदकत्वात्। प्रतिज्ञात्वाद्य-

वच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदकं यद्यत्तदवच्छिन्नप्रतियोगिताकभेदानुयोगितावच्छेदकत्वेनापि तादृशधर्मविशेषणे चातिगौरवमतो लघुलक्षणान्तरमाह प्रतिज्ञाद्यघटकत्व इति। अत्रापि न्यायान्तर्गतत्वे सतीत्यनुषज्यते, अतो न्यायबहिर्भूतवाक्यव्युदासः। प्रतिज्ञाद्येकदेशवारणाय प्रतिज्ञाद्यघटकत्वनिवेशनम्। तदर्थश्च प्रतिज्ञादिघटकतानवच्छेदकधर्मवत्त्वम् तेन प्रतिज्ञादिघटकतदेकदेशभेदस्य प्रतिज्ञात्वादिरूपव्यासज्यवृत्तिधर्मावच्छिन्नेऽनभ्युपगमेऽपि न क्षतिः। प्रतिज्ञादिघटकतावच्छेदकत्वं तु प्रतिज्ञात्वादिन्यूनवृत्तित्वं तच्च प्रतिज्ञात्वाद्यवच्छिन्नभेदानुयोगितावच्छेदकत्वे सति प्रतिज्ञात्वादिसमानाधिकरणत्वम्। तथात्वं च तदेकदेशवृत्तिपर्वतपदत्वादेस्तदवच्छिन्ने प्रतिज्ञात्वाद्यवच्छिन्नभेदसत्त्वान्न तु प्रतिज्ञात्वादेः, हेतुत्वादेः प्रतिज्ञात्वाद्यवच्छिन्नभेदानुयोगितावच्छेदकत्वात्तत्सङ्ग्रहाय विशेष्यदलम्। न च मिलितभेदपञ्चकानुयोगितावच्छेदकभिन्नत्वनिवेशे हेतुत्वांशे हेतुत्वादेर्हेतुत्वाद्यवच्छिन्नभेदानुयोगितावच्छेदकत्वविरहात्तादृशानुयोगितावच्छेदकभिन्नत्वमव्याहतमेवेति विशेष्यदलमनर्थकमेवेति वाच्यम्। धूमादालोकवान्पर्वतो वह्निमानित्यादिप्रतिज्ञाघटकधूमादित्यादिभागसाधारणस्य हेतुत्वस्य निवेशे तत्रातिप्रसङ्गभयेन मिलितभेदपञ्चकानुयोगितावच्छेदकत्वस्यैकत्र निवेशासम्भवात्।

वस्तुतस्तु तद्व्यावृत्तपूर्वोपदर्शितहेतुत्वनिवेशनेनैव तादृशभागवारणसम्भवान्मिलितभेदपञ्चकानुयोगितावच्छेदकत्वस्यैव निवेशनीयतया नोपादेयमेव विशेष्यदलम्। मिलितभेदपञ्चकानुयोगितावच्छेदकत्वस्य प्रतिज्ञादिघटकतावच्छेदकत्वानात्मकत्वे विशेष्यदले उभयाघटितत्वनिवेशनेनैवोपपत्तौ तद्घटकभागद्वयाघटितत्वपर्यन्तनिवेशवैयर्थ्यात्-प्रतिज्ञादिघटकभागहेतुद्वयघटितवृत्तिसमुदायत्वस्य प्रतिज्ञात्वाद्यवच्छिन्नभेदानुयोगितानवच्छेदकत्वेन प्रतिज्ञादिघटकतानवच्छेदकत्वदलेनैव वारणसम्भवात्। मिलितभेदपञ्चकानुयोगितावच्छेदकत्वस्य प्रतिज्ञादिघटकतावच्छेदकरूपत्वे तु प्रतिज्ञात्वपर्याप्त्यधिकरणहेत्वेकदेशहेतुत्वपर्याप्त्यधिकरणप्रतिज्ञैकदेशादिवृत्तिसमुदायत्वस्य प्रतिज्ञात्वहेतुत्वाद्यवच्छिन्नभेदानुयोगितानवच्छेदकतया तत्समुदायत्वमादायातिप्रसङ्गस्य वारणाय भागद्वयनिवेशपर्यन्तसार्थक्यात्। न च विभिन्नप्रतिज्ञादिव्यक्तिनिष्ठबुद्धिविशेषविषयत्वरूप-

समुदायत्वात्मकप्रतिज्ञात्वादिकं विभिन्नमेव, एकसाध्यहेतुकसकलप्रतिज्ञासमुदायत्वस्य प्रतिज्ञात्वे प्रत्येकं प्रतिज्ञादिव्यवहारस्यानुपपत्तेः, तथा चैकप्रतिज्ञात्वव्यक्तेरपरप्रतिज्ञात्वाद्यवच्छिन्नभेदानुयोगितावच्छेदकतया प्रतिज्ञात्वादिघटकतावच्छेदकत्वं दुर्वारमेवेति वाच्यम् । स्वसमानाधिकरणप्रतिज्ञात्वाद्यवच्छिन्नभेदानामनुगतरूपविशिष्टप्रतिज्ञात्वाद्यवच्छिन्नभेदानां वाऽनुयोगितावच्छेदकत्वस्यैव विवक्षणात् । घटकतानवच्छेदकधर्मश्च व्यासज्यवृत्तित्वेन विशेषणीयः, तेन न प्रतिज्ञाघटकवर्णान्यतमत्वादिकमादाय तदेकदेशेऽतिव्याप्तिः(१) ।

केचित्तु प्रतिज्ञादिघटकतावच्छेदकत्वं स्वाश्रयाविषयकप्रतीत्यविषयकप्रतिज्ञादिकत्वे सति प्रतिज्ञाद्यविषयकप्रतीतिविषयतावच्छेदकत्वं, सत्यन्तमनिवेश्य प्रतिज्ञादिविषयकत्वाभावकूटवत्प्रतीतिविषयतावच्छेदकत्वनिवेशे धूमाद्वह्निमतः सधर्मा पर्वतो वह्निमान् धूमादित्यादिन्यायान्तर्गतप्रतिज्ञैकदेशे धूमादित्यादिभागेऽतिव्याप्तिस्तत्र प्रकृतहेतुतावच्छेदकावच्छिन्नविशिष्टहेतुत्वप्रतिपादकत्वरूपहेतुत्वसत्त्वेन तत्प्रतीतेर्हेत्वविषयकत्वघटिताभावकूटवत्त्वाभावादतः प्रतिज्ञाद्यविषयकप्रतीतिविषयतावच्छेदकत्वाद्यवच्छिन्नभेदकूटवद्धर्मवत्त्वमेव प्रतिज्ञाद्यघटकत्वमित्यनेन विवक्षणीयम्, तथा चासंभववारणाय सत्यन्तमवच्छेदकाविशेषणं प्रतिज्ञाद्येकदेशाविषयकप्रतीतिविषयत्वस्य प्रतिज्ञात्वाद्याश्रयतदेकदेशान्तरे सत्त्वेन तदाश्रयसमुदायस्य तादृशप्रतीत्यविषयत्वासम्भवेऽपि प्रतिज्ञात्वाद्याश्रयतत्तदेकदेशस्य तत्तदेकदेशाविषयकप्रतीतिविषयान्यतयैव तत्तदेकदेशवृत्तिधर्मे सत्यन्तस्य निर्वाहः सम्भवति प्रतिज्ञापदस्य पर्याप्त्यतिरिक्तस्वरूपसम्बन्धेन प्रतिज्ञात्वाश्रयपरत्वात् । सत्यन्तस्थस्वपदेन प्रतिज्ञात्वादेरप्युपादातुं शक्यतयाऽसम्भव इति विशेष्यदलम् । तच्च प्रतिज्ञैकदेशमात्रवृत्तिपर्वतपदत्वादेरेव तदाश्रयमात्रविषयकप्रतीतिस्तत्समुदायस्वरूपप्रतिज्ञाद्यविषयकत्वस्याव्याहतत्वात्, न तु प्रतिज्ञात्वादेः एकदेशमात्रविषयकप्रतीतिविषयतायामतिप्रसक्तस्य तस्यावच्छेदकत्वासम्भ-

---

(१) न च प्रतिज्ञादिघटकयावद्वर्णवृत्त्यन्यतमत्वमादाय प्रतिज्ञाद्येकदेशेऽतिव्याप्तिः तादृशधर्मस्य प्रतिज्ञादिभेदानुयोगितावच्छेदकत्वात्प्रत्येकपर्याप्तत्वाच्चेति वाच्यम् । तादृशधर्मस्य व्यासज्यवृत्तित्वेन विशेषणीयत्वात् । इति पाठान्तरम् ।

वात् । न चैकदेशमात्रविषयिकाया अपि प्रतीतेः प्रतिज्ञात्वाद्याश्रया-विषयत्वासम्भवेन तदाश्रयसमुदायाविषयकत्वविवक्षणे एकैकप्रतिज्ञादिविषयिकाया अपि प्रतीतेः प्रतिज्ञात्वाद्याश्रयापरव्यक्त्यविषयकत्वेन तदाश्रयसमुदायाविषयकतया एकैकप्रतिज्ञादिव्यक्तिपर्याप्तप्रतिज्ञात्वादिकं तादृशप्रतीतिविषयतावच्छेदकमेव तदनतिप्रसक्तत्वादिति वाच्यम् । स्वाश्रयाविषयकप्रतीत्यविषयता यादृशप्रतिज्ञात्वाद्याश्रये तादृशप्रतिज्ञात्वाद्याश्रयवर्णसमुदायाविषयकप्रतीतिविषयतावच्छेदकत्वविवक्षया प्रतिज्ञादिविषयकसकलप्रत्ययानामेव तादृशसमुदायविषयकत्वेनादोषात् । अवच्छेदकत्वं चेहानातिरिक्तवृत्तित्वमेव न तु स्वरूपसम्बन्धविशेषः, तेन प्रतिज्ञात्वादिना तदेकदेशमात्रविषयकज्ञानविषयतायां प्रतिज्ञात्वादेस्तथाविधावच्छेदकत्वसत्त्वेऽपि न क्षतिः । तथाविधयत्किञ्चिदेकज्ञानविषयतात्वावच्छिन्नानतिरिक्तवृत्तित्वमिह निवेशनीयम्, तेन प्रतिज्ञादिघटकेषु सकलवर्णेष्वेव प्रतिज्ञाद्यविषयकप्रतीतिविषयत्वसत्त्वेन तादृशाविषयतासामान्यशून्याप्रसिद्धावपि स्वव्यापकतादृशविषयतात्वावच्छिन्नकत्वस्य प्रतिज्ञात्वादिसाधारणत्वेपि न क्षतिरिति वदन्ति ।

तदसत् । एतदपेक्षया उक्तप्रतिज्ञाद्यन्यतमत्वस्यैव लघुत्वात्तन्मात्रानिर्भरस्यानिर्बीजतापातात् । एतेन प्रतिज्ञादिघटकतावच्छेदकत्वं स्वसमानाधिकरणस्वानधिकरणवृत्तिप्रतिज्ञात्वादिकत्वमित्यपि हेयम्—स्वत्वाननुगमेन तादृशं स्वं यद्यद्विशिष्य तावतामनन्तभेदानां निवेशनीयतया महागौरवात् ।

प्रतिज्ञाहेत्वादिसमुदायवारणाय उभयेत्यादि उभयघटकभागद्वयावृत्तिधर्मवत्त्वार्थकम्, तथाच प्रतिज्ञादिघटकतानवच्छेदकत्वे सति उभयघटकभागद्वयावृत्तिर्यो धर्मस्तद्वत्त्वं दलद्वयार्थः । प्रतिज्ञाद्येकैकावयवघटकभागद्वयस्यापि यत्किञ्चिदुभयघटकत्वादसम्भव इत्यतः प्रतिज्ञाहेत्वाद्युभयचतुष्टयस्य विशिष्योभयपदार्थतामाह उभयं चेति । इति विशिष्य वक्तव्यमित्यग्रिमेणान्वयः । इति—इतिरीत्या, प्रतिज्ञाहेत्वाद्योरपि प्रतिज्ञाहेतूभयत्वादिना न घटकत्वांशे विशेषणता तादृशोभयघटकभागाप्रसिद्धेः, किन्तु प्रत्येकं प्रतिज्ञात्वहेतुत्वादिना, तथाच प्रतिज्ञाघटको यो भागः यश्च हेतुघटकस्तदुभयाघटितत्वमिति क्रमेणाघटितत्वचतुष्टयं निवेशनीयम् । प्रतिज्ञाहेत्वाद्येकदेशघटित-

समुदायवारणाय घटकभागनिवेशनम । प्रतिज्ञादिघटकत्वं चैकदेशसाधारणं प्रतिज्ञात्वाद्याश्रयत्वं नान्यत् गौरवात्, तथाच प्रतिज्ञात्वाद्याश्रयहेतुत्वाश्रयोभयावृत्तित्वादिरूपविशेषणचतुष्टयं धर्मविशेषणं पर्यवसितम । न चैवं धूमाद्वह्निमतः सधर्मा पर्वतो वह्निमान् धूमादित्यादिन्यायघटकप्रतिज्ञायामव्याप्तिः तस्याः हेतुलक्षणाक्रान्तभागघटितत्वेनोभयघटकभागद्वयघटितत्वात्तद्व्यावृत्तस्य पूर्वोपदर्शितहेतुत्वस्य निवेशेऽपि निगमनेऽयंपदानुषङ्गपक्षे तत्रोपनये चाव्याप्तिर्दुर्वारैव तस्योपनयघटकेनायंपदेनोपनयस्य च तद्घटकेन तेन घटितत्वादिति वाच्यम् । अनुषङ्गपक्षे उपनयघटकभागनिगमनघटकभागद्वयाघटितत्वशरीरे उपनयाघटकत्वेन निगमनघटकस्य निगमनाघटकत्वेन चोपनयघटकस्य भागस्य विशेष्यवाचकपदातिरिक्तत्वेन वा भागद्वयस्य विशेषणीयत्वात् । अयं तस्मादित्यादिभागस्य च सत्यन्तेनैव वारणात् । स्वानाश्रयान्तरितभागद्वयवृत्त्यन्यत्वेन च धर्मो विशेषणीयः, तेन हेत्वाद्यंशपरित्यागेन प्रतिज्ञोदाहरणादिसमुदाये नातिप्रसङ्गः ।

वस्तुतस्तु प्रतिज्ञा हेतुः इत्यादौ हेत्वादिपदं प्रतिज्ञाद्यतिरिक्तपरम् तथाचोदाहरणादेः प्रतिज्ञाद्यतिरिक्तत्वान्न दोषः । प्रतिज्ञाद्यतिरिक्तत्वं च प्रतिज्ञाद्येकदेशव्यावृत्तं प्रतिज्ञात्वाद्यनाश्रयत्वमेव पर्यवसितं बोध्यमिति दिक् ।

मूलस्थं शाब्दज्ञानजनकशाब्दज्ञानान्तमन्यतमत्वेनानुगतरूपेणावयवप्रतिपाद्यतत्तद्विशिष्टार्थविषयकशाब्दबोधपरमतो नाननुगमः, नाद्यशाब्दबोधजनकानां वाक्यानामन्यतमत्वेनानुगमे व्यासज्यवृत्तिधर्मावच्छेदेनैकदेशवृत्तिधर्मावच्छिन्नानुयोगिताकान्योन्याभावानभ्युपगमे पूर्वोक्तानुपपत्तिप्रसङ्गात् शाब्दबोधानामेवान्यतमत्वेनोपात्तुं युक्तत्वादित्यभिप्रायेण मूलोक्तावयवलक्षणमन्यथा व्याचक्षाणानां केषांचिन्मतमाह प्रतिज्ञादिप्रतिपाद्येति । विशिष्य निवेश्यानां विशिष्टार्थविशेषाणां साध्यविशिष्टपक्षादीनां परिचायकमात्रमेतत्, न तु प्रतिज्ञादिप्रतिपाद्यत्वेन तेषां निवेशः विशिष्टार्थविशेषमनन्तर्भाव्य प्रतिज्ञात्वादीनां दुर्निर्वचतया तेषां विशिष्य निवेशनस्यावश्यकत्वे तत्तद्विशिष्टार्थविषयकबोधजनकवाक्यप्रतिपाद्यत्वेन तत्तद्विशिष्टार्थनिवेशनस्य शिरोवेष्टनेन नासिकास्पर्शतुल्यत्वात् एतत्सूचनायैव तत्तदित्युक्तम् । न

चात्र नानावयवजन्यसमूहालम्बनबोधं प्रतिज्ञाहेत्वादिजन्यावैशिष्ट्या- र्थबोधं चादाय तज्जनकसमुदायेऽतिव्याप्तिः तत्तद्विशिष्टार्थबोधनिष्ठ- तत्तदेकदेशबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकताश्रयावयवैकदे- शे चातिव्याप्तिरिति वाच्यम्। तत्तद्विशिष्टार्थविषयकशाब्दबुद्धित्वा- वच्छिन्नजन्यता अन्यतमत्वेनोपादाय तत्तन्निरूपितजनकतावच्छेदक- धर्मपर्याप्त्यधिकरणताया निवेशनीयत्वात्, तादृशो धर्मः पर्वतो वह्निमानित्यादिवाक्यत्वमेव तादृशवाक्यत्वस्य व्यासज्यवृत्तितया नैकदेशेऽतिव्याप्तिः। तादृशशाब्दबुद्धित्वावच्छिन्नत्वं च तादृशशाब्द- बुद्धित्वपर्याप्तावच्छेदकताकत्वम्, अतः प्रतिज्ञाहेतुसमुदायादेः सा- ध्यविशिष्टपक्षावगाहिशाब्दत्वघटितधर्मावच्छिन्नजनकत्वेऽपि नातिप्र- सङ्गः। वाक्यज्ञानस्य जनकतामते तु तादृशजनकतायां विषयिता- सम्बन्धेन यादृशधर्मावच्छिन्नं यादृशधर्मावच्छिन्नविषयकत्वं वा अवच्छेदकं तादृशधर्मपर्याप्त्याश्रयत्वं विवक्षणीयमिति नासम्भवः। तादृशोऽपि धर्मः पर्वतो वह्निमानित्यादिवाक्यत्वमेव।

अथाकांक्षादिमत्पदसमूहत्वरूपमेव वाक्यत्वं व्यासज्यवृत्तितद- वच्छिन्नविषयकज्ञानत्वेन च न शाब्दबुद्धिजनकत्वं समूहत्वज्ञानस्या- नुपयुक्तत्वात्, किन्त्वानुपूर्वीविशेषात्मकाकांक्षावच्छिन्नविषयकज्ञा- नत्वेनैव तथात्वम्। आनुपूर्वीविशेषश्चैकवर्णानन्तरापरवर्णानन्तर्यरूपो न व्यासज्यवृत्तिरित्येकदेशेऽतिप्रसङ्गो दुर्वारः। न च तादृशजनकता- वच्छेदकीभूतविषयितानिरूपकवर्णसमुदायत्वमेव विवक्षणीयमतो नाऽतिप्रसङ्ग इति वाच्यम्। तत्तत्प्रतिज्ञादिव्यक्तिभिन्नप्रतिज्ञादिघ- टकवर्णानामपि तादृशसमुदायघटकतया क्वचिदप्यवयवव्यक्तौ ता- दृशसमुदायत्वापर्याप्तिः प्रत्येकमवयवव्यवहारानुपपत्तेः।

मैवम्। तादृशबोधजनकतावच्छेदकीभूतयत्किञ्चिज्ज्ञानीयविष- यितानिरूपकवर्णसमुदायत्वस्य विवक्षणीयत्वात्। तादृशं च ज्ञानं तथाविधजनकताद्वयशून्यत्वेन विशेषणीयं, तेन प्रतिज्ञाहेत्वादिसमु- दाये नाऽतिव्याप्तिः। न चैवं हेत्वर्थप्रतिपादकभागघटितप्रतिज्ञावि- शेषेऽव्याप्तिः तद्विषयकज्ञाने हेत्वर्थबोधकतानियमादिति वाच्यम्। व्याप्यव्यापकभावानापन्नजनकताद्वयशून्यताया निवेशनीयत्वात्।

वस्तुतस्तु स्वानवच्छेदकविषयिताविशिष्टतादृशजनकतानाश्र- यत्वं ज्ञाने विशेषणं देयम्। स्वं-जनकता। प्रतिज्ञाहेतूभयादिविषयक-

ज्ञानं च प्रतिज्ञार्थबोधजनकतानवच्छेदकीभूतहेत्वादिविषयिताविशिष्टतादृशजनकताश्रय एव, धूमादालोकवान् पर्वतो वह्निमानित्यादिप्रतिज्ञामात्रविषयकज्ञानं च न तादृशविशिष्टजनकताश्रयस्तन्निष्ठहेत्वर्थबोधजनकतावच्छेदकविषयिताया अपि विशिष्टप्रतिज्ञार्थबोधजनकतायामवच्छेदकत्वात् ।

एतेन व्याप्यव्यापकभावानापन्नतथाविधजनकताद्वयशून्यत्वप्रवेशे धूमादालोकवान्पर्वतो वह्निमान्धूमादित्यादिसमुदायेऽतिव्याप्तिः—तादृशसमुदायविषयकज्ञाननिष्ठप्रतिज्ञार्थबोधजनकत्वहेत्वर्थबोधजनकत्वयोर्व्याप्यव्यापकभावसत्त्वात् व्याप्यव्यापकभावानापन्नतथाविधजनकताद्वयशून्यत्वादिति निरस्तम् । तादृशवाक्यविषयकज्ञानीयप्रतिज्ञाघटकहेतुसमानाकारकवाक्यविषयिताया विशिष्टप्रतिज्ञार्थबोधजनकतावच्छेदकत्वेऽपि प्रतिज्ञावाक्यविषयितानन्तःपातिन्या हेतुविषयितायास्तादृशजनकतानवच्छेदकत्वात् । यदि चोदासीनपदार्थविषयितानियतविषयिताकावयवव्यक्तिः प्रामाणिकी तदा स्वानवच्छेदकविषयिता तथाविधजनकतावच्छेदकत्वेन विशेषणीया । तादृशावयवव्यक्तिविषयकज्ञानेऽवयवान्तरविषयितानैयत्यस्य प्रामाणिकत्वे त्वगतिरेवेति ध्येयम् । समानाकारकप्रतिज्ञाद्वयाद्यात्मकसमुदायत्वस्यावयवत्वपर्याप्त्याश्रयत्वमिष्टमेव तस्यातथात्वे तद्वारणप्रकारोऽपि चिन्तनीयः । न्यायान्तर्गतत्वस्यापि निवेशनीयतया नोदासीनवाक्यसाधारण्यमिति बोध्यम् ।

अत्र च यत्किञ्चित्त्वनिवेशादननुगमो दुर्वारः । एवं प्रतिज्ञाघटकहेत्वर्थप्रतिपादकभागेऽतिव्याप्तिः । एवमुदाहरणस्य वाक्यद्वयात्मकस्य संग्रहाय तत्प्रतिपाद्यसाध्यविशिष्टधर्मिविषयकशाब्दत्वावच्छिन्नजन्यता तथाविधहेतुविशिष्टधर्मिकशाब्दत्वावच्छिन्नजन्यता च अन्यतमजन्यतागर्भे निवेशनीया, तथाच तद्घटकप्रत्येकवाक्येऽतिव्याप्तिः । तादृशार्थद्वयविषयकबुद्धित्वं च समुदायस्यापि जन्यतावच्छेदकमिति तदवच्छिन्नैकजन्यतानिवेशासम्भवात् । न च जनकता एवान्यतमत्वेन निवेशनीयाः तच्छरीरे चोदाहरणप्रतिपाद्यतत्तद्विशिष्टार्थबुद्धित्वावच्छिन्ननिरूपितजनकताद्वयं द्वित्वेन निवेशनीयं अतः एकैकजनकताश्रयप्रत्येकभागाविषयकज्ञानमादाय न प्रत्येकभा-

गेऽतिव्याप्तिरिति वाच्यम्। उभयभिन्नत्वस्य प्रत्येकमुभयत्र सत्त्वात् उभयभिन्नभिन्नत्वस्योभयत्रासम्भवात् अन्यतमत्वेनोभयोपादानासम्भवात्। व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकभेदोपगमे तु तादृशान्यतमत्वाश्रयप्रत्येकजनकतामादायातिप्रसङ्गस्य दुर्वारत्वात्। पूर्वकल्पे तु प्रतिज्ञाद्यघटकत्वविशेषणेनैव नातिप्रसङ्गावकाशः यो यो धूमवानित्यादिप्रत्येकवाक्यस्य वाक्यद्वयात्मकोदाहरणघटकत्वात्। न च वाक्यद्वयपर्याप्तमुदाहरणत्वं दुर्वचं स्वघटकयत्पदोपस्थाप्यधर्मिणि हेतुमत्त्वबोधकं यद्वाक्यं यच्च तदनन्तरप्रयुक्तं स्वघटकतत्पदोपस्थाप्यतादृशधर्मिणि साध्यवत्त्वाबोधकं वाक्यं तदुभयत्वस्यैव तथात्वात्। अथात्रापि प्रतिज्ञाद्यघटकत्वं निवेशनीयमिति चेत्तर्हि गुरुशरीरस्य तादृशविषयतानिरूपकवर्णसमुदायत्वस्य निवेशापेक्षया निरुक्तोभयघटकभागद्वयाघटितत्वनिवेशनमेवोचितमित्यरुचिबीजमवसेयम्।

ननु न्यायजन्यज्ञानस्याप्युपनयार्थसाध्यव्याप्यवत्पक्षावगाहितया परामर्शरूपत्वात्परामर्शजनकवाक्यत्वमेव न्यायत्वं कुतो नोच्यते, एवं तादृशवाक्यघटकवाक्यमेवावयवत्वमस्तु किमुक्तगुरुतरन्यायतदवयवलक्षणानुसरणेनेति प्रतिज्ञादिपञ्चकस्य विशिष्टैकार्थप्रतिपादकत्वाभिमानिनां शङ्कां मूलकृन्निराकरोति अत एवेति। तादृशलक्षणमुपेक्ष्य यथोक्तलक्षणकरणादेवेत्यर्थः। परामर्शस्य–परामर्शमात्रस्य। परामर्शजनकस्य–परामर्शजनकमात्रस्य। मात्रपदात्पूर्वोपवर्णितन्यायतदवयवलक्षणघटकशाब्दबोधविशेषौ क्रमेणव्यवच्छेद्यौ।

वाक्यपञ्चकसमुदायस्यैव प्रत्येकवाक्यस्यापि न्यायत्वमिष्टमेव परामर्शप्रयोजकवाक्य एव न्यायव्यवहारात्तत्त्वस्य समुदायवत्प्रत्येकमात्रेऽपि सत्वात्। एवञ्च परामर्शप्रयोजकवाक्यत्वमेव न्यायलक्षणमिति केचित्। तन्मतमुपन्यस्यति यत्त्विति। सङ्क्षेपतः–लाघवतः। सोऽपि न्याय एवेत्यनेनान्वयः। परामर्शप्रयोजकेति। वह्निव्याप्यधूमवानयमित्यादिवाक्यस्यापीत्यादिः। विशेषेति। वाक्यपञ्चकात्मकसमुदायादित्यादिः।

यादृशवाक्यप्रयोगो नार्थान्तरादिनिबन्धननिग्रहप्रयोजकस्तदेव न्यायव्यवहारविषय इति नियमाभिप्रायेण दूषयति तन्नेति। कथायां–विचारसमये। आकांक्षाक्रमेणैवाभिधानं निग्रहाप्रयोजक-

मिति शेषः । इति-अतः, तदभिधाने निग्रहादित्यग्रिमेणान्वयः । विशिष्टवैशिष्ट्ये-पक्षस्य व्याप्तिविशिष्टहेतुमत्त्वे । आकांक्षा-जिज्ञासा, नास्तीति । विप्रतिपत्तितः साध्यतदभावसंशयवतस्तदेकतरकोटि-जिज्ञासा प्रथममुदेति ततः प्रतिज्ञावाक्यात्सन्निश्चये तद्धेतौ तत्प्रतीतौ च तद्गमकतौपयिकव्याप्तौ तदनन्तरमेव च पक्षस्य तादृशहेतुमत्त्व इति भावः । तदभिधाने-विशिष्टवैशिष्ट्यप्रतिपादकवाक्योच्चारणे । अत्रापि प्रथममित्यनुषज्यते । अन्यथा-लाघवमात्रमादृत्य तस्य लक्षणत्वोपगमे । परामर्शजनकतयेति । लाघवाद्वाक्यत्वमप्यनन्तर्भाव्य परामर्शजनकत्वमात्रस्य लक्षणत्वौचित्यादिति भावः । ननु मध्यस्थाकांक्षा यतो निवर्त्तते स एव न्यायः सा च शाब्दत्वप्रकारिका विषयसिद्धिनिर्वाहकशब्दादेव निवर्त्तते न तु प्रमाणान्तरादिति न चक्षुरादेर्न्यायत्वमत आह आकांक्षेति । आकांक्षानिवृत्तिविरह इत्यर्थः । तुल्य एवेति । व्याप्यवत्ताबोधकवाक्यस्य प्रथमप्रयोगेऽपि साध्यसन्देहाद्यधीनानां मध्यस्थाकांक्षाणामनिवृत्तेरिति भावः । दुर्निरूपं-असम्भवि । जनकताया अवच्छेदकानियतत्वात्तज्ज्ञानस्यावच्छेदकज्ञानाधीनत्वादिति भावः ॥ लक्षणान्तरसम्भवस्य लक्षणेऽदोषतया तस्यैव लक्षणत्वादितिमूलमसङ्गतमतो दीधितिकृद्भावं व्याचष्टे तथाचेति । तादृशानुगतरूपस्वीकारे चेत्यर्थ । साधकाभाव इति । तादृशधर्मस्यैव न्यायादिपदप्रवृत्तिनिमित्तत्वसम्भवेन तत्प्रवृत्तिनिमित्ततया ज्ञाननिष्ठजातिविशेषसिद्ध्यसम्भवाद्युक्त्यन्तरस्य चासत्त्वादिति भावः । बाधकमित्यस्य प्रतिज्ञादिजन्यतावच्छेदकजातावित्यादिः । तेन वक्ष्यमाणसंकरस्य न्यायजन्यतावच्छेकजातावसम्भवेऽपि न क्षतिः । अन्यथेति मूलस्य प्रतिज्ञादिजन्यतावच्छेदकजातिस्वीकारे संकीर्णजातिस्वीकारप्रसङ्ग इत्यर्थकत्वमभिप्रेत्य संकरं विवृणोति न्यायेति । न्यायजन्यं च ज्ञानं विशिष्टैकार्थविषयकं तावद्वाक्यार्थविषयकसमूहालम्बनरूपं वेत्यन्यदेतत् । पञ्चेति । जातय इत्यग्रिमेणान्वयः । तथाच तत्रैव प्रतिज्ञादिजन्यतावच्छेदकपञ्चजातीनां समावेश इति भावः । अन्यत्रापि सामानाधिकरण्यमाह द्वित्रादीति । मिथो व्यभिचारितामाह एकैकेति । नन्वेकैकजन्यनानावयवजन्यबोधगततत्तदवयवजन्यतावच्छेदकजातीनां नानात्वोपगमान्न संकरावकाश इत्यत आह तत्र तत्रेति । सुतरां मानाभाव इति । प्रतिज्ञाहेत्वादिनानावयवजन्य-

बोधनिष्ठप्रतिज्ञादिजन्यतावच्छेदकजातेर्हेत्वादिजन्यतावच्छेदकतया हेत्वादावपि प्रतिज्ञादिलक्षणातिव्याप्त्यापत्त्या तादृशजातिघटितलक्षणकरणासम्भवेन तादृशजातौ लक्षणानुरोधरूपयुक्तेरनवकाशात्। एकैकावयवजन्यबोधवृत्तिजातीरुपादाय स्वरूपयोग्यतघटितलक्षणस्य निर्दोषत्वेऽपि तदुभयादिजन्यबोधे तत्तज्जात्यभावनिर्वाहकप्रतिबध्यप्रतिबन्धकभावकल्पने महागौरवात्। तत्तज्जात्यवच्छिन्नजनकतावच्छेदकत्वेनाभिमतानां गुरुशरीराणामपि यथोक्तधर्माणां प्रतिज्ञादिपदप्रवृत्तिनिमित्तत्वौचित्येन तत्तज्जातिकल्पनं प्रतिज्ञादिपदप्रवृत्तिनिमित्तलाघवरूपाया अपि युक्ते रनवकाशादिति भावः। अननुगमेन तत्तज्जातिघटितलक्षणासम्भवाल्लक्षणानुपपत्तिरूपयुक्तेः सुदूरपराहतत्वादिति भाववर्णनमनुपादेयम्। एकैकजन्यबोधवृत्तिजातिमादायैव स्वरूपयोग्यताघटितलक्षणकरणसम्भवात्।

अन्यथेत्यादिमूलमन्यथा व्याचक्षाणानां मतमाह केचित्त्विति। तदेत्यन्तमन्यथेत्यस्यार्थः। कदाचिदिति हेत्वादिजन्य इत्यत्रापि अनुषज्यते, तेन व्यभिचारितादिलाभः। स्यादिति। वर्त्ततेत्यर्थः नियामकाभावादिति भावः। ननु नियमेन सर्वत्रैव प्रतिज्ञाजन्यबोधे हेत्वादिजन्यव्यक्तिवृत्तिजातिमत्त्वसम्भवेन परस्परव्यभिचारिताया दुर्घटत्वात् न संकरावकाश इत्यतो बाधकान्तरं पूरयति सर्वेषामिति। सर्वत्र सर्वजातिसत्त्वे सर्वजातीनां समनैयत्याद्भेद एव दुर्लभ इति सर्वजातीयत्वप्रसङ्गोऽसङ्गत इत्यत आह एकेति। इत्थं च विजातीयशाब्दबोधजनकत्वघटितप्रतिज्ञादिलक्षणमसम्भवदुक्तिकमेवेति भावः। अत्र चानुगतकारणाभावेऽप्यननुगतकारणघटितसामग्रीणां जातिविशेषनियामकत्वं सम्भवतीति नोक्तरीत्या जातिसंकराद्यवकाशः, अन्यथाऽनुमितित्वादिजातेरप्यनियमेन प्रत्यक्षादिसाधारण्यापत्तेः, तत्रापि वह्निव्याप्यवत्तापरामर्शादीनामननुगतत्वादनुगतस्य कस्यचित्कारणस्य सम्भवेऽपि तस्यातिप्रसक्तत्वात् तादृशस्य प्रकृतेपि सम्भवाच्च। न च व्यभिचारेण तादृशजात्यवच्छिन्नशाब्दबोधं प्रत्यननुगतस्य कारणत्वासम्भवात्तादृशजातीनां कारणनियत्वं न सम्भवतीत्येकस्यान्यजातीयताप्रसङ्गो दुर्वार इति वाच्यम्। अनुमितौ परामर्शस्येव प्रकृतेऽननुगतकारणस्य कार्यतावच्छेदकसंकोचेन व्यभिचारवारणसम्भवादित्यस्वरसबीजमवसेयम्। न चानुगतनियाम-

काभावस्याकिंचित्करत्वेऽनुगतानतिप्रसक्तरूपं दुर्निरूपमिति मूलासङ्गतिरिति वाच्यम् । स्वमतेऽनुगतनियामकाभावे न निर्भरः, अपि तु न्यायजन्यबोधादौ संकररूपबाधक एवेति वक्तुं शक्यतया तादृशबाधकस्य विचारासहत्वेपि क्षतिविरहात् ।

इदं पुनरिहावधेयम् प्रतिज्ञाद्यवयवादित्यादिमूलं न जातिविशेषघटितप्रतिज्ञालक्षणाभिप्रायकं तथासति तादृशप्रतिज्ञादिलक्षणस्यात्रैव निराकृतत्वेन प्रतिज्ञाग्रन्थे प्रतिज्ञाजन्यविजातीयज्ञानमित्यादिना जातिघटितं लक्षणमाशङ्क्यानेनैव दोषेण तन्निराकरणस्य पौनरुक्त्यापत्तिः, किन्त्ववयवसामान्यलक्षणपरं प्रत्येकमित्यस्यावयवान्तरासहकारेणेत्यर्थः, तेन न्यायजन्यबोधतो वाक्यैकवाक्यत्वाधीनप्रतिज्ञाहेत्वादिजन्यबोधतश्च वैलक्षण्यलाभेन तदात्मकसमुदायेऽतिव्याप्तिशङ्कानिरासः । विजातीयत्वं च प्रतिज्ञाद्येकदेशजन्यबोधावृत्तिजातिमत्वं, तेनावयवैकदेशातिव्याप्तिशङ्कानिरासः । मूले तज्जनकशब्दत्वं तल्लक्षणमित्येव पाठः । तल्लक्षणमित्यस्यावयवलक्षणमित्यर्थः । एवं चान्यथेत्यादिमूलस्य प्रतिज्ञाहेत्वादिजन्यतावच्छेदकजातीनां परस्परसंकरपरत्वं न घटत इति । यदि लक्षणनुरोधमात्रेण जातिस्वीकारस्तदा तत्साध्यपक्षहेतुकन्यायादिलक्षणानुरोधेनापि विभिन्नसाध्यकन्यायजन्यशाब्दबोधेषु विभिन्नानां प्रतिज्ञाद्येकदेशजन्यबोधावृत्तिनानाजातीनां स्वीकरणीयतया तासां च तथाविधाद्विन्नादिन्यायजन्यबोधे समावेशेन संकीर्णजातिस्वीकारप्रसङ्ग इति तादृशमूलार्थः । यदि च संकररूपबाधकभयेन जातिकल्पनासम्भवाज्जातिघटितन्यायविशेषादिलक्षणं न संभवतीत्यन्यथैव तत्साध्यपक्षहेतुकन्यायादयो निर्वचनीया इत्युच्यते, तदा व्याप्त्यादिपदस्येव न्यायादिपदस्यापि नानार्थत्वे क्षतिविरहात्, सर्वसाधारणन्यायत्वादिनिर्वचनानुरोधेन जातिस्वीकारोऽप्यनुचित इति भावः । दीधितिकारस्तु तत्तज्ज्ञीजनकशब्दत्वं तत्तल्लक्षणमिति मूलपाठाभिप्रायेण प्रतिज्ञाहेत्वादिजन्यतावच्छेदकजातीनां न्यायजन्यबोधादौ संकरपरतया जातिसंकरप्रसङ्ग इति मूलं व्याख्यातवान् तादृशपाठे तद्ग्रन्थस्यावयवसामान्यलक्षणपरत्वानुपपत्तेः । एवं च सत्यगत्या भिन्नप्रस्तावे जातिघटितप्रतिज्ञालक्षणदूषणं विस्मृत्य प्रतिज्ञाग्रन्थे पुनस्तदाशङ्केति यथाकथञ्चिदर्वाग्रमग्रन्थावतारो बोध्यः ।

(चि०) तत्र प्रतिज्ञा न साध्यनिर्देशः—साध्यपदेऽतिव्याप्तेः, किन्तूद्देश्यानुमितिहेतुलिङ्गपरामर्शप्रयोजकवाक्यार्थज्ञानजनकत्वे सत्युद्देश्यानुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकं वाक्यम् ।

(दी०) साध्यनिर्देशः प्रतिज्ञेति सूत्रम् । साध्योऽनुमेयधर्म्मविशिष्टो धर्म्मी, तथा च पक्षतावच्छेदकपर्वतत्वादिविशिष्टे साध्यतावच्छेदकवह्नित्वादिविशिष्टवैशिष्ट्यज्ञानजनको न्यायावयव इति पर्य्यवसितोऽर्थः । उदाहरणाच्च साध्यतावच्छेदकविशिष्टज्ञानं न पक्षतावच्छेदकविशिष्टे उपनयाच्च पक्षतावच्छेदकविशिष्टे न साध्यतावच्छेदकविशिष्टवैशिष्ट्यज्ञानमिति तयोर्व्युदासः ।

किन्त्वित्यादि । प्रकृतन्यायबहिर्भूतवाक्यवारणाय सत्यन्तं प्रकृतन्यायावयवत्वपर्य्यवसितार्थकम् । उद्देश्येति । प्रकृतेत्यर्थः । वह्निसाध्यकन्यायोपनयस्य वह्निव्याप्यधूमसाध्यकानुमित्यन्यूनानतिरिक्तविषयकज्ञानजनकस्य वारणाय प्रकृतद्वयम्, तथाच यादृशसाध्यपक्षकन्यायावयवत्वं तादृशसाध्यपक्षकानुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकत्वं पर्य्यवसितार्थः । धूमादालोकवान् पर्वतो वह्निमान् धूमादित्यादावनतिरिक्तविषयकज्ञानजनकस्य हेतोर्वारणाय अन्यूनेति । निगमनवारणाय अनतिरिक्तेति ।

यद्यपि निगमने साक्षात्पक्षवाचकं पदं न श्रूयते, तथापि न्यूनताभङ्गायोपनयस्थायमादिपदस्यानुषङ्गात्तथा बोध्यम् । इत्थमेव च प्रसक्तामतिप्रसक्तिं निगमनञ्चेत्यादिना निराकरिष्यति । तदर्थश्च निगमनमन्यूनानतिरिक्तविषयकज्ञानजनकं सत्त्र परामर्शहेतुर्येन निरुक्तन्यायावयवत्वरूपं प्रतिज्ञात्वं तदपि

व्याप्त्युपात् अबाधितत्वादेस्तद्बोधौपयिकविशिष्टहेतुसम्बन्धस्य वा बोधकतया तस्यातिरिक्तविषयकज्ञानजनकत्वादिति ।

(गा०)साध्यपदमनुमितिविधेयवाचकपरमित्यभिप्रायेण मणिकारदूषितं सूत्रकारीयप्रतिज्ञालक्षण साध्यपदस्य प्रकृतानुमितिविधेयविशिष्टार्थपरतां स्वीकृत्य परिष्कर्त्तुमारभते साध्येति । सामान्यतो विधेयत्वस्य धर्मित्वस्य च केवलान्वयितयाऽवयवान्तरे विधेयविशिष्टधर्मिबोधकत्वमतिप्रसक्तम्, एवं च प्रतिज्ञासमानाकारे न्यायबहिर्भूतवाक्येऽपीत्यत साध्यपदस्य तद्विशेषपरत्वं निर्देशपदस्य च बोधजनकन्यायावयवरूपवाक्यविशेषपरत्वमनुस्मृत्य पर्यवसितार्थमाह तथाचेति । पक्षतावच्छेदकसाध्यतावच्छेदकयोर्न तत्त्वेन निवेशः, अपि तु विशिष्येवेति सूचनाय पर्वतत्वादीति वन्हित्वादीति च । तादृशविशिष्टवैशिष्ट्यावगाहिशाब्दबोधत्वावच्छिन्नजनकयत्किञ्चिज्ज्ञानविषयवर्णसमुदायत्वमिह विवक्षणीयमतो हेत्वर्थादिविषयकप्रतिज्ञार्थबोधजनकताया हेत्ववयवादिमात्रविषयकबोधसाधारण्येऽपि न हेत्ववयवादावतिव्याप्तिः । न्यायान्तर्गतत्वमुपेक्ष्य न्यायावयवत्वनिवेशात्प्रतिज्ञार्थबोधजनकप्रतिज्ञाहेत्वादिविषयकज्ञानमादाय प्रतिज्ञाहेत्वादिसमुदाये नातिव्याप्तिः । पक्षतावच्छेदकविशिष्टत्वादिनिवेशनप्रयोजनमाह उदाहरणाच्चेति । यद्यपि साध्यतावच्छेदकविशिष्टवैशिष्ट्यज्ञानजनकत्वमात्रस्यैव निवेशे उपनयनिगमनयोरप्यतिव्याप्तिः, तथापि यत्किञ्चिद्धर्मविशिष्टे शुद्धसाध्यतावच्छेदकविशिष्टवैशिष्ट्यबोधजनकत्वनिवेशने न तत्रातिप्रसङ्गः । उपनयजन्यबोधे उपनयार्थव्याप्तिशरीरघटकसाध्यस्य धर्मितावच्छेदकाप्रवेशात् , निगमनजन्यबोधे च साध्यांशे हेतुज्ञानज्ञाप्यत्वस्याधिकस्य भानात् , अन्यथा पक्षतावच्छेदकान्तर्भावेऽपि अनुषङ्गपक्षेऽप्यनिस्तारादिति उदाहरणमात्रानुसरणम् । तदप्युदाहरणजन्यबोधे व्यापकत्वं न विधेयतावच्छेदकतया भासते अपि तु शुद्धवन्हित्वाद्यवच्छिन्नवत्त्वमेव सकलहेत्वधिकरणे भासत इति प्राचीनमतमनुसृत्य । निगमनेऽयंपदानुषङ्गपक्षे तु शुद्धसाध्यतावच्छेदकविशिष्टत्वं न निविष्टम् । विशेषणान्तरावच्छिन्नवह्न्यादिसाध्यकन्यायान्तर्गतप्रतिज्ञाया शुद्धवह्नित्वावच्छिन्नसाध्यकप्रतिज्ञालक्षणातिप्रसक्तेः प्रकृतन्यायान्तर्गतत्वाभावेनैव वारणादित्यभिप्रायकमिदम् अतो व्यापकत्वस्याधिकस्यो-

दाहरणबोधे भानेऽपि न क्षतिरिति केचित् । तन्मते निगमनोपेक्षाबीजं चिन्तनीयम् ।(१)

यत्तत्पदस्योदाहरणस्थस्य न पक्षतावच्छेदकावच्छिन्नपरत्वम्, अपि तु पक्षान्यसाध्यवत्साधारणरूपावच्छिन्नपरत्वमेव पक्षतावच्छेदकावच्छिन्ने हेतुमत्त्वस्य ततो लाभेन उपनयानुत्थानात्तदवच्छिन्ने साध्यवत्त्वस्य च प्रतिज्ञात एव लाभेनाऽनाकांक्षितत्वाच्चेति पक्षतावच्छेदकप्रवेशे नोदाहरणातिप्रसङ्गः । अथ यत्किञ्चिद्धर्मावच्छिन्नविशेष्यकसाध्यतावच्छेदकावच्छिन्नवैशिष्ट्यावगाहिबुद्धित्वावच्छिन्नजनकत्वमुदाहरणैकदेशे स वह्निमानित्यादिवाक्य एव न तु तस्य न्यायावयवत्वं, तच्च समुदाय एव न तत्र तादृशजनकत्वमिति विशिष्य पक्षतावच्छेदकानन्तर्भावेऽपि नोदाहरणातिप्रसङ्ग इति चेन्न । जनकत्वस्य जनकयत्किञ्चिज्ज्ञानविषयवर्णसमुदायत्वरूपस्य विवक्षितत्वात्, उदाहरणविषयकज्ञानविषयत्वमादाय समुदाय एवाऽतिप्रसक्तेः । एवमेतल्लक्षणप्रविष्टन्यायावयवत्वशरीरे प्रतिज्ञाहेत्वादिसमुदायातिप्रसङ्गवारणायोभयघटकभागद्वयाघटितत्वमेव निवेशनीयं न तु प्रतिज्ञाद्यघटकत्वमपि प्रयोजनान्तरविरहादुदाहरणैकदेशे तादृशवाक्येऽ-

---

(१) न च पर्वतो आर्द्रेन्धनभववह्निमान्धूमाद्यो धूमवान् सवह्निमानित्यादिवाक्यपंचकान्तर्गतप्रथमवाक्येऽतिव्याप्तिवारणाय यद्रूपावच्छिन्नसाध्यकोदाहरणाद्यघटितन्यायान्तर्गतत्वं पक्षे शुद्धतद्रूपविशिष्टवैशिष्ट्यावगाहित्वमवश्यं निवेशनीयमिति वाच्यम् । तद्धर्मावच्छिन्नसाध्यकोदाहरणादिघटितन्यायलक्षणे शुद्धतद्धर्मावच्छिन्नवैशिष्ट्यावगाहिबोधजनकप्रकृतवाक्यरूपप्रतिज्ञानिवेशात् तादृशन्यायान्तर्गतत्वाभावेनैवोक्तातिप्रसंगविरहात्, दलान्तरे शुद्धवह्नित्वादिविशिष्टवैशिष्ट्यबोधप्रवेशे प्रयोजनविरहात् । तथा च व्यापकत्वाधिकस्योदाहरणजन्यबोधे भानेपि न क्षतिः । न चैवं निगमनेऽपि व्यावृत्तिसम्भवेन तदुपेक्षायां बीजविरह इति वाच्यम् । पर्वतो वह्निमानित्यादिवाक्यस्य पर्वते वह्निवैशिष्ट्यावगाहिबोधजनकत्वं मतुप्प्रकृतिनामार्थस्य नामार्थे भेदान्वय एव मतुप्प्रत्ययो निरर्थक एव भेदान्वयाकांक्षानिर्वाहक इत्यभ्युपगमे एव निर्वहतीति तथाभ्युपगमे केवलनिगमनात्साध्यविशिष्टबोधानुदयेन तत्र व्यावृत्त्यसंगतिरिति ध्येयमिति पाठान्तरम् ॥

तिप्रसङ्गस्य लघुतरपक्षतावच्छेदकवैशिष्ट्यनिवेशेनैव वारयितुमुचितत्वात् । यद्यप्येवं नीलपर्वतो वह्निमानित्यादिभागेऽपि व्यावृत्तिः सम्भवति, तथापि सकलप्रतिज्ञैकदेशे न तथेति विशिष्योपादाने प्रयासाधिक्येनोदाहरणानुधावनमिति ध्येयम् ।

साध्यतावच्छेदकावच्छिन्नप्रकारकत्वनिवेशनप्रयोजनमाह उपनयाश्चेति । साध्यवैशिष्ट्यमात्रनिवेशेऽपि पर्वतो द्रव्यवान् धूमादित्यादिन्यायान्तर्गते उपनये तत्स्थलीयप्रतिज्ञालक्षणातिव्याप्तिरिति साध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वनिवेश इत्यवधेयम् ।

यथाश्रुतसत्यन्तार्थस्योदासीनवाक्यसाधारण्यमक्षतमेव न्यायान्तर्गतवाक्य(जन्य)स्येव तदनन्तर्गततादृशवाक्यजन्यस्यापि शाब्दबोधस्योपनायकज्ञानादिविधया परामर्शप्रयोजकत्वादतस्तदर्थमाह प्रकृतन्यायावयवत्वेति ।

वह्निव्याप्यधूमसाध्यकानुमितेरपि कदाचिदुद्देश्यतया वक्ष्यमाणातिप्रसङ्गवारणासम्भवादुद्देश्यपदं प्रकृतार्थकतया व्याचष्टे उद्देश्येतीति । वह्निसाध्यकोपनयस्य—तत्साध्यकन्यायान्तर्गतोपनयस्य, एतेन(अन्यसाधकन्यायमादाय)सत्यंतदलसत्त्वमाविष्कृतम्वह्निव्याप्यधूमसाध्यकत्यादिना(अन्यसाध्यकानुमितिमादाय)विशेष्यदलसत्त्वं स्फुटीकृतम्। वारणाय-प्रतिज्ञाव्यवहारविषयतावारणाय । प्रकृतद्वयं–प्रतिज्ञापदार्थप्रविष्टन्यायानुमित्योरेकसाध्यादिकत्वप्रापकं प्रकृत(पद)द्वयम् प्रकृतन्यायावयवत्वपर्यन्तानिवेशे वह्निव्याप्यधूमसाध्यकप्रतिज्ञानुरोधेन। तत्साध्यकानुमितेरपि प्रकृतानुमितिपदेन विवक्षणीयतया तामादाय दर्शितोपनये प्रकृतानुमितिपर्यन्तानिवेशे वह्निसाध्यकन्यायस्यापि प्रकृतन्यायत्वेनेन विवक्षणीयतया तदवयवत्वमादाय तत्र प्रतिज्ञाव्यवहारस्य दुर्वारत्वादत उभयत्र प्रकृतत्वनिवेशः । तथाच सति तत्साध्यपक्षकन्यायान्तर्गतत्वघटितप्रतिज्ञापदार्थगर्भे तत्साध्यपक्षकानुमितेरेवान्तर्भावान्नातिप्रसंगस्तदेवाह तथाचेति(१)। यत्तु तादृशोपनये वह्निसाध्यकप्रातिज्ञाव्यवहारवारणाय न्याये वह्निसाध्यकप्रतिज्ञाव्यवहारवारणायानुमितौ प्रकृतत्वनिवेशनमिति प्रकृतद्वयमित्यन्तार्थ इति। तच्चिन्त्यम् । तत्साध्यपक्षकप्रतिज्ञाव्यवहारविषय-

(१) तथा सत्यभिन्नसाध्यपक्षकानुमित्यन्तर्भावे यादृशो लक्षणार्थस्तं स्फुटयति तथाचेति । इति पाठान्तरम् ।

स्यात्र निर्वाच्यत्वे प्रतिज्ञापदार्थघटकन्यायानुमित्योरुभयत्र समभिव्याहृतसाध्यपक्षान्वयनिवेशसूचनाय प्रकृतद्वयम्, तत्साध्यपक्षकार्थकमित्यस्यैवाभिधातुमुचिततया तदुपेक्ष्य प्रतिज्ञाव्यवहारविषयतावच्छेदकीभूतैकधर्मशरीरे द्विधा निविष्टयोः साध्यपक्षयोरभेदमात्रलाभाय तथात्वेत्यभिधाने सन्दर्भविरोधात्। यादृशेत्यादेः स्वस्येत्यादिः। तादृशेत्यादेः स्वनिष्ठमित्यादिः पर्यवसितार्थः। प्रतिज्ञापदप्रतिपाद्यतावच्छेदकतया मूलाभिप्रायविषयः। एवञ्च सति प्रतिज्ञापदस्य नानार्थत्वं न दोषाय गत्यन्तरविरहादिति प्रागेवोक्तं ग्रन्थकृतैव। तत्साध्यतावच्छेदकावच्छिन्नतत्साध्यकत्वस्य न्यायाद्यंशेऽनिवेशने उक्तोपनय एवातिप्रसङ्गः। यत्पक्षकानुमितिसमानविषयकत्वं तत्पक्षकन्यायान्तर्गतत्वस्याक्षतत्वादिति तन्निवेशनम्। द्रव्यव्याप्यधूमवानयमित्याकारकद्रव्यत्वावच्छिन्नसाध्यकोपनयवारणाय साध्यतावच्छेदकनिवेशनम्। एतल्लक्षणघटकन्यायावयवत्वशरीरे उदाहरणाद्यघटकत्वनिवेशस्य सिषाधयिषाधीनन्यायप्रयोगानङ्गीकारपक्षे प्रयोजनान्तरविरहात्। प्रतिज्ञाऽघटकत्वमात्रस्य तदेकदेशसाधारणस्य निवेशनीयतया वह्न्यादिसाध्यकन्यायान्तर्गतस्य यत्किञ्चिद्धर्मिकवह्न्यादिसाध्यकानुमित्यन्यूनातिरिक्तविषयकबोधजनकस्य स वह्निमानित्युदाहरणैकदेशस्य वारणायैकधर्मावच्छिन्न(पक्षक)त्वनिवेशनम्।

वस्तुतो अन्यूनातिरिक्तविषयकत्वं प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहित्वे सति तादृशवैशिष्ट्यविषयिताविलक्षणविषयिताशून्यत्वरूपमनुमितिमनन्तर्भाव्यैवाग्रे निर्वचनीयम्। तत्र प्रकृतपक्षादिनिवेशव्यावृत्तिरग्रे दर्शनीया किं व्यावृत्त्यन्तरस्थलान्तरानुसरणेन।

यत्तु पक्षविशेषमनन्तर्भाव्यातिप्रसक्तस्य न्यायत्वस्य दुर्निर्वचतया पक्षनिवेशनमिति। तदसत्। तथासति हेतुविशेषमनन्तर्भाव्यापि तस्य दुर्वचतया यादृशहेतुकेत्यस्यापि वक्तुमुचितत्वात्।

यदि च न्यायपदोपादानादेव तत्र हेतुविशेषनियन्त्रितन्यायलाभ इति न तदभिहितमित्युच्यते, तदा पक्षप्रवेशस्यावश्यकत्वेऽपि न्यायपदादेव पक्षविशेषनियन्त्रितन्यायलाभ इति यादृशपक्षक इत्यभिधानस्यानुपयुक्ततेति।

हेतोर्वारणायेति। अनतिरिक्तविषयकत्वं पक्षतावच्छेदकविशिष्टसाध्यतावच्छेदकविशिष्टवैशिष्ट्यविषयत्वं यत्ताद्विलक्षणविषयता

शून्यत्वं, न तु प्रकृतानुमित्यविषयाविषयकत्वं-स्वरूपमग्रे दूषणीयत्वात्। तादृशविषयताविलक्षणत्वं च तादृशविषयताशालिनिश्चयत्वावच्छिन्नानिवर्त्यसंशयानिवर्तकतावच्छेदकत्वरूपं निर्वक्ष्यते। एवञ्चोक्तहेत्ववयवजन्यबोधस्यानुमित्यविषयवह्निनिष्ठधूमव्याप्यत्वविषयकत्वेऽपि तादृशविषयताविलक्षणविषयताशून्यत्वमक्षतमेवेत्यतिप्रसक्तिरिति भावः। निगमनवारणायेति। निगमनजन्यबोधस्यापि पक्षतावच्छेदकविशिष्टे साध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वेनान्यूनविषयकतयाऽतिव्याप्तिप्रसक्तेरिति भावः।

निगमने-तस्माद्वह्निमानिति वाक्यसन्निधाने। साक्षादिति। अवयवान्तरबहिर्भावेनेत्यर्थः। न श्रूयते इति। तथाच कथं तज्जन्यबोधस्यान्यूनविषयकत्वमिति भावः। न्यूनताभङ्गाय-आकाङ्क्षापूरणाय। पक्षतावच्छेदकविशिष्टे पक्षे साध्यवत्ताबोधने कस्तादृशवह्निमानिति जिज्ञासा निवर्त्तते, वह्निमानित्यभिधाने च तादृशाकाङ्क्षोत्सर्गतो जायत इत्यनुभवसिद्धमेवेति भावः। अनुपस्थितेरिति। निगमनस्थसाध्यवाचकपदसमभिव्याहृतत्वेनानुसन्धानोपगमादित्यर्थः। तथाच तदन्तर्भावेनैव निगमनेऽवयवत्वं [illegible]विषयकबोधजनकन्यायावयवत्वमादाय तादृशसमुदायातिप्रसक्तिरिति भावः।

निगमनं च च परामर्शहेतुरिति यथाश्रुताभिमूलग्रन्थस्य सत्यन्तदलविरहेण निगमने नातिव्याप्तिरित्यर्थपरत्वं प्रती[illegible]। [illegible] घटते-सत्यन्तस्य न्यायावयवार्थकत्वात्, तस्य च निगमनसाधारण्याद्यथाश्रुतस्यापि सत्यन्तार्थस्य प्रतिज्ञायामिव तत्राप्यक्षतत्वात्, अनतिरिक्तविषयकत्वविशेषणेनैव तद्वारणाच्च [illegible]कत्वविशेषणस्य निगमनातिव्याप्तिवारकतापरत्वेन [illegible]मत्रैव व्याख्यातुं भूमिकामारचयति इत्थमेव चेति। अन्यूनानतिरिक्तेति। तथाच न्यायावयवत्वपर्यवसिततादृशपरामर्शजनकशाब्दज्ञानजनकत्वसत्त्वेऽपि अन्यूनानतिरिक्तविषयक[illegible]जनकत्वं नास्तीति पर्यवसितोऽर्थः। अबाधितत्वादिपरताया उ[illegible] तद्बोधेनापि [illegible]हान्निगमनजन्यशाब्दबोधे तद्भानार्थं लक्षणादरो न युक्त इति [illegible]क्तं तद्विषयकतयाऽतिरिक्तविषयकत्वं न विचारसहम्। एवं [illegible]म्यन्तभागार्थस्यातिरिक्तस्य विषयतया तथात्वाप्रतिपादनेन न्यूनत्वं

श्चेत्यतः पूरयति तद्बोधौपयिकेति । अबाधितत्वादिबोधौपयिकेत्यर्थः। विशिष्टहेतुसम्बन्धस्य-व्याप्तिपक्षधर्मताविशिष्टहेतुज्ञानज्ञाप्यत्वस्य । अस्य चाबाधितत्वादिव्याप्यतया तद्बोधौपयिकत्वं बोध्यम् ।

(दी०) यत्तु पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वादित्यादौ यत्र पृथिवीतरेभ्यो भिद्यते न तत् पृथिवीत्युदाहरणवारणाय तदिति ।

तत्तुच्छम्—तेन पृथिव्यामितरभेदस्याविषयीकरणात् तात्पर्य्यभ्रमेण तादृशबोधजनकत्वस्यातिप्रसक्तत्वात् । न च तावताप्युदाहरणस्य तथात्वसम्भवो, यन्नेत्यादेरनन्वयात् । यदि च निगमनेनायमादिपदं निविशते वाक्यैकवाक्यतयैव विशिष्टलाभादिति विभाव्यते, तदा हेतौ साध्यसामानाधिकरण्यभाने सामान्यतः पक्षेऽपि साध्यवत्त्वभानात् पक्षे हेतुव्यापकसाध्यसामानाधिकरण्यविशिष्टहेतुमत्ताबोधकस्योपनयस्य यत्र च पक्षसाध्ययोस्ताद्रूप्येण दृष्टान्तत्वहेतुत्वाभ्यामुपन्यासस्तादृशसिषाधयिषया च न्यायप्रयोगस्तत्रोदाहरणोपनययोर्यत्र वा पर्वतत्वाद्यवच्छेदेन साध्यसिद्धेरुद्देश्यतायामेतत्पर्वतत्वादिना दृष्टान्तस्योपन्यासस्तत्रोदाहरणस्य सत्यन्तस्य चावयवाघटकन्यायान्तर्गतत्वपरतया हेत्वन्तस्यायमादिनिगमनान्तभागस्य वारणाय तत् ।

यद्यपि सर्वमभिधेयं प्रमेयमित्यादावतिरिक्ताप्रसिद्धिः। न च कोऽप्यप्रसिद्ध्या प्रमेयं न वेति विप्रतिपत्तेः संशयस्य चायोगात्र तादृशी प्रतिज्ञा प्रकृतानुमितिविषयतासमव्याप्तविषयताकत्वं प्रकृतानुमितिप्रकारतासमव्याप्तप्रकारताकत्वं वा व्यक्तव्यमिति वाच्यम् । सकलाभिधेयवृत्तिधर्म्मवत्सकलाभिधेयनिष्ठात्यन्ताभावाप्रतियोग्याकाशाभाववद्वा इदं द्रव्यमित्यादौ विशिष्टपक्षवो-

धके उपनयेऽतिव्याप्तेः।

तथापि प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्याविषयत्वं तदन्यूनविषयत्वम् ।

मिश्रमतमुपन्यस्यति यत्त्विति । पृथिवी इतरेभ्यो भिद्यते इत्यसमस्तमितरपदं पृथिवीतरपरम् इतरादिसम्बन्धिकार्थबोधकपदानां समभिव्याहृततत्तत्पदोपस्थाप्यतत्तदर्थेतरत्वादिना निरूढलक्षणा-अतो वादिवाक्ये स्वारसिकलक्षणाविरहेऽपि न क्षतिः । प्रतिज्ञापदादौ सर्वत्रैकेनैव पदेन साध्यादिनिर्देश इति न नियमः, तेन नाग्रे यत्र पृथिवीतरेभ्यो भिद्यत इत्युदाहरणप्रयोगविरोधः। विशेष्यवाचकं पृथिवीतिपदान्तरं पूरणीयम् । अतपदं समस्तमित्येव वा। उदाहरणवारणायेति । तज्जन्यबोधेऽपि पक्षसाध्याश्रयत्वात्मकतत्सम्बन्धरूपानुमितिविषयसकलपदार्थभानेनान्यूनविषयकत्वसत्त्वादित्यभिमानः । तत्-अनतिरिक्तेतिपदम् ।

अन्यूनविषयकत्वं हि न प्रकृतानुमितिविषयताव्यापकविषयताकत्वम्-सर्वस्मात्कालत्वमानयं कालपरिमाणवान् सर्वस्मादित्यत्र हेत्ववयवेऽतिव्याप्तेः, नापि पक्षतावच्छेदकविशिष्टपक्षाविषयकत्वम्-हेतुत्वं प्रमेयत्वाद्वाच्यत्ववत्प्रमेयत्वादित्यादौ हेत्ववयवेऽतिव्याप्तेः। नापि पक्षतावच्छेदकविशिष्टविषयकत्वे सति साध्यतावच्छेदकविशिष्टसाध्यविषयकत्वं तद्वैशिष्ट्यविषयकत्वं वा-प्रमेयनिष्ठं हेतुत्वं प्रमेयं प्रमेयादित्यत्र हेतावतिव्याप्तेः-तज्जन्यबोधे प्रमेयत्वत्वरूपसाध्यतावच्छेदकविशिष्टस्य प्रमेयपदार्थतावच्छेदकस्य धर्मिणि वैशिष्ट्यभानादिति, पक्षतावच्छेदकविशिष्टे साध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वं तत् वाच्यम्, तथाच नोक्तोदाहरणातिव्याप्तिरित्याशयेन दूषयति तत्तुच्छमिति । ननु भ्रान्तः पृथिवीपदस्य विशेष्यपरत्वमितरपदस्य पृथिवीतरपरत्वमवगम्य तादृशोदाहरणात् पृथिवीत्वविशिष्टे साध्यवत्त्वं प्रत्येतीति तत्रातिव्याप्तिप्रसक्तिरित्यत आह तात्पर्यभ्रमेणेति । तादृशेति । अन्यूनविषयकेत्यर्थः । अतिप्रसक्तत्वात्-तथाचायामित्याद्याकारकसाध्यवत्त्वपरत्वभ्रमाविषयसर्वनामपदघटितोपनयेतिव्याप्तत्वात् । तात्पर्यभ्रमदशायामपि नातिव्याप्तिप्रसी-

क्तरित्याह नन्वे[illegible]तापीति। उदाहरणस्य—उदाहरणत्वपर्याप्त्यधिकरणस्य। यन्नेत्यादेः—यन्नेत्यादिभागार्थस्य। अनन्वयात्—पृथिवीतरेभ्यो भिद्यते इत्येतादृशबोधाऽप्रवेशात्। तथा चान्यूनविषयकतादृशबोधजनकत्वमेकदेशस्यैव, न तु यन्नेत्यादिघटितसमुदायस्य, एकदेशस्य तु न्यायावयवत्वाभावादेव नातिप्रसङ्गशङ्का। न्यायान्तर्गतत्वस्यैकदेशसाधारणस्य निवेशे चानतिरिक्तविषयकत्वनिवेशेऽपि तादृशोदाहरणैकदेश एवातिव्याप्तिरिति भावः। तात्पर्यभ्रमेण यन्नेत्यादिवाक्यान्तर्भाव्य यद्भिन्ना पृथिवीतरेभ्यो भिद्यत इत्यन्वयबोधः सम्भवतीति नाशङ्कनीयम्। जलं न द्रव्यं गन्धवदित्यादितो जलभिन्नं द्रव्यं गन्धवदित्यन्वयबोधस्यानुभवविरुद्धतया नञर्थोद्देश्यतावच्छेदकान्वयबोधस्याव्युत्पन्नत्वात्। यदितरभिन्नपृथिव्यन्यदित्याकारको यदर्थविशेष्यकबोधोऽपि न सम्भवति—अयं न पचति पुरुष इत्यत्र इदंपदार्थे पाककर्तृपुरुषभेदबोधस्यानुभवविरुद्धतयाभावप्रतियोगितावच्छेदकत्वेनाख्यातार्थभानस्य पचति चैत्र इत्यभिन्नादितः पाककर्तृचैत्रादिसादृश्यबोधस्याननुभवेन इतरविशेषणविशेषणतया तज्ज्ञानस्यैवाव्युत्पन्नत्वात्।

अत्र केचित्—अन्यूनविषयकत्वं पक्षतावच्छेदकविशिष्टविषयकत्वे सति साध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वम्। एवञ्च दर्शितव्यतिरेक्युदाहरणजन्यबोधस्यापि तादृशान्यूनविषयकत्वादतिव्याप्तिः प्रसज्यते। न चैवमपि साध्यतावच्छेदकविशिष्टसाध्यपक्षतावच्छेदकविशिष्टपक्षघटितवाक्यार्थबोधकत्वमुदाहरणैकदेशस्यैव न तु तत्र पृथिवीत्यादिभागघटितसमुदायरूपोदाहरणस्येत्यवयवत्वविशेषणप्रवेशादेव नातिव्याप्तिशङ्केति वाच्यम्। तादृशान्यूनविषयकत्वघटितधर्मावच्छिन्ननिरूपितजनकतापर्यन्तानिवेशात्। वाक्यार्थद्वयविषयकसमूहालम्बनबोधजनकतामादायातिव्याप्तेः प्रसञ्जनात्, न हि तादृशसमूहालम्बनबोधजनकत्वमेकदेशे पर्यवस्यति अपि तु समुदाय एव। अथवा न्यायान्तर्गतत्वमेव सत्यन्तार्थः। अत एव मिश्राणां घटशब्दो गुणः द्रव्यकर्मान्यत्वे सति सत्त्वादित्यत्रोदाहरणे यदि प्रतिज्ञारूपशब्द एव दृष्टान्तत्वेनोपादीयते तदा तत्राऽतिव्याप्तिवारणार्थत्वादित्यादि-

ना शाब्दज्ञानपदस्य व्यावृत्तिदानसङ्गतिः, तददाने तत्रातिव्याप्तिप्रसक्तिर्विपर्ययविधया श्रावणप्रत्यक्षजनकत्वात्तादृशदृष्टान्तरूपशब्दस्येति । पक्षतावच्छेदकविशिष्टविषयकत्वमन्यूनविषयकत्वम् । एवञ्च तादृशोदाहरणैकदेशातिव्याप्तिवारणार्थमेव साध्यतावच्छेदकसम्बन्धेन साध्यतावच्छेदकमात्रविशिष्टसाध्यप्रकारकत्वार्थकमनतिरिक्तविषयकेति–तज्जन्यबोधस्य साध्यतावच्छेदकसम्बन्धेन साध्याप्रकारकत्वात् । मात्रपदान्तर्भावान्निगमनव्युदासः–तज्जन्यबोधविशिष्टहेतुसम्बन्धस्याधिकस्य साध्यांशे भानेन शुद्धसाध्यतावच्छेदकावच्छिन्नसाध्याप्रकारकत्वात् । एवञ्च वह्निव्याप्यधूमवानयमित्याद्युपनयजन्यबोधस्य व्याप्तिघटकाधिकरणांशे साध्यतावच्छेदकावच्छिन्नप्रकारकत्वेऽपि साध्यांशे व्यापकत्वस्याधिकस्य भानेन न तत्रातिप्रसङ्गः । न चैवमपि यत्र पृथिवीतरान्यदित्युदाहरणैकदेशेऽतिप्रसङ्गः तज्जन्यबोधे पक्षतावच्छेदकविशिष्टविषयत्वस्य शुद्धसाध्यतावच्छेदकविशिष्टसाध्यप्रकारकत्वस्य सत्त्वादिति वाच्यम् । पक्षतावच्छेदकावच्छिन्नविशेष्यकत्वावच्छेदेन तादृशसाध्यप्रकारकत्वस्य दलद्वयनिष्कृष्टार्थत्वात् । तादृशोदाहरणभागजन्यबोधस्य इतरभेदांशे निर्धर्मितावच्छेदकतया तादृशसाध्यप्रकारकत्वविरहात् । साध्यतावच्छेदकसम्बन्धनिवेशनं च यत्र कालिकसम्बन्धेन कालपरिमाणस्पन्दत्वादेः साध्यता समवायेन च तस्यैव हेतुता तत्रत्योपनयीयव्याप्त्यन्तातिरिक्तभागवारणाय । सिषाधयिषया च न्यायप्रयोगो नाभ्युपेयत इति यत्र साध्यतावच्छेदकसम्बन्धेनैव साध्यस्य हेतुना तत्रत्योपनीयतादृशभागेऽतिप्रसङ्ग इत्यस्यानवकाशः । नचैवमपि निगमनीयतस्मादित्यंशातिरिक्तांशेऽतिव्याप्तिर्दुर्वारैवेति वाच्यम् । तस्मादित्यंशार्थमनन्तर्भाव्य व्यवहितयोः पक्षसाध्यवद्वाचकपदयोरन्वयबोधाजनकत्वादिति रीत्या उक्तस्थलेऽपि वृत्तिदानं सङ्गमयन्ति ।

अयंपदाननुषङ्गपक्षे निगमनेऽनतिरिक्तविषयकत्वव्यावृत्तिर्न सङ्गच्छत इत्याशङ्कते यदि चेति । अयमादीत्यादिना इदमियमित्यादिपरिग्रहः । वाक्यैकवाक्यतयेति । उपनयनिगमनवाक्ययोरेकवाक्यतयेत्यर्थः । विशिष्टलाभात्–पक्षतावच्छेदकविशिष्टे साध्यवत्तालाभाद्विशेष्याकाङ्क्षानिवृत्तेः । न च पक्षवाचकपदाननुषङ्गे तस्मान्नेतराणीत्यादिनिगम-

ना शाब्दज्ञानपदस्य व्यावृत्तिदानसङ्गतिः, तद्दाने तत्रातिव्याप्तिप्रसक्तिर्विपर्ययविधया श्रावणप्रत्यक्षजनकत्वात्तादृशदृष्टान्तरूपशब्दस्येति । पक्षतावच्छेदकविशिष्टविषयकत्वमन्यूनविषयकत्वम् । एवञ्च तादृशोदाहरणैकदेशातिव्याप्तिवारणार्थमेव साध्यतावच्छेदकसम्बन्धेन साध्यतावच्छेदकमात्रविशिष्टसाध्यप्रकारकत्वार्थकमनतिरिक्तविषयकेति–तज्जन्यबोधस्य साध्यतावच्छेदकसम्बन्धेन साध्याप्रकारकत्वात् । मात्रपदान्तर्भावान्निगमनव्युदासः–तज्जन्यबोधविशिष्टहेतुसम्बन्धस्याधिकस्य साध्यांशे भानेन शुद्धसाध्यतावच्छेदकावच्छिन्नसाध्याप्रकारकत्वात् । एवञ्च वह्निव्याप्यधूमवानयमित्याद्युपनयजन्यबोधस्य व्याप्तिघटकाधिकरणांशे साध्यतावच्छेदकावच्छिन्नप्रकारकत्वेऽपि साध्यांशे व्यापकत्वस्याधिकस्य भानेन न तत्रातिप्रसङ्गः । न चैवमपि यत्र पृथिवीतरान्यदित्युदाहरणैकदेशेऽतिप्रसङ्गः तज्जन्यबोधे पक्षतावच्छेदकविशिष्टविषयत्वस्य शुद्धसाध्यतावच्छेदकविशिष्टसाध्यप्रकारकत्वस्य सत्त्वादिति वाच्यम् । पक्षतावच्छेदकावच्छिन्नविशेष्यकत्वावच्छेदेन तादृशसाध्यप्रकारकत्वस्य दलद्वयनिष्कृष्टार्थत्वात् । तादृशोदाहरणभागजन्यबोधस्य इतरभेदांशे निर्धर्मितावच्छेदकतया तादृशसाध्यप्रकारकत्वविरहात् । साध्यतावच्छेदकसम्बन्धानिवेशनं च यत्र कालिकसम्बन्धेन कालपरिमाणस्पन्दत्वादेः साध्यता समवायेन च तस्यैव हेतुता तत्रत्योपनयीयव्याप्त्यन्तातिरिक्तभागवारणाय । सिषाधयिषया च न्यायप्रयोगो नाभ्युपेयत इति यत्र साध्यतावच्छेदकसम्बन्धेनैव साध्यस्य हेतुना तत्रत्योपनीयतादृशभागेऽतिप्रसङ्ग इत्यस्यानवकाशः । नचैवमपि निगमनीयतस्मादित्यंशातिरिक्तांशेऽतिव्याप्तिर्दुर्वारैवेति वाच्यम् । तस्मादित्यंशार्थमनन्तर्भाव्य व्यवहितयोः पक्षसाध्यवद्वाचकपदयोरन्वयबोधाजनकत्वादिति रीत्या उक्तस्थलेऽपि वृत्तिदानं सङ्गमयन्ति ।

अयंपदाननुषङ्गपक्षे निगमनेऽनतिरिक्तविषयकत्वव्यावृत्तिर्न सङ्गच्छत इत्याशङ्कते यदि चेति । अयमादीत्यादिना इदमियमित्यादिपरिग्रहः । वाक्यैकवाक्यतयेति । उपनयनिगमनवाक्ययोरेकवाक्यतयेत्यर्थः । विशिष्टलाभात्–पक्षतावच्छेदकविशिष्टे साध्यवत्तालाभाद्विशेष्याकाङ्क्षानिवृत्तेः । न च पक्षवाचकपदाननुषङ्गे तस्मान्नेतराणीत्यादिनिगम-

नविरोधः अनुयोग्यमिश्रितनञर्थशाब्दबोधस्याव्युत्पन्नतया तन्मात्रस्याबोधकत्वेन वाक्यत्वाभावादिति वाच्यम्। एतन्मते तादृशनिगमनानभ्युपगमात्। यद्यप्यनतिरिक्तविषयकत्वानिवेशे अन्यूनविषयकबोधजनकत्वं तज्जनकज्ञानविषयत्वं वा न्यायावयवत्वविशेषितं प्रतिज्ञाहेत्वादिजन्यबोधमादाय हेत्वादावतिप्रसक्तम्, तथापि प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहित्वरूपान्यूनविषयकत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकयत्किञ्चिज्ज्ञानविषयतावद्वर्णसमुदायत्वनिवेशे नायं दोष इति स्थलान्तरे व्यावृत्तिमाह तदेत्यादिना। भाने–ज्ञाने, सामान्यतः–अधिकरणत्वरूपसामान्यधर्मावच्छिन्ने विशेषरूपानवच्छिन्ने इति वा। साध्यवत्त्वभानात्–साध्यवत्त्वविषयकत्वात्, उपनयस्य वारणाय तदिति योजना। पक्षे साध्यवैशिष्ट्यावगाहित्वमेवान्यूनविषयकत्वं न तु पक्षतावच्छेदकवैशिष्ट्यान्तर्भाव–इत्यभिप्रायेणेदम्। प्रमेयाद्वाच्यत्ववानयं प्रमेयः प्रमेयादित्यादिहेतुवारणाय पक्षतावच्छेदकवैशिष्ट्यान्तर्भाव आवश्यक इति तदन्तर्भावाभिप्रायेण स्थलान्तरे व्यावृत्तिमाह यत्र चेति। पक्षेति। पक्षस्य ताद्रूप्येण पक्षतावच्छेदकप्रकारेण दृष्टान्ततया यत्रोपन्यासः तत्रोदाहरणस्य साध्यस्य वा ताद्रूप्येण साध्यतावच्छेदकप्रकारेण हेतुतया यत्रोपन्यासः तत्रोपनयस्य वारणाय तदित्यर्थः। रूपान्तरेण पक्षसाध्ययोर्दृष्टान्तहेतुत्वाभ्यामुपन्यासे दर्शितान्यूनविषयकत्वासम्भव इति ताद्रूप्येणेति। ननु पक्षे साध्यनिश्चयदशायामेव तादृशदृष्टान्तहेतुसम्भव इति तत्र संशयाभावान्न्याय एव न सम्भवतीत्यत आह तादृशसिषाधयिषयेति। अन्यस्थले संशयस्यावश्यकत्वेऽपि वादस्थले न तथेति संशयमन्तरेणापि अनुमित्साधीनानुमितिनिर्वाहाय न्यायप्रयोगसम्भवादिति भावः।

ननु सिषाधयिषया न्यायप्रयोगोपगमे पञ्चम्यर्थहेतुत्वं यादृशसम्बन्धेन प्रकृत्यर्थस्यान्वयस्तत्सम्बन्धेन वह्निसाध्यकहेतुत्वपक्षकवह्निहेतुकन्यायान्तर्गतहेत्ववयवेऽतिव्याप्तिर्दुर्वारैवेति सिषाधयिषया न्यायप्रयोगो नाङ्गीकर्त्तव्य इत्यत उक्तव्यावृत्तिर्न सङ्गच्छत इत्यतः स्थलान्तरमनुसरति यत्र चेति। पर्वतत्वसामानाधिकरण्येन साध्यसिद्ध्युद्देश्यता तत्रैतत्पर्वतत्वेनापि दृष्टान्तता न सम्भवति एतत्पर्वतत्वेन

साध्यवत्तानिश्चयस्यापि तादृशानुमितिविरोधित्वादतः पर्वतत्वावच्छेदेनेति । तत्रोदाहरणस्येति । यद्यपि पर्वतत्वावच्छेदेन वह्निमत्तावगाहिन्यामनुमितौ पर्वतत्वव्यापकत्वस्य वह्न्यंशे भानात्तादृशदृष्टान्तघटितोदाहरणजन्यबोधे च तदभानादुदृश्यानुमितिन्यूनविषयकत्वमेव, तथापि पक्षतावच्छेदकविशिष्टसाध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वरूपं निर्वाच्यमन्यूनविषयकत्वमक्षतमेवेति भावः । यद्यपि पक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्यतावच्छेदकावच्छिन्नवैशिष्ट्यावगाहित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयतानिवेशे उदाहरणैकदेश एव तादृशविषयता न तु समुदाय इति न्यायावयवत्वनिवेशान्नातिव्याप्तिप्रसङ्गः, तथापि प्रतिज्ञामात्राघटकत्वगर्भं न्यायावयवत्वं प्रकृतलक्षणे प्रविष्टम्, तच्च यथायं पर्वत इत्युदाहरणैकदेशेऽपीत्याशयः । अवच्छेदकावच्छेदेन अनुमितिस्थलीयन्यायनिविष्टप्रतिज्ञालक्षणेऽवच्छेदकावच्छेदेन साध्यवैशिष्ट्यावगाहित्वरूपान्यूनविषयकत्वनिवेशने नैतद्व्यावृत्तिसङ्गतिरित्यपरितोषेण व्यावृत्त्यन्तरमाह सत्यन्तस्येति । अयमाशयः । एतल्लक्षणघटकन्यायावयवत्वशरीरे उभयघटकभागद्वयाघटितत्वं न निवेशनीयम्–अनतिरिक्तविषयकत्वविशेषणेनैव तादृशभागद्वयघटितसमुदायेऽतिप्रसङ्गवारणात् । न च शब्दज्ञानस्यैव शाब्दबोधजनकतया जनकत्वमत्र जनकज्ञानविषयत्वमेव वाच्यम्, एवञ्च तादृशसमुदायविषयकज्ञानमप्येकदेशप्रतिज्ञाविषयकत्वेन तथाविधबोधजनकमिति समुदायेऽतिप्रसङ्ग इति वाच्यम् तादृशबोधजनकतावच्छेदकीभूतयत्किञ्चिदेकज्ञानविषयतानिरूपकवर्णसमुदायत्वस्यैव विवक्षणीयत्वात् । न च तादृशवर्णसमुदायत्वं तादृशवर्णत्वव्यापकसमुदायत्वम्, तादृशं च प्रतिज्ञाहेतुसमुदायत्वमपीति तत्समुदायेऽतिप्रसङ्ग एवेति तादृशभागद्वयाघटितत्वमवश्यमेव निवेश्यमिति वाच्यम् । अनतिरिक्तपदसार्थक्याय तादृशयत्किञ्चिज्ज्ञानविषयताशालिवर्णत्वसमनैयत्यमेव निवेश्य प्रतिज्ञाहेत्वादिसमुदायत्वस्य वारणीयत्वात् । समानार्थकप्रतिज्ञाद्वयादिविषयकयत्किञ्चिज्ज्ञानविषयताश्रयवर्णत्वसमनैयत्यस्य तादृशप्रतिज्ञाद्वयादिपर्याप्तसमुदायत्वे सत्त्वेऽपि न क्षतिः–तदुभयादावपि प्रतिज्ञाव्यवहारात् । अपि तु प्रतिज्ञैकदेशस्यापि तादृशबोधनिष्ठवह्निसम्बन्धिबुद्धित्वाद्यवच्छिन्नजन्यतानिरूपितजनकतावच्छेदकीभूतयत्किञ्चिदेकज्ञानविषय-

ताश्रयवर्णसमुदायत्वमादायैव प्रतिज्ञात्वप्रसङ्ग इति प्रतिज्ञाद्यघटकत्वं प्रतिज्ञामात्राघटकत्वं वा निवेशनीयम्। अन्यूनानतिरिक्तविषयकशाब्दबुद्धित्वस्य किञ्चिज्जन्यतानवच्छेदकतया तदवच्छिन्ननिरूपितजनकतानिवेशासम्भवात्। इत्थं चाननुषङ्गपक्षेऽप्ययं तस्माद्वह्निमान् इति भागे प्रतिज्ञादिहेत्वन्तभागे च व्यावृत्तिः सम्भवतीति अवयवाघटकेति। न च तदुपादानेऽपि धूमादालोकवान् पर्वतो वह्निमानित्यादिप्रतिज्ञार्थमात्रविषयकबोधानिष्टधूमविशेषितहेतुत्वविषयकशाब्दत्वावच्छिन्नकारणधूमादित्यादिहेतुविषयकज्ञानविषयतामादायावयवाघटके ताहशहेतावतिव्याप्तिवारणायानतिरिक्तविषयकबोधनिष्ठपक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वरूपान्यूनविषयकत्वावच्छिन्नजनकतावच्छेदकयत्किञ्चिज्ज्ञानीयविषयतानिरूपकवर्णसमुदायत्वनिवेशस्यावश्यकतयाऽवयवाघटकत्वनिवेशनं निष्प्रयोजनकमिति वाच्यम्। ताहशहेतुवारणायावयवाघटक इत्यनेनावयवैकदेशमात्रविषयकज्ञाननिष्ठजनकताव्यावृत्तावयवत्वपर्याप्त्यवच्छेदकयत्किञ्चिद्धर्मव्यापकविषयताकान्यज्ञानवृत्तित्वावच्छिन्नभेदस्यैवान्यूनानतिरिक्तविषयकबोधजनकतायां विवक्षणीयत्वात्। अवयवत्वं चेह न्यायान्तर्गतत्वविशेषणशून्यम्, तेन प्रतिज्ञासमानाकारोदासीनवाक्यज्ञाने प्रतिज्ञाज्ञानीयकारणतायाः सत्त्वेऽपि तत्सङ्ग्रहः ताहशोदासीनवाक्येऽपि तथाविधावयवत्वपर्याप्तेरिति।

वस्तुतस्तु अवयवत्वघटकविशेष्यपरित्यागमात्रेणैव व्यावृत्तिः सङ्गच्छत इति ताहशजनकतापर्यन्तनिवेशने प्रतिज्ञाद्यघटकत्वदलपरित्यागसम्भवेऽपि तत्परित्यागस्य प्रकृतानुपयुक्तत्वमित्येतल्लाभायैकावयवाघटकेत्यभिहितमिति।

केचित्तु यत्र प्रतिज्ञैकदेशस्यापि कथञ्चित्प्रतिज्ञासमानार्थकत्वं सम्भवति तत्रैकदेशेऽतिप्रसङ्गवारणायावयवाघटकत्वनिवेशनमावश्यकमित्याहुः। तदसत्। प्रतिज्ञाप्रतिपाद्यविशिष्टार्थप्रतिपादकताया एकदेशे सम्भवेऽपि तन्मात्रस्य तथाविधबोधपरत्वाभावात् तथात्वे समुदायप्रयोगानुपपत्तेः, कथंचित्तत्प्रयोगेऽपि समुदायमन्तर्भाव्य न्यायत्वानङ्गीकारात्। अप्रकृतार्थपरवाक्यवारणाय च वास्तवतथा-

विधितात्पर्यपरतायास्तल्लक्षणेऽवश्यं निवेशनीयतया एकदेशमात्रस्य तादृशार्थपरत्वाभावेनाऽतिप्रसङ्गानवकाशादिति ।

इत्यन्तस्यार्थः । कथितान्यूनविषयकत्वावच्छिन्नजन्यतानिरूपितजनकतानिवेशने तत्तदङ्गप्रतिपाद्यविशिष्टार्थबोधजनकत्वमादाय केवलहेत्वादावतिव्याप्तिर्न सम्भवति तादृशजनकताश्रययत्किञ्चिज्ज्ञानविषयवर्णसमुदायत्वस्य तत्रापर्याप्तेरतो हेतुमात्रनिगमनमात्रे उपेक्षिते ॥

अन्यूनानतिरिक्तविषयकेत्यस्य प्रकृतानुमितिविषयस्यान्यूनः सन्ननतिरिक्तो विषयो यस्येति व्युत्पत्तेरनुमितिविषयनिष्ठभेदप्रतियोगितानवच्छेदकत्वे सत्यनुमितिविषयातिरिक्तावृत्ति यद्विषयत्वं तत्त्वमिति यथाश्रुतार्थमाक्षिपति यद्यपीति । यद्यपि प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षकप्रकृतसाध्यतावच्छेदकावच्छिन्नसाध्यकयत्किञ्चिदनुमित्यविषयविषयकत्वं पर्वतो वह्निमानित्यादिप्रतिज्ञाजन्यानिखिलबोधानामेवेति तादृशानुमितिविषयत्वसामान्याभावो विवक्षणीयः तथाच केवलाभिधेयत्वाद्यवच्छिन्नपक्षकस्थलेऽप्यतिरिक्ताप्रसिद्धिरस्त्येव, तथाप्यप्रसिद्धिं स्फुटीकर्तुमभिधेयत्वाद्यवच्छिन्नपक्षकप्रमेयत्वाद्यवच्छिन्नसाध्यकस्थले विश्वमेवानुमितिविषय इत्येतल्लाभाय सर्वमित्युक्तम् । 'सर्वेभ्यो दर्शपूर्णमासा'वित्यत्रेव प्रक्रान्तकतिपयपदार्थमात्रवृत्तिसर्वत्वावच्छिन्नतात्पर्येणापि विशेष्यवाचकपदान्तरासमभिव्याहृतसर्वपदप्रयोगसम्भवात् सर्वं प्रमेयमित्युक्तावनुमितिविषयतायाः केवलान्वयित्वालाभादभिधेयमित्युक्तम् । एवञ्च किञ्चिद्धर्मावच्छिन्नांशेऽभेदेन स्वार्थविशेषणकबोधपरसर्वशब्दस्य तद्धर्मव्यापकविधेयव्याप्यसर्वत्वबोधकताव्युत्पत्तेरभिधेयत्वव्यापकसर्वत्वलाभान्नानुमितेः कतिपयवस्तुमात्रविषयकत्वशङ्केति भावः । अतिरिक्ताप्रसिद्धिः-प्रकृतानुमितिविषयतातिरिक्ताप्रसिद्धिः । प्रमेयत्वं पक्षनिष्ठाभावप्रतियोगि न वेति संशयसम्भवेन तादृशप्रतिज्ञासम्भव इत्यतस्तत्संग्रहायान्यूनानतिरिक्तविषयकत्वमन्यथा निर्वक्ति प्रकृतेति । स्वविषयताव्यापकप्रकृतानुमितिविषयताव्यापकविषयताकत्वमर्थः—स्वविषये अनुमितिविषयान्यूनत्वस्य स्वविषयत्वे तद्विषयताव्यापकत्वपर्यवसितत्वात् । स्वविषयेऽनुमितिविषयानतिरिक्तत्वस्य च तद्विषयत्वे स्वविषयताव्यापक-

त्वपर्यवसितत्वादिति भावः । यद्यपि समूहालम्बनरूपपर्वतपक्षकवह्निविधेयकानुमितिविषयितायाः किञ्चिद्वृत्तितया पर्वतो वह्निमानिति प्रतिज्ञामात्रजन्यबोधो न तादृशानुमितिविषयतासमनियतविषयताकः वाक्यान्तरसहिततज्जन्यसमूहालम्बनबोधजनकयत्किञ्चिज्ज्ञानविषयवर्णसमुदायत्वं च न तन्मात्रपर्याप्तम्, यत्किञ्चित्प्रकृतानुमितिव्यक्तिविषयतासमनैयत्यस्य विवक्षणेपि च निगमनाद्यतिव्याप्तिर्दुर्वारैव-तज्जन्यबोधस्यापि पर्वतो वह्निमान् धूमज्ञानज्ञाप्यवह्निमांश्चेत्याकारकसमूहालम्बनानुमितिसमनियतविषयताकत्वात्, तथापि प्रकृतपक्षकप्रकृतसाध्यव्याप्यवत्तापरामर्शत्वावच्छिन्नजनकतानिरूपितजन्यतावच्छेदकविषयतात्वेन यद्विषयतासमनैयत्यं तत्त्वस्य विवक्षितत्वान्न दोषः । नन्वेवंसत्युक्तस्थलीयोपनयेऽतिव्याप्तिः तज्जन्यबोधस्यापि विश्वविषयकत्वेन तथाविधानुमितिविषयतासमनियतविषयताकत्वादित्यतो विषयपदस्य प्रकारत्वाभिप्रायेणान्यथा तदर्थं निर्वक्ति प्रकृतेति । तादृशोपनयजन्यबोधे प्रकारीभवतोऽभावत्वादेस्तादृशानुमितावप्रकारत्वान्न तत्प्रकारतायाः समनैयत्यमिति नातिव्याप्तिरिति भावः । सकलेति । सकलाभिधेयवृत्तिधर्मवदिदं द्रव्यमिति योजना । तादृशानुमिताविव एतस्थलीयोपनयजन्यबोधे विश्वस्यैवाभिधेयत्वेन प्रकारतया तत्प्रकारतायाः समनैयत्यमक्षतमेवेति भवत्यतिव्याप्तिरिति भावः । ननु विशेषणानवच्छिन्नप्रकारतानां समनैयत्यं विवक्षणीयमतो नातिव्याप्तिः उपनयजन्यबोधेऽभावत्वादेः तादृशप्रकारतासत्त्वादुक्तानुमितेस्तादृशप्रकारतायाश्च तत्रासत्त्वादित्यतो अनुमितावपि तेषां तथाविधप्रकारताघटनाय स्थलान्तरेऽतिव्याप्तिमाह सकलाभिधेयेति । तत्राभावत्वप्रतियोगित्वत्वादीनां स्वरूपतः पक्षतावच्छेदकघटकत्वाद्भवति तथात्वमिति भावः । द्रव्यमिति विपरीतकोटिप्रसिद्ध्यर्थं । विशिष्टपक्षबोधक इति । उपनयस्थेदंपदेन विशेष्यमात्रपरामर्शेऽन्यूनविषयकत्वं न सम्भवतीति भ्रमनिराकरणाय व्याप्तिशरीरे साधनसाध्यप्रकारेणैव तदधिकरणान्तर्भावः, न त्वधिकरणत्वेनापीत्यनुमितौ तस्य तत्त्वस्य वा स्वरूपतः प्रकारत्वविरहेऽपि नासङ्गतिः । हेतुरप्यत्रेदत्वं समवायेन द्रव्यमेव वा बोध्यम् । गुणादेस्तथात्वे हेतुतावच्छेदकगुणत्वादेः स्वरूपत उपनयजन्यबोधे भाने कथितप्रकारता-

समनैयत्यानुपपत्तेः। न चाभेदेन विषयतासमनैयत्योक्तौ अनुमितिविषयतात्वसमनियतस्वाविषयतात्वकत्वोक्तौ वा नायं दोष इति वाच्यम्। हेत्वर्थघटितार्थकप्रतिज्ञाघटितन्यायान्तर्गतहेतुजन्यबोधविषयताया अनुमितिनिरूपितविषयतात्वाभावात् अनुमितिविषयतात्वव्याप्यस्वविषयतात्वकत्वाभावादेव तादृशबाधवारणसम्भवेनान्यूनविषयकत्वांशवैयर्थ्यापत्तेः; न हि साध्यतावच्छेदकावच्छिन्नसाध्यविशिष्टप्रकृतपक्षतावच्छेदकावच्छिन्नविषयताबहिर्भूतविषयता अनुमितिनिरूपिता। समूहालम्बनानुमितिनिरूपितविषयत्वमादाय तु नातिप्रसङ्गावकाशः—प्रकृतपरामर्शजन्यतावच्छेदकविषयतात्वस्यैव निवेशनीयत्वात्, अन्यथाऽसम्भवापातादिति। उपनयविशेषातिव्याप्त्यभिधानं चोपलक्षणपरम्। अन्यूनविषयकत्वस्य निरुक्तार्थकत्वे सर्वस्मात्कालत्ववानयं कालपरिमाणवान् सर्वस्मादित्यत्र हेत्ववयवेऽव्याप्तिर्बोध्या—तज्जन्यबोधविषयतायाः विश्ववृत्तित्वेनानुमितिविषयताव्यापकत्वात्। एवं तादृशान्यूनविषयकत्वस्य किञ्चिज्जन्यतानवच्छेदकत्वेन तदवच्छिन्नजन्यताविलक्षणासम्भवेन प्रतिज्ञाहेतुजन्यसमूहालम्बनबोधमादाय तन्निष्ठहेत्वर्थविषयकत्वावच्छिन्नजन्यतानिरूपितजनकताश्रये धूमादालोकवान् पर्वतो वह्निमान् धूमादित्यादौ हेत्ववयवेऽतिव्याप्तिर्दुर्वारा। तस्या अनवच्छिन्नप्रकारताव्यापकतादृशप्रकारताकत्वविवक्षयापि वारणासम्भवादित्यपि बोध्यम्।

एतद्दोषवारणाय प्रथमतोऽनुमित्यन्यूनविषयकत्वमन्यथा निर्वक्ति तथापि प्रकृतेनेति। एतच्च पक्षतावच्छेदकविशिष्टार्थकम्, तदनुपादाने प्रमेयाद्वाच्यत्ववानयं प्रमेयः प्रमेयादित्यादौ हेत्ववयवे यत्किञ्चिद्धर्मावच्छिन्नत्वोपादानेऽपि घटान्यत्ववद्रूपघटान्यतरस्माद्घटान्यत्ववत्सधर्मा घटो घटान्यत्ववानित्याकारिका या सामानाधिकरण्यसम्बन्धेन घटान्यत्वसाध्यकप्रतिज्ञा तद्घटितन्यायान्तर्गते रूपघटान्यतरत्वावच्छिन्नांशे सामानाधिकरण्यसम्बन्धेन विशेषणतापन्नघटान्यत्वघटिततादृशसम्बन्धावच्छिन्नहेतुके विशिष्टान्यतररूपहेतुप्रतिपादकहेत्ववयवेऽतिव्याप्तिः। घटत्वादौ सामानाधिकरण्यसम्बन्धेन रूपवति व्यभिचारवारकतया घटान्यत्वात्मकविशेषणस्य धाभेदेन च विशेष्यस्य घटान्यत्वसमानाधिकरणसत्तासम-

माधिकरणे घटरूपादौ व्यभिचारवारकतया तत्र विशेष्यतावच्छेद-कस्य सार्थकत्वमित्यवधेयम् । सामानाधिकरण्यसम्बन्धस्य वृत्त्य-नियामकतया व्यापकत्वाघटकत्वेऽपि नित्यद्रव्यावृत्तिधर्मशून्यत्वा-न्निरवयवं गगनं नित्यद्रव्यावृत्तिधर्मशून्यत्वात् वह्निमत्पर्वतावृत्तिध-र्मशून्यत्वादालोकवान् पर्वतो वह्निमान् वह्निमत्पर्वतावृत्तिधर्मशून्य-त्वादित्यादौ हेत्ववयवेऽतिव्याप्तिवारणाय पक्षतावच्छेदकवैशि-ष्ट्यनिवेशनमावश्यकम् अखण्डाभावघटकतया हेतुघटकद्रव्यत्वपर्व-तत्वादीनामवैयर्थ्यम् ॥

(दी०) प्रकृतपञ्चम्यर्थपक्षकप्रतिज्ञादिस्थले तु पक्षे प्रकृत्य-र्थस्य वैशिष्ट्यबोधको हेतुर्न तु प्रकृतसाध्यस्य, तादृशविषयता-विलक्षणविषयताशून्यत्वं प्रकृतहेतुकप्रकृतसाध्यसिद्ध्यौपयिक-व्याप्यत्वविषयकत्वं वा तदनतिरिक्तविषयत्वम् । वह्निव्याप्यालो-कवत्सधर्म्मा पर्वतो वह्निमान् धूमादिन्धनव्याप्यधूमवान् पर्वतो वह्निमान् धूमादित्यादौ तस्याः सङ्ग्रहाय प्रकृतहेतुसाध्ययोरुपा-दानम् । वह्निव्याप्यधूमवान् पर्वतो वह्निमान् धूमात् सत्तादिव्या-प्यद्रव्यत्ववदिदं सत्तादिमद्द्रव्यत्वादित्यादिस्तु न प्रयोगः—विशि-ष्टपक्षोपस्थापकादेव तादृशव्याप्तिप्रतीतावाकाङ्क्षाविरहेणोदाहर-णानुत्थानात्, अन्यथातिप्रसङ्गात् । अत एव नैकदोभयव्या-प्त्युपन्यासोऽपि ।

यदि च मैत्रः पचति अयं गौरित्यादेरेव प्रतिज्ञाया यथोप-वर्णितविशिष्टज्ञानजनकत्वं तादात्म्येन गोः साध्यत्वात् गोत्व-त्वाद्यनुपस्थित्या गोत्वादेः साध्यत्वानुपपत्तेः पदार्थतावच्छेदक-जातौ हेत्वर्थान्वयायोगाच्च, वह्निमानित्यादौ पुनरनुमितौ पक्षे साध्यस्य वह्नेः संयोगात्मकः सम्बन्धो भासते तथैव वह्निव्या-प्यधूमवानित्याद्युपनयसङ्गमात् । शाब्दभाने तु वह्निमतोऽभेद एवं भेदे साध्ये भिद्यते भिन्नमित्यादावपि वैलक्षण्यमिति सूक्ष्म-

प्रक्षिप्यते, तदा यादृशपक्षसाध्यिकाः पक्षे यादृशयादृशविशिष्टार्थबोधिकाः प्रतिज्ञाः सम्प्रदायप्रसिद्धाः तादृशानां बोधानामन्यतमेनाप्यनिवर्त्यस्य संशयस्यानिवर्त्तको यस्तावद्बोधानामन्यतमो बोधस्तज्जनकत्वं वक्तव्यम् । एवञ्च तादात्म्येन गवि साध्ये पक्षे गवाभेदस्य संयोगेन समवायेन वा वह्नौ वह्न्यादिभेदस्य समवायेन पाकस्य कृतौ पाककृतिमत्त्वस्य पाककर्त्रभेदस्य विशेषणतयेतरेभ्यो भेदे इतरभेदवत्त्ववत्त्वस्येतरान्याभेदस्येतरभेदवत्त्वस्येतरभिन्नाभेदस्य च बोधा विशिष्य वक्तव्या इति दिक् ।

तावद्बोधानिवर्त्यसंशयानिवर्त्तकतावद्बोधानिवर्त्ययावत्संशयनिवर्त्तकबोधजनकत्वं वाच्यमित्यपि कश्चित् ॥

(गा०) साध्यतावच्छेदकविशिष्टसाध्यनिवेशप्रयोजनमाह पञ्चम्यर्थेति । हेतुत्वं प्रमेयाद्वाच्यत्ववत्प्रमेयादित्यादौ हेतुजन्यबोधस्य विभक्त्यर्थहेतुत्वे प्रमेयाद्यात्मकप्रकृत्यर्थवैशिष्ट्यावगाहित्वेऽपि प्रकृतसाध्यतावच्छेदकविशिष्टवैशिष्ट्यानवगाहित्वान्नातिव्याप्तिरित्यर्थः । पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नप्रकारताकत्वमेव पर्यवसितार्थः । सम्बन्धविशेषश्चैतद्दले न प्रवेश्यः प्रयोजनविरहादतः पञ्चम्यर्थे प्रकृत्यर्थस्य यादृशसम्बन्धेनान्वयस्तस्य वृत्त्यनियामकतया व्यापकत्वाघटकत्वेऽपि नैतद्व्यावृत्त्यसङ्गतिः । यदि च जन्यग्रहविषयत्वरूपपञ्चम्यर्थैकदेशजन्यत्वे प्रकृत्यर्थस्य हेतुज्ञानस्यान्वयः न तु परम्परासम्बन्धेन तादृशविषयत्वे, तदा जन्यत्वपक्षकोक्तसाध्यहेतुकस्थले व्यावृत्तिर्बोध्या–पक्षमुख्यविशेष्यकत्वपर्यन्तानिवेशात्, न तु तादृशविषयत्वत्वावच्छिन्नपक्षकस्थले हेतुजन्यबोधस्य तादृशविशिष्टपक्षे इतरवैशिष्ट्यानवगाहित्वात् । तादृशविषयताविलक्षणेति । साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविषयताविलक्षणेत्यर्थकम् । तद्विलक्षणत्वं च न तद्भिन्नत्वं प्रतिज्ञाजन्यबोधीयसाध्यादिविषयतायास्तद्भिन्नत्वेनासम्भवापातात् । तादृशविषयताभिन्नमुख्यविशेष्यताशून्यत्वनिवेशेनासम्भववा-

रणेऽपि निगमनातिव्याप्तितादवस्थ्यात् अन्यूनविषयकत्वदलवैयर्थ्याच्च । धूमादालोकवान् पर्वतो वह्निमान् धूमादित्यादौ हेत्ववयवजन्यबोधीयहेतुत्वानग्रमुख्यविशेष्यतायास्तादृशविषयताभिन्नत्वात् । एतेन तादृशविशिष्टविषयतानन्तःपातित्वं, प्रकृतपरामर्शजन्यतानवच्छेदकत्वं वा तदित्यपि निरस्तम्–उक्तस्थले आलोकाद्यंशे हेतुत्वप्रकारताया एव तादृशविषयतान्तःपातित्वात्प्रकृतपरामर्शजन्यतावच्छेदकत्वाच्च हेतुजन्यबोधीयतादृशविषयताया अतथात्वात् । न च तथाविधविषयतावच्छेदककोट्यप्रविष्टधर्मावच्छिन्नविषयताशून्यत्वनिवेशान्न दोष, इत्यपि न साधु–यत्र प्रमेयसामान्यस्य पक्षतावच्छेदकादिघटकता तत्र तादृशविषयतावच्छेदककोट्यप्रविष्टाप्रसिद्धेः । विलक्षणावच्छेदकतानिवेशेऽपि द्रव्यव्याप्यधूमादालोकवान् पर्वतो वह्निमान् धूमादित्यादिन्यायान्तर्गतनिगमनादावतिव्याप्तिस्तज्जन्यबोधविषयतावच्छेदकधूमत्वादेस्तादृशविषयतावच्छेदककोटिप्रविष्टत्वानियमात् । अपि तु तादृशविषयताशालिनिश्चयत्वावच्छिन्नानिवर्त्यसंशयनिवर्त्तकतावच्छेदकत्वमेव तत् निगमनादिजन्यबोधीयज्ञानज्ञाप्यत्वादिविषयतायास्तादृशनिश्चयत्वावच्छिन्नानिवर्त्यज्ञानज्ञाप्यत्वादिसंशयनिवर्त्तकतावच्छेदकतया तद्वारणम् । उक्तहेत्ववयवजन्यबोधनिवर्त्यस्य हेतुत्वं धूमीयं न वेत्यादिसंशयस्य धूमादिज्ञानज्ञाप्यत्वादिघटितपक्षतावच्छेदकावच्छिन्नपक्षकसाध्यतावच्छेदकावच्छिन्नप्रकारकनिश्चयनिवर्त्यतया तादृशबोधविषयतायां न तथाविधविषयताविलक्षणतेत्यन्यूनपदस्य व्यावृत्तिसङ्गतिः । सर्वेषामेव संशयानां स्वविरोधिविषयकतथाविधविषयताशालिसमूहालम्बननिश्चयनिवर्तनीयतया तादृशनिश्चयानिवर्त्यसंशयाप्रसिद्धिरतस्तादृशनिश्चयत्वावच्छिन्नेति । इत्थं च अधिकमवगाहमानेऽपि निगमनजन्यबोधे साध्यतावच्छेदकावच्छिन्नसाध्यविशिष्टपक्षतावच्छेदकावच्छिन्नपक्षविषयकत्वस्याक्षततया धूपज्ञानज्ञाप्यत्वादिसंशयस्य तादृशविषयताशालिनिश्चयानिवर्त्यत्वानुपपत्तिरित्यपि समाहितम् । अवच्छिन्नत्वं चान्यूनवृत्तित्वं व्यापकत्वपर्यवसितम्, अतो ज्ञानज्ञाप्यत्वं धूमीयं नवेति संशयनिरूपितप्रतिबन्धकतायां धूमज्ञानज्ञाप्यत्वातिरिक्तप्रतिज्ञाप्रतिपाद्यभागविषयताघटितधर्मस्य स्वरूपसम्बन्धरूपावच्छेदकत्वविरहेऽपि नान्यूनपदव्यावृत्त्यसङ्गतिः अप्रामाण्यज्ञानास्कन्दितस्य

निगमनादिजन्यबोधस्य संशयाप्रतिबन्धकतया तज्जनकत्वमादायातिप्रसङ्गस्य वारणाय तादृशसंशयानिवर्त्तकत्वमुपेक्ष्य तन्निवर्त्तकतावच्छेदकविषयताशून्यत्वेन बोधो विशेषितः। पक्षतावच्छेदकाद्यनिवेशे तदनवच्छिन्नपक्षादिविषयताशालिनिश्चयसमुदायस्य कमपि संशयं प्रत्यप्रतिबन्धकतया तादृशानिवर्त्याप्रसिद्धिरतस्तन्निवेश इति। इत्थं चानतिरिक्तविषयकत्वघटकसाध्यतावच्छेदकावच्छिन्नसाध्यविशिष्टपक्षतावच्छेदकावच्छिन्नविषयतायां स्वनिष्ठत्वनिवेशेनैव न्यूनविषयकदर्शितहेतुजन्यबोधवारणसम्भवे पृथगन्यूनविषयकत्वविशेषणमनर्थकमित्यपि समाहितम्—तादृशविषयतायां स्वनिष्ठत्वविशेषणे निगमनादिजन्यबोधस्य ज्ञानज्ञाप्यत्वविशेषितसाध्यविशिष्टपक्षविषयताशालित्वनियमात्स्वनिष्ठनिरुक्तविषयताशालिनिश्चयत्वव्यापकप्रतिबन्धकताकज्ञानज्ञाप्यत्वादिसंशयान्यसंशयाप्रतिबन्धकतयाऽनतिरिक्तविषयताकत्वापत्तेर्दुर्वारत्वात् । सत्यन्तस्य न्यायावयवत्वमर्थः। निगमने च पक्षवाचकं पदमनुपज्यत इति तद्वारणमनतिरिक्तपदप्रयोजनमिति मतमनुसृत्य लघुशरीरमनतिरिक्तविषयकत्वं निर्वक्ति प्रकृतेति। प्रकृतहेतुका या प्रकृतसाध्यसिद्ध्यौपयिकी व्याप्तिस्तद्विषयकत्वमित्यर्थः । यद्रूपावच्छिन्नविशेषितप्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टप्रकृतपक्षतावच्छेदकावच्छिन्नविषयकनिश्चयत्वं प्रकृतसाध्यतावच्छेदकावच्छिन्नसाध्यकानुमितिजनकतानतिरिक्तवृत्ति तद्रूपावच्छिन्नविषयकत्वमिति तु पर्यवसितम् । तादृशं रूपं तद्धेतुतावच्छेदकावच्छिन्नतद्धेतुव्यापकप्रकृतसाध्यसमानाधिकरण्यत्वं तत्तत्साध्यतावच्छेदकावच्छिन्नसाध्याभावव्यापकाभावप्रतियोगितात्वं च । निगमनस्थतत्पदस्य च व्याप्तिपक्षधर्मताविशिष्टहेतुपरतया तज्जन्यबोधस्य तादृशरूपावच्छिन्नविषयकत्वान्नातिव्याप्तिः । अन्वयव्यतिरेकव्याप्त्योर्विशिष्यैकतरनिवेशेऽन्वयिनि व्यतिरेकिणि वा निगमनेऽतिव्याप्तिरिति निरुक्तरूपावच्छिन्नत्वेन द्वयोरनुगमः । यदि च यत्त्वतत्त्वयोर्निवेशान्नानुगमसम्भव इति विभाव्यते, तदाऽभावद्वयमेव बोधे निवेशनीयम् । एतल्लाभायैव चौपयिकान्तमिति ध्येयम् । यद्यप्युदाहरणजन्यबोधस्य न निरुक्तरूपावच्छिन्नविषयकत्वं तथापि सिषाधयिषाधीनन्यायप्रयोगानुपगमेन तत्र पक्षतावच्छेदकविशिष्टे

साध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वरूपान्यूनविषयकत्वविरहादेव नातिप्रसङ्गः। हेत्वन्तभागे च सत्यताभावान्नातिव्याप्तिरित्यवधेयम्। वह्निव्याप्तिविशिष्टस्यालोकस्य पर्वतत्वावच्छिन्नविशेषणत्वे तद्विशिष्टेऽपि पर्वते तद्वृत्तेरर्थतो लाभेनार्थतस्तत्र प्रकृतसाध्यगमकतालाभान्न हेत्ववयवाभिधानप्रयोजकाकांक्षावसर इत्यतः सधर्मेति। तस्याः–प्रतिज्ञायाः।

नन्वेवमपि यत्र प्रकृतहेतुकप्रकृतसाध्यकव्याप्तिरेवान्तर्भवति पक्षगर्भे तत्रत्यप्रतिज्ञाया असंग्रह इत्याशङ्कां परिहरति यद्वीति। विशिष्टपक्षेति। पक्षतावच्छेदकविशिष्टपक्षेत्यर्थः। तादृशव्याप्तीति। प्रकृतहेतुकप्रकृतसाध्यसिद्ध्यौपयिकव्याप्तीत्यर्थः। उदाहरणेति। यद्यपि दर्शितस्थले विशिष्टपक्षोपस्थापकपदात्प्रकृतहेतौ विशिष्टपक्षवृत्तित्वस्याप्यर्थतः प्रतीत्योपनयादिप्रयोजकाकांक्षाया अप्यनवकाशः, तथापि धूमवत्त्वस्थाने धूमवत्साधर्म्यनिवेशे तस्याः सम्भव इति उदाहरणमात्रोपादानम्। अन्यथा–ऽऽकांक्षाविरहेणाभिधाने। अतिप्रसङ्गात्-हेतुवचनादेरप्यभिधानप्रसङ्गात्। अत एव-अनाकांक्षिताभिधानादेव। एकदा–एकन्यायप्रयोगदशायाम्। उभयव्याप्तीति। अन्वव्याप्तिव्यतिरेकव्याप्तिद्वयेत्यर्थः। व्याप्तिद्वयस्य क्रमेणैवाभिधातुं शक्यतया प्रथमोपन्यस्तव्याप्तिप्रतीत्यैव सन्निहितनिर्वाहेण व्याप्त्यन्तराकांक्षानुदयादिति भावः। एतेनान्वयव्यतिरेक्युदाहरणाकांक्षाघटितान्वयव्यतिरेकिहेतुलक्षणानन्तरमपरलक्षणमभिधास्यतो मणिकारस्य प्रथमलक्षणानिर्भरबीजमाविष्कृतम्। अतएव तादृशातिप्रसङ्गस्य पृथगभिधानम।

वह्न्यादिसाध्यकप्रतिज्ञायामव्याप्त्या यथोपवर्णितलक्षणमाक्षिपति यदि चेति। अत्र चासम्भवाभावमाविष्कर्त्तुं कतिपयप्रतिज्ञाजन्यबोधस्य यथोपवर्णितानुमित्यन्यूनानतिरिक्तविषयकत्वं व्यवस्थापयति मैत्र इत्यादिना। अयं गौरित्यत्र गोत्वस्य साध्यत्वे पक्षे साध्यतावच्छेदकगोत्वत्वविशिष्टप्रकारकज्ञानजनकत्वासम्भवादाह तादात्म्येन गोरिति। ननु भवतु गोसाध्यकप्रतिज्ञा तादृशी तथापि यदि समवायेन गोत्वस्य साध्यत्वेऽपि तथाविधप्रतिज्ञासंप्रदायानुमता तदा तत्साध्यकतादृशप्रतिज्ञाया दर्शितबोधजनकत्वासम्भवात्सामान्यतस्तदाकारप्रतिज्ञायास्तथात्वाभिधानमसङ्गतमि

स्याशङ्कायां तस्या गोत्वादिसाध्यकत्वं निराकरोति गोत्वत्वाद्यनुपस्थित्येति । तादृशप्रतिज्ञावाक्यादित्यादिः । अत्रेति शेषः । अनुपपत्तेरिति । प्रतिज्ञायाः साध्यतावच्छेदकोपस्थापकत्वनियमादन्यथा सुन्दरवह्नित्वावच्छिन्नसाध्यकस्थलेऽपि वह्निमानित्याकारकप्रतिज्ञाप्रसङ्गादिति भावः । यद्यपि समवायेन रक्तत्वविशिष्टदण्डावच्छिन्नसाध्यकरक्तदण्डिमानित्यादिप्रतिज्ञाया न समवायेन रक्तत्वविशिष्टसाध्यतावच्छेदकबोधकत्वसम्भवः, तथापि तत्र साध्यतावच्छेदकघटकसकलपदार्थानामेव विशकलितानां तादृशप्रतिज्ञावाक्यादुपस्थितेस्तदधीनसाध्यतावच्छेदकविशिष्टसाध्यविषयकमानसबोधेनापि तत्र विशिष्टसाध्यसंशयप्रयोज्यजिज्ञासाविपर्यसिद्धिसम्भवः, प्रकृते तु विशकलितानामपि गोत्वत्वादिघटकपदार्थानां नोपस्थितिरिति विशेषः । गोत्वादेः साध्यत्वे दोषान्तरमाह पदार्थेति । जातेः पदार्थतावच्छेदकत्वं पदार्थान्तरान्वयित्वासम्भवप्रयोजकत्वेनाभिहितम् । इदमुपलक्षणम् । अन्वयितावच्छेदकरूपेणानुपस्थितत्वमपि तथा बोध्यम् ।

ननु पर्वतो वह्निमानित्याद्याकारकप्रतिज्ञा न वह्निसाध्यिका अपि त्वभेदेन वह्निमत्साध्यकैव, तथाच तज्जन्यबोधविषयितायाः अभेदेन वह्निमत्साध्यकानुमितिविषयितातो न वैलक्षण्यमतो न तत्राव्याप्त्यवकाश इत्यत आह तथैवेति । तादृशप्रतिज्ञाया वह्निसाध्यकत्वेनैवेत्यर्थः । इत्युपनयभङ्गमात्–इत्याकारस्योपनयस्य तादृशप्रतिज्ञाघटितन्यायान्तर्गतत्वोपपत्तेः । वह्निमतः साध्यत्वे वह्निमद्व्याप्यवानित्याकारस्यैवोपनयस्य सम्भवादिति भावः । शाब्दभाने–वह्निमानित्येतादृशवाक्यजन्यज्ञाने । अभेद इति । भासत इत्यनुषज्यते । न तु वह्नेः संयोग इति शेषः । नामार्थयोर्भेदान्वयस्याव्युत्पन्नत्वादिति हृदयम् । तथाच तादृशप्रतिज्ञाजन्यबोधे निरुक्तमन्यूनविषयकत्वमनतिरिक्तविषयकत्वं च न सम्भवतीति भावः । भेदे–शुद्धे प्रतियोगिविशेषिते वा साध्ये, इत्यादौ–इत्यादिप्रतिज्ञायाम् , आदिपदादितरेभ्यो भिद्यते इतरभिन्नमित्यादिपरिग्रहः । वैलक्षण्यम्–अनुमितिविलक्षणबोधजनकत्वम् । भेदसाध्यकानुमितौ भेदस्यानुयोगितया इतरावच्छिन्नभेदसाध्यकानुमितावनुयोगितया इतरविशेषितस्य तस्य विशेषण भिद्यते इति प्रतिज्ञाजन्ये च बोधे आख्यातान्तोपस्थाप्यस्य भेदाश्रयस्य इतरेभ्यो भिद्यत इत्यादिजन्ये बोधे च पञ्चम्यन्तार्थेतरप्र-

तियोगिकत्वविशेषितभेदाश्रयत्वस्य स्वरूपसम्बन्धेन भिन्नमित्यादिजन्ये च निष्ठान्तोपस्थाप्यस्य भेदाश्रयत्वावच्छिन्नस्य इतरेभ्यो भिन्नमित्यादिजन्ये च इतरप्रतियोगिकत्वविशेषितभेदाश्रयत्वावच्छिन्नस्येतरभिन्नमित्यादिजन्ये चाभेदेनेतरप्रतियोगिकविशेषितभेदाश्रयत्वावच्छिन्नस्येतरेभ्योऽन्यदित्यादिजन्ये चेतरप्रतियोगिकत्वविशेषितभेदावच्छिन्नस्येतरान्यदित्यादिजन्ये चाभेदेनेतरप्रतियोगिकविशेषितभेदावच्छिन्नस्य भेदेन पक्षांशे विशेषणत्वादिति अनुमितेस्तादृशबोधवैलक्षण्यादिति भावः । इदमुपलक्षणम् । ईदृशादिशा प्रकृते विधेयांशे भान इवोद्देश्यतावच्छेदकांशे भानेऽपि वैलक्षण्यमवसेयम्। गन्धाद्यवच्छिन्नपक्षकानुमितौ गन्धादेः साक्षाद्विधेयधर्मितावच्छेदकत्वात्, गन्धवती इतरेभ्यो भिद्यत इत्याकारकतादृशप्रतिज्ञाजन्यबोधे च गन्धादिसम्बन्धस्यैव तथात्वादिति ॥

उद्देश्यानुमितिपदस्य यादृशविशिष्टार्थबोधः प्रतिज्ञया जन्यते तादृशविशिष्टार्थबोधपरतेत्यभिप्रेत्य समाधत्ते यादृशेति । यादृशरूपावच्छिन्नपक्षकयादृशरूपावच्छिन्नसाध्यकसम्प्रदायसिद्धप्रतिज्ञा यादृशरूपावच्छिन्नपक्षे यादृशयादृशरूपावच्छिन्नप्रकारकबोधजनिका तादृशरूपावच्छिन्ने तादृशरूपावच्छिन्नप्रकारकबोधानिवर्त्यसंशयानिवर्त्तकतादृशबोधान्यतमबोधजनकत्वे सति तादृशरूपावच्छिन्नपक्षकतादृशरूपावच्छिन्नसाध्यकन्यायान्तर्गतत्वं प्रतिज्ञात्वमित्यर्थः । अत्र च जनिकेत्यन्तं बोधविशेषपरिचायकमात्रं न तु तदर्थस्य लक्षणे निवेशः । बोधाश्च विषयविशेषसन्निवेश्य विशिष्यैवोपादेयाः न तु प्रतिज्ञाप्रतिपाद्यत्वेन अतो नात्माश्रयशङ्कावकाशः । एवञ्च प्रतिज्ञाप्रतिपाद्यविशिष्टार्थानामननुगमेनैकधर्मावच्छिन्नपक्षसाध्यकनिखिलप्रतिज्ञासाधारणमपि प्रतिज्ञात्वं नैकं सम्भवतीति बोधानामन्यतमत्वेनानुगमस्तेन रूपेण जनकतांश एव बोधानां विशेषणता न तु निवर्त्यत्वांशेऽपीति बोधानामननुगमेपि तादृशतादृशबोधनिवर्त्यत्वाभावकूटघटितधर्मस्यानुगतत्वात् तादृशबोधभेदकूटवद्भिन्नत्वरूपान्यतमत्ववान्निवर्त्यत्वसामान्यभावस्थले तादृशतादृशबोधनिवर्त्यत्वाभावकूटस्यैव लाघवेन निवेशयितुमुचितत्वात् । एवञ्च तादृशाभावकूटनिवेशसूचनायैवान्यतमेनापीत्युक्तम् । एतेन सामान्याभावनिवेशसूचनायापिकार इति व्याख्यानमनादेयम् । विशेष्यदलेऽन्यत-

मत्वानिवेशनमपि यत्र प्रतिज्ञार्थानां नानाविधत्वं तत्रैव पर्वतादिपक्षकवह्न्यादिसाध्यकस्थले पर्वतादौ वह्न्यादिमदभेदरूपेणैकविधबोधस्यैव प्रतिज्ञया जननान्न तत्र तन्निवेशः । एतेनैकमादायान्यतमत्वस्यासम्भवेऽपि न क्षतिः—शब्दाभेदस्याप्यप्रयोजकत्वात् । वह्नित्वावच्छिन्नसाध्यकप्रतिज्ञया घटवद्भूतलादिघटितधर्मावच्छिन्नविशेष्यकः पर्वतत्वावच्छिन्नपक्षकप्रतिज्ञया च तादृशधर्मावच्छिन्नप्रकारकोऽपि बोधो जन्यते, तन्निवर्त्यश्च भूतलं घटवन्नवेत्यादिसंशयोऽपीति प्रतिज्ञायां प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षकत्वस्य प्रकृतसाध्यतावच्छेदकावच्छिन्नसाध्यकत्वस्य वाऽनुपादाने उक्तबोधानिवर्त्यसंशयाप्रसिद्धिरतस्तदुपादानम् । यत्किञ्चिद्रूपावच्छिन्नपक्षसाध्यकप्रतिज्ञाप्रतिपाद्यतत्तद्विशिष्टार्थबोधानिवर्त्यसंशयानिवर्तकबोधजनकत्वस्य यत्किञ्चिद्रूपावच्छिन्नपक्षसाध्यकन्यायान्तर्गतत्वस्य निवेशनेऽतिप्रसङ्गः प्रागुपदर्शित एवेति यादृशरूपावच्छिन्नपक्षसाध्यकप्रतिज्ञाप्रतिपाद्यविशिष्टार्थबोधानिवर्त्यसंशयानिवर्त्तकबोधजनकत्वं तादृशरूपावच्छिन्नपक्षसाध्यकन्यायान्तर्गतत्वं निवेशितम् । अधिकं त्वित्यादिन्यायेन साध्यांशे हेतुज्ञानज्ञाप्यत्वमवगाहमानेऽपि निगमनादिजन्यबोधे प्रतिज्ञाप्रतिपाद्यविशिष्टार्थविषयकत्वस्याक्षततया निगमनाद्यतिव्याप्तिवारणाय तद्रूपावच्छिन्नविशेष्यकतद्रूपावच्छिन्नप्रकारकबोधानिवर्त्यसंशयानिवर्त्तकत्वरूपतादृशबोधानतिरिक्तविषयकत्वं बोधविशेषणम । इत्थं च प्रतिज्ञाजन्यबोधानिवर्त्त्यस्य वह्नि धूमज्ञानज्ञाप्यो न वेत्यादिसंशयस्य निवर्त्तकतया तादृशबोधवारणम ।

न च प्रतिज्ञाजन्यबोधस्य पर्वतत्वाद्यवच्छिन्नविशेष्यकवह्निमत्त्वाद्यवच्छिन्नप्रकारकबोधत्वेनैवोपादेयतया निगमनादिजन्यबोधस्यापि तथात्वात्तन्निवर्त्यत्वमुक्तसंशयस्याक्षतमेवेति वाच्यम् । अप्रामाण्यज्ञानानास्कन्दिततादृशविशिष्टार्थविषयकनिश्चयत्वावच्छिन्नानिवर्त्यत्वस्यैव निवेशनीयत्वादुक्तसंशयस्य धूमज्ञानज्ञाप्यत्वाविषयकवह्निमत्पर्वतनिश्चयानिवर्त्यत्वेन तथाविधनिश्चयत्वावच्छिन्नानिवर्त्यत्वाक्षतेः । एतेन सर्वेषामेव संशयानां वह्निमत्पर्वतादिविषयकसमूहालम्बनात्मकस्वविरोधिनिश्चयनिवर्त्तनीयतया तादृशबोधानिवर्त्यसंशयाप्रसिद्धिरित्यपि निरस्तम् । तादृशनिश्चयत्वनिष्ठं निवर्त-

कतावच्छेदकत्वं च न स्वरूपसम्बन्धविशेषः किन्त्वनतिरिक्तवृत्तित्वम्। तेन सम्बन्धी वह्निमान्न वेत्याकारकैकदेशसंशयं प्रति वह्निसम्बन्ध्यभिन्नपर्वतादिनिश्चयत्वेनाप्रतिबन्धकत्वेऽपि तादृशसंशयनिवर्त्तकप्रतिज्ञाजन्यबोधस्य नासङ्ग्रहः। अत एव धूमादालोकवान् पर्वतो वह्निमान्धूमादित्यादौ हेतुजन्यबोधनिवर्त्य-हेतुत्वं धूमीय न वेति-संशयं प्रति प्रतिज्ञाप्रतिपाद्यविशिष्टार्थविशेषविषयकनिश्चयत्वेनाप्रतिबन्धकत्वेऽपि न विशेष्यदलवैयर्थ्यम। वह्निमत्त्वप्रकारकनिश्चयत्वावच्छिन्ननिवर्त्यस्य पर्वतत्वाद्यवच्छिन्नविशेष्यकनिश्चयत्वावच्छिन्ननिवर्त्यस्य चाप्रसिद्धिरतो विशेष्यप्रकारोभयनिवेशनम्।

यद्यप्यत्र प्रतिज्ञाप्रतिपाद्यस्य विधेयविशिष्टधर्मिण एव यादृशविशिष्टार्थपदेनोपादानसम्भव इति यादृशविशिष्टार्थबोधिका इत्युपेक्ष्य विशेष्यप्रकारयोः खण्डश उपादानसूचनाय पक्षे यादृशविशिष्टार्थवत्त्वबोधिका इत्यभिधानमनुचितम्, तथापि धूमादालोकवान् पर्वतो वह्निमान् धूमादित्यादौ प्रतिज्ञार्थहेत्वर्थविषयकसमूहालम्बनबोधजनके हेत्वन्ते हेतौ वा न्यायावयवत्वं परित्यज्य न्यायान्तर्गतत्वनिवेशपक्षे प्रतिज्ञाजन्यबोधनिष्ठैकदेशविषयकबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकतामादायैकदेशे चातिप्रसङ्गवारणाय विशिष्टार्थविषयकबुद्धित्वावच्छिन्नजन्यताप्रतियोगिकजनकत्वनिवेशे पर्वतो वह्निमानित्यादिप्रतिज्ञाया असङ्ग्रहः, वह्न्यादिशून्यपर्वतादौ वह्निमत्त्वाद्यवगाहिभ्रमात्मकशाब्दबोधसाधारण्यानुरोधेन तत्तत्पदार्थानां परस्परमुपश्लेषावगाहित्वस्यैव तादृशप्रतिज्ञाजन्यतावच्छेदकत्वोपगमात् तत्तद्विशिष्टार्थविषयकत्वस्यातथात्वादिति अनतिरिक्तविषयकबोधनिष्ठतादृशपरस्परोपश्लेषावगाहित्वावच्छिन्नजन्यताप्रतियोगिकजनकताया निवेशसूचनाय तथाभिधानम्। तादृशपरस्परोपश्लेषावगाहिशाब्दत्वे जन्यतावच्छेदकतापर्याप्त्यनिवेशान्नानतिरिक्तविषयकत्वदलवैयर्थ्यमित्यवधेयम्। भेदादिसाध्यकस्थले पृथिवी इतरेभ्यो भिद्यत इत्यादिप्रतिज्ञाप्रतिपाद्यभेदाश्रयत्वादिरूपयत्किञ्चिदेकार्थनिश्चयाप्रतिबध्यभेदादिकोटिकसंशयं प्रति पृथिवी नेतराणीत्यादिप्रतिज्ञाजन्यभेदादिप्रकारकनिश्चयस्य प्रतिबन्धकतया न कस्याश्चिदपि प्रतिज्ञायास्तादृशसंशयानिवर्त्तकबोधजनकत्वमतस्तद्विशिष्टार्थविषयकनिश्चयनिवर्त्यत्वाभावकूटानिवेशनम्। प्रतिज्ञाजन्य-

बोधस्य स्वसमानाकारानुमितौ सिद्धिविधया प्रतिबन्धकत्वात्तादृशानुमितेश्च सिषाधयिषाकालीनतादृशबोधाप्रतिबध्यतया तादृशाप्रामाण्यज्ञानानास्कन्दितप्रतिज्ञाप्रतिपाद्यविशिष्टार्थविषयकनिश्चयत्वावच्छिन्नप्रतिबन्धकताकान्यत्वादसम्भव इत्यतो ज्ञानसामान्यमुपेक्ष्य संशयपर्यन्तानुधावनम् । न चानुमितेस्तादृशनिश्चयत्वावच्छिन्नप्रतिबन्धकताकान्यत्वेऽपि तदप्रतिबन्धकासिषाधयिषाकालीनबोधजनकत्वमादाय प्रतिज्ञायां लक्षणसमन्वयः सम्भवतीति संशयपदमनर्थकं स्वरूपयोग्यतारूपजनकताया एव निवेशनीयतयाऽव्याप्तेरप्यनवकाशादिति वाच्यम् । अनिवर्त्तकत्वं हि प्रतिबन्धकतावच्छेदकीभूतविषयिताशून्यत्वं न तु प्रतिबन्धकत्वाभावः तथासत्यप्रामाण्यज्ञानास्कन्दिततादृशबोधमादाय निगमनातिव्याप्तितादवस्थ्यात्, तथाच सिषाधयिषाकालीनसिद्धेरप्रतिबन्धकत्वेऽपि प्रतिबन्धकतावच्छेदकीभूतविषयिताशालित्वेनानुमित्यनिवर्त्तकत्वासम्भवात् । न च सिद्धेः पूर्वं परतो वा सिषाधयिषाया उत्पादस्थले द्वितीयक्षणे प्रथमक्षणे वा सिषाधयिषाविरहविशिष्टत्वमक्षतमेवेति सिषाधयिषाविशिष्टाया अपि सिद्धेरनुमितिप्रतिबन्धकत्वमक्षतमेवेति कथं तस्या अप्रामाण्यज्ञानानास्कन्दिततादृशविशिष्टार्थनिश्चयत्वावच्छिन्नप्रतिबन्धकताकान्यत्वमिति वाच्यम् । यादृशसिद्धेः पूर्वं परतश्च सिषाधयिषाया उत्पादस्तादृशसिद्धेरेवाप्रतिबन्धकत्वात् । प्रत्यक्षनिश्चये विशेषदर्शनकालीनविपरीतनिश्चयस्याप्रतिबन्धकतामते तस्यापि प्रतिज्ञार्थनिश्चयत्वावच्छिन्नप्रतिबध्यतयोक्तदिशाऽसम्भव इति प्रत्यक्षसामान्यमुपेक्ष्य संशयपर्यन्तानुधावनम् । अत्र च तत्तद्विशिष्टार्थविषयकनिश्चयत्वानवच्छिन्नसंशयप्रतिबन्धकत्वशून्यत्वस्य ज्ञानविशेषणत्वोपगमेनैवातिरिक्तविषयकस्य हेत्वन्तादिभागजन्यबोधस्य तथाविधधूमज्ञानज्ञाप्यत्वादिसंशयप्रतिबन्धकताश्रयस्य वारणसम्भवात् तादृशप्रतिबन्धकतात्वेनैव तथाविधनिश्चयत्वावच्छिन्नप्रतिबन्धकताकान्यसंशयप्रतिबन्धकतानिवेशः न तु तथाविधनिश्चयत्वावच्छिन्नप्रतिबन्धकताकान्यसंशयप्रतिबन्धकतात्वेन गौरवादित्यवधेयम् । उक्तहेतुवारणाय तादृशबोधान्यतमेति । प्रकृतप्रतिज्ञाजन्यतावच्छेदकीभूतं यादृशयादृशबुद्धित्वं तादृशतादृशबुद्धित्वावच्छिन्नान्यतमजन्यतानिरूपितजनकतापर्यन्तस्य विवक्षणीयतयोक्तसमूहालम्बनबो-

धमादाय न तत्रातिप्रसङ्ग इत्युक्तप्रायम् ॥

गवाभेदस्येत्यादि सकलषष्ठ्यन्तैः समं बोधा विशिष्य धर्त्त-व्या इत्यग्रिमस्यान्वयः। यद्यपि तादात्म्येन गोःसाध्यकस्थलेऽनुमित्य-न्यूनानतिरिक्तविषयकबोधजनकत्वं प्रतिज्ञायाः सम्भवतीति प्रागभि हितं तावतैव च गवाभेदः प्रतिज्ञाप्रतिपाद्य इत्यस्य लाभात्तत्र तादृशबो-धमादाय लक्षणं कर्त्तव्यमिति स्फुटमेव, तथापि तत्र तादृश एव बोधो लक्षणघटको न त्वन्यविधो बोध इति स्फुटीकर्त्तुं तदुपादानम्। तादा-त्म्येन वह्नौ साध्येऽयं वह्निरित्येव प्रतिज्ञा जायते तत्र च न वह्निमद्भे-दबोधो लक्षणघटक इत्यतः संयोगेन समवायेन वेति। तादात्म्यातिरि-क्तसम्बन्धेनेत्यर्थः। वह्नौ इत्यादि सप्तम्यन्तत्रयं साध्य इति प्राकृतनेना-न्वितम्। वह्निमदभेदस्येति।अत्राप्येतादृशबोधस्य तादृशप्रतिज्ञाजन्य-तायाः प्रागुपदर्शितत्वेप्यन्यविधबोधासम्भवमाविष्कर्त्तुमतदुपादानम्। पाककृतिमत्त्वस्येति। पाककृतिसमवायस्येत्यर्थः। पचतीति प्रतिज्ञा-तस्तद्बोधादिति भावः। पाककर्त्रभेदस्येति। पाककृत्यवच्छिन्नाभेदस्य पाककृतिमत्त्वावच्छिन्नाभेदस्य चेत्यर्थः। पक्ता पाककृतिमानित्यादि-प्रतिज्ञातस्तद्बोधादिति भावः। इतरभेदवत्त्वस्येति। इतरभेदाश्रयता-सम्बन्धस्येत्यर्थः। इतरेभ्यो भिद्यत इत्यादितस्तादृशबोधादिति भा-वः। इतरान्याभेदस्येति। इतरभेदावच्छिन्नाभेदस्येत्यर्थः। इतरान्येति प्रतिज्ञातस्तद्बोधादिति भावः। इतरभेदवत्त्वस्येति।इतरभेदसंसर्गस्ये-त्यर्थः।नेतराणीत्यतस्तद्बोधादिति भावः। इतरभिन्नाभेदस्येति। इतर-भेदाश्रयत्वावच्छिन्नाभेदस्येत्यर्थः। इतरभिन्नेति प्रतिज्ञातस्तद्बोधादि तिभावः ॥

अनतिरिक्तविषयकत्वार्थः पूर्ववदेव। अन्यूनविषयकत्वं तु तावद्बो-धनिवर्त्ययावत्संशयनिवर्तकत्वम्,दर्शितहेतुजन्यबोधस्य ज्ञानज्ञाप्यत्वं धूमीयं नवेत्यादिप्रतिज्ञाजन्यबोधानिवर्त्तनीयसंशयप्रतिबन्धकत्वेऽपि तादृशयावत्संशयान्तर्गतपर्वतो वह्निमान्न वेत्यादिसंशयानिवर्त्तक-त्वेन वारणसंभवादिति वदतो मतमाह तावदिति। तत्तद्विशिष्टार्थवि-षयकेत्यर्थः। तावद्बोधनिवर्त्ययावत्संशयेति। तत्तद्विशिष्टार्थबोधान्य-तमयत्किञ्चिद्बोधानिवर्त्ययावत्संशयेत्यर्थः। तेन भेदादिसाध्यकस्थले भेदतदाश्रयत्वादिकोटिकनानाविधसंशयानामेव प्रकृतसाध्यपक्षक-प्रतिज्ञार्थबोधनिवर्त्यतया यावत्संशयान्तर्गततयातावत्संशयनिवर्त्त-

क(१)(तायाः पृथिवी नेतराणि पृथिवीतरेभ्यो भिद्यत इत्यादिप्रतिज्ञाजन्यबोधेऽसत्त्वेऽपि तादृशसकलवाक्यजन्यसमूहालम्बनबोधस्य तावत्संशयनिवर्त्तकत्वात्तत्र च निरुक्तानतिरिक्तविषयकत्वसत्त्वात् तज्जनकत्वमादायैव प्रत्येकप्रतिज्ञासु लक्षणसमन्वयो बोध्यः।) अत्र च स्वमतापेक्षया गौरवमेवास्वरसबीजं बोध्यम् ॥

(दी०) चैत्रः पचति घटो नेतराणीति प्रतिज्ञायां साध्ये विषयित्वानुयोगित्वयोः सम्बन्धविधयैवानुप्रवेशाद्यथोपदर्शितसाध्यगमकतौपयिकव्याप्तिविशिष्टहेतुमत्त्वस्य च पक्षे उपनेयत्वात् तथा चायमित्याकारः सुवच एव प्राचामुपनयः । नव्यानां पुनरनन्यगतिकतया तद्व्याप्यहेतुमांस्तद्वान् वेत्याकारः, योग्यतावशाच्च तदा साध्यस्य तद्व्याप्यस्य वा परामर्शः ।

केचित्तु वह्निमान्नवेति विप्रतिपत्तौ तदधीनसंशये च वह्निमत्तदन्योन्याभावयोस्तादात्म्यविशेषणत्वाभ्यां कोटित्वेन जिज्ञासितत्वात्तादात्म्येन वह्निमानेव साधयितुमुचितो न तु वह्निः-अजिज्ञासितत्वात्, तथा च तथा चायमित्याकारो वह्निमद्व्याप्यो धूमवांश्चायमित्याकारो वा उपनयो, न तु वह्निव्याप्यधूमवांश्चायमित्याकारोऽर्थान्तरत्वादिति प्राहुः ।

यत्र चान्तरा तादृशबोधो न जातस्तत्रापि तादृशाकाङ्क्षायोग्यतादिशालित्वरूपं तज्जननयोग्यत्वमक्षतम् । तल्लाभश्च जातिविशेषोपस्थापकशाब्दवाक्यशब्दयोरुपसन्दानादेवेति ।

(गा०)ननु विषयितादिसम्बन्धेन पाकाद्यवच्छिन्नकृत्यादेः यत्र साध्यता तत्र कीदृश उपनयः ? नतावत्पाककृतिव्याप्यवानित्याकारकः-तत्र तत्पुरुषघटकपाकादिपदस्य पाकविषयकादिलाक्षणिकतया पाकविषयकाभिन्नकृतित्वाद्यवच्छिन्ननिरूपितव्याप्तेरेव लाभात्, प्रकृतसाध्यतावच्छेदकावच्छिन्ननिरूपिताया व्याप्तेरलाभेनार्थान्तरप्रसङ्गादित्यत

(१) त्वं न कस्यापि बाधस्येत्यतिव्याप्तिरिति निरस्तम्–अत्रचेति पाठान्तरम् ।

आह चैत्र इति। साध्ये–विशिष्टसाध्यशरीरे। विषयितानुयोगित्वयोरिति। कृतिभेदांश इत्यादिः। सम्बन्धविधयैवेत्यत्रकारेण विशेषणत्वव्यवच्छेदः विषयित्वाद्युपस्थापकपदाभावेन तयोर्विशेषणत्वासंभवादिति भावः। निपातार्थेन नामार्थस्य भेदान्वयधियो व्युत्पत्त्यविरुद्धतया नेतराणीत्यादौ प्रथमाया अनुयोगितार्थकत्वमसिद्धमिति हृदयम्। यथोपदर्शितेति। प्रतिज्ञोपस्थापितेत्यर्थः। उपनेयत्वात्–उपनयबोधनीयत्वात्। तादृशव्याप्तेरेवाकांक्षितत्वेन यः पाककृतिसामग्रीमान् स पचतीत्युदाहरणेन प्रतिपादनात्तादृशव्याप्तिविशिष्टस्य पक्षधर्मताकाङ्क्षयैवोपनयप्रयोगादिति भावः। सुवच एवेति। तथाशब्देन तादृशव्याप्तिविशिष्टहेतुमत एवोपस्थापनादिति भावः।

ननु मणिकृता थाल्प्रत्ययार्थं वितर्क्य तस्मात्तथेतिनिगमनस्य निराकरणीयतया तथापदघटितोपनयेऽपि तद्दोषग्रास इत्यस्यानुमतस्तादृशोपनय इत्येतन्मतमनुसृत्याह नव्यानामिति। तत्पदेन यथोपदर्शितसाध्यस्यैव तादृशसाध्यव्याप्तिविशिष्टहेतोरपि परामर्शसम्भव इति व्याप्त्यादिपदप्रयोगवैयर्थ्यमित्याशयवानाह तद्व्याप्येति। ननु पक्षादेरपि प्रक्रान्तत्वात्तस्यैव कथं नोपनयस्थतच्छब्देन परामर्श इत्यत आह योग्यतेति। तात्पर्यवशादित्यर्थः। व्याप्तिविशिष्टहेतुमत्त्वस्यैवाकांक्षितत्वेन तत्परताया एव तत्र ग्रहादिति भावः। तदा–तच्छब्देन। साध्यस्येति प्रथमकल्पं तद्व्याप्यस्येति द्वितीयकल्पमभिप्रेत्य।

पर्वतो वह्निमानित्यादिन्यायस्य वह्निसाध्यकत्वं निराकृत्य वह्निव्याप्यधूमवांश्चायमित्याकारकोपनयं निराकुर्वतां मतमाह केचित्त्विति। विप्रतिपत्तौ कोटित्वं तज्जन्यस्मृतिविषयत्वं तज्जन्यप्रत्येकशाब्दबोधप्रकारत्वं वा न तु तदधीनसंशयप्रकारत्वमतो न संशये चेत्यस्य वैयर्थ्यम्, तत्प्रदर्शनं च संशयकोटितानिर्वाहकत्वेन तस्य स्वतो जिज्ञासायामतन्त्रत्वादित्यवधेयम्। यद्यपि वह्निमत उपस्थितिदशायां वह्नेरप्युपस्थिततया तादृशविप्रतिपत्तिवाक्याद्वह्निकोटिकोऽपि संशयो भवितुमर्हति तथापि स्वातन्त्र्येण कोट्युपस्थितिः संशयप्रयोजकेत्यभिप्रायेणेदमित्यवधेयम्। अथवा विप्रतिवाक्याच्छाब्द एव संशय इति मतानुसारेणेदम्।

वस्तुतो वह्न्यभावस्य कोटितायामेव वह्निकोटिकसंशयतोपपद्यते न तु वह्निमद्भेदस्य स्वस्वाभावप्रकारस्यैव स्वसंशयत्वात्प्रकृते च

वह्न्यभावो नोपस्थितः, अपि तु तद्भेद एवेति वह्न्यभावस्य कोटित्वासम्भवाद्वह्निसंशयो न सम्भवतीत्यभिप्रायः। एतत्सूचनायैव च वह्निमद्भेदस्य कोटित्वमभिहितं तदभिधानस्य प्रयोजनान्तराभावात्।

यद्वा धर्मिणि तत्प्रकारबोधौपयिकाकाङ्क्षावत्पदजन्यतदुपस्थितिरेव धर्मिणि तत्कोटिकसंशयजनिका पर्वतो वह्निरभाव इत्यादितो वाक्याद्वह्न्याद्युपस्थितौ पर्वतादौ वह्निसंशयानुदयात्। तथाच पर्वतो वह्निमानित्यादिवाक्यस्थवह्न्यादिपदमपि न पर्वतादौ वह्न्यादेर्भेदान्वयौपयिकाकांक्षावदिति न तादृशविप्रतिपत्तिवाक्याद्वह्न्यादिकोटिकसंशयः इति परमार्थः।

नवीनमतमनुसृत्याह वह्निमद्व्याप्येति। प्राहुरिति प्रशब्देनात्रास्वरसभावः सूचितः।

फलोपधायकतारूपजनकतारूपनिवेशशङ्कया प्रसक्तां तादृशशाब्दबोधानुपधायकप्रतिज्ञायामव्याप्तिं योग्यताविवक्षया निराकरोति यत्र चेति। अन्तरेणेति। हेत्वर्थादिविषयकशाब्दबोधसामग्र्यनुत्तरमित्यर्थः। एतेन फलोपधानविवक्षणे अवयवान्तरार्थविषयकशाब्दबोधमात्रोपधायकप्रतिज्ञायामप्यव्याप्तिः प्रसज्यते अनतिरिक्तविषयशाब्दबोधानुपधायकत्वादिति सूचितम्। तादृशेति। तादृशशाब्दबोधजनकज्ञानविषयेत्यर्थः। आकांक्षानिवेशात्पर्वतो वह्निः सम्बन्धीत्यादिनिराकांक्षवाक्यव्युदासः। न च पर्वतो वह्निमानित्यादिशाब्दबोधं प्रति निराकांक्षतादृशवाक्यविषयकज्ञानत्वेनाजनकत्वात्तादृशशाब्दबोधजनकतावच्छेदकविषयिताकत्वनिवेशेनैवोपपत्तावाकांक्षानिवेशनमफलमिति वाच्यम्। पर्वतो वह्निमानित्यादिवाक्यानुपूर्वीप्रकारकभ्रमात्मकतादृशनिराकांक्षविषयकज्ञानस्यापि तथाविधशाब्दधीजनकतया तदीयविषयिताया अपि तज्जनकतावच्छेदकत्वेन तज्जनकतावच्छेदकप्रकारताश्रयानुपूर्वीरूपाकांक्षाशालित्वनिवेशस्यावश्यकत्वात्। तच्छालित्व च तद्घटकवर्णसमुदायत्वम्। तज्जनकतावच्छेदकीभूतभ्रमान्यवृत्तिकाञ्चज्ञानवृत्तिविषयितानिरूपकवर्णसमुदायत्वमिति तु पर्यवसितोऽर्थः। ह्रदो वह्निमानित्यादिभ्रमानुमितसमानविषयकतादृशबोधजनकवाक्यस्य वारणाय योग्यतानिवेशनम्। योग्यत्वं चाबाधितार्थकत्वम्। प्रकृतसाध्यविशिष्टप्रकृतपक्ष-

बोधकत्वमिति यावत् । वैशिष्ट्यं च वास्तवं न तु वैज्ञानिकम् । यद्यपि स्वातन्त्र्येण योग्यतानिवेशो निरर्थकः—अन्यूनविषयकत्वावच्छिन्नजन्यताप्रतियोगिकजनकतायाः अवश्यं विवक्षणीयतया वास्तववैशिष्ट्यघटितसाध्यविशिष्टपक्षविषयकत्वरूपान्यूनविषयकत्वनिवेशासम्भवेऽप्ययोग्यवाक्यप्रतिपाद्यविशिष्टार्थाप्रसिद्ध्या सम्प्रदायसिद्धप्रतिज्ञाप्रतिपाद्यविशिष्टार्थबोधानिवर्त्यसंशयानिवर्त्तकत्वरूपानतिरिक्तविषयकत्वघटितलक्षणस्य तत्रातिव्याप्त्यप्रसक्तेः, तथापि वास्तववैशिष्ट्यघटितानतिरिक्तविषयकत्वसूचनाय योग्यतोपादानम् । आदिपदात्तात्पर्यविशेषपरिग्रहः । तेन निस्तात्पर्यकस्य शुकाद्युच्चारितप्रतिज्ञासमानाकारवाक्यस्यार्थान्तरपरतादृशवाक्यस्य च व्युदासः ।

नन्वाकांक्षादिनिवेशे शाब्दवाक्यपदयोर्वैयर्थ्यम्—आकांक्षादेर्ज्ञानान्तरोपयिकत्वविरहाद्वाक्यातिरिक्तेऽसत्त्वाच्चानुमितिजनकपरामर्शादौ शाब्दधीजनकयोग्यताज्ञानादावतिप्रसङ्गानवकाशादित्यत आकांक्षादिमत्त्वलाभार्थकतया तादृशपदोपादानं सार्थकयति तल्लाभश्चेति । तल्लाभः—शाब्दबोधं प्रति आकांक्षादिमत एव वाक्यस्य जनकतया आकांक्षादिमत्त्वलाभः । तादृशपदद्वयोपादानादित्यर्थः । शाब्दपदस्य योगेन शब्दजन्यार्थकत्वेन तल्लाभः आकांक्षादिरहितस्यापि शब्दस्य शब्दजन्यस्मृतिहेतुत्वादतो जातिविशेषोपस्थापकेति । रूढ्यानुभवनिष्ठशाब्दत्वरूपजात्यवच्छिन्नोपस्थापकार्थकम् । शाब्दबोधं प्रति आकांक्षादिरहितस्यापि योग्यताज्ञानादेर्हेतुतया वाक्यपदानुपादाने केवलशाब्दपदान्न तल्लाभ इति वाक्यपदोपादानापेक्षेति भावः ।

यत्तु—तल्लाभश्चेति अन्यूनविषयकशाब्दत्वावच्छिन्नौपयिकाकांक्षादिमत्त्वलाभश्चेत्यर्थः । शाब्दपदस्यावयवशक्त्या शब्दजन्यज्ञानत्वावच्छिन्नार्थकत्वे शब्दजन्यतावच्छेदकजातिविशेषानुपस्थित्या तदवच्छिन्नजन्यताप्रतियोगिकजनकतालाभो न भवतीत्यत उक्तं जातिविशेषोपस्थापकेति । तथा च कार्यांशे शाब्दपदेन शाब्दत्वजातेः कारणांशे च वाक्यपदेनाकांक्षादिमत्त्वस्य लाभात्तादृशशाब्दत्वावच्छिन्नौपयिकाकांक्षादिमत्त्वलाभ इति—व्याख्यानम्, तदसत्—अवच्छेदकतापर्याप्त्यनिवेशादिरिक्तान्यूनविषयकत्वावच्छिन्न-

जन्यतानिवेशमात्रेणोपपत्त्या शाब्दत्वाविवेशने प्रयोजनाभावात्तदुपस्थितेरप्रयोजकत्वात् ।

न च तदर्थविषयकत्वस्य शाब्दत्वनिष्ठजन्यतावच्छेदकतायामेवावच्छेदकतया जन्यतायां तदवच्छिन्नत्वविरहात् अन्यूनविषयकशाब्दत्वावच्छिन्नत्वेनैव जन्यता निवेशनीयेति वाच्यम् । विनिगमनाविरहेण शाब्दत्वविशिष्टतत्तदर्थविषयकत्वस्यापि जन्यतावच्छेदकत्वात् ॥

(चिं०) अन्यूनानतिरिक्तपदं विहाय लिङ्गाविषयकत्वं वा ज्ञानविशेषणम्, तेनोदाहरणादिव्युदासः । निगमनञ्च न परामर्शहेतुः—अबाधितासत्प्रतिपक्षत्वज्ञानजनकत्वात् ।

(दी०) अन्यूनेत्यादि । तथा चोद्देश्यानुमितिसमानविषयकशाब्दज्ञानजनकन्यायावयवत्वमर्थः । व्यतिरेकिणि ह्रदो निर्धूम इत्यादौ निर्वह्नित्वहेतुके यथा ह्रदभिन्नमित्यादिदृष्टान्तवतो ह्रदावृत्तिधर्म्मशून्यत्वादिहेतुके वोदाहरणस्य वारणाय समानविषयकान्तं पक्षविशेष्यकार्थकम् । उपनयवारणाय लिङ्गाविषयकेति ।

यद्यपि प्रकृतलिङ्गाविषयत्वं पृथिवीतरेभ्यो भिद्यते पृथिवीत्वात् गन्धवती तथा गन्धादित्यादावव्यापकम् । न चात्रोपनयासम्भवः इदमा गन्धवत्त्वेन परामृष्टे हेतुभूतगन्धवत्त्वान्वयायोगादिति वाच्यम् । साध्याभावव्यापकगन्धाभावाभाववत्त्वेनान्वयात् । अत एव व्यतिरेकिणि न च नेयं पृथिवीत्यादिकः प्राचां प्रयोगः । यदि च दण्डवान् रक्तदण्डवानित्यस्यान्वयो नानुपपन्नस्तद्विशिष्टे शुद्धतद्विशिष्टान्वयस्यैवाव्युत्पन्नत्वादित्युच्यते, तदा नानुपपत्तिगन्धोऽपि । पक्षाविशेषणत्वेन तदविषयत्वञ्चायं वह्निसामग्रीमान् वह्नेरित्यादौ पक्षाविशेषणत्वेन साध्याविशेषण-

त्वेन च तदविषयत्वम् दधि द्रव्यं दध्नः प्रमेयत्वमभिधेयं प्रमेयत्वात् गोत्वभावो न सास्नादिमान् गोत्वाभावादित्यादावव्यापकमतिव्यापकञ्चोपनयस्य । तथापि पक्षतावच्छेदकाविशिष्टपक्षे यत्साध्यतावच्छेदकविशिष्टसाध्यवैशिष्ट्यावगाहित्वं तद्वहिर्भावेन लिङ्गविषयत्वस्याभावो वाच्यः ॥

(गा०) नन्वन्यूनानतिरिक्तपदपरित्यागे अनुमितिविषयकशाब्दधीजनकमित्यवशिष्यते, तथाच पर्वतो वह्निमानित्यादिप्रतिज्ञावाक्यस्यानुमित्यबोधकतयाऽव्याप्तिरित्याशङ्कां परिजिहीर्षुरनुमितिर्विषयो विषयो यस्येति मध्यमपदलोपिसमासाभिप्रायेण समुदितलक्षणपर्यवसितार्थं व्याचष्टे तथाचेति । दृष्टान्तघटित इति । अस्याग्निमेणोदाहरणस्येत्यादिनाऽन्वयः । अन्वय्युदाहरणस्य लिङ्गबोधकत्वाद्व्यतिरेकिपर्यन्तानुधावनम् । यो यो धूमवान्स स वह्निमानित्यतिरेक्युदाहरणस्य वन्ह्यभावादिरूपलिङ्गाबोधकत्वात्पक्षविषयकत्वमात्रनिवेशेनैव तादृशोदाहरणवारणसम्भवेन पक्षमुख्यविशेष्यकत्वपर्यन्तस्य विवक्षणीयस्य व्यावृत्तिदानाय यथा ह्रदभिन्नमित्यादिदृष्टान्तघटितनतदनुसरणम् । दृष्टान्ताघटितेप्युदाहरणे व्यावृत्तिमाह ह्रदावृत्तीति । उपनयवारणायेति । पक्षतावच्छेदकावच्छिन्नपक्षविशेष्यकत्वानिवेशस्य प्रयोजनान्तरविरहेऽप्येतदर्थमेव तन्निवेशेऽननुषङ्गपक्षे निगमनातिव्याप्तिर्न सम्भवतीत्यभिप्रायेण निगमनोपेक्षा । तस्मादितरेभ्यो भिद्यत इत्यादिनिगमनस्य पक्षविशेष्यकबोधजनकत्वाभावान्निगमनसामान्ये नातिव्याप्तिसम्भव इत्यभिप्रायेण वा । वस्तुतः पक्षमुख्यविशेष्यकत्वनिवेशेऽपि गोत्व सास्नाभाववद्गोत्वाभावादित्यत्र यत्र सास्ना तत्र गोत्वमित्युदाहरणे पक्षमुख्यविशेष्यकबोधजनकेऽतिव्याप्तिर्दुर्वारैव पक्षमात्रमुख्यविशेष्यकत्वनिवेशे च विरुद्धपक्षकस्थले मात्रार्थाप्रसिद्ध्याऽव्याप्तिरिति पक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यत्वानिरूपकत्वमेव विवक्षणीयम् । तथा च निगमनेऽननुषङ्गपक्षेऽतिव्याप्तिर्न सम्भवत्येवेति ध्येयम् ।

लिङ्गत्वस्य केवलान्वयितया सामान्यतो लिङ्गाविषयकत्वं ज्ञानेऽप्रसिद्धमिति प्रकृतलिङ्गाविषयकत्व विवक्षणीयम, तथापि न निस्तार इत्याशयेनाह यद्यपि प्रकृतेति । लिङ्गतावच्छेदकावच्छिन्नाविषयक-

त्वविवक्षणे पृथिवीतरेभ्यो भिद्यत इत्यादिप्रतिज्ञाया नासङ्गहः—तज्जन्यबोधे स्वरूपत एव पृथिवीत्वादिलिङ्गभानादित्याशयेन स्थलान्तरे दोषमाह गन्धवती तथेति । तथा—इतरेभ्यो भिद्यते । न चात्र उपनयासम्भव इति । तथाच तादृशप्रतिज्ञाघटितन्याय एव न सम्भवतीति काव्यामिशङ्केति भावः । इदमा—इदम्शब्देन । गन्धवत्त्वेनेति । उपनयस्थेदंशब्दस्य प्रतिज्ञोपदर्शितपक्षतावच्छेदकावच्छिन्नपरत्वादिति भावः । गन्धवत्त्वान्वयेति । गन्धवद्भेदान्वयस्येत्यर्थः । अयोगादिति । उद्देश्यत्वाविधेयत्वयोरवच्छेदकयोरैक्येऽभेदान्वयबोधप्रसङ्गादिति भावः । साध्याभावेति । साध्याभावव्यापको यो गन्धाभावस्तदभाववत्त्वेनेत्यर्थः । तथाच भिन्नरूपेण गन्धादेरुद्देश्यत्वविधेयत्वावच्छेदकगर्भान्तर्भावान्नान्वयबोधानुपपत्तिरिति भावः ।

ननु हेत्वभावाभाववत्त्वेन हेतूपस्थापकपदाभावात्कथमुपनयवाक्यात्तेन रूपेण पक्षे हेतुमानमत आह अत एवेति । साध्याभावव्यापकतावच्छेदकहेत्वभावत्वाद्यवच्छिन्नाभाववत्त्वेन हेत्वन्वयानुरोधादेवेत्यर्थः । न च नयं पृथिवीति । नञ्द्वयेनाभावाभाववत्त्वेन हेतुबोधनादिति भावः ।

यद्यपि पृथिवीत्वहेतुकस्थले तादृशोपनयप्रयोगो न युज्यते पृथिवीपदार्थतावच्छेदकस्य नञर्थाभावेऽन्वयासम्भवेन हेत्वभावाभाववत्त्वेन हेत्वलाभात् । न च हेतुमद्भेदाभावोऽपि हेतुरेवान्योन्याभावाभावस्य प्रतियोगितावच्छेदकरूपत्वात्, एवं हेतुमद्भेद एव साध्याभावव्यापकता यत्र नेतरभेदस्तन्न पृथिवीत्युदाहरणेन बोध्यत इति पृथिवीभेदाभाववत्त्वेन पृथिवीत्वबोधकस्तादृशोपनयो युज्यत इति वाच्यम् । एवमपि पृथिवीत्वादिति हेतुवाक्योपस्थितपृथिवीत्वत्वविशिष्टहेतुकानुमित्यौपयिकतद्रूपविशिष्टवद्भेदत्वावच्छिन्ने साध्याभावव्यापकताया एवाकांक्षिततया तस्या एव यत्रेतरभेदाभावस्तन्न पृथिवीत्ववदिति उदाहरणेनोपदर्शनीयतया तद्रूपविशिष्टवद्भेदत्वावच्छिन्नाभाववत्त्वेन हेतुमत्ताया एव उपनेयत्वात्तादृशोपनयासङ्गतेः, अन्यथा पृथिवीतरेभ्यो भिद्यते गन्धसमवायिकारणतावच्छेदकरूपवत्त्वादित्यादावपि तथोपनयप्रयोगापत्तेरिति । तथापि तादात्म्येन पृथिवीहेतुकस्थलाभिप्रायेणेदम् । आदिपदान्न च नेयं ग·

न्धवतीत्याद्याकारकस्य न च नात्र गन्ध इत्याद्याकारकस्य वोपनयस्य परिग्रहः। अत्र हेत्वभावादौ साध्याभावव्यापकत्वाभानेऽपि न क्षतिः। प्राचीनमते उदाहरणादेव व्याप्तिलाभेन पक्षधर्मतामात्रस्योपनेयत्वात् अत एव प्राचामित्युक्तम्। साध्याभावव्यापकेत्यादौ च व्यापकान्तमुपलक्षणार्थकम्।

ननु न च नेयं पृथिवीत्यादिकः प्राचीनानुमत उपनयोऽसङ्गतः—नञर्थाभावस्य प्रतियोग्यनुयोग्युपरागेणैव शाब्दानुभवे भानात् अन्योन्याभावबोधे समानविभक्तिकप्रतियोग्यनुयोगिवाचकपदसमभिव्याहारस्य संसर्गाभावबोधे च सप्तम्यन्तानुयोगिवाचकपदसमभिव्याहारस्यापेक्षितत्वात्प्रकृते चानुयोगिवाचकपदाभावेन पृथिवीभेदगन्धाभावादिबोधासम्भवादिति नवीनानुमत इतरत्वव्यापकीभूताभावप्रतियोगिगन्धवती चेयमित्याद्याकारकोपनय एवादरणीयः। तथाच हेतोः पक्षतावच्छेदकत्वे दर्शितव्युत्पत्तिविरोधो दुष्परिहर एवेत्यालोच्य नव्यमते समाधानमाह यदि चेति। उच्यते इत्यग्रिमेणान्वयः। तद्विशिष्ट इति। तद्धर्मं धर्मितावच्छेदकीकृत्येतराविशेषिततद्धर्मावच्छिन्नाभेदान्वयबोधस्यैव व्युत्पत्तिविरुद्धत्वादित्यर्थः। नानुपपत्तीति। प्रकृते उद्देश्यतावच्छेदकाघटकव्याप्तेः विधेयतावच्छेदकघटकतया भानादिति भावः। तथाच गन्धवतीतरेभ्यो भिद्यते गन्धादित्यादिन्यायस्यापि निष्प्रत्यूहतया लिङ्गविषयकतादृशन्यायान्तर्गतप्रतिज्ञायामव्याप्तिर्दुर्वारैवेति भावः।

ननु पक्षाविशेषणतया यल्लिङ्गविषयत्वं तच्छून्यत्वं विवक्षणीयमतो नोक्ताव्याप्तिरुक्तस्थले पक्षविशेषणतयैव लिङ्गविषयतासत्त्वेन विशिष्टाभावसत्त्वादित्यत आह पक्षाविशेषणत्वेनेति। अयं वह्निसामग्रीमान्वह्निरित्यादाविति। अव्यापकमित्यग्रिमेणान्वयः।

अथ पक्षाविशेषणत्वं पक्षनिरूपितविशेषणताभिन्नत्वम्, तस्य लिङ्गविषयताविशेषणत्वे चायं वह्निसामग्रीमान्वह्निरित्यादावव्याप्त्याशङ्कानवकाशः—तत्रापि पक्षांशे विशेषणतापन्नसाध्यनिरूपितविशेषणतात्मकलिङ्गविषयतायाः परंपरया पक्षनिरूपितत्वाद् गन्धवतीतरेभ्यो भिद्यते इत्यादावपि मत्वर्थसम्बन्धांशे विशेषणीभूतगन्धविषयताया गन्धसमानकालीनरूपवती पृथिवी इतरेभ्यो भिद्यत इत्यादौ तद्विषयतायाः साक्षात्पक्षनिरूपितविषयतानात्मकत्वेन सा-

क्षात्परंपरासाधारणनिरूपितत्वस्यैव निवेशनीयत्वादिति चेन्न। पक्षाविशेषणत्वं यद्युक्तार्थकं तदा निगमनातिव्याप्तिः । न च निगमनेऽयंपदाननुषङ्गपक्षे उक्तयुक्त्या पक्षतावच्छेदकानवच्छिन्नमुख्यविशेषताकान्यत्वस्य विषयकान्तार्थस्य विवक्षणीयतया नातिव्याप्तिरिति वाच्यम्। एवमप्यनुषङ्गपक्षे तत्रातिव्याप्तेर्दुर्वारत्वात् । अतः पक्षतावच्छेदकप्रकारतानिरूपकविशेष्यतानिरूपितप्रकारतान्यत्वमेव तदर्थो वाच्यः। पक्षतावच्छेदकप्रकारतान्तःपातिनी सर्वैव प्रकारता तादृशविशेष्यनिरूपिता । इयांस्तु विशेषः-'काचित्साक्षात्काचित्परंपरया तथेति। विधेयकोटिप्रविष्टपदार्थीयप्रकारता च न धर्मितावच्छेदकप्रकारतानिरूपितविशेष्यतानिरूपिता विधेयनिरूपितविशेष्यतायाः धर्मितावच्छेदकावच्छिन्नतया धर्मितावच्छेदकप्रकारतानिरूपितविशेष्यतायाश्च स्वस्य स्वधर्मितानवच्छेदकत्वेन तदनवच्छिन्नतया विधेयतद्धर्मितावच्छेदकप्रकारतानिरूपकविशेष्यतयोर्भेदादिति निगमनादिजन्यबोधीयविधेयकोटिप्रविष्टलिङ्गविषयता न पक्षतावच्छेदकप्रकारतानिरूपकविशेष्यतानिरूपितविशेषणतात्मिकेति न निगमनाद्यतिव्याप्तिः। एवं च वह्निसामग्रीमान् वह्नेरित्यादावव्याप्तिः प्रसज्यत एवेति'।

एतेन पर्वतो वह्निमान्धूमादित्यादौ प्रसिद्धन्यायान्तर्गतोपनयेऽतिव्याप्तिप्रसंजकत्वेन नैतद्विवक्षण शंकापथमारोहति । न चायं दोषो'ऽतिव्यापकं चोपनयस्ये'त्यनेन स्वयमेव वक्ष्यत इति नानुपपत्तिरिति वाच्यम्। उपनयवारणार्थकतयैव लिङ्गाविषयकत्वविशेषणस्य स्वयं प्राग्व्याख्याततया उपनयमात्र एव यादृशविवक्षायामतिव्याप्तिस्तदाशङ्कायां सन्दर्भविरोधस्य जागरूकत्वादित्यपि समाहितम्।

न 'चैवमतिव्यापकं चोपनयस्येति' ग्रन्थासङ्गतिः-तादृशग्रन्थस्य धूमवान् वह्निमान् धूमादित्यादिन्यायान्तर्गतोपनयविशेषपरत्वात्तत्र हेतोरेव पक्षतावच्छेदकतया पक्षतावच्छेदकावच्छिन्नांशे यद्विशेषणत्वं तस्यापि पक्षतावच्छेदकप्रकारतानिरूपकविशेष्यतानिरूपितत्वात्। एवं व्यापकत्वनिरूपकतया हेतुविषयताया अपि स्वात्मकपक्षतावच्छेदकप्रकारतानिरूपिताधिकरणनिष्ठविशेष्यतानिरूपितप्रकारतात्मकतयाऽतिव्याप्तिसङ्गतिः।

यत्तु-पक्षतावच्छेदकहेतुकव्यतिरेक्युपनयपर्यन्तपरतया तादृ-

शग्रन्थसङ्गमनम् अन्वय्युपनये तज्जन्यबोधे व्याप्तिघटकतया लिङ्गविषयकत्वमस्त्वेनातिव्याप्तिर्न सम्भवतीत्यभिमानेन केषांचिन्मतं-तदेतेनाश्रद्धेयम् ।

पक्षाविशेषणत्वेन साध्याविशेषणत्वेन चेति । पक्षतावच्छेदकप्रकारतानिरूपकविशेष्यतानिरूपितप्रकारताभिन्नत्वे सति साध्यतावच्छेदकप्रकारतानिरूपितविशेष्यतानिरूपितप्रकारताभिन्नं यल्लिङ्गविषयकत्वं तच्छून्यत्वमर्थः । साध्याविशेषणतयेत्यस्य यथाश्रुतार्थकत्वे निगमने परम्परया साध्यविशेषणतयैव लिङ्गभानादतिव्याप्त्यापत्तेः । न चैवमपि ज्ञानविषयवान् धूमादित्यादिन्यायान्तर्गतनिगमनातिव्याप्तिस्तदवस्थैव ज्ञानविषयत्वरूपसाध्यतावच्छेदकप्रकारतानिरूपकविशेष्यतानिरूपितत्वरूपसाध्यतावच्छेदकस्य हेतुप्रकारतायां सत्त्वादि(१)ति वाच्यम् । शुद्धसाध्यतावच्छेदकप्रकारतानिरूपकविशेष्यताया एव विवक्षणीयत्वात् ।

ननु पक्षधर्मलिङ्गाविषयकत्वाविवक्षणे दधि द्रव्यं दध्न इत्यादौ नाव्याप्त्यवकाशः दधि द्रव्यमित्याकारकबोधस्य दधिद्व्यणुकाविषयकस्य दधिसमवेतद्रव्यविषयकत्वसम्भवात् अतः स्थलान्तरमाह प्रमेयत्वमिति । ननु प्रमेयत्वं प्रमाविषयत्वं, तच्च विषयभेदाद्भिन्नम्, एवञ्च घटादिनिष्ठप्रमेयत्वाविषयकस्य प्रमेयत्वमभिधेयमिति बोधस्य प्रमेयत्वरूपपक्षनिष्ठप्रमेयत्वाविषयकस्य सम्भवान्नात्राव्याप्तिरतः स्थलान्तरमनुसरति गोत्वाभाव इति । ननु पक्षतावच्छेदकविशिष्टपक्षविषयतानन्तःपातिलिङ्गविषयताशून्यत्वनिवेशेनोपदर्शितहेतुपक्षकप्रतिज्ञाया असङ्ग्रहः । तदन्तःपातित्वं च पक्षतावच्छेदकप्रकारतानिरूपितसंसर्गतानिरूपकत्वं पक्षतावच्छेदकप्रकारतापक्षविशेष्यतासाधारणमित्यालोच्याव्याप्तिमाह आतव्यापकं चेति ॥

पक्षतावच्छेदकविशिष्टेति । पक्षतावच्छेदकावच्छिन्नपक्षविशेष्यता-

---

(१) तु-एवं वह्निसाध्यकनिगमनजन्यबोधीयहेतुज्ञानज्ञाप्यत्वविशिष्टवह्नित्वादिप्रकारघटकविषयतायाः साध्यतावच्छेदकावच्छिन्नादिनिरूपितप्रकारतात्वस्याधिकं त्वित्यादिन्यायेनाक्षततया तादृशप्रकारघटकविषयतायाः निरुक्तविशेष्यतानिरूपितप्रकारतान्यत्वविरहात्तत्रातिव्याप्तितादवस्थ्यमिति पाठोऽधिकः पुस्तकान्तरे ।

निरूपिता या साध्यतावच्छेदकावच्छिन्नसाध्यप्रकारतानिरूपितवैशिष्ट्यविषयता तद्बहिर्भूतलिङ्गविषयताशून्यत्वमित्यर्थः।

अथ तद्बहिर्भूतत्वं न साक्षात्परंपरासाधारणतन्निरूपकत्वशून्यत्वं-पक्षतावच्छेदकप्रकारताया उक्तयुक्त्या तदनिरूपकत्वात्। कथंचित्तन्निरूपकत्वोपपादनेऽपि यत्र संयोगेन वह्नेः साध्यत्वं वह्निसंयोगत्वेन हेतुना तत्रत्यप्रतिज्ञायामव्याप्तिः-हेतुभूतवैशिष्ट्यविषयतायाः स्वनिरूपकत्वविरहात्। एवं साक्षात्परंपरासाधारणानुगतनिरूप्यनिरूपकभावोऽपि दुर्वचः-परंपरया निरूपितत्वस्य तन्निरूपितनिरूपितत्वाद्यात्मकत्वात्। एतेन तादृशवैशिष्ट्यविषयतानिरूपकविषयत्वानिरूपितत्वं तादृशविषयताबहिर्भूतत्वम्, तच्च वैशिष्ट्यविषयतासाधारणं तन्निरूपकप्रकारताविशेष्यतानिरूपितत्वमादाय तन्निरूपकप्रकारतासाधारणं चेत्युक्तावपि न निस्तार इति चेत्। न।

तथाविधवैशिष्ट्यविषयताशालिनिश्चयत्वसमनियत(व्यापक)प्रतिबन्धकतानवच्छेदकत्वमेव तद्बहिर्भूतत्वम्। निगमनजन्यबोधीयहेतुविषयता च यादृशप्रतिबन्धकतावच्छेदककोटौ निवेश्यते न तादृशी कापि प्रतिबन्धकता तादृशनिश्चयत्वव्यापिका हेत्वविषयकतादृशवैशिष्ट्यविषयताशालिज्ञानासाधारण्यात्, अतस्तथाविधहेतुविषयतायास्तद्बहिर्भूतत्वोपपत्तिरित्यनुपसंहारिपक्षेऽपि न निगमनातिव्याप्तिः। तादृशनिश्चयत्वव्यापकत्वमात्रस्य प्रतिबन्धकताविशेषणत्वे धूमादालोकवान् पर्वतो वह्निमान्धूमादित्यत्र हेत्ववयवेऽतिव्याप्तिः तादृशहेतुनिष्ठाया हेतुत्वं धूमीयं न वेति संशयप्रतिबन्धकतावच्छेदकतादृशबोधविषयताया निरुक्तविषयताबहिर्भूतत्वानुपपत्तेरतस्तादृशनिश्चयत्वव्याप्यत्वमपि प्रतिबन्धकताविशेषणम्। न च पक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यतानिवेशस्यावश्यकतया नैतादृशातिव्याप्तिसंभावनेति व्यर्थं व्याप्यत्वनिवेशनमिति वाच्यम्। तथाप्यनुपसंहारिपक्षे धूमाद्वह्निमतस्सधर्मा पर्वतो वह्निमान्धूमादित्यादिस्थलीयनिगमने हेतुत्वं प्रमेयाद्वाच्यत्ववत्प्रमेयादित्यादिस्थलीयहेत्ववयवे चातिव्याप्तेर्दुर्वारत्वात्तन्निवेशस्यावश्यकत्वादिति। न च धर्मितावच्छेदकनिष्ठं प्रकारत्वं न प्रतिबन्धकतावच्छेदकमपि तु तन्निष्ठविशेष्यतावच्छेदकत्वमेव तथा च गन्धवतीतरेभ्यो भिद्यते इत्यादिप्रतिज्ञाजन्यबोधीयहेतुप्रकारतायास्तद्बहिर्भूतत्वादव्याप्तिरिति वाच्यम्।

विशेष्यतावच्छेदकताया एव प्रकारतात्वोपगमेन तादृशबोधे तदन्यप्रकारतानभ्युपगमात्। एवं चातिप्रसक्तस्य भूतलं घटवदित्यादिज्ञानस्य भूतलत्वांशे तद्धर्मितावच्छेदकत्वस्य प्रकारान्तरेण वारणसम्भवात्। अस्तु वा विशेष्यतावच्छेदकताख्यविषयता प्रकारतातोऽन्यैव तथापि न क्षतिः। तादृशविषयताबहिर्भूतविषयताशून्यत्वं ज्ञानविशेषणमुपेक्ष्य तादृशविषयताबहिर्भूतविषयतानवच्छिन्नजन्यतानिरूपितजनकताया वाक्यविशेषणत्वोपगमेन विशेष्यतावच्छेदकताभिन्नगन्धादिविषयतायाः प्रतिज्ञाजन्यबोधे सत्त्वेऽपि तस्याः प्रतिज्ञाजन्यतावच्छेदककोटिनिवेशे प्रयोजनाभावेन तन्निष्ठधर्मितावच्छेदकताया एव तत्र निवेशनीयतयाऽव्याप्त्यनवकाशात्। तादृशबहिर्भूतविषयतासामान्यशून्यत्वानिवेशेऽनुमितिसमानविषयकत्वानिवेशनस्य मूलोपात्तस्य वैयर्थ्यप्रसङ्ग इति तादृशलिङ्गविषयतासामान्यशून्यत्वनिवेशनमिति अखण्डाभावघटकतया न लिङ्गांशवैयर्थ्यम्॥

(दी०) वस्तुतो लिङ्गं-लिङ्गत्वं, तथाच प्रकृतहेतुतावच्छेदकावच्छिन्नस्य प्रकृतसाध्यतावच्छेदकावच्छिन्नगमकतौपयिकं यद्व्याप्तिविषयत्वं तच्छून्यत्वमर्थः। तच्च हेतौ साध्यव्याप्यतावगाहित्वम् हेतुभूताभावप्रतियोगितावच्छेदकावच्छिन्ने साध्याभावव्यापकतावगाहित्वञ्च। द्रव्यत्वव्याप्यसंयोगवद्वृत्तिधर्मवानयं द्रव्यत्ववान् गुणात् गुणव्याप्यरूपवानयं स्पर्शवान् रूपादित्यादौ प्रतिज्ञासंग्रहायावच्छेदकद्वयोपादानम्।

अन्यूनातिरिक्तपदमिति च मूलमुद्देश्यानुमित्यन्यूनातिरिक्तविषयभागपरम्। हेतुत्वमभिधेयं मेयत्वादित्यादौ पञ्चम्यर्थपक्षकहेतुवारणाय पञ्चम्यन्तान्यत्वस्य हेत्वन्यत्वस्य वाऽवश्यं वाच्यत्वात्। संख्यातिरिक्तसुबर्थस्य प्रातिपदिकार्थे विशेष्यत्वेनैवान्वयात्। प्रातिपदिकार्थयोः क्रियाप्रातिपदिकार्थयोश्च भेदेन साक्षादन्वयस्याव्युत्पत्तेर्वक्ष्यमाणत्वात्। चैत्रस्येदं न मैत्रस्य मैत्रस्येदं न चैत्रस्य द्वयोरिदं नेदमेकस्यापीत्यादौ चैत्रादिसम्बन्धाभावबोधस्य

विना विभक्त्यर्थविशेष्यतामनुपपत्तेः चैत्रो न पचतीत्यादौ तिङर्थस्येव विनाऽप्यनुयोगिनि सप्तम्यां सुबर्थस्याप्यभावान्वयात् ।

हेतुविषयकज्ञानजनकत्वव्याप्यावयवावच्छेदकरूपशून्यत्वे सत्युदाहरणान्यन्यायावयवत्वं तत्त्वम्, तादृशश्चावच्छेदकं हेतुत्वादिकमिति केचित् ।

(गा०) उक्तरीत्या बहिर्भूतत्वनिर्वचनायासविद्वेषात्कल्पान्तरमाश्रयते वस्तुतस्त्विति । लिङ्गत्वमिति । व्याप्तिरित्यर्थः । नन्वननुगतयोरन्वयव्यतिरेकव्याप्त्योस्तद्घटकव्यापकत्वयोर्वा एकतरमात्रविषयताया उपादानेऽन्यतरबोधकोपनयादावतिव्याप्तिरित्याशङ्क्य तादृशव्याप्तिघटकव्यापकताद्वयविषयतयोरनुगतरूपेणाभावं निवेशयति तथाचेति । प्रकृतहेतुतावच्छेदकावच्छिन्नस्येति गमकत्वान्वितम् । व्याप्तिविषयकत्वमित्यत्र व्याप्तिपदं व्यापकत्वविषयतानिष्ठसाध्यतावच्छेदकादिविषयताव्यावृत्तविलक्षणौपयिकतानिवेशसूचनाय ॥

अथ किमिदं तादृशगमकतौपयिकत्वं ? न तावत्प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुकप्रकृतसाध्यतावच्छेदकावच्छिन्नसाध्यकानुमितित्वावच्छिन्नजनकतावच्छेदकत्वम्—पक्षधर्मत्वाविषयकोदाहरणजन्यबोधीयव्यापकत्वादिविषयताया अनुमितिजनकतावच्छेदककोट्यप्रविष्टतया तत्रातिव्याप्तेः । न च हेतुव्यापकत्वादिविषयतात्वेनैव तद्विषयताया जनकतावच्छेदककोटौ निवेशादनुमित्यजनकस्यापि तादृशज्ञानस्य विषयतानां तादृशरूपाक्रान्तानां तथात्वमक्षतमेवेति वाच्यम् । तादृशविषयतात्वेन पक्षविशेषणतापन्नहेतुविशेषणतापन्नसामानाधिकरण्यविशेषणतापन्नसाध्यादिविषयतानिरूपितव्यापकत्वविषयताया एव कारणतावच्छेदकघटकत्वादतादृश्या तदवच्छेदकत्वाभावात् । यद्रूपावच्छिन्नविषयता जनकतावच्छेदिका तद्रूपावच्छिन्नविषयताशून्यत्वनिवेशे च साध्यतावच्छेदकाद्यवच्छिन्नविषयताया अप्यनुमितिजनकतावच्छेदककोटिप्रविष्टतया तादृशविषयताशून्यत्वस्य प्रतिज्ञाजन्यबोधेऽप्यसत्त्वादसम्भवः । यद्रूपावच्छिन्ननिरूपितव्यापकत्वविषयता जनकतावच्छेदिका तद्रूपावच्छिन्नव्यापकतानवगाहित्वनिवेशे च किञ्चिद्रूपावच्छिन्नव्यापकत्वं साध्यस्य पक्ष-

स्य वा घटकं यत्र तत्स्थलीयप्रतिज्ञाया असङ्ग्रहः, यत्वतत्वनिवेशादनुगमानवकाशश्चेति चेन्न। पक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यतानिरूपितविषयतानिरूपिता या विषयता तन्निरूपितविषयतानिरूपितविषयतायां विशेषणविधया प्रकृतानुमितिजनकतावच्छेदकतावच्छेदकतायाः पर्याप्त्यधिकरणधर्मवत्वेन हेतुव्यापकताविशिष्टसाध्यविषयत्वसाध्याभावव्यापकताविशिष्टहेत्वभावविषयत्वे अनुगमय्य तादृशधर्मावच्छिन्नतदभावस्य निवेशनेनानुपपत्त्यभावात्। तथाहि-प्रकृतानुमितिजनकतावच्छेदिकाया अन्वयिपरामर्शीयहेतुव्यापकतावच्छिन्नसाध्यविषयताया पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितहेतुविषयतानिरूपिताधेयत्वविषयतानिरूपिताधिकरणविषयतानिरूपितत्वात्, व्यतिरेकिपरामर्शीयसाध्याभावव्यापकत्वावच्छिन्नहेत्वभावविषयताया अपि तादृशविशेष्यतानिरूपितसांसर्गीयविषयतानिरूपितहेतुविषयतानिरूपितप्रतियोगित्वविषयतानिरूपितत्वेन साध्याभावव्यापकताविशिष्टहेत्वभावविषयतात्वस्यापि हेतुव्यापकताविशिष्टसाध्यविषयतात्ववन्निरुक्तविषयत्वविशेषणविधया अनुमितिजनकतावच्छेदकतायाः पर्याप्त्यधिकरणत्वात्।

यद्यपि यथा परंपरया पक्षविशेष्यतानिरूपितोदाहरणजन्यबोधीयहेतुव्यापकताविशिष्टसाध्यादिविषयता नानुमितिजनकतावच्छेदिका तथा तन्निरूपितव्यापकत्वादिविषयतापि न तथेति तदीयसाध्यादिविषयताविशेषणतया व्यापकत्वादिविषयतानिरूपितत्वस्यानुमितिजनकतावच्छेदकतावच्छेदके प्रवेशो न सम्भवति जनकतावच्छेदकविषयतावृत्तेरेव धर्मस्य तादृशविषयताविशेषणतया जनकतावच्छेदकतावच्छेदकत्वसम्भवादिति निरुक्तपक्षविषयतापञ्चमविषयतांशे विशेषणविधया अवच्छेदकतावच्छेदकत्वपर्याप्त्यधिकरणं यत्साधनादिव्यापकत्वविषयतानिरूपितत्वसहितं साध्यादिविषयतात्वं तन्नोदाहरणजन्यबोधीयसाध्यादिविषयतासाधारणं तथा चोदाहरणेऽतिव्याप्तिर्दुर्वारैव, तथापि निरुक्तजनकतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नविषयतावच्छिन्ना या प्रतिबन्धकता तदवच्छेदकविषयतात्वेनोदाहरणबोधीयहेतुव्यापकसाध्यादिविषयतायाः संग्रहो बोध्यः। अनुमितिजनकतावच्छेदकपरामर्शीयसाध्यादिविषयताया हेतुव्यापकत्वादिविषयतानिरूपित-

साध्यादिविषयतात्वेन साध्यं हेतुव्यापकं न वेत्यादिसंशयप्रतिबन्धकतावच्छेदकत्वात्, तादृशप्रतिबन्धकतायां तादृशरूपेणोदाहरणजन्यबोधीयसाध्यादिविषयताया अप्यवच्छेदकत्वात्। मुख्यविशेष्यतानिवेशाद् गोत्वाभावः प्रमेयत्वव्यापकवाच्यत्ववत्सास्नाभाववान् गोत्वाभावादित्यत्र तादृशविशिष्टसाध्यकप्रकृतानुमितिजनकपरामर्शीयस्वात्मकपक्षविशेषणतापन्नगोत्वाभावविषयतानिरूपिताधेयत्वविषयतानिरूपिताधिकरणविषयतानिरूपितसास्नाभावविषयतानिरूपितवाच्यत्वविषयतांशे विशेषणविधयाऽवच्छेदकतावच्छेदकतायाः पर्याप्त्यधिकरणधर्मवत्प्रमेयत्वव्यापकवाच्यत्वविषयतात्ववद्विषयतायाः प्रतिज्ञाजन्यबोधे सत्त्वेऽपि न क्षतिः। जनकता च साध्यव्याप्यत्वावच्छिन्नधर्मिताकान्यपरामर्शीया ग्राह्या तेन तद्धर्मिकपरामर्शमादायापि नोक्तप्रतिज्ञायामव्याप्तिः। न च साध्याभावव्यापकहेत्वभावप्रतियोगिहेतुमानितिपरामर्शीयपक्षविशेष्यतानिरूपितहेतुविषयतानिरूपितप्रतियोगित्वविषयतानिरूपिताभावविषयतानिरूपितव्यापकत्वविषयताया अपि निरुक्तविषयतात्वात्तादृशविषयत्वविशेषणतयाऽवच्छेदकीभूतं साध्याभावव्यापकताविषयतात्वमप्यस्ति वह्न्यभावव्यापकमेयत्ववान् पर्वतो वह्निमानित्यादिप्रतिज्ञायामव्याप्तिरिति वाच्यम्। किंचित्व्यापकत्वविशिष्टविषयतांशे विशेषणतया अवच्छेदकतावच्छेदकत्वस्यैव निवेशनीयत्वात्, व्यतिरेकिपरामर्शीयपक्षविषयतापन्नमव्यापकत्वविषयतायाश्चातथात्वात्।

वस्तुतस्तु चतुर्थविषयतायामभावनिष्ठप्रकारताभिन्नत्वस्य निवेशनीयत्वान्न कोपि दोषः। अन्वयव्यतिरेकव्याप्तिघटकव्यापकताद्वयविषयताया विशिष्टाभावद्वयनिवेशपरोऽयं ग्रन्थः। तथासति हेतुतावच्छेदकेत्याद्यनुगतशब्देनोभयोत्कीर्तनवैयर्थ्यापातात्। विशिष्यापि तदुभयावगाहित्वस्य तच्चेत्यादिना दर्शनीयतया प्रथमत एव विशिष्य तदुभयानवगाहित्वार्थकत्वोपवर्णनानौचित्यात्।

तच्चेति। तादृशगमकत्वौपयिकत्वं चेत्यर्थः। हेताविति। हेतुव्यापकताविशिष्टसाध्यविषयकत्वमर्थः। 'अतो नोक्तानुगमविरोधः। हेतुभूताभावप्रतियोगितावच्छेदकेति। तादृशप्रतियोगितावच्छेदकं च धूमादिभावहेतुकस्थले धूमाभावत्वादिकं वह्न्यभावादिहेतुकस्थले च वह्नित्वादिकम्। एतदसंग्रहभयेनैव हेत्वभावत्वावच्छिन्न इति नोक्तम्,

तथासति अयं निर्धूमो निर्वह्नित्वादित्यादौ यत्र धूमस्तत्र वह्निः धूमव्यापकवह्न्यभाववांश्चायमित्याद्याकारकयोरेवोदाहरणोपनययोः प्रयोगाद्वह्नित्वाद्यवच्छिन्न एव साध्याभावव्यापकतायास्ततः प्रतीतिर्न तु वह्न्यभावाद्यभावत्वावच्छिन्न इति तत्रातिव्याप्त्यभावाप्रतिपादनेन न्यूनतापत्तेः । हेतुतावच्छेदकसाध्यतावच्छेदकनिवेशप्रयोजनमाह द्रव्यत्वेति । प्रतिज्ञासंग्रहायेति । प्रथमोपदर्शितप्रतिज्ञाविषयसंयोगत्वावच्छिन्ननिरूपितव्यापकताया अपि संयोगत्वेन गुणहेतुकद्रव्यत्वत्वाद्यवच्छिन्नानुमितेः द्वितीयप्रतिज्ञाविषयगुणत्वाद्यवच्छिन्नव्यापकतायाः गुणत्वेन स्पर्शसाध्यकरूपत्वावच्छिन्नहेतुकानुमितेः प्रयोजकतयाऽवच्छेदकद्वयानुपादाने तत्रतत्राव्याप्तेरिति भावः ।

नन्वेवं लिङ्गत्वाविषयकत्वविशेषणेनैवोदाहरणस्यापि वारणे पूर्वोक्तानुमितिसमानविषयकत्वविशेषणस्य व्यावृत्तिर्न सङ्गच्छते इति सत्यन्तोत्तरविषयान्तभागपरित्यागस्यैवावश्यकत्वेनान्यूनानतिरिक्तपदमात्रपरित्यागपरमूलविरोध इत्यालोच्य तादृशमूलस्य तथाविधसमुदायपरित्यागपरत्वमेवाह अन्यूनेति । नन्वेतत्कल्पे हेतुवारणायैव पक्षविशेष्यकत्वपर्यवसिततादृशविशेषणोपादानमावश्यकम्-तज्जन्यबोधस्य व्यापकत्वाविषयकत्वेन लिङ्गत्वाविषयकत्वदलेनावारणादिति कथं समुदायपरित्याग इत्यत आह हेतुत्वमिति । पञ्चम्यर्थपक्षक इति । तथाच पक्षमुख्यविशेष्यकत्वमपि तादृशहेतुजन्यबोधेऽक्षतमिति न तेन तद्वारणसम्भव इति भावः । पञ्चम्यन्तान्यत्वस्य निवेशे घटो दण्डात्पटो न दण्डादित्यादिपञ्चम्यन्तप्रतिज्ञानामसंग्रहमालोच्य कल्पान्तरमाह हेत्वन्यत्वस्येति । अवश्यं वाच्यत्वादिति । तथाच तत एव सकलहेतुवारणे उक्तसमुदायदलपरित्यागो न क्षतिमावहतीति भावः ।

ननु ज्ञापकत्वं पञ्चम्यर्थः, स च प्रकृत्यर्थस्य विशेषणतयैव भासते न तु विशेष्यतया, तथाच कथं पञ्चम्यर्थपक्षकन्यायान्तर्गतहेतोः पक्षमुख्यविशेष्यकबोधजनकत्वमत आह संख्येति । विभक्त्यर्थस्यैकत्वादेः प्रकृत्यर्थविशेषणतया बोध अनुभाविकः तस्य विशेष्यत्वे घटमित्यादित एकत्वं कर्मत्वं च घटीयमित्याकारकसर्वानुभवविरुद्धसमूहालम्बनबोधस्यापत्तेरतः संख्यातिरिक्तेति सुबर्थविशेषणम् । लिङर्थस्येष्टसाधनत्वादेः प्रकृत्यर्थविशेषण-

तया भानात्प्रत्ययार्थसामान्योपेक्षा । विशेष्यस्यैवेत्यत्र युक्तिमाह प्रातिपदिकार्थयोरिति । समानविभक्तिकनामार्थयोः क्रियाविशेषणीभूतद्वितीयान्तनामार्थधात्वर्थयोश्चाभेदान्वयबोधोत्पत्त्या भेदेनेति । तयोरपि विभक्त्यर्थमन्तराकृत्य परंपरया भेदान्वयबोधात्साक्षादिति । अव्युत्पत्तेर्वक्ष्यमाणत्वादिति । भूतलं घट इत्यादावाधाराधेयभावादिसम्बन्धेन घटभूतलयोः तण्डुलः पचतीत्यादौ च क्रियाकर्मादिभावसम्बन्धेन तण्डुलपाकाद्योरन्वयबोधानुदयादिति भावः । तथाच सुबर्थस्य प्रातिपदिकार्थविशेषणत्वे विभक्त्यर्थस्यान्तराभानेन प्रातिपदिकार्थस्य भूतलतण्डुलादेः घटपाकादौ आधाराधेयत्वकर्मत्वादिसम्बन्धेन साक्षादेवान्वयबोधस्य भूतले घटः तण्डुलं पचतीत्यादितः स्वीकरणीयतया तादृशव्युत्पत्तिविरोध इत्याशयः । न च भूतले घट इत्यादौ घटाधिकरणं भूतलमित्याद्याकारक एवान्वयबोध उपपद्यते नातो दर्शितव्युत्पत्तिविरोध इति वाच्यम् । तथासति शाब्दबोधे अनुभवसिद्धस्य प्रथमान्तार्थमुख्यविशेष्यकत्वस्य भङ्गप्रसङ्गात् ।

ननु विभक्त्यर्थः संसर्गतयैव भासते न तु विशेष्यतया घटादावाधेयत्वादिसम्बन्धेन भूतलादिप्रकारकबोधे च सप्तम्यादिविभक्त्यन्तभूतलादिवाचकपदसमभिव्याहारस्य नियामकत्वान्नोक्तातिप्रसङ्गः । न चैवं भूतले धूमादित्यादिभागमात्रस्याननुभावकत्वप्रसङ्गः, इष्टत्वात् । अस्तु वा विभक्त्यर्थाधिकरणत्वज्ञापकत्वादिविशेषितस्यैव प्रकृत्यर्थस्य तुल्यवित्तिवेद्याधेयत्वज्ञाप्यत्वादिसम्बन्धेनान्वय इत्यतो विभक्त्यर्थस्याविशेष्यत्वे नेदं मैत्रस्येत्यादौ मैत्रादिविशेषितस्वत्वादिरूपस्याभावप्रतियोगिनोऽवान्तरवाक्यादनुपस्थित्या नञर्थान्वयबोधानुपपत्तिमाह चैत्रस्येदमिति । मैत्रादेरेवाभावो नञा बोध्यते न तु स्वत्वस्येत्याशङ्कां निराचिकीर्षुणा तदुपगमे चैत्रीयधनेऽपि संयोगसमवायादिना चैत्राद्यभावसत्त्वेन यत्र चैत्रस्येदमिति व्यवहारः तत्र न चैत्रस्येदमित्यपि व्यवहारः स्यादिति सूचयितुं चैत्रस्येत्युक्तम् । न च स्वत्वादिसम्बन्धेनैव प्रकृत्यर्थस्याभावो दर्शितस्थले नञा बोध्यते, तथा च नोक्तातिप्रसङ्ग इति वाच्यम् । वृत्त्यनियामकतया स्वत्वादेरभावप्रतियोगितावच्छेदकसम्बन्धत्वाभावात् नामार्थप्रतियोगिकाभावस्यानुयोगिनि सप्तमीं विना नञा बोधयितुमशक्य-

त्वाच्च। वृत्त्यनियामकसम्बन्धस्याभावप्रतियोगितावच्छेदकत्वेऽपि स्वत्वादिसम्बन्धावच्छिन्नाभावस्य षष्ठ्यन्तचैत्रादिपदसमभिव्याहृतनञा बोधनेऽनुयोगिनि सप्तम्या अनपेक्षणेऽपि च द्वयोरिदं नेदमेकस्येत्यादावगतिः। तथाहि—स्वत्वस्य विशेष्यत्वे स्वनिरूपकनिष्ठभेदाप्रतियोगिनिरूपितं यत्स्वत्वं तदभावो धननिष्ठस्तत्र प्रतीयते। अप्रतियोग्यन्तमेकपदार्थः सर्वत्र स्वसमभिव्याहृतपदार्थसंसर्गिनिष्ठभेदाप्रतियोगित्वरूपस्य सजातीयद्वितीयरहितत्वस्य एकपदार्थत्वात्। स्वत्वं षष्ठ्यर्थः। तथाविधं च स्वमेकमात्रनिरूपितं स्वत्वं न तूभयनिरूपितं तन्निरूपकस्यैकपुरुषस्य तन्निरूपकपुरुषान्तरनिष्ठभेदप्रतियोगितया तथाविधभेदाप्रतियोग्यप्रसिद्धेरिति तादृशस्वत्वाभाव उभयधनेऽबाधितः। स्वत्वसंबन्धेन एकपदार्थस्याभावो यदि नञा बोध्यते तदा स्वस्वामिनिष्ठभेदाप्रतियोग्येकपदार्थो वाच्यः। तत्र यदि स्वमभावस्यानुयोगि धनं तदाऽप्रसिद्धिः प्रमेयमात्रस्यैवोभयस्वामिकं यद्धनं तत्स्वामिनिष्ठभेदप्रतियोगित्वात्। यदि धनान्तरमेकमात्रनिरूपितस्वत्ववत् तदा तस्य समभिव्याहृतपदार्थत्वाभावादेकपदस्य तादृशार्थसम्बन्धिनिष्ठभेदाप्रतियोगिबोधकत्वव्युत्पत्तिभङ्गः, एकमात्रस्वत्ववद्धनान्तरस्वामिचैत्रमैत्रोभयधने नेदमेकस्येति व्यवहारानुपपत्तिश्च। एतदभिप्रायेणैव द्वयोरित्याद्यनुसृतम्।

इदमत्रावधेयम्। नेदमेकस्येत्यतः स्वनिरूपकनिष्ठभेदाप्रतियोगिनिरूपितयत्किञ्चित्स्वत्वस्याभावबोधे एकमात्रधनेऽपि तथाविधधनान्तरनिष्ठस्वत्वाभावसत्त्वात्तादृशप्रयोगप्रसङ्गः। तादृशस्वत्वसामान्यस्य चाभावो न सम्भवति प्रतियोगितावच्छेदकस्य स्वत्वघटितत्वेनाननुगमात्। अभावकूटस्य चासर्वज्ञदुर्ज्ञेयत्वमित्येकत्वसंख्यावच्छिन्न एवैकपदार्थस्तदन्वितस्वत्वस्य उभयस्वत्वानिरूपितविशेषणताविशेषेण स्वत्वस्य समवेतत्वे तादृशसमवायेन वाऽभावः प्रतीयत इत्युपगन्तव्यम्। तथाचोभयानिरूपितस्वत्वसम्बन्धेन प्रकृत्यर्थस्याभावबोधोऽपि सम्भवति। उभयानिरूपितत्वं च स्वनिरूपितत्वस्वभिन्ननिरूपितत्वोभयसम्बन्धेन किञ्चिद्विशिष्टं यत्तदन्यत्वमिति।

ननु स्वत्वस्य विशेष्यत्वेऽपि नेदं मैत्रस्येत्यादितः कथं स्वत्वसंसर्गाभावबोधः संसर्गाभावबोधमात्र एव नञा अनुयोगिनि सप्तम्यपेक्षणादित्यत आह चैत्रो न पचतीति। नामार्थप्रतियोगिकाभा-

घबोधे एवानुयोगिसम्बन्ध्यपेक्षणादिति भावः ।

यथाश्रुतलिङ्गविषयकत्वनिवेशे गन्धवतीतरेभ्यो भिद्यत इत्यादावव्याप्तिं प्रकारान्तरेण वारयतां मतमाह हेतुविषयकेति । कस्याश्चित् प्रतिज्ञाया हेतुविषयकज्ञानजनकत्वेऽपि प्रतिज्ञात्वस्य हेतुविषयकज्ञानजनकत्वानियतत्वात्तन्नियतान्यवयवतावच्छेदकानि हेतुत्वोपनयत्वनिगमनत्वान्येव न तु प्रतिज्ञात्वमिति नाव्याप्तिः । हेतुबोधकप्रतिज्ञानिष्ठप्रतिज्ञात्वादेः तादृशज्ञानजनकत्वानियतत्वादव्याप्तितादवस्थ्यमतोऽवयवतावच्छेदकेति । अभावहेतुकव्यतिरेक्युदाहरणस्य लिङ्गाविषयकज्ञानजनकस्य सम्भवादुदाहरणत्वस्य तादृशज्ञानजनकत्वानियतत्वादुदाहरणेऽतिव्याप्तिरत उदाहरणान्येति । प्रतिज्ञात्वादेः हेतुसाध्यपक्षभेदेन भिन्नत्वाद्गन्धवतीतरेभ्यो भिद्यते गन्धादित्यादावव्याप्तिः तदवस्थैव-तादृशप्रतिज्ञानिष्ठस्य प्रतिज्ञात्वस्य हेतुविषयकज्ञानजनकत्वनियतत्वात्, हेत्वादिभेदेऽपि प्रतिज्ञात्वाद्यभेदे तु प्रकृतहेतुविषयकज्ञानजनकत्वानियतावयवतावच्छेदकस्यैवाप्रसिद्धिः नानाहेतुहेत्ववयवादिसाधारणहेतुत्वादेरप्यतथात्वादित्यस्वरससूचनाय केचिदिति ॥

(चि०) हेत्वभिधानप्रयोजकजिज्ञासाजनकवाक्यत्वं वा लिङ्गाविषयकालिङ्गिविषयकज्ञानजनकन्यायावयववाक्यत्वं वा इतरावयवानां लिङ्गविषयकज्ञानजनकत्वात् ॥

प्रतिज्ञात्वं जातिः अनुगतानतिप्रसक्तनान्तरीयकव्यवहारादिति केचित् । तन्न । देवदत्तप्रभवत्वादिना जातिसङ्करप्रसङ्गात् । प्रतिज्ञाजन्यं विजातीयं ज्ञानं व्यवहारादिति तज्जनकं वाक्यं प्रतिज्ञेत्यपि न, तज्जनकत्वं जनकत्वज्ञानं वा नानुगतरूपमन्तरेण सम्भवतीत्युक्तस्यानुसरणीयत्वात् । एतेन शब्दोऽनित्य इति लिङ्गिधीपरवाक्यजन्यज्ञानवृत्तिकृतकत्वादित्यादिवाक्यजन्यज्ञानावृत्तिजातियोगिज्ञानजनकवाक्यं प्रतिज्ञेति

निरस्तम् ।

ननु प्रतिज्ञा न साधनाङ्गं विप्रतिपत्तेः पक्षपरिग्रहे तत्र प्रमाणाकाङ्क्षायां हेत्वभिधानस्य प्राथम्यादिति चेन्न । विप्रतिपत्त्यग्रे समयबन्धानन्तरं शब्दानित्यत्वं साधयेति मध्यस्थस्य वादिनो वाऽऽकाङ्क्षायां शब्दानित्यत्वं साध्यम् । न च साध्यनिर्देशं विना हेतुवाक्यं निष्प्रतियोगिकमन्वयं बोधयितुमीष्टे । नच वादिवाक्येऽनुपस्थितमपि योग्यतया अन्वेति-अतिप्रसङ्गात् । न च विप्रतिपत्तितः साध्योपस्थितिः तस्याः प्रतिवादिविप्रतिपत्त्या प्रमाणादिव्यवस्थया चान्तरितत्वात्, परविप्रतिपत्तिं समयबन्धञ्च विना स्थापनाया अभावात्, विप्रतिपत्तिवाक्यस्य पक्षग्रहेण पर्यवसिततया निराकाङ्क्षत्वाच्च । आवृत्तौ तु सैव प्रतिज्ञा । न चावयवान्तराद्धेत्वन्वययोग्या साध्योपस्थितिः । नाप्यवयवान्तरेणाक्षेपात् साध्यान्वये तदभिधाने च साध्यान्वय इत्यन्योन्याश्रयात् । तस्मात् प्रतीत्यनुपपत्त्या प्रतीतानुपपत्त्या वा नेहाक्षेपः ।

अन्ये तु शब्दानित्यत्वे प्रमाणं वदेति यदि मध्यस्थस्यानुयोगः तथापि प्रमाणमात्रे नाकाङ्क्षा, किन्तु विशिष्टे । विशिष्टन्तु विशेषणं साध्यमनभिधाय न शक्याभिधानम् । न च वस्तुतो यत्साध्यम् तत्र प्रमाणं वदेति मध्यस्थनियोगः वादिद्वयमध्ये तदसम्भवात् । तस्मात्साध्याभिधानं विना न हेतोराकाङ्क्षा न वान्वयबोधकत्वमिति प्रतिज्ञा साधनाङ्गमिति ॥

(दी०) हेत्वभिधानेति । जिज्ञासाजनकत्वं—तद्योग्यता, वाक्यत्वं—न्यायावयवत्वम् ।

लिङ्गेत्यादि । लिङ्गाविषयकेति पूर्वोपदर्शितार्थकम् । अभावहेतुकव्यतिरेक्युदाहरणवारणाय लिङ्गीति । लिङ्गि—साध्यं, तद्विषयकं—तद्विशेष्यकम्, तेनेदं जलं निःस्नेहत्वप्रकारकप्रमाविषयत्वशून्यत्वात् इदं द्रव्यं जलान्यत्वप्रकारकप्रमाविषयत्वशून्यत्वादित्यादौ यन्न जलं तन्निःस्नेहत्वप्रकारकप्रमाविषय इत्याद्युदाहरणे नातिप्रसङ्गः ।

लिङ्गाविषयेत्यस्य पूर्वोक्तव्याप्यत्वाविषयार्थकत्वे हेतुवारणाय लिङ्गीति । लिङ्गिविषयत्वञ्च प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेत्वविषयताबहिर्भावेन वाच्यम्, तेन वह्निमान् वह्निसामग्रीमत्त्वात् अयं हेतुरिदं वा हेतुत्वं तत्त्वेन प्रतीयमानत्वादित्यादौ हेतौ नातिप्रसङ्गः । लिङ्गविषयकज्ञानजनकत्वानियतलिङ्गिविषयकज्ञानजनकत्वानियतावयवतावच्छेदकरूपवत्त्वं तत्त्वमित्यादिकं तादृशावच्छेदकरूपान्तरापरिचये दुर्ग्रहत्वादनुपादेयम् ॥

(गा०) जिज्ञासाफलोपधायकत्वस्याव्याप्तिमाशङ्क्याह जिज्ञासेति । उदासीनेऽतिव्याप्तिवारणाय न्यायावयवत्वस्यावश्य निवेशनीयतया वाक्यभिन्नातिव्याप्त्यप्रसक्तेर्वाक्यपदोपादानमनर्थकमित्याशङ्क्य वाक्यपदस्यैव न्यायावयवत्वार्थकतामाह वाक्यत्वमिति ।

गन्धादित्यादावव्याप्तिवारणाय लिङ्गाविषयकेतीति । पूर्वोपदर्शितार्थकमिति । साध्यतावच्छेदकावच्छिन्नसाध्यविशिष्टपक्षतावच्छेदकावच्छिन्नपक्षविषयताबहिर्भूतलिङ्गविषयताशून्यार्थकमित्यर्थः । अभावहेतुकेति । वन्ह्यभावादिहेतुकेत्यर्थः । तत्र यो यो धूमवान् स स वह्निमानित्याकारकोदाहरणस्य लिङ्गाविषयकत्वादिति भावः । भावहेतुकस्य व्यतिरेकिणोऽप्युदाहरणस्य हेत्वभावत्वेनैव व्यतिरेकबोधकतया न लिङ्गाविषयकत्वसम्भवः, एवमभावहेतुकस्याप्यन्वय्युदा-

हरणस्य न तथात्वसम्भव इत्यभावहेतुकव्यतिरेकित्वानुधावनम् ।

लिङ्गि साध्यमिति । लिङ्गमस्यास्तीति व्युत्पत्त्या लिङ्गिपदस्य लिङ्गतानिरूपकत्वार्थकत्वादिति भावः । वक्ष्यमाणोदाहरणे साध्यविषयकत्वसत्त्वादतिव्याप्तिराह तद्वद्विशेष्यकमिति । तद्वद्विशेष्यकं तद्वन्मुख्यविशेष्यकम् । निःस्नेहत्वं–स्नेहत्वशून्यत्वम्, स्नेह एव तद्धेतुत्वे उदाहरणस्य न लिङ्गाविषयकत्वसम्भव इति तत्प्रकारकप्रमाविषयत्वशून्यत्वानुधावनम् तच्च भावप्रतियोगिकतयाऽतिरिक्तमिति हृदयम् । जलत्वसन्देहदशायां जलान्यत्वस्य सन्दिग्धतया तत्प्रकारकप्रमाविषयत्वमपि सन्दिग्धमिति तच्छून्यत्वस्य हेतुतयोपन्यासो न सम्भवतीति प्रथमसाध्ये तदुपेक्षितम् । उत्पत्तिकाले जलस्यापि निःस्नेहतया द्रव्यत्वसाध्यकजलान्यत्वप्रकारकप्रमाविषयत्वशून्यत्वहेतुकस्थलान्तरमनुसृतम् । अत्रोक्तयुक्त्या जलत्वसाध्योपेक्षा ।

यत्तु जलान्यत्वप्रकारकप्रमाविषयत्वशून्यत्वमपि लाघवाज्जलत्वस्वरूपमेवेति जलत्वस्य साध्यत्वे उदाहरणजन्यबोधस्य साध्यविषयकस्य न लिङ्गाविषयकत्वसम्भव इति द्रव्यत्वसाध्यकानुधावनमिति । तन्न । जलान्यत्वप्रकारकप्रमाविषयत्वशून्यत्वस्य जलत्वस्वरूपत्वे यन्न द्रव्यं तज्जलान्यत्वप्रकारकप्रमाविषय इत्युदाहरणस्याप्यन्यत्वप्रतियोगितावच्छेदकतया लिङ्गविषयकत्वेनासङ्गतेः ।

पूर्ववद्व्याप्त्यविषयकस्य लिङ्गाविषयकत्वपदार्थत्वे उदाहरणस्य व्याप्तिबोधकतया तत्र लिङ्गाविषयकत्वविशेषणव्यावृत्तिर्न सम्भवतीत्याशयेन स्थलान्तरे व्यावृत्तिमाह लिङ्गेति । पूर्वोक्तेति । उक्तानुगतरूपावच्छिन्नेत्यर्थः । हेतुवारणायेति । इतरेषां त्रयाणां व्याप्तिविषयकत्वेनैव वारणादिति भावः । प्रकृतेति । हेतुतावच्छेदकहेतुहेतुत्वविषयतानां भेदनिवेशे साध्यस्य हेतुतावच्छेदकादिरूपत्वे हेतुतावच्छेदकादिविषयताभिन्नसाध्यविषयत्वाप्रसिद्ध्याऽव्याप्तिरिति विशिष्टविषयताबहिर्भावनिवेशः । तादृशविषयताबहिर्भावः पूर्ववन्निर्वाच्यः । न च तादृशविषयताबहिर्भूतविषयतामात्रनिवेशेनैव हेतुवारणसम्भवे साध्यांशवैयर्थ्यमिति वाच्यम् । तादृशविषयतान्तर्भूतसाध्यविषयताभिन्नत्वस्यैवात्र बहिर्भावेनेत्यन्तेन विवक्षिततया दर्शितहेतौ तादृशसाध्यविषयताभिन्नहेतुत्वादिविषयतामादायातिप्रसङ्गस्य वारकतया तत्सार्थक्यात् भेदप्रतियोगिकोटौ निविष्टस्य साध्यांशस्य चाखण्डा-

भावघटतयाऽवैयर्थ्यात् । यत्र च प्रकृतहेतुतावच्छेदकाविशिष्टहेतुविशिष्टहेतुत्वविषयतान्तर्भूतसाध्याविषयताया अप्रसिद्धिस्तत्र बहिर्भूतान्तमनुपादेयमेव शब्दद्वयस्यानपेक्षितत्वादिति नाव्याप्तिः । तादृशविषयतान्तर्भूतत्वसाध्यीयत्वोभयाभाव एव वा बहिर्भावेनेत्यन्तार्थः । हेतुतावच्छेदकहेतुहेतुत्वानां निवेशस्य प्रयोजनं क्रमेण दर्शयति तेनेति तत्त्वेनेति । हेतुत्वेन हेतुत्ववत्त्वेन चेत्यर्थः । हेतुहेतुत्वयोस्तादात्म्येन साध्यत्वं बोध्यम् । हेतुत्वावच्छिन्नसाध्यकस्थले हेतुत्वेन प्रमीयमाणत्वरूपप्रकृतहेतोरपि साध्यतावच्छेदकाक्रान्ततया हेतुजन्यबोधस्य साध्यविषयकत्वमक्षतमेव साध्यतावच्छेदकविशिष्टनिरूपितविषयतापर्यन्तस्याविवक्षितत्वादिति हेतुविशेष्यताबहिर्भावनिवेशव्यावृत्तिसङ्गतिः । न च हेतुविषयताबहिर्भावनिवेशापेक्षया साध्यतावच्छेदकविशिष्टविषयकत्वनिवेशनमेव लाघवेनोचितमिति वाच्यम् । विशिष्टविषयताबहिर्भावे निवेशनीये हेतुविषयताबहिर्भावस्य स्वातन्त्र्येण निवेशनीयतया गौरवानवकाशात् । हेत्वंशानिवेश एव हेतुतावच्छेदकविषयित्वहेतुत्वविषयतयोर्बहिर्भावस्य पृथक् निवेशनीयतया गौरवात्, हेतुतावच्छेदकादिप्रविष्टसाध्यकप्रतिज्ञायामव्याप्तेश्च । हेत्वंशमनिवेश्य विशिष्टस्य दुर्निवेश्यतया विशिष्टनिवेशनैव तन्निवेशात् । एवं च प्रमेयत्वाद्यवच्छिन्नसाध्यकस्थलेऽपि हेत्वंशनिवेशप्रयोजनसम्भवादयं हेतुरित्युपलक्षणपरं बोध्यम् ।

लिङ्गिविषयकेत्यस्य पूर्ववत्साध्यवद्विशेष्यकार्थकत्वोपगमे वह्निमान् वह्निसामग्रीमत्त्वात् अयं हेतुः तत्त्वेन प्रमीयमाणत्वादित्यनयोः अतिप्रसङ्गवारणसंभवेऽपि इदं हेतुत्वमित्यादौ पञ्चम्यर्थस्य तादात्म्यसम्बन्धेन साध्यतायां साध्यप्रकारतानिरूपितविशेष्यतार्थकत्वेऽपि स्वरूपसम्बन्धेन हेतुत्ववत्त्वसाध्यकस्थले निरूपितत्वसम्बन्धेन ज्ञानत्वावच्छिन्नसाध्यकजनकतात्वावच्छिन्नपक्षकस्थले च हेतावतिव्याप्तिवारणं न सम्भवतीति गुरुतरारम्भः । लिङ्गविषयतायां पूर्वोपदर्शितविषयताबहिर्भावनिवेशनं लिङ्गपदस्य धर्मपरतां विनैव लिङ्गबोधकप्रतिज्ञाविशेषेऽव्याप्तिं लिङ्गिपदविषयपदयोः साध्यवद्विशेष्यपरतां विनैव दर्शितव्यतिरेक्युदाहरणाऽतिव्याप्तिं प्रकारान्तरेण वारयतां मतमुपन्यस्य दूषयति लिङ्गेति । निगमनस्योदाहरणस्य च वारणाय नियतान्तद्वयमवयवतावच्छेदकविशेषणम्, प्रतिज्ञात्वोदाह-

रणत्वयोरपि लिङ्गलिङ्गिविषयकज्ञानजनकत्वसमानाधिकरणतया असम्भवातिप्रसङ्गासम्भवात् सामानाधिकरण्यमुपेक्ष्योभयत्र नियतत्वप्रवेशनम् । उदाहरणविशेषत्वमादायातिप्रसङ्गवारणायावच्छेदकत्वान्तम् । आदिपदात्पञ्चमीविभक्तिमत्त्वानियतलिङ्गिविषयकज्ञानजनकत्वानियतावच्छेदकरूपवत्त्वादिपरिग्रहः । रूपान्तरेति । यद्यपि निरुक्तस्यापि रूपस्यापरिचयादन्तरपदमनर्थकम्, तथाप्यात्माश्रयभयेन तथाविधरूपान्तरपरिचयोऽपेक्षणीयः । तच्च रूपमनुमित्यन्यूनानतिरिक्तविषयकशाब्दधीजनकवाक्यत्वादिकमेव, तथाच तस्यैव तद्घटकस्य लक्षणत्वसम्भवाद्व्यर्थविशेषणता । न च तस्य विशेष्याघटकत्वान्न व्यर्थविशेषणतेति वाच्यम् । प्रतिज्ञात्वहेतुत्वसाधारणस्यावयवतावच्छेदकत्वस्य दुर्वचतया विशिष्य तन्निवेशस्यावश्यकत्वादित्येतल्लाभायान्तरपदम् । अत्र च साध्यादिभेदेनाभिन्नं प्रतिज्ञात्वं यद्यवच्छेदकत्वेन निविश्यते तदा तस्य प्रकृतसाध्यविषयकत्वानियतत्वासम्भवादप्रसिद्धिः । यदि च साध्यादिभेदेन भिन्नं तत्तदा यादृशसाध्यपक्षकप्रतिज्ञायां प्रकृतलिङ्गबोधकत्वं नियतं तत्राव्याप्तिरित्यपि दूषणं बोध्यम् ॥

इति गादाधर्यामवयवग्रन्थे प्रतिज्ञालक्षणम् ।

साध्यनिर्देशानन्तरं कुत इत्याकाङ्क्षायां साधनताव्यञ्जकविभक्तिमल्लिङ्गवचनमेवोचितम्, अन्यथाऽनाकाङ्क्षाभिधाने निग्रहापत्तेः लोके तथैवाकाङ्क्षानिवृत्तिरिति व्युत्पत्तेरिति प्रतिज्ञानन्तरं हेतूपन्यासः । हेतुत्वञ्चानुमितिकरणीभूतलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकसाध्याविषयकशाब्दधीजनकहेतुविभक्तिमच्छब्दत्वम् ।

(दी०) अनुमितीत्यादि । जनकान्तं न्यायावयवार्थकम् । निगमनवारणाय साध्याविषयकेत्यादि । साध्याविषयत्वञ्च प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वविषयताबहिर्भावेन पूर्वोपदर्शितसाक्षात्परम्परासाधारणप्रकृतपक्षविशेषणत्वेन वा तेन पूर्वोपदर्शितहेतौ नाव्याप्तिः । इदं न दण्डाज्जातं दण्डसंयोगाजन्यद्रव्यत्वात् अयं न धूमादालोकवान् आर्द्रेन्धनशून्यत्वादित्यादौ व्यतिरेकण्युदाहरणस्य हेतुत्वपक्षकसाध्यान्वितस्वार्थबोधकेदम्पदशालिन उपनयस्य च वारणाय हेतुविभक्तिमदिति । तदर्थश्च प्रकृतसाध्यान्वयबोधनक्षमार्थोपस्थितिजनकहेतुविभक्तिमत्त्वम् । हेत्विति सम्पातायातम् ।

यदि च पर्वते पर्वतभिन्नत्वप्रकारकज्ञानस्य विशेष्यतया अभावस्य साध्यत्वं हेतुत्वञ्च सिषाधयिषया च न्यायप्रयोगस्तत्र यथा तादृशज्ञानाभावादुत्पन्नं ज्ञानमिति दृष्टान्तशालिनि व्यतिरेक्युदाहरणेऽतिव्याप्तिरित्युच्यते, तदावयवान्तरोपस्थितार्थान्वितस्वार्थबोधकविभक्तिमत्त्वं वक्तव्यम् । उदाहरणान्यत्वेन वा विशेषणीयम् ।

केचित्तु साध्यविषयकधीजनकत्वानियतहेतुविभक्तिमत्त्वनियतावयवतावच्छेदकरूपत्वं समुदितलक्षणार्थ इत्याहुः । तच्चिन्त्यम् ।

(गा०) निगमनवारणायेति । प्रतिज्ञोदाहरणोपनयनविशेषाणां विवक्षणीयहेतुविभक्तिमत्त्वविशेषणेन वारणसम्भवान्न तदुक्तम्। ननु साध्याविषयकबोधजनकत्वनिवेशे वह्निमान्वह्निसामग्रीमत्त्वादित्याद्युक्तहेतावव्याप्तिरत आह साध्याविषयकत्वं चेति । बहिर्भावेणेति । विवक्षणीयमिति शेषः । साध्यांशोपादानं हेतुविभक्तिमत्त्वदलसार्थक्याय । एतत्कल्पे तादृशसाध्याविषयकत्वप्रतियोगिकोटौ साध्यांशमुपादाय दलान्तरोपादानं 'प्रक्षालनाद्धी'त्यादिन्यायेन सन्दर्भविरुद्धमतः कल्पान्तरमाश्रयते पूर्वेति । तस्माद्वह्निमानित्यादिनिगमने मत्त्वर्थांशे एव साध्यांशस्य विशेषणतयाऽतिव्याप्तिरतः साक्षात्परम्परासाधारणेति । तथाच तत्रापि परम्परया साध्यस्य पक्षविशेषणत्वान्न दोषः ।

हेतुत्वं प्रमेयं प्रमेयादित्यादौ प्रमेयत्वादिसाध्यके हेत्ववयवेऽव्याप्तिः हेतुतावच्छेदकीभूतसाध्यस्य परम्परया पक्षविशेषणत्वादतः पूर्वोपदर्शितेति । प्रकृतपक्षसाध्यकप्रतिज्ञाजन्यबोधे यादृशं पक्षांशे साध्यस्य विशेषणत्वं तादृशेत्यर्थः । तच्च साध्यतावच्छेदकसम्बन्धाद्यवच्छिन्नं साक्षात्पक्षनिरूपितं पक्षांशेऽभेदादिसम्बन्धेन विशेषणतापन्नसम्बन्ध्यादिनिरूपितं च, तादृशविशेषणतात्मकसाध्यविषयताशून्यत्वं समुदितार्थः । अयं वह्निमान् वह्निमद्वृत्तिधर्मशून्यत्वादित्यादौ हेतावव्याप्तिवारणाय प्रकृतेति पक्षतावच्छेदकावच्छिन्नार्थकम्। न चैवमनुषङ्गपक्षे निगमनजन्यबोधे साध्यस्य पक्षतावच्छेदकावच्छिन्नाविशेषणत्वादतिव्याप्तितादवस्थ्यमिति वाच्यम् । अननुषङ्गपक्षे पक्षमुख्यविशेष्यतानिरूपितप्रकारतापन्नत्वरूपं पक्षविशेषणतापन्नत्वं यदि निवेश्यते तदा पक्षतावच्छेदकावच्छिन्नत्वाविवक्षणेऽपि तस्मादितरेभ्यो भिद्यत इत्यादिनिगमनादावतिव्याप्तेरशक्यपरिहारतया एतत्कल्पस्यानुषङ्गपक्षाभिप्रायकत्वात् ।

अयं धूमाभाववान् वह्न्यभावादित्यादौ यो धूमवान्स वह्निमानित्यादेर्व्यतिरेक्युदाहरणस्य यथाश्रुतहेतुविभक्तिमत्त्वनिवेशेनापि वारणसम्भवाद्विवक्षणीयस्य प्रकृतसाध्यान्वयबोधनक्षमार्थोपस्थितिजनकहेतुविभक्तिमत्त्वस्य व्यावृत्तिस्थलमाह इदमिति । उदाहरणस्य साध्याविषयकत्वरक्षणायाभावसाध्यकानुधावनम्। हेतुविभक्तिपदस्य ज्ञापकत्वरूपहेतुत्वबोधकविभक्त्यर्थकत्वे प्रथमोदाहरणे नाति-

व्याप्तिः-तत्र जनिधात्वर्थोत्पत्त्यन्वितप्रयोज्यत्वस्यैव पञ्चम्यर्थत्वात् अतः स्थलान्तरमाह अयमिति। व्यतिरेक्युदाहरणस्येति। यद्दण्डाज्जातं तद्दण्डसंयोगाजन्यद्रव्यत्वाभाववत् यो धूमादालोकवान् स आर्द्रेन्धनवानित्याकारकस्येति शेषः। साध्याविषयकत्वरक्षार्थं व्यतिरेकिपर्यन्तानुधावनम्। यद्यप्यन्वय्युदाहरणस्य साध्यविषयकत्वेऽपि पक्षतावच्छेदकविशिष्टे साध्याविशेषणकत्वादतिव्याप्तिस्तदवस्थैव द्वितीयकल्पे तथापि प्रथमकल्पेऽपि व्यावृत्तिघटनायाभावसाध्यकव्यतिरेक्यनुसरणम्। तत्र तादृशोदाहरणस्य साध्यान्वितस्वार्थबोधकपदशालित्वनिवेशनेनैव वारणसम्भवात्। तादृशविभक्तिपर्यन्तस्य व्यावृत्तिस्थलमाह हेतुत्वपक्षकेति। साध्यान्वितेति। निगमनोपस्थाप्यसाध्यान्वितेत्यर्थः। विशेषणतया साध्यान्वितस्याविवक्षणादिति भावः। न चोपनये व्याप्तिघटकतया साध्यविषयकत्वसत्त्वान्नातिव्याप्तिः प्रसज्यते अनुषङ्गपक्षे निगमनोपस्थाप्यसाध्येन सममिदंपदार्थस्य हेतुत्वस्यानन्वयाद्व्यावृत्तिदानस्याननुषङ्गपक्षाभिप्रायकतयाऽननुषङ्गपक्ष च निरुक्तविषयताबहिर्भूतसाध्यविषयताशून्यत्वस्यैव साध्याविषयकत्वपदार्थतया पक्षविशेषणतया साध्याविषयकत्वस्याप्रयोजकत्वादिति वाच्यम्। उपनयपदस्य इतरत्वव्यापकीभूताभावप्रतियोगिमत्त्वेत्याकारकाभावसाध्यकव्यतिरेक्युपनयपरत्वात्।

प्रकृतसाध्येति। प्रकृतसाध्यान्वितस्वार्थभानप्रयोजकाकांक्षादिमद्धेतुविभक्तिमत्त्वमित्यर्थः। उपदर्शितस्थले धूमज्ञानज्ञाप्यालोकाभावादिरूपसाध्यांशे पञ्चम्यर्थानन्वयान्नातिव्याप्तिरिति भावः

नन्वेवं हेतुपदमनर्थकं साध्यान्वितस्वार्थबोधकविभक्तिशालिनो हेत्वतिरिक्तावयवस्य साध्यविषयकतानियमेनातिप्रसङ्गानवकाशात्। न च पक्षविशेषणतया साध्याविषयकत्वनिवेशपक्षे ज्ञानादिसाध्यके य इच्छति स जानातीत्युदाहरणे ज्ञानादिरूपसाध्यान्वितस्वार्थबोधकाख्यातविभक्तिशालिनि विशेषणविभक्तेरभेदार्थकत्वमते प्रमेयत्वादिपक्षकप्रमेयत्वादिसाध्यकोपनये पक्षीभूतसाध्यान्विताभेदबोधकप्रथमाविभक्तिशालिनि चातिव्याप्तिवारणाय हेतुपदोपादानमावश्यकमिति वाच्यम्। पक्षविशेषणतया साध्याविषयकत्वनिवेशपक्षे हेतुपदोपादानेऽपि (यो यो धूमवान् स स वह्निमान् यथा धूमाद्वह्निमन्महानस-

मिति) दर्शितसद्दृष्टान्तोदाहरणातिव्याप्तिवारणायोपदर्शितसाक्षात्पर-म्परासाधारणप्रकृतपक्षविशेषणतापन्नसाध्यान्वितस्वार्थबोधकत्वस्या-वश्यं निवेशनीयतया तादृशोदाहरणोपनययोस्तथाविधसा-ध्यान्वितस्वार्थबोधकविभक्तिमत्त्वविरहेणातिप्रसङ्गानवकाशादित्यत आह हेत्विवतीति । इदमुपलक्षणम् । पक्षविशेषणतया सा-ध्याविषयकत्वनिवेशकल्पे विभक्तिमत्त्वमपि नोपादेयम्–तत्कल्पस्या-नुषङ्गपक्षपरतया तत्पक्षे उपनयस्य निगमनैकवाक्यताविरहेण साध्यान्वितस्वार्थबोधजनकपदशालित्वाभावादुपदर्शितविभक्तिपदव्या-वृत्तेरनुषङ्गपक्षेऽसङ्गतेस्तत्कल्पे व्यावृत्त्यभावादिति केचित् ।

वस्तुतोऽनुषङ्गपक्षेऽपि उपनयस्थस्यैव पक्षबोधकेदंपदस्य निग-मनघटकीभूतसाध्यान्वितस्वार्थबोधकतया तादृशबोधे च प्रयोजना-न्तरविरहेण स्वजन्यत्वानिवेशादुपनये विभक्तिपदव्यावृत्तिः सम्भ-वतीत्यवधेयम् ।

ननु प्रथमसाध्याविषयकत्वनिर्वचनपक्षे पर्वतः पर्वताभिन्नत्वप्र-कारकज्ञानाभाववान् तादृशज्ञानाभावात् यः पर्वतभिन्नत्वेन ज्ञायते स पर्वतभिन्नत्वेन ज्ञायते यथा पर्वतभिन्नत्वप्रकारकज्ञानाभावादुत्प-न्नं ज्ञानमित्यादौ विशेष्यतासम्बन्धावच्छिन्नप्रतियोगिताकाभाव-साध्यकहेतुकव्यतिरेक्युदाहरणेऽतिव्याप्तिः। तत्र हेतुतावच्छेदकवि-शिष्टहेतुविशिष्टहेतुत्वविषयतान्तर्भूताया एव साध्यविषयतायाः सत्त्वात् साध्यीभूततादृशाभावान्वितस्वार्थबोधकपञ्चमीविभक्तिमत्त्वा-च्च, प्रथमकल्पे साध्ये पक्षविशेषणतापन्नत्वानिवेशात् दृष्टान्तो-पस्थाप्यस्य तादृशसाध्यस्य पक्षानन्वितस्याकिञ्चित्करत्वादित्यत आह यदि चेति । सिषाधयिषया न्यायप्रयोगस्य सविवादतया यदि चेत्युक्तम्, तस्य च इत्युच्यत इत्यनेनान्वयः । समवायसम्बन्धा-वच्छिन्नाभावस्य साध्यत्वे ज्ञानस्य समवायेन ज्ञानरूपप्रतियोग्यनधि-करणतया न व्यतिरेकदृष्टान्तत्वसम्भव इति विशेष्यतयेत्युक्तम् । अ-त एव महानसत्वप्रकारकज्ञानाभाव उपेक्षितः विशेष्यतयापि ज्ञान-स्य तादृशज्ञानवत्त्वाभावात् । साध्यस्य हेतुतायामेव हेतुत्वविशेष-णतापन्नतथाविधसाध्यविषयतायाः हेतुतावच्छेदकविशिष्टहेतुवि-षयितान्तर्भावः सम्भवतीति तदादरः । ज्ञानाभावादुत्पन्नमिति । अ-संसर्गाग्रहविधया तादृशज्ञानाभावस्य पर्वतत्वप्रकारकज्ञानोत्पाद-

कत्वं बोध्यम् । व्यतिरेकिपर्वतानुधावनं विशिष्टविषयताबहिर्भूतसाध्यविषयत्वाभावनिर्वाहाय । प्रकृतसाध्ये विशेषणतयाऽन्विता यः स्वार्थस्तद्बोधकत्वं च दर्शितहेतुत्वपक्षकोपनयस्थेदंपदस्य नास्तीति तद्विवक्षणे विभक्तिपदवैयर्थ्यमिति विशेष्यविशेषणसाधारणमेवान्वितत्वं निवेशनीयमित्युक्तोदाहरणबोधे पञ्चम्यर्थस्य साध्यविशेष्यत्वेऽप्यतिप्रसङ्ग एवेत्यभिप्रायः ।

अवयवान्तरेति । स्वभिन्नावयवघटकपदजन्योपस्थितिसहकारेण वा तत्पदार्थान्वितस्वार्थबोधकविभक्तिमत्त्वमित्यर्थः । तेन तादृशसाध्यस्य प्रतिज्ञाद्यवयवघटकपदोपस्थापितत्वेऽपि नातिव्याप्तिः । न चैवमनुषङ्गपक्षे साध्याविषयकत्वविशेषणमनर्थकं निगमनस्य तत्पक्षे उपनयेनैकवाक्यताविरहेण स्वाघटकपदोपस्थापितार्थान्वितार्थबोधकविभक्तिमत्त्वाभावात् व्यावृत्त्यसङ्गतेरिति वाच्यम् । चैत्रः पचति पाककृतिसामग्रीमत्त्वादित्यादौ पाककृत्यादिसाध्यकप्रतिज्ञायां हेत्ववयवस्थपञ्चम्युपस्थाप्यहेतुत्वान्वितस्वार्थबोधकाख्यातविभक्तिमत्त्वादतिव्याप्तिवारणाय साध्याविषयकत्वोपादानस्यावश्यकत्वात्, प्रथमरीत्या साध्याविषयकत्वनिर्वचनस्याननुषङ्गपक्ष इवानुषङ्गपक्षेऽपिसम्भवात्, अननुषङ्गपक्षे एवेयं विवक्षा, अनुषङ्गपक्षे तूदाहरणान्यविशेषणेनानुपदमुक्तोदाहरणं वारणीयमित्यपि वदन्ति ।

साध्यघटितार्थबोधकोक्तहेतावव्याप्तिं हेतुविभक्तिमदुक्तोदाहरणेऽतिव्याप्तिं च प्रकारान्तरेण वारयतां मतमाह केचित्त्विति । निगमने हेतुविभक्तिनैयत्यात्तत्रातिव्याप्तिवारणाय।नियतान्तम् । हेतुत्वस्यापि साध्यबोधकोक्तहेतुवृत्तितयाऽसम्भव इति असामानाधिकरण्यमुपेक्ष्यानियतत्वानुधावनम् । उदाहरणोपनययोः साध्याविषयकबोधजनकयोरपि सम्भवादुदाहरणोपनयसामान्यवारणाय नियतान्तम् । हेतुविभक्तिमद्दर्शितोदाहरणवृत्त्युदाहरणत्वमादायातिप्रसङ्गवारणाय सामानाधिकरण्यमुपेक्ष्य नियतत्वनिवेशनम् । विभक्तिमत्त्वमनुपादेयं हेतुत्वप्रतिपादकपदवत्त्वनिवेशेनैवानतिप्रसङ्गात् । हेतुत्वप्रतिपादकपदवत्त्वनैयत्यार्थप्रतिपादकविभक्तिमत्त्वनैयत्ययोर्वैकल्पिकमुपादानम् वा । तत्र च द्वितीयकल्पे विशेषणविभक्तेर्निरर्थकत्त्वाभिप्रायेण उदाहरणविशेषत्वमादाय उक्तोदाहरणेऽतिव्याप्तिवारणायावयवतावच्छेदकेति । तच्चिन्त्यमिति । चिन्ताबीजं पूर्ववत् ।

(चि०) हेतुत्वप्रतिपादकविभक्तिमन्न्यायावयवत्वं वा उदाहरणप्रयोजकाकाङ्क्षाजनकशाब्दज्ञानजनकन्यायावयवत्वं वा साध्याविषयकज्ञानजनकहेतुपञ्चम्यन्तानुमितिपरशाब्दत्वं वा प्रतिज्ञावाक्यभीजन्यकारणाकाङ्क्षानिवर्त्तकज्ञानजनकहेतुविभक्तिमद्वाक्यत्वं वा ।

(दी०) हेतुत्वप्रतिपादकेति । विभक्त्यर्थहेतुत्वविशेष्यकान्वयबोधजनकन्यायावयवत्वमित्यर्थः । हेतुत्वं प्रमेयमित्यादिप्रतिज्ञावारणाय विभक्त्यर्थेति । तस्मादितरभ्यो भिद्यते इत्यादिनिगमनवारणाय हेतुत्वेति विशेष्येति च । घटो दण्डाद्वह्निधूमादित्यादिका तु न प्रतिज्ञा तद्वृत्तेरतदात्मनश्च तद्धर्मव्यापकत्वायोगात् सम्प्रदायविरोधाच्च तेन तत्रत्यनिगमने नातिव्याप्तिरिति भावः ।

उदाहरणेति । क्वचिज्जिज्ञासानुत्पादेऽपि तद्योग्यतासत्त्वान्नाव्याप्तिः । अनुक्तोदाहरणस्थलेऽपि तादृशयोग्यतासत्त्वान्न्यायावयवेति । उदाहरणत्वञ्चेह न न्यायगर्भं वैयर्थ्यात् ।

साध्याविषयेत्यादि । अयं न दण्डादण्डसंयोगाजन्यद्रव्यत्वादित्यादौ प्रतिज्ञानिगमनयोर्वारणाय साध्याविषयेत्यादिव्याख्यातार्थकम् । उपनयविशेषणवारणाय हेतुपञ्चम्यन्तेति ।

हेत्विति हेतुत्वबोधकार्थकं हेतुपञ्चम्योर्वैकल्पिकमुपादेयम् । उपनयस्य चान्तेऽनुसन्धीयमाना प्रथमैवान्तः । एवं दण्डादित्यादेः स्वपरस्यापि दृष्टान्तस्यं पञ्चम्यन्तत्वेऽन्वयायोगात् । कस्यचिद्व्यतिरेकिण उदाहरणस्य पञ्चम्यन्तत्वसम्भवे तु तद्वारणं पूर्ववत् । अत्र चार्थवद्भागस्य हेतुपञ्चम्यन्तत्वं बोध्यम्, तेन निर-

र्थकृतसिलन्तवाह्निप्रमान इत्यादौ नाव्याप्तिः । पञ्चम्यादेस्तसिला-द्यादेशवादिनां नये तु नानुपपत्तिगन्धोऽपि ।

केचित्तु हेतुपञ्चम्यन्तत्वं हेतुत्वप्रतिपादकपदशालित्वम्, पूर्ववत्साध्याविषयकज्ञानजनकत्वञ्च इतरनैरपेक्ष्येण प्रकृतहेतुत्व-विशिष्टसाध्यविषयकज्ञानाजनकत्वम्, साध्यञ्चेह न विवक्षितं वैय-र्थ्यादित्याहुः ।

(गा०) यथाश्रुतप्रकृतद्वितीयलक्षणार्थस्य निगमनसाधारणतया-ऽन्यथा व्याचष्टे विभक्त्यर्थेति । विभक्तिजन्यहेतुत्वोपस्थितिद्वारा हेतुत्वमुख्यविशेष्यकशाब्दधीजनकन्यायावयवत्वमित्यर्थः तेन हेतुत्वे विभक्त्यर्थहेतुत्वविशेषणस्याव्यावर्त्तकत्वेऽपि न क्षतिः । निगमनवारणायेति । तत्र तिङर्थस्य विशेष्यत्वादिति भावः । विशेष्यत्वेति । हेतुत्वविशेष्यकत्वस्य तत्रापि सत्त्वेन मुख्यविशेष्यतापर्यन्तानिवेशने तत्रातिव्याप्तिरिति भावः ।

ननु घटो दण्डादित्यादिप्रतिज्ञाघटितघटादिपक्षकनिरूपकतासंसर्गकदण्डादिनिष्ठहेतुतासाध्यकन्यायान्तर्गते तस्माद्दण्डादित्याकारक-निगमनेऽननुपङ्गपक्षे विभक्त्यर्थहेतुत्वविशेष्यकबोधजनकेऽतिव्याप्तिरत आह घटो दण्डादिति । ज्ञापकत्वरूपहेतुत्वस्यैव प्रकृते निवेशनीय-तया जनकत्वरूपहेतुत्वसाध्यकप्रथमस्थले नातिव्याप्तिप्रसङ्ग इत्यतो वह्निपक्षकधूमनिष्ठज्ञापकतासाध्यकस्थलान्तरानुसरणम् । तदवृत्तेरि-ति । तादात्म्यातिरिक्तवृत्त्यनियामकसम्बन्धेन व्यापकत्वानभ्युपगमा-दिति भावः । तादात्म्येन स्वस्य स्वधर्मव्यापकत्वसत्त्वादाह अतदा-त्मन इति । ज्ञाप्यतायाः एव नवीनमते पञ्चम्यर्थतया ज्ञाप्यत्वसाध्य-कतादृशप्रतिज्ञा सम्भवत्येव, तथा चासम्भववारणाय लक्षणस्थहे-तुत्वपदेनापि तादृशस्य हेतुत्वरूपार्थस्यैव विवक्षणीयतया तत्रत्य-निगमनेऽतिव्याप्तितादवस्थ्यमित्याशंक्याह सन्दर्भविरोधाच्चेति ।

न्यायानन्तर्गतस्य धूमादित्यादिभागस्य उदाहरणप्रयोजक-जिज्ञासोपधायकत्वविरहेऽपि तत्स्वरूपयोग्यतामादायातिव्याप्तिं प्र-सज्य न्यायावयवत्वदलं सार्थकीचिकीर्षुर्जनकतापदस्य स्वरूपयो-ग्यतापरत्वं स्फुटयति क्वचिदिति । अभ्युपेत्य फलोपधाननिवेशेऽपि

न्यायावयवत्वनिवेशनमावश्यकमित्याह उदाहरणत्वं चेति । वैयर्थ्यात्–प्रयोजनान्तराभावात् । तथाच यत्रोदाहरणान्तमेव प्रयुक्तं तत्राप्युदाहरणप्रयोजकजिज्ञासाफलोपधानसम्भवेनातिव्याप्तिवारणाय न्यायावयवत्वनिवेशनं जनकपदस्य फलोपधानपरत्वेप्यावश्यकमिति भावः ।

चतुर्थलक्षणे प्रसिद्धप्रतिज्ञानिगमनयोः साध्याविषयकत्वविशेषणव्यावृत्तिर्न घटते पञ्चम्यन्तत्वाभावादिति पञ्चम्यन्तर्ताद्वशेषे तद्व्यावृत्तिमाह अयं न दण्डादिति । अयं दण्डादित्यादिप्रतिज्ञायाः संप्रदायविरुद्धत्वं प्रागभिहितमित्यभावसाध्यकानुधावनम् । वह्निमान् वह्निसामग्रीमत्त्वादित्यादौ यथाश्रुताव्याप्तेराह व्याख्यातार्थकमिति । हेतुतावच्छेदकविशिष्टेत्यादिनेत्यादिः । उपनयविशेषेति । साध्याविषयकबोधजनकाभावसाध्यकव्यतिरेक्युपनयेत्यर्थः । उदाहरणस्य पञ्चम्यन्तस्यापि सम्भवात्तद्वारणायं उदाहरणन्यत्वस्य निवेशनीयतया तत एवोदाहरणसामान्यवारणसम्भवादुपनयपर्यन्तानुधावनम् । धूमादालोकाभावादिसाध्यके धूमादालोकव्यापकाभावप्रतियोगिमानयमित्याद्युपनयेऽतिव्याप्तिवारकतया तत्पदसार्थक्यं बोध्यम् ।

उपनयस्य कस्यचिदपि पंचम्यन्तत्वासम्भवाद्धेतुपदवैयर्थ्यमाशङ्क्याह हेतुत्वबोधकार्थकमिति । तादृशार्थकहेतुपदस्य पञ्चमीपदस्य च वैकल्पिकमुपादानमित्यर्थः । तथाच हेतुत्वबोधकान्तत्वं पञ्चम्यन्तत्वं पृथक् निवेश्य लक्षणद्वयं करणीयमित्यर्थः ।

नन्वेवं प्रथमलक्षणे हेतुत्वपक्षके तद्बोधकेदंपदान्तोपनयेतिव्याप्तिरित्यत आह उपनयस्य चेति । श्रूयमाणविभक्त्यन्तत्वाभावादनुसन्धीयमानेति । तथाच तस्या हेतुत्वबोधकत्वाभावादेव नातिव्याप्तिरिति भावः ।

ननु द्वितीयलक्षणे इदं द्रव्यसमवेतं गुणत्वादित्यादौ यथा दण्डादित्यादिस्वपरपञ्चम्यन्तपदघटितदृष्टान्तशालिनि उदाहरणे द्वितीयरीत्या साध्याविषयकत्वनिर्वचनपक्षे गुणत्वाभावसाध्यके तादृशव्यतिरेकदृष्टान्तशालिन्युदाहरणेऽतिव्याप्तिरित्यत आह एवमिति । दृष्टान्तस्येत्यत्रानुसन्धीयमाना प्रथमैवान्त इत्यनुपपद्यते । अन्वयायोगादिति । प्रथमान्तत्वं विना समानविभक्तिकत्वाभावेन तादृशशाब्दे प्रथमान्तपदोपस्थाप्यसाध्याभावसाधनाभाववद्भेदान्वयानुपपत्तेरित्यर्थः ।

नन्वेवमपि अयं घटो न दण्डाजन्यत्वात् यो घटः स दण्डादि- त्यादावुदाहरणे लक्षणद्वयातिव्याप्तिर्दुर्वारैव साध्याविषयकबोधजन- कत्वात्पञ्चम्यन्तत्वाच्चेत्यत आह कस्यचिदिति । पूर्ववदिति । अव- यवान्तरोपस्थापितार्थान्वितस्वार्थबोधकत्वोदाहरणान्यत्वयोरन्यतर- विशेषणेत्यर्थः । ननु पञ्चम्यास्तसिलित्यत्र पञ्चम्या इत्यस्य पञ्चम्य- न्ततापक्षे पर्वतो वह्निमान् वह्निप्रमात इत्यादिहेत्ववयवस्य तसिलन्तस्य हेतुपञ्चम्यन्तताविरहादव्याप्तिरित्यत आह अत्र चेति । हेतुपञ्च- म्यन्तत्वमिति । हेतुत्वबोधकान्तत्वं पञ्चम्यन्तत्वं चेत्यर्थः । अर्थवद्भाग- स्येति । स्वघटकार्थवद्भागपूर्वत्वाभाववद्धेतुत्वबोधकादिघटितत्वमेव तदन्तत्वमिह विवक्षितमिति भावः । अर्थवत्त्वं आकांक्षानिर्वाहकत्वम् । तसिलं विनापि तत्पूर्वपञ्चम्यैव प्रकृतान्वयबोधौपयिकाकांक्षानिर्वा- हान्न तसिलादेराकांक्षानिर्वाहकत्वं, न तु किञ्चिदर्थवाचकत्वं तत् त- सिलादेरवाचकत्वेऽपि तद्घटकप्रत्येकवर्णानां वाचकत्वात् एकाक्ष- रकोशेन समस्तवर्णानां वाचकताबोधनात् । उक्तसूत्रे पञ्चमीपदस्य षष्ठ्यन्तत्वमपि सम्भवतीत्यभिप्रायेण यथाश्रुतस्यैव साधुतां समर्थ- यति पञ्चम्यादेरिति । नानुपपत्तीति । तथासति तसिल एव हेतुत्व- प्रतिपादकत्वात् पञ्चमीत्वाच्चेति भावः ।

तसिलादेः पञ्चम्यनादेशतापक्षे उक्तहेतावव्याप्तिवारणाय पञ्च- म्या अन्तत्वमविवक्षतां मतमाह केचित्त्विति । हेतुत्वप्रतिपादकपद- शालित्वमिति । तथाच पञ्चम्यन्तत्वानिवेशात्तसिलः पञ्चम्यनादेशता- पक्षेऽपि न तदन्तहेतावव्याप्तिरिति भावः । ननु हेतुत्वप्रतिपादकपद- स्यान्तत्वाविवक्षणे दर्शितव्यतिरेक्युपनयेऽतिव्याप्तितादवस्थ्यमि- त्यत आह पूर्ववदिति । प्रकृतसाध्यान्वितस्वार्थबोधकतादृशपदशा- लित्वरूपमित्यर्थः । एवञ्च प्रथमलक्षणे तादृशस्वार्थबोधकविभक्ति- शालित्वं साध्याविषयकधीजनकत्वं च निरुक्तविशिष्टविषयताबहि- र्भूतसाध्यविषयताशून्यधीजनकत्वरूपं निविष्टम् । अत्र च तादृशहेतु- त्वप्रतिपादकशालित्वं साध्याविषयकज्ञानजनकत्वं च निर्वक्ष्यमाण- मन्यविधं प्रविष्टमिति भेद इत्यवधेयम् । पर्वतो वह्निमानित्यादिन्यायान्त- र्गतप्रतिज्ञादेः निर्वाच्यसाध्याविषयकज्ञानजनकताशालिनो वारणाय हेतुत्वप्रतिपादकपदोपादानम् वह्नेर्द्रव्यत्ववान् वह्निमान् हेतुत्वं प्रमेयमि- त्यादिप्रतिज्ञादावतिव्याप्तिवारणाय विशेषणतया साध्यान्वितत्व-

निवेशेनेऽपि सुन्दरवह्निमत्सधर्मा पर्वतो वह्निमानित्यादावतिव्याप्तिवारणाय तदावश्यकत्वम् । न चैवमप्यालोकाद्वह्निमतः सधर्मा पर्वतो वह्निमान् धूमादित्यादावतिव्याप्तिर्दुर्वारैव तत्रापि विवक्षणीयप्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वविशिष्टसाध्यविषयकज्ञानजनकत्वस्याक्षतत्वादिति वाच्यम् । हेतुत्वप्रतिपादकेत्यस्य प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वप्रतिपादकार्थकत्वात् ।

यथाश्रुतं साध्याविषयकज्ञानजनकत्वम् अयं वह्निमान् वह्निसामग्रीमत्त्वादित्यादिन्यायस्थलेहेत्ववयवेऽव्यापकं पूर्वनिरुक्ततन्निवेशे च साध्यान्वितस्वार्थबोधकहेतुत्वप्रतिपादकपदशालित्वे विशेषणे हेतुत्वप्रतिपादकेत्यस्य वैयर्थ्यम् प्रतिज्ञायां निरुक्तसाध्याविषयकज्ञानजनकत्वाभावादेव वारणादतः साध्याविषयकज्ञानजनकत्वमन्यथा निर्वक्ति साध्येति । एवञ्च पर्वतो वह्निमानित्यादिप्रतिज्ञायाः साध्यविषयकधीजनकत्वेऽपि इतरनैरपेक्ष्येण हेतुत्वविशिष्टसाध्यविषयकज्ञानाजनकतया साध्याविषयकेत्यादिनाऽवारणात् हेतुत्वप्रतिपादकत्वं पदविशेषणमर्थपद्भवति हेत्ववयवस्यापि प्रतिज्ञासहकारेण हेतुत्वविशिष्टसाध्यविषयकज्ञानजनकतयाऽसम्भववारणाय इतरनैरपेक्ष्येणेति । स्वाघटकपदासहकारेणेत्यर्थकम् अजनकेत्यस्य प्रतियोगिनि विशेषणम् ।तथा च स्वेतरावयवाजन्यहेतुत्वविशिष्टसाध्यविषयकज्ञानजनकं यत्तदन्यत्वमिति समुदितार्थः । अथ जनकपदस्य जनकतावच्छेदकधर्मपर्याप्त्याश्रयपरत्वेनैव हेत्ववयवस्य प्रतिज्ञासहकारेण तादृशबोधजनकत्वेऽपि तादृशधर्मपर्याप्त्याश्रयसमुदायभेदस्याक्षततया इतरनैरपेक्ष्याप्रवेशेऽपि लक्षणसमन्वय इति चेत्, तर्हि तादृशपर्याप्तिनिवेशलाभायैव तदभिधानम् । अयं धूमाद्वह्निमान् धूमाद्वह्निमतोऽन्यत्रावर्तमानधर्मादित्यादिहेतौ धूमानिष्टहेतुविशिष्टसाध्यविषयकज्ञानजनकस्य सङ्ग्रहाय प्रकृतेति । प्रकृतहेतुतावच्छेदकावच्छिन्नविशिष्टेत्यर्थकम् । प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वमितराविशेषणतयाऽवगाहिन एव ज्ञानस्य इतरानिरपेक्षहेतुवाक्येन जननात्तादृशहेतुत्वप्रकारकज्ञानसामान्याजनकत्वस्यैव सकलहेत्ववयवसाधारण्यात् साध्यांशोपादानमनर्थकमिति तत्परित्यजति साध्यं चेति । अत्र च साध्यान्वितस्वार्थबोधकत्वनिवेशेऽपि हेतुत्वपक्षकव्यतिरेकयुपत्तये साध्यान्वितस्वार्थबोध स्वजन्यत्वनिवेशेऽनुषङ्गपक्षे सा-

ध्यान्वितपक्षबोधस्योपनयाजन्यतया तद्वारणेऽप्यननुषङ्गपक्षे निगमनोपस्थापितसाध्यान्वितहेतुत्वबोधकेदंपदशालिन्यतिव्याप्तिः । न च हेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वप्रतिपादकपदशालित्वनिवेशान्न तत्रातिव्याप्तिरिति वाच्यम् । गोत्वाभावनिष्ठं हेतुत्वं सास्नाभाववत् गोत्वाभावादित्यादिन्यायान्तर्गतोपनये तथाप्यतिव्याप्तिवारणासम्भवादनुषङ्गपक्षेऽप्युक्तन्यायान्तर्गतप्रतिज्ञायामतिव्याप्तेश्च । विशेषणतया साध्यान्वितस्वार्थबोधकत्वं निवेश्य तद्वारणे साध्यान्वितत्वत्र साध्यांशवैयर्थ्यम् । अनुषङ्गपक्षेऽप्युपनयस्थेदंपदार्थस्य कुत्रापि विशेषणताविरहात् (पदान्तरोपस्थापितेन प्रकृतहेतुना साक्षाद्विशेषितहेतुत्वप्रतिपादकपदशालित्वं निवेश्योक्तविशिष्टहेतुत्वपक्षप्रतिज्ञोपनययोर्वारणेऽपि) प्रकृतहेतुत्वविशिष्टसाध्याविषयकज्ञानजनकत्वनिवेशेनैवोपपत्तौ नञ्व्यत्यासस्य इतरेतरपक्ष्येणत्यभिधानस्य चाकिञ्चित्करत्वमित्यस्वरसः ॥

(चि०) पञ्चम्यन्तलाक्षणिकपदवदनुमितिपरवाक्यत्वं वा, हेतुपदेन ज्ञानलक्षणात् । अन्यथा लिङ्गस्याहेतुत्वेन हेतुविभक्त्यर्थानन्वयात् तथैवाकाङ्क्षानिवृत्तेः ।

अनुमितिहेतुज्ञानकारणधूमवत्त्वादितिशब्दजन्यज्ञानवृत्तिप्रतिज्ञादिजन्यज्ञानावृत्तिजातियोगिज्ञानजनकवाक्यत्वं हेतुत्वमित्यन्ये । जातिं विना केन रूपेण ज्ञानस्यानुमितिजनकत्वं वाक्यार्थबोधजन्यत्वस्यापि जन्यतावच्छेदकरूपापरिचये दुर्ग्रहत्वादित्यपरे । अन्वयव्याप्त्यभिधायकावयवाभिधानप्रयोजकज्ञानजनकहेतुत्वप्रतिपादकविभक्तिमन्न्यायावयवत्वमन्वयिहेतुत्वम् । एतदेव व्यतिरेकव्याप्त्यभिधायकपदप्रक्षेपाद्व्यतिरेकिहेतुत्वम् । अन्वयव्यतिरेकोदाहरणाकाङ्क्षाप्रयोजकतथाभूतावयवत्वमन्वयव्यतिरेकिहेतुत्वम् ।

यद्वा पक्षसपक्षसतो विपक्षासतो हेतुवचनमन्व-

यव्यतिरेकि । अत्यन्ताभावाप्रतियोगिसाध्यसमानाधिकरणपक्षसद्धेतुवचनं केवलान्वयि ।

यद्वा अनुमितिकारणीभूतपरामर्शप्रयोजकशाब्दज्ञानकारणसाध्याविषयकशाब्दधीजनकप्रतीतान्वयसाध्यसाधनवाचकहेतुविभक्तिमच्छब्दत्वमन्वयिहेतुत्वम् । एतदेवाप्रतीतान्वयसाध्यसाधनेतिविशेषणाद्व्यतिरेकिहेतुलक्षणम् । कथायां धूमादित्येव प्रयोक्तव्यं न तु धूमवत्त्वादिति मतुपो व्यर्थत्वात् ।

(दी०) पञ्चम्यन्तेति । अनुमितिपरवाक्यत्वं—अवयवत्वम् । हेतुत्वादौ पञ्चमी लाक्षणिकी । वृक्षाद्विभजत इत्यादौ लाघवेनावधित्वे अवधिमत्त्वे वा शक्तत्वात् । द्रव्यनिष्ठमवधित्वमिव विभागनिष्ठमवधिमत्त्वमपि सम्बन्धविशेषः । स चातिरिक्तोऽनतिरिक्तो वेत्यन्यदेतत् । तत्सम्बन्धाग्रहे च व्यवहारः शक्तिभ्रमात् ।

वृक्षादपैति पतति इत्यादौ लाघवाद्विभागे शक्तिस्तज्जनकत्वञ्च क्रियायाः सम्बन्धमर्यादया भासत इत्यपि वदन्ति । अतो निगमनेऽतिव्याप्तिरतः पञ्चम्यन्तेति । तस्मादित्यत्र च तत्पदे न लक्षणा शक्त्यैव तादृशज्ञानोपस्थितिसम्भवात् । पर्वतो वह्निमान् वह्निसामग्रीमान् वा तस्मादित्यादिकन्तु न न्यायप्रयोगः सम्प्रदायविरोधात् इति वदन्ति ।

(गा०) पञ्चम्या लाक्षणिकत्वं व्यवस्थाप्य तद्धुत्वेन निगमनेऽतिव्याप्तिं प्रसञ्जयन् पञ्चम्यन्तपदं सार्थकयति हेतुत्वादाविति । हेतुत्वं—जनकत्वम् , आदिना ज्ञापकत्वपरिग्रहः । जनकत्वोपादानं दृष्टान्तविधया । गुरुशरीरं तत्क्रियानाश्रयत्वे सति तज्जन्यविभागाश्रयत्वरूपमपादानत्वं वा दृष्टान्तविधया आदिपदग्राह्यम् । हेतुत्वं ज्ञापकत्वमेव । तर्हि कुत्र तच्छक्तिरित्यपेक्षायामाह वृक्षादिति । इत्यादौ-इत्यादिवाक्यस्थपञ्चमीप्रतिपाद्ये । विनिगमनाविरहं निराकरोति

लाघवेनेति । वृक्षादिनिष्ठावधित्वस्य निरूपकतासम्बन्धेन विभागेऽन्वयसम्भवेऽपि न वृक्षादित्यादौ वृक्षादिनिष्ठाया अवधितायाः आश्रयतासम्बन्धावच्छिन्नाभावस्य वृक्षाद्यवधिकविभागेऽपि सत्त्वेनातिप्रसङ्गभिया बोधोपगमासम्भवात् वृत्त्यनियामकनिरूपकतासम्बन्धस्य वाऽभावप्रतियोगितानवच्छेदकत्वाद्विभागनिष्ठं वृक्षादिनिरूपितमवधिमत्त्वमेव पञ्चम्या प्रतिपाद्यत इति नव्यमतानुसारेणाह अवधिमत्त्वे वेति । नन्ववधिमत्त्वमवाधिनानिरूपकत्वमेव तत्र वृक्षादेरवधितायामेवान्वयस्योपगन्तव्यतया एकदेशान्वयः, निरूपकत्वं च तज्ज्ञानजनकज्ञानविषयत्वमिति ज्ञापकत्वापेक्षया गौरवं चेत्यत आह द्रव्यनिष्ठमिति । सम्बन्धविशेषः—अवधिमन्निष्ठो अवधिनिरूपितः सम्बन्धविशेषः । अवधिमत्त्वमेव स्वरूपसम्बन्धविशेषः तन्निरूपकत्वमेवावधित्वमिति वैपरीत्यस्यापि सम्भवेन विनिगमनाविरहादिति भावः । अन्यदेतादिति । अनतिरिक्तत्वेऽपि अवधितात्वादेरनुगमकधर्मस्यानुगतप्रतीत्यनुरोधेनावश्यकत्वात्तस्य प्रवृत्तिनिमित्तत्वे लाघवादिति भावः । नन्ववधित्वादावेव पञ्चम्याः शक्तौ ज्ञापकत्वादाववधित्वादिसम्बन्धरूपवृत्त्यग्रहे पञ्चम्या ज्ञापकत्वग्रहासम्भवात्तत्प्रत्यायनेच्छया पञ्चमीप्रयोगो न स्यादित्यत आह तदिति । ज्ञापकत्वादाववधित्वादिसम्बन्धाग्रहे चेत्यर्थः । व्यवहारः—ज्ञापकत्वादिपरपञ्चमीप्रयोगः । शक्तिभ्रमात्—ज्ञापकत्वादौ शक्तिभ्रमात् । अपादानताघटकविभागत्वजात्यवच्छिन्ने शक्तिवादिनां मतमुपन्यस्यति वृक्षादिति । अपैतीति । अपैत्यर्थोऽपगमः स्पन्दमात्रं न तु विभागावच्छिन्नस्पन्दः, तर्हि त्यजितुल्यतया धात्वर्थतावच्छेदकविभागाश्रयतया वृक्षाद्यपादानस्य कर्मताप्रसङ्गात् । नाप्युत्तरसंयोगावच्छिन्नस्पन्दः वृक्षाद्भूमिं प्रयातीतिवद्वृक्षाद्भूमिमपैतीति प्रयोगप्रसङ्गात् । पततीत्यत्राधःसंयोगावच्छिन्नस्पन्दः स्पन्दत्वावान्तरजात्यवच्छिन्नो वा पतत्यर्थः । उभयत्र वृक्षादिनिष्ठविभागजनकत्वं पञ्चमीलभ्यमेवेति प्रवृत्तिनिमित्तलाघवाद्विभागे एव तस्याः शक्तिरित्यर्थः । नन्वेवं जनकत्वं कुतो लब्धव्यम् ? तदन्तर्भावेण शक्तौ च न ज्ञापकत्वाद्यपेक्षया लाघवमित्यत आह जनकत्वं चेति ।

अथ यत्नादेः स्वनिष्ठविभागानुकूलक्रियाश्रयत्वाद्विभागमात्रस्य

पञ्चम्यर्थत्वे स्वं स्वस्मात्पततीत्यादिप्रयोगः स्यादिति भेदप्रतियोगितावच्छेदकत्वसहित एव विभागः पञ्चम्यर्थो वाच्यः स्वनिष्ठक्रियायाः स्वनिष्ठविभागजनकत्वेऽपि स्वनिष्ठभेदप्रतियोगितावच्छेदकत्वविरहान्नोक्तातिप्रसङ्ग इति तु लाघवमिति चेन्न । भेदप्रतियोगितावच्छेदकत्वे लक्षणयैवोपपत्तौ तदन्तर्भावेण शक्तेरकल्पनात् तात्पर्यवशाच्छक्यलक्ष्ययोरपि युगपदन्वयोपगमात् । लक्ष्यार्थभेदप्रतियोगितावच्छेदकत्वविनिर्मोकेण पञ्चम्या विभागबोधकत्वव्युत्पत्तेर्न विभागमात्रतात्पर्येण स्वं स्वस्मात्पततीति प्रयोगप्रसङ्गः । अथवा केवलविभागे पूर्वपूर्वप्रयोगाभावादेवाप्रयोगः ।

वस्तुतो भेदप्रतियोगितावच्छेदकत्वस्य पञ्चम्यर्थत्वेऽपि वृक्षात्पत्रं पततीत्यत्र पत्रात्पत्रं पततीति प्रयोगो दुर्वारः पत्रान्तरनिष्ठभेदमादाय ततः प्रत्येकपत्रस्य पत्रान्तरनिष्ठभेदप्रतियोगितावच्छेदकत्वे सति पत्रनिष्ठविभागजनकत्वस्य पतनक्रियायामबाधात् । न च भेद एव पञ्चम्यर्थः तस्य स्वप्रतियोगितावच्छेदकत्वस्वाश्रयनिष्ठविभागजनकत्वोभयसम्बन्धेन क्रियान्वयो वाच्य इति नोक्तातिप्रसङ्गः, तत्पत्रनिष्ठक्रियावच्छिन्नप्रतियोगिताकभेदाश्रयपत्रान्तरनिष्ठविभागजनकतायाः तत्पतनक्रियायामसत्त्वेन तस्या उभयसम्बन्धेन पत्रान्तरान्वितभेदान्वयायोग्यत्वादिति वाच्यम् । पत्रान्तरनिष्ठतत्क्रियावच्छिन्नभेदस्य वृक्षेऽपि सत्त्वेन तद्भेदाश्रयवृक्षनिष्ठविभागजनकतायाः तत्क्रियायां सत्त्वेन पत्रान्तरनिष्ठभेदस्योक्तोभयसम्बन्धेन तत्क्रियान्वययोग्यताया अक्षतत्वात् अधिकरणभेदेनाभावभेदाभावात् ।

अथ पत्रादित्यत्राधेयतासम्बन्धेन पत्रविशिष्टो भेद उपतिष्ठते विशिष्टस्यैव च स्वाश्रयनिष्ठविभागजनकत्वघटितोभयसम्बन्धेनान्वयः, विशिष्टस्याधिकरणमेव विशिष्टनिरूपितपरंपरासम्बन्धघटकं पत्राधेयत्वविशिष्टस्यैव चाधेयतासम्बन्धेन पत्रविशिष्टस्याप्यधिकरणं विशेषणीभूतं पत्रमेव न तु वृक्षः, अतो नोक्तोभयसम्बन्धेन पत्रविशिष्टभेदस्य तत्क्रियान्वययोग्यता भेदप्रतियोगितावच्छेदकत्वदलरक्षार्थं स्वपदेन पत्रान्तरविशिष्टभेदस्यैवोपादेयत्वात्, तदुपादाने तदाश्रयपत्रान्तरनिष्ठविभागजनकत्वस्य तत्क्रियायां घटयितुमशक्यत्वादिति चेत् । तर्हि विभाग एव शक्तिरस्तु, तस्यैवाधेयतासम्बन्धेन प्रकृत्यर्थविशिष्टस्य स्वाश्रयनिष्ठभेदप्रतियोगितावच्छेदकत्वसहितजनकतास-

म्बन्धेन क्रियायामन्वय उपेयतां तावताप्युक्तस्थले पत्र त्पत्रं पततीति प्रयोगप्रसङ्गस्य वारणसम्भवात्, आधेयतया यत्पत्रविशिष्टविभागजनकत्वं तत्क्रियायास्तादृशविशिष्टाश्रयतत्पत्रनिष्ठभेदप्रतियोगितावच्छेदकत्वस्य तत्क्रियायामभावादित्यलमधिकेन ।

अत्र जनकतासम्बन्धस्य वृत्त्यनियामकतया पूर्ववदाकाशात्पतति न वृक्षादित्यत्रानुपपत्तिरिति विभागजनकत्वमेवार्थो वाच्य इति क लाघवमित्यस्वरसः ।

अत इति । निगमनस्थायंतस्मादितिपञ्चम्या लाक्षणिकत्वात् । निगमनवारणायेति शेषः । पञ्चम्यन्तेति । तथा च पञ्चमीपदस्य पञ्चम्यन्तत्वाभावान्नातिव्याप्तिरिति भावः । नन्वेवमपि पञ्चम्यन्ततत्पदस्य तादृशधूमादिपदवद्धूमादिज्ञाने लाक्षणिकत्वाद्दुर्वारैव निगमनातिव्याप्तिरत आह तस्मादित्येतेति । तत्पदे न लक्षणेति । न धूमादिज्ञाने शक्तिविरह इत्यर्थः । तेन तत्पदशक्यधूमादिना तज्ज्ञानस्य सम्बन्धसत्त्वाच्छक्तिज्ञानशून्यकाले शक्यसम्बन्धग्रहात् पदान्तरस्येव तत्पदस्यापि तादृशार्थबोधकताया अशक्यापलापत्वाच्च तत्पदे लक्षणायास्तथा बोधकत्वस्य च दुरपवादत्वेऽपि न क्षतिः । लक्षणे च लाक्षणिकत्वं वाच्यार्थतात्पर्यराहित्यमतो निगमने तत्पदस्य तात्पर्यविषयीभूतधूमज्ञानलाक्षणिकत्वेऽपि नातिव्याप्तिरित्यवधेयम् । शक्त्यैवेति । तत्पदस्य वक्तृबुद्धिस्थवाचकत्वात् धूमादिज्ञानतात्पर्येण च प्रकृते तत्पदप्रयोगेण ज्ञानस्य वक्तृबुद्धिस्थताया आवश्यकत्वात विशिष्टहेतुज्ञानस्याप्रक्रान्तत्वेऽपि न क्षतिरिति भावः।

नन्वेवं तत्पदेन यत्र हेतुनिर्देशस्तत्र पञ्चम्यन्तलाक्षणिकपदाभावादव्याप्तिरित्यत आह पर्वत इति । वह्निमान् तस्मादित्यत्र हेतुभूतधूमादेरप्रक्रान्तत्वाद्धेतोः प्रक्रान्ततारक्षार्थं वह्निसामग्रीमानिति । अत्र वह्निरूपहेतोः प्रक्रान्तत्वेन तत्पदेन स्फुटतरतत्परामर्शादिति भावः । न च वह्निसामग्रीघटकतया हेतोर्वह्नेः प्रक्रान्तत्वेऽपि ज्ञानस्याप्रक्रान्तत्वात्तत्पदेन बोधनासम्भवः वह्नौ चायोग्यतया न हेत्वर्थान्वयसम्भव इति वाच्यम् । प्रमितवह्निसामग्रीमत्त्वादेः साध्यत्वेन वह्निज्ञानादेरपि प्रकान्तत्वेन पञ्चम्यर्थहेतुत्वान्वयोपपत्तेः । संप्रदायाननुरोधिनां तथा प्रयोगो दुर्वार एवेत्यत्र लक्षणे वदन्तीत्यनेनास्वरसः सूचितः ।

(दी०)यत्तु हेत्वन्वयानुरोधात् वह्निमानित्यादावपि ज्ञानलक्षणेति । तन्न पञ्चम्या ज्ञापकत्वे ज्ञाप्यत्वे वा लक्षणयैवोपपत्तौ तत्र च लक्षणायां मानाभावात् ,अतएवोक्तम्—'आवृत्तौ सैव प्रतिज्ञेति' । अतएव व्याचक्षते—'यतो द्रव्यं गुणाः कर्मेत्यत्र हेतुत्वं यथासम्भवमुत्पादकत्वं ज्ञापकत्वञ्चे'ति । अतएव लोके किं वह्निमदिति प्रश्ने तद्गृहं वह्निमदित्युत्तरिते कुत इति जिज्ञासा धूमवत्त्वादित्युत्तरञ्च । नहि तत्र ज्ञाने प्रश्नः येन लक्षणया ज्ञानेनोत्तरयेत् । न वा परकीयभाविप्रश्नानुरोधात् अजिज्ञासिताभिधानम् । न वा कुत इति प्रश्ने ज्ञातमेतदित्यध्याहार्य्यं—मानाभावात् । दाहो दहनात् न जलात् जलं स्पर्शवत् रूपात् न गन्धाच्चापि शब्दादित्यादौ नञ अन्वयानुरोधात् जन्यत्वरूपं हेतुमत्त्वं जन्यज्ञानविषयत्वरूपञ्च ज्ञाप्यत्वमर्थः । एवञ्च हेतुमत्त्वे शक्तावपि ज्ञाप्यत्वे लक्षणैव । न च धूमादालोकवान् पर्वतो वह्निमान् धूमाद्वह्निमतः सधर्म्मा पर्वतो वह्निमानित्यादौ प्रतिज्ञायां पर्वतो धूमाद्वह्निमानित्यादौ च तत्रत्यनिगमने चातिव्याप्तिः, प्रकृतपक्षान्वितस्वार्थबोधकपदोपस्थापितप्रकृतसाध्यान्वितस्वार्थबोधकपञ्चम्यन्तलाक्षणिकपदवद्वयवत्वस्य विवक्षितत्वात् ।

(गा०)प्रतिज्ञास्थसाध्यवाचकपदस्य ज्ञानलाक्षणिकत्वात्प्रतिज्ञायामपि पञ्चम्यन्तपदव्यावृत्तिः सम्भवतीति मतमुपन्यस्य दूषयति यत्त्विति

अथ वा निगमनस्थवह्न्यादिपदस्य वह्न्यादिज्ञाने लाक्षणिकतया। तस्मादिति पञ्चम्या जनकत्वं जन्यत्वं वाऽर्थः, तथाच पञ्चमीमादाय न निगमने व्यावृत्तिसङ्गतिः—अवधित्वादेरिव जनकत्वादेरपि स्वरूपसम्बन्धरूपतया विनिगमकाभावेन जन्यत्वस्यापि वाच्यत्वेन पञ्चम्या अलाक्षणिकत्वादिति वादिनो मतं दूषयति यत्त्विति । एवञ्चाग्रे जन्यत्वे शक्तावपि ज्ञाप्यत्वे लक्षणैवेत्युपसंहारः सङ्गच्छते। हेत्वन्वयानुरोधादिति । हेत्वर्थानुशिष्टपञ्चम्या जन्यजनकभाव एवार्थः न तु ज्ञाप्यज्ञापकभावः 'हेतुर्ना करणं बीज'मिति कोशाद्धेतुकारणपदयोः प-

र्यायतास्थितौ ज्ञापकतार्थकतायाः हेतुपदस्य कोशादावदर्शनात्, तथा प्रतिज्ञास्थवह्न्यादिपदस्य मुख्यार्थपरत्वे मुख्यार्थस्य वह्न्यादेः धूमजन्यत्वेन ज्ञाने लक्षणां विना पञ्चम्यन्तार्थान्वयानुपपत्तिः स्यादिति भावः । ज्ञानलक्षणा–वह्न्यादिज्ञानलक्षणा । एतत्पक्षे तस्य विषयतासम्बन्ध एव मतुबर्थः । ज्ञानविषयतापर्यन्तमेव वा वह्न्यादिपदार्थ इति भावः । ज्ञापकत्व इति प्रकृत्यर्थवृत्तिकर्मत्वादीनां सुबर्थतावादिप्राचीनमतेन । ज्ञाप्यत्वे वेति नव्यमतेन । तत्र–वह्न्यादिपदे । लक्षणायां–लक्षणानिर्वाहकतात्पर्ये । मानाभावादिति । जन्यजनकभावस्य पञ्चम्यर्थत्वेऽपि तल्लाक्षणिकतायाः आवश्यकत्वात्तत्रैव ज्ञानान्तर्भावेणोपपत्तौ उभयत्र लक्षणाया अयुक्तत्वादिति भावः । न च सुब्विभक्तेरानुशासनिकातिरिक्ते न लक्षणानुशासनं विनापि तत्तल्लक्ष्यार्थे विभक्तेः साधुत्वे कर्मत्वादिरूपलक्ष्यार्थे षष्ठ्याद्यनुशासनवैयर्थ्यादिति कथमेतदिति वाच्यम् । हेताविति तृतीयाबोधकसूत्रस्थहेतुपदस्य कारणज्ञापकोभयपरतया तदनुवृत्तिमता 'विभाषागुणेऽस्त्रिया'मिति सूत्रेण ज्ञापकत्वेऽपि पञ्चम्या अनुशिष्टत्वात् । यद्यपि तत्र गुणपदं न वैशेषिकसिद्धगुणपरं पुण्याभावाच्च सुखी इत्यादौ पञ्चम्यनुपपत्तेरिति पराश्रितपरं तत्, पराश्रितत्वं च साध्यवदधिकरणाश्रितत्वं, तथासति उक्तस्थले पुण्याभावादेः स्वप्रयोज्यसुखाद्यभावाश्रयवृत्तितया तत्प्रयोजकत्वात् पञ्चम्युपपत्तेः, तथाच ज्ञानकारणतावादिमते धूमादिपदार्थज्ञानरूपहेतुः साध्यवति समवायादिना वर्त्तते । तथापि विषयतयैव तत्र वृत्तिरिति नानुपपत्तिः । एवं सति धूमज्ञानाद्वह्निमानिति प्रयोगः स्यादिति तु न देश्यम्–ज्ञापकताबोधकपञ्चम्यन्ततत्तदर्थवाचकपदस्य तत्तदर्थज्ञान एवानादितात्पर्यात् धूमज्ञानपदस्य धूमज्ञानज्ञान एव तथा तात्पर्यात् । ज्ञानज्ञाप्यत्वस्य पञ्चम्यर्थतामते च ज्ञानविषयधूमादिरूपहेतोः संयोगादिनैव साध्यवदाश्रितत्वान्नानुपपत्तिगन्धोऽपि । प्रतिज्ञास्थवह्न्यादिपदस्य मुख्यार्थपरत्वे मणिकृतोऽपि स्वरसं दर्शयति अत एवोक्तमिति । आवृत्ताविति । तेन ग्रन्थेन पुनरनुसन्धीयमानस्य प्रतिवादिवाक्यसहकारेण मध्यस्थसंशयजनकस्य पूर्वोक्तसाध्यवद्धर्मिकबोधजनकवादिवाक्यस्य प्रतिज्ञात्वमभ्युपगतम् । तत्र च वह्न्यादिपदं न तज्ज्ञानादिपरं तथासति विषयसंशायकत्वासम्भवात् विप्रतिपत्तिवाक्याभ्यां कोटद्वय-

पस्थितिद्वारा मानसः संशयो जन्यत इति सिद्धान्तिभिरपि वह्निः पर्वतो अभाव इत्यादिना आकांक्षारहिताच्छब्दात्संशयानुदयेन तद्धर्मिणि तत्तदभावकोट्योः प्रत्येकं शाब्दधीजनकसामग्रीभ्यामेव परस्परविरोधेन शाब्दबोधमनुत्पाद्य मानसः संशयो जन्यत इत्यभ्युपगमात्। प्रतिवादिनिवृत्तये पर्वते वह्निः साधनीय इत्यभिसन्धेः प्रथमतोऽनियमात् शब्दादेव पर्वते वह्निनिश्चयो भविष्यतीत्यभिप्रायेणापि प्रथमं पर्वतो वह्निमानित्यादिप्रयोगात् पूर्वप्रयुक्तवह्निपदस्य सर्वत्र ज्ञानपरत्वासंभवाच्चेति भावः।

वर्द्धमानोपाध्यायानामपि पञ्चम्या ज्ञापकत्वार्थकत्वे सम्वादमाह अत एवेति। यथासम्भवमिति। समभिव्याहृतद्रव्यादिपदार्थे जन्यनित्यरूपेऽन्वययोग्यतानुसारेणेत्यर्थः।

नन्वावृत्तौ सैव प्रतिज्ञेति मणिकृतोऽभ्युपगमवादः न तु तत्र निर्भरः मध्यस्थसंशयात् परतोऽपि हेतुवाक्यसमभिव्याहृतसाध्यनिर्देशस्य सांप्रदायिकत्वात्। हेतुत्वं यथासम्भवमित्युपाध्यायग्रन्थोऽपि पञ्चमीप्रतिपाद्यं हेतुत्वं क्वचित्समभिव्याहृतपदमुख्यार्थनिरूपितं क्वचिच्च लक्ष्यार्थतज्ज्ञाननिरूपितं कारणत्वमित्यर्थकतयोपपद्यते। यदप्युक्तम्-उभयपदे लक्षणानौचित्यमिति-तदपि शिथिलम्-ज्ञापकतायाः पञ्चम्यर्थत्वे सूत्रस्थहेतुपदस्य उभयपरतया वाक्यभेदापत्तेरनुशासनानुरोधेनोभयत्र लक्षणाया एव उचितत्वादित्यतो युक्त्यन्तरमाह अत एवेति। जिज्ञासा प्रश्नः धूमवत्त्वादित्युत्तरं चेति। प्रयुज्यत इति शेषः। उपष्टम्भं विवृणोति नहीति। ज्ञाने प्रश्न इति। प्रश्नस्थवह्निपदं वह्निज्ञानपरमित्यर्थः। वह्नेरेव जिज्ञासितत्वादिति शेषः। लक्षणया ज्ञानेनोत्तरयेदिति लक्ष्यार्थज्ञानपरमुत्तरवाक्यमित्यर्थः। अपि तु प्रश्नसमानविषयकत्वानुरोधेन मुख्यार्थवह्निपरमेव तादृशोत्तरं प्रयुक्तमिति शेषः। तथाच तत्र वह्नौ कुत इति धूमादिति च प्रश्नोत्तरवाक्ययोर्ये पञ्चम्यौ तदर्थान्वयानुरोधेन ज्ञापकत्वं ज्ञाप्यत्वं वा पञ्चम्यर्थो वाच्य इति भावः।

ननु प्रथमप्रश्नानुरोधाद्वह्निपदस्य वह्निपरत्ववत् कुत इति प्रश्नस्थपञ्चम्यर्थान्वयानुरोधात्तदुत्तरधूमादिति पञ्चम्यर्थान्वयानुरोधाच्च ज्ञानत्वपरत्वमप्यविरोधात् एकदा शक्यलक्ष्यार्थानन्वयेऽपि वह्निं बोधयित्वा ज्ञानं बोधयिष्यतीत्यभिप्रायेणैव एकपदप्रयोगे बाध-

काभावात् । अत एव तथाविधतात्पर्यानुरोधेन नानार्थस्थले व्यावृत्तिरित्यत आह न वेति । परकायभाविप्रश्नानुरोधादिति । तादृशप्रश्नस्थीयतदुत्तरवाक्यस्थपञ्चम्यर्थान्वयानुरोधादित्यर्थः । अजिज्ञासिताभिधानम् । प्रथमजिज्ञासाविषयज्ञानप्रत्यायनेच्छया वह्निपदप्रयोगः । परकीयत्वेन भावित्वेन च प्रथमं कुत इति प्रश्नस्याज्ञानात् परकीयवह्निज्ञानहेतुजिज्ञासायाः अज्ञानेन वह्निज्ञानप्रत्यायनेच्छयाः प्रथममसम्भवादिति हेतुसूचनाय परकीयत्वभावित्वाभिधानम् ।

ननु तत्र ज्ञानमित्यध्याहारात्कुत इति पञ्चम्यर्थस्य ज्ञानेन्वऽयो न तु वह्नावित्यत आह नवेति । प्रश्नस्थपदस्योत्तरवाक्येऽनुषङ्गस्य व्युत्पत्तिसिद्धत्वात्कुत इत्यत्र ज्ञानमित्याध्याहारेणैव धूमादित्यत्रापि ज्ञानान्वयसम्भवात्तत्राध्याहारान्तरविरहेऽपि न क्षतिरित्यतः कुत इत्यत्रैवाध्याहारः शङ्कितः । मानाभादिति । पदार्थान्तरान्वयस्य वक्तुरनभिप्रेतत्वनिश्चयेऽपि बोधस्यानुभाविकत्वात् सर्वत्राश्रुतकल्पनासम्भवादित्यर्थः ।

इदं त्ववधेयम् । गृहं वह्निमदिति प्रयोक्तुः वह्निपदे ज्ञानतात्पर्ये कुत इति वाक्यजन्ये ज्ञानहेतुजिज्ञासाबोधेऽनुपयुक्तं स्वाभिप्रायस्य स्वबोधाहेतुत्वात् कुत इति पृच्छकपुरुषतात्पर्यस्यैव तत्रोपयोगात् । तथाच स्वजिज्ञासां बोधयितुकामस्य कुत इति प्रयोक्तुः परप्रयुक्तवह्निपदलक्षणया वह्निपदोपस्थापित ज्ञानमादाय कुत इति पञ्चम्यर्थान्वयो भवत्वित्यभिप्रायं ज्ञात्वैव प्रतिवक्ता प्रष्टुर्वह्निज्ञानहेतुजिज्ञासां कुत इति शब्दादनुपज्यमानस्वोक्तवह्निपदसहितात् ज्ञास्यति । एवं गृहं वह्निमदिति प्रयोक्तुः प्रथमं वह्निपदे ज्ञानतात्पर्यविरहेऽपि कुत इति प्रश्नानन्तरं प्रष्टुर्वह्निज्ञानहेतुजिज्ञासाया ज्ञाने किमर्थमन्यत् वह्निपदं प्रयोक्तव्यं पूर्ववह्निपदाल्लक्षणयोपस्थितं ज्ञानमादायैव धूमादिति वाक्यं धूमज्ञाने वह्निज्ञापकतां बोधयत्वित्यभिप्रायसम्भवात् तज्ज्ञानेन धूमादिति पञ्चम्यर्थस्य ज्ञानान्वयो भविष्यतीति किमनुपपन्नम्, न हि प्रयोक्तुः पुरुषस्यैकार्थतात्पर्यं पुरुषान्तरीयान्यार्थतात्पर्यविरोधि अन्यैरन्यतात्पर्येण प्रयुक्तान्यपि पदान्यादायान्यार्थपरश्लोकस्य मौनिना निबन्धनात् । न वा स्वीयं प्राथमिकमन्यतात्पर्यमुदीच्यापरतात्पर्यं विरुणद्धि बीजाभावात् । युज्यते च वह्न्यादिपदस्य वह्न्यादिप्रकारकज्ञानविषयत्वे लक्षणा

साध्यान्वयिजन्यज्ञानविषयत्वस्य पञ्चम्यर्थत्वे गुणः सत्तावान् द्रव्यत्वादित्यादिप्रयोगस्य दुर्वारतापातात् द्रव्यत्वादिज्ञाप्यसत्त्वादेर्गुणादावपि सत्त्वात्, साध्यवाचकपदस्य लाक्षणिकत्वे पक्षान्वयिसाध्यतावच्छेदकविशिष्टसाध्यप्रकारकज्ञानविषयत्वरूपसाध्यवाचकपदार्थे पञ्चम्यन्तार्थलिङ्गज्ञानप्रयोज्यत्वान्वयात्, द्रव्यत्वादिप्रकारकज्ञानप्रयोज्यसत्त्वादिप्रकारकज्ञानविषयत्वस्य गुणादौ बाधेन कथितातिप्रसङ्गवारणसम्भवात्। न च जन्यज्ञानविषयत्वरूपपञ्चम्यर्थस्य साध्यविशिष्टपक्षेऽन्वयः स्वीक्रियते सत्तादिरूपसाध्यविशिष्टगुणादिरूपपक्षस्य च न द्रव्यत्वादिलिङ्गज्ञाप्यतेति नातिप्रसङ्गः, वह्न्यादिमतः पर्वतादेः द्रव्यत्वादिरूपसाध्यविशिष्टस्य पृथिवीत्वादिज्ञानज्ञाप्यत्वेऽपि वह्न्यादिविशिष्टस्य न तथात्वमिति विशेषणावच्छिन्न एव पञ्चम्याः ज्ञाप्यत्वबोधकत्वान्न पर्वतो वह्निमान्पृथिवीत्वादिप्रयोगः, विषयतायाः पर्याप्तिसम्बन्धेन विशिष्टेऽन्वयोपगमात् द्रव्यत्वादिरूपसाध्यवत्त्वेन वह्न्यादिरूपपक्षतावच्छेदकविशिष्टपर्वतादेः पृथिवीत्वादिज्ञाप्यत्वेऽपि न क्षतिरिति वाच्यम्। एवमपि द्रव्यत्ववान् पर्वतो वह्निमान् धूमान्न पृथिवीत्वादित्यादौ नञर्थान्वयानुपपत्तेर्दुर्वारत्वात् पृथिवीत्वज्ञाप्यतापर्याप्त्यधिकरणद्रव्यत्वविशिष्टपर्वतादौ वह्न्यादिरूपविशेषणान्तरावच्छिन्नेऽपि तज्ज्ञाप्यताविरहासम्भवात्, अस्मन्मते च तत्र पर्वताद्यन्वयिनि वह्न्यादिप्रकारकज्ञानविषयत्वे पृथिवीत्वादिरूपलिङ्गज्ञानप्रयोज्यत्वस्य पञ्चम्यर्थस्याभावान्वयात्तदभावस्य तत्राबाधेनानुपपत्तिविरहात्। एवं साध्ये ज्ञाप्यत्वान्वयपक्षेऽपि उक्तप्रयोगानुपपत्तिर्द्रष्टव्या—वह्न्यादेरपि प्रमेयत्वादिना पृथिवीत्वादिज्ञाप्यत्वात्। यदि च प्रयोज्यत्वं समभिव्याहृतपक्षविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नविधेयता च खण्डशो लक्षणया पञ्चम्यर्थः अन्वयबलात्साध्ये पक्षांशे तत्तद्रूपेण हेतुज्ञाप्यतालाभः, नञ्समभिव्याहारस्थले च लिङ्गज्ञानान्वितप्रयोज्यत्वरूपैकार्थस्य निरुक्तविधेयतारूपापरपञ्चम्यर्थेऽभावो नञा प्रत्याय्यते इत्युच्यते, तदा साध्यतावच्छेदकपक्षतावच्छेदकादेर्द्विधा भानाद्गौरवम्। साध्यान्वयिनि पक्षविशेष्यतानिरूपितविधेयता पक्षान्वयिनी साध्यविधेयतानिरूपितविशेष्यता वा पञ्चम्यर्थ इति विनिगमनाविरहः एकपदस्यार्थद्वये खण्डशो लक्षणा पदद्वयस्यैव वा प्रत्येकमर्थद्वये लक्षणेत्यत्र को विशेष इति। प्रसङ्गतः

पञ्चम्याः जनकत्वज्ञापकत्वार्थकत्वं नञर्थान्वयस्थलेऽनुपपत्तिप्रदर्शनेन निराकुर्वन् जन्यत्वज्ञाप्यत्वार्थकतां व्यवस्थापयति दाहो दहनादित्यादिना। गन्धस्याज्ञापकत्वं पक्षधर्मताविरहेण शब्दस्यातथात्वं व्याप्तेरपि विरहेणेति प्रदर्शनार्थमुभयोपादानम्। नञर्थान्वयानुरोधादिति। जनकत्वज्ञापकत्वयोः पञ्चम्यर्थत्वेऽपि निरूपकतासम्बन्धावच्छिन्नाभावाप्रसिद्ध्या आश्रयतासम्बन्धावच्छिन्नाभावप्रत्यय एव दाहस्पर्शादौ स्वीकार्यः, तथाच तत्र जलगन्धादिनिष्ठजनकत्वज्ञापकत्वयोरिव दहनरूपादिनिष्ठयोरपि तयोरभावसत्त्वेन दाहो न दहनात् जलं स्पर्शवन्न रूपादित्यपि प्रयोगः स्यादिति भावः। न च दाहादिविशेषितजनकत्वादेरेवाभावस्तत्र जलगन्धादिरूपप्रकृत्यर्थे प्रतीयत इति वाच्यम्। प्रथमान्तार्थस्य पञ्चम्यर्थविशेष्यतयैव शब्दात्प्रतीतेर्दाहादिविशेषितजनकत्वादिरूपप्रतियोगिनः शब्दादनुपस्थितस्य नञाऽभावबोधनासम्भवात्। पञ्चम्यर्थस्य प्रकृत्यन्यपदार्थविशेषितस्यापि नञ्समभिव्याहारस्थले भानोपगमे व्युत्पत्तिभेदाद्गौरवम्। सर्वत्रैव प्रकृत्यर्थे विभक्त्यर्थो विशेषणं तत्र च निरूपकतया समभिव्याहृतपदार्थान्तरमिति चानुभवसिद्धप्रथमान्तपदार्थविशेष्यताभङ्गेनासम्भवदुक्तिकम्। इन्धनस्य दाहो दहनादित्यादौ तु तुल्ययुक्त्या दहनादेर्दाहजनकत्वादिविशेष्यत्ववदिन्धनादेरपि दाहसम्बन्धादिविशेष्यतया इन्धनं दाहसम्बन्धि दहनो दाहजनक इत्यादिसमूहालम्बनबोधस्य स्वीकारेण वाक्यभेदप्रसङ्गात्। यत्रान्यस्य दाहो दहनान्नैतादिन्धनस्य तत्रैतदिन्धनस्य दाहो न दहनादिति प्रयोगानुपपत्तिश्चेति।

अत्र वदन्ति। जन्यतायाः पञ्चम्यर्थत्वेऽपि दाहो दहनात् न परमाणुपरिमाणादित्यादिप्रयोगानुपपत्तिः पारिमाण्डल्यस्य कार्यसामान्येऽजनकतया परमाणुपरिमाणादिजन्यत्वाप्रसिद्धेर्नञर्थे प्रतियोगितयाऽन्वयासम्भवात्। दाहाद्यन्वयिनि जन्यत्वे प्रकृत्यर्थस्य निरूपितत्वसम्बन्धेनाभावबोधोपगमे च वृत्त्यनियामकसम्बन्धावच्छिन्नाभावाभ्युपगमः, लक्षणया प्रकृत्यर्थनिरूपितत्वस्याभावान्वयोपगमेऽपि गगनं न परमाणुपरिमाणादित्यादौ गगनादौ जन्यत्वान्वयायोग्यत्वादनुपपत्तिः, पारिमाण्डल्यानिरूपितत्वाभाववज्जन्यत्वाभाववद्गगनमित्याकारिकायाः द्विधा नञर्थावगाहिन्याः प्रतीतेरुपगमे च घटो न घटजनकादित्यस्यापि स्यात्—घटजनकाद्यनिरूपितजन्यत्वाभावस्य घटादावबाधात्,

दण्डाद्यनिरूपितजन्यत्वत्वावच्छिन्नाभावस्य पटांशे बाधने पटो न-दण्डादित्यादेरप्यनुपपत्तेश्च । गगनादौ जन्यत्वभ्रमदशायां गगनं न पारिमाण्डल्यादित्यादिवाक्यस्याबोधकतापत्तेः। पञ्चम्यर्थे जन्यतासामान्ये लक्षणया प्रकृत्युपस्थाप्यस्य पारिमाण्डल्यनिरूपितत्वगगनवृत्तित्वोभयत्वावच्छिन्नस्याभावबोधोपगमे च जनकतायाः पञ्चम्यर्थत्वेऽपि तत्सामान्ये लक्षणया प्रकृत्युपस्थाप्यस्य पारिमाण्डल्यवृत्तित्वगगनिरूपितत्वोभयत्वावच्छिन्नस्याभावबोधोपगमेन सामञ्जस्यम् । न च तत्र लक्षणाया आवश्यकत्वेऽपि दाहो न जलादित्यादेर्लक्षणां विनैवोपपत्तये जन्यत्वस्य पञ्चम्यर्थत्वमुचितमिति वाच्यम्। जलादेरपि कार्याजनकत्वभ्रमदशायां दाहो न पारिमाण्डल्यादित्यादाविवान्वयबोधस्यानुभविकतया तदनुरोधेन तत्रापि जन्यतायां जलादिनिरूपितत्वाभावबोधस्यावश्योपेयत्वादिति ।

अत्रेदं तत्त्वम्। शशविषाणं नास्तीति वाक्यवद्दाहो न पारिमाण्डल्यादित्यादिवाक्यमप्रमाणमेव। तद्वाक्यस्य प्रामाण्यानुरोधेन लक्षणया पारिमाण्डल्यादिनिरूपितत्वाभावबोधस्य क्वचिदभ्युपगमेऽपि दाहो न जलादिवाक्यतो लक्षणाज्ञानशून्यकालेऽपि अन्वयबोधस्यानुभविकतया जन्यत्वाभावबोधकतापि तादृशवाक्यस्योपगन्तव्येति जन्यत्वं पञ्चम्यर्थ इति ।

जन्यज्ञानविषयत्वमिति । जन्यत्वान्वयि प्रकृत्यर्थज्ञानं भ्रमभिन्नं ग्राह्यम् अतो व्याप्तिपक्षधर्मतावगाहिभ्रमरूपहृदत्वादिज्ञानस्य पर्वतादौ वह्न्याद्यनुमापकत्वेऽपि पर्वतो वह्निमान् हृदत्वादित्यादिप्रयोगस्य नापत्तिः, न वा पर्वतो वह्निमान् धूमात् न हृदत्वादित्यादिप्रयोगानुपपत्तिः। यद्यपि यत्किञ्चिद्विषयभ्रमान्यत्वं भ्रमसाधारणं भ्रमसामान्यान्यत्वं च, तदभाववति तत्प्रकारकत्वरूपभ्रमत्वस्य तत्तत्प्रकारविशेषघटितत्वेनाननुगततया जगतीगतयावद्वस्तुभ्रमाणां तत्तद्वस्तुभ्रमत्वावच्छिन्नभेदकूटरूपामतिदुर्ज्ञेयम् , तथापि प्रकृतसाध्यहेतुपक्षकपरामर्शे प्रकारीभूता ये ये तत्तत्प्रकारकभ्रमभिन्नत्वमेव विशेषणं ज्ञेयम्। यद्यपि धूमादिमत्यपि पर्वतादौ समवायादिसम्बन्धावच्छिन्नधूमाद्यभावसत्त्वात् पर्वतादौ धूमादिप्रमायाः सङ्ग्राहाय यत्सम्बन्धेन हेतुप्रकारकं ज्ञानं यत्र हेतुवाचकपदेन विवक्षितं तत्र तत्सम्बन्धावगाहितत्प्रकारकभ्रमान्यत्वं प्रतीयत इत्युपेयम् , तथाच स्वरूपादिसम्बन्धेन

प्रमेयत्वादेर्यत्र हेतुत्वं तत्र तत्सम्बन्धेन तद्भ्रमाप्रसिद्ध्या तदन्यत्वं दुर्ग्रहम्, तथापि तत्र तादृशभ्रमान्यत्वप्रतीतिरेव न स्वीक्रियते अतो न दोषः ।

वस्तुतस्तु स्वानुयोगिनिष्ठविशेष्यतानिरूपितत्व-स्वप्रतियोगिनिष्ठत्व-स्वावच्छिन्नत्वैतत्त्रितयसम्बन्धेन सम्बन्धविशिष्टान्यप्रकारताशालित्वमेवानुगतं भ्रमत्वं सुवचम्, अतो भ्रमविषयतयैव प्रमेयत्वं वाच्यत्वादिज्ञापकमिति भ्रमदशायां वाच्यं प्रमेयत्वादित्यादिप्रयोगस्य तादृशप्रयोगाधीनबोधस्य च वारणाय प्रमेयत्वादिज्ञानस्यापि तद्भ्रमान्यत्वेनैव पञ्चमीप्रकृत्यर्थता वाच्या सा चाप्रसिद्ध्या न सम्भवतीति दूषणमनवकाशम् ।

निगमनस्थपञ्चम्या लाक्षणिकत्वमुपसंहरति एवञ्चेति । एवञ्च-पञ्चम्या जन्यज्ञाप्यभावार्थकत्वस्थितौ च । हेतुमत्त्वे-जन्यत्वे । ज्ञाप्यत्वे लक्षणैवेति । जन्यत्वापेक्षया तस्य शरीरगौरवादिति भावः । न चेति । धूमादालोकवान् पर्वतो वह्निमानित्यादिप्रतिज्ञाघटितन्याये आलोकादेर्हेतुत्वे प्रकृतहेत्वन्वितार्थकपञ्चमीनिवेशेनाप्यतिव्याप्तिवारणसम्भवात् धूमादिति हेत्वभिधानम्। अत्र पञ्चम्याः प्रकृतसाध्यान्वितस्वार्थबोधकत्वविशेषणमात्रेणातिव्याप्तिवारणसम्भवात्तादृशसाध्ये विवक्षणीयोपस्थापितान्तविशेषणव्यावृत्तये स्थलान्तरेऽतिव्याप्तिं दर्शयति धूमाद्वह्निमत इति । अत्र वह्निमत्त्वेन पक्षस्यापि भानाद्विवक्षणीयविशेषणे पक्षतावच्छेदकपर्यन्तनिवेशनस्याप्यात्रैव व्यावृत्तिः । साध्यतावच्छेदकावच्छिन्नत्वांशनिवेशनाय स्थलान्तरेऽतिव्याप्तिं दर्शयति पर्वतो धूमाद्वमानिति । तत्रत्यनिगमने-तस्मात् धूमाद्वह्निमानित्याकारके। अत्र पञ्चम्यन्तार्थविशिष्टवह्नित्वमेव साध्यतावच्छेदकमिति तदवच्छिन्ने साध्ये पञ्चम्यर्थानन्वयात्साध्यतावच्छेदकावशिष्टान्वितस्वार्थबोधकत्वनिवेशेने नातिव्याप्तिः । धूमाद्वह्निमतः सधर्मेत्यादौ प्रकृतपक्षतावच्छेदकावच्छिन्ने यस्य साध्यस्य द्वितीयवह्निपदजन्योपस्थितिवशादन्वयः प्रथमवह्निपदोपस्थापिते तत्रैव प्रतिज्ञाघटकपञ्चम्यर्थस्यान्वयात्पक्षान्वितस्वार्थबोधकत्वविशेषणेन तद्वारणासम्भवात्साध्ये प्रकृतपक्षान्वितत्वं विहाय प्रकृतपक्षान्वितस्वार्थबोधकपदोपस्थापितत्वं निवेशितम् । यद्यप्युभयत्र वह्निपदेन एकमेव साध्यमुपस्थाप्यते अतो नैव तावताप्युक्तातिव्याप्तिवारणसम्भवः, तथापि प्र

कृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपिता या विशेषणता त-द्वच्छिन्नसाध्यतावच्छेदकविशिष्टसाध्यीयविशेष्यतानिरूपितस्वार्थ-विषयताप्रयोजकबोधकान्तार्थः-पञ्चमीत्वमनिवेश्य प्रयोजनाभावात्। उपनयोपस्थापितपक्षविशेषणतापन्नसाध्यान्वितार्थबोधकपञ्चम्यन्तत-त्पदमादायाननुषङ्गपक्षेऽपि निगमनेऽव्यातिव्यासेर्वारणं लाक्षणिकपद-प्रयोजनम्।

(दी०) यत्तु अयमात्मा ज्ञानादित्यादावव्याप्तिः शक्त्यैव ज्ञानोपस्थितिसम्भवेन लक्षणाविरहादिति।

तन्न। यद्विषयकज्ञानस्य हेतुत्वादिकमवगतं तस्य व्या-प्त्यादिजिज्ञासायामुदाहरणादिप्रयोगः, न चेह ज्ञानविषयत्वेनोप-स्थितिर्विना लक्षणाम्, अन्यथा सुखादेरपि व्याप्त्याद्युपदर्शन-प्रसङ्गात्।

केचित्तु पञ्चम्यन्तलाक्षणिकपदवत्त्वनियतावच्छेदकरूपवत्त्वं तादृशपदवत्त्वव्यभिचार्यवयवतावच्छेदकशून्यावयवत्त्वं वा विव-क्षितमित्याहुः।

नव्यास्तु पञ्चम्या ज्ञानज्ञाप्यत्वलक्षणयैवोपपत्तौ न प्रातिप-दिकेऽपि लक्षणा। आकाङ्क्षावैचित्र्याच्च पदार्थैकदेशेऽपि ज्ञाने प्रातिपदिकार्थो विषयत्वेनान्वेति कर्तृकृतीव कृतौ धात्वर्थः। यद्धर्मविशिष्टश्च हेतुः प्रयुज्यते आकाङ्क्षाबलात् तद्धर्मविशिष्ट-स्यैव व्याप्यत्वमुपदर्श्यते, अन्यथा यथार्थधूमज्ञानादित्यादिप्र-योगेऽपि धूमादेर्व्याप्यत्वोपदर्शनप्रसङ्ग इति प्राहुः।

अयमात्मा ज्ञानादित्यादौ ज्ञानपदं मुख्यार्थपरमेव पञ्चम्यर्थान्वय-स्य तत्रैव सम्भवेन लक्षणाबीजभूतान्वयानुपपत्तिविरहादित्यभिमा-निनामुक्तलक्षणाव्याप्तिशङ्कामुद्धर्तुमुपन्यस्यति यत्त्विति। शुद्धज्ञा-नत्वावच्छिन्नेन समं पञ्चम्यर्थान्वयसम्भवेऽपि अनुमितिजनकज्ञान-विषयतया ज्ञानोपस्थितावेव ज्ञानरूपहेतौ तद्विषयतानिर्वाहकव्याप्त्या-द्याकांक्षया यो ज्ञानवान् स आत्मा इत्युदाहरणादिप्रयोगसम्भव इति

ज्ञानविषयकज्ञानत्वावच्छिन्ने तात्पर्यानुपपत्त्या लक्षणाया आवश्यकत्व-मिति समाधत्ते तन्नेत्यादिना । यद्विषयकज्ञानस्य यद्विषयकज्ञानत्वाव-च्छिन्नस्य । हेतुत्वमनुमितिजनकत्वम् । तस्य व्याप्त्यादिजिज्ञासायां तुल्यवित्तिवेद्यतयाऽर्थतो वा तत्र प्रतीतानुमापकज्ञानविषयतायाः नि-र्वाहकाकांक्षायामित्यर्थः । उदाहरणादिप्रयोगः-उदाहरणोपनयाभ्यां तन्निष्ठव्याप्तिपक्षधर्मताप्रदर्शनम् । यद्यपि ज्ञानविषयकज्ञानत्वाव-च्छिन्ने ज्ञानपदस्य तात्पर्येऽपि मुख्यार्थज्ञानत्वावच्छिन्नपरत्वमक्षतमे-वेति पूर्वोपदर्शितमुख्यार्थतात्पर्यराहित्यरूपं लाक्षणिकत्वं नोपपद्यते, तथापि शक्यतावच्छेदकविलक्षणरूपावच्छिन्नतात्पर्यकत्वमेव लाक्ष-णिकत्वमतो न दोषः । ननु शुद्धज्ञानत्वावच्छिन्नेऽनुमापकताबोधेऽपि तत्र तन्निर्वाहकव्याप्त्यादिमद्विषयकत्वलाभाय वस्तुगत्या तादृश-ज्ञानविषयीभूते ज्ञाने व्याप्त्यादिप्रदर्शनसङ्गतिरित्यत आह अन्यथेति । जनकज्ञानविषयतयाऽप्रतीते ज्ञाने वास्तवतादृशविषयतां पुरस्कृत्य व्याप्त्युपदर्शने सुखादेरपि आत्मत्वानुमापकज्ञानविषयतया अयमा-त्मा ज्ञानादित्यत्र यः सुखी स आत्मेत्युदाहरणादिप्रयोगप्रसङ्गादि-त्यर्थः । तथाच सुखादौ व्याप्त्यादिप्रदर्शनेऽपि ज्ञानेऽनुमापकत्वनि-र्वाहकव्याप्त्यादिमद्विषयकत्वपर्यन्तालाभादाकाङ्क्षाया अपूरणात् यथा सुखादौ न तत्प्रदर्शनं तथा एतन्मते ज्ञानेऽपि तत्प्रदर्शनं नोप-पद्यत इति भावः ।

उक्तप्रतिज्ञादावतिव्याप्तिवारणाय प्रकारान्तरेण लक्षणं परिष्कु-र्वतां मतमाह केचित्त्विति । पञ्चम्यन्तेति । कस्याश्चित् प्रतिज्ञायाः पञ्चम्यन्तलाक्षणिकपदत्वेऽपि धूमज्ञानज्ञाप्यालोकवान् पर्वतो वह्नि-मानित्यादिप्रतिज्ञायां व्यभिचारेणावयवतावच्छेदकं प्रतिज्ञात्वं पक्षा-दिभेदेन भिन्नमपि न तादृशावयवतापदवत्त्वनियतमिति नातिप्रसङ्ग इ-ति भावः । तादृशवच्छेदकं हेतुत्वं दुर्वचं सुवचत्वे तदेव लक्षणमित्यतो-ऽन्यथा परिष्कुरुते तादृशेति । तादृशपदं-पञ्चम्यन्तलाक्षणिकपदम् । प्रतिज्ञात्वादिकं च तादृशपदाद्यघटितस्यापि प्रतिज्ञादेः सत्त्वेन तादृश-पदवत्त्वव्यभिचारीति तच्छून्यत्वाभावान्न प्रतिज्ञादावतिव्याप्तिः। तादृश-पदवत्त्वव्यभिचारिमेयत्वादिशून्यत्वाप्रसिद्ध्याऽवयवतावच्छेदकेति । अत्र प्रतिज्ञात्वहेतुत्वादिसाधारणस्यावयवतावच्छेदकत्वस्यैकस्याभा-वात्प्रतिज्ञात्वादिकं विशिष्योपादाय तच्छून्यत्वं निवेश्यम् तथाच हेतु-

त्वव्यावर्त्तनायोपात्तं तादृशपदवत्त्वव्यभिचारित्वविशेषणमनर्थकम् । यदि च प्रतिज्ञात्वहेतुत्वादिसाधारणं प्रतिज्ञात्वादिपञ्चान्यतमत्वमवयवतावच्छेदकत्वम्, तदा तत्र हेतुत्वप्रवेशो तस्यान्यादृशस्य दुर्वचत्वात् । सुवचत्वे तदेवास्तु लक्षणमन्यतममध्ये हेतुत्वमन्तर्भाव्य तद्व्यावर्त्तये विशेषणान्तरदानं प्रक्षालनाद्धीति न्यायेनायुक्तमित्यस्वरसः।

पञ्चम्यन्तेत्यादिलक्षणकर्त्तुरनुमतां धूमादित्यादिवाक्यस्थधूमादिपदस्य ज्ञानलक्षणां स्वातन्त्र्येण दूषयति नव्यास्त्विति । ज्ञानज्ञाप्यत्वलक्षणयेति । ज्ञाप्यत्वलक्षणाया आवश्यकत्वात् । तत्र च ज्ञानांशस्यापि अधिकस्य प्रवेशेनैव धूमादिपदस्य मुख्यार्थपरत्वेपि धूमादिज्ञानज्ञाप्यत्वलाभसम्भव इत्यर्थः । न प्रातिपदिकेति । न पञ्चमीप्रकृतिधूमादिपदे ।

नन्वेवं ज्ञानस्य पञ्चम्यर्थैकदेशतया तत्र धूमादिपदार्थस्यान्वयायोगात् धूमादिज्ञानालाभः । न च ज्ञाप्यत्वस्य पञ्चम्यर्थत्वेऽपि जन्यत्वरूपतदेकदेशे कथं धूमादिपदार्थतज्ज्ञानान्वय इति वाच्यम् । चैत्रस्य पुत्रः घटादन्य इत्यादौ ससम्बन्धिकपदार्थैकदेशे जन्यत्वादौ पदार्थान्तरस्यान्वयदर्शनात् निष्प्रतियोगिक एव पदार्थैकदेशे इतरान्वयस्याव्युत्पन्नत्वात् । न च स्वतन्त्रोपस्थित एव पदार्थ इतरान्वयजिज्ञासा जायते न तु इतरविशेषणतयोपस्थिते अत एव गौर्नित्येत्यादौ स्वतन्त्रगोत्वाद्युपस्थितये लक्षणा इत्यत आकांक्षाविरह एव पदार्थान्तरस्य पदार्थैकदेशेनान्वये वीजं स च सप्रतियोगिकनिष्प्रतियोगिकैकदेशसाधारण इति वाच्यम् । फलानुरोधेन सप्रतियोगिकपदार्थे विशेषणतयोपस्थितेऽपि प्रतियोगिजिज्ञासा जायते इति कल्पनात् । न च ज्ञानादिसविषयकपदार्थेऽपि तथोपस्थिते विषयजिज्ञासा जायत इति युज्यते कल्पकाभावादित्याशङ्क्य सविषयककृतिदृष्टान्तेन पदार्थैकदेशे ज्ञानेऽपि विषयाकांक्षां व्यवस्थापयति आकांक्षावैचित्र्याच्चेति । कुत्रचित्स्वतन्त्रोपस्थिते एव इतराकांक्षा कुत्रचिद्विशेषणतयाप्युपस्थिते कस्यचिदाकांक्षेति विषयस्वभावाधीनतया आकांक्षावैचित्र्यादित्यर्थः । कर्तृकृती चेति । पक्तेत्यादौ तृजाद्यर्थैकदेशे कृतौ यथा विषयत्वेन पाकादिक्रियान्वेतीत्यर्थः ।

इदं तु बोध्यम् । जिज्ञासारूपाकांक्षायाः शाब्दधीहेतुत्वमजिज्ञासोरपि शाब्दबोधोदयात्, मणिकृता निराकृतम् तथाचाकांक्षाविरहेण

पदार्थैकदेशे पदार्थान्तरानन्वये बीजम्, गौर्नित्येत्यादौ गवादिपदा-
र्थैकदेशे गोत्वे नित्यादिपदार्थाभेदान्वयबोधप्रयोजकायाः समा-
नविभक्तिकतत्तत्पदसमभिव्याहाररूपाया आकांक्षाया अक्षतत्वात्,
अतः पदाधीनायाः स्वतन्त्रतदुपस्थितेः पदार्थान्तरस्य तत्रा-
न्वयबोधे हेतुता वाच्या । एवञ्च ज्ञानविशिष्टार्थकात्मादिपदघ-
टितात्मा न द्रव्यमित्यादि वाक्यात्पदार्थैकदेशे ज्ञाने इतरान्वय-
वारणाय दण्डजन्यो न दण्डजन्य इत्यादिवाक्यात् पदार्थैकदेशे
दण्डजन्यत्वादौ दण्डजन्यभेदान्वयबोधवारणाय कल्पनीये ज्ञाना-
द्यंशे इतरान्वयबोधे स्वतन्त्रज्ञानाद्युपस्थितेर्हेतुत्वे कार्यतावच्छेदक-
कोटिप्रविष्टतराविषयतायां विषयित्वादिसम्बन्धावच्छिन्नप्रकारता-
न्यत्वं विशेषणं देयम् ।

वस्तुतो ज्ञानादिविषयकशाब्दबोधे स्वतन्त्रज्ञानाद्युपस्थितेर्हेतु-
त्वेऽपि पञ्चम्यादिजन्यज्ञानज्ञाप्यत्वोपस्थितिप्रकृतिजन्यधूमाद्युपस्थि-
तियोग्यताज्ञानघटितशाब्दसामग्र्याः पदार्थैकदेशे ज्ञानादौ विष-
यितादिसम्बन्धेन धूमादिप्रकारकशाब्दबोधजनने बाधकाभावः—ता-
दृशसामग्र्यां स्वतन्त्रज्ञानाद्युपस्थितेरनन्तर्भावात् तादृशोप-
स्थितेर्ज्ञानादौ द्रव्यभेदाद्यन्वयबोधप्रयोजकसामग्र्यन्तरे एव निवे-
शात् । न चैवं स्वतन्त्रज्ञानाद्युपस्थितेर्व्यभिचारेण हेतुत्वमेव न स-
म्भवतीति वाच्यम् । यतो यत्रैकरूपावच्छिन्ने पदे पदान्तराकांक्षा
गृहीता अन्यरूपेण च वृत्तिर्गृहीता तत्रातिप्रसङ्गवारणाय तत्तदानु-
पूर्वीविशेषरूपपदविशेषत्वप्रकारेण गृहीतवृत्तिकपदजन्यतत्तदर्थोप-
स्थितित्वेनैव पदार्थोपस्थितेर्हेतुता वाच्या, तथासति तत्तद्धर्म-
प्रकारेणाकांक्षादिग्रहस्य तत्तद्धर्मप्रकारेण गृहीतवृत्तिकपदाधीनोपस्थि-
तेः परस्परसहकारेणैव फलजनकत्वोपगमेनोक्तातिप्रसङ्गवारणसम्भ-
वात् । तथाच नानानुपूर्वीप्रकारकपदज्ञानजन्योपस्थितीनामेकवि-
धशाब्दबोधे विभिन्नरूपेण हेतुतया व्यभिचार आवश्यक इति तत्कार-
णधर्मेनैव दर्शितव्यभिचारस्यापि वारणमिति ।

एतेन जन्यत्वांशे इतरान्वयबोधे स्वतन्त्रजन्यत्वोपस्थितेः
कार्यकारणभावे कार्यतावच्छेदककोटिप्रविष्टतराविषयतायां निरू-
पितत्वसम्बन्धावच्छिन्नप्रकारताभेदनिवेशनमुभयासिद्धम्, अन्यथा
औपगव इत्यादौ तद्धितार्थापत्यैकदेशे जन्यत्वे निरूपकत्वेन प्रकृत्य-

र्थान्वयानुपपत्तेः, ज्ञानज्ञाप्यत्वस्य पञ्चम्यर्थत्वमते च स्वतन्त्रज्ञानोपस्थितिजन्यतावच्छेदकज्ञानविषयतानिरूपितेतरविषयतायां विषयितासम्बन्धावच्छिन्नप्रकारताभेदनिवेशनमधिकमिति प्रत्युक्तम्। तन्निवेशेऽपि दर्शितरीत्या सामंजस्यात्। वैयाकरण इत्यादौ 'तदधीते तद्वेद'इत्यनेन विहिततद्धितार्थस्य कर्तुरेकदेशे ज्ञाने विषयतया प्रकृत्यर्थस्यान्वयोपपत्तये उक्तस्थले विषयितासम्बन्धावच्छिन्नप्रकारताभेदानवेशस्य सर्वमत एवावश्यकत्वाच्चेति।

प्रकृतमुख्यार्थपरत्वे युक्त्यन्तरमाह यद्धर्मविशिष्टश्चेति। यद्धर्मविशिष्टः पञ्चमीप्रकृत्यर्थ इत्यर्थः। तद्धर्मविशिष्टस्यैव व्याप्यत्वमुपदर्श्यत इति ज्ञानज्ञाप्यत्वस्य पञ्चम्यर्थतामते तद्धर्मविशिष्टस्यैव पञ्चम्या जनकज्ञानविषयत्वबोधनादिति भावः। अन्यथा-पञ्चम्या ज्ञानजनकत्वेन बोधितप्रकृत्यर्थे ज्ञाने विषयत्वेन विशेषणतामवलम्ब्य विषये व्याप्त्युपदर्शनसंगमने। यथार्थधूमज्ञानादित्यादिप्रयोगेपीति। तत्रापि शक्त्युपस्थितज्ञाने पञ्चम्यर्थज्ञापकतान्वयेन धूमादेर्ज्ञापकज्ञानविषयत्वलाभेन धूमादेर्व्याप्यत्वप्रदर्शनं स्यात्। अस्मन्मते तु ज्ञानज्ञाप्यत्वस्यैव पञ्चम्यर्थतया धूमज्ञानज्ञानस्यैव तत्र ज्ञापकत्वं प्रतीयते न धूमज्ञानस्येति नातिप्रसङ्ग इति। न च पञ्चम्याः केवलज्ञाप्यत्वार्थकत्वमतेऽपि उक्तस्थले ज्ञानपदस्य लक्ष्यार्थे ज्ञानविषयकज्ञाने एव तात्पर्यान्न धूमादिज्ञाने मुख्येऽप्यर्थे ज्ञापकतालाभ इति न धूमादौ व्याप्यत्वोपदर्शनप्रसङ्ग इति वाच्यम्। मुख्यार्थपरत्वे बाधकविरहे तत्तात्पर्येणापि प्रयोगसम्भवात्। न हि यत्र पदे अर्थान्तरे निरूढलक्षणा शक्त्युपस्थापितोऽर्थस्तेन न बोध्यते तद्बोधौपयिकाकांक्षादिसत्त्वे सामग्रीबलेन तद्बोधस्य दुर्वारत्वात्।

अथ तत्र शक्यार्थबोधस्यापि सम्भवेन तत्रापि कस्यचित्कदाचित्तात्पर्यसम्भवेपि तत्रानादितात्पर्यविरहान्न तत्तात्पर्येण न्यायान्तर्गतपदप्रयोगसम्भव इति चेत्। माभून्मुख्यार्थतात्पर्यकज्ञानपदघटितयथार्थधूमज्ञानादित्यादिवाक्यसमुदायस्य न्यायत्वम्, तथापि ज्ञाप्यत्वमात्रस्य पञ्चम्यर्थत्वे न्यायानन्तर्गतमुख्यार्थपरज्ञानपदघटितयथार्थधूमज्ञानादिति वाक्यस्य धूमादौ व्याप्त्याकांक्षाप्रयोजकधीजनकत्वं दुर्वारमेव तच्चानुभवविरुद्धम्। न च ज्ञानज्ञाप्यत्वे पञ्चम्या लक्षणापक्षेऽपि केवलज्ञाप्यत्वे स्वारसिकलक्षणयोपस्थिते

धूमज्ञाने ज्ञानजनकताबाधसम्भवात् उक्तातिप्रसङ्गो दुर्वारः, तत्रेष्टापत्तौ च प्रकृतपीष्टापत्तिसम्भव इति वाच्यम् । स्वारसिकलक्षणया पञ्चम्युपस्थापितविषयत्वादिरूपार्थान्तर इव तादृशज्ञाप्यत्वेऽपि प्रकृत्यर्थान्वये आकांक्षाया मयाप्यनभ्युपगमात् धूमज्ञानादित्यतो धूमज्ञानस्य ज्ञापकत्वाबाधनादिति भावः ।

यत्तु धूमज्ञानादित्यतो लक्षणयोपस्थितधूमरूपविषयविशिष्टज्ञानज्ञाने ज्ञापकताभाने ज्ञापकज्ञानविषयत्वं धूमज्ञान इव तद्विषये धूमेऽपि भासते इति प्रकृतेर्लाक्षणिकतामते तत्र धूमे व्याप्त्याकांक्षया तदुपदर्शनप्रसङ्गो दुर्वार इति आशयवर्णनम् ।

तदसत् । तथापि स्वमतेऽपि तद्दोषस्य दुर्वारत्वात्–पञ्चम्यर्थैकदेशे ज्ञाने मुख्यार्थधूमरूपविषयविशिष्टज्ञानान्वयेऽपि धूमे ज्ञापकज्ञानविषयताबाधस्य दुर्वारत्वात् । न च तथापि पञ्चमीप्रकृत्यधीनोपस्थितिविशेष्यत्वं यस्य तस्यैव व्याप्त्यादिकं प्रदर्श्यत इति नियमस्य स्वयमुपगमान्न स्वमते दर्शितातिप्रसङ्ग इति वाच्यम् । तत्र धूमादौ ज्ञापकज्ञानविषयताबाधादाकांक्षासम्भवे तादृशनियममननुरुध्य व्याप्त्याद्युपदर्शनस्यानपवादात् ।

वस्तुतो लिङ्गज्ञानं प्रकृत्यर्थे पञ्चम्यर्थेऽवाऽन्तर्भवतु, उभयथापि धूमज्ञानादित्यत्र धूमज्ञान एव साध्यज्ञापकतावच्छेदकपक्षतावच्छेदकावच्छिन्नविषयतानिरूपितप्रकारता लभ्यते सैव तस्य व्याप्तिपक्षधर्मतानिर्वाह्येति तदाकांक्षया तत्रैव व्याप्त्याद्युपदर्शनम् । ज्ञानविशेषणधूमे च तादृशविषयतावच्छेदकत्वरूपविषयतैव सा च न तद्गतव्याप्त्यादिनिर्वाह्येत्यतो न तत्र तदाकांक्षेति धूमादित्यादिप्रयोगे धूमत्वादाविव धूमज्ञानादित्यत्र धूमादौ व्याप्त्यादेर्नोपदर्शनमिति ॥

(दी०) इतरान्वितस्वार्थबोधकत्वे सति स्वीयं पदन्त्यभिन्नं पदं तदर्थविशेष्यकान्वयबोधजनकत्वे सति अन्त्यपदवत्त्वे सति स्वीयानन्त्यपदार्थविशेष्यकान्वयबोधाजनकान्यत्वे च सति वा न्यायावयवत्वं प्रतिज्ञात्वम् । प्रतिज्ञाहेत्वोरुपनयनिगमनयोश्चार्थौ परस्परमन्वितौ न तूदाहरणस्य केनापि वि-

भक्त्यन्तं पदम् तेन निगमने नातिव्याप्तिः ।

प्रकृतपक्षान्वितस्वार्थबोधकपदोपस्थापितार्थान्वितस्वार्थबोधकन्यायावयवत्वं हेतुत्वम् । निगमनवारणाय उपस्थापितान्तम् । प्रमेयत्वमभिधेयं प्रमेयत्वात् इत्यादौ प्रकृत्यर्थपक्षान्वितस्वार्थबोधकपञ्चम्यर्थान्वितो न प्रतिज्ञार्थः अपि तु तदेकदेशार्थ इति । स्वार्थविशिष्टवैशिष्ट्यबोधजनकन्यायावयवत्वं विशिष्टवैशिष्ट्यबोधजनकस्वार्थोपस्थितिजनकन्यायावयवत्वं विशिष्टबोधजनकस्वार्थविशिष्टबोधजनकन्यायावयवत्वं वा तत्त्वम् । एकवाक्यतया हेत्वर्थविशिष्टसाध्यस्य वैशिष्ट्यं भासते न पुनरवयवान्तरार्थविशिष्टस्य कस्यचिदिति ॥

(गा०) मूलोक्तलक्षणापेक्षया लघूनि प्रतिज्ञाद्यवयवलक्षणानि स्वयमाह इतरान्वितेति । प्रथमसत्यन्तस्य हेतूपनयनिगमनसाधारणस्य उदाहरणव्यावर्त्तनं स्वयमेव दर्शयिष्यते प्रतिज्ञाहेत्वोरित्यादिना । इतरान्वितत्वं स्वाभिन्नावयवार्थान्वितत्वं स्वाघटकपदोपस्थापितार्थान्वितत्वं वा । एवञ्च स्वेतरावयवसहकारेण स्वाघटकपदसहकारेण वा बोधकत्वं समुदायार्थः । तेनोदाहरणबोध्यार्थप्रविष्टसाध्यादेः प्रतिज्ञाजन्यबोधे इतरान्वितत्वेऽपि न क्षतिः । द्वितीयसत्यन्तानन्तरमग्रिमं न्यायावयवत्वमिति सम्बध्यते । द्वितीयसत्यन्तं च हेतूपनयनिगमनवारकम्, हेतुअन्येतरस्मादितरेभ्यो भिद्यत इत्यादिनिगमनजन्ये च बोधे विभक्त्यर्थस्य विशेष्यतया विवक्षणीयविभक्त्यन्तपदार्थाविशेष्यकत्वाविरहात् । वह्निव्याप्यधूमवांश्चायं तस्माद्वह्निमानित्याद्युपनयनिगमनजन्यबोधे च विभक्त्यन्तपदमध्ये अन्त्यभूतेदंपदमतुबाद्यन्तपदार्थयोरेव विशेष्यतया अन्त्यपदभिन्नस्वीयपदार्थविशेष्यकत्वविरहात् । अन्त्यत्वं च स्वघटकपदेषु चरमत्वम् उपनयादिस्थेदमादिपदानामपि न पदसामान्यमध्ये चरमत्वं तदुत्तरमप्यन्यवाक्यघटकपदसत्त्वादित्यतः स्वघटकत्वं पदविशेषणम् । एवं च निगमनघटकेषु यच्चरमं तदन्योपनयस्थेदंपदार्थविशेष्यकबोधं प्रत्युपनयसहकारेण जनके निगमने तादात्म्येन द्रव्यादिसाध्यके इदं द्रव्यं गुणकर्मान्यत्वे सति सत्त्वा-

दित्यादौ स्वघटकविभक्त्यन्तपदेषु यदन्त्यं सत्त्वादिपदं तदन्यवि-
भक्त्यन्तप्रतिज्ञास्थद्रव्यादिपदार्थविशेष्यकान्वयबोधजनके हेत्ववय-
वे चातिव्याप्तिवारणाय स्वीयत्वमभिन्नपदविशेषणम् । अत्र स्वत्व-
पुरस्कारेण लक्ष्यव्यक्तीनां निवेशादननुगम इति प्रतियोगिनि स्वत्वं
निवेश्य लक्षणान्तरमाह अन्त्यपदवत्त्वे सतीति । अत्राप्युदाहरण-
वारकं प्रथमसत्यन्तमनुषज्यते । द्वितीयसत्यन्तवैकल्पिकं सत्यन्त-
द्वयम् । धूमादित्यादिहेतौ विभक्त्यन्तान्त्यपदाप्रसिद्ध्या एकपदमात्र-
घटिततत्पदसाधारणस्यान्त्यत्वस्य निर्वचनेऽप्यन्त्याभिन्नविभक्त्यन्त-
स्वीयपदाप्रसिद्ध्या स्वपदेनान्यस्यैवोपादेयतया स्वीयानन्त्यपदार्थ-
विशेष्यकशाब्दबोधाजनकं यत्तदन्यत्वसत्त्वादतिव्याप्तिरतोऽन्त्यपद-
वत्त्वे सतीति । अन्त्यपदवत्त्वं च स्वघटकपदोत्तरपदाघटितं यत्स्वं
तदन्यत्वं न तु स्वघटकपदोत्तरपदवत्त्वम् । लक्ष्यभूतप्रतिज्ञाव्य-
क्तीनां स्वत्वेनोपादेयतयाऽननुगमतादवस्थ्यात् । अन्त्यपदवतो हेतु-
विशेषस्य उपनयनिगमनयोस्तद्धेतोः स्वीयानन्त्यपदार्थविशेष्यकबो-
धाजनकयोस्तदन्यत्वासत्त्वान्नातिव्याप्तिः । न चोपनयघटकानन्त्य-
पदार्थहेतुमदादिविशेष्यकबोधजनकतदेकदेशमतुबन्तादेर्भेदस्य तद्घ-
टितसमुदायात्मकोपनयादावसत्त्वात् तादृशबोधाजनकं स्वं
नोपनयादिकमित्यतिव्याप्तिरिति वाच्यम् । तादृशबोधजनकत्वं
यादृशसमुदायावृत्तितादृशसमुदायरूपस्वभिन्नत्वनिवेशेनानतिप्रस-
ङ्गात् । उपनयाद्येकदेशवृत्तितादृशबोधजनकताया इदमाद्यन्त-
पदघटितसमुदायात्मकोपनयावृत्तितया तदन्त्यपदसमुदायात्मको-
पनयादेस्तादृशसमुदायात्मकत्वेन तद्भिन्नत्वाभावात् । तादृश-
समुदायभिन्नत्वं च तद्भेदानुयोगितावच्छेदकावयवतावच्छेदक-
रूपवत्त्वम्, अतः समुदायघटकप्रत्येकसकलभागेषु समुदायभेदसत्त्वे-
ऽपि नातिप्रसङ्गः । इत्थमेव रीतिरवयवान्तरघटितलक्षणान्तरेऽपि
बोध्या, तस्मात् इतरेभ्यो भिद्यते इत्यादिनिगमने स्वघटकविभक्त्यन्त-
पदमध्ये यदन्त्यं धातुपदं तदर्थाख्यातार्थविशेष्यकबोधजनकतयाऽति-
व्याप्तिमन्त्याभिन्नपदस्य विभक्त्यन्तरूपताविवक्षणेन वारयति पद-
मिति । निगमन इति । निगमनपदं तस्मात्पृथिवीत्यादि निगमनवि-
शेषपरम् । अन्त्यपदशरीरे विभक्तिमत्स्वरूपपदवत्त्वनिवेशे पुनरुप-
नयनिगमनयोरेवातिव्याप्तिः स्यात् उपनयघटकायंपदनिगमनघटक-

मतुप्पदयोरन्ते तद्घटकविभक्तिसत्त्वेनान्त्यभिन्नत्वादतस्तत्र विभक्त्य-न्तपदमेव निवेश्यमिति भाव इति केचिद्व्याचक्षते।

तन्न मनोरमम्। तथाहि—स्वघटकविभक्त्यन्तपदमध्ये यदन्त्यमित्यस्य कोऽर्थः? स्वघटकविभक्त्यन्तपदप्रागभावासमानकालीनविभक्त्यन्तपदमिति चेत्। उपनयादिस्थेदमादिपदस्य विभक्तिरूपपदप्रागभावसमानकालीनतया तस्यान्त्यत्वनिर्वाहाय प्रथमं विभक्त्यन्तत्वमस्तु चरमविभक्त्यन्तत्वविशेषणमनर्थकम्। तद्धेयमेवेति चेत्। तर्हि अनन्त्यत्वं स्वीयविभक्त्यन्तपदप्रागभावसमानकालीनत्वपर्यवसितं भिन्नभिन्नत्वनिवेशस्य वैयर्थ्यात्। एवञ्च तस्माद्भिद्यत इत्यादिनिगमनस्थाख्यातपदस्यानन्त्यत्वमेव नास्ति किमनन्त्यपदे विभक्त्यन्तत्वनिवेशनेनेति।

वस्तुतस्तु तस्मान्नेतराणीत्यादौ निगमने विभक्त्यन्तेतरादिपदप्रागभावसमानकालीननञ्पदार्थविशेष्यकशाब्दबोधजनकेऽतिव्याप्तिरेव लक्षणस्थपदपदस्य विभक्त्यन्तपरतया वारिता।

अथ नञ्पदस्यापि प्रातिपदिकत्वेन विभक्त्यन्ततया विभक्त्यन्तत्वविशेषणेन दुर्वारता। न च निपातस्य विभक्तिप्रकृतित्वं न स्वीक्रियते तदर्थेन विभक्त्यर्थानन्वयात्, स्वराद्यव्ययार्थे चानुसन्धीयमानलुप्तविभक्त्यर्थान्वयेन तादृशान्वयोत्तरमेव विभक्तिस्वीकारस्यावश्यकत्वात्, नञोऽसुबन्तत्वेऽपि नञिति तत्पुरुषविधायकसूत्रसामर्थ्यादेव तेन सह समासो भविष्यतीति वाच्यम्। विभक्तेर्निपातार्थान्वितार्थाबोधकत्वेऽपि निर्विभक्तिकप्रातिपदिकस्यासाधुतया साधुत्वाय विभक्तेरावश्यकत्वात् नञोऽसुबन्तत्वेऽपि नञिति तत्पुरुषविधायकसूत्रसामर्थ्येन तेन सह पदान्तरस्य तत्पुरुषसमर्थनेऽपि बहुव्रीह्यव्ययीभावयोरनुपपत्तेश्च। सुबन्तत्वेऽपि समासाप्रविष्टप्रतियोगिपदार्थानुपरागेण नञोऽभावाबोधकतया तत्सापेक्षत्वेनासामर्थ्यान्न तेन सह द्वन्द्व इति चेत्।

सत्यम्। विभक्त्यन्तत्वमत्र शाब्दबोधौपयिकविभक्तिप्रकृतित्वम्, पर्वतो वह्निमानित्यादौ प्रतिज्ञास्थपर्वतादिपदोत्तरसुब्विभक्तेरर्थविशेषपरताविरहेऽपि अभेदान्वयबोधाद्युपयोग्याकाङ्क्षानिर्वाहकसमानविभक्तितासम्पादकत्वेन शाब्दबोधोपयोगिता न तु निपातोत्तरविभक्तेरिति नातिव्याप्तिः। अघटादिशब्देन यत्र प्रतिज्ञायां घट-

भिन्नादिरूपपक्षनिर्देशस्तत्र नञादेर्निरुक्तविभक्त्यन्ततावरहेऽपि विशेष्यीभूतविशिष्टपक्षबोधकघटादिपदस्य तादृशविभक्त्यन्तत्वाल्लक्षणसमन्वयः।

यत्तु यादृशपदोत्तरं कदाचिद्विभक्तेः श्रवणं तदेव विभक्त्यन्तपदेन विवक्षितं दध्यादिपदोत्तरं प्रथमैकवचनाश्रुतावपि द्विवचनादिश्रुतेर्दधि द्रव्यमित्यादिप्रतिज्ञासङ्ग्रह इति। तन्न। पक्षवाचकस्वरादिपदघटितप्रतिज्ञायामव्याप्तेः।

निगमनवारणायेति। इतरान्वितस्वार्थबोधकत्वमात्रनिवेशे उपनयार्थान्वितस्वार्थबोधकतया निगमनातिव्याप्तिः स्यात्तद्वारणायेत्यर्थः। यद्यपीतरान्वितस्वार्थबोधकत्वं निगमनवत्प्रतिज्ञोपनययोरपि, तथापि विशेषणतयाऽन्वितत्वनिवेशनेन तद्वारणसम्भवान्निगमनमात्रकथनम्। यद्यपि निगमनसमुदायार्थः पक्ष एवान्वेतीति साध्यान्वितस्वार्थबोधकत्वं निवेश्यापि प्रायशो निगमनवारणसम्भवः, तथापि यत्र साध्यस्य प्रमेयत्वगोत्वाभावादेरेव पक्षता तत्रत्यनिगमनेऽतिव्याप्तिवारणाय पक्षान्वितस्वार्थबोधकपदोपस्थापितार्थान्वितत्वनिवेशनम्। पक्षान्वितस्वार्थबोधकत्वं पक्षतावच्छेदकावच्छिन्नविषयतानिरूपितस्वार्थविषयताप्रयोजकत्वम्, यथाश्रुते उपनयस्थपक्षवाचकेदंपदस्य वस्तुगत्याऽभेदेन पक्षसंसृष्टो यः पक्षस्तद्बोधकत्वेन पाषाणमयः पर्वत इत्यादिवाक्यात्पाषाणमयत्वादिरूपेण पक्षतावच्छेदकावच्छिन्नसंसृष्टतया प्रतीयमानो यः पक्षतावच्छेदकावच्छिन्नस्तद्बोधकत्वेन च तदुपस्थापितार्थान्वितस्वार्थबोधके निगमनेऽतिव्याप्तेरवारणात्। तादृशपदोपस्थापितार्थान्वितस्वार्थबोधकत्वं च तादृशपदप्रयोज्यविषयतानिरूपितस्वप्रयोज्यास्वार्थविषयताकत्वम्, यथाश्रुते निगमनार्थान्वयिन एव पक्षतावच्छेदकावच्छिन्नस्य पर्वतो नीलपर्वत इत्यादिवाक्यस्थपक्षतावच्छेदकावच्छिन्नविषयतानिरूपितविषयताप्रयोजकपर्वतपदोपस्थाप्यत्वेन निगमनातिव्याप्तेर्दुर्वारत्वात्। पक्षतावच्छेदकावच्छिन्नविषयतानिरूपिता या विषयता तन्निरूपितविषयताप्रयोजकत्वं फलितार्थः। पक्षतावच्छेदकावच्छिन्नत्वानिवेशे व्याप्यवत्वावच्छिन्ना या पक्षविषयता तन्निरूपितोपनयस्थेदम्पदप्रयोज्यविषयतानिरूपितविषयताप्रयोजकत्वमादाय निगमन एवातिव्याप्तिः स्यादिति तन्निवेशः।

अथ तन्निवेशेऽपि पक्षतावच्छेदकावच्छिन्ना या उपनयस्थेदंपदप्रयोज्यविषयता तन्निरूपितनिगमनार्थविषयतानिरूपितोपनयार्थविषयतैवेत्युपनयेऽतिव्याप्तिः । न च चरमविषयताप्रकारत्वरूपा विवक्षणीया अतो नायमतिप्रसङ्ग इति वाच्यम् । एवंसति प्रमेयत्वममिधेयं प्रमेयत्वादित्यत्र पक्षान्वितपञ्चम्यर्थे विशेष्यतयाऽन्वितसाध्यरूपार्थमादाय प्रतिज्ञातिप्रसङ्गाप्रसक्तेः प्रमेयत्वमभिधेयमित्याद्यग्रिमग्रन्थानुत्थितेः । एवं प्रमेयत्वमभिधेयं प्रमेयत्वादित्यत्र प्रतिज्ञातिव्याप्तेरेकदेशार्थविषयताव्यावृत्तस्वार्थविषयतानिवेशेन वारणेऽपि तत्रत्यनिगमनेऽभिधेयत्वव्याप्यप्रमेयत्ववांश्चायमित्युपनयार्थप्रमेयत्वस्वरूपपक्षतावच्छेदकरूपहेतुतावच्छेदकावच्छिन्नान्विततादृशपक्षतावच्छेदकावच्छिन्ने स्वार्थान्वयबोधजनकेऽतिप्रसङ्गो दुर्वारः । पक्षतावच्छेदकावच्छिन्नेत्यत्र विशेषणतयान्वितत्वनिवेशे प्रमेयत्वमित्याद्यग्रिमग्रन्थानुत्थितेः पञ्चम्यर्थहेतुत्वस्य विशेष्यतयैव पक्षान्वयित्वेन प्रतिज्ञातिव्याप्त्यप्रसक्तेः, विशेषणतया किञ्चिदन्वितत्वनिवेशेनैवोपपत्तेः प्रकृतपक्षनिवेशवैयर्थ्यापाताच्च । निगमनार्थस्य विशेषणतया किञ्चिदन्वितेऽनन्वयेन तत्रातिव्याप्तेस्तमनिवेश्यापि वारणसंभवात् ।

मैवम् । शुद्धपक्षतावच्छेदकावच्छिन्नान्वितत्वं निवेश्य दर्शितातिप्रसङ्गद्वयवारणसम्भवात्, उपनयार्थव्याप्तिविशिष्टपक्षान्वयिनो निगमनार्थस्य शुद्धपक्षतावच्छेदकावच्छिन्नानन्वयित्वेन तदन्वितार्थकेऽप्युपनये शुद्धपक्षतावच्छेदकावच्छिन्नान्वितार्थकपदोपस्थापितार्थकत्वविरहात् । प्रमेयत्वमभिधेयं प्रमेयत्वादित्यत्र व्याप्तिविशिष्टप्रमेयत्वरूपपक्षतावच्छेदकावच्छिन्न एव इदमर्थान्वयेन तदन्वितार्थकेऽपि निगमने निरुक्तरूपविरहात् ।

एतेन पक्षसाध्ययोरभेदस्थले निगमनार्थघटकसाध्यरूपपक्षान्वितेदम्पदार्थान्वितार्थकतया निगमनातिव्याप्तेरपि नावकाशः ।

यत्तु एकविशेषणतापन्नस्य यत्रापरविशेष्यता तत्र विशेष्यत्वविशेषणत्वरूपविषयतयोर्भेदेन पक्षविषयतानिरूपितविषयतानिरूपितस्वार्थविषयतानिवेशे हेतुमात्र एव लक्षणानुपपत्तिः एवं चोक्तरीत्या उपनयातिव्याप्तेर्नावकाशः पक्षविषयतानिरूपितनिगमनार्थनिष्ठप्रकारतारूपविषयतया पक्षविषयतानिरूपकतन्निष्ठविषयताया अभेदेनावच्छेद्या-

वच्छेदकभावविरहात्। एवंक्रमेण पक्षसाध्ययोरभेदस्थले निगमनातिव्याप्तेरनवकाशः। एवं हेतुपक्षयोरभेदस्थले निगमनातिव्याप्तिरपि समाहिता हेतुप्रकारतानिरूपिताया निगमनार्थप्रकारतानिरूपितायाश्चेदमर्थनिष्ठविशेष्यतारूपविषयतायाश्चाभेदेनावच्छेद्यावच्छेदकभावविरहादिति।

तच्च। एकविशेषणतापन्नस्य यत्रापरविशेष्यता तत्र विशेष्यताप्रकारतयोरभेदे बाधकविरहेण लाघवेन तस्यैवोपगमात्, नत्ववच्छेद्यावच्छेदकभावापन्नविषयताद्वयस्य। यदि चैकविशेषणतापन्नस्यापरविशेष्यतास्थले प्रकारताविशेष्यतयोरभेदे दण्डी पुरुषवानित्यादिबुद्धेः पुरुषादिनिष्ठप्रकारतानिरूपितदण्डादिविशेष्यताशालित्वं दुर्वारमिति तस्याः पुरुषीयो न वा दण्ड इत्यादिसंशयविरोधिताप्रसङ्ग इति तद्भेदः समूहालम्बनवैलक्षण्याय तयोरवच्छेद्यावच्छेदकभाव एव च स्वीक्रियत इति मन्यते, तदा हेतुपक्षयोरभेदस्थले निगमनार्थधर्मितावच्छेदकताकहेतुप्रकारतानिरूपिताया निगमनार्थप्रकारतानिरूपितायाश्च विशिष्टहेत्ववच्छिन्ना या इदंपदार्थपक्षविशेष्यताया ऐक्ये हेतोर्हेतुधर्मितावच्छेदकतापत्तिरिति अवच्छेद्यावच्छेदकभावापन्नविषयताद्वयस्य स्वीकरणीयतया तत्रत्यनिगमनातिव्याप्तेर्दुर्वारत्वात्। स्वार्थैकदेशस्यापि स्वार्थत्वाभिमानमूलां प्रतिज्ञाविशेषातिव्याप्तिशङ्कां स्वार्थपदस्य स्वप्रतिपाद्यत्वपर्याप्त्यधिकरणविशिष्टार्थपरतां स्फुटयन्निराकरोति प्रमेयत्वमिति। न प्रतिज्ञार्थः-साध्यविशिष्टपक्षरूपः। एकदेशार्थः-साध्यमात्रम्। यद्यपि प्रमेयत्वमभिधेयं प्रमेयत्वादित्यादिन्यायान्तर्गतनिगमने हेतुभूतपक्षान्वितस्वार्थबोधकेदम्पदोपस्थापितपक्षान्वितस्वार्थबोधकत्वमक्षतमिति विशेषणतया पक्षान्वितत्वं विवक्षणीयमिति कथितस्थले पञ्चम्यर्थः पक्षे न विशेषणमित्यतोऽपि नोक्तप्रतिज्ञायामतिव्याप्तिसम्भवः, तथापि निगमनार्थैकदेशस्य ज्ञाप्यत्वान्तभागस्य तादृशार्थान्विततया निगमनेऽतिप्रसङ्गवारणाय स्वार्थपदस्य स्वप्रतिपाद्यविशिष्टार्थपरताया आवश्यकत्वात्। कथितस्थले पञ्चम्यर्थान्वितस्वार्थबोधकत्वाभावेनापि अतिव्याप्तिवारणासम्भवात्तत्कथनम्। केवलेन हेतुवाक्येन पञ्चम्यर्थविशेष्यकावान्तरवाक्यार्थबोधो जन्यते ततश्च प्रतिज्ञास्थवह्न्यादिपदसहकारेण

धूमज्ञानज्ञाप्यो वह्निरित्याकारकस्वार्थविशिष्टबोधो जन्यते ततः समुदितप्रतिज्ञासहकारेण पक्षे स्वार्थविशिष्टसाध्यवैशिष्ट्यबोधश्च प्रत्येकमेतादृशबोधत्रयजनकताघटितलक्षणत्रयमाह स्वार्थेति । प्रथमलक्षणं तृतीबोधघटितम् द्वितीयं प्रथमबोधघटितम् तृतीयं च द्वितीयबोधघटितं बोध्यम् । विशिष्टवैशिष्ट्येति । स्वतात्पर्यविषयबोधीयविशेषणतावच्छेदकस्वार्थबोधजनकन्यायावयवत्वमित्यर्थः । तेन निगमनार्थान्वितोपनयार्थबोधस्यापि निगमनार्थैकदेशविशिष्टवैशिष्ट्यबोधतया निगमनार्थबोधस्य तज्जनकत्वेन यथाश्रुतलक्षणस्य निगमनेऽतिव्याप्तिरिति दूषणं प्रत्युक्तम् । विशेषणतावच्छेदकतया अव्यावर्त्तकत्वात्स्वतात्पर्यविषयबोधीयत्वं तद्विशेषणम् । विशिष्टबोधेति । स्वतात्पर्यविषयबोधजनकतावच्छेदकस्वार्थप्रकारताशालिबोधजनकन्यायावयवत्वमित्यर्थः । तेन निगमनार्थविशिष्टोपनयार्थज्ञानस्य निगमनार्थविषयकत्वेन तादृशज्ञानस्वरूपयोग्यत्वेऽपि न निगमनेऽतिव्याप्तिः । लक्षणत्रयमेव हेतौ सङ्गमयन्नवयवान्तराद्व्यावर्तयति एकवाक्यतयेत्यादिना ॥

(दी०) इतरान्वितस्वार्थबोधकन्यायावयवत्वमुदाहरणत्वम्, अन्वयव्याप्तिबोधकत्वं व्यतिरेकव्याप्तिबोधकत्वञ्च विशेषलक्षणद्वयम् ।

इतरोपस्थापितार्थविशेषणकस्वार्थबोधकन्यायावयवत्वं स्वार्थविशेष्यकेतरार्थान्वयबोधजनकन्यायावयवत्वं वोपनयत्वम् ।

अवयवार्थविशेष्यकस्वार्थबोधजनकन्यायावयवत्वं निगमनत्वम् । हेत्वर्थश्च प्रतिज्ञार्थे न विशेषणत्वेनान्वेति किन्तु तदेकदेशार्थ इत्युक्तप्रायम् ॥

इत्यवयवदीधितिः ॥

—:०:—

(गा०) इतरोपस्थापितेति । स्वाघटकपदोपस्थापितेत्यर्थः । स्वार्थत्वं स्वस्वजन्यप्रतिपत्तिविशेष्यत्वम्, अतो निगमनजन्यप्रतिपत्तिविशेष्ये मतुबाद्यर्थे तदघटकपदोपस्थापितसाध्यविशेषणकबोधजनकस्य

निगमनस्य वारणाय उपस्थापितान्तम् । अत्र प्रथमलक्षणे इतरार्थप्रकारकस्वार्थविषयताकत्वेन द्वितीये च स्वार्थांशेतरप्रकारकत्वेन बोधस्य निवेशाद्भेदः ॥

अवयवार्थेति । अवयवजन्यप्रतिपत्तिविशेष्यविशेष्यकस्वार्थप्रकारकबोधजनकावयवत्वमर्थः । सर्वेषामेवावयवानां स्वार्थघटकविशेष्यांशे स्वार्थघटकार्थान्तरप्रकारकबोधजनकतयाऽतिव्याप्तिवारणाय स्वार्थप्रकारकेति । प्रतिज्ञार्थघटकसाध्यरूपविशेषणे हेत्वर्थस्यान्वयेऽपि विशेष्ये पक्षे तदनन्वयात् प्रतिज्ञायां नोपनयलक्षणातिव्याप्तिर्न वा हेतौ निगमनलक्षणातिव्याप्तिः उपनयनलक्षणे स्वार्थपदस्य निगमनलक्षणे चावयवार्थपदस्य विशेष्यपरत्वादित्याह हेत्वर्थश्चेत्यादिना । उक्तप्रायमिति । पूर्वं हेत्वर्थैकदेशपञ्चम्यर्थ एकदेशार्थमात्रान्वयित्वमुक्तम् अत्र च हेतुसमुदायार्थस्य तथात्वमिति विशेषात्प्रायमिति ।

(चि०) केचित्तु सामान्यवत्त्वे सति बाह्यकरणप्रत्यक्षत्वादित्यपार्थकम् विभक्त्युपस्थापितहेतुत्वेन सामान्यवत्त्वस्य विभक्त्यन्तरावरुद्धस्यानन्वयादिति केचित् । तन्न । सतिसप्तमीबलात् सामान्यवत्त्वस्य बाह्यकरणप्रत्यक्षत्वस्य च सामानाधिकरण्योपस्थितौ विशिष्टे हेतुत्वान्वयात् तथैव व्युत्पत्तेः न ह्ययमर्थोऽस्मान्नावगम्यते ।

हेतावुक्ते कथमस्य गमकत्वमित्याकाङ्क्षायां व्याप्तिपक्षधर्मतयोः प्रदर्शनप्राप्तौ व्याप्तेः प्राथम्यात् तत्प्रदर्शनायोदाहरणम् । तत्रानुमितिहेतुलिङ्गपरामर्शवाक्यजन्यज्ञानजनकव्याप्यत्वाभिमतवन्निष्ठनियतत्वाभिमतसम्बन्धबोधजनकशब्दत्वमुदाहरणत्वम् । सामान्यलक्षणे साध्यसाधनसम्बन्धबोधकत्वं साध्यसाधनाभावसम्बन्धबोधकत्वञ्च विशेषलक्षणद्वयम् । 'न्या·

यावयवदृष्टान्तवचनमुदाहरण'मिति तु न–दृष्टान्तप्रयोगस्य सामयिकत्वेनासार्व्वत्रिकत्वात्, यो यो धूमवान् सोऽग्निमानित्येव व्याप्तिप्रतीतेः। नापि प्रकृतानुमितिहेतुलिङ्गपरामर्शपरवाक्यजन्यज्ञानाविषयव्याप्त्युपनायकं वचनं तत्,–उपनयातिव्याप्तेः। अत उपनयाभिधानप्रयोजकजिज्ञासाजनकवाक्यमुदाहरणम्। एतदेवान्वयव्यतिरेकिव्याप्तिविषयत्वविशेषितं विशेलक्षणद्वयमित्यन्ये। अत्र च व्यभिचारवारणाय वीप्सामाहुः। यत्र च सामानाधिकरण्यादेव व्याप्तिस्तत्र न वीप्सा, केवलान्वयिन्यभेदानुमाने च वीप्सायामपि व्यभिचारतादवस्थ्यमिति तु वयम्। वीप्सा च यत्पदे न तत्पदेऽपि विरुद्धरूपोपस्थितयोरपि तत्पदेन परामर्शाद्बुद्धिस्थवाचकत्वादिति न व्युत्पत्तिविरोधः, यथा यद्यत् पापं प्रतिजहीत्यत्र। इदञ्च साध्यसाधनोभयाश्रयाविकलानुपदर्शितान्वयं विपरीतोपदर्शितान्वयानुपदर्शितव्यतिरेकविपरीतोपदर्शितव्यतिरेकभेदादाभासरूपमिति।

उदाहरणानन्तरम्भवतु व्याप्तिस्तथापि व्याप्तं किं पक्षे वर्त्तते न वेत्याकाङ्क्षायां व्याप्तस्य पक्षधर्मत्वप्रदर्शनायोपनयः। तत्रानुमितिकारणतृतीयलिङ्गपरामर्शजनकावयवत्वमुपनयत्वमिति सामान्यलक्षणम्। साध्यव्याप्यविशिष्टपक्षबोधकावयवत्वं साध्याभावव्यापकाभावप्रतियोगिमत्पक्षबोधकावयवत्वञ्च विशेषलक्षणद्वयम्। उदाहरणान्त एव प्रयोग इति न वाच्यम्। तृतीयलिङ्गपरामर्शस्य व्याप्तपक्षधर्मतावगाहिनोऽवय-

वान्तरादलाभात्, तदनभ्युपगमेऽपि पक्षधर्मताया अलाभात्। न च हेतुवचनादेव तदवगमः तस्य को हेतुरित्याकाङ्क्षायां प्रवृत्तत्वेन हेतुस्वरूपोपस्थापकस्यातत्परत्वात्। वादिवाक्यादेवाक्षेप इति चेन्न। तदर्थस्यासिद्धत्वेनानाक्षेपकत्वात्,अन्यथा प्रतिज्ञामात्रादेव सर्वाक्षेपेऽवयवान्तरविलयात्। प्रतिपाद्यानां स्वत एव तदवगम इति चेन्न। तेषां व्युत्पन्नाव्युत्पन्नतया सर्वत्र तदसम्भवात् प्रतिपादकेन स्वव्यापारस्य निर्वाहयितुमुचितत्वाच्च, अन्यथावयवान्तरेऽप्येवंप्रसङ्गात्।

उपनयानन्तरं निगमनम्, तच्चानुमितिहेतुलिङ्गपरामर्शप्रयोजकशाब्दज्ञानकारणव्याप्तिपक्षताधीप्रयुक्तसाध्यधीजनकं वाक्यम्। न च व्याप्तिपक्षधर्मतायाश्चतुर्भिरेवावयवैः पर्याप्तेः किं तेनेति वाच्यम्। अबाधितासत्प्रतिपक्षत्वयोरलाभे चतुर्णामप्यपर्यवसानात्।

अथाभिधानाभिधेययोर्व्याप्तिपक्षधर्मतावल्लिङ्गप्रतिपादनादेव पर्यवसानेनावयवान्तराणां निराकाङ्क्षत्वं विपरीतशङ्कानिवृत्तेरपि तत एव लाभात्, अन्यथा निगमनेनापि तदवारणात् न हि तद्विशेषदर्शनमनाहत्यैव तन्निवर्त्तकम्। सिद्धनिर्देशतया वारयतीति चेत्। न स्वरूपमात्राभिधानात्। साध्यत्वानुपस्थितौ तस्मादिति हेतुविभक्त्यनन्वयप्रसङ्गाच्चेति चेन्न। व्याप्तिपक्षधर्मताज्ञानेऽपि बाधसत्प्रतिपक्षबुद्धेः साध्यज्ञानानुत्पत्तिदर्शनात् तदभावाबोधने समीहितानिर्वाहात्।

अथ बाधादिविरहस्य प्रयोजकत्वं न तु तद्बोधस्य

मानाभावादसिद्धेश्च इति किमर्थं बाधादिविरहो बोधनीय इति चेन्न। यदवगमे सति यन्न भवति तत्तदभावज्ञानसाध्यमिति व्याप्तेः। न चानन्वयः, तस्मादित्यन्वयबलादेव हेत्वनाकाङ्क्षितत्वलक्षणासिद्धत्वज्ञानात् न त्वन्वयात् पूर्व्वम्।

इह केचित्–यथा तस्मादिति सर्व्वनाम्ना हेतोः परामर्शः पूर्व्वोक्ताशेषरूपलाभाय तथा साध्यांशस्यापि तथा इति सर्वनाम्ना सिद्धस्थल इव विरोधादिवारणाय युक्त इत्याहुः। तन्न। तथेति स्वरूपे प्रकारे सादृश्ये वा? आद्ये तथा चायमिति प्रक्रान्तात् तथेति हेतुमानित्यर्थः स्यात्, तथा चानन्वयः न हि हेतुमत्त्वादेव हेतुमत्त्वमित्यन्वितम्। न द्वितीयः सामान्येन पक्षस्यापि अन्वय व्याप्तौ प्रवेशात् तत्प्रकारान्वयस्तत्रैवेत्यनन्वयात्। अत एव न तृतीयोऽपि अभेदानुमाने चान्वयिनि तस्मात्तथेति सादृश्याभावात्, बहूनाञ्च प्रक्रमे विशेष्यानन्वयात्, वादिवाक्ये च योग्यतान्वयेऽतिप्रसङ्गात् तस्मादित्यत्र विभक्त्यर्थानन्वयादेव नियमः। तस्मादनित्य इत्यभिधाने विशिष्य सिद्धतावगम्यते पूर्व्वं साध्यतयोक्तस्य समर्थहेतुसम्बन्धेन पुनरुत्कीर्त्तनात्, अन्यथा तद्वैयर्थ्यात्। संशयप्रयोजनादयस्त्ववयवलक्षणाभावादेव नावयवाः, किन्तु न्यायाङ्गतयोपयुज्यन्त इति नाधिक्यम्, कण्टकोद्धारस्य च न सार्वत्रिकत्वं समयविशेषोपयोगित्वादिति॥

इत्यवयवचिन्तामणिः।

शब्दो अनित्यः सामान्यवत्त्वे सति बाह्यकरणप्रत्यक्षत्वादिति हेतुप्रयोगे हेतुघटकदलयोः प्रत्येकं व्यभिचारितया भेदेन नामार्थयोस्तयोरेकांशेऽपरस्य विशेषणतयाऽनन्वयेन च विशिष्टहेतुत्वान्वयासम्भवेन विशेषणविशेष्यभावानापन्नयोर्मिलितयोर्हेतुत्वान्वयो वाच्यः । सोऽपि न सम्भवति सामान्यवत्त्वादेः। सप्तम्यन्तपदोपस्थाप्यहेतुत्वार्थकपञ्चमीप्रकृत्यर्थत्वाभावादिति केषांचित्पूर्वपक्षं समाधातुमुपन्यस्यति मूले हेतुग्रन्थे सामान्यवत्त्व इति । सामान्यवत्त्वस्य बाह्यकरणप्रत्यक्षत्वे विशेषणत्वासम्भवेऽपि सप्तम्यन्तार्थस्य सामान्यवत्त्वसामानाधिकरण्यस्य तत्र विशेषणतया तादृशविशेषणावच्छिन्नबाह्यकरणप्रत्यक्षत्वे हेतुत्वान्वयसम्भवान्नापार्थकतेत्याह तन्नेति । सामान्यवत्त्वस्येति । सामान्यवत्त्वस्य बाह्यकरणप्रत्यक्षत्वविशेषणीभवत्सामानाधिकरण्यप्रतियोगितयोपस्थितावित्यर्थः।

अथ समानाधिकरण्ये सप्तम्या अननुशासनात्कथमेतत् सतीत्यस्य ा कोऽर्थ इति चेन्न। 'यस्य च भावे न भावलक्षण'मिति सूत्रानुशिष्टसप्तम्या गोषु दुह्यमानासु गत इत्यादौ यथा गोदोहनादिसमानकालीनत्वं गमनादौ बोध्यते तथा प्रकृतेऽपि समानदेशत्वप्रत्यायनात् । न च तादृशसप्तम्या क्रियासमानकालीनत्ववत् क्रियासमानदेशत्वस्य कदाचित्क्रियायां प्रत्यायनसम्भवः यस्य क्रियया अन्यस्य क्रिया लक्ष्यते विशेष्यते तद्वाचकपदसमभिव्याहृतकृदन्तोपस्थापितक्रियासमानकालीनत्वादिसम्बन्धेन क्रियान्तरविशेषणमिति यावत् तद्वाचकपदात्सप्तमीत्यर्थकत्वात्तादृशसूत्रस्य क्रियासमानकालीनत्वादौ क्रियान्तरविशेषणतया विवक्षिते तादृशसूत्रेण सप्तमीविधानात् । सप्तमीप्रकृत्यर्थनिरूपितसामानाधिकरण्यादेरपरनामार्थविशेषणतया विवक्षणे 'सप्तम्यननुशासनात्सामान्यवत्त्वसामानाधिकरण्यस्य प्रत्यक्षत्वे कुतो लाभ इति वाच्यम्। यथा गोषु दुह्यमानास्वागत इत्यादौ गोपदोत्तरसप्तम्याः समभिव्याहृतक्रियागोदोहनरूपोऽर्थः, तत्र समभिव्याहृतकृदन्तार्थान्वितप्रकृत्यर्थस्य कर्मतानिरूपकत्वसम्बन्धेनान्वयः तस्याश्च समानकालीनत्वसम्बन्धेन क्रियान्तरेऽन्वय इति तत्र दुह्यमानगोकर्मकदोहनसमानकालीनत्वलाभस्तथा प्रकृतेऽपि । अत्रापि शतृप्रकृतेः असुधातोराधारत्वमर्थः अत्रास्ति घट इत्यादौ एतद्देशनिष्ठाधारताप्रतियोगी घट इत्यादिप्रतीतेः तत्र च सप्तम्यर्थसमभि·

त्याहृताधारत्वरूपक्रियायां सामान्यवत्त्वस्य प्रकृत्यर्थस्य प्रतियोगितासम्बन्धेनान्वयः आधारतायाः प्रत्यक्षत्वे समानदेशत्वसम्बन्धेनान्वय इति प्रत्यक्षत्वे सामान्यवत्त्वसामानाधिकरण्यलाभसम्भवात् । भावलक्षणामिति भावशब्दस्य धर्ममात्रपरत्वात् प्रत्यक्षत्वस्य क्रियात्वविरहेऽपि क्षतिविरहात् । सत इत्यस्याध्याहारेण वा प्रत्यक्षत्वसत्त्वे सामान्यवत्त्वसत्त्वस्य समानदेशतालाभेन सामञ्जस्यात् । कुत्रचित्समानकालीनत्वं क्रियायाः सम्बन्धः कुत्रचित्समानदेशत्वमित्यत्र किं नियामकमिति चेत् । यत्रसमभिव्याहृतकृत्यप्रत्ययस्य वर्त्तमानत्वे तात्पर्यं तत्र समानकालीनत्वं यत्र च न तद्विवक्षणं तत्र समानदेशत्वं सम्बन्ध इति नियमात् । प्रकृते च वर्त्तमानत्वविवक्षया समानदेशत्वलाभात् वर्तमानत्वाविवक्षायामपि विरोधिकालाविवक्षया लटः साधुत्वात् । यत्र चातीतत्वमनागतत्वं वा कृता विवक्षितं दुग्धासु दोग्धव्यास्वित्यादौ तत्रोत्तरत्वं पूर्ववत्त्वम्, पूर्ववत्त्वं च सम्बन्ध इति दोहनोत्तरत्वादिकमेव प्रतीयते न तु समानकालीनत्वमित्यवधेयम् ।

ननु उदाहरणे यत्पदद्विरुक्तिप्रयोजिकायाः महानसमहानसान्यत्वादिना वक्तुर्यावत्साधनाधिकरणप्रत्यायनेच्छारूपवीप्सायाः किं प्रयोजनम्, न हि साधनस्य यावदधिकरणे साध्यवत्त्वज्ञानमनुमितिहेतुः येन यत्पदे वीप्सां विना यावत्धूमाधिकरणानुपस्थापने तत्पदेन तावदधिकरणानां परामर्शासम्भवात्सकलसाधनाधिकरणे साध्यवत्त्वाप्रतीतेरनुमित्यनिर्वाहः स्यादिति यत्तत्पदात्तावदधिकरणबोधो वीप्साप्रयोजनं भवेत् । न च व्याप्तिप्रत्यायनेच्छा वीप्सा तस्याश्चानुमित्यौपयिकबोध एव प्रयोजनमिति वाच्यम् । व्याप्तेश्च पदार्थत्ववाक्यार्थत्वविरहेण तत्प्रत्यायनेच्छायामपि शाब्दतत्प्रत्ययस्यायोगात् मानसबोधे च वक्त्रभिप्रायानुपयोगात् । यदि च यत्पदसमभिव्याहृततद्वह्न्यादिपदस्य धूमज्ञापकताविशिष्टवन्ह्यादिलाक्षणिकतया धूमादौ वह्निव्याप्तिलाभ इत्युच्यते तदा यत्पदस्य द्विरुक्तिं विनापि तल्लाभसम्भवाद्द्विरुक्तिवैयर्थ्यमित्याक्षेपे प्राचीनसमाधानमुपन्यस्यति अत्र चेति । उदाहरणस्थयत्पदे चेत्यर्थः । व्यभिचारवारणयेति । वीप्सामुद्दिश्य मानसव्याप्तिज्ञानाविरोधिव्यभिचारधीवारणप्रयोजनिकामाहुरित्यर्थः । यावद्धेत्वधिकरणे साध्यवत्त्वनिश्चये ते-

न विपरीतनिश्चयात्मकेन साधनाधिकरणे साध्याभाववत्त्वरूपव्यभिचारग्रहस्य प्रतिबन्ध इति भावः ।

नन्वेवं वाच्यत्वादिसाध्यस्य यत्रोपायान्तरात्केवलान्वयित्वं गृहीतमयमेतदभिन्नः एतद्वृत्तियावद्धर्मवत्त्वादित्यत्र च हेतावेकमात्रवृत्तित्वं गृहीतं तत्र हेतौ साध्यसामानाधिकरण्यग्रहादेव मानसी व्याप्तिधीः सम्भवति प्रथमेऽभावे साध्यीयत्वाग्रहेण द्वितीये साध्याभाववत्तया गृह्यमाणेऽधिकरणान्तरे हेतोरग्रहेण व्यभिचारग्रहासम्भवादित्युभयसिद्धव्याप्तिकासाधकतानुमाने यथा उदाहरणं न प्रयुज्यते तथात्र सामानाधिकरण्यलाभायोदाहरणप्रयोगेऽपि द्विर्यत्पदं न प्रयुज्यतेत्यत्रेष्टापत्तिमाह यत्र चेति । सर्वत्रैव द्विरुक्तिरनपेक्षितेति स्वमतमाह वीप्सायामपीति । अयमाशयः । द्विर्यत्प्रयोगेऽपि सकलसाधनाधिकरणपरत्वाग्रहे व्यभिचारतादवस्थ्यं व्यभिचारधियोऽनिवृत्तिः तत्परत्वग्रहापेक्षायां च यद्योगप्राथम्याभ्यां साधननिष्ठव्याप्तितात्पर्यमेव गृह्यतां तत एव च लक्षणया व्याप्तिशाब्दबोधसम्भवात् तत्र च व्यभिचारशङ्काया अविरोधित्वात् । यावत्साधनवति साध्यवत्त्वबोधाय द्विर्वचनमनर्थकमेव अत एव यन्नैवं तन्नैवमिति प्राचामुदाहरणोपदर्शनमपि सङ्गच्छते । आवश्यकश्च व्याप्तेः शाब्दबोधोऽन्यथा समानप्रकारतामपुरस्कृत्य विपरीतधियो विरोधितायाः दुःकल्प्यतया महानसत्वादिना सकलधूमाधिकरणे साध्यवत्त्वबोधेऽपि धूमवत्त्वप्रकारेण तत्रैव साध्याभावशंकाया अनुच्छेदेन मानसव्याप्तिग्रहासम्भवात् । एवमद्विरुक्तेनापि यत्पदेन एकरूपेण विभिन्नरूपेण वा सकलधूमाधिकरणोपस्थितिसम्भवात्तदर्थकतया द्विरुक्तिसार्थक्यमित्यपि दुर्वचम् । न च सकृदुच्चरितेत्यादिव्युत्पत्तिविरोधादेकस्माद्यत्पदान्नानेकाधिकरणबोधः संभवतीति वाच्यम् । सकृदुच्चरितस्य नानाशक्त्या बोधकतायामेवाव्युत्पत्तेः सर्वनाम्नां च बुद्धिस्थतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नत्वेन नानाधर्मिणामनुगमात् नानार्थेषु शक्तेरैक्येन व्युत्पत्तेरविरोधात्, अन्यथा द्विरुक्तिस्थले एकस्यैव पदद्वयरूपादेशस्थानितया पदभेदविरहेण द्विरुक्तादपि नानार्थबोधानुपपत्तेः कथंचिदर्थद्वयबोधकत्वनिर्वाहेऽपि भूयोऽर्थबोधस्य निर्वाहयितुमशक्यत्वाच्चेति ।

अथ द्विरुक्तस्थल एव व्याप्तौ निरूढलक्षणा अत एव यत्पदप्रयोगेऽपि वादिवाक्ये स्वारसिकलक्षणाविरहेण व्याप्तिबोधनिर्वाहः। वस्तुतो व्याप्तिगोचरशाब्दबोधानुरोधेन चेदुदाहरणप्रयोगस्तदा उपनयवद्व्याप्यपदेनैवोदाहरणेऽपि व्याप्तिबोधनं युज्यते इति सकलधूमाधिकरणे साध्यवत्त्वबोधनाय यो धूमवानित्युदाहरणम्। इत्थं च यत्पदस्य सकलधूमाधिकरणपरताया आवश्यकतया अद्विरुक्तयत्पदस्य तत्पदत्वानियमेन तत्परत्वग्रहार्थं द्विरुक्तेरावश्यकत्वात्। एवं 'नित्यवीप्सयो'रिति सूत्रेण द्विरुक्तिविधानस्य नित्यतया सकलधूमाद्यधिकरणपरत्वे यत्पदस्याद्विरुक्तस्य साधुत्वमेव न स्यादित्यतो द्विरुक्तेरावश्यकतेत्याशयेन यत्पदे द्विरुक्तिमभिप्रेत्य तत्पदे द्विरुक्तिं खण्डयति वीप्सा चेति। द्विरुक्तिनियमोऽपि कदाचित्पदे एव न तु तत्पदेपीत्यर्थः। सर्वत्रैव तत्पदे न द्विरुक्तिरिति नार्थः। विवर्णभावं स स भूमिपाल इत्यादौ छन्दोनुरोधादिना द्विरुक्तिदर्शनात्। न्याये तु प्रयुज्यमाने आधिक्यस्य न्यायेऽन्याय्यतया न तत्र द्विरुक्तिः। सकलधर्मिप्रत्यायनेच्छारूपवीप्सासत्त्वेऽपि अद्विरुक्ततत्पदस्य साधुतासम्भवः महाकविप्रयोगदर्शनादेतदपि स्पष्टयितुं भवभूतिनाद्यास्तथा प्रयोगो दर्शयिष्यते। द्विरुक्तयत्पदबोधितनानाधर्मिणामेकेन तत्पदेन परामर्शायोग इत्याशंकां निरस्यति विरूपेति। महानसमहानसान्यत्वादिना विभिन्नप्रकारेणेत्यर्थः। तत्पदेन परामर्शात् तत्पदेन परामर्शसम्भवात्। तत्पदस्य परामर्शकतायां व्युत्पत्तिविरोधे द्विरुक्तयत्पदेनापि तावद्धर्मिबोधासम्भवात्। व्युत्पत्तिविरोध एव च कथमित्याकांक्षायामाह बुद्धिस्थवाचकत्वादिति। बुद्धिप्रकारविशिष्टसर्वेषु एकशक्तेरित्यर्थः। व्युत्पत्त्यविरोधं दृष्टान्तेन दृढयति यथेति ॥

इति श्रीगदाधरभट्टाचार्यचक्रवर्तिविरचितगादाधर्यामवयवप्रकरणम् ॥

श्रीगणेशाय नमः

अथानुमानगादाधर्याम्

सामान्यनिरुक्तिप्रकरणम् ।

(चि०) अथ हेत्वाभासास्तत्त्वनिर्णयविजयप्रयोजकत्वान्निरूप्यन्ते ।

(दी०) एतावता प्रबन्धेन सपरिकरं हेतुं निरूप्य तत्प्रसङ्गात् तत्त्वनिर्णयादिरूपतत्कार्य्यकारित्वाच्च तदाभासनिरूपणं प्रतिजानीते अथेति ।

(गा०) हेत्वाभासनिरूपणे प्रसङ्गस्यापि सङ्गतित्वं सम्भवति व्याप्तिपक्षधर्मताविशिष्टहेतुनिरूपणे सति व्याप्तिपक्षधर्मताविरोधितद्विरहवतो दुष्टहेतोः स्मरणात्, अतस्तदप्रदर्शनेन मूलस्य न्यूनतां परिजिहीर्षुः प्रसङ्गस्यापि तन्निरूपणप्रयोजकत्वमाह एतावतेति । परिकरो–व्याप्तिपक्षधर्मते । निरूप्येत्यन्तमुक्तक्रमेण दुष्टहेतोः स्मृतत्वस्य प्रसङ्गनिर्वाहकस्य लाभाय । तत्प्रसङ्गादिति । सपरिकरहेतुनिरूपितप्रसङ्गसङ्गतेरित्यर्थः । तज्ज्ञानजन्यजिज्ञासाधीनत्वं पञ्चम्यर्थः । अन्वयश्चास्य निरूपणमित्यनेन । तत्त्वनिर्णयविजयप्रयोजकत्वादिति मूलं यद्यपि हेत्वाभासनिष्ठतत्त्वनिर्णयादिजनकज्ञानविषयत्वार्थकतया शिष्यप्रवृत्त्युपयोगिनिरूपणघटकज्ञानप्रयोजनप्रदर्शनपरम्, तथापि तन्मात्रपरत्वे सङ्गत्यप्रदर्शनेन न्यूनता स्यादिति तस्यैककार्यकारित्वादिरूपसङ्गतिप्रदर्शनपरत्वमपि सम्भवतीति स्फुटीकर्त्तुमाह तत्त्वनिर्णयादिति । आदिपदाद्विजयपरिग्रहः । तत्कार्यकारित्वात्–सपरिकरहेतुप्रयोज्यकार्यप्रयोजकत्वात् । प्रयोजकत्वं च जनकतावच्छेदकादिसाधारणमतः स्वविषयकज्ञानकार्यं प्रति स्वस्य तत्त्वमक्षतमेव । तत्त्वनिर्णयः–प्रमितकोटिनिश्चयः । तत्र व्याप्तिपक्षधर्मताविशिष्टप्रकृतहेतुज्ञानमिव तद्विपरीतकोटिसाधकस्य हेत्वाभासत्वज्ञानम-

ऽप्युपयुज्यते प्रतिबन्धकीभूततद्विपरीतकोटिव्याप्यवत्ताज्ञानेऽप्रामाण्यग्राहकत्वादित्युभयोस्तत्त्वनिर्णयप्रयोजकत्वम् । अथवा तत्त्वनिर्णयः—साध्यवत्ताज्ञाने प्रमात्वनिश्चयः । तत्रानुमापकहेतोर्व्याप्त्यादिविशिष्टत्वरूपसद्धेतुत्वज्ञानमिव विपरीतसाधकहेतोर्दुष्टत्वज्ञानमप्युपयुज्यते । प्रकृतसाध्यग्रहाप्रामाण्यग्राहकविपरीतसाधकहेत्वदुष्टत्वग्रहविघटकत्वात् । विजयप्रयोजकत्वं च हेत्वाभासस्य स्वज्ञानाधीनपरोक्तहेतुदोषोद्भावनद्वारा व्याप्त्यादिविशिष्टहेतोः स्वज्ञानाधीनसन्न्यायप्रयोगद्वारा च बोध्यम् ।

(चि०) तत्रानुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वम् यद्विषयत्वेन लिङ्गज्ञानस्यानुमितिविरोधित्वं ज्ञायमानं सदनुमितिप्रतिबन्धकं यत्तत्त्वं वा हेत्वाभासत्वम् ।

(दी०) अनुमितीति । यथाश्रुतमिदं हेतुदोषाणां लक्षणम्, तद्वत्त्वञ्च दुष्टहेतूनाम्, तदभिप्रायेणैव उपधेयसङ्करेऽपीत्यादि वक्ष्यति । तत्रानुमितिपदम् अनुमितिनिष्ठकार्यतानिरूपकसम्बन्धित्वेनानुमितितत्कारणज्ञानपरम् साध्यव्याप्यहेतुमान् पक्षः साध्यवानित्याकारानुमितिपरं वा, तेनैकत्र हेतौ व्यभिचारादिग्रहेऽप्यन्यस्य परामर्शादनुमित्युत्पादेन व्यभिचाराद्यव्याप्त्यादिज्ञानेनान्यथासिद्धत्वाच्च व्यभिचारादिग्रहाभावस्यानुमित्यजनकत्वेऽपि न क्षतिरिति वदन्ति ।

(गा०)मूलोक्तलक्षणानां दुष्टहेतुलक्षणत्वे दोषेष्वतिव्याप्तिः, यथार्थज्ञाननिष्ठानुमितिप्रतिबन्धकतावच्छेदकविषयताश्रयत्वपर्यन्तस्य समूहालम्बनज्ञानविषयताश्रयोदासीनपदार्थवारणाय प्रथमलक्षणे विवक्षणीयतया बाधादिज्ञानप्रतिबन्धकतायां प्रायशो हेतुविषयताया अनवच्छेदकत्वात् तत्रत्यहेतावव्याप्तिश्च, यद्विषयकत्वेनेत्यादिलक्षणे तृतीयाया अवच्छेदकत्वार्थकतया सुतरां तथेत्यत आह यथाश्रुतमिति । इदमेतल्लक्षणत्रयम् ! ननु हेतुवदवभासन्त इति व्युत्पत्त्या हेत्वाभासपदस्य दुष्टहेतुपरत्वात् दुष्टहेतुनिरूपणस्यैव प्रति·

ज्ञातत्वात् तल्लक्षणमप्याकांक्षितमतस्तदनुक्तौ मूलस्य न्यूनता, अन्यविधव्युत्पत्त्या हेत्वाभासपदस्य हेतुदोषपरत्वसम्भवेऽपि 'ते च'त्यादिना दुष्टहेतूनामेव विभजनाद् दुष्टहेतुनिरूपणस्याप्रतिज्ञातत्वेन तदसङ्गतेः, एवं दुष्टहेतुनिरूपणस्याप्रकृतत्वे दुष्टहेतूनां विभागानर्हतया तेषां सङ्करेण विभागव्याघातशङ्काया अनवतारात् उपधेयसङ्करेत्यादिग्रन्थस्योपाध्यसङ्करेण विभागोपपादनपरस्यासङ्गतिरित्यत आह तद्वत्त्वं चेति । तादृशदोषवत्त्वं चेत्यर्थः । दुष्टहेतूनां लक्षणमित्यनुषज्यते । स्फुटमिति शेषः । तथाच दुष्टहेतुनिरूपणस्य प्रकृतत्वेऽपि दोषलक्षणे कृते दुष्टहेतुलक्षणस्य स्फुटतया लाभेन नोक्तानुपपत्तिरिति भावः । तदभिप्रायेणैवेति । दुष्टहेतुलक्षणाभिप्रायेणैवेत्यर्थः ।

अनुमितिपदस्यानुमितिसामान्यपरत्वे असम्भवः यत्किञ्चिदनुमितिपरत्वेऽतिप्रसङ्गात् प्रकृतपक्षसाध्यहेतुकानुमितिपरत्वमावश्यकम्, तथाच व्यभिचारादावव्याप्तिः वह्निर्धूमव्यभिचारीत्यादिज्ञानाभावस्य पर्वतो धूमवानित्याद्यनुमित्यजनकत्वात्, लक्षणया तस्य तादृशानुमितिकारणज्ञानमात्रपरत्वे बाधादावव्याप्तिः—बाधादिज्ञानस्य परामर्शाप्रतिबन्धकत्वात्, अतोऽनुमितिपदमजहत्स्वार्थलक्षणया तदुभयपरतया व्याचष्टे तत्रेति । तादृशलक्षणवाक्य इत्यर्थः । लक्षणघटकतावच्छेदकमुभयसाधारणमनुगतरूपमाह अनुमितिनिष्ठकार्यतानिरूपकसम्बन्धित्वेनेति । अनुमितिपदस्य प्रकृतपक्षतावच्छेदकविशिष्टप्रकृतसाध्यतावच्छेदकावच्छिन्नप्रकारकप्रकृतहेतुतावच्छेदकावच्छिन्नहेतुकानुमितिपरत्वं स्वयमेव दर्शयिष्यति अतो न वक्ष्यमाणातिप्रसङ्गः । निरूपकत्वं च यदि प्रतियोगित्वं तदा कार्यस्य कार्यताप्रतियोगित्वाभावादनुमित्यसङ्ग्रहः । अतः सम्बन्धिपदं संबन्धिद्वयसाधारणस्य तत्साक्षात्कारजनकसाक्षात्कारविषयतात्मकत्वस्य लाभाय ।

अत्र पर्वतो वह्निमान्ह्रदश्च तथेत्यादिसमूहालम्बनानुमित्याद्यविरोधिह्रदनिष्ठवह्न्यभावादिरूपबाधादेः पर्वतादौ धूमादिना वह्न्यादिसाधने दोषताप्रसङ्गः, प्रकृतानुमितिनिष्ठकार्यतानिरूपकसम्बन्धिग्रहत्वस्य कस्यापि प्रतिबध्यतानवच्छेदकतया तदवच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतानिवेशनासम्भवात्, तथाविधग्रहत्वव्यापकप्रतिबध्यतानिवेशे चानुमित्यविरोधिनि व्यभिचारादौ प-

रामर्शाविरोधिनि बाधादौ चाव्याप्तिः—उभयविरोधिपक्षाप्रसिद्ध्यादावेव तादृशप्रतिबध्यतानिरूपितप्रतिबन्धकताशालिज्ञानविषयत्वसत्त्वादतः कल्पान्तरमाह साध्यव्याप्येति । प्रकृतपक्षतावच्छेदकविशिष्टपक्षे प्रकृतसाध्यतावच्छेदकावच्छिन्नतद्व्याप्तिविशिष्टप्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारताकानुमितिसामान्यपरमित्यर्थः । एवं च तादृशसमूहालम्बनानुमितेर्व्याप्त्यादिविषयकतया व्यभिचारज्ञानादिप्रतिबध्यत्वात् न व्यभिचाराद्यसङ्ग्रहः । दर्शितसमूहालम्बनानुमितिप्रतिबन्धकतामादाय दर्शितातिप्रसङ्गवारणाय सामान्यपदम् । तथाच तादृशानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकताशालियथार्थज्ञानविषयत्वं पर्यवसितोऽर्थः । साध्यतावच्छेदकावच्छिन्नादिप्रकारकानुमितिसामान्यान्तर्गतायां पर्वतो वह्निमान्वह्निव्याप्यधूमवांश्चेत्याद्यनुमितौ ह्रदो न वह्निमानित्यादिनिश्चयस्याप्रतिबन्धकत्वान्नातिव्याप्तिरिति भावः । बाधसत्प्रतिपक्षस्वरूपासिद्ध्याश्रयासिद्धिष्वतिव्याप्तिवारणाय प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षविशेष्यकत्वनिवेशः । द्रव्यत्वादिना ह्रदादिविशेष्यकानुमितौ तथाविधनिश्चयस्याप्रतिबन्धकत्वात्तद्दोषतादवस्थ्यमतः पक्षतावच्छेदकावच्छिन्नत्वोपादानम् । अवच्छेदकत्वं च तत्पर्याप्त्यधिकरणत्वम्, तेनातेजस्वी पर्वतो वह्निमानित्यादौ विशिष्टपर्वतत्वादिमति वह्न्यभावरूपबाधस्य काञ्चनमयः पर्वतो वह्निमानित्यादौ पक्षाप्रसिद्धेः शुद्धपर्वतत्वावच्छिन्नपक्षकानुमित्यविरोधित्वेऽपि नासङ्ग्रहः । एवमग्रेऽपि बोध्यम् । साध्यतावच्छेदकावच्छिन्नसाध्यप्रकारकत्वानिवेशे परामर्शाविरोधितया बाधसत्प्रतिपक्षयोरव्याप्तिः । तत्र प्रकृतसाध्यतावच्छेदकावच्छिन्नत्वस्यानुपादानेऽपि तद्दोषतादवस्थ्यम्—वह्नित्वावच्छिन्नाभावादिनिश्चयस्य धूमजनकतेजस्वी वह्निव्याप्यधूमवांश्च ह्रद इत्याद्यनुमित्यविरोधित्वात् । साध्याप्रसिद्ध्यव्याप्तिवारणप्रयोजनकत्वं तदुपादानस्येति तु न सत्—वह्निर्न काञ्चनमय इत्यादिनिर्णयस्य शुद्धवह्नित्वादिना वह्न्याद्यनुमित्यविरोधित्वेऽपि द्वितीयदले प्रकृतसाध्यतावच्छेदकावच्छिन्नान्तर्भावसत्त्वात्, तस्य काञ्चनमयवह्निव्याप्यधूमवानयं पर्वत इत्यनुमितिविरोधितया तत्र लक्षणगमनात् । द्वितीयदलप्रवेशात् व्यभिचारविरोधसाधनाप्रसिद्धिस्वरूपासिद्धिषु नाव्याप्तिः तत्रापि साध्यतावच्छेदकावच्छिन्ननिरूपितव्याप्तिविशिष्ट-

त्वनिवेशाद्व्यभिचारविरोधयोर्नाव्याप्तिः । वह्निर्धूमव्यभिचारीत्यादिज्ञानदशायामपि द्रव्यत्वादिना धूमादिनिरूपितव्याप्तिभानसम्भवात्तद्दोषतादवस्थ्यमतो व्याप्तौ साध्यतावच्छेदकावच्छिन्नीयत्वनिवेशः । अन्वयव्याप्तिव्यतिरेकव्याप्ती विशिष्योपादाय तदुभयविशिष्टहेतुप्रकारकत्वमेव निवेश्यम् । एकतरमात्रव्याप्त्युपादाने साधारण्यानुपसंहारित्वयोरेकतरासङ्ग्रहप्रसङ्गादित्यग्रे व्यक्तीभविष्यति । तादृशव्याप्तिद्वयप्रकारतानिरूपितहेतुप्रकारतायास्तत्साध्यकतद्धेतुकानुमितिजनकतावच्छेदकप्रकारतात्वेनानुगमय्य निवेशस्तु न संभवति–साध्याभाववद्वृत्तित्वज्ञानदशायां केवलव्यतिरेकव्याप्त्यादिप्रकारकहेतुमत्ताज्ञानोत्पत्त्या साधारण्यादेस्तादृशप्रकारताशाल्यनुमितिसामान्याविरोधित्वाभावात् । तादृशव्याप्तिविशिष्टविषयकत्वमात्रस्य तद्विशिष्टहेतुतावच्छेदकावच्छिन्नविषयकत्वमात्रस्य वा निवेशे स्वरूपासिद्धावव्याप्तिः, अतः पक्षांशे तादृशव्याप्तिविशिष्टहेतुतावच्छेदकावच्छिन्नत्वानिवेशः । पक्षांशे व्याप्तिविशिष्टहेतुप्रकारकत्वमात्रस्य निवेशेपि तद्दोषतादवस्थ्यम्, धूमाभाववान् ह्रद इत्यादिज्ञानस्य द्रव्यत्वादिना हेतुमत्ताज्ञानाविरोधित्वात्साधारण्याद्यव्याप्तिश्च वह्नित्वावच्छिन्ने धूमाभाववद्वृत्तित्वग्रहस्य धूमादिव्याप्तिविशिष्टतद्व्यक्तित्वावच्छिन्नप्रकारकज्ञानाविरोधादतो हेतुतावच्छेदकावच्छिन्नत्वानिवेशः । पक्षांशे साध्यादिप्रकारकस्य संस्कारादेराहार्यज्ञानस्य च बाधादिज्ञानाप्रतिबध्यत्वात् असम्भव इत्यतस्तादृशानुमितित्वनिवेशः । साध्यव्याप्यहेतुधर्मितावच्छेदककसाध्यवत्ताज्ञानस्यैव साध्यव्याप्यहेतुमान्पक्षः साध्यवानित्याकारकतया तादृशाकारालिखनस्वरसात्तादृशहेतुविशिष्टपक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्यतावच्छेदकावच्छिन्नप्रकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकत्वस्य लक्षणघटकत्वोपगमे तु पर्वतत्वाद्यवच्छेदेन वह्नेः साध्यत्वे तत्सामानाधिकरण्येन साध्याभावादेरदोषत्वप्रसङ्गः सामानाधिकरण्यमात्रावगाहिबाधादिज्ञानस्य शुद्धपर्वतत्वाद्यवच्छेदेन वह्न्यादिज्ञानं प्रत्येव प्रतिबन्धकतया धूमविशिष्टपर्वतत्वाद्यवच्छिन्नधर्मिकवह्न्यादिज्ञानाप्रतिबन्धकत्वादिति तदुपेक्षितम् । न च विशेष्यतावच्छेदककोटौ धूमादेरधिकस्य भानेपि शुद्धपर्वतत्वाद्यवच्छिन्नसंयोगादेर्यत्र संसर्गता तत्र पर्वतत्वसामा-

धिकरण्येन वह्न्यभावादिज्ञानस्य प्रतिबन्धकत्वमावश्यकम् तादृशा- नुमितेरपि शुद्धपर्वतत्वावच्छेदेन वह्न्याद्यवगाहित्वादिति वाच्यम । धर्मितावच्छेदकावच्छेदेन विशिष्टबुद्धौ धर्मितावच्छेदतापर्याप्त्यधिकरणधर्मावच्छिन्नत्वमेव संसर्गांशे भासते न तु तदेकदेशावच्छिन्नत्वमपि तद्धर्मावच्छिन्नविशेष्यतानिरूपिततदेकदेशव्यापकत्वावच्छिन्नसंसर्गताया आप्रामाणिकत्वात् ॥

अथ लिङ्गोपधानमते हेतोः सर्वत्रैव धर्मितावच्छेदकतया भानात्तादृशसंसर्गताभ्युपगम आवश्यकः, अन्यथा शुद्धपर्वतत्वावच्छेदेन हेतुमत्ताज्ञानस्थलेऽपि विशिष्टपर्वतत्वाद्यवच्छिन्नसंयोगादिसंसर्गकानुमितेरेव मानत्वाभ्युपगमे पर्वतत्वादिसामाधिकरण्यमात्रावगाहिबाधादिग्रहकालेऽपि तथाविधसाध्यनिश्चयवतो अनुमित्त्यापत्तेः, न हि सामानाधिकरण्येन बाधासिद्ध्योरनुमितिं कश्चिदुपैति तादृशबाधादिग्रहस्य कचिदप्यनुमितिप्रतिबन्धकत्वासंभवात् तेषां हेत्वाभासताविलायापत्तिश्च इति चेत् । एवमपि लिङ्गानुपधानमते तादृशविषयतायां मानाभाव एव, प्रकृतग्रन्थस्तु न लिङ्गोपधानमताभिप्रायकः- तन्मतेऽनुमितेः सर्वत्रैव तदाकारतया तादृशाकारत्वस्याव्यावर्तकतयाऽनुमितिपदस्य तादृशाकारानुमितिपरत्वप्रदर्शनासंगतेः ।

केचित्तु लिंगानुपधानमतेऽनुमितिपदस्य तदुभयपरत्वं व्याख्याय यथाश्रुतार्थपरतानिर्वाहाय लिङ्गोपधानमतमाश्रयते—साध्यव्याप्येत्यादिना । इत्याकारकानुमितिपरम्-अनुमितेरित्याकारकतामताभिप्रायकमिति व्याचक्षते । एतादृशव्याख्यानप्रयोजनं स्फुटयति—तेनेति । एकत्र-वह्नित्वाद्येकधर्मावच्छिन्ने । व्यभिचारादित्यादिना स्वरूपासिद्धिपरिग्रहः । अन्यस्य परामर्शात्-तद्वह्नित्वादिरूपापरधर्मावच्छिन्ने व्याप्तिपक्षधर्मताद्यवगाहिज्ञानात् । व्यभिचारादित्यादिहेतोरनुमितिजनकत्वेपीत्यनेन सम्बन्धः । यत्र यद्रूपावच्छिन्ने व्यभिचारज्ञानोत्पत्तिद्वितीयक्षणे कथंचित्तद्रूपावच्छिन्नलिङ्गकपरामर्शस्तत्रैकक्षणविलम्बेनानुमित्युपगमे व्यभिचारासंभवान्न तत्र व्यभिचारो दर्शितः ।

ननु तद्धर्मावच्छिन्नलिङ्गकानुमितौ तद्धर्मावच्छिन्नधर्मिकव्यभिचारज्ञानाभावस्य हेतुत्वोपगमान्न व्यभिचारः । तद्धर्मावच्छिन्नलिङ्गकत्वं चाव्यवहितोत्तरत्वसम्बन्धेन तद्रूपावच्छिन्नधर्मिकव्याप्त्या-

दिज्ञानविशिष्टत्वम् तादृशसम्बन्धेन व्यभिचारज्ञानविशिष्टं यत्तदन्यत्वमेव वा जन्यतावच्छेदकं वाच्यम्, तेन धूमव्याप्यवह्निमानयमित्याकारकशाब्दादिपरामर्शोत्पत्तिद्वितीयक्षणे यत्र लौकिकसन्निकर्षजन्यो धूमव्यभिचारी वह्निः धूमव्याप्येन्धनवानित्याकारकसमूहालम्बनग्रहस्तत्र तज्जन्यानुमितेरुक्तसम्बन्धेन वह्नित्वावच्छिन्नधर्मिकव्याप्त्यादिज्ञानाविशिष्टत्वेऽपि न क्षतिरित्यत आह व्याप्त्यादीति । फलप्रकारणताकव्याप्त्यादिज्ञानसत्त्वे व्यभिचारज्ञानाद्यभावव्यतिरेकेणानुमितिव्यतिरेकस्यासिद्धत्वादिति भावः । व्याप्तिज्ञानादेर्व्यभिचारज्ञानाभावेनान्यथासिद्धत्वशङ्का प्रागेव निराकृता । न क्षतिः—व्यभिचारादौ नाव्याप्तिः । यत्रासद्धेतुविशेषेऽनुमितिरप्रसिद्धा तत्रत्यदोषस्याव्याप्तेर्वक्ष्यमाणतया एतादृशयथाश्रुतव्याख्यायामनिर्भरसूचनाय वदन्तीति ॥

(दी०) पर्वतो निर्वह्निर्धूमो वह्नेरभिधेयत्वं वा मेयत्वस्य व्यभिचारीत्यादिभ्रमादनुमितिप्रतिबन्धादाह यथार्थेति । ननु प्रतिबन्धकज्ञानविषयव्यभिचारादिघटकसाध्यादेरपि प्रत्येकं हेत्वाभासतापत्तिः । अथ विशिष्टविषयकं ज्ञानं प्रतिबन्धकम् तद्घटकञ्च न विशिष्टमिति चेत्तर्हि यथार्थेति व्यर्थं भ्रमविषयविशिष्टस्याप्रसिद्धत्वादित्यनुशयेनाह यदिति ।

(गा० पर्वतो वह्निमान् धूमादित्यादिसद्धेतुस्थले बाधादिभ्रमविषयेऽतिव्याप्तिवारकतया यथाश्रुतं यथार्थपदं सार्थकयति पर्वतो निर्वह्निरिति । अत्रेतिपदस्य त्रितयस्थले सम्बन्धात्क्रमात्त्रयलाभः । प्रत्येकं भ्रममादायैवातिप्रसङ्गसम्भवात्तादृशसमूहालम्बनभ्रमपर्यन्तानुधावनं वैकल्यात्तत्परत्वासङ्गतेरिति ध्येयम् । प्रथमभ्रमोऽनुमितौ विरोधी, अन्त्यौ च जनकज्ञाने, तथाच तयोरपि प्रथमे अन्यत्र प्रसिद्धस्य साध्याभाववद्वृत्तित्वस्य धूमाद्यंशे भ्रमत्वम् । अन्त्ये प्रमेयत्वाभाववद्वृत्तित्वस्याप्रसिद्ध्या न तद्भ्रमत्वं किन्त्वभावांशेऽनुयोगिताविशेषसम्बन्धेन साध्यस्य भ्रमत्वमित्येतादृशविशेषमादृत्य शिष्यव्युत्पादनायानेकविधभ्रमकथनम् ।

इदं त्ववधेयम् । अभिधेयत्वं प्रमेयत्वस्य व्यभिचारी-

त्यत्र स्वरूपसम्बन्धावच्छिन्नप्रमेयत्वत्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन प्रमेयत्वस्य भ्रमो वाच्यः प्रतियोगित्वांशे साध्यतावच्छेदकधर्मसाध्यतावच्छेदकसम्बन्धावच्छिन्नत्वयोः साध्याभाववद्वृत्तित्वरूपव्याप्तिघटकतया तदंशे तदुभयावगाहिव्यभिचारज्ञानस्यैव व्याप्तिज्ञानविरोधित्वात्। एवं च भेदादौ प्रमेयत्वत्वावच्छिन्नप्रतियोगिताकत्वस्य प्रसिद्धावपि स्वरूपसम्बन्धावच्छिन्नतादृशप्रतियोगित्वाप्रसिद्ध्या तादृशभ्रमानुपपत्तिः। प्रतियोगित्वांशे सम्बन्धविशेषावच्छिन्नत्वस्य भ्रम इत्यपि न युक्तम्—तस्य सम्बन्धघटकतया तत्प्रकारकत्वघटिततद्भ्रमत्वानुपपत्तेः। न च तेन रूपेण प्रतियोगिताप्रकारक एवात्र भ्रमो विवक्षितः, न तु तत्तदवच्छिन्नप्रतियोगिताकत्वसंसर्गक इति वाच्यम्। लाघवात् प्रतियोगितासंसर्गकव्याप्तिज्ञानस्यैवानुमितिहेतुतया तत्प्रकारकव्यभिचारज्ञानस्याकिञ्चित्करत्वात्॥

अत्राहुः—स्वावच्छिन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिकत्वसम्बन्धेन साध्यतावच्छेदकवत्त्वमेवाभावस्य साध्याभाववद्वृत्तित्वरूपव्याप्तिघटकं लाघवात्। एवं च तादृशसम्बन्धेनाभावांशे साध्यतावच्छेदकप्रकारकव्यभिचारज्ञानस्य व्याप्तिग्रहविरोधितया घटत्वादेः प्रसिद्धेन तादृशसम्बन्धेन प्रमेयत्वत्वादेरेवाभावांशे भ्रमात्मक एव तथाविधग्रहो विवक्षित इति न किञ्चिदनुपपन्नम्।

अन्ये तु प्रथमे साध्याभाववद्वृत्तित्वज्ञानविरोधी हेतौ साध्याभाववद्वृत्तित्वरूपव्यभिचारस्य भ्रमः। द्वितीये च तदप्रसिद्ध्या व्यापकसामानाधिकरण्यग्रहविरोधिसाध्यतावच्छेदके हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वस्य भ्रमो अभिमतः। समानप्रकारकज्ञानस्यैव विरोधितया द्विविधव्यभिचारसङ्ग्रहाय द्विविधव्याप्तिविषयकसमूहालम्बनस्यैव लक्षणे निवेश्यत्वात्। न च हेतुः साध्यस्य व्यभिचारीत्यत्र साध्यतावच्छेदके हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वस्य दुर्लभतया तदवगाहिज्ञानस्याभिधेयत्वं प्रमेयत्वस्य व्यभिचारीत्याकारकतां नोपयुज्यते इति वाच्यम्। एतौ अभाववद्वृत्तित्वं समानाधिकरणाभावप्रतियोगितावच्छेदकत्वं चेति द्वयमेव हेतुः साध्यस्य व्यभिचारीत्यत्र व्यभिचारपदार्थः। तत्रादिमव्यभिचारतात्पर्यकस्थले व्यभिचारपदार्थैकदेशे अभावेऽनुयोगितारूप-

षष्ठ्यर्थस्य तत्र च प्रकृत्यर्थतावच्छेदकवह्नित्वाद्यवच्छिन्ननिरूपितत्वसम्बन्धेन प्रकृत्यर्थस्यान्वयः । मत्वर्थीयार्थः स्वरूपसम्बन्धवान् तस्य चाभेदेन प्रथमान्तार्थेऽन्वयः । द्वितीयतत्पदार्थपरवाक्यस्थले च तदेकदेशसामानाधिकरण्ये हेतुपदार्थान्वितप्रथमार्थस्य निरूपितत्वस्यान्वयः षष्ठीप्रकृतेस्तद्धर्मपरतया षष्ठ्यन्तार्थस्य साध्यतावच्छेदकनिष्ठत्वस्य तादृशान्वयबललभ्यहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वे तस्य तदुक्तार्थीभूतसम्बन्धिनः एकदेशे घटकत्वरूपसम्बन्धे सम्बन्धिनश्चाभेदेन प्रथमार्थे अन्वयः । एवं चोक्तवाक्यात्तत्र साध्यतावच्छेदके हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वस्यापि लाभात्तत्र तदवगाहिभ्रमस्य दर्शिताकारतासम्भव इत्यपि वदन्ति ॥

भ्रमादिति पञ्चम्यर्थः प्रयुक्तत्वं तस्य प्रतिबन्धपदार्थे अनुत्पादेऽन्वयः । यथार्थेनेति । यथार्थपददानेन स्वव्यधिकरणप्रकारावच्छिन्ना या या विषयता तत्तदनिरूपकत्वरूपस्य सर्वांशे प्रमात्वस्य विवक्षणीयतया दर्शितभ्रमाणां किञ्चिदंशे प्रमात्वेऽपि न तामादाय दोष इति भावः ॥

अत्र यथार्थपदेन सद्धेतुस्थलेऽनुमितिविरोधिभ्रमविषयसाध्याभावादौ अतिप्रसङ्गवारणेऽप्यसद्धेतुस्थले तादृशप्रमाविषयदोषघटकसाध्यतदभावादेः प्रत्येकं दोषत्वापत्तिर्दुर्वारैवेति तदर्थं प्रकारान्तरानुसरणे च तत एव पूर्वदोषस्यापि वारणसम्भवे यथार्थपदं व्यर्थमिति दोषस्य दुरुद्धरतया तस्यैव यथार्थपदाघटितलक्षणान्तरानुसरणे बीजत्वमाह नन्विति । एकदेशस्यापि विशिष्टघटकतया हेत्वाभासपदार्थत्वस्येष्टत्वादाह प्रत्येकमिति । प्रत्येकपदार्थपर्याप्तसाध्यतावच्छेदकावच्छिन्नेत्यर्थः । हेत्वाभासतापत्तिः–हेत्वाभासपदार्थत्वापत्तिः । यद्रूपावच्छिन्नज्ञानस्यानुमित्यविरोधित्वं तद्रूपावच्छिन्ने हेत्वभासत्वव्यवहारस्य तद्रूपावच्छिन्नमात्रज्ञानाद्धेतोर्दुष्टत्वव्यवहारस्यानुदयेन चेष्टापत्तिर्न सम्भवतीति भावः ॥

यादृशविशिष्टविषयकत्वं तादृशानुमितिविरोधित्वानतिरिक्तवृत्ति तत्त्वमिति विवक्षया न साध्याद्यावतिव्याप्तिरित्याशयेनाशङ्कते अथेति । विशिष्टविषयकं–साध्याभाववद्वृत्तित्वविशिष्टसाधनादिविषयकमेव, तद्घटकं–तादृशविशिष्टघटकप्रत्येकपदार्थविषयकं, न

विशिष्टं—न तादृशविशिष्टनिरूपितम्, तथाच प्रत्येकपदार्थविषयकत्वस्य प्रतिबन्धकतया अतिरिक्तवृत्तित्वान्नातिव्याप्तिरिति भावः। व्यर्थमिति। यथार्थपदादानेऽपि सद्धेतुस्थलेऽतिव्याप्तिवारणसम्भवात्। ननु तत्र भ्रमविषयप्रत्येकपदार्थस्योक्तरीत्या वारणेऽपि तद्विशिष्टाव्याप्तिरत आह भ्रमविषयेति। अप्रसिद्धत्वादिति। तथाच क्वातिव्याप्तिरिति भावः॥

(दी०) केचित्तु दुष्टानामेव हेतूनामेतानि लक्षणानि तत्र तृतीयमिव प्रथममपि ज्ञायमानव्यभिचारादेः प्रतिबन्धकत्वमभ्युपेत्य। तदर्थश्च तादृशाभावप्रतियोगिनो ये व्यभिचारादयस्तत्प्रकारकयथार्थज्ञानविषयत्वमग्रे च तत्त्वमिसस्य तद्वत्त्वमित्यर्थः। आद्यस्यैव वा दुष्टहेतुलक्षणत्वमिति प्राहुः।

(गा०) केचित्त्विति। नन्वस्य दुष्टहेतुलक्षणत्वे दोषेष्वतिव्याप्तिः—तेषामपि अनुमितिविरोधियथार्थज्ञानविषयत्वात्। न च ह्रदत्वावच्छिन्नपक्षकवन्ह्यादिसाध्यकस्थले वन्ह्यभाववद्ध्रदादिरूपदोषाणामपि दुष्टहेतुत्वमिष्टमेवेति वाच्यम्। तद्रूपावच्छिन्नपक्षकतद्रूपावच्छिन्नसाध्यकतद्रूपावच्छिन्नहेतुकस्थले तेन रूपेण दुष्टस्य लक्षणं यदि तद्रूपावच्छिन्नपक्षसाध्यहेतुकानुमितिविरोधियथार्थज्ञानविषयत्वमात्रम् तदा ह्रदत्वावच्छिन्नपक्षकवह्नित्वावच्छिन्नसाध्यकधूमत्वावच्छिन्नहेतुकानुमितिप्रतिबन्धकप्रमाविषयवन्ह्यभाववद्ध्रदादीनां धूमत्वादिना दुष्टहेतुत्वाभावादतिव्याप्तिरित्याशंकां परिजिहीर्षुस्तादृशाभावप्रतियोगिनां यथार्थज्ञानमिति षष्ठीसमासमाश्रित्य तादृशाभावप्रतियोगिप्रकारकयथार्थज्ञानविषयत्वमर्थं व्याख्यास्यति। तच्च ज्ञायमानदोषस्य प्रतिबन्धकतामत एव सङ्गच्छतेऽतस्तन्मतमेवालम्ब्याह तत्रेति। तेषु लक्षणेषु मध्य इत्यर्थः। तृतीयलक्षणस्य सर्वमत एव ज्ञायमानदोषप्रतिबन्धकत्वाभिप्रायकतया दृष्टान्ततयेनोपन्यासः। तदर्थश्चेति। प्रतियोग्यन्तेन दोषानादाय लक्षणं सङ्गमनीयमिति दर्शयितुं व्यभिचारादय इति न तु तेन रूपेण घटकत्वमित्यवधेयम्॥

यद्यपि पर्वतत्वावच्छिन्ने वह्नित्वावच्छिन्नसाधने धूमत्वाद्यवच्छिन्नो दुष्ट इत्यादेः सद्धेतौ दुष्टत्वव्यवहारस्य नापत्तिः तत्र तत्साध्य-

पक्षहेतुकानुमितिप्रतिबन्धकरूपदोषप्रकारकज्ञानविषयत्वस्यैव प्रत्येतव्यत्वात्, तादृशानुमितिप्रतिबन्धकबाधव्यभिचारादेश्चाप्रसिद्धत्वात् ह्रदादौ वन्ह्यादिसाधनमादाय सर्वत्रैव दुष्टव्यवहार इष्टः। तथापि धूमसाधने वन्हित्वेनायं दुष्ट इत्यादौ वह्नित्वावच्छिन्नहेतुकधूमाद्यनुमितिप्रतिबन्धकदोषप्रकारकज्ञानविषयत्वस्य प्रत्येतव्यत्वात्। वक्ष्यमाणसम्बन्धावच्छिन्नतादृशानुमितिप्रतिबन्धकधूमाभाववद्वृत्तित्वविशिष्टवन्ह्यादिरूपप्रसिद्धदोषप्रकारताशालिभ्रममादाय रासभादितात्पर्येणापि तथा व्यवहारः स्यात्। न च तत्र विशेष्ये तृतीयान्तार्थवह्नित्ववैशिष्ट्यभानाद्रासभे तद्बाधेन नायमतिप्रसङ्ग इति वाच्यम्। तथासति दोषपदार्थघटकानुमितौ वह्नित्वावच्छिन्नहेतुकत्वालाभात्, तल्लाभानुरोधेन हेतुप्रकारकज्ञानजन्यानुमितिप्रतिबन्धकरूपदोषपदार्थघटकहेतौ वह्नित्ववैशिष्ट्यरूपतृतीयान्तार्थस्य तत्प्रकारतायां वाऽवच्छिन्नत्वार्थकतृतीयान्तलभ्यवन्हित्वावच्छिन्नत्वस्याप्यन्वय इत्येवोपगन्तव्यत्वात्। न च विशेष्ये वह्नित्वादिधर्मवैशिष्ट्यबाधकसमभिव्याहारस्थले दोषार्थकधातोरेव वह्नित्वावच्छिन्नहेतुकानुमितिप्रतिबन्धकोऽर्थः।

अथवाऽनुमित्यर्थकसाधनशब्दस्यैव वह्नित्वावच्छिन्नहेतुकानुमितिरूपविशेषे लक्षणिकत्वं दुषधात्वर्थे अनुमित्यर्थान्तर्भावे साधनपदार्थानन्वयप्रसङ्गात्। तथाच विशेष्ये एव तृतीयार्थवैशिष्ट्यान्वयोपगमात् नोक्तातिप्रसङ्ग इति वाच्यम्। एवमपि वह्निना धूमसाधने रासभो दुष्ट इत्यादिव्यवहारस्य भ्रममादायातिप्रसङ्गादिति॥

अथवा इतरभेदानुमापकमेवेदम् लक्षणम्। तथाच पर्वतपक्षकधूमसाध्यकवह्निहेतुकदुष्टलक्षणस्य तथाविधानुमितिविरोधिज्ञानविषयव्यभिचारादिभ्रममादाय सद्धेतावितरभेदव्यभिचारित्वाद्यथार्थपदं सार्थकम्। ज्ञानं चात्र स्वज्ञानविषयप्रकृतहेतुतावच्छेदकवत्त्वसम्बन्धावगाहि ग्राह्यम्, तेन प्रकृतहेतुभिन्नस्यापि सम्बन्धान्तरेण दोषप्रमाविषयत्वेऽपि नातिप्रसङ्गः। अग्रेपीदृशसम्बन्धेनैव तद्वत्त्वं बोध्यम्।

अथ ज्ञायमानपक्षादिनिष्ठसाध्याभाववत्त्वादिना बाधादिदोषाणां प्रतिबन्धकता न सम्भवति साध्याभाववत्त्वादिना पदार्थान्तरस्यैव यत्र ज्ञानं तत्र दोषाणामज्ञायमानतयाऽविरोधित्वेनाऽनुमित्यापत्तेः, कि-

न्तु ज्ञानीयपक्षतावच्छेदकाद्यवच्छिन्नविषयतानिरूपितसाध्याद्यवच्छिन्नविषयताश्रयत्वेन तादृशविषयताज्ञानविशिष्टत्वेन वा, तच्च रूपं तादृशभ्रमविषयपदार्थान्तरसाधारणमेवेति तेषामेव भ्रमदशायां विरोधित्वापत्त्युक्तापत्तिः। एवं च सद्धेतूनामपि प्रतिबन्धकतावच्छेदकोक्तनिरुक्तविषयताश्रयवह्न्यभावादिप्रमाविशेष्यत्वादतिव्याप्तिरिति चेन्न। यद्रूपावच्छिन्नविषयतासामान्यमनुमितिप्रतिबन्धकतावच्छेदकं तद्रूपविशिष्टप्रकारकप्रमाविशेष्यत्वमेव विवक्षणीयम्। ह्रदो वह्निमान् धूमादित्यादौ च तादृशरूपं ह्रदविशिष्टवह्न्यभावत्वादिकं ह्रदे वह्निर्नास्तीत्यादिज्ञाननिरूपिततद्रूपावच्छिन्नविषयतासामान्यस्यैव ह्रदत्वाद्यवच्छिन्नविषयतानिरूपितवह्न्यभावत्वाद्यवच्छिन्नविषयतात्वेन दोषनिष्ठानुमितिप्रतिबन्धकतायामवच्छेदकत्वात्। सद्धेतुस्थले च केवलवह्न्यभावत्वादिकं न तथा तदवच्छिन्नविषयतासामान्यान्तर्गतधर्म्यविषयकज्ञाननिरूपिततादृशविषयताया अनुमितिप्रतिबन्धकतानवच्छेदकत्वात्। पर्वतविशिष्टवह्न्यभावत्वादिविशिष्टं न किञ्चिद्वस्तु प्रसिद्धमिति नातिप्रसङ्गः। तृतीयमपि लक्षणमनयैव रीत्या परिष्कार्यम्। यद्यप्यस्य दुष्टहेतुलक्षणत्वे ज्ञायमानदोषप्रतिबन्धकतामतानाश्रयणेऽपि तद्रूपावच्छिन्नपक्षसाध्यहेतुकानुमितिप्रतिबन्धकप्रमाविषयतद्धेतुतावच्छेदकवत्त्वं तद्रूपावच्छिन्नपक्षसाध्यहेतुकस्थले तेनैव रूपेण दुष्टत्वमित्यर्थकतामुपगम्य यथार्थपदसार्थक्यमुपपादयितुं शक्यते, तथापि दुष्टलक्षणस्य दोषघटितत्वानुरोधेन तन्मतमवलम्ब्य षष्ठीसमास आदृत इति ॥

ननु द्वितीयतृतीयलक्षणयोर्दोषेऽतिव्याप्तिरव्याप्तिश्च क्वचिद्धेतौ यत्पदेन दोषस्यैवोपादेयतया तत्त्वस्य तन्मात्रवृत्तित्वादत आह तत्त्वमित्यस्यैवेति। प्रथममात्रस्य दुष्टहेतुलक्षणत्वेनैवोपपत्तौ चरमयोर्दोषलक्षणत्वमेवाचितं तत्त्वमित्यस्य यथाश्रुतार्थानुरोधकत्वादतस्तथैवाह आद्यस्यैवेति। ईदृशव्याख्याया निर्दोषत्वात्प्राहुरित्युक्तम्।

(दी०) लिङ्गमविवक्षितम्, यद्विषयत्वेन—यादृशविशिष्टविषयत्वेन, तेनानुमितिप्रतिबन्धकपक्षविशेष्यकभ्रमाविषये साध्याभावादौ सद्धेत्वादिनिष्ठे नातिप्रसङ्गः। अवच्छेदकत्वञ्चेहानतिरिक्तवृत्तित्वं, तेन विशिष्टस्यासत्त्वेऽपि भ्रमात् प्रतिबन्धेऽपि न क्ष-

तिः । विशेषणीयश्च तादृशविशिष्टान्तराघटितत्वेन, तेन प्रमेयत्वादिविशिष्टे सव्यभिचारादौ नातिप्रसङ्गः । एवञ्च पक्षतावच्छेदकादिविरहविशिष्टः पक्षः पक्षनिष्ठस्तद्विरहो वा साध्याभाववद्वृत्ति साधनं साधनवद्वृत्तिसाध्याभावो वा हेतुदोषः, येन केनापि सम्बन्धेन तद्वांश्च प्रकृतो हेतुर्दुष्टः ।

(गा०) लिंगज्ञानस्येति मूले लिंगांशनिवेशस्य निष्प्रयोजनकतया तस्या विवक्षितत्वमाह लिंगमिति । यद्विषयकत्वेनेति तृतीयार्थो अवच्छेदकत्वम् । तच्चेदमनतिरिक्तवृत्तित्वमिदानीं निवेश्यते तदाऽसम्भवः विशिष्टस्यानतिरिक्ततया वन्ह्यभावविशिष्टह्रदादिरूपदोषविषयकत्वस्य शुद्धह्रदत्वाद्यवच्छिन्नविषयकज्ञानेपि सत्त्वेनानुमितिप्रतिबन्धकत्वातिरिक्तत्वादतः स्वरूपसम्बन्धरूपमेव तद्वाच्यम्–तथाच पर्वतो वह्निमानित्याद्यनुमितिप्रतिबन्धकभ्रमविषयवन्ह्यभावादावतिव्याप्तिः तद्विषयकत्वस्यापि प्रतिबन्धकतावच्छेदकघटकत्वादसंभवभयेन चावच्छेदकतापर्याप्तिनिवेशासंभवादतो यद्विषयकत्वेनेति पदं व्याचष्टे यादृशविशिष्टविषयकत्वेनेति । यादृशविशिष्टविषयकत्वेन–यद्रूपावच्छिन्नविशिष्टविषयकत्वेन । एवञ्च तत्त्वमित्यस्य तद्रूपावच्छिन्नत्वमर्थः ।

व्याख्याबीजं प्रकाशयति तेनेति । यत्प्रकारकत्वेनानुमितिप्रतिबन्धकत्वमित्युक्तौ पक्षविशेषणकभ्रममादाय वह्न्यभावादौ नातिप्रसङ्गः । पर्वतादावतिप्रसङ्गसम्भवेपि यत्सम्बन्धावच्छिन्नयन्निष्ठप्रकारताकत्वेनानुमितिप्रतिबन्धकत्वं तेन सम्बन्धेन तद्वत्त्वस्य दुष्टताव्यवहारनियामकत्वोपगमे पर्वतविशेषणकवह्न्यभावज्ञानस्य विशेषणताविशेषावच्छिन्नाधेयतासंसर्गावच्छिन्नपर्वतादिनिष्ठप्रकारताकत्वेन प्रतिबन्धकत्वात् । तेन सम्बन्धेन पर्वतादिमत्तायां पर्वतमहानसान्यत्वादिरूपसद्धेतौ सत्त्वेपि प्रसिद्धधूमादिरूपहेतावसत्त्वात्तत्र दुष्टताव्यवहारापत्तेरयोग इति तदनुरोधेन पक्षविशेष्यकेत्युक्तम् । भ्रमपदं निश्चयसामान्यपरम्, तेन सद्धेत्वादावित्यादिपदग्राह्यसाध्यशून्यपक्षकदुष्टहेतावनुमितिप्रतिबन्धकप्रमाविषयसाध्याभावादेरेव सत्त्वेपि नासङ्गतिः । नातिप्रसङ्ग इति । उक्तव्याख्यानेऽनतिरिक्तवृत्तित्वमेव

अवच्छेदकत्वं विवक्षणीयम्, विशेषणीभूतवह्न्यभावाद्यविषयके शुद्धहृदत्वादिना वह्न्यभावविशिष्टहृदादिविषयकज्ञाने वह्न्यभावविशिष्टहृदत्वाद्यवच्छिन्नविलक्षणविषयतानिरूपकत्वस्यासत्त्वेनोक्तासम्भवानवकाशात्। तथा केवलवह्न्यभावत्वाद्यवच्छिन्नविषयकत्वस्य प्रतिबन्धकत्वातिरिक्तत्वान्नातिप्रसङ्ग इत्यर्थः।

ननु स्वरूपसम्बन्धरूपावच्छेदकत्वनिवेशेऽयमेवातिप्रसङ्गो दुर्वारः। अप्रामाण्यज्ञानाभावविशिष्टयद्रूपावच्छिन्नविषयकत्वं प्रतिबन्धकतावच्छेदकतापर्याप्त्यधिकरणमित्येतादृशविवक्षया तादृशातिप्रसङ्गवारणे पुनरसम्भवः। वह्न्यभावत्वादिना घटाद्यवगाहिनो वह्न्यभाववान्हृद इत्यादिज्ञानस्यापि प्रतिबन्धकतया तत्साधारण्यानुरोधेन वह्नित्वाद्यवच्छिन्नप्रकारतानिरूपिताभावत्वावच्छिन्नविषयतानिरूपितहृदत्वावच्छिन्नविशेष्यताकनिश्चयत्वेनैव प्रतिबन्धकताया वक्तव्यतया वह्न्यभावविशिष्टहृदत्वाद्यवच्छिन्नविषयतायास्तादृशप्रकारतानिरूपितहृदत्वाद्यवच्छिन्नविषयतात्वेनैवावच्छेदकत्वेऽप्यप्रामाण्यज्ञानाभावविशिष्टहृदत्वाद्यवच्छिन्नविषयताकनिश्चयत्वस्यावच्छेदकतापर्याप्त्यनधिकरणत्वादित्यनस्तृतीयाया अतिरिक्तवृत्तित्वलक्षणावच्छेदकतार्थकत्वं स्फुटयति अवच्छेदकत्वं चेति। इह लक्षणे घटकत्वं सप्तम्यर्थः। न च विशिष्टदोषविषयकत्वस्याप्रतिबन्धकसंशयादौ सत्त्वात्पुनरसम्भव इति वाच्यम्। ज्ञानस्येत्यत्र ज्ञानपदमनाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चयपरं षष्ठ्यर्थश्चाश्रयत्वं तस्य यद्विषयकत्वेनेत्यन्वयः, एवं च तादृशनिश्चयवृत्तित्वविशिष्टं यादृशविशिष्टविषयकत्वमनुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तादृशत्वस्य विवक्षणीयतया असम्भवानवकाशात्। अनतिरिक्तवृत्तित्वं च स्वव्यापकतत्कत्वं न तु तच्छून्यावृत्तित्वं विशिष्टस्य विशेष्यीभूतविशिष्टविषयकत्वानतिरिक्ततया तस्यातिप्रसक्तत्वेन विशिष्टे तस्मिन्ननतिप्रसक्तत्वस्य दुर्घटत्वात्।

यत्तु प्रतिबन्धकताशून्यतादृशनिश्चयवृत्तित्वमेवानतिरिक्तवृत्तित्वमतो नोक्तरीत्याऽसम्भवं इति। तदसत्। तथासति मूलोपात्तज्ञानस्येत्यस्य वैयर्थ्यप्रसङ्गात्। हृदत्वाद्यवच्छिन्ना या वह्न्यभावविशिष्टहृदत्वाद्यवच्छिन्नविषयकयत्किञ्चिज्ज्ञानविषयता तन्निरूपकत्वस्य प्रतिबन्धकताशून्यतादृशनिश्चयावृत्तित्वेन शुद्धहृदत्वावच्छिन्न

अतिप्रसङ्गाच्च । अस्मन्मतेऽनुमितिप्रतिबन्धकतायास्तादृशाभिन्नयवृत्तित्वविशिष्टह्रदत्वाद्यवच्छिन्नविषयकत्वत्वावच्छिन्नव्यापकताविरहादतिप्रसङ्गानवकाशात् ।

अथैवमपि जातित्वादिना ह्रदत्वादिविषयकस्य जातिमान्वह्न्यभाववानित्यादिज्ञानस्यापि वह्न्यभावविशिष्टह्रदत्वावच्छिन्नविषयकतया तस्य च ह्रदो वह्निमानित्यनुमित्यविरोधितयाऽसंभवः, जलवान्वह्निमानित्यादिस्थलीयदोषासंग्रहेणाविशेषितधर्मावच्छिन्नपक्षकस्थलीयस्यापि किंचिद्विशिष्टतद्घटितदोषस्यासंग्रहेण च पक्षतावच्छेदकाद्यंशेऽन्याप्रकारकत्वनिवेशस्याशक्यत्वात्तादृशविशिष्टाघटकपदार्थाविषयकत्वस्य ज्ञानविशेषणत्वे सर्वमाकाशवदित्यादिस्थलीयबाधादौ तद्घटकाप्रसिद्ध्याऽव्याप्तिः । यद्यद्रूपावच्छिन्नस्य यस्य यस्य यादृशविशिष्टघटकता तत्तद्रूपावच्छिन्नतत्तन्निष्ठविषयताभिन्नकिञ्चिदवच्छिन्नविषयताभिन्नकिंचिदवच्छिन्नविषयताशून्यत्वं ज्ञाने निवेश्यम् । जातित्वाद्यवच्छिन्नस्य च ह्रदत्वादेर्न वह्न्यभाववद्ध्रदत्वावच्छिन्नात्मकदोषघटकतेति जातित्वाद्यवच्छिन्नविषयता तादृशविषयताभिन्नैव तच्छून्यत्वं च नोक्तदोष इत्यपि न सत्-तथा सति ह्रदो जात्यभाववानित्यादिस्थलीयबाधादेरेव दुःसंग्रहत्वात् जातित्वादिना ह्रदत्वादिरूपधर्मितावच्छेदकावगाहिनो जातिमान् जातिमानित्यादिज्ञानस्य जातित्वाद्यवच्छिन्नह्रदत्वादिनिष्ठधर्मितावच्छेदकतारूपविषयताया निरुक्तविषयताभिन्नत्वविरहेण तादृशज्ञानस्यानुमित्यप्रतिबन्धकस्य शून्यत्वान्तेनावारणात् ।

मैवम् । यद्रूपावच्छिन्नविषयतात्वं तादृशविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं तद्रूपावच्छिन्नविषयताशून्यत्वस्य ज्ञानविशेषणतया सामञ्जस्यात् । अप्रतिबन्धकज्ञानविषयतावच्छेदकजातित्वादिविशेषितह्रदत्वादिघटिततद्रूपावच्छिन्नविषयतात्वावच्छिन्नाभावस्य दोषात्मकविशिष्टविषयतासमानाधिकरणत्वात् तज्ज्ञानव्यावृत्तिरिति । विशिष्टस्य-विशिष्टविषयताकत्वस्य, असत्त्वेपि-वह्न्यभावत्वादिना घटाद्यवगाहिभ्रमेऽसत्त्वपि, तथाच विशिष्टविषयकत्वेन प्रतिबन्धकता न सम्भवतीति भावः । भ्रमात्प्रतिबन्धेपि तादृशभ्रमस्यानुमित्यनुत्पादप्रयोजकत्वेपि । न क्षतिः-नोक्तयुक्त्या पर्याप्तिनिवेशाऽसम्भवः, तदनिवेशे पूर्वातिऽप्रसङ्गो वा ॥

ननु विशिष्टदोषघटकीभूततदेकदेशविषयतायां स्वरूपसम्बन्धरूपावच्छेदकत्वसत्त्वेऽपि विशिष्टविषयतासामान्यस्य तादृशावच्छेदकत्वविवक्षयाऽतिप्रसङ्गवारणसम्भवात्तदेव कथं न विवक्षितमिति । न च सामान्यपदस्य व्यापकत्वार्थकतया प्रतिबन्धकतावच्छेदकतायां विशिष्टविषयतात्वव्यापकत्वं निवेश्यं तदपेक्षया प्रतिबन्धकतायां विशिष्टविषयताव्यापकत्वनिवेशनमेवोचितमिति वाच्यम् । यतो वह्न्यभावविशिष्टह्रदादिनिरूपितविषयितायाः अनुमित्यप्रतिबन्धकसंशयाहार्याप्रामाण्यज्ञानास्कन्दितज्ञानसाधारणतया नानुमितिप्रतिबन्धकतायास्तद्व्यापकत्वमित्यनाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चयवृत्तित्वविशिष्टा या विषयता तद्व्यापकत्वं प्रतिबन्धकतायां भवता विवक्षणीयम् । तदपेक्षया लाघवेन च स्वरूपसम्बन्धरूपावच्छेदकतायां विशिष्टविषयतात्वव्यापकत्वमेव विवक्षितुमुचितम् । तथासति निश्चयत्वाद्यनिवेशात्समानाकारकज्ञानेषु विषयताभेदस्याप्रामाणिकतया संशयादिज्ञानीयविषयताया अपि निश्चयत्वादिविशिष्टीयतया प्रतिबन्धकतावच्छेदकतया प्रतिबन्धकतावच्छेदकतायां बाधादिरूपदोषनिरूपितविषयतात्वव्यापकताया अक्षतत्वात् । न च वह्न्यभाववान्ह्रदो वह्निमानित्याहार्यज्ञानीयवह्न्यभावविशिष्टह्रदादिविषयता नानाहार्यज्ञानसाधारणी तादृशाहार्यज्ञानसमानाकारकानाहार्यज्ञानाप्रसिद्धेः, ह्रदो वह्न्यभाववानित्याद्यनाहार्यज्ञानीयवह्न्यभावविशिष्टह्रदादिविषयतातो बाधादिप्रकारतानिरूपिततादृशाहार्यज्ञानीयह्रदादिविषयताया भिन्नत्वात्, तथा चानाहार्यत्वविशिष्टविषयताया एव प्रतिबन्धकतावच्छेदकतया न दर्शिताहार्यज्ञानीयविषयितासाधारण्याविशिष्टविषयितात्वव्यापकत्वमिति वाच्यम् । एवं सत्यनाहार्यज्ञानीयविशिष्टविषयितात्वव्यापकताया एव विवक्षणीयत्वात्तावतापि संशयान्यत्वाप्रामाण्यज्ञानानास्कन्दितत्वयोरप्रवेशेन लाघवानपायात् ।

मैवम् । स्वरूपसम्बन्धरूपावच्छेदकत्वप्रवेशे पाषाणमयत्वाद्यवच्छेदेन वह्न्यभाववत्तानिश्चयविशिष्टस्य पाषाणमयत्वादिविशिष्टपक्षादिज्ञानस्य वह्न्याद्यनुमितिप्रतिबन्धकतया तदवच्छेदकविषयताकपाषाणमयत्वादिविशिष्टपक्षादावतिव्याप्तेः । अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशमते तादृशविशिष्टविषयता-

यः पाषाणमयत्वाद्यवच्छेदेन वह्न्यभाववत्तानिश्चयाविशिष्टज्ञानसाधारणतया अनुमितिप्रतिबन्धकतातिरिक्तवृत्तित्वेनातिप्रसङ्गानवकाशात् । न चानतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशेऽपि जलाद्यवच्छेदेन वह्न्यभाववत्ताघटितस्य वन्ह्याद्यभाववज्जलादिमद्वृत्तिजलादिविशिष्टस्य, ह्रदादिरूपपक्षस्य जलवान्वह्न्यभाववानित्यादिज्ञानसहितस्य जलवांश्च ह्रद इत्यादिज्ञानस्य तादृशज्ञानाविशिष्टतादृशज्ञानत्वेनैव प्रतिबन्धकतया तादृशप्रतिबन्धकताशून्यज्ञानाविषयस्य सत्प्रतिपक्षानात्मकस्य वारणाय ज्ञानवैशिष्ट्यानवच्छिन्नत्वस्य प्रतिबन्धकतायामवश्यं निवेशनीयतया मन्मतेऽपि तत्रानतिप्रसङ्गादिति वाच्यम् । ज्ञानवैशिष्ट्यानवच्छिन्नत्वस्य प्रतिबन्धकताविशेषणत्वे प्रतिहेतुव्यापकसाध्याभावसमानाधिकरणतद्धेतुमत्पक्षरूपसत्प्रतिपक्षाव्याप्तेः—साध्याभावांशे तद्व्यापकताग्रहविशिष्टतद्वत्ताज्ञानत्वेन स्वतन्त्रसाध्याभावधर्मिकतद्व्यापकताग्रहविशिष्टतद्वत्ताज्ञानसाधारण्यानुरोधेनावश्यक्लृप्तप्रतिबन्धकतयैवोपपत्तेः । तादृशविशिष्टज्ञानस्य ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकतान्तरे मानाभावात् । उक्तविशिष्टेऽतिप्रसङ्गस्तु विवक्षणीयविशिष्टान्तराघटितत्वविशेषणेनैव वारणीयः । न च ज्ञानद्वयसाधारणप्रतिबन्धकतायाः प्रत्येकज्ञानविषयविशिष्टविषयकत्वं नानतिरिक्तवृत्तित्वरूपावच्छेदकतावत्, तथा च दर्शितविशिष्टघटकस्य प्रत्येकज्ञानाविषयस्य न निरुक्तविशिष्टात्मकत्वेति निरुक्तविशिष्टान्तराघटितत्वमुक्तविशिष्टस्याक्षतमेवेति वाच्यम् । वक्ष्यमाणविशिष्टान्तराघटितत्वस्यैव यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वं प्रतिबन्धकतानतिरिक्तवृत्ति तादृशविशिष्टद्वयाघटितत्वे सति यादृशविशिष्टविषयकनिश्चयत्वं प्रतिबन्धकतानतिरिक्तवृत्ति तादृशविशिष्टान्तराघटितत्व)स्यापि विवक्षणीयतया उक्तविशिष्टवारणसम्भवात् । न चैवमुक्तसत्प्रतिपक्षाव्याप्तिः—तस्य प्रतिहेतुव्यापकताविशिष्टसाध्याभावप्रतिहेतुविशिष्टपक्षात्मकनिरुक्तविशिष्टद्वयघटितत्वादिति वाच्यम् । सत्प्रतिपक्षघटकतादृशदलद्वयविषयताभिन्ननिरुक्तविशिष्टद्वयविषयिताशून्यप्रतीतिविषयत्वस्य विशिष्टद्वयाघटितार्थकत्वात् । यत्र सत्प्रतिपक्षाप्रसिद्धिस्तत्र भिन्नान्तमनुपादेयमेव । साध्यादिभेदेन लक्षणभेदात् प्रमात्मकविषयतासाधारणरूपेणैव वा प्रतिहेतुव्यापकताविशिष्टसा-

व्याभावादिविषयितोपादेया । न च दर्शितविशिष्टस्य सत्प्रतिपक्षता
न स्वीक्रियते,अपि तु हेतुतावच्छेदकाघटितसाध्याभावाभाववदवृत्ति-
मत्पक्षात्मकविशिष्टस्यैव व्यापकसामानाधिकरण्यरूपव्याप्तिविशिष्ट-
हेतुमत्पक्षस्योक्तरीत्या सङ्ग्रहे तद्धर्मव्यापकसाध्याभावकालीनतद्ध-
र्मविशिष्टपक्षादिव्यावृत्तिरप्यशक्या स्यात् इत्यविशेषेण व्यापक-
ताघटितविशिष्टमात्रस्यालक्ष्यताया एव युक्तत्वात्, तथा चोक्तप्र-
यासमपेक्ष्य ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकतानिवेशनमेवोचि-
तमिति वाच्यम् । एवमपि प्रकृतहेतुनिष्ठसाध्यव्यापकीभूताभावप्रति-
योगित्वघटितस्य मतभेदेन साधारण्यविरोधरूपस्य विषयितायाः
पक्षधर्मकप्रकृतहेतुमत्ताज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतायामेवा-
वच्छेदकत्वात् , प्रतिबन्धकतायां ज्ञानवैशिष्ट्यानवच्छिन्नत्वनिवेशा-
सम्भवात् । दर्शितातिप्रसङ्गवारणाय च निरुक्तविशिष्टद्वयाघटित-
त्वस्यैव निवेशनीयत्वात् । न च पक्षविशेषितं प्रकृतहेतुनिष्ठसाध्य-
व्यापकीभूताभावप्रतियोगित्वमेवासाधारण्यादिरूपं वाच्यम् । पक्ष-
वृत्तित्वघटितविशिष्टविषयितायाः अप्रतिबन्धकज्ञानसाधारणतया
प्रतिबन्धकतानवच्छेदकत्वात्तादृशस्य चासाधारणादेः पक्षवृत्तित्व-
विशिष्टप्रकृतहेतुसाध्यव्यापकाभावप्रतियोगित्वविशिष्टप्रकृतरूपनि-
रुक्तविशिष्टद्वयघटिततया निरुक्तविशिष्टद्वयाघटितत्वनिवेशोऽपि न
सम्भवतीति वाच्यम् । पक्षवृत्तित्वाघटितविशिष्टस्यैवासाधारण्यरू-
पताया 'विरोधोपि फलतः प्रतिरोध एव तदन्यत्वेन वा विरोधि वि-
शेषणीय'मिति पंक्तिव्याख्यानावसरे सम्पादनीयत्वात् ॥

नन्वनतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशे व्यभिचारादिघ-
टितपदार्थान्तरेऽतिव्याप्तिः तद्विषयकत्वस्यापि प्रतिबन्धकतानतिरि-
क्तवृत्तित्वादत आह विशेषणीयं चेति । तादृशलक्षणमिति शेषः ।
तादृशविशिष्टेति । अनुमितिप्रतिबन्धकतायां यद्रूपावच्छिन्नविषयक-
त्वमवच्छेदकं तद्रूपावच्छिन्नेत्यर्थः । व्यभिचारत्वाद्यवच्छिन्नस्य
व्यभिचारत्वादिरूपतादृशरूपावच्छिन्नघटितत्वादसम्भव इत्यतो अ-
न्तरेति । स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकावच्छिन्नार्थ-
कम् । अतः शुद्धव्यभिचारादेर्मेयत्वविशिष्टव्यभिचाराभिन्नत्वेपि न
क्षतिः । तदघटितत्वन्तदविषयकप्रतीतिविषयत्वम् । एवं च अनुमि-
तिप्रतिबन्धकतायां यादृशरूपावच्छिन्नविषयकत्वमवच्छेदकं तादृ-

शं यत्स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यत्तदवच्छिन्नत्वं समुदितार्थः । यद्रूपावच्छिन्ने लक्षणं सङ्गमनीयं तदेव स्वपदार्थः । भवन्ति हि व्यभिचारत्वाद्यवच्छिन्नाविषयप्रतीतिविषयकतावच्छेदकीभूतबाधत्वादयस्तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं व्यभिचारत्वादीति तदवच्छिन्ने लक्षणसमन्वयः । प्रमेयत्वविशिष्टव्यभिचारत्वादेः स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकव्यभिचारत्वाद्यवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वाभावान्न तदवच्छिन्ने अतिव्याप्तिः । प्रमेयत्वविशिष्टव्यभिचारादेरपि मेयत्वादिना व्यभिचारत्वाद्यवच्छिन्नाविषयकप्रतीतिविषयत्वात्तद्दोषः स्यादतस्तादृशरूपाश्रयधर्मिणं तदवच्छिन्नाविषयकप्रतीतिविषयत्वेनाविशिष्य स्वमेव तादृशविषयतावच्छेदकत्वेन विशेषितम् । मेयत्वविशिष्टव्यभिचारत्वाश्रयाविषयकत्वस्य व्यभिचारत्वाद्यवच्छिन्नाविषयकप्रतीतौ दुर्घटत्वाद्दोषः, अतः स्वाश्रयाविषयकत्वमुपेक्ष्य स्वावच्छिन्नाविषयकत्वनिवेशः । स्वावच्छिन्नाविषयकप्रतीतिविषयवृत्तित्वस्य तादृशधर्मविशेषणत्वे व्यभिचारादेरपि प्रमेयत्वादिना व्यभिचारत्वाद्यवच्छिन्नविषयकप्रतीतिविषये व्यभिचारादौ वर्तमानत्वादसम्भव इत्यतस्तादृशविषयतावच्छेदकत्वेन धर्मो विशेषितः । प्रमेयं गगनवद्वाच्यत्वादित्यादौ व्यभिचारत्वाद्यवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यद्गगनाभाववन्मेयत्वादि तदाश्रयाविषयकप्रतीत्यप्रसिद्ध्या अव्याप्तिरतस्तदवच्छिन्नाविषयकत्वनिवेशः । अत्र च तादृशविशिष्टान्तराविषयकप्रतीतिविषयतावच्छेदकत्वस्य दोषतावच्छेदकधर्मे विशेषणतापेक्षया ज्ञानस्येत्यत्र ज्ञानपदार्थे तादृशविशिष्टान्तराविषयकत्वनिवेश एवोचितः । एवं च निष्कृष्टवक्ष्यमाणकल्पे यद्विषयकनिश्चयस्येत्यत्र निश्चये एव तन्निवेश्यं लाघवादित्यवधेयम् ॥

अथ धूमव्यभिचारिवह्निमान्धूमवान्वह्नेरित्यादौ बाधादेर्व्यभिचारादिघटिततया तत्राव्याप्तिः । न च यद्रूपावच्छिन्नविषयकत्व स्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकं तादृशरूपान्तराघटितत्वस्य विवक्षितत्वान्न दोषः । व्यभिचारस्योक्तबाधविषयकत्वान्यूनवृत्तिव्याप्तिज्ञानप्रतिबन्धकतावच्छेदकविषयिता-

कत्वेऽपि तादृशप्रतिबन्धकतासामान्यान्तर्गतानुमितिप्रतिबन्धकतावच्छेदकविषयकत्वविरहेण तद्घटितत्वस्य अकिञ्चित्करत्वादिति वाच्यम् । व्यभिचारत्वादिरूपस्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकविषयतानिरूपितावच्छेदकस्य तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकस्याप्रसिद्ध्या असम्भवात् व्यभिचारत्वमेयत्वविशिष्टव्यभिचारत्वादेरेव तथाविधविषयितानिरूपकताकत्वात् तस्य च व्यभिचारत्वाद्यवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वाभावात् । न च स्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकविषयतानिरूपकतावच्छेदकः कश्चित्स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदको यस्य एवंभूतं यत्स्वं प्रमेयत्वविशिष्टव्यभिचारत्वादि तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्य विवक्षणीयतया न दोष इति वाच्यम् । तथासति धूमव्यभिचारिवह्निमान्धूमवान्वह्नेरित्यादौ बाधत्वाद्यवच्छिन्नघटकतावच्छेदकस्य धूमव्यभिचारिवह्निमत्त्वादेः स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकीभूतस्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकविषयितानिरूपकतावच्छेदकव्यभिचारत्वकत्वादव्याप्तेर्दुर्वारत्वात् । न च स्वावच्छिन्नविषयित्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकीभूतयत्किञ्चिद्विषयित्वं यादृशधर्मावच्छिन्ननिरूपितं तादृशतादृशधर्मावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यत्स्वं तद्रूपावच्छिन्नत्वमेव समुदितलक्षणार्थः । मेयत्वविशिष्टव्यभिचारत्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकीभूतायाः शुद्धव्यभिचारत्वाद्यवच्छिन्ननिरूपितविषयितायाः मेयत्वविशिष्टव्यभिचारत्वाद्यवच्छिन्नानिरूपितत्वेन स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्य च स्वस्मिन्नसत्त्वेन मेयत्वविशिष्टव्यभिचारत्वादेः स्वपदेनोपादातुमशक्यत्वात् (व्यभिचारत्वादिविशिष्टविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदिकायाः कस्या अपि विषयितायाः व्यभिचारत्वादिविशिष्टानिरूपितत्वासम्भवात्तादृशविषयितायाः यादृशधर्मविशिष्टानिरूपितत्वं घटत्वमेयत्वविशिष्टव्यभिचारत्वादेरेव तादृशत्वात् तदविषयकप्रतीतिविषयतावच्छेदकस्य व्यभिचारत्वादेः स्वपदेनोपादातुमशक्यत्वाच्च न कश्चिद्दोषः)।

अथवा यद्धर्मावच्छिन्नविषयित्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकीभूतविषयितात्वं यद्धर्मावच्छिन्ननिरूपितत्वव्याप्ये तद्धर्मवत्त्वमेव समुदितार्थ इति वाच्यम्, बाधविशिष्टव्यभिचारत्वाद्यवच्छिन्ने अतिप्रसङ्गात् तादृशधर्मावच्छिन्नविषयकत्वावच्छिन्नबाधज्ञानप्रतिबन्धकतायां केवलव्यभिचारविषयताया अनवच्छेदकत्वेन बाधविशिष्टव्यभिचारत्वाद्यवच्छिन्नविषयताया एव तथाविधप्रतिबन्धकतासामान्यावच्छेदकत्वं तस्यास्तादृशविशिष्टनिरूपितत्वस्य वश्यकत्वात् प्रथमकल्पे स्वपदेन चरमकल्पे च यत्पदेन तस्योपादानसम्भवात् ।

यत्तु वह्न्यभावादिधर्मितावच्छेदककवह्न्यादिप्रकारकबुद्धेरिव धूमव्यभिचारविशिष्टवह्न्यादिधर्मितावच्छेदकस्य धूमव्याप्यतया वह्न्यादिप्रकारकग्रहस्यानाहार्यस्यासंभवेन तादृशपक्षतावच्छेदकावच्छिन्नपक्षकसमूहालम्बनानुमितेरप्रसिद्ध्या तादृशानुमितिप्रतिबन्धकताघटितयथाश्रुतलक्षणस्य तद्रूपावच्छिन्नपक्षकवह्न्यादिहेतुकदोषाव्याप्तिः स्वयमेव वक्ष्यते इति तद्वारणायासो वृथेति भवतु तावदेवम् । तथापि विशेषगुणवान्भिन्नो घटो गुणसामान्यवान्भिन्न इत्यादौ दर्शितसमूहालंबनानुमितिप्रसिध्या विशेषगुणवद्घटादिरूपाश्रयासिद्धेर्गुणवद्घटादिरूपबाधघटितायाः सङ्ग्रह आवश्यकः ।

यदि च तत्र घटत्वावच्छेदेन गुणवत्त्वबाधः आश्रयासिद्धौ तु घटत्वसामानाधिकरण्येन घटत्वावच्छेदेन वा विशेषगुणवत्त्वं तस्यां च गुणत्वरूपसामान्यधर्मावच्छिन्नघटत्वव्यापकताघटितोक्तबाधस्य न प्रवेशः, विशेषगुणत्वेन घटत्वव्यापकतायास्तत्र प्रवेशेऽपि सामान्यरूपेण व्यापकतायास्तदनन्तर्भावादिति न तादृशासिद्धिसङ्ग्रह इत्युच्यते । तथापि विशेषगुणाभाववान्द्वितीयादिक्षणावच्छिन्नो घटो गुणसामान्याभाववानित्यादौ द्वितीयादिक्षणावच्छिन्ने घटे विशेषगुणवत्त्वरूपाश्रयासिद्धौ तदवच्छिन्ने घटे गुणवत्त्वरूपबाधप्रवेशावश्यकत्वात् यथाश्रुतलक्षणे च तत्सङ्ग्रहस्यावश्यकतया उक्तविशेषणानुपपत्तिः ।

वस्तुतस्त्वत्र वदन्तीत्यादिनिष्कृष्टकल्पेऽपि प्रमेयत्वविशिष्टव्यभिचारादिवारणाय विशिष्टान्तराघटितत्वस्य निवेशनीयतया तन्मते दर्शितबाधाद्यसङ्ग्रहो दोष एव ।

एतेन स्वावच्छिन्ननिरूपितविषयकत्वावच्छिन्नयत्किंचित्प्रतिबन्धकतावच्छेदकविषयताकविशिष्टनिरूपितविषयितात्वव्यापकस्वावच्छिन्ननिरूप्यताकधर्मवत्त्वं समुदितलक्षणार्थः । मेयत्वविशिष्टव्यभिचारत्वादिकं नैतादृशं स्वं—तदवच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतावच्छेदकविषयताकशुद्धव्यभिचारादिविषयितात्वस्य तदवच्छिन्ननिरूप्यत्वाव्यापकत्वात् । उक्तस्थले विशेषगुणविशिष्टघटादिरूपाश्रयासिद्ध्यादिविषयकत्वावच्छिन्नविशिष्टपक्षग्रहादिनिरूपितयत्किंचित्प्रतिबन्धकतावच्छेदकविषयिताकविशिष्टनिरूपितविषयितात्वस्य तादृशाश्रयासिद्ध्यादिनिरूपितत्वव्याप्यत्वात्तत्र लक्षणसमन्वयः । प्रतिबन्धकतायां यावत्त्वानिवेशाच्चोक्तरीत्या बाधविशिष्टव्यभिचारादावतिप्रसङ्गः । स्वावच्छिन्ननिरूपितविशिष्टविषयितानवच्छिन्नप्रतिबन्धकतावच्छेदकस्वावच्छिन्नविषयिताको यो धर्मस्तद्वत्त्वं वा समुदितलक्षणार्थः । मेयत्वविशिष्टव्यभिचारत्वं नैतादृशं स्वं तदवच्छिन्ननिरूपितशुद्धव्यभिचारत्वाद्यवच्छिन्नविषयित्वाद्यवच्छिन्नायामेव प्रतिबन्धकतायां तदवच्छिन्नविषयिताया अवच्छेदकत्वात् । उक्तस्थले च आश्रयासिद्धिविषयकत्वस्य तदनिरूपितबाधविषयितानवच्छिन्ना या विशिष्टपक्षग्रहप्रतिबन्धकता तदवच्छेदकत्वात् लक्षणसमन्वय इति परास्तम् । यद्विषयकनिश्चयस्य विरोधिविषयताप्रयुक्त इत्यादिनिष्कृष्टे कल्पे अनुमितिप्रतिबन्धकतायाः अप्रसक्तत्वात् । प्रतिबन्धकतायां विशिष्टान्तराविषयकत्वानवच्छिन्नत्वविशेषणदानस्यासंभवेन यत्पदार्थस्यैव तादृशपदार्थान्तराघटितत्वेन विशेषणीयतया उक्तबाधाव्यभिचारयोरशक्यपरिहारत्वात् ।

अत्र केचित्—सजातीयविशिष्टान्तराघटितत्वमेव यत्पदार्थे विशेषणं देयम् । साजात्यं च हेत्वाभासविभाजकरूपेण । तच्च रूपं बाधत्वव्यभिचारत्वादि तेन रूपेण व्यभिचारादेर्न बाधादिसाजात्यमिति व्यभिचारघटितबाधादौ नाव्याप्तिः । न चैवं यद्विषयकनिश्चयस्य विरोधिविषयताप्रयुक्त उभयाभावस्तत्त्वमित्यत्र विरोधिविषयताप्रयुक्तदलस्य वैयर्थ्यं घटादेस्तादृशरूपेण सजातीयत्वाप्रसिद्ध्यैव नातिप्रसङ्ग इति वाच्यम् । स्वसजातीयविशिष्टान्तरघटितं यत् तद्विषयकप्रतीतिविषयत्वस्य विवक्षया अनुयोगिनि स्वत्वान्तर्भावेन पदार्थान्तरेष्वतिप्रसङ्गवारकतया तद्दलसार्थक्यात् ।

च व्यभिचारविशिष्टमेयत्वादेर्हेत्वाभासत्वविरहाद्धेत्वाभासविभाजकरूपेण सजातीयाप्रसिद्ध्या तस्य स्वपदेनोपदातुमशक्यतया मेयत्वविशिष्टव्यभिचारत्वादिकमेव स्वपदेनोपादेयं तस्य शुद्धव्यभिचाराद्यभिन्नतया व्यभिचारत्वादिरूपहेत्वाभासविभाजकरूपेण तत्सजातीयप्रसिद्धेरिति तद्विषयकप्रतीतिविषयत्वस्य व्यभिचारविशिष्टमेयत्वादौ सत्त्वात्तत्रातिप्रसङ्ग इति वाच्यम् । विशिष्टान्तराघटितत्वेनाघटितस्य साध्यसाधनग्रहविरोधिज्ञाननिष्ठविषयतासम्बन्धेन व्याप्तिग्रहप्रतिबन्धकतानतिरिक्तवृत्तित्वादिरूपव्यभिचारादिविभाजकस्यात्र निवेशात्तादृशरूपस्य व्यभिचारविशिष्टमेयत्वादिसाधारणत्वादित्याहुः ॥

तन्न–व्यभिचारादिघटितबाधादावपि विशिष्टान्तराघटितत्वाद्यघटितव्यभिचारत्वादिसत्त्वेन तदघटकव्यभिचारादेर्व्यभिचारादिना तत्सजातीयतया तत्सङ्ग्रहानुपपत्तेः ॥

(इदमत्रावधेयम् । प्रतियोगिनि स्वत्वान्तर्भावेण तादृशलक्षणकरणेऽपि व्यभिचारघटितबाधादावव्याप्तिवारणमशक्यमेव । तत्र सजातीयविशिष्टान्तरघटितं यत्स्वं धूमव्यभिचारि वह्निमत्त्वं तदघटितत्वस्य तद्घटितबाधादावसत्त्वात् । यदि च तदघटितत्वं तदपर्याप्तविषयतापर्याप्त्यधिकरणत्वम्, तच्च सुघटमेव–एकदेशापर्याप्तविषयतायाः समुदायपर्याप्तिरित्युच्यते तदाप्यव्याप्तिर्दुर्वारैव । ... उक्तव्यभिचारत्वेन सजातीयविशिष्टान्तरघटितं यत्स्वं तादृशबाध एव, तदपर्याप्तविषयतायास्तत्राभावात् ।) न च स्ववृत्तियावद्धेत्वाभासविभाजकरूपेण साजात्यं विवक्षणीयम्, तथा च बाधादिघटकव्यभिचारादौ बाधत्वाद्यसत्त्वान्न तादृशबाधादिसजातीयत्वमतस्तत्सङ्ग्रहसम्भव इति वाच्यम् । एवं सति बाधादिविशिष्टव्यभिचारादौ स्ववृत्तिबाधत्वव्यभिचारत्वादियावद्धर्मेण सजातीयविशिष्टान्तरस्य व्यभिचारविशिष्टबाधादेः प्रसिद्धावपि तद्घटितत्वासत्त्वेनातिव्याप्तेस्तस्माद्व्यभिचारादिघटितबाधादेस्सङ्ग्रहप्रकारोऽग्रे दर्शनीय एवादरणीयः । मेयत्वविशिष्टव्यभिचारादौ–तादृशव्यभिचारत्वाद्यवच्छिन्ने, नातिप्रसङ्गो–न दोषताप्रसङ्गः । अत्र मेयत्वविशिष्टव्यभिचारो दोष इत्यादिव्यवहाराभावान्नेष्टापत्तिः सम्भवति । न च विशिष्टव्यभिचारादेः शुद्धव्यभिचारत्वादिना दोषत्वस्याक्षततयो-

क्तविशेषणदानेपि तादृशव्यवहारापत्तिर्दुर्वारैवेति तत्रेष्टापत्तौ व्यर्थं विशेषणमिति वाच्यम् । दोषादिपदस्य निरुक्तविशेषणावच्छिन्नानुमितिप्रतिबन्धकतावच्छेदकस्वावच्छिन्ननिरूपितविषयिताकत्वेनान्वयितावच्छेदकधर्मबोधकतया व्युत्पन्नतया प्रकृते च मेयत्वविशिष्टव्यभिचारत्वादिरूपान्वयितावच्छेदकस्योक्तविशेषणविरहेणातिप्रसङ्गाभावादिति हृदयम् ॥

न, चाश्रयासिद्ध्यादिस्थले पक्षतावच्छेदकाभाववत्पक्षकत्वादिकमेव दोषस्तस्यैव हेतुनिष्ठतया हेतोर्दुष्टत्वव्यवहारनिर्वाहकत्वात्, तादृशधर्मस्य च तादृशाभाववत्पक्षादिरूपतादृशविशिष्टान्तराघटिततया अव्याप्तिरित्यत आह एवं चेति । तादृशविशेषणदाने चेत्यर्थः । पक्षतावच्छेदकादीति । आदिपदात्साध्यादिपरिग्रहः । पर्वतादिधर्मिककाञ्चनमयत्वादिविशिष्टबुद्धौ पर्वतः काञ्चनमयत्वाभाववानित्यादिधर्मिविशेष्यकनिश्चयस्येव पर्वते काञ्चनमयत्वं नास्तीत्यादिधर्मिविशेषणकनिश्चयस्यापि विरोधित्वमानुभविकमतस्तद्विषयस्यापि दोषत्वमाह पक्षनिष्ठ इति । आधेयतासम्बन्धेन पक्षविशिष्ट इत्यर्थः । वाकारः समुच्चये । साधनवद्वृत्तिसाध्याभाव इति । साधनधर्मिकसाध्याभाववद्वृत्तित्वप्रकारकज्ञानं साधनधर्मिकव्याप्तिज्ञानप्रतिबन्धकम्, साधनवद्वृत्तिसाध्याभाव इति ज्ञानेपि साधने साध्याभाववद्वृत्तित्वं तुल्यवित्तिवेद्यतया नियमतः भासत इति तदपि व्याप्तिज्ञानप्रतिबन्धकमिति मताभिप्रायेण, तादृशज्ञाने नियमतस्तद्भानेपि मणिमन्त्रादिन्यायेन तस्य व्याप्तिज्ञानप्रतिबन्धकत्वमिति प्राचीनमताभिप्रायेण वा दोष इति, न तु पक्षतावच्छेदकाभाववत्पक्षकत्वादिति शेषः । तथा चालक्ष्यत्वान्न तत्राव्याप्तिरिति भावः ॥

ननु पक्षतावच्छेदकाभाववत्पक्षादीनां हेत्ववृत्तित्वात्कथं हेतौ दुष्टताव्यवहार इत्यत आह येन केनापीति । एकज्ञानविषयत्वेनेत्यादिः । तद्वान्-तदवच्छिन्नो, दुष्टः-दुष्टपदप्रतिपाद्यः । तथा च हेतोः तादृशानधिकरणत्वेपि न क्षतिः । दुष्ट इत्यादौ सामान्यतः सम्बन्धिन एव दुष्टार्थत्वात् । एवं चैकज्ञानविषयत्वादिना वन्ह्यभाववत्ह्रदादिरूपदोषस्य धूमादौ सत्त्वेपि पर्वतादौ च वन्ह्यादिसाधने तस्य दुष्टव्यवहारविषयतायास्तद्रूपावच्छिन्नपक्षसाध्यहेतुवाचकपदसमभिव्याहारस्थले दुष्टपदस्य तद्रूपावच्छिन्नपक्षसाध्यहेतुकानुमितिप्रतिबन्धकतावच्छे-

कस्वावच्छिन्ननिरूपितविषयिताकधर्मावच्छिन्नसम्बन्धिबोधकव्युत्पत्त्या पूर्ववद्वारणेपि पूर्ववदेव वन्हिना धूमसाधने रासभो दुष्ट इत्यादिव्यवहारो निरुक्तदोषमात्रस्य दुष्टव्यवहारविषयत्वे दुर्वार इति प्रकृते हेतुतावच्छेदकविशिष्टसम्बन्धो निष्ठार्थतावच्छेदको वाच्यः । एतत्सूचनायैव प्रकृते हेतुरित्युक्तम् । ह्रदे वह्निसाधने धूमो दुष्ट इत्यत्र ह्रदत्वावच्छिन्नपक्षकवह्नित्वावच्छिन्नसाध्यकधूमत्वावच्छिन्नहेतुकानुमितिप्रतिबन्धकतावच्छेदकस्वावच्छिन्नविषयिताकधर्मावच्छिन्नसम्बन्धी धूम इत्यन्वयबोधः । तत्र प्रतिबन्धकतावच्छेदकस्वावच्छिन्नविषयिताकधर्म एव दुषधातोरर्थः । साधनपदं लक्षणया धूमत्वावच्छिन्नहेतुकानुमितिपरम् । तत्र ह्रद इति सप्तम्यन्तार्थह्रदत्वावच्छिन्नपक्षकत्वस्य वह्नेरितिषष्ठ्यन्तार्थस्य वह्नित्वावच्छिन्नसाध्यकत्वस्य चान्वयः । तादृशानुमित्यन्वितसप्तम्यर्थनिरूपितत्वस्य दुषधात्वर्थैकदेशे प्रतिबन्धकत्वे अन्वयः । एवं च पर्वते वन्हेः साधने धूमो दुष्ट इत्यत्र पर्वतत्वावच्छिन्नपक्षकवह्नित्वावच्छिन्नसाध्यकधूमत्वावच्छिन्नहेतुकानुमितिप्रतिबन्धकतावच्छेदकस्वावच्छिन्ननिरूपितविषयिताकधर्मविशिष्टसम्बन्धी धूम इत्येव प्रतीयते, तादृशधर्मश्च अप्रसिद्ध एवेति न तथा व्यवहारः । पक्षविशेष्यादिकमनन्तर्भाव्य धूमो दुष्ट इत्यादिव्यवहारस्तु इष्यत एवेति दिक् ॥

(दी०) यादृशधर्म्मिणि यादृशधर्म्मवत्ताज्ञानं अनुमितिप्रतिबन्धकं तस्य धर्म्मिणस्तादृशधर्म्मवत्त्वं हेतुदोष इत्यपि कश्चित् ।

(गा०)साधननिष्ठसाध्याभाववद्वृत्तित्वादेरेव व्यभिचारतया प्रसिद्धिर्न तु तद्विशिष्टसाधनादेः अतो न तस्य दोषत्वमिति कश्चिदाह व्याचष्टेपि लक्षणमन्यथैवान्यथातिप्रसङ्गात् तादृशव्याख्यामुपन्यस्यति यादृशेति । यद्रूपावच्छिन्नेत्यर्थकम् ज्ञानं-ज्ञानत्वावच्छिन्नं, तस्य धर्मिणः-तद्धर्मावच्छिन्नस्य तेन सम्बन्धेनेति शेषः । तादृशधर्मवत्त्वं-तद्रूपावच्छिन्नवत्त्वम्, साधनादिविशेषणकसाध्याभाववद्वृत्तित्वादिविशेष्यकज्ञानस्य व्याप्त्यादिज्ञानप्रतिबन्धकत्वेपि साध्याभाववद्वृत्तित्वादेराधेयतासम्बन्धेन साधनीयत्वादिकं न दोषः-साधनादेः साध्याभाववद्वृत्तित्वादिधर्मताविरहात् । अत्राप्यवच्छेदकत्वं पूर्ववदेव, न तु स्वरूपसम्बन्धविशेषः । पक्षतावच्छेदकावच्छिन्ननिष्ठकेवलाभा-

वत्वावच्छिन्नवत्त्वादावतिप्रसङ्गात्, तदवच्छिन्नधर्मिकतद्रूपावच्छिन्न-घत्ताज्ञानस्यापि प्रतिबन्धकतावच्छेदककोटिप्रविष्टत्वात्। अवच्छेद-कतापर्याप्तिविवक्षणे च ह्रदत्वाद्यवच्छिन्ननिष्ठवन्ह्यभावत्वाद्यवच्छिन्न-वत्त्वे अव्याप्तिः, यतो वह्नित्वादिना घटाद्यवगाहिनोऽपि ह्रदो न वह्निमा-नित्यादिनिश्चयस्य ह्रदो वह्निमानित्याद्यनुमितिप्रतिबन्धकतया ह्रद-त्वाद्यवच्छिन्नविशेष्यकवास्तववन्ह्यभावत्वावच्छिन्नप्रकारकत्वेन न प्रतिबन्धकता अपि तु तद्विशेष्यकवह्नित्वावच्छिन्नप्र[illegible]निरूपिता-भावत्वावच्छिन्नप्रकारताकनिश्चयत्वेनैव, अतस्ताद[illegible] प्रति-बन्धकतावच्छेदकतापर्याप्त्यधिकरणं न तु ह्रदत्वाद्यवच्छिन्नधर्मि(ता-वच्छेद)कवन्ह्यभावत्वावच्छिन्नप्रकारकनिश्चयत्वमिति। यद्रूपपदेन वन्ह्यभावत्वाद्युपादानं न संभवतीति (पर्वतो वन्ह्यभाववानित्यादौ पर्व-तत्वावच्छिन्ननिष्ठवह्नित्वावच्छिन्नवत्त्वरूपबाधादाववच्छेदकतापर्या-प्तिघटितलक्षणस्यापि सत्त्वादसंभवोऽभिहितः। पर्वतत्वाद्यवच्छिन्नवि-शेष्यकवह्नित्वावच्छिन्नप्रकारकनिश्चयत्वे पर्वतो वन्ह्यभाववानित्यनु-मितिप्रतिबन्धकतावच्छेदकतापर्याप्तेः) पर्वतो वन्ह्यभाववानित्यादौ पर्वतत्वाद्यवच्छिन्ननिष्ठवह्नित्वाद्यवच्छिन्नवत्त्वरूपबाधादेरसङ्ग्रहभयेन यद्रूपावच्छिन्ने धर्मिणि यद्रूपावच्छिन्नप्रकारतानिरूपितयद्रूपाव-च्छिन्नप्रकारताकनिश्चयत्वेन प्रतिबन्धकता तद्रूपविशिष्टे तद्रूपावच्छि-न्नविशेषिततद्रूपावच्छिन्नवत्त्वं दोष इति विवक्षाया असंभवात्। अत्र साधननिष्ठसाध्याभाववद्वृत्तित्वादेरिव साध्याभाववद्वृत्तिसाधनादे-रपि दोषत्वे क्षतिविरहात् एतावान्प्रयासो निरर्थक इत्यस्वरसः कश्चिदित्यनेन सूचितः॥

(दी०) अथ पर्वतत्वेन पक्षत्वे वह्नित्वेन साध्यत्वे विशिष्ट-धूमत्वेन च हेतुत्वे पर्वतादेः काञ्चनमयत्वविरहो ह्रदस्य वह्नि-धूमशून्यत्व पर्वतस्य महानसीयवह्निधूमविरहित्वं मेयत्वस्य के-वलधूमस्य वा वह्निव्यभिचारो विशिष्टस्य धूमस्य वा पर्वतीय-वह्निव्यभिचारो न दोषः, न वा तत्सम्बन्धेन तत्र तस्य हेतोर्दु-ष्टत्वम्, अतस्तद्धर्मावच्छिन्नतत्पक्षकतद्धर्मावच्छिन्नतत्साध्यक-तद्धर्मावच्छिन्नतद्धेतुकानुमितिप्रतिबन्धकत्वं वाच्यम्, तथाच नि-

र्वह्निः पर्वतो वह्निमान् पर्वतावृत्तिवह्निमान् वा तद्व्यभिचारिणः पर्वतावृत्तेर्वा धर्मादित्यादौ न कोऽपि हेत्वाभासः स्यात् तादृशानुमितेरप्रसिद्धत्वादिति ।

(गा०) यथाव्याख्यातयथाश्रुतार्थे निर्वह्निः पर्वतो वह्निमानित्यादौ प्रकृतपक्षतावच्छेदकविशिष्टविशेष्यकप्रकृतसाध्यतावच्छेदकावच्छिन्नप्रकारकानुमितेरप्रसिद्ध्याऽव्याप्तिर्दर्शयिष्यते, तत्र विशिष्य पक्षतावच्छेदकाद्यप्रवेशे नाप्रसिद्धिरतस्तन्निवेशनप्रयोजनमाह अथेति । पर्वतादेः काञ्चनमयत्वविरह इत्यादौ सर्वत्र न दोष इति सम्बध्यते । तथाच पक्षतावच्छेदकाद्यप्रवेशे पूर्वोक्तयुक्त्याऽसम्भववारणाय यत्किञ्चिद्धर्मावच्छिन्नपक्षसाध्यहेतुकानुमितिसामान्यप्रतिबन्धकत्वमेव निवेश्यमिति पर्वतो वह्निमान्धूमादित्यादौ पर्वतनिष्ठकाञ्चनमयत्वाभावादावतिव्याप्तिः—तस्यापि काञ्चनमयत्वादिसहितपर्वतत्वादिरूपयत्किञ्चिद्धर्मावच्छिन्नपक्षसाध्यहेतुकानुमितिसामान्यप्रतिबन्धकज्ञानविषयत्वादिति भावः । आदिपदं वस्वन्तरसंग्राहकम्, प्रकृतानुमित्यविषयपदार्थाभावेऽतिव्याप्तिं सूचयित्वा तद्विषयसाध्याद्यभावे तां सूचयति ह्रदस्येति । ह्रदनिष्ठवह्निशून्यत्वं धूमशून्यत्वं चेत्यर्थः । ह्रदादिनिष्ठसाध्याभावे अतिव्याप्तिसूचनं च प्रकृतपक्षतावच्छेदकावच्छिन्ने प्रकृतपक्षकत्वरूपसमुदायदलस्यैवानिवेशे बोध्यम् । महानसीयेति । महानसीयवह्न्यभावो महानसीयधूमाभावश्चेत्यर्थः । अत्रातिव्याप्तिसूचनं च प्रकृतसाध्यतावच्छेदकप्रकृतहेतुतावच्छेदकयोरनिवेशे बोध्यम् ॥ इदमुपलक्षणम् । साध्यहेत्वोरनिवेशेपि जलत्वाभावादावप्यतिव्याप्तिर्बोध्या । प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुकत्वानिवेशे पक्षधर्मताज्ञानप्रतिबन्धकतामादायातिप्रसङ्गं सूचयित्वा व्याप्तिज्ञानप्रतिबन्धकतामादायातिव्याप्तिं सूचयति मेयत्वस्येति । वह्निव्यभिचार इत्यनेनान्वयः । अत्रातिव्याप्तिस्तादृशदलस्यैवानिवेशे बोध्या । प्रकृतहेतुकत्वं निवेश्याप्येतद्दोषस्य शक्यवारणतया हेतुतावच्छेदकनिवेशायाह केवलधूमस्येति । वह्निशून्यदेशान्तरवृत्तिधूमव्यक्तिव्यावर्तकविशेषणावच्छिन्नस्येत्यर्थः । साध्यतावच्छेदकानिवेशे पूर्वं साध्यवत्ताज्ञानविरोधिविषयेऽतिव्याप्तिर्दर्शितेदानीं व्याप्तिज्ञानविरोधिविषयेऽतिव्याप्तिं दर्शयति । विशिष्टधूमस्य वा पर्वतीयवह्निव्यभि-

चार इति। दोषलक्षण इव दुष्टलक्षणेपि पक्षतावच्छेदकादिनिवेशस्यावश्यकतां दर्शयति न वा तत्सम्बन्धेनेति। तत्र-पर्वतत्वावच्छिन्ने वह्नित्वावच्छिन्नवह्निसाधने, तस्य-विशिष्टधूमत्वावच्छिन्नस्य, पक्षादौ पक्षतावच्छेदकादेर्यादृशसम्बन्धेन विशेषणत्वं यत्राभिमतं तत्र तत्सम्बन्धेन तदवच्छिन्नत्वं निवेश्यमिति सूचयितुं तत्पक्षकेत्युक्तम्, पक्षतावच्छेदकादिनिवेशे पक्षादिनिवेशस्याप्रयोजकत्वादिति। वाच्यम्-तद्रूपावच्छिन्नपक्षसाध्यहेतुकदोषलक्षणे निवेशनीयम्। तथाचेति। निर्वह्निः पर्वतो वह्निमानित्यत्र च पक्षतावच्छेदकनिर्वह्नित्वविशिष्टपर्वते वह्निवैशिष्ट्यावगाहित्वमनुमितेर्न सम्भवति—स्वविरोधिधर्मधर्मितावच्छेदककस्वप्रकारकानाहार्यज्ञानस्यानभ्युपगमात्, पर्वतः पर्वतावृत्तिधर्मवानित्यत्र पर्वते पर्वतावृत्तित्वरूपसाध्यतावच्छेदकावच्छिन्नप्रकारकत्वमनुमितेर्न सम्भवति स्वस्मिन्स्वावृत्तित्वावच्छिन्नप्रकारकानाहार्यज्ञानस्याननुभविकत्वात्, एवं पर्वतो वह्निमान्वह्निव्यभिचारिण इत्यत्र वह्निव्यभिचारत्वरूपहेतुतावच्छेदकावच्छिन्ने वह्निव्याप्यत्ववैशिष्ट्यावगाहित्वमनुमितौ न सम्भवति पूर्वोक्तयुक्तेः, पर्वतो वह्निमान्पर्वतावृत्तेरित्यत्र पर्वते पर्वतावृत्तित्वरूपहेतुतावच्छेदकावच्छिन्नवैशिष्ट्यावगाहित्वं नानुमितेः सम्भवति उक्तयुक्तेरिति, यथाविवक्षितानुमित्यप्रसिद्धिप्रयोजकभेदेन नानास्थले अव्याप्तिकथनम्। न कोपि हेत्वाभासः स्यादिति। तथा चापार्थकत्वरूपनिग्रहस्थानसत्त्वेन प्रयोक्तुर्निग्रहोपपत्तावपि निर्वह्नित्वेन पर्वते वह्नेः साधने धूमो दुष्ट इत्यादिव्यवहारो दुरुपपाद इति भावः। तादृशानुमितेः-तथाविवक्षतानुमितेः। अप्रसिद्धत्वादिति। आहार्यपरोक्षज्ञानानुपगमादिति भावः॥

(दी०) अत्र वदन्ति-यद्विषयकनिश्चयस्य विरोधिविषयताप्रयुक्तस्तदुत्तरम् अनुमितौ अनाहार्यमानसज्ञाने वा पक्षतावच्छेदकविशिष्टपक्षे साध्यतावच्छेदकविशिष्टसाध्यवैशिष्ट्यावगाहित्वस्य साध्यतावच्छेदकविशिष्टसाध्यनिरूपितव्याप्तिविशिष्टहेतुतावच्छेदकविशिष्टहेतुमत्त्वावगाहित्वस्य च द्वयोर्व्यतिरेकस्तत्त्वं हेतुदोषत्वम्। पक्षतावच्छेदकवैशिष्ट्यादिकञ्च वैज्ञानिकं न तु

वास्तवं ग्राह्यं व्याप्तिश्चान्वयतो व्यतिरेकतश्च वाच्या तादृशाव-गाहित्वप्रसिद्धिराहार्य्यज्ञान एवाभ्युपेतव्याऽनन्यगतिकत्वात् । एवञ्च वस्तुमात्रनिश्चयादनन्तरं निर्वह्नित्वविशिष्टे वह्निग्रहेऽपि न क्षतिस्तस्य विरोध्यविषयकत्वात् । एवं साध्यनिश्चयोत्तरं त-स्यानुमितावपि मानमज्ञानाविरोधित्वाच्च तादृशि पक्षे तादृश-साध्यवैशिष्ट्यस्य तादृशसाध्यनिरूपितव्याप्तिविशिष्टतादृशहेतुवै-शिष्ट्यस्य चावगाहिनो ज्ञानस्य यद्विषयं ज्ञानं विरोधिविषयकं तत्त्वं तादृशज्ञानाविरोधित्वं वा हेतुदोषत्वम् । ज्ञानविरोधित्वञ्च तद्विषयविषयकग्रहविरोधिग्रहविषयत्वम् । एवंविधैव रीति-रुत्तरत्र सर्वत्र सव्यभिचारलक्षणादावनुसर्त्तव्या इत्यपि केचित् ।

(गा०) यद्विषयकनिश्चयस्येति । यद्रूपावच्छिन्नविषयकनि-श्चयस्येत्यर्थः । उत्तरपदस्य उत्तरकालीनार्थकतया तदुत्तरमितिधा-तूपस्थाप्यानुमितिरूपक्रियाविशेषणमतो द्वितीया । अग्रिमकल्पे तादृशज्ञानरूपक्रियाविशेषणम् , अतो ज्ञानपदमपि सार्थकम् । तत्पदं च तादृशनिश्चयपरामर्शकम्, उत्तरपदं चाव्यवहितोत्तरार्थ-कम् । 'कालाध्वनोरत्यन्तसंयोगे' इत्यनेन द्वितीयाधिकरणे उत्तर-पदस्योत्तरकालपरत्वादिति तु न युक्तम् । व्यापकतार्थकस्यात्यन्त-संयोगस्य प्रकृतेऽविवक्षितत्वात् । अनुमितौ–अनुमितिसामान्ये, द्वयोर्व्यतिरेक इति सम्बन्धः । तत्त्वं–तद्रूपावच्छिन्नत्वम् । अत्र च तज्ज्ञानानन्तरज्ञाननिष्ठतादृशोभयाभावे तज्ज्ञानीयाया एव विरोधि-विषयितायाः प्रयोजकत्वात् । विरोधिविषयितायां तादृशनिश्चयी-यत्वकथनं स्वरूपकीर्त्तनमात्रं न तु लक्षणघटकम् , तथाच यद्रूपाव-च्छिन्नविषयकनिश्चयाव्यवहितोत्तरानुमितिसामान्यस्य विरोधिवि-विषयताप्रयुक्तोभयाभाववत्त्वं तादृशरूपावच्छिन्नत्वं दोष इति स-मुदितलक्षणार्थः । वह्न्यभावविशिष्टह्रदत्वावच्छिन्नविषयकनिश्च-यानन्तरं ह्रदो वह्निमान्वह्निव्याप्यधूमवांश्च इत्याकारकानुमितेः क-दाचिदप्यनुपपत्त्या घटाद्यनुमितय एव तादृशनिश्चयाव्यवहितोत्तरानु-मितिसामान्यान्तर्गताः, तासु च ह्रदत्वादिविशिष्टे यद्वह्निवाद्यव-

च्छिन्नवैशिष्ट्यावगाहित्वं वह्नित्वाद्यवच्छिन्नवह्निनिरूपितव्याप्तिविशिष्टधूमत्वाद्यवच्छिन्नवैशिष्ट्यावगाहित्वं च तदुभयाभाववत्त्वमक्षतमेव। तत्र तादृशनिश्चयीयविरोधिविषयिताप्रयुक्तत्वमपि—स्वनिष्ठप्रतिबन्धकतावच्छेदकधर्मस्य स्वानन्तरोत्पन्नज्ञाननिष्ठप्रतिबध्यतावच्छेदकधर्माभावप्रयोजकत्वात्। ह्रदत्वादिविशिष्टविशेष्यकत्वावच्छिन्नवह्नित्वविशिष्टप्रकारताघटितधर्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकीभूताया ह्रदत्वावच्छिन्नविशेष्यकत्वावच्छिन्नाभावीयप्रकारितायास्तादृशवह्नित्वविशिष्टप्रकारकत्वाभावप्रयोजकत्वे तथात्वात्। न च तादृशविशिष्टप्रकारकत्वमात्रं न विपरीतनिश्चयप्रतिबध्यतावच्छेदकम्, अपि तु तद्विशिष्टानाहार्यज्ञानत्वं तत्कथं तत्प्रकारकत्वाभावस्य तथाविधविरोधिविषयिताप्रयुक्तत्वमिति वाच्यम्। विशिष्टाभावप्रयोजकस्य विशेष्यवन्निष्ठविशेषणाभावप्रयोजकत्वादनाहार्यज्ञानत्वाश्रयानुमित्यादिनिष्ठतादृशविशिष्टप्रकारकत्वाभावस्य विरोधिविषयिताप्रयुक्तत्वाक्षतेरिति—ह्रदो वह्निमान्धूमादित्यादौ वह्न्यभावादिविशिष्टह्रदत्वाद्यवच्छिन्ने लक्षणसमन्वयः। (यद्विषयकनिश्चयाव्यवहितोत्तरानुमितित्वव्यापको विरोधिविषयिताप्रयुक्तो व्यापकत्वविशिष्टसंयोगसंसर्गकवह्नित्वप्रकारकत्वघटितोभयाभावस्तत्त्वमवच्छेदकावच्छेदेन साध्यसिद्धिस्थलीयहेत्वाभासलक्षणम्। व्यापकत्वाद्यविशेषितसंयोगसंसर्गकवह्निप्रकारकघटितोभयाभावघटितं सामानाधिकरण्येन साध्यसिद्धिस्थलीयं लक्षणम्। उभयसाधारणमेकलक्षणं तु न सम्भवति—अवच्छेदकावच्छेदेन साध्यसिद्धौ सामानाधिकरण्येन बाधाव्याप्तेः। सामानाधिकरण्येन साध्यसिद्धौ सामानाधिकरण्येन बाधातिव्याप्तेरप्रसङ्गात्।) निर्वह्निः पर्वतो वह्निमानित्यादौ तादृशानुमितेरप्रसिद्धावपि वह्निमत्पर्वतादिरूपाश्रयासिद्ध्यादिविषयकनिश्चयानन्तरप्रसिद्धघटाद्यनुमितिषु अन्यत्र प्रसिद्धपक्षतावच्छेदकविशिष्टविषयकत्वावच्छिन्नसाध्यतावच्छेदकविशिष्टप्रकारकत्वघटितोभयाभाववत्त्वमक्षतमेवेति तत्र लक्षणसमन्वयः। न चाहार्यज्ञानमात्रप्रसिद्धस्य निर्वह्निपर्वतत्वावच्छिन्नविशेष्यकवह्निप्रकारकज्ञानत्वस्य विरोधिविषयकज्ञानप्रतिबध्यतानवच्छेदकतया तादृशधर्मावच्छिन्ने वह्न्यादिप्रकारकत्वस्याभावे विरोधिविषयताप्रयुक्तत्वमप्रामाणिकमिति वाच्यम्। तादृशज्ञानत्वस्य

प्रतिबध्यतानवच्छेदकत्वेपि तद्व्यापकस्य पर्वतत्वावच्छिन्ने वह्नित्वावच्छिन्नाभावप्रकारकज्ञानत्वस्यैव वह्निविशिष्टपर्वतविषयकनिश्चयप्रतिबध्यतावच्छेदकतया व्यापकाभावप्रयोजकस्य सुतरां व्याप्याभावप्रयोजकतया तादृशविशिष्टविशेष्यकत्वावच्छिन्नवह्न्यादिप्रकारकत्वाभावस्य तादृशदोषविषयताप्रयुक्तत्वस्यावश्यकत्वात् । न च विरोधिज्ञानासत्त्वेपि निर्वह्निः पर्वतो वह्निमानित्यादिज्ञानस्यानाहार्यस्यानुत्पत्त्याइच्छादिघटिततादृशाहार्यज्ञानसामग्र्यभावस्यैव निर्वह्निविशिष्टे वह्न्यादिवैशिष्ट्यावगाहित्वाभावप्रयोजकत्वं न तु विरोधिविषयत्वस्य क्वचिदप्यक्लृप्तत्वादिति वाच्यम् । अभावाधिकरणतायामेव विरोधिविषयताप्रयुक्तत्वस्य निवेश्यतया अधिकरणतानां चाभावाभेदेऽप्यधिकरणभेदेन भिन्नतया विरोधिज्ञानानन्तरोत्पन्नज्ञाने तादृशवैशिष्ट्यावगाहित्वाभावाधिकरणतायां विनिगमनाविरहेण पूर्वज्ञानीयविरोधिविषयताया अपि प्रयोजकत्वात् । यद्विषयताप्रयुक्तः तादृशोभयाभावस्तत्त्वमित्येतावन्मात्रे कृते ह्रदो वह्न्यभाववानित्यादिज्ञानीयवह्न्यभावादिविशिष्टह्रदादिविषयिताया इव तदन्तःपातिवह्न्यभावत्वादिविशिष्टविषयताया अपि प्रतिबन्धकतावच्छेदककोटिप्रविष्टतया प्रतिबध्यतावच्छेदकस्य ह्रदत्वादिविशिष्टे वह्न्यादिवैशिष्ट्यावगाहित्वस्य विरहप्रयोजकतया बाधाद्येकदेशे वह्न्यभावादिरूपविशिष्टेऽतिव्याप्तिरिति यद्विषयकनिश्चयाव्यवहितोत्तरानुमितिसामान्यस्य विरोधिविषयताप्रयुक्तोभयाभाववत्त्वं निवेशितम् । न च यादृशविशिष्टविषयितासामान्यप्रयुक्तस्तादृशोभयाभावस्तत्त्वमित्येव सम्यक् ह्रदत्वादिविशिष्टविषयतासामान्यान्तर्गतायां ह्रद इत्यादिज्ञानीयविषयितायामुभयाभावप्रयोजकत्वासत्त्वादतिव्याप्तेरनवकाशादिति वाच्यम् । पाषाणमयो न वह्निमानित्यादिज्ञानविशिष्टस्य पर्वतः पाषाणमय इति ज्ञानस्य पर्वतो वह्निमानित्यादिज्ञानप्रतिबन्धकतया ज्ञानभेदेन विषयतानां भेदाभावात्, पाषाणमयत्वविशिष्टपर्वतादिविषयतासामान्यस्यैव उभयाभावप्रयोजकत्वात् पाषाणमयत्वविशिष्टपर्वतादावतिव्याप्तेर्दुर्वारत्वात् । ह्रदो वह्न्यभाववानित्यादिह्रदादिविषयकनिश्चयोत्तरोत्पन्नघटानुमितौ विरोधिविषयताप्रयुक्तोभयाभावसत्त्वात् केवलह्रदादावतिव्याप्तिरतः सामान्यपदं परिपूरितम्, तथासति ह्रदादिनिश्चयानन्तरोत्पन्नानुमितिसामान्या-

ऽन्तर्गतायां ह्रद इत्यादिनिश्चयानन्तरजात-ह्रदो वह्निमान् वह्निव्याप्यधूमवांश्च-इत्याद्यनुमितौ विरोधिविषयिताप्रयुक्ततादृशोभयाभावासत्त्वान्नातिव्याप्तिः। द्रव्यत्वादिना वह्न्यभावविशिष्टह्रदादिविषयकनिश्चयानन्तरमुक्तसमूहालम्बनानुमित्युत्पत्त्या तादृशविशिष्टस्यापि दोषत्वानुपपत्तेरतो यत्पदं यद्रूपावच्छिन्नपरतयोपवर्णितम्। वह्न्यभावविशिष्टह्रदादिविषयकस्य ह्रदो वह्निमान्नवेति ज्ञानस्यानन्तरं तादृशसमूहालम्बनानुमित्युत्पत्त्या तद्दोषतावश्यमतो निश्चयेति। अनाहार्याप्रामाण्यज्ञानानास्कन्दितसंशयान्यज्ञानपरम्, तेनाहार्यस्याप्रामाण्यज्ञानास्कन्दितस्यापि दोषविषयकनिश्चयस्यानन्तरं तादृशानुमितावपि न क्षतिः। दोषविषयकनिश्चयनाशे सति तादृशानुमितेरुत्पत्त्या तद्दोषापत्तिरतो अव्यवधाननिवेशः। एवं दोषविषयकलौकिकनिश्चयाव्यवहितपूर्वमनुमित्युत्पत्त्या तद्दोषः स्यादिति अतो उत्तरेति। तत्सामानाधिकरण्यमनुमितौ निवेश्यमतः एकस्य बाधनिश्चयानन्तरमन्यस्यानुमित्युत्पत्तावपि न क्षतिः। बाधनिश्चयानन्तरं पक्षतावच्छेदकावच्छिन्ने साध्यतावच्छेदकावच्छिन्नसाध्यादिप्रकारकस्याहार्यस्य लौकिकस्य च प्रत्यक्षस्योत्पत्त्या तादृशज्ञानसामान्यमुपेक्ष्यानुमितिसामान्यनिवेशः।

यत्साध्यकयत्पक्षकयद्धेतुकस्थले यादृशदोषविषयकनिश्चयानन्तरं कस्याप्यनुमितिर्न जाता तत्र तादृशानुमितेरप्रसिद्ध्याऽव्याप्तिरतोऽनुमितिस्थलेऽनाहार्यदोषविशेषाजन्यज्ञानं निवेश्य कल्पान्तरमाह अनाहार्येति। तथाच तादृशानुमित्यप्रसिद्धिर्यत्र तत्र तथाविधमानसोपनीतभानात्मकमादायैव लक्षणं सङ्गमनीयमिति भावः। बाधाविनिश्चयानन्तरमाहार्यसाध्यादिप्रकारकस्योत्पत्त्या असंभवोऽव्याप्तिर्वेत्यतो अनाहार्येति। शङ्खो न पीत इत्यादिनिश्चयानन्तरं शङ्खादौ पीतत्वादिप्रकारकस्य दोषविशेषजन्यचाक्षुषादेरुत्पत्त्या शंखः पीतः शङ्खत्वादित्यादिस्थलीयबाधादावव्याप्तिरतो मानसेति। मानसपदं दोषविशेषाजन्यज्ञानपरम्। तेन नाहं गौर इत्यादिनिश्चयानन्तरं मिथ्याज्ञानजन्यवासनादिरूपदोषजन्यस्यात्मविशेष्यकगौरत्वादिप्रकारकमानसस्योत्पत्तावपि अहं गौरः आत्मत्वादित्यादिस्थलीयबाधादौ नाव्याप्तिः। एतेन यादृशसाध्यपक्षहेतुकस्थले दोषविषयकनिश्चयानन्तरं विरोधिसामग्र्यादिवशेन मानसज्ञानं कदापि न जातं तत्रा-

व्याप्तिरित्यपि निरस्तम्। तत्राप्यनुमितिशाब्दबोधादिकमादाय लक्षणगमनसम्भवात्। पक्षतावच्छेदकेत्यादिदलद्वयनिवेशव्यावृत्तिः पूर्वोक्तरीत्या बोध्या। विरोधिविषयताप्रयुक्तत्वनिवेशनप्रयोजनं स्वयमेव वक्ष्यति। यत्र विषयविशेषे समूहालम्बनज्ञानं न कस्यापि जातं तत्र पक्षतावच्छेदकविशिष्टे साध्यवैशिष्ट्यावगाहित्वविशिष्टसाध्यव्याप्तिविशिष्टहेतुवैशिष्ट्यावगाहित्वाभावरूपविशिष्टाभावमुपेक्ष्योभयाभावः स्वीकृतः। तादृशोभयाभावप्रयोजकविरोधिविषयितावत्त्वं यद्रूपविशिष्टविषयिताव्यापकं तद्रूपावच्छिन्नत्वं दोषत्वमित्यस्य सम्भवत्वेपि यथासंनिवेशं न वैयर्थ्यम्।

ननु काञ्चनमयः पर्वतो वह्निमान्धूमादित्यादौ पक्षतावच्छेदकविशिष्टपक्षाद्यप्रसिद्ध्या विशिष्टपक्षे विशिष्टसाध्यादिवैशिष्ट्यावगाहित्वाद्यप्रसिद्धिरित्याश्रयासिद्ध्यादावव्याप्तिरित्यत आह पक्षतावच्छेदकेति। आदिपदात्साध्यतावच्छेदकवैशिष्ट्यादिपरिग्रहः। वैशिष्ट्यमिति। तत्प्रकारेण ज्ञायमानत्वमित्यर्थः। तथाच पर्वतादेः काञ्चनमयत्वादिवैशिष्ट्यस्य वास्तविकस्य विरहेऽपि तेन रूपेण ज्ञायमानत्वमादाय लक्षणसमन्वय इति भावः। न च ह्रदो न वह्निमानित्यादिनिश्चयानन्तरं जायमाने ह्रदो द्रव्यं जलमयं वह्निमदित्याकारकसमूहालम्बने ह्रदत्वादिना ज्ञायमाने वह्न्यादिवैशिष्ट्यावगाहित्वसत्त्वादसम्भव इति वाच्यम्। पक्षतावच्छेदकावच्छिन्ना या पक्षनिष्ठविशेष्यता तन्निरूपिता या साध्यतावच्छेदकावच्छिन्नसाध्यप्रकारता या च साध्यतावच्छेदकावच्छिन्नसाध्यप्रकारता तन्निरूपितव्याप्यत्वप्रकारतानिरूपितहेतुतावच्छेदकावच्छिन्नहेतुप्रकारता तत्प्रतियोगितयोरवगाहितान्तद्वयेन विवक्षणात्। विशिष्टविषयताऽप्रसिद्धावपि पर्वताद्यंशे काञ्चनमयत्वाद्यवगाहिभ्रमविषयताया व्यधिकरणकाञ्चनमयत्वाद्यवच्छिन्नायाः प्रसिद्ध्या लक्षणसमन्वयात्। व्याप्तिप्रकारतास्थाने च निरूप्यनिरूपकभावापन्नव्याप्तिघटकतत्तत्पदार्थप्रकारता निवेशनीया, तेन धूमवान्वह्नेरित्यादौ वह्निव्यापकधूमसामानाधिकरण्यरूपव्याप्तेरप्रसिद्धावपि न क्षतिः।

नन्वत्र व्याप्तिपदेनान्वयव्याप्तिश्चेदुच्यते तदा व्यतिरेकव्याप्तिज्ञानविरोधिनि साध्यादिनिष्ठाभावाप्रतियोगित्वादिरूपानुपसंहारित्वेऽव्याप्तिस्तादृशज्ञानस्यान्वयज्ञानाविरोधित्वात्। व्यतिरेकव्याप्ति-

विवक्षणे च हेतुनिष्ठसाध्याभाववद्वृत्तित्वसाध्यतावच्छेदकनिष्ठहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वादावव्याप्तिस्तज्ज्ञानस्य ग्राह्याभावाद्यनवगाहितया व्यतिरेकव्याप्तिज्ञानविरोधित्वे मानाभावत आह व्याप्तिश्चेति । अन्वयतः—अन्वयनिरूपिता प्रकृतहेतुनिष्ठा प्रकृतसाध्यनिरूपितेति यावत् । सा चात्यन्तान्योन्याभावभेदेन भिन्ना अव्यभिचरितसामानाधिकरण्यरूपेण नानाविधैव ग्राह्या । अतोऽत्यन्ताभावादिगर्भव्याप्तिज्ञाने अन्योन्याभावादिगर्भव्यभिचारज्ञानस्य व्यापकताज्ञाने साध्याभाववद्वृत्तित्वादिज्ञानस्य ग्राह्याभावानवगाहितयाऽविरोधित्वेऽपि न क्षतिः । व्यतिरेकतः—व्यतिरेकनिरूपिता साध्याभावव्यापकीभूताभावप्रतियोगित्वरूपा ग्राह्या—व्याप्तिपदेन विवक्षणीया, तथाच तत्र व्याप्तिप्रकारतानिरूपितहेतुतावच्छेदकावच्छिन्नप्रकारताप्रतियोगित्वकूटाभावो निवेशनीय इति भावः ।

ननु निर्वह्निः पर्वतो वह्निमानित्यादौ पक्षतावच्छेदकविशिष्टे साध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वमेवाप्रसिद्धमिति कथं लक्षणसमन्वय इत्यत आह तादृशावगाहित्वप्रसिद्धिरिति । आहार्यज्ञान एवेति । निर्वह्नित्वविशिष्टे वह्निप्रत्यक्षं जायतामित्याकारकेच्छाजन्यप्रत्यक्ष एवेत्यर्थः ।

विरोधिविषयताप्रयुक्तत्वनिवेशप्रयोजनमाह एवञ्चेति । विरोधिविषयताप्रयुक्तत्वानिवेशने चेत्यर्थः । न क्षतिः—न निर्वह्निः पर्वतो वह्निमानित्यादौ घटादावतिव्याप्तिः, तस्य—घटादिनिश्चयस्य—विरोध्यविषयत्वात्—स्वानन्तरानुमितिसामान्यनिष्ठतादृशोभयाभावप्रयोजकविरोधिविषयताकत्वविरहात् । वह्निमत्पर्वतादिविषयकसमूहालम्बनात्मकघटादिनिश्चयानन्तरजातज्ञाननिष्ठतादृशोभयाभाववत्त्वस्य तज्ज्ञानीयविरोधिविषयताप्रयुक्तत्वेऽपि घटादिनिश्चयाव्यवहितोत्तरानुमितिसामान्यान्तर्गतसमूहालम्बनात्मकघटादिनिश्चयाव्यवहितोत्तरानुमितौ विरोधिविषयताप्रयुक्तोभयाभाववत्त्वविरहान्नातिव्याप्तिरिति भावः । प्रयोज्यप्रयोजकभावश्चानुभवसिद्धः स्वरूपसम्बन्धविशेषः ।

विरोधिपदप्रयोजनमाह एवमिति । अनुमितावपीति । न क्षतिः, तस्य विरोध्यविषयकत्वादित्यनुषज्यते । न क्षतिः—न साध्यवत्पक्षेऽतिव्याप्तिः । विरोधिविषयतापदेन तादृशोभयाभावप्रतियोगिताव-

च्छेदककोटौ यद्रूपावच्छिन्नांशे यद्रूपावच्छिन्नवैशिष्ट्यावगाहित्वं निविष्टं तद्रूपावच्छिन्नविषयितानिरूपिततद्रूपावच्छिन्नाभाववद्व्याप्यान्यतरविषयितायाः साध्यतावच्छेदकावच्छिन्नप्रकारता निरूपितपक्षतावच्छेदकावच्छिन्नविषयितान्यविषयितायाः वा विवक्षितत्वादिति भावः। न च सिषाधयिषाधीनायां साध्यनिश्चयानन्तरसमूहालम्बनानुमितौ तादृशोभयाभावासत्त्वात् सिद्धिविरहेऽतिप्रसङ्ग एव नास्ति, एवं पक्षे साध्यनिश्चयोत्तरं तदतिरिक्ताविषयकसाध्यविधेयकानुमितेरनुत्पादेऽपि पक्षांशे साध्यांशे वा अधिकावगाहिन्या अनुमितेस्साध्यधर्मितावच्छेदकतापन्नपर्वतत्वावच्छिन्नधर्मिताकान्यविधेयकानुमितेः साध्यावच्छिन्नपक्षविधेयकानुमितेश्चोत्पत्त्या तत्रोभयाभावासत्त्वादपि नातिप्रसङ्गप्रसक्तिरिति वाच्यम्। यत्र सिषाधयिषाबलात् सिद्ध्युत्तरं तादृशानुमितिः कदापि न जाता तत्रैवातिव्याप्तिसम्भवात्।

द्वितीयकल्पे विषयितामात्रं निवेश्यं न तु विरोधिविषयतापर्यन्तमित्याशयेनाह मानसज्ञानेति। साध्यनिश्चयस्येत्यादिः। मेयत्वविशिष्टव्यभिचारादिवारणाय यथाश्रुतविशिष्टान्तराघटितत्वनिवेशे उपदर्शितव्यभिचारघटितबाधाद्यव्याप्त्या विशिष्टान्तरविषयित्वाप्रयोज्यस्वविषयिताप्रयोज्यतादृशोभयाभावप्रयोजकाभावाधिकरणताकत्वरूपं तादृशविशेषणं निवेश्यम्। मेयत्वविशिष्टव्यभिचारादिविषयिताप्रयोज्याया उक्तोभयाभावप्रयोजकव्याप्त्याद्यवगाहित्वाभाववत्तायाः शुद्धव्यभिचारादिविषयिताप्रयोज्यत्वनियमेन न मेयत्वविशिष्टव्यभिचारादौ विशिष्टान्तरविषयित्वाप्रयोज्यस्वविषयिताप्रयोज्यनिरुक्तोभयाभावप्रयोजकभावाधिकरणताकत्वमिति नातिप्रसङ्गः। उपदर्शितव्यभिचारघटितबाधादिविषयिताप्रयोज्यायाः पक्षे साध्यावगाहित्वाद्यभावाधिकरणतायास्तद्घटकव्यभिचारादिविषयित्वाप्रयोज्यत्वेन तत्संग्रहः। न च विशिष्टपक्षे विशिष्टसाध्यवत्ताग्रहप्रतिबन्धकतावच्छेदिकायास्तादृशबाधादिविषयतान्तःपातिव्यभिचारादिविषयिताया अपि तादृशबाधादिविषयताप्रयोज्यायां विशिष्टपक्षे विशिष्टसाध्यवैशिष्ट्यावगाहित्वाद्यभावाधिकरणतायां प्रयोजकतया तादृशबाधादेर्दुःसङ्ग्रह इति वाच्यम्। यत्किञ्चिद्विशिष्टान्तरविषयितात्वव्यापकरूपावच्छिन्नाप्रयोज्यत्वनिवेशेन तत्र तत्सङ्ग्रहसम्भवात्।

व्यभिचारादिविषयितायाः बाधविषयतान्तःपातिविषयतामात्रवृत्तिरूपेणैवोपदर्शितसाध्यवत्ताग्रहप्रतिबन्धकतावच्छेदकतया तेनैव रूपेण तादृशसाध्यावगाहित्वविरहवत्ताप्रयोजकत्वात्, तादृशस्य च रूपस्य बाधादिविषयतानन्तःपातिव्यभिचारादिविषयतासाधारण(स्य) व्यभिचारादिरूपविशिष्टविषयतात्वाव्यापकत्वात्, तद्व्यापकरूपावच्छिन्नाप्रयोज्यत्वस्योक्तबाधादिविषयताप्रयोज्यउक्तसाध्यावगाहित्वाभाववत्तायामक्षतत्वात्। मेयत्वविशिष्टव्यभिचारादिविषयताया येन रूपेण व्याप्त्यादिग्रहप्रतिबन्धकतावच्छेदकता तद्रूपेण निरुक्तविषयतात्वव्यापकेन मेयत्वविशिष्टव्यभिचारादिविषयतान्तःपातिव्यभिचारादिविषयतायाः मेयत्वविशिष्टव्यभिचारादिविषयताप्रयोज्यव्याप्त्यवगाहित्वाभाववत्तायां नियमतः प्रयोजकत्वान्नातिप्रसङ्गावकाशः। बाधसत्प्रतिपक्षादिविषयकज्ञानस्य नानाविधबाधादिविषयकज्ञानस्य वाऽनन्तरं जातायां घटाद्यनुमितौ बाधादिविषयताप्रयोज्याया अभावाधिकरणता तस्या विशिष्टान्तरविषयताप्रयोज्यत्वेऽपि (स्व)पूर्ववृत्तिज्ञानीयविरोधिविषयताया एव स्वनिष्ठप्रतिबध्यतावच्छेदकाभावाधिकरणताप्रयोजकत्वात्। एकैकविधबाधादिमात्रज्ञानानन्तरजातज्ञाने या तत्तद्बाधादिविषयत प्रयोज्यावगाहित्वाभावाधिकरणता तस्या विशिष्टान्तरविषयित्वाप्रयोज्यतया बाधादौ लक्षणसमन्वयः। व्यभिचारघटितबाधादिविषयिताप्रयोज्याया दीधितिकारोक्तोभयाभावाधिकरणताया व्याप्त्याद्यवगाहिताविरहप्रयोज्यत्वेन यत्किञ्चिद्विशिष्टान्तरविषयितात्वव्यापकरूपावच्छिन्नतादृशविषयतान्तःपातिव्यभिचारादिविषयताप्रयोज्यत्वनियमात्तत्सङ्ग्रहाय तादृशोभयाभावप्रयोजकाभावाधिकरणतापर्यन्तनिवेशः। तथासति दर्शितोभयाभावाधिकरणताया उक्तरूपावच्छिन्नव्यभिचारादिविषयताप्रयोज्यत्वनियमेऽपि तादृशोभयाभावप्रयोजकसाध्यादिमत्तावगाहित्वाभावाधिकरणताया उक्तरूपावच्छिन्नव्यभिचारादिविषयित्वाप्रयोज्यत्वेन तादृशबाधादेः सङ्ग्रहा(द्बाधादिविषयताप्रयोज्यस्य साध्यादिमत्तावगाहिताविरहस्य सत्प्रतिपक्षादिरूपविशिष्टान्तरविषयताप्रयोज्यत्वानियमादसम्भवः स्यादित्युभयाभावप्रयोजकाभावे विशिष्टान्तराविषयत्वाप्रयोज्यत्वमनिवेश्य तादृशाभावाधिकरणतायां तन्निवेशः। तथासत्यधिकरणताया अधिकरणभेदेन भिन्नतया पूर्ववर्तिनिष्ठप्रतिबन्धकता-

वच्छेदकधर्मस्यैव तदुत्तरोत्पन्ननिष्ठप्रतिबध्यतावच्छेदकधर्माभावाधिकरणताप्रयोजकत्वेनैव बाधादिनिश्चयोत्तरोत्पन्नानुमितिनिष्ठसाध्यादिमत्त्वावगाहित्वाभावाधिकरणतायां सत्प्रतिपक्षान्यादृशबाधादिविषयताया अप्रयोजकत्वेन सामञ्जस्यात् ।)

अथैतादृशोभयाभावघटितलक्षणकरणेऽपि केवलनिर्वह्नित्वादिपक्षककवह्न्यादिसाध्यकस्थलीयनिर्वह्निनिष्ठवह्न्यभावादिरूपबाधादिदोषेऽव्याप्तिः–तादृशबाधादिस्थलीयवह्न्यभावरूपबाधज्ञानस्याप्रतिबन्धकतया तदीयविषयतायाः प्रतिबन्धकतानवच्छेदकतया तथाविधोभयाभावाप्रयोजकत्वात् । तस्य दोषत्वानुपगमे च तादृशहेतौ दुष्टत्वव्यवहारानुपपत्तेः । इष्टापत्तौ च निर्वह्निः पर्वतो वह्निमानित्यादावपि तत्सम्भवेनैतादृशप्रयासवैफल्याच्च । न च तत्राभाववान्वह्निमानित्यनाहार्यज्ञानस्य प्रसिद्ध्या तत्प्रतिबन्धकीभूतस्याभाववान्निर्वह्निरित्यादिज्ञानस्य विषय एव दोष इति वाच्यम् । अभाववत्त्वसामानाधिकरण्येन निर्वह्नित्वग्रहस्य तादृशवह्निमत्त्वग्रहाविरोधित्वात् । अभाववत्त्वावच्छेदेन वह्न्यादिमत्ताग्रहविरोधित्वेऽपि तादृशवह्न्यादिमत्त्वावगाहित्वस्य वह्न्यभावादिमत्त्वरूपपक्षतावच्छेदकविशिष्टे साध्यवैशिष्ट्यावगाहित्वाव्यापकतया तदवच्छिन्नप्रतिबन्धकतावच्छेदकविषयितायास्तथाविधोभयाभावाप्रयोजकत्वात् तद्विषयस्य दोषत्वानुपपत्तेः अभाववत्त्वावच्छेदेन निर्वह्नित्वग्रहस्य भ्रमरूपतया तद्विषयकविशिष्टस्यैवाप्रसिद्धेः । एवं वह्निमान्निर्वह्निरित्यादिस्थलीयदोषे नितरामव्याप्तिः । वह्निमन्निष्ठवह्निमत्त्वादेरेव तत्र दोषत्वसम्भवात्तद्विषयकज्ञानस्य च कदाचिदपि प्रतिबन्धकत्वायोगात् । एवं यत्र निर्वह्निः पर्वतो वह्निमानित्यादौ पर्वतत्वादिसामानाधिकरण्येन वह्न्यभावादिमत्त्वस्य पक्षतावच्छेदकघटकता तत्र पर्वतत्वादिसामानाधिकरण्येन वह्न्यादिमत्त्वं न दोषः । विशिष्टपक्षग्रहाद्यविरोधित्वेनाश्रयासिद्ध्यादिरूपतानुपपत्तेः, उक्तरीत्यैतल्लक्षणानाक्रान्तत्वाच्च । पर्वतत्वावच्छेदेन वह्न्यादिमत्त्वमप्रसिद्धं वह्निशून्यपर्वतादेरपि सत्त्वात् । नापि पर्वतत्वादिसामानाधिकरण्येन पर्वतत्वावच्छेदेन वा वह्न्यभावादिमत्त्वरूपबाधादिर्दोषः–तज्ज्ञानस्य पक्षतावच्छेदकविशिष्टे साध्यवैशिष्ट्यावगाहित्वव्यापकविषयिताघटितधर्मावच्छिन्नाप्रतिबन्धकतया तत्र लक्षणगमनायोगात् । नापि प-

पर्वतत्वावच्छेदेन वह्न्यभावादिमत्त्वम् अप्रसिद्धत्वादिति तत्र न कोपि दोषः स्यात् ।

यत्तु प्रयुक्तत्वं व्यापकत्वं यद्विषयकनिश्चयनिष्ठविरोधिविषयतायाः उभयाभावव्याप्यत्वं च स्वाश्रयतादृशनिश्चयाव्यवहितोत्तरानुमितित्वसम्बन्धेन, तादृशसम्बन्धलाभायैव तदुत्तरमनुमितावित्युक्तम् । एवं च विरोधिविषयकयद्विषयकनिश्चयाव्यवहितोत्तरानुमितित्वव्यापकस्तादृशाभाव इति पर्यवसितम् । एवं च निर्वह्निर्वह्निमानित्यादिस्थलीयबाधादेर्विषयितायां स्वरूपसम्बन्धरूपोभयाभावप्रयोजकत्वासंभवेऽपि निरुक्तोभयाभावप्रतियोगितावच्छेदककोटौ यद्रूपावच्छिन्नविशेष्यकयद्रूपावच्छिन्नप्रकारकत्वं निविष्टं तद्रूपावच्छिन्नविशेष्यकतद्रूपावच्छिन्नाभावतद्व्याप्यान्यतरकत्वस्यैव विरोधिविषयित्वार्थकतया तत्र लक्षणं सुसमन्वयमेव तादृशप्रयोजकत्वस्यानिवेशात् । न चैवं तत्र वस्तुमात्रेऽतिव्याप्तिर्दुर्वारैव तादृशोभयाभावस्य विरोधिविषयकसमूहालम्बनरूपघटादिविषयनिश्चयाव्यवहितोत्तरानुमितित्वव्यापकताया अक्षतत्वादिति वाच्यम् । विरोधिविषयतानतिरिक्तवृत्तियद्विषयताशालिनिश्चयस्य निश्चयान्तेन विवक्षितत्वात् । घटादिविषयतायास्तत्र निरुक्तविरोधिविषयतानतिरिक्तत्वविरहात् । न चैवं विरोधिविषयतानतिरिक्तवृत्तिर्यदीयविषयिता तत्त्वमित्येतावतैव सामञ्जस्ये शेषवैयर्थ्यमिति वाच्यम् । यत्र पर्वतादिसामानाधिकरण्येन वह्न्यादेः साध्यता तत्र पर्वतत्वादिसामानाधिकरण्येन वह्न्याद्यभावादिमत्त्वस्य विषयिताया निरुक्तविरोधिविषयितानतिरिक्ततया तत्रातिव्याप्तिवारकतयाऽशेषसार्थक्यात् । तदुपादाने तादृशवह्न्यभावादिमत्त्वविषयनिश्चयानन्तरं पर्वतत्वादिसामानाधिकरण्येन वह्न्याद्यनुमित्युत्पत्त्या तादृशानुमितौ तथाविधोभयसत्त्वेनातिव्याप्त्यनवकाशादिति ।

तत्तुच्छम् । निर्वह्निः पर्वतो वह्निमानित्यादौ यत्र पर्वतत्वादिसामानाधिकरण्येन वह्न्यभावादेः पक्षतावच्छेदकघटकता पर्वतत्वसामानाधिकरण्येन वह्न्यादिमत्त्वस्य विशिष्टपक्षग्रहाविरोधित्वेनाश्रयासिद्ध्यनात्मकस्य हेत्वाभासान्तरताभयेनासम्भवद्दोषभावस्य निरुक्तविरोधिविषयतानतिरिक्तवृत्तिविषयिताकतयाऽतिव्याप्तिः ।

तादृशोभयाभावप्रतियोगितावच्छेदकगर्भे यद्रूपविशिष्टे येन सम्बन्धेन यद्रूपावच्छिन्नवैशिष्ट्यावगाहित्वं निवेश्यते तद्रूपावच्छिन्नविशेष्यकतद्रूपावच्छिन्नप्रकारकानुमितित्वावच्छिन्ननिरूपितप्रतिबन्धकतावच्छेदकत्वरूपविरोधित्वस्य विषयतायां निवेशे तु शेषवैयर्थ्यम्। उक्तरीत्या निर्वह्निर्वह्निमानित्यादिस्थलीयदोषेऽव्याप्तिश्च।

यत्तु पक्षतावच्छेदकविशिष्टे निरुक्तसाध्यहेतुवैशिष्ट्यावगाहिनिश्चयावृत्तिर्विषयतैव विरोधिविषयतापदार्थः। तथाच यन्निरूपिततादृशविषयताशालिनिश्चयोत्तरानुमितित्वव्यापकः उभयाभावस्तत्त्वमिति समुदायार्थः। निश्चयत्वं च विशेषणविशेष्यतावच्छेदकभावानापन्नविरोधिकोटिद्वयप्रकारकैकधर्मिविशेष्यकज्ञानान्यज्ञानत्वम्। कोटिद्वये विशेषणविशेष्यतावच्छेदकभावानापन्नत्वानिवेशान्निर्वह्निः पर्वतो वह्निमानित्यादौ पक्षतावच्छेदकविशिष्टसाध्यादिवैशिष्ट्यग्रहस्य एकत्र विरोधिद्वयप्रकारत्वनियमेपि न तादृशवैशिष्ट्यावगाहिनिश्चयाप्रसिद्धिः। यदीयविषयिता तादृशनिश्चयावृत्तिस्तत्त्वमित्येतावत्कृते ह्रदो वह्निव्याप्यधूमवानित्यादौ ह्रदनिष्ठवन्ह्यभावादिमत्त्वेऽतिव्याप्तिः। वन्ह्यादिव्याप्यवत्तानिश्चयस्यापि वन्ह्यादिनिश्चयवत् कार्यसहभावेन वह्न्यभावादिग्रहविरोधित्वाद्वन्ह्यभावादिमत्त्वविषयितायास्तादृशनिश्चयावृत्तित्वादिति न शेषवैयर्थ्यमिति।

तदपि न। वह्निव्याप्यवान्वह्निव्याप्यव्याप्यवांश्च ह्रदो वह्न्यभाववानित्येतादृशाहार्यज्ञानोपगमे च वह्न्यभावादिमत्त्वविषयितया वह्निव्याप्यादिमत्त्वनिश्चयवृत्तितया उक्तातिव्याप्त्यनवकाशेन शेषसार्थक्यानुपपत्तेः। वह्निमान्वह्निव्याप्यवांश्च ह्रदो वह्न्यभाववानित्येतादृशाहार्यसाध्यादिवैशिष्ट्यनिश्चये ह्रदो वह्निमानित्यादिस्थलीयबाधादिविषयितासत्त्वेनासंभवप्रसङ्गाच्च। वह्न्यादिरूपधर्मितावच्छेदकानवच्छिन्नवह्न्यभावादिविशेषितह्रदादिनिरूपितविषयितायाः साध्यादिनिश्चयावृत्तित्वेपि घटादिनिरूपितविषयिताया अपि दोषविषयितावच्छिन्नाया विषयितायाः साध्यादिनिश्चयावृत्तितया घटादावुदासीने अतिव्याप्तेर्वारणाय यादृशविशिष्टविषयितासामान्यं तादृशनिश्चयावृत्ति तादृशविशिष्टनिरूपितविषयिताया एव विरोधिविषयितेत्यनेन विवक्षणीयतयाऽप्रतीकारात्। अमान्यवृत्तित्व-

दीयविषयितासामान्यं तादृशनिश्चयावृत्ति तदीयविषयिताया एव विवक्षणेन निर्वाहेऽपि विरोधियद्विषयताशालिनिश्चयोत्तरानुमितिसामान्ये द्वयोर्व्यतिरेक इत्यभिधाय यद्विषयकनिश्चयस्येत्यादिवक्ष्यमाणाभिधानस्य ग्रन्थकाररीतिविरुद्धत्वात् ।

एतेन विषयिताया उभयाभावप्रयोजकत्वं तादृशोभयाभावप्रतियोगितावच्छेदकत्वं यद्रूपविशिष्टे येन सम्बन्धेन यद्रूपावच्छिन्नवैशिष्ट्यावगाहित्वघटितं तद्रूपावच्छिन्नविशेष्यकतत्संसर्गकतद्रूपावच्छिन्नप्रकारकत्वविशेषितेनानुमितित्वेनानाहार्यलौकिकसन्निकर्षाद्यजन्यज्ञानत्वेन वाऽवच्छिन्ना या प्रतिबध्यता तन्निरूपितप्रतिबन्धकतावच्छेदकत्वम् । एवं च यादृशविशिष्टविषयिता निरुक्तथाविधोभयाभावप्रयोजकताश्रयस्तादृशत्वमेव लक्षणम् । विषयितादौ विरोधित्वादिकथनं तु स्वरूपाख्यानमात्रमिति प्रलपितमप्यनादेयम् । निर्वह्निर्वह्निमानित्यादिस्थलीयदोषस्योक्तयुक्त्या दुःसंग्रहत्वात् ।

अत्र केचित् कश्चिदित्यन्ताग्रिमकल्पे दीधितिकृतां न निर्भरः । निर्वह्निर्वह्निमानित्यादिस्थलीयदोषासंग्रहेणास्वरसस्याग्रिमकल्पे कश्चिदित्यनेनैव,अत्रापि कल्पे वदन्तीत्यनेन सूचितत्वात् । निर्भरस्तु केचिदित्यादिकल्प एव, अत एव तत्र प्रकर्षबोधनाय प्राहुरित्युक्तमिति ।

परे तु घटाद्यभावादिधर्मितावच्छेदककवह्न्यादिज्ञानं प्रति तद्धर्मितावच्छेदककवह्न्यभावादिमत्ताज्ञानप्रतिबन्धकत्वे कल्पनीये धर्मितावच्छेदकभेदेन तत्कल्पनाप्रयुक्तलाघवानुरोधेन धर्मितावच्छेदकधर्मानिवेश्य अनाहार्यवह्न्यादिविशिष्टबुद्धित्ववह्न्यभावादिनिश्चयत्वाभ्यां समानधर्मितावच्छेदकत्वप्रत्यासत्त्यैव प्रतिबन्धकभावः कल्प्यते । एवं च तद्देशनिष्ठस्य पूर्ववर्तिप्रतिबन्धकनिरूपितप्रतिबन्धकतावच्छेदकसम्बन्धस्य उत्तरवर्तिनिष्ठप्रतिबध्यतावच्छेदकसम्बन्धेन तद्देशासम्बन्धित्वं प्रति प्रयोजकतया वह्न्यभावादिप्रकारकज्ञानीयधर्मितावच्छेदकताख्यविषयतायास्तदुत्तरोत्पन्नाहार्यवह्न्यादिप्रकारकज्ञानस्य वह्न्यभावादिधर्मितावच्छेदककत्वविरहप्रयोजकत्वात् वह्न्यभावादिविशिष्टे वह्न्यादिवैशिष्ट्यावगाहित्वविरहस्य,वह्न्यभावादिधर्मितावच्छेदककवह्न्यभावादिप्रकारकनिश्चयीयविषयताप्रयुक्तत्वमक्षतमेवेति तादृशनिश्चयविषयस्य दोषत्वमव्याहतमेव । न च धर्मितावच्छेदकानिष्ठप्रत्यासत्त्या विपरीति·

ज्ञानस्य प्रतिबन्धकत्वे निर्वह्निविशेष्यकवह्निप्रत्यक्षं मे जायतामित्याकारकेच्छाजन्यस्य निर्वह्निर्वह्निमान्घटाभाववांश्च वह्निमानित्याद्याहार्यज्ञानस्य विपरीतज्ञानप्रतिबध्यतावच्छेदकानाक्रान्ततया घटाभाववान्वह्न्यभाववानित्यादिनिश्चयकाले तथाविधेच्छासत्त्वे घटाभावविशिष्टविशेष्यकवह्निज्ञानं मे जायतामित्याकारकेच्छां विनैव तादृशज्ञानापत्तिरिति वाच्यम् । यतः सामान्यतो वह्न्यादिज्ञानेच्छाविशिष्टान्यत्वरूपमनाहार्यत्वं न प्रतिबध्यतावच्छेदककोटौ निवेशनीयम्, किन्त्वाहार्यज्ञानोपपत्त्यर्थं विशेष्यतानिष्ठं यत्स्वविशेष्यतावच्छेदकत्वं तदवच्छेदकतावच्छेदकत्वसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यादिज्ञानेच्छाविरहस्य या स्वाव्यवहितप्राक्क्षणावच्छिन्नाधिकरणता तद्विशिष्टधर्मितावच्छेदकताया एव प्रतिबध्यतावच्छेदकसम्बन्धत्वमुपेयते तादृशेच्छाविरहस्य प्रतिबन्धकविशेषणत्वमेव वा विशेषणताविशेषधर्मितावच्छेदकताघटितसामानाधिकरण्यसम्बन्धेनोपगन्तव्यम्, उक्तस्थले च घटाभावादौ तादृशेच्छाविरहस्य सत्त्वान्नोक्तापत्तिः । अन्यत्राधिकमनुसन्धेयमिति वदन्ति ।

निर्वह्निः पर्वतो वह्निमानित्यादिस्थलीयदोषसाधारण्याय प्रकारान्तरेण वर्णयतां केषाञ्चिन्मतमाह तादृशपक्ष इति । पक्षतावच्छेदकविशिष्टपक्ष इत्यर्थः । तादृशसाध्य इति । साध्यतावच्छेदकविशिष्टसाध्येत्यर्थः । तादृशहेताविति । हेतुतावच्छेदकविशिष्टहेतावित्यर्थः । ज्ञानस्य विरोधिविषयकं यद्विषयकं ज्ञानमिति योजना । ज्ञानं ज्ञानसामान्यम्, तेन घटादिविषयकस्य कस्यचित्समूहालम्बनस्य तादृशज्ञानविरोधिबाधादिविषयकत्वेपि नातिप्रसङ्गः । स्वावच्छिन्नविषयकत्वव्यापकतादृशज्ञानविरोधिविषयिताकधर्मवत्त्वमिति फलितार्थः ।

अत्र च विषयितानिष्ठं स्वरूपसम्बन्धरूपतादृशज्ञानविषयविषयकग्रहप्रतिबन्धकतावच्छेदकत्वात्मकतादृशज्ञानविरोधित्वमेव निवेशनीयं न तु विषयनिष्ठं निर्वाच्यतादृशज्ञानविरोधित्वं तस्यैव लक्षणत्वसम्भवेन शेषवैयर्थ्यप्रसङ्गात् । अत्र च विषयनिष्ठस्य निर्वाच्यतादृशज्ञानविरोधित्वस्यैतदपेक्षया लघुतया तदेवाह तादृशज्ञानविरोधित्वं चेति । तादृशज्ञानविरोधित्वं यदि तादृशज्ञानप्रतिबन्धकतावच्छेदकस्वावच्छिन्नविषयिताकधर्मवत्त्वं तदा पूर्वनि-

रुक्तयथाश्रुतार्थ एव पर्यवसानान्निर्वह्निः पर्वतो वह्निमानित्यादिस्थलीयदोषाव्याप्तितादवस्थ्यमिति तन्निर्वक्ति तज्ज्ञानविरोधित्वं चेति। तद्विषयविषयकेति। तथा च निर्वह्निः पर्वतो वह्निमानित्यादौ तादृशज्ञानविरोधिज्ञानाप्रसिद्धावपि तद्विषयविषयकस्य निर्वह्निः पर्वतो वह्निमानित्यादिज्ञानस्य प्रतिबन्धकं यद्वह्निमानित्यादिज्ञानं तद्विषयतामादायैव वह्निमत्पर्वतादिरूपतत्स्थलीयाश्रयासिद्ध्यादौ लक्षणसमन्वयः।

अथ घटवद्भूतलादिरूपोदासीनपदार्थविषयकसमूहालम्बनात्मकपक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्यतद्व्याप्यहेतुप्रकारकज्ञानविषयकघटवद्भूतलादिज्ञानप्रतिबन्धकज्ञानाविषयघटाभाववद्भूतलादावतिव्याप्तिः। न च पक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्यतावच्छेदकविशिष्टसाध्यतान्निरूपितव्याप्तिविशिष्टहेतुतावच्छेदकावच्छिन्नप्रकारकग्रहत्वव्यापकविषयिताघटितधर्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वावच्छिन्नविषयताकधर्मवत्त्वनिवेशान्न दोषः—घटवद्भूतलादिविषयितायास्तादृशग्रहत्वाव्यापकत्वादिति वाच्यम्। यतः पर्वताद्यंशे वह्निमत्त्वाद्यनवगाहिनो निर्वह्निः पर्वत इत्यादिज्ञानस्य या वह्निप्रकारकत्वाद्यनिरूपिता निर्वह्नित्वादिप्रकारतानिरूपितपर्वतादिविषयिता सैवानाहार्यत्वविशिष्टतया वह्निमत्पर्वत इत्यादिज्ञानप्रतिबध्यतावच्छेदिका तस्याश्च निर्वह्निः पर्वतो वह्निमानित्याद्याहार्यज्ञानसाधारण्ये मानाभावः—आहार्यज्ञानसामग्र्यास्तादृशविषयिताप्रयोजकत्वासिद्धेः, विपरीतज्ञानाभावघटितायास्तादृशविषयिताप्रयोजकानाहार्यज्ञानसामग्र्याश्चाहार्यज्ञानाजनकत्वात्। तादृशग्रहत्वव्यापिका च वह्निमत्त्वादिप्रकारतानिरूपिता तादृशपर्वतादिविषयिता सा च न प्रतिबध्यतावच्छेदिकेति निर्वह्नित्वादिप्रकारतानिरूपितपर्वतत्वादिविषयितात्वेन निर्वह्निः पर्वत इत्यादिज्ञानीयविषयितापि तथाविधग्रहत्वव्यापिकेति चेत्तर्हि विषयितात्वादिनापि तद्व्यापकतयोदासीनपदार्थवारणमशक्यम्।

नैवम्। यद्रूपावच्छिन्ने यद्रूपावच्छिन्नप्रकारकत्वतत्त्वावच्छिन्नं तादृशग्रहत्वव्यापकं तद्रूपावच्छिन्नविशेष्यकतद्रूपावच्छिन्नप्रकारकग्रहत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वावच्छिन्ननिरूपिताविषयिताकधर्मवत्त्वस्य विवक्षणीयतया सर्वेषामक्षयादिति दिक्।

अत्र चास्वरससूचनाय केचिदिति । स चोक्तयुक्त्या निर्वह्निर्वह्निमानित्यादिस्थलीयदोषासङ्ग्रहेण । न च धर्मितावच्छेदकताप्रत्यासत्त्या वह्निप्रकारकज्ञानं प्रति वह्न्यभावप्रकारकज्ञानस्य प्रतिबन्धकतामते निर्वह्निर्वह्निमानित्येतादृशज्ञानसमानविषयक-पर्वतो वह्निमानित्याकारकानाहार्य-ज्ञानप्रतिबन्धकतामादाय लक्षणसमन्वयस्तत्रापि सम्भवतीति वाच्यम् । तादृशमताश्रयणे पर्वतो वह्निमानित्यादौ वह्न्यभाववद्ध्रदादेर्दोषताप्रसङ्गात् ॥

(दी०) केचित्तु यादृशपक्षकयादृशसाध्यकयादृशहेतौ यावन्तो दोषाः सम्भवन्ति तावदन्यान्यत्वमेकमात्रदोषस्थले च तत्त्वमेव हेत्वाभासत्वम् । स चातिरिक्त एवाऽन्योन्याभाव इति न वैयर्थ्यम् । पञ्चविधभेदोक्तिस्तु तत्सम्भवस्थलाभिप्रायेण, व्यभिचारादेः साध्यादिभेदनियन्त्रितत्वात्, शब्दाभेद(मात्र)स्य चाकिञ्चित्करत्वादिति प्राहुः ।

(गा०) **यादृशेति । सर्वत्र यद्रूपावच्छिन्नार्थकम् । तावदन्यान्यत्वमिति । अत्र च यादृशपक्षसाध्यहेतुस्थले यादृशदोषज्ञानस्य प्रतिबध्यज्ञानं प्रसिद्ध्यति, यथा निर्वह्निः पर्वतो वह्निमान् धूमादित्यादौ वह्निविशिष्टपर्वतरूपाश्रयासिद्धिधूमाभावविशिष्टनिर्वह्निरूपस्वरूपासिद्ध्यादीनां तत्र तादृशदोषाणां ग्राह्याभावतद्व्याप्यघटकभेदेन विशेष्यविशेषणभावभेदेन च विभिन्नानामनुगतेन विशिष्टपक्षे विशिष्टसाधनवैशिष्ट्यग्रहविरोधित्वरूपासिद्धित्वादिनैव तावदन्यान्यत्वघटकभेदप्रतियोगिविधया निवेशः, न तु वह्निविशिष्टपर्वतत्वनिर्धूमत्वविशिष्टनिर्वह्निपर्वतत्वादिना प्रयोजनविरहात् । यादृशदोषविषयकज्ञानस्य प्रतिबध्यज्ञानमप्रसिद्धम् यथा तत्स्थलीयस्य निर्वह्निर्वह्निमानित्यादिस्थलीयस्य च बाधादेर्ज्ञानस्य तादृशदोषाणामगत्या वह्न्यभावविशिष्टनिर्वह्नित्ववह्न्यभावव्याप्यविशिष्टनिर्वह्नित्वनिर्वह्निनिष्ठवह्न्यभावव्याप्यत्वादिनाऽननुगतरूपेणैव निवेशः । अत्र च विशिष्टभिन्नाभिन्नत्वस्य शुद्धविशेष्यसाधारणतया सधर्मकाशवदित्यादौ आकाशाभावविशिष्टसर्वादिरूपबाधादिभिन्नत्वस्याप्रसिद्धतया च तत्तद्विशिष्टनिरूपितविषयितान्यतमविषयिता-**

निरूपिकतावच्छेदकधर्मवत्त्वमेवाभिमतम् । अयं च प्रकारो-यादृशपक्षसाध्यहेतुकस्थले उक्तसमूहालम्बनानुमितेरप्रसिद्धिस्तत्रैवादरणीयः । यत्र तु तत्प्रसिद्धिस्तत्र लाघवाद्यथाश्रुतमूललक्षणमेव साधीयः । शब्दाभेदस्याकिंचित्करतायाः स्वयमेव वक्ष्यमाणत्वादित्यवधेयम् ।

यत्र चाश्रयासिद्धत्वादिरेक एव दोषः प्रतिबध्यज्ञानं च प्रसिद्धं महानसत्ववान्पर्वतो वह्निमान् धूमादित्यादौ तत्र विशिष्टपक्षग्रहविरोधिस्वरूपाश्रयासिद्धत्वादावेव सामान्यलक्षणत्वमुचितम , न तु महानसत्वाद्यभावविशिष्टपर्वतत्वाद्यवच्छिन्नतादृशाभावव्याप्यविशिष्टपर्वतत्वाद्यवच्छिन्नादिभिन्नभिन्नत्वस्य निरुक्तसमूहालंबनानुमितिविरोधित्वस्य च गौरवादित्याशयेनाह एकमात्रदोषस्थल इति । एकविध एव यत्र दोषस्तद्विषयकज्ञानप्रतिबध्यज्ञानं च प्रसिद्धं तादृशस्थल इत्यर्थः । तेन ग्राह्याभावतद्व्याप्यरूपभेदेन विशेष्यविशेषणभावभेदेन च सर्वत्र दोषाणां नानात्वसंभवात् एकमात्रदोषस्थले ग्राह्याभावतद्व्याप्यरूपघटकादिभेदेन विभिन्नाश्रयासिद्ध्यादीनामनुगमकरूपाभावेनान्यतमत्वस्य च लक्षणतायाः आवश्यकत्वेपि न क्षतिः । तत्त्वम्–तादृशत्वम । निरुक्ताश्रयासिद्धित्वादिकमिति यावत् । इदमुपलक्षणम् । यत्र परामर्शविरोधिनो व्यभिचारविरोधासिद्धयस्त्रयो दोषाः न तु बाधप्रतिरोधौ पर्वतो वह्निमान् द्रव्यत्वादित्यादौ तत्र परामर्शविरोधित्वमेव सामान्यलक्षणम् । यत्र च बाधप्रतिरोधासिद्धयो दोषाः, न तु व्यभिचारविरोधौ ह्रदो वह्निमान् धूमात ह्रदः काञ्चनमयवह्निमान् धूमात् काञ्चनमयह्रदो वह्निमान् धूमात ह्रदो वह्निमान् काञ्चनमयधूमादित्यादौ तत्र विशिष्टपक्षे विशिष्टसाध्यसाधनयोर्वैशिष्ट्यावगाहि यज्ज्ञानं तद्विरोधित्वमेव । तथा एवं यत्र व्यभिचारासिद्धी एव दोषौ काञ्चनमयपर्वतो धूमवान्वह्नेरित्यादौ तत्र विशिष्टपक्षविषयकव्याप्तिविशिष्टसाधनविशिष्टग्रहविरोधित्वादिकं तथेत्यपि बोध्यम् ।

ननु तत्तद्धर्मावच्छिन्नाभिन्नाभिन्नत्वरूपलक्षणघटकतत्तद्धर्माणां भागासिद्धतया हेत्वाभाससामान्येतरभेदानुमापकत्वेपि व्यभिचारावारकतया तदितरांशवैयर्थ्यमत आह स चेति । स चान्योन्याभावोऽतिरिक्त एवेति योजना । स च–तत्तद्धर्मावच्छिन्नभेदकूटाव-

च्छिन्नप्रतियोगिताकश्च, अतिरिक्तः तत्तद्धर्मातिरिक्तः तथाच धर्मिभेदान्न वैयर्थ्यम्। तत्तद्धर्मावच्छिन्नभेदमात्रावच्छिन्नप्रतियोगिताकान्योन्याभावस्य स्वप्रतियोगितावच्छेदकीभूतभेदप्रतियोगितावच्छेदकतत्तद्धर्मस्वरूपत्वेपि तादृशभेदकूटावच्छिन्नप्रतियोगिताकभेदत्वस्य नानाधर्मेषु कल्पनापेक्षया तद्विशिष्टस्यैकस्यैव भेदस्य लाघवेन कल्पयितुं युक्तत्वादित्यभिप्रायः। एतच्च यथाश्रुताभिप्रायेण। तत्तद्धर्मावच्छिन्ननिरूपितविषयितान्यतमविषयितानिरूपकतावच्छेदकधर्मवत्त्वस्य लक्षणत्वेऽधिकरणाविकासकतया विशेषणसार्थक्यमित्यवधेयम्।

ननु साध्यादिभेदेन लक्षणभेदे ह्रदो वह्निमानित्यादिस्थलीयलक्षणस्य पञ्चहेत्वाभाससाधारण्यासम्भवात् तादृशलक्षणाक्रान्तानां पञ्चविधत्वोक्त्यसङ्गतिरित्यत आह पञ्चविधभेदोक्तिरिति। पञ्चविधत्वोक्तिरित्यर्थः। तत्सम्भवस्थलेति। यत्र पञ्चानामेव हेत्वाभासानां सम्भवो गौरश्वो घटादित्यादौ तत्तत्स्थलीयलक्षणाक्रान्तस्य पञ्चविधत्वाभिप्रायेणेत्यर्थः। नन्वेवं लक्षणाननुगमात् इतरभेदानुमाने भागासिद्धिरित्यत आह व्यभिचारादेरिति। साध्यादिभेदेन नियन्त्रितत्वात्–साध्यादिभेदनियन्त्रितलक्ष्यतावच्छेदकत्वात्तथाच लक्षणस्येव लक्ष्यतावच्छेदकस्याप्यननुगमान्न भागासिद्धिरिति भावः।

नन्वेवमप्यनुगतोक्त्यसम्भवात् नायं प्रकारः साधीयानित्यत आह शब्दाभेद(मात्र)स्येति। इदं पुनरिहावधेयम्। तावदन्यान्यत्वम् इतरभेदानुमापकमेव न तु दोषपदप्रवृत्तिनिमित्तम् तथासति निर्वह्नित्वविशिष्टे वह्निसाधने धूमो दुष्ट इत्यादौ दुष्टपदस्य वह्न्यभावविशिष्टनिर्वह्नित्वाद्यवच्छिन्नान्यतमवदर्थकतया निर्वह्नित्वविशिष्टे निर्वह्नेः साधने इत्यादेरनन्वितार्थकत्वप्रसङ्गात्। अप्रसिध्या तस्य हेत्वन्वयिनि निर्वह्नित्वविशिष्टविशेष्यकवह्न्यनुमितिप्रयोजकत्वार्थकत्वासम्भवात् किन्तु अभावप्रयोजकभ्रमान्यवृत्तिविषयितानिरूपकत्वमेव तथा। उक्तस्थले च प्रकारताप्रकारतानिरूपितव्याप्तिप्रकारतानिरूपितधूमत्वाद्यवच्छिन्नप्रकारता चोभयमेव साधनपदार्थः। प्रकारतारूपसाधनपदार्थेऽपरपदार्थैकदेशे व्याप्तिप्रकारतानिरूपकप्रकारतायां च षष्ठ्यन्तवह्निपदप्रतिपाद्यस्य वह्निनिष्ठत्वस्य स्वरूपसम्बन्धेन साधनपदार्थो-

कप्रकारताद्वये च सप्तम्यन्तार्थस्य निर्वह्नित्वादिविशिष्टविशेष्यतायाश्च निरूपितत्वसम्बन्धेनान्वयः । साधनपदोत्तरसप्तम्या निरूपकत्वं द्वित्वं चार्थः । निरूपकत्वे च निरुक्तसाधनपदार्थयोः पृथगन्वयः । तदन्वितनिरूपकत्वे च द्वित्वान्वयः द्वित्वान्वयिताद‍ृशनिरूपकत्वयोर्दोषपदार्थघटकाभावेऽन्वयः । तथा च निर्वह्नित्वविशिष्टविशेष्यतानिरूपितवह्निनिष्ठप्रकारतानिरूपकत्वस्य ताद‍ृशविशेष्यतानिरूपिता या वह्निप्रकारतानिरूपितव्याप्तिप्रकारतानिरूपितधूमत्वाद्यवच्छिन्नप्रकारता तन्निरूपकत्वस्य च द्वयोरभावप्रयोजकभ्रमान्यवृत्तिविषयतानिरूपकत्वानित्येवान्वयबोधः । प्रतिबन्धकीभूतभ्रमविषयितानिरूपकाभावमादाय पर्वते वह्निसाधने धूमो दुष्ट इत्यादिप्रयोगवारणाय विषयितायां भ्रमान्यवृत्तित्वं निवेशितम् । दोषघटककेवलसाध्यादौ दोषव्यवहाराभावादयं दोष इत्यादौ स्वविषयकनिश्चयाव्यवहितोत्तरानुमितिनिष्ठताद‍ृशोभयाभावाधिकरणतात्वव्यापकविरोधिविषयताप्रयोज्यताकधर्म एव दोषपदार्थ इति दिक् ॥

(चि०) दशाविशेषे हेत्वोरेवाऽसाधारणसत्प्रतिपक्षयोराभासत्वात् तद्बुद्धेरप्यनुमितिप्रतिबन्धकत्वम् ।

(दी०) स्यादेतत् शब्दोऽनित्यः शब्दत्वात् इत्यत्रासाधारणेऽव्याप्तिः—सर्वसाध्यवद्व्यावृत्तेस्तत्रासत्त्वात्, एवं शब्दोऽनित्यः कृतकत्वात् इत्यस्य सत्प्रतिपक्षे नित्यत्वव्याप्याद्रव्यद्रव्यत्वादावपि पक्षस्य तद्वत्ताविरहादित्याशङ्कां तयोरलक्ष्यत्वेन निराकुरुते दशाविशेष इति । हेत्वोः—सद्धेत्वोः, असाधारणः पक्षमात्रवृत्तिः, सन् प्रतिपक्षो विरोधिपरामर्शो यस्य स तथा, तयोर्दशाविशेषे हेतौ सर्वसाध्यवद्व्यावृत्तत्वस्य पक्षे साध्याभावव्याप्यवत्त्वस्य च भ्रमदशायामाभासत्वात् अनुमित्यजनकत्वात्तद्बुद्धेर्हेत्वादौ साध्यवद्व्यावृत्तत्वादिबुद्धेः प्रतिबन्धकत्वं परमायाति, न तु तद्विषयस्य दोषत्वम् असत्त्वात् । अन्यथा बाधभ्रमेणानुमित्यनुदयात् तस्यापि दोषत्वं स्यात् । को हि साध्याभावतद्व्याप्यवत्ताभ्रमयोरनुमितिविरोधित्वे विशेषः । निर्युक्तिकस्तु प्रवादो न श्रद्धेयः ॥

(गा०) असाधारण्यस्य पक्षवृत्तित्वे सति साध्यव्यापकीभूताभावप्रतियोगित्वात्मकस्य सत्प्रतिपक्षस्य च पक्षनिष्ठसाध्याभावव्याप्यवत्त्वरूपस्य बुद्धेर्विरोधिविषयकतया साध्यवत्ताज्ञानप्रतिबन्धकत्वं निर्विवादमेव, एवं च तज्ज्ञानदशायां हेतोरनुमित्यजनकत्वात्तद्बुद्धेः प्रतिबन्धकत्वमावश्यकमित्येतादृशयथाश्रुतार्थपरस्य दशाविशेष इत्यादिमूलस्यानुत्थितिः, अन्यथा साधारण्यादिज्ञानप्रतिबन्धकताया अपि व्यवस्थापयितुमुचितत्वात् अतस्तादृशमूलमन्यथा व्याख्यातुमवतरणिकामाह स्यादेतदिति । इत्यत्रासाधारणे—एतत्स्थलीयासाधारण्यरूपदोषप्रकारकहेतुविशेष्यकभ्रमविषये-सर्वसाध्यवद्व्यावृत्तत्वात्मके । अव्याप्तिरिति । तद्विषयकत्वस्य निरुक्तानुमित्यप्रतिबन्धकहेत्वविषयकज्ञानसाधारणतया तादृशप्रतिबन्धकतातिरिक्तवृत्तित्वादिति भावः। ननु केवलं सर्वसाध्यवद्व्यावृत्तत्वं न दोषः अपि तु साधनवृत्तित्वविशिष्टम्, तादृशाविशिष्टविषयकत्वं तु न प्रतिबन्धकतातिरिक्तवृत्तीत्यत आह सर्वेति । तत्र हेतौ, असत्त्वात्—अवृत्तेः, साध्यवति पक्षे हेतोर्वृत्तेरिति शेषः। तथाच तादृशाविशिष्टस्याप्रसिद्ध्या तस्य दोषत्वासम्भवेन प्रसिद्धस्य विशिष्टसाध्यवद्व्यावृत्तत्वस्यैव तत्र दोषतायाः आवश्यकत्वादिति भावः। अद्रव्यद्रव्यत्वादाविति । असमवेतद्रव्यत्वादावित्यर्थः। असमवेतत्वस्य ध्वंससाधारणतया नित्यत्वव्याप्यत्वासम्भवात् विशेष्यांशानिवेशः । अप्यनन्तरमव्याप्तिरित्यनुषज्यते । तद्विषयकत्वस्य पक्षविषयकज्ञानसाधारणतया प्रतिबन्धकतातिरिक्तवृत्तित्वादिति भावः । ननु केवलं नित्यत्वव्याप्याद्रव्यद्रव्यत्वादिकं न तत्र दोषः अपि तु पक्षनिष्ठतद्वत्त्वैव, तादृशाविशिष्टविषयकत्वं तु प्रतिबन्धकतानतिरिक्तवृत्त्येवेत्यत आह पक्षस्येति। तथाच पक्षघटितविशिष्टाप्रसिद्ध्या पक्षाघटितस्यैव दोषत्वमावश्यकमिति भावः। तयोः-तादृशस्थलीयदोषत्वेनाभिमतयोरुक्तधर्मयोः ।

शब्दो नित्यः शब्दत्वादित्यादौ शब्दत्वादिविशेष्यकनित्यव्यावृत्तत्वादिज्ञानविषयेऽव्याप्तेः शङ्कानास्पदत्वादलक्ष्यताभ्युपगमेन तत्परिहारस्य चात्यन्तासम्भवदुक्तिकत्वाद्धेतुपदं सद्धेतुपरतया व्याचष्टे हेत्वोरिति । सद्धेत्वोः साध्यवद्व्यावृत्तत्वरूपासाधारणसाध्याभावव्याप्यतत्पक्षकत्वरूपसत्प्रतिपक्षत्वासम्भवादसाधार-

णसत्प्रतिपक्षपदे अन्यथा व्याचष्टे असाधारण इति। यस्येति षष्ठ्यर्थः प्रकारता। तथा—प्रकृतसत्प्रतिपक्षपदार्थः। प्रकृतसद्धेत्वो-र्दुष्टतारूपाभासत्वायोगादाभासपदमन्यथा व्याचष्टे आभासत्वा-दिति। तद्बुद्धेरित्यत्र तत्पदस्य हेतुमात्रपरत्वं न संभवति सत्प्रतिप-क्षस्थले प्रतिबन्धकज्ञानस्य हेतुविषयकत्वानियमाद्धेतुविषयकत्वकथ-नस्याप्रयोजकत्वात्, बुद्धिपदस्यापि बुद्धिसामान्यपरत्वं न सम्भवति हेत्वादिमात्रविषयकज्ञानस्याप्रतिबन्धकत्वादतस्तत्पदस्य हेतुपक्षो-भयपरतया बुद्धिपदस्य साध्यवद्व्यावृत्तत्वसाध्याभावव्याप्यत्वा-वगाहिबुद्धिपरतया तद्बुद्धिपदं हेतुविषयकसाध्यवद्व्यावृत्त-त्वबुद्धिपक्षविषयकसाध्याभावव्याप्यवत्ताबुद्धिपरत्वेन व्याचष्टे त-द्बुद्धेरिति। तयोरलक्ष्यतालाभाय हेत्वोरित्यनन्तरं श्रुत एवका-रो योजनीयः। तदर्थमन्तर्भाव्य व्याचष्टे प्रतिबन्धकत्वं परमाया-तीति। परं-केवलम्। एवकारेण व्यवच्छेद्यं स्पष्टयति नत्विति। तद्विषयस्य-तादृशबुद्धिविषयस्य, दोषत्वं-दोषलक्षणलक्ष्यत्वम्, अ-सत्वात्-लक्ष्यताप्रयोजकरूपस्यासत्वात्, प्रतिबन्धकीभूतज्ञानप्रमा त्वस्यैव तद्विषयस्य लक्ष्यताप्रयोजकत्वादिति भावः। असत्त्वात् वि-शिष्टस्याप्रसिद्धत्वादिति तु नार्थः-एकदेश एवाव्याप्तेराशंकिततया विशिष्टाप्रसिद्धेस्तदलक्ष्यतानिर्वाहकत्वविरहेणानुपयोगात्। अन्य-था—प्रतिबन्धकीभूतभ्रमविषयस्यापि दोषत्वे, बाधभ्रमेण-पक्षे सा-ध्याभावभ्रमेण। तस्य-तद्विषयसाध्याभावादेः। नन्वेवमुक्तस्थले प्राचां दशाविशेषे हेतोर्दुष्टताप्रवादो नोपपद्यते इत्यत आह निर्युक्ति-कस्त्विति॥]

(दी०) यत्तु ज्ञानस्य यदनुमितिप्रतिबन्धकतावच्छेदकं तद्वत्त्वं तत्प्रकारकप्रमाविषयत्वञ्च लक्षणार्थः। तच्च द्विविधं-वि-षयरूपं साधारण्यादि, बाधे च प्रमितसाध्याभाववान् पक्षः, तद्वि-षयत्वेन ज्ञानस्यानुमितिप्रतिबन्धकत्वात्। अविषयरूपञ्च विरो-धिसामग्रीकालीनत्वादिकम् तद्वत्त्वञ्च ज्ञानस्यैव तद्विषयस्य हेतो-रपीति। तन्न। तद्वत्त्वं हि हेतोर्नाभेदेन—बाधे तदभावात्, अत एव नाश्रयतया—वह्निव्यभिचारिद्रव्यत्वादिमति धूमेऽतिप्रसङ्गाच्च।

साध्याभाववत्पक्षस्यैव साध्याभाववद्वृत्तिहेतोर्ज्ञानस्य प्रतिबन्धकत्वात्, साधारण्यादिविषयकत्वस्य ज्ञाननिष्ठस्यैव प्रतिबन्धकतावच्छेदकत्वात् सत्तादिसाध्यके ज्ञानेऽतिप्रसङ्गाच्च । यथाकथञ्चित्तद्रूपस्य चातिप्रसञ्जकत्वात् । विरोधिसामग्रीसमवहितोऽपि च लिङ्गपरामर्शो न स्वसाध्यकानुमितेः प्रतिबन्धको मणिसमवहितो वह्निरिव दाहस्य ।

(गा०) उपदर्शितस्थलेऽपि दशाविशेषे हेतोर्दुष्टतामङ्गीकुर्वन्तस्तत्साधारण्याय लक्षणमन्यथा व्याचक्षते तेषां मतमाह ज्ञानस्येति । षष्ठ्यन्तार्थस्य यत्पदार्थेऽन्वयः, तथा च ज्ञानसम्बन्धित्वविशिष्टं यद्रूपावच्छिन्नं यत्किञ्चित्तत्सम्बन्धेनानुमितिप्रतिबन्धकतावच्छेदकमित्यर्थः । अत्राप्यवच्छेदकत्वमनतिरिक्तवृत्तित्वमुक्तयुक्तेस्तत्पदमुभयत्र तद्रूपावच्छिन्नपरम् । लक्षणार्थः—व्युत्क्रमेण लक्षणयोरर्थः । नन्वेतावतैव कथं दर्शितसत्प्रतिपक्षादौ लक्षणसमन्वयः तत्र प्रतिबन्धकतावच्छेदकीभूतविशिष्टविषयकत्वस्याप्रसिद्धेः, कथं वा व्यभिचारादिकमादाय सव्यभिचारादावेव लक्षणगमनम् व्यभिचारादिविषयकत्वस्यैव प्रतिबन्धकतावच्छेदकतया व्यभिचारादेरतथात्वादित्यत आह तथेति । तादृशप्रतिबन्धकतावच्छेदकं चेत्यर्थः । भ्रमात्मकबाधनिश्चयप्रतिबन्धकतामादायापादितायाः सद्धेतोर्दुष्टतायाश्चासम्भवं स्फुटीकर्तुमाह बाधेति । बाधज्ञाननिष्ठप्रतिबन्धकतायां चेत्यर्थः । अवच्छेदक इति शेषः । पक्षस्य वास्तवं साध्यभाववत्त्वं निविश्यते न तु वैज्ञानिकमिति सूचयितुं प्रमितेति । विषयस्यावच्छेदकत्वे युक्तिमाह तद्विषयकत्वेनेति । तथा च विषयविषयकत्वस्यैव विषयस्यापि विषयितयाऽवच्छेदकत्वमक्षतमिति भावः । विरोधिसामग्रीकालीनत्वादीति । विरोधिकोट्यनुमितिसामग्रीकालीनत्वेन परामर्शादेः प्रतिबन्धकत्वमित्यभिमानः । तथा च तदादायैव सत्प्रतिपक्षितेऽसाधारणे च सद्धेतौ दशाविशेषे दुष्टत्वमिति भावः ।

ननु ज्ञाननिष्ठविरोधिसामग्रीकालीनत्वमादाय कथं हेतोर्दुष्टत्वं तस्य ज्ञान एव सत्त्वादित्याशङ्कां परिहरति तद्रूपस्य चेति । तद्विषय-

स्य हेतोरपीति। तत्कालनिरूपिताधेयतात्मकस्य तत्तत्कालीनत्वस्याधेयभेदेन भेदानभ्युपगमादभ्युपगमे वाधेयतासम्बन्धेन तत्कालस्याप्यवच्छेदकतया तमादायैव लक्षणसमन्वयसम्भवादिति भावः।

नाभेदेनेति। विवक्षितुं शक्यमिति शेषः। साध्याभाववद्वृत्तित्वादिविशिष्टसाधनरूपदोषस्याभेदसम्बन्धेन हेतौ सत्त्वात्तादृशसम्बन्धेन तद्वत्त्वविवक्षाया व्यभिचारादावतिप्रसक्तिः। बाधे तदभावादिति। वह्न्यभाववद्ध्रदादिरूपबाधे धूमादिहेत्वभेदासत्त्वादित्यर्थः। तथाच तत्राऽव्याप्तिरिति भावः। अत एव–बाधितेऽव्याप्तेरेवाश्रयतया तद्वत्त्वं विवक्षितमिति शेषः। धूमादेर्वह्न्यभाववद्ध्रदानाश्रयत्वादेकज्ञानविषयत्वादिरूपसम्बन्धस्य चाधारत्वानिर्वाहकत्वादिति भावः। अव्याप्तिमुक्त्वातिव्याप्तिमप्याह वह्निव्यभिचारीति।

ननु साध्याभाववद्वृत्तित्वादिरूपविषय एव प्रतिबन्धकतावच्छेदको न तु तद्विशिष्टद्रव्यत्वादिस्तदाश्रयधूमादिरित्याशंकां निराकरोति साध्याभाववदिति। साध्याभाववद्वृत्तिहेतोर्ज्ञानस्येति। तादृशहेतुविषयकज्ञानस्येत्यर्थः। तथाच वह्न्यभाववद्वृत्तिद्रव्यत्वादिकमपि विषयतावच्छेदकमेवेति भावः। ननु धूमादेस्तादृशधर्मवत्त्वेपि वह्नौ साध्ये धूमो दुष्ट इत्यादिव्यवहारस्य नापत्तिसम्भवः उक्तयुक्त्या तद्धेतुकानुमितिविरोधिरूपवत्त्वस्यैव तत्र दुष्टताव्यवहारनियामकत्वात्, अन्यथा तत्राप्यप्रतिकारादित्यतोऽन्यत्रातिप्रसङ्गमाह—साधारण्यादिविषयकत्वस्यैवेति। ज्ञाननिष्ठस्य–ज्ञानवृत्तित्वविशिष्टस्य, सत्तादाविति–सत्तावत् ज्ञानादित्यादौ, ज्ञानहेतुकसत्ताद्यनुमितिप्रतिबन्धकतावच्छेदकं ज्ञानांशे सत्त्वाद्यभाववद्वृत्तित्वावगाहित्वमादाय सत्त्वे साध्ये ज्ञानं दुष्टमिति व्यवहारापत्तिरित्यर्थः। येन केनापि सम्बन्धेन तद्वत्त्वं विवक्षणीयमित्यपि दूषयति यथाकथञ्चिति। अतिप्रसञ्जकत्वादिति। उक्तधर्ममादाय सत्तादिसाध्यके ज्ञाने धूमाद्यंशे वह्न्यभाववद्वृत्तित्वावगाहित्वम् एकज्ञानविषयत्वसम्बन्धेन तद्वत्त्वमादाय वह्न्यादिसाध्यके धूमादावपि दुष्टत्वव्यवहारापत्तेरित्यर्थः। सत्प्रतिपक्षादिस्थले विरोधिसामग्रीकालीनत्वेन प्रतिबन्धकतामादाय लक्षणसत्त्वमुपपादितं तद्दूषयति विरोधिसामग्रीति। न स्वसाध्यानुमितेः प्रतिबन्धक इति। न स्वजन्यानुमितिप्रतिबन्धक इत्यर्थः। कारणत्वप्रतिबन्धकत्वयोरेकत्रानभ्युपगमादिति

हृदयम् । विभिन्नरूपेण तदुभयस्यैकत्रोपगमे प्रतिबन्दीसूचनायाह मणीति । न प्रतिबन्धक इत्यनुषज्यते । तथाच विरोधिकोट्यनुमिति-सामग्रीकालीनत्वेन परामर्शादीनामनुमितिप्रतिबन्धकत्वे मणिसमवहितत्वेन वह्न्यादीनामपि दाहप्रतिबन्धकत्वापत्तेः । मणिसमाहितत्वापेक्षया लाघवान्मणित्वेनैव प्रतिबन्धकत्वापत्तिः कल्प्यत इति चेत्, तर्हि विरोधिसामग्रीकालीनत्वापेक्षया लाघवात्तादृशसामग्रीत्वेन विरोधिपरामर्शत्वेनैव वा प्रतिबन्धकत्वं प्रकृते कल्पयितुमुचितमिति कथं विरोधिसामग्रीकालीनत्वमादाय लक्षणं सङ्गमनीयं तस्य प्रतिबन्धकतातिरिक्तिवृत्तित्वादिति भावः ।

(दी०) अथ यद्धर्मविशिष्टज्ञाने सत्यवश्यमनुमितिप्रतिबन्धः तदेवात्र प्रतिबन्धकतावच्छेदकमुक्तम्, भवति च प्रतिबन्धकीभूतविरोधिसामग्रीकालीनत्वादिविशिष्टे परामर्शे तथा इति चेत् । न वै कालादिसाधारणकारणघटिता सामग्री क्वापि प्रतिबन्धिका, विशेषतस्त्वत्र तत्सत्त्वे कार्य्योत्पादस्य दुर्वारत्वात्, किन्तु विरोधिपरामर्शस्तथा । यदि च तत्सत्त्वेऽपि तत्साध्ये बाधावतारान्नानुमितिप्रतिबन्धः प्रामाणिकस्तदा अप्रामाण्यग्रहाभावस्येव तदभावस्यापि वैशिष्ट्यन्तत्र निवेश्यताम्, यथा च भ्रमप्रमासाधारणविरोधिपरामर्शसत्त्वे नानुमितिस्तथा तथाविधबाधादिग्रहेपीत्यतिप्रसङ्गः । न चानीतादौ लिङ्गे विरोधिपरामर्शकालीनत्वमपि ।

(गा०) कार्यानुत्पत्तिव्याप्यतावच्छेदकत्वरूपप्रतिबन्धकतावच्छेदकत्वमेवात्र विवक्षितं न तु कारणीभूताभावप्रतियोगितावच्छेदकत्वरूपम् तच्च विरोधिसामग्रीकालीनत्वेप्यक्षतमेवेत्याह अथेत्यादिना । यद्धर्मेति । यादृशधर्मविशिष्टनिश्चयाव्यवहितोत्तरक्षणत्वव्यापकीभूतानुमित्यनुत्पादस्तादृशरूपमेवेत्यर्थः । निश्चयत्वनिवेशाद्बाधादिविषयकसंशयसंस्काराद्यव्यवहितोत्तरक्षणे कदाचिदनुमित्युत्पादेपि च न क्षतिः । अत्र-एतल्लक्षणे, प्रतिबन्धकतावच्छेदकमुक्तं-प्रतिबन्धकतावच्छेदकपदेन विवक्षितम् । भवति चेति । विरो-

धिकोट्यनुमितिसामग्र्याः प्रतिबन्धकत्वकथनं प्रतिबन्धकसमवहितोत्तरक्षणे कार्यानुत्पादस्यावश्यकतया विरोधिसामग्रीकालीनत्वस्य निरुक्तप्रतिबन्धकतावच्छेदकताया आवश्यकत्वप्रदर्शनाय। तथा—अवश्यमनुमित्यनुत्पादः । विरोधिसामग्र्याः प्रतिबन्धकत्वमुक्तं तदेवादौ दूषयति न वै इति । नहीत्यर्थः। कालादीति घटितान्तं हेतुगर्भविषणम्, तथाच कारणसमुदायः सामग्री, सा च क्वचिदपि न प्रतिबन्धिका कालादिसाधारणकारणानामपि तदन्तर्निविष्टत्वात् तेषां च प्रतिबन्धकतावच्छेदककोटिनिवेशस्य निष्फलत्वात्प्रतिबन्ध्यकार्येपि तेषामनुगुणत्वादित्यर्थः। सत्प्रतिपक्षस्थले विरोधिकोट्यनुमितिसामग्र्यास्तत्कोट्यनुमितिप्रतिबन्धकत्वमत्यन्तासम्भवद्युक्तिकमेव तत्र फलानुत्पादेन सामग्र्या एवासत्त्वादित्याह विशेषतस्त्वित्यादिना। अत्र—सत्प्रतिपक्षस्थले। सामग्री न प्रतिबन्धकेत्यनुषज्यते । तत्सत्त्वे—सामग्रीसत्त्वे, कार्योत्पादस्य दुर्वारत्वात्—सामग्र्या कार्योत्पत्तिनियतत्वादिति भावः । ननु तर्हि तत्र परामर्शादिरूपानुमितिहेतुसत्त्वादनुमितिः कथं नोत्पद्यत इत्यत आह किन्त्विति। विरोधिपरामर्शः—साध्याभावव्याप्यवत्तानिश्चयः, तथा—ऽनुमितिप्रतिबन्धकः।

ननु यत्र वह्न्यभावव्याप्यवत्तापरामर्शो वह्न्यभावाभाववान्पक्ष इति बाधनिश्चयो वर्त्तते तत्र वह्निव्याप्यवत्ताज्ञानेन वह्न्यनुमितिर्जन्यते इत्यनुभवसिद्धं विरोधिपरामर्शमात्रस्य प्रतिबन्धकत्वे च तन्नोपपद्यते इत्यत आह यदि चेति । तत्सत्त्वेपि—विरोधिपरामर्शसत्त्वेपि, तत्साध्येबाधावतारे—तादृशपरामर्शानुमेयविरोधिकोटेः पक्षेऽभावनिश्चयदशायां, नानुमितिप्रतिबन्धः—न प्रकृतसाध्यनुमित्यनुत्पादः। अप्रामाण्यग्रहाभावस्येत्यनन्तरं वैशिष्ट्यमित्यनुषज्यते। तदभावस्य—विरुद्धकोटिविरहनिश्चयाभावस्य, तत्र—विरोधिपरामर्शप्रतिबन्धकतावच्छेदकगर्भे । निवेश्यतामिति । अत्र विपरीतकोटिव्याप्यवत्तापरामर्शदशायां तत्कोटिविरहनिश्चयसत्त्वे तत्परामर्शभ्रमत्वग्रहानन्तरमेवानुमितिः स्वीक्रियते न तु अन्यथेति भ्रमत्वग्रहाभाववैशिष्ट्यनिवेशेनैवोपपत्तौ तादृशबाधग्रहाभाववैशिष्ट्यानिवेशो व्यर्थ इत्यनिर्भरसूचनाय यदि चेत्युक्तम्। अप्रामाण्य ग्रहाभावस्य दृष्टान्तविधया प्रतिबन्धकतावच्छेदकत्वं च दर्शितम्

नन्वस्त्वनुमितिविरोधिपरामर्शमात्रं प्रतिबन्धकं तथापि तद्घटितविरोधिसामग्रीकालीनस्य फलानुत्पादनियतत्वात् तादृशसामग्रीकालीनत्वस्य निरुक्तप्रतिबन्धकतावच्छेदकत्वं दुरपवादमेव, एवं च तथाविधविरोधिपरामर्शकालीनत्वमादायापि दशाविशेषे सत्प्रतिपक्षितस्य हेतोर्दुष्टत्वमुपपद्यत एवेत्यतो विरोधिपरामर्शादिकालीनत्वसमशीलबाधादिभ्रमकालीनत्वमादाय सद्धेतावतिप्रसङ्गमाह यथा चेति । तथाविधेति । भ्रमप्रमासाधारणेत्यर्थः । अपीत्यन्तरं नानुमितिरित्यनुषज्यते । तथाच तादृशबाधादिग्रहकालीनत्वमपि निरुक्तप्रतिबन्धकतावच्छेदकत्ववद्भवत्येवेति भावः । अतिप्रसङ्ग इति । बाधादेरनित्यदोषतायाः केनाप्यनभ्युपगमेनेष्टापत्त्यनवकाशादिति भावः । विरोधिपरामर्शकालीनत्वमादाय सर्वत्र सत्प्रतिपक्षिते दुष्टत्वं नोपपादयितुं शक्यत इत्याह न चेति । नहीत्यर्थः । अतीतादेरिति । तथा चातीतादिसद्धेतौ विरोधिपरामर्शदशायां भवन्मतसिद्धं सत्प्रतिपक्षितत्वं नोपपद्यत इति भावः ।

(दी०) यदपि तद्विषयत्वेन ज्ञानस्य अनुमितिप्रतिबन्धकत्वं तद्वत्त्वमेव वाच्यम् सत्प्रतिपक्षे च विरोधिव्याप्त्यादिकमेव तथा, तद्वत्त्वमपि हेतो स्वजज्ञानरूपसम्बन्धेन, तस्य समूहालम्बनरूपतया हेतुद्वयविषयत्वादिति । तदपि तुच्छम् । साध्याभाववत्पक्षविषयत्वेन तादृशपक्षज्ञानप्रमात्वविषयत्वेन वा ज्ञानस्य प्रतिबन्धकत्वं तस्य च साध्यवत्यपि पक्षे सम्भवादतिव्याप्तेः ।

विशिष्टविषयत्वेन प्रतिबन्धकत्वं विशिष्टश्च तत्राप्रसिद्धमिति चेत्तर्हि किं सर्वत्र सत्प्रतिपक्षे साध्याभावव्याप्यवान् पक्षः प्रसिद्धः, यथाकथञ्चित्सम्बन्धेन तद्वत्त्वञ्चातिप्रसक्तं धूमादेरपि ज्ञानरूपेण तदाश्रयाश्रयत्वादिना वा सम्बन्धेन व्यभिचारादिसत्त्वात् । यादृशसम्बन्धावगाहित्वेन ज्ञानस्य प्रतिबन्धकत्वं तेन तद्वत्त्वञ्च न सर्वत्र सत्प्रतिपक्षिते हेतावस्ति च क्वचित् सद्धेताविति कृतं पल्लवितेन ।

(गा०) सत्प्रतिपक्षिते सद्धेतौ विरोधिव्याप्यवत्पक्षाप्रसिद्धा·

यपि प्रतिबन्धकीभूतभ्रमविषयप्रसिद्धविरोधिव्याप्त्यादिरेव दोष इति मतं दूषयति यद्यपीति । विषयकत्वेनेति तृतीयार्थः स्वरूपसम्बन्धरूपमवच्छेदकत्वं न त्वनतिरिक्तवृत्तित्वरूपम् तथासति विरोधिव्याप्त्यादेर्दोषत्वानुपपत्तेः । प्रतिबन्धकतायां ज्ञाननिष्ठत्वं विशेषणं कामिनीजिज्ञासादिनिष्ठप्रतिबन्धकतावच्छेदकधर्मेऽतिप्रसङ्गवारणाय । ननु विरोधिकोटिव्याप्यत्वस्य पर्वतो वह्निमान्धूमात् पर्वतो न वह्निमान् जलत्वादित्यादौ प्रतिबन्धकीभूतज्ञानविषयसमवायादिसम्बन्धावच्छिन्नपक्षधर्मतायाः प्रकृते हेतावभावात्कथं तस्य दुष्टत्वमत आह तद्वत्त्वमपीति । विरोधिव्याप्त्यादिमत्त्वमपीत्यर्थः । तज्ज्ञानरूपेति । स्वविषयकज्ञानविषयत्वेत्यर्थः । सम्बन्धविशेषस्याविवक्षितत्वादिति भावः । तादृशसम्बन्धवत्तां प्रकृतहेतावुपपादयति तस्येति । विरोधिव्याप्त्यादिज्ञानस्येत्यर्थः । समूहालंबनतयेति । न चैवं क्रमिकपरामर्शद्वयस्थले सत्प्रतिपक्षितानुपपत्तिरिति वाच्यम् । तत्रापि तादृशव्याप्त्यादिप्रकारकप्रकृतहेतुविषयकेश्वरज्ञानादिकमादाय तद्वत्त्वोपपत्तेः । साध्याभाववत्पक्षविषयकत्वेन-साध्याभावप्रकारेण पक्षावगाहित्वेन । साध्याभाववत्पक्षज्ञानेति । साध्याभावप्रकारकपक्षज्ञानांशे प्रमात्वविषयकत्वेनेत्यर्थः । मतभेदेन विकल्पः । तस्य-तादृशज्ञानस्य । अतिव्याप्तेरिति । साध्यवत्यपि पक्षे-साध्यवत्यपि सति पक्षस्य साध्यवत्त्वे सत्यपीति यावत् । पर्वतो वह्निमान्धूमादित्यादौ भ्रमात्मकबाधादिज्ञाननिष्ठप्रतिबन्धकतावच्छेदकविषयतानिरूपकवह्न्यभावादेः स्वविषयकज्ञानविषयत्वादिसम्बन्धेन वैशिष्ट्यस्य हेतौ सत्त्वादिति भावः ।

इदमुपलक्षणम् । वह्निमान्धूमादित्यादौ विरोधिपरामर्शशून्यकालेपि तद्विषयविरोधिव्याप्त्यादिकमादायापि हेतोर्दुष्टत्वप्रसङ्गो बोध्यः । तत्रापि पक्षांशे तद्विशिष्टविषयकसमूहालंबनज्ञानसम्बन्धेन हेतौ तद्वैशिष्ट्यसम्भवात् अनतिरिक्तवृत्तित्वरूपमवच्छेदकत्वं विवक्षणीयमित्यभिप्रायेण बाधभ्रमप्रतिबन्धकतामादायातिप्रसङ्गस्योद्धारमाशङ्कते विशिष्टेति । साध्याभावविशिष्टपक्षविषयकत्वमेव प्रतिबन्धकतानतिरिक्तवृत्ति न तु साध्याभावविषयकत्वमात्रमित्यर्थः । विशिष्टं च साध्याभावविशिष्टपक्षः । तत्र-बाधस्थले सत्प्रतिपक्षस्थले, सर्वत्र तादृशविशिष्टं प्रसिद्धमेवेत्यभिमानः । भ्रमं

निराकरोति तत्किमिति । पक्षवृत्तिसाध्यकसत्प्रतिपक्षे साध्याभावव्याप्यविशिष्टपक्षस्य प्रसिद्धत्वात् । सर्वत्रेति । सत्प्रतिपक्षे-सत्प्रतिपक्षतया भवन्मतसिद्धे । प्रसिद्ध इति । तथा चानतिरिक्तवृत्तित्वरूपावच्छेदकत्वं विवक्षितुमशक्यमिति दर्शितातिव्याप्तिर्दुर्वारैवेति भावः । तद्वत्त्वघटकसम्बन्धं वितर्क्यापि दूषयति यथाकथंचिदिति । अतिप्रसक्तं-सद्धेतुसाधारणम्, तथाच पर्वतादेः वह्न्यादिमत्त्वे साध्ये धूमादौ दुष्टताव्यवहारापत्तिरिति भावः । तादृशसम्बन्धेन तद्वत्त्वस्य धूमादिरूपसद्धेतुसाधारणत्वं स्फुटयति धूमादेरिति । ज्ञानरूपेण—स्वविषयकज्ञानविषयत्वेन तदाश्रयाश्रयत्वादिना, आदिना एककालीनत्वपरिग्रहः । व्यभिचारादिसत्त्वात्-वह्न्यभाववद्वृत्तित्वादिसत्त्वात् ।

ननु यादृशसम्बन्धावच्छिन्नयद्यत्प्रकारतानिरूपितधर्मिविशेष्यताशालित्वेन ज्ञानस्य प्रतिबन्धकत्वं तेन सम्बन्धेन तद्वत्त्वमेव दुष्टत्वमिति वाच्यम्, एवं च स्वरूपादिसम्बन्धावच्छिन्नसाध्याभाववद्वृत्तित्वादिप्रकारतानिरूपितहेतुविशेष्यताशालित्वेनैव व्यभिचारादिज्ञानस्य प्रतिबन्धकता तेन सम्बन्धेन तद्वत्त्वस्य च हेतोरभावान्न तत्रातिव्याप्तिरित्याशङ्कां निराकुरुते यादृशेति । सर्वत्र सत्प्रतिपक्षित इति । ह्रदो वह्निमान्धूमवत् इत्यादिस्थले धूमवत्त्वादिरूपहेतोर्व्याप्यताघटकसम्बन्धेन वन्ह्याद्यभावव्याप्यधूमवत्त्वादेः सत्तायाः सत्त्वात् सर्वत्रेत्युक्तम् । क्वचित्सद्धेतावपीति । सद्धेतुतादशायामपि क्वचिदित्यर्थः । पर्वतो वह्निमान्धूमादित्यादौ विरोधिपरामर्शासमवधानदशायामपि प्रतिबन्धकतावच्छेदकप्रकारताश्रयवन्ह्याद्यभाववद्वन्हिमदन्यत्ववत्ताव्याप्यत्वादेस्तादृशप्रकारतावच्छेदकस्वरूपादिसम्बन्धेन धूमादिवृत्तित्वादिति भावः ।

यत्तु-ज्ञानसम्बन्धेन तद्वत्त्वमेव दुष्टत्वं ज्ञानं च विशिष्टव्यवहाराद्यनुरोधात् क्वचिदेव कस्यचित्सम्बन्धः । एवं च विरोधिव्याप्त्यादेर्ज्ञानं विरोधिपरामर्शदशायामेव प्रकृते हेतौ तत्सम्बन्धस्तदैव तत्र दुष्टताव्यवहारात्साध्याभावादेर्ज्ञानं तु तत्र न कदाचिदपि तथा परमेश्वरादिसाधारणं साध्याभावविशिष्टपक्षादेर्ज्ञानं तु तत्र सर्वदैवे-ति ॥

ननु हास्यास्पदमेव—सकलाभियुक्तपुरुषसाधारणस्य नियतव्यवहारस्यासिद्धत्वात् वासनाविशेषवतां तादृशव्यवहारस्य विपरीतसम्भवात् ज्ञानस्य नियततत्सम्बन्धत्वादिति ।

(चिं०) यद्यपि बाधसत्प्रतिपक्षयोः प्रत्यक्षशाब्दज्ञानप्रतिबन्धकत्वान्न लिङ्गाभासत्वम्, तथापि ज्ञायमानस्याभासस्यात्र लक्षणम् । यद्वा प्रत्यक्षादौ बाधेन न ज्ञानं प्रतिबध्यते किन्तूत्पन्नज्ञानेऽप्रामाण्यं ज्ञाप्यते अनुमितौ तूत्पत्तिरेव प्रतिबध्यते ।

ते च सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्च ॥

इति सामान्यनिरुक्तिचिन्तामणिः ।

(दी०) यद्यपीति । स्थाणुत्वाभावस्य तद्व्याप्यकरादेश्च निश्चये स्थाणुत्वप्रत्यक्षशाब्दयोरनुदयात् । न चैवं नरशिरःकपालं शुचि प्राण्यङ्गत्वादित्यादिनाप्यगमप्रतिरोधः स्यात्, तत्रानुकूलतर्काभावेन बलवत्तरागमविरोधेन च व्याप्तिनिश्चयस्यानुत्पत्तेरिति भावः । यद्वेत्याद्यभ्युच्चयमात्रम् प्रत्यक्षं प्रत्यानुमानिकबाधादिनिश्चयस्याप्रतिबन्धकत्वेऽपि शाब्दं प्रति प्रतिबन्धकत्वात् । योग्यताज्ञानेनान्यथासिद्धत्वात् तदभावो न तत्र हेतुरिति चेत्, एवमप्युपनीतभानविशेषं प्रति तत्त्वेन हेतुताया दुर्वारत्वात् ।

इति सामान्यनिरुक्ति दीधितिः ॥

(गा०) बाधसत्प्रतिपक्षज्ञानयोः प्रत्यक्षशाब्दज्ञानप्रतिबन्धकत्वमभिधाय बाधसत्प्रतिपक्षयोर्लिङ्गज्ञानजन्यज्ञानमात्रवृत्तिधर्मावच्छिन्नप्रयोज्यतानिरूपितप्रयोजकताश्रयाभावप्रतियोगिज्ञानविषयत्वरूपं लिङ्गासाधारणदोषत्वं न सम्भवतीत्याक्षिप्तं मणिकृता, तादृशप्रतिबन्धतायां च युक्तिर्नोक्तेति न्यूनतापरिहाराय तत्र युक्तिमाह स्थाणुत्वाभावस्येति । स्थाणुत्वप्रत्यक्षशाब्दयोरिति । समानधर्मितावच्छेदकस्य स्थाणुत्वप्रकार-

कस्य लौकिकसन्निकर्षाद्यजन्यप्रत्यक्षस्य शाब्दस्य चेत्यर्थः । एवं-शाब्दबुद्धौ बाधतदभावव्याप्यवत्ताज्ञानयोः प्रतिबन्धकत्वे । नरशिरःकपालमिति । नरशिरःकपाले शुचित्वानुमापकेन तद्धर्मिकप्राण्यङ्गत्वपरामर्शेन स्वतः फलद्वारा वाऽऽगमजन्याशौचबोधाविरोधः स्यादित्यर्थः । स चानुभवविरुद्धः । तत्र प्राण्यङ्गत्वज्ञानदशायामपि शाब्दाशौचज्ञानस्यानुभवसिद्धत्वादिति भावः । समाधत्ते तत्रेति । तादृशाशौचज्ञानप्राक्काल इत्यर्थः । अनुकूलतर्काभावेन व्याप्तिनिश्चयस्य बलवत्तरागमविरोधेनानुमितेश्चानुत्पत्तेरिति योजना । एवं च बाधवद्व्याप्यधर्मस्य येन केनापि रूपेण ज्ञानमेव न विरोधि अपि तु व्याप्यत्वरूपेण, अत्र च प्राण्यङ्गत्वस्य ज्ञानेपि व्याप्तिग्राहकतर्कविरहेण व्यभिचारशङ्कयाशौचव्याप्यत्वेन तज्ज्ञानं न सम्भवति कारणान्तरविरहेण यत्र व्यभिचारशङ्काविरहः तत्र कथंचित् व्याप्तिग्रहेपि गृहीतप्रामाण्यकागमतात्पर्यविषयविपरीतविषयकत्वेन तत्राप्रामाण्यं गृह्यते,तथाच तादृशप्राण्यङ्गत्वज्ञानं न शौचानुमितिजनने शाब्दाशौचज्ञानप्रतिबन्धे वा प्रभवतीति समुदायार्थः । आगमे प्रामाण्यग्रहश्च शिष्टपरिग्रहादिनैव भवति । यादृशं च तादृशपरामर्शेनाप्रामाण्यं गृह्यते तावत भवत्येवागमप्रवृत्तिरिति भावः ।

यद्वेत्यादिग्रन्थेन बाधादिज्ञानस्यानुमित्यतिरिक्तज्ञानाप्रतिबन्धकत्वं व्यवस्थाप्य बाधादेर्लिङ्गासाधारणदोषत्वमेवोपपादितम् तत्र सङ्गच्छते-बाधितार्थस्य शाब्दाभ्युपगमेऽनुमितेरप्यनवबाधात् तत्राप्यप्रामाण्यग्राहकतया बाधादिग्रहस्य प्रवृत्त्यादिविरोधितोपपत्तेरित्यत्र कल्पे ग्रन्थकृतोऽनिर्भरमाह-यद्वेत्यादीति । ननु आनुमानिकबाधादिनिश्चयदशायामपि लौकिकसंनिकर्षादितः-प्रत्यक्षनिश्चयोत्पत्त्या बाधनिश्चयसामान्यस्य प्रत्यक्षप्रतिबन्धकत्वं न सम्भवतीत्यनुमित्यसाधारणप्रतिबन्धकत्वं बाधनिश्चयत्वावच्छिन्नस्याक्षतमतो यद्विषयकनिश्चयत्वेन अनुमित्यसाधारणप्रतिबन्धकत्वम् तत्र लक्ष्यताप्रयोजकत्वाभिप्रायेण यद्वेत्यादिग्रन्थस्य बाधलक्षणतोपपादकत्वं सुसङ्गच्छत इत्यत आह प्रत्यक्षं प्रतीति । समानेन्द्रियजन्यबाधनिश्चयसत्त्वे लौकिकप्रत्यक्षस्यानुत्पत्तेरानुमानिकेति बाधनिश्चयविशेषणम् । शाब्दं प्रतीति । तथाच तावतैव लिङ्गासाधारणदोषत्वं बाध्यत इति भावः । तत्रापि तत्प्रतिबन्धकत्वमाशङ्कते-

योग्यतेति । अन्यथासिद्धत्वादिति । बाधादिनिश्चयदशायां योग्यताज्ञानरूपकारणविरहेणैव शाब्दज्ञानानुत्पादादिति भावः । तदभावः बाधादिनिश्चयाभावः । तत्र शाब्दबुद्धौ यद्यपि योग्यतासंशयद्वितीयक्षणे स्मरणात्मकयोग्यतानिश्चये सति तद्द्वितीयक्षणे शाब्दज्ञानवारणाय तदभावस्य शाब्दबोधहेतुत्वस्यावश्यकत्वम्, तथापि बाधादिज्ञानस्य शाब्दाप्रतिबन्धकत्वेपि निर्विवादोपनीतभानविशेषप्रतिबन्धकतयैव बाधादेर्लिङ्गासाधारणदोषत्वनिराकरणत्वसंभवात्, तन्मतन्निराकरोति एवमपीति । उपनीतभानविशेष–दोषविशेषाजन्योपनीतभानं, तत्त्वेन–बाधनिश्चयाद्यभावत्वेनैव । दुर्वारत्वादिति । बाधादिनिश्चयदशायामनुमितेरिव तादृशोपनीतभानानुत्पादस्य सर्वानुभवसिद्धत्वादिति भावः ॥

इति श्रीगदाधरभट्टाचार्यचक्रवर्तिविरचितायां गादाधर्यां
हेत्वाभाससामान्यनिरुक्तिनिरूपणम् ।

श्रीगणेशाय नमः ।

अथानुमानगादाधर्यां

सव्यभिचारप्रकरणम् ।

(चि०) सव्यभिचारोऽपि त्रिविधः-साधारणासाधारणानुपसंहारिभेदात्। तत्र सव्यभिचारः साध्यतदभावप्रसञ्जक इति न त्रितयसाधारणं लक्षणम्-एकस्योभयं प्रत्यसाधकत्वात्, अनापादकत्वाच्च। नाप्युभयपक्षवृत्तित्वं उभयव्यावृत्तं वा तत्त्वम्-अननुगमात्।

(दी०) यद्यपि लक्षणतः सामान्यमप्रतीतवतो विशेषजिज्ञासानुदयात् सामान्यलक्षणानन्तरमेव विशेषविभागो युक्तस्तथापि सव्यभिचारपदस्य साधारणमात्रे प्रसिद्धतया तन्मात्रस्य लक्ष्यभावं बुध्यमानैरन्तेवासिभिरसाधारणादिसाधारणस्य लक्षणस्यातिव्याप्तिस्तस्माद्वृत्तस्यैव च साधुता प्रतीयेत अतस्तद्वारणाय लक्ष्यान्तरमपि दर्शयति सव्यभिचार इति।

कश्चित्तु सामान्यज्ञानाधीनो विभागो न तल्लक्षण(तः) प्रत्ययमपेक्षतेऽतः प्रथमं विभागकरणेऽपि न दोष इत्याह। प्रसक्तिरनुमितिरापत्तिर्वा, तद्द्वयधानमव्यापकमतिव्यापकञ्च तथाविधव्याप्तिभ्रमेण सङ्केतावतस्तद्योग्यता वाच्या, सा च तादृशव्याप्त्यादिरूपा, न च विरुद्धोभयव्याप्यत्वमेकस्य सम्भवतीत्याह एकस्येति।

(गा०) सव्यभिचारसामान्यलक्षणमनुक्त्वा मणिकृतस्तद्विभ·
जनमाक्षिपति यद्यपीति । लक्षणतः–लक्षणवाक्यतः । सामान्यं–सा·
धारणासाधारणानुपसंहारित्रितयसाधारणधर्मम् । अप्रतीतवतो·
ऽन्तेवासिन इति शेषः । विशेषजिज्ञासानुदयात्–अवान्तरधर्मप्रका·
रकज्ञानेच्छोत्पत्त्यसम्भवात् । सामान्यज्ञानस्य विशेषजिज्ञासायां
स्वातन्त्र्येणेष्टसाधनताज्ञाने धर्मितावच्छेदकज्ञानसम्पादकतया वा
हेतुत्वादिति भावः । सामान्यलक्षणानन्तरं—सव्यभिचारसामा·
न्यलक्षणानन्तरम् । विभागः—सव्यभिचारविभागः । सव्य·
भिचारत्वावान्तरधर्मपुरस्कारेण धर्मिप्रतिपादनमिति यावत् ।
नायं ग्रन्थो विभागपरः, अपि त्वसाधारणानुपसंहारिणोर·
लक्ष्यताभ्रमनिबन्धनवक्ष्यमाणसामान्यलक्षणातिव्याप्तिभ्रमनिराकर·
णाय त्रयाणां लक्ष्यतापर इति समाधत्ते तथापीति । साधारण·
मात्रे प्रसिद्धतया—भूरिप्रयोगविषयसाधारणमात्रकतयाऽतिव्याप्तिः
प्रतीयेतेति सम्बध्यते । तद्व्यावृत्तस्य—असाधारणादिव्यावृत्तस्य ।
साधुता–निर्दोषता । लक्ष्यान्तरमिति । तथाच सव्यभिचार इतिमू·
लस्य वक्ष्यमाणसव्यभिचारसामान्यलक्षणलक्ष्य इत्यर्थः ।

एतद्ग्रन्थस्य विभागपरत्वमुपपादयतो मतमाह—कश्चिदिति ।
सामान्यज्ञानाधीनः–सामान्यज्ञानसामान्याधीनः । तल्लक्षणप्रत्ययं·
लक्षणवाक्याधीनसामान्यज्ञानमात्रम् । अत्र च विभागोपयुक्तसा·
मान्यज्ञानस्योपायान्तरतोऽभ्युपगमे पश्चादपि सामान्यलक्षणाभि·
धानमसङ्गतमनाकाङ्क्षितत्वादित्यस्वरससूचनाय कश्चिदित्युक्तम् ।

अथवा सामान्यज्ञानाधीनः–त्रितयसाधारणकिञ्चिद्धर्मावच्छि·
न्नज्ञानाधीनः, तल्लक्षणप्रत्ययं—सव्यभिचारपदार्थतावच्छेदकव·
क्ष्यमाणलक्षणज्ञानमपेक्षते । अत इति । तादृशलक्षणाज्ञानेपि सव्य·
भिचारपदार्थत्वरूपसामान्यज्ञानस्य शिष्याणां स्वत एव सम्भवेन
विशेषजिज्ञासासम्भवादिति भावः । अत्र च सव्यभिचारपदार्थत्वे·
न त्रयाणां ज्ञानेऽपि प्रथमं सव्यभिचार एव कीदृश इत्येवं जिज्ञा·
सोदेति न तु सव्यभिचारपदार्थः कतीति प्रथमं विभागोऽनुचित इ·
त्यस्वरसबीजम् ।

प्रसक्तञ्चपदस्यानुमापकापादकयोरेकतरमात्रपरत्वेऽसाधकत्वा·
दित्यादिदोषद्वयासङ्गतेस्तत्सङ्गमनाय प्रसक्तिपदार्थं वितर्कयति–प्रस

क्तिरिति । प्रपूर्वकसञ्जधात्वर्थ इत्यर्थः । तत्कोटिव्याप्यस्यापि व्याप्तिभ्रमेण तद्विरुद्धकोटेरापादकत्वमनुमापकत्वञ्च सम्भवतीत्येकस्योभयं प्रति असाधकत्वादित्यादिदोषासङ्गतिरित्यत आशयं पूरयति–तदुपधानमिति । प्रसक्त्युपधायकत्वमित्यर्थः । अव्यापकमिति । येन हेतुना कदाचिदपि साध्यस्य तदभावस्य वानुमितिरापत्तिर्वा न जनिता प्रत्येकमपि तदसङ्ग्राहकमित्यर्थः । तथाविधेति । साध्याभावनिरूपितेत्यर्थः । तद्योग्यता–प्रसक्तियोग्यता, वाच्या–प्रसञ्जकपदेन विवक्षणीया । योग्यतायास्तत्स्वरूपयोग्यज्ञानविषयतारूपत्वे व्याप्तिभ्रमविषयतामादाय पुनरुक्तदोषप्रसङ्ग इत्यतो योग्यतामाचष्टे–सा चेति । तत्कोटिप्रसक्तियोग्यता चेत्यर्थः । व्याप्त्यादिरूपा–तत्कोटिनिरूपितव्याप्त्यादिरूपा ॥

(चि०) अथ साध्यसंशयजनककोटिद्वयोपस्थापकपक्षधर्मताज्ञानविषयत्वे सति हेत्वभिमतः सः ।

(दी०) साध्येति । कोटिद्वयोपस्थापकं सत् साध्यसन्देहजनकं साध्यसन्देहजनककोटिद्वयोपस्थितिजनकमिति यावत् । आश्रयतया विषयितया वा नित्यत्वानित्यत्वोपस्थापकस्य नित्यत्वे साध्ये ज्ञानस्यानुवृत्तत्वव्यावृत्तत्वाभ्यां वह्नितदभावोपस्थापकस्य वह्नौ साध्ये धूमस्य वारणाय जनकान्तम् । तथोपस्थितेः साध्यसन्देहाजनकत्वात् । धर्मितावच्छेदकपुरोवर्त्तित्वादिविशिष्टधर्मिज्ञानस्य संशयजनकतया तद्वारणाय कोटिद्वयोपस्थापकेति ।

(गा०) साध्यसन्देहेति यथाश्रुतग्रन्थात्पक्षधर्मताज्ञानस्य साध्यसन्देहजनकत्वं कोटिद्वयोपस्थितिजनकत्वञ्च लक्ष्यते । तत्र च नित्यत्वादिसाध्यकज्ञानादिहेतौ वक्ष्यमाणातिव्याप्तिर्वारयितुमशक्यैव–नित्यत्वतदभावविषयकज्ञानवानयमिति ज्ञानस्य नित्यत्वतदभावोपस्थापकत्वात्, धर्मितावच्छेदकप्रकारकज्ञानमुद्रया तादृशज्ञानवद्वित्त्वावच्छिन्नधर्मिकनित्यत्वसंशयहेतुत्वाच्च । न च फलीभूतसंशयधर्मितावच्छेदकता यादृशधर्मे पर्याप्ता तादृशधर्मावच्छिन्नविशेष्यकयत्प्रकारकज्ञानत्वेन संशयं प्रति हेतुतेति विव-

क्षणे नायं दोषः, तादृशज्ञानस्य धर्मितावच्छेदकप्रकारकज्ञानमुद्रया
नित्यत्वतदभावविषयकज्ञानवदिदन्त्वपर्याप्तधर्मितावच्छेदकताकसं·
शयं प्रत्येव हेतुत्वात्, तादृशधर्मं धर्मितावच्छेदकीकृत्य तज्ज्ञानवत्त्वा·
नवगाहित्वात्, शुद्धेदन्त्वं धर्मितावच्छेदकीकृत्यैव तदवगाहित्वादिति
वाच्यम्। तथासति वक्ष्यमाणधर्मितावच्छेदकातिव्याप्तेरप्रसक्त्या
कोटिद्वयोपस्थापकत्वनिवेशवैयर्थ्यप्रसङ्गादित्यतो मूलमन्यथा व्या·
चष्टे साध्येतीति । कोटिद्वयोपस्थापकं सदिति । एतेन कोटि·
द्वयोपस्थापकत्वे साध्यसन्देहजननोद्देश्यतावच्छेदकता लभ्यते ।
एवञ्च धनवान्सुखीत्यादौ धनादेः सुखादिप्रयोजकताबोधस्यानुभ·
विकतया उद्देश्यविधेयभावस्थलेऽसति बाधके उद्देश्यविधेययोः प्रयो·
ज्यप्रयोजकभावबोधस्य व्युत्पत्तिसिद्धत्वात्, कोटिद्वयोपस्थितिजनक·
तायाः साध्यसन्देहजनननिर्वाहकतालाभेन व्यापारजनकतायाश्च
फलजनननिर्वाहकत्वात् कोटिद्वयोपस्थितेर्द्वारता लाभ इति कोटि·
द्वयोपस्थितिद्वारा साध्यसन्देहजनकत्वं लभ्यते दर्शितज्ञानवत्ता·
ज्ञानस्य धर्मितावच्छेदकप्रकारकज्ञानमुद्रया साक्षादेव साध्यसन्दे·
हजनकतया नातिप्रसङ्गः। कोटिद्वयोपस्थितिद्वारा साध्यसन्देह·
जनकत्वञ्च साध्यसन्देहजनककोटिद्वयोपस्थितेर्जनकत्वे सति सा·
ध्यसन्देहजनकत्वम्। अत्र च विशेष्यांशनिवेशो निष्फलः सत्य·
न्तदलमात्रनिवेशेनैव सामञ्जस्यादतस्तं परित्यज्य निष्कृष्टार्थमाह–
साध्यसन्देहजनकेति । जनकान्तनिवेशनप्रयोजनमाह–आश्रयत·
येत्यादिना। आश्रयतया विषयतया वा नित्यत्वानित्यत्वोपस्था·
पकस्य––नित्यत्वानित्यत्वोपस्थितिजनकीभूताश्रयत्वादिरूपसम्बन्ध·
ज्ञानविषयस्य ज्ञानस्य, नित्यत्वे साध्ये, वारणाय–नित्यत्वसाध्यक·
स्थले सव्यभिचारत्वाभावसम्पादनायेत्यर्थः। एकज्ञानस्य नित्यत्व·
तदभावोभयाश्रयताविरहादाश्रयतासम्बन्धमादाय यथाश्रुते नाति·
व्याप्तिसंभव इति आश्रयवृत्तिज्ञानवत्त्वसम्बन्धोऽनुसरणीयोऽतस्त·
दपेक्षया लघुसम्बन्धमादाय व्यावृत्तिमाह–विषयतया वेति। एकज्ञा·
नस्य तदुभयविषयकत्वं निष्प्रत्यूहमेवेति ध्येयम्। समवायेन हेतावति·
व्याप्तिमुक्त्वा संयोगेन हेतावपि तामाह अनुवृत्तित्वेति। अनुवृत्तित्वं सा·
मानाधिकरण्यं व्यावृत्तत्वं विरोधस्ताभ्यां, वह्नितदभावोपस्थापकस्य·
वह्नितदभावोपस्थितिजनकीभूततादृशसम्बन्धद्वयज्ञानविषयस्य, वह्नौ

साध्ये-वह्निसाध्यकस्थले, वारणाय-सव्यभिचारत्वाभावसंपादनायेत्यर्थः । जनकान्तस्य वारकत्वे हेतुमाह तथोपस्थितेरिति । तादृशसम्बन्धज्ञानजन्योपस्थितेरित्यर्थः । सन्देहाजनकत्वादिति । सन्देहं प्रति साधारणासाधारणधर्मवद्धर्मिविप्रतिपत्तिज्ञानजन्याया एव कोट्युपस्थितेर्हेतुत्वादिति भावः । जनकता च साध्यसंशयत्वावच्छिन्नजन्यतानिरूपिता ग्राह्या, अतः सम्बन्धान्तरज्ञानजन्यकोट्युपस्थितेर्विशेषणज्ञानादिमुद्रया संशयाहेतुत्वेऽपि न क्षतिः । यद्यसाधारणधर्मज्ञानादिजन्यसंशये व्यभिचारवारणाय साधारणधर्मज्ञानादिजन्योपस्थितिजन्यतावच्छेदककोटौ तादृशाव्यवहितोत्तरत्वनिवेशावश्यकतया साध्यसंशयत्वं तत्र प्रयोजनविरहेण न निवेश्यत इत्युच्यते, तदा संशयत्वावच्छिन्नत्वं परित्यज्य साध्यसंशयत्वन्यूनवृत्तित्वमेव निवेशनीयं विशेषणज्ञानादिजन्यता च न तन्न्यूनवृत्तिरिति नातिप्रसङ्गः । न चैवमपि यत्र नित्यत्वानित्यत्वाभावसहचरितप्रमेयत्ववानयं नित्यत्वतदभाववाँश्चायमित्याकारकज्ञानाभ्यां नित्यत्वतदभावविषयिणी एकैवोपस्थितिर्जनिता तत्र तादृशोपस्थितिजनकपक्षधर्मताज्ञानविषयत्वमादाय ज्ञानेऽतिव्याप्तिर्दुर्वारा तादृशोपस्थितिव्यक्तेः साधारणधर्मवत्ताज्ञानजन्यतया साध्यसंशयत्वावच्छिन्नं प्रति जनकत्वादिति वाच्यम् । साध्यसंशयत्वावच्छिन्ननिरूपितजनकतानियतजन्यतानिरूपकीभूतजनकताया एव पक्षधर्मताज्ञानविशेषणत्वोपगमान्नित्यत्वानित्यत्वविषयज्ञानवत्ताज्ञानजन्यतायाः संशयाजनकसाधारणधर्मवत्ताज्ञानाजन्यतदुभयोपस्थितिसाधारणतया संशयत्वावच्छिन्ननिरूपितजनकताव्यभिचारित्वेनातिप्रसङ्गविरहात् । साधारण्यादिविशिष्टधर्मवत्ताज्ञानजन्यतदुभयोपस्थितीनां सर्वासां तादृशोपस्थितित्वेन संशयत्वावच्छिन्नं प्रति हेतुतया तादृशज्ञाननिरूपितकोट्युपस्थितिनिष्ठजन्यतायाः संशयत्वावच्छिन्ननिरूपितजनकतानियतत्वमक्षतमेव ।

अथवा उक्तातिप्रसङ्गवारणाय तादृशजनकतावच्छेदकावच्छिन्नत्वमेव जन्यतायां निवेशनीयम् । अव्यवहितोत्तरत्वसम्बन्धेन साधारण्यादिविशिष्टपक्षधर्मवत्ताज्ञानविशिष्टतत्तत्कोट्युपस्थितित्वरूपतादृशज्ञानजन्यतावच्छेदकधर्म एव च संशयजनकतावच्छेदकः न तु तादृशज्ञानजन्यतत्कोट्युपस्थितत्वं जन्यतापेक्षया तद्व-

टकस्याव्यवहितोत्तरत्वस्य लघुत्वात्। अत आत्माश्रयेन साधारणादिधर्मवत्ताज्ञानजन्यत्वस्य तादृशज्ञानजन्यतानवच्छेदकत्वे न क्षतिः। जनकतावच्छेदकावच्छिन्नत्वञ्च जनकतावच्छेदकपर्याप्तावच्छेदकताकत्वं तेन साध्यसन्देहजनकतावच्छेदकघटकज्ञानत्वादेर्नित्यत्वतदभावविषयकज्ञानवत्ताज्ञानादिजन्यतावच्छेदकताघटकत्वेऽपि न क्षतिः। जनकतावच्छेदकतापर्याप्तिर्न निवेश्यते प्रयोजनविरहात्। तेन साधारण्यादिविशिष्टधर्मवत्ताज्ञानजन्यतावच्छेदककोटौ तद्वैशिष्ट्यनिवेशनैवोपपत्तौ प्रयोजनविरहेण संशयजनकतावच्छेदकघटकस्य साध्योपस्थितत्वादेरनिवेशेऽपि न क्षतिः। न चैवं साध्यसंशयत्वादेर्निवेशनं व्यर्थं यत्किञ्चिज्जनकतावच्छेदकावच्छिन्नजन्यतानिवेशनेनैवोपपत्तेः, नित्यत्वतदभावविषयकज्ञानवत्ताज्ञानजन्यतावच्छेदकस्याव्यवहितोत्तरत्वसम्बन्धेन तादृशज्ञानविशिष्टनित्यत्वादिविषयकोपस्थितित्वस्य किञ्चिदपि कार्यं प्रति जनकतावच्छेदकत्वाभावेनातिप्रसङ्गविरहादिति वाच्यम्। तथासति वह्न्यादौ साध्ये रासभतदभावसाहचर्यादिप्रकारकज्ञानमादाय धूमादावतिप्रसङ्गापातात्, प्रकृतसाध्यसन्देहजनकताया अवश्यं निवेशनीयत्वात्। न च कोटिद्वयपदस्य प्रकृतसाध्यतावच्छेदकावच्छिन्नतदभावपरतया प्रकृतसाध्यतावच्छेदकावच्छिन्नविषयकोपस्थितित्वघटितधर्मावच्छिन्नजन्यतानिवेशान्नेयमतिव्याप्तिरिति वाच्यम्। एवंसति एतल्लाभायैव संशयपदोपादानात्।

ननु साध्यसन्देहजनकपक्षधर्मताज्ञानविषयत्वेनैव सामञ्जस्ये कोटिद्वयोपस्थापकत्वांशनिवेशोऽनतिप्रयोजक इत्याशङ्कामपनेतुं तत्प्रयोजनमाह धर्मितावच्छेदकेति। तद्वारणाय—वह्न्यादिव्याप्ये तद्विरुद्धे वा पुरोवर्त्तित्वादौ वह्न्यादिव्यभिचारित्ववारणाय। कोटिद्वयेति। न च साध्यसन्देहजनकोपस्थितिजनकत्वमेव निवेश्यतां किमुपस्थितौ कोटिद्वयाविषयकत्वनिवेशनेनेति वाच्यम्। तथासति व्याप्यविरुद्धयोरतिव्याप्तिः। तथाहि—संशयं प्रति तत्कोटिसहचरितधर्मवत्ताज्ञानजन्यतदुपस्थितित्वेन तदभावकोटिसहचरितधर्मवत्ताज्ञानजन्यतदभावोपस्थितित्वेन पृथगेव तत्तत्साहचर्यविषयतामन्तर्भाव्य हेतुता कल्प्यते। एवं तत्तत्कोट्युपस्थितिं प्रत्यपि तथैव तत्तत्कोटिसहचरितधर्मवत्ताज्ञानत्वेन हेतुता। इत्थञ्च वह्न्य-

भावसहचरितधूमवानिति ज्ञानजन्यवह्न्यभावोपस्थितिसहकारेण वह्निसंशयजनकवह्न्युपस्थितिजनकीभूतं वह्निसहचरितधूमवानिति ज्ञानमादाय धूमे वह्निसहचरितजलत्ववानिति ज्ञानजन्यवह्न्युपस्थितिसहकारेण वह्निसंशयजनकवह्न्यभावोपस्थितिजनकीभूतं वह्न्यभावसहचरितजलत्ववानितिज्ञानमादाय च जलत्वेऽतिव्याप्तिः। कोटिद्वयोपस्थितिनिवेशे च तथाविधज्ञानयोः प्रत्येकं कोटिद्वयोपस्थापकत्वाभावान्नातिप्रसङ्गः। न च वह्निसहचरितधूमवान्वह्न्यभावसहचारितधूमवांश्च पर्वत इत्येतादृशसमूहालम्बनज्ञानस्य कोटिद्वयोपस्थापकत्वेनैतद्दोषतादवस्थ्यमिति वाच्यम्। साध्योपस्थितिजनकतावच्छेदकीभूता या साध्याभावोपस्थितिजनकतावच्छेदकीभूतप्रकारता तदाश्रयत्वनिवेशात्तादृशसमूहालम्बनज्ञाननिरूपितयोः वह्नितदभावसाहचर्यावच्छिन्नप्रकारतयोः प्रत्येकन्तादृशजनकताद्वयावच्छेदकत्वविरहेणातिप्रसङ्गविरहात्। धूमसहचरितवह्निमान् धूमाभावसहचरितवह्निमांश्च पर्वत इत्यादिसमूहालम्बनज्ञाने प्रकारतावच्छेदकभेदेन वह्न्यादिप्रकारताभेदात्प्रत्येकं कस्याश्चिदपि प्रकारतायास्तादृशजनकताद्वयावच्छेदकत्वासम्भवेऽपि धूमधूमाभावसहचरितवह्निमान्पर्वत इत्याद्याकारकोभयसाहचर्यावच्छिन्नलक्षणैकप्रकारतायास्तथात्वेन वह्न्यादौ लक्षणसमन्वयः। वह्नितदभावसहचरितधूमवान्पर्वत इत्याद्याकारकोभयसाहचर्यावच्छिन्नप्रकारताशालिज्ञानमादायातिप्रसङ्गस्तु तादृशप्रकारतावच्छेदकतापर्याप्त्यधिकरणधर्मवत्त्वविवक्षया स्वयमेव निराकरिष्यते।

अथ वह्निसाहचर्येण वह्न्यभावसाहचर्यमात्रेण वाऽवच्छिन्ना या व्याप्यस्य विरुद्धस्य वा प्रकारता तस्याः उद्बोधकान्तरवशात्साध्यतदभावोभयविषयकसमूहालम्बनोपस्थितिजनकज्ञानीयतया प्रत्येकं साध्योपस्थितिजनकतायां साध्याभावोपस्थितिजनकतायाश्चावच्छेदकत्वेनातिप्रसङ्गः। यदि च साध्यविशेषणकोपस्थितिवृत्तिसाध्यसन्देहजनकतानियतं यज्जन्यत्वं तन्निरूपितायां साध्याविशेषणकोपस्थित्यवृत्तिसाध्यसन्देहजनकतानियतञ्च यज्जन्यत्वं तन्निरूपितायाञ्च जनकतायामवच्छेदिका या प्रकारता तस्याः साध्याभावविषयकत्वघटितधर्मावच्छिन्नजनकतावच्छेदकावच्छिन्नजन्यतानि-

निरूपितायां तादृशधर्मानवच्छिन्नसाध्यविषयकत्वघटितधर्मावच्छिन्नजनकतावच्छेदकावच्छिन्नजन्यतानिरूपितायाश्च जनकतायामवच्छेदिका या प्रकारता तस्या वा निवेशान्नोक्तदोषः। साध्याभावोपस्थित्यवच्छिन्नाया अपि जनकतायाः साध्यविषयकत्वघटितधर्मावच्छिन्नतया विरुद्धातिव्याप्तेर्दुर्वारतया साध्यविषयकत्वघटितधर्मावच्छिन्नजनकतायां साध्याभावविषयकत्वानवच्छिन्नत्वप्रवेशः। साध्यमुख्यविशेष्यताघटितधर्मावच्छिन्नत्वं निवेश्यैव वा तादृशातिव्याप्तिर्वारणीयेत्युच्यते, तथापि वह्निमद्वृत्तिवह्न्यभाववद्व्यावृत्तधूमवानयं वह्निमद्व्यावृत्तवह्न्यभाववद्वृत्तिजलत्ववानिति ज्ञानीयधूमादिप्रकारतामादायातिप्रसङ्गो दुर्वार एव। वह्निमद्वृत्तिधूमवत्ताज्ञानजन्यवह्न्युपस्थितेर्वह्न्यभाववद्वृत्तिधर्मवत्ताज्ञानजन्यवह्न्यभावोपस्थितिसहकारेण संशयजनकतावद्वह्न्यभाववद्व्यावृत्तधर्मवत्ताज्ञानजन्यवह्न्यभावोपस्थितेरपि वह्निमद्व्यावृत्तधर्मवत्ताज्ञानजन्यवह्न्युपस्थितिसहकारेण संशयजनकत्वात्, तादृशज्ञानीयधूमप्रकारताया वह्निसाहचर्यावच्छिन्नत्वेन संशयजनकवह्न्युपस्थितिजनकतायां वह्न्यभाववद्व्यावृत्तत्वावच्छिन्नत्वेन च तथाविधवह्न्यभावोपस्थितिजनकतायां तादृशज्ञानीयजलत्वप्रकारतायाश्च वह्निमद्व्यावृत्तत्वावच्छिन्नत्वेन तथाविधवह्न्युपस्थितिजनकतायां वह्न्यभाववद्वृत्तित्वावच्छिन्नत्वेन च तथाविधवह्न्यभावोपस्थितिजनकतायामवच्छेदकत्वात्।

मैवम्। साध्यविषयत्वघटितधर्मावच्छिन्नजनकतावच्छेदको यो धर्मस्तदवच्छिन्नजन्यतानिरूपितायां तदवच्छिन्नसहकारितावच्छेदकसाध्याभावाविषयकत्वघटितधर्मावच्छिन्नजनकतावच्छेदकावच्छिन्नजन्यतानिरूपितायाश्च जनकतायामवच्छेदकीभूतप्रकारतानिवेशे नातिप्रसङ्गः। तदवच्छिन्नसहकारितावच्छेदकत्वञ्च तदवच्छिन्नासमवधानप्रयुक्तफलोपधायकत्वाभाववत्त्वावच्छिन्नकत्वमित्यलं पल्लवितेन॥

(दी०) न च तदसाधारणतया संग्राह्यमेवेति वाच्यम्। तथात्वेऽपि तदुत्तीर्णतादशायां विशेषदर्शनात् संशयानुपधायकत्वेऽपि तज्जननयोग्यताया अनिवृत्तेः। अन्यथा यथायथं पक्षे

साध्यतदभावनिश्चयदशायां साधारणाव्याप्तिप्रसङ्गात् । प्रतिपक्षसम्वलनदशायां हेतुमत्ताज्ञानस्य साध्यसन्देहजनकत्वपक्षे हेतुवारणाय कोटीत्यादि । हेतुना साध्यस्य प्रतिहेतुना तदभावस्य उपस्थापनादुभयोपस्थापकत्वं न कस्यापीत्यपि कश्चित् ।

(गा०) तत्-संशयधर्मितावच्छेदकेदन्त्वादिकम् । असाधारणतयेति । संशयविषयमात्रवृत्तित्वेन सपक्षविपक्षव्यावृत्तत्वादिति भावः । सङ्ग्राह्यमेव-संशयदशायां सव्यभिचारसामान्यलक्षणलक्ष्यमेव । तथाच संशयदशायां लक्ष्यतयैव नातिव्याप्तिसंभवः । तदवच्छिन्ने साध्यादिनिश्चयदशायाञ्च तत्प्रकारकज्ञानस्य संशयजनकतया संशयजनकताघटितस्य लक्षणस्यैतत्साधारण्यञ्च संभवतीति हृदयम् ।

तादृशनिश्चयदशायामेवातिव्याप्तिं सङ्क्रमयति तथात्वेपीति । तथात्वेपि-तदवच्छिन्नविशेष्यकसंशयदशायान्तस्य लक्ष्यत्वेऽपि,तदुत्तीर्णतादशायाम्-असाधारण्योत्तीर्णतादशायाम्,तादृशधर्मवति-साध्यस्य तदभावस्य वा निश्चयदशायामिति यावत्, विशेषदर्शनात् विपरीतनिश्चयात् । तज्जननयोग्यताया इति । तत्प्रकारकज्ञानस्येत्यादिः । अनिवृत्तेरिति । अतिव्याप्तिरिति शेषः । वक्ष्यमाणदोषेण संशयफलोपधायकतानिवेशासम्भवादिति भावः । इदमुपलक्षणम् । फलोपधायकतानिवेशेपि संशयजनकज्ञानशून्यतादशायां साधारणाव्याप्तिभयेन तादृशज्ञानस्योपलक्षणविधयैव लक्षणे निवेशनीयतया संशयोपधायककालान्तरीणज्ञानविषयतामादायातिव्याप्तिः सम्भवतीति बोध्यम् । अन्यथा-फलोपधायकज्ञानस्य विशेषणविधया लक्षणघटकत्वे । पक्षादाविति । पक्षे साध्यादिनिश्चयसत्त्वेपि धर्म्यन्तरविशेष्यकसाध्यसन्देहजनकतामादाय लक्षणगमनसम्भवादादिपदं हेतुमत्ताज्ञानविषयीभूतपक्षेतरयावद्धर्मिपरम् । इदमुपलक्षणम् । साधारण्यादिविशिष्टस्वप्रकारकधर्मिज्ञानशून्यतादशायामव्याप्तिर्बोध्या । साधारणाव्याप्तीति । साधारणस्य नित्यदोषतया तदा तस्यालक्ष्यत्वोपगमासम्भवादिति भावः ।

कोटिद्वयोपस्थापकत्वांशस्य प्रयोजनान्तरं वर्णयन्तो मतमाह

सत्प्रतिपक्षेति । स्वमते व्याप्यवत्तानिश्चयस्य संशयप्रतिबन्धकत्वमेव न तु कारणत्वम् । विरोधिपरामर्शयोरप्रामाण्यग्रहे तु साधारणधर्मादिज्ञानादेव संशय इत्यतो जनकत्वपक्ष इति । हेतुवारणाय-व्याप्यवारणाय, तस्यापि परामर्शात्मकसंशयजनकपक्षधर्मताज्ञानविषयत्वादिति भावः । ननु साधारण्यादिविशिष्टवत्ताज्ञानस्यैव परामर्शयोरपि साध्यतदभावोपस्थितिद्वारैव संशयजनकत्वात्कोट्युपस्थितिनिवेशेऽपि न प्रतीकार इत्यत आह हेतुनेति । उभयोपस्थापकत्वं-साध्योपस्थितिजनकतावच्छेदिका सती तदभावोपस्थितिजनकतावच्छेदकीभूता या प्रकारता तदाश्रयत्वम् ॥

(दी०) इदं द्व्यणुकं नित्यमणुत्वादित्यादौ साधारणधर्मवद्धर्मिज्ञानस्य कोट्युपस्थितिं संशयञ्च प्रति हेतुतया तद्विषये धर्मिणि सद्धेतौ अतिप्रसङ्गः स्यादतः पक्षधर्मतेति । पक्षपदं धर्मिमात्रपरम् । न चैवं नित्यो घटः शब्दत्वादित्यत्र बाधाद्यवतारेऽसाधारण्यापत्तिः, इष्टत्वात्, अन्यथा बाधासिद्ध्योरन्यतरावतारदशायां साधारणासंग्रहापत्तेः । असिद्धिसङ्कीर्णत्वे सव्यभिचारमध्यप्रवेशे सव्यभिचारसङ्कीर्णतया असिद्धेऽप्यनन्तर्भावापत्तौ तस्यातिरिक्तहेत्वाभासत्वापत्तेः । न च व्याप्यविरुद्धयोः साधारण्यभ्रमदशाया(१)मतिप्रसङ्गः, धर्मिणि यद्रूपावच्छिन्नवत्ताज्ञानं साध्यसन्देहजनकं तद्रूपावच्छिन्नत्वस्योक्तत्वात् । तच्च रूपं साधारणत्वादीति सिद्धान्ते स्फुटीभविष्यति ॥

(गा०)निश्चितसाध्याभाववद्वृत्तित्वस्य साधारणघटकतामते केषुचिद्द्व्यणुकेषु साध्याभावनिश्चयसत्त्व एव अणुत्वस्य तथात्वं सम्भवतीत्यभिप्रेत्य तादृशनिश्चयसत्त्वं सूचयितुं यत्किञ्चिद्द्व्यणुकस्य पक्षतालाभाय इदमिति । साधारणधर्मवद्धर्मिज्ञानस्य-नित्यत्वानित्यत्वसहचरिताणुत्ववद्द्व्यणुकधर्मिज्ञानस्य, धर्मिणि-द्व्यणुके । नित्यत्वसाध्यकस्थले

(१) अत्र गादाधर्यनुसारेण-साधारण्यभ्रममादायातिप्रसङ्ग-इति पाठस्समुचितः किन्तु सर्वत्रेदृश 'एव पाठस्योपलंभात्स एव धृत इति बोध्यम् ।

तस्यालक्ष्यत्वसूचनाय सद्हेताविति। अतिप्रसङ्गोऽ-तिव्याप्तिः। न च समूहालम्बनविषयतामादायातिप्रसङ्गवारणाय कोटिद्वयोपस्थितिजनकतावच्छेदकीभूतविषयताश्रयत्वनिवेशनमावश्यकम्, तथा च कथं धर्मिण्यतिव्याप्तिः यतस्तत्कोटिस्मृतौ तत्तत्साहचर्यादिविशिष्टविषयकज्ञानत्वेनैव हेतुता, न तु तद्विशिष्टवद्धर्मिज्ञानत्वेन सम्बन्धिविशेष्यकज्ञानादपि सम्बन्ध्यन्तरस्मरणादन्यथाप्ययं हस्तिसम्बन्धी घटपदं घटे शक्तमित्याद्याकारकज्ञानाद्धस्तिघटादिस्मरणानुदयप्रसङ्गात्, तथा च धर्मिविषयतायाः कोटिद्वयोपस्थापकतावच्छेदकत्वमेव नास्तीति वाच्यम्। सम्बन्धिविशिष्टधर्मिज्ञानत्वेनैवापरसम्बन्धिस्मारकतेति मतानुसारेणैवैतल्लक्षणप्रणयनात्। एतन्मतस्य निर्युक्तिकतया पक्षधर्मतापदस्य निष्प्रयोजनकत्वमाकलय्यैतत्परित्यागेन सिद्धान्तलक्षणस्य वक्ष्यमाणत्वात्।

वस्तुतस्तु साध्यसन्देहजनककोटिद्वयोपस्थितिजनकज्ञानविषयत्वमित्यस्य कोटिद्वयोपस्थितिनिष्ठा या साध्यसन्देहजनकता जन्यतासम्बन्धेनाव्यवहितोत्तरत्वसम्बन्धेन वाऽवच्छिन्नायान्तदवच्छेदकतायामवच्छेदिका या विषयता तदाश्रयत्वमर्थः। एवञ्च साधारणधर्मादिविशेष्यकज्ञानस्य कोटिद्वयस्मरणजनकत्वेपि संशये धर्मिभाननियमाय तत्तद्धर्मिकसंशयं प्रति साधारण्यादिविशिष्टधर्मवद्धर्मिज्ञानविशिष्टकोट्युपस्थितित्वेन हेतुतेति धर्मिविषयताया अपि तादृशसन्देहजनकतावच्छेदकतावच्छेदकत्वादतिव्याप्तिरतः पक्षधर्मतापदोपादानमावश्यकमिति पक्षधर्मतेति। न च पक्षधर्मतापदोपादानेपि तद्दोषतादवस्थ्यं धर्मिणोपि पक्षधर्मताज्ञानविषयत्वादिति वाच्यम्। तदुपादानबलेन निरुक्तायां जनकतायां परम्परया जनकतावच्छेदकतायां वाऽवच्छेदकीभूता या धर्मिविषयता तन्निरूपितविषयता प्रकारतापर्यवसिता तदाश्रयत्वस्य लाभेनातिप्रसङ्गविरहात्। प्रकारतायाः प्रकारतात्वेनावच्छेदकत्वं विवक्षणीयम्। तेन साधारणधर्मादेर्धर्मितावच्छेदकीभूतसद्हेतौ नातिप्रसङ्गः। धर्मितावच्छेदकीयविषयतायाः प्रकारतात्वव्याप्येन धर्मितावच्छेदकतात्वेनैव निवेशात्। प्रकृतपक्षस्य प्रकृतपक्षतायाश्च निवेशे प्रयोजनाभावात् पक्षपदं धर्मिमात्रपरतयाव्याचष्टे पक्षपदमिति। धर्मिमात्रेति। मात्रपदेन पक्षतानिवेशव्यवच्छेदः।

यत्तु धर्मिपदमत्र मुख्यविशेष्यपरम्। तेन वह्निवहृयभावसहचरितधूमवद्वृत्तिप्रमेयत्ववान्पक्ष इत्यादिज्ञानीयधूमादिविषयतामादाय नातिप्रसङ्ग इति। तन्न। साहचर्यधर्मितावच्छेदकीयविषयताया जनकतावच्छेदककोटौ प्रयोजनबिरहेणानिवेशान्निवेशेपि वा धर्मितावच्छेदकतात्वेनैव तस्या निवेशनीयतया प्रकारतात्वेनानिवेशात्साहचर्यस्य धर्मितावच्छेदकविषयतान्तःपातिधूमादिविषयतामादायातिप्रसङ्गाभावात्।

पक्षपदस्य पक्षताविशिष्टप्रकृतपक्षपरत्वमावश्यकम्, अन्यथा घटादिरूपपक्षे शब्दत्वादिना नित्यत्वसाधने बाधस्यासिद्धेर्वाऽवतारदशायामपि सपक्षविपक्षव्यावृत्तशब्दत्ववान् शब्द इत्यादिज्ञानविषयतामादाय सव्यभिचारत्वापत्तिः। न चेष्टापत्तिः-दोषान्तरसङ्करप्रसङ्गात्। अस्मन्मते च पक्षताविशिष्टप्रकृतपक्षवृत्तिताज्ञानस्य विशेषणविधया लक्षणघटकत्वान्नातिप्रसङ्गः। बाधग्रहस्थले पक्षताया असिद्धेरवतारे हेतौ प्रकृतपक्षधर्मताज्ञानस्याभावादित्याशङ्कते न चैवमिति। एवं-पक्षपदस्य धर्मिमात्रपरत्वे, बाधसम्पादनायानित्यत्वमुपेक्ष्य नित्यत्वसाध्यतानुसरणम्। एवञ्च घटो नित्य इत्युक्तौ नञ्प्रश्लेषशङ्कया नित्यत्वसाध्यकत्वञ्च स्फुटीभवतीति नित्यो घट इत्युक्तम्। बाधादित्यादिना स्वरूपासिद्धिपरिग्रहः। असाधारण्यापत्तिः-असाधारण्यज्ञानमादाय सव्यभिचारत्वापत्तिः। एतेनास्य सव्यभिचारसामान्यलक्षणतया एतदतिप्रसक्तेरसाधारण्यानापादकत्वादसङ्गतिरित्यपास्तम्। सपक्षावृत्तित्वेन साधारण्यस्य केवलान्वयिधर्मस्य पक्षतानवच्छेदकत्वादनुपसंहारित्वस्य वाऽसम्भवात्परिशेषेणासाधारण्यापत्तिरिति वार्थः। तदानीं सपक्षविपक्षव्यावृत्तत्वसत्त्वे दोषान्तरावतारेऽपि सव्यभिचारत्वमसाधारण्यं वेष्टमेव क्षतिविरहादित्याशयेनाह इष्टत्वादिति। अन्यथा-पक्षतायाः प्रकृतपक्षधर्मताज्ञानस्य वा विशेषणत्वे। बाधासिद्ध्योरिति। बाधस्यासिद्धेर्वाऽवतारदशायां ह्रदादौ धूमादिसाधने वह्न्यादेरसङ्ग्रहापत्तेरित्यर्थः। साधारण्यस्य नित्यदोषतया तत्रेष्टापत्तिर्न सम्भवतीति भावः।

ननु दोषान्तरावतारदशायां सव्यभिचारत्वं क्वापि नेष्यत एव भवतु साधारण्यमप्यनित्यदोष इत्यत आह असिद्धेरिति। साधार-

ण्यभ्रममादायेति । यथायथं साध्याभाववद्वृत्तित्वसाध्यवद्वृत्तित्वांशे भ्रमात्मकं साधारण्यज्ञानमादायेत्यर्थः । धर्मिणि—फलीभूतसंशयधर्मितावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्ने, यद्रूपावच्छिन्नवत्ताज्ञानं–यद्रूपावच्छिन्नप्रकारताशालिज्ञानत्वावच्छिन्नम् । साध्यसन्देहजनकमिति । एतच्च संशयं प्रति कोट्युपस्थितिविशेषणज्ञानादिमुद्रयैव हेतुः साधारणधर्मवद्धर्मिज्ञानञ्च साक्षादेव तथेति निष्कृष्टमते कोट्युपस्थितिजनकत्वाघटितमेव लक्षणङ्कर्तव्यमित्यभिप्रायेण । यथाश्रुतमूलानुरोधे तु संशयजनककोटिद्वयोपस्थितिजनकत्वमेव निवेशनीयम् । साध्यसंशयजनककोटिद्वयोपस्थितिजनकमित्यपि व्याचक्षते । तन्मते धर्मिणीति प्रकारतात्वेन अवच्छेदकतालाभायेति ध्येयम् ।

अथैवं साधारण्यादिघटककेवलसाध्यवद्वृत्तित्वत्वाद्यवच्छिन्नत्वमादायातिप्रसङ्गो दुर्वारः । न च धर्मितावच्छेदकावच्छिन्नविशेष्यतानिरूपितयद्रूपावच्छिन्नप्रकारताशालिज्ञानत्वं संशयजनकतानतिरिक्तवृत्ति तद्वत्त्वस्य साध्यसंशयजनकतावच्छेदकीभूता या धर्मितावच्छेदकावच्छिन्नविशेष्यतानिरूपितप्रकारता तदवच्छेदकतापर्याप्त्यधिकरणधर्मवत्त्वस्य वा निवेशान्नातिप्रसङ्गः, संशयं प्रति कोटिद्वयसाहचर्यावच्छिन्नप्रकारताशालिज्ञानत्वेन साधारण्यादिविशिष्टधर्मवत्ताज्ञानस्यैकहेतुताकल्पनादेकैककोटिसाहचर्यावच्छिन्नप्रकारताशालिज्ञानस्य संशयाजनकतया उभयकोटिसाहचर्यादेरेव तादृशधर्मत्वादिति वाच्यम् । उक्तरूपेणैकहेतुताकल्पनेऽप्येककोटिसाहचर्याद्यवच्छिन्नत्वविशिष्टापरकोटिसाहचर्याद्यवच्छिन्नत्वेनैव प्रकारताया निवेशनीयतया अवच्छिन्नत्वयोर्विशेष्यविशेषणभावे विनिगमनाविरहात्, व्याप्यसंशयस्य साधारणधर्मवत्ताज्ञानान्तर्भावानुपपत्तेश्च । तत्र व्याप्यतदभावयोः प्रत्येकमुभयकोटिसहचरितत्वाभावात् । न च व्याप्यसंशयस्य पृथक्कारणतामत एवेदं लक्षणमिति वाच्यम् । व्याप्यसंशयस्येत्यादिग्रन्थविरोधात् । न च यद्यद्रूपावच्छिन्नप्रकारकज्ञानत्वेन संशयजनकता तत्तद्रूपवत्त्वस्य संशयजनकतावच्छेदकप्रकारतावच्छेदकतापर्याप्तिमन्तो ये ये धर्मास्तद्धर्मवत्त्वस्य वा विवक्षया नातिप्रसङ्ग इति वाच्यम् । सत्तावत्समवेतजातिमान्सत्ताभाववत्समवेतजातिमानयमित्यादिसं-

मविषयितावच्छेदकसत्तावत्समवेतत्वाद्यादाय सत्तादिसाध्यके जात्यादावतिव्याप्तेः। सत्ताभाववत्समवेतत्वस्याप्रसिद्ध्या यत्पदेन तदुपादानासम्भवात्।

वस्तुतस्त्वेवंविवक्षणेऽसाधारण्यादेरपि तादृशधर्मतया साधारणादेरपि तादृशयावद्धर्मवत्त्वाभावादसम्भव एव। न च स्वनिष्ठतादृशप्रकारतावच्छेदकयावद्धर्मवत्त्वविवक्षणेऽसाधारण्यादिवारणं व्याप्यसंशयेत्यादिग्रन्थसङ्गतिश्च सम्भवति। साधारणादेरप्यसाधारण्यादिप्रकारेण ज्ञानस्य संशायकत्वात्। एतेन संशयजनकतावच्छेदकीभूता या प्रकारता तदवच्छेदकतापर्याप्त्यधिकरणधर्मवत्त्वनिवेशेपि न निस्तारः। धर्मिणि यद्रूपावच्छिन्नप्रकारकज्ञानस्य स्वनिष्ठयद्रूपावच्छिन्नप्रकारकज्ञानसहकारेण साध्यसंशयजनकत्वन्तदुभयरूपवत्त्वस्य विवक्षितत्वेपि व्याप्यसंशयस्येत्यादिग्रन्थासङ्गतिरशक्यसमाधिरेव व्याप्यत्वावच्छिन्नप्रकारकज्ञानसहकारिणो धर्मिविशेष्यकस्वनिष्ठरूपान्तरावच्छिन्नप्रकारकज्ञानस्याप्रसिद्धेर्व्याप्यत्वमादाय व्याप्येऽतिप्रसङ्गाप्रसक्तेः।

मैवम्। यत्किञ्चित्साध्यसन्देहनिरूपिताया जनकताया मवच्छेदिका या या धर्मितावच्छेदकावच्छिन्नविशेष्यतानिरूपितप्रकारता तत्तदवच्छेदकतापर्याप्त्यधिकरणधर्मवत्त्वं सव्यभिचारत्वम्। साधारण्यादिविशिष्टहेतुमत्ताज्ञानजन्यसंशयजनकतावच्छेदकीभूता या तादृशी प्रकारता सा साध्याभाववद्वृत्तित्वाद्यवच्छिन्नापि तदवच्छेदकवत्त्वाभावान्न व्याप्यादावतिप्रसङ्गः। यत्किञ्चित्संशयनिवेशादसाधारण्यादेस्साधारण्यादावसत्त्वेऽपि न क्षतिः। व्याप्यसंशयस्य च व्याप्यवत्ताज्ञानत्वेनैव हेतुता न तु व्याप्याभावप्रकारकत्वमपि तत्र निवेश्यते व्याप्यवत्तानिश्चयदशायान्तस्य प्रतिबन्धकत्वादेव संशयापत्त्यसम्भवात्। अतो व्याप्याभावत्वावच्छिन्नप्रकारतायाः संशयजनकतानवच्छेदकतया व्याप्याभावत्वस्य व्याप्येऽसत्त्वेपि न तत्र वक्ष्यमाणाया अतिव्याप्तेरप्रसक्तिः। न च व्याप्यसंशयहेतुतायामप्रामाण्यनिश्चयानास्कन्दितत्वस्यैव निवेशाद्व्याप्यवत्तानिश्चयादप्रामाण्यशङ्कास्कन्दिताद्व्यापकसंशयापत्तिस्तस्याविरोधित्वादिति व्याप्यसंशयत्वेनैव व्यापकसंशयहेतुत्वमावश्यकमिति वाच्यम्। यादृशविषये व्याप्यवत्तानिश्चयदशायां व्यापकसंशयस्येतरसकलका-

रणसमवधाने तादृशनिश्चयेऽप्रामाण्यसंशय एव न जातस्तत्र उक्तातिप्रसङ्गासम्भवेन निश्चयसाधारणव्याप्यवत्ताज्ञानत्वेन हेतुताया निष्प्रत्यूहत्वात्तादृशस्थलीयातिव्याप्त्यभिप्रायकतयैव तद्ग्रन्थस्य व्याख्येयत्वात्।

अथवा व्याप्यवत्ताज्ञानत्वेन या व्यापकसंशयहेतुता तदवच्छेदककोटिप्रविष्टाप्रामाण्यनिश्चयानास्कन्दितत्वघटकनिश्चयत्वं साध्यव्याप्यत्वावच्छिन्नाभावज्ञानविशिष्टाप्रामाण्यसंशयान्याप्रामाण्यज्ञानत्वम्। तथाच व्याप्याभाववत्ताज्ञानशून्यकालीनाप्रामाण्यसंशयस्यापि यथोक्तनिश्चयहेतुत्वात् तद्विशिष्टव्याप्यवत्ताज्ञानकाले चापत्तेरभावात्। न च तथापि व्याप्यवत्ताज्ञानत्वेन व्यापकसंशयहेतुता न सम्भवति, तथासति धर्मितावच्छेदकसामानाधिकरण्यमात्रावगाहिव्याप्यवत्तानिश्चयात्तदवच्छेदेन व्यापकवत्तान्तत्सामानाधिकरण्यमात्रेण व्यापकाभावमवगाहमानस्य संशयस्यापत्तेस्तादृशसंशये तादृशनिश्चयस्याविरोधित्वादिति वाच्यम्। धर्मितावच्छेदकावच्छेदेन व्याप्यवत्तावगाहिनः संशयादेव तदवच्छेदेन व्यापकवत्तावगाहिसंशयोदयात्तादृशव्यापकवत्तासंशये तादृशव्याप्यवत्त्वावगाहिज्ञानत्वेनैव हेतुत्वोपगमादुक्तापत्तेरप्रसक्तेः।

अथवा संशयजनकतावच्छेदकप्रकारतायां सव्यभिचारताघटकसम्बन्धावच्छिन्नत्वस्यावश्यकतया वह्निव्याप्यवान्नवेति संशयीयाभावप्रकारतायाः संयोगादिसम्बन्धानवच्छिन्नतया तत्सम्बन्धावच्छिन्नव्याप्यप्रकारतैव संशयजनकतावच्छेदिकेत्यतिव्याप्तिप्रसक्त्या न व्याप्यसंशयस्येत्यादेरसंगतिः।

अथ साधारणधर्मवत्ताज्ञानस्य संशयजनकत्वे धर्मैक्यस्याप्रयोजकतामते तत्सम्बन्धस्याप्यप्रयोजकतया तादृशजनकतावच्छेदकयावत्प्रकारतासु प्रत्येकमवच्छेदकीभूतानि यानि रूपाणि तद्वत्त्वनिवेशे अयमात्मा ज्ञानादित्यादौ विषयतया आत्मत्वाभावसमानाधिकरणज्ञानवत्ताज्ञानसहकारेण साध्यसन्देहजनकं यत्समवायेन साध्यसहचरितज्ञानादिमत्ताज्ञानन्तर्दीयप्रकारतामादाय समवायेन ज्ञानादेर्व्यभिचारितापत्तेः। विषयितासम्बन्धेनाभावकोटिसहचरिततद्वत्ताज्ञानीयप्रकारतायाः समवायसम्बन्धावच्छिन्नतया सव्यभिचारिताघटकसम्बन्धावच्छिन्नयावत्प्रकारतानन्तर्गतत्वात् इति चेत्।

सत्यम्। यत्किञ्चित्साध्यसंशयनिरूपितजनकतावच्छेदकीभूतधर्मितावच्छेदकावच्छिन्ना या या विशेष्यता तन्निरूपितसव्यभिचारताघटकसम्बन्धावच्छिन्ना या प्रकारता तदवच्छेदकधर्मवत्त्वमेव विवक्षणीयम्। तथा सत्युक्तस्थले विषयतासम्बन्धावच्छिन्नज्ञानप्रकारतानिरूपितविशेष्यताया अपि निरुक्तयावद्विशेष्यतान्तर्गतत्वात्तन्निरूपितसव्यभिचारताघटकसम्बन्धावच्छिन्नप्रकारत्वाप्रसिद्ध्या नातिव्याप्तिः। एवं संशये समुच्चयवैलक्षण्याय उभयप्रकारतानिरूपितैकविशेष्यतास्वीकर्तृमते व्याप्यसंशयीयकोटिद्वयप्रकारतानिरूपितविशेष्यतानिरूपितव्याप्यताघटकसम्बन्धावच्छिन्नप्रकारतावच्छेदकव्याप्यत्वमात्रमादायाप्यतिव्याप्तिः सम्भवतीत्याशङ्क्य व्याप्यसंशयेत्यादिकमभिहितम्।

वस्तुतस्तु जनकतावच्छेदकयावत्प्रकारतावच्छेदकवत्त्वादिनिवेशे धूमतदभावसहचरितकाञ्चनमयवह्निमानित्यादिज्ञानीयप्रकारताया अपि निरुक्तयावत्प्रकारतान्तर्गततया तदवच्छेदकतापर्याप्त्यधिकरणकाञ्चनमयत्वादिघटितधर्मवत्ताया वह्न्यादौ दुरुपपादतया असम्भव इति यत्किञ्चित्संशयनिरूपिता धर्मितावच्छेदकावच्छिन्नविशेष्यताघटितधर्मावच्छिन्ना या या जनकता तदवच्छेदकीभूततादृशविशेष्यतानिरूपितप्रकारतावच्छेदकतापर्याप्तिमद्धर्मवत्त्वमेव विवक्षणीयम्। एवञ्च काञ्चनमयत्वाद्यवगाहितदनवगाहिज्ञानसाधारणकारणताया ऐक्यात्तदवच्छेदकीभूतकाञ्चनमयत्वाद्यनवगाहिज्ञानीयप्रकारतावच्छेदकतापर्याप्त्यधिकरणधर्मवत्त्वमादायैव धूमादिसाध्यकवह्न्यादौ लक्षणसमन्वयः। संशयं प्रति तत्तत्कोटिसाहचर्यावच्छिन्नप्रकारताशालिज्ञानत्वेन साधारण्यादिविशिष्टधर्मवत्ताज्ञानस्य कारणताद्वयीति व्याप्यविरुद्धयोरतिव्याप्तिनिरासः। एवञ्च व्याप्यसंशयत्वावच्छिन्नाया उभयकोटिप्रकारत्वावच्छिन्नाया जनकताया ऐक्यात्तदवच्छेदकीभूतव्याप्यप्रकारतावच्छेदकव्याप्यत्वमादाय व्याप्येऽतिप्रसङ्गो दुर्वार एवेत्याशङ्क्य व्याप्यसंशयस्य पृथक्कारणतामते ज्ञानपदस्य निश्चयपरत्वमुपदर्शितम्। न च व्याप्यसंशयस्य उभयप्रकारत्वेनैकहेतुता विशेष्यविशेषणभावे विनिगमनाविरहादपि तु प्रत्येकप्रकारतां निवेश्य हेतुताद्वयमेव कल्पनीयम् इति नातिव्याप्तिप्रसक्तिरिति वाच्यम्। हेतुताद्वयकल्पने यत्र व्याप्यवत्तानिश्चयस्य

स्वांशेऽप्रामाण्यसंशयात्मकस्यानन्तरक्षणे व्याप्याभाववत्तानिश्चयस्तदुत्तरक्षणे व्यापकसंशयापत्तेः । एतेन यावत्प्रकारतानिवेशपक्षेपि सव्यभिचारताघटकसम्बन्धावच्छिन्ननिरुक्तजनकतावच्छेदकप्रकारतानां न यावत्त्वेन निवेशः अपितु निरुक्तजनकतावच्छेदकीभूता यावत्यः प्रकारताः सव्यभिचारताघटकसम्बन्धावच्छिन्नानां तासां प्रत्येकावच्छेदकरूपवत्त्वं निवेश्यम् । एवं च अयमात्मा ज्ञानादित्यादौ नोक्तक्रमेणातिव्याप्तिसम्भवः विषयतासम्बन्धावच्छिन्नज्ञानादिप्रकारतानामपि निरुक्तयावत्प्रकारतान्तर्गततया सव्यभिचारताघटकसम्बन्धावच्छिन्नत्वस्य तत्रासत्त्वेन तेन रूपेण तदुपादानासम्भवात् । तथाच तावता व्याप्यसंशयहेतुतामादायाप्यतिव्याप्तिवारणसम्भवेन विशेष्यताया यावत्त्वेन निवेशनं ज्ञानपदस्य निश्चयपरत्वं च न युक्तमिति पूर्वव्याख्यानासम्यक्त्वेपि न क्षतिः ।

अथवा व्याप्यसंशयस्य साधारणधर्मवत्ताज्ञानान्तर्भावमते एकैककोटिसामानाधिकरण्यमादाय सद्धेतावतिप्रसङ्गवारणाय यत्किञ्चित्संशयजनकतावच्छेदकयावत्प्रकारतापर्यन्त निवेशनीयम् । व्याप्यसंशयस्य पृथक्कारणतामते नोक्तक्रमेण सद्धेतावतिप्रसङ्गशङ्कावकाशः तन्मते कोटिद्वयसामानाधिकरण्यावच्छिन्नत्वेनैव प्रकारताया जनकतावच्छेदकत्वोपगमात् । एकैककोटिसाहचर्यावच्छिन्नत्वप्रकारतायाः संशयजनकतानवच्छेदकत्वात । अतो यावत्प्रकारतानिवेशनं संशये यत्किञ्चित्त्वनिवेशनं च न कर्तव्यम्, अपि तु व्याप्यसंशयहेतुतामादायातिप्रसङ्गवारणाय ज्ञानपदमेव निश्चयपरमुपगन्तव्यम् इत्येव व्याप्यसंशयेत्यादिनाऽभिहितम् । न च धर्मैक्यस्य संशयजनकतायां तन्त्रतामते कोटिद्वयसामानाधिकरण्यावच्छिन्नत्वं नैकत्र निवेश्यते विशेष्यविशेषणभावे विनिगमनाविरहादपि तु प्रत्येकसामानाधिकरण्यावच्छेदकत्वं प्रत्येकं निवेश्य कारणताद्वयमेव कल्प्यते । धूमसहचरितवह्निमत्ताज्ञानधूमाभावसहचरितवह्निमत्ताज्ञानयोः परस्परसहकारित्वाच्च कोटिद्वयसहचरितविभिन्नधर्मवत्ताज्ञानात् संशयप्रसङ्गः । धूमसहचरितवह्निमान् तदभावसहचरितवह्निमानिति ज्ञानद्वयादितोऽपि संशयः स्वीक्रियते, तथाच सद्धेतावतिप्रसङ्गवारणाय यावत्प्रकारतानिवेशनं संशये यत्किञ्चित्त्वनिवेशनं चावश्यकमिति वाच्यम् । विभिन्नहेतुत्वे साहचर्यधर्मितावच्छेदकवह्नित्वद्रव्यत्वादिध-

र्माणां विशिष्यानिवेशे कोटिद्वयसहचरितधर्मवत्ताज्ञानयोः परस्परसहकारित्वे विभिन्नधर्मवत्ताज्ञानात्संशयापत्तेर्दुर्वारतया तादृशधर्माणां विशिष्य निवेशनीयतया कारणतानन्त्यापत्तेरिति संक्षेपः ॥

अथ द्रव्यं विशिष्टसत्त्वादित्यादेः सव्यभिचारत्वापत्तिः–विशिष्टसत्त्वस्यानतिरिक्ततया विशिष्टसत्त्वादौ साध्यतदभावसहचरितत्वतद्वृत्तित्वयोः सत्त्वादिति चेन्न। गुणकर्मान्यत्वसामानाधिकरण्यरूपं हि तद्वैशिष्ट्यं च क्वचिदुपलक्षणतया हेतुतावच्छेदकं क्वचिद्विशेषणतया। आद्यं यथाऽनुमित्यादिलक्षणप्रविष्टमितरभेदानुमापकतावच्छेदकं यत्तद्व्यक्तिसमवेतत्वादिकं तद्विशिष्टानुमितित्वादिजातेः व्यक्त्यन्तरेऽसत्त्वेन भागासिद्धस्तस्य विशेषणत्वायोगात्। अत एव तादृशजातावनुभवत्वान्यत्वादिविशेषणं व्यभिचारवारकतया सार्थकम्। द्वितीयं च यथा शब्दोऽनित्यो बाह्यकरणप्रत्यक्षविषयत्वे सति सत्त्वादित्यादौ सत्यन्तार्थः। तस्य तद्विशेषणत्वे एव सद्धेतुतानिर्वाहात्। तथाच दर्शितस्य वैशिष्ट्यस्योपलक्षणतया हेतुतावच्छेदकत्वे सव्यभिचारत्वमिष्टमेव, विशेषणत्वे च विशिष्टनिरूपितसमवायादिरेव हेतुतावच्छेदकसम्बन्धो वाच्यः, अन्यथा यद्धर्मविशिष्टनिरूपितत्वानवच्छिन्नसमवायादेर्हेतुतावच्छेदकसम्बन्धस्तस्य हेतुप्रकारस्योपलक्षणविधया हेतुतावच्छेदकत्वात् विशेषणानुपपत्तिः। न च विशिष्टनिरूपितसमवायादेर्हेतुतावच्छेदकसम्बन्धत्वे तेन सम्बन्धेन शुद्धसत्तादेरव्यभिचारतया तद्विशेषणवैयर्थ्यमिति गुणकर्मान्यत्वे सति सत्त्वादिति हेतुप्रयोगे निग्रहप्रसङ्गादिति वाच्यम्। विशिष्टविशेषणकबुद्धावेव विशिष्टनिरूपितत्वस्य सम्बन्धतावच्छेदकतया तद्रूपविशिष्टनिरूपितसमवायादिना तद्रूपानवच्छिन्नस्य हेतुत्वासम्भवात्। एवं च विशिष्टनिरूपितसमवादिना सम्बन्धेन सद्धेतोर्विशिष्टसत्त्वादेर्न तेन सम्बन्धेन सव्यभिचारताप्रसङ्गः। यादृशेन सम्बन्धेन पक्षधर्मताविषयकं यज्ज्ञानं तस्य तादृशेन सम्बन्धेन कोटिद्वयसहचरितावगाहितायाः संशायकताप्रयोजकत्वात्समवायसामान्यसम्बन्धेन द्रव्यत्वाद्यभावसाहचर्यावगाहिनो दर्शितविशेषसम्बन्धेन पक्षधर्मताज्ञानस्य संशायकताविरहात्। तादृशविशेषसम्बन्धेन च द्रव्यत्वाद्यभावसाहचर्यस्य सत्त्वादावभावात् तादृशसाहचर्यावगाहिभ्रममादायातिप्रसङ्गानवकाशात्।

अथ यथा हेतुतावच्छेदकोपलक्षिते व्याप्तिज्ञानस्थलेपि पक्षे त-

द्विशिष्टवैशिष्ट्यज्ञानादनुमिति'राधिक्यं त्वि'त्यादिन्यायात् , तथा विशिष्टसत्तात्वोपलक्षिते सहचारो यत्र गृह्यते तत्र तद्विशिष्टवैशिष्ट्यस्य धर्मिणि ज्ञानादपि संशयोत्पत्तिरुचितेति, चेन्न । उभयोः स्थलयोर्विशेषात् । तथाहि—सामान्यरूपेण सामान्यसम्बन्धेन वा व्याप्तिग्रहे सामान्यघटितेन विशेषरूपेण विशेषसम्बन्धेन वा पक्षधर्मताज्ञानादनुमितिर्युज्यते हेतोः सम्बन्धस्य वा सङ्कोचे व्याप्तेरव्याघातात् । सामान्यरूपेण सामान्यसम्बन्धेन वा सहचारग्रहे विशेषरूपेण विशेषसम्बन्धेन वा पक्षधर्मताज्ञाने तु न संशयः—सङ्कोचस्य साधारण्यव्याघातकत्वात् । अत एव वन्हित्वादिना धूमतदभावसाहचर्यग्रहे आर्द्रेन्धनप्रभववह्नित्वादिना धर्मिवृत्तित्वज्ञानान्न संशयः, न वा संयोगसामान्येन धूमतदभावसहचरितवह्न्यादेर्महानसाद्यनुयोगिकसंयोगेन धर्मिणि ज्ञानात्तत्संशयः, न वा तत्र साधारण्यप्रसङ्ग इति ।

अथ द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यत्र सद्धेतौ द्रव्यं गुणत्वे सति सत्त्वादित्यत्र विरुद्धे चातिव्याप्तिः—विशेष्येऽपि साध्यतदभावोभयसामानाधिकरण्यसत्त्वेन विशिष्टेऽपि तत्सत्त्वादिति चेन्न । साध्यतदभाववद्वृत्तितावच्छेदकविशिष्टवत्ताज्ञानस्यैव साधारणधर्मदर्शनविधया साध्यसन्देहजनकत्वात् । यत्किञ्चित्साध्यसन्देहजनकतावच्छेदकीभूता या या प्रकारतावच्छेदकता तदवच्छेदकतापर्याप्त्यधिकरणधर्मविशिष्टप्रकृतहेतुतावच्छेदकवत्त्वविवक्षणेनातिप्रसङ्गविरहात्—विशिष्टसत्तात्वरूपप्रकृतहेतुतावच्छेदकस्योभयवद्वृत्तितावच्छेदकत्वविरहात् । उभयसहचरितवृत्तित्वावच्छिन्नप्रकारतावच्छेदकताकज्ञानस्य संशायकत्वेऽपि नोक्तातिप्रसंगः, तथा सति यादृशयादृशधर्मावच्छिन्नप्रकृतहेतुतावच्छेदकविशिष्टवैशिष्ट्यावगाहिज्ञानत्वेन यत्किञ्चित्संशयजनकता तादृशतादृशरूपविशिष्टतद्वत्त्वस्य विवक्षणीयत्वात् । उभयसहचरितवृत्तित्वं प्रकारतावच्छेदके भासते यत्र तत्र तदुपलक्षितवत्ताज्ञानस्य हेतुतया तद्विशिष्टवैशिष्ट्यावगाहिज्ञानत्वेनाजनकत्वादुभयवद्वृत्तितावच्छेदकत्वेन प्रकारतावच्छेदकस्य यत्र भानं तत्रोभयसहचारघटकतदवच्छिन्ननिरूपिताधिकरणतावगाहिज्ञानस्यैव हेतुतया तद्विशिष्टवैशिष्ट्यावगाहिज्ञानत्वेन हेतुत्वमावश्यकमिति । तादृशहेतुतामादाया-

साधारणे उभयवद्वृत्तितानवच्छेदकविशिष्टवैशिष्ट्यावगाहिबोधत्वेन हेतुतामादाय चासाधारणे लक्षणं सङ्गमनीयम्। प्रकृतपक्षधर्मताज्ञानानिवेशे घटज्ञानं सविषयकं आत्मवृत्ति वा ज्ञानत्वादित्यादावतिव्याप्तिः। तथाहि—घटज्ञानं सविषयकमित्यादिनिश्चयकालीनघटज्ञानं सविषयकं न वेत्यादिसंशयं प्रति घटधर्मिकसविषयकत्वज्ञानं प्रमा न वेत्याद्याकारकसंशया हेतुः अर्थनिश्चयोत्तरार्थसंशये तद्धर्मिकप्रामाण्यसंशयस्य हेतुत्वात्। स च प्रामाण्यसंशयः सविषयकत्वतदभावादिरूपकोटिद्वयोपस्थित्यात्मकः सविषयकत्ववति सविषयत्वरूपप्रामाण्यस्य सविषयकत्वेन तदभाववति तत्प्रकारकत्वरूपाप्रामाण्यस्य च तदभावेन घटितत्वात् तादृशप्रामाण्यसंशये च सविषयकत्वादिज्ञानधर्मिकप्रामाण्याप्रामाण्यसहचरितज्ञानत्वादिमत्ताज्ञानं हेतुरिति सविषयकत्वादिरूपसाध्यसन्देहजनककोटिद्वयोपस्थितिजनकधर्मवृत्तिताज्ञानविषयत्वं ज्ञानत्वादावक्षतमेवेति प्रकृतपक्षधर्मताज्ञाननिवेश आवश्यकः, तन्निवेशे च सविषयकत्वादिज्ञानधर्मिकज्ञानत्ववत्ताज्ञानस्य तादृशज्ञानविषयघटज्ञानादिरूपप्रकृतधर्मत्वाविषयत्वान्नातिव्याप्तिरिति ॥

(दी०) इदं सविषयकमात्मवृत्ति वा ज्ञानत्वात् इत्यादौ प्रामाण्याप्रामाण्यसंशयस्य तद्घटकीभूतसाध्यतदभावविषयकतया कोट्युपस्थितिरूपस्य जनकीभूतज्ञानविषये ज्ञानत्वे तु नातिप्रसङ्गशङ्कापि, साधारणधर्मवत्ताज्ञानस्य तज्जन्यकोट्युपस्थितेर्वा संशयजनकतया तज्ज्ञानस्य तादृशसंशयाहेतुत्वात्। प्रामाण्यसंशयस्थले तु ज्ञानत्वलक्षणसाधारणधर्मदर्शनात् ज्ञाने प्रामाण्यस्य ज्ञानविषयतात्मकसाधारणधर्मदर्शनाच्च विषये तद्वत्त्वस्य सन्देहः। अप्रामाण्यशङ्काद्यन्वयानुविधानन्तु भ्रमत्वज्ञानशून्यविरोधिज्ञानस्य प्रतिबन्धकतया तदपसारणप्रयुक्तमित्यस्याकरे व्यक्तत्वात्। व्याप्यवत्तासंशयस्य पृथग्व्यापकवत्तासंशयहेतुत्वपक्षे ज्ञानपदं निश्चयपरम्। हेतुत्वाभिमतविशेषणन्तु येन सम्बन्धेन तदुभयसाहचर्यं तेन सम्बन्धेन तद्वत्ताज्ञानस्य संशयादिजनकतासूचनार्थम्, तेना-

त्मत्वकपालत्वादिसाध्यके समवाय (सम्बन्धे)न हेतौ ज्ञानघटादौ विषयत्वसंयोगादिना तत्सन्देहजनके नातिप्रसङ्ग इति ॥

(गा०) मिश्रमतं दूषयति इदं सविषयकमिति । सविषयकत्वस्य स्वरूप सम्बन्धात्मकत्वेनाननुगततया तस्मिन्साध्ये ज्ञानत्वादिकं व्यभिचार्यैवेत्याह आत्मवृत्ति वेति । अप्रामाण्यं भ्रमत्वं न तु प्रमात्वाभावः—तस्य साध्याभावाघटितत्वात् । तज्जन्यकोटैवेति मतभेदेन । तज्ज्ञानस्य--प्रामाण्याप्रामाण्यसहचरितज्ञानत्ववत्ताज्ञानस्य । तादृशसंशयाहेतुत्वात्-प्रामाण्यसंशयात्मककोटिद्वयोपस्थितिजनकत्वेपि प्रामाण्यसंशयस्य कथितार्थसंशयहेतुताया अप्रामाणिकतया तादृशकोट्युपस्थितेः साध्यसंशयाहेतुत्वादिति भावः । ननु विनापि साधारणधर्मज्ञानं प्रामाण्यसंशयस्थले विषयसंशयोदयात् साधारणधर्मज्ञानवत्प्रामाण्यसंशयस्यापि संशयजनकत्वमावश्यकमित्यत आह प्रामाण्यसंशयेति । ज्ञानत्वलक्षणसमानधर्मदर्शनात्—प्रामाण्याप्रामाण्यसहचरितज्ञानत्ववत्ताज्ञानात्, प्रामाण्यस्य सन्देह इति योजना । एतच्च दृष्टान्तविधयोक्तम् । ज्ञानविषयतात्मकसाधारणधर्मदर्शनात्-तत्प्रकारकज्ञानविशेष्यत्वरूपतत्तदभावसहचरितधर्मवत्ताज्ञानात्, विषये-घटज्ञानादौ, तद्वत्त्वस्य-सविषयकत्वादेः सन्देहः, तादृशधर्मवत्ताज्ञानासत्त्वे च संशयोऽसिद्ध एवेति भावः । नन्वेवमपि अर्थनिश्चयदशायां सत्यपि साधारणादिधर्मवत्ताज्ञाने प्रामाण्यसन्देहे सत्यर्थसन्देहः असति तु तस्मिन्नेत्यन्वयव्यतिरेकानुविधानं नोपपद्यत इत्यत आहाप्रामाण्यशङ्केति । तदपसारणप्रयुक्तं—तादृशविशिष्टप्रतिबन्धकाभावसंपादकत्वनिबन्धनम् । तथाच प्रयोजकत्वेनैवान्वयविधानोपपत्तेर्न तत्कारणतासाधकमिति भावः । व्याप्यवत्तासंशयस्येति । व्याप्यतदभावयोर्व्यापकतदभावसहचरिततया साधारणधर्मदर्शनविधयैव व्याप्यसंशयो व्यापकसंशये हेतुः, धर्मस्यैकतायाः ज्ञानस्य निश्चयपरतायाश्चाप्रयोजकत्वात् । यदि च व्याप्याभावस्य व्यापकाभावसाहचर्यं न प्रतिसन्धत्से तदा धर्मिणि तद्व्याप्यधर्मं संशयानोपि न तं सन्दिग्धे इति । स्वीयमते साध्यसंशयजनकतावच्छेदकप्रकारतावच्छेदकसाध्याभावववृत्तित्वस्य व्याप्ये असत्त्वेनातिव्याप्त्यनवकाशात् पृथगिति हे-

तुत्वे विशेषणम् । पृथक्कारणतामते व्याप्तिमादायातिव्याप्तिः प्रागेवोपपादिता । ज्ञानपदं निश्चयपरमिति । तादृशजनकतायां निश्चयत्वावच्छिन्नत्वं निश्चयत्वशून्यावृत्तित्वं वा विशेषणं देयमित्यर्थः । सद्धेतावतिव्याप्तेर्वास्तवसाधारण्यादिमत्त्वाभावेनाप्रसक्तेर्हेतुत्वाभिमतपदोपादानमनर्थकमित्याशङ्कायामाह हेत्विति । तेन सम्बन्धेन—सव्यभिचारत्वघटकतयाऽभिमतसम्बन्धेन । जनकतासूचनार्थं—जनकताया लक्षणघटकतालाभार्थम् । तथाच तादृशपदोपादानस्वरसात्तादृशरूपावच्छिन्ने यत्सम्बन्धावच्छिन्नप्रकारताशालिज्ञानं साध्यसन्देहजनकं तादृशरूपवान्तेन सम्बन्धेन सव्यभिचार इत्येव लक्षणं कर्तव्यमिति भावः । समवायेन हेतौ–समवायेन व्याप्ये । एतेनालक्ष्यत्वं सूचितम् । ज्ञानघटादौ नातिप्रसङ्ग इति योजना । समवायेन सव्यभिचारत्वप्रसङ्ग इत्यर्थः । अतिप्रसङ्गप्रसञ्जकं विशेषणमाह विषयत्वसंयोगत्वादिना । तत्सन्देहजनक इति । विषयत्वसंयोगादिघटितसाध्यतदभावसाहचर्यादिप्रकारेण तादृशसम्बन्धेन स्वप्रकारकं संशयजनकं यज्ज्ञानं तद्विषय इत्यर्थः । न च तेन सम्बन्धेन तद्वत्ताज्ञानस्य लक्षणघटकत्वेपि समवायेन विषयतासंयोगादिघटितकोटिद्वयसामानाधिकरण्यावच्छिन्नज्ञानघटादिप्रकारकज्ञानमादायातिप्रसङ्ग इति वाच्यम् । तेन सम्बन्धेन तद्वत्ताज्ञानस्य तत्संबन्धघटितसहचारविषयकस्यैव संशयजनकतया समवायसम्बन्धावच्छिन्नायां संशयजनकतावच्छेदकप्रकारतायां समवायसम्बन्धघटितसाध्यतदभावसाहचर्यस्यैवावच्छेदकतया तद्वत्तायाः ज्ञानघटाद्यवसत्त्वेनातिव्याप्त्यनवकाशात् ।

(चि०) विप्रतिपत्तिस्तु प्रत्येकं न तथा, न वा पक्षवृत्तिः, साधारणमन्वयेन असाधारणं व्यतिरेकेण अनुपसंहारी पक्ष एवोभयसाहचर्येण कोटिद्वयोपस्थापकः ।

(दी०)विप्रतिपत्तौ प्रत्येकं कोटिद्वयोपस्थापकत्वाभावात् लक्षणस्थद्वयपदेन तद्वारणात् , मिलितस्य तदुपस्थापकत्वेऽपि तद्वत्ताज्ञानं न तथा, न वा मिलित्वा द्वयोर्ज्ञनकत्वं, तथात्वेऽपि वा येन सम्बन्धेन तद्वत्ताज्ञानमुभयकोट्युपस्थापकं तेन सम्बन्धेन हेतुत्वे-

ऽवश्यं सव्यभिचारत्वमिति ।

अनुपसंहारी पक्ष एवेति । अनुपसंहारितादशायां साध्यतद्भावसहितत्वनिर्णयाभावेऽप्युक्तक्रमेण वास्तवतत्सहचरितत्वमादायैव लक्षणसमन्वय इति भावः ॥

केचित्तु व्याप्त्यादिधर्मेऽपि साधारण्यज्ञानात् संशयस्योदयात् तदज्ञाने च वस्तुतः साधारण्यज्ञानेऽप्यनुदयात् साधारण्यज्ञानं हेतुस्तत्र निश्चयत्वमकिञ्चित्करं गौरवात्, तथाच पक्ष एव तत्संशयात्मकतदुभयसाहचर्यज्ञानाद्भवति तथात्वमिति भाव इत्याहुः । तच्चिन्त्यम् ।

(गा०) विप्रतिपत्तिस्त्वित्यादिमूले तथापदस्य कोट्युपस्थापकपरत्वेऽसङ्गतिः—तद्घटकसाध्यतदभावोपस्थापकपदयोः प्रत्येकं कोट्युपस्थापकत्वात्, प्रत्येकमतथात्वेऽपि वा कथं तत्र लक्षणासत्त्वमित्यपि न स्फुटमिति तद्ग्रन्थमधृत्वैव तदर्थं पूरयित्वा व्याचष्टे विप्रतिपत्तेरिति । विप्रतिपत्तिघटकतत्तत्पदस्येत्यर्थः । तत्तत्पदविषयकप्रत्येकज्ञानयोः कोटिद्वयोपस्थापकत्वविरहेऽपि समूहालंबनज्ञानस्य तथात्वात्तदादायैवातिव्याप्तिर्भविष्यतीति आशङ्कायां न वा पक्षवृत्तिरिति मूलावतार इति सूचयितुं पूरणसम्वलितं तदर्थमाह मिलितस्येति । मिलितविषयकस्येत्यर्थः । तदुपस्थापकत्वेऽपि-कोटिद्वयोपस्थापकत्वेऽपि । तद्वत्ताज्ञानं-तादृशवाक्यप्रकारताशालिज्ञानत्वावच्छिन्नम् । तथा-कोटिद्वयोपस्थापकम्, तथाच पक्षधर्मतापदोपादानादेव न तत्रातिव्याप्तिरिति भावः । पक्षधर्मतापदानुपादानेऽपि न तत्रातिव्याप्तिः सम्भवति पदद्वयविषयकज्ञानस्य कोटिद्वयोपस्थितिजनकत्वेऽपि विषयभेदेन विषयताभेदान्नित्यानित्यपदविषयतयोः प्रत्येकं कोटिद्वयोपस्थितिजनकतावच्छेदकत्वविरहात्, लक्षणे च कोटिद्वयोपस्थितिजनकतावच्छेदकैकविषयताया एव निवेशादित्याह नवेति । मिलित्वा-एकविषयताश्रयीभूय, द्वयोः-पदयोः, जनकत्वं-जनकतावच्छेदकघटकत्वम् । कोटिद्वयोपस्थितिजनकतावच्छेदकीभूता या विषयता तदाश्रयत्वमिति पर्यवसितो-

र्थः। ननुविप्रतिपत्तिघटकपदानां प्रतिपाद्यत्वादिसंबन्धेन कोटिद्वयासहचरिततया तेन सम्बन्धेन तद्वत्ताज्ञानस्य संशयहेतुत्वात्तेषां प्रत्येकं सन्देहजनककोटिद्वयोपस्थितिजनकतावच्छेदकविषयताश्रयत्वमक्षतमेवेत्याह तथात्वेपीति। विप्रतिपत्तिघटकपदानां प्रत्येकताहशविषयताश्रयत्वेपीत्यर्थः। अवश्यं 'सव्यभिचारत्वमिति। तथाच लक्ष्यतया न तत्रातिव्याप्तिरिति भावः।

नन्वनुपसंहारी पक्ष एवेति मूलमसङ्गतं सम्बन्धनिश्चयस्यैव स्मारकतया पक्षे साध्यस्य तदभावस्य च सन्दिग्धतया तदन्तर्भावेन हेतौ तत्सामानाधिकरण्यस्य निश्चेतुमशक्यत्वेन हेतो कोटिद्वयोपस्थापकत्वासम्भवादतोऽभिप्रायं व्याचष्टे अनुपसंहारीति। अनुपसंहारितादशायां-पक्षे साध्यसन्देहदशायाम्, उक्तक्रमेण लक्षणसमन्वय इति योजना। यद्रूपविशिष्टवत्ताज्ञानं साध्यसन्देहजनकं वास्तवतद्रूपवत्त्वस्यैव लक्षणार्थतयोपस्थितत्वात्। सर्वमनित्यं प्रमेयत्वादित्यादौ पक्षे एव क्वचित्साध्यस्य क्वचित्साध्याभावस्य निश्चयदशायां नित्यत्वतदभावसहचरितप्रमेयत्ववत्सर्वमित्याकारकज्ञानस्य सम्भवेन तद्विषयतावच्छेदकोभयसाहचर्यमादाय साध्यसन्देहदशायामपि लक्षणसमन्वयः। अनुपसंहारितोत्तीर्णतादशायां तदुभयसाहचर्यसत्त्वेपि तदानीं ताहशहेतोः साधारणतया न सामान्यलक्षणातिव्याप्तिरिति भावः।

साधारणविषयकज्ञानत्वावच्छिन्नस्यैव संशयान्वयव्यतिरेकानुविधायित्वात्तेन रूपेण संशयहेतुता न तु तद्विषयकनिश्चयत्वेन तदवच्छिन्नस्यान्वयव्यतिरेकानुविधायितायाः असिद्धत्वात्, तथाच साध्यसंशयकाले साहचर्यनिश्चयस्यासम्भवेपि तदंशे संशयात्मकसंशयजनकज्ञानमादाय लक्षणसमन्वयः सम्भवतीति केचिदाहुः, तन्मतमुपन्यस्यति केचित्त्विति। वस्तुतः-वस्तुगत्या यत्साधारणं तज्ज्ञानेपि, तत्र-तद्धेतुतायाम्। अकिञ्चित्करम्-अनवच्छेदकम्। पक्ष एव-पक्षान्तर्भावेनैव। तत्संशयेति। साहचर्यांशे संशयेत्यर्थः। साहचर्यज्ञानात्-साहचर्यविशिष्टप्रकारकज्ञानात्। तथात्वं-सव्यभिचारत्वम्।

तच्चिन्त्यमिति। सम्बन्धांशे निश्चयात्मकं सम्बन्धिज्ञानं सम्बन्ध्यन्तरस्मारकं शक्त्यादिसंशयात्पदार्थस्मरणाद्यनुत्पत्तेरिति साधारण्यसंशये कोट्युपस्थापकत्वं न सम्भवति, एवं च संशयसाधारणसहचा-

रज्ञानस्य हेतुत्वे अप्रामाण्यनिश्चयानास्कन्दितत्वमेवावच्छेदककोटौ निवेशनीयं तन्निश्चयत्वेन हेतुत्वे तु अप्रामाण्यज्ञानानास्कन्दितत्वमेव लाघवात्, संशयात्मकसहचारज्ञानं न हेतुः । एवमनुपसंहारितादशायां संशजनकज्ञानसंपादनप्रयासो विफलः तादृशज्ञानासत्त्वदशायां साधारणाव्याप्तिभयेन तादृशज्ञानस्योपलक्षणविधयैव लक्षणघटकत्वादित्यादि चिन्ताबीजमूहनीयम् ॥

(चि०) केवलान्वयिसाध्यकानुपसंहारी अयं घट एतत्त्वादित्यसाधारणश्च सद्धेतुरेव, तदज्ञानं दोषः पुरुषस्य । अत एवासाधारणप्रकरणसमयोरनित्यदोषत्वम्, अन्यथा सद्धेतौ बाधादिज्ञाने हेत्वाभासाधिक्यापत्तिः ।

(दी०) ननु केवलान्वयिसाध्यकानुपसंहारिणि साध्याभावाप्रसिद्ध्या तत्संशयाद्यभावादव्याप्तिः एवं यत्र स्थिरे धर्मिणि पूर्वं घटत्वं गृहीतमुत्तरदशायां तत्रैव दोषात् घटत्वाग्रहे तद्घटभिन्नोऽयमिति भ्रमे च घटत्वनिश्चयविषयीभवद्धर्मिव्यावृत्तत्वेन गृह्यमाणतया असाधारणे इदन्त्वेऽपि वस्तुतस्तद्व्यावृत्तत्वाभावेन तत्र लक्षणायोगादितस्तयोर्लक्ष्यत्वाभावेन परिहरति केवलान्वयीति । अतएवेति । यत एव पुरुषदोषाधीनं तद्दोषत्वम् अतएव तस्यानित्यदोषत्वम्, साहजिक(दोष)त्वे कादाचित्कत्वानुपपत्तेः, एवञ्च यत्र दोषताप्रयोजकं वस्तुतो हेतौ तत्रानित्यदोषत्वमपि, यत्र पुरुषस्य तद्भ्रमो न तत्र तदपि भ्रमप्रमाद्दुष्टत्वेऽतिप्रसङ्गमाह अन्यथेति केचित् ॥

(गा०) केवलान्वयि इत्यादि मूलमवतारयति नन्वित्यादिना । अयं घटः एतत्वात् इत्यादिस्थले पक्षतादशायां संशयप्रयोजकनिश्चितसाध्यतदभाववद्व्यावृत्तत्वस्य सत्त्वादव्याप्त्यप्रसक्तेस्तस्यालक्ष्यतयाऽव्याप्तिपरिहारोऽपि न संगच्छत इत्यतस्तत्र निश्चितसाध्यवद्वृत्तित्वं संपादयति एवमिति । हेतुभूतेदंत्ववति पूर्वं घटत्वग्रह एव तन्मू-

लकात् स घट इत्याकारकस्मरणात् तद्घटत्वेनैव तद्घटभेदो गृहीतुं शक्यते नान्यथा प्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानविरहादिति धर्मिणि पूर्वं घटत्वग्रहत्वस्यानुसरणम्। तद्घटभिन्नोयमिति भ्रमपर्यन्तं तद्घटानवस्थाने तादृशो भ्रम एव न सम्भवति विशेष्यविरहादतः स्थिर इत्युक्तम्। तद्घटभिन्नोयमिति भ्रमदशायां इदंत्वावच्छिन्ने घटत्वग्रहे इदंत्वस्य साध्यसहचरितत्वेन निश्चिततया असाधारण्यं न शङ्कास्पदमपीत्याह तत्रैव दोषाद्घटत्वाग्रह इति। तत्र—इदंत्वावच्छिन्ने। तद्घटभिन्नोयमिति भ्रमानुधावनं इदंत्वस्य निश्चितसाध्यवद्धर्मिव्यावृत्तत्वज्ञानसंपादनाय। तदा धर्मिणि घटत्वनिश्चयसत्त्वे एव संशयप्रयोजकस्य तत्कालीनतत्पुरुषीयसाध्यनिश्चयविषयव्यावृत्तत्वस्येदंत्वेऽसत्त्वमतः केवलतद्व्यक्तित्वेन प्रतियोगिविधया तद्घटभानमुपेक्ष्य तद्घटत्वेन तद्घटभानानुसरणम्। तथा सति तादृशभ्रम एव तद्व्यक्तित्वविशिष्टे धर्मिणि घटत्वस्य निश्चयादिति तन्निष्ठेदंत्वे दर्शितसंशयप्रयोजकरूपाभावादव्याप्तिप्रसक्तिः। इदंत्वविशिष्टे घटसामान्यभेदभ्रमे इदंत्वे विपक्षवृत्तित्वनिश्चयसम्भवादसाधारण्यं न शङ्कास्पदमपीति प्रतियोगिकोटौ तत्ताभानानुधावनम्। इदंत्वेपीति। अव्याप्तिरित्यनुषज्यते। वस्तुतस्तद्व्यावृत्तत्वाभावेन—वास्तविकस्य साध्यनिश्चयविषयीभूतधर्मिव्यावृत्तत्वस्याभावेन। लक्षणायोगादिति। वास्तवसंशयप्रयोजकरूपवत्त्वस्य लक्षणघटकत्वादिति भावः। अत एवेत्यत्रेदंपदेन पूर्वाभिहितायाः सद्धेतुत्वाज्ञानस्य पुरुषदोषतायाः परामर्शो सङ्गतिस्तस्या असाधारण्यादेरनित्यदोषतायामनुपष्टम्भकत्वात् अतस्तत्परामर्शे व्याचष्टे अत एवेति। पुरुषदोषाधीनं—पुरुषस्य हेतुमति पक्षे च साध्यतदभावानिश्चयसाध्याभावव्याप्यवत्ताभ्रमाधीनम्। तद्दोषत्वं—तादृशहेतोरसाधारण्यसत्प्रतिपक्षरूपदोषत्वं, तस्य—असाधारण्यस्य सत्प्रतिपक्षस्य च, अनित्यदोषत्वं—दशाविशेषे एव हेतोर्दुष्टतासम्पादकत्वम्। साहजिकदोषत्वे—तादृशदोषविरहदशायामपि हेतोर्दुष्टतासम्पादकत्वे। कादाचित्केति। कदाचिदेव हेतोर्दुष्टतासम्पादकत्वम्। एतावतायं घट एतत्वादित्यादौ पुरुषदोषाधीनदुष्टत्वशङ्काया अनिवृत्तेस्तन्निवृत्त्यर्थं अन्यथेत्यादिग्रंथसङ्गमनाय चाभिप्रायं पूरयति एवंचेति। दोषताप्रयोजकं—निश्चितसाध्यवद्धा-

वृत्तित्वादिकं, हेतौ तिष्ठतीति शेषः । तत्रानित्यदोषत्वमपि–तत्रैवानित्यदोषत्वम् । तत्प्रमा दोषताप्रयोजकरूपस्येति शेषः । अन्यथापदार्थं व्याचष्टे भ्रममात्रादिति । तादृशरूपभ्रमादित्यर्थः । केचिदित्यस्वरससूचनाय । स च निश्चितसाध्यतदभाववद्व्यावृत्तत्वस्य संशयप्रयोजकताया अग्रे खण्डनीयत्वात्, असाधारण्यादेः पुरुषदोषाधीनदोषतायाः प्रकृतानुपयोगितया मूलानुक्ततया चात एवेत्यत्रेदंपदेन तत्परामर्शे संदर्भविरोधाच्च ॥

(दी०) परे तु अयं घट एतत्त्वादित्यादावव्याप्तिः-साध्यसन्देहप्रयोजकं हि तस्य साध्यतदभाववद्व्यावृत्तत्वं न ह्येकस्य धर्मस्य तदुभयव्यावृत्तत्वं सम्भवति, असाधारण्यन्तु तस्य पक्षमात्रवृत्तितया अतस्तस्यालक्ष्यतयोत्तरयति अयं घट इत्यादि । एवञ्चावृत्तिगगनादिकमेवासाधारणम् । पक्षवृत्तित्वभ्रमदशायाञ्चासाधारण्यस्यासङ्करः । न चोभयव्यावृत्तत्ववृत्तिमत्त्वयोः स्वरूपतो विरोधः, निश्चितसाध्यतदभाववद्व्यावृत्तत्वञ्च न सन्देहप्रयोजकम्, तथा सति तुल्यन्यायतया निश्चितसाध्यतदभाववद्वृत्तित्वस्यापि तथात्वे सद्धेतावपि साध्याभाववत्त्वभ्रमविषयवृत्तित्वग्रहदशायामतिप्रसङ्गात् । न च तादृशनिश्चयविषयस्य धर्मिणो वास्तवं साध्याभावादिमत्त्वमपि तन्त्रम् । मानाभावात् । किञ्च सन्देहजनकतावच्छेदकरूपस्य विशेषणत्वे व्यभिचारिणि रासभादौ महानसादिवृत्तितादशायामव्याप्तिः, उपलक्षणत्वे असाधारण्योत्तीर्णतादशायामतिव्याप्तिः, असाधारणप्रकरणसमयोस्तत्त्वेन भ्रमविषययोरनित्यदोषत्वं विशेषादर्शनदशायामनुमित्यनुत्पादप्रयोजकत्वं न तु वास्तवं हेतुदोषत्वम्, अन्यथानुमित्यनुत्पादप्रयोजकज्ञानविषयतामात्रेण वास्तवहेतुदोषत्वे इत्याहुः ।

(गा०) तस्य—असाधारणस्य, धर्मस्य—वृत्तिमतः । ननु तादृशहेतोः संशयप्रयोजकरूपशून्यत्वेऽसाधारण्यमेव कथं बीजाभावादित्यत आह असाधारण्यं त्विति । अतः-इत्याशङ्का-

तः। ननु अयं घट पतत्वात् इत्यादेरिव तुल्ययुक्त्या शब्दोऽनित्यः शब्दत्वादित्यादेरपि सद्धेतुत्वमेव शब्दो नित्यः शब्दत्वादित्यादिकमपि विरुद्धमेव न त्वसाधारणं साध्यतदभाववद्व्यावृत्तत्वाभावादसाधारणहेत्वाभासस्यैवाप्रसिद्धिरत आह एवं चेति। अवृत्तीति। वृत्तिमतः साध्यतदभाववद्व्यावृत्तत्वासम्भवादिति भावः। ननु पक्षधर्मताज्ञानविरहादेव गगनादिहेतुकस्थले अनुमित्यनुत्पादनिर्वाहादसाधारण्यज्ञानस्यानुमित्यनुत्पादप्रयोजकत्वमेव नास्तीति कथं तस्य हेत्वाभासत्वमित्यत आह पक्षवृत्तित्वेति। असङ्करः—इतरानधीनानुमित्यनुत्पादप्रयोजकज्ञानविषयत्वम्। ननु उभयव्यावृत्तत्वस्य वृत्तिमत्त्वविरुद्धतया तदुभयज्ञानस्य नैकदा सम्भवः मिथः प्रतिबन्धकत्वात्, न चैवं पक्षधर्मताज्ञानाभावसंपादकतयैव तस्य हेत्वाभासत्वं निष्प्रत्यूहम्, तथासत्यसिद्धावन्तर्भावेन सव्यभिचारप्रभेदत्वानुपपत्तेरत आह नचोभयेति। स्वरूपतो विरोधः—परस्पराभावव्याप्यत्वाविशेषितयोः परस्परज्ञानप्रतिबन्धकीभूतज्ञानविषयत्वं, तस्य वास्तवविरुद्धविषयकस्यापि ज्ञानस्य विरोधाविषयकस्याप्रतिबन्धकत्वादिति भावः॥

ननु निश्चितसाध्यतदभाववद्व्यावृत्तत्वरूपसंशयप्रयोजकधर्मस्योक्तहेतौ सत्त्वात्कथं तत्राव्याप्तिशङ्का कथं वाऽलक्ष्यताभ्युपगमेन तत्परिहार इत्यत आह निश्चितेति। साध्यतदभावनिश्चयाविषयीभूतधर्मिव्यावृत्तत्वं न साध्यसन्देहजनकतावच्छेदकप्रकारतावच्छेदकमित्यर्थः। निश्चितसाध्यतदभाववद्वृत्तित्वस्य—साध्यतदभावनिश्चयविषयवृत्तित्वस्य, तथात्वे—संशयप्रयोजकत्वे, सद्धेतौ—वन्ह्याद्यधिकरणवृत्तितया निश्चिते धूमादौ, धर्मिवृत्तित्वग्रहदशापर्यन्तानुधावनं संशयजनकज्ञानस्य विशेषणविधया लक्षणघटकत्वेऽप्यतिव्याप्तिः सम्भवतीत्यभिप्रायेण। वस्तुतो यदा हेतुमति साध्याभावभ्रमो वर्तत तदा हेतौ तदधिकरणवृत्तित्वाग्रहेऽप्यतिव्याप्तिः सम्भवति तादृशज्ञानस्योपलक्षणत्वादिति ध्येयम्। तादृशेति। साध्यतदभावविषयकेत्यर्थः। तन्त्रं—संशयप्रयोजकरूपघटकम्। जनकतावच्छेदकरूपस्य—जनकतावच्छेदकप्रकारतावच्छेदकरूपस्य, विशेषणत्वे—धर्मिविशेषणतया सव्यभिचारप्रतिपाद्यत्वे, महानसादिवृत्तितादशायामव्याप्तिः—तत्कालान्तर्भावेनाव्यभिचारित्वव्यवहारापत्तिः तदानीं साध्याभाववद्वृत्तित्वाभावस्य तत्रा-

क्षतत्वात्, तादृशव्यवहारविषयस्याबाधितत्वादिति भावः । न च दूष्यं विशिष्टसत्त्वादित्यादावतिव्याप्तिवारणाय साध्यसन्देहजनकतावच्छेदकप्रकारतावच्छेदकतावच्छेदकधर्मवत्प्रकृतहेतुतावच्छेदकधर्मत्वमेव व्यभिचारपदार्थो वाच्यः, साधारणस्थले च तादृशो धर्मः साध्यतदभाववद्वृत्तितावच्छेदकत्वमेव तद्विशिष्टहेतुतावच्छेदकावच्छिन्नहेतुमत्ताज्ञानस्यापि सन्देहजनकत्वोपगमात्, एवं च रासभादेर्महानसादिवृत्तितादशायां साध्याभाववद्वृत्तित्वविरहेऽपि तदवच्छेदकरासभत्वादिसत्त्वेन तादृशव्यभिचाराभावो नास्तीति कथमुक्तव्यवहारापत्तिरिति वाच्यम् । एवमपि अनित्यधर्मस्य हेतुतावच्छेदकत्वे तदसत्त्वदशायामापत्तितादवस्थ्यात् । विशेषणत्वे-कालविशेषावच्छिन्नतया तदानीं व्यभिचारीत्यादिव्यवहारविषयत्वे, अव्याप्तिः-तत्कालान्तर्भावेण तादृशव्यवहारानुपपत्तिरिति तु नार्थः साधारणस्य नित्यदोषतया कालविशेषान्तर्भावेण व्यभिचारिव्यवहाराजनकतायास्तत्रेष्टत्वात् । उपलक्षणत्वे-अत्यन्तायोगव्यवच्छेदपरिचायकतया व्यभिचारपदप्रतिपाद्यत्वे । तादृशरूपात्यन्तायोगव्यवच्छेदस्य तत्पदार्थत्वोपगम इति यावत् । असाधारण्योत्तीर्णतादशायां-हेतुमति साध्यतदभावयोरन्यतरनिश्चयदशायाम् । तत्कालान्तर्भावेणातिव्याप्तिः कालान्तरीणासाधारण्यमादाय सव्यभिचारव्यवहारापत्तिः ।

इदं पुनरिहावधेयम् । शब्दोऽनित्यः शब्दत्वादित्यादौ पक्षतादशायां सव्यभिचारव्यवहारनियामकं यत् पटगगनादिव्यावृत्तत्वरूपमसाधारण्यं तच्छब्दादौ साध्यादिनिश्चयदशायामप्यक्षतमेवेति विशेषणत्वेऽप्येतद्दोषतादवस्थ्यम् । संशयप्रयोजकरूपस्य तथात्वेन न व्यभिचारपदप्रतिपाद्यता किन्तु साध्यतदभाववद्वृत्तित्वत्वानिश्चितसाध्यतदभाववद्व्यावृत्तत्वत्वरूपेणैव विभाजकमुक्तानुगतरूपम्, एवं च साधारण्यमुपलक्षणमसाधारण्यं च विशेषणमित्यत्राविरोधः । निश्चयघटितरूपावच्छिन्नपरवाक्यार्थञ्च कालविशेषो निश्चयांश एवान्यत्र साध्यतदभावनिश्चयादौ खण्डशक्तिस्वीकारेण अन्वयबलात्साध्यतदभावनिश्चयविषयवृत्तित्वसामान्याभावभिन्नस्यापि तत्कालीननाश्रयवृत्तित्वत्वावच्छिन्नाभावस्य लाभः । सव्यभिचारपदस्य नानार्थत्वमिष्टमेवेति चेदुच्यते तदा उपलक्षणत्वेऽपि नोक्तदोषावसर इति ।

एवं च निश्चयाघटितं साध्यतद्भाववद्व्यावृत्तत्वमेव संशयप्रयोजकं तदवच्छिन्नप्रकारकज्ञानस्य विशेषदर्शनतया संशयप्रतिबन्धकत्वेपि तत्कोटिविशिष्टबुद्धौ तत्कोटिमद्व्यावृत्तत्वावच्छिन्नप्रकारकज्ञानप्रतिबन्धकतायां विपरीतकोटिमद्व्यावृत्तत्वावच्छिन्नप्रकारकज्ञानस्योत्तेजकतया सत्प्रतिपक्षस्थलमिव संशयनिर्वाहः, तथा चायं घट एतत्त्वादित्यादौ साध्यतदभाववद्व्यावृत्तत्वस्यासत्त्वेनाव्याप्त्यशङ्काया अलक्ष्यत्वाभ्युपगमेन तत्परिहारस्य च नासङ्गतिरिति समुदिततात्पर्यार्थः । संशयप्रयोजकरूपं चेदानीमुपलक्षणविधयैव दुष्टताव्यवहारनियामकम् अतो रासभादौ महानसादिवृत्तितादशायां नाव्याप्तिरसाधारणश्च हेतुः सर्वदैव तथेति नातिप्रसंगोपीति ध्येयम् ।

अदुष्टहेतौ वास्तवासाधारणप्रकरणसमत्वाभावादसाधारणप्रकरणसमोपीति व्याचष्टे असाधारणेति । भ्रमविषयस्य नव्यमते दोषत्वाभावादनित्यदोषत्वमिति व्याचष्टे विशेषेति । प्रयोजकत्वं–प्रयोजकज्ञानविषयत्वम्, अत एवेत्यत्रेदंपदार्थस्य सद्धेतोः सर्वदाऽदुष्टत्वस्य भ्रमविषयस्यानुमित्यनुत्पादप्रयोजकतायामनुपष्टंभकतया तदुपष्टंभं पूरयति नत्विति । तथाच यत एव सद्धेतुः सर्वदैव तथा न तु कदाचिदपि दुष्टलक्षणलक्ष्यः अत एव तत्स्थलीयानुमितिविरोधी यो भ्रमरूपो ग्रहस्तस्यानुमित्यनुत्पादप्रयोजकत्वेऽपि न हेतुदोषः भ्रमदशायां सद्धेतोर्दुष्टत्वे भ्रमविषयस्य दोषत्वमावश्यकं स्यादिति अत एवेत्यादिमूलस्य पर्यवसितोर्थः ।

ननु भ्रमस्यानुमित्यनुत्पादप्रयोजकत्वे तद्विषयस्य दोषत्वमिष्यत एवेति भ्रमविषयो न दोष इत्येवासिद्धमित्याशङ्कायामन्यथेति मूलावताराच्चादृशशङ्कोद्धारं स्फुटीकर्तुं चिकीर्षुरन्यथापदं व्याचष्टे अन्यथेति ॥

मूले बाधादिज्ञान इति । पक्षविशेष्यकसाध्याभावादिभ्रमदशायामित्यर्थः । हेत्वाभासाधिक्यापत्तिः–अतिरिक्तहेत्वाभासतापत्तिः, बाधादेर्नित्यदोषतायाः सर्ववादिसिद्धतया भ्रमविषयस्य तदन्तर्भावासम्भवादिति भावः ।

(चि०) न च प्रमेयत्वेनाभेदानुमाने शब्दोऽनित्यः शब्दाकाशान्यतरत्वादित्यत्र च साधारणेऽव्या·

प्तिः तयोः साध्यवदवृत्तित्वेन विरुद्धत्वादिति चेन्न । एतदज्ञानेऽपि साधारण्यादिप्रत्येकस्य ज्ञानादुद्भावनाच्च स्वपरानुमितिप्रतिबन्धात् उद्भावितैतन्निर्वाहार्थं साधारणादेरवश्योद्भाव्यत्वेन तस्यैव दोषत्वाच्च ।

(दी०) अनवगतसाध्यसहचारत्वे सति अवगतसाध्याभावसहचारतया विरुद्धत्वमेव । तयोरिति । इदञ्चाभ्युपगमवादेन । वस्तुतो यथोपवर्णितलक्षणस्य न तत्राव्याप्तिरिति ध्येयम् ।

यद्रूपज्ञानमनुमितिप्रतिबन्धकं तदेव विभाजकम् अन्यथा अतिप्रसङ्ग इत्यभिप्रेत्य दूषयति नैतदिति ।

वस्तुतस्तु उपस्थापकत्वादिज्ञानमनुमितेस्तज्जनकस्य वा न प्रतिबन्धकं विरोधिविषयकत्वाभावात् एवमुत्तरत्रापि ।

(गा०) अभेदे साध्ये प्रमेयत्वस्यानित्यत्वे साध्ये शब्दाकाशान्यतरत्वस्य च वास्तवसाध्यवदवृत्तित्वविरहेण विरुद्धत्वासम्भवात्प्राचीनमताभिप्रायकतया तयोर्विरुद्धोक्तिमुपपादयति दीधितौ अनवगतेति । एवं च साध्यवदवृत्तित्वेनेति मूलस्य साध्यवद्वृत्तितया अनवगतत्वेनेत्यर्थः । तादृशस्थले पक्षतादशायां हेतोः साध्यतदभावोभयसहचारस्याशक्यनिर्णयत्वेऽपि कालान्तरीयतन्निर्णयविषयवास्तवतदुभयसहचारमादाय लक्षणगमनसम्भवादलक्ष्यतयाऽव्याप्तिपरिहारो न घटत इत्यत आह अभ्युपगमेति । संशयजनकपक्षधर्मताज्ञानस्य विशेषणविधया लक्षणघटकत्वमभ्युपगम्येत्यर्थः । यथाश्रुतलक्षणे व्याप्त्यादिग्रहदशायां सद्धेतावतिव्याप्तिवारणाय तादृशज्ञानं विशेषणविधयैव निवेशनीयम्, तादृशज्ञानदशायामतिप्रसङ्गस्यास्त्येव तत्र तादृशज्ञानविरहदशायां चागत्या साधारणस्यापि सव्यभिचारत्वं नोपगन्तव्यमित्यत उपवर्णितेति । यथाव्याख्यातेत्यर्थकम्, अनुमित्यविरोधिज्ञानविषयस्यापि हेत्वाभासविभाजकत्वे क्षतिविरहात् एतदज्ञानेपीत्यादिनोक्तविभाजकधर्मज्ञानस्यानुमित्यविरोधित्वकथनमकिञ्चित्करमित्याशङ्कायामभिप्रायोपवर्णनेन निराकुरुते यद्रूपज्ञानमिति । यद्रूपावच्छिन्नविषयकज्ञानमित्यर्थः । तदेव-तद्रूपावच्छिन्नमेव ।

एतेन निरुक्तपक्षधर्मताज्ञानविषयतावच्छेदकधर्मवैत्त्वस्यैव विभाजकतया साधारण्यादिरूपतादृशधर्मविषयकज्ञानस्य चानुमितिविरोधितया तादृशनियमोपगमेऽपि तथाविधधर्मस्य न विभाजकत्वानुपपत्तिरिति परास्तम्। साधारणत्वादिनैव साधारण्यादिज्ञानस्य विरोधितया तादृशपक्षधर्मताज्ञानविषयतावच्छेदकत्वेन तस्य विभाजकतानुपपत्तेः, एवं च एतद्ज्ञानस्येति मूलस्य निरुक्तविभाजकतावच्छेदकावच्छिन्नाज्ञानेपीत्यर्थः। साधारण्यादिप्रत्येकस्येत्यस्य साधारण्यत्वादिरूपप्रत्येकधर्मावच्छिन्नस्येत्यवधेयम्। अन्यथा अनादृशरूपावच्छिन्नस्यापि विभाजकत्वे। अतिप्रसङ्गः—अनुमितिकारणीभूतज्ञानविरोधिधर्मवत्त्वादिना अन्यतरधर्मवत्त्वादिना वा सव्यभिचारविरुद्धादीनामैक्यप्रसङ्गः॥

मूले प्रतिबन्धादित्यस्य निरुक्तसामान्यधर्मज्ञानस्याप्रतिबन्धकत्वादिति शेषः। तस्यैव दोषत्वादित्यस्य प्रत्येकधर्मस्यैव विरोधित्वादित्यर्थः। तत्रैवायं हेतुरिति न सत्, दोषत्वाच्चेति चकारासङ्गतेः। तस्यैव दोषतया उद्भावयितुमुचितत्वात् न तु अनुगतधर्मस्येत्यर्थः। एवं च दोषविधया यादृशो धर्म उद्भाव्यते स एव विभाजकः उक्तानुगतधर्मस्य च दोषविधयाऽनुद्भावनीयतया न तथात्वमिति हृदयम्।

ननु तद्ज्ञानदशायामन्यज्ञानादनुमितिप्रतिबन्धस्य तज्ज्ञानीयानुमित्यविरोधिताबीजत्वं मणिकृताभिहितं न घटते तथासति सत्प्रतिपक्षादिज्ञानस्यानुमितिविरोधितया बाधादिज्ञानस्यातथात्वापत्तेः, अतः स्वयं तद्बीजमाह—वस्तुतस्त्विति। उपस्थापकत्वादीति। कोटिद्वयोपस्थापकज्ञानविषयत्वादीत्यर्थः। आदिपदात्स्वयं निष्कर्षिततादृशज्ञानविषयतावच्छेदकरूपवत्त्वपरिग्रहः। विरोधिविषयकत्वाभावात्—ग्राह्यनिरूपितप्रतियोगितावच्छेदकावच्छिन्नतद्व्याप्यत्वाद्यवच्छिन्नाविषयकत्वात्॥

इदं त्ववधेयम्। मूले प्रतिबन्धादित्यनन्तरं मानाभावेन निरुक्तधर्मस्यानुमित्यप्रतिबन्धकत्वादिति शेषः, एवं च प्रत्येकज्ञानस्यानुमितिप्रतिबन्धकत्वं नानुगतधर्मस्यानुमित्यप्रतिबन्धकतासंपादकतया मूलेऽभिहितं किन्तु तथात्वेन प्रमाणाभावे कथिते अनन्तरं—ननु प्रत्येकं नानाधर्मज्ञानस्यानुमितिविरोधित्वकल्पनापेक्षया विरोध्यविषयकत्वस्यापि अनुगतधर्मज्ञानस्यैकस्य तथात्वं विशेषदर्शिनां साधार·

ण्यादिहेतुकानुमितिवारणाय कल्पितुमुचितमित्याशङ्कावतारास्तत्परिजिहीर्षया प्रत्येकज्ञानस्यावश्यकल्पनीयप्रतिबन्धकताकत्वं दोषत्वादित्यन्तेनाभिहितमिति ॥ एवं-तादृशयुक्ते उत्तरत्रापि-निर्वक्ष्यमाणानुगतधर्मान्तरेपि, अनुमितिविरोधिज्ञानविषयत्वं वाच्यमिति शेषः ।

(चि०) एतेन पक्षवृत्तित्वे सत्यनुमितिविरोधिसम्बन्धाव्यावृत्तिरनैकान्तिकः सपक्षविपक्षवृत्तित्वमुभयव्यावृत्तत्वमनुपसंहारित्वञ्चानुमितिविरोधि, तत्सम्बन्धः प्रत्येकमस्ति, विरुद्धोऽप्यनेन रूपेण सव्यभिचार एव उपाधेश्च न सङ्कर इति वक्ष्यत इति निरस्तम् ।

एतदज्ञाने ज्ञानेऽपि वावश्यकप्रत्येकज्ञानस्य दोषत्वात् असाधकतानुमितौ व्यर्थविशेषणत्वाच्च ।

(दी०) पक्षवृत्तित्वे सतीति । विरोधित्वं-विरोधिज्ञानविषयत्वम् । अव्यावृत्तिपदमसन्तायोगव्यवच्छेदार्थकम्, तेन संयोगसम्बन्धेन व्यभिचारिणि द्रव्ये हेतौ व्यभिचाराभावदशायां नाप्रसङ्गः। साध्यवद्वृत्तिस्तु नासाधारण इति हृदयम् । अप्रसिद्धस्वरूपादिवारणाय सत्यन्तम् । पक्षः सन्दिग्धसाध्यो धर्मी विशिष्टहेतौ तद्वृत्तित्वग्रहाविरोधित्वञ्च तदर्थः। तथाच पक्षतावच्छेदकरूपेण पक्षे साध्यतावच्छेदकरूपेण साध्यस्य हेतुतावच्छेदकरूपेण हेतोर्वा यज्ज्ञानं तदविरोधित्वस्य लाभात् पक्षसाध्यसाधनाप्रसिद्धिस्वरूपासिद्धिबाधप्रतिरोधानां निरासोऽसिद्धिसङ्कीर्णसंग्रहः। विरोधोऽपि फलतः प्रतिरोध एव । तदन्यत्वेन वा विरोधि विशेषणीयम् । वक्ष्यते च सिद्धान्ते विरुद्धान्येति हेतुसाध्यसामानाधिकरण्यग्रहाविरोध्यर्थकम् । सम्बन्धपदबलेन प्रकृतहेतुसम्बन्धितया विरोधित्वे तात्पर्योपवर्णनेन प्रायशो बाधादिवारणेपि घटस्त्वमनित्यं घटत्वादित्यादौ प्रयत्नसाध्यमिव तत् प्रतिभाति ।

वस्तुतस्त्वनुमितिपदं तत्कारणज्ञानपरम्। आश्रयासिद्ध्यादिवारणाय सत्यन्तं तादृशपक्षकतादृशहेतुकग्रहाविरोध्यर्थकम्। अनया च वाचोभङ्ग्या व्याप्तिग्रहविरोधित्वमेवाभिधित्सितम्, तेन वह्निमान् वह्निमान् ह्रदत्वादित्यादौ हेतोः साध्यवदवृत्तित्वादेर्नासंग्रहः। विवेचयिष्यते चेदमुपपरिष्टात्। सपक्षेति सम्पातायातम्, अत एवानुपदं विरुद्धोऽपीत्यादिकम्। व्यर्थेति। विशेषणं–पक्षवृत्तित्वम्।

(गा०) विरोधिपदस्य प्रतिबन्धकत्वार्थकत्वे असङ्गतिः साधारण्यादेरतथात्वादतो व्याचष्टे विरोधित्वमिति। विरोधिज्ञानेति,–प्रतिबन्धकीभूतज्ञानेत्यर्थकम्। अनुमितिविरोधिसम्बन्धनिवेशेनैवोपपत्तौ अव्यावृत्तिपदमनर्थकमित्याशङ्कां निराचिकीर्षुस्तस्य व्यभिचारिणि साध्याभाववद्वृत्तित्वाभावदशायामव्याप्तिवारकतया सार्थकतासंपादनाय तद्व्याचष्टे अव्यावृत्तीति। अत्यन्तायोगः—प्रतियोगिवैयधिकरण्यावच्छिन्नोऽभावः। नाप्रसङ्ग इति। रासभादौ महानसादिवृत्तितादशायां वन्ह्यभाववद्वृत्तित्वासत्त्वेऽपि प्रतियोगिवैयधिकरण्यावच्छिन्नतदभावस्य तत्रासत्त्वेन तद्व्यवच्छेदस्य तदानीमपि सत्त्वादिति भावः॥

नन्वव्यावृत्तिपदस्यात्यन्तायोगव्यवच्छेदार्थकत्वे शब्दोऽनित्यः शब्दत्वादित्यादावसाधारण्योत्तीर्णतादशायामतिप्रसङ्ग इत्यत आह साध्यवद्वृत्तिस्त्विति। नासाधारण इति। निश्चयागर्भितस्य साध्यतदभाववद्व्यावृत्तत्वस्यैवासाधारण्यपदार्थत्वादिति शेषः। तथाच तत्रोक्तस्थले कदाचिदपि असाधारण्यस्यासत्त्वान्नातिप्रसङ्ग इति भावः। बाधादिवारणाय विवक्षणीयस्य पक्षे साध्यग्रहाविरोधित्वस्य लाभाय पक्षपदं व्याचष्टे पक्ष इति। सन्दिग्धसाध्यः–सन्दिग्धसाध्यविशिष्टः। धर्मी–पक्षतावच्छेदकावच्छिन्नः। विशिष्टहेतौ–हेतुतावच्छेदकावच्छिन्ने। तद्वृत्तित्वेति,–तादृशसाध्यविशिष्टपक्षतावच्छेदकावच्छिन्नपक्षवृत्तित्वेत्यर्थकम्। वैशिष्ट्यं च वैज्ञानिकम्, तेन बाधादिसङ्करस्थले साध्यविशिष्टपक्षाप्रसिद्धत्वेऽपि न क्षतिः। बाधादिज्ञानस्य साध्यविशिष्टपक्षतावच्छेदकावच्छिन्नविषयकज्ञानाविरोधित्वान्न बाधादिकमादाय ह्रदो वह्निमान्धूमादित्यादावतिव्याप्तिरिति भावः। अत्र च साध्यवदवृत्तित्वरूपासाधारण्यस्यासङ्ग्रहः तज्ज्ञानदशायां हेतौ साध्यविशिष्ट-

पक्षवृत्तित्वज्ञानानुदयात्, एवं साध्यांशे संशयविषयत्वरूपविशेषणमनर्थकमित्यतस्तत्परित्यज्य निष्कृष्टार्थमाह तथाचेति । पक्षतावच्छेदकेति । पक्षतावच्छेदकावच्छिन्नपक्षविशेष्यतानिरूपिता, या साध्यतावच्छेदकावच्छिन्नसाध्यप्रकारता या च तादृशी हेतुतावच्छेदकावच्छिन्नहेतुप्रकारता तन्निरूपकलौकिकसन्निकर्षाद्यजन्यज्ञानाविरोधित्वस्य लाभादित्यर्थः । तादृशज्ञानाविरोधित्वं न तादृशज्ञानसामान्यनिरूपितप्रतिबन्धकतानतिरिक्तवृत्तिविषयित्वानिरूपकत्वं हेतुमन्निष्ठसाध्याभावादिरूपव्यभिचारस्यापि पक्षनिष्ठसाध्याभावत्वादिना बुद्धेस्तादृशज्ञानं प्रति प्रतिबन्धकत्वात्तादृशविषयितानिरूपकत्वेनाव्याप्तेरसम्भवस्य वा प्रसङ्गात्, किन्तु तादृशविषयितानिरूपकतावच्छेदकधर्मवत्त्वम् । तदनवच्छेदकत्वं च तदवच्छेदकतापर्याप्त्यनधिकरणत्वम्, तेन हेतुमन्निष्ठसाध्याभावत्वादिरूपव्यभिचारत्वस्यापि तादृशप्रतिबन्धकतानतिरिक्तवृत्तिविषयितानिरूपकतावच्छेदकपक्षनिष्ठसाध्याभावत्वादितोऽनतिरिक्तत्वेऽपि न क्षतिः । बाधादिनिष्ठानामनुमितिविरोधितानवच्छेदकधर्माणां प्रमेयत्वादीनां तादृशविषयितानिरूपकतानवच्छेदकत्वेऽपि तादृशविषयितानिरूपकतानवच्छेदकीभूतानुमितिविरोधितावच्छेदकरूपावच्छिन्नत्वस्य समुदायार्थत्वान्नातिप्रसङ्गः तादृशं यत्किञ्चिज्ज्ञानं यादृशरूपावच्छिन्नविषयकनिश्चयसामान्याप्रतिबध्यं तादृशो योऽनुमितिविरोधितावच्छेदको धर्मस्तदवच्छिन्नत्वं वा समुदितार्थः ।

वस्तुतस्तु निरुक्ततादृशज्ञानाविरोधित्वम् अनुमितिविरोधिनि तादृशज्ञानविरोधितानवच्छेदकत्वं वा अनुमितिविरोधितावच्छेदके न निवेशनीयम्, परन्त्वनुमितिविरोधिताघटकानुमितिनिष्ठप्रतिबध्यतायामेव तादृशज्ञानत्वन्यूनवृत्तित्वं निवेशनीयं लाघवात्, बाधादिज्ञाननिरूपितप्रतिबध्यतानां च तादृशसकलज्ञानसाधारणतया न तादृशज्ञानत्वन्यूनवृत्तित्वमतो नातिप्रसङ्गः । व्यभिचारज्ञानप्रतिबध्यत्वं च तन्न्यूनवृत्त्येव व्याप्यविषयकतादृशज्ञानावृत्तित्वात् । अग्रेपि सर्वत्रैवेतादृशादिशा निष्कर्षणीयमिति । अत्र च यत्र प्रकृतपक्षे व्यभिचाराभावो निविष्टस्तत्र व्यभिचारोऽसिद्धिमध्ये निवेश्यत इति हृदयम् । पक्षसाध्यसाधनानामप्रसिद्ध्या सममन्वयः । निरास इति । तेषां ज्ञानस्य यथोक्तज्ञानप्रतिबन्धकत्वादिति भावः । असिद्धिसंकीर्णा-

ह्रदादौ धूमादिसाधने वह्न्यादिहेतुः । तत्सङ्ग्रहः–तत्र यथाश्रुतपक्षवृत्तित्वेऽपि यथोक्तज्ञानाप्रतिबन्धकत्वादिविशिष्टानुमितिविरोधिसाध्याभाववद्वृत्तित्वाद्यादाय लक्षणगमनसम्भवादिति भावः ।

ननु विरोधोऽपि यथोक्तज्ञानाविरोधी अनुमितिविरोधी चेत्यतिप्रसङ्गः । न च विरुद्धो हेतुः साध्यवद्व्यावृत्ततया असाधारण एवेति न तत्र सव्यभिचारलक्षणातिव्याप्तिप्रसक्तिरिति वाच्यम् । यथोक्तज्ञानाविरोधित्वविशिष्टानुमितिविरोधित्वस्य विरोधिसाधारण्ये तस्य सव्यभिचारपदप्रवृत्तिनिमित्तत्वासम्भवात्तदवच्छिन्नवतः सव्यभिचारपदार्थत्वे तत्पदस्य पारिभाषिकत्वापत्तेः व्यभिचारलक्षणातिव्याप्तेश्चाशक्यपरिहारत्वादत आह विरोधोऽपीति । फलतः–तदभावव्याप्यवत्ताज्ञानविधया अनुमितिप्रतिबन्धरूपफलप्रयोजकज्ञानविषयत्वेन, प्रतिरोधः–प्रतिरोधतुल्य एव । तथाच पक्षे साध्यवत्ताज्ञानप्रतिबन्धकत्वान्न तत्रातिप्रसङ्ग इति शेषः । पक्षवृत्तित्वे सति साध्यव्यापकीभूताभावप्रतियोगित्वं विरोधः, तादृशाभावप्रतियोगित्वं च साध्याभावस्य व्यतिरेकव्याप्तिरिति तज्ज्ञानं तदभावव्याप्यवत्ताज्ञानविधया पक्षे साध्यवत्ताज्ञानं विरुणद्धीति हृदयम् ।

साध्यासामानाधिकरण्यस्यैव चिन्तामणिकारमते विरोधतया तस्य पक्षे साध्यवत्ताज्ञानाविरोधितयाऽतिव्याप्तिर्दुर्धरैवेति अतस्तन्मताभिप्रायेण तद्वारणाय प्रकारान्तरमनुसरति तदन्यत्वेन वेति । विरोधान्यत्वेन वेत्यर्थः । विरोधि–अनुमितिविरोधि ।

अथैतन्मते किमसाधारण्यम् ? न तावत्पक्षवृत्तित्वे सति साध्यव्यापकीभूताभावप्रतियोगित्वम्–तज्ज्ञानस्य पक्षे साध्यवत्ताज्ञानं प्रति साध्याभावव्याप्यवत्ताज्ञानमुद्रया विरोधित्वेन सत्यन्तार्थविरहात् । नापि निश्चितसाध्यवद्व्यावृत्तत्वं–तज्ज्ञानस्यानुमितौ तत्कारणीभूतज्ञाने वा प्रतिबन्धकताविरहेण हेत्वाभाससामान्यलक्षणस्यैतल्लक्षणस्य च तत्साधारण्यविरहात्, अनुमितिकारणीभूतसाध्यसामानाधिकरण्यज्ञानं प्रति साध्यवद्व्यक्तिविशेषावृत्तित्वज्ञानस्याप्रतिबन्धकत्वात्, कथंचित्प्रतिबन्धकत्वे साध्यासामानाधिकरण्यग्रहाविरोधित्वरूपविरोधान्यत्वरूपस्य तत्रासत्त्वेन प्रकृतलक्षणस्य तत्साधारण्यासम्भवात् । नापि पक्षवृत्तित्वाविशेषितं साध्यव्यापकीभूताभावप्रतियोगित्वं तज्ज्ञानस्यापि अनुमितौ तज्जनकज्ञाने वाऽविरोधित्वात् । यदि

धर्मिणि प्रकृतहेतुमत्ताज्ञानसहकृतं प्रकृतहेतौ साध्यव्यापकीभूताभावप्रतियोगित्वज्ञानमनुमितिं प्रतिबध्नाति स्थाणुत्वाभावव्याप्यवक्रादिमांश्चायमित्यादिज्ञानदशायामपि अयं स्थाणुरिति ज्ञानानुदयात् धर्मिविशेष्यकतद्धत्ताज्ञानविशिष्टतद्धर्मिकग्राह्याभावव्याप्तिनिश्चयत्वेनैव तदभावव्याप्यवत्ताज्ञानस्य प्रतिबन्धकत्वादित्युच्यते, तदा तादृशधर्मस्य पक्षे साध्यवत्ताज्ञानविरोधित्वात् सत्यन्तार्थविरहादिति ॥

अत्र केचित्तु पक्षवृत्तित्वविशेषितं साध्यव्यापकीभूताभावप्रतियोगित्वमेवासाधारण्यम्, सत्यन्तदले च विरोधिताघटकप्रतिबन्धकतायास्तादृशासाधारण्यविषयकत्वानवच्छिन्नत्वविशेषणं प्रक्षिप्य तत्साधारण्यं प्रकृतलक्षणस्योपपादनीयमित्याहुः ।

परेतु हेतुनिष्ठसाध्यव्यापकीभूताभावप्रतियोगित्वमेवासाधारण्यं तद्विषयकत्वस्य पक्षधर्मिकहेतुमत्ताज्ञानविरहकालीनानुमित्यप्रतिबन्धकज्ञानसाधारणतया अनुमितिप्रतिबन्धकतातिरिक्तवृत्तित्वेऽपि पक्षधर्मिकहेतुमत्तानिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वमनुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तादृशत्वस्य सामान्यलक्षणेऽत्र च लक्षणे विवक्षणीयतया सामान्यलक्षणस्य प्रकृतलक्षणविशेषदलस्य च तत्साधारण्यनिर्वाहः । पक्षतावच्छेदकविशिष्टपक्षे साध्यतावच्छेदकावशिष्टसाध्यवत्तादिज्ञानाविरोधित्वस्य च तादृशं यत्किञ्चिज्ज्ञानं यादृशधर्मावच्छिन्नविषयकनिश्चयसामान्याप्रतिबध्यं तादृशधर्मत्वरूपस्य शरीरे निश्चयांशे पक्षधर्मिकहेतुमत्तानिश्चयवैशिष्ट्यानिवेशात्तादृशनिश्चयविरहकालीनहेतुनिष्ठसाध्यव्यापकीभूताभावप्रतियोगित्वविषयकनिश्चयस्यापि तद्विषयकनिश्चयसामान्यान्तर्गतत्वेन पक्षे साध्यवत्ताज्ञानस्य च तदप्रतिबध्यतया तद्दलस्याप्येतत्साधारण्योपपत्तिरित्याहुः ॥

वस्तुतो यादृशविशिष्टविषयकनिश्चयत्वमनुमितिप्रतिबन्धकताशून्यपक्षधर्मताज्ञानकालीनज्ञानावृत्ति तादृशत्वस्य स्वव्यापकत्वस्वरूपानतिरिक्तवृत्तित्वनिवेशे यादृशविशिष्टविषयकनिश्चयत्वव्यापकः पक्षधर्मताज्ञानकालीनत्वानुमित्यप्रतिबन्धकत्वोभयाभावः तादृशत्वस्य वा निवेशान्न दोषः, अन्यथा स्वरूपासिद्धिवारकस्य हेतुमत्ताग्रहाविरोधित्वदलस्य वैयर्थ्यापत्तेः–पक्षधर्मिकहेतुमत्तानिश्चय

कालीनतद्विषयकनिश्चयस्याप्रसिद्ध्या यादृशविशिष्टविषयकत्वेन तस्योपादानासंभवात् । एवं सामान्यलक्षणस्याप्यव्याप्तिः । यथाविवक्षिते तु तद्विषयकनिश्चयत्वस्यानुमितिप्रतिबन्धकताशून्यपक्षधर्मिकहेतुमत्तानिश्चयकालीनज्ञानावृत्तित्वेन तत्राव्याप्तिवारकतया तत्सार्थकत्वात् सामान्यलक्षणस्यापि सङ्गमाच्च । 'अत्र वदन्ती'त्यादिनिष्कृष्टकल्पे च पक्षवृत्तित्वासहितोक्तरूपस्य स्वविषयकनिश्चयाव्यवहितोत्तरानुमितिसामान्ये उभयाभावसत्त्वात् सामान्यलक्षणाक्रान्तत्वं विशेषलक्षणाक्रान्तत्वं च निर्वहति हेतौ साध्यव्यापकीभूताभावप्रतियोगित्वज्ञानानन्तरं हेतुमान् साध्यवानित्यनाहार्यज्ञानस्य कदाप्यनुदयात् । एतादृशविशेषणप्रक्षेपे मूलकृतः सम्मतिमाह यक्ष्यतीति ॥

ननु हेतुनिष्ठसाध्यसामानाधिकरण्यात्यन्ताभावत्वच्छेदसाध्यनिष्ठहेतुसामानाधिकरण्याभावादिसाध्यासामानाधिकरण्यविशिष्टसाधनादिरूपविविधविरोधानामेकस्य भेदनिवेशेऽन्यत्रातिव्याप्तिर्दुर्वारैव । एवं साध्यासामानाधिकरण्यादिविशिष्टसाधनादिरूपविरोधभेदनिवेशे साध्याभाववद्वृत्तित्वविशिष्टसाधनादिरूपस्य विरुद्धस्थलीयव्यभिचारस्यासंग्रहः—गोत्ववदवृत्तित्वविशिष्टाश्वत्वादिनो गोत्वाभाववद्वृत्तित्वविशिष्टाश्वत्वादेरनतिरिक्तत्वादित्यत आह हेत्विति । हेतुतावच्छेदकावच्छिन्नधर्मिकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यप्रकारकज्ञानाविरोध्यर्थकमित्यर्थः । तेन विरोधग्रहदशायामपि रूपान्तरेण साध्ये हेतुविषयकसामानाधिकरण्यग्रहोत्पत्तावपि न क्षतिः । न वा अवृत्तिहेतुकस्थले तदुभयसामानाधिकरण्याप्रसिद्ध्या तत्स्थलीयासाधारण्यासङ्ग्रहः । सामानाधिकरण्येऽपि साध्यतावच्छेदकावच्छिन्नीयत्वं वैज्ञानिकमेव न तु वास्तवम्, तेन नावृत्तिसाध्यकसाधारण्यासंग्रहः । अविरुद्धहेतुकस्थलीयव्यभिचारलक्षणे च एतद्विशेषणमनुपादेयमेव, तेन तत्र हेतुसाध्यसामानाधिकरण्यग्रहाविरोध्यप्रसिद्धावपि न क्षतिः ॥

वस्तुतस्तु तादृशसामानाधिकरण्यग्रहत्वन्यूनवृत्तित्वस्यैवानुमितिविरोधित्वघटकानुमितिनिष्ठप्रतिबध्यतायां निवेशनीयतया धूमवान्वह्नेरित्यादौ सामानाधिकरण्यग्रहविरोधिनोऽप्रसिद्धावपि न क्षतिः ।

केचित्तु सत्यन्तस्य विशिष्टहेतौ विशिष्टपक्षवृत्तित्वग्रहाविरोधि

त्वमेवार्थं वर्णयन्तो बाधादिवारणाय पन्थानमन्यमेवाश्रयन्ते तन्मतमाक्षिपति सम्बन्धपदेति । प्रकृतहेतुसम्बन्धितया विरोधित्वे इति । प्रकृतहेतुतावच्छेदकावच्छिन्नविशेष्यतानिरूपितयद्रूपावच्छिन्नप्रकारताशालिनिश्चयत्वमनुमितिप्रतिबन्धकतावच्छेदकं तद्रूपावच्छिन्नत्वे इत्यर्थः । यत्किंचिद्रूपावच्छिन्नहेतुविशेष्यतानिवेशे द्रव्यं वह्निमद्धूमादित्यादौ पक्षतावच्छेदकावच्छेदेन साध्यसिद्धावुद्देश्यायां द्रव्यत्वाद्यवच्छिन्नधूमादिविशेष्यतानिरूपितसाध्याभावादिप्रकारताशालिनिश्चयत्वस्यानुमितिप्रतिबन्धकतावच्छेदकत्वात् साध्याभावादिवारणासम्भव इत्यतः प्रकृतेति,-प्रकृतहेतुतावच्छेदकावच्छिन्नेत्यर्थकम् ॥

अथैवं हेत्वघटितसाध्याभाववद्वृत्तित्वादिकमेव व्यभिचारः स्यात् । न चेष्टापत्तिः, तस्य सामान्यलक्षणानाक्रान्तत्वात् । हेतुतावच्छेदकावच्छिन्नहेतुनिष्ठत्वस्य विरोधिविशेषणत्वोपगमेन तादृशातिप्रसङ्गवारणेपि साध्याभाववद्वृत्तित्वादिविशिष्टसाधनादेः साध्याभावनिष्ठसाधनसामानाधिकरण्यादेश्चासङ्ग्रहः । न च हेतुतावच्छेदकावच्छिन्नघटितत्वे सति विरोधित्वमेव प्रकृतहेतुसम्बन्धितया विरोधित्वम्, तच्च विशेष्यविशेषणभावभेदभिन्नसकलव्यभिचारसाधारणमेवेति वाच्यम् । तथा सति ह्रदो वह्निमानभावादित्यादौ वन्ह्यभाववद्ध्रदादिरूपबाधादौ गगनवान् अभावादित्यादौ अवृत्तित्ववत् गगनादिरूपव्याप्यत्वासिद्धौ चातिव्याप्त्यापत्तेः ।

मैवम् । व्यभिचारलक्षणस्य नैतादृशरीत्या परिष्कारः, अपि तु व्यभिचारिलक्षणस्यैवेति न साध्याभावनिष्ठप्रकृतसाधनसामानाधिकरण्याद्यसङ्ग्रहे हेत्वघटितसाध्याभाववद्वृत्तित्वादेः संग्रहे वा क्षतिः ।

अथवा हेतुनिष्ठत्वविशेषिततादृशविरोध्येव व्यभिचारपदार्थः, अन्याविधोपदर्शितव्यभिचारस्तु तन्मते व्याप्यत्वासिद्धावेवान्तर्भवतु तावता क्षतिविरहात् । प्रायश इत्यस्य प्रयोजनं स्वयमेव प्रकाशयिष्यते । बाधादीत्यादिना सत्प्रतिपक्षपरिग्रहः । तत्साध्यतद्धेतुकानुमितिसामान्यं प्रति हेतुसम्बन्धितया विरोधित्वविवक्षणे तादृशबाधादिवारणसम्भवादसाध्यत्वमुपेक्ष्य प्रयत्नसाध्यत्वकथनम् । न चैवं हेतुसम्बन्धितयेत्यस्य वैयर्थ्यमिति वाच्यम् । तदनुपादाने साध्यनिष्ठावृत्तित्वरूपव्याप्यत्वासिद्धावतिप्रसङ्गापातात् तस्य तत्साध्य-

कानुमितिमात्र एव विरोधित्वात् । न च तदुपादानेऽपि हेतुनिष्ठावृत्तित्वातिप्रसङ्गो दुर्वार इति वाच्यम् । सत्यन्तदलेनैव तद्वारणात् । अत एव हेतुनिष्ठपक्षावृत्तित्वादेस्तादृशानुमितिसामान्याविरोधित्वादेव वारणे सत्यन्तवैयर्थ्यमित्यपि परास्तम् । काञ्चनमयवन्हिमान् वह्नेरित्यादौ साध्याप्रसिद्धिवारणं तु विशिष्टसाध्यग्रहाविरोधित्वविशेषणप्रक्षेपेणैव संभवतीति हृदयम् । तत्—बाधादिवारणम् ॥

अत्र च व्यभिचारज्ञानस्य प्रकृतपक्षे प्रकृतसाध्यानुमित्यविरोधितयाऽनुमितिपदस्य प्रकृतपक्षे प्रकृतसाध्यतद्व्याप्यप्रकृतहेतुवैशिष्ट्यावगाह्यनुमितिपरत्वमावश्यकम् । तत्र निष्प्रयोजनकं साध्यवैशिष्ट्यावगाहित्वं निवेश्य तन्निबन्धनबाधाद्यतिव्याप्तिवारकविशेषणान्तरप्रक्षेपः 'प्रक्षालनाद्धी'त्यादिन्यायेनायुक्त इत्यतो ज्ञाने साध्यवैशिष्ट्यावगाहित्वं विरोधिनि बाधादिवारकविशेषणं च परित्यजति वस्तुतस्त्वित्यादिति । आश्रयासिद्ध्यादीत्यादिना स्वरूपासिद्धिसाधनाप्रसिद्धिपरिग्रहः । यथाश्रुते आश्रयासिद्ध्यादिवारणासम्भवादसिद्धसङ्कीर्णव्यभिचारासङ्ग्रहाच्च सत्यन्तार्थं व्याचष्टे तादृशेति । प्रथमं तादृशेति पक्षतावच्छेदकविशिष्टेत्यर्थकम् । उदीच्यम् तद्धेतुतावच्छेदकविशिष्टार्थकम् । ननु वन्हिमान् ह्रदत्वादित्यादौ हेतुनिष्ठसाध्यासामानाधिकरण्यादिरूपासाधारण्यासङ्ग्रहः तज्ज्ञानस्य साध्यात्मकपक्षतावच्छेदकविशिष्टे हेतुमत्ताग्रहविरोधित्वादत आह अनयेति । अनुमितिकारणीभूतं व्याप्तेः पक्षधर्मतायाश्च ज्ञानम् । तथाच पक्षधर्मताज्ञानाविरोधित्वकथनेन परिशेषाद्व्याप्तिग्रहविरोधित्वमेव लभ्यत इति भावः । ननु एतत्साध्यसाधनयोरप्रसिद्धावतिव्यापकमन्योन्यात्यन्ताभावगर्भव्याप्त्योरेकतरोपादानेऽन्यतरासङ्ग्राहकं साध्याव्यभिचरितत्वविशिष्टसामानाधिकरण्याभावरूपव्याप्यत्वासिद्धावतिव्यापकं चेत्यत आह विवेचयिष्यत इति । विशिष्टसाध्यसाधनग्रहाविरोधित्वं निवेश्य साध्याप्रसिद्ध्यादिकं वारयिष्यते । विशिष्टसाधनग्रहविरोधी व्यभिचारोऽसिद्धावेवान्तर्भावनीयः । समूहालंबनात्मकनानाविधव्याप्तिज्ञानमादायात्यन्तान्योन्याभावगर्भा विविधा व्यभिचाराः सङ्ग्रहीष्यन्ते । व्याप्त्यभावो व्यभिचार एवान्तर्भावयिष्यते । तस्य बहिर्भावनीयत्वे विशकलितयोरेवाव्यभिचारसामानाधिकरण्ययोर्ज्ञानमुपादेयमिति न कस्यचिदपि दोषस्यावकाश इति भावः ।

ननु सपक्षवृत्तित्वज्ञानस्यानुमित्याद्यविरोधितया सपक्षविपक्षवृत्तित्वस्यानुमितिविरोधित्वाक्तिर्न सङ्गच्छते । न च विपक्षवृत्तित्वज्ञानस्यानुमितिप्रतिबन्धकतया तदुद्घटितविशिष्टस्यानुमितिविरोधित्वमक्षतमेवेति वाच्यम् । तथासत्यपि विपक्षवृत्तित्वमात्रस्यापि तथात्वात्तमादायैव लक्षणगमनसम्भवे विशिष्टमादाय लक्षणसङ्गमनस्यानुचितत्वात् विपक्षवृत्तित्वमात्रस्यातथात्वे तदादाय विरुद्धेऽतिव्याप्तेरप्रसक्तेः विरुद्धेत्यग्रिमग्रन्थासङ्गतिश्चेत्यत आह सपक्षेतीति । तथाच विपक्षवृत्तित्वमात्रं विवक्षितमिति भावः । अतएव—सपक्षवृत्तित्वस्याविवक्षितत्वादेव । मूले एतदज्ञानेपीति दृष्टान्तविधयोक्तम् । तथासति–एतादृशानुगतधर्माज्ञानदशायामिव तज्ज्ञानदशायामपि, अवश्यकल्प्यप्रतिबन्धकताकप्रत्येकज्ञानस्यैव दोषत्वात्–अनुमित्यनुत्पादप्रयोजकत्वादित्यर्थः । तथा चानुगतधर्मज्ञानदशायां प्रत्येकज्ञानस्यासत्त्वेऽनुमितिरिष्टैव तत्सत्त्वे तत एवानुमित्यनुत्पाद इति तज्ज्ञानस्य प्रतिबन्धकताया अप्रामाणिकत्वान्न तस्य विभाजकत्वमिति भावः ।

व्यर्थविशेषणत्वादिति मूले विशेषणपदस्यानुमितिविरोधित्वरूपविशेषणपरत्वं न सम्भवति तदनुपादाने सद्धेतौ व्यभिचाराद्तो व्याचष्टे विशेषणमिति । स्वरूपासिद्ध्यादिहेतोरप्यसाधकतया तत्र व्यभिचाराप्रसक्तेस्तद्वारकं विशेषणं व्यर्थमेवेति भावः ॥

(चि०) अतएव साध्याव्याप्यत्वे सति साध्याभावाव्याप्यहेत्वाभासत्वं साध्यवन्मात्रवृत्त्यन्यत्वे सति साध्याभाववन्मात्रवृत्त्यन्यत्वं वेति परास्तम् । व्यर्थविशेषणत्वात् प्रथमं हेत्वाभासत्वाज्ञानाच्च ।

गगनमनित्यं शब्दाश्रयत्वादित्यादिबाधविरुद्धसङ्कीर्णासाधारणाव्याप्तिरिति कश्चित् ॥

(दी०) साध्याव्याप्यत्व इति । हेत्वाभासत्वं हेतुवदाभासमानत्वं वत्यर्थश्च वृत्तिमत्त्वम्, एवञ्च साध्यतदभावव्याप्यत्वग्रहविरोधिवृत्तिमत्त्वग्रहाविरोधिरूपवत्त्वमर्थः । साध्यतदभाववद्वृत्तित्वं साधारण्यम् निश्चितसाध्यतदभाववद्व्यावृत्तत्वमसाधारण्यम् तत्र

व्याप्तिद्वयग्रहाविरोधीति हृदयम् । असिद्धिविशेषस्त्ववृत्तित्वं वृत्तिमत्त्वग्रहविरोधि, साध्यतदभाववद्व्यावृत्तत्वमपि यदीदृशं तदा असिद्धिरेव नो चेदिदमेवासाधारण्यं बोध्यम् । साध्याप्रसिद्ध्यादिवारणाय विशिष्टसाध्यसाधनग्रहाविरोधित्वं वाच्यम् । व्यापकसामानाधिकरण्यमिह व्याप्यत्वम् तेन च द्वितीयस्य भेदः । रीतिस्तुल्यैव ।

केचित्तु असाधारण्याभावकालावच्छिन्नसाध्यतदभावव्याप्तिशून्यत्वं विवक्षितं विशेषणाभावात् । वस्तुतो व्याप्यस्य विरुद्धस्य वा असाधारणस्य सङ्ग्रह इत्याहुः । तच्चिन्त्यम् ।

व्यर्थेति । विरोधादेर्वारकं साध्याभावेत्यादि व्यर्थं तस्य पार्थक्ये प्रमाणाभावादिति भावः । प्रथममित्यादि गगनमित्यादि च दूषणं यथाश्रुते ॥

(गा०) सद्धेतोः साध्यव्याप्यतया तत्रातिव्याप्त्यप्रसक्तेः हेत्वाभासपदं व्यर्थमित्याशङ्कां निराचिकीर्षुर्दोषलक्षणेऽसिद्धिविशेषात्मकावृत्तित्वातिव्याप्तिवारकतया तत्सार्थकीकर्तुं तदर्थमाह हेतुवदिति । दशाविशेषे व्याप्यविरुद्धयोरप्यसाधारणत्वात्तयोः प्रत्येकं यथाश्रुतलक्षणघटकदलद्वयविरहादव्याप्तिः, एवं हेत्वाभासपदस्य वृत्तिमदर्थकत्वेऽवृत्तेरपि साध्यतदभाववद्व्यावृत्तत्वेनासाधारणतया तत्राऽव्याप्तिरतः पर्यवसितार्थमाह एवञ्चेति । ननु साध्याभाववद्वृत्तित्वं साधारण्यं साध्यवदवृत्ति चासाधारण्यम् तच्च साध्यव्याप्तिग्रह एव विरोधि न तु साध्याभावव्याप्तिग्रहेपीति कथं तत्सङ्ग्रह इत्यत आह साध्येति । साध्यतदभाववत्व्यावृत्तत्वस्य वृत्तिमत्त्वविरुद्धतया तज्ज्ञाने वृत्तिमत्त्वग्रहप्रतिबन्धकमित्यभिप्रेत्य निश्चितेति । तच्च–तादृशं साधारण्यमसाधारण्यं च । व्याप्तिद्वयेति । साध्यव्याप्तिसाध्याभावव्याप्तीत्यर्थः साध्यस्य साध्याभावाभावतया साध्याभावनिरूपितव्याप्तिग्रहे साध्यवद्वृत्तित्वस्य ज्ञानं प्रतिबन्धकमिति तद्घटितस्य साधारण्यस्य साध्याभावव्याप्तिग्रहाविरोधित्वम् , एवं साध्याभाववद्व्यावृत्तत्वस्य ज्ञानमपि साध्याभावसामानाधिकरण्यघटितसाध्याभावव्याप्तिग्रहे प्रतिबन्धकमिति तद्घटितस्यासाधारण्यस्यापि तथात्व-

मिति भावः । इदयमित्यस्वरससूचनाय । स च साध्याभावाभावत्वेन साध्याविषयकतद्वृत्तित्वज्ञानस्यैव साध्याभावाभाववद्वृत्तित्वघटितस्य साध्याभावे हेतुसमानाधिकरणाभावाप्रतियोगित्वघटितस्य वा साध्याभावव्याप्यत्वस्य ग्रहे प्रतिबन्धकतया साध्यतावच्छेदकसाध्यविषयकतद्वृत्तित्वज्ञानस्य तदप्रतिबन्धकत्वम्, निश्चितसाध्यादिमद्व्यावृत्तत्वज्ञानस्य साध्यादिसामानाधिकरण्यसामान्याभावाविषयकतया साध्यादिव्याप्तिग्रहाप्रतिबन्धकत्वमिति च ।

विशेष्यदलप्रयोजनं स्फुटयति असिद्धिविशेष इति । स्वरूपासिद्धिविशेष इति । स्वरूपासिद्धव्याप्यत्वासिद्धेवेत्यर्थः । एतच्चालक्ष्यतालाभाय ।

ननु निश्चयाघटितस्य साध्यातदभाववद्व्यावृत्तत्वस्य वृत्तिमत्त्वग्रहविरोधितया एतदनन्तर्भावे तस्याधिकहेत्वाभासत्वापत्तिरित्यत आह साध्येति । यदीदृशं-यदि वृत्तिमत्त्वग्रहविरोधि । वृत्तिमत्त्वग्रहे ग्राह्याभावावगाहितया तत्सामान्याभावावगाहिज्ञानमेव विरोधि न त्वेकविशिष्टापरविशेषाभावरूपसाध्यतदभाववद्व्यावृत्तत्वज्ञानमित्यस्वरसाद्यदीति । निष्कृष्टमताभिप्रायेणाह नोचेदिति । इदमेव-निश्चयाघटितं साध्यतदभाववद्व्यावृत्तत्वमेव । एवकारेण निश्चयघटितस्य व्यवच्छेदः ॥

नन्वत्र साध्यादिव्याप्यत्वं यदि साध्यादिमदन्यावृत्तित्वे सति साध्यादिमद्वृत्तित्वं तदा द्वितीयलक्षणाभेदः साध्यवन्मात्रवृत्त्यादिपदस्यापि तादृशव्याप्तिमदर्थकत्वादित्यत आह व्यापकेति । द्वितीयलक्षणस्यापि यथाश्रुतार्थपरत्वं पूर्ववद्व्याप्यविरुद्धयोर्दशाविशेषेऽसाधारणयोरसंग्रह इत्यत आह रीतिरिति । तत्रापि साध्यतदभाववन्मात्रवृत्तित्वग्रहविरोधिवृत्तिमत्त्वग्रहाविरोधिधर्मवत्त्वमेव विवक्षणीयमित्यर्थः ।

उपाध्यायमतमाह केचित्त्विति । असाधारण्याभावकालः-प्रकृतहेतुनिष्ठासाधारण्याभावस्यावच्छेदकक्षणः । तेन यदा शब्दत्वादेरसाधारण्यं तादृशक्षणस्य घटत्वादिनिष्ठासाधारण्याभावावच्छेदकत्वेऽपि न क्षतिः ॥

अथ शब्दादौ साध्यसन्देहदशायां शब्दत्वादावसाधारण्यव्यवहारप्रयोजकस्य तत्कालीनसाध्यादिनिश्चयविषयीभूतघटादिवृत्तित्व-

विरहस्य शब्दादौ साध्यादिनिश्चयदशायामपि तत्र सत्त्वात् प्रकृतहेतुनिष्ठासाधारण्याभावस्याप्रसिद्ध्याऽव्याप्तिः । न च तत्कालीनसाध्यादिनिश्चयविषयीभूतधर्मिव्यावृत्तत्वरूपासाधारण्यघटकतत्कालादिविरहात् तदानीं तद्घटितासाधारण्यविरहोऽक्षत एवेति वाच्यम् । प्रतियोगिकोटिप्रविष्टविशेषणासत्त्वस्याभावीयविशिष्टाभावाप्रयोजकत्वात् अन्यथा दण्डाद्यसत्त्वे दण्डविशिष्टपुरुषाभावादेरिव दण्डविशिष्टपुरुषाभावाद्यभावस्यापि सत्त्वप्रसङ्गात् । यदि च प्रकृतहेतुमद्विशेष्यकसाध्यतदभावान्यतरनिश्चयक्षण एवासाधारण्याभावकालेत्यनेन विवक्षितमित्युच्यते, तदा शब्दोऽनित्यः शब्दत्वादित्यादौ यदा क्वचिदपि साध्यस्य साध्याभावस्य वा निश्चयो नास्ति तदा सव्यभिचारत्वप्रसङ्गः—तादृशक्षणस्य प्रकृतहेतुमद्विशेष्यकसाध्यादिनिश्चयस्याप्यनधिकरणत्वेन तदा तादृशनिश्चयक्षणावच्छिन्नसाध्यादिव्याप्त्यभावस्य हेतौ सत्त्वात् तदा चासाधारण्यघटकसाध्यादिनिश्चयासत्त्वेनासाधारण्यस्य साधारण्यस्य च विरहेणेष्टापत्तेरयोगात् । प्रकृतहेतुनिष्ठासाधारण्यघटको यो यस्तदन्यक्षणस्य विवक्षणे तु यादृशसाध्यकस्थले यादृशसाधारणस्य हेतोः कदापि नासाधारण्यं तत्राव्याप्तिः—प्रकृतहेतुनिष्ठस्यासाधारण्यस्याप्रसिद्धेः ।

मैवम् । तत्तत्कालावच्छिन्नत्वविशिष्टस्य तत्तत्कालीनसाध्यादिनिश्चयविषयव्यावृत्तत्वरूपासाधारण्यस्य प्रकृतहेतुनिष्ठाभावावच्छेदककाल एवासाधारण्याभावकालः हेतुमति साध्यादिनिश्चयदशायां कालान्तरावच्छिन्नस्य कालान्तरघटितासाधारण्यस्याभावकूटो हेतौ सुलभ एव । यादृशसाधारणहेतोः कदापि नासाधारण्यं तत्राप्यन्ततो गगनादिनिष्ठप्रकृतसाध्यकासाधारण्यस्याभावकालः प्रसिद्ध एवेति न दोषः ।

अथवा प्रकृतहेतुमद्विशेष्यकसाध्यतदभावान्यतरनिश्चयानधिकरणत्वाकिञ्चिद्विशेष्यकसाध्यतदभावनिश्चयवत्त्वोभयाभाववान् क्षण एवासाधारण्याभावकालेत्यनेन विवक्षितः, । शब्दोऽनित्यः शब्दत्वादित्यादौ यदा क्वचिदपि साध्यस्य तदभावस्य वा न निश्चयः तत्क्षणे प्रकृतहेतुमद्विशेष्यकसाध्यतदभावान्यतरनिश्चयानधिकरणत्वसत्त्वेपि साध्यतदभावनिश्चयवत्त्वाभावेनोभयाभावोऽक्षत एवेति तदा न सव्यभिचारिताप्रसङ्गः ।

प्रकृतहेतुनिष्ठासाधारण्यघटको यो यस्तदन्यक्षण एव विवक्षणीयः यत्साध्यकस्थले यस्य साधारणहेतोः कदापि नासाधारण्यं तत्साध्यके तत्स्थलीयलक्षणेऽसाधारण्याभावकालावच्छिन्नत्वं नोपादेयमेव साध्यसाधनभेदेन लक्षणभेदादित्यपि कश्चित् ।

विशेषणाभावात्-असाधारण्याभावकालावच्छिन्नत्वरूपं यद्व्याप्तिद्वयस्य विशेषणं तदभावात् । संग्रहः—तादृशविशेषणविशिष्टव्याप्तिद्वयस्याभाववत्त्वम् । एतन्मते च पूर्वलक्षणे साध्याभाववद्वृत्तित्वघटितायां उत्तरत्र च तद्वदन्यावृत्तित्वघटिताया व्याप्तेरनुप्रवेशाच्च लक्षणयोरभेदः । स्वव्यापकसामानाधिकरण्यरूपव्याप्तेरभावश्च निवेशयितुमशक्यः तादृशव्याप्तेः स्वत्वघटिततया हेतुभेदेन भेदात् साधारणहेतुकस्थले तदप्रसिद्ध्याऽसंभवात् । शिरोमणिव्याख्यायां च तादृशव्याप्तेरप्रसिद्धत्वेपि तद्घटकपदार्थानां परस्परोपश्लेषावगाहिज्ञानविरोधितया एव निवेशेनानुपपत्त्यभावात् व्यापकसामानाधिकरण्यमिह व्याप्यत्वमित्युक्तत्वात् । एवमेतन्मते दुष्टलक्षणपर एवायं ग्रन्थो न तु दोषलक्षणपरोपि तादृशव्याप्तिद्वयशून्यत्वस्य व्यभिचारपदार्थत्वाभावादित्यवधेयम् ।

तच्चिन्त्यमिति । चिन्ताबीजं चासाधारण्यशरीरे तत्पुरुषीयनिश्चयनिवेशस्यावश्यकतया सामान्यलक्षणस्य तत्पुरुषविशेषनियन्त्रित्वापत्तिः । न चेष्टापत्तिः । तथासति साधारणहेतावप्यसाधारणहेताविवामुकं प्रत्ययं व्यभिचारीति व्यवहारप्रसङ्गात् । एवं सव्यभिचारपदस्य पारिभाषिकत्वमपि ।

इतरभेदानुमाने वैयर्थ्यसंभवे असाधकतानुमाने वैयर्थ्यपरतया व्यर्थविशेषणत्वादिति मूलव्याख्यानमनुचितमित्याशयेन इतरभेदानुमानवैयर्थ्यपरतयैव मूलं व्याचष्टे व्यर्थेतीति । विरोधादेरित्यादिना अवृत्तित्वपरिग्रहः । साध्याभावेत्यादीति । साध्याभावव्याप्तिग्रहविरोधित्वं वृत्तिमत्त्वग्रहाविरोधित्वं चेत्यर्थः । तस्य-विरोधादेः । पार्थक्ये-व्यभिचारपदार्थबहिर्भूतत्वे । प्रमाणाभावादिति । तथा च विरोधादावपि व्यभिचारपदार्थरूपपक्षे इतरभेदसत्त्वेन तद्व्यावर्तकविशेषणानवच्छिन्नस्यैवेतरभेदानुमापकत्वसंभवादिति भावः । हेत्वाभासपदस्यान्यथा व्याख्यानाद् दुष्टहेतुत्वरूपहेत्वाभासत्वस्य लक्षणाघटकत्वात् प्रथममित्यादिदूषणस्यासङ्गतिः । एवं गगनमनित्यं शा-

च्छदाश्रयत्वादित्यादौ हेतोः साध्याभावव्याप्यत्वेपि साध्याभावव्याप्ति-ग्रहविरोधिदर्शितधर्मवत्त्वं तत्राक्षतमेवेति तत्राव्याप्तिदानमप्यसङ्गत-मित्यतो यथाश्रुतार्थे तादृशदोषद्वयं सङ्गमयति प्रथममिति ॥

(चि०) नापि सपक्षविपक्षगतसर्वसपक्षविपक्षव्यावृत्तान्यतरत्वम् ,व्यर्थविशेषणत्वात् अनुपसंहार्य्यव्याप्तेश्च । किञ्च पक्षातिरिक्तसाध्यवतः सपक्षत्वे प्रमेयत्वेनाभेदसाधनेऽनुपसंहार्य्येऽव्याप्तिः-पक्षातिरिक्तसाध्यवतोऽप्रसिद्धेः । साध्यवतः सपक्षत्वे विवक्षितेऽप्रसिद्धिः-वृत्तिमतो धर्म्मस्य साध्यवद्विपक्षान्यतरवृत्तित्वनियमात् । नापि पक्षातिरिक्तसाध्यवन्मात्रवृत्त्यन्यत्वे सति पक्षातिरिक्तसाध्याभाववन्मात्रवृत्तिभिन्नत्वम् , अनुपसंहार्यव्याप्तेः धूमादावतिव्याप्तेश्च तस्य पक्षे साध्यवति वृत्तेः । नापि पक्षवृत्तित्वे विरुद्धान्यत्वे च सत्यनुमित्यौपयिकसम्बन्धशून्यत्वम् । व्यर्थविशेषणत्वात् । एतेनानुगतं सर्व्वमेव लक्षणं प्रत्युक्तम् । प्रत्येकमेव दूषणत्वात् उद्भावने वादिनिवृत्तेश्च ॥

(दी०) नापीत्यादि । सपक्षविपक्षत्वावच्छिन्नव्यावृत्तत्वं सर्वतद्व्यावृत्तत्वम् । व्यर्थेति । सपक्षवृत्तित्वविपक्षव्यावृत्तत्वयोर्दूषकतायामनुपयोगादिति भावः । पक्षातिरिक्तेत्यादि । व्याप्यविरुद्धयोरसाधारणयोः सङ्ग्रहाय पक्षातिरिक्तपदं । पक्षत्वं सन्दिग्धसाध्यकत्वम् । धूमेत्यादिदूषणं यथाश्रुते न तु सप्तमीसमासात् पक्षातिरिक्ते वर्त्तते यत्साध्यवन्मात्रवृत्ति साध्याभाववन्मात्रवृत्ति च तद्भिन्नत्वमित्यर्थे इति ध्येयम् । पक्षवृत्तीत्यादि । विरोधः साध्यासामानाधिकरण्यम् । पक्षवृत्तित्वसामानाधिकरण्यग्रहाविरोधी योऽनुमितेरौपयिकस्य जनकज्ञानविषयस्य सम्बन्धस्य सपक्षसत्त्वादे-

रभावस्तद्वत्त्वमित्यर्थः । सपक्षविपक्षव्यावृत्तत्वस्य चासाधारण्यस्य असाधारण्यनिश्चये पक्षे साध्यसामानाधिकरण्यसन्देहान्न तस्य तज्ज्ञानविरोधित्वम् ।

पक्षवृत्तौ विरुद्धभिन्ने च वर्त्तते यस्तादृशोऽभावस्तद्वत्त्वमर्थ इति केचित् ॥

(गा०) एकमात्रसपक्षविपक्षस्थले सर्वसपक्षाद्यप्रसिद्धिरित्याशंकां व्याचष्टे सपक्षेति । सपक्षवृत्तित्वत्वावच्छिन्नाभावो विपक्षवृत्तित्वत्वावच्छिन्नाभावश्चेत्यर्थः । सर्वतद्व्यावृत्तत्वं सर्वसपक्षविपक्षव्यावृत्तत्वपदार्थः । तावतैव यत्किञ्चित्सपक्षविपक्षव्यावृत्तयोर्व्याप्यविरुद्धयोर्नातिव्याप्त्यवकाश इति भावः । सपक्षगतत्वविपक्षव्यावृत्तत्वयोर्विशेषणयोर्विरुद्धातिव्याप्तिवारकतया सार्थक्यं संभवत्यवेत्याशङ्क्य दूषकतानुपयोगित्वरूपवैयर्थ्यपरतां व्यर्थविशेषणत्वादिति मूलस्याह सपक्षेति । व्याप्यविरुद्धयोरिति । शब्दोऽनित्यः शब्दत्वादित्यादौ व्याप्यस्य हेतोः साध्यवन्मात्रवृत्तित्वेपि पक्षेपि वृत्तेः पक्षातिरिक्तसाध्यवन्मात्रवृत्त्यन्यत्वमक्षतमेव । एवं शब्दो नित्यः शब्दत्वादित्यत्र विरुद्धस्य हेतोः साध्याभाववन्मात्रवृत्तित्वेपि पक्षेपि वृत्तेः पक्षातिरिक्तसाध्याभाववन्मात्रवृत्त्यन्यत्वमक्षतमेवेति द्वयोः संग्रह एवेति भावः । पक्षातिरिक्तेत्यत्र पक्षपदस्य तद्धर्मिमात्रपरत्वे पक्षे साध्यतदभावान्यतरनिश्चयदशायां शब्दोऽनित्यः शब्दत्वादित्यादावतिव्याप्तिः, सिद्ध्यभावरूपपक्षताविशिष्टपरत्वे पक्षे सिद्धिदशायां तत्र विशिष्टातिरिक्तत्वसत्त्वोपगमात् अतिरिक्तान्तस्य पक्षताशून्यपरत्वोपगमाद्वा अतिप्रसङ्गवारणसंभवेपि शब्दोऽनित्यः शब्दत्वादित्यादौ बाधनिश्चयदशायामतिप्रसङ्गो दुर्वार एव, सिद्धिबाधान्यतराभावरूपपक्षताविवक्षणे च गौरवमतः संशयरूपपक्षतापरतया व्याचष्टे पक्षत्वमिति । सन्दिग्धसाध्यकत्वं विषयतासम्बन्धेन साध्यसन्देहविशिष्टत्वम् । कालान्तरीणसंशयविषयेपि संशयरूपविशेषणासत्त्वदशायां तद्विशिष्टभेद उपगम्यते । अतिरिक्तान्तं वा पक्षताशून्यपरमतः साध्यादिनिश्चयदशायां नातिप्रसङ्गः । यदा पक्षे साध्यतदभावयोर्न निश्चयो नापि संशयस्तदा शब्दोऽनित्यः शब्दत्वादित्यादेर्नासाधारणता किन्तु यथायथं सद्धेतुत्वं विरुद्धत्वं चेति नाव्याप्तिप्रसङ्ग इति भावः ।

पक्षातिरिक्तवृत्ति यत्साध्यतदभाववन्मात्रवृत्ति तदन्यत्वार्थकत्वे वह्निमान्धूमादित्यादौ नातिव्याप्तिसंभवः भेदप्रतियोगितावच्छेदकघटकदलद्वयस्यैव तत्र सत्त्वेन विशिष्टभेदासत्त्वादतः पक्षातिरिक्तत्वस्य साध्यादिमद्विशेषणत्वाभिप्रायकतया मूलं सङ्गमयति धूमेत्यादीति। यथाश्रुते–पक्षातिरिक्तो यः साध्यादिमांस्तन्मात्रवृत्तिभिन्नत्वमित्यर्थे, सप्तमीसमासादित्यर्थे न तु दूषणमिति योजना। सप्तमीसमासलभ्ये तादृशार्थे न दूषणमित्यर्थः।

ह्रदो धूमवान् वह्नेरित्यादिसाधारणे शब्दो नित्यः शब्दत्वादित्यसाधारणे च यथाश्रुतलक्षणस्याव्याप्तिरतो व्याचष्टे पक्षवृत्तीत्यादीति। पक्षवृत्तित्वस्य साध्यसामानाधिकरण्यस्य च यो ग्रहस्तदविरोधीत्यर्थः। अनुमित्यौपयिकस्येति समासेन लिखनं जनकज्ञानविषयेत्यस्य समुदायव्याख्यानतायामेव संभवतीत्यतो व्यासेन लिखनम्। सपक्षसत्त्वादेर्नानुमितिजनकत्वमपि तु तज्ज्ञानस्यैवेत्यौपयिकपदस्य जनकतार्थत्वं न संभवतीति तद्व्याचष्टे जनकज्ञानविषयस्येति। नन्वत्रासाधारण्येऽव्याप्तिः तस्य सपक्षव्यावृत्तत्वघटिततया साध्यवद्वृत्तित्वग्रहविरोधित्वादित्यत आह सपक्षविपक्षव्यावृत्तत्वस्य चेति। चस्त्वर्थे। सपक्षत्वं–निश्चितसाध्यवत्त्वम्। पक्षे–पक्षान्तर्भावेण। तस्य–असाधारण्यस्य। तज्ज्ञानविरोधित्वं–साध्यसामानाधिकरण्यज्ञानविरोधित्वम्। साध्यवद्वृत्तित्वसामान्याभावज्ञानमेव साध्यसामानाधिकरण्यसामान्यज्ञानविरोधि न तु तद्विशेषाभावात्मकसपक्षव्यावृत्तत्वज्ञानमपीति भावः।

अथात्र विरुद्धहेतवो यद्यलक्ष्याः तदा सपक्षवृत्तित्वाद्यभावादिकमादाय सर्वेषु तेष्वतिव्याप्तिः, तेषां लक्ष्यत्वे साध्यसामानाधिकरण्यग्रहाविरोधित्वोपादानमनर्थकमेवेति चेन्न।

दुष्टहेतुलक्षणे विरुद्धा लक्ष्या एव, उक्तविशेषणोपादानं च दोषलक्षणे विरोधातिव्याप्तिवारणायैव। सपक्षविपक्षव्यावृत्तत्वस्यासाधारण्यस्येत्यत्र विपक्षपदं संपातायातमेवेत्यवधेयम्।

अत्र च यद्रूपविशिष्टविषयकत्वेनानुमितिजनकता तद्रूपावच्छिन्नाभावोऽवश्यं विवक्षणीयः, अन्यथा सपक्षसत्त्वादेर्द्वित्वाद्यवच्छिन्नाभावमादायातिप्रसङ्गापातात्। एवं च निश्चितसाध्यवद्वृत्तित्वावच्छिन्नाभावासंग्रहः। निश्चयांशज्ञानस्यानुमित्यहेतुतया तद्घटितता·

दृशधर्मविशिष्टविषयतावत्त्वेनानुमितिजनकत्वाभावात् । येन केनापि रूपेण यद्रूपाश्रयानिरूपितविषयतावत्त्वेन जनकता तद्रूपावच्छिन्नाभावविवक्षणे च ह्रित्वावच्छिन्नाभाववारणमशक्यमेवेति दूषणमशक्यसमाधानमित्यवधेयम् ।

उपदर्शितसाधारणासाधारणयोः संग्रहाय मिश्रा अन्यथैवैतल्लक्षणं व्याचख्युः तदुपन्यस्यति पक्षवृत्ताविति । पक्षावृत्तित्वं न पक्षवृत्तौ विरोधश्च न विरुद्धभिन्ने वर्तते इति न पर्वतो वह्निमान्महानसत्वात् ह्रदो वह्निमान् ह्रदत्वाद्वा इत्याद्योः स्वरूपासिद्धविरुद्धयोरतिव्याप्तिः । सपक्षविपक्षवृत्तित्वं तद्व्यावृत्तत्वं च पक्षवृत्तौ विरुद्धभिन्ने च वर्तत इति तदादाय उपदर्शितसाधारणासाधारणयोः संग्रहः । एतत्कल्पेपि पूर्ववद्विरुद्धा लक्ष्या एव विरोधस्य व्यभिचारतावारणायैव विरुद्धान्यवृत्तित्वोपादानमित्यवधेयम् ।

अत्र च हेतुतावच्छेदकसम्बन्धेन पक्षवृत्तित्वविवक्षणमावश्यककम् । अन्यथा हेतुतावच्छेदकसबन्धेन पक्षावृत्तेरपि येन केनापि सम्बन्धेन पक्षवृत्तितया स्वरूपासिद्धेरपि पक्षवृत्तितया तद्वारणासंभवात् । एवं च हेतुतावच्छेदकसंबन्धेन पक्षवृत्तित्वं यत्राप्रसिद्धं तादृशव्यभिचारिण्यव्याप्तिः । एवं गगने साध्यनिश्चयदशायां घटः शब्दवान् घटत्वादित्यादावसाधारणेऽव्याप्तिः । सपक्षव्यावृत्तत्वस्य विरुद्ध एव वर्तमानत्वादित्यस्वरसः केचिदित्यनेन सूचितः ॥

इति गादाधर्यां सव्यभिचारलक्षणपूर्वपक्षग्रन्थः ॥

(चि०) उच्यते । उभयकोट्युपस्थापकतावच्छेदकरूपवत्त्वं तत्त्वम् । तच्च साधारणत्वादि ।

(दी०) पूर्वोक्तलक्षणानां यथोक्तरीत्या यथामतं नाव्याप्त्यादिसम्भावना परन्तु तज्ज्ञानस्यानुमित्यप्रतिबन्धकतया तेषां हेत्वाभासताच्छेदकत्वं न घटते, न घटतां किन्तेन, तेषां हेत्वाभासविभागमात्रोपयोगित्वादित्याशयेनाह उच्यत इति । सन्देहं प्रत्येव साधारण्यादिविशिष्टधर्म्मवद्धर्मिज्ञानत्वेन हेतुना तज्जनककोटिद्वयोपस्थितिं प्रति तु तादृशधर्म्मज्ञानत्वमात्रेणेत्यभिप्रेत्याह उभये-

ति। साध्यसन्देहजनकेति प्रकृतम् ॥

(गा●) ननु पूर्वपक्षग्रन्थोक्तलक्षणावलम्बनेन सिद्धान्तप्रणयनमसङ्गतं तत्तद्दोषाणां जागरूकत्वादित्याशङ्कां निराकरोति पूर्वोक्तेति । यथामतमिति । यद्यन्मतमालम्ब्य यद्यल्लक्षणमभिहितं तत्तन्मते तत्र नाव्याप्तिसम्भावनेत्यर्थः। तत्र साधारण्यस्यासाधारण्यस्य च संशायकतामते प्रथमलक्षणं व्याप्तिग्रहादिविरोधितामते च तादृशविरोधिताघटितलक्षणम्। तेन विरोधित्वघटितलक्षणलक्ष्ये विरुद्धे संशयप्रयोजकस्य सपक्षवृत्तित्वघटितसाधारण्यस्य विपक्षव्यावृत्तत्वघटितासाधारण्यस्य च विरहेऽपि प्रथमलक्षणस्य नाव्याप्तिः प्रथमलक्षणालक्ष्ये तत्र च विरोधिताघटितलक्षणस्य वा नातिव्याप्तिरिति भावः। तेषां–कोटिद्वयोपस्थापकतावच्छेदकत्वादिरूपानुगतधर्मावच्छिन्नानां तादृशरूपाद्यात्मकलक्षणानाम्, हेत्वाभासतावच्छेदकत्वम्–अनुमितिप्रतिबन्धकतायामवच्छेदकत्वम्। विभागमात्रेति। मात्रपदेन दुष्टव्यवहारव्यवच्छेदः, दुष्टव्यवहारनियामकोऽनुमितिप्रतिबन्धकतावच्छेदकधर्म एव विभाजक इति नियमे मानाभावादिति भावः।

नन्वत्र लक्षणे पक्षधर्मतापदानुपादानान्नित्यत्वादिसाध्यकस्थले कोटिद्वयोपस्थापकसाधारणधर्मवत्ताज्ञानविषयीभूते द्व्यणुकादौ अतिव्याप्तिरित्याशंकां निराचिकीर्षुरभिप्रायं वर्णयति सन्देहमित्यादिना। एवकारेण कोट्युपस्थितौ तादृशरूपेण हेतुताव्यवच्छेदः। तादृशधर्मेति। साधारण्यादिविशिष्टधर्मेत्यर्थः। मात्रपदेन धर्मिविषयकत्वस्य कोटिद्वयोपस्थितिजनकतावच्छेदकत्वव्यवच्छेदः। तथाच कोटिद्वयोपस्थितिजनकतावच्छेदकीभूता या विषयता तदवच्छेकधर्मवत्त्वं नोक्तस्थले द्व्यणुकादौ अणुत्वादिविषयताया एव तथात्वादिति न तत्रातिव्याप्तिरिति भावः।

अथैतन्मते संशयं प्रति साधारणधर्मवद्धर्मिज्ञानत्वेन हेतुताया आधिक्याद्गौरवमिति चेन्न। भवन्मतेऽपि कोटिद्वयोपस्थितिं प्रति तेन रूपेण हेतुताया आधिक्यात्। सम्बन्धिहस्त्यादिविशेष्यकज्ञानाद्धस्तिपकादिस्मृतेरिव तत्कोटिसहचरितधर्मविशेष्यकज्ञानादपि तत्कोटिस्मृतेर्निर्विवादतया साधारणधर्मविषयकज्ञानत्वेन कोट्युपस्थितिहे-

तुताया उभयवादिसिद्धत्वात्तस्माकोट्युपस्थितौ साधारणधर्मवद्धर्मिज्ञानत्वेन संशयं प्रति च साधारणधर्मवद्धर्मिज्ञानजन्यकोट्युपस्थितित्वेन हेतुत्वमिति पूर्वपक्षलक्षणोपष्टंभकमतापेक्षया संशयं प्रति साधारणधर्मवद्धर्मिज्ञानत्वेन साधारणधर्मज्ञानजन्यकोट्युपस्थितित्वेन च हेतुतामतमेव सयुक्तिकम् ।

अथास्तु कोट्युपस्थितौ साधारणधर्मज्ञानत्वेनैव हेतुता तथापि संशये धर्मिभाननियमाय तत्र साधारणधर्मवद्धर्मिज्ञानत्वेन हेतुत्वमफल कोट्युपस्थितेः संशयहेतुतायां साधारणधर्मज्ञानजन्यत्वनिवेशस्थाने साधारणधर्मवद्धर्मिज्ञानजन्यत्वनिवेशनादेव तन्नियमोपपत्तेः स्वतन्त्रकारणताकल्पनापेक्षया क्लृप्तकारणतायामवच्छेदकगौरवस्यैवोचितत्वात् । न च धर्मिज्ञानस्य संशये साक्षाद्धेतुताया अपि क्लृप्तत्वात्तत्र साधारणधर्मप्रकारकत्वमात्रं निवेश्यत इति नास्माकमपि स्वतन्त्रकारणताकल्पनम्, मानसेऽपि च विप्रतिपत्तिवाक्याधीनसंशये कोट्योरिव धर्मिणोऽपि पदजन्यैवोपस्थितिः कारणमिति पदजन्यत्वेन धर्मिज्ञानस्य विप्रतिपत्तिवाक्याधीनसंशये पृथक् कारणताया आवश्यकत्वात्तदन्यसंशयकारणतायां साधारणधर्मादिविषयकत्वान्तर्भावे बाधकाभावादिति वाच्यम् । संशये साधारणासाधारणधर्मवद्धर्मिज्ञानत्वेन हेतुताद्वयस्य तादृशतादृशधर्मज्ञानजन्यकोट्युपस्थितित्वेन हेतुताद्वयस्य च कल्पनापेक्षया तादृशतादृशधर्मविषयकत्वमनन्तर्भाव्य धर्मिज्ञानत्वेन हेतुतायास्तादृशतादृशधर्मवद्धर्मिज्ञानजन्यकोट्युपस्थितित्वेन च हेतुताद्वयस्य च कल्पने स्फुटतरं लाघवात् ।

मैवम् । कोट्युपस्थितिकारणतायां तत्तत्कोटिसहचरितधर्मवद्धर्मिविशेषविषयकज्ञानजन्यत्वनिवेशे धर्मिभेदेन गुरुधर्मावच्छिन्नकारणताया आनन्त्यापत्तेस्तदपेक्षया धर्मिविशेषमनन्तर्भाव्य तत्तत्कोटिसहचरितधर्मज्ञानजन्यकोट्युपस्थितित्वेन धर्मिविशेषमन्तर्भाव्य साधारणधर्मवद्धर्मिविशेषज्ञानत्वेन लघुशरीरेण हेतुत्वस्य च कल्पयितुं युक्तत्वात् । न चोपस्थितिकारणतावच्छेदकशरीरे धर्मिणोऽनन्तर्भावेपि कार्यतावच्छेदकीभूतसंशयत्वस्य धर्मिविषयताघटितत्वात् कोट्युपस्थितधर्मिभेदेन कारणताभेद आवश्यक इति वाच्यम् । संशयत्वशरीरे धर्मिविशेषविषयताया विशेष्यतात्वेन किञ्चिद्धर्मावच्छिन्नविशेष्यतात्वेनैव वा सामान्यतो निवेशनीयतया धर्मिभेदेन कार-

णताभेदानावश्यकत्वादिति दिक् ।

पूर्वलक्षणोक्तातिप्रसङ्गवारणाय साध्यसन्देहजनकत्वस्य कोट्युपस्थितिविशेषणताया आवश्यकत्वादत्र तदुपस्थापकपदानुपादाननिबन्धनं तदनिवेशभ्रमं निराकुरुते साध्यसन्देहेति । प्रकृतं—प्रकरणवशात्सामान्यशब्दस्य विशेषपरतया प्राप्तम् । तथा च साध्यसन्देहजनिका या साध्योपस्थितिस्तज्जनकतावच्छेदिका सती तथाविधसाध्याभावोपस्थितिजनकतावच्छेदकीभूता या विषयता तदवच्छेदकतापर्याप्त्यधिकरणधर्मवत्त्वं तत्त्वमिति पूर्वोक्तदिशा लक्षणार्थो निष्कर्षयितव्यः । वह्निसाहचर्यवह्न्यभाववद्व्यावृत्तत्वावच्छिन्नधूमादिविषयतायाः पूर्वोपदर्शितरीत्या तथाविधसाध्याभावोपस्थितिजनकतावच्छेदकत्वेपि तामादायातिप्रसङ्गः पूर्ववदेव वारणीयः । समवायादिघटितसाधारण्यमादाय संयोगादिना धूमादेर्वह्न्यादिसाध्यकसव्यभिचारतावारणाय प्रकृतसम्बन्धेन यत्साध्यवद्वृत्तित्वं साध्याभाववद्वृत्तित्वं च तद्घटितत्वेन विषयतावच्छेदकधर्मो विवक्षणीयः असाधारण्यशरीरेपि अभावप्रतियोगितया साध्यादिमद्वृत्तित्वनिवेशान्न तदसंग्रहः ॥

(दी०) यथाकथञ्चित् कोटिद्वयोपस्थितिः स्मृत्यनुभवसाधारणी सन्देहजननी नियामकन्तु साधारण्यादिविशिष्टधर्मवत्ताज्ञानम्, अत एव धारावाही सन्देह इति मते तु धर्मितावच्छेदकविशिष्टे धर्मिणि यद्रूपविशिष्टज्ञानं साध्यसन्देहजनकं तद्रूपवत्त्वमेव वक्तव्यम् । कोटिद्वयसहचरितत्वादिना ज्ञातस्य ऊर्द्धत्वादेरूर्द्धत्वत्वादिना धर्मिणि ज्ञानमेव संशयजनकं न तु तदानीं साहचर्यज्ञानमपेक्षत इति नये तु यद्रूपविशिष्टत्वेन गृहीतस्य धर्मस्य धर्मिवृत्तिताज्ञानं तथा तद्रूपवत्त्वमेव वाच्यम् । तच्चेति ॥

(गा०) साधारणधर्मवद्धर्मिज्ञानसत्त्वे उद्बोधकान्तराधीनकोटिस्मरणादनुभवात्मककोट्युपस्थितेर्वा संशयोपगमे क्षतिविरहात् । विशेषणज्ञानादिमुद्रया कोट्युपस्थितिहेतुतयैवोपपत्तेः साधारणधर्मज्ञानजन्यकोट्युपस्थितित्वे स्वतन्त्रहेतुताकल्पनमनर्थकमिति व्याख्यातकल्पे साध्यसन्देहजनकत्वरूपकोट्युपस्थितिविशेषणस्याव्यावर्त्तकतया विलक्षणजनकताश्रयासत्त्वेन निवेशनासंभवादुक्तातिप्रसङ्गो दुर्वार

एवेत्यभिप्रेत्य तादृशनिष्कृष्टमते प्रकारान्तरेण व्याचष्टे यथाकथंचिदिति । साधारणधर्मज्ञानजन्या तदजन्या चेत्यर्थः । विशेषणज्ञानादिमुद्रया कल्प्तकारणताऽत एव निर्वाहो न तु स्वातन्त्र्येण तद्धेतुत्वमिति सूचयितुं स्मृत्यनुभवसाधारणीति । नन्वेवं साधारण्यादिविशिष्टधर्मवत्ताज्ञानशून्यकाले कथं न संशय इत्यत आह नियामकमिति । नियामकं—तादृशधर्मदर्शनदशायामेव संशय इति नियमनिर्वाहकम् । साधारण्यादीत्यस्य साक्षात्संशयहेतुभूतमित्यादिः । आदिपदादसाधारण्यपरिग्रहः । अत एव—अनुभवसाधारण्यादेः कोट्युपस्थितेर्हेतुत्वादेव । धारावाही सन्देहः—अविरलक्रमोत्पन्नसन्देहत्रितयादिकम् । साधारणधर्मज्ञानजन्यकोट्युपस्थितित्वेन संशयहेतुत्वे स्मरणात्मककोट्युपस्थितेरेव तथात्वात् । साधारणधर्मविषयकतथाविधएककोट्युपस्थित्या संशयद्वयजननसम्भवेऽपि संशयान्तरोत्पत्तौ तथाविधस्मृत्यात्मकोपस्थित्यन्तरस्यापेक्षणीयतापत्त्या अविरलपन्नसंशयत्रितयादिकं नोपपद्यते एतन्मते तु संशयात्मककोट्युपस्थितेरपि संशयान्तरोत्पादसम्भवेनान्तरा कोटिस्मरणानपेक्षणात्साधारणधर्मवद्धर्मिविषयकद्वितीयादिसंशयात्तदग्रिमक्षणेषु संशयान्तरोत्पादे बाधकाभावः । न चास्मन्मतेऽपि संशयात्मककोटिज्ञानस्यापि साधारणधर्मज्ञानजन्यतयान्तरा कोटिस्मृतिं विनैव संशयान्तरोत्पादः सम्भवतीति वाच्यम् । अवच्छेदकभेदभिन्नयोः स्मृतिसंशयनिष्ठतादृशज्ञानजन्यतयोरननुगततया स्मृतिनिष्ठजन्यताया एव निवेशनीयतया स्मरणापेक्षाया आवश्यकत्वादिति भावः । स्वसामानाधिकरण्यावच्छिन्नस्वाव्यवहितोत्तरत्वसम्बन्धेन साधारणधर्मज्ञानविशिष्टोपस्थितित्वेन हेतुत्वोपगमे तु संशयादपि संशयः सम्भवतीति गौरवमेवोपस्थितेः स्वतन्त्रहेतुतायां बाधकमित्यवधेयम् ॥

धर्मितावच्छेदकेति । धूमवान्पर्वतो वह्निमान्न वेति संशये धर्मितावच्छेदकप्रकारकज्ञानमुद्रया पर्वतत्वाद्यवच्छिन्नविशेष्यकधूमत्वादिविशिष्टवत्ताज्ञानस्य जनकतया धूमादिमत्त्वमादायातिप्रसङ्गवारणाय धर्मितावच्छेदकविशिष्टेति । धर्मितावच्छेदकपदं फलीभूतसंशयधर्मितावच्छेदकतापर्याप्त्यधिकरणधर्मपरम् । अन्यथा पर्वतत्वादिरूपदर्शितसंशयधर्मितावच्छेदकघटकतया उक्तातिप्रसङ्गवारणासम्भवात् । एवं च तद्धर्मपर्याप्तधर्मितावच्छेदकताकयत्कि-

ञ्चित्संशयनिरूपितायां जनकतायामवच्छेदकीभूता या तद्धर्मिनिष्ठधर्मितावच्छेदकतानिरूपकप्रकारता तन्निरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मवत्त्वमिति प्राङ्निरुक्तार्थः पर्यवसितः। तेन सत्तावान् जातेरित्यादौ सत्ताभाववत्समवेतत्वाप्रसिद्ध्या यद्रूपपदेन सत्तावत्समवेतत्वमात्रोपादानसंभवेनातिव्याप्तिरिति परास्तम्। वक्तव्यं-व्याख्येयम्। एवं च मूलस्थमुभयकोट्युपस्थापकपदं संशायकपदमित्यभिप्रायः। मूलमुपेक्ष्य निष्कृष्टमते स्वातन्त्र्येणैव तल्लक्षणमिति केचित्।

प्राचीनास्तु साधारण्याद्यवच्छिन्नप्रकारताशालिज्ञानत्वेन न संशयजनकता पुरुषत्वतदभावसहचरितत्वेन यदा कदाचिज् ज्ञातस्योर्द्ध्वत्वादेरूर्द्ध्वत्वत्वादिमात्रेण धर्मिणि ज्ञानादप्ययं पुरुषो न वेति संशयात्, किन्त्वनुद्बुद्धसंस्कारान्यसाधारण्यादिप्रकारकविशिष्टधर्मिज्ञानत्वेनैव, साधारण्यादिप्रकारकत्वं च संस्कारज्ञानसाधारणम्, अतस्तत्प्रकारकज्ञानासत्त्वेऽपि तज्जन्यतथाविधसंस्कारविशिष्टोर्द्ध्वत्वादिज्ञानात्संशयनिर्वाहः। वैशिष्ट्यं च स्वविशेष्यतावच्छेदकावच्छिन्नप्रकारताकत्वसामानाधिकरण्योभयसम्बन्धेन। अत एकधर्मावच्छिन्नविशेष्यकसाधारण्यादिप्रकारकज्ञानादिसहितात् अपरधर्मावच्छिन्नप्रकारकधर्मिज्ञानान्न संशयः ईदृशापत्तिवारणायैव एकविशिष्टापरस्य हेतुता स्वीक्रियते न तूभयोः पृथक्कारणता, एकाविशिष्टापरत्वेन हेतुत्वे विशेष्यविशेषणभावे विनिगमनाविरहेण कारणताद्वयमाश्रम्, पृथक् कारणतामते तु एकधर्मावच्छिन्नविशेष्यकसाधारण्यादिप्रकारकज्ञानादिसहितादन्यधर्मावच्छिन्नप्रकारकधर्मिज्ञानात्संशयापत्तेः। तत्तद्धर्मावच्छिन्नविशेष्यकसाधारण्यादिप्रकारकत्वेन तत्तद्धर्मावच्छिन्नप्रकारकधर्मिज्ञानत्वेन च हेतुताकल्पनमन्तरेण दुर्वारतया तादृशहेतुतास्वीकारे ऊर्द्ध्वत्वत्वादिरूपविषयतावच्छेदकानन्तधर्मभेदेन हेतुताया आनन्त्यं स्यादिति वदन्ति।

तन्मते यथाव्याख्यातलक्षणे शुद्धधूमत्वावच्छिन्नप्रकारताया अपि वह्न्यादिसन्देहजनकतावच्छेदकत्वात् शुद्धधूमत्वादिकमादायातिप्रसङ्गवारणमशक्यमिति तन्मते कल्पान्तरमाह कोटिद्वयेति। ऊर्द्ध्वत्वत्वादिनेत्यस्य केवलेत्यादिः। तदानीं–संशयप्राक्काले। यद्रूपेति। यद्रूपावच्छिन्नविषयकविशिष्टत्वेन यत्किञ्चित्संशयजनकता त-

रूपवत्त्वमित्यर्थः । यत्किञ्चित्संशयजनकतावच्छेदकतावच्छेदकत्वनिरूपिता या निरूपकत्वसंसर्गावच्छिन्नावच्छेदकता तदवच्छेदकतापर्याप्त्यधिकरणधर्मवत्त्वम्, यत्किञ्चित्संशयजनकतावच्छेदकवैशिष्ट्यघटकविशेष्यतानिरूपितप्रकारतापर्याप्त्यधिकरणधर्मवत्त्वमिति वा पर्यवसितार्थः ॥

(चि०) विरुद्धान्यपक्षवृत्तित्वे सत्यनुमितिविरोधिसम्बन्धाव्यावृत्तिर्वा । तेनैव रूपेण ज्ञातस्य प्रतिबन्धकत्वात् परस्य तथैवोद्भावनाच्च लक्षणानुरोधेन प्रत्येकमेव हेत्वाभासत्वम् ॥

(दी०) ननु असाधारण्यं न साध्यतदभाववद्व्यावृत्तत्वम् वृत्तिमतस्तथात्वासम्भवात् एककोटिव्याप्यस्येव एककोटिमद्व्यावृत्तस्यापि धर्मस्य बुद्धेर्विशेषदर्शनतया संशयविरोधित्वाच्च। सत्प्रतिपक्षे च परामर्शाप्रामाण्यसंशयोत्तरमेव साध्यसन्देहात् । नापि निश्चितसाध्यतदभाववद्व्यावृत्तत्वम् । तद्धि यत्र यत्र साध्यादिमत्तानिश्चयस्तद्व्यावृत्तत्वम्, येन येन रूपेण यत्र यत्र तन्निश्चयस्तेन तेन तद्व्यावृत्तत्वं वा । आद्ये सर्व्वाणि साध्यव्याप्यवन्ति सर्व्वाणि वा साध्यवन्ति प्रमेयाणीत्यादिनिश्चये सामान्यतः पक्षेऽपि साध्यादिनिश्चयादतथात्वप्रसङ्गः । द्वितीये तु विशिष्य पक्षे साध्यनिश्चयं विनैव शब्दादिना साध्यव्याप्यत्वनिर्णयेऽपि तथात्वापत्तिः। नैष दोषो यादृशव्याप्तिग्रहे सति नासाधारण्यं तद्ग्रहाभावेन विशेषलक्षणस्य साधारण्याभावविशिष्टस्य तद्ग्रहस्य चाभावेन सामान्यलक्षणस्य विशेषणादतिव्याप्तिनिरासात् । विशिष्टाभावादेव च साधारण्ये व्याप्तिभ्रमदशायां नाव्याप्तिरिति चेत् । एवं सत्येकैकव्याप्तौ गृहीतायामसाधारणस्य न कञ्चिदपि प्रति सव्यभिचारित्वं स्यात्, स्याद्वा तदपि तत्तत्पुरुषघटितमसाधारण्यवत्, साध्यादिव्याप्यवत्त्वेन रूपेण साध्यादिमत्त्वनिश्चयेऽव्याप्तिप्रसङ्गाच्च । न हि

घटोऽनित्यो घटाद्व्यावृत्तं शब्दत्वमितिवत् अनित्यत्वव्याप्यवतो व्यावृत्तं शब्दत्वमिति तदानीं निश्चयः। अभिहितञ्च निश्चितसाध्यतदभाववद्व्यावृत्तत्वं न संशयप्रयोजकं किन्तु साध्यतदभावाभ्यां सहचरितत्वमिव तत्सहचरिताभावप्रतियोगित्वम्, व्याप्यविरुद्धयोस्तु तत्त्वेन निश्चितयोर्दर्शने विशेषदर्शनवशादेव न संशय इति विभाव्य लक्षणान्तरमाह विरुद्धान्येति। विशिष्टसाध्यहेतुसामानाधिकरण्यग्रहाविरोध्यर्थकमर्थतो विरोधिविशेषणम्, तेन साध्यसाधनयोरप्रसिद्धेरवृत्तित्वस्य परम्परासामानाधिकरण्यादीनाञ्च निरासः। पक्षपदञ्च धर्मिमात्रपरम्, तथाच यद्यद्धर्म्मिवृत्तित्वं हेतोर्ज्ञायते तत्र तत्रैवानुमितिविरोधि यद्रूपं तद्वत्त्वमित्यर्थः। साध्यव्यापकीभूताभावप्रतियोगित्वन्तु तथा, बाधप्रतिरोधौ तु धर्म्मिविशेषितत्वात् न तादृशौ। सर्वं साध्याभाववत् तद्व्याप्यवद्वेत्यादिकञ्च साध्यवत्त्वग्रहविरोधित्वेन सामानाधिकरण्यग्रहविरोधि। साध्यानुमितिसामान्यविरोधित्वं वा विशेषणम्। तेनैवेति। तेनानुमितिविरोधिना विपक्षवृत्तित्वादिना। एवकारेणानुगमकं रूपं व्यवच्छेद्य तस्य हेत्वाभासतावच्छेदकत्वं निरस्यति (हेत्वाभास)लक्षणानुरोधेनेति।

(गा०) तत्रेत्यादिमूलग्रन्थः साधारण्यासाधारण्यरूपसंशयप्रयोजकरूपमादाय लक्षणसङ्गमनपरः। तत्र यादृशासाधारण्यस्य संशयप्रयोजकत्वं विचारसहं तत्सद्धेतुसाधारणमिति दोषेण लक्षणान्तरमुत्थापयितुं तादृशग्रन्थं धारयति तत्रेत्यादीति। असाधारण्यं-संशयप्रयोजकीभूतासाधारण्यपदार्थः। वृत्तिमत इति। तथा च शब्दोऽनित्यः शब्दत्वादित्यादावसाधारणेऽव्याप्तिरिति भावः। ननु वृत्तिमतो नासाधारण्यमुपगन्तव्यं किन्त्ववृत्तेरेवेति नैतद्दोषावकाश इत्यत आह एककोटीति। व्याप्यस्य-व्याप्यतया गृहीतस्य, व्यावृत्तस्य-तद्वद्वृत्तित्वेन गृहीतस्य। एतेन एककोटिमद्व्यावृत्तस्यैककोटिव्याप्यताया आवश्यकत्वेऽपि न भेदघटितेयार्थासङ्गतिः।

तद्वद्वृत्तित्वं च न तदभावव्याप्यत्वं तच्छरीरे तदभावाभाववत्त्वेन तस्यानिवेशादित्यवधेयम् ।

विशेषदर्शनतया विरोधिधर्मदर्शनतया । संशयविरोधित्वादिति । पुरुषत्वाभावाभाववदवृत्तिशाखादिमानयमित्याकारकदशायामिव पुरुषावृत्तिशाखादिमानित्यादिनिश्चयदशायामपि पुरुषत्वादिविशिष्टबुद्ध्यनुत्पादस्य सर्वानुभवसिद्धत्वात्तद्विशिष्टबुद्धौ तद्वदवृत्तित्वेन गृहीतधर्मवत्ताज्ञानस्य प्रतिबन्धकताया आवश्यकत्वादिति भावः । तथा च निरुक्तासाधारण्यविशिष्टधर्मवत्ताज्ञानस्य संशयप्रतिबन्धकतया संशयजनकत्वासम्भवात् कथं तादृशासाधारण्यस्य संशयप्रयोजकता । न च तादृशज्ञानस्य संशयप्रतिबन्धकत्वेपि तज्जन्यकोट्युपस्थितेः संशयजनकत्वं सम्भवत्येतन्नाशानन्तरं तज्जन्यकोट्युपस्थित्या संशयजननसम्भवादसाधारणधर्मवद्धर्मिज्ञानस्यात एव बाधकात्साक्षाद्धेतुत्वासम्भवेन तज्जन्यकोट्युपस्थितित्वेन हेतुतायां गौरवस्याकिञ्चित्करत्वादिति तादृशकार्यकारणभावघटितलक्षणपरतयैव मूलं व्याख्येयमिति वाच्यम् । किन्त्वादिनाऽग्रे निर्वाच्यस्यासाधारण्यस्य बुद्धेः संशयाविरोधितया तज्ज्ञानस्यैव साक्षात्संशयजनकत्वसम्भवेन गौरवादुक्तरूपेण कोट्युपस्थितेरहेतुत्वात् कोटिस्मृतिजनकताघटितलक्षणस्यासम्भवात्संशयजनकताघटितलक्षणकरणे च तादृशासाधारण्यमादाय व्याप्यविरुद्धयोरतिव्याप्तेश्च ।

ननु सत्प्रतिपक्षसंवलनदशायामिव कोटिद्वयवद्व्यावृत्तधर्मवत्ताज्ञानदशायामपि संशयोत्पत्तिरनुभवसिद्धैवेति तदभावव्याप्यवत्ताज्ञानप्रतिबन्धकतायां तद्व्याप्यवत्ताज्ञानस्येव तत्कोटिमदवृत्तिधर्मवत्ताज्ञानप्रतिबन्धकतायामपि तदभाववदवृत्तिधर्मवत्ताज्ञानस्योत्तेजकत्वमगत्या कल्पनीयमिति कोटिद्वयवद्व्यावृत्तधर्मवत्ताज्ञानस्य संशायकत्वमव्याहतमेव येन रूपेण प्रतिबन्धकता तेनैव रूपेण जनकत्वानभ्युपगमादित्यत आह सत्प्रतिपक्षे चेति । विरोधिकोटिद्वयव्याप्यवत्ताज्ञानसमय इत्यर्थः । परामर्शप्रामाण्यसंशयेति । तथा च तुल्ययुक्त्या प्रकृतेपि तत्तत्कोटिमदवृत्तित्वविशिष्टवत्ताज्ञाने प्रामाण्यसंशयादेव संशयः स्वीक्रियत इति नैककोटिमद्व्यावृत्तधर्मवत्ताज्ञानप्रतिबन्धकतायामपरकोटिमद्व्यावृत्तधर्मवत्ताज्ञानस्योत्तेजकत्वं प्रामाणिकमप्रामाण्यज्ञानोत्तेजकतयैवोपपत्तेः । अप्रामाण्य-

ज्ञानानास्कन्दितस्यैवं च ज्ञानस्य जनकतया निरुक्तासाधारण्यस्य बुद्धेर्जनकत्वोपगमे प्रतिबन्धकतावच्छेदकरूपेणैव जनकताप्रसङ्ग इति भावः। निश्चितसाध्यतदभाववद्व्यावृत्तत्वमिति। असाधारण्यमित्यनुषज्यते। येन येन रूपेणेति। यद्यद्रूपं धर्मितावच्छेदकीकृत्येत्यर्थः। तेन तेन रूपेण तद्व्यावृत्तत्वं-तत्तद्धर्मविशिष्टतत्तद्धर्मिव्यावृत्तत्वम्। प्रमेयत्वादिसामानाधिकरण्येन घटादौ साध्यादिनिश्चयदशायामपि शब्दोऽनित्यः शब्दत्वादित्यादावसाधारण्यसत्त्वाद्धर्मिविशेषनिवेशः। प्रथमपक्षे वक्ष्यमाणाया निर्धर्मितावच्छेदककसाध्यनिश्चयविषयवृत्तिहेतोरसाधारण्यानुपपत्तेर्वारणाय घटत्वादिना साध्यादिनिश्चयदशायां रूपान्तरावच्छिन्नघटादिव्यावृत्तत्वज्ञानात्संशयापत्तिवारणाय च धर्मितावच्छेदकनिवेशः। साध्यव्याप्यवत्त्वेन पक्षातिरिक्तमात्रविषयकनिश्चयदशायामसाधारण्यानुपपत्त्यनवकाशात्पक्षस्यापि निश्चयविषयत्वमाविष्कर्तुं सर्वाणीति। सर्वपदेन सर्वत्वावच्छिन्नोद्देश्यताकबोधः केवलान्वयिसर्वत्वावच्छेदेन विधेयविषयक एव जन्यत इति तथाविधबोधस्यैव सर्वाणि साध्यवन्तीत्याकारकता, तथा च विशिष्य पक्षे साध्यनिश्चयदशायामिव साध्यसन्देहविरोधिनः सर्वाणि साध्यवन्तीति निश्चयस्य सत्त्वेऽप्यसाधारण्याभावस्येष्टत्वात्साध्यव्याप्यवन्तीति। तथा चैतादृशनिश्चयदशायां विशिष्य पक्षे साध्यसन्देहस्यानिवृत्तेस्तादृशनिश्चयस्य नासाधारण्यक्षतिकारकत्वमिति भावः। प्रथमपक्षे धर्मितावच्छेदकानिवेशात्सामान्यधर्मावच्छिन्नधर्मिकं विशिष्य संशयानिवर्तकं निर्णयमिव निर्द्धर्मितावच्छेदकतया अप्रसक्तसंशयनिवर्त्तकताकनिश्चयमादायापि दोषदानं सम्भवतीत्यभिप्रेत्याह सर्वाणि वेति। साध्यवत्त्वावच्छिन्ने सर्वत्वविधेयकस्य साध्यवन्ति सर्वाणीत्याकारकज्ञानस्य पक्षाविषयकस्यापि सम्भवात्सर्वसाध्यवदुद्देश्यकप्रमेयत्वविधेयकज्ञानानुधावनम्। तादृशज्ञानस्य वस्तुत्वव्यापकसर्वत्वावच्छेदेन साध्यवत्त्वानवगाहितया तत्सत्त्वं न पक्षे साध्यसन्देहनिवर्तकमिति तदानीमसाधारण्यमक्षतमेवेति भावः। आदिपदात् शब्दो नित्यः शब्दत्वादित्यादौ सर्वाणि साध्याभावव्याप्यवन्ति साध्याभाववन्तीत्यादिनिश्चयपरिग्रहः। साध्यादीत्यादिपदात्साध्याभावपरिग्रहः। अतथात्वं असाधारण्याभावः। द्वितीयपक्षे तत्तद्व्यक्तित्वरूपधर्मितावच्छेदक-

विवक्षणे प्रथमपक्षोक्तप्रथमदोषस्य द्वितीयदोषस्य च यथाश्रुतेऽप्यनवकाशात्तत्र दोषान्तरमाह द्वितीयं त्विति । विशिष्य धर्मितावच्छेदकप्रकारेण सामान्यतः पक्षे साध्यवत्तानिश्चयं विना पक्षमात्रवृत्तिहेतौ साध्यवद्वृत्तित्वघटितव्याप्तिनिश्चय एव न सम्भवतीत्यभिप्रेत्य एतदभिहितम् ।

अथवा विशिष्य विशेषधर्मं धर्मितावच्छेदकीकृत्य उक्तविवक्षणे सामान्यधर्मधर्मितावच्छेदककनिश्चयदशायामप्येतद्दोषस्य सम्भवात्तादृशस्थलसंग्रहाय विशेषधर्मस्य धर्मितावच्छेदकत्वानुसरणम् । विशेषलक्षणस्येति । विशेषणादित्यग्रिमेणान्वयः । वैशिष्ट्यं च सामानाधिकरण्यप्रत्यासत्त्या बोध्यम् । तदविशेषितस्यैव तस्य संशयप्रयोजकतया सव्यभिचारसामान्यलक्षणस्यातिव्याप्तिं वारयितुमाह साधारण्येति । एतच्च व्याप्तिग्रहदशायां साधारणसंग्रहाय । वैशिष्ट्यं विशेषणताविशेषविशेष्यतोभयघटितसामानाधिकरण्येन बोध्यम् । कंचिदपीति । व्याप्तिग्रहशून्यपुरुषं प्रत्यपीत्यर्थः ।

ननु तत्पुरुषीयव्याप्तिग्रहाभावः तत्पुरुषीयासाधारण्यशरीरे निवेशनीय इति नायं दोष इत्यत आह स्याच्चेति । तदपि-सामान्यव्यभिचारित्वमपि । तत्तत्पुरुषघटितमिति । तथाचासाधारण इव साधारणेऽपि पुरुषविशेषनियन्त्रितसव्यभिचारव्यवहारापत्तिर्धूमादौ साध्ये वह्न्यादिरमुकं प्रति व्यभिचारीति व्यवहाराभावेनापत्तेरयोगादिति भावः । यथाश्रुतैतत्कल्पे प्रथमपक्षीयप्रथमदोषमप्याह साध्यादीति । आदिपदात्साध्याभावपरिग्रहः ।

ननु तदानीमसाधारण्याभावेऽपि तद्भ्रमादेवानुमितिप्रतिबन्ध इति शंकानिराचिकीर्षया तद्भ्रमाभावमप्युपपादयति नहीति । तदानीं-पक्षे साध्यसन्देहदशायां. तदानीं तत्र तद्व्याप्यवत्तासंशयस्याप्यौचित्यावर्जितत्वात्तद्व्याप्यवद्वृत्तित्वस्यापि हेतौ संशयादिति भावः । एतेन उक्तस्थले लक्षणाव्याप्तिवत् असाधारण्यनिश्चयरूपकारणाभावेन संशयानुपपत्तिरपि द्रष्टव्या । उक्तविवक्षायामेतद्दोषानवकाशात्साधारणे पुरुषविशेषनियंत्रितसव्यभिचारव्यवहारे कदाचिदिष्टापत्तेः सम्भवाद्दोषान्तरमाह अभिहितं चेति । परेत्वित्यादिना अयं घट एतत्वादित्यादिपूर्वपक्षग्रन्थपंक्तिव्याख्यावसर इति शेषः । न संशयप्रयोजकमिति । तथाच तदादायासाधारणे न लक्षण-

संगमनसम्भवः । ननु तर्हि कीदृशमसाधारण्यं संशयप्रयोजकमत आह किंत्विति । तत्सहचरितेति । साध्यतदभावसहचरितेत्यर्थः । एतादृशासाधारण्यस्य च न हेतुदोषतासम्भवः सद्धेतुसाधारण्यात् अनुमितिप्रतिबन्धकज्ञानाविषयत्वेन दोषसामान्यलक्षणानाक्रान्तत्वाच्चेति भावः । ननु व्याप्यविरुद्धसाधारणस्यैतादृशधर्मस्य संशयप्रयोजकत्वे व्याप्त्यादिदर्शनादपि संशयापत्तिरित्यत आह व्याप्यविरुद्धयोरिति । व्याप्त्यादिग्रहशून्यकाले व्याप्त्यादिदर्शनस्य संशयाप्रतिबन्धकतया तत्त्वेन निश्चितयोरिति । व्याप्यत्वादिना अनिश्चितस्य व्याप्यादेर्निरुक्तरूपज्ञानात्संशय इष्ट एवेति भावः ।

विरुद्धान्यत्वस्य हेतुविशेषणत्वे असाधारणासंग्रहः, विरोधपदार्थे साध्यासामानाधिकरण्यत्वादिना निवेश्य तदन्यत्वेनानुमितिविरोधिविशेषणेपि साध्याप्रसिद्ध्यादिवारणासम्भव इत्यत आह विशिष्टेति । साध्यतावच्छेदकादिविशिष्टेत्यर्थः । एतदर्थः पूर्वपक्ष एव विवृतः । यथाश्रुतमूलतो धर्मिविशेषणताया एव लाभादर्थत इति । तात्पर्यबलत इत्यर्थः । विरोधिविशेषणम्—अनुमितिविरोधिविशेषणम् । अवृत्तित्वे परस्परासामानाधिकरण्ये च साध्यसाधनयोरित्यनुषज्यते । पक्षतानिवेशे प्रयोजनाभावादाह पक्षपदमिति । पक्षवृत्तित्वस्य धर्मिविशेषणत्वे स्वरूपासिद्धस्य व्यभिचारिणोऽसंग्रहप्रसङ्गः, हेतौ पक्षवृत्तित्वग्रहाविरोधित्वेन विरोधिविशेषणेपि बाधसत्प्रतिपक्षातिप्रसङ्गवारणमशक्यमेवेति पूर्ववत्पक्षवृत्तित्वे सत्यनुमितिविरोधिसम्बन्धाव्यावृत्तिरिति, दलद्वयेन व्याप्तिग्रहविरोधिधर्मवत्त्वस्य विवक्षणे च मणिकारमतसिद्धस्य साध्यव्यापकीभूताभावप्रतियोगित्वरूपासाधारण्यस्य संग्रहः, विशेषणान्तरं प्रक्षिप्य बाधादिवारणे च गौरवमित्यभिप्रेत्य पूर्वपक्षोक्तरीतिं परित्यज्य प्रकारान्तरेण बाधादिकं वारयितुमुक्तदलद्वयनिष्कृष्टार्थमाह तथाचेति । यद्धर्मीति । सधर्मितावच्छेदकहेतुमत्तानिश्चयकालीनयादृशविशिष्टविषयकनिश्चयसामान्यं स्वसमानकालीनहेतुमत्तानिश्चयसमानधर्मितावच्छेदककानुमितिसामान्यप्रतिबन्धकं तादृशधर्मवत्त्वमित्यर्थः । समूहालंबनात्मकस्योदासीनपदार्थविषयकनिश्चयस्याप्यनुमितिप्रतिबन्धकतावारणायोदासीनपदार्थाविषयकनिश्चयसामान्यस्यापि तद्विपरीतविषयकस·

मूहालम्बनात्मकप्रकृतानुमितिप्रतिबन्धकतया तत्रातिव्याप्तिवारणाय सामान्यपदद्वयम्। हेतुमत्ताज्ञानासमानकालीनस्य व्यभिचारनिर्णयस्य व्यभिचारनिश्चयसामान्यान्तर्गतस्य स्वसमानकालीनहेतुमत्ताज्ञानाप्रसिद्ध्या असंभवः स्यादिति प्रथमं कालीनान्तं निश्चयविशेषणम्। निर्धर्मितावच्छेदककहेतुमत्तानिश्चयकालीनव्यभिचारनिश्चयकालीनहेतुमत्ताज्ञानधर्मितावच्छेदकाप्रसिद्ध्या तद्दोषतादवस्थ्यमतो हेतुमत्ताज्ञाने सधर्मितावच्छेदककत्वविशेषणम्। अनुमितिसामान्यान्तर्गतायां स्वसमानकालीनहेतुमत्ताज्ञानासमानधर्मितावच्छेदककसाध्यानुमितौ हेतुतावच्छेदकावच्छिन्नस्य साध्यव्यापकीभूताभावप्रतियोगित्वज्ञानं न प्रतिबन्धकं नित्यत्वव्यापकीभूताभावप्रतियोगि शब्दत्वमित्यादिज्ञानदशायामयं नित्य इत्यादिज्ञानोत्पत्तावविवादादित्यसाधारण्याव्याप्तिरतः समानधर्मितावच्छेदकान्तमनुमितिविशेषणम्। तथा च इदन्त्वादिधर्मितावच्छेदककनित्यत्वादिविशिष्टबुद्धौ शब्दत्वादिधर्मिकनित्यत्वादिव्यापकीभूताभावप्रतियोगित्वरूपानित्यत्वीयव्यतिरेकव्याप्तिनिश्चयविशिष्टस्य तद्धर्मितावच्छेदककशब्दत्वादिमत्ताज्ञानस्य तदभावव्याप्यवत्ताज्ञानमुद्रया प्रतिबन्धकत्ववद्विशेषणविशेष्यभावे विनिगमनाविरहेण तादृशशब्दत्वादिमत्ताज्ञानविशिष्टस्य तथाविधव्याप्तिनिश्चयस्यापि प्रतिबन्धकतया तादृशहेतुमत्ताज्ञानसमानधर्मितावच्छेदककानुमितिसामान्यप्रतिबन्धकत्वं तथाविधासाधारण्यनिश्चयस्याक्षतमेवेत्यसाधारण्यसङ्ग्रहः। अनुमितिपदं साध्यव्याप्यो हेतुः साध्यवांश्च पक्ष इत्येतादृशसमूहालम्बनानुमितिपरम्, तेन साधारण्यज्ञानस्य साध्यवत्ताज्ञानाप्रतिबन्धकत्वेऽपि न तदसंग्रहः।

एतेनानुमितिविरोधित्वं यादृशविशिष्टविषयकनिश्चयत्वेनानुमितिप्रतिबन्धकत्वं तादृशत्वम् तत्र चावच्छेदकत्वं प्रागुक्तयुक्त्या अनतिरिक्तवृत्तित्वरूपमेव विवक्षणीम्, एवं च साध्यव्यापकीभूताभावप्रतियोगी हेतुरिति ज्ञानस्य हेतुमत्ताज्ञानासमानकालीनस्य साध्यवत्ताज्ञानाप्रतिबन्धकतया तादृशज्ञानविषयस्य निरुक्तलक्षणानाक्रान्तत्वेन नासाधारण्यस्वरूपतोपपद्यते पक्षवृत्तित्वविशेषितस्य तस्य च बाधादिवद्धर्मिविशेषघटितमूर्तिकतया नियतपक्षधर्मिकानुमितिविरोधित्वमेव न तु यत्र यत्र हेतुमत्त्वं ज्ञायते तत्तद्धर्मिकानुमितिसामान्यविरोधित्वमिति न तस्यापि तथात्वसम्भव इति परास्तम्।

यत्तु-हेतुमत्ताज्ञानमनिवेश्य तत्तद्धेतुधर्मिकसाध्यव्यापकीभूताभावप्रतियोगित्वनिश्चयत्वेनैव प्रतिबन्धकता, प्रतिबध्यतावच्छेदकं तु धर्मिविशेषविषयकत्वाघटितं तत्तद्धेतुमत्ताज्ञानजन्यानुमितित्वमतः शब्दत्वं नित्यत्वव्यापकीभूताभावप्रतियोगीतिनिश्चयसत्त्वे समानधर्मितावच्छेदककशब्दत्वनिश्चयस्य चासत्त्वे नित्यत्वाद्यनुमितेर्नानुपपत्तिः तदानीं हेत्वन्तरज्ञानेनैवानुमितिजननात्तस्याश्च शब्दत्वधर्मिकताद्दशाभावप्रतियोगित्वनिश्चयाप्रतिबध्यत्वात्, एवं च पक्षवृत्तित्वाविशेषितं निरुक्तरूपमेवासाधारण्यम्, लक्षणे अनुमितिपदस्य प्रकृतहेतुकानुमितिपरतया प्रकृतहेतुकानुमितिसामान्यविरोधित्वस्यानतिरिक्तवृत्तित्वरूपावच्छेदकत्वघटितस्यापि तत्र सत्त्वेन तदसंग्रहाप्रसक्तेरिति समाधानम्-तन्न मनोज्ञं विज्ञानाम्। शब्दत्वादिधर्मिकताद्दशप्रतियोगित्वनिश्चयस्य शब्दत्वादिहेतुमत्ताधीजन्यानुमितित्वावच्छिन्नं प्रति प्रतिबन्धकत्वं तादृशनिश्चयसहकृतशब्दत्वादिनिश्चयदशायां तत्समानधर्मितावच्छेदकताकशब्दबोधाद्यापत्तेरन्यहेतुकतादृशानुमित्यापत्तेश्च दुर्वारत्वात्। न चान्यहेतुकापि समानधर्मितावच्छेदकतद्धेतुमत्ताज्ञानकालीनानुमितिः तद्धेतुमत्ताज्ञानजन्यैवेति न तदापत्तिसम्भव इति वाच्यम्। व्याप्यत्वानवच्छिन्नहेतुप्रकारताशालिज्ञानस्यानुमितिजनकत्वे मानाभावात् अन्यलिङ्गकपरामर्शघटितसामग्र्या तत्तद्धर्मिकतादृशनिश्चयाभावस्यानन्तर्भावेन तद्बलादापत्तेः कथामात्रेण वारयितुमशक्यत्वाच्च। एतेन समानधर्मितावच्छेदककतद्धेतुमत्ताज्ञानानन्तरोत्पत्तिकत्वनिवेशेऽपि न निस्तार इत्यलमत्यावेशेन।

एतन्मये पक्षवृत्तित्वाविशेषितहेतुनिष्ठसाध्याभावीयान्वयव्याप्तेरप्यसाधारण्यमेवेति न तत्रातिव्याप्तिरित्यवधेयम्। तथा-निरुक्तानुमितिसामान्यविरोधि, धर्मिविशेषितत्वात्-धर्मिविशेषघटितत्वात्। न तादृशौ-न तादृशानुमितिसामान्यविरोधिनौ।

नन्वेवमपि सर्वमाकाशवत्प्रमेयत्वादित्यादिस्थलीयबाधप्रतिरोधयोरव्याप्तिः सर्वमाकाशाभाववदित्यादिनिश्चये क्वचिदप्याकाशाद्यनुमितेरनुदयादनुभवानुरोधेनासमानधर्मितावच्छेदककज्ञानेऽपि तत्प्रतिबन्धकत्वकल्पनात्तयोरनुमितिसामान्यविरोधित्वादिति अत आह सर्वमिति। इत्यादिकम्-इत्याकारकज्ञानविषयबाधादिकम्।

अग्रिमाविरोधिपदद्वयस्य प्रतिबन्धकत्वपरतया इत्यादिकमित्यस्य इत्याकारकज्ञानमित्येवार्थः । सामानाधिकरण्यग्रहाविरोधीति । साध्यसामानाधिकरण्यस्य साध्यवत्त्वघटितत्वादिति शेषः । तथा चाविरोध्यन्तेनैव तद्वारणमिति भावः । निर्द्धर्मितावच्छेदककस्य ज्ञानस्य बाधाद्यप्रतिबध्यत्वे साध्यसामानाधिकरण्यज्ञानस्य साध्यांशे निर्द्धर्मितावच्छेदकतया तदविरोधित्वमुक्तबाधादिरक्षणमेवेत्याशयेनाह अनुमितीति । व्यभिचारस्यापि प्रकृतसाध्यकप्रकृतहेतुकानुमितिविरोधित्वात् सामान्येति । तथा च तस्यान्यहेतुकानुमित्यविरोधित्वान्न तदसंग्रहः । उक्तबाधादेश्च सर्वहेतुकानुमितिविरोधित्वात्तद्वारणमिति भावः । यद्यपि शब्दत्वादिनिष्ठनित्यत्वव्यापकीभूताभावप्रतियोगित्वरूपासाधारण्यज्ञानमन्यलिङ्गकानुमितावपि तत्समानधर्मिकशब्दत्वादिमत्ताज्ञानविशिष्टं सत्प्रतिबन्धकमिति प्रकृतसाध्यकानुमितिसामान्याविरोध्येवासाधारण्यम्, तथापि ज्ञानान्तरवैशिष्ट्याविशेषितज्ञानसामान्यप्रतिबन्धकत्वघटितविरोधिताया एवात्र निवेशनीयतया तादृशविरोधिताशून्यत्वमसाधारण्यसाधारणमेव ।

इदं त्ववधेयम् । सर्वमाकाशाभाववदित्यादिज्ञानस्यासमानधर्मितावच्छेदकानुमितिविरोधित्वे मानाभावः तादृशज्ञानकाले इदमपि सर्वान्तर्गतमित्यादिज्ञानसत्त्व एव इदमाकाशवदित्याद्यनुमित्यनुदयात्तत्र च तादृशज्ञानस्यैव ग्राह्याभावावच्छेदकधर्मदर्शनविधया तादृशानुमित्यभावनिर्वाहकत्वात्तथाच तादृशबाधबुद्धेर्निरुक्तानुमितिसामान्यविरोधित्वाभावादेव नातिव्याप्तिशंकेति ।

वस्तुतस्तु तद्धर्मितावच्छेदककबुद्धौ तत्सामानाधिकरण्यमात्रेण ग्राह्याभावावगाहिबुद्धेरप्रतिबन्धकतया ग्राह्याभावांशे तद्धर्मितावच्छेदकव्यापकतावगाहित्वमेव तन्त्रम्, तथा च ग्राह्याभावे तत्तद्धर्मव्यापकतानिश्चयस्य तद्धर्मावच्छिन्नांशे ग्राह्याभावप्रकारकस्यापि तत्तद्धर्मधर्मितावच्छेदकताकग्रहप्रतिबन्धकत्वम्, तत्तद्धर्मव्यापकता च तत्तद्धर्मसमानाधिकरणाभावाप्रतियोगित्वम्, तज्ज्ञानस्य प्रतिबन्धकत्वे वृत्तिमदत्यन्ताभावाप्रतियोगित्वज्ञानमपि तथा, सामान्यघटितविशेषाभावग्रहस्य यत्र प्रतिबन्धकत्वं तत्र तत्सामान्याभावग्रहस्यापि तथात्वानुभवात् । सर्वमाकाशाभाववदिति बुद्धेश्चाकाशाभावे वृत्तिमदत्यन्ताभावाप्रतियोगित्वं विषयः स एव बाधः तादृशानुमिति-

सामान्यविरोधी चेति ।

मूलस्थेन तेनेत्यनेन संशयप्रयोजकयोर्विभाजकीभूतसपक्षवृत्तित्वाविपक्षव्यावृत्तत्वघटितसाधारण्यासाधारण्योः परामर्शोऽसङ्गतिः सपक्षवृत्तित्वाद्यंशज्ञानस्यानुमित्यविरोधितया तद्घटितस्य हेत्वाभासताविरहादिति तस्यानुमितिविरोधितया प्रकान्तविपक्षवृत्तित्वाद्यंशमात्रपरामर्शकतामाह तेनेति । विपक्षवृत्तित्वत्वादिनाऽप्राकान्तत्वात् प्रकान्ततालाभायानुमितिविरोधिनेत्युक्तम् । अनुमितिविरोधित्वावच्छिन्नस्यानुमित्यविरोधित्वात्तत्पदस्य विपक्षवृत्तित्वत्वाद्यवच्छिन्नपरत्वमावश्यकमिति तल्लाभाय विपक्षवृत्तित्वादिनेति । विपक्षवृत्तित्वत्वाद्यवच्छिन्नेनेत्यर्थः । तेनैवेत्येवकारस्य विभाजकधर्मस्यानुमितिप्रतिबन्धकज्ञानप्रकारत्वव्यवच्छेदपरत्वेऽसङ्गतिः तादृशज्ञानप्रकारीभूतविपक्षवृत्तित्वादेरेवानुगतधर्मप्रकारेण विभाजकत्वात् । एवं प्रत्येकमेवेत्येवकारस्यापि विभाजकधर्मस्य हेत्वाभासताव्यवच्छेदपरत्वं नोपपद्यते इति अनुमितिविरोधित्वादिरूपानुगमकविभाजकतावच्छेदकधर्मस्य प्रतिबन्धकज्ञानप्रकारतावच्छेदकत्वहेत्वाभासपदप्रतिपाद्यतावच्छेदकत्वव्यवच्छेदपरतया एवकारद्वयं व्याचष्टे एवकारेणेति । प्रथमैवकारेणेत्यर्थः । व्यवच्छिद्य–प्रतिबन्धकज्ञानप्रकारतावच्छेदकत्वव्यवच्छेदवत्तया प्रतिपाद्य, हेत्वाभासस्येति पूरणम् । एवं च प्रत्येकमेवेति मूलस्य विपक्षवृत्तित्वादिप्रत्येकमात्रवृत्तिरूपावच्छिन्नस्यैवेत्यर्थः । तेनासाधारण्यस्येत्यादिमूलस्यानुमितिविरोधिताघटितलक्षणं परित्यज्य लक्षणान्तरकरणेनासाधारण्यस्य साध्यतदभावोपस्थापकतया संशायकतया दूषकत्वपक्षे नाव्याप्तिरित्यर्थकत्वेऽसङ्गतिः–सम्भवत्संशयप्रयोजकताकसाध्यतदभावसहचरिताभावप्रतियोगित्वरूपासाधारण्यस्य सद्धेतुसाधारणताप्रयुक्तदोषत्वासम्भवदोषेणैवानुमितिविरोधिताघटितलक्षणस्यावतारितत्वात् ।

(चि०)यद्वा साध्यवन्मात्रवृत्त्यन्यत्वे सति साध्याभाववन्मात्रवृत्त्यन्यत्वम् । तेनासाधारणस्य साध्यतदभावोपस्थापकतया दूषकत्वपक्षे नाव्याप्तिः । न चैवमाधिक्ये विभागव्याघातः, स्वरूपसतानुगतरूपेण अ-

याणामेकीकृत्य महर्षिणा विभागकरणात् । न चैवं साध्याभावज्ञापकत्वेन बाधप्रकरणसमयोस्तदज्ञापकतयान्येषामुपसंग्रहः कुतो न कृत इति वाच्यम् स्वतन्त्रेच्छस्य नियोगपर्यनुयोगानर्हत्वात् ।

(दी०) तेनानुमितिविरोधित्वघटितलक्षणकरणेन, असाधारणस्य सत्प्रतिपक्षोत्थापकतया दूषणत्वपक्षे नाव्याप्तिरन्यथा पुनरव्याप्तिरेव । साध्याभावज्ञापकत्वेन—साक्षात्साध्यवत्तानुमितिविरोधित्वेन ।

(गा०) तेनेत्यस्य संशायकताघटितलक्षणपरित्यागपूर्वकापरलक्षणद्वयकरणस्यासाधारणसङ्ग्रहप्रयोजकतार्थकत्वं साध्यतदभावोपस्थापकतये यस्य सत्प्रतिपक्षोत्थापकतयेत्यर्थकत्वमपि न साधु । असाधारण्यस्य सत्प्रतिपक्षोत्थापकतामते साध्यव्यापकीभूताभावप्रतियोगित्वस्यैवासाधारण्यतया तस्य व्याप्तिग्रहाविरोधितया विरुद्धादिसंकीर्णासाधारणानुरोधेन व्याप्तिग्रहद्वयविरोधितापरतया व्याख्येयस्याव्यवहितलक्षणस्य तत्राव्याप्तेरावश्यकत्वादतस्तत्पदं मध्यमलक्षणमात्रपरतया व्याचष्टे तेनेति । असाधारणस्य संशायकतापक्षे प्रथमलक्षणस्यैव साधुता न तु मध्यमस्य संशयप्रयोजकस्य निश्चितसाध्यतदभाववद्व्यावृत्तत्वादेरनुमित्यविरोधित्वादित्युपष्टंभासङ्गतिभयेन साध्यतदभावोपस्थापकतयेत्यस्य संशायकतयेत्यर्थं परित्यज्यार्थान्तरमाह सत्प्रतिपक्षोत्थापकतयेति । इतरलक्षणयोस्तन्मतेऽसाधारणाव्याप्तिसत्त्व पर्वोपष्टंभसङ्गतेरुपष्टंभकतां स्पष्टीकर्तुं तत्पूरयति अन्यथा पुनरिति । इतरलक्षणयोस्त्वित्यर्थः । अव्याप्तिरेवेति । सत्प्रतिपक्षोत्थापकतया दूषकत्वपक्ष इत्यनुषज्यते । यथाश्रुतं साध्याभावज्ञापकत्वं न बाधसाधारणमतस्तदर्थं व्याचष्टे साध्याभावेति । व्यभिचारादिव्यावृत्तस्य कारणीभूताभावप्रतियोगित्वरूपप्रतिबन्धकताघटितस्य विरोधित्वस्य विरोधितालाभाय साक्षादिति ॥

इति श्रीगदाधरभट्टाचार्यचक्रवर्तिविरचितायां
गादाधर्यां सव्यभिचारनिरूपणम् ।

अथानुमानगादाधर्याम्

साधारणप्रकरणम् ।

(चि०) तत्र साधारणत्वं न साध्याभाववद्गामित्वम् । सर्व्वमनित्यं मेयत्वादित्यनुपसंहार्य्ये भूर्नित्या गन्धवत्त्वादित्यसाधारणे संयोगादिसाध्यकद्रव्यत्वे चातिव्याप्तेः। अत एव न साध्यवत्तदन्यवृत्तित्वम् , नापि निश्चितसाध्यवत्तदन्यवृत्तित्वम् साध्यवदन्यवृत्तित्वस्य दूषकत्वेन शेषवैयर्थ्यात् । अत एवामुकेनायमनैकान्तिक इत्येवोद्भाव्यते तत एव वादिनिवृत्तेश्च, न तु सपक्षगतत्वमपि । अनुपसंहार्य्यो व्यावर्त्योऽन्यथा तस्यैतद्विशेषत्वापत्तिरिति चेत्, त्यज तर्हि तमधिकं कल्पेऽन्तर्भावात् । नापि सपक्षविपक्षगतत्वम् ,व्यर्थविशेषणत्वात् । विरुद्धो व्यावर्त्य इति चेन्न । विपक्षगामित्वस्यैव दूषकत्वे तस्याप्येतदन्तर्भावात् ।

अथ पक्षान्यसाध्यवत्तदन्यवृत्तित्वं साधारणत्वम् , तेन सर्वमनित्यं मेयत्वादित्यनुपसंहार्य्ये नातिप्रसङ्गः, न च व्यर्थविशेषणता, घटोऽनित्यो घटाकाशोभयवृत्तिच्छित्वाश्रयत्वादित्यनुपसंहार्य्यस्य विरुद्धस्यानैकान्तिकभिन्नस्य व्यवच्छेद्यत्वादिति चेन्न । दूषकताप्रयोजकरूपभेदमन्तरेण भेदस्यैवानुपपत्तेः । साध्यवद्वृत्तित्वे सति सर्वसाध्यवदन्यवृत्तित्वमित्यपि न, व्यर्थविशेषणत्वात् एकव्यक्तिकसाध्ये तदभावाच्च । एतेन हेत्वाभासान्तरव्यवच्छेदकं लक्षणान्तरेऽपि विशेषणं व्यर्थमिति ॥

(दी०) सर्वमनित्यमित्यादि सम्प्रदायमनुरुध्योक्तम् । अत एव तावग्रेऽन्तर्भावयिष्यति । नापीति । निश्चिते साध्यवति साध्यवद्भिन्ने च वर्त्तमानत्वमित्यर्थः । अनुपसंहार्य्य इति । साध्यवदन्यवृत्तित्वांशस्य तत्रापि सत्त्वादिति भावः । नापीति । इह सपक्षत्वं न निश्चयगर्भमतो नाभेदः । घट इत्यादि । इत्यस्य विरुद्धस्य-अनुपसंहार्य्यस्य-प्रसिद्धस्य च विरुद्धान्तरस्य व्यवच्छेद्यत्वादित्यर्थः ।

अन्वयतो व्यतिरेकतश्च सहचाराग्रहदशायामीदृशं द्वित्वमनुपसंहारीति मतेनेदमित्यपि कश्चित् ॥

(गा०) सर्वमनित्यं प्रमेयत्वादित्यादेः स्वमते साधारणत्वात्तत्रातिव्याप्तिप्रदर्शनासंगतेराह संप्रदायमिति । तन्मते निश्चितसाध्यतदभाववद्वृत्तेरेव साधारणतया उक्तहेत्वोरनुपसंहार्य्यत्वासाधारणत्वदशायामलक्ष्यत्वमेवेति भावः । ननु मणिकारमते वास्तवसाध्याभाववद्वृत्तिरेव साधारण इत्येव कुतोऽवधारितमित्यत आहात एवेति । स्वमते तस्य लक्ष्यत्वादेवेत्यर्थः । अग्रे-सिद्धान्तग्रन्थे । निश्चितसाध्यवत्तदन्यवृत्तित्वमित्यत्र तत्पदस्य प्रकान्तनिश्चितसाध्यवत्परामर्शकत्वे साध्यसंशयविषयीभूतपक्षे सपक्षे च वर्त्तमाने सद्धेतावतिप्रसङ्ग इत्यतस्तस्य साध्यवन्मात्रपरतां स्पष्टयितुं व्याचष्टे निश्चित इति । साध्यादिमत्तया निश्चित इत्यर्थः । एतच्च साध्यवद्भिन्नेप्यन्वेति, अन्यथा निश्चितसाध्यवतीति समासेन लिखनस्य परित्यागे बीजाभावात् । न चानुपसंहार्य्यसाधारणयोरतिव्याप्तिः साध्यवति तद्विशेषणेनैव वारणात् साध्यवद्भिन्ने तस्य विशेषणत्वमप्रयोजकमिति वाच्यम् । साध्यवदन्यत्वसंशयविषयवृत्तित्वज्ञानस्याप्रतिबन्धकत्वात् स्वरूपसन्निश्चयघटितस्यैव दोषत्वमित्यभिप्रायेण तदुपादानात् साध्यवति तद्विशेषणोपादानं च-शब्दोऽनित्यः शब्दाकाशान्यतरत्वादित्यादेरनवगतसाध्यसहचारितत्वे सति अवगतसाध्याभावसहचारिततया विरुद्धत्वमेव न तु साधारणत्वमिति-मताभिप्रायेण तद्वारणाय । उभयत्र विकल्पेन तादृशविशेषणं प्रक्षिप्य लक्षणद्वयं करणीयमित्यभिप्रायेण समासोपेक्षणमिति पुनरयुक्तम् । तथासति सपक्षविपक्षग-

तत्वरूपाप्रिमलक्षणे सपक्षत्वविपक्षत्वोभयशरीरे निश्चयांशपरित्याग एव पौनरुक्त्यपरिहारसम्भवात्, सपक्षत्वमात्रस्य च तद्गर्भतया निराकरणासंगतेः।

मूले इत्येवोद्भाव्यत इत्यत्र इतीत्यनन्तरं विपक्षवृत्तित्वमिति पूरणीयम्। अयोगोलकेनानैकान्तिको वह्निरित्यत्र साध्यवदन्याधेयत्वम् अनैकान्तिकपदार्थः। तत्रैव च तृतीयान्तार्थायोगोलकनिरूपितत्वादेरन्वयो बोध्यः। ननु तन्मात्रोद्भावनान्न वादिनिवृत्तिरिति न तन्मात्रं दोष इत्याशंकां निराकरोति तत एवेति। एवकारव्यवच्छेद्यं स्फुटयति न त्विति। सपक्षगतत्वमपीति। उद्भाव्यत इत्यनुषज्यते। अनुपसंहार्ये सर्वमनित्यं प्रमेयत्वादित्यादौ निश्चितसाध्यवदन्यवृत्तित्वदलासत्त्वात् सपक्षगतत्वमात्रस्य न तद्व्यावर्त्तकता अतः सपक्षगतत्वनिश्चितत्वरूपसाध्यवदन्यविशेषणयोरन्यतरसार्थक्यशङ्कापरत्वमनुपसंहार्य्य इति मूलस्य स्फुटयितुं निश्चयाघटितसाध्यवदन्यवृत्तित्वस्य तत्साधारण्यमाह दीधितौ साध्यवदन्येति। तत्रापि–अनुपसहार्येपि। न निश्चयगर्भमिति। न निश्चितसाध्यवद्वृत्तित्वरूपमपि तु साध्यवद्वृत्तित्वरूपमेवेत्यर्थः। नाभेद इति। न निश्चितसाध्यवदित्याद्युक्तलक्षणाभेद इत्यर्थः। घटो ऽनित्यो घटाकाशोभयवृत्तिद्वित्वादित्यस्य केवलान्वयिधर्मावच्छिन्नपक्षकत्वाभावेनानुपसंहारित्वाभावादित्यनुपसंहार्यस्येति मूलासङ्गतिमाशंक्यान्तरा पूरयति इत्यस्य विरुद्धस्येति। विरुद्धत्वं चास्यानवगतसाध्यसहचारकत्वे सति अवगतसाध्याभावसहचारी विरुद्ध इति मते अनुपसंहार्यस्य विशिष्यानभिधानात् कस्येत्याकाङ्क्षायामाह प्रसिद्धस्येति। सर्वमनित्यं प्रमेयत्वादित्यादेरित्यर्थः। विरुद्धस्येत्यस्य विरुद्धसामान्यपरत्वे दर्शितद्वित्वरूपविरुद्धहेतोः पृथगुपादानानुपपत्तिरतोऽयं गौरश्वत्वादित्यादिसर्ववादिसिद्धविरुद्धपरतया तद्व्याचष्टे विरुद्धान्तरस्येति। तादृशद्वित्वरूपविरुद्धस्य पक्षातिरिक्तसाध्यवद्वृत्तित्वरूपसमुदायविशेषणेन विरुद्धान्तरस्य च पक्षान्यत्वमनन्तर्भाव्यापि साध्यवद्वृत्तित्वविशेषणेन व्यावृत्तिरिति प्रदर्शनाय भेदेनोपादानमिति भावः।

केवलान्वयिधर्मावच्छिन्नपक्षकत्वं नानुपसंहारित्वं किन्त्वप्रतीतव्याप्तिग्रहानुकूलसहचारत्वमिति मते कथितद्वित्वमनुपसंहार्य्येवेति तन्मतमालंब्य यथाश्रुतमूलमुपपादयतो मतमाहान्वयत इति। साध्य-

पक्षवृत्तित्वांशव्यावर्त्यस्य विरुद्धस्यैव पक्षान्यवृत्तित्वांशव्यावर्त्यस्य सर्वमनित्यं प्रमेयत्वादित्याद्यनुपसंहार्यस्याप्युपादानौचित्यादनुपसंहार्यविशेषस्योपादानं निर्बीजमित्यस्वरससूचनाय कश्चिदिति ॥

(चिं०) उच्यते विपक्षवृत्तित्वं साधारणत्वम्, तन्मात्रस्य दूषकत्वात् । विरुद्धस्यापि तत्त्वाज्ञाने विपक्षवृत्तिताज्ञानदशायां साधारणत्वम्, अन्यथा तस्य हेत्वाभासान्तरतापत्तेः । उपाधेरसङ्कर एव । सर्वमनित्यं मेयत्वादित्यनुपसंहारी शब्दो नित्यः शब्दत्वात् भूर्नित्या गन्धवत्त्वादित्यसाधारणश्च वस्तुगत्या साध्याभाववद्वृत्तित्वेन साधारणोऽपि पक्षतादशायाम् उद्भावयितुं न शक्यत इत्युभयोर्भेदेनोपन्यासः ॥

इति साधारणचिन्तामणिः ॥

(दी०) विपक्षेति । अत्र विपक्षत्वं साध्याभाववत्त्वम् । अनुपदमेव वस्तुगत्या साध्याभाववद्वृत्तित्वेन साधारण इति मूल एव स्फुटतरमभिधानात्, न तु निश्चयगर्भं तज्ज्ञानस्याप्रतिबन्धकत्वात् । न च वस्तुतो यत्र तन्निश्चयस्तद्वृत्तित्वज्ञानं प्रतिबन्धकम्, रूपान्तरेण साध्याभाववत्तया निश्चिते रूपान्तरेण हेतुज्ञानेऽप्यप्रतिबन्धात् । न चैकेन रूपेण तत्तथा, गौरवात्, हेतुसाध्याभावयोः सामानाधिकरण्यास्फुरणेनाविरोधात्, साध्याभाववद्वृत्तिर्हेतुरित्यादिशब्दज्ञानानामप्रतिबन्धकत्वापाताच्च ।

यत्तु साध्याभावांशे निश्चयरूपं शेषांशे संशयसाधारणं साध्याभाववद्वृत्तित्वज्ञानं प्रतिबन्धकमन्यथा पक्ष एव साध्यसन्देहेन सन्दिग्धानैकान्तिकत्वापत्तेरिति । यदाहुः–'नहि पक्षे पक्षसमे वा व्यभिचार' इति ।

तन्न । व्याप्तिनिश्चये हेतौ व्यभिचारसंशयायोगात्, तदनिश्चयदशायाम् अनुकूलतर्कास्फूर्तौ सन्दिग्धानैकान्तिकत्वस्येष्ट-

त्वात्–हेतुसाध्याभावसामानाधिकरण्यावगाहितयैव ज्ञानस्य व्याप्तिग्रहप्रतिबन्धकत्वात्, अत एव पक्षः साध्यातिरिक्तपक्षधर्मातिरिक्तधर्मवान् मेयत्वादित्यादयोऽनुकूलतर्कविरहिणो बाधप्रतिरोधयोरनवतारेऽपि पक्षे एव सन्दिग्धानैकान्तिकतया अप्रयोजका गीयन्ते। एवं वह्निर्दाहानुकूलेत्यादयः शक्तिसाधका अपि। अन्यथा पक्षातिरिक्ते सर्वत्र साध्यवत्तानिर्णयाद्व्याप्तिग्रहस्य दुर्वारत्वात्, पक्षविपक्षान्यतरत्वादिना सर्वत्र सत्प्रतिपक्षप्रसङ्गाच्च।

(गा०) सिद्धान्तलक्षणेपि विपक्षपदस्य निश्चितसाध्याभाववदर्थकताभ्रमं निराकरोति अत्रेति। निश्चयांशानिवेशे मूलस्यापि संमतिमादर्शयति अनुपदमेवेति। स्फुटतरमभिधानात्–वास्तवसाध्याभाववद्वृत्तित्वस्य साधारण्यरूपतास्फुटीकरणात्। न तु निश्चयगर्भं विपक्षत्वं संभवदुक्तिकमपीति शेषः। तज्ज्ञानस्य–निश्चयांशज्ञानस्य, अप्रतिबन्धकत्वात्–व्याप्तिज्ञानाप्रतिबन्धकत्वात्, व्याप्तेर्निश्चितसाध्याभाववद्वृत्तित्वाघटितत्वादिति भावः।

ननु निश्चयांशज्ञानस्याप्रतिबन्धकत्वेपि स्वरूपसत्साध्याभावनिश्चयविषयधर्मिवृत्तित्वज्ञानत्वेन प्रतिबन्धकतया तादृशधर्मिवृत्तित्वं साधारण्यरूपहेत्वाभासो भवतु। न च निश्चयघटितस्य विशिष्टस्य प्रतिबन्धकज्ञानाविषयत्वेन सामान्यलक्षणानाक्रान्ततया न हेत्वाभासतेति वाच्यम्। मणिकारोक्तदोषसामान्यलक्षणस्य यथाश्रुतार्थपरताया अनेनैव परित्यागात्, तत्परित्यागे कथंचिदेतत्साधारण्यस्यापि सम्भवात्।

(वस्तुतस्तु साध्याभावनिश्चयविषयीभूतायोगोलकादिधर्मिवृत्तित्वस्यायोगोलकादिवृत्तितात्वेनैव रूपेण दोषता तद्रूपविशिष्टविषयकज्ञानस्यायोगोलकादिधर्मिकसाध्याभावनिश्चयविशिष्टत्वेन प्रतिबन्धकत्वात्, तथाच साध्याभावनिश्चयविषयवृत्तित्वत्वेन ज्ञानस्याप्रतिबन्धकत्वेपि न क्षतिः, तेन रूपेण दोषत्वानुपगमात्। न चायोगोलकादिवृत्तितादृशज्ञानस्योक्तनिश्चयांशविशिष्टत्वेन प्रतिबन्धकत्वेऽपि तद्विषयकत्वस्य तादृशप्रतिबन्धकताशून्यतादृशानिश्चयविशिष्टज्ञान साधारणतया नानतिरिक्तवृत्तित्वरूपावच्छेदकत्वमिति

न तत् हेत्वाभाससामान्यलक्षणाक्रान्तत्वमिति वाच्यम् । सामानाधिकरण्यसम्बन्धेन यस्य यस्य यादृशप्रतिबन्धकतायामवच्छेदकत्वं तत्तदवच्छेदकविशिष्टस्य यादृशविषयकनिश्चयत्वस्य तत्प्रतिबन्धकतानतिरिक्तवृत्तित्वाविवक्षया सामान्यलक्षणस्योक्तसाधारण्यसम्भवात् । बाधादप्रतिबन्धकतायामप्रामाण्यग्रहाभाव एव सामानाधिकरण्यसम्बन्धेनावच्छेदकः प्रसिद्ध इति ।) न चैवं तुल्ययुक्त्या हेतुमत्ताज्ञानविषयधर्मिवृत्तिसाध्याभावादिकमपि तथा स्यादिति वाच्यम् । इष्टत्वात् ।

अथैवं महानसादौ वह्न्यभावभ्रमदशायां ह्रदादौ धूमादिभ्रमदशायां च तादृशभ्रमविषये धूमवह्न्यभावादेर्वृत्तेर्वह्न्यादिसाध्यकधूमादेः साधारण्यं स्यादिति चेदेतदपीष्टमेव । न चैवं साधारण्यस्य नित्यदोषताप्रवादविरोधः, उक्तरूपेण साध्याभाववद्वृत्तित्वरूपविशिष्टविषयकज्ञानस्यापि प्रतिबन्धकतया तादृशविशिष्टविषयस्य चाप्रतिबन्धकज्ञानाविषयत्वेन नित्यदोषतया तदविरोधात् । सद्धेतुनिष्ठसाध्याभावभ्रमविषयवृत्तित्वादिरूपस्य च तस्यानित्यदोषताया एवोपगमात् । न चैव सद्धेतौ पक्षतावच्छेदकादिभ्रमविषयवृत्तिसाध्याभावादिकमपि बाधः स्यादविशेषादिति वाच्यम् । प्रतिबन्धकप्रमाविषयस्यैव दोषत्वोपगमात् तादृशस्य साध्याभावादिविषयकप्रतिबंधकीभूतज्ञानस्य पक्षतावच्छेदकाद्यंशे भ्रमत्वनियमात्, प्रकृते च ज्ञानद्वयस्यापि मिलितस्य प्रतिबन्धकतया एकज्ञानस्य भ्रमत्वेपि प्रमात्मकापरज्ञानविषयस्यापि दोषतासम्भवात् । अत एव सद्धेतौ पक्षवृत्तिसाध्याभावव्याप्यस्याप्रसिद्धावपि पक्षवृत्तित्वेन भ्रमविषयनिष्ठसाध्याभावव्याप्यत्वादेः सत्प्रतिपक्षतया तस्यानित्यदोषत्वम्, मिलितयोः समानधर्मिकसाध्याभाववत्ताग्रहहेतुमत्ताग्रहयोर्व्याप्तिबुद्ध्याविव मिलितयोरेकधर्मिकसाध्याभावव्याप्तिपक्षधर्मताबुद्ध्योरनुमितौ विरोधित्वात् तदुभयैकतरप्रमारूपैकज्ञानविषयस्य विशिष्टस्य दोषत्वे बाधकाभावात् । न चैवं विरोधिव्याप्त्यादेरज्ञायमानतादशायामपि सद्धेतौ दुष्टतापत्तिरिति वाच्यम् । ज्ञानद्वयस्य यत्र प्रतिबन्धकता तत्र प्रतिबन्धकीभूतज्ञानावच्छिन्नस्यैव विषयस्य दोषत्वादिति । न च ज्ञानान्तरविशिष्टस्य यादृशविशिष्टज्ञानस्य प्रतिबन्धकत्वं तादृशविशिष्टविषयकत्वस्य प्रतिबन्धकतानतिरिक्तवृत्तित्वान्न दोषसामान्यल-

क्षणाक्रान्तत्वमिति वाच्यम् । सामान्यलक्षणे स्वरूपसम्बन्धरूपावच्छेदकताया एव निवेशनीयत्वात् । एकदेशातिव्याप्तेर्यादृशविशिष्टविषयितासामान्यं प्रतिबन्धकतावच्छेदकमिति विवक्षयैव वारणात् । न च नित्यदोषस्य बाधादेः सर्वदा दोषतया तदनिर्वाहभयेन प्रतिबन्धकज्ञानाधिकरणकालावच्छिन्नत्वस्य सामान्यलक्षणे दुर्निवेशतयाऽनित्यानामपि दोषाणां सर्वदा दोषतापत्तिर्दुर्वारैवेति वाच्यम् । यादृशज्ञानान्तराविशिष्टत्वेन यादृशविशिष्टविषयकज्ञानस्य प्रतिबन्धकता तादृशज्ञानसहिततादृशविशिष्टज्ञानानधिकरणक्षणवृत्तित्वविशिष्टतादृशविशिष्टपर्याप्तविषयताविरहविशिष्टत्वे सति यादृशविशिष्टनिरूपितविषयतासामान्यमनुमितिप्रतिबन्धकतावच्छेदकं तादृशविशिष्टत्वस्य सामान्यलक्षणतया नित्यदोषे च विशेष्यीभूतनिरुक्तविषयताविरहेण तादृशज्ञानानधिकरणक्षणवृत्तित्वविशिष्टतादृशविषयताविरहस्य सर्वदैव सत्त्वेन अनित्यदोषे च प्रतिबन्धकज्ञानदशायामेव तादृशक्षणरूपविशेषणविरहेण तादृशविरहस्य सत्त्वेन सामञ्जस्यात् । विशिष्टाभावप्रविष्टक्षणे निरुक्तज्ञानयोरेकतरानधिकरणत्वमात्रस्य निवेशे पर्वतो वह्निमान् धूमादित्यादौ महानसादौ वह्न्यभावादिभ्रमशून्यतादशायामपि धूमादौ महानसादिवृत्तित्वज्ञानमादाय व्यभिचारित्वापत्तिः, प्रतिहेतौ विरोधिव्याप्तिपक्षधर्मताज्ञानयोरेकतरमात्रसत्त्वेऽपि सत्प्रतिपक्षतापत्तिश्चेति विशिष्टाभावप्रतियोगिकोटौ एकज्ञानसहितापरज्ञानानधिकरणक्षणनिवेशः । एवं च सद्धेतोरधिकरणे साध्याभावस्य भ्रमसत्त्वेऽपि हेतौ तदधिकरणवृत्तित्वाज्ञानदशायां न तस्य सव्यभिचारत्वमपि तूभयज्ञानदशायामेवेति मिश्रानुयायिनामाशंकां निराकर्तुं साधारण्यस्थले ज्ञानद्वयप्रतिबन्धकतां खण्डयति न चेति । न वेत्यर्थः । रूपान्तरेणेति । द्रव्यं धूमाभाववत् अयोगोलकं वह्निमदित्यादिज्ञानेऽपि वह्निर्धूमव्याप्य इति ज्ञानोत्पत्तेरित्यर्थः। तद्रूपावच्छिन्नसाध्याभावनिश्चयसहिततद्रूपावच्छिन्नविशेष्यकहेतुमत्ताज्ञानप्रतिबन्धकमित्युक्तौ नायं दोष इति शंकते न चैकेनेति । गौरवादिति विशिष्टज्ञानत्वेन प्रतिबन्धकत्वापेक्षयेत्यादिः । ननु ज्ञानद्वयकालेऽपि फलानुत्पत्त्या तन्निर्वाहाय दर्शितरूपेण प्रतिबन्धकताया आवश्यकत्वे गौरवमकिंचित्करमेवानन्यगतिकत्वादित्यत आह हेत्विति । ज्ञानद्वयस्थले ग्राह्यसाध्याभाववद्वृत्तित्वाभावाविरोधिता-

वच्छेदकसाध्याभावसामानाधिकरण्यत्वावच्छिन्नस्य हेतावभानेन व्याप्तिज्ञानोत्पादे बाधकाभावादित्यर्थः । तथाच तदानीं व्याप्तिज्ञानानुत्पादस्यैवासिद्धतया गुरुरूपेण प्रतिबन्धकत्वमप्रामाणिकमेवेति भावः । दर्शितरूपेण प्रतिबन्धकत्वे सर्ववादिसिद्धप्रतिबन्धकताकस्य ग्राह्यविरोधितावच्छेदकप्रकारकज्ञानस्यासंग्रह इत्याह साध्याभावेति । अप्रतिबन्धकत्वापातादिति । साध्याभावग्रहस्य तदानीन्तनस्य निर्द्धर्मितावच्छेदकतया तादृशज्ञानस्योक्तप्रतिबन्धकतावच्छेदकानाक्रान्तत्वादिति भावः । प्रत्यक्षे सन्निकर्षादिबलात् साध्याभावधर्मितावच्छेदकतया अयोगोलकत्वादेरपि भानसम्भवात् शाब्दानुधावनम् । न च साध्याभावप्रकारतानिरूपितविशेष्यतानिरूपिता या स्वसमानकालीनज्ञानीयप्रकारता तदाश्रयधर्मावच्छिन्नवृत्तित्वावगाहिज्ञानत्वेन प्रतिबन्धकत्वोपगमादुक्तज्ञानसंग्रहः, साध्याभावे धर्मितावच्छेदकस्यैव साध्याभावस्यापि निरुक्तप्रकारताश्रयत्वादिति वाच्यम् । द्रव्यत्वादिसामानधिकरण्येन साध्याभावग्रहकालीनस्य द्रव्यवृत्तिर्हेतुरित्यादिज्ञानस्य प्रतिबन्धकत्वापातात् । धर्मितावच्छेदकावच्छेदेन साध्याभावावगाहिज्ञानस्य निवेशे न निस्तारः निर्द्धर्मितावच्छेदकसाध्याभावज्ञानकालीनज्ञानस्य दुःसंग्रहत्वात् ।

विपक्षत्वं निश्चितसाध्याभाववत्त्वमेव निश्चयांशज्ञानस्याविरोधित्वेपि न क्षतिः । तद्घटितसाध्याभाववद्वृत्तित्वस्यैव दोषत्वोपगमात्।साध्याभावे निश्चितत्वाभिधानस्य व्यभिचारज्ञानप्रतिबन्धकतायां तदंश एव निश्चयत्वप्रवेश इत्येतत्प्रदर्शनमात्रार्थत्वादेवं च साधारण्यस्य नानित्यदोषताप्रसक्तिरपीति मिश्राणां द्वितीयं मतं दूषयितुमुपन्यस्यति यत्त्विति । साध्याभावांशे निश्चयरूपमिति ।

अथात्र किं निश्चयत्वम्? न सामान्यतः साध्याभावसंशयान्यसाध्याभावज्ञानत्वम् , महानसं धूमवन्नवा धूमाभाववदयोगोलकवृत्तिर्वह्निरित्येतादृशज्ञानासंग्रहात् । नापि–हेत्वधिकरणप्रकारीभूतयत्किञ्चिद्धर्मावच्छिन्नविशेष्यकसाध्याभावसंशयान्यतज्ज्ञानत्वम् ।यत्किञ्चित्त्वनिवेशात् वन्हिमान् पर्वतो धूमवान्न वा धूमाभाववदयोगोलकवृत्तिर्वह्निरिति ज्ञानसंग्रहः, तस्य तादृशायोगोलकत्वरूपयत्किञ्चिद्धर्मावच्छिन्नविशेष्यकसंशयान्यत्वादिति–निर्दोषम् ।साध्याभावांशे निर्द्धर्मितावच्छेदकस्य साध्याभाववद्वृत्तिर्हेतुरितिज्ञानस्यासंग्रहात्—तत्र हे-

त्वधिकरणांशे साध्याभावमात्रस्य प्रकारत्वात् तदवच्छिन्नविशेष्यताकसाध्याभावसंशयस्याप्रसिद्धेः, यत्किञ्चित्त्वनिवेशेनाननुगमाच्चेति ।

अत्राहुः—आधेयताविशेषणतापन्नस्य अधिकरणस्य या संशयत्वनिरूपकविशेष्यतान्यविशेष्यता तन्निरूपितसाध्याभावप्रकारताशालित्वं तन्निश्चयत्वम्, संशयत्वनिरूपिका च विपरीतकोटिधर्मितावच्छेदकतापन्नधर्मावच्छिन्ना विशेष्यता, तदन्यत्वं च साध्याभाववद्वृत्तिधूम इत्यादिज्ञानीयधर्मितावच्छेदकानवच्छिन्नविशेष्यतादावक्षतमेव, संशये च प्रत्येककोटिनिश्चयीयविशेष्यताभ्यामतिरिक्तैव विशेष्यता, अतो निश्चयीयधर्मितावच्छेदकावच्छिन्नविशेष्यतायां तदन्यत्वमेव । अधिकमन्यत्रानुसन्धेयम् ।

शेषांशे-आधेयत्वाद्यंशे, संशयसाधारणं-निश्चयत्वविशेषणानवच्छिन्नम्, अन्यथा-साध्याभावांशे निश्चयत्वनिवेशे, सन्दिग्धानैकान्तिकत्वापत्तेः-पक्षांशे साध्याभावसंशयात्मकपक्षवृत्तित्वावगाहिव्यभिचारज्ञानादनुमितिमात्रोच्छेदापत्तेः।साध्याभावसंशयविषयहेतुमत्ताज्ञानस्याविरोधित्वे प्राचीनसंवादमाह न हि पक्ष इत्यादिना । पक्षे-सन्दिग्धसाध्यकप्रकृतधर्मिणि, पक्षसमे-सन्दिग्धसाध्यकधर्म्यन्तरे, व्यभिचारो-व्यभिचारग्रहः । प्रतिबन्धक इति शेषः। व्याप्तिनिश्चये हेतुमति पक्षादौ साध्याभावसंशयानवतारदशायां निश्चिताया व्याप्तेः स्मरणे व्यभिचारसंशयायोगात् इति । पक्षः साध्यवान्न वा पक्षवृत्तिर्हेतुरिति विशृङ्खलाविषयकज्ञानं न विरोधि विरोधितावच्छेदकरूपाप्रकारकत्वात्, किन्तु साध्याभाववद्वृत्तित्वत्वावच्छिन्नप्रकारकज्ञानमेव, तच्च व्याप्तिनिश्चयप्रतिबध्यमिति तस्योत्पत्त्यसंभवादित्यर्थः ।

यत्र व्याप्तिग्राहकसहचारदर्शनादिदशायामेव क्वचन हेतुमति साध्याभावसंशय आसीत्तत्र तन्मते पूर्वं व्याप्तेरनिश्चयेन पक्षे हेतुदर्शनदशायां व्याप्तिस्मरणासंभवात्पक्षान्तर्भावेण व्यभिचारसंशयसत्त्वात् प्रत्यक्षतन्निश्चयस्यासंभवादनुमितिर्न स्यादित्यत्रेष्टापत्तिमाह तदनिश्चयदशायां त्विति । पूर्वं व्याप्तेरनिश्चयेपि पक्षे साध्यसन्देहदशायामनुकूलतर्कावतारे तु व्याप्तिनिश्चयः संभवति अनुकूलतर्कस्य विशेषदर्शनवत् संशयप्रतिबन्धकतायामुत्तेजकत्वादत आह ।

नुकूलतर्कास्फूर्ताविति । अस्फूर्तिरनवतारः । अवगाहितयैवेत्येवकारेण निश्चयत्वस्य प्रतिबन्धकतावच्छेदकघटकत्वव्यवच्छेदः । तथा च साध्याभावांशे संशयात्मकमपि व्यभिचारज्ञानं प्रतिबन्धकमिति भावः । संशयायोगादिष्टत्वादित्यन्तद्वयस्यात्रैव हेतुत्वं बोध्यम् । अत एव-साध्याभावांशे संशयसाधारणव्यभिचारज्ञानस्य प्रतिबन्धकत्वादेव । पक्ष इत्यादि । शब्दो नित्यत्वातिरिक्तशब्दधर्मातिरिक्तधर्मवानित्यादय इत्यर्थः । बाधप्रतिरोधयोरनवतारेऽपि-विप्रतिपत्तिदशायां शब्दादौ अनित्यत्वत्तद्व्याप्तिविशिष्टयोरनिश्चयेऽपि, अप्रयोजका-नित्यत्वाद्यसाधका,गीयन्ते तान्त्रिकैरिति शेषः। दाहानुकूलेत्यादयः-दाहानुकूलादृष्टातीन्द्रियधर्मसमवायी दाहजनकत्वाददृष्टविशेषवदित्यादय इत्यर्थः।भर्जनकपालस्थ वह्निनिष्ठानुद्भूतरूपमादाय सिद्धसाधनवारणाय दाहानुकूलेति । अदृष्टवदात्मसंयोगमादाय सिद्धसाधनवारणायादृष्टेति ।उष्णस्पर्शमादाय सिद्धसाधनवारणायातीन्द्रियेति। अन्यथा-तादृशव्यभिचारज्ञानस्याप्रतिबन्धकत्वे, पक्षातिरिक्ते-साध्यसंशयाविषये, सर्वत्र-हेतुमति, साध्यवत्तानिर्णयात्-क्वापि हेतुमति साध्याभावानिश्चयेन व्याप्तिग्रहस्य दुर्वारत्वात् । एतेन द्वितीयानुमाने वह्निरूपपक्षातिरिक्ते करतलानलसंयोगादौ दण्डादौ च दाहानुकूलातीन्द्रियधर्मानिश्चयेऽपि न दोषः । पक्षविपक्षान्यतरत्वादिना-पर्वतह्रदान्यतरत्वतदुभयाविशेष्यकप्रमाविषयत्वादिना, सर्वत्र-पर्वतो वह्निमान् धूमादित्यादिसद्धेतौ, सत्प्रतिपक्षप्रसंगात्-अनुमितिप्रतिरोधप्रसङ्गात् । तादृशस्यान्यतरत्वादेरधिकरणे क्वचिदपि वन्ह्यादेरनिश्चयेन प्रतिबन्धकतावच्छेदकवह्न्यभावादिव्याप्तेस्तत्र सुग्रहत्वादिति भावः । एतच्च सर्वं प्रत्यक्षानिश्चयं ग्राह्यसंशयस्य प्रतिबन्धकत्वमतेनाभिहितम्, अन्यथा पुनर्ग्राह्यान्तरविशिष्टबुद्धौ ग्राह्याभावज्ञानस्येवाव्यभिचारबुद्धावपि व्यभिचारग्रहस्यापि निश्चयत्वेनैव प्रतिबन्धकता निश्चयत्वावच्छिन्नं प्रति ज्ञानत्वेन प्रतिबन्धकत्वे संशये निश्चयत्वावच्छिन्नस्यापरप्रतिबन्धकताया आवश्यकत्वात् संशयानन्तरं संशयोदयाज्ज्ञानत्वावच्छिन्नं प्रति ज्ञानत्वेन प्रतिबन्धकत्वासम्भवात् । निश्चयत्वं च वृत्त्यंश इव साध्याभावांशेऽपि निवेश्यम्,अधिकरणवृत्तित्वांशे निश्चयात्मकस्य अधिकरणांशे साध्याभावरूपविशेषणसंशयस्यापि विशिष्टसंशयसमानशीलतया विशिष्टाभावसंशयाविरो-

धित्वात्। एवमप्यनुकूलतर्कविरहिणामुक्तानुमानानामप्रयोजकत्वमुप-पद्यत एव व्यभिचारसंशयसामग्रीसत्त्वेन व्याप्तिनिश्चयोत्पत्त्यसम्भ-वात्। निश्चयत्वघटकविपरीतकोट्यप्रकारकत्वे विपरीतकोटिज्ञानप्र-योजकाभावस्य प्रयोजकत्वात् अनुकूलतर्कस्य च विपरीतज्ञानवि-रोधिनस्तत्प्रयोजकसामग्रीविघटनेनैव व्याप्तिनिश्चयोपयोगितेत्यव-धेयम् ॥

(दी०) अथ साध्यतद्वदत्यन्तान्योन्याभावगर्भव्यभिचारयो-रेकोपादानेऽन्यतराव्याप्तिः। साध्यवत्ताज्ञानप्रतिबन्धकज्ञानविषय-त्वेनाभावद्वयानुगमेऽपि हेतुमति तादृशाभाववत्त्वस्य तादृशाभा-ववति हेतुमत्त्वस्य तादृशाभावे हेतुसामानाधिकरण्यस्य साध्य-तद्वदादौ हेतुसमानाधिकरणतादृशाभावप्रतियोगित्वादेश्चासंग्रह इति चेत्।

अत्र वदन्ति—प्रकृतसाध्यसाधनसामानाधिकरण्यग्रहाविरो-धिनो ज्ञानस्य विषयतया अन्वयव्याप्तिग्रहविरोधितावच्छेदकत्वेन विभजनान्नासंग्रहः। अविरोधिन इत्यनेन साध्याप्रसिद्ध्यादीनां निरासः, यदि पुनरत्यन्तान्योन्याऽभावयोरेकतरगर्भव्यभिचा-रज्ञानस्य नान्यतरगर्भव्याप्तिग्रहविरोधित्वम् इत्यादिकं विभा-व्यते, तदा साध्यसामानाधिकरण्यघटितत्वेनान्वयव्याप्त्योऽनुग-मनीयाः। प्रातिस्विकरूपेणोपादाय वा तावद्व्याप्त्यवगाहित्वं ग्रह-स्य वक्तव्यम्। साध्यव्यभिचरितसामानाधिकरण्यस्य व्याप्ये प्र-सिद्धस्य हेतौ विरहोऽप्येतद्विशेष एव। विशिष्टसाधनवत्त्वग्रहावि-रोधिनो ज्ञानस्य विषयतया व्यापकत्वग्रहविरोधितावच्छेदकरूप-त्वं वा विभाजकम्। शेषं पूर्ववत्।

(दी०) साध्यतद्वतोरत्यन्तान्योन्याभावौ साध्याभाव-व्याप्यादिव्यावृत्तेन साध्यवत्ताज्ञानविरोधित्वेनानुगमय्य तत्र

हेतुसामानाधिकरण्याभावग्रहविरोधित्वं साध्यवत्ताज्ञानविरोधिनि तादृशाभावग्रहविरोधिहेत्वाभासतावच्छेदकरूपवत्त्वं वा तथा वक्तव्यम् । साध्याभावव्याप्यादौ तु हेतुसामानाधिकरण्यादिरूपविरोधित्वान्नाभासः । विरोधित्वं पूर्वोक्तदिशावसेयम् । उपदर्शितविशिष्टव्याप्तिविरहो व्याप्यत्वासिद्धिरेवेति । व्याप्तिग्रहकारणसहचारग्रहसहचार्यभावप्रतियोगिग्रहविषयत्वेनानुगम इत्यपि कश्चित् ॥

इति साधारणदीधितिः ।

(गा०) एकोपादाने-एकमात्रवृत्तिसाध्यात्यन्ताभाववद्वृत्तित्वत्वादेः साधारण्यलक्षणत्वे, अन्यतराव्याप्तिः-साध्यवदन्यवृत्तित्वादावव्याप्तिः । एतच्चान्योन्यात्यन्ताभावगर्भव्याप्तिद्वयस्यैवानुमितिप्रयोजकतामते अन्यथा । एकाभावघटितव्याप्तेरेव तथात्वे अपराभावघटितव्यभिचारस्य व्यभिचारोन्नायकतयैव विरोधितया हेत्वाभासताविरहात् । साध्यवत्ताज्ञानेति । धर्मितावच्छेदकावच्छिन्ने यद्रूपविशिष्टप्रकारकनिश्चयत्वं साध्यतावच्छेदकावच्छिन्नवत्ताज्ञानप्रतिबन्धकतावच्छेदकं तद्रूपावच्छिन्नत्वेन साध्यतद्वदत्यन्तान्योन्याभावावनुगमय्य तादृशविशिष्टवद्वृत्तित्वं साधारण्यमित्युक्तावपीत्यर्थः । तादृशाभाववत्त्वस्य-साध्यतद्वदत्यन्तान्योन्याभाववत्त्वस्य । एतत्सर्वमसमानप्रकारकज्ञानस्यापि प्रतिबन्धकतामते, अन्यथा साध्याभाववद्वृत्तिर्हेतुरित्यादिज्ञाने हेतुमति साध्याभाव इत्यादिज्ञानस्यासमानप्रकारकत्वेनाविरोधितया तद्विषयस्यानुमितौ तज्जनकज्ञाने च साक्षादविरोधितया हेत्वाभासत्वाभावेन साधारण्यरूपतानुपपत्तेः । साध्यतद्वदादौ-साध्यतावच्छेदकविशिष्टतदवच्छिन्नादौ । आदिपदात् साध्यतावच्छेदकतदवच्छिन्नपरिग्रहः । प्रतियोगित्वादेरित्यादिना तदवच्छेदकत्वपरिग्रहः ।

प्रकृतेति । विशिष्टसाध्यविशिष्टसाधनसामानाधिकरण्यग्रहत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयताशून्यनिश्चयनिष्ठविषयितायां निरूपितत्वसम्बन्धेन विशेषणीभूतान्वयव्या-

प्तिग्रहत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वेनेत्यर्थः । तादृशप्रतिबन्धकतावच्छेदकीभूततथाविधनिश्चयत्वविशिष्टस्वनिरूपितविषयिताकत्वमिति यावत् । अन्वयव्याप्तिनिवेशात् व्यतिरेकव्याप्तिग्रहाविरोधिन्यनुपसंहारित्वे नातिव्याप्तिः । अन्वयव्याप्तिश्च स्वव्यापकसामानाधिकरण्यम् । व्यभिचारिणि तदप्रसिद्धावपि तद्घटकपदार्थानां परस्परोपश्लेषावगाहिज्ञाननिवेशात् नानुपपत्तिः । असमानप्रकारकहेत्वादिधर्मिकसाध्याभावसामानाधिकरण्यादिज्ञानमपि तादृशव्याप्तिधीविरोध्येवेति न तदसङ्ग्रहः । तस्य तदविरोधित्वे व्यापकसामानाधिकरण्यसाध्याभावासामानाधिकरण्याद्यवगाहिसमूहालम्बनज्ञानाविरोधित्वमेव निवेशनीयम् तावद्व्याप्तिग्रहत्वस्य व्यभिचारधीप्रतिबध्यतायां स्वरूपसम्बन्धरूपावच्छेदकत्वविरहेऽपि न क्षतिः अनतिरिक्तवृत्तित्वरूपावच्छेदकताया एव विवक्षणीयत्वात् । साध्यसाधनसामानाधिकरण्यग्रहत्वावच्छिन्नप्रतिबन्धकताशरीरेऽपि तादृशमेवावच्छेदकत्वं निवेशनीयम् अतः साध्याप्रसिद्ध्यादेर्ग्रहस्य विशिष्टसाध्यग्रहत्वावच्छिन्नं प्रत्येव प्रतिबन्धकत्वेऽपि न तस्याविरोध्यन्तव्यावर्त्यतानुपपत्तिः । शेषं पूर्ववत् । साध्याप्रसिद्ध्यादीनामित्यादिना साध्यनिष्ठावृत्तित्वस्य व्याप्यत्वासिद्धिविशेषस्य साधनाप्रसिद्धेः साधननिष्ठावृत्तित्वस्य स्वरूपासिद्धिप्रभेदस्य साध्यसाधनयोः परस्परासामानाधिकरण्यस्य विरोधात्मकस्यासाधारण्यरूपस्य वा परिग्रहः । विशिष्टसाध्याद्युपादानस्य यथायथं साध्याप्रसिद्ध्यादिवारणप्रयोजनकत्वं बोध्यम् । धूमवान् धूमाभाववदवृत्तिवह्नेरित्यादौ धूमाभाववदवृत्तित्वादिकमसिद्धिरेव न तु साधारण्यमतो न तदसङ्ग्रहः क्षतिमावहति । साध्याभाववदवृत्तित्वाद्यवगाहिसमूहालम्बनव्याप्तिग्रहानिवेशपक्षे साध्यादेरत्यन्ताभावाप्रतियोगित्वादिकमनुपसंहारित्वं साध्यादावत्यन्ताभावप्रतियोगित्वादिग्रहाविरोधित्वविशेषणं प्रक्षिप्य वारणीयम् । नान्यतरगर्भव्याप्तिग्रहाविरोधित्वमिति । ग्राह्याभावानवगाहित्वे मणिमन्त्रादिन्यायेन विरोधित्वे मानाभावादिति भावः । सामानाधिकरण्यघटितत्वेन—अनुमितिजनकतावच्छेदकीभूतहेतुतावच्छेदकावच्छिन्नविषयतानिरूपितसामानाधिकरण्यप्रकारतात्वरूपसाधारणधर्मेण । अन्वयव्याप्त्योऽन्वयव्याप्तिप्रकारताः । अन्योन्यात्यन्ताभावघटितव्यापकतावच्छेदकावच्छिन्नसाध्यसामाना-

धिकरण्यतत्तदभावघटितव्यभिचाराभावविशिष्टसाध्यसामानाधिकरण्यप्रकारता इति यावत् । अनुगमनीयाः–प्रतिबध्यग्रहविशेषणतया निवेशनीयाः। अतो नैकाभावघटितव्याप्त्युपादानेऽन्यघटितव्यभिचारासङ्ग्रहस्यावकाश इति शेषः । यथाश्रुतग्रन्थलभ्यो विषयानुगमो नोपादेयः गौरवाद्व्यभिचारिणि हेतुव्यापकसाध्यसामानाधिकरण्यरूपविशिष्टव्याप्त्यप्रसिद्धेश्च ।

ननूक्तरूपेण नानाविधव्याप्तिविषयतानामनुगमेऽसम्भवः । एकाभावघटितव्यभिचारज्ञानप्रतिबध्यतायाः अन्याभावघटितव्याप्तिज्ञाने असत्त्वेन कस्या अपि व्यभिचारज्ञानप्रतिबध्यताया निरुक्तप्रकारताशालिग्रहत्वव्यापकत्वासम्भवात् । सामानाधिकरण्यानवगाहिव्यापकत्वादिज्ञानस्यापि व्यभिचारज्ञानप्रतिबध्यतया सामानाधिकरण्यविषयतायाः स्वरूपसम्बन्धरूपतदवच्छेदकतानाश्रयत्वेन तादृशप्रकारताशालिग्रहत्वे अनतिरिक्तवृत्तितारूपायाः प्रतिबध्यतावच्छेदकताया एव निवेशनीयत्वात् । यदि च स्वरूपसम्बन्धरूपप्रतिबध्यतावच्छेदकताघटितसाध्यसामानाधिकरण्यविषयताघटितधर्मावच्छिन्नानुमितिकारणतावच्छेदकत्वोपलक्षितविषयतावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वविषयिताकत्वं विवक्ष्यते, तदा पक्षधर्मत्वविषयत्वावच्छिन्नधीविरोधिन्यां स्वरूपासिद्धावतिव्याप्तिः । हेतुपक्षोभयवैशिष्ट्यविषयताबहिर्भूतत्वस्य जनकतावच्छेदकविषयतायां निवेशे प्रयासाधिक्यमित्येतत्कल्पं परित्यज्य समूहालंबनव्याप्तिधीविरोधित्वेन सकलव्यभिचारान् संगृह्णाति प्रातिस्विकरूपेणेति । तत्तद्व्याप्तित्वेनेत्यर्थः । तथाच समूहालंबनतावद्व्याप्तिबुद्धौ सकलव्यभिचारधियो विरोधित्वात् सर्वत्रलक्षणसमन्वय इति भावः । (ननु साध्याप्रसिद्धिसाधनाप्रसिद्धिवारणानुरोधेन विशिष्टसाध्यसाधनग्रहाविरोधित्वमेवास्तु साध्यसाधनसामानाधिकरण्यग्रहाविरोधित्वपर्यन्तं व्यर्थम् । विरोधानतिप्रसङ्गस्य सामानाधिकरण्याविषयकतावद्व्यभिचारावगाहिज्ञानोपादानेनैव संभवादित्यत आह साध्येति । तथा 'चाव्यभिचरितसामानाधिकरण्याभावस्य साधारण्यान्तर्गतस्य सङ्ग्रहाय सामानाधिकरण्यविषयकज्ञानमेवोपादेयम् । एवं च 'विरोधातिव्याप्तिवारणायैव तत्पर्यन्तं सार्थकमिति भावः । व्याप्ये प्रसिद्धस्येत्यनेन वह्निव्यापकधूम-

सामानाधिकरण्यादिरूपव्याप्तेरप्रसिद्ध्या वह्न्यादिनिष्ठतदभावे प्रसिद्धतया नातिव्याप्तेः प्रसक्तिरिति सूचितम्। एतद्विशेषः—साधारण्यविशेषः। व्याप्यत्वासिद्धिस्तु साध्याप्रसिद्ध्यादिरेवेति भावः।

अथ व्याप्तिश्चेत् साध्याभाववदवृत्तित्वविशिष्टसाध्यसामानाधिकरण्यरूपा तदा साध्याभाववद्वृत्तित्वेऽव्याप्तिस्तज्ज्ञानस्य हेतुतावच्छेदकावच्छिन्नांशेऽव्यभिचाराप्रकारकतादृशव्याप्तिज्ञानाविरोधित्वात्। साध्याभाववदवृत्तित्वं साध्यसामानाधिकरण्यमुभयं चेद्व्याप्तिस्तदा विशिष्टाभावस्य कथं साधारण्यमुररीकृतम्। यदि च विनिगमनाविरहात्साध्याव्यभिचरितत्वविशिष्टसाध्यसामानाधिकरण्यमिव साध्यसामानाधिकरण्यविशिष्टसाध्याव्यभिचरितत्वमपि व्याप्तिरित्युभयसङ्ग्रह इत्युच्यते, तथाप्यनुमितिं प्रति विशिष्टप्रकारकज्ञानस्य गौरवेण हेतुत्वासम्भवादेकत्र द्वयमिति रीत्योभयप्रकारकज्ञानस्य हेतुत्वं वाच्यम्, तथाच विशिष्टाभावज्ञानस्य जनकज्ञानाविरोधितया तद्विषयविशिष्टाभावस्य कथं हेत्वाभाससामान्यलक्षणाक्रान्तत्वमिति चेन्न।

(यतो)विशिष्टाभावपदमुभयाभावपरम् हेतुतावच्छेदकावच्छिन्नविशेषणतापन्नाव्यभिचारः सामानाधिकरण्यमुभयमेव व्याप्तिः। उभयाभावज्ञानस्य चोभयत्वप्रकारतामनिवेश्य उभयप्रकारतानिरूपितैकविशेष्यताशालिज्ञानं प्रत्येव प्रतिबन्धकत्वं लाघवात्(इति)कल्प्यते।तादृशं च ज्ञानमुभयत्वप्रकारकमिव तदप्रकारकमपीति अनुमितिहेतुभूतयुगपदुभयविशेषितहेतुविषयकज्ञानं प्रति विरोधितया तदुभयाभावस्य हेत्वाभासत्वं साधारण्यरूपता चेति न काप्यनुपपत्तिः। विशिष्टव्याप्तेरुपादाने सामानाधिकरण्यांशानिवेशे प्रयोजनविरहः। व्यापकतांशमात्रोपादानेनैव सकलसाधारण्यसङ्ग्रहसम्भवात्., तथा चाव्यभिचरितसामानाधिकरण्याभावे नातिव्याप्तिः। साध्यसाधनसामानाधिकरण्यग्रहाविरोधित्वपर्यन्तानिवेशेऽपि च न विरोधातिव्याप्तिरित्याशयेनाह विशिष्टेति। साध्यतावच्छेदकादिविशिष्टेत्यर्थः। आदिपदग्राह्यं साधनतावच्छेदकवैशिष्ट्यं साधनविशेषणं बोध्यम्। वस्तुतः साधनपदमेव साधनतावच्छेदकविशिष्टपरं साध्यपदपूर्वविशिष्टपदार्थस्य साध्यसाधनपदयोर्द्वन्द्वाश्रयण एव साधनान्वयसम्भवात्। तथाच सति द्वन्द्वात्परश्रूयमाणमत्वर्थस्य साध्येनापि समन्व-

यस्यावश्यकत्वापातात्। न च साध्यवत्त्वमपि ग्रहविशेषणतया विवक्षितम्, साध्यवत्त्वस्य व्यापकत्वाघटकतया साध्यस्यावृत्तित्वेऽतिप्रसङ्गानवकाशेन निष्प्रयोजनकत्वात्। न चावृत्तिगगनादिवारकवृत्तिमत्त्वमपि व्यापकताघटकमिति मते तत्सार्थक्यमिति वाच्यम्। अनुमितौ वृत्तिमत्त्वघटितव्यापकतावगाहित्वेन हेतुत्वेऽपि प्रकृतलक्षणे तदंशघटितव्यापकतां निवेश्य साध्यवत्त्वग्रहविरोधित्वनिवेशस्य 'प्रक्षालनाद्धि' इति न्यायेनायुक्तत्वात्। साध्याप्रसिद्धिसाधनाप्रसिद्ध्योर्वारणाय साध्यतावच्छेदकादिवैशिष्ट्यनिवेशनम्। व्यापकताघटकसाधनवत्त्वग्रहविरोधिनः साधननिष्ठावृत्तित्वस्य वारणाय साधनवत्त्वपर्यन्तानुधावनम्। साध्याभाववद्वृत्तित्वज्ञानस्य व्यापकताज्ञानाविरोधित्वे साध्याभाववदवृत्तित्वादिविषयकसमूहालंबनरूपव्यापकताग्रहो विवक्षणीयः। अथवा व्यापकताघटितव्याप्तिधीरेवानुमितिहेतुः न तु साध्याभाववदवृत्तित्वादिधीस्तथा च साध्यतावच्छेदके हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वादिकमेव व्यभिचारः, न तु हेतौ साध्याभाववदवृत्तित्वादिकं साक्षादनुमितिजनकज्ञानाविरोधित्वादिति मतेनायं कल्पः।

ननु अत्यन्तान्योन्याभावगर्भव्यापकतयोरेकोपादानेऽन्यतरगर्भव्यभिचारासङ्ग्रहः एकाभावगर्भव्यापकताबुद्धौ अन्यतरगर्भव्यभिचारज्ञानस्य ग्राह्याभावानवगाहितयाऽविरोधित्वादित्यत आह शेषं पूर्ववदिति। अनुमित्यौपयिकसाध्यविशेष्यतानिरूपितप्रकारतात्वेन द्विविधव्यापकत्वप्रकारते अनुगमनीये, प्रातिस्विकरूपेण वा तत्तद्व्यापकताप्रकारकत्वं ज्ञाने निवेशनीयमित्यर्थः। साध्याभाववद्वृत्तित्वसाध्यवदन्यावृत्तित्वरूपव्याप्तिद्वयमेवानुमित्यौपयिकं न तु व्यापकताघटितमिति मते हेतौ साध्याभाववदवृत्तित्वादिकमेव दोषः। न तु साध्यतावच्छेदके हेत्वव्यापकतावच्छेदकत्वं परमुखनिरीक्षकत्वात्, तन्मते च उक्तलक्षणे लक्ष्यापरिग्रहोऽलक्ष्यपरिग्रहश्चेति तत्परित्यज्य साध्यात्यन्ताभाववद्वृत्तित्वसाध्यवद्भिन्नवृत्तित्वसंग्राहकं लक्षणमाह साध्यतद्वतोरिति। साध्याभावव्याप्ये हेतुसामानाधिकरण्यादिवारणाय साध्यभावव्याप्यादिव्यावृत्तेनेति। आदिपदात् साध्याभावावच्छेदकपरिग्रहः। तत्र-तादृशाविरोधिताश्रये, यो हेतुसामानाधिकरण्याभावग्रहः तद्विरोधित्वम् तदभावव्याप्यादिव्यावृत्तं त-

ज्ञानविरोधित्वं च तद्वत्तानिश्चयप्रतिबध्यतावच्छेदिका सती तद्वत्ताज्ञानप्रतिबन्धकतावच्छेदिका या प्रकारता तदाश्रयत्वम्। तदभावव्याप्यवत्ताज्ञानस्य तद्वत्तानिश्चयाप्रतिबध्यतया तद्विषयव्युदासः। वह्निव्याप्यसाध्यकस्थले वह्न्यभावे हेतुसामानाधिकरण्यवारणाय प्रतिबन्धकताविवेशः।

अथ घटाभावादेरपि वन्ह्यभावत्वादिना ज्ञानस्य वह्निमत्ताज्ञानविरोधित्वात् घटाभावादिसामानाधिकरण्येऽपि वह्न्यादिसाध्यके व्यभिचारः स्यात्, साध्यवत्ताज्ञानविरोधितावच्छेदकीभूतविषयतानिरूपितहेतुसामानाधिकरण्याभावविषयताशालिग्रहाविरोधितानिवेशे चासम्भवः—धर्मितावच्छेदकावच्छिन्नविषयतानिरूपितसाध्याभावप्रकारताया एव साध्यवत्ताज्ञानप्रतिबन्धतावच्छेदकतया साध्याभावो न हेतुसामानाधिकरण इति ज्ञानीयसाध्याभावविषयताया अतथात्वादिति चेन्न।

फलीभूतज्ञानधर्मितावच्छेदकावच्छिन्नविशेष्यतानिरूपितयद्रूपावच्छिन्नप्रकारताशालिनिश्चयत्वेन तद्धर्मावच्छिन्नविशेष्यकसाध्यवत्ताज्ञानप्रतिबन्धकता तद्रूपावच्छिन्नांशे हेत्वसामानाधिकरण्यग्रहविरोधितानिवेशेनातिप्रसङ्गाभावात् साध्याभावत्वादेरेव तादृशरूपत्वात्। काञ्चनमयधूमवान् वन्हेरित्यादौ धूमो न काञ्चनमय इति ज्ञानस्यापि साध्यतावच्छेदकविशिष्टसाध्यवत्ताज्ञानविरोधित्वात् काञ्चनमयत्वाभावसामानाधिकरण्येऽतिप्रसङ्गः। साध्यतावच्छेदकविशिष्टसाध्यवत्ताज्ञानत्वेन यद्रूपावच्छिन्नप्रकारकनिश्चयप्रतिबध्यतेत्युक्तौ तत्र विशेष्य धूमाभावसामानाधिकरण्यासङ्ग्रहः—धूमत्वावच्छिन्नाभावनिश्चयप्रतिबध्यतावच्छेदककोटौ कांचनमयत्वविषयताया अनिवेशात्। यत्किञ्चिद्धर्मावच्छिन्नविशेष्यताकविशिष्टसाध्यवत्ताज्ञानत्वव्यापकप्रतिबध्यतानिवेशे च धूमो न काञ्चनमय इति ज्ञानप्रतिबध्यतायाः काञ्चनमयत्वविशिष्टधूमादिमत्ताज्ञानत्वव्यापकतया उक्तातिप्रसङ्गस्य दुर्वारतेत्यतः फलीभूतज्ञानधर्मितावच्छेदकावच्छिन्नविशेष्यतानिवेशः। यद्यपि धूमत्वादेरपि काञ्चनमयत्वादिविशिष्टधूमादिमत्ताज्ञानधर्मितावच्छेदकत्वमक्षतमेव—काञ्चनमयधूमवान् धूम इत्यताादृशज्ञानस्यापि कदाचिदुत्पादात्, तथापि विशिष्टसाध्यवत्तादिज्ञानधर्मितावच्छेदको यो यो धर्मस्तत्तद्धर्मावच्छि-

प्रविशेष्यतानिरूपितयद्रूपावच्छिन्नप्रकारताः तद्धर्मावच्छिन्नविशेष्यकविशिष्टसाध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदिकाः तद्रूपावच्छिन्नत्वस्य विवक्षितत्वान्नातिप्रसङ्गः। हेत्वसामानाधिकरण्यविषयतानिरूपितसाध्यवत्ताधीविरोधितावच्छेदकत्वोपलक्षितधर्मावच्छिन्नविषयतायाः स्वरूपसम्बन्धरूपं प्रतिबध्यतावच्छेदकत्वमेव निवेश्यम् न त्वनतिरिक्तवृत्तित्वम्, तेनान्योन्याभावघटितव्यभिचारधियोऽत्यन्ताभावघटितव्यभिचारधियश्च प्रत्येकप्रतिबध्यतायास्तादृशविषयितात्वावच्छिन्नव्यापकताविरहेऽपि न क्षतिः। अत एव साधनाप्रसिध्यादावपि नातिप्रसङ्गः–साध्याभावादिविषयतायास्तत्प्रतिबध्यतावच्छेदककोटावनिवेशात्। हेत्वसामानाधिकरण्यविषयतायां च धर्मितावच्छेदकताभिन्नत्वमुपलक्षणविधया निवेश्यम्, तेन धूमासमानाधिकरणवह्न्यभावो न घटसमानाधिकरण इति ज्ञानविरोधिनि धूमासमानाधिकरणवह्न्यभावादौ घटादिसामानाधिकरण्ये नातिप्रसङ्गः।

साध्याभावव्याप्यसाध्याभावावच्छेदकादिसामानाधिकरण्यवारणाय दर्शितप्रकारापेक्षया लघुप्रकारान्तरमाह साध्यवत्तेति।तादृशाभावेति। हेतुसामानाधिकरण्याभावेत्यर्थः। हेत्वाभासतेति। दोषत्वेत्यर्थः। विशेष्यदलप्रयोजनं स्फुटयति साध्याभावेति। अविरोधित्वात्–अनुमितिजनकज्ञानाविरोधित्वात्। अत्र च प्रकृतानुमितिजनकज्ञानविरोधित्वमेवाभासत्वम्, न तु बाधादिसाधारणगुरुशरीरानुमितिसाधारणोक्तानुगमकप्रकारघटितं तत्प्रयोजनाभावात्। अनुमितिजनकज्ञानस्यापि अनुमितिजनकतावच्छेदककोटिप्रविष्टविषयतावच्छिन्नत्वेन निवेशः, न तु विशिष्टपक्षे विशिष्टसाध्यव्याप्यविशिष्टहेतुवैशिष्ट्यावगाहिज्ञानत्वेन, तथा सत्यत्यन्तान्योन्याभावघटितनानाव्याप्तीनामननुगमेन तादृशनानाविधव्यभिचारसङ्ग्रहासम्भवात्तावद्व्याप्त्यवगाहिसमूहालम्बनानुमितिनिवेशेन तत्सङ्ग्रहसम्भवेपि पक्षधर्मत्वाद्यवगाहितायाः प्रयोजनविरहेण निवेशप्रसङ्गेन तादृशाभावग्रहविरोधित्वविशेषणवैयर्थ्याच्च॥

नन्वेतत्कल्पे धूमाभावव्याप्यासमानाधिकरणवह्निमान् वह्नेरित्यादौ वह्निनिष्ठधूमाभावव्याप्यसामानाधिकरण्यरूपाश्रयासिद्ध्यादावतिव्याप्तिरित्यत आह विरोधित्वमिति। पूर्वोक्तदिशेति। विशे·

ष्टपक्षग्रहाद्यविरोधिज्ञानस्य विषयतयेत्यर्थः ।

यत्तु धूमवान् धूमाभावसमानाधिकरणवह्नेरित्यादौ हेतुतावच्छेदकधूमाद्यभावसामानाधिकरण्यादिविशिष्टवह्न्यसामानाधिकरण्यस्य धूमाद्यभावेऽनाहार्यज्ञानाप्रसिद्ध्या तत्स्थलीयसाधारण्येऽव्याप्तिरित्याशंकायां विरोधित्वमित्यादिकमवतार्य निर्वह्निर्वह्निमानित्यादिस्थलीयदोषे सामान्यलक्षणाव्याप्तिवारकपूर्वोक्तप्रकारानुसरणपरतया तद्व्याख्यानम् ।

तन्नशोभनम्–पूर्वमेवंविधैव रीतिः उत्तरत्र सर्वत्र सव्यभिचारादिलक्षणेऽनुसर्त्तव्या इत्यभिधानेनैव पौनरुक्त्यापातात्।नन्वव्यभिचरितत्वविशिष्टसामानाधिकरण्याभावस्याव्यभिचारज्ञानाविरोधित्वादव्याप्तिरित्याशङ्कां तस्यालक्ष्यतामङ्गीकृत्य परिहरति उपदर्शितेति।व्याप्तिग्रहे संशयसाधारणव्यभिचारधियो विरोधित्वात् ज्ञानत्वेन प्रतिबन्धकत्वमेव लक्षणे प्रवेश्यम्, अतो न साधनाप्रसिद्ध्यादावतिव्याप्तिस्तेषां निश्चयस्यैव विशिष्टसाधनादिग्रहे विरोधित्वादित्याशयेन विशिष्टसाधनवत्त्वादिग्रहाविरोधित्वमनिवेश्य लक्षणं कुर्वतां मतमाह व्याप्तिग्रहेति । अत्र व्याप्तिग्रहकारणत्वमेवाभावे निवेश्यम्, न तु तादृशसहचारदर्शनसहकारित्वमव्यावर्त्तकत्वात् । तदभिधानं च सहचारदर्शनस्य यथा व्यापकताप्रत्यक्षे स्वातन्त्र्येण कारणता तादृशी या संशयसाधारणज्ञानाभावकारणता सैवात्र निवेश्या न तु ग्राह्याभावनिश्चयाभावविधया कारणतेति प्रदर्शनाय । व्याप्तिश्च विशिष्यैकैवोपादेया। मणिमन्त्रादिन्यायेन प्रतिबन्धकतामते एकैकविधव्याप्तिज्ञानं प्रत्यपि नानाविधव्यभिचारधियो विरोधित्वादित्यवधेयम् । मणिमन्त्रादिन्यायेन विरोधितायामस्वरसात् केचिदित्युक्तम् ॥

इति श्रीगदाधरभट्टाचार्यचक्रवर्तिविरचितायां गादाधर्यां
साधारणप्रकरणम् ।

अथानुमानगादाधर्याम्

असाधारणप्रकरणम् ।

(चि०) सर्वसपक्षविपक्षव्यावृत्तोऽसाधारणः । ननु सपक्षत्वं न साध्यवन्मात्रत्वम्, विपक्षावृत्तेर्वृत्तिमतः साध्यवद्वृत्तित्वानियमात् । नापि पक्षातिरिक्तसाध्यवत्त्वम्, शब्दोऽनित्यः शब्दत्वादित्यादेर्व्याप्तिधीदशायामप्यसाधारणतापत्तेः । न चेष्टापत्तिः, बाधप्रतिरोधौ विना व्याप्तिपक्षधर्मतया ज्ञातादनुमितिनियमादिति चेन्न । सर्वनिश्चितसाध्यवद्विपक्षव्यावृत्तत्वस्य तत्त्वात्, शब्दत्वानित्यत्वव्याप्तिग्रहे सति शब्दे साध्यनिश्चयान्नातिव्याप्तिः । न च घटोऽयमेतत्त्वादिति सद्धेतावतिव्याप्तिः, साध्यसन्देहदशायां तस्य हेत्वाभासत्वात् । यद्यपि भूर्नित्या गन्धवत्त्वादित्यादिर्वस्तुनः साधारणः, शब्दो नित्यः शब्दत्वादिति विरुद्धः, शब्दोऽनित्यः शब्दत्वादित्यादिः सद्धेतुरेव, व्याप्त्यज्ञानस्य पुरुषदोषत्वादित्युदाहरणाभावादसाधारणो न पृथक् । तथापि पक्षतादशायां साध्यतदभावानिश्चयेन तस्य दोषत्वम्, अन्यथा पक्षत्वभङ्गप्रसङ्गात् ।

(दी०) प्राचां मतेनोत्तरयति न सर्वेत्यादि । सर्वेति विपक्षेऽप्यन्वेति, तेन साध्याभावन्यूनवृत्तेर्व्युदासः । विपक्षत्वस्य निश्चयगर्भत्वात् भूरनित्या गन्धवत्त्वात् ,नित्यः शब्दः शब्दत्वादित्यादौ नाव्याप्तिः । पृथिवी रूपवती रसादित्यादौ जलादेर्नीरसत्वभ्रमे पुनरसाधारण्यभ्रम एवेति मन्तव्यम् । तथापीति । पक्षत्वं–सन्दिग्धसाध्यकत्वम् ।

(गा०) ननु चिन्तामणिकारमते सत्प्रतिपक्षस्योत्थापकतया असाधारण्यस्य दूषकत्वात् साध्यव्यापकीभूताभावप्रतियोगित्वमेवासाधारण्यमिति न सर्वेत्यादिग्रन्थासङ्गतिरित्यत आह प्राचामिति। साध्याभावन्यूनवृत्तेरिति। पर्वतो वह्निमान् जलत्वादित्यादेरित्यर्थः। तत्रापि घटादिरूपयत्किञ्चिद्विपक्षव्यावृत्तत्वसत्त्वादिति भावः। ननु भूरनित्या गन्धवत्त्वादित्यादौ पार्थिवपरमाणुरूपविपक्षवृत्तित्वादव्याप्तिरिति विपक्षपदस्य वास्तवसाध्याभाववदर्थकत्वाभिमानमूलामाशङ्कां निराकरोति विपक्षत्वस्येति। ननु पृथिवी रूपवती रसादित्यादिकं जलादेः नीरसत्वभ्रमदशायामसाधारणमेव सपक्षजलादिव्यावृत्तत्वस्य तदानीं हेतौ ग्रहादिति तत्राव्याप्तिर्वास्तवसपक्षजलादिव्यावृत्तत्वासत्त्वादित्याशंकामलक्ष्यतया परिहरति पृथिवीति।

मूले तथापीति। तथापि-शब्दे अनित्यत्वनित्यत्वयोः साध्यतायां शब्दत्वस्य सद्धेतुत्वविरुद्धत्वेपि। साध्यतदभावेति। हेतुमति पक्षे साध्यानिश्चयेन व्याप्तिग्रहाभावात्सद्धेतावपि तत्र साध्याभावानिर्णयेन साध्याभावव्याप्यत्वरूपविरोधस्याग्रहेण विरुद्धहेतावप्यसाधारण्यदोषत्वं युक्तमेवेत्यर्थः। अन्यथा-तदानीमपि साध्यतदभावान्यतरानिश्चये।

ननु सिषाधयिषाविरहविशिष्टसिद्ध्यभावरूपपक्षतायाः साध्यनिश्चयदशायामपि सिषाधयिषासत्त्वे बाधनिश्चयदशायामपि चाक्षतत्वात्र तद्भङ्गप्रसङ्ग इत्यत आह दीधितौ पक्षत्वमिति।

(चि०) अथ सर्वसपक्षव्यावृत्तिरेव दोषो न विपक्षव्यावृत्तिरपि, तस्या अनुगुणत्वात् प्रत्युत विपक्षव्यावृत्तत्वेन व्यतिरेकितया परसाध्यसाधकमेवोपन्यस्तं स्यात्। न च संशायकतया दोषत्वं तच्चोभयव्यावृत्तत्वज्ञानादिति वाच्यम्। व्याप्तिग्राहकं सहचारज्ञानं (१)तदभावद्वारेण सपक्षव्यावृत्तिमात्रस्य दोषत्वात्।

(दी०) मतं दूषयति अथेत्यादि। व्याप्तीति। तथाच स्वतो दूषणाक्षमत्वान्नाभासत्वम् उपाधिवदिति भावः। एकध-

(१) तदभावद्वारेणेति गदाधरभट्टाचार्याभिमतः पाठः किन्तूपलब्धचिन्तामणिपुस्तकेषु सर्वत्रायमेवोपलभ्यत इति न धृतः॥

र्मिव्यावृत्तत्वश्च न सामानाधिकरण्यग्रहविरोधि धर्म्यन्तरे तत्सम्भवात्, अन्यथा सतोरपि साध्यसाधनयोर्व्यतिरेकित्वं दोषाय स्यात् ।

अथायं शङ्कितुरभिप्रायः-पक्षे साध्याभावस्य संशयो निश्चयश्चानुमितिविरोधी विरोधिविषयकत्वात्, तत्सामग्री च विरोधिसामग्रीत्वेन, तत्रादिमस्य सामग्रीपक्षे सव्यभिचारस्य हेतोर्ग्रहः द्वितीयस्य तु प्रतिहेतोः परामर्शः अतस्तयोराभासत्वम् । अत एव सव्यभिचारलक्षणे पक्षवृत्तित्वं विशेषणम् साध्याभाववद्वृत्तित्वमात्रं पुनरसिद्धिरेवेति विरोधान्यस्य परामर्शविरोधिनो रूपस्य तत्त्वादिति ।

मैवम् । बाधसंशयस्य प्रतिबन्धकत्वानङ्गीकारात् साधारणधर्मवत्ताज्ञानस्य संशयसामग्रीत्वाभावात् सामग्रीत्वेन प्रतिबन्धकत्वे हेत्वाभासत्वायोगाच्च । अन्यथा पक्षस्य साध्यतदभाववद्वृत्तिप्रमेयत्वादिमत्त्वं सर्वत्र हेतावाभासीभवेत्, तथा कामिनीजिज्ञासाप्रयोजकं तज्ज्ञानेष्टसाधनत्वादिकमपि ॥

(गा०) मणिकारमते विपक्षव्यावृत्तेरसाधारण्याघटकतया तन्मते अथेत्यादिना तस्याद्दूषणोपयोगितानिराकरणमसंगतम् इति तद्घटितासाधारण्यवादिप्राचीनमतदूषणपरतया तत्सङ्गमयति मतमिति । प्राचामित्यादि ।

मूले दोष इति । दोषविधयोद्भाव्य इत्यर्थः । तस्या-विपक्षव्यावृत्तेः, अनुगुणत्वात्-प्रकृतसाध्यसिद्ध्यप्रतिकूलोद्भावनकत्वात्, प्रत्युत विपक्षव्यावृत्तत्वेनोपन्यस्तं लिङ्गं व्यतिरेकिमुद्रया प्रकृतसाध्यसाधकमेव स्यात्, तथाच परार्थस्थलेऽपि विपक्षव्यावृत्तत्वसहितं सपक्षव्यावृत्तत्वमनुद्भाव्यत्वेन नासाधारण्यदोष इति भावः ।

केवलसपक्षव्यावृतत्वं कोटिद्वयानुपस्थापकत्वेन न साध्यसंशायकं किन्तु मिलितमेवेति दोषतया मिलितमेवोद्भाव्यमित्याशंकते नचेति । संशायकमसाधारण्यं यद्यपि विपक्षव्यावृत्तत्वघटितम्

तथापि तादृशस्य दोषत्वं नोपपद्यते विरोधिज्ञानविषयस्यैव दोषत्वात् विपक्षव्यावृत्तत्वांशज्ञानस्य चाविरोधित्वादित्याशयेनाह व्याप्तीत्यादि। तदभावद्वारेण–तदभावप्रयोजकज्ञानविषयतयैव–एवकारेणानुमितितज्जनकज्ञाने साक्षाद्विरोधिविषयत्वव्यवच्छेदः। तद्व्यवच्छेदफलं दीधितिकृदेव स्फुटयति तथाचेति। स्वतो दूषणाक्षमत्वात्–अनुमितौ तत्कारणज्ञाने च साक्षादविरोधित्वात्, नाभासत्वं-सपक्षव्यावृत्तत्वस्यापि न हेत्वाभासत्वम्। एतेन विपक्षव्यावृत्तत्वस्य दूषणानुपयोगित्वे तदंशपरित्यागेनैव हेत्वाभासता स्वीकार्येति निराकृतम्। एवं च स्वार्थानुमानेऽपि सर्वसपक्षव्यावृत्तिरेव दोष इत्युक्तमित्यग्रिममूलस्यापि स्वार्थानुमानेपि विपक्षव्यावृत्तेर्दूषणानौपयिकत्वं सपक्षव्यावृत्तत्वस्य सहचारधीविरोधितया तथात्वेपि न हेत्वाभासत्वमित्युक्तमित्यर्थो बोध्यः।

ननु सहचारग्रहविरोधित्वे व्याप्तेः सहचारघटिततया तद्ग्रहेपि साक्षाद्विरोधित्वमेव तस्येति न कथं हेत्वाभासत्वमित्याशङ्कां परिहरति एकधर्मिव्यावृत्तत्वं चेति। निश्चितसाध्यवद्व्यक्तिवृत्तित्वाभावश्चेत्यर्थः। सामानाधिकरण्येति। साध्यवद्वृत्तित्वसामान्येत्यर्थः। धर्म्यन्तरे–साध्यवद्व्यक्त्यन्तरमन्तर्भाव्य, तत्सम्भवात्—साध्यसामानाधिकरण्यग्रहोदयात्। इदमुपलक्षणम्। साध्यवत्त्वरूपसामान्यधर्मपुरस्कारेण तद्धर्मिणमन्तर्भाव्यापि तत्सम्भवो द्रष्टव्यः। तथाच तत्तद्धर्मिव्यावृत्तत्वरूपविशेषाभावग्रहस्य प्रत्येकं साध्यसामानाधिकरण्यसामान्यग्रहाविरोधित्वे तादृशविशेषाभावकूटात्मकासाधारण्यग्रहस्यापि तदविरोधित्वान्न तस्य सामानाधिकरण्यसामान्यघटितव्याप्तिज्ञाने साक्षाद्विरोधित्वमिति भावः। अन्यथा—यत्किञ्चिदधिकरणान्तर्भावेन सामानाधिकरण्यग्रहविरोधिनोपि दोषत्वे, सतोः–समीचीनयोः साध्यसाधनयोः वह्निधूमाद्योः, व्यतिरेकित्वं–ह्रदाद्यवृत्तित्वम्। दोषाय स्यादिति। तस्यापि ह्रदाद्यन्तर्भावेन सहचारग्रहविरोधित्वादिति भावः।

संशायकतया विपक्षव्यावृत्तत्वघटितासाधारण्यस्य दोषत्वं शङ्कितुः संशायकज्ञानस्यानुमितिं प्रति साक्षात्प्रतिबन्धकत्वमभिप्रेतम्, अन्यथा शङ्काया अतितुच्छतापत्तेः, तादृशगूढाभिप्रायमबुद्ध्वैव च 'व्याप्तिग्राहक'मित्यादिना तादृशस्य दोषतां मणिकारो निराकार्षीदतो

न्यूनताभङ्गाय तादृशाभिप्रायमाशंक्य निराकुरुते अथायमित्यादिना। निश्चयश्चेति दृष्टान्तार्थम्। विरोधिसामग्रीत्वेन-विरोधिज्ञानसामग्रीत्वेन, विरोधिनीति लिङ्गविपरीतेनान्वयः। आदिमस्य-संशयस्य, सव्यभिचारस्य-साधारण्येनासाधारण्येन वा विशिष्टस्य, द्वितीयस्य-साध्याभावनिश्चयस्य, प्रतिहेतोः-साध्याभावव्याप्यस्य, परामर्शः-पक्षे परामर्शः, तयोः-तादृशग्रहविषयव्यभिचारसत्प्रतिपक्षयोः,अत एव-व्यभिचारस्य संशायकतया दोषत्वादेव, पक्षवृत्तित्वं विशेषणं यथाश्रुतमेव सम्यगिति शेषः। पक्षावृत्तेः पक्षे साध्यसंशयाप्रयोजकतया पक्षवृत्तित्वे सतीत्यादिलक्षणस्याप्युक्तरीत्या व्यभिचारस्य दूषकतापक्षे एवोपगमात्तदलक्ष्यत्वेन तत्राव्याप्त्यप्रसञ्जकत्वात् इति भावः। एवं च यद्रूपावच्छिन्नप्रकारताशालिनिश्चयत्वेन साध्यवत्तानिश्चयत्वावच्छिन्नं प्रति प्रतिबन्धकता पक्षवृत्तित्वे सति तद्रूपवत्त्वं तादृशलक्षणार्थः। साध्याभावव्याप्यवत्ताज्ञानस्य न निश्चयत्वं प्रतिबध्यतावच्छेदकमिति न सत्प्रतिपक्षातिव्याप्तिः। वन्ह्यभावत्वाद्यवच्छिन्नवत्ताज्ञानस्यापि निश्चयत्वेन प्रतिबन्धकता न निश्चयत्वावच्छिन्नं प्रति अतो न ह्रदो वह्निमान् वन्ह्यभावादित्यादावतिप्रसङ्ग इत्यवधेयम्। नन्वेवं पक्षवृत्तित्वेन साध्यवद्वृत्तित्वेन चाघटितस्य साध्याभाववद्वृत्तित्वस्य व्याप्तिज्ञानविरोधितया हेत्वाभासस्याधिक्यापत्तिर्व्यभिचारानन्तर्भावादित्यत आह साध्याभावेति।

असिद्धिरेवेति। व्याप्यत्वासिद्धिरेवेत्यर्थः। तत्त्वादिसिद्धित्वात्। यद्यपि परामर्शविरोधित्वं साधारण्यस्यापि साध्याभाववद्वृत्तित्वांशघटितत्वात् अक्षतमेव, तथापि मेयत्वादिविशिष्टासिद्धावतिप्रसङ्गभंगाय तादृशविरोध्यन्तराघटितत्वनिवेशस्यावश्यकत्वान्नातिप्रसङ्गः।

प्रतिबन्धकत्वानङ्गीकारादिति। निश्चयत्वस्यार्थसमाजग्रस्ततया संशयानन्तरमसति विशेषदर्शने निश्चयत्वावच्छिन्नापत्तेरयोगादिति भावः। तथा च संशयसामग्र्या अपि प्रतिबन्धकत्वमसिद्धमिति भावः। संशयसामग्र्याः प्रतिबन्धकत्वमभ्युपेत्य दूषयति साधारणधर्मवत्ताज्ञानस्येति। तन्मात्रस्येत्यर्थः। ननु तन्मात्रे सामग्रीत्वपर्याप्तिविरहेऽपि प्रतिबन्धकसामग्रीघटकत्वेन तस्य प्रतिबन्धकत्वमव्याहतमेवेत्यत आह सामग्रीत्वेनेति। सामग्र्यन्तर्गततयेत्यर्थः। हेत्वाभासत्वायोगादिति। तद्विषयस्येत्यादिः। यादृशविशिष्टविषयकनिश्चय-

त्वमनुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तादृशत्वमेव हेत्वाभासत्वम् प्रतिबन्धकसामग्रीघटकज्ञानविषयसाधारण्यादिश्च न तथा विशेषदर्शनादिकालीने अप्रतिबन्धकीभूतज्ञानेपि तद्विषयकनिश्चयत्वसत्त्वादिति भावः । अन्यथा–यथाकथंचिल्लक्षणं परिष्कृत्य प्रतिबन्धकसामग्रीघटकज्ञानविषयस्य हेत्वाभासत्वोपपादने, मेयत्वादिहेतौ साध्यतदभावसहचरितमेयत्ववान् पक्ष इत्यादिज्ञानविषयस्य दोषतापत्तिः इष्टत्वात् ! सर्वत्रेति । तथाच धूमादिहेतौ तस्यादोषत्वेन नेष्टापत्तिसम्भव इति भावः । आभासीभवेदिति । धूमादिहेतुकानुमितावपि तज्ज्ञानस्य संशयसामग्रीत्वेन प्रतिबन्धकत्वादिति भावः । विरोधिज्ञानसामग्रीविधया यज्ज्ञानं प्रतिबन्धकं तत्राभासतामापाद्य विरोधिजिज्ञासासामग्रीविधया प्रतिबन्धकस्य विषये तामापादयति तथेति । प्रयोजकत्वं–जनकज्ञानविषयत्वम् ॥

(चि०)किञ्च शब्दोऽनित्यः शब्दत्वादित्युक्त्वा निवृत्ते तावन्नेदमुद्भाव्यं न्यूनत्वेनैव वादिनिग्रहात् तदुद्भावने वादिनिवृत्तेश्च । न च न्यूनत्वे तदुपजीव्यम्, असाधारण्यव्यतिरेकेणापि तदुद्भावनात् । न च व्यतिरेकिप्रयोगे तदुपन्यासः, व्याप्तिपक्षतयोरप्रतिक्षेपेऽकिञ्चित्करत्वात् स्वार्थानुमाने च सर्वसपक्षव्यावृत्तिरेव दोष इत्युक्तमिति ॥

(दी०) एवं विशिष्टस्यानुद्भाव्यत्वं व्युत्पाद्य केवलस्यापि सपक्षव्यावृत्तत्वस्य तथात्वं व्युत्पादयति किञ्चेति । वाद्युपदर्शितदृष्टान्तस्य साधनवैकल्यन्तु नासाधारण्यम्, सपक्षान्तरवृत्तित्वेऽपि तत्सम्भवात् । तदुद्भावनन्तु तस्य निग्रहस्थानत्वात्, विभाजकसूत्रस्थानुक्तसमुच्चायकचकारेण तस्य समुचितत्वात् तदुदाहरणस्याभासताप्रदर्शनायैव वा, आवश्यकश्च प्राचां दृष्टान्तप्रयोग इति भावः । माभूत् परार्थानुमानेऽसाधारण्यं दोषः स्वार्थे तु स्यादत आह स्वार्थेति ।

(ग०) विपक्षव्यावृत्तत्वस्य व्याप्तिपक्षधर्मताग्रहाविरोधित्वेनानुद्भावनीयतायाः प्रागेव व्यवस्थापितत्वात् किञ्चेत्यादिग्रन्थस्य तत्परत्वं न घटते पौनरुक्त्यप्रसङ्गात् । न च पूर्वं अन्वयिनि दृष्टान्तासम्भवेन न्यूनताया आवश्यकतया न तदुद्भावनं निराकृतमिति न पौनरुक्त्यप्रसङ्ग इति वाच्यम् । एवमपि व्यतिरेकिणि व्याप्तिपक्षधर्मत्वाप्रतिक्षेपकतया तदुद्भावननिराकरणपौनरुक्त्यस्य दुर्वारत्वादित्यतः केवलसपक्षव्यावृत्त्युद्भावननिराकरणपरतया किञ्चेत्यादिमूलमवतारयति एतदपीति । एवं-उक्तप्रकारेण, विशिष्टस्य-विपक्षव्यावृत्तत्वविशिष्टस्य । ननु साधनविकलस्यापि घटादेः विशेषादर्शनदशायामिव विशेषदर्शनदशायामप्याहार्यसाधनवत्त्वभ्रमादिना दृष्टान्तविधया उपन्यासः सम्भवत्येवेति तत्र न्यूनताविरहेणासाधारण्योद्भावनसार्थक्यम् , न च तत्र दृष्टान्तस्य साधनवैकल्योद्भावनेनैव वादिनिवृत्तिसम्भवादसाधारण्यस्य दोषत्वमनावश्यकमिति वाच्यम् , दृष्टान्तस्य निश्चितसाध्यवतः साधनवैकल्यस्यैवासाधारण्यत्वादित्याशङ्कां निरस्यति वाद्युपदर्शितेति । यावन्निश्चितसाध्यवति साधनवैकल्यमसाधारण्यमेवेति वाद्युपदर्शितत्वाभिधान एकदेशे साधनवैकल्यस्य यावति साधनवैकल्यानतिरिक्ततया तस्यासाधारण्यत्वनिषेधासङ्गतेस्तदुद्भावनपर्यन्तमसाधारण्योद्भावनत्वप्रतिषेधः । सपक्षान्तरवृत्तित्वे पीति । हेतोरिति शेषः । तत्सम्भवात्-वाद्युपदर्शितस्य दृष्टान्तस्य साधनवैकल्यसम्भवात् । नन्वेवं दृष्टान्तस्य साधनवैकल्यं हेत्वाभासबहिर्भूततया क्वापि नोद्भाव्येतेत्यत आह तदुद्भावनं त्विति । ननु 'प्रतिज्ञाहानिः प्रतिज्ञान्तर'मित्यादिनिग्रहस्थानविभाजकसूत्रेऽस्यागणनाश्च निग्रहस्थानतेत्यत आह विभाजकेति । आभासताप्रदर्शनायैव तदुद्भावनमित्यनुषङ्गेनान्वयः। आभासता-बाधितसाधनवत्त्वार्थकता, सा चापार्थकत्वरूपनिग्रहस्थानमिति भावः। ननु यथा घट इत्यादि दृष्टान्तप्रयोगस्य समयबन्धाधीनत्वेनानियतत्वात् यत्र तच्छून्यमेवोदाहरणं प्रयुक्तं तत्रैवासाधारण्यमुद्भावनीयमित्यत आह आवश्यकश्चेति । तथाच तदप्रयोगे न्यूनत्वमेवेति भावः ॥

इति गादाधर्यामसाधारणपूर्वपक्षग्रन्थः ॥

(चि०) उच्यते। शब्दत्वं साध्यवतस्तदभाववतश्च निवृत्तत्वेन ज्ञातमर्थाद्व्यतिरेकितया वा पक्षे साध्यं तदभावञ्च साधयत्—अविशेषात्, अन्यथा पक्षवृत्तित्वानुपपत्तिरिति साध्यतदभावोत्थापकतया स्वार्थानुमानेऽसाधारणो दोषः। सत्प्रतिपक्षे द्वौ हेतू तथा, अत्र त्वेक एवेति तयोर्भेदः। असाधारणेन व्यतिरेकिप्रयोगे परस्य सर्वसपक्षव्यावृत्तत्वमात्रमुद्भाव्यं साध्याभावोत्थापकत्वात्, न विपक्षव्यावृत्तत्वमपि प्रतिकूलत्वात् व्यर्थत्वाच्च।

यद्वा विपक्षव्यावृत्ततया साध्यमिव सपक्षव्यावृत्ततया साध्याभावमपि साधयेदिति दृष्टान्ततया प्रतिबन्धितया वा तदुद्भावनमपि। लक्षणन्तु सर्वसपक्षव्यावृत्तत्वम् न तु विपक्षव्यावृत्तत्वमपि व्यर्थविशेषणत्वात्। विरुद्धमप्यनेनोपाधिनाऽसाधारणमेव। अन्यथैतदवगमे विरुद्धत्वाज्ञाने हेत्वाभासान्तरतापत्तेः॥

इत्यसाधारणचिन्तामणिः॥

(टी०) स्वमते सिद्धान्तमुपक्रमते उच्यत इति। अर्थादिति। व्यतिरेकिमुद्रया अर्थादुभयं साधयेत्, अर्थवशसम्पन्नमेवोभयसाधकत्वम् उभयसिद्ध्यनुकूलव्याप्त्यादिग्रहादित्यर्थः। व्यतिरेकितया वेति पाठे अर्थात् अर्थापत्तिविधयेति परमतेन। एवञ्च पक्षधर्मतया ज्ञायमानो हेतुः साध्याभावव्यापकीभूताभावप्रतियोगित्वज्ञानात् साध्यस्य साध्यव्यापकीभूताभावप्रतियोगित्वज्ञानाच्च

साध्याभावस्य साधनायोन्मुखो मिथो विरोधेन नैकमपि साधयति । न च शब्दे नित्यत्वानित्यत्वसन्देहे तदुभयव्यापकत्वं शब्दत्वाभावस्य ग्रहीतुमशक्यम्—व्यापकत्वाभिमतशब्दत्वाभावाभाववच्छब्दवृत्तित्वस्य नित्यत्वानित्यत्वयोः सन्दिह्यमानत्वादिति वाच्यम्। तथात्वेऽपि तादृशसंशयाभावदशायां तथात्वनिश्चये तदुभयव्यापकीभूताभावप्रतियोगिशब्दत्ववत्त्वस्य शब्दे प्रतिसन्धातुं शक्यत्वात् । स्वाश्रयप्रतीत्यैव प्रतीतस्य सौरभादेरभावस्य पानीयपाषाणादौ पृथिवीत्वतदभावसहचारेण तदुभयव्यापकताग्रहे तादृशाभावप्रतियोगिसौरभस्य चन्दनादौ परामर्शे पृथिवीत्वादौ साध्ये तदसाधारण्यस्यातिसुलभत्वाच्च ।

नन्वयं सत्प्रतिपक्ष एव व्याप्तरन्वयनिरूप्यत्वस्याव्यापकत्वेनाप्रयोजकत्वादित्यत आह सत्प्रतिपक्ष इति । न चैवं त्रिधभेदेन पृथगभिधानेऽतिप्रसङ्गः, स्वतन्त्रेच्छाया इत्यादेर्ग्रन्थकृतैवाभिधानात् तदभावसाधके तत्साधकत्वभ्रमरूपाशक्तिविशेषसूचनार्थत्वाच्च ।

सत्प्रतिपक्षसव्यभिचारोभयलक्षणाक्रान्ततया उभयान्तर्भावस्याविरुद्धत्वादित्यपि कश्चित् ।

सर्वसपक्षेति । सपक्षः—साध्यवान्, पक्षवृत्तित्वे सति साध्यव्यापकीभूताभावप्रतियोगित्वमित्यर्थः, इदञ्च साक्षादनुमितिविरोधि, विरोधश्च साध्यासामानाधिकरण्यादिरूपोऽन्वयव्याप्तिग्रहविरोधीति न साङ्कर्यशङ्कापि । साध्यसामानाधिकरण्यन्तु नासाधारणम्। दशाविशेषे तद्भ्रमस्तु पुरुषदोषो, व्याप्य इव साधारण्यभ्रम

(गा०) मूले ज्ञानमित्यस्य पक्ष इत्यादि । व्यतिरेकितयेत्यनन्तरं चाकारासत्त्वे अर्थादित्यस्यार्थापत्तिविधयेत्यर्थो न संगच्छते अर्थापत्तिव्यतिरेक्यनुमानोभयविधया साध्यकत्वस्यैकमतेऽसम्भवादित्यत अन्यथा तद्व्याचष्टे अर्थादितीति । व्यतिरेकित्वे अर्थाधीनत्वान्वयभ्र

निराकर्त्तुं व्यत्यस्य योजयति व्यतिरेकिमुद्रया अर्थादिति। साधयेदिति सम्भावनायां लिङ्। सिध्युपधानसंभावना च योग्यताधीना इत्यर्थतः सा लभ्यत इत्याशयेन व्याचष्टे अर्थवशेति। उभयसाधकत्वम्–उभयसिद्धियोग्यत्वम् परस्परसिद्धिसामग्रीरूपपरस्परसिद्धिप्रतिबन्धकाभावातिरिक्तउभयसिद्धिसामग्रीसमवधानमिति यावत्। मूले ज्ञातमित्यन्तं हेतुगर्भविशेषणमिति स्फुटयति उभयेति। मूले अन्यथेति। साध्यतदभावव्यापकीभूताभावप्रतियोगित्वेन ज्ञातस्य विरोधिसामग्र्यतिरिक्तप्रतिबन्धकासमवहितस्य हेतोर्विरोधिसमग्र्यभावातिरिक्तसाध्यतदभावसिद्धिसामग्र्यसमवहितत्वे। पक्षवृत्तित्वानुपपत्तिरिति। पक्षवृत्तितया ज्ञातत्वानुपपत्तिरित्यर्थः। 'इति साध्यतदभावोत्थापकतया असाधारणो दोष' इति मूलार्थं दीधितिकृत् व्याचष्टे एवं चेत्यादिना। तत्र साध्यतदभावसाधनोन्मुखत्वमुक्ततत्सिद्धिसामग्रीसमवहितत्वम् एतदेव च साध्यतदभावोत्थापकत्वार्थः। साध्यतदभावव्यापकीभूताभाप्रतियोगित्वज्ञानयोर्मिलितयोस्तदुभयसिद्धिसामग्रीत्वशङ्कानिराकरणाय साध्यतदभावव्यापकीभूताभावप्रतियोगित्वज्ञानात्तदुभयसाधनायोन्मुख इति संक्षेपोक्तिरुपेक्षिता। विरोधेन–परस्परविरोधेन। नैकमपि साधयतीति। असाधारण इति शेषः। एवं चासाधकत्वमेव हेतोर्दोषत्वमित्यवधेयम्। संदेहे–सन्देहदशायाम्। व्यापकत्वेति। उभयव्यापकतया ग्राह्यस्य शब्दत्वाभावस्य योऽभावः शब्दत्वं तद्वद्वृत्तित्वरूपस्य व्यभिचारस्येत्यर्थः। सन्दिह्यमानत्वादिति। उक्तसंशयेन विषयीकरणादित्यर्थः। आधारत्वाधेयत्वयोस्तुल्यवित्तिवेद्यत्वादिति भावः। एतच्च व्याप्यधर्मिकव्यापकाभाववद्वृत्तित्वज्ञानमेव व्यापकताग्रहप्रतिबन्धकमित्यभिमानेन। वस्तुतस्तु तादृशज्ञानवद्व्यापकाभाववद्धर्मिकव्याप्यवत्ताज्ञानमपि प्रतिबन्धकम्–असमानप्रकारकत्वस्याविशेषादिति कथितसंशये शब्दवृत्तितया नित्यत्वानित्यत्वसंशयाभावदशायां घटगगनादौ शब्दत्वाभावे प्रत्येकमुभयसहचारज्ञानात्तथात्वनिश्चये शब्दत्वाभावे उभयव्यापकतानिश्चये सति तज्जन्यसंस्कारात् शब्दे साध्यसन्देहदशायामपि तादृशव्यापकताद्वयस्मरणेऽव्यापकत्वभानासम्भवेन व्यापकीभूताभावप्रतियोगिशब्दत्वस्य शब्दे प्रतिसन्धातुं निश्चेतुं शक्यत्वादित्यर्थः। गगनघटा-

दौ शब्दत्वाभावे नित्यत्वतदभावोभयसाहचर्य्यग्रहः शब्दत्वोपस्थितावेव सम्भवति शब्दत्वजातिप्रतीतौ व्यक्तिभानं नियतमिति शब्दे नित्यत्वतदभावसंशयजनकं धर्मिज्ञानमेकतरकोट्युपस्थितिश्च वर्तते अपि तु कारणान्तराभावादेव तत्र संशयविरहः, अतो यत्साध्यहेतुके हेत्वभावे साध्यतदभावयोः साहचर्यं गृह्यमाणे हेतुमतो धर्मिण उपस्थित्यनैयत्यं तत्र धर्मिज्ञानाभावादेव न हेतुमति साध्यतदभावसंशय इति तादृशस्थले हेत्वभावे साध्यतदभावव्यापकताग्रहसौकर्यमाहाश्चर्यमिति । सहचारेण–सहचारग्रहेण । तादृशाभावेति । पृथिवीत्वतदभावव्यापकताविशिष्टाभावेत्यर्थः । पृथिवीत्वादौ साध्य इति । चन्दनं पृथिवी सारभादित्यादावित्यर्थः । असाधारण्यस्य–असाधारण्यग्रहस्य ।

अयं–साध्यतदभावव्यापकीभूताभावप्रतियोगितया गृह्यमाणो हेतुः । सत्प्रतिपक्ष एवेति । विरोधिव्याप्तिपक्षधर्मताज्ञानप्रतिबन्ध्यकार्य्यकत्वात् इति भावः । तथा च नासाधारण्यस्य स्वतन्त्रहेत्वाभासतेति भावः । ननु विरोधिव्याप्तेरन्वयव्याप्तित्वं सत्प्रतिपक्षताप्रयोजकमिति नात्र सत्प्रतिपक्षतेत्यत आह व्याप्तेरिति । अन्वयनिरूपितत्वस्य–साध्यसाधनोभयनिरूपितत्वस्य, अव्यापकत्वेन–व्यतिरेकिना हेत्वन्तरेण यत्र सत्प्रतिपक्षता तत्स्थलसाधारण्याभावेन एवंविधेति । यत्र हेत्वन्तरेण प्रतिरोधस्तत्र सत्प्रतिपक्षता यत्र च स्वेनैव स्वकार्यप्रतिरोधस्तत्र तदन्यहेत्वाभासतेत्यभिधान इत्यर्थः । अतिप्रसङ्गः–यत्रान्वयिना हेत्वन्तरेण प्रतिरोधः स सत्प्रतिपक्षः यत्र च व्यतिरेकिणा हेत्वन्तरेण प्रतिरोधः स हेत्वाभासान्तरमित्यादिप्रसङ्गः । तदभावसाधक इत्यादेः प्रकृते पृथगभिधानस्य इत्यादिः । अशक्तिविशेषोऽनिशायिता शक्तिः ।

उभयलक्षणाक्रान्ततयोभयान्तर्भावस्येति । यथा सत्प्रतिपक्षलक्षणाक्रान्ततया सत्प्रतिपक्षता तथा सव्यभिचारलक्षणाक्रान्ततया तथात्वस्यापीत्यर्थः । अविरुद्धत्वादिति । तथा च तस्य सव्यभिचारसामान्यलक्षणाक्रान्ततया सव्यभिचारमध्येऽवश्यं विभजनीयतया साधारणानुपसंहारिभिन्नस्य शब्दो नित्यः शब्दत्वादित्यादेरसाधारणत्वेन विभजनं युक्तमेवेति भावः । केचिदित्यस्वरसः । स चासाधारण्यसत्प्रतिपक्षपार्थक्यप्रयोजकदर्शितबीजमनादृत्य सत्प्रतिपक्षान्तर्भा-

वस्वीकारे व्याप्तिज्ञानविरोधित्वघटिततद्व्यावृत्तसाधारण्यसङ्ग्राहकसव्यभिचारसामान्यलक्षणस्यैव सम्भवेन प्रयासेन समूहालम्बनानुमितिविरोधिताघटिततत्साधारणसव्यभिचारसामान्यलक्षणकरणस्य निर्युक्तिकतया तस्य सव्यभिचारान्तर्भावासम्भवात् ।

सपक्षपदस्य निश्चयगर्भार्थकत्वे सत्प्रतिपक्षोत्थापकता न सम्भवति व्याप्तेर्ज्ञानागर्भत्वादित्यतस्तद्व्याचष्टे सपक्ष इति । पक्षवृत्तित्वाविशेषितस्य हेतौ केवलसाध्यव्यापकीभूताभावप्रतियोगित्वस्य यद्यद्धर्मिवृत्तित्वं हेतोर्ज्ञायेत इत्यादिरीत्या सव्यभिचारसामान्यलक्षणाक्रान्तत्वेऽपि अनुमितिप्रतिबन्धकतानतिरिक्तवृत्तिविषयिताकत्वाभावेन न हेत्वाभाससामान्यलक्षणाक्रान्तत्वम् । अनुमितिविरोधिताशून्यपक्षधर्मताज्ञानकालीनज्ञानावृत्तिविषयिताकत्वरूपं प्रतिबन्धकतानतिरिक्तवृत्तित्वं सामान्यलक्षणे निवेश्य हेत्वाभाससामान्यलक्षणाक्रान्तत्वसम्पादनसम्भवेऽपि तादृशप्रयासे गौरवमतोऽसाधारण्यशरीरे पक्षवृत्तित्वमन्तर्भावयति पक्षवृत्तित्वे सतीति । यद्यपि 'सव्यभिचारसामान्यलक्षणस्य यद्यद्धर्मिवृत्तित्वमित्यादिना बाधादिसाधारण्यवारणप्रकारो न सम्भवति पक्षवृत्तित्वघटितासाधारण्यस्यापि धर्मविशेषानियन्त्रितत्वात्, तादृशरीत्यादेः निरुक्तासाधारण्यस्यैवासङ्ग्रहापत्तेः, तथापि प्रकृतपक्षतावच्छेदकविशिष्टे प्रकृतसाध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहिप्रकृतहेतुतावच्छेदकविशिष्टवैशिष्ट्यावगाहिज्ञाननिरूपिता या निरुक्तासाधारण्यविषयकत्वानवच्छिन्नप्रतिबन्धकता तच्छून्यत्वे सति समूहालम्बनानुमितिविरोधित्वस्य बाधप्रतिरोधव्यावृत्तस्य निरुक्तासाधारण्यसाधारणस्य सव्यभिचारसामान्यलक्षणत्वसम्भवात् ।

ननु साध्यवद्व्यावृत्तत्वं यदि तद्वदवृत्तित्वं तदा शब्दो नित्यः श्रोत्रग्राह्यत्वे सति गुणत्वादित्यादौ विशिष्टस्य गुणत्वादेः केवलानतिरिक्ततया नित्यत्ववदवृत्तित्वं नोपपद्यते इत्यव्याप्तिः, एवं साध्यवदवृत्तित्वं सामानाधिकरण्यग्रहविरोधितया व्याप्तिग्रहविरोध्येव इति न सत्प्रतिपक्षोत्थापकमतो व्याचष्टे साध्यव्यापकेति । विरोधरूपोपाधेः साध्याभावव्याप्यतारूपत्वे सोपि साध्यव्यापकीभूताभावप्रतियोगित्वमिति सङ्कर इत्याशङ्कां निराकरोति साध्यासामानाधिकरण्यादीति । हेतुनिष्ठसाध्यासामानाधिकरण्यादीत्यर्थः । आदिना साध्यनि-

ष्टहेतुसामानाधिकरण्यपरिग्रहः । नन्वेवं विरोधस्य विरोध्यविषयत्वेनानुमित्यविरोधितया न दोषता स्यादित्यत आहान्वयव्याप्तीति । साध्यहेतुसामानाधिकरण्यघटितव्याप्तीत्यर्थः । पक्षवृत्तित्वप्रवेशानिवेशाभ्यामपि भेदसम्भवात् शङ्कापीत्युक्तम् । शब्दोऽनित्यः शब्दत्वादित्यादौ वास्तवसाध्यवद्व्यावृत्तत्वाभावेनाव्याप्तिशङ्कामलक्ष्यतया परिहरति साध्यसामानाधिकरणं त्विति ।

ननु दर्शितस्थलेऽपि दशाविशेषेऽसाधारण्यज्ञानेनानुमित्यनुत्पादाद्धेतोर्दुष्टताया आवश्यकत्वे कथमलक्ष्यत्वमित्यत आह दशाविशेष इति । तद्भ्रमः—असाधारण्यभ्रमः, पुरुषदोष एव न तु तत्र हेतोर्दुष्टतेत्यर्थः । प्रतिबन्दिसूचनाय दृष्टान्तमाह व्याप्य इवेति ॥

(दी०) नवीनाः पुनरेवं वर्णयन्ति । सामग्रीद्वयविरोधेन हेत्वभावस्य साध्यतदभावव्यापकताग्रहविरोधोऽसाधारणस्य दूषकताबीजम् तथाहि—वृत्तिमता हेतुना क्वचिदपि वर्तितव्यम् तत्र चावश्यं साध्यतदभावयोरन्यतरेण भवितव्यम् । न च तत्र हेत्वभावः सम्भवति, अतोऽवश्यमन्यतराव्यापकत्वं तस्य, एवंविधविरोधध्रौव्ये साध्येन तदभावेन च हेत्वभावस्य सहचारज्ञानं नैकतरनिरूपितमपि व्यापकतां ग्राहयति मिथो विरोधात्, विरोधिपरामर्शद्वयमिव साध्यतदभावौ, एवञ्च वृत्तिमत्त्वविशेषितं हेतोर्यावद्विपक्षसपक्षव्यावृत्तत्वं वृत्तिमत्प्रतियोगित्वविशेषितं वा हेत्वभावस्य यावत्सपक्षविपक्षवृत्तित्वमसाधारण्यमिति । योजयन्ति च ग्रन्थमित्थम् शब्दत्वं यदि साध्यतदभाववद्व्यावृत्तत्वेन तदुभयव्यापकीभूताभावप्रतियोगित्वेन ज्ञातं ज्ञानयोग्यं स्यात् तद्वत् स्यादिति यावत्, तदा व्यतिरेकितया तादृशव्यतिरेकप्रतियोगित्वेनार्थात् पक्षे तदुभयं साधयेत् तदुभयसहचरितं भवेत्, व्यापकाभाववति व्याप्याभावस्यावश्यम्भावात् अन्यथाभावे पक्षधर्मताया व्याप्तेर्वानुपपत्तिः । न च तथाभावः सम्भवति, न वा पक्षवृत्तित्वं बाधितम् अतः साध्यतदभावोत्थापकतया तदुभयसिद्ध्य-

नुकूलविरोधि व्याप्तिद्वयग्राहकव्यतिरेकसहचारद्वयग्रहविषयतया असाधारणो दोषो व्याप्तिद्वयग्रहप्रतिबन्धकः। ननु यदि विरोधिव्याप्तिद्वयं न गृह्यते तदा सत्प्रतिपक्षोच्छेदः गृहीतविरोधिव्याप्तिद्वयहेतुसमुत्सत्त्वात् तस्येत्यत आह सत्प्रतिपक्ष इति। तत्र-हेत्वोर्भिन्नतयाधिकरणभेदेन तथा ग्रहः सम्भवति अत्र पुनरेकस्मिन् हेतौ तदुभयग्रहो विरुद्ध इत्यर्थः।

(गा०) मिश्रव्याख्यानमुपन्यस्यति नवीना इति। सामग्रीद्वयविरोधेनेति। हेत्वभावे साध्यतदभावव्यापकताग्राहकसामग्र्योः परस्परजन्यफलप्रतिबन्धकत्वेनेत्यर्थः। ग्रहविरोधो-ग्रहानुत्पादः, असाधारणस्य-हेतोःदूषकतायां बीज-अनुमित्यनुत्पादकतायां बीजम्। व्यापकतयाविरोध एव परस्परग्राहकसामग्र्योः परस्परग्रहप्रतिबन्धकत्वं सम्भवतीति विरोधमेवोपपादयति तथाहीति। क्वचिदधिकरणे वर्तितव्यमिति। वृत्तेरधिकरणनिरूपितत्वनियमादिति भावः। तत्र च-तदधिकरणे च, साध्यतदभावयोरन्यतरेण भवितव्यं-स्थातव्यम्, प्रतियोग्यभावयोरेकासत्त्वे अपरसत्त्वनियमादिति भावः। तत्र-अधिकरणे, न हेत्वभावः सम्भवति प्रतियोगिवृत्त्या विरोधादिति भावः। अतो-हेत्वभावस्य तत्रासत्त्वात्, अन्यतराव्यापकत्वं-साध्याव्यापकत्वसाध्याभावाव्यापकत्वयोरन्यतरवत्त्वम्, तस्य-हेत्वभावस्य, तयोर्मध्ये हेत्वधिकरणे यस्य स्थितिस्तद्व्यापकतायास्तदभावेऽसम्भवादिति भावः। एवंविधविरोधध्रौव्ये-एवंरीत्या नित्यत्वतदभावव्यापकतयोः शब्दत्वाभावादावेकसत्त्वेऽपरासत्त्वनियमे। सहचारज्ञानमिति। व्यापकताग्रहकारणीभूतं गगनघटादौ सामानाधिकरण्यज्ञानम्। विरोधिग्रहसामग्र्याः प्रतिबन्धकत्वम् दृष्टान्तेन दृढयति विरोधीति। साध्यतदभावौ न ग्राहयतीति अनुषंगेनान्वयः। अवृत्तिवारणाय वृत्तिमत्त्वविशेषितमिति। सपक्षविपक्षव्यावृत्तत्वं यावत्सपक्षविपक्षनिष्ठाभावप्रतियोगित्वम्, न तु हेत्वभावत्वरूपेण सहचारज्ञानमेव तेन रूपेण व्यापकताग्राहकतया व्यापकतान्तरग्रहविरोधीति तद्विषयस्यैव दोषत्वमुचितमित्याशयेनाह वृत्तिमदिति। उभयव्यापकीभूताभावप्रतियोगित्वज्ञानविषयत्वं भ्रममादायोभयासहचरितसाधारणमिति नाभ-

यसाहचर्य्यरूपतया व्याख्यायोभयसाधकत्वापादकमतो व्याचष्टे ज्ञातं ज्ञानयोग्यमिति। उभयसाधकत्वे उभयसाहचर्य्यरूपे व्यतिरेक्यनुमानत्वमप्रयोजकमिति व्यतिरेकितयेत्यन्यथा व्याचष्टे व्यतिरेकितयेति। तादृशेति। साध्यतदभावव्यापकीभूतेत्यर्थः। यद्यपि तादृशव्यतिरेकिप्रतियोगित्ववत् स्यात्तदा उभयसहचरितं स्यादित्यत एव तादृशप्रतियोगितया उभयसाहचर्यप्रयोजकत्वं लभ्यते, तथापि आपत्तिमूलभूतव्याप्तिदार्ढ्यप्रदर्शनाय व्यतिरेकितयेति पुनर्मूलेऽभिहितमित्यवधेयम्।

भ्रमेणोभयसाधकत्वस्येष्टत्वादुभयं साधयेदित्यस्यार्थमाह उभयसहचरितं भवेदिति। यद्यपि वृत्तिमत्त्वविशेषितैककोटिव्यापकाभावप्रतियोगित्वस्य वस्तुगत्याऽपरकोटिव्यापकाभावप्रतियोगित्वविरुद्धत्वेऽपि विरोधाप्रतिसन्धानदशायां नैकग्राहकसामग्र्या अपरग्रहविरोधितेति दर्शिततर्कावतारेणैव विरोधिप्रतिसन्धानमसाधारण्यदशायामङ्गीकार्य्यम्,तद्दूरयिष्यति दर्शितरीत्या तदवधारणे चेत्यादिना,तथा च शब्दे नित्यत्वानित्यत्वयोः सन्देहे शब्दत्वतदुभयसाहचर्य्यमपि सन्दिग्धमेवेतीष्टापत्तिदशायां नोक्ततर्कावतारसम्भवः। तदुभयैकाधिकरणवृत्तित्वस्य चाप्रसिद्ध्या नापत्तिसम्भवः-अप्रसिद्धस्य व्याप्त्यवधारणासम्भवात्। एवमुभयव्यापकीभूताभावप्रतियोगित्वमवृत्तौ प्रसिद्धं तत्र नोभयसाहचर्य्यमिति विरोधे एतापाद्यापादकयोः कथमापत्तिः। वृत्तिमत्त्वे सत्युभयव्यापकीभूताभावप्रतियोगित्वं चाप्रसिद्धम्। वृत्तिमत्त्वे सति तत्तत्कोटिव्यापकीभूताभावप्रतियोगित्वेन प्रत्येकं तत्तत्कोट्यभावसाहचर्य्यापत्तौ चेष्टापत्तिशंकाया अनिवृत्तिरिति महदसमञ्जसम्। तथापि जलत्वादौ वृत्तिमत्त्वे सति घटत्वपटत्वाद्युभयव्यापकाभावप्रतियोगित्वतदुभयाभावद्वयसहचारमवधार्य सामान्यतः आपाद्यापादकयोर्यत् वृत्तिमत्त्वे सति यदुभयव्यापकाभावप्रतियोगि तत्प्रत्येकं तदुभयाभावद्वयैकाधिकरणवृत्तीति व्याप्तिरवधार्य्यते ततश्च शब्दत्वादौ वृत्तिमत्त्वानित्यत्वतदभावव्यापकाभावप्रतियोगित्वानामाहार्य्यज्ञाना(न्नि)त्यत्वतदभावद्वयैकाधिकरणवृत्ति स्यादिदमित्यप्रसिद्धविशेषापत्तिः सुलभैव। सामान्यव्याप्त्यधीनविशेषानुमिताविव तदधीनविशेषापत्तावपि विशेषप्रसिद्धेरनङ्गत्वात्। न च उक्तापाद्याप्रसिद्धौ प्रतियोग्यप्रसिद्ध्या आपाद्यव्यतिरेकानिश्चयास-

म्भवेन नापरयवतारसम्भव इति वाच्यम्। विशिष्टविषयकापत्तौ विशेष्ये विशेषणाभावनिश्चयस्यापि विशिष्टशङ्कानिवर्त्तकत्वेन हेतुत्वाद्धिकरणे नित्यत्वानित्यत्वाभावोभयवत्तानिश्चयादेव तादृशापत्तिसम्भवात्। मूले व्यतिरेकितयेति यद्व्याप्तेर्दार्ढ्यं दर्शितं तदेव स्फुटीरोति व्यापकाभाववतीति। प्रतियोगिनाऽभावाभाववत्त्वात् प्रकृतत्वं बोध्यम्। अन्यथेत्यस्य विवरणं अतथाभाव इति। शब्दत्वस्य एकाधिकरणे उभयाभावे तस्यावृत्तित्वे वेत्यर्थः। उभयथैव उक्तापाद्यासत्त्वविघटनादवृत्तित्वपक्ष एव शब्दरूपपक्षधर्मताया अनुपपत्तिर्न तु शब्दत्वाधिकरणे तदुभयाभावसत्त्वपक्षे, तथासति तदुभयाभावस्य विपर्ययेण तदुभयरूपतया शब्दत्वाभावे तदुभयव्यापकताया एवानुपपत्तिरिति मूलन्यूनताभङ्गाय पूरयति व्याप्तेर्वेति। इष्टापत्तिशङ्काविरहेण स्फुटयति न च तथाभाव इति। तथा चेष्टापत्तिशङ्काविरहेण शब्दत्वे नित्यत्वानित्यत्वोभयाभाववदधिकरणत्वेन मिलितापादकानां वृत्तिमत्त्वानित्यत्वतदभावव्यापकीभूताभावप्रतियोगित्वानामभावे साधनीये नित्यत्वतदभावव्यापकाभावप्रतियोगित्वयोर्द्वयोरभावः पक्षधर्मताबलात् शब्दत्वे सिद्ध्यति। अयमेव च विरोधग्रह इति भावः।

ननु वृत्तिमत्त्वाभावमादायैव न कथम्पर्यवसानमित्यत आह न वा पक्षवृत्तित्वं बाधितमिति। तथा च वृत्तिमत्त्वनिश्चयान्न तथा पर्यवसानमिति भावः। एतन्मते साध्यतदभावोत्थापकतयेत्यस्य साध्यतदभावसिद्धिसामग्रीसमवहिततयेत्यर्थो न सम्भवति व्याप्तिग्रहाभावेन तादृशसामग्र्यसम्भवादतोऽन्यथा व्याचष्टे साध्यतदभावेति। दोष इत्यस्य व्याख्या व्याप्तिग्रहप्रतिबन्धक इति। व्याप्तिग्रहविरोधिधर्मवानित्यर्थः।

एतन्मतेऽसाधारणे सत्प्रतिपक्षाविशेषशङ्कानवतारात् आशङ्कान्तरेण सत्प्रतिपक्ष इत्यादि मूलमवतारयति नन्विति। विरोधिव्याप्तिद्वयं—साध्यतदभावनिरूपितव्याप्तिद्वयम्, न गृह्यते—ग्राहकसामग्रीद्वयविरोधेन एकदा न गृह्यते। सत्प्रतिपक्षोच्छेद इति। परस्परसामग्रीविरोधेन विरोधिकोट्योरनुमितिप्रतिबन्धोच्छेद इत्यर्थः। गृहीतेति। हेतुधर्मिकतदभावव्याप्तिग्रहाधीनत्वादित्यर्थः॥

(दी०) अत्र चेदं चिन्त्यम्। एवं सति सपक्षादेर्यावत्त्वविशेषणं व्यर्थम्, दूषकतायामनुपयोगात् व्यभिचाराग्रहमात्रोपक्षीणत्वात्। वृत्तिमत्त्वादिविशेषितस्यापि चासाधारण्यस्य ज्ञानं न व्याप्तिज्ञानविरोधि, विरोधिविषयकत्वाभावात् उपदर्शितविरोधस्य तच्छरीरेऽनन्तर्भावाच्च। व्यापकतयोरपि च न स्वतो विरोधः। उपदर्शितरीत्या तदवधारणे चावश्यं व्यभिचारज्ञानमेव प्रतिबन्धकम्, अत एव सत्यपि असाधारण्यज्ञाने एकत्रानुकूलतर्कावतारे भवति व्याप्तिधीरिति। एतेन तादृशसहचारज्ञानं तुल्यबलविरोधिव्याप्तिग्रहसामग्रीत्वेन प्रतिबन्धकं तर्कावतारे पुनस्तुल्यबलतैव नास्तीति परास्तम्। तर्कस्य व्यभिचारशङ्कानिवर्त्तकत्वेनैवोपयोगित्वात् सामग्रीत्वेन प्रतिबन्धकत्वे हेत्वाभासत्वायोगाच्च। सत्प्रतिपक्षे च विरोधिव्याप्यवत्तानिर्णयत्वेन प्रतिबन्धकत्वं न तु विरोधिसामग्रीत्वेन, बाधावतारे त्वापाततः सत्प्रतिपक्षितत्वेऽपि बाधेन प्रतिहेतोरव्याप्यत्वादिज्ञान एव साध्यानुमित्युदयादिति कृतं पल्लवितेन ॥

इत्यसाधारणदीधितिः ॥

(गा०) दूषकतायामनुपयोगादिति । यत्किञ्चिदधिकरणे साध्यहेतुसामानाधिकरण्यज्ञानस्यापि व्यापकताग्राहकत्वेन तादृशरीत्या दोषत्वेऽधिकरणे यावत्त्वस्याप्रयोजकत्वादित्यर्थः। ननु यत्किञ्चित्सपक्षादौ हेतोर्ग्रहे तादृशव्यभिचारग्रहेण प्रतिबन्धाद्धेत्वभावे साध्यादिव्यापकताग्रहो न सम्भवतीति यावत्सपक्षादौ हेत्वभावग्रहो व्यभिचारग्रहविरोधितया हेत्वभावे साध्यादिव्यापकताग्राहक इति कथं यावत्त्वानुपयोग इत्यत आह व्यभिचाराग्रहेति । सपक्षादौ हेत्वभावग्रहस्य व्यभिचाराग्रहमात्रसंपादकतया व्यापकताग्रहेऽन्यथासिद्धत्वादित्यर्थः। तथा च यावत्त्वघटितासाधारण्यज्ञानत्वेन प्रतिबन्धकज्ञानाजनकतया न तेन रूपेण प्रतिबन्धकत्वमपीति न तादृशासाधारण्यस्य दोषतासंभवः सहचारज्ञानविधया व्यापकताग्राहकज्ञानविषयस्य यत्किंचित्सपक्षविपक्षयोर्हेत्वभावस्य दोषत्वे वह्निमान् धूमादित्यादौ अयःपिण्डजलह्रदादिनिष्ठधूमाभावादेरसाधारण्यता-

प्रसङ्ग इति भावः। ननु वृत्तिमत्त्वे सति यावत्सपक्षविपक्षनिष्ठात्यन्ताभावप्रतियोगित्वस्य हेतौ ज्ञानं वृत्तिमत्प्रतियोगिकत्वे सति यावत्सपक्षविपक्षवृत्तित्वस्य हेत्वभावे ज्ञानं वा तादृप्येण व्यापकताग्रहाजनकमपि व्यापकताग्रहप्रतिबन्धकमास्थीयते साधारण्यज्ञानदशायां व्यापकताग्रहानुत्पादस्यानुभवसिद्धत्वादित्यत आह वृत्तिमत्त्वादीति। विरोधिविषयकत्वाभावादिति। तादृशासाधारण्यज्ञानकाले व्याप्तिग्रहानुत्पाद एव नानुभविकः विरोधिविषयकज्ञानकाल एव ज्ञानानुत्पादस्यानुभविकत्वादिति भावः। उपदर्शितविरोधस्य—एककोटिव्यापकत्वे तदभावरूपापरकोटिव्यापकतानुपपत्तिरूपस्य(साध्याभावव्यापकप्रतियोगिकविरोधस्य)तच्छरीरे—ऽसाधारणघटकहेत्वभावनिष्ठयावत्सपक्षवृत्तित्वादौ, अनन्तर्भावात्—असत्त्वात्, तथा च व्याप्त्यसाधारणयोर्मिथोविरोधिरूपत्वाभावात् इति पर्यवसितार्थः। ननु असाधारण्येन समं व्याप्तेरविरोधेऽपि वृत्तिमदभावनिष्ठयोर्भावाभावव्यापकतयोर्मिथो विरोधात्तयोरेकदा निश्चयोऽनुभवविरुद्धः, एवं चासाधारण्यग्रहदशायां यदि व्यापकताग्रहः स्यात्तदाऽविशेषेण व्यापकताद्वयग्रह एव स्यादित्यगत्याऽसाधारण्यग्रहस्य व्यापकताग्रहविरोधित्वमास्थेयमित्यत आह व्यापकतयोरपीति। न स्वतो विरोध इति। न विरोधाग्रहदशायां भावाभावयोरिव युगपन्निश्चयाविषयत्वमित्यर्थः। ननूक्तरीत्या विरोधावधारणदशायां युगपत्तन्निश्चयवारणायैव तादृशप्रतिबन्धकताकल्पनमावश्यकमित्यत आह दर्शितरीत्येति। अवश्यम्—अवश्यकल्प्यप्रतिबन्धकताकम्, व्यभिचारज्ञानं हेत्वभावाभावरूपेहेतुमति नित्यत्वतदभावसंशयात्मकसाधारण्यज्ञानम्, प्रतिबन्धकं—हेत्वभावे नित्यत्वतदभावव्यापकताज्ञानानुत्पादनिर्वाहकं, तस्यापि तत्र नियमेन कल्पनसंभवात्तथा च तदनुरोधेनाऽप्यसाधारण्यज्ञानस्य न प्रतिबन्धकता कल्प्यते इति भावः। अत एव—तादृशस्थले साधारण्यधीमात्रेण व्याप्तिग्रहप्रतिबन्धादेव। भवति व्याप्तिधीरिति। साधारण्यज्ञाने तर्कस्योत्तेजकत्वादिति भावः। असाधारण्यज्ञानस्य प्रतिबन्धकत्वे तत्र तर्कस्याकिंचित्करतया व्याप्तिग्रहासंभवादुपष्टंभसंगतिः। एतेन—स्वप्रतिबन्धकतयैव निर्वाहेन, तुल्यबलविरोधिव्याप्तिग्रहसामग्रीत्वेन—विरोधिव्याप्तिग्रहासाधारणतत्कारणसमुदायत्वेन न त्वसाधारण्यज्ञानत्वमात्रेण, तर्कावतारे तु—एकादि-

इष्टेव तर्कावतारे तु, तुल्यबलतैव–सकलकारणसंमेलनमेव । नास्तीति । विरोधिव्याप्तिग्राहकस्य तर्कस्य अनुकूलतर्काभावसहितस्य प्रतिबन्धकतया तदभावस्यापि सामग्रीघटकत्वादिति भावः । अतो न तत्र व्याप्तिग्रहानुपपत्तिरिति शेषः । उपयोगित्वात्–उक्तस्थले व्याप्तिग्रहेऽपेक्षणीयतोपपत्तेः, तथाच कल्पनीयातिरिक्तप्रतिबन्धकतायां तदभावनिवेशनस्य निर्युक्तिकत्वादिति भावः ।

केचित्तु तुल्यबलविरोधिव्याप्तिग्रहसामग्रीत्वेनेति । स्वसमानकालीनप्रकृतव्याप्तिग्राहकसामग्री यावत्कारणघटिता तावत्कारणघटिता या विरोधिव्याप्तिग्राहकसामग्री तत्त्वेनेत्यर्थः । तुल्यबलतैव विरोधिव्याप्तिग्राहकसामग्र्या नास्ति तद्व्याप्तिग्राहकतर्कासत्त्वेन न्यूनत्वादिति भावः । तर्कस्येति । तथाच तर्कस्य व्याप्तिग्रहकारणत्वाभावात्तत्सत्त्वासत्त्वे न न्यूनाधिकबलभावमावहत इति भाव इति व्याचक्षुः ।

हेत्वाभासत्वायोगाच्चेति । प्रागुपदर्शितातिप्रसङ्गादिति भावः । नन्वेवं सत्प्रतिपक्षस्य हेत्वाभासत्वानुपपत्तिरित्यत आह सत्प्रतिपक्षे चेति । विरोधीति । ग्राह्याभावादित्यर्थः । नन्वेवमुभयव्याप्यवत्तानिश्चयदशायामेकसाध्यस्य बाधावतारेऽपि साध्यान्तरस्यानुमानप्रसङ्ग इत्यत आह बाधावतारे त्विति । अव्याप्यत्वादीत्यादिना अपक्षधर्मत्वपरिग्रहः । एतज्ज्ञानं च व्याप्तिविशिष्टवत्ताज्ञानविशेषणतापन्नविशेष्यताविशेषणधर्मिविशेषणतया बोध्यम्, तथाच प्रतिहेतुपरामर्शे व्याप्त्याद्यंशेऽप्रामाण्यज्ञानमिति पर्यवसितार्थः । (पक्षे तत्साध्याभावनिश्चये पक्षविशेषणतापन्नहेत्वंशे तत्साध्यव्याप्तिप्रकारकपरामर्शीयहेतुविषयतायाः साध्याभाववत्पक्षविषयतानिरूपितत्वग्रहेण ततस्तत्साध्यव्याप्त्यभाववद्वृत्तित्वतत्पक्षावृत्तित्वान्यतरवत्त्वं तद्विषयतायामनुमातुं शक्यत इति बाधनिश्चयस्य परामर्शेऽप्रामाण्यग्राहकता बोध्या) ।

एतेनाव्याप्यत्वादिज्ञानस्यानुमितिविरोधिव्याप्यवत्ताज्ञानसत्त्वेऽकिञ्चित्करता व्याप्यवत्तापरामर्शेन प्रतिबन्धाद् दुर्घटता चेत्यसङ्गतिरिति परास्तम् । अप्रामाण्यज्ञाने व्याप्यत्वादेर्धर्मितावच्छेदकानवच्छिन्न एव हेतौ भानात्तस्य व्याप्त्यादिनिश्चयाप्रतिबन्धकतया विरोधिनिश्चयोत्तेजकीभूततत्समवधाने प्रकृतसाध्यानुमितिसंभवात् ॥

इति श्रीगदाधरभट्टाचार्यचक्रवर्तिविरचितायां गादाधर्याम् असाधारणप्रकरणम् ।

अथानुमानगादाधर्याम्

अनुपसंहारिप्रकरणम्।

(चि०) अनुपसंहार्य्यो नामत्सपक्षविपक्षः, सिद्ध्यसिद्धिविरोधात्। नापि केवलान्वयिधर्मावच्छिन्नपक्षकः, केवलान्वयिसाध्यकस्य सद्धेतुत्वात् व्यतिरेकिसाध्यकस्य तु साध्यतदभाववद्धर्मित्वेन साधारणत्वात्। अन्यथा संशयाहेतुत्वेनानैकान्तिकता न स्यात्। सर्वं क्षणिकं सत्त्वादिति साध्याप्रसिद्ध्या व्याप्यत्वासिद्धमपार्थकं वा, साध्यप्रसिद्धौ तु साधारणमेव। न च पक्षान्यसाध्यवत्तदन्यवृत्तित्वं पक्षातिरिक्तसाध्याभाववद्वृत्तित्वं वा साधारणत्वं व्यर्थविशेषणत्वात्। न च विरुद्धं विशेषणस्य व्यावर्त्यमित्युक्तम्। नाप्यत्यन्ताभावप्रतियोगिसाध्यकत्वे सति केवलान्वयिधर्म्मावच्छिन्नपक्षकत्वम्, सर्वमभिधेयं मेयत्वादित्यत्र विप्रतिपत्त्या पक्षतादशायां पक्षे साध्यानिश्चयेनानुपसंहारिण्यव्यापकत्वात्।

(दी०) केवलान्वयीत्यादि। सद्धेतुत्वं साधारणत्वञ्च केवलान्वयिनः साधनस्य, व्यतिरेकिणस्तु भागासिद्धत्वं साधारणत्वं विरुद्धत्वञ्च यथासम्भवं बोध्यम्। नापीति। केवलान्वयिसाध्यकवारणाय सत्यन्तम्। व्यतिरेकिसाध्यकसद्धेतुवारणाय केवलान्वयीत्यादि। पक्षत्वं साधकबाधकमानशून्यत्वम्। केवलान्वयिसाध्यकेऽपि बाधकमानाप्रसिद्धिरुक्तैवेति न सत्यन्तवैयर्थ्यम्। नि-

श्रितसाध्याभाववत्तन्मात्रवृत्तित्वे त्वसाधारण्यं विरुद्ध इति साधारण्याद्यग्रहदशायामसाङ्कर्यमिति वा हृदयम् । अव्यापकत्वादिति । सद्धेतुत्वञ्च व्याप्तिनिश्चयदशायामेवेति भावः ॥

(ग०)सर्वमभिधेयं घटत्वादित्यादेः केवलान्वयिसाध्यकस्यापि न निर्दोषत्वरूपं सद्धेतुत्वम् सर्वमनित्यं घटत्वादित्यादेर्व्यतिरेकसाध्यकस्यापि न साधारणत्वमतो हेतुविशेषपरतया सद्धेतुत्वात् साधारणत्वादिति मूलं सङ्गमयति सद्धेतुत्वमिति । न्यूनताभङ्गाय व्यतिरेकिसाधनस्य लक्ष्यतां स्वयं निराकरोति व्यतिरेकिणास्त्विति । भागासिद्धत्वं सर्वपक्षकस्य सर्वस्यैव । व्यतिरेकिणः साधारणत्वविरुद्धत्वे यथासम्भवं सर्वमनित्यं द्रव्यत्वात् गगनत्वादित्यादेर्बोध्ये । केवलान्वयिसाध्यकवारणायेति । तस्य सद्धेतुत्वेनालक्ष्यतायाः प्रागभिहितत्वादिति भावः । व्यतिरेकिसाध्यकेति । पर्वतो वह्निमान् धूमादित्यादीत्यर्थः । सद्धेतुत्वं प्रकृतदोषराहितत्वम्, तेन पर्वतो धूमवान् वह्नेरित्यादेर्वारणीयत्वेपि न न्यूनता ।

पक्षत्वं यदि सन्दिग्धसाध्यकत्वं तदा केवलान्वयिनि साध्ये पक्षनिष्ठाभावप्रतियोगित्वसंशयमादाय पक्षतासंपादनसम्भवेपि सत्यन्तवैयर्थ्यं दुर्वारमेव–केवलान्वयिसाध्यकेपि संशयदशायामनुपसंहारित्वस्य इष्टत्वेन तद्व्यावर्तकविशेषणदानानौचित्यात्, अत एव सिद्धान्तलक्षणे सन्देहात्मकपक्षताघटिते तादृशविशेषणं परित्यक्तमेवेति पक्षत्वमन्यथा व्याचष्टे पक्षत्वमिति । साधकबाधकमानशून्यत्वं–साध्यनिश्चयबाधनिश्चयाभाववत्त्वमित्यर्थः । केवलव्यतिरेकिवारणाय बाधाभावनिवेशः । ईदृशी च पक्षता सर्वमभिधेयं प्रमेयत्वादित्यादौ यदा क्वचिदपि न संशयो नापि निश्चयस्तदाऽक्षतैवेति तदानीं तत्रानुपसंहारित्वस्य सिद्धान्तिनोऽप्यनिष्टस्य वारणाय सत्यन्तदलस्यैव सार्थक्यमिति भावः । (केवलान्वयिसाध्यके साध्यसन्देहदशायामप्यलक्ष्यत्वमिदानीमभिप्रेतमिति भावः) । नन्वेवमपि सत्यन्तदलवैयर्थ्यं दुर्वारमेव केवलान्वयिसाध्यके साध्याभावाप्रसिद्ध्या बाधनिश्चयघटितपक्षत्वाप्रसिद्ध्या विशेष्यदलस्यैवासत्त्वादित्यत आह केवलान्वयिसाध्यकेपीति । बाधकमानप्रसिद्धिरुक्तेवेति । पक्षनिष्ठाभावप्रतियोगित्वधीरेव सुलभो बाध इत्यत्रेति शेषः । बाधकमान-

पदस्य साध्यवत्त्वज्ञानत्वावच्छिन्नविरोधिनिश्चयपरत्वादिति भावः।

ननु अत्रापि लक्षणे पूर्वलक्षणोक्तलक्ष्याप्रसिद्धिर्जागर्ति सर्वमनित्यं प्रमेयत्वादित्यादेः साधारण्यादिसंकरेण लक्ष्यत्वासंभवादिति कथमेतल्लक्षणावतार इत्यत आह निश्चितेति। निश्चितसाध्याभाववच्च तन्मात्रं चेति द्वन्द्वः, तथाच निश्चितसाध्याभाववद्वृत्तित्वं साधारणत्वं निश्चितसाध्याभाववन्मात्रवृत्तित्वं विरुद्धत्वमिति यथासंख्येनान्वयः। वृत्तीति, द्वयमित्यग्रिमेणान्वयः। एवं च सर्वमनित्यं प्रमेयत्वात् गगनत्वादित्यादिकमेव पक्षतादशायामसंकीर्णोदाहरणमिति भावः। ननु साधारण्यशरीरे पक्षातिरिक्तत्वविशेषणस्य वैयर्थ्येन प्राक् निराकृतत्वात् निश्चयघटितसाधारण्याद्यभिप्रायेण लक्षणान्तरं न सङ्गच्छते निश्चयांशवैयर्थ्यस्याप्यतिस्फुटत्वादित्यतो दोषान्तरज्ञानशून्यकाले दोषान्तरवतोऽपि हेतोरनुपसंहारित्वेनैवानुमित्यनुत्पादकत्वमिति लक्ष्यत्वमित्याशयेनैव तल्लक्षणमित्याह साधारण्यादीति। आदिना विरोधभागासिद्धिपरिग्रहः। सर्वमभिधेयं प्रमेयत्वादित्यादेः सद्धेतुतयाऽलक्ष्यत्वस्य प्रागभिहितत्वात् तत्राऽव्याप्त्यभिधानं सङ्गमयति सद्धेतुत्वं चेति। व्याप्तिनिश्चयदशायामेवेति। तथाच सर्वत्र साध्यसन्देहदशायां तस्य लक्ष्यत्वमेवेत्यव्याप्तिरेव तत्र सत्यन्तविरहादिति भावः॥

(चि०) अथ पक्षातिरिक्ते व्याप्तिग्रहानुकूलाप्रतीतसहचारोऽनुपसंहारित्वः, यदि च पक्षे व्याप्तिग्रहः कथञ्चित्तदा शब्दोपदर्शितव्याप्तिकानुमानवदभेदानुमानवच्च सद्धेतुरेवेति चेन्न।

तत्रैव सद्धेतावतिव्याप्तेः, सर्वस्य पक्षत्वे पक्षातिरिक्ताप्रसिद्धेः असाधारणविरुद्धयोरतिव्याप्तेश्च, दूषकतायां व्यर्थविशेषणत्वाच्च। न च दूषकतानैकान्तिकत्वेन न प्रत्येकमिति वाच्यम्। अर्थगत्या व्यर्थविशेषणत्वात्। नापि विप्रतिपत्तिविषयमात्रवृत्तित्वम्, केवलान्वयिसाध्ये अव्याप्तेः सर्वस्य पक्षत्वे मात्रार्थाभावादिति।

(दी०) अथेत्यादि । पक्षातिरिक्ते न प्रतीतो निश्चितो व्याप्तिग्रहानुकूलोऽन्वयेन व्यतिरेकेण वा सहचारो यस्य स तथा । सद्धेतुरेवेति । तथाच लक्षणे पक्षातिरिक्तपदं सहचारग्रहस्थलमात्रोपदर्शकं न तु विशेषकमिति । विशेषकत्वाभिप्रायेण दूषणद्वयमाह तत्रैवेत्यादि । असाधारणे सपक्षव्यावृत्ते पक्षतादशायां शब्दोऽभिधेयः शब्दत्वादित्यादौ जलं निःस्नेहं शीतस्पर्शवत्त्वादित्यादौ च रूपं जलं वा द्रव्यभिन्नं गुणवत्त्वात् गुणकर्म्मावृत्तिजातिमत्त्वादित्यादौ विरुद्धे चातिव्याप्तिरित्यर्थः । दूषकतायामिति । सहचाराभावस्यैव ज्ञानं विरोधि न तु तत्प्रत्ययांशस्यापीति । अर्थगत्येति । अनैकान्तिकशब्दार्थविवेचनेन प्रातिस्विकरूपेणैव प्रतिबन्धकत्वव्यवस्थितेरित्यर्थः ।

केचित्तु दूषकतायामसाधकतायाम् , अर्थेति, अनैकान्तिकशब्दार्थे उभयकोट्युपस्थापकत्वादौ साध्योपस्थापकत्वाद्यंशस्य व्यर्थत्वादित्यर्थ इत्याहुः ।

विप्रतिपत्तिः पक्षे साध्याभावप्रतीतिः साध्ये पक्षनिष्ठाभावप्रतियोगित्वप्रतिपत्तिर्व्वा ? आद्ये केवलान्वयीति । साध्याभावाप्रसिद्ध्या अव्याप्तिरित्यर्थः । उभयत्र सर्वस्येति । अतिव्याप्तेरिति पाठे तन्मात्रवृत्तित्वं तत्तद्व्याप्यवृत्तिकत्वं तदितरावृत्तित्वं वा ? आद्ये केवलेति । इदञ्च यथाकथञ्चिद्व्याप्तिग्रहदशायाम् । द्वितीये सर्वस्येति ।

(गा०) पक्षातिरिक्तेत्यादि यथाश्रुतमूलेऽप्रतीतपदस्य पक्षातिरिक्तपदव्यवहिततया पक्षातिरिक्ते सहचाराप्रत्ययो न लभ्यते, एवं व्याप्तिग्रहानुकूलपदसहचारपदयोरव्यवधानविरहेण व्याप्तिग्रहानुकूलसहचारत्वावच्छेदेनाप्रतीत्वान्वयालाभ इति विपर्ययेण योजयित्वा व्याचष्टे पक्षातिरिक्त इत्यादि । सर्वत्र साध्यसन्देहदशायामपि हेतौ साध्यसहचारस्य संशयरूपप्रतीतिसम्भवात् प्रतीतिपदं निश्चिता·

र्थकतया व्याचष्टे न प्रतीत इति । व्याप्तिग्रहानुकूलत्वेनानुगमनीयं सहचारद्वयं विशिष्य दर्शयति अन्वयेन व्यतिरेकेण वेति । सहचारस्य साध्यसाधनसहचारत्वेन निवेशे व्यतिरेकिणि साध्याभावहेत्वभावसहचारत्वेन निवेशेऽन्वयिन्यतिव्याप्तिः, सहचारत्वेनोभयोरनुगमे उदासीनपदार्थसहचारग्रहदशायां अनुपसंहारिण्यव्याप्तिरिति तद्वारणमुक्तरूपेणानुगमफलं बोध्यम् । यस्येत्यस्य व्याप्तिग्रहेणान्वयः । षष्ठ्यर्थसम्बन्धश्च तद्धेतुकानुमित्यनुकूलत्वम, तथाच तद्धेतुकानुमित्यौपयिकव्याप्तिग्रहानुकूलसहचारनिश्चयाभावस्तस्यानुपसंहारित्वमिति लक्षणं पर्य्यवसितम् । यदि च पक्षे व्याप्तिग्रहः कथंचिदिति ग्रन्थोऽसर्वपक्षकपर एव सर्वपक्षकपरत्वे तत्रैव सद्धेतावतिव्याप्तिरित्यग्रिमग्रन्थासंगतेः पक्षे सहचारप्रत्ययेऽपि पक्षातिरिक्तेप्रतीतसहचारकत्वेनातिव्याप्तेः पक्षातिरिक्तप्रसिद्धावेसंगतेः, एवं सर्वस्य पक्षत्वे पक्षे व्याप्तिग्रह इति विशेषाभिधानमप्यसंगतं स्यात्, एवं च तत्र पक्षातिरिक्तत्वपदमहिम्ना लक्षणगमनात् सद्धेतुरेवेत्यभिधानमसंगतमित्यतः पक्षातिरिक्तत्वांशस्य लक्षणाघटकत्वाभिप्रायेण तत् संगमयति तथाचेति । विशेषकं-सहचारग्रहस्थलव्यावर्त्तकम् । नन्वेवमग्रिमदूषणद्वयदानविरोध इत्यतोऽभिप्रायानवबोधमूलकत्वेन तत् संगमयति विशेषकत्वेति । दूषणद्वयमप्रसिद्धेरित्यन्तम् । शब्दोऽनित्यः शब्दत्वादित्यादौ प्रसिद्धासाधारणे गगनादौ व्यतिरेकसहचारस्यैव प्रतीतत्वादयं गौरश्वत्वादित्यादिविरुद्धे च घटादौ व्यतिरेकसहचारनिश्चयसंभवान्नातिव्याप्तिसंगतिरतोऽसाधारणविरुद्धयोरिति मूलं तद्विशेषपरतया व्याचष्टेऽसाधारण इति । वक्ष्यमाणकेवलान्वयिसाध्यकहेतोर्विपक्षाप्रसिद्ध्या जलं निःस्नेहं शीतस्पर्शवत्वादित्यादौ बाधावतारदशायां विपक्षप्रसिद्धावपि तद्व्यावृत्तत्वाभावात् सपक्षविपक्षव्यावृत्तत्वरूपमसाधारण्यं न संभवतीति असाधारण इत्यस्यार्थमाह सपक्षव्यावृत्त इति । शब्दोऽभिधेयः शब्दत्वादित्यादौ पक्षेऽन्वयसहचारस्य सत्वे दशाविशेषे निश्चयसंभवादाह पक्षतादशायामिति । अतिव्याप्तिरित्यग्रिमेण संबध्यते । यत्र सहचार एव नास्ति तादृशमुदाहरति जलमिति । निःस्नेहत्वं-स्नेहवदन्यत्वम्, अत्र च सर्वदैवातिव्याप्तेः पक्षतादशायामित्यस्य न सम्बन्ध इत्याविष्कर्त्तुमित्यादावित्यादाविति मध्येऽप्युक्तम् । अस्य च विरुद्धत्वेऽपि बाधानवतार

दशायां तद्ग्रहासंभवादसाधारणतयोपपादनमविरुद्धम् । जले चेति । प्रथमेऽसिद्धिसंकीर्णो द्वितीये च बाधसंकीर्णो विरोध इति भेदः । घटादावुत्पत्तिकाले गुणरूपहेत्वभावसत्त्वेऽपि प्रतियोगिवैयधिकरण्यावच्छिन्ने तस्मिन् साध्याभावसहचारो न सम्भवति, स एव च व्यतिरेकव्याप्तिग्रहानुकूलः—प्रतियोगिवैयधिकरण्यावच्छिन्नाया एव व्यापकताया अव्याप्यवृत्तिव्यभिचारिण्यतिव्याप्तिवारणाय तादृशव्याप्तौ निवेशनीयत्वात् प्रथमेऽतिव्याप्तिसंगतिः, प्रतियोगिवैयधिकरण्यानवच्छिन्नापि यदभावे साध्याभावसहचारो न सम्भवति तत्रातिव्याप्तेरतिस्फुटतया तादृशमपि हेतुमाह गुणकर्मावृत्तीति । समवायेनावृत्तित्वस्य हेतुतायाश्च लाभाय जातीति । अतिव्याप्तिरिति । यद्यपि प्रथमोक्तासाधारणभिन्नस्थलत्रये व्याप्तिग्रहानुकूलसहचाराप्रसिद्ध्या नातिव्याप्तिसम्भवः, तथापि प्रकृतसाध्यादिसहचारस्य प्रमेयत्वेन केवलसहचारत्वादिना वा निश्चयदशायामनुपसंहारिण्यव्याप्तिवारणाय व्याप्तिग्रहानुकूलो यः सहचारनिश्चयः पुरुषनिष्ठस्तदभाव एव विवक्षणीयः, तथा चोक्तस्थलेष्वपि कदाचित् कस्यचिदन्यदीयसहचारे साध्यादिसहचारत्वभ्रमेण व्याप्तिभ्रमोत्पत्त्या प्रसिद्धतादृशभ्रमरूपसहचारनिश्चयाभावमादायातिव्याप्तिसम्भवान्नासंगतिः । पक्षातिरिक्तत्वविशेषणस्य दूषकतायामनुपयुक्तत्वेऽपि तस्य विशेषणत्वानभ्युपगमे न दोष इति प्रत्ययांशघटितस्य दोषत्वासंभवपरतया दूषकतायामित्यादिमूलं व्याचष्टे दूषकतेति । न तु तत्प्रत्ययांशस्य प्रत्ययांशघटितस्य सहचारप्रत्ययाभावस्येति यावत् । ज्ञानं विरोधीति अनुषंगेणान्वयः । ग्राह्याभावाद्यविषयत्वादिति भावः । प्रत्ययांशपरित्यागे च विरोध एव पर्यवसानमित्याशयः ।

अनुपसंहारित्वज्ञानस्याविरोधित्वेऽपि अनैकान्तिकत्वरूपसामान्यधर्मस्य विरोधिधीविषयत्वेन दोषतयाऽनुपसंहारिणो दुष्टत्वमव्याहतमित्याशंकते मूले न चेति । दीधितावनैकान्तिकशब्दार्थेति । अनैकान्तिकत्वं व्याप्तिग्रहविरोधिधर्मवत्त्वं साधारणादेः साधारण्यादिधर्ममादायैव उपपादनीयम् अनुगततादृशधर्मान्तरासम्भवात् , तथा च साधारण्यादिज्ञानत्वेनैव प्रतिबन्धकत्वमावश्यकमित्यनुपसंहारित्वे दूषकताविरोधिप्रत्ययांशनिवेशनिबन्धनदोषो दुर्वार एवेति भावः ।

मिश्रमतमाह केचित्त्विति । असाधकतासाधकतायामनुपसंहारितादोषस्येत्यादिः। एवं च साध्यसहचाराभावस्यैवासाधकताव्याप्यत्वेन व्यभिचारावारकत्वेन प्रत्ययांशवैयर्थ्यं बोध्यम्। (मूले) न च दूषकतेत्यत्र च(ए)तन्मते दूषकताऽसाधकतासाधनमनैकान्तिकत्वेन लिङ्गेन न तु प्रत्येकमनुपसंहारित्वादिना, तथाच तस्य व्यभिचारावारकविशेषणत्वेपि न क्षतिरिति तादृशमूलाशयः। उभयकोटीति । साध्यतदभावेत्यर्थकम्। उपस्थापकत्वादीत्यादिना विरुद्धान्यपक्षवृत्तित्वे सतीत्यादिरूपपरिग्रहः। साध्योपस्थापकत्वादीत्यादिना द्वितीयानैकान्तिकत्वघटकसत्यन्तपरिग्रहः। व्यर्थत्वादिति। विरुद्धादेरपि असाधकत्वेन तद्व्यावर्त्तकतादृशविशेषणस्य व्यभिचारावारकत्वादिति भावः।

अथ साध्योपस्थापकतावच्छेदकरूपमात्रस्यासाधकताहेतुत्वे यथा तादृश(साध्य)सहचारत्ववति सद्धेतौ व्यभिचारः तथा साध्याभावोपस्थापकतावच्छेदकरूपमात्रस्य हेतुत्वेऽपि तादृशसाध्याभाववद्व्यावृत्तत्ववति सद्धेतौ व्यभिचारो दुर्वार इति कोटिद्वयोपस्थापकतावच्छेदकरूपहेतौ वैयर्थ्याभिधानासङ्गतिः। साध्योपस्थापकतावच्छेदकसाध्यसहचारतदभावोपस्थापकतावच्छेदकतदभाववद्व्यावृत्तत्वयोः सद्धेतुसाधारणत्वेपि यद्रूपविशिष्टविषयकज्ञानजन्योपस्थितिः यद्रूपविशिष्टविषयकज्ञानजन्यसाध्याभावोपस्थितिसहकारेण सन्देहजनिका तदुभयरूपवत्त्वस्यैव उभयकोट्युपस्थापकतावच्छेदकरूपवत्त्वमित्यनेन विवक्षितत्वात्, तादृशसद्धेतुव्यावृत्तत्वेनासाधकतासाधकत्वसंभवादिति चेन्न।

निष्कृष्टमते धर्मितावच्छेदकधर्मिणि यद्रूपवत्ताज्ञानं साध्यसन्देहजनकं तद्रूपवत्त्वस्यैव तदुभयकोट्युपस्थापकतावच्छेदककरूपवत्त्वमित्यत्र विवक्षितत्वात्। तत्र धर्मितावच्छेदकविशिष्टसाध्यतदभावोभयप्रकारकज्ञानस्यैव साध्यसन्देहपदार्थतया तत्र प्रकारत्वांशवैयर्थ्यपरतया प्रकृतग्रन्थसंगतेः। तादृशलक्षणे साध्याभावाप्रकारकानुमितिं प्रति धर्मितावच्छेदकविशिष्टधर्मिणि साध्याभावव्याप्तिविशिष्टवत्ताज्ञानस्य हेतुतया विरुद्धातिव्याप्तिवारणायैव साध्यप्रकारकत्वानिवेशादसाधकतानुमाने च सद्धेतौ व्यभिचारप्रसंगात् तद्वैयर्थ्यस्य दुर्वारत्वात्। साध्यप्रकारकत्वमात्रनिवेशे साध्यानुमितिज-

नकसाध्यव्याप्यवत्ताज्ञानविषयतावच्छेदकव्याप्तिमादाय व्यभिचारात्तद्धारकसाध्याभावप्रकारत्वांशवैयर्थ्यप्रसक्तेन तद्वैयर्थ्यमुक्तम् । एवं चोभयकोट्युपस्थापकत्वादावित्यादेः साध्यतदभावप्रकारकज्ञानजनकत्वादावुपस्थितिविशेषणतया प्रविष्टं यत्साध्यप्रकारकत्वं तदादिविशेषणवैयर्थ्यादित्यर्थो द्रष्टव्यः। सहचारप्रत्ययाभावः सहचाराभावादन्य एवेति धर्म्मिभेदाद्वैयर्थ्यमत्रास्वरसबीजं बोध्यम् ।

सर्वस्य पक्षत्वे मात्रार्थाभावादिति केवलान्वयिसाध्यकाव्याप्तौ न हेतुः साध्ये केवलान्वयित्वाभिधानानुपयोगापत्तेरिति साध्याभावाप्रसिद्धेरेव तद्धेतुत्वं मूलकृतोऽभिमतम् । सर्वस्येत्यादिकं च सर्वपक्षकसामान्य एवाभिप्रेताव्याप्तिर्दोषान्तरस्य हेतुपरम् । एवं च साध्ये पक्षनिष्ठाभावप्रतियोगित्वप्रतिपत्तेर्विप्रतिपत्तिपदार्थत्वे प्रथमदोषासङ्गतिरिति तं सङ्गमयितुं विप्रतिपत्तिपदार्थं वितर्कयति विप्रतिपत्तिरिति। पक्षपदं विषयताविशेषलाभाय ।

मूले पक्षत्व इति । विप्रतिपत्तिविषयत्व इत्यर्थः । केवलान्वयिसाध्यकेऽतिव्याप्तेरिति पाठे मात्रार्थाप्रसिद्धेरतिव्याप्त्यसङ्गतेः तत्सङ्गमनाय वितर्कयति तन्मात्रवृत्तित्वमिति । तत्वव्याप्यवृत्तित्वं विप्रतिपत्तिविषयत्वव्याप्याधिकरणताकत्वम्, विप्रतिपत्तिश्च साध्ये पक्षनिष्ठाभावप्रतियोगित्वविप्रतिपत्तिरेव । तदितरेति । विप्रतिपत्तिविषयेतरेत्यर्थः । केवलान्वयिसाध्यकस्य विप्रतिपत्तिविषयत्वव्याप्यवृत्तेस्सर्वमभिधेयं प्रमेयत्वादित्यादिहेतोर्लक्ष्यतया नातिव्याप्तिः संगच्छत इत्यत आहेदं चेति । कथंचिदिति । सर्वत्र साध्यसन्देहसत्वेपि शब्दादिना व्याप्तिग्रहदशायामित्यर्थः। व्याप्त्यनिश्चयदशायामेव च तस्य लक्ष्यत्वादिति भावः। असाधारणव्यतिरेकिणोरप्यतिव्याप्तिर्बोध्या ॥

इत्यनुपसंहारिपूर्वपक्षः ॥

(चि०) उच्यते व्याप्तिग्रहानुकूलैकधर्म्म्युपसंहाराभावो यत्र स हेत्वभिमतोऽनुपसंहारी । स चान्वयेन व्यतिरेकेण वा सर्वस्य पक्षत्वे दृष्टान्ताभावात् घटोऽनित्यो घटाकाशोभयवृत्तिद्वित्वाश्रयत्वादित्यादौ सा-

ध्यसाधनसाहचर्य्याज्ञानात्तस्य विरुद्धत्वाज्ञानदशाया-मनुपसंहारित्वेनेष्टत्वात् ।

केवलान्वयिधर्म्मावच्छिन्नपक्षको वा । सर्वमभिधेयं प्रमेयत्वादिति सद्धेतौ न केवलान्वयी पक्षतावच्छेदकः निश्चितसाध्यवद्वृत्तित्वात् । विप्रतिपत्त्या साध्यानिश्चयदशायां पक्षत्वे तदनुपसंहार्य्येव । व्यतिरेकिसाध्यके साध्याभाववद्वृत्तित्वाज्ञानदशायामिदं दूषणम्, तदवगमेऽपि साधारणसङ्कर एव । एवं व्याप्यत्वासिद्धेर्ज्ञाने । तदुद्भावने चायं व्यभिचारवदुपजीव्यत्वाददोषः । घटाकाशोभयवृत्तिद्वित्वाश्रयत्वञ्च विरुद्धमेव । एतेनानुपसंहारित्वप्रतिसन्धाने यदि व्याप्तिग्रहस्तदानुमितिरेव तदभावे व्याप्यत्वासिद्धिरेवेति निरस्तम्, उपजीव्यत्वादिति ।

इत्यनुपसंहारिचिन्तामणिः ॥

(दी०) व्याप्तीत्यादि । यत्र यस्येत्यर्थः । तथाच हेत्वभिमतशब्दोपसन्दानात् यद्धेतुकपक्षतसाध्यसिद्ध्यौपयिकव्याप्तिग्रहानुकूलोपसंहाराभावस्तस्यानुपसंहारित्वमित्यर्थलाभाद्व्यतिरेकिणि नातिव्याप्तिः ।

ननूपसंहारः सहचारः तन्निश्चयो वा ? आद्ये तादृशस्याभावो निखिलप्रसिद्धानुपसंहार्य्यव्यापकः अतिव्यापकश्च रूपं द्रव्यभिन्नं गुणवत्त्वादगुणकर्म्मावृत्तिजातिमत्त्वादित्यादेः, द्वितीये पुनरज्ञानरूपासिद्धिपर्य्यवसायी कारणाभावतया स्वरूपसन्नेव दोषो न हेत्वाभास इत्यत आह ·केवलान्वयीति । पक्षः साध्यनिश्चयविरोधिनः साध्यवान्न वेत्यादेः सन्देहस्य विषयः। अवच्छे-

दकत्वञ्च स्वान्यूनवृत्तितत्कत्वं तच्च स्वरूपसतोऽप्यविरुद्धम् । तेन प्रातिस्विकद्रव्यत्वादिरूपेण सर्वत्र साध्यसन्देहदशायां नाव्याप्तिः । एवञ्च सर्वत्रैव हेत्वादिमति साध्यतदभावसन्देहाद्व्याप्त्यग्रहेणाभासत्वम् ।

परार्थस्थले बहिर्भावं व्युत्पादयति एवमित्यादिना । असिद्धिरनिश्चयः । ज्ञाने ज्ञापने । स्वार्थस्थलेऽन्तर्भावम् एतेनेत्यादिनाशङ्क्य निरस्यति उपजीव्यत्वादिति ।

(गा०) यत्रेत्यस्य सहचारग्रहाभावरूपैकधर्म्युपसंहाराभावेनान्वये व्यतिरेकिण्यतिव्याप्तिः–व्यतिरेकसहचारप्रकारकग्रहस्य हेत्वभावे सत्त्वेपि विषयतया तदभावस्य हेतावक्षतत्वात्, तस्य व्याप्तावन्वयेऽपि व्यतिरेकसहचारग्रहस्याप्ययव्याप्त्यग्राहकत्वे सैवातिव्याप्तिः–व्यतिरेकव्याप्तेः प्रकृतहेतुनिष्ठत्वाभावात्, सप्तम्यर्थविषयतायां व्याप्तिग्रहेऽन्वयेपि स एव दोषः–प्रकृतहेतोर्व्यतिरेकसहचारग्रहाधीनव्यतिरेकव्याप्तिग्रहाविषयत्वात्, अतः षष्ठ्यर्थपरतया सप्तमीं व्याचष्टे यत्रेति । एवं च व्यतिरेकव्याप्तेः प्रकृतहेतुनिष्ठत्वविरहेऽपि तद्ग्रहस्य प्रकृतहेतुविषयकत्वविरहेपि वा तत्सम्बन्धितया तद्ग्रहानुकूलसहचारग्रहदशायां नातिव्याप्तिरिति भावः । ननु यथाकथंचित् सम्बन्धस्य उदासीनव्याप्त्यादावपि सत्त्वेन व्याप्तेराधाराधेयभावरूपो विषयत्वरूपो वा सम्बन्ध एव विवक्षणीयः, तथाच तद्दोषतादवस्थ्यमित्यत आह तथाचेति । हेत्वभिमतेति । स्वहेतुकप्रकृतसाध्यसिद्ध्यौपयिकसम्बन्धतात्पर्यग्राहकहेत्वभिमतपदसमभिव्याहारादित्यर्थः । एतेन तत्पदवैयर्थ्यशंकापि निराकृता । उपसंहाराभावस्तु तत्पुरुषनिष्ठस्तं प्रति तस्य हेतोरनुपसंहारित्वमित्यर्थलाभादित्यर्थः ।

सर्वं द्रव्यभिन्नं गुणवत्त्वादित्यादौ अन्वयसहचारस्य व्यतिरेकसहचारस्य च विरहाल्लक्षणसमन्वयसम्भवेन प्रसिद्धानुपसंहारिणि सर्वमभिधेयं नित्यं वा प्रमेयत्वात् द्रव्यत्वाद्वेत्यादावव्याप्तेरभिधानं नासम्भवस्य।यद्यप्युक्तस्थलेपि प्रकृतव्याप्तिग्रहानुकूलसहचाराप्रसिद्धया न यथाश्रुतलक्षणसम्भवस्तथापि प्रकृतसाध्यसिद्ध्यौपयिको यो व्या-

प्तिग्रहस्तदननुकूलसहचारसामान्यकत्वविवक्षणे पदार्थान्तरसहचा-
रस्य प्रकृतसाध्यसिद्ध्यौपयिकव्याप्तिधर्मानुकूलत्वाभावमादाय लक्ष-
णसमन्वयसम्भवः । न च गुणादिनिष्ठद्रव्यत्वादिसहचारस्य द्रव्यभे-
दादिसहचारत्वभ्रमविषयतया प्रकृतव्याप्तिग्रहानुकूलत्वसत्त्वान्न स-
हचारसामान्ये तदननुकूलत्वमिति कथं लक्षणसङ्गमनमिति वा-
च्यम् । सहचारपदेन किञ्चित्प्रतियोगिकत्वकिञ्चिदनुयोगिकत्वविशि-
ष्टसहचारत्वविशिष्टपर्याप्तविषयताया विवक्षणीयत्वात् । भ्रमवि-
षयविशिष्टसहचाराप्रसिद्ध्या तद्विषयताया वास्तवसहचारत्वविशि-
ष्टापर्याप्तत्वात् भ्रमात्मकज्ञानविषयतासामान्ये च प्रकृतव्याप्तिग्रहा-
नुकूलत्वविरहस्याक्षतत्वात् । रूपमिति । प्रतियोगिवैयधिकरण्या-
नवच्छिन्ने गुणाभावे द्रव्यान्यत्वाभावसहचारसम्भवात् गुणकर्मा-
वृत्तिजातिमत्त्वहेत्वनुसरणम् । अज्ञानरूपासिद्धिपर्यवसायी-अज्ञान-
रूपासिद्ध्यात्मकः, कारणाभावतया-व्याप्तिग्रहकारणाभावतया, स्व-
स्वरूपसन्नेव-ज्ञानानपेक्ष एव, दोषः—परम्परयानुमित्यनुत्पादप्रयोज-
कः । न हेत्वाभास इति । यद्यपि वक्ष्यमाणसाध्यसन्देहविषयत्वरूप-
मनुपसंहारित्वमपि स्वरूपसदेव विरोधीति न तस्य हेत्वाभासता-
सम्भव इति लक्षणद्वयेऽपि तुल्यानुयोगः, तथापि प्रथमस्य कारणा-
भावतया स्वरूपसद्दूषणत्वं स्फुटतरं न द्वितीयस्य तस्यातथात्वादि-
त्यापातत ईदृशानुयोगेन द्वितीयावतारसंगतिरित्यवधेयम् ।

पक्षपदस्य साध्यवान्न वेति संशयविषयपरत्वे केवलान्वयिसा-
ध्यकेऽव्याप्तिस्तत्र कोट्यप्रसिध्या तादृशसंशयासम्भवात्, स्वनि-
ष्ठाभावप्रतियोगित्वसंशयविषयसाध्यकत्वार्थकत्वे पक्षविशेष्यकसं-
शयदशायामनित्यत्वादिसाध्यकेऽव्याप्तिरतः संशयद्वयमनुगमयति
पक्ष इति । पक्षताग्रन्थे व्याख्यातमेतत् । यद्यपि घटः प्रमेयवान् इ-
त्यादौ प्रमेयं घटनिष्ठाभावप्रतियोगि न वेत्यादिसंशयविषयतायाः
केवलान्वयिधर्मव्यापकत्वात् यथाश्रुतेऽतिव्याप्तिः, विषयताविशेष-
निवेशे उभयविधसंशये धर्मिविषयताया एकविधत्वाभावादननुग-
मः, प्रकृतानुमित्युद्देश्यनिष्ठसाध्यवत्तानिश्चयविरोधिसंशयविषयता-
निवेशे विश्वस्मिन् साध्यसन्देहदशायां व्यतिरेकिधर्मावच्छिन्ने प-
क्षे साध्यसाधकस्याप्यनुपसंहारिताया दूषकताबीजसत्त्वेनोपगन्त-
व्यतया तत्राव्याप्तिः । तथापि स्वप्रतिबन्धकतावच्छेदकीभूतसाध्यव-

स्तानिश्चयविशेष्यतासमानाधिकरणसंशयविषयताविवक्षणान्न दोषः ।
प्रमेयं घटनिष्ठाभावप्रतियोगि न वेत्यादिसंशयस्य घटादिमात्रवि-
षयताया एव तादृशसंशयप्रतिबन्धकतावच्छेदकप्रमेयादिप्रकारता-
निरूपितविशेष्यतासमानाधिकरणत्वात् तादृश्याश्च केवलान्वयि-
धर्माव्यापकत्वात् । ननु यत्र केवलान्वयिसर्वत्वादिकं धर्मितावच्छे-
दकीकृत्य न साध्यसंशयोऽपि तु द्रव्यत्वगुणत्वादिविशेषधर्मं धर्मि-
तावच्छेदकीकृत्यैव विश्वविषयकसंशयः तत्र संशयविषयतायां स्व-
रूपसम्बन्धरूपकेवलान्वयिधर्मावच्छिन्नत्वाभावादव्याप्तिस्तत्रापि स
हचारग्रहरूपदूषकताबीजसत्त्वेनालक्ष्यतास्वीकारासम्भवात् इत्यत
आह अवच्छेदकत्वं चेति । स्वान्यूनवृत्तित्वकत्वमिति । तथा च के-
वलान्वयिधर्मव्यापकं संशयविषयत्वं पर्यवसितम् । केवलान्वयि-
धर्मव्यापकत्वं चात्यन्ताभावाप्रतियोगित्वमेव न तु केवलान्वयिध-
र्मवन्निष्ठात्यन्ताभावाप्रतियोगित्वं निष्ठान्तनिवेशे प्रयोजनाभावात् ।
स्वरूपसतोऽपि-संशयधर्मिण्यप्रकारीभवतोऽपि । नाव्याप्तिरिति । तादृश-
समूहालम्बनसंशयविषयतायास्तत्संशयविषयतात्वेन केवलान्वयि-
धर्मव्यापकत्वादिति भावः । यत्र विश्वेषां नैकसंशयविषयता अपि
तु क्रमिकसंशयद्वयविषयतैव तादृशस्य संग्राह्यत्वे तत्कालीनसंशय-
विषयतात्वेन व्यापकत्वं विवक्षणीयम् ।

हेत्वादीत्यादिना हेत्वभावपरिग्रहः । व्याप्त्यग्रहेणेति । व्याप्त्यनि-
श्चयेनेत्यर्थः । सहचारनिश्चयासंभवादिति भावः । न च धर्मिणि
किञ्चिद्रूपेण साध्यादिसंशयेऽपि साध्याद्यंशे निर्धर्मितावच्छेदकसा-
ध्यादिसहचारस्य हेतौ निश्चये बाधकाभाव इति वाच्यम् । तद्वत्तया
गृह्यमाणे सर्वत्र तत्संशयदशायां तत्र सहचारसंशयसामग्र्या अ-
प्यौत्सर्गिकत्वात्, क्वचित् स्वाधिकरणे तन्निश्चयदशायामेव तादृशनि-
श्चयेन स्वाधिकरणवृत्तितत्कत्वनिश्चयेन वा तत्सामानाधिकरण्या-
भावनिवर्त्तनात्, स्वस्मिन् तत्सामानाधिकरण्यसंशयसामग्रीविघट-
नासंभवात् । आभासत्वं हेतोर्दुष्टत्वम् ।

मूले सन्दिग्धेतावति । क्वचिदधिकरणे साध्यनिश्चयदशावच्छिन्न
इत्यर्थः । साध्यानिश्चयदशायां-सर्वत्र साध्यसन्देहदशायां, पक्षत्वे-
केवलान्वयिधर्मस्य पक्षतावच्छेदकत्वे, तत्-अभिधेयत्वसाध्यकप्रमे-
यत्वम् व्यतिरेकिसाध्यके अनित्यत्वादिसाध्यकप्रमेयत्वादौ । अज्ञानद-

शायामिति। साध्याभावांशे निश्चयरूपज्ञानविरहदशायामित्यर्थः। इदं इदमेवानुपसंहारित्वमित्यर्थः । दूषणम्-अनुमित्यनुत्पादप्रयोजकं, न तु साधारण्यं तादृशनिश्चयात्मकज्ञानाविषयस्य तस्यातथात्वादिति भावः। तदवगमे-साधारण्यस्य यथोक्तनिश्चयरूपावगमदशायाम्। साधारणसंकर एवेति। कालान्तरीणानुपसंहारितासमानाधिकरणसाधारण्यप्रयुक्त एवानुमित्यनुत्पाद इत्यर्थः। तथा चोभयोरेव पृथक्प्रयोजकतया नान्यतरदोषत्वमिति भावः । अनुपसंहारितादशायां व्याप्त्यनिश्चयरूपव्याप्यत्वासिद्ध्यैवानुमित्यनुत्पादनिर्वाहादनुपसंहारिता न दूषणमित्येतेनेत्यादिनाशंक्य उपजीव्यतया तस्या दूषणत्वमग्रे व्यवस्थाप्यम् एवं व्याप्यत्वासिद्धित्वस्येत्यादिनाप्युपजीव्यतया दूषणत्वं व्यवस्थाप्यत इति पौनरुक्त्याशंकां स्वार्थपरार्थानुमानपरतया निराकरोति दीधितौ परार्थेति । बहिर्भावोऽसिद्धिबहिर्भावः, स्वार्थस्थले व्याप्त्यनिश्चयस्य ज्ञानोद्भावनयोरनुपयोगादिति भावः। अनुपसंहारित्वस्य दशाविशेषे व्याप्येपि हेतौ सत्त्वेन व्याप्त्यभावरूपव्याप्यत्वासिद्ध्यनियतत्वान्न तज्ज्ञापकत्वसम्भव इत्यसिद्धिपदमज्ञानरूपासिद्धिपरतया व्याचष्टेऽसिद्धिरिति। उद्भावनेऽर्थज्ञानद्वारैव उपजीव्यतया तदभिधानेनैवोद्भावकज्ञानेप्युपजीव्यत्वं लभ्यत इत्युद्भावनाधीनपरकीयज्ञानपरतया ज्ञानपरं व्याचष्टे ज्ञान इति । न चोद्भावनाधीनं परकीयज्ञानं शाब्दमेव तत्रानुपसंहारित्वस्य लिङ्गस्य नोपजीव्यतासंभव इति वाच्यम्। वादिवाक्याच्छाब्दव्याप्त्यनिश्चयनिश्चयेपि तत्प्रयोजकविरहशंकया तत्राप्रामाण्यशंकाया अनिवृत्तेः तत्प्रयोजकानुपसंहारित्वज्ञानस्यापेक्षितत्वात् ॥

(दी०) अत्रेदं चिन्त्यम्। हेतुमति साध्याभावसन्देहो नाभासः सत्त्वयैव विरोधित्वात्। तद्विषयस्तु हेतोः साध्याभावसामानाधिकरण्यं साध्यस्य वा हेतुमन्निष्ठाभावप्रतियोगित्वं नास्त्येव केवलान्वयिसाध्यके, व्यतिरेकिसाध्यके तु साधारण्यरूपतया सन्दिग्धानैकान्तिकत्वं पर्यवसितम्। त्रिश्वविषयकसाध्यतदभावसन्देहे च कारणीभूतान्वयव्यतिरेकसहचारग्रहविरहात् संशयसामग्र्या साध्यतदभाववत्त्वनिश्चयप्रतिबन्धाद्वा व्याप्त्यग्रहेऽज्ञानरू-

पासिद्धिरेव, उपजीव्योऽपि च साध्याभावसन्देहादिनाभासः सत्त्वेनैव विरोधादिति ।

(गा०) सन्देहोऽनुपसंहारित्वं तद्विषयो वा तदधीनो व्याप्त्यनिश्चयो वा ? तत्राद्यं दूषयति हेतुमतीति । नाभास इति । तथाच न तद्विशेषोऽनुपसंहारित्वाद्युपाधिरिति भावः । सत्त्वेनैव न तु ज्ञायमानतया । द्वितीयं दूषयति तद्विषयत्वादिति । हेतोः साध्याभावसामानाधिकरण्यं हेतुमान् साध्यवान्न वेति संशयस्य साध्यस्य हेतुमन्निष्ठाभावप्रतियोगित्वं संशयान्तरस्य विषयः । केवलान्वयिसाध्यके-सर्वमभिधेयं मेयत्वादित्यादिप्रसिद्धानुपसंहारिणि । इदमुपलक्षणम् । सर्वमनित्यं घटत्वादित्यादिव्यतिरेकिसाध्यव्याप्यानुपसंहारिण्यपि तदसत्त्वं बोध्यम् । व्यतिरेकिसाध्यके-सर्वमनित्यं प्रमेयत्वादित्यादौ । सन्दिग्धानैकान्तिकत्वमिति । एतेन निश्चितसाध्याभाववद्वृत्तित्वं साधारण्यं साध्याभावांशे निश्चयात्मकस्यैव साधारण्यज्ञानस्य प्रतिबन्धकत्वादन्यथा पक्षे साध्यसन्देहेनानुमानमात्रोच्छेदापत्तेः सन्दिग्धसाध्याभावसामानाधिकरण्यं पुनरनुपसंहारित्वमतो भेद इत्याशंका निराकृता । नियतविषयसंशयस्थले हेतौ सन्दिग्धसाध्याभावसामानाधिकरण्यादेरनुकूलतर्कानवतारे दोषत्वोपगमात्तस्य साधारण्यतया एव स्वीकार्यत्वात् तादृशस्थले तस्याविरोधित्वे सर्वत्र साध्यसंशयस्थलेऽप्यविरोधितापत्तेस्तज्ज्ञानस्य प्रतिबन्धकतान्तरे मानाभावात् । तृतीयं दूषयति विशेषेति । सहचारग्रहविरहात् व्याप्त्यग्रह इत्यग्रिमेणान्वयः । ग्रहो निश्चयः, दोषतया स्वीकृत इति शेषः । सहचारनिश्चयत्वेन पृथग्व्यापकताग्रहकारणतायाः स्वानभिमततया व्याप्त्यग्रहप्रयोजकान्तरमाह संशयेति । साध्यतदभावसंशयेत्यर्थः । साध्यतदभाववत्त्वनिश्चयप्रतिबन्धादिति । अन्वयव्यतिरेकव्याप्तिशरीरान्तर्गततया तदंशे निश्चयत्वघटकविपरीतभानानवच्छिन्नसाध्यतदभाववत्त्वभानविघटनादित्यर्थः । विपरीतकोट्यभाने तद्भासकसामग्र्यभावस्य प्रयोजकत्वादिति भावः । अज्ञानरूपासिद्धिरेव दोषतया पर्यवसिता । तथाच पूर्वोक्तैकधर्म्युपसंहाराभावस्येव नास्यापि हेत्वाभासत्वमिति भावः ।

ननु व्याप्त्यग्रहस्याज्ञानरूपासिद्धित्वेन हेत्वाभासताविरहेपि

तदुपजीव्यतया साध्यसन्देहः सहचारानिश्चयो वा व्यभिचारवदाभासः स्यादेव असिद्ध्युपजीव्यत्वेऽज्ञायमानविरोधिताया आभासत्वाविरोधित्वादिति मूलानुसारिशंकां निराकरोति उपजीव्योपि चेति। सत्तयैव विरोधित्वादिति। तथा चाज्ञायमानविरोधिनो ज्ञानरूपासिद्ध्युपजीव्यत्वं न हेत्वाभासताप्रयोजकं दृष्टान्तस्य साधारण्यस्य ज्ञायमानतयैव विरोधित्वादिति भावः।

(दी०) यत्तु व्याप्तीति, व्याप्तिग्रहानुकूलसहचारनिश्चयत्वावच्छिन्नविरोधिरूपवत्त्वमर्थः। विरोधस्तु संशयसाधारणमन्वयमात्रसहचारग्रहं विरुणद्धि, असाधारणे व्यतिरेकिणि च न व्यतिरेकसहचारग्रहविरोधः, तादृशरूपमन्तरेण लक्षणस्यासम्भवितया तदेव रूपं लक्षणमाह केवलेति। तादृशावच्छिन्नः पक्षः सन्दिग्धसाध्यको यस्याश्रयः स तथा। तथाच केवलान्वयिधर्म्मावच्छिन्नसाध्यसन्देहविषयवृत्तित्वमनुपसंहारित्वम्। व्यतिरेक्यादौ केवलान्वयी न साध्यसन्देहविषयतावच्छेदकः। साध्यवत्तानिश्चयसामान्यविरोधिसंशयविषयवृत्तित्वं वा तत्त्वम्। धर्म्मिविशेषनियन्त्रितस्तु सन्देहो नान्यधर्म्मिकनिश्चयविरोधी। साध्यासन्देहविषयताव्याप्यसाध्यसिद्ध्यनुकूलव्याप्तिग्रहौपयिकसत्ताकत्वं वा, तादृशी च सत्ता अन्वये हेतोर्व्यतिरेके च तदभावस्येति न कश्चिद्विशेषः। स्वरूपसत्तादृशसंशयविषये च हेतुमत्ताज्ञानं हेतौ साध्यसामानाधिकरण्यं संशयसामग्रीत्वेन तन्निश्चयप्रतिबन्धकम्, सर्वत्र संशयसामग्र्या निश्चयप्रतिबन्धकत्वकल्पनात्। हेतुमति सर्वत्र साध्याभावसन्देहे हेतौ साध्यसामानाधिकरण्याभावसंशयस्यौचित्यावर्जितत्वात् साध्याभावेन साध्यसामानाधिकरण्याभावोपस्थापनादिति।

(गा०) अत्रैव पूर्वपक्षेऽत्र ब्रूम इत्यादिमिश्रोक्तसमाधानं दूषयितुमुपन्यस्यति यत्त्विति। व्याप्तीति। प्रथमलक्षणसाधारणमा व्याप्तिग्र-

हेति । व्याप्तिग्रहानुकूलो यो यः सहचारस्तत्तत्सहचारनिश्चयत्वावच्छिन्नविरोधिरूपवत्त्वमित्यर्थः । सहचारनिश्चयवृत्तित्वमुपेक्ष्य निश्चयत्वावच्छिन्नत्वस्य प्रतिबध्यताविशेषणत्वात् आकाशाभाववानाकाशादित्यादौ हेत्वादेरवृत्तित्वस्य उभयसहचारग्रहविरोधित्वेपि नातिव्याप्तिः । अवच्छिन्नत्वं स्वरूपसम्बन्धविशेषः विरोधस्य हेतौ साध्यसामानाधिकरण्यात्मकस्य उभयथा वारणं दर्शयति विरोधस्त्विति । संशयेत्यनेन प्रतिबध्यतायां निश्चयत्वानवच्छिन्नत्वं दर्शितम् । अन्वयमात्रेत्यनेन व्यतिरेकसहचारग्रहविरोधित्वदलव्यवच्छेदः । (यद्यप्यनुपसंहारिण्यपि हेतुनिष्ठकेवलान्वयिधर्मव्यापक(साध्य)–संशयविषयवृत्तित्वं न हेत्वभावे साध्याभावसहचारनिश्चयविरोधिहेत्वभावधर्मिकसाध्याभावसंशयविषयवृत्तित्वग्रहस्यैव तद्धर्मिकतत्सचारसंशयसामग्रीत्वेन तद्धर्मिकतन्निश्चयप्रतिबन्धकत्वात्तथापि तत्तत्सहचारनिश्चयत्वावच्छिन्नविरोधित्वं नैकधर्मविशेषणम् । तथाच सर्वमनित्यं घटत्वादित्यादौ अन्वयसहचारनिश्चयविरोधि यद्धेतुनिष्ठतादृशसंशयविषयवृत्तित्वं यच्च हेत्वभावनिष्ठं तादृशसाध्याभावसंशयविषयवृत्तित्वं तदुभयरूपवत्त्वमादाय लक्षणसमन्वयः । येन केनापि सम्बन्धेन विरोधिरूपवत्त्वनिवेशात् हेत्वभावनिष्ठसंशयविषयवृत्तित्वस्यापि एकज्ञानविषयत्वादिना हेतुनिष्ठत्वात् सर्वमभिधेयमनित्यं वा प्रमेयत्वादित्यादौ व्याप्तिग्रहानुकूलव्यतिरेकसहचाराप्रसिद्ध्या यो यः सहचार इत्यनेनाप्यन्वयसहचारमात्रस्योपादानात् तद्विरोध्येकरूपमादाय लक्षणसमन्वयः । पर्वतो वह्निमान् धूमादित्यादौ साधनवत्ताग्रहविषयकतिपयधर्मिविशेष्यकसाध्यादिसंशयविषये साधनादेर्वृत्तिर्न साध्यादिसहचारनिश्चयविरोधिनी यद्यद्धर्मिणि विशिष्य सम्बन्धो ज्ञायते तावद्धर्मिषु विशेषणसंशयस्यैव विशेष्यविशिष्टवृत्तित्वसंशयहेतुतया विशिष्टनिश्चयविरोधित्वात् नानादण्डवत्त्वेन ज्ञाते पुरुषे एकद्व्यादिदण्डे रक्तत्वादिसन्देहेपि रक्तदण्डवान्न वा पुरुष इत्यादिसंशयानुदयात् । न हि पर्वतवह्निसन्देहे महानसादिवृत्तितया गृहीतधूमे वह्निमद्वृत्तित्वसंशयः । तान्निर्वाहश्च विशेषणसंशयाभाववैशिष्ट्यसम्बन्धज्ञानाभावस्य विशेष्यसम्बन्धज्ञानस्य च परस्परसहकारेणैव हेतुत्वकल्पनयेति । अन्वयसहचारनिश्चयत्वावच्छिन्नविरोधितामात्रानिवेशेऽतिप्रसङ्गं सूचयति असा-

धारण इति । शब्दोऽनित्यः शब्दत्वादित्यादौ पृथिवीतरेभ्यो भिद्यते पृथिवीत्वादित्यादौ चेत्यर्थः । ग्रहविरोधो-ग्रहानुत्पादः, तथाच तत्र साध्यसंशयविषयशब्दपृथिव्यादिवृत्तित्वे अन्वयसहचारनिश्चयविरोधित्वेऽपि व्यतिरेकसहचारनिश्चयविरोधित्वाभावान्नातिप्रसङ्ग इति भावः । व्यतिरेकसहचारनिश्चयत्वावच्छिन्नविरोधितामात्रनिवेशे शब्दोऽनित्यः शब्दत्वाभावादित्यादौ व्यतिरेकसहचारनिश्चयत्वावच्छिन्नविरोधिनि हेत्वभावनिष्ठसाध्याभावसंशयविषयशब्दादिवृत्तित्वेऽतिप्रसङ्गो बोध्यः । तादृशरूपमिति विरोधितावच्छेदकरूपमित्यर्थः । लक्षणस्य विरोधिरूपवत्त्वरूपानुपसंहारिलक्षणग्रहस्य । यस्य पक्ष इत्यत्र विग्रहे साध्यसंशयविषयरूपपक्षपदार्थघटकसाध्ये यत्सम्बन्धिकतया षष्ठ्यर्थसम्बन्धान्वये केवलान्वयिधर्मावच्छिन्नविषयताकसंशयविषयकसाध्यकत्वं लभ्यते, तस्य च ज्ञानं न व्याप्तिज्ञानविरोधि किन्तु वक्ष्यमाणक्रमेण साध्यसंशयविषयवृत्तित्वज्ञानमेवातस्तल्लाभाय संशयविषयधर्मान्विताश्रयतासम्बन्धार्थकत्वं षष्ठ्याः प्रदर्शयितुमाह यस्याश्रय इति । केवलान्वयीति । अवच्छिन्नान्तं विषयतान्वयि । तन्निवेशप्रयोजनमाह व्यतिरेक्यादाविति । आदिना असाधारणपरिग्रहः । पर्वतो वह्निमान्धूमादित्यादेः संशयविषयमात्रवृत्तित्वं निवेश्य वारणसम्भवाद्व्यतिरेक्याद्यनुधावनम् । साध्यवत्तानिश्चयविरोधित्वेन संशयानुगमस्यावश्यकतया प्रतिबन्धकतायां तादृशनिश्चयत्वव्यापकत्वमेव निवेशयितुमुचितम् विषयतायां केवलान्वयिधर्मव्यापकत्वस्य निवेशापेक्षया लाघवादित्याशयेनाह साध्यवत्तेति । सामान्यपदेन व्यतिरेक्यादिवारणं स्फुटयति धर्मिविशेषेति । धर्मिविशेषानियन्त्रितः-कतिपयमात्रधर्मिकः । नान्यधर्मिकेति । समानधर्मिकाविपरीतज्ञानस्यैव विरोधित्वादिति भावः ।

ननु यत्र यत्र हेतुस्तद्व्यतिरेकश्च ज्ञातस्तावद्धर्मिकासर्वविषयसंशयदशायामपि हेतोरनुपसंहारिता सहचारनिश्चयानुत्पादस्य दूषकताबीजस्य सत्त्वादिति तत्रोक्तलक्षणाव्याप्तिरतस्तत्साधारण्याय प्रकारान्तरमनुसरति साध्यसन्देहेति । उक्तस्थले चाज्ञायमानहेतुतद्व्यतिरेके सत्तावत्यधिकरणे सन्देहविषयतासत्त्वेऽपि न क्षतिः ज्ञायमानसत्ताया एव व्याप्तिग्रहानुकूलत्वात् । अथवा यत्र साध्यवति न हेतुर्यत्र वा साध्याभाववति न हेतुस्तत्र न साध्यसंशयः किन्तु यत्र यत्र धर्मिणि साध्य-

हेत्वोः साध्याभाववद्धेत्वभाववयोश्च सहचारस्तादृशे सर्वत्रैव साध्यसंशयस्तत्रापि हेतोरनुपसंहारित्वं व्याप्तिग्राहकसहचारनिश्चयाऽसंभवरूपदूषकताबीजस्याक्षतत्वादिति तत्साधारण्याय प्रकारान्तरमाह साध्यसन्देहेति। साध्यवन्निष्ठहेत्वभाववत्तायाः साध्याभाववन्निष्ठहेतुसत्तायाश्च व्याप्तिग्राहकसहचारघटकत्वेन व्याप्तिग्रहाननुकूलतया तदनुकूलसत्तायाः साध्यसंशयविषयताव्याप्यतयोक्तस्थले लक्षणसमन्वय इति भावः। साध्यसन्देहस्य चोक्तानुगतरूपेणैव निवेशो बोध्यः। असाधारणव्यतिरेकिहेतुसत्तायाः साध्यसंशयविषयत्वव्याप्यतयातिप्रसङ्गवारणाय साध्यसिद्ध्यनुकूलत्वेनान्वयव्यतिरेकव्याप्ती अनुगमय्य तद्ग्रहानुकूलत्वेन हेतुतद्व्यतिरेकसत्त्वयोरनुगमः। एतदेव दर्शयति तादृशी चेति। तादृशी—तादृशग्रहोपायिकी। अन्वये अन्वयसहचारनिविष्टा व्यतिरेके व्यतिरेकसहचारनिविष्टा। इदानीमनुपसंहारित्वस्य ज्ञायमानतया हेत्वाभासतानिर्वाहाय विरोधित्वं व्यवस्थापयति स्वरूपसदिति। साध्येत्यादेर्हेतोरित्यादिः। तन्निश्चयेति। साध्यसामानाधिकरण्यनिश्चयेत्यर्थः।

ननु हेतुमति साध्यसंशयस्य हेतौ साध्यसामानाधिकरण्यसंशयसामग्रीत्वमेवासिद्धमित्याशंकायामाह हेतुमतीति। औचित्यावर्जितत्वादिति। हेतुमति साध्यसत्त्वं हेतौ सामानाधिकरण्यनियतं सर्वत्र तद्वति तदभावसत्त्वं तत्र तत्सामानाधिकरण्याभावनियतमिति तदुभयभाने तदुभयभानौचित्यनाप्रत्याख्येयत्वादित्यर्थः। ननु साध्यसन्देहस्याधिकरणे सत्त्वेपि साध्यसामानाधिकरण्याभावस्यानुपस्थित्या न संशयः सम्भवति तदुपस्थापकसाधारणधर्मादिदर्शनसत्त्वे तदेव संशायकमस्त्वित्यत आह साध्याभावेनेति। साध्यसामानाधिकरण्याभावस्य साध्याभाववृत्तित्वेनाश्रयतया तत्सम्बन्धिसाध्याभावविषयकसाध्यसन्देहस्यैव तदुपस्थापकत्वादित्यर्थः। एवं च संशयज्ञानस्यानुपयोगित्वेपि तद्विषयवृत्तिताया ज्ञानस्य संशयसामग्रीविधया साध्यसामानाधिकरण्यघटितव्याप्तिनिश्चयविरोधितया तस्यानुपसंहारित्वरूपहेत्वाभासताऽक्षतैवेति समुदायभावः॥

(दी०) तत्र, सर्वत्र साध्यसन्देहदशायां क्वचिदपि सा-

ध्यसामानाधिकरण्यस्याग्रहीतत्वेन तदभावस्य गृहीतुमशक्यत्वात् । प्रतियोगितावच्छेदकविशिष्टप्रतियोगिनिश्चयस्याभावधीहेतुताया असकृदावेदितत्वात् ।

अस्तु वा स यथाकथञ्चित् साध्ये हेतुसामानाधिकरण्याभावसंशयहेतुत्वेन वा तथात्वं, न तथापि सामग्रीत्वेन प्रतिबन्धकतया हेत्वाभासत्वम् । अन्यथा व्यभिचरिताव्यभिचरितसमानासमानाधिकरणव्याप्याव्याप्यपक्षधर्मापक्षधर्मादिसाधनवाभिःसाधनादिसाधारणद्रव्यत्वादिमत्त्वम् हेतोः पक्षस्य चाभासान्तरं स्यात्, तदुपदर्शितस्येव तस्यापि ज्ञानस्येतरसाचिव्येन तत्तन्निश्चायकविरोधिसंशयसामग्रीत्वात् । एवमसिद्ध्यादिनिश्चायकप्रत्यक्षसामग्र्यपि । अपि च हेतोः साध्याभावसन्देहविषयमात्रवृत्तित्वं दूषणमिति प्राप्तं तच्च व्यतिरेकिणि हेतौ नियतविषयेणापि सन्देहेन सम्पद्यते, दूषकताबीजसत्त्वे चासाधारण्यादिसाधारण्यं न दोषाय, न वा अत्रैव निर्भरः कर्त्तव्यो हेत्वाभासत्वानुपपत्तेरुक्तत्वादित्यलं पल्लवितेन ॥

(गा०) अनुपसंहारितादशायां साध्यसामानाधिकरण्यसंशय एव दुर्घटः कथं तज्ज्ञानस्य तत्संशयसामग्रीत्वमित्याह सर्वत्रेति । क्वचिदपीति । कमपि धर्मिणमन्तर्भाव्य साध्यांशे निश्चयरूपसाध्यवद्वृत्तित्वप्रकारकज्ञानस्याजातत्वेनेत्यर्थः । तदभावस्य–साध्यसामानाधिकरण्यत्वावच्छिन्नाभावस्य, गृहीतुमशक्यत्वात्–संशयेन कोटितया गृहीतुमशक्यत्वात् । ग्रहणस्याशक्यत्वे हेतुमाह प्रतियोगितावच्छेदकेति । सर्वांशे निश्चयरूपस्य प्रतियोगितावच्छेदकप्रकारकज्ञानस्येत्यर्थः । अभावधीहेतुताया इति । प्रतियोगिविशेषिताभावबुद्धौ विशेषणतावच्छेदकनिश्चयविधया हेतुताया इत्यर्थः । प्रतियोगिविशेषिताभावबुद्धेः प्रतियोगितावच्छेदकविशिष्टवैशिष्ट्यावगाहितानियमादिति भावः ।

यत्तु मिश्रमतसिद्धस्वतन्त्रप्रतियोगिज्ञानहेतुताभिप्रायकोऽयं ग्रन्थ

इति । तदसत्-अभावलौकिकप्रत्यक्षं प्रत्येव स्वतन्त्रतद्धेतुतायास्तैः स्वीकारात् संशय उपनीताभावकोटिभाने तादृशकारणविरहस्याकिञ्चित्करत्वात् ।

अथ सर्वत्र साध्यसन्देहदशायां तादृशप्रत्यक्षनिश्चयासंभवेऽपि कालान्तरीणनिश्चयजन्यसंस्कारतः स्मरणात्मकतादृशनिश्चयः संभवत्येवेति चेन्न । यस्य पुंसः प्रागपि कुत्रचित् साध्यनिश्चयो न जातस्तस्य सहचारसंशयसामग्र्या एवमपि दुरुपपादत्वात् ।

ननु साध्यांशे निर्द्धर्मितावच्छेदकं तदंशे निश्चयरूपं साध्यसामानाधिकरण्यज्ञानं सर्वत्र साध्यसंशयदशायामपि सुलभमेव धर्मितावच्छेदकावच्छिन्नधर्मिविषयताया एव संशयत्वघटकतया धर्मितावच्छेदकावच्छिन्नतद्विषयताया निश्चयत्वसंपादकत्वात् । न च धर्मितावच्छेदकप्रकारेण सकलधर्मिणामेव तदा भानसंभवात् धर्मिविषयताया धर्मितावच्छेदकानवच्छिन्नत्वं दुर्घटमिति वाच्यम् । एकज्ञाने धर्मितावच्छेदकावच्छिन्नतदनवच्छिन्नविषयतयोः सत्त्वे बाधकाभावादित्याशयेनाहास्तुवेति । सः-प्रतियोगितावच्छेदकीभूतसाध्यसामानाधिकरण्यान्वयप्रकारकोनिश्चयः,सर्वत्र साध्यसंशयदशायामपि पक्षे हेतुमत्तानिश्चयसत्त्वे हेतुत्वांशे निश्चयात्मकहेतुसामानाधिकरण्यज्ञानसत्त्वेन साध्ये हेतुसामानाधिकरण्याभावसंशयः सुलभ एवेत्याशयेनाह साध्ये इति । न तथापि हेत्वाभासत्वमित्यन्वयः । उक्तानुपसंहारिताया इति शेषः । अत्र हेतुः सामग्रीत्वेन प्रतिबन्धकतयेति । तज्ज्ञानस्येति शेषः । अन्यथा-प्रतिबन्धकसामग्र्यात्मकधीविषयस्यापि हेत्वाभासत्वे, व्यभिचारिताव्यभिचारितेत्यादिपंचकस्यैव साधारणान्वयः । तत्र च व्यभिचारिताऽव्यभिचारितादिचतुष्टयसाधारणद्रव्यत्वादिमत्त्वं हेतोः साधनवान्निःसाधनसाधारणतद्वत्त्वं पक्षस्य बोध्यम् । प्रथमद्वयं हेतौ व्याप्तिघटकदलयोः प्रत्येकाभावसंशायकम्, तृतीयं विशिष्टव्याप्त्यभावसंशायकम्, तुरीयं पक्षधर्मत्वसंशायकम्, पंचमं पक्षे साधनाभावसंशायकमिति भेदः । तस्यापि तादृशद्रव्यत्वादिमत्वस्यापि,इतरसाचिव्येन-विशेषादर्शनादिसहकारेण । तत्तन्निश्चयति । अव्यभिचारादिनिश्चयेत्यर्थः । प्रत्यक्षसामग्रीलौकिकप्रत्यक्षसामग्रीघटकविशेषणज्ञानादिविषयः, तादृशसामग्र्या अपि बलवद्विपरीतभानसामग्रीत्वेन पक्षादौ हेतुमत्ताज्ञानप्रतिबन्धक-

त्वादिति भावः । दूषणान्तरमाहापि चेति । साध्याभावसन्देहविषयमात्रवृत्तित्वमिति । तन्मात्रस्य व्यतिरेकव्याप्तिग्रहाविरोधित्वेऽपि विरोधवदन्वयव्याप्तिग्रहाविरोधित्वेन हेत्वाभासताया दुर्वारत्वादिति भावः । व्यतिरेकिणि–पृथिवीतरेभ्यो भिद्यते पृथिवीत्वादित्यादौ, नियतविपर्ययेन–पृथिव्यादिमात्रविपर्ययेण, सपक्षे–निर्वहति, तथा च तत्राप्यनुपसंहारितापत्तिरिति भावः । इदमुपलक्षणम् असाधारण्येऽप्यतिप्रसङ्गो बोध्यः ।

वस्तुतस्तु असाधारणेऽपि व्यतिरेकव्याप्तिग्रहेण व्यतिरेकिपदेनासाधारण्यस्य साक्षादेव लाभः । ननु साधारणादिव्यावर्त्तनायैव सन्देहविषयताव्याप्यव्यतिरेकसत्ताप्यनुपसंहारित्वे निवेश्यतेत्यत आह दूषकतेति । अन्वयव्याप्तिग्रहप्रतिबन्धलक्षणहेत्वाभासताप्रयोजकसत्त्वे साध्यसन्देहविषयमात्रत्वांशमात्रस्यासाधारण्यं न हेत्वाभासताविरोधीत्यर्थः । नन्वस्तु तदेवानुपसंहारित्वं व्यतिरेकिणस्तथात्वेऽपि व्यतिरेकव्याप्त्युपादानान्नानुमानविरोध इत्यत आह नवेति॥

(टी०) व्याप्तिग्रहप्रतिबन्धलक्षणैकप्रयोजकत्वेन साधारण्यादीनामेकहेत्वाभासत्वम् । साधारणेन व्यापकत्वस्याव्यभिचारित्वस्य वा असाधारणेन सामानाधिकरण्यस्यानुपसंहारिणा च व्यतिरेकव्याप्तेर्ग्रहस्य प्रतिरोधात् । लक्षणन्तु विशिष्टसाध्यसाधनग्रहाविरोधिनो ज्ञानस्य विषयतया व्याप्तिग्रहविरोधितावच्छेदकं रूपम् । व्याप्तीश्चान्वयतो व्यतिरेकतश्च नानारूपाः प्रातिस्विकरूपेण उपादाय तावद्ग्राही ग्रहो वाच्यः । साध्यसाधनयोरप्रसिद्धेरसिद्धिभेदस्य वारणायाविरोधिन इत्यन्तम् । साध्यसाधनभेदेन व्यभिचारभेदाद्यत्र विशिष्टं साध्यं साधनं वाऽप्रसिद्धं तत्र तद्ग्रहविरोधित्वं नोपादेयम् । एवमन्यत्रापि । शेषं हेत्वाभासलक्षणोक्तदिशावसेयम् । व्यर्थविशेषणत्वन्तु न व्याप्तिग्रहविरोधीति वक्ष्यते । साध्याव्यभिचरितसामानाधिकरण्यविरहस्य बहिर्भावनीयत्वे पुनरन्वयव्याप्तौ व्यापकत्वमव्यभिचरितत्वं वा सामानाधिकरण्यञ्च

विशकलितं युगपदुपादेयम् । तत्र साधारणत्वं वर्णितम् । असाधारणत्वन्तु सपक्षव्यावृत्तत्वं, सपक्षश्च साध्यवान्, तद्व्यावृत्तत्वन्तद्वृत्तित्वग्रहविरोधित्वम् । प्रकृतसाध्यसाधनग्रहाविरोधिनो ज्ञानस्य विषयतया तदुभयसामानाधिकरण्यग्रहविरोधितावच्छेदकमिति तु निष्कर्षः । संगृह्यते चेत्थं साध्यादेः साधनवदवृत्तित्वादिकम् ।

(गा०) व्यतिरेकव्याप्तिग्रहविरोधिनो हेत्वाभासान्तरताविरहात्तस्य व्यभिचारमध्य एवान्तर्भावस्यौचित्यात्तस्यैवानुपसंहारित्वरूपतां स्वातन्त्र्येण व्यवस्थापयितुं भूमिकामाह व्याप्तिग्रहेति । एकहेत्वाभासत्वं–व्यभिचाररूपैकहेत्वाभासान्तर्गतत्वम् व्यापकताज्ञानस्यानुमितिहेतुताया निराकृतत्वादाहाव्यभिचारत्वस्य वेति । सामानाधिकरण्यस्य–साध्यसामानाधिकरण्यस्य, साध्यासामानाधिकरण्यमेवासाधारण्यं न तु मणिकारसंमतं साध्यव्यापकीभूताभावप्रतियोगित्वं तस्यानुमितौ साक्षादेव विरोधित्वेन सत्प्रतिपक्षादिवद्व्यभिचारान्यहेत्वाभासताया एव युक्तत्वादित्याशयः ।

असाधारण्यस्य साध्यासामानाधिकरण्यरूपत्वेऽनुमितिविरोधित्वादिघटितमूलोक्तसामान्यलक्षणस्याव्याप्त्यतिव्याप्तिकराम्बितत्वात् स्वयं सामान्यलक्षणमाह लक्षणं त्विति । ज्ञानस्य विषयतया–विषयीभूय, विरोधितावच्छेदकं–प्रतिबन्धकतायामवच्छेदकं प्रतिबन्धकतावच्छेदकीभूतज्ञानवृत्तिविषयताकत्वमिति तु पर्यवसितम् । एवमग्रेऽपि सर्वत्र बोध्यम् । अनुपसंहारित्वसंग्रहायाह व्याप्तीश्चेति । केनापि रूपेण व्याप्तीनामननुगमे तज्ज्ञानसामान्यविरोधित्वं न साधारण्यादेरित्यत आह प्रातिस्विकेति । असिद्धिभेदस्येत्यनेनालक्ष्यत्वं दर्शितम । असिद्धिभेदो व्याप्यत्वासिद्धिः । साध्यसाधनयोरवृत्तित्वं साध्यसाधनसामानाधिकरण्यग्रहविरोधितया असाधारण्यमेवेति तद्व्यावृत्तेरनपेक्षिततया साध्यादिमत्त्वपर्यन्तानुधावनम् । ननु धूमवान् वह्नेरित्यादिस्थलीयसाधारण्याद्यसंग्रहप्रसङ्गः तत्र विशिष्टसाध्यादिग्रहविरोध्यप्रसिद्धेः । न च विशिष्टसाध्यादिग्रहविरोधिनी कामिनीजिज्ञासैव प्रसिद्धेति तदन्यज्ञाननिष्ठव्याप्तिग्रहविरोधितावच्छेदकरूपवत्त्वमादाय लक्षणसमन्वयः संभवतीति वाच्यम् । एवमपि यत्र

कामिन्यादेरेव साध्यता हेतुता वा तत्र साध्यादिग्रहविरोध्यप्रसिद्धेर्दुर्वारत्वादित्यत आह साध्यसाधनभेदेनेति । साध्यतावच्छेदकादिभेदेनेत्यर्थः । नोपादेयमिति । तत्र साध्याप्रसिद्ध्यादिदोषाप्रसिद्ध्या तदनुपादानेऽप्यतिप्रसङ्गानवकाशादिति भावः । तथाच दर्शितस्थले विशिष्टसाध्यादिग्रहविरोध्यप्रसिद्ध्याऽव्याप्तेर्नावकाश इत्याशयः । यदि स्वाप्रतिबध्यविशिष्टसाध्यादिग्रहकत्वमविरोध्यन्तार्थस्तदाऽविरोधिन इत्यन्तस्योपादानेपि नाव्याप्तिरित्यपि बोध्यम् । अन्यत्रापि वक्ष्यमाणासाधारणादिलक्षणेऽपि, शेषमवच्छेदकत्वनिर्वचनं विशिष्टान्तराघटितत्वनिवेशनादिकम् ।

ननु नीलधूमादित्यादौ हेतुतावच्छेदकस्य साध्यसामानाधिकरण्यानवच्छेदकत्वरूपव्यर्थविशेषणतायां व्याप्यत्वासिद्धिप्रभेदत्वेन व्याप्तिग्रहविरोधिन्यामतिव्याप्तिरित्यत आह व्यर्थविशेषणं त्विति । वक्ष्यत इति । असिद्धिग्रन्थ इति शेषः । व्याप्त्यभावेतिव्याप्तिमाशङ्क्याह साध्याव्यभिचरितेति । स्वमते व्यापकताज्ञानस्यानुमित्यहेतुत्वेन तद्विरोधिनोऽव्यापकतादेः साक्षाज्जनकज्ञानाविरोधित्वेन न हेत्वाभासत्वमिति स्वमताभिप्रायेणाहाव्यभिचरितत्वं वेति । साध्याभाववदवृत्तित्वं वेत्यर्थः । युगपदिति । एकज्ञानविशेषणतयेत्यर्थः । हेतौ साध्याव्यभिचारावगाहित्वे सति तत्र सामानाधिकरण्यावगाहि यज्ज्ञानं तद्विरोधित्वं निवेश्यम्, न तु अव्यभिचारविशिष्टसामानाधिकरण्यावगाहित्वमिति समुदायार्थः । तथाच विशिष्टाभावग्रहस्य विशिष्टवत्ताज्ञानमात्रविरोधितया तत्सत्त्वेपि साध्याव्यभिचारी साध्यसमानाधिकरणश्च हेतुरिति विशकलितदलद्वयावगाहिज्ञानोदयान्न विशिष्टाभावेऽतिव्याप्तिरिति भावः । साध्याप्रसिद्ध्यादिव्यभिचारानात्मकस्यापि व्याप्यत्वासिद्धेः सत्त्वाद्दर्शितविशिष्टाभावस्यासिद्धिव्यभिचारोभयरूपत्वेपि न क्षतिरित्यत्रानिर्भरसूचनाय बहिर्भावनीयत्वे पुनरित्युक्तम् ।

अथानुमितौ सामानाधिकरण्यसम्बन्धेनाव्यभिचारविशिष्टं यत् सामानाधिकरण्यं तत्प्रकारकहेतुज्ञानत्वेन न हेतुता सामानाधिकरण्यविशिष्टाव्यभिचारज्ञानत्वेनापि विनिगमनाविरहेण हेतुताप्रसङ्गात् हेतोर्व्यभिचारज्ञानकालेऽपि हेतुविशेषणतापन्नसामानाधिकरण्यांशे विशेषणतयाऽव्यभिचारभाने बाधकाभावेनानुमित्यापत्तेश्च । न चो-

उभयविधविशिष्टज्ञानस्यानुमितिहेतुत्वोपगमाद्धेतौ व्यभिचारग्रहदशायां तत्र सामानाधिकरण्यविशिष्टाव्यभिचारग्रहाभावान्नानुमित्यापत्तिरिति वाच्यम् । उभयविधव्याप्तिज्ञानसत्त्व एवानुमितिरित्युपगमस्यानुभवविरोधेनासंभवात्, तृणारणिमणिन्यायेनैवोपदर्शितोभयविधविशिष्टज्ञानहेतुतायाः स्वीकरणीयत्वाद्व्यभिचारग्रहकाले तदभावविशिष्टसामानाधिकरण्यग्रहाधीनानुमित्यापत्तेर्दुर्वारत्वात्, तथा चाव्यभिचारसामानाधिकरण्योभयावच्छिन्नहेतुविषयताशालिज्ञानत्वेनैवानुमितिहेतुता वाच्या तादृशज्ञाने प्रत्येकाभावज्ञानमेव विरोधि न त्वेकविशिष्टापराभावज्ञानं प्रतियोगितावच्छेदकविशिष्टप्रतियोगिमत्ताबुद्धेरेकाभावधीप्रतिबध्यत्वादिति विशिष्टाभावस्य हेत्वाभासत्वमेव दुर्घटं क्वान्तर्भावबहिर्भावविचार इति चेन्न । सामानाधिकरण्यसम्बन्धेनैकविशिष्टापरस्याभावग्रहो यथा तादृशविशिष्टप्रकारकग्रहविरोधी तथा युगपद्विशेषणविशेष्योभयधर्मावच्छिन्नतया एकधर्मिग्रहेऽप्युभयाभावग्रहवद्विरोध्युभयाभावसमशीलतादृशाभावग्रहदशायां सामानाधिकरण्येनैकविशिष्टापरग्रहसमशीलधर्मद्वयवत्ताग्रहानुत्पादस्यानुभवसिद्धतया प्रत्याख्यातुमशक्यत्वात् । अत एवासिद्धिग्रन्थे व्याप्तिविशिष्टपक्षधर्मताविरहस्य विशिष्टपरामर्शविरोधितया दोषत्वं स्वयं व्यवस्थापयिष्यते न हि विशिष्टपरामर्शस्य एकविशिष्टापरावगाहित्वं कारणतावच्छेदकं लाघवेनानुभवबलेन च हेतौ व्याप्तिपक्षधर्मत्वोभयावगाहिज्ञानस्यैवानुमितिहेतुत्वोपगमात् । न चैवं विशकलिताव्यभिचारसामानाधिकरण्योभयावगाहिधीविरोधित्वोपादानेनापि न विशिष्टाभाववारणसंभव इति वाच्यम् । विशकलितोभयावगाहित्वं हि न मिथो विशेष्यविशेषणभावानापन्नोभयावगाहित्वम्, अपि तु धर्मिनिष्ठविभिन्नविषयतानिरूपितोभयविषयताप्रतियोगित्वम् । तच्च साध्याव्यभिचारी हेतुः साध्यसमानाधिकरणो हेतुरिति समूहालंबनबुद्धौ, तस्याश्च न विशिष्टाभावधीप्रतिबध्यता अपि तु उभयविषयतानिरूपितैकविषयताशालिबुद्धेरेवेति वर्णितं साधारणग्रन्थे ।

असाधारण्यस्य सत्प्रतिपक्षोत्थापकतया दूषकतया मणिकारसम्मततया तदनुयायिना पूर्वं साध्यव्यापकीभूताभावप्रतियोगित्वमसाधारण्यमिति व्याख्यातम् तच्च स्वाननुमतमित्यन्यथा तन्निर्वक्ति

असाधारणत्वं त्विति । पक्षव्यावृत्तत्वमिति । यद्यप्येतदप्यनुपदं विवरणीयमिति तदेवासाधारणत्वविवरणमिस्तु किमन्तरा तद्विवरणेन, तथापि सपक्षव्यावृत्तत्वमसाधारणत्वमिति प्राचीनप्रवादाविरुद्धत्वं स्वमतस्य दर्शयितुमेतद्विवरणम् । निश्चितसाध्यवद्व्यावृत्तत्वस्य व्याप्तिग्रहं प्रति साक्षादविरोधितायाः प्राग्व्यवस्थापितत्वात् निश्चयांशपरित्यागेन सपक्षपदं व्याचष्टे सपक्षश्चेति । तद्व्यावृत्तत्वं यदि तदवृत्तित्वं तदा साध्यादिनिष्ठहेत्वसामानाधिकरण्यसाध्यवदवृत्तित्वविशिष्टसाधनादेरसङ्ग्रह इति तत्साधारण्याय व्याचष्टे तद्व्यावृत्तत्वमिति । साध्याप्रसिद्ध्यादेरपि विशिष्टसाध्यादिसामानाधिकरण्यग्रहविरोधितयाऽतिप्रसङ्गवारणाय विशिष्टसाध्यादिग्रहाविरोधित्वमधिकं प्रवेशयन् विरोधिपदस्य प्रतिबन्धकपरताभ्रमनिराकरणाय तदर्थं विवृणोति प्रकृतेत्यादिना । प्रकृतत्वं साध्यतावच्छेदकादिवैशिष्ट्यम् । तदुभयेति । विशिष्टसाध्यसाधनोभयेत्यर्थः । इत्थं–सामानाधिकरण्यग्रहविरोधितात्मकानुगमकप्रकारेण ॥

(दी०) चाक्षुषस्पर्शवान् स्पार्शनशब्दवत्त्वादित्यादौ विशेष्ययोरसामानाधिकरण्यञ्च । बाधासिद्धिभेदस्य च साध्यसाधनयोरवृत्तित्वस्यैतत्साङ्कर्येऽपि न क्षतिः । इदमेव च मणिकृतां विरुद्धत्वम् । इत्थञ्च तदीयमसाधारणत्वमेव विरुद्धत्वमिति । यत्र च धर्मिणि यो धर्मो यादृशो हेत्वाभासः तद्व्याप्यमपि तद्विशेषोऽन्तरेण प्रकरणसमन्तद्व्याप्यञ्च,पृथगुपदेशादविरोधाच्च।अनुपसंहारित्वञ्च विशिष्टसाध्यसाधनग्रहाविरोधिनो ज्ञानस्य विषयतया व्यतिरेकव्याप्तिग्रहविरोधितावच्छेदकरूपवत्त्वम् ।तादृशञ्च साध्यादेरत्यन्ताभावाप्रतियोगित्वादिकम् । वह्न्यभावाभावत्वेन वह्नेर्धूमाभाववद्वृत्तित्वज्ञानं वह्न्यभावस्य धूमाभावव्यापकताज्ञानं कदाचिद्विरुन्ध्यादपि न तु वह्नित्वेनेति नातिप्रसङ्गः । केवलान्वयिनि तत्सम्भवेऽपि अन्वयव्याप्त्युपादानेनानुमितिप्रतिरोध इति दिक् ॥

इति अनुपसंहारिदीधितिः ॥

ननु विशिष्टसाध्यसाधनसामानाधिकरण्यग्रहत्वावच्छिन्नानिरूपिता विरोधिता समूहालम्बनविशेषविरोधिताव्यावर्त्तनायावश्यं प्रवेश्यते तत्र चावच्छिन्नत्वं स्वरूपसम्बन्धात्मकमेव निवेश्यते न त्वन्यूनवृत्तित्वं गौरवात्तथाच विशिष्टसाध्यसाधनग्रहाविरोधित्वनिवेशनमनर्थकं साध्याप्रसिद्ध्यादिग्रहप्रतिबध्यताया विशिष्टसाध्यादिग्रहत्वेनैवावच्छिन्नत्वादित्यत आह चाक्षुषस्पर्शेति । विशेष्ययोः–स्पर्शशब्दयोः, परस्परासामानाधिकरण्यं संगृह्यत इत्यनेनान्वयः । तथाच स्वरूपसम्बन्धरूपावच्छिन्नत्वनिवेशे तत्राव्याप्तिः तादृशाविरोधिज्ञानप्रतिबध्यतावच्छेदककोटौ साध्यतावच्छेदकचाक्षुषत्वादिविषयत्वाप्रवेशेन विशिष्टसाध्यादिसामानाधिकरण्यग्रहत्वावच्छिन्नाविरोधितायास्तत्रासत्त्वादित्यन्यूनवृत्तित्वरूपमेव तन्निवेश्यम्, तथाच तत्स्थलीयसाध्याप्रसिद्ध्यादिग्रहप्रतिबध्यताया अपि विशिष्टसाध्यादिसामानाधिकरण्यग्रहत्वान्यूनवृत्तित्वात् तत्रातिप्रसङ्गवारणाय विशिष्टसाध्यादिग्रहाविरोधित्वनिवेशनमावश्यकमिति भावः ।

ननु साध्यस्यावृत्तित्वे बाधरूपे साधनस्य वाऽवृत्तित्वे स्वरूपासिद्ध्यात्मकेऽतिव्याप्तिः तद्ग्रहस्यापि साध्यवत्त्वादिग्रहविरोधितया तद्घटितोभयसामानाधिकरण्यग्रहविरोधित्वादित्याशङ्कां तयोर्लक्ष्यतास्वीकारेण निराकरोति बाधेति । एतत्सांकर्य्येऽपि–असाधारण्यरूपत्वेऽपि । न क्षतिरिति । अन्यादृशस्यापि बाधादेः प्रसिद्ध्या स्वातन्त्र्येण तत्परिगणनोपपत्तेरिति भावः ।

ननु साधनादेः साध्यासामानाधिकरण्यादिकं विरोध एव तस्य कथमसाधारण्यतोपगम इत्यत आह इदमिति । मणिकृत एव इदं विरुद्धत्वमनुमतं न तु ममेत्यर्थः । नन्वेवं भवतां को विरोध इत्याकांक्षायामाह इत्थं चेति । तदीयं–मणिकारीयं, साध्यव्यापकाभावप्रतियोगित्वरूपमसाधारणत्वम् ।

ननु साधनादेः साध्यासामानाधिकरण्यवत्तस्य तद्व्याप्यवत्त्वमप्युभयसामानाधिकरण्यग्रहविरोधीति तत्रोक्तलक्षणातिव्याप्तिरित्याशंकां लक्ष्यताप्रदर्शनेन निराकरोति यत्र चेति । प्रकरणसमं–पक्षनिष्ठसाध्याभावादिव्याप्यम् । तद्व्याप्यं–पक्षनिष्ठसाध्याभावादिव्याप्यव्याप्यम् । तस्य बाधसत्प्रतिपक्षविशेषणत्वाभावादिति शेषः । तत्र हेतुमाह पृथगिति । पक्षनिष्ठसाध्याभावादिव्याप्यस्य सत्प्र-

तिपक्षतया स्वतन्त्रपरिगणानात्तादृशस्य साध्यवत्ताज्ञानविरोधिधीविषयत्वेन हेत्वाभासताविरहाच्चेत्यर्थः । व्यतिरेकव्याप्तिग्रहेति । हेत्वभावत्वावच्छिन्नधर्मिकसाध्याभावव्यापकताग्रहेत्यर्थः । साध्यादेरित्यादिना साधनस्य साधनाभावस्य च परिग्रहः । अत्यन्ताभावाप्रतियोगित्वेनादिपदग्राह्यसाधनस्याप्यन्वयः । अप्रतियोगित्वादिना साध्याभावाव्यापकत्वपरिग्रहः । तस्य च साधनाभावेन सम्बन्धः ।

अथाभावाप्रतियोगित्वधीरभावप्रतियोगित्वप्रकारकं ज्ञानं प्रत्येव विरोधिनी न तु तदप्रकारकं साध्याभावव्यापको हेत्वभाव इत्यादिज्ञानं प्रति ग्राह्याभावानवगाहित्वात् । न चैतादृशज्ञानेपि संसर्गतयाऽभावप्रतियोगित्वभानादभावाप्रतियोगित्वं ग्राह्याभाव एवेति वाच्यम् । अभावांशे विशेषणीभवतः साध्यादेरनुयोगिताया एव संसर्गतया प्रतियोगितायास्तत्राभानात् । प्रतियोगितानिरूपकत्वावच्छिन्नैवानुयोगिता सम्बन्धो न तु केवला प्रतियोगित्वानुयोगित्वयोः समानवित्तिवेद्यतायाः सिद्धान्तसिद्धत्वादिति चेत् । एवमप्यभावप्रतियोगितात्वेन प्रतियोगिताया ग्राह्यताविरहात्तत्तद्रूपावच्छिन्नाभावस्य विरोधितानुपपत्तिः ।

यत्तु-अभावे अनुयोगितासम्बन्धावच्छिन्नसाध्याद्यभावस्यैव दोषतया विवक्षणम्-तदपि न, वाच्यत्वादिसाध्यहेतुकेपि संयोगादिसम्बन्धावच्छिन्नप्रतियोगिताकस्य द्वित्वाद्यवच्छिन्नप्रतियोगिताकस्य चाभावस्यानुयोगितासम्बन्धेन साध्यादिसम्बन्धित्वादभावत्वावच्छेदेन तत्सम्बन्धावच्छिन्नसाध्याद्यभाववत्त्वाप्रसिद्धेः । अभावत्वसामानाधिकरण्यमात्रेण तद्वत्ताधियश्च अभावत्वसामानाधिकरण्यमात्रेण साध्यादिप्रकारकव्यतिरेकव्याप्तिग्रहाविरोधितया तस्य दोषत्वायोगात् । स्वरूपादिसम्बन्धावच्छिन्नवाच्यत्वत्वाद्यवच्छिन्नप्रतियोगितानिरूपितानुयोगितासम्बन्धस्य चाप्रसिद्ध्या तादृशसम्बन्धावच्छिन्नाभावोप्यप्रसिद्ध इति न तादृशस्य दोषतोपगमसम्भवः । साध्यताद्यवच्छेदकस्य स्वावच्छिन्नसम्बन्धविशेषावच्छिन्नप्रतियोगिताकत्वसम्बन्धावच्छिन्नप्रतियोगिताकाभावोऽभावांशे तादृशसम्बन्धेन प्रतियोगिविशेषणतापन्नसाध्यतावच्छेदकादिप्रकारकव्यतिरेकव्याप्तिग्रहविरोधितयाऽनुपसंहारित्वमित्यपि न सार्वत्रिकं विशेषणान्तरानवच्छिन्नज्ञानत्वादेर्यत्र साध्यता-

द्यवच्छेदकता तत्र स्वरूपतस्तत्प्रकारकव्यतिरेकव्याप्तिबुद्धेरेव हेतुतया तत्र तदभावप्रकारकज्ञानस्य नियमेन तदंशे प्रतियोगितावच्छेदकज्ञानत्वत्वादिप्रकारताया अविरोधित्वात् प्रतियोगितावच्छेदकप्रकारकप्रतियोगिमत्ताबुद्धेरेव समानप्रकारकतया अभावग्रहप्रतिबध्यत्वात् वृत्त्यनियामकसम्बन्धस्य संसर्गाभावप्रतियोगितानवच्छेदकतया तादृशसम्बन्धावच्छिन्नाभावाप्रसिद्धेश्च । एतेन तत्सम्बन्धेन तत्प्रकारकबुद्धौ समानधर्मिकतत्सम्बन्धावच्छिन्नतदभाववत्ताबुद्धिवत् तद्धर्मस्य तेन सम्बन्धेन असम्बद्धत्वग्रहस्यापि प्रतिबन्धकत्वमानुभविकम् । अत एव साध्यादेरवृत्तित्वस्य बाधादिप्रभेदतोक्तिरपि सङ्गच्छते । एवं च साध्यादेरत्यन्ताभावाप्रतियोगित्वादिकमिति यथाश्रुतस्यैव सङ्गतिरित्यप्ययुक्तम्–केवलान्वयिन्यपि द्वित्वाद्यवच्छिन्नाभावप्रतियोगित्वेसत्त्वेन तन्निष्ठतदप्रतियोगित्वासिद्धेः । स्वरूपादिसम्बन्धावच्छिन्नवाच्यत्वत्वाद्यवच्छिन्नप्रतियोगिताया अप्रसिद्ध्या तदभावस्याप्रसिद्धेः । साध्यताद्यवच्छेदकसम्बन्धविशेषावच्छिन्नप्रतियोगितानवच्छेदकत्वमनुपसंहारित्वमित्यपि स्वरूपतो ज्ञानत्वादिसाध्यतावच्छेदकस्थले न सम्भवति निर्विशेषणकज्ञानत्वादिविषयकव्याप्तिग्रहे ज्ञानत्वत्वादिप्रकारेणासम्बद्धत्वग्रहस्यासमानप्रकारकतयाऽविरोधित्वात् । साध्यतावच्छेदकावच्छेदेन वर्त्तमानः साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगित्वाभावोऽनुपसंहारित्वमिति प्रगल्भानुमतमननुमतमेव दीधितिकृता व्याप्तिवादे निराकृतत्वात् ।

अत्राहुः विशिष्टबुद्धौ विशेष्ये प्रकाराभावग्रहवद्विशिष्टसंसर्गकबुद्धौ संसर्गे संसर्गतावच्छेदकाभावग्रहोऽपि विरोधी संसर्गविशेषावच्छिन्नविषयताया एव ग्राह्याभावधीप्रतिबध्यतावच्छेदकत्वात् विशिष्टसंसर्गकबोधस्थले संसर्गतावच्छेदकीयवैशिष्ट्यस्यापि संसर्गतान्तःपातिसंसर्गतया संसर्गतावच्छेदकविषयताया अपि संसर्गावच्छिन्नत्वात् । एवं च वाच्यत्वत्वाद्यवच्छिन्नत्वस्वरूपसम्बन्धावच्छिन्नत्वोभयविशेषितप्रतियोगितासंसर्गके वाच्यत्वाभावव्यापको हेत्वभाव इति ज्ञाने प्रतियोगितात्वावच्छेदेन तदुभयाभावग्रहस्य विरोधितया तद्विषयतादृशाभावोऽनुपसंहारित्वमिति विवक्षितम् । अधिकमन्यत्रानुसन्धेयम् ।

ननूक्तलक्षणस्य हेतुनिष्ठसाध्याभाववद्वृत्तित्वरूपसाधारण्येऽति-

व्याप्तिः तज्ज्ञानस्यापि हेत्वभावप्रतियोगिकाभावे हेतोः साध्याभावसामानाधिकरण्यावगाहितया हेत्वभावे साध्याभावसमानाधिकरणाभावाप्रतियोगित्वज्ञानाविरोधित्वात् साध्याभावसमानाधिकरणत्वेन भासमानेऽभावे हेत्वभावप्रतियोगिकत्वग्रहस्य तुल्यवित्तिवेद्यतया हेत्वभावे तादृशाभावप्रतियोगित्वावगाहनादित्यभिमानं निराकरोति वह्न्यभावभावत्वेनेति ।कदाचिद्धिरुन्ध्यादिति। सम्भावनायां लिङ्। तुल्यवित्तिवेद्यतायां मानाभावात् भावे वा ।इहापि असमानप्रकारकतया उक्तज्ञानस्य व्यापकताज्ञानविरोधिताया विचारासहत्वादनिर्भरः। न तु वन्हित्वेनेति। तेन रूपेण भाने हेत्वभावांशे प्रतियोगिताया असंस्पर्शादिति भावः। नातिप्रसङ्ग इति। हेतुतावच्छेदकावच्छिन्नस्य साध्याभाववद्वृत्तिताया एव साधारणत्वात् उक्तबुद्धेर्विरोधितायाः प्रामाणिकत्वे हेत्वभावाभावत्वावच्छिन्नस्य साध्याभाववद्वृत्तिताया लक्ष्यत्वादेवेति भावः। तत्सम्भवेपि-अभावाप्रतियोगित्वरूपानुपसंहारित्वसम्भवेपि, अन्वयव्याप्त्युपादानेन-अन्वयव्याप्तिधीसम्भवेन, नानुमितिप्रतिरोधः—विशेषदर्शिनोपि नानुमित्यनुत्पादः। न चैवमपि केवलान्वयिसाध्यकहेतोराभासतया तत्प्रयोक्तुर्निग्रहप्रसङ्ग इति वाच्यम्। अभिमतसाधकताविघटकाभासस्यैव निग्रहप्रयोजकतया अन्वयिमुद्रया गमकता यत्राभिमता तत्र निग्रहायोगात् व्यतिरेकिप्रयोगे निग्रहस्येष्टत्वात् इति ॥

इति श्रीगदाधरभट्टाचार्यचक्रवर्तिविरचितायां अनुमानगादाधर्यामनुपसंहारिप्रकरणम्।

अथानुमानगादाधर्यां

विरुद्धप्रकरणम् ।

(चि०) विरुद्धो न साध्याभावव्याप्यः, संयोगसाध्यके सद्धेतावतिव्याप्तेः । नापि साध्यवन्निष्ठात्यन्ताभावप्रतियोगिव्याप्यत्वं तत्त्वम्, इदं द्रव्यं गुणवत्त्वादित्यादौ संयोगादिव्याप्येऽतिव्याप्तेः । किन्तु साध्यासमानाधिकरणसाध्याभावव्याप्यः साध्यवदन्योन्याभावव्याप्यो वा । साध्याभावत्वं साध्यविरोधित्वमात्रं भावाभावसाधारणम्, तेनाभावे साध्येऽभावाभावस्य भावत्वेऽपि नाव्याप्तिः । अभावाभावोऽभावप्रतियोगिनिरूप्यत्वेन भावाभिन्न एव वा । न च भावत्वेनैवोपपत्तौ किमधिकेनेति वाच्यम् । बाधकं विनाऽभावप्रतीतेः प्रमात्वात्, अन्यथा अत्यन्ताभावाऽन्योन्याभावयोरप्रसिद्धिः ।

(दी०) साध्यविरोधित्वं साध्यप्रतियोगिकत्वम् । एकदेशिमतेनाह अभावेत्यादि । न च भावस्य स्वाभावविरहात्मकत्वरूपप्रतियोगित्वग्राहिधर्म्मिग्राहकमानबाधः, प्रतियोगित्वस्य सम्बन्धान्तरत्वात् । स्वस्याभावस्येत्यत्र षष्ठ्यर्थस्य तस्यावश्याभ्युपेयत्वात् । विरहत्वञ्च नाभावत्वं, बाधात् । नापि तद्ग्रहप्रतिबन्धकग्रहविषयत्वम्, अविरोधात् प्रत्यक्षेण दुर्ग्रहत्वाच्च । न चानवस्था, अभावस्य स्वाभावाभावत्वे बाधकाभावात् । भावस्य तथात्वे बाधकमाह बाधकं विनेत्यादि । अभावप्रतीतेः–अभावत्वविशि-

ष्टप्रतीतेः । अभावत्वञ्च न भावभिन्नत्वं प्रथमं दुर्ग्रहत्वात्, किन्त्वयमभावो न भाव इति प्रतीतिसाक्षिकं पदार्थान्तरम्, तच्चानुपस्थितं निर्विकल्पकोपस्थितं वा प्रकारः, अभावत्वञ्चासमवेतत्वान्न जातिः । अन्यथेति । अनतिप्रसक्तैरधिकरणैस्तद्धर्मैर्वा अभावव्यवहारोपपत्तेरिति भावः । लाघवादबाधिताभावत्वविशिष्टप्रत्ययबलाच्चातिरिक्तैकाभावसिद्धिस्तुल्यैव । एतेनाभावत्वं सप्रतियोगिकत्वं तच्चाननुगतानामप्यावश्यकानां प्रतियोगिनां कल्प्यते इत्यपास्तम् । संयोगादिसाधारण्याच्च ॥

(गा०)साध्याभाववत्त्वं साध्यविरोधित्वमात्रमित्यत्र मूले साध्यविरोधित्वं यदि साध्यासामानाधिकरण्यं तदा साध्यासमानाधिकरणपदोपादानवैयर्थ्यमिति तद्व्याचष्टे साध्येति । साध्यासमानाधिकरणत्वं साध्यानधिकरणवृत्तित्वं न तु साध्याधिकरणावृत्तित्वमतो न साध्याभावपदोपादानवैयर्थ्यम् । अधिकरणभेदेन संयोगाद्यभावभेदमते इदं लक्षणम्, अतो न संयोगी द्रव्यत्वादित्यादावतिव्याप्तिः । साध्यासमानाधिकरणपदं प्रतियोगिव्यधिकरण्यविशिष्टार्थकमित्यपि केचित् । तन्न, साध्याभावप्रतियोगित्वेन साध्योपादानस्य शिरोवेष्टनेन नासिकास्पर्शतुल्यत्वात् । मूलस्थमात्रपदेन भावव्यावर्त्तकाभावत्वनिवेशव्यवच्छेदः ।

अभावाभावस्य अभावप्रतियोगिकस्य भावत्वेऽपि भावतयाऽभावत्वाविरहेऽपि अभावत्वानिवेशाभ्युपगमेनाभावाभाव इत्यादिकल्पान्तराभिधानस्य सिद्धान्तत्वभ्रमनिरासायाह दीधितावेकदेशीति । ननु घटाभावो नास्तीत्यादिप्रतीत्या घटाभावाभावत्वविशिष्टधर्मो सिध्यति तस्यातिरिक्तत्वं च सैव विरुणद्धि तस्या एव घटादिरूपभावे स्वाभावाभावत्वरूपस्वाभावप्रतियोगित्वावगाहित्वादित्याशंकते न चेति । संबन्धान्तरत्वात्—अभावत्वान्यसम्बन्धत्वात् । स च सम्बन्धः स्वरूपादतिरिक्तोऽनतिरिक्तो वेत्युभयथैव न क्षतिरिति भावः । बाधादित्यस्य भाव इत्यादि । अविरोधादिति । अभावाभावस्यातिरिक्तत्ववादिनामपि प्रतियोगिमत्ताज्ञानस्याभावग्रहप्रतिबन्धकत्वोपगमादिति भावः । प्रत्यक्षेणेति । तद्ग्रहप्रतिबन्धकग्रहविषयत्वस्य ज्ञानघटितत्वेन चक्षुरयोग्यत्वादित्

भावः । अनवस्था–अतिरिक्तानामभावानामप्यतिरिक्ताभावकल्पनायामनन्ताभावकल्पनागौरवम् । बाधकाभावादिति । भावस्येवाभावत्वकल्पनयोगादिति भावः ।

मूले भावत्वेनैवेति । घटाभावो नास्तीति प्रतीतेर्घटादिरूपभावविषयकत्वेनैवेत्यर्थः । किमधिकेन–घटाद्यतिरिक्तविषयकत्वेन, यथातिरिक्तस्यापि तेजोऽभावादेरिदन्त्वादिविशिष्टस्य न प्रतियोगिग्रहसापेक्षग्रहत्वं किन्त्वभावत्वावच्छिन्नस्यैव तथा घटत्वादिविशिष्टस्य प्रतियोगिग्यनिरूप्यत्वेपि घटादेरभावत्वेन प्रतियोगिनिरूप्यत्वे बाधकविरहादिति भावः । अभावाभावप्रतीतेः प्रमात्वाभिधानस्य भावेऽभावप्रतियोगिकत्वबोधकतादृशप्रतीत्यप्रमात्वप्रसंजनसूचकतां स्फुटीकरोति दीधितौ भावस्येति । भावस्याभावप्रतियोगिकत्वेपि घटाभावो नास्तीत्यादिप्रतीतेरभावादिवैशिष्ट्यांशे प्रमात्वसंभवादभावरूपप्रतियोगिधर्मितावच्छेदकतापन्नाभावत्वांशे तत्र प्रमात्वानुपपत्तिलाभाय व्याचष्टेऽभावेति । अभावत्वं भाववैधर्म्यं तच्च भावे न संभवतीति तद्विशिष्टवाचकनञुल्लेखिन्या घटाभावो नास्तीत्यादिप्रतीतेस्तेन रूपेण घटाद्यवगाहित्वे तदंशे प्रमात्वं व्याहन्यतेति मूलाभिप्रायः । अभावत्वं यदि भावभिन्नत्वं तदा भावे तदप्रसक्त्या भावेप्यभावत्वस्वीकार इत्यर्थकान्यथेतिमूलानुत्थितिरतोऽभावत्वस्य तदन्यत्वं व्यवस्थापयति अभावत्वं चेति । प्रथमं–भावत्वादिप्रकारकज्ञानानुत्पत्तिदशायाम् । अभावो न भाव इति । एतावता तस्य भावभिन्नत्वरूपता निराकृता तथासत्यभावो न भाव इत्यनयोः समानार्थकतया विषयभेदाधीनद्विधाभिलापानुपपत्तेः ।

ननु तथाप्यभावत्वस्य निर्विकल्पकावेद्यतायाः सिद्धान्तसिद्धत्वाद्विशेषणज्ञानविरहेण प्रथमं तत्प्रकारकप्रत्यक्षानुपपत्तिरित्यत आह तच्चेति । अनुपस्थितमिति । विशिष्टबुद्धौ विशेषणज्ञानहेतुताया विशेषणभेदेन भिन्नतया अभावत्वविशिष्टबुद्धौ उक्तज्ञानहेतुत्वाकल्पनादित्यभिप्रायः । ननु केवलप्रमेयत्वादिना अभावत्वादिप्रकारकोपनीतभानदशायां स्वरूपतोऽभावत्वप्रकारतानियत्यघारणाय स्वरूपतस्तत्प्रकारकबुद्धौ लौकिकान्यत्वं कार्यतावच्छेदककोटौ निवेश्यैव स्वरूपतस्तद्विषयकज्ञानत्वेन हेतुता कल्प्यते लाघवात्, तथाच घटो नास्तीत्यादिलौकिकप्रत्यक्षपूर्वकालेपि स्वरूपतस्तद्विषयकज्ञान-

मपेक्षितमित्याशयेनाह निर्विकल्पकोपस्थितमिति। तथा चाभावत्वस्य निर्विकल्पकावेद्यत्वप्रवादो भावभिन्नस्वरूपाभावत्वमते एव, तस्य पदार्थान्तरत्वपक्षे यादिनां तु निर्विकल्पकवेद्यत्वमिष्टमेवेति भावः। नन्वेवमभावत्वस्य नित्यत्वे सत्यनेकव्यक्तिवृत्तितया जातित्वापत्तिरित्यत आह अभाववच्चेति।

इदं तु बोध्यम्। अभावत्वमनुयोगिताख्यः प्रतियोगिनिरूपितः सम्बन्धविशेषः, स च प्रतियोग्यादिभेदभिन्न एवेत्यनुगमकधर्मान्तरप्रकारेणैव तस्य नास्तीति बुद्धौ प्रकारता ससम्बन्धिकतया च तस्य प्रतियोग्युपरागेणैव भानं निर्विकल्पकवेद्यता चानुगमकधर्मस्यैव। प्रपंचितं चैतदस्माभिरधस्तात्।

अधिकरणस्याभावरूपत्वे अभावाधिकरणत्वानुपपत्तेरतस्तद्धर्मैवेति। अभावव्यवहारोपपत्तेरिति। भावेऽभावाभावत्वस्वीकारे भावाभावत्वस्यापि तत्र सम्भवादिति भावः। प्रतिबन्दिमात्रस्यानुत्तरतया युक्तिं दर्शयति लाघवादिति। अनन्तधर्मिष्वभावत्वकल्पनापेक्षया एकत्र तत्कल्पन इत्यादिः। घटत्वाद्यभावाभावस्यातिरिक्तत्वे ईदृशयुक्त्यसम्भवाद्भावो नाभाव इति प्रतीतेर्दुरपन्हवतया अभावत्वं भावव्यावृत्तमेवेति दर्शितयुक्तावेव निर्भरं दर्शयति अबाधितेति। प्रमात्मकेत्यर्थः। एतेन-क्लृप्तधर्मिणां बहुत्वस्य धर्मकल्पनायामबाधकत्वेऽभावमात्रासिद्धिप्रसङ्गेन। संयोगादिसाधारण्यापत्त्यस्य सप्रतियोगिकत्वस्येत्यादिः। तथाच सप्रतियोगिकत्वस्य नास्तीति प्रतीतिविषयत्वे घटसंयोगादिमत्यपि घटो नास्तीति प्रतीतिः स्यादिति भावः।

अत्र सिद्धान्तानुसारिणः। अभावत्वं भावाभावसाधारणमेव नास्तीति प्रत्ययनियामकम्। यदि भावो नाभाव इति प्रत्ययः प्रामाणिकः तदा भावव्यावृत्तमप्यभावत्वं तादृशप्रत्ययनियामकतया स्वीक्रियताम्, न तु तदेव नास्तीति प्रत्ययनियामकं तथासत्यनन्ताभावकल्पनया गौरवात् भावाभावसाधारणैकधर्मस्यैव लाघवेन नास्तीति प्रत्ययनियामकतया कल्पनौचित्यात्।

यत्तु-अनन्तघटादीनां घटाद्यभावाभावत्वकल्पने गौरवाल्लाघवेनातिरिक्तैकैकाभावे तत्कल्पनमुचितमिति। तत्रेदं प्रतिभाति-घटाभावाभावत्वं घटाभावनिरूपितोऽनुयोगिताविशेषः, स च घटानिष्ठ-

घटाभावीयप्रतियोगितातो नातिरिच्यते । सा चानन्तघटेषु क्लृप्तैव । न चैवमत्र घटाभावप्रतियोगी अत्र घटाभावाभाव इति प्रतीत्योरविशेषापत्तिः, प्रतियोगितानुयोगित्वरूपविभिन्नधर्मावगाहनेनैव तद्विशेषात् । "अभावविरहात्मकत्वं वस्तुनः प्रतियोगिते"ति प्रवादाविरुद्धश्चायं पन्थाः । घटादेः संयोगादिसम्बन्धस्यैव संयोगादिसम्बन्धावच्छिन्नस्वाभावाभावत्वविशिष्टनिरूपितत्वं स्वीक्रियते न तु समवायादेरतो न कपालादौ संयोगादिसम्बन्धावच्छिन्नघटाभावो नास्तीत्यादिप्रत्ययप्रसङ्ग इत्यलं पल्लवेन ॥

(चि०) अथ साध्यहेत्वोर्विरोधे पक्षे साध्यसत्त्वे हेत्वसिद्धिः, हेतुसत्त्वे साध्याभावसिद्धौ बाधः । न च प्रमाणान्तरेण साध्याभावसिद्धौ बाधो न हेतुत्वेनेति वाच्यम् । विशेषणवैयर्थ्यादिति चेन्न ।

हेतोः पक्षे साध्याभावबाधानुपस्थापनेऽपि प्रथमोपस्थितविरोधस्यैव उपजीव्यत्वेन दोषत्वात् ।

ननु साध्याभावसम्बन्धो व्यभिचार एव दोषो न तु तन्नियतत्वमपि, गौरवात् असाधकत्वे व्यर्थत्वाच्च । न च साध्यासहचरितस्य साध्याभावसहचरितस्य वा गमकत्वभ्रमरूपायामशक्तौ विशेषोऽस्ति, येनाशक्तिविशेषोन्नायकतया न व्यर्थविशेषणता । न चानैकान्तिकसामान्यलक्षणे विपक्षगामित्वं न विशेषणम् असाधारणाव्याप्तेः, साधारणन्तु सपक्षवृत्तित्वसहितमिति वाच्यम् । विपक्षगामित्वस्यैव साधारणत्वात् अधिकस्य व्यर्थत्वात् । न च विरुद्धं व्यावर्त्यम्, विपक्षगामित्वेनात्रैव तदन्तर्भावात् ।

अथानैकान्तिके विपक्षसम्बन्धेनैव दूषकताबीजम्, असाधारणाव्याप्तेः, न च तत्रान्यदेव बीजम्,

हेत्वाभासाधिक्यापत्तेरिति चेत्। अस्तु तावदेवम्, तथापि साधारणे विरुद्धप्रवेशो वज्रलेप एव।

अन्ये तु विरुद्धलक्षणे न व्यर्थत्वं साधारणस्य व्यवच्छेद्यत्वात्, नाप्यसाधकतानुमितौ एतस्यापि व्याप्यत्वात्, नीलधूमादौ च व्याप्तिरस्त्येवेति न स्वार्थानुमाने दोषः, परस्य तु व्यर्थत्वमधिकम्, न च विरुद्धत्वादित्यत्र शब्दाधिक्यमिति।

तन्न। अर्थो हि लिङ्गम्, न च व्यभिचारावारकविशेषणावच्छेदेनापि व्याप्तिर्गौरवादिति वक्ष्यते। न चार्थानुगत्या व्यर्थत्वेऽपि विरुद्धत्वादित्यत्र उद्भावनाशक्यत्वम्, आवश्यकतद्विवेचने तदुद्भावनस्य शक्यत्वादिति हेतुद्वयोपन्यासे चाधिकं प्रथमेन द्वितीयस्य कृतकर्त्तव्यताया दुष्टिबीजत्वात्। न च नीलधूमादित्यादौ विशिष्टकर्त्तव्यमन्येन केनापि कृतम्। धूमवत्त्वादित्यनेन कृतमिति चेन्न। तथानुपन्यासात्, अन्यथा नीलानन्वयापत्तेः।

अपरे तु साध्यानवगतसहचारः साध्याभावसहचारी विरुद्धः। अन्यथा पृथिव्यां मेयत्वेनेतरभेदानुमानं न विरुद्धं स्यात् साध्याभावाव्याप्यत्वात्। न च तत्साधारणम्, सपक्षासत्त्वात्। न च साध्यसहचाराज्ञानदशायां साधारणातिव्याप्तिः, तदा तस्यापि विरुद्धत्वादिति प्राहुः।

तन्न। विपक्षगामित्वमात्रं दूषकमित्युक्तत्वात्। अत एव व्यभिचारितो व्यतिरेक्यनैकान्तिक एव। नापि साध्याभावसाधकत्वं तत्प्रमापकत्वं वा, साध्याभावस-

म्बन्धबुद्धिं विना तदज्ञानात् । नापि साध्यवदन्यत्वव्याप्यत्वम्, व्याप्यत्वविवेचने व्यर्थविशेषणत्वात् । नापि स्वव्यापकाभावप्रतियोगिसाध्यकत्वम्, साध्याभावस्य हेतुव्यापकत्वप्रतीतौ हेतुसाध्याभावसम्बन्धभानस्यावश्यकत्वात् ॥

(दी०) गमकत्वभ्रमेति । व्यभिचारिण्यव्यभिचारमात्रे विरुद्धे च समानाधिकरण्यांशेऽपि भ्रम इति । अशक्तौ विशेष इति । दूषकतायां तुल्यत्वेऽपि निग्रहस्थानत्वेन विशेषाद्भेदेनोपन्यासः । अत एवानैकान्तिकसामान्यलक्षणे साधारणलक्षणे च विरोधवारकं विशेषणम् छलजात्योर्निग्रहस्थानविशेषनिरनुयोज्यानुयोगविशेषत्ववदेतस्यानैकान्तिकविशेषसाधारणविशेषत्वेऽप्यदोषो वेति पुनराकरानुसारी पन्थाः ।

नापीत्यादि । व्यापकत्वं व्याप्यव्यापकसामानाधिकरण्यघटितं न वा ? आद्ये साध्याभावस्येति । द्वितीये तु नाभासत्वमविरोधात् ॥

(गा०) साधारणविरुद्धयोर्गमकत्वभ्रमरूपाशक्तौ न कश्चिद्विशेष इति मूलोक्तं दूषयति व्यभिचारिणीत्यादिना । अव्यभिचारमात्र इति भ्रम इत्यग्रिमेणान्वयः । मात्रपदेन साध्यसामानाधिकरण्यभ्रमव्यवच्छेदः । सामानाधिकरण्यांशेपि इत्यपिना अव्यभिचारसमुच्चयः । नन्वेवमप्यनुमितिविरोधिरूपमुभयोरपि साध्याभावसामानाधिकरण्यमेकमेवेति साधारणविरुद्धयोः पृथक्परिगणनमसङ्गतमित्यत आह दूषकतायामिति । अनुमित्यनुपधानप्रयोजकरूपभेदविरहेपीत्यर्थः । निग्रहस्थानत्वेन विशेषादिति । निग्रहविशेषप्रयोजकत्वेनानैकान्तिकबहिर्भावादित्यर्थः । भेदेनोपन्यासः—विरुद्धस्य स्वातन्त्र्येण परिगणनम् । अत एव—उक्तयुक्त्या विरुद्धस्यानैकान्तिकविशेषबहिर्भूतत्वादेव ।

विरुद्धस्यानैकान्तिकलक्षणाक्रान्तत्वेपि स्वातन्त्र्येण तद्विभजनं सङ्गमयति छलजात्योरिति । छलजात्योः पदार्थविभाजकनिग्रहस्थान-

त्वाक्रान्तत्वेपि यथा पदार्थेषु स्वतन्त्रविभजनमविरुद्धं तथा विरुद्ध-स्यानैकान्तिकविशेषविशेषतया अनैकान्तिकत्वरूपहेत्वाभासविभा-जकरूपाक्रान्तत्वेपि हेत्वाभासेषु स्वतन्त्रविभजनमविरुद्धमित्यर्थः।

मूले विरुद्धलक्षण इति। विरुद्धपक्षेतरभेदानुमान इत्यर्थः। न व्यर्थत्वं न नियमांशस्य व्यर्थत्वम्।

हेतुमन्निष्ठाभावाप्रतियोगित्वरूपायाः साध्याभावनिष्ठहेतुव्याप-कताया हेतुसाध्याभावसामानाधिकरण्याघटिततया तदघटितविरो-धज्ञाने साधारण्यभानस्यावश्यकत्वाभिधानं मूलकृतो न सङ्गच्छत इति तत्सङ्गमनाय वितर्कयति व्यापकत्वमिति। अविरोधित्वादि-ति। ग्राह्याभावाद्यनवगाहने तज्ज्ञानस्य व्याप्तिज्ञानाद्यप्रतिबन्धक-त्वादित्यर्थः।

इति विरुद्धपूर्वपक्षग्रन्थः॥

(चि०) उच्यते। साध्यव्यापकाभावप्रतियोगि-त्वं विरुद्धत्वम्। न च प्रतियोगिनोरनन्वयं भासमान ए-व तदभावयोर्व्याप्तिग्रहः, भिन्नग्राहकसामग्रीकत्वात् अन्यथा व्यतिरेकिविलयापत्तेः।

यद्वा वृत्तिमतः साध्यवदवृत्तित्वं साध्यवद्वृत्ति-त्वानधिकरणत्वं साध्यासमानाधिकरणधर्म्मत्वं सा-ध्यवद्वृत्तित्वानधिकरणधर्म्मत्वं वा तत्त्वम्। न च व्य-तिरेकव्यतिव्याप्तिः। तत्र साध्याप्रसिद्ध्या तथाज्ञानवि-रहात्। असाधारणे च सङ्कर एव, अनेनापि रूपेण तस्य दोषत्वात्। न च साध्यवद्वृत्तित्वे सति वृत्तिमत्त्वज्ञानात् साध्याभाववद्गामित्वज्ञानमावश्यकं तेन विना सा-ध्यवदवृत्तित्वाज्ञानादिति वाच्यम्। उपजीव्यत्वेन भि-न्नत्वात्, उपजीव्यत्वेऽपि साध्यवति न वर्त्तत इति ज्ञा-

नं स्वतोदूषकमिति चेन्न। असहचारज्ञानस्य विरोधितया व्याप्तिग्रहप्रतिबन्धकत्वात्, व्यभिचाराज्ञानविरोधित्वेन व्यभिचारज्ञानवत् ।

(दी०) साध्यवदित्यादि । हेत्वभावस्य साध्यवन्निष्ठाभावाप्रतियोगित्वज्ञानं वस्तुतस्तत्प्रतियोगिकाभावस्य हेतोः साध्यसामानाधिकरण्यग्रहं विरुणद्धीत्यभिप्रायेणेदम् ।

यदि च तदभावाभावत्वेनासामानाधिकरण्यग्रहेऽपि तत्त्वेन सामानाधिकरण्यग्रहो न विरुध्यत इति भाव्यते तदाह यद्वेत्यादि । वृत्तिमत इति धर्मेति च पक्षधर्मत्वाविरोधित्वप्रदर्शकं न तु विशेषकम्, दूषकतायामनुपयोगादव्याप्तिकरत्वाच्च । वृत्तिविशेषसूचनाय वा तत्, तेन समवायेन हेतुतायां धूमे नाव्याप्तिः । आद्ययोः साध्यवद्वृत्तित्वतदधिकरणत्वाभावौ चरमयोश्च साध्यवद्वृत्तितत्त्वाधिकरणभेदावर्थाविति भेदः । ज्ञानातिप्रसक्तिं निरस्यति न चेत्यादिना । तेनेत्यादि । साध्याभाववद्वृत्तित्वज्ञानं विना वृत्तिमत्त्वविशिष्टसाध्यवद्वृत्तित्वज्ञानापर्यवसानादित्यर्थः । असहचारेति । सहचारः सामानाधिकरण्यम् । व्यभिचारेति । व्यभिचारो न ज्ञायते यस्मात्तद्व्यभिचाराज्ञानमव्यभिचारज्ञानम् । तदयमर्थः-अव्यभिचरितसामानाधिकरण्यरूपाया व्याप्तेरव्यभिचारांशग्रहाविरोधिग्रहविषयतया यथा व्यभिचारो हेत्वाभासस्तथा सामानाकरण्यांशग्रहविरोधिग्रहविषयतया विरोधोऽपीति ।

(गा०) ननु हेतौ साध्यव्यापकीभूताभावप्रतियोगित्वज्ञानस्य व्याप्तिज्ञानादौ ग्राह्याभावाद्यनवगाहितया प्रतिबन्धकत्वं न संभवतीति कथं हेतुनिष्ठतादृशप्रतियोगित्वस्य विरोधरूपतया सिद्धान्तप्रणयनमित्यत आह हेत्वभावस्येति । तत्प्रतियोगिकेति । हेत्वभावप्रतियोगिकेत्यर्थः । हेत्वभावाभावत्वेन भासमान एव सामानाधिकरण्यग्रहस्तदभावे तुल्यवित्तिवेद्यतया साध्यसमानाधिकरणाभावप्र-

तियोगित्वमवगाहत इति तत्र तादृशप्रतियोगित्वाभावरूपव्यापकताग्रहप्रतिबध्यता न तु हेतुतावच्छेदकरूपेण भासमाने साध्यसामानाधिकरण्यग्रह इत्यरुचेरनुपदं वक्ष्यमाणतया अभिप्रायेणेति।

यदि चेत्यनन्तरं हेत्वभावे साध्यव्यापकताग्रहदशायामिति पूरणीयम्। तदभावेति। हेत्वभावेत्यर्थः। असामानाधिकरण्यग्रहेपीति। सामानाधिकरण्यग्रहासंभवेपि साध्यव्यापकत्वं साध्यासमानाधिकरणस्वभावकत्वरूपं यदि विवक्ष्यते तदा पूरणं विनैव असामानाधिकरण्यग्रहेपि इत्यस्यासामानाधिकरण्यग्रहदशायामिति यथाश्रुतार्थकतयैव च संगतिर्बोध्या। तत्त्वेन–हेतुतावच्छेदकरूपेण, अवृत्तिहेतोर्विरुद्धत्वस्यावृत्तितायाः विरोधरूपतायाश्चेष्टत्वाद्वृत्तिमत इति धर्मेति च व्यर्थमित्यत आह वृत्तीति। पक्षधर्मत्वाविरोधित्वप्रदर्शकमिति। एतद्दर्शनं च स्वरूपासिद्धिवैलक्षण्यस्य विरोधे लाभायेति ध्येयम्। विशेषकं–विरोधशरीरप्रविष्टार्थकं, दूषकतायां–प्रतिबन्धकतायाम्। अनुपयोगित्वात्–तदर्थविषयतायाः अनुपयोगित्वात्, अव्याप्तिकरत्वात्–अवृत्तिविरुद्धासंग्रहप्रयोजकत्वात्। वृत्तिविशेषेति। येन सम्बन्धेन विरुद्धत्वमभिमतं तत्सम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वनिवेशलाभायेत्यर्थः। तन्निवेशनप्रयोजनमाह तेनेति। लक्षणचतुष्टयस्य भेदं स्फुटयति आद्ययोरिति। अभावाविति। अत्यन्ताभावावित्यर्थ। पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वादित्यादौ व्यतिरेकिणि साध्यवद्वृत्तित्वसत्त्वाद्विरुद्धत्वातिव्याप्तिर्न संभवतीत्याशयेनाह ज्ञानातिप्रसक्तिमिति। हेतुमति साध्यवत्त्वाग्रहेण तत्र साध्यवदवृत्तित्वग्रहसंभवादिति भावः। असाधारणे शब्दो नित्यः शब्दत्वादित्यादौ वस्त्वतिव्याप्तिशंकां लक्ष्यतां स्वीकृत्य निराकुरुते मूले असाधारणे चेति। संकर एवेति। विरोधस्य दोषान्तरसामानाधिकरण्यमिष्टमेवेत्यर्थः। अनेन–विरुद्धत्वेन, तस्य–असाधारणहेतोः, दोषत्वात्–दुष्टत्वे क्षतिविरहात्। साध्याभाववद्वृत्तित्वज्ञानाभावस्य साध्यवदवृत्तित्वाज्ञानप्रयोजकत्वं न संभवति कार्याभावस्य कारणव्यतिरेकाप्रयोजकत्वादिति तेन विनेत्यादिमूलासंगतिरिति तदन्यथा व्याख्यामुपादत्ते दीधितौ तेनेत्यादीति। वृत्तिमत्त्वेति। वृत्तिमत्त्वविशिष्टसाध्यवदवृत्तित्वरूपहेतुज्ञानघटितसाध्याभाववद्गामित्वानुमितिसामग्र्याः फलोपहितत्वानिर्वाहादित्यर्थः। तथाच सामग्र्याः फ-

लोपधाननियमानुरोधात् तज्ज्ञानस्यावश्यकत्वमिति भावः ।

मूले उपजीव्यत्वेन भिन्नत्वादिति । व्यभिचारज्ञानोपजीव्यत्वेन विरोधस्यापि पृथग्दोषताया आवश्यकत्वादित्यर्थः । न स्वतो दूषकमितीति । उपाधिरिव न हेत्वाभास इति शेषः । व्याप्तिग्रहप्रतिबन्धकत्वादित्यस्य स्वतोपीत्यादिः । व्यभिचाराज्ञानविरोधित्वेनेति मूलस्य व्यभिचारज्ञानाभावविरुद्धत्वेनेत्यर्थो न संभवति–तावता व्याप्तिज्ञानप्रतिबन्धकत्वालाभादित्यन्यथा तद्याचष्टे दीधितौ व्यभिचारेणेति । व्याप्तेर्व्यभिचारसामानाधिकरण्यघटितत्वमभिधाय तत्सद्भावनविरोधिनो ज्ञानस्य व्याप्तिज्ञानप्रतिबन्धकतां स्फुटीकुर्वन् तद्विषयस्य हेत्वाभासताया निष्प्रत्यूहत्वं दर्शयति तदयमर्थ इत्यादिना ।

(चिं०) ननु विरुद्धस्य स्वार्थानुमानदोषत्वेऽपि परार्थानुमानेऽपार्थकत्वम् अयोग्यताज्ञानेन निश्चितानन्वयादिति चेन्न । अयोग्यताज्ञानस्य विरुद्धत्वज्ञानोपजीवकत्वेन तस्यैव दोषत्वात् बाधेऽप्येवम् । स चायं विधिसाधने त्रिविधः—साक्षात्साध्याभावव्याप्यत्वात् साध्यव्यापकाभावव्याप्यत्वात् साध्यव्यापकविरुद्धोपलम्भात् । यथा धूमवानयं योग्यधूमवत्तया अनुपलभ्यमानत्वात् निरग्निकत्वात् जलाशयत्वात् । न च सर्वत्र साध्यव्यापकविरुद्धोपलम्भ इति न त्रैविध्यम् । एतदज्ञानेऽपि साध्याभावतद्व्यापकाभावव्याप्यत्वेनापि ज्ञातस्य दोषत्वात् । न च धूमवानयं तदभाववत्त्वादिति अधिकम् , स्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं हि व्यापकत्वम् , तच्चाभेदेऽपि धूमवानयं धूमाभाववत्तयोपलभ्यमानत्वात् तद्वत्तयानुपलभ्यमानत्वादित्यनैकान्तिकमेव ।

निषेधसाधनेऽपि त्रिविधः–प्रतियोग्युपलम्भात् साध्यव्यापकाभावोपलम्भात् साध्यव्यापकविरुद्धो-

पलम्भात् । यथा निराग्निकोऽयमाग्नित्वात् धूमाभावशून्यत्वात् धूमवत्त्वात् ।

(दी०) स चायं विरुद्धो हेतुः । साध्याभावेति । तदभावत्वं तद्वत्ताग्रहविरोध्यभावत्वम् , तेन साध्यवदन्यत्वव्याप्यत्वोपसंग्रहः । एवमुत्तरत्रापि । साध्यव्यापकेति । अत्र व्याप्यपदं स्वरूपपरम् । साध्येत्यादि । साध्यव्यापकसामानाधिकरण्यग्रहविरोधिरूपवत्त्वादित्यर्थः । तेन साध्यव्यापकवदवृत्तित्वाद्युपसंग्रहः । सर्वत्र चोपलम्भपदं स्वरूपसिद्धिमात्रफलकम् । साध्याभावेति । व्याप्यपदव्यत्यासेन साध्याभावव्यापकाभावत्वेन चेत्यर्थः । स्वममानेति । तथाच साध्याभावसाध्यव्यापकाभावयोर्निरुक्तसाध्यव्यापकाभावत्वेनानुगमान्नाधिक्यमित्यर्थः ।

प्रतियोग्युपलम्भात्—स्वरूपतः साध्यवत्त्वग्रहविरोधित्वात् , तेन निर्वह्निकान्यत्वादिसंग्रहः । साध्यव्यापकेति । अत्र व्यापकत्वं भेदाभेदसाधारणं तेन साध्याभावव्याप्यत्वसंग्रहः । धूमवत्त्वादिति । धूमाभावस्य वह्न्यभावव्यापकत्वग्रहदशायामस्य मध्यमेऽन्तर्भावो, वह्न्यभावव्यापकवह्निसामग्र्या भावाभावव्याप्यत्वग्रहे च चरमे ।

(गा०) विरोधस्यैव निरुक्तत्वात् स चायमित्यस्य तत्परामर्शकताभ्रमं निराकरोति स चायमिति ।

साध्याभावव्याप्यत्वज्ञानवत् साध्यवद्भेदव्याप्यत्वज्ञानस्यापि विरोधितया तदनभिधाने न्यूनतां परिजिहीर्षुः साध्याभावपदं साध्यतद्वदत्यन्तान्योन्याभावपरतया व्याचष्टे तदभावत्वमिति । साध्याभावव्याप्यव्याप्यत्वादिवारणायाभावपदं विरोधिताविशेषसूचकम् । उत्तरत्रापि-साध्यव्यापकाभावेत्यत्रापि । अन्यथा साध्यव्यापकवद्भेदत्वासंग्रहापत्तिरिति भावः । व्यापकाभावव्याप्यत्वव्यापकविरुद्धत्वयोरभेदाद्वितीये व्याप्यपदपदार्थाविवक्षामाह व्याप्यपदमिति । विरुद्धपदस्य तदभावव्याप्यतद्वदवृत्त्युभयपरतामाह साध्यव्यापकेति ।

सामानाधिकरण्यविरोधित्वं तद्ग्रहप्रतिबन्धकधीविषयत्वं न तु तदधिकरणावृत्तित्वं तदभाववत्त्वादेरपि तत्सामानाधिकरणावृत्तित्वात् व्यापकवदवृत्तीत्यादिना व्यापकाभावव्याप्यत्वपरिग्रहः । इदं च तदभावव्याप्यत्वग्रहस्य तत्समानाधिकरण्यग्रहविरोधितामंगीकृत्य विरुद्धत्वादिग्रह एव विरोधी न तु तदुपलंभग्रह इत्याशयेनोपलम्भपदानामविवक्षितार्थकतामाह सर्वत्रेति । सर्वत्र—व्यापकविरुद्धोपलंभादित्यत्रापि प्रतियोग्युपलंभादित्यादौ चेत्यर्थः ।

साध्याभावतद्व्यापकाभावव्याप्यत्वेनेत्यत्र मूले व्याप्यपदस्याविवक्षायां साध्याभावव्याप्यत्वालाभः, तद्विवक्षायां च साध्यव्यापकाभाववत्त्वालाभः अविवक्षिततद्व्याप्यत्वलाभश्चेत्यतो व्याचष्टे साध्याभाववतीति । ज्ञातस्य दोषत्वादिति मूलं ज्ञातस्य विरोधित्वादित्यर्थकं, तथा च सामानाधिकरण्यग्रहविरोधिरूपाणां परिगणनीयतया न तदुपादानविरोध इति भावः । स्वव्यापकतायाः स्वसाधारण्य एव कथं साध्याभाववत्त्वस्य कथितान्तर्भाव इत्याकांक्षायामाह दीधितौ तथा चेति ।

प्रतियोग्युपलंभपदं साध्यभूताभावप्रतियोगितावच्छेदकतद्वद्वत्त्वतदत्यन्ताभावत्वादिसंग्राहकतया व्याचष्टे प्रतियोग्युपलम्भादिति । स्वरूपत इति । विरोधिताविशेषसूचकं साध्यव्यापकाभावत्ववारणाय । विरोधित्वात्—विरोधिज्ञानप्रकारतावच्छेदकधर्मवत्त्वात् । निर्वह्निकान्यत्वादीति । निरग्निकान्यत्ववत्त्वादीत्यर्थः । साध्यव्यापकविरुद्धोपलम्भादित्यनेन साध्याभावव्याप्यत्वोपग्रहायाह साध्यव्यापकेत्यत्रेति । धूमवत्त्वादीति । तृतीयोदाहरणस्य साध्यव्यापकाभाववत्तया मध्यमेऽप्यन्तर्भावः सम्भवतीति दशाविशेषे व्यापकविरुद्धान्तर्भावं दर्शयति धूमाभावस्येत्यादिना । दशायामित्यनन्तरमेवकारः पूर्यः । मध्यमे—साध्यव्यापकाभावत्वज्ञानविषयतया दुष्टे, ग्रहे—ग्रहदशायां, चरमे—साध्यव्यापकविरुद्धत्वज्ञानविषयतया दुष्टे ।

(चि०) सर्वश्चायं विशेषणद्वारापि । यथा कृष्णागुरुप्रभववह्निमानयं कटुकासुरभिपाण्डुरधूमवत्त्वात् । अयञ्च बाधाश्रयासिद्धस्वरूपासिद्धासाधारणसंकीर्णः क्वचित् ॥

इति विरुद्धचिन्तामणिः ॥

(दी०) इदं पुनरिहावधेयम् । कथितरूपाणि किं स्वरूपतो ज्ञातान्येव सामानाधिकरण्यग्रहविरोधीनि असामानाधिकरण्यव्याप्यत्वेन वा ? नाद्यः—व्यापकाभावव्याप्यत्वादेस्तदसम्भवात् । न द्वितीयः—साध्याभावव्याप्यत्वयोः स्वरूपेणैव ज्ञातयोस्तथात्वात् । तथात्वेऽपि तत्त्वमविरुद्धमिति चेत्, हन्तैवमसामानाधिकरण्यस्य समानाधिकरणावृत्तित्तद्धर्माणाञ्च तथात्वादाधिक्यम् । न च एतानि धर्म्मिविभाजकान्येव, सर्वेषामेव साध्याभावव्याप्यत्वेनैकविधत्वादिति ।

विरोधोन्नायकप्रकारत्रैविध्येन धर्म्मिणोऽपि त्रैविध्याभिधानमिति वदन्ति । अयञ्चेत्यादि । बाधस्वरूपासिद्ध्यन्यतरसङ्करस्तु आवश्यकोऽन्यसङ्करस्तु काचित्को ज्ञानासङ्कराच्च पार्थक्यम् ।

इति विरुद्धदीधितिः ॥

(गा०) स्वरूपतो ज्ञातान्येवेति एवकारो मध्ये योज्यः, तथाच ग्राह्याभावव्याप्यत्वादिना अज्ञातान्यपि विरोधीनीत्यर्थः । असामानाधिकरण्यव्याप्यत्वेनेति, सावधारणमतो न वक्ष्यमाणदूषणासङ्गतिः । व्यापकाभावव्याप्यत्वादेरित्यादिना व्यापकवदवृत्तित्वपरिग्रहः । स्वरूपेणैव ज्ञातयोरिति । तदभावव्याप्यत्वेनाज्ञातयोरपीत्यर्थः । साध्याभावः साध्यसमानाधिकरण इत्यनाहार्य्यज्ञानानुत्पत्त्या धर्मितावच्छेदकतासम्बन्धेन तत्सामानाधिकरण्यप्रकारकानाहार्य्यबुद्धौ तदभावत्वादिपर्य्याप्तविषयतासम्बन्धेन ज्ञानत्वेन प्रतिबन्धकत्वादिति भावः । यथाकथंचिद्विरोधिरूपाणामेवायं विभाग इत्याशङ्कते तथात्वेपीति । स्वरूपतो विरुद्धत्वेपीत्यर्थः । तत्त्वं—विरुद्धत्वम्, अविरुद्धं—अधिकम् । असामानाधिकरण्यस्येति । अस्य स्वरूपत एव सामानाधिकरण्यधीविरोधित्वादिति भावः । समानाधिकरणेति । असमर्थः

सास्नावत्त्वादित्यादौ सास्नात्वादीनामित्यर्थः । तेषामप्यश्वत्वाद्यसामानाधिकरण्यव्याप्यत्वेन विरोधित्वादिति भावः ।

स चायमित्यादिग्रन्थो न सामानाधिकरण्यव्याप्यत्वेन विरोधिरूपपरिगणनपरः, किन्तु विरुद्धहेतुप्रभेदपरिगणनपर एव, एवं च साध्यासामानाधिकरण्यरूपवतां धर्मिणां साध्याभावव्याप्यत्वादिनैवोपग्रहान्नाधिक्यमिति शङ्कां निरस्यति न चैतानीति । सर्वेषां–साध्यव्यापकाभावादीनाम् । साध्याभावव्याप्यत्वेनेति । तथा च तेषां पृथगुपादानानुपपत्तिरिति भावः । इदमुपलक्षणम् । एतदज्ञानेपीत्यादिमूलविरोधोऽपि द्रष्टव्यः ।

विभागं सङ्क्रमयतां केषांचिन्मतमाह विरोधोन्नायकेति । एवं च साध्याभावव्याप्यत्वादिना ज्ञानस्य यत् दूषकत्वमभिहितं तदपि विरोधिज्ञानद्वारा न तु साक्षादिति न विरोध इति ध्येयम् । विरोधानुमापकहेतूनामानन्त्यात्त्रैविध्यानुपपत्तिस्तदवस्थैवेत्यस्वरससूचनाय वदन्तीति ।

मूले सर्वश्चायं विशेषणद्वारापीति । उक्तनिखिलप्रकारो विरुद्धः विशेषणनिबन्धनोऽपीत्यर्थः । अत्र विशेषणनिबन्धनत्वस्य विरोधरूपविशेषणे संक्रमो बोध्यः । कृष्णगुर्विति । अत्र विशेष्यधूमत्वावच्छिन्नस्य साध्यसमानाधिकरणत्वात् कटुत्वादिविशिष्टस्यैव विरुद्धत्वादिति भावः । अत्र प्रत्येकविशेषणावच्छिन्नस्यैव विरुद्धता बोध्या । बाधस्वरूपासिद्ध्यन्यतरसङ्करस्यावश्यकतया कैश्चित्कृताभिधानं न सङ्गच्छत इत्याशङ्क्य तत्तदुभयानुगमकेतररूपावच्छिन्नसङ्करस्य काचित्कत्वं विवक्षितमित्याह दीधितौ बाधेत्यादिना । ननु विरोधस्थले दोषान्तरस्यावश्यकत्वे किमस्य दोषताभ्युपगमेनेत्यत आह ज्ञानासङ्कराच्चेति । दोषान्तराज्ञानदशायां विरोधज्ञानेनाप्यनुमितिप्रतिबन्धादस्य दोषान्तरत्वमावश्यकमिति भावः ॥

इति गदाधरभट्टाचार्यचक्रवर्तिविरचितायां
गादाधर्यां विरुद्धप्रकरणम् ।

श्रीगणेशाय नमः ।

अथानुमानगादाधर्यां

सत्प्रतिपक्षप्रकरणम् ।

(चि०) सत्प्रतिपक्षत्वं न समानबलबोधितसाध्यविपर्य्ययलिङ्गत्वम्, परस्परप्रतिबन्धेनोभयोरबोधकत्वात् । बलञ्च न सपक्षसत्त्वादि, व्यतिरेकिण्यभावात् । नापि समानव्याप्तिपक्षधर्म्मतावत्त्वम्, विरोधेनैकत्र तद्भङ्गनियमात् । नापि व्याप्तिपक्षधर्म्मतया ज्ञातत्वम्, विरोधिव्याप्तिपक्षधर्म्मताविशिष्टज्ञानयोरन्यतरभ्रमत्वनियमेन नित्यत्वव्याप्तश्रावणत्वादिवैशिष्ट्याप्रसिद्ध्याऽऽरोपयितुमशक्यत्वात् । न च साध्यव्याप्यस्य पक्षधर्म्मता पक्षधर्म्मस्य वा साध्यव्याप्यतारोप्येति वाच्यम् । एकत्र तदुभयाभावात् विशिष्टस्याप्रसिद्ध्या तद्वैशिष्ट्यस्यारोपासम्भवात् । नाप्यनिर्द्धारितविशेषेण बोधितसाध्यविपर्य्ययकत्वम्, उभयोरबोधकत्वात् । विशेषश्च न व्याप्तिभङ्गाभङ्गरूपः एकत्र तद्भङ्गनियमात् ।

(दी०) एकत्र तदुभय इति । व्याप्ये पक्षधर्म्मतायाः पक्षधर्मे च व्याप्यत्वस्यारोपः प्रत्येकमव्यापकोऽतो विशिष्टस्यारोपो वाच्यः, स चैकधर्मिणि विरोधिव्याप्यद्वयविरहाद्विशिष्टस्याप्रसिद्ध्या न सम्भवतीत्यर्थः । विरुद्धादौ साधने स्वव्यापकसामानाधिकरण्यरूपव्याप्तेरप्रसिद्धेश्चेत्यपि द्रष्टव्यम् । एकत्र भङ्गेति । तथा चान्यतरत्वेन तदवधारणमस्तीति भावः ।

(गा०) समानबलेत्यादिमूलस्य प्रकृतसाध्यानुमापकबलशालित्वे सति प्रकृतसाध्याभावानुमापकबलशालिहेत्वन्तरकत्वमित्यर्थः। अत्रानुमापकत्वमनुमितिफलोपहितत्वमनुमितिस्वरूपयोग्यत्वं वा ? आद्ये दूषणमाह परस्परेति । उभयोः—व्याप्तिसहितपक्षधर्मयोः । अबोधकत्वादित्यस्य सत्प्रतिपक्षतादशायामित्यादिः । द्वितीयपक्षे एतद्दोषानवकाशात् बलपदार्थं वितर्क्य दूषयति—बलं चेति । बलपदार्थश्चेत्यर्थः । सपक्षसत्त्वादीति । आदिना पक्षसत्त्वविपक्षासत्त्वयोः परिग्रहः। व्यतिरेकिणीति । अभावात्—सपक्षाप्रसिद्ध्या तत्सत्त्वासम्भवात् । एतदुपलक्षणम् । सर्वत्रैव सत्प्रतिपक्षे एकहेतौ पक्षसत्त्वविपक्षासत्त्वयोरेकतराभावोऽपि द्रष्टव्यः । समानेति सम्पातायातम् । बलपदार्थस्य समानत्वाघटितत्वात् । विरोधेनेति । विरुद्धसाध्यतदभावव्याप्ययोरेकत्रासत्त्वनियमेनेत्यर्थः । तद्भङ्गेति । व्याप्तिपक्षधर्मतयोरेकतराभाव इत्यर्थः । व्याप्तिपक्षधर्मतया—व्याप्तिसहितपक्षधर्मतया, ज्ञातत्वं—ज्ञायमानत्वं, व्याप्तिविशिष्टस्ववैशिष्ट्यज्ञानविषयकत्वमित्यर्थः । तेन 'नित्यत्वव्याप्यश्रावणत्वादिवैशिष्ट्याप्रसिद्धे'त्याद्यग्रिममूलसङ्गतिः । नित्यत्वव्याप्येति । शब्दो नित्यः कृतकत्वादित्यादौ श्रावणत्वादिरूपप्रतिहेतौ भ्रमात्मकव्याप्यवत्ताज्ञानस्यारोप्याप्रसिद्ध्यासम्भवेन समानबलत्वासम्भवादित्यर्थः ।

यत्राव्याप्यः प्रतिहेतुः तत्र पक्षधर्मे श्रावणत्वे अन्यत्र प्रसिद्धायाः व्याप्तेरारोप एव बलम् , यत्रापक्षधर्मः प्रतिहेतुः तत्र साध्यव्याप्ये पक्षधर्मत्वारोप एव बलमिति शङ्कायां विशिष्टाप्रसिद्ध्या व्याप्तिविशिष्टपक्षधर्मत्वारोपासम्भवाभिधानमसङ्गतमित्यत आशयं पूरयति दीधितौ व्याप्य इत्यादिना । व्याप्ये—व्याप्तिविशिष्टे, पक्षधर्मे—पक्षधर्मताविशिष्टे, प्रत्येकं व्याप्तिविशिष्टस्वविषयकपक्षधर्मताज्ञानत्वादिना, अव्यापकः—सकलसत्प्रतिपक्षासंग्राहकः, अव्याप्यादिप्रतिपक्षस्य व्याप्त्यादिविशिष्टत्वाप्रसिद्धेरिति भावः । विशिष्टारोपः—व्याप्तिविशिष्टपक्षधर्मतायाः स्वस्मिन्ग्रहः, वाच्यः बलपदेन विवक्षणीयः। एकधर्मिणीत्यादिकमेकत्रेत्यादिमूलशब्दविवरणम । विशिष्टस्येति । यादृशसाध्यं पक्षे बाधितं तादृशव्याप्तिविशिष्टप्रकृतपक्षवृत्तित्वस्याप्रसिद्ध्या न सम्भवतीति, तथाच नित्यत्वादिव्याप्तिविशिष्टश्रावणत्वाद्यप्रसिद्ध्या यथा व्याप्तिविशिष्टतद्धेतुधर्मिकपक्षधर्मताग्रहोऽप्रसिद्धस्तथा नित्यत्वादिव्या-

प्तिविशिष्टशब्दवृत्तित्वाद्यप्रसिद्ध्या श्रावणत्वादौ तद्भ्रमोऽप्यप्रसिद्ध इति श्रावणत्वादेः समानबलत्वासम्भवेन कृतकत्वादेस्सत्प्रतिपक्षतानुपपत्तिरिति भावः ।

व्याप्तिपक्षधर्मतोभयज्ञानविषयताया बलत्वे नैष दोष इत्यतो दोषान्तरं स्वयमाह विरुद्धादाविति । आदिना साधारणपरिग्रहः । साध्याभाववदवृत्तित्वरूपाया व्याप्तेरन्यत्रप्रसिद्धाया विरुद्धादावप्यारोपसम्भवात् । स्वव्यापकेत्यादि । अप्रसिद्धश्चेति । तज्ज्ञानघटितसमानबलत्वासम्भवे इति शेषः । व्याप्तिप्रकारेण पक्षे स्वप्रकारकज्ञानाविवक्षणे सामान्यादौ पक्षे समवायादिरूपहेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्धिर्न क्षतिमावहतीति साऽप्रसिद्धिर्नोक्ता व्याप्तिघटकानां तादृशपदार्थानां खण्डशः प्रसिद्धानां परस्परोपश्लेषावगाहिज्ञानस्य बलतया विवक्षणेन तद्दोषोद्धारसम्भवेपि अन्वयव्यतिरेकव्याप्तिज्ञानयोरननुगमेनैकोपादानेऽन्यत्राव्याप्तिर्दुर्धरैवेति भावः । साध्यवत्ताज्ञानाविरोध्यनुमितिसमर्थत्वेनानुगमे तु सिद्धान्त एव पर्यवसानम् ॥

व्याप्तिभङ्गाभङ्ग इति मूलं व्याप्तिपक्षधर्मताप्रमितिविषयत्वतद्भ्रमविषयत्वान्यतररूप इत्यर्थकम् ,एकतरविषयकव्याप्तिपक्षधर्मताज्ञानस्य भ्रमत्वानियमेपि तदनवधारणेनानिर्धारितविशेषत्वसम्भवादेकत्र तद्भङ्गनियमादिति दूषणमसङ्गतमित्यत आह तथा चेति । तादृशभङ्गनियमे चेत्यर्थः । तदवधारणं-भङ्गावधारणम् । अनयोरेकतरं बाध्यं विरुद्धार्थप्रतिपादकत्वादित्यनुमानात्सत्प्रतिपक्षतादशायामप्यस्तीत्यर्थः । यद्यपि अनयोरेकतरमित्यादेः एकत्र पक्षे साध्यतदभावव्याप्यतया हेतुद्वयज्ञानान्यतरद्भ्रमः एकत्र मिथो विरुद्धद्वयसाधकद्वयान्यतरत्वादित्यर्थो न साधु-सद्धेतुपरामर्शेऽप्यन्यतरत्वहेतुसत्त्वेन भ्रमत्वस्याभावेन व्यभिचारात् । न चैकपक्षकहेतुप्रतिहेतुपरामर्शान्यतरत्वं पक्षीकृत्य विरोधिसाधकद्वयवृत्तित्वेन भ्रमवृत्तित्वमेवानुमेयं तादृशान्यतरत्वाश्रये एकत्र भ्रमत्वसत्त्वेनैव तत्र भ्रमवृत्तित्वसत्त्वेन न व्यभिचारप्रसक्तिरिति वाच्यम् । तथासत्यपि घटादिविषयकसमूहालम्बनरूपो यत्र परामर्शस्तत्र घटाद्यंशे भ्रमत्वमादायार्थान्तरवारणाय तत्तद्धेतौ तत्तत्साध्यव्याप्तिपक्षधर्मतान्यतरभ्रमस्य निवेशनीयतया तत्तद्धेतुद्वयान्तर्गतसद्धेतौ तत्तत्साध्यादिव्याप्तिभ्रमाप्रसिद्ध्या साध्याप्रसिद्धेः । तत्तद्धेतुद्वयान्यतरांशे तत्तत्साध्यव्याप्तिपक्षधर्मता-

न्यतरभ्रमवृत्तित्वसाधने च विरुद्धार्थसाधकान्यहेतुकपरामर्शद्वयान्यतरत्वे व्यभिचारः साध्यप्रसिद्धिमात्रेणैव कृतकृत्यता च । तथापि तत्तत्साध्यतदभावव्याप्यवच्छिन्नपक्षधर्मतानिरूपितहेतुविषयताद्वयान्यतरत्वं पक्षीकृत्य भ्रमत्वानयतविषयतावृत्तित्वमेकधर्मिकाविरुद्धानुमितिजनकतावच्छेदकविषयताद्वयवृत्तित्वेन साधनीयम् । भ्रमत्वं चानुगतं कथंचिन्निर्वचनीयम ॥

इति सत्प्रतिपक्षपूर्वपक्षग्रन्थः ॥

(चिं०) उच्यते । साध्यविरोध्युपस्थापनसमर्थसमानबलोपस्थित्या प्रतिरुद्धकार्यलिङ्गत्वं तत्त्वम् । बलञ्च व्याप्तिपक्षधर्म्मते । विरोधिबाधकान्यगमकतौपयिकरूपसम्पत्तिमत्तया ज्ञायमानेन प्रतिरुद्धकार्यत्वं वा तत्त्वम् ।

(दी०) सत्प्रतिपक्षितव्यवहारो हि सत्यसति वा साधने नापरामृश्यमाणे नाप्यविद्यमानविरोधिपरामर्शे, अत एव सन् प्रतिपक्षो विरोधिव्याप्यादिमत्तया परामृश्यमाणो हेतुः विरोधिपरामर्शो वा यस्य परामृश्यमाणस्य हेतोरसौ सत्प्रतिपक्ष इति विग्रहमपि वर्णयन्ति, अतस्तदनुसारेणैव व्यवहारौपयिकं लक्षणमाह साध्येति । बाधाश्रयासिद्धिनिर्णयवारणाय समर्थान्तम् । न चासौ न व्याप्तिपक्षधर्म्मतात्मकबलोपस्थितिरिति वाच्यम् । व्याप्तिपक्षधर्म्मताविरहस्य साध्यत्वे पक्षतावच्छेदकत्वे वा तत्सम्भवात् । पक्षः साध्याभावव्याप्यवान् साध्यं पक्षवृत्तित्वाभावव्याप्यवदिति पक्षस्य, व्यापकभेदेन अन्वयव्यतिरेकभेदेन च व्याप्तेश्च भिन्नत्वादेकोपादानेऽन्यसंग्रहेण बलस्याविवक्षितत्वाच्च । साध्यधीविरोध्यनुमितिजनकज्ञानाविषयत्वेन तदुपादाय तदुपस्थित्यभिधानञ्च शिरोवेष्टनेन नासिकास्पर्शमनुधावति । साध्यस्य साध्यसिद्धेर्विरोधिन्याः पक्षो न साध्यवानित्याद्युपस्थितेः, सा-

ध्यविरोधी साध्यवत्ताज्ञानप्रतिबन्धकज्ञानविषयो बाधः साध्याभावादिस्तदुपस्थितेर्वा जननयोग्यया समानया बलोपस्थित्या तथाविधव्याप्त्यादिबुद्ध्या प्रतिरुद्धं कार्यं यस्य तादृशलिङ्गत्वमित्यर्थः । विरोधिव्याप्त्यादिविषयत्वलक्षणयोग्यताशालिन्या अप्युपस्थितेरप्रामाण्यग्रहे सत्प्रतिपक्षत्वासम्पादकत्वात् कार्यप्रप्रतिरोधानुधावनम् । समानत्वञ्चागृहीताप्रामाण्यकसाध्यसिद्ध्यौपयिकपरामर्शकालीनत्वम् । असति गृहीताप्रामाण्यके वा परामर्शे सत्प्रतिपक्षितत्वव्यवहारविरहात् ।

(गा०) उच्यते इत्यादि ग्रन्थस्य दोषनिर्वचनपरत्वं न सम्भवति साध्यविरोध्युपस्थानेत्यादेर्ज्ञानस्य ग्राह्याभावाद्यनवगाहितयाऽनुमित्यप्रतिबन्धकतया तस्य हेत्वाभासत्वासंभवादिति सत्प्रतिपक्षनिर्वचनपरतया व्याख्यातुकामो व्यवहारविषयमवधारयति सत्प्रतिपक्षितेति । सत्यसति वेति । समीचीने ऽसमीचीने वेत्यर्थः । तथाच सङ्केतावुक्तलक्षणस्यातिप्रसंगो दशाविशेषे न दूषणावह इति भावः । अपरामृश्यमाण इति । प्रकृतसाध्यसिद्ध्यौपयिकस्वविषयकपरामर्शदशानवच्छिन्न इत्यर्थः । एतेन साध्यसिद्ध्यौपयिकपरामर्शकालीनत्वरूपसमानत्वनिवेशसार्थक्यं दर्शितम् । असति गृहीताप्रामाण्यके च परामर्शे सत्प्रतिपक्षव्यवहारविरहादित्यग्रिमग्रन्थश्चासतीत्यस्य दृष्टान्तविधया प्रदर्शनेन गृहीताप्रामण्यकत्वांशमात्रव्यावृत्तिप्रदर्शनपर इति न पौनरुक्त्यम् । अविद्यमाने विरोधिपरामर्शे इति । विरोध्यनुमितियोग्यपरामर्शदशानवच्छिन्न इत्यर्थः । एतेन बलोपस्थितिप्रतिरुद्धकार्यकत्वांशनिवेशप्रयोजनं दर्शितम् । अतएवेति । प्रकृतपरामर्शस्य विरोधपरामर्शस्य चासत्त्वदशायां सत्प्रतिपक्षव्यवहारविरहादेवेत्यर्थः । अतीतानागतप्रतिहेतुपरामर्शदशायामपि सत्प्रतिपक्षत्वात्प्रतिपक्षपदस्य हेतुपरतापक्षं परित्यज्य परामर्शपरतामाह विरोधिपरामर्शेति । परामृश्यमाणस्येति । यद्यप्यन्यपदार्थे परामृश्यमाणत्वं न शब्दतो लभ्यते तथापि प्रतिपक्षपदस्यैव फलोन्मुखस्वकार्यप्रतिरोधकपरतया परामृश्यमाणस्वकार्यानुमितिविरोधिपरामर्शपरत्वात् फलितार्थविवरणमिदम् । तदनुसारेण—तादृशव्यवहारानु-

सारेण । बाधाश्रयासिद्धिवारणायेति । तद्दशायामतिव्याप्तिवारणाये-त्यर्थः । तयोरपि साक्षादनुमितिप्रतिबन्धकत्वादिति भावः । न चा-श्रयासिद्ध्यादिनिर्णयस्यानुमितिप्रतिबन्धकत्वेऽपि तस्य परामर्शेनापि समं विरोधात्परामर्शकाले तत्समवधानं दुर्घटमिति वाच्यम् । लौ-किकसन्निकर्षादेव तत्सम्भवात् । आश्रयासिद्धपदं साध्याप्रसिद्धे-रप्युपलक्षणम् । बलपदेनैव तद्वारणात् समर्थान्तवैयर्थ्यमित्याशंकां निराकरोति न चासावित्यादिना । असौ—बाधादिनिर्णयः । व्या-प्तीति । धूमो वह्निव्याप्तिविशिष्टपर्वतवृत्तित्वाभाववान् पर्वताद्य-वृत्तित्वात् तादृशाभाववान्धूमो गुणवान् द्रव्यत्वादित्यादौ धू-मादेर्वह्न्यादिव्याप्तिविशिष्टपक्षधर्मताऽनिश्चयरूपबाधाश्रयासिद्धिनिर्ण-यस्य व्याप्तिपक्षधर्मतात्मकबलोपस्थितित्वसम्भवादिति भावः । ननु बलपदं प्रकृतसाध्याभावव्याप्तिविशिष्टप्रकृतपक्षधर्मतापरमिति नायं दोषः प्रकृते वन्हिव्याप्तिविशिष्टपर्वतवृत्तित्वव्याप्तिविशिष्टधूम-वृत्तिताया एव बलत्वादित्यत आह पक्ष इति । इतीत्यस्य प्रतिरोध-कज्ञानविषयस्येति शेषः । पक्षस्य व्याप्तेश्च भिन्नत्वादित्यर्थः । प्रथ-मे प्रकृतपक्षस्य द्वितीये प्रकृतसाध्यस्य पक्षतया पक्षभेदः । व्याप्तेर्भे-दकद्वयमाह व्यापकेत्यादि । व्यापकभेदेनेति । व्यापकयोः साध्याभा-वपक्षवृत्तित्वाभावयोर्भेदेनेत्यर्थः । अन्वयव्यतिरेकभेदेनेति । एक-साध्यगमकव्याप्तेरप्यन्वयव्यतिरेकरूपनिरूपकभेदेनेत्यर्थः । अविव-क्षितत्वात्—विवक्षितुमशक्यत्वात् । नन्वनुगतरूपेण सकलव्याप्तिप-क्षधर्मतानिवेशे नायं दोष इत्यत आह साध्येति । शिरोवेष्टनेनेति । तादृशानुमितिजनकज्ञानत्वेन प्रतिरोधकज्ञानस्यैव निवेशात्तद्विषय-कत्वेन पुनस्तन्निवेशोऽनुचित इत्यर्थः । तथा च विरोध्युपस्थापनस-मर्थस्येनैवोपस्थितिनिवेशो युक्त इति भावः । उपस्थितविरोधित्वं प्र-तिबन्धकत्वं तच्च न साध्यनिरूपितमिति साध्यपदन्तदनुमितिपरतया व्याचष्टे साध्येत्यादि । इत्याद्युपस्थितेरित्यादिना साध्यं पक्षावृत्तीत्या-दि उपस्थितिपरिग्रहः । उपस्थापनेत्यत्र धात्वर्थोपस्थितौ विरोध्य-न्तस्य स्तोकं नमेत्यादौ नमने स्तोकस्येवाभेदान्वयः प्रयत्नेनोपपा-द्यः, एतदस्वरसेन साध्यपदस्य मुख्यार्थपरत्वानुरोधेन च कल्पान्त-रमाह साध्यविरोधीति । तदुक्तज्ञानप्रतिबन्धकज्ञानविषयत्वस्यैव विषयविरोधिरूपत्वात्साध्यवत्ताज्ञानविषय इति विवरणसङ्गतिः ।

साध्याभाववत्पक्षादिरित्यादिना पक्षावृत्तित्वादिविशिष्टसाध्यादिपरिग्रहः। एतच्च फलितकथनम्। तदुपस्थितेरिति। तादृशपक्षादेः कर्मतया उपस्थितिक्रियायामन्वयो युक्त एवेति भावः।

अथैवं पक्षे साध्यवति साध्याभाववत्पक्षादेरप्रसिद्ध्या सत्प्रतिपक्षितसद्धेतावव्याप्तिरिति चेन्न। यद्रूपावच्छिन्ने धर्मिणि यद्रूपावच्छिन्नवत्ताज्ञानं पक्षतावच्छेदकावच्छिन्ने साध्यतावच्छेवकावच्छिन्नवत्ताज्ञानप्रतिबन्धकं तद्रूपावच्छिन्ने पक्षे तद्रूपावच्छिन्नसाध्यकानुमितिजननयोग्योपस्थितिप्रतिरुद्धकार्यकत्वाविवक्षणात्। यत्र बाधो दोषस्तत्रैव सत्प्रतिपक्षो दोषः प्रतिहेतुपरामर्शसंवलनदशायां तत्रैव हेतौ सत्प्रतिपक्षव्यवहारो यथार्थ इत्याशयेनैवैतत्कल्पानुसरणम्। तथाच साध्यवत्पक्षकहेतोरलक्ष्यतया न तत्राव्याप्तिरित्याहुः।

वस्तुतस्साध्यवत्ताज्ञानप्रतिबन्धकज्ञानत्वेनोपस्थितेर्लक्षणे निवेशनीया तादृशज्ञानाविषयविषयत्वेन तन्निवेशनस्य शिरोवेष्टनेनत्यादिन्यायेन हेयत्वात्। साध्यादिपक्षकसाध्यतावच्छेदकाद्यभावव्याप्यवत्तापरामर्शवारणाय विशिष्टसाध्यादिग्रहाविरोधित्वेनाप्युपस्थितिर्विशेष्या। जननयोग्ययेति। जननं ण्यर्थः योग्यत्वं च समर्थपदार्थः बले समानत्वं न विवक्षणीयं तस्याविवक्षितत्वादपि तु उपस्थितावेवेति स्फुटीकर्तुं समानयेत्यसमासालिखनम्। तथाविधव्याप्तिबुध्या—साध्याभावादिव्याप्तिबुद्ध्या। एतदपि वस्तुकथनम्। तया प्रतिरुद्धत्वं च तत्प्रयुक्तानुत्पादप्रतियोगित्वम्। वह्निव्याप्याभावादिसाध्यकस्थले वह्न्यादिमत्पक्षविषयकानुमितिजननयोग्यया वह्न्यादिव्याप्यवत्पक्षोपस्थित्या बाधनिश्चयरूपया कार्यप्रतिरोधदशायामतिव्याप्तिवारणाय साध्यवत्ताज्ञानप्रतिबन्धकत्वं प्रथमोपस्थितिविशेषणम्, वह्न्यादिव्याप्यवत्पक्षोपस्थितेरपि साध्यवत्ताज्ञानप्रतिबन्धिका वह्निव्याप्यादिमत्पक्षविषयकसमूहालम्बनरूपवह्न्यादिमत्पक्षविषयकानुमितिं प्रति स्वरूपयोग्यतया यथाश्रुते उक्तातिव्याप्तेर्दुर्वारतया साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकविषयत्वावच्छिन्नानुमितिनिष्ठकार्यतानिरूपितकारणताश्रयत्वपर्यन्तं समर्थान्तेन विवक्षणीयम्। न च साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकीभूता साध्याभावादिप्रकारता तद्विधेयतैव प्रतिहेतुपरामर्शजन्यतावच्छेदिकेति तज्जन्यताया न प्रतिबन्धकतावच्छेदकविषयतावच्छिन्नत्वमित्युक्तविवक्षायामसम्भव

इति वाच्यम् । प्रकारताविशेषस्यैव विधेयतात्वात्, अन्यथा तु यदवच्छिन्नविशेष्यकयदवच्छिन्नप्रकारकत्वं प्रतिबन्धकतावच्छेदकं तदवच्छिन्नपक्षकतदवच्छिन्नविधेयकत्वावच्छिन्नकार्यतानिरूपितकारणत्वमेव निवेश्यम् ।

ननु तादृशोपस्थितिकालीनज्ञानविषयत्वमेव सम्यक् किं तत्प्रतिरुद्धकार्यकत्वनिवेशेनेत्यत आह विरोधीत्यादि । अप्रामाण्यग्रहविशिष्टाया व्याप्त्याद्युपस्थितेर्न विरोध्यनुमितिजननयोग्यत्वं तद्ग्रहविशिष्टत्वेनैव परामर्शस्यानुमितियोग्यत्वादिति न तादृशोपस्थितिमादायातिव्याप्तिप्रसक्तिरित्याशङ्कां निराकरोति विरोधिव्याप्त्यादिविषयत्वलक्षणयोग्यताशालिन्या इति । जनकतावच्छेदकतापर्याप्त्यधिकरणत्वरूपयोग्यता नात्र विवक्षिता, किन्तु जनकतावच्छेदककोटिप्रविष्टविषयतारूपैवेति भावः । अथवा अप्रामाण्यग्रहाभावो नानुमितिजनकतावच्छेदकोऽपि तु स्वातन्त्र्येण जनक एवेत्यभिप्रायेणैतत् । कार्यप्रतिरोधानुधावनमिति । तथा चाप्रामाण्यग्रहाभावविशिष्टविरोधिपरामर्शस्यैवानुमितिप्रतिबन्धकतयागृहीताप्रामाण्यकविरोधिपरामर्शस्य कार्याप्रतिरोधकत्वान्नोक्तस्थलेऽतिप्रसङ्गः । यद्यपि अप्रामाण्यज्ञानास्कन्दितपरामर्शस्यागृहीताप्रामाण्यबाधादिरूपत्वे तद्विरुद्धकार्यकत्वमपि दुर्वारमिति यथाश्रुतेऽतिव्याप्तिरस्त्येव, तथापि विरोध्यनुमितिजनकतावच्छेदकरूपस्य कार्यप्रतिरोधप्रयोजकतावच्छेदकताविवक्षणेनातिव्याप्तिर्वारणीया । न च यत्र विरोधिपरामर्शानन्तरक्षणे तद्विषयकाप्रामाण्यग्रहो जायते तत्र पूर्वक्षणेऽप्रामाण्यग्रहाभावविशिष्टतज्ज्ञानरूपप्रतिबन्धकसत्त्वेन तत्क्षणे कार्यानुत्पादात्तत्क्षणे सत्प्रतिपक्षत्वं दुर्वारमिति वाच्यम् । यत्कालीनोपस्थित्यग्रिमक्षणे यस्य कार्यानुत्पादस्स तदा सत्प्रतिपक्ष इति विवक्षया अतिप्रसङ्गवारणात् ।

उपाध्यायरीत्या समानपदं सार्थकयितुं तदर्थमाह समानत्वं चेति । अगृहीताप्रामाण्यकेति । स्वविषयकाप्रामाण्यग्रहाभावविशिष्टेत्यर्थः ।

अथागृहीताप्रामाण्यकत्वशरीरे अन्वयव्याप्त्यंशे व्यतिरेकव्याप्त्यंशे च यदप्रामाण्यं तद्ग्रहाभावविशिष्टत्वं निवेश्यं तद्व्याप्त्यंशे ऽप्रामाण्यग्रहसत्त्वे तद्व्याप्त्यवगाहिपरामर्शस्य सत्प्रतिपक्षत्वाप्रयोजक-

त्वात्, तथा चान्वयव्यतिरेकव्याप्त्योरेकतरविषयकपरामर्शदशायामन्वयव्याप्त्यंशेऽप्रामाण्यग्रहसत्त्वे सत्प्रतिपक्षता न स्यात्। न च स्वयोग्यानुमितिविरोधिग्रहत्वेनाप्रामाण्यग्रहद्वयमनुगमय्य तदभावविशिष्टत्वं निवेशनीयम्। विरोधित्वं च समानविशेष्यकत्वानवच्छिन्नं ग्राह्यम्। तेन विरोधिपरामर्शव्यावृत्तिरिति वाच्यम्। एवं सति तादृशव्याप्तिद्वयविषयकसमूहालम्बनपरामर्शे एकतरांशेऽप्रामाण्यग्रहसत्त्वे सत्प्रतिपक्षत्वानुपपत्तेरिति चेन्न।

स्वीययत्किञ्चिद्विषयताप्रयोज्यानुमितिप्रतिबन्धकज्ञानसामान्याभावस्य निवेशनीयत्वात्। विरोधित्वं च विरोधिपरामर्शव्यावृत्तं ग्राह्यम् समूहालम्बनपरामर्शस्थले यादृशव्याप्त्यंशे प्रामाण्यज्ञानं नास्ति तादृशव्याप्तिविषयताप्रयोज्यानुमितिविरोधिज्ञानसामान्याभावस्य सत्त्वान्न सत्प्रतिपक्षतानुपपत्तिः। साध्यसिद्ध्यौपयिकत्वं प्रकृतसाध्यानुमितिजननयोग्यत्वम्, योग्यत्वं चाप्रामाण्यग्रहास्कन्दितस्यापि परामर्शस्याप्रामाण्यग्रहाभावस्य तत्सहकारिकत्वादिति नागृहीताप्रामाण्यकत्ववैयर्थ्यम् असति अविद्यमाने परामर्शे स्वविषयकपरामर्शे स्वस्य सत्प्रतिपक्षताविरहात्। न चासति गृहीतकाप्रामाण्यके वा प्रकृतसाध्यानुमापकपरामर्शेऽप्रामाण्यज्ञानभावसहकृतपरामर्शरूपकारणविरहादनुमितिविरहो न विरोधिपरामर्शप्रयुक्त इति समानत्वानिवेशेपि नातिप्रसङ्गावकाश इति वाच्यम्। तत्र उभयोरेव कारणाभावतया विनिगमनाविरहेण कार्याभावप्रयोजकताया दुर्वारत्वात्। विरोधिपरामर्शमात्रप्रयुक्तत्वस्य प्रयोजनविरहेणानिवेशात् यत्र प्रतिरोधको विरोधिपरामर्शो बाधनिश्चयश्च वर्तेत तत्रापि सत्प्रतिपक्षत्वस्येष्टत्वात्।

(दी०) यत्तु–प्रामाण्यनिर्णयेनाधिकबलतया बाधकस्य विरोधिपरामर्शस्य वारणाय समानेति–तदसत् व्यभिचारेण प्रामाण्यग्रहस्याबलत्वात्, अन्यत्राप्रामाण्यग्रहानुकूलत्वेनैव क्वचित्तदुपयोगात्। बलपदोपसन्दानाच्चोक्तरूपलाभान्न तद्वैयर्थ्यम्। लिङ्गपदोपादानाच्च स्वीयलिङ्गतौपयिकपरामर्शलाभादात्मादेर्व्युदासः। विरोधिपरामर्शप्रतिरुद्धकार्यकविशिष्टपरामर्शविषयत्वन्तु फलि-

तार्थः । अगृहीताप्रामाण्यकत्वसंवलितयोग्यतोपादाने तु बाधोपस्थितिसमर्थपरामर्शकालीनसाध्यसिद्धिसमर्थपरामर्शविषयत्वं वाच्यं तत्त्वम् ।

यदि चायं वह्निव्याप्यवान् वह्न्यभावव्याप्यवांश्चेति परामर्शादयं वह्निमान् वह्न्यभावव्याप्यवांश्चेत्यनुमितिः प्रामाणिकी न तु सत्प्रतिपक्षत्वम्, तदा कार्य्यप्रतिरोधोऽवश्यमुपादेयोऽजनितविरोधिबोधकत्वेन च विरोधिपरामर्शो विशेषणीयः। अत एवाग्रिमलक्षणे विरोधिबोधिकान्येति फलतो ज्ञानविशेषणम् । एकस्याप्रामाण्यग्रहेऽपरेणानुमितिजननात् तद्वारणाय वा तत् । प्रतिरुद्धकार्य्यत्वञ्च प्रतिरुद्धकार्य्यपरामर्शविषयत्वम् ।

(गा०) मिश्रोक्तसमासपदव्यावृत्तिं दर्शयितुमुपन्यस्यति यत्त्विति । प्रामाण्यनिर्णयेन–स्वविषयकप्रामाण्यनिश्चयेन । एतच्च बाधकताप्रयोजकाधिकबलतायां हेतुः । बाधकस्य–विरोध्यनुमापकस्य, निश्चितप्रामाण्यकपरामर्शजन्यानुमितावनिश्चितप्रामाण्यकाविरोधिपरामर्शो न प्रतिबन्धकः तद्व्याप्यवत्ताज्ञानधर्मिकप्रामाण्यनिश्चयस्य विरोधिव्याप्यवत्ताज्ञानप्रतिबन्धकतायामुत्तेजकत्वात् । तादृशप्रामाण्यनिश्चये विरोधिव्याप्यवत्ताज्ञानधर्मिकप्रामाण्यनिश्चयाभावस्य विशेषणत्वेऽभयपरामर्शे प्रामाण्यनिश्चयदशायां उभयानुमितिप्रतिरोधनिर्वाह इत्यभिमानः । समानेतीति । समानत्वं च विरोधिबोधानुपधायकत्वं विरोधिबोधाव्यवहितप्राक्क्षणावशिष्टत्वाभाव इति यावत् । प्रतिरुद्धकार्यकत्वं च तदभावातिरिक्तसकलप्रकृतसाध्यकानुमितिकारणसमवधानकालावच्छिन्नतत्प्रयुक्तकार्यानुपधायकत्वम् । सकलकारणनिवेशादुभयपरामर्शसत्त्वे बाधेन हीनबलस्य हेतोर्न सत्प्रतिपक्षत्वम् । कार्यप्रतिरोधनिवेशश्च परामर्शप्रामाण्यनिश्चयेनाधिकबलहेतावतिव्याप्तिवारणायेति बोध्यम् । प्रतिहेतोः स्वसाध्यबाधेन हीनबलतादशायां प्रकृतहेतोः सत्प्रतिपक्षतावारणाय विरोधिपरामर्शेऽपि प्रकृतहेतुपरामर्शाभावातिरिक्तसकलकारणसमवहितत्वं निवेश्यम् । वस्तुतो मिश्रमतेऽनुमितौ न विरोधिपरामर्शमात्रस्य विरोधित्वं किन्तु विरोध्यनुमितिसामग्र्या एव, तथाचेतरकारणासम-

वहितस्य परामर्शस्य कार्याप्रतिरोधकतया प्रतिरोधकविरोधिपरामर्शेतरकारणसमवहितत्वं विशेषणं देयम् ।

उभयपरामर्शे अप्रामाण्यग्रहासत्त्व एकत्र प्रामाण्यनिश्चयेऽपि तस्यानुमितिजनकत्वासिद्ध्या विरोधिपरामर्शस्य सामग्रीविधया स्वातन्त्र्येण वा विरोधितायां न प्रतिबध्यानुमितिजनकपरामर्शीयप्रामाण्यग्रहस्योजकत्वमित्याशयेनाह व्यभिचारेणेति । उक्तस्थले विरोध्यनुमित्युत्पत्तौ तत्र प्रकृतसाध्यानुमापकपरामर्शाभावरूपकारणस्य व्यभिचारप्रसङ्गेनेत्यर्थः । अबलत्वात्–प्रकृतपरामर्शेऽप्रामाण्यग्रहमन्तरेण उक्तस्थलेऽनुमित्यनुपधायकत्वात् ,तथाच तत्र सत्प्रतिपक्षत्वमिष्टमेवेति भावः ।

अथवा व्यभिचारेण तज्जनकज्ञाने प्रामाण्यनिश्चयं विनाऽप्यनुमित्युत्पत्त्या जनकज्ञाने प्रामाण्यग्रहस्याबलत्वात् अनुमितिसामग्र्यघटकत्वात्, तथाच यत्र प्रकृतपरामर्शे न प्रामाण्यग्रहः किन्तु विरोधिपरामर्श एव तत्रापि प्रकृतपरामर्शे अप्रामाण्यग्रहासत्त्वे कोटिद्वयानुमितिसामग्र्या अक्षतत्वात् परस्परविरोधेन नैकस्यानुमितिरिति सत्प्रतिपक्षत्वमिष्टमेवेति भावः ।

नन्वेकत्र प्रामाण्यग्रहसत्त्वे एककोट्यनुमितेः प्रामाणिकत्वेन तस्य बलवत्त्वमावश्यकमित्यत आह अन्यत्रेति । परामर्शान्तर इत्यर्थः । तदुपयोगात्—प्रामाण्यग्रहस्यानुमित्युत्पादकत्वात् । बलपदस्याविवक्षितार्थत्वेऽपि समानपदस्य निरुक्तार्थतात्पर्यग्राहकतया बलपदोपादानं सार्थकयति बलपद इति । लिङ्गपदोपादानवैयर्थ्यशंकां निरस्यति लिङ्गपद इति । स्वीयलिङ्गत्वौपयिक इति । स्वनिष्ठप्रकृतसाध्यानुमापकतावच्छेदकविषयताविशेषरूपगमकतानिर्वाहकेत्यर्थः । आत्मादेरिति । अन्यथा तस्यापि धूमलिङ्गकवह्न्यनुमित्यौपयिकपरामर्शकालीनवह्न्यभावाद्यनुमापकपरामर्शप्रतिरुद्धवह्न्यनुमित्यात्मककार्यकत्वसत्त्वेन धूमादेरिव सत्प्रतिपक्षितत्वापत्तेरिति भावः । न च प्रतिरुद्धकार्यकत्वं प्रतिरुद्धकार्यकपरामर्शविषयत्वं तच्च नात्मादाविति नातिप्रसङ्ग इति वाच्यम् । आत्मादेरपि प्रतिरुद्धकार्यकसमूहालम्बनादिरूपधूमादिपरामर्शविषयत्वसम्भवात् । प्रतिरुद्धकार्यकत्वमित्यनेन प्रतिरुद्धकार्यकपरामर्शविषयत्वमवश्यमेव विवक्षणीयमनुमितेर्हेतुकार्यत्वाभावेन हेतोस्तत्कार्यकत्वाभावात् , तथाच तादृश-

विषयतायां प्रकृतानुमितिजनकतावच्छेदकत्वनिवेशेनैवोपपत्तेः विरोधिपरामर्शे स्वनिष्ठप्रकृतानुमितिजनकतावच्छेदकविषयताकपरामर्शकालीनत्वनिवेशनमनुचितमित्याशयेन तथैव निष्कृष्टार्थमाह विरोधिपरामर्शेति । प्रकृतानुमितिविरोध्यनुमितियोग्यपरामर्शप्रयुक्ताग्रिमक्षणावच्छिन्नानुत्पादप्रतियोग्यनुमितिजनकतावच्छेदकीभूतपरामर्शीयविषयताविशेषविशिष्टत्वमित्यर्थः ।

अगृहीताप्रामाण्यकपरामर्शत्वेनानुमितिजनकतामते जनकतावच्छेदकतापर्याप्त्यधिकरणधर्मवत्त्वरूपयोग्यता न गृहीताप्रामाण्यकपरामर्शस्येति कार्यप्रतिरोधनिवेशमन्तरेणैवोपपत्त्या तं परित्यजति अगृहीताप्रामाण्यकेति । बाधोपस्थितिसमर्थेति । साध्यवत्ताज्ञानप्रतिबन्धकत्वे सति तत्प्रतिबध्या यानुमितिस्तद्योग्येत्यर्थः । साध्यवत्ताधीप्रतिबध्यत्वानिवेशात् साध्याभावव्याप्यानुमितिसमर्थपरामर्शकाले नातिप्रसङ्गः । तत्कालीनत्वं च एककालावच्छिन्नैकात्मवृत्तित्वसम्बन्धेन तद्विशिष्टत्वम्, तेन व्यधिकरणपरामर्शमादाय नातिप्रसङ्गः ।

यदि चायमिति । अनुमितिः प्रामाणिकीत्यत्र नच सत्प्रतिपक्षत्वमित्यत्र च यदि चेत्यस्य सम्बन्धः । तदभावव्याप्यवत्तानिश्चयानन्तरमिव तादृशनिश्चयक्षणेऽपि नानुमितिर्जायते तादृशनिश्चयस्य बाधनिश्चयवत् स्वोत्पत्तिक्षणेऽपि कार्योत्पत्तिविरोधित्वात्, तत्रानुमितेः प्रामाणिकत्वे तादृशानुमित्युत्पत्तिक्षणेऽपि सत्प्रतिपक्षतायामपि नानुपपत्तिः तदग्रिमक्षणे विरोधिपरामर्शादनुमितिप्रतिरोधादित्युभयत्र विवादप्रदर्शनार्थं तदुपादानम् । कार्यप्रतिरोधोऽवश्यमुपादेय इति । स्वानन्तर्येण प्रकृतसाध्यसिद्ध्यौपयिकपरामर्शे स्वजन्यकार्याभावविशिष्टत्वरूपप्रतिहतकार्यकत्वमगृहीताप्रामाण्यकत्वेनानुमितिहेतुतामतेऽपि निवेश्यमित्यर्थः । अजनितविरोधिबोधकत्वेनेति । स्वजन्यविरोध्यनुमित्यभावविशिष्टत्वेनेत्यर्थः । विशेषणीय इति । तेन तत्र विरोधिवह्निसाध्यकपरामर्शेन वह्न्यभावसाधकहेतोर्न सत्प्रतिपक्षितत्वमिति शेषः । अत एव-उक्तस्थले वह्न्यभावसाधकहेतोः सत्प्रतिपक्षत्ववारणानुरोधादेव । विरोधिबोधकान्येति । निरुक्तार्थकमिति भावः । यथाश्रुतशब्दतो गमकतौपयिकरूपं विरोधिबोधकान्यत्वं लभ्यते न तु ज्ञायमानपदोपस्थाप्यज्ञाने, तथा विवक्षणे च यादृशव्याप्त्यादिमत्तया ज्ञानेन प्रकृतसाध्यकपरामर्शशून्यस्य पुरुषान्तरस्य विरोध्यनुमितिर्जनिता

प्रकृतसाध्यपरामर्शसहिततादृशव्याप्तिविषयकज्ञानान्तरस्यापि सत्प्रतिपक्षत्वप्रयोजकतानुपपत्तिरतः फलतो ज्ञानविशेषणमिति । उक्तानुमितेरप्रामाणिकत्वेऽपि तदानीं सत्प्रतिपक्षत्वोपगमेऽपि वाऽग्रिमलक्षणे विरोधिपरामर्शे विरोधिबोधकान्यत्वस्य निरुक्तव्यावृत्तेरसंगतिः अतस्तन्मते व्यावृत्त्यन्तरमाह एकस्येति । तद्वारणाय-अनुमित्युपधायकपरामर्शस्य सत्प्रतिपक्षितत्वप्रयोजकतावारणाय । तत् विरोधिबोधकान्यत्वम्—स्वजन्यविरोधिबोधाव्यवहितप्राक्क्षणाविशिष्टं यत्तदन्यत्वात्मकं, स्वनिष्ठतादृशक्षणवैशिष्ट्यशून्यत्वात्मकं वा । नन्वेवमपि यत्र प्रतिहेतुपरामर्श एव विद्यते न तु प्रकृतहेतुपरामर्शः अन्यत एव कुतश्चित्प्रतिबन्धकात् न तदग्रिमक्षणे विरोध्यनुमितिः तत्राग्रिमक्षणेऽतिप्रसंग एवेत्यत आह प्रतिरुद्धेति । तथाच तत्र प्रकृतहेतौ विशेषणीभूतपरामर्शविषयत्वाभावान्नातिप्रसंग इति भावः । न चैवमपि यत्र प्रकृतहेतुपरामर्शो गृहीताप्रामाण्यकः प्रतिहेतुपरामर्शश्चागृहीताप्रामाण्यको विद्यते प्रतिबन्धकान्तरवशाच्चाग्रिमक्षणे विरोध्यनुमित्यनुत्पादः तत्रातिप्रसंगो दुर्वार एव प्रकृतहेतुपरामर्शेऽगृहीताप्रामाण्यकत्वस्य तन्नियतसाध्यसिद्धियोग्यताया वा निवेशे प्रतिहेतुपरामर्शे विरोधिबोधकान्यत्वस्य वैयर्थ्यमिति वाच्यम् । एतन्निवेशलाभायैव विरोधिबोधकान्यत्वस्योपादानात् ।

वस्तुतस्तु विरोधिबोधकान्यत्वं प्रकृतहेतुपरामर्शप्रतिरुद्धकार्यकत्वरूपं प्रतिहेतुपरामर्शविशेषणं गृहीताप्रामाण्यकप्रकृतहेतुपरामर्शाच्च न प्रतिहेतुकार्यप्रतिरोध इति तादृशपरामर्शदशायां नातिप्रसङ्गः ॥

(चि०) स्थापनाया व्याप्तिपक्षधर्म्मत्वमुभयवादिसिद्धम्, वादिना तदभावानुपन्यासात्, द्वितीयस्य तस्यमन्यतरासिद्धमिति प्रथमेन द्वितीयं बाधितमिति स्वार्थानुमान एवायं दोष इत्येके । तन्न । एकदा निरन्तरयोर्वोभयोर्व्याप्तिपक्षधर्म्मतया ज्ञानयोः प्रतिपक्षत्वात् । युगपदुपस्थितेः कारणवशेन स्वपरसाधारणत्वात् ।

(दी०) एकदेत्यादि । न च द्वितीयस्य परामर्शस्योत्पादनसमये पूर्वेणानुमितिजननात् कथं नैरन्तर्य्यमिति वाच्यम् । साधकमानादिवशेन क्षणमनुमित्यनुत्पादसम्भवात् । स्वपरेति । अयं भावः । न खलु सम्भवन्तः सर्व्वे एव हेत्वाभासाः समुद्भाव्याः आधिक्यप्रसङ्गात्, परन्तु यथाकालमेकः, तथाच प्रतिपक्षोद्भावनेऽपि नाप्रतिषेधमात्रेण व्याप्त्याद्यभ्युपगम इति ।

(गा०) मूले एकदेत्यस्य उत्पन्नयोरिति शेषः । अविरलक्रमेणोत्पन्नयोरित्यर्थकम् निरन्तरयोर्वेति मूलमाक्षिपति न चेत्यादि । साधकमानं–साध्यनिश्चयः । विरोधिपरामर्शानन्तरमपि यदि साधकमानादिवशेनानुमितिर्न जायेत तदा तदनुरोधेन सत्प्रतिपक्षस्य दोषता नायातीत्यतः क्षणमिति । क्षणैकमित्यर्थः ।

मूले ज्ञानयोर्ज्ञानयोः, प्रतिपक्षत्वात्–परस्परकार्यप्रतिरोधकत्वात् । युगपदिति । यौगपद्यमेककालवृत्तित्वं न तूत्पत्तिघटितं द्वितीयपक्षासंग्रहत्वात्, परामर्शद्वयसंवलनस्य स्वपरसाधारणत्वेऽपि परार्थस्थले व्याप्तिपक्षधर्मताभंगमुपेक्ष्य सत्प्रतिपक्षोद्भावनेनाप्रतिषिद्धत्वेन प्रकृतहेतौ व्याप्तिपक्षधर्मतयोः प्रतिवाद्यनुमतत्वग्रहाच्च तयोस्तुल्यबलत्वमिति आक्षेपानुद्धाराद्भावं पूरयति दीधितावयं भाव इति । आधिक्यप्रसंगादिति । हेतुद्वयप्रयोग इव दोषद्वयोद्भावनेऽपि आधिक्यादिति भावः । यथाकालमित्यनेन तदुद्भावने विनिगमकशंका निराकृता । व्याप्त्याद्युपगमः–व्याप्त्यादेः प्रतिवाद्यनुमतत्वसिद्धिः । अप्रतिषिद्धस्याभावानुद्भावनरूपस्यान्यथासिद्धतया अनुमित्यनपेक्षकत्वादिति भावः ।

(चि०) अथ वस्तुनोऽज्ञातमकत्वेन व्याप्तिपक्षधर्म्मताभङ्ग एकत्रावश्यक इति स एव दोषः । न च तयोर्विरोधभङ्गेऽप्युपपत्तेर्न व्याप्त्यादिभङ्गनियम इति वाच्यम् । अविरोधेऽप्यनुमित्यविरोधात्, विरोधे तु व्याप्तिभङ्गनियमादिति चेन्न ।

प्रतिरुद्धत्वज्ञानानन्तरं व्याप्त्यादिभङ्गज्ञानमित्यु-

पजीव्यत्वेन व्यभिचारवदस्यापि दोषत्वात् ।

ननु साध्यतदभावयोरिव तद्व्याप्यत्वेनावधारित-योर्विरोधादेकत्र न निश्चयः किन्तु संशयः, निश्चये वा-न्यतरव्याप्तिसंशय इति व्याप्यत्वासिद्धिरिति चेन्न ।

उभयोरेकत्र निश्चयानन्तरमन्यतरव्याप्तिसंशय इत्युपजीव्यत्वेनास्य भिन्नत्वात् । दूषकताबीजन्तु सम-बलविरोधिसामग्रीप्रतिबन्धेन निर्णयाजनकत्वं, न तु व्याप्तिपक्षधर्म्मताविरह एव–सद्धेतावपि सत्प्रतिपक्ष-त्वात् । एकत्र व्याप्तिभङ्गज्ञानद्वारा वास्य दूषकत्वम् । चक्षुरादेश्च नानुमानेन प्रतिरोधः, तदुपस्थितावपि फलदर्शनेन तस्याधिकबलत्वात् ।

(दी०) प्रतिरुद्धत्वेति । प्रतिरोधप्रयोजकविरोधिव्या-प्त्यादीत्यर्थः । उभयोरिति । परस्पराभावव्याप्यत्वं हि हेत्वोर्वि-रोधः, तद्ग्रहे च तयोरेकत्र निर्णयो न विरुध्यते इति भावः । दूषकतेति । विरोधिपरामर्शसत्त्वे नियमेन परामर्शान्तरादनुमि-त्यनुत्पादः तस्यानुमितिविरोधित्वं कल्पयति न तु तेन ज्ञाप्यमा-नस्य व्याप्त्यादिविरहस्य–सद्धेतावपि तस्यानुमितिविरोधित्वादि-त्यर्थः । व्याप्त्यादिविरहज्ञानद्वारा अस्य दूषकत्वमाह एकत्रेति । वाकारोऽनास्थायाम् । प्राथमिकावश्यकानुमितिप्रतिरोधेनैव तथा-त्वात् परमुखनिरीक्षकत्वेन तद्विषयस्याभासत्वायोगाच्चेति । ननु विरोधिपरामर्शो यदि विपरीतनिर्णयविरोधी कथं तर्हि सति विशेषदर्शने नयनादिजन्मा पीतत्वादिभ्रम इत्यत आह चक्षुरा-देश्चेति । चस्त्वर्थः ।

(गा०) मूलेऽज्ञात्मकतयेति । साध्यतदभावयोरेकतरवत्त्वेऽप-रानधिकरणत्वनियमेनेत्यर्थः । व्याप्तीति । एकत्र हेत्वोरन्यतरत्र स्व-

स्वसाध्यनिरूपितव्याप्तिपक्षधर्मताज्ञानयोः अन्यतरभंग आवश्यक इति स एवान्यतरत्वेनोभयत्रावधारितो विशेष्य सन्दिग्धो दोष आस्तां किं प्रकरणसमस्य दोषतयेत्यर्थः । साध्यतदभावयोर्यौ व्याप्तौ तयोरेकधर्मिणि सत्त्वमनुपपन्नम् धर्मिवृत्तौ एकतरव्याप्त्यभावं तदा कल्पयति यदि व्याप्त्यभावं विना तन्नोपपद्येत इत्यवधारितुं शक्यते तदेव नोभयत्र व्याप्तिसत्त्वेपि साध्यतदभावौ यद्यविरुद्धौ स्यातां तदोभयत्र पक्षधर्मता निर्वहतीति प्रतिसन्धानेन तद्विघटनादिति सामान्येपि न व्याप्त्यादिभंगावधारणमिति कथमज्ञायमानस्य दोषतेत्याशंकते तयोरिति । साध्यतदभावयोरविरोधग्रहदशायामनुमित्यप्रतिरोधान्न सत्प्रतिपक्षता अपि तु विरोधावधारणदशायामेव, तथा चोक्तान्यथासिद्धिसंभावनाविरहादनुपपत्त्यवधारणं न दुर्घटमित्याह विरोध इति ।

प्रतिरुद्धत्वस्य कार्यानुत्पादस्यादोषतया प्रतिरुद्धत्वेत्यादि यथाश्रुतमूलासंगतिरतो व्याचष्टे प्रतिरुद्धत्वेतीति ।

एकधर्मिणि विरुद्धयोर्मिथस्साध्यतदाभावव्याप्ययोर्व्याप्यत्वेन ज्ञानं यदि निश्चयरूपं स्यात्तदा परस्परप्रतिबन्धेन नोत्पद्येत एवातो व्याप्त्यंशे पक्षधर्मतांशे संशयरूपमेव तत्, तथा च कारणभूतनिश्चयाभावादेवानुमित्यनुत्पादो न तु सत्प्रतिपक्षभावात् इत्याक्षेपे उभयोरेकत्र निश्चयानन्तरमित्यादिना विरोधिद्वयव्याप्यवत्तानिश्चयस्य व्याप्तिसंशयोपजीव्यत्वाभिधानं न सङ्गच्छते तादृशनिश्चयस्यैवानुपपादितत्वादतो भावमाह परस्परेति । साध्यतदभावव्याप्यत्वं हि हेत्वोस्साध्यतदभावयोरेव विरोधः न तु परस्परं तयोः परस्परं विरुद्धत्वेन ज्ञातयोरेव नैकदा निश्चय इति तदग्रहणे परस्परव्यापकविरुद्धत्वेन ग्रहेपि हेत्वोरेकत्र निश्चयः सम्भवत्येवेत्यर्थः ।

दूषकताबीजमित्यादिग्रन्थस्य दूषकत्वं निग्रहप्रयोजकत्वं दुष्टत्वमिति यावत् इत्येतादृशार्थपर्यालोचनया विरोधिपरामर्शेनानुमित्यजनकत्वं सत्प्रतिपक्षस्थले हेतोर्दुष्टत्वप्रयोजकं न तु निर्णयाजनकत्वमात्रं विरोधिपरामर्शशून्यतादशायामपि कारणविरहेणानुमित्यजनकतया सद्धेतोर्दुष्टतापत्तेः, नापि विरोधिपरामर्शेनाप्यमानो व्याप्तिपक्षधर्मताविरहः सद्धेतौ तदसत्त्वे विरोधिपरामर्शसंवलनदशायामपि तस्य दुष्टतानुपपत्तेः, विरोधिपरामर्शप्रयु-

कव्याप्तिभङ्गज्ञानं भ्रमप्रमासाधारणं वा सद्धेतुसाधारणदुष्टताप्रयोजकमित्यर्थो नित्यदोषतानभ्युपगन्तृमते न सम्भवतीति तमन्यथा व्याचष्टे विरोधीत्यादिना। समानबलसामग्र्या प्रतिबन्धेन निर्णयाजनकत्वमिति मूले सामग्रीपदं विरोधिपरामर्शपरं प्रतिबन्धपदं नियमपरम् विशेषणे तृतीया निर्णयाजनकत्वमनुमित्यनुत्पादः, तथा च विरोधिपरामर्शनियतोऽनुमित्यनुत्पाद इति समुदितार्थः। नियमश्च व्यापकत्वमित्याशयेन विरोधिपरामर्शसत्त्वे नियमेनानुमित्यनुत्पाद इति व्याख्यातम्। तस्य-विरोधिपरामर्शस्य। विरोधित्वं कल्पयतीति। एवं च दूषकतापदं विरोधिपरामर्शनिष्ठप्रतिबन्धकतापरं बीजपदं कल्पकार्थकं बोध्यम्।

मूले न तु व्याप्तिपक्षधर्मताविरह इति। अत्र दूषकताबीजमित्यस्यानुषङ्गेण व्याप्तिपक्षधर्मताविरहो न दूषकताबीजमिति लभ्यते, स चासङ्गतः व्याप्तिपक्षधर्मताविरहस्य विरोधिपरामर्शनिष्ठप्रतिबन्धकताकल्पकत्वरूपदूषकताबीजत्वाप्रसक्तेः, अतो व्याप्तिपक्षधर्मताविरह इत्यनन्तरं विरोधिपरामर्शकालीनानुमित्यनुत्पादकल्प्यप्रतिबन्धकताक इति पूरणीयमित्याशयेन व्याचष्टे न त्विति। व्याप्त्यादिविरहस्य स्वरूपसतो दोषताप्रसक्तेः, अन्यज्ञाप्यमानस्य तथात्वे च विरोधिपरामर्शानुपयोगितया तदसंवलनदशायामपि सत्प्रतिपक्षतापत्तिरतो न त्वित्यनन्तरं तेन ज्ञाप्यमानस्य इति पूरणीयमित्याशयेन व्याचष्टे तेनेति। सद्धेतावपि-व्याप्तिपक्षधर्मताविरहशून्येऽपि, एतादृशमूलप्रतीकानन्तरं पूरयति तस्येति। विरोधिपरामर्शस्येत्यर्थः।

सत्प्रतिपक्षत्वादितिमूलस्य व्याख्या अनुमितिविरोधित्वादिति। दूषकत्वं-विरोधिपरामर्शस्यानुमितिविरोधित्वम्। एतन्मतस्य दुष्यत्वाद्वाकारमनिर्भरसूचकतया व्याचष्टे वाकार इति। अनुमितिविरोधेन-अनुमित्यनुत्पादानुरोधेन। तथात्वात्-साक्षादनुमितिविरोधित्वात्, अन्यथा व्याप्तिभङ्गज्ञानस्योदीच्यतया साक्षादनुमित्यविरोधितया च विरोधिसंवलितपरामर्शात्प्रथममनुमितिजन्यतैवेति भावः। परंपरया व्याप्तिज्ञानविरोधित्वं न हेत्वाभासतायामप्युपयुज्यत इत्याह परेति। प्रथमपक्षे विरोध्यनुमितिसामग्र्या अनुमितिविरोधित्वे प्रत्यक्षप्रतिबन्धकत्वमपि तस्याः स्यात् विरोधिसामग्रीत्वाविशेषादित्याशंक्य चक्षुरादेश्चेत्यादिग्रन्थमवतार्य फलानु-

रोधेन प्रत्यक्षसामग्र्या बलवत्त्वमित्यर्थकतया व्याख्यानमयुक्तं भिन्नविषयेऽनुमितिसामग्र्याः बलत्वादतो एकत्रेत्यादि । पक्ष एव व्याप्तिभङ्गद्वारा व्याप्तिसापेक्षप्रमाण एव दूषकता सम्भवतीति चक्षुरादेरतथाभूततया तत्प्रतिरोधकत्वं विरोधिपरामर्शस्य न स्यादित्याशङ्कया चक्षुरादेश्चेति फक्किकामवतार्य इष्टापत्तिपरतया मिथ्या व्याख्यातवन्तः, तत्र विरोधिपरामर्शस्य लौकिकचाक्षुषाप्रतिबन्धकत्वेऽप्युपनीतभाने जननीये चक्षुरादेरशब्दस्य च प्रतिरोधकतायां कथन्ताया अनिवृत्तेः स्वयं विशिष्टबुद्धौ तदभावव्याप्यताबुद्धेः साक्षात्प्रतिबन्धकतया दूषकत्वे निर्भरस्य वर्णितत्वात् तादृशप्रतिबन्धकतानुपपत्तिशङ्कयैव तादृशमूलमवतारयति नन्विति । विरोधिपरामर्शः तदभावव्याप्यवत्तानिर्णयः, विपरीतज्ञानविरोधी तद्विशिष्टज्ञानविरोधी, विशेषदर्शने पीतत्वाभावव्याप्यशङ्खत्वादिनिश्चयत्वेऽपि चानुमितिप्रतिबन्धकबाधादौ चक्षुरादेश्चेति चकारस्यानुक्तानुमानशब्दसमुच्चायकता न संभवति तस्यानुमानप्रतिरोध्यत्वादित्यत आह चस्त्वर्थ इति ।

नानुमानेन प्रतिरोध इति मूलस्य दोषविशेषाधीनज्ञाने जननीय इति भावः । तदुपस्थितावपीति । विरोधिपरामर्शसत्त्वेपीत्यर्थः । तस्यदोषादिसमवहितचक्षुरादेः, अधिकबलत्वात्–अधिकबलत्वोपगमात् , अप्रतिबध्यफलत्वोपगमादिति यावत् । तथाच दोषविशेषाद्यजन्यत्वं साक्षात्कारित्वव्यञ्जकदोषविशेषजन्यज्ञानसाधारणविषयताविशेषशून्यत्वं वा प्रतिबध्यतावच्छेदककोटौ अधिकफलबलेन निवेशनीयमिति भावः ॥

(चि०) नन्वेवं वादिवाक्यमात्रस्य प्रतिरोधकत्वेनानुमानमात्रोच्छेदः । न च विरोधिवाक्यस्य न्यूनबलत्वे लक्षणायोगः, समानबलत्वे प्रतिरोध एव, अधिकबलत्वे नरशिरःशौचानुमानवत्तेन बाध एवेति वाच्यम् । अगृह्यमाणविशेषदशायां प्रतिवादिवाक्येन सर्वानुमानप्रतिरोधापत्तेः । अनुमानात् पूर्वं पश्चाद्वाऽनुमानान्तरेण तस्य न्यूनाधिकबलत्वानिरूपणात्, निरू-

पणे वाऽनुमानवैयर्थ्यापत्तेः ।

मैवम् । विरोधिवाक्यमात्रस्य समबलत्वाभावात् । उक्तं हि–'व्याप्तिपक्षधर्म्मते बलमि'ति । प्रत्यक्षादेर्लिङ्गभावेनैवानुमानप्रतिरोधः–कथायां तदुपन्यासानर्हत्वात् ।

यत्तु विरोधिव्याप्यद्वयस्यासाधारणत्वात् संशयजनकत्वं दूषकताबीजमिति । तन्न । एकैकं हि सत्प्रतिपक्षं न तु विशिष्टम्, तादृशञ्च न संशायकमिति ।

अनुमितिप्रामाण्यग्राहकाप्रवृत्तिर्दूषकताबीजमित्यन्ये । तन्न । परस्परप्रतिबन्धेनानुमितेरेवानुत्पत्तेः ।

(दी०) अथ व्याप्तिपक्षधर्म्मते यदि बलं कथं तर्हि प्रत्यक्षादेः प्रतिरोधकतया कथायामुपन्यास इत्यत आह प्रत्यक्षादेरिति ।

अत्र हेतुमाह कथायामिति । प्रत्यक्षस्य स्वरूपसत्तयैव विरोधकत्वात् विरोधिवाक्यमात्रस्यानुमित्यविरोधित्वात् बोध्याभावव्याप्यवत्तानिर्णयेनैव शब्दादिबोधप्रतिरोधाच्चेति ।

(गा०) एवं–विरोधिज्ञानसामग्र्या निश्चयविरोधित्वे । यद्यपि विरोधिपरामर्शस्य तदभावव्याप्यवत्ताज्ञानविधयैव शिरोमणिमते प्रतिबन्धकत्वं तन्मते मूलस्थसामग्रीपदेनापि साध्याभावव्याप्यवत्तापरामर्शस्य विवक्षणीयत्वात्, तथापि सामग्रीपदस्य यथाश्रुतार्थपरत्वाभिमानेनेयमाशङ्का । वादिवाक्यमात्रस्येति । अत्र मात्रपदेन साध्याभा बोधकानुमानापेक्षाव्यवच्छेदः । प्रतिरोधकत्वेन·प्रतिरोधकत्वप्रसङ्गेन, अनुमानमात्रव्यवच्छेदः–परार्थानुमानमात्रव्यवच्छेदः । न्यूनबलत्वे–अनाप्तोक्ततया निश्चितत्वे, लक्षणायोगः–प्रतिरोधप्रयोजकसमानबलत्वायोगः, समानबलत्वे–ऽनाप्तोक्ततया निश्चितत्वे । प्रतिरोध इष्ट एवेति शेषः । अधिकबलत्वे–आप्तोक्ततया निश्चितत्वे, शौचानुमानवत–शौचानुमानस्येव,–तेन–विरोधिबोधकशब्देन, बाधो–विरोधिनिश्चयजननम् । परार्थस्थले मध्यस्थस्य पक्षे साध्यमिव सा-

ध्यतदभावग्राहकमानयोराभासत्वं सन्दिग्धं न तु कुत्राप्यनाभासत्वमाभासत्वं वा निश्चितं प्रमाणान्तरेण तन्निश्चये साध्यस्यापि प्रमाणान्तरेण निश्चयसम्भवाद्विवादापर्यवसानापत्तेरिति समानबलतया प्रतिवादिशब्दः प्रतिरुन्ध्यादेवानुमानमित्याह गृह्यमाणेति ।

दीधितौ तर्हीति । तर्हि कथं प्रतिरोधकतया कथायां प्रत्यक्षादेरुपन्यास इत्यन्वयः । अनुमान एव तादृशबलसत्त्वादिति भावः ।

मूले प्रतिरोधः-प्रतिरोधकतया कथायां प्रत्यक्षादेरुपन्यासः ।

दीधितावत्रेति । व्याप्तिपक्षधर्मताभ्यां ज्ञायमानत्वरूपलिङ्गभानमपुरस्कृत्य प्रत्यक्षशब्दयोः प्रतिरोधकतया अनुपन्यसनीयत्व इत्यर्थः ।

मूले तदुपन्यासानर्हत्वात्-लिङ्गभावानापन्नप्रमाणस्यानुपयुक्तोपन्यासकत्वादिति भावः ।

हेतुपूरणेन तदुपन्यासानुपयोगित्वं व्यवस्थापयति दीधितौ प्रत्यक्षस्येति । स्वरूपसत एव-स्वज्ञानमनपेक्ष्यैव । विरोधिकत्वादिति । तथाचोपन्यासस्य परज्ञानमेव फलं प्रत्यक्षप्रमाणस्य च यदि ज्ञानमेवानुपयुक्तं तदा क उपन्यासोपयोग इति भावः । ननु प्रत्यक्षस्य ज्ञानानपेक्षस्य बोधकतया तदुपन्यासस्य विरोधिज्ञानसामग्र्यसंपादकत्वेपि आदिपदग्राह्यशब्दस्य ज्ञातस्यैव बोधकतया तदुपन्यासस्य विरोधिज्ञानसामग्रीसंपादकतया उपयोगित्वं दुर्वारमेवत्यत आह विरोधिवाक्यमात्रस्येति । विरोधिवाक्यज्ञानमात्रस्येत्यर्थः । मात्रपदेन कारणान्तर (साहित्य) व्यवच्छेदः । अविरोधित्वादिति । तन्मात्रस्य विरोधिबोधसामग्रीत्वविरहादिति भावः । तथापि कारणान्तरसहितज्ञानस्यैव प्रतिरोधोपयोगितया तदुद्भावनसार्थक्यमित्यत आह बोध्येति । तथा च व्याप्यवत्तापरामर्शदशायां विरोधिवाक्यज्ञानादिसत्त्वेपि तदभावव्याप्यवत्तानिश्चयाभावघटितसामग्र्याः कथंचिदप्यसम्भवात् लिङ्गभावानापन्नशब्दप्रमाणोपन्यासो न विरोधिज्ञानसामग्रीं सम्पादयतीति न, कश्चिदुपयोग इति भावः । इदमुपलक्षणम् । पक्षे साध्यं नास्तीति वाक्यस्यानुपूर्वीविशेषप्रकारेण ज्ञानं पक्षे साध्याभाववत्त्वावगाहिविरोधिबोधसामग्रीघटकं, तादृशश्च ज्ञानं प्रत्यक्षात्मकं तादृशवाक्यप्रयोगादेव सम्पद्यते न तु साध्याभावप्रमापकशब्दाविषयः पक्ष इत्याद्याकारकतदुपन्यासादिति

न कथंचिदपि तादृशोपन्यासस्य प्रतिरोधकतेत्यपि बोध्यम् ।

मूले एकैकमिति । प्रत्येकहेतुवृत्तितत्तल्लिङ्गतावच्छेदकावच्छिन्नं, सत्प्रतिपक्षं-सत्प्रतिपक्षतया दुष्टव्यवहारविषयः, न तु विशिष्ट-हेतुप्रतिहेतुसाधारणरूपावच्छिन्नम्, तादृशं च न संशायकमिति । संशायकतया दुष्टबीजत्वे तादृशादुष्टव्यवहारानुपपत्तिरित्यर्थः ॥

(चि०) रत्नकोषकारस्तु-सत्प्रतिपक्षाभ्यां प्रत्येकं स्वसाध्यानुमितिः संशयरूपा जन्यते, विरुद्धोभयज्ञानसामग्र्याः संशयजनकत्वात्, संशयद्वारा ऽस्य दूषकत्वम् । न च संशयरूपा नानुमितिः बाधस्येव विरोध्युपस्थितेरनुमितिसामग्रीविघटकत्वेनाऽवधारणात्, अन्यथा बाधेऽप्यनुमित्यापत्तेरिति वाच्यम् । अधिकबलतया बाधेन प्रतिबन्धात् तुल्यबलादनुमितिः स्यादेव, सामग्रीसत्त्वात् । साध्याभावबोधस्य च तत्र प्रतिबन्धकत्वं न तु तद्बोधकस्य नयनादेः । प्रत्येकं निर्णायकत्वेनावधारितात् कथं संशय इति चेन्न । प्रत्येकाद्धि ज्ञानमुत्पद्यमानमर्थात् संशयो न तु प्रत्येकं संशयजनकत्वमिति-मेने ।

तन्न । साध्यतदभावयोर्विरोधेन यथैकज्ञानस्यापरधीप्रतिबन्धकत्वं तथा साध्याभावव्याप्यवत्त्वस्यापि साध्यविरोधित्वात्तद्बुद्धेरपि साध्यधीप्रतिबन्धकत्वात् विरोधिज्ञानत्वस्य प्रतिबन्धकत्वे तन्त्रत्वात् ॥

(दी०) रत्नकोषकृतामभिप्रायः-एकधर्मिकाविरुद्धानेकप्रकारकनानाधर्मिकविरुद्धाविरुद्धनानाप्रकारकज्ञानत्वादिवदेकधर्मिकविरुद्धानेकप्रकारकज्ञानत्वरूपं संशयत्वं न जन्यतावच्छेदकम्, तत्तद्धर्मिकतत्तत्प्रकारकज्ञानत्वप्रयोजकसमाजप्रयोज्यत्वात् समाजस्य । क्वचिद्विरोधभानस्यापि तत्प्रयोजकाधीनत्वात् । नी-

लेतरघटत्वपटत्वाप्रकारज्ञानत्वैकधर्मिकाविरुद्धानेकप्रकारकान्यज्ञानत्वादिवच्च संशयान्यज्ञानत्वादिरूपं निश्चयत्वमपि न जन्यतावच्छेदकम्, तत्त्वप्रयोजकविरहादेव तत्त्वविरहाद्युपपत्तेः । एवञ्च तुल्यबलाभ्यां विरुद्धोभयसामग्रीभ्यां जायमानं ज्ञानमर्थात् संशयरूपं भवति । अत एवाहत्यैव विप्रतिपत्तिजन्मानं संशयमामनन्ति । फलबलकल्पनीयश्च न्यूनाधिकप्रबलभावः । सत्यामपि पीतत्वशुक्लत्वस्मृतौ सविधवर्त्तिनि शङ्खे सति दोषविशेषे पीतत्वस्यैवासति च शुक्लत्वस्यैव दूरस्थे च धर्मिणि असति विशेषदर्शने स्मृतयोरेव कोट्योः सति च एकस्या एव नयनेन ग्रहात् । अथैवमुद्बुद्धाभ्यां विरोधिसंस्काराभ्यां स्मरणमपि संशयात्मकं स्यात्, किं न स्याद्यदि च नानुभवबाधः येन गुरुणापि निश्चयत्वेन संस्कारजनकत्वमुपेयते भवता ।

अथ विरोधिनो निर्णयोऽनुमितिप्रतिबन्धको विरोधित्वञ्च सहानवस्थायित्वं साध्यभावस्येव तद्व्याप्यस्यापीति चेत् । यदि वस्तुतो विरोधिनो निर्णयस्तथा, कथं तर्हि पक्षतावच्छेदकादेस्तादृशस्य निश्चये भ्रमानुमितिः । अथ विरोधित्वेन, तदा तदग्रहे नेह साध्यमित्यादिनिर्णयेऽप्यनुमितिप्रसङ्गः ।

अथ विशेषदर्शनं विरोधिबुद्धिप्रतिबन्धकं कथमन्यथा तदनन्तरं न भ्रमसंशयाविति चेन्न । सत्यपि शुक्लत्वादिव्याप्यदर्शने शङ्खादौ दुष्टेन नयनेन पीतत्वादेरदुष्टेन च पीतत्वादिव्याप्यवत्तानिश्चये सत्यपि शुक्लत्वादेर्ग्रहात्, सति च विशेषदर्शने क्वचिदुपनीतभानानुदयाद्दूरतः प्रमितस्य स्थाणुत्वादेः शाखादौ करादिभ्रमे णाग्रहात् तत्तत्स्थलविशेष एव तस्य प्रतिबन्धकत्वमिति ।

(गा०) विरोधिभानसामग्र्याः संशयविरोधित्वे संशयमात्रोच्छेदप्रसङ्ग इति प्रकरणसमो विरोधिभानसामग्रीविषया संशयरूपामनुमितिं

मा प्रतिरौत्सीत् विरोधिविषयत्वेन तु बाधतदभावव्याप्यवत्तानिश्चयस्य प्रतिबन्धकत्वं दुर्वारमिति शङ्कते मूले न च संशयरूपा नानुमितिरित्यादिना। बाधबुद्धेर्विरोधिविषयत्वमात्रं न प्रतिबन्धकत्वे तन्त्रं किन्तु निश्चयप्रामाण्यकत्वे सति विरोधिविषयत्वं, सत्प्रतिपक्षस्थले चोभयव्याप्यवत्ताज्ञानयोरेव प्रामाण्यानिश्चयान्नानुमितिप्रतिरोध इति समाधत्ते अधिकबलत्वेति। ननु प्रत्यक्षे समानबलग्राह्याभावसामग्री संशयानुपपत्त्याऽविरोधिन्यास्तामनुमितौ तस्याः प्रतिबन्धकत्वे का क्षतिरित्यत आह साध्याभावबोधस्येति। साध्याभावनिश्चयस्यैवेत्यर्थः। तत्रा-ऽनुमितौ। नयनादेरित्यादिना विरोधिपरामर्शपरिग्रहः। नयनग्रहणं दृष्टान्तार्थम, मानाभावादिति पूरणीयम्। प्रत्येकमिति। एकैककोटिनिश्चयजनकत्वेन अवधारितात्परामर्शादित्यर्थः। कथं संशय इति। संशयत्वावच्छिन्नं प्रति परामर्शस्य हेतुतायाः काप्यक्लृप्तत्वादिति भावः। संशयत्वस्य जन्यतानवच्छेदकत्वेपि तत्तत्प्रकारकज्ञानत्वावच्छिन्नोत्पत्तिनियामकसामग्रीत एव सर्वत्र संशयः प्रत्येककोटिभानसामग्र्याः संशयत्वावच्छिन्नजनकत्वं तु प्रत्यक्षस्थलेपि नास्तीत्याह प्रत्यकाद्धीत्यादि। तथाच तत्तत्साध्यकानुमितित्वस्य निश्चयसाधारणस्य तत्तत्साध्यव्याप्यवत्तापरामर्शजन्यतावच्छेदकत्वेपि तद्घटितसामग्रीसमाजात्संशयानुमित्युत्पत्तिर्निष्प्रत्यूहैवेति भावः।

अगृहीताप्रामाण्यकत्वे सति विरोधिविषयकत्वमेव बाधप्रतिबन्धत्वे प्रयोजकं न तु निश्चितप्रामाण्यकत्वसहितमित्याशयेन दूषयति तन्नेति।

रत्नकोशकारमतं दीधितिकारः परिष्कर्तुमारभते रत्नकोशकृतामित्यादिना। संशयत्वं यदि यत्किञ्चिज्जन्यतावच्छेदकं तर्हि तद्घटितसामग्रीत एव संशयत्वावच्छिन्नोत्पत्तिरिति नियमेऽनुमितेः संशयत्वं न सम्भवति अनुमितिसामग्रीघटकस्य परामर्शादेः कस्यापि संशयाजनकत्वात्, अतः संशयत्वस्य जन्यतावच्छेदकत्वाभावं मूलकारोक्तं प्रतिबन्दिसूचनेन द्रढयति एकधर्मिकेति। अविरुद्धानेकप्रकारकेत्यस्य द्वन्द्वात्परश्रूयमाणेन ज्ञानत्वेन सम्बन्धः। प्रकारांशे संशयत्वघटकविरुद्धत्वविपरीतविशेषणघटितधर्मस्य जन्यतावच्छेदकत्वप्रसक्तिं प्रदर्श्य धर्म्यंशे तद्घटकैकत्वविपरीतविशेषणघटितस्य

प्रकारांशे विशेषणानैकत्वाविरुद्धैकत्वविरुद्धाविरुद्धनानात्वभेदेन भिन्नस्य धर्मद्वयस्य तथात्वापत्तिमपि सूचयति नानाधर्मिकेति । एकत्वस्य प्रकारांशे विरुद्धत्वाविरुद्धत्वयोः नानापदार्थे प्रत्येकमन्वयः । न जन्यतावच्छेदकंकस्यापीति शेषः । न चैवं क्वचिज्ज्ञाने संशयत्वं क्वचिन्नेत्यत्र किं नियामकमित्यत आह तत्तद्धर्मिकेति । पर्वतादिधर्मिकेत्यर्थः । तत्तत्प्रकारेति । वन्हित्वन्ह्यभावप्रकारकेत्यर्थः । प्रयोजकसमाजेति । तदवच्छिन्नोत्पत्तिनियामकसामग्रीसंवलनेत्यर्थः । समाजस्य—पर्वतादिधर्मिकवन्ह्यादिप्रकारकत्वतद्धर्मिकवन्ह्यभावादिप्रकारत्वयोर्वैशिष्ट्यस्य, तथा चैकमात्रकोटिभानप्रयोजकसामग्रीदशायां यज्ज्ञानं जायते तत्र तत्कोटिप्रकारकत्वे विरुद्धकोट्यन्तरप्रकारकत्ववैशिष्ट्यप्रयोजकस्य तत्कोटिप्रकारकप्रयोजकसामग्र्यां कोट्यन्तरप्रकारकत्वप्रयोजकसामग्रीवैशिष्ट्यस्य विरहाद्विरुद्धकोट्यन्तरप्रकारकत्वविशिष्टतत्कोटिप्रकारकज्ञानत्वरूपसंशयत्वविरहः । कोटिद्वयभानसामग्र्युत्तरं च यज्ज्ञानं जायते तत्र तादृशवैशिष्ट्यप्रयोजकसत्वेन तादृशसंशयत्वसत्त्वमिति संशयत्वस्य जन्यतानवच्छेदकत्वेपि तन्नियमनिर्वाह इति भावः ।

ननु कोटिद्वयावगाहिज्ञानत्वमात्रं न संशयत्वं कोटिद्वयसमुच्चयसाधारणत्वात् , किन्तु एककोट्यंशेऽपरकोटिविरोधावगाहित्वसहितं, तादृशस्य कोटिद्वयभानप्रयोजकसंवलनमात्रं न नियामकं तत्सत्त्वेऽपि समुच्चये संशयत्वाभावादिति संशये प्रयोजकमन्यदेव किञ्चिदुपगन्तव्यम् , यतः क्वचिदेवोभयावगाहिज्ञाने संशयत्वमिति नियम इति तस्यैव कार्यतावच्छेदकं संशयत्वमावश्यकमित्यत आह क्वचिदिति । उभयप्रकारक इति शेषः । तथा च विरोधिभानस्यासमप्रकोटिद्वयप्रकारकज्ञानवृत्तितया इत्यर्थः । तत्प्रयोजकाधीनत्वादिति । अव्याप्यवृत्तित्वज्ञानाभावादिघटितविरोधभानप्रयोजककक्लृप्तसामग्र्यन्तरस्य क्वाचित्कत्वप्रयोजकत्वादित्यर्थः । तथाच तत्संवलनस्यापि विरोधभानघटितसंशयत्वप्रयोजकतया समुच्चयस्थले तद्विरहादेव संशयत्वविरह इति भावः । उक्तयुक्तिभिः संशयत्वस्य कार्यतावच्छेदकत्वखण्डनं वस्तुगतिमनुरुध्य । वस्तुतः संशयत्वस्य कार्यतावच्छेदकत्वे तस्य धर्मितावच्छेदकप्रकारकज्ञानजन्यतावच्छेदकप्रकारकज्ञानजन्यतावच्छेदकताया एव स्वीकरणीयतया प्रत्यक्ष-

स्थले यथा तदभावप्रकारकज्ञानसामग्रीद्वयसहितधर्मिज्ञानरूपा सामग्री संशयं जनयति तथा ऽनुमितिस्थलेपि तादृशधर्मिज्ञानात्मकसामग्र्या संशयजनने न किञ्चिद्बाधकम् ।

ननु माभूत्संशयत्वं तज्जन्यतावच्छेदकं तथापि निश्चयत्वावच्छिन्नहेतुभूतात्परामर्शादितः कथं संशयानुमितिरित्याशङ्कायां निश्चयत्वस्यापि जन्यतावच्छेदकत्वं निराकरोति नीलेतरेति । यथा घटे नीलरूपवद्भेदात्मकनीलेतरत्वप्रयोजको घटे नीलोत्पादकसामग्रीविरहः, घटत्वप्रयोजकं च घटत्वावच्छिन्नहेतुदण्डादिघटितसामग्रीजन्यत्वं, तत्संवलनाधीनं नीलेतरत्वघटत्वयोः संवलनमिति तदेव नीलेतरत्वविशिष्टघटत्वनियामकमिति तस्य किञ्चिज्जन्यतानवच्छेदकत्वेपि कस्यचिदेव घटत्वस्य तथात्वमिति नियमः, एवं पटादिज्ञाने घटत्वप्रकारताविरहः तत्पूर्वकालीनघटत्वप्रकारकत्वावच्छिन्नजनकघटत्वज्ञानादिघटितसमग्रीरूपतथात्वप्रयोजकाविरहप्रयोज्य इति ज्ञानत्वप्रयोजिका तत्पूर्वकालीनसामान्यसामग्री घटत्वप्रकारकत्वावच्छिन्नोत्पादकसामग्रीविरहश्च द्वयोः संवलनमेव घटत्वाप्रकारकत्वज्ञानत्वयोः संवलनप्रयोजकं तदेव जन्यतानवच्छेदकस्यापि एकविशिष्टापरस्य प्रयोजकम्, एवमेकधर्मिकाविरुद्धानेकप्रकारकत्वं संवलितनानासामग्रीप्रयोज्यं तद्विरहप्रयोज्यः तद्विरहः तत्संवलितज्ञानत्वप्रयोजकप्रयोज्यं तद्विशिष्टज्ञानत्वमिति यथा तस्य जन्यतानवच्छेदकत्वेपि नानियमस्तथा निरुक्तनिश्चयत्वस्यापीत्यर्थः । यद्यपि तत्प्रयोजकसमाजनियम्यस्य जन्यतानवच्छेदकतायामेकधर्मिकाविरुद्धनानाप्रकारकज्ञानत्वादिकमेव पूर्वं दृष्टान्तीकृतम्, तथापि तत्र सामग्रीरूपप्रयोजकसमाजनियम्यत्वमेव न तु सामग्रीसमाजानियम्यत्वं निश्चयत्वे च तादृशमेवेति प्रकृतसाम्याय दृष्टान्तान्तरानुसरणम् । तत्र प्रथमे तज्जनकसामग्र्यभावसंवलनस्य तद्वदन्यत्वविशिष्टप्रयोजकता, द्वितीये तदवच्छिन्नजनकसामग्रीविरहसंवलनस्य, तृतीये तद्घटकनानाधर्मावच्छिन्नहेतुभूतसामग्रीसंवलनविरहसंवलनस्येति उत्तरोत्तरं निश्चयत्वसाम्यौत्कर्ष्यमिति बोध्यम् ।

एवं चेति । संशयत्वनिश्चयत्वयोर्जन्यतानवच्छेदकत्वे चेत्यर्थः तुल्यबलाभ्यां–परस्परकार्याविरोधिनीभ्याम् । संशयरूपं भवतीति

तथाच समबलसत्प्रतिपक्षसंवलनस्थले तुल्यबलकोटिद्वयानुमितिसामग्रीभ्यां संशयानुमितिर्जन्यत एवेति भावः ।

अथ कल्पविरोधभासकविरोधावगाहिपरामर्शघटितसामग्र्यभावाद्विरोधो न भासितुमर्हति तथाच कथं संशय इति चेन्न । सत्प्रतिपक्षतादशायां कोटिद्वयनिश्चयानुत्पादस्योभयवादिसिद्धतया तन्निर्वाहाय परस्परजन्यकार्ये विरोध्यनुमितिसामग्र्योः प्रतिबन्धकताकल्पनापेक्षया विरोधभानप्रतिबन्धकाभावसहकारेण विरोधाविषयकस्यापि परामर्शस्य विरोधभानप्रयोजकतया लाघवेन कल्पनादनुपस्थितस्य विरोधस्य प्रकारतया भानासम्भवेऽपि विरोधसम्बन्धेन एककोट्यंशेऽपरकोटेः प्रकारतया एककोटिसम्बन्धानिष्ठसंसर्गतायां कोट्यन्तरविरोधस्यावच्छेदकतया भानोपगमात्, अन्यथा यत्र कोट्योः नाविरोधग्रहः न वा विरोधस्योपस्थितिर्वर्तते तत्र सामग्रीसमाजात् प्रत्यक्षात्मककोटिद्वयनिश्चयस्य दुर्वारत्वापातात् ।

अथ यत्र कोट्योर्नाविरोधग्रहः अथ च धर्मिणि विरोधसम्बन्धेनैककोटिविशिष्टापरकोटेः विरोधाविशिष्टसंयोगसम्बन्धेन च कोट्योर्वा बाधग्रहः तत्र कथञ्चिदपि विरोधभानासम्भवेन एकदा प्रतियोगितदभावयोः निश्चयरूपानुमितिर्जायतामिति चेत्, प्रत्यक्षस्थलेऽप्येष नियोगस्तुल्यः ।

अथ धर्मिणि संशयान्यतद्वत्ताज्ञानं प्रति अव्याप्यवृत्तित्वज्ञानाभावविशिष्टतद्विरोधिधर्मवत्ताज्ञानसामग्री प्रतिबन्धिकेति नोपदर्शितस्थले परस्परविरोधेन तत्तदभावयोः प्रत्यक्षनिश्चयेऽपि प्रत्यक्षानुमित्यादिसामग्रीणां चानुगतरूपेण प्रतिबन्धकताकल्पनासम्भवात्, अनुमितिस्थले विरोध्यनुमितिसामग्र्याः प्रतिबन्धकत्वे कल्पनीये संशयान्यत्वं न प्रतिबध्यतावच्छेदकगर्भे निवेश्यत इति क्व संशयानुमितिवार्तेति ।

अत्रार्वाचीनाः । संशयत्वं न विरोधावगाहितानियतं, तथाहि-यथा लौकिकसन्निकर्षजन्यं साक्षात्करोमीति प्रतीतिविषयताविशेषः अनुमिनोमि आपादयामीति प्रतीतेश्चानुमित्यापत्त्योस्साध्यापाद्ययोर्विषयताविशेषो दुरपह्नवः तथा सन्दिह्मीत्यनुव्यवसायबलात् संशयेऽपि कोट्यंशे विलक्षणविषयता निष्प्रत्यूहैवाते तत्प्रतियोगित्वमेव संशयत्वं तस्या विरोध्यानवगाहिज्ञानसाधारण्ये न किञ्चिद्बाधकम् ।

न च तादृशप्रतीतेर्विरोधावगाहिसमानधर्मिकतत्तदभावावगाहिज्ञानत्वावलम्बनतयैवोपपत्तेर्विषयताविशेषे किं मानमिति वाच्यम्। क्वचित्संशये विरोधस्य सांसर्गिकविषयताया प्रमाणान्तरहितायाः उक्तातिप्रसङ्गवारणाय सामग्रीप्रतिबन्धकतायाश्च कल्पनामपेक्ष्य लाघवेन कोटिताख्यविलक्षणविषयताया एव कल्पयितुं शक्यत्वात्, सा च प्रकारताप्रभेदः तदन्यैव वा कोटिविशेष्यकसंशयसाधारण्यानुरोधात्। न च तादृशविषयतानिष्ठवैलक्षण्यं दुर्घटमखण्डोपाधेरपसिद्धान्तकवलितत्वादिति वाच्यम्। एवंसति विषयतात्वप्रकारतात्वादीनामपि विलयप्रसङ्गेन बहुतरासामञ्जस्यात्। अस्तु वा विरोधिकोट्यन्तरविषयकत्वेन ज्ञाननिरूपितत्वमेव समुच्चयविषयव्यावृत्तस्तद्विशेषः संशय एव तत्कोटिविषयकत्वयोर्मिथो अवच्छेद्यावच्छेदकभावोपगमात्। तादृशविषयताशालिबुद्धौ च मणिमन्त्रादिन्यायेन काद्यंशेऽव्याप्यवृत्तित्वज्ञानं प्रतिबन्धकमास्थीयते, नातः समुच्चयदशायां संशयापत्तिः, एवं कोट्यंशे औत्कट्यरूपं सम्भवनात्वमपि विशेषताविशेष एवेति ध्येयम्।

न चैवमर्थसमाजरूपबाधकेन संशयत्वस्य कार्यतानवच्छेदकत्वव्यवस्थापनं दीधितिकृतो विरुध्येत सामग्रीद्वयसमाजस्य तत्तत्सामग्रीप्रयोज्यकार्यतावच्छेदकद्वयसामानाधिकरण्यमात्रप्रयोजकत्वात्, कार्यतावच्छेदकविषयितयोरवच्छेद्यावच्छेदकभावादिप्रयोजकत्वासम्भवेन तत्समाजादवच्छेद्यावच्छेदकभावापन्नविषयिताविशेषरूपसंशयत्वानिर्वाहात्, तादृशविषयताविशेषस्य समुच्चयसाधारण्यविरहेण विरोधानवगाहिज्ञानसाधारण्येन च कोटिद्वयभानसामग्रीसंवलनस्य विरोधभासकसामग्रीमनपेक्ष्यापेक्ष्य वा तत्प्रयोजकत्वस्यासम्भवदुक्तिकत्वाच्चेति वाच्यम्। विरोधावगाहित्वसहितकोटिद्वयावगाहित्वं संशयत्वमिति प्राचीनसिद्धान्तमवलम्ब्यापाततस्तज्जन्यतानवच्छेदकत्वाभिधानात्।

अथैवमपि संशयानुमितिव्यवस्थापनमशक्यं विषयताविशेषरूपसंशयत्वे परामर्शादिघटितानुमितिसामग्र्याः प्रयोजकत्वकल्पकाभावादिति चेन्न। विरोधज्ञानमनपेक्ष्य सामग्रीसमाजादेकदा एकधर्मिणि तत्तदभावोभयानिश्चयानुमित्यनुदयात्संशयानुमितिसिद्धौ अव्याप्यवृत्तित्वादिज्ञानाभावसमवहितयोः प्रत्यक्षसामग्र्योरिवानुमि-

तिसामग्र्योरपि संशयत्वावच्छिन्नोत्पत्तिप्रयोजकताया अवर्जनीयत्वात् । न च संशयत्वाघटकीभूता या निश्चयीयविषयता तस्याः संशयव्यावृत्तये संशयसामग्र्याः तदवच्छिन्नं प्रति प्रतिबन्धकत्वं कल्पनीयम्, संशयसामग्रीत्वं च प्रत्यक्षानुमितिसामग्रीसाधारणं नैकमिति अव्याप्यवृत्तित्वज्ञानाभावविशिष्टविरोधिकोट्यनुमितिसामग्र्याः प्रतिबन्धकत्वे कल्पनीये अनुमितित्वस्यैव तत्प्रतिबध्यतावच्छेदकत्वमुपेयते लाघवान्न तु निश्चयत्वस्यैवेति न संशयानुमितिसम्भव इति वाच्यम् । प्रत्यक्षसंशयस्य तादृशविषयताशालित्ववारणाय तदवच्छिन्नं प्रति संशयोपधायकताविशिष्टत्वेनैव सामग्र्याः प्रतिबन्धकताकल्पनात्तद्रूपस्य च संशयानुमितिसामग्रीसाधारणतया तत्र प्रतिबन्धकतान्तराकल्पनादिति वदन्ति ।

अतएव-तुल्यबलसामग्रीसमाजात्प्रत्यक्षस्येव परोक्षस्यापि संशयस्योत्पत्तौ बाधकाभावादेव । आहत्यैव-साक्षादेव, विप्रतिपत्तिवाक्यतो जन्म यस्य एवंभूतं शाब्दबोधात्मकं संशयमपि वदन्तीत्यर्थः ।

ननु समानबलत्वं न्यूनाधिकबलत्वं वा सामग्र्याः कथमवधारणीयमित्यत आह फलबलकल्पनीयश्चेति । सामग्रीसंवलनस्थले एकस्याः फलानुत्पत्त्या न्यूनाधिकबलभावः उभयोः फलोत्पत्त्या समबलभावोऽवधारणीय इत्यर्थः । एतदेव विशिष्यावधारयति सत्यामपीति । पीतत्वशुक्लत्वस्मृतावपीति सन्निधवर्तिनि शंखे इत्याभ्यां विशेषणज्ञानविशेष्येन्द्रियसन्निकर्षघटिततदुभयत्वविशिष्टप्रत्यक्षसामग्रीसत्त्वं दर्शितं दोषविशेषे पीतद्रव्यसमवधानरूपे पीतत्वस्यैव ग्रहणादित्यग्रिमेणान्वयः । तथाच फलबलात् इत्यादिलौकिकप्रत्यक्षसामग्रीतो दोषविशेषोपबृंहितपीतत्वशुक्लत्वाभावादिग्राहकसामग्र्या बलवत्त्वमिति भावः । दोषविशेषासत्त्वे उपनीतभानसामग्र्यपेक्षया लौकिकसंनिकर्षघटितविरोधिग्रहसामग्र्या बलवत्त्वमित्याह असति च शुक्लत्वस्यैवेति । दोषविशेषासमवधानस्थले उपनयघटितसामग्रीद्वयस्य तुल्यबलत्वमाह दूरस्थ इति । धर्मिणो दूरस्थत्वेऽसति च विशेषदर्शने विद्यमानकोटेरपि न लौकिकसामग्री दूरत्वदोषस्य विशेषादर्शनसहितस्य लौकिकधीविरोधित्वादिति लौकिकसामग्रीविघटनाय दूरस्थत्वविशेषादर्शनयोरनुधावनम् । स्मृतयोरित्युपनयसंपादनाय । कोट्योः-स्थाणुत्वतदभावयोः । विशेषदर्शनघटितसा-

मग्र्या बलवत्त्वमाह सति चेति । सति च विशेषदर्शने, एकस्याः गृहीतविशेषायाः, कोटेरेव नयनेन ग्रहणात् । अत्र प्रकृताविपरीतविशेषदर्शनस्यैव प्रतिबन्धकत्वं न तु सामग्र्या इत्यवधेयम् ।

ननु कोटिद्वयभासकसामग्रीसमाजादेव चेत्संशयः तदा संस्कारं प्रति निर्णयत्वेन हेतुतयापि न संशयाकारस्मरणवारणसम्भवः प्रत्येकतत्तदभावगोचरनिश्चयजन्यसंस्कारद्वयसंवलनात्तदुत्पत्तौ बाधकाभावादित्याशङ्कते अथैवमिति । उद्बुद्धाभ्यामिति । न चोद्बोधकस्य फलैकोन्नेयतया एकदा विरुद्धकोटिद्वयोद्बोधकाकल्पनान्नापत्तिरिति वाच्यम् । नियतोद्बोधकसम्बन्धिवस्तुविशेषज्ञानादीनामनुगतरूपेणैव कारणतायाः क्लृप्तत्वात्तादृशोद्बोधकद्वयसमवधानदोषाद्यत्रतत्रैवापत्तिसम्भवात् । अनुभवविरोधविरहे इष्टापत्तिमाह किं न स्यादिति । अनुभवविरोधस्य सविवादतया यदीति । येन-अनुभवविरोधेन । भवतेत्यनेन परस्परसामग्रीप्रतिबन्धकताकल्पनमन्तरेण तावतापि संशयाकारस्मरणवारणं न सम्भवतीति सूचितम् ।

बाधबुद्धेरत्यन्तान्योन्याभाववत्ताधीसाधारणविरोधिप्रकारकत्वेनैव प्रतिबन्धकता तथात्वं च विरोधिपरामर्शस्यापीति मूलोक्तसिद्धान्तं दूषयितुमाशङ्कते अथेति । विरोधित्वं-तदभावव्याप्यत्वं स्वव्यापकतदभावकत्वरूपं स्वत्वघटितत्वेन न सर्वसाधारणमित्यत आह सहानवस्थायित्वमिति । विरोधस्य विषये उपलक्षणत्वं विशेषणत्वं वेति वितर्क्य दूषयति यदीत्यादिना । तथा-प्रतिबन्धः । पक्षतावच्छेदकादेरिति । इदन्त्वाद्यवच्छिन्नह्रदादिरूपपक्षविशेषणस्य हेतुत्वेनाभिमतस्य वा तादृशस्य वस्तुगत्या वन्ह्यादिविरोधिनो निर्णये भ्रमानुमितिनिर्णयाधीना भ्रमानुमितिर्भवतीत्यर्थः । तत्र जनकज्ञानस्यैवोक्तप्रतिबन्धकतावच्छेदकाक्रान्तत्वादिति भावः । यद्यपि जलमयत्वादेर्विरोधानवगाहिज्ञानदशायां तदनवच्छिन्नपक्षावगाहिन्यास्तदलिङ्गिकायाश्चायं वह्निमानित्याद्यनुमितेरपि पक्षतावच्छेदकावच्छिन्ने जलमयत्वभ्रमदशायामनुपपत्तिरस्ति, तथापि जलमयोऽयं वह्निमानित्याद्यनुमितिस्थले प्रतिबन्धकनैयत्येन तथाविधानुमितिमात्रोच्छेद इत्यभिप्रायेण तावद्दूरानुसरणम् ।

अथ विरोधित्वेनेति । निर्णयस्तथेत्यनुषज्यते । तदग्रहे-वन्ह्यभावादौ वह्न्यादेर्विरोधाग्रहे । अनुमितिप्रसङ्ग इति । तथा च वह्न्यभा-

धत्वावच्छिन्नावगाहिनिश्चयत्वेनैव विशिष्य बाधबुद्धेः प्रतिबन्धकता वाच्या, तच्च न विरोधिपरामर्शसाधारणमिति भावः । इदमुपलक्षणम् । अनुगततत्तदधिकरणावृत्तित्वरूपविरोधावच्छिन्नप्रकारक-निश्चयत्वेन विरोधित्वे स्वव्यापकतत्सामानाधिकरण्यरूपव्याप्यत्वा-वगाहिविरोधिपरामर्शस्य तद्रूपानाक्रान्ततया तादृशपरामर्शाभ्यां संशयानुमितिजनने बाधकाभावः । एवं तत्सम्बन्धेन तदधिकरणा-वृत्तित्वरूपविरोधावच्छिन्नस्य तत्सम्बन्धावगाहिज्ञानमेव विरोधीति सम्बन्धविशेषनिवेशस्यावश्यकतया विशेषणताविशेषादिसंसर्गक-ग्राह्याभावादिज्ञानसम्बन्धान्तरावगाहिविरोधिपरामर्शयोर्नानुगतरू-पेण प्रतिबन्धकतासम्भव इत्यपि बोध्यम् ।

ननु मा भूद्बाधबुद्धिप्रतिबन्धकतावच्छेदकरूपाक्रान्तत्वं विरो-धिपरामर्शस्य, तथापि संशयानुमित्यसम्भवः स्थाणुत्वाभावव्याप्य-करादिमानित्यादिनिश्चये स्थाणुत्वादिप्रत्यक्षभ्रमसंशयानुदयात्तद्वि-शिष्टबुद्धित्वावच्छिन्नं प्रति तदभावव्याप्यवत्तानिश्चयत्वेन प्रतिबन्धक-ताया आवश्यकत्वादित्याशङ्कते अथेति । शुक्लत्वादीति । पीतत्वा-भावादित्यर्थः । दुष्टेन-पित्तादिदूषितेन । पीतत्वादीति । शुक्लत्वाभा-वादीत्यर्थः । नन्वेवं संशयत्वं प्रतिबध्यविशेषणं देयमित्याशङ्कामुप-नीतभानविशेषसंग्रहं प्रदर्श्य दूषयति सति चेति । विशेषदर्शन-वि-रोधिव्याप्यदर्शने, द्वितीयानुरोधेन च लौकिकसंनिकर्षाजन्यत्वं प्रथ-मानुरोधेन दोषविशेषाजन्यत्वं प्रतिबध्यत्वविशेषणं देयमित्यत आह दूरत इति । प्रमितस्य-करादिभ्रमात्प्राक्प्रमापकलौकिकसन्निकर्षा-श्रयस्य । एतेन करादिभ्रमदशायामपि दूरत्वादेव स्थाणुत्वग्रह इति शङ्का निराकृता । अग्रहादिति । तथा च लौकिकसंनिकर्षाद्यजन्यत्व-निवेशे तत्र स्थाणुत्वादिप्रत्यक्षापत्तेस्तन्निवेशो न संभवतीति भावः । स्थलविशेष इति । यद्यद्व्यक्तिसत्त्वे विशिष्टबुद्धिर्न जायते तत्तद्व्यक्तेरेव विशिष्य विशिष्टबुद्धित्वावच्छिन्नं प्रति प्रतिबन्धकत्वं वाच्यमित्यर्थः । तथा च कोट्यन्तरविशेषदर्शनसहितविशेषदर्शनव्यक्तीनां प्रतिब-न्धकत्वाकल्पनात्संशयानुमितिर्निःप्रत्यूहैवेति भावः ।

(दी०) अत्राहुः—अनुगतकार्यकारणभावानुरोधात् दो-षविशेषाद्यजन्ये ज्ञाने कदाचिदनुभवे वा विशेषदर्शनं विरोधि

कल्प्यते । न च प्रत्यक्ष एव तथा, सामान्ये बाधकाभावात् बोध्याभावव्याप्यवत्तानिश्चयेन शाब्दादिधीप्रतिबन्धाच्च । अथ विशेषान्तरदर्शनविरहविशिष्टमेव तत्तथा अन्यथा कोटिद्वयविशेषदर्शने संशयो न स्यादिति चेन्न । भवत्येव तावद्यावदप्रामाण्यं न गृह्यते, अगृहीताप्रामाण्यकस्यैव विशेषदर्शनस्य विरोधित्वादिति ।

(गा०) क्वचिल्लौकिकसन्निकर्षजन्यज्ञाने दूरत्वादिसहकृततदभावव्याप्यभ्रमस्य विरोधित्वेऽपि लौकिकसन्निकर्षाद्यजन्यविशिष्टबुद्धित्वाद्यवच्छिन्नं प्रति तदभावव्याप्यनिश्चयत्वेनानुगतैकप्रतिबन्धकताकल्पनमुचितं तत्तद्व्यक्तित्वेन प्रतिबन्धकत्वेऽनन्तप्रतिबन्धकताप्रसङ्गात् दूरत्वादिदोषसहकृतविशेषदर्शनस्य च प्रतिबध्यतावच्छेदककोटौ लौकिकान्यत्वमनिवेश्य प्रतिबन्धकत्वान्तरं कल्पनीयमिति समाधत्ते अनुगतेति । दोषविशेषादीत्यादिना लौकिकसन्निकर्षपरिग्रहः । दोषविशेषजन्यज्ञानेऽपि साक्षात्कारित्वव्यञ्जकविषयताविशेषोपगमात्तच्छून्यत्वं निवेश्यैव दोषविशेषजन्यलौकिकसन्निकर्षजन्यज्ञाने व्यावर्त्तनीये, एवं च परमेश्वरबुद्धावपि तादृशविषयताया एव स्वीकारान्न नित्यसाधारण्यं, न चानुगतधर्मस्य प्रतिबध्यतावच्छेदकत्वे चक्षुःसन्निकर्षादिजन्यभेदानामेकत्र निवेशनीयतया मिथो विशेषणविशेष्यभावे विनिगमनाविरहप्रसङ्गाच्चक्षुःसंयोगाद्यजन्यचाक्षुषत्वादीनां जन्यतावच्छेदकत्वापत्तिः अन्धकारे चक्षुःसंयोगदशायां घटोपनीतभानस्य चक्षुःसन्निकर्षजन्यत्वेन प्रतिबध्यतावच्छेदकानाक्रान्ततया विशेषदर्शनकालेऽपि तादृशोपनीतभानापत्तिश्चेति । एवं अनाहार्यत्वस्यापि निवेशो वाच्यः । तेनाहार्यचाक्षुषादीनां विरोधिनिर्णयाप्रतिबध्यत्वोपपत्तिः । आहार्यत्वं च स्वविषयकेच्छाव्यवहितोत्तरक्षणोत्पन्नप्रत्यक्षत्वं विषयत्वस्वाव्यवहितोत्तरत्वोभयसम्बन्धेन इच्छावच्छिन्नप्रत्यक्षत्वं वा, आहार्यचाक्षुषादौ चाक्षुषादीच्छाया हेतुत्वोपगमान्नेच्छां विना विरोधिनिश्चयदशायां तदुत्पत्तिः । कदाचिदिति । यदि विशेषदर्शनं परिभूय ज्ञानमुत्पद्यते तदधीनस्मरणमपि विशेषदर्शनकाले अनुभूयते तदेत्यर्थः । वस्तुतस्तु विशेषदर्शनकाले पूर्वं जातविशिष्टज्ञानत्वमेव स्मर्यते न तु तद्विषयीभूतं

विशिष्टं यावद्विशेषदर्शनेनाप्रामाण्यं गृह्यते, तथा च ज्ञानत्वमेव प्रतिबध्यतावच्छेदकं न त्वनुभवत्वमनुभवत्वजातेरप्रामाणिकत्वात्स्मृतिभिन्नज्ञानत्वस्य तथात्वे गौरवात्प्रत्यक्षस्य तथात्वमाशङ्कते नचेति । समाधत्ते । सामान्य इति । सामान्यधर्मज्ञानत्वस्य तथात्वे बाधकाभावादित्यर्थः । ननु संशयानुमितेः सन्दिग्धतया ज्ञानत्वस्य विरोधिपरामर्शाभावजन्यत्वकल्पना न सम्भवति व्यभिचारसंशयस्य विरोधित्वादित्यत आह बोध्याभावेति । शाब्दादीत्यादिना उपमितिस्मृतिपरिग्रहः । तथाच ज्ञानस्य तथात्वे शाब्दादिस्थले स्वतन्त्रप्रतिबन्धकत्वाकल्पने लाघवात् व्यभिचारसन्देहोऽकिञ्चित्कर इति भावः ।

ननु तद्व्याप्यवत्ताज्ञानस्य तदभावव्याप्यवत्ताज्ञाने उत्तेजकत्वमावश्यकम्, अन्यथा कोटिद्वयव्याप्यदर्शनदशायां प्रत्यक्षात्मकस्यापि संशयस्योत्पादासम्भवात् तदानीं संशयानुभवापलापप्रसङ्गादिति सत्प्रतिपक्षसंवलनदशायां उत्तेजकसत्त्वेन संशयानुमितिर्निष्प्रत्यूहैवेत्याशङ्कते अथेति । यावदप्रामाण्यं न गृह्यत इति । तथा चानयोरेकतरमिति रीत्या सामान्यतस्तत्राप्रामाण्यग्रहे विशिष्योभयत्रैवाप्रामाण्यसंशयेन प्रत्यक्षसंशयो भवतीति भावः । एतदुपपादकमेवाह अगृहीताप्रामाण्यकस्यैवेति । अप्रामाण्यसंशयादनुमितिः संशयरूपा न सम्भवति अगृहीताप्रामाण्यकपरामर्शरूपक्लृप्तकारणविरहात् कारणान्तरस्य कल्पकाभावात् ।

मिश्रास्तु तद्व्याप्यदर्शनस्य तदभावव्याप्यदर्शनप्रतिबन्धकतायामुत्तेजकत्वेपि प्रत्यक्षसंशयवत् उभयव्याप्यकतादर्शनान्न संशयानुमितिरुत्पद्यते यतो व्याप्यदर्शनमवधारणात्मकज्ञान एव हेतुः अवधारणत्वं चानुमितौ व्याप्यदर्शनजन्यप्रत्यक्षे च स्वीक्रियते, अवधारणद्वयसामग्रीसमाजान्न संशयः अवधारणस्य संशयव्यावृत्तत्वात्, तत्कोट्यवधारणे तद्विरोधिकोट्यवधारणजनकविशेषदर्शनस्य प्रतिबन्धकतया विरोधिकोटिद्वयावधारणसामग्रीसंवलनस्यासम्भवात् तादृशप्रतिबध्यप्रतिबन्धकभावाकल्पने उभयकोटिव्याप्यदर्शनकाले उभयकोट्यवधारणापत्तेः । न चेष्टापत्तिः, तत्र संशयस्यैवोत्पत्त्यावधारयामीत्यननुभवात्कोटिद्वयविशेषदर्शनकाले च एकविशेषदर्शनस्यापरविशेषदर्शनेनाप्रयोजकीकृतत्वाद्विशेषादर्शनदशा-

यां विशेषणज्ञानादिघटितयादृशसामग्रीसमाजात्प्रत्यक्षसंशयः तादृशस्य तस्य तत्राप्यक्षतत्वात् भवति संशयात्मकं प्रत्यक्षम्, अनुमितिस्थले चावधारणसामग्र्यतिरिक्तसामग्री न कल्प्यते प्रयोजनाभावादिति न संशयानुमितिवार्तेत्याहुः।

तेषां चायमाशयः। अवधारणत्वं न निर्णयत्वं विपरीतकोट्यनुपस्थितिकालीनविशेषदर्शनानधीननिश्चयानन्तरमवधारयामीति प्रतीत्यनुदयात्, किन्तूत्कटनिश्चयत्वम्, औत्कट्यं च विषयताविशेष एव अन्यस्य दुर्वचत्वात् स एव प्रत्यक्षानुमितिसाधारणो व्याप्यदर्शनप्रतिबध्यतावच्छेदकश्चेति। अत्र च निश्चिनोमि अवधारयामीति प्रतीत्योः समानविषयता निश्चयत्वमेवावधारणत्वम् अनभ्यासदशापन्नज्ञानाद्विशेषदर्शनकालीनज्ञाने अप्रामाण्यशङ्कानास्कन्दनमेव विशेषः निश्चयत्वस्य चार्थसमाजग्रस्तता व्यवस्थापितेति नात्र दीधितिकृतो निर्भरः।

इदं त्ववधेयम्। विरोधिज्ञानदशायामाहार्यज्ञानोपपत्तये यदि निरुक्तमनाहार्यत्वं प्रतिबध्यतावच्छेदककोटौ निवेश्यते तदा तस्याव्यवहितोत्तरत्वघटिततयाऽव्यवहितोत्तरत्वस्य चानुगतस्य दुर्वचतया इच्छाव्यक्तिसमसंख्यभेदानां निवेशनीयतया महागौरवम् इच्छायाः आहार्यज्ञानसामग्रीघटकतानिर्वाहाय तस्याः तद्धेतुताधिक्यं चेति इच्छाया उत्तेजकत्वपक्ष एव समुचितः। तथाच न प्रत्यक्षशाब्दादिसाधारणबुद्धौ प्रतिबन्धकतैक्यसम्भवः विरोधिज्ञानदशायां चाक्षुषत्वादिप्रकारकेच्छाबलात् स्पार्शनाद्यनुत्पत्त्या च तज्जातीयप्रत्यक्षेच्छानां विशेष्योत्तेजकतां स्वीकृत्य तत्तज्जातीयप्रत्यक्षे पृथक् पृथक् प्रतिबन्धकताया आवश्यकत्वात्तथा चानुमितिस्थले पृथक् प्रतिबन्धकताया अप्रामाणिकत्वात्संशयानुमितिर्दुर्वारैव। यदि कथञ्चिदव्यवहितोत्तरत्वमनुगतं शक्यते निर्वक्तुं चाक्षुषस्पर्शादिभेदेन प्रत्यक्षस्थले चाक्षुषादिगोचरेच्छाविरहविशिष्टविरोधिनिश्चयाभावत्वरूपगुरुधर्मावच्छेदेन कारणताषट्कस्य शाब्दोपमित्योः इच्छाविरहविशेषितविरोधिनिश्चयाभावकारणताद्वयस्य च कल्पनापेक्षया तद्भेदेन चाक्षुषेच्छात्वादिरूपलघुधर्मपुरस्कारेण कारणताषट्कस्य इच्छाविशिष्टान्यबुद्धिसामान्ये विरोधिनिश्चयाभावस्यैकहेतुतायाश्च कल्पने लाघवमीक्ष्यते, तदाऽव्यवहितोत्तरत्वसम्बन्धेन

विरोधिनिश्चयानवच्छिन्नत्वमेव तत्प्रतिबध्यतावच्छेदकमङ्गीक्रियताम्, तथा सति दोषविशेषाजन्यत्वादेस्तदनिवेशनीयतया लाघवात्, तथा चोभयव्याप्यवत्तानिश्चयदशायां संशयानुमितेरुपगमेऽपि तादृशप्रतिबन्धकाभावव्यभिचारानवकाशात्तद्विरोधिपरामर्शाभावघटिताया उभयानुमानसामग्र्या अनुमित्युत्पादप्रयोजकत्वोपगमात्संशयानुमितिर्निष्प्रत्यूहैवेति ।

एतेन वह्निव्याप्यवान्पर्वत इत्याकारकाश्रयासिद्ध्यादिनिश्चयदशायां वह्निमान्पर्वतो घटवानित्याद्यनुमितिवारणाय वह्न्यादिप्रकारकानुमितावपि तदभावव्याप्यवत्ताबुद्धेः प्रतिबन्धकत्वमावश्यकमिति न संशयानुमितिप्रसङ्ग इति निरस्तम् । तदभावव्याप्यवत्तानिश्चयानवच्छिन्नबुद्धिप्रतिबन्धकत्वे फलानुरोधेन तद्विशिष्टपक्षकाद्यनुमानसामग्र्यां तदभावव्याप्यवत्तानिश्चयाभावान्तर्भावेऽपि प्रयोजनाभावेन तादृशपक्षकानुमितिसामग्र्यां तदन्तर्भावानुपगमात् ।

अत्राहुः—अस्तु प्रत्यक्षस्थले विरोधिज्ञानप्रतिबन्धकतायामिच्छानामुत्तेजकत्वं, तथापि परोक्षशाब्दादिबोधस्थले प्रत्यक्षान्यत्वसहितस्य ज्ञानत्वस्य प्रतिबध्यतावच्छेदकत्वमङ्गीक्रियते न तु शाब्दत्वादिनानाधर्माणामिति न संशयानुमितित्वप्रसङ्गः । न च प्रत्यक्षान्यत्वज्ञानत्वयोरेकविशिष्टापरस्यैवातिप्रसक्तस्यावच्छेदकत्वमङ्गीकार्यं तत्र च विशेष्यविशेषणभावे विनिगमनाविरह इति वाच्यम् । प्रत्यक्षान्यत्ववैशिष्ट्यस्य गुणत्वादिसाधारणतया तन्मात्रेण ज्ञानत्वस्य निवेशे इतरव्यावृत्त्यसम्भवाज्ज्ञानत्वस्य विशेष्यत्वे विशेष्यतावच्छेदकतया ज्ञानत्वत्वस्य विनिवेशनीयतया गौरवेण स्वतो व्यावृत्तज्ञानत्वविशिष्टप्रत्यक्षान्यत्वस्यैवावच्छेदकत्वादिति ।

अन्ये तु महानसीयत्वविशिष्टतया वह्नित्वाद्यनुपस्थितिदशायामपि प्रतीयमानस्य महानसीयवह्न्यभावादेः प्रतियोगितायां यथा धर्मिविशेषणतापन्नेषु महानसीयवह्नित्वादिनानाधर्मेषु मिथो विशेष्यविशेषणभावानापन्नेषु वाऽवच्छेदकत्वं प्रत्येकं तादृशधर्माणामतिप्रसक्तत्वेऽपि यत्रैकस्मिन्नवच्छेद्ये नानाधर्माणामवच्छेदकता तत्रावच्छेदकसमुदायस्यानतिप्रसक्तस्यैवावच्छेदकतानिर्वाहः । अवच्छेदकस्य विशेषणसम्बन्धादिभेदेनावच्छेदकतायाश्च भेदेऽपि नावच्छेद्यभेदः अवच्छेद्यप्रतीतौ अवच्छेदकप्रकारकविषयताभेदेनैव तद्भेदात्, महा-

नसीयवह्निर्नास्तीति प्रतीतौ च नानाधर्मप्रकारकसमूहालम्बनव्यावृत्तवह्न्यादिविषयतायाः ऐक्यात्तथा प्रकृतेऽपि धर्मिविशेषणतापन्नमिथोविशेष्यविशेषणभावानापन्नप्रत्यक्षान्यत्वज्ञानत्वयोः प्रतिबध्यतावच्छेदकत्वादिकमतो न विनिगमनाविरहात्प्रतिबध्यतादिभेद इत्याहुः ।

तन्न । प्रत्यक्षान्यत्वसहितज्ञानत्वेन धर्मिणो युगपदुद्भावने एकतरस्यापरधर्मितावच्छेदकत्वभानमावश्यकं समूहालम्बनाविलक्षणनिर्धर्मितावच्छेदकोभयभानस्याप्रामाणिकत्वादिति प्रत्यक्षान्यत्वधर्मितावच्छेदकतापन्नज्ञानत्वप्रकारिकाया ज्ञानत्वधर्मितावच्छेदकतापन्नप्रत्यक्षान्यत्वप्रकारिकायाश्च धर्मिविषयतायाः भेदेन प्रतिबध्यताभेदस्यावश्यकत्वात् ।

केचित्तु वह्नित्वाभावत्वाभ्यां व्यापकताग्रहकाले महानसीयवह्नित्वतादृशवह्न्यभावत्वप्रकारेणानुमितिप्रयोजकलाघवज्ञानवशाद्यत्र सत्प्रतिपक्षभावः तत्र संशयानुमितिः न तदभावव्याप्यवत्ताबुद्धिविरोधित्वेन शक्यते वारयितुं शुद्धवह्नित्वावच्छिन्नशुद्धाभावत्वावच्छिन्नव्याप्यधर्मयोर्महानसीयवह्न्यभावमहानसीयवह्निविशिष्टबुद्ध्यविरोधित्वात् । न च लाघवज्ञानघटिततद्विरोध्यनुमितिसामग्रीकाले तत्प्रत्यक्षशाब्दादिवारणाय तत्र तादृशसामग्र्याः प्रतिबन्धकत्वे कल्पनीये अनुमितिसाधारणस्य तद्विशिष्टजिज्ञासानवच्छिन्नतद्विशिष्टधीत्वस्यैव प्रतिबध्यतावच्छेदकत्वोपगमान्न संशयानुमितिप्रसङ्ग इति वाच्यम् । लाघवज्ञानाघटितशुद्धाभावत्वादिप्रकारकानुमितिसामग्र्याः व्यापिकायाः प्रतिबन्धकतयैवोपपत्तेः, प्रत्यक्षादौ लाघवादिज्ञानमन्तर्भाव्य सामग्रीप्रतिबन्धकत्वान्तरस्यैवासिद्धेः, तथा चोक्तानुमितिवारणासम्भवः तत्प्रतिबध्यतावच्छेदककोटौ महानसीयवह्नित्वावच्छिन्नविषयकानुमित्यन्यतादृशज्ञानस्यैव निवेशनीयत्वात् । यदि च लाघवज्ञानजन्यमहानसीयवह्न्यभावादिप्रकारकानुमितौ महानसीयवह्न्यभावत्वादिकमपि विधेयतावच्छेदकम्, तथाच शुद्धाभावादिप्रकारकसिद्धिदशायां शुद्धाभावत्वाद्यवच्छिन्नविधेयकानुमितिसामग्र्या असत्त्वात्तदानीमेव लाघवादिज्ञानसत्त्वे प्रत्यक्षादिवारणाय लाघवज्ञानघटितसामग्र्या प्रतिबन्धकत्वान्तरकल्पनमावश्यकमित्युच्यते, तदापि लाघवज्ञानघटितविरोधकोटिद्वयानुमितिसामग्रीसंवलनदशायां भवन्मते प्रत्यक्षशाब्दबोधाद्युत्पत्त्या

एककोटिसामग्र्यामपरकोटिसामग्र्यभावप्रवेशस्यावश्यकतया कथं तत्प्रतिबन्धकतया संशयानुमितिवारणसम्भवः। एतेन विरोधिविषयकनिश्चयानन्तरमिव तत्सामग्र्यनन्तरमपि इच्छाबलात्परोक्षज्ञानं नोत्पद्यते, एवं च लाघवज्ञानघटितविरोधिकोट्यनुमितिसामग्रीदशायामिच्छासत्त्वेपि न शाब्दबोधादिरुत्पद्यते किन्तु विरोधिकोट्यनुमितिरेवेति फलानुरोधेन इच्छाभावं प्रतिबन्धकेच्छानवच्छिन्नत्वं च प्रतिबध्यविशेषणमनिवेश्य लाघवज्ञानघटितसामग्र्याः परोक्षतद्विशिष्टज्ञाने प्रतिबन्धकत्वान्तरकल्पनमावश्यकमिति तत्प्रतिबध्यतावच्छेदकत्वस्य परोक्षत्वस्यानुमितिसाधारण्यात्प्रोक्तस्थले संशयानुमितिप्रसङ्ग इत्यपि निरस्तम्। विरोधिविषयकनिश्चयसामग्रीबलात्परोक्षज्ञानानुत्पादस्याप्रामाणिकत्वादित्याहुः॥

अत्राहुः—संशयसमुच्चययोर्विरोधभानाभानप्रयुक्तवैलक्षण्यस्य दुर्वचत्वात्संशयत्वस्य विषयताविशेषरूपत्वमावश्यकम्, तादृशविषयता च कोटिनिरूपिता कोट्युपरागेणैव सन्देह्मीति प्रतीतेः तत्कोटिनिरूपितविषयताविशेषभिन्नतत्कोटिविषयताविशेषशालित्वं तत्तत्कोटिनिश्चयत्वं, तथाच निश्चयत्वघटकविषयितायाः संशयसाधारणत्वे तत्रापि निश्चिनोमीतिप्रतीत्यापत्तिरिति तस्यास्तद्व्यावृत्तत्वमावश्यकम्, तन्निर्वाहश्च संशयसामग्र्या तादृशविषयताशालिज्ञानप्रतिबन्धकतयैवेत्युक्तलाघवज्ञानघटितसामग्रीद्वयात्संशयस्वीकर्तॄणामपि निश्चयत्वघटकनिरुक्तविषयितायाः तादृशसंशयव्यावृत्त्यर्थं लाघवज्ञानघटितविपरीतकोट्यनुमितिसामग्र्यास्तत्कोटिनिरूपिततादृशविषयताशालिज्ञानप्रतिबन्धकत्वमावश्यकम्, तथाच लाघवात्संशयत्वघटकविषयताभेदमनिवेश्यैव तत्कोटिप्रकारित्वस्यैतादृशसामग्रीप्रतिबध्यतावच्छेदकत्वापगमात्प्रोक्तसामग्रीद्वयात्संशयानुमितिः। न च संशयत्वघटककोटिप्रकारताभिन्नतत्कोटिप्रकारिताकज्ञानत्वं न तत्कोटिनिश्चयत्वम्, अपि तु तादृशप्रकारताशून्यतत्कोटिप्रकारकज्ञानत्वम्, तथाच संशये निश्चयवृत्तिविषयतास्वीकारेपि न क्षतिरिति वाच्यम्। एकधर्मावच्छिन्ने तत्कोटिसंशयरूपस्यान्यधर्मावच्छिन्नांशकतत्कोटिनिश्चयस्य सङ्ग्रहाय तत्तद्धर्मावच्छिन्नविशेष्यतानिरूपितविलक्षणविषयता[illegible]त्वस्य तत्तद्धर्मावच्छिन्नविशेष्यकनिश्चयत्वशरीरे निवे[illegible]तया धर्मितावच्छेद-

कनिष्ठप्रत्यासत्त्या कारणत्वप्रतिबन्धकत्वपक्षीयलाघवस्य विलयप्रसङ्गात् । अत्र ग्राह्याभावे अव्याप्यवृत्तित्वग्रहदशायां ग्राह्याभावनिश्चयविषये धर्मिणि ग्राह्यज्ञानोत्पत्त्या यथा तादृशाव्याप्यवृत्तित्वग्रहस्य तत्प्रतिबन्धकतायामुत्तेजकत्वं तथा तद्धर्मिकाव्याप्यवृत्तित्वग्रहदशायां तद्व्याप्यवत्तानिश्चयस्यापि तद्विपरीतज्ञानाप्रतिबन्धकतया तत्रापि तद्धर्मिकाव्याप्यवृत्तित्वग्रहस्योत्तेजकत्वमुपेयम् । एवं च कपिसंयोगतदभावयोर्दैशिकाव्याप्यवृत्तित्वग्रहदशायां पक्षतावच्छेदकशाखादिरूपकावच्छेदेन तदुभयकोट्यवगाहिन्या गन्धतदभावयोः कालिकाव्याप्यवृत्तित्वग्रहदशायां पक्षतावच्छेदकतत्क्षणावच्छेदेन तदुभयकोटिमवगाहमानायाश्च संशयानुमितेः ग्राह्याभावव्याप्यवत्ताज्ञानप्रतिबन्धकतया न शक्यते वारयितुम् । न चाव्याप्यवृत्तित्वज्ञानस्य संशयविरोधितया अव्याप्यवृत्तित्वज्ञानकाले समुच्चय एव भवति न संशय इति वाच्यम् । यतो विरोधग्रह एवाव्याप्यवृत्तित्वग्रहस्य विरोधितया कोट्योर्विरोधावगाहिसंशय एव तयोरव्याप्यवृत्तित्वग्रहदशायां न सम्भवति विरोधानवगाहिन एकदेशावच्छेदेनैककालावच्छेदेन वा कोटिद्वयावगाहिज्ञानस्य संशयस्य तदानीमुत्पत्तौ बाधकाभावः, नहि तादृशज्ञानं कोटिद्वयनिश्चयरूपं सम्भवति समानकालदेशावच्छेदेन तत्तदभावनिश्चययोरव्याप्यवृत्तित्वग्रहकालीनयोरपि मिथो विरोधित्वात् अव्याप्यवृत्तित्वेऽपि भावाभावयोरेकावच्छेदेन वृत्तेरसम्भवात् अव्याप्यवृत्तितया तादृशनिश्चययोर्विषयविरोधापरिहारात् । न च यदि तादृशदेशाद्यवच्छेदेन तदभावनिश्चयः तदवच्छेदेन विशिष्टबुद्धिं ग्राह्याभावधर्मिकाव्याप्यवृत्तित्वग्रहदशायामपि प्रतिबध्नाति तदा तादृशाव्याप्यवृत्तित्वग्रहदशायामेवावच्छेदकावच्छेदेन ग्राह्याभावव्याप्यवत्ताज्ञानमपि तादृशीमनुमितिं विरुन्ध्यात्, तथा चावच्छेदकावच्छेदेनानुमितावच्छेदकावच्छेदेन परामर्शस्यैव हेतुतया तादृशयोश्च परामर्शयोरवच्छेदकावच्छेदेन विपरीतसाध्यवत्ताज्ञानप्रतिबन्धकतया नोक्तसंशयानुमितिसम्भव इति वाच्यम् । अवच्छेदकसामानाधिकरण्येन हेतुमत्ताज्ञानादपि देशकालरूपपक्षतावच्छेदके बाधाभावबलात्स्वरूपसम्बन्धरूपावच्छेदकत्वमवगाहमानाया अनुमितेर्मणिकारादिभिरुपगमात् ।

वस्तुतो ग्राह्याभावस्याव्याप्यवृत्तित्वेपि तदवच्छेदकावच्छेदेन ग्राह्यवत्त्वासम्भवात् विषयविरोधितावच्छेदकावच्छेदेन विशिष्टबुद्धौ तदवच्छेदेन ग्राह्याभावज्ञानप्रतिबन्धकतायामिव तद्धर्मिकाव्याप्यवृत्तित्वग्रहाभावो नापेक्षितः, तादृशतद्व्याप्यवत्ताज्ञानस्य तादृशविशिष्टबुद्धिं प्रत्यपि विरोधित्वे तु तादृशाव्याप्यवृत्तित्वग्रहाभावोऽपेक्षित एव ग्राह्याभावस्याव्याप्यवृत्तित्वे ग्राह्यावच्छेदकावच्छेदेन ग्राह्याभाववति वर्तमानस्यापि तद्व्याप्यतया विषयाविरोधित्वविरहात्। साध्यानवच्छेदकावच्छेदेन साध्यवति वर्तमाने यादृशदेशकालावच्छेदेन यत्र हेतुस्तत्र तादृशकालावच्छेदेन तत्र साध्याभाव व्याप्तिर्न सम्भवतीति चेत् का क्षतिः। न हि पक्षतावच्छेदकदेशकालावच्छेदेन साध्यानुमितौ तदवच्छेदेन गृहीततादृशव्याप्तिकहेतुमत्तापरामर्श एव हेतुरित्यवच्छेदकावच्छेदेनानुमितिस्थलेऽसिद्धव्यभिचारासङ्कीर्णबाधस्य हेत्वाभासत्वं व्यवस्थापितवतो मणिकारस्यानुमतम्, तथासति सल्लिङ्गपरामर्शात्क्रमानुमित्यसम्भवेन बाधे दोषान्तरासंकरस्य दुर्घटत्वात्। तथा चावच्छेदकदेशकालाघटितप्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावघटिता व्याप्तिरपि तन्मतेऽवच्छेदकावच्छेदेनानुमितिप्रयोजिका, तादृशव्याप्त्यवगाहिनोऽवच्छेदकावच्छेदेन हेतुमत्तापरामर्शस्यापि विपरीतकोट्यनुमितिप्रतिबन्धकत्वे ग्राह्याभावधर्मिकाव्याप्यवृत्तित्वज्ञानाभावोऽपि अपेक्षित इत्यवच्छेदकावच्छेदेन हेतुमत्तापरामर्शस्य तदनवच्छेदेन साध्यानुमितावपेक्षितत्वेपि न दर्शितरीत्या संशयानुमित्यनुपपत्तिरिति ॥

(चि०) निबन्धे तु हेत्वाभासानां फलद्वारकं लक्षणम्। अनैकान्तिकानामन्वयाद्यनिरंकाद्या कोट्युपस्थापकतया संशयः फलं, विरुद्धस्य साध्यविपरीतज्ञानम्। अपक्षधर्मोऽपि विरुद्धोऽन्यत्र विपरीतज्ञानसमर्थ एव बा-[1] धेऽन्यतो विपरीतज्ञानं न तु हेत्वभिमतादेः। नित्यो घटः कार्यत्वादिति विरुद्धे बाधसङ्करोऽप्यदोषः। असिद्धे अनैकान्तिकादिचतुष्टयज्ञानान्यलिङ्गत्वज्ञानं, बाधे पक्षधर्महेतौ व्याप्तिबाधः। प्रकरणसमे तु न व्याप्तिपक्षधर्म-

ताबाधः फलं, नाप्यलिङ्गत्वज्ञानं-व्याप्त्यादिबुद्धिसत्त्वात्। नापि विपरीतबुद्धिः-स्वसाध्यविपरीतेनानियमात्। नापि संशयः-प्रत्येकं कोटिद्वयानुपनयात्। किन्तु कथमत्र तत्त्वनिर्णय इति जिज्ञासा फलम्। तथाच प्रकृतसाध्यहेत्वोः किं तत्त्वमिति जिज्ञासाजनिका व्याप्तिपक्षधर्मतोपस्थितिः प्रकरणसमः। न ह्यनुपस्थिते प्रतिपक्षे एकस्माज्जिज्ञासा किन्तु निर्णय एव ॥

(दी०) विरुद्धस्येति । साध्याभावव्याप्यस्येत्यर्थः । बाध इति। हेतौ प्रकृतेऽन्यत्र वा। अपक्षधर्मे च पक्षधर्म्मतैवबाध इति शेषो वा। तथाच हेतौ व्याप्तिपक्षधर्म्मतान्यतरभङ्ग इत्यर्थः। प्रकृतेति। प्रकृतसाध्ययोर्यौ हेतू तयोरित्यर्थः।

(गा०) मूले अन्वयाद्व्यतिरेकाद्वेति। कोटिद्वयसहचरितत्वज्ञानात्, निश्चितकोटिद्वयव्यावृत्तत्वज्ञानाद्वेत्यर्थः। व्यवस्थितविकल्पोऽयं साधारणासाधारणभेदेन। विरुद्धस्येत्यत्र साध्यासामानाधिकरण्यरूपविरोधविवक्षणेऽवृत्तेरपि विरोधितया तस्य चापक्षधर्मस्य न साध्यविपरीतानुमितिः फलमित्यसङ्गतिरतोऽन्यादृशविरोधं दीधितिकृदाह साध्याभावव्याप्यस्येति।

अपक्षधर्मविरुद्धस्य प्रकृतपक्षे साध्यविपरीतानुमापकत्वासंभवेऽपि न क्षतिः। साध्यविपरीतानुमितौ प्रकृतपक्षकत्वाविवक्षणादित्याह मूले अपक्षधर्मोपीति। अन्यत्र-प्रकृतपक्षाभिन्ने स्वाधिकरणे, ह्रदो वन्हिमान्धूमादित्यादौ ह्रदत्वादिहेतोः पक्षे साध्यविपरीतज्ञानसंभवेऽपि अविरुद्धधूमादेर्न तत्फलमिति नातिप्रसङ्गः। यस्य तत्फलं स विरुद्ध एवेत्याह बाध इति। साध्याभावसाधकबाधितहेतोर्लक्ष्यतयोक्तफलघटितविरुद्धलक्षणातिव्याप्तिशङ्कां निराकरोति नित्य इति। घटो नित्य इति अभिधाने अकारप्रश्लेषेणानित्यत्वसाध्यकत्वभ्रमः स्यादिति प्रथमं नित्यत्वसाध्यकत्वोत्कीर्तनम्। असिद्ध इत्यादि। व्यभिचारादिदोषचतुष्टयं ज्ञानान्धमात्राधीनं फलतः तज्ज्ञानानधीनं, अलिङ्गत्वज्ञानं-असाधकत्वज्ञानं असिद्धदोषस्य ज्ञातस्य फलमित्यर्थः।

तथा च तादृशदोषवत्त्वमसिद्धहेत्वाभासलक्षणमिति भावः ।

पक्षधर्मे हेताविित्यत्र हेतुपदस्य प्रकृतहेतुपरत्वेऽपक्षधर्मव्याप्यप्रकृतहेतुकबाधस्थले व्याप्त्यभावसिद्धिरूपतत्फलासंभवात् फलघटितलक्षणाव्याप्तिरतो हेतुपदस्य प्रकृताप्रकृतसाधारणहेतुमात्रपरतां दीधितिकृदाह हेतौ प्रकृते अन्यत्र वेति । तथा च ह्रदो वन्हिमान्धूमादित्यादावपि साध्याभाववत्पक्षरूपबाधघटितेन तद्वृत्तित्वहेतुना द्रव्यत्वादिरूपहेत्वन्तरे व्याप्त्यभावानुमितिसंभवाल्लक्षणसमन्वय इति भावः । यद्यपि प्रकृतहेतोर्न तत्फलमिति तत्फलकत्वं न बाधितहेतोर्लक्षणम्, तथापि तत्फलकदोषवत्त्वं तल्लक्षणमिति नानुपपत्तिः । हेतुपदस्य प्रकृतसाधारणहेतुपरत्वे तदुपादानमफलमव्यावर्तकत्वादिति पक्षधर्मे व्याप्तिबाध इत्यवोच्येत अतः प्रकृतहेतुपरमेव तद्वाच्यमित्याशयेनापक्षधर्मप्रकृतहेतुकबाधस्य फलान्तरं पूरयति अपक्षधर्मेति । अत्र प्रकृतहेत्वर्थकं हेताविति पूर्वोक्तमनुषञ्जनीयम् । एतत्कल्पे फलाननुगमात्तद्घटितलक्षणाव्याप्तिमाशङ्क्यान्यतरत्वेन फलानुगमे मूलाभिप्राय इति दर्शयति तथा चेति । हेताविति । प्रकृत इत्यादि । व्याप्तिभङ्गे साध्ये साध्याभाववत्पक्षवृत्तित्वं हेतुः पक्षस्य साध्याभाववत्त्वेनैव निवेशः न तु पक्षतावच्छेदकस्यापि तत्र प्रवेश इति न व्यर्थविशेषणता । पक्षधर्मताभङ्गे साध्ये पक्षनिष्ठाभावप्रतियोगिसाध्यव्याप्यत्वं हेतुः, अत्रापि साध्यस्य तादृशाभावप्रतियोगित्वेनैव निवेशः हेतुद्वयमेव बाधघटितमिति बाधस्यान्यतरफलकत्वमुभयत्र ।

मूले व्याप्त्यादिबुद्धिसत्त्वादिति । सद्धेतोरपि विरोधिपरामर्शदशायां सत्प्रतिपक्षत्वात् तत्र तद्व्याप्तिपक्षधर्मताप्रतिपत्तिसत्त्वादित्यर्थः । तथाच प्रकरणसमदोषस्य व्याप्त्यादिविरहोन्नायकत्वासंभवादिति भावः । विपरीतबुद्धिः—स्वसाध्याभावानुमितिः, सत्प्रतिपक्षहेतोः फलमिति शेषः । स्वसाध्यविपरीतेनानियमादिति । धूमादिहेतोर्वन्ह्याद्यभावव्याप्यत्वाभावादित्यर्थः । संशय इति । कोटिद्वयोपस्थितिद्वारकसाध्यसंशय इत्यर्थः । कोटिद्वयानुपनयादिति । स्वेन स्वसाध्यस्यैवोपस्थापनादिति भावः । इति जिज्ञासेति । एतादृशतत्त्वनिर्णयोपायेच्छाफलिका जिज्ञासेत्यर्थः । अनयोः किं तत्त्वमिति जिज्ञासेति यावत्, अतो नाग्रिमग्रन्थविरोधः ।

ननु स्वस्वव्याप्त्यादिमत्तयोपस्थितयोर्हेत्वोरन्यतरसमीचीनत्व

एव जिज्ञासा, तद्वक्ष्यति-'अत्र हेतुः समीचीनत्व' इति। तथाच प्रकृत-
साध्यहेत्वोरिति यथाश्रुतमसंगतमित्यतो दीधितिकृद्धेतुद्वयार्थकत-
या तद्व्याचष्टे प्रकृतसाध्ययोरिति ।

किं तत्त्वमिति मूलस्य क समीचीन इत्यर्थः । एतादृशजिज्ञासा-
प्रयोजकत्वं समीचीनत्वसंशयादिसाधारणमतस्तद्वारणाय पक्षधर्म-
तोपस्थितिरिति । उदासीनव्याप्त्याद्युपस्थितिवारणाय विशेषणद-
लम् । न च व्याप्त्यादेरननुगमात् सर्वसाधारणरूपेण तदुपस्थितिनि-
वेशासंभवात् विशिष्य प्रकृतसाध्यतदभावव्याप्त्याद्युपस्थितिनिवे-
शस्यावश्यकत्वं जनकान्तर्गतवैयर्थ्यमिति वाच्यम् । अनुमितिचरमका-
रणत्वेन व्याप्त्याद्यन्तरोपस्थितिसाधारणेन तन्निवेशसम्भवात् यादृ-
शपरामर्शसहकारेण यादृशपरामर्शस्योक्तजिज्ञासाजनकत्वं तादृश-
परामर्शसहिततादृशपरामर्शनिवेशात् जिज्ञासास्वरूपयोग्यैकतरप-
रामर्शदशायां नातिप्रसङ्गः प्रकरणसम इति । शेष इति शेषः । प्रकृ-
तसाध्यवत्तापरामर्शतदभावव्याप्यवत्तापरामर्शयोर्जिज्ञासाजनने मि-
थः सहकारितां व्यवस्थापयति न ह्यनुपस्थित इति । असतीत्यर्थः ।
प्रतिपक्षे-विरोधिपरामर्शान्तरे, एकस्मात्-परामर्शात्, निर्णयः-एक-
तरसाध्यस्य एकतरसमीचीनत्वस्य वा निर्णयः, फलोपधानगर्भलक्ष-
णमेकपरामर्शदशायां नातिप्रसक्तमित्येतत्परतया न तदित्यादेः जिज्ञा-
सोपधानस्यानियमेन तद्घटितलक्षणस्याव्याप्त्या विवक्षणासंभवात् ॥

**(चि०) अथ ज्ञातुमिच्छा जिज्ञासा सा च ज्ञाने-
ष्टसाधनताज्ञानात् संशयाद्वेति कथं तेन विना विरो-
धिसाधनज्ञानमात्रादिति चेन्न ।**

**असति प्रतिपक्षे न जिज्ञासा सति सेत्यन्वयव्यति-
रेकाभ्यां प्रकरणसमस्यापि जिज्ञासाकारणत्वात् । न
चानैकान्तिकातिव्याप्तिः । तत्र हि संशयद्वारा साध्य
जिज्ञासा, अत्र तु हेतुसमीचीनत्व इति । ननु पराम-
र्शयोरेकदानुत्पादात् कथं प्रतिरोधः ? क्रमोत्पन्नयोरेक-
दाऽसत्त्वादिति चेन्न । एकानन्तरमपरहेतुव्याप्तिपक्षध-**

र्मताज्ञानाभ्यामग्रिमव्याप्तिविशिष्टज्ञानोत्पत्तिकाले पूर्वपरामर्शनाशात्। न चोभयहेतुव्याप्तिपक्षधर्मताज्ञानानां परस्पराप्रतिबन्धात् परामर्शोत्पाद इति वाच्यम्। व्याप्त्यादिज्ञानचतुष्टययौगपद्याभावात्।

यत्तु व्याप्तिद्वयसंस्कारोद्बोधकहेतुद्वयज्ञानयोः परस्परप्रतिबन्धात् नोभयव्याप्तिस्मृतिरिति दूषकताबीजम्। तन्न। व्याप्तिस्मृतिं विना सत्प्रतिपक्षाभावात् वादिभ्यां व्याप्त्युद्भावनाच्चेति। मैवम्। हेतुद्वयसमूहालम्बनाद्युगपदुभयव्याप्तिस्मृतावुभयपरामर्शरूपं ज्ञानमुत्पद्यते अत एकदा विरुद्धकार्यद्वयकारणान्नैकमपि कार्यमुत्पद्यते। तादृशपरामर्शश्च स्वार्थानुमाने प्रत्यक्षादितः, परस्य तु वाद्युपन्यस्तन्यायोत्थापितप्रमाणात्। अस्य केवलान्वयिन्यपि सम्भवः घटोऽभिधेयः प्रमेयत्वादित्यत्राभिधेयत्वं घटनिष्ठात्यन्ताभावप्रतियोगि जात्यन्यत्वे सति घटमात्रवृत्त्यन्यधर्मत्वात् घटान्योन्याभाववत् पटरूपवच्च, घटनिष्ठात्यन्ताभावोऽभिधेयत्वप्रतियोगिकः घटवृत्तिनित्याभावत्वात् घटनिष्ठान्योन्याभाववदिति विशेषादर्शनदशायाम्। न च पक्षैक्यमपि तन्त्रम्, विरोधस्यैव दूषकत्वेऽधिकस्य व्यर्थत्वात्॥

इति सत्प्रतिपक्षचिन्तामणिः॥

(दी०) संशयादिति। तज्जन्यदुःखोत्सारणरूपेष्टसाधनताज्ञानात् अन्यत्र चेष्टान्तरसाधनताज्ञानाज्ज्ञानेच्छेति भेदेन विकल्पोपन्यासः। अप्रतीत्यादि। हेतुसमीचीनत्वासमीची-

नत्वसंशयजन्यदुःखाभावरूपेष्टसाधनताज्ञानद्वारेण जिज्ञासोपयोगित्वादित्यर्थः । उत्पत्तिकाले-उत्पत्तिपूर्वकाले । व्याप्तिपक्षधर्म्मताज्ञानयोरुत्पादक्रमानियमादुभयोर्नाशकत्वमुक्तम् । उत्पत्तावेव वा तयोरन्वयः । यत्र च व्याप्तिपक्षधर्म्मतयोः समूहालम्बनं तत्र द्वितीयपरामर्शोत्पत्तिकाल एव प्रथमपरामर्शनाशः। अस्यनिरुक्तसत्प्रतिपक्षितत्वस्य । जात्यन्येति । सत्ताकम्बुग्रीवादिमत्त्वादावेकैकस्य व्यभिचाराद्विशिष्टोपादानम् । घटानिष्ठेति । घटनिष्ठात्यन्ताभावत्वेन सामान्यतः पक्षत्वान्न बाधाश्रयासिद्धी ।

नन्वाद्यस्य समवेतत्वादौ द्वितीयस्य घटाभावादौ व्यभिचार इत्यत आह विशेषादर्शनेति ।

(गा०)नन्विष्टसाधनताज्ञानात्संशयाद्वेति विकल्पोऽसङ्गतः ज्ञानगोचरेच्छादशायां तादृशेष्टसाधनताज्ञानस्य सर्वत्रैव हेतुतया संशयकल्पे तत्कल्पव्यवच्छेदायोगात् इत्यत इष्टभेदाभिप्रायकतया विकल्पं सङ्गमयति संशयजन्य इति । संशयजन्यदुःखस्य उत्सारणं कारणीभूतसंशयविघटनेनानुत्पादः तद्रूपं यदिष्टं तत्साधनताज्ञानादित्यर्थः । एवं च मूलोक्तसंशयस्य जिज्ञासाहेतुत्वं दुःखं जनयित्वा तदभावोपस्थानेन तदभावेच्छासंपादनद्वारेति स्फुटीकृतम् । अन्यत्र-संशयाभावदशायाम् । इष्टान्तरेति । व्यवहाररूपेत्यादि । तथाच मूलं इष्टपदं तद्विशेषपरमित्यर्थः । ज्ञानेच्छा-एकतरकोटिनिश्चयेच्छा ।

प्रतिपक्षसंवलनस्य जिज्ञासायामतिव्यवहितस्यान्यथासिद्धत्व अकारणत्वात् जिज्ञासाहेतुत्वादिति मूलं तत्प्रयोजकत्वार्थकतया द्वारं प्रदर्शयन् व्याचष्टे हेत्विति । समीचीनत्वं प्रमितव्याप्तिपक्षधर्मताकत्वं स्वसाध्यानुमित्यौपयिकप्रमात्मकपरामर्शविषयत्वमिति यावत् । तत्संशयश्च परामर्शप्रामाण्यसंशयपर्यवसित इति बोध्यम् । अनैकान्तिकातिव्याप्तिरिति मूलं यद्यप्यनैकान्तिकत्वोपस्थितेर्व्याप्तिपक्षधर्मतोपस्थितत्वाभावान्नैतादृशशंकावसरस्तथापि तदुपस्थितेरपि उदासीनव्याप्त्यादिविषयकत्वसम्भवात् तत्संगतिः । संशयद्वारा-साध्यसंशयद्वारा ।

युगपत्परामर्शद्वयानुत्पादेऽपि क्रमिकपरामर्शद्वयसंवलनात्प्रतिरोध

इति शंकते क्रमेति । एकपरामर्शानन्तरमपरपरामर्शजनकव्याप्तिपक्षधर्मताज्ञानयोः क्रमेणैवोत्पत्तेः, तथाच प्रथमपरामर्शचतुर्थक्षण एव परामर्शान्तरोत्पत्तिः तदानीं च पूर्वपरामर्शनाशो नोत्पद्यते अपि तु स्वद्वितीयक्षणोत्पन्नावशेषगुणात्तृतीयक्षण एवेति उत्पत्तिकालपदं तत्पूर्वकालपरतया व्याचष्टे उत्पत्तीति । तदा नाशादित्यनन्तरं तदा नाशोत्पत्तिरौत्सर्गिकीत्याशयेनेदं व्याख्यानम्, तदा नाशस्वार्थकत्वे यथाश्रुतमेव सङ्गच्छते अनन्तरोत्पन्नस्यैव गुणस्य नाशकतयोभयोर्व्याप्तिपक्षधर्मताज्ञानयोरेकत्र पूर्वज्ञानं नाशकत्वासम्भवात्पृथक्स्थलीयनाशकत्वाभिप्रायकतया ज्ञानाभ्यां विनाशादिति मूलं संगमयति व्याप्तीति । उत्पादकक्रमानियमादिति । व्याप्तिज्ञानानन्तरमेव पक्षधर्मताज्ञानं पक्षधर्मताज्ञानानन्तरमेव व्याप्तिज्ञानमुत्पद्यत इति नियमाभावादित्यर्थः । उभयोर्नाशकत्वमुक्तमिति । उक्तज्ञानयोर्यज्ज्ञानं प्रथमतो यत्रोत्पद्यते तत्र तस्य नाशकत्वादिति भावः । विशिष्टज्ञानोत्पत्तिकाल इत्यत्रोत्पत्तौ तादृशज्ञानयोर्हेतुत्वेनान्वये एकत्रैव उभयहेत्वन्वययोग्यता निर्वहतीति किं स्थलभेदानुसरणेनेत्याशयेनाह उत्पत्तावेवेति । व्याप्तिपक्षधर्मताविषयकैकज्ञानस्थले परामर्शयोर्यौगपद्यं न सम्भवतीति स्वयमाह यत्र चेति ।

उभयहेतुव्याप्तिज्ञानपक्षधर्मताज्ञानानामिति । परामर्शद्वयहेतुव्याप्तिपक्षधर्मताज्ञानचतुष्टयस्येत्यर्थः । परस्पराप्रतिबन्धात्–एकसत्त्वस्यापरसत्त्वाविघटकत्वात् । परामर्शोत्पाद इति । व्याप्त्यादिज्ञानचतुष्टयाधीनस्यैकदा समूहालम्बनरूपस्याविरलक्रमेण वोभयव्याप्यवत्ताज्ञानस्योत्पाद इत्यर्थः । विशिष्टपरामर्शयोरेवैकदानुत्पादस्तृतीयक्षणे च विनाशः नेतरज्ञानस्य तन्नियम इत्यभिमानेनेयमाशङ्का । अभिमानं निराकरोति व्याप्त्यादीति । यौगपद्याभावात्–युगपदवस्थानासंभवात्, ज्ञानमात्र एव उक्तनियमादिति भावः । परस्परप्रतिबन्धात्–परस्परजन्यव्याप्तिज्ञानप्रतिबन्धकत्वात् ।

समूहालम्बनपक्षधर्मताद्वयज्ञानात्समूहालम्बनरूपं व्याप्तिद्वयस्मरणं ततः समूहालम्बनमुभयव्याप्यवत्ताज्ञानं प्रतिरोधप्रयोजकमिति समाधत्ते मैवमिति । स्वयं निर्वक्ष्यमाणस्य नित्यसत्प्रतिपक्षदोषस्य साध्याभावव्याप्यवत्पक्षादिरूपस्य, केवलान्वयिसाध्यक साध्याभावाऽप्रसिद्ध्याऽसंभवात् ।

अस्येति मूलं निरुक्तव्यवहारौपयिकपरामर्शसंवलनात्मकसत्प्रतिपक्षत्वपरतया व्याचष्टे अस्येति । अभिधेयत्वे द्वित्वावच्छिन्नाभावप्रतियोगित्वसाधारणरूपेण घटनिष्ठाभावप्रतियोगित्वज्ञानस्य विरोध्यविषयकत्वेन घटेऽभिधेयत्वज्ञानाप्रतिबन्धकतया तत्सामग्र्या नाभिधेयत्वानुमानप्रतिरोध इत्यभिधेयत्वमित्यादिग्रन्थस्याभिधेयत्वत्वपक्षकघटनिष्ठाभावप्रतियोगितावच्छेदकत्वसाध्यकजात्यवृत्तित्वविशिष्टघटमात्रवृत्तितानवच्छेदकत्वलिंगकानुमाने तात्पर्यम् । दृष्टान्तोऽपि घटान्योन्याभावत्वं पटरूपत्वं च ।

दीधितौ 'सत्ता कंबुग्रीवादिमत्त्वादीति' यथाश्रुतमूलानुसारेण यथाविवक्षिते तु सत्तादिपदं सत्तात्वादिपरम् । एकैकस्येति । केवलविशेष्यकेवलविशेषणयोरित्यर्थः । ननु घटनिष्ठात्यन्ताभाव इत्यनेन प्रसिद्धघटत्वाद्यभावविवक्षणे तत्राभिधेयत्वप्रतियोगिकत्वबाधान्न साधनसम्भवः अभिधेयत्वाभावस्य चाप्रसिद्ध्या न पक्षत्वसम्भव इत्याशङ्कां निरसितुमाह घटनिष्ठेति । उभयमतप्रसिद्धेनेत्यादिः । सामान्यतः–सामान्यरूपेण । बाधेति । सामानाधिकरण्यमात्रेण साध्यसिद्धेरुद्देश्यत्वान्नांशतो बाधो दोषः, अभावस्य कस्यचिदभिधेयत्वप्रतियोगिकत्वमपीति विवादे पक्षतावच्छेदकावच्छेदेन बाधो दुर्निश्चयः पक्षतावच्छेदकप्रसिद्ध्यैव नाश्रयासिद्धिरित्यर्थः ।

ननु स्वरूपसम्बन्धेनाभिधेयत्वत्वावच्छिन्नसाध्यकानुमितौ पक्षनिष्ठाभावे तत्सम्बन्धावच्छिन्नत्वविशेषिताभिधेयत्वत्वावच्छिन्नप्रतियोगिताकत्वानुमितिरेव विरोधिनी तादृशं च साध्यमप्रसिद्धम्, न च घटनिष्ठस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वेन पक्षत्वादुद्देश्यसिद्धिरिति स्वरूपसम्बन्धावच्छिन्नगगनाद्यभावस्य संयोगसम्बन्धावच्छिन्नाभिधेयत्वत्वावच्छिन्नभावसमनैयत्येनाभिन्नतया सिद्धसाधनस्य दुर्वारत्वादिति चेन्न । सत्यम्, स्वरूपसम्बन्धावच्छिन्नायां घटनिष्ठाभावप्रतियोगितायां घटनिष्ठान्त्याभावप्रतियोगितात्वेन हेतुना घटनिष्ठानभिधेयत्वभेदप्रतियोगितादृष्टान्तेनाभिधेयत्वत्वावच्छिन्नत्वानुमाने तात्पर्येण सामञ्जस्यम् ।

मूले विशेषादर्शनदशायामिति । व्यभिचारिण्यपि एतादृशहेतौ व्यभिचाराग्रहदशायामित्यर्थः । केवलान्वयिन्यपि सम्भव इत्यनेनान्वयः ।

व्यभिचारस्थलं दर्शयन्नेतत्कथनप्रयोजनमाह दीधितौ नन्विति। आद्यस्य-जात्यन्यत्वं इत्यादि प्रथमानुमानहेतोः, द्वितीयस्य-घट-वृत्तीत्यादि द्वितीयानुमानहेतोः ॥

(दी०) वस्तुतो घटो नाभिधेयः कम्बुग्रीवादिमत्त्वादि-त्यादिव्यतिरेकिणा सत्प्रतिपक्षः सम्भवत्येव, व्यापकाभावेनाप्र-सिद्धस्यापि व्याप्याभावस्य सिद्ध्यभ्युपगमात् , प्रत्येकपदार्थप्रसि-द्धौ तादृशप्रतिज्ञाद्युपपत्तेर्विशिष्टस्य वाक्यार्थत्वात् । सत्प्रतिपक्षस्तु साध्याभावव्याप्यवान् साध्यवदन्यत्वव्याप्यवांश्च पक्षः पक्ष-निष्ठौ साध्याभावसाध्यवद्भेदव्याप्यौ इत्येवमादिः प्रत्येकमेव ।

विभाजकन्तु प्रकृतपक्षसाध्यवैशिष्ट्यग्रहविरोधित्वे सति प्र-कृतपक्षसाध्यग्रहाविरोधिप्रकृतपक्षसाध्यवैशिष्ट्यग्रहविरोधिरूपो-न्नायकत्वम्। तदुन्नायकत्वञ्च यादृशविशिष्टविषयत्वेन परामर्शस्या-नुमितिजनकत्वं तत्त्वम् । तच्च साध्याभावव्याप्यवत्पक्षादिकम् । अ-साधारणविरोधयोरन्यतरस्य प्रतिपक्षविधया दोषत्वपक्षे प्रकृत-साधने प्रकृतसाध्यव्यापकाभावप्रतियोगित्वाद्यनवगाही पराम-र्शो ग्राह्यः। अत्र सत्यन्तेन सत्प्रतिपक्षोन्नायकस्य अविरोध्यन्तेना-श्रयासिद्ध्याद्युन्नायकस्य, विरोध्यन्तेन वह्निव्याप्याभावे साध्ये वह्निव्याप्यवत्पक्षात्मकस्य बाधस्य व्युदासः । संगृह्यते चानेन काञ्चनमयवह्निमानित्यादौ वह्न्याद्यभावव्याप्यह्रदत्वादिमान प-क्ष इति । सत्प्रतिपक्षे च यथासिद्धान्तं पञ्चावयवादिप्रयोग-मिच्छन्ति। अयं हेतुः साध्यव्यभिचारवानित्यादिवदयं पक्षः सा-ध्याभावव्याप्यवानित्यादिकमुद्भावनं पुनरुचितं प्रतिभाति ॥

इति सत्प्रतिपक्षदीधितिः ॥

(गा०) प्रतियोगित्वादिप्रकारकबाधबुद्धेर्विशिष्टबुद्धिविरोधिता-

या मठ्यैरनभ्युपगमात्, तथासति तत्सम्बन्धसम्बन्धादिप्रकारकबुद्धेरपि विरोधापातात् नोक्तानुमानेन घटोऽभिधेयः प्रमेयत्वादित्यनुमानप्रतिरोधसम्भव इति स्वयमभिधेयत्वरूपप्रतियोगिप्रकारेणाभावानुमानमेव मूलकृता साध्याप्रसिद्ध्या उपेक्षितमपि प्रतिरोधकतया व्यवस्थापयति वस्तुत इति। साध्याऽप्रसिध्याऽन्वय्यनुमानात्पटादिसाधारणद्रव्यत्वादेः पटादौ व्यभिचारग्रहसम्भवेन व्यतिरेकितयापि साधकतायाः सुघटत्वाभावेन पक्षमात्रवृत्तिकंबुग्रीवादिव्यतिरेकयादरः। अभावसाध्यकव्यतिरेकितया साध्यप्रसिद्धेरनपेक्षां दर्शयति व्यापकाभावेनेति। पटादावभिधेयत्वादिव्यापकतया गृहीतस्य कंबुग्रीवादिमत्त्वाभावस्याभावेन कंबुग्रीवादिमत्त्वादिनेत्यर्थः। अप्रसिद्धस्यापि प्रतियोगितया अभिधेयत्वादिकं प्रकारीकृत्य अज्ञानस्यापि व्याप्याभावस्य व्याप्यतया गृहीतमभिधेयत्वादिकं प्रकारीकृत्य वस्तुभूतस्याभावान्तरस्यापि सिद्ध्युपगमादप्रसिद्धसाध्यस्यानुमानस्यैकदेशिनामेवानुमततया अभ्युपगमोक्तिः कम्बुग्रीवादिमत्त्वाभावस्य वास्तवाभिधेयत्वव्यापकताविरहात् अवस्तुभूताभिधेयत्वाभावस्यानुमित्याऽवगाहनासम्भवात् प्रसिद्धपटत्वाद्यभावस्य व्याप्यतया गृहीताभिधेयत्वप्रतियोगिकत्वाभावाद्व्यापकाभावेनेत्यादेर्यथाश्रुतस्यासंगतिर्बोध्या। व्यवहर्त्तव्यत्वविशिष्टाप्रसिद्धावपि न विशिष्टार्थपरप्रतिज्ञाद्यसम्भव इत्याह प्रत्येकपदार्थप्रसिद्ध्यैवेति। तावतैव भ्रमात्मकस्य व्यवहारोपयोगिविशिष्टज्ञानस्य सम्भवात् विशिष्टज्ञानं विनापि तत्तद्विशेष्यांशे तत्तद्विशेषणावगाहित्वेन तात्पर्यघटकप्रतीतेर्ज्ञानेन विशिष्टबोधकवाक्यप्रयोगसम्भवाच्चेति भावः। मूलकृता सत्प्रतिपक्षहेतुदोषानभिधानात्स्वयं तान्दर्शयति सत्प्रतिपक्षस्त्विति। सत्प्रतिपक्षहेतोर्दोषस्त्वित्यर्थः। तुकारेण मूलनिरुक्तसत्प्रतिपक्षव्यवहारविषयतावच्छेदकरूपस्य दोषत्वव्यवच्छेदः। व्याप्यवान्-व्याप्यविशिष्टः, पक्षनिष्ठौ-आधेयतया पक्षविशिष्टौ। एवमादिरिति। आदिपदादाधेयतासम्बन्धेन प्रकृतपक्षसाध्यकप्रकृतसाध्याभावादिपक्षकानुमितिजनकपरामर्शविषयप्रकृतपक्षव्याप्यविशिष्टप्रकृतसाध्याभावादिपरिग्रहः। पक्षे साध्याभाव इत्यादि बाधबुद्धेरपि पक्षे साध्यानुमितिविरोधितया तादृशबाधोन्नायकस्यापि परामर्शस्यानुमितिविरोधित्वेन तद्विषयस्यापि सत्प्रतिपक्षतौचित्यात्। अत एव सा-

ध्यतदभावयोराधेयतया पक्षव्याप्यवत्ताज्ञानसंवलनदशायां पक्षे साध्यं साध्याभावो वेति कोटिविशेष्यकसंशयरूपानुमितिः प्रत्येकमेवेत्यनेन तावत्समुदायस्य सत्प्रतिपक्षविभाजकत्वासंभवो दर्शितः ।

नन्वेवं प्रत्येकरूपस्याव्याप्त्या विभाजकत्वासम्भवात्सर्वसाधारणं किमेतद्विभाजकमित्याकांक्षायां तादृशं विभाजकं रूपमाह विभाजकं त्विति । सर्वत्र प्रकृतेति पक्षसाध्ययोर्द्वयोरेवान्वेति । प्रकृतपक्षतावच्छेदकावच्छिन्ने प्रकृतसाध्यतावच्छेदकावच्छिन्नप्रकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदिका सती विशिष्टपक्षविशिष्टसाध्यग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतानवच्छेदकानिरुक्तपक्षसाध्यवैशिष्ट्यग्रहप्रतिबन्धकतावच्छेदकविषयतावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेदिका यादृशविशिष्टनिरूपितविषयिता तादृशत्वमित्यर्थः । तादृशी च वह्न्यभावव्याप्यविशिष्टह्रदनिरूपितविषयतेति तत्र लक्षणसमन्वयः । साध्याभावव्याप्यविशिष्टपक्षविषयतायाः साध्यानुमितिप्रतिबन्धकतावच्छेदकतया तद्वदनुमितिजनकतावच्छेदकविषयताकसाध्याभावव्याप्यवत्पक्षादावतिव्याप्तिवारकतया सत्यन्तं सार्थकयिष्यते । तत्र निरुक्तवैशिष्ट्यग्रहप्रतिबन्धकतावच्छेदकविषयताकत्वरूपविरोधित्वान्तार्थस्य उन्नायकविषयविशेषणत्वे विषयताभागस्य द्विधा निवेशे गौरवात् उन्नायकताघटकविषयतायामेव प्रतिबन्धकतावच्छेदकत्वं विशेषणं दत्तम् । पक्षतावच्छेदकवैशिष्ट्यनिवेशव्यावृत्तिः पूर्ववत् । उक्तप्रकारताशालिग्रहनिरूपितप्रतिबन्धकतामात्रनिवेशे साध्याभावव्याप्यवत्ताज्ञानस्यापि समूहालम्बनसाध्यग्रहरूपसाध्याभावव्याप्यव्याप्याभावादिमत्त्वप्रतिबन्धकतया नोपदर्शितसत्प्रतिपक्षोन्नायकव्यावृत्तिरिति तादृशप्रकारताकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतानिवेशः । तादृशप्रकारताशालिदोषजन्यज्ञानमाहार्यज्ञानं प्रति च साध्याभावव्याप्यवत्ताज्ञानस्याप्रतिबन्धकतया सत्प्रतिपक्षस्यैवासंग्रह इति ज्ञानत्वमुपेक्ष्यानुमितित्वनिवेशः । ह्रदः काञ्चनमयवह्निमान्काञ्चनमयह्रदो वह्निमानित्यादौ सङ्ग्राह्यस्य वह्न्यभावव्याप्यविशिष्टह्रदादेः ज्ञानस्य प्रतिबन्धकतावच्छेदककोटौ साध्यतावच्छेदकादिघटककाञ्चनमयत्वादिविषयताया अनिवेशात्तद्घटितपक्षतावच्छेदकविशिष्टे साध्यतावच्छेदकविशि-

ध्यवैशिष्ट्यग्रहत्वं नोक्तज्ञानप्रतिबध्यतावच्छेदकमित्यव्याप्तिः स्यादतः स्वरूपसम्बन्धरूपमवच्छेदकत्वं परित्यज्य व्यापकत्वं प्रतिबध्यताविशेषणम् । अत एवोक्तस्थले आश्रयासिद्ध्युन्नायके विशिष्टपक्षमात्रग्रहत्वावच्छिन्नाविरोधिन्यपि विशिष्टपक्षविशिष्टसाध्यवैशिष्ट्यविषयकानुमितित्वव्यापकप्रतिबध्यताघटितविरोधिताशालिनि काञ्चनमयत्वाभावव्याप्यविशिष्टह्रदादौ सत्यन्तदलस्य निरुक्तसाध्यवैशिष्ट्यप्रतिबन्धकतावदनुमितिजनकतावच्छेदकविषयताकत्वरूपाविरोध्युन्नायकत्वस्य च सत्त्वेनातिव्याप्तिः स्यादिति अविरोध्यन्तविशेषणम् । एतच्च संगृह्यते इत्यादिना स्वयमेव वक्ष्यते । उन्नेयतया विशिष्टविषयेऽविरोधित्वविशेषणं यथाश्रुतशब्दलभ्यं तदर्थस्तादृशविषयताकान्यत्वं तन्निवेशेऽधिकविषयतादिनिवेशाद्गौरवं काञ्चनमयो ह्रदो वह्निमानित्यादौ काञ्चनमयत्वाभाववद्ध्रदादिरूपाश्रयासिद्धिभेदस्य सत्प्रतिपक्षदोषोन्नेयवह्न्यभावविशिष्टह्रदादिरूपबाधेऽसत्त्वेनाव्याप्तिश्चेति उन्नेयतावच्छेदकविशिष्टबाधविषयतायां विशिष्टपक्षादिग्रहप्रतिबन्धकतानवच्छेदकत्वनिवेशः । उक्तस्थले बाधग्रहस्यापि अनुमितिरूपविशिष्टपक्षादिग्रहविरोधितया अव्याप्तितादवस्थ्यमिति विशिष्टपक्षग्रहत्वव्यापकत्वनिवेशः । विशिष्टपक्षग्रहत्वपर्याप्तावच्छेदकताकत्वस्य प्रतिबध्यतायां निवेशे काञ्चनमयरजतमयह्रदो वह्निमानित्यादौ आश्रयासिद्ध्युन्नायके काञ्चनमयत्वाभावव्याप्यह्रदादावतिव्याप्तिः रजतमयत्वघटितपक्षतावच्छेदकविशिष्टग्रहत्वस्य तज्ज्ञानप्रतिबध्यतानवच्छेदकत्वादतः तदुपेक्ष्य तादृशग्रहत्वव्यापकतायाः तत्र निवेशः । अत एव ह्रदो वह्निमानित्यादौ ह्रदत्वादिपक्षतावच्छेदकत्वविशिष्टविषयकग्रहत्वस्य केवलस्य कस्यापि प्रतिबध्यतानच्छेदकत्वेऽपि नाप्रसिद्धिः । न च तादृशग्रहत्वव्यापकप्रतिबध्यतानवच्छेदकत्वविशिष्टविषयतानिवेशेऽपि कस्या अपि विरोधिज्ञानप्रतिबध्यतायाः ह्रद इति निर्धर्मितावच्छेदकज्ञानसाधारणतादृशग्रहत्वव्यापकत्वासम्भवात्तथाविधप्रतिबध्यत्वाप्रसिद्धिः विशिष्टविषयकानुमितित्वव्यापकतानिवेशे तादृशानुमितित्वस्य निर्धर्मितावच्छेदकज्ञानावृत्तित्वेऽपि ह्रदो वह्निमान्ह्रदो घटवानित्यादिनानाप्रकारकानुमितिष्वेव ह्रदत्वादिविशिष्टविषयकानुमितित्वसत्त्वात् तादृशसकलानुमितीनां कस्यचिज्ज्ञानस्य प्रतिबध्यत्वासंभवेन तादृशानुमितित्वव्यापकप्रतिब-

ध्यता न प्रसिध्यतीति वाच्यम् । कामिनीजिज्ञासादिप्रतिबध्यताया एव तथाविधानुमितित्वादिव्यापिकायाः प्रसिद्धेः ।

वस्तुतस्तु विरोधित्वघटकप्रतिबध्यतायामेव पक्षतावच्छेदकादिविशिष्टविषयकानुमितित्वाव्यापकत्वनिवेशान्न प्रसिद्धिरिति पूर्वमेवावेदितम् । एतेन यत्र कामिनीत्वस्य पक्षतावच्छेदकता तत्र तद्विशिष्टविषयकानुमितित्वादेः कामिनीजिज्ञासाप्रतिबध्यत्वाव्याप्यत्वेऽपि न क्षतिः ।

अथोन्नेये विशिष्टपक्षादिग्रहाविरोधित्वनिवेशेऽपि वन्ह्यभावव्याप्यव्याप्याभाववान् ह्रदो वन्हिमानित्यत्र वन्ह्यभावव्याप्यव्याप्यविशिष्टे ह्रदे आश्रयासिद्ध्यात्मकेऽतिव्याप्तिर्दुर्वारैव तस्य वन्ह्यभावव्याप्यविशिष्टह्रदात्मकसत्प्रतिपक्षस्य विशिष्टपक्षग्रहाविरोधिनः उन्नायकत्वात् आश्रयासिद्धित्वेन अनुमितिविरोधित्वेन सत्यन्तदलाक्रान्तत्वाच्च । न चोन्नायक एव विरोध्यन्तं विशेषणं विवक्षितम्, उक्ताश्रयासिद्धेश्च विशिष्टपक्षग्रहविरोधितया नातिव्याप्तिरिति वाच्यम् । तथासति वह्निमान्ह्रदो वन्ह्यभावव्याप्यव्याप्याभाववानित्यत्र वन्ह्यभावव्याप्यव्याप्यविशिष्टह्रदात्मके बाधेऽनुमितिविरोधिवन्ह्यभावव्याप्यविशिष्टह्रदरूपाश्रयासिद्ध्युन्नायकेऽतिव्याप्तेः तस्य वह्निविशिष्टपक्षात्मकविशिष्टपक्षग्रहाविरोधित्वादिति चेन्न । उन्नेये उन्नायके चाविरोध्यन्तस्य विशेषणतोपगमेनातिप्रसङ्गस्य वारणीयत्वात् ।

अथवा उन्नेयविशेषणमेवाविरोध्यन्तम् यद्धर्मावच्छिन्नप्रतिबध्यताघटितं विरोधित्वं सत्यन्तार्थः, तद्धर्मावच्छिन्नप्रतिबध्यताघटितविरोधिताया उन्नेयविशेषणतया विवक्षितत्वात् पूर्वोक्तस्थले वन्ह्यभावव्याप्यव्याप्यविशिष्टह्रदात्मकाश्रयासिद्धेः विशिष्टपक्षग्रहविरोधितावच्छेदकावच्छिन्नत्वेन सत्यन्तदलाक्रान्तायास्तद्रूपावच्छिन्नाविरोधिनः सत्प्रतिपक्षस्यैवोन्नायकत्वेन नातिव्याप्तिः, उन्नेयबाधस्योन्नायकसत्प्रतिपक्षस्य च विशिष्टपक्षसाध्यवैशिष्ट्यग्रहत्वरूपैकधर्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयताकत्वेन सत्प्रतिपक्षस्थले लक्षणसमन्वय इति उन्नेयेऽविरोध्यन्तविशेषणं वह्निव्याप्याभावसाध्यके वह्निव्याप्यवत्पक्षात्मकबाधस्य विशिष्टपक्षादिग्रहाविरोधिवह्निमत्पक्षस्योन्नायकस्य वारकमिति वक्ष्यते । तत्र यथाश्रुताविरोध्युन्नायकत्वं प्रतिबन्धकतावच्छेदकविषयताविशिष्टविषयतावच्छिन्नानुमितिप्रयोजकत्वं तत्र प्रतिबन्धकतावच्छेदकविषयतानिरूपकविषयतात्वेन निवेशनं शिरोवेष्टनेन

नासिकास्पर्शमनुकरोतीति प्रतिबन्धकतावच्छेदकाविषयतावच्छिन्नानुमितिप्रयोजकत्वं निवेशितम् । उक्तस्थले वह्निव्याप्यवत्पर्वतरूपबाधस्य वह्निमत्पर्वतविषयकसमूहालम्बनरूपवह्निव्याप्यवत्पर्वतरूपविरोधिविषयकानुमितिप्रयोजकतया अतिप्रसङ्गः स्यादिति विरोधिविषयतावच्छिन्ननिरूपितप्रयोजकत्वं निवेशितम् । अनुमितिजनकत्वरूपमुन्नायकत्वं न विषयस्येति अनुमितिजनकतावच्छेदकविषयिताकत्वरूपमनुमितिप्रयोजकत्वं वात्र तदित्याह उन्नायकत्वं चेति । यादृशविशिष्टविषयकत्वेनेति तृतीयार्थोऽनतिरिक्तवृत्तित्वरूपमवच्छेदकत्वम् । तन्निवेशाद्वह्निव्याप्यवत्पर्वतरूपोक्तस्थलीयबाधे सत्प्रतिपक्षविषयकसमूहालम्बनविषये सत्प्रतिपक्षैकदेशे केवलपक्षादौ च नातिव्याप्तिः स्वरूपसम्बन्धरूपावच्छेदकत्वनिवेशे सत्प्रतिपक्षैकदेशे केवलपक्षादावनतिरिक्तवृत्तित्वरूपावच्छेदकत्वघटितसत्यन्तार्थाभावेनातिव्याप्तिविरहेऽपि ह्रदो वह्निमानित्यादौ वह्न्यभावव्याप्यव्याप्योभयविशिष्टह्रदादिविषयकज्ञानीयवह्न्यभावविशिष्टह्रदादिविषयताया अनुमितिप्रतिबन्धकतानतिरिक्तवृत्तेर्वह्न्यभावव्याप्यव्याप्यत्वावच्छिन्नविषयतानिरूपितह्रदत्वावच्छिन्ननिरूपितविषयतात्वेन विरोध्युन्नायकतावच्छेदकतया वह्न्यभावविशिष्टह्रदादावतिव्याप्तेर्दुर्वारतयोन्नायकताशरीरेऽनतिरिक्तवृत्तित्वमवच्छेदकत्वं तत्र निवेश्यम् । अत्रेदृशावच्छेदकतानिवेशेऽपि सत्यन्तविरोधित्वशरीरे ईदृशावच्छेदकत्वं प्रवेश्यं न तु स्वरूपसम्बन्धरूपं, तथा सति उक्तस्थले वह्न्यभावव्याप्यव्याप्यविशिष्टह्रदादौ अतिव्याप्तिः तादृशविशिष्टविषयताया वह्न्यभावविशिष्टह्रदादिविषयत्वाभिन्नतया वह्न्यभावत्वावच्छिन्नविषयतानिरूपितह्रदत्वत्वावच्छिन्नविषयतात्वेन पक्षसाध्यवैशिष्ट्यग्रहप्रतिबन्धकतावच्छेदकत्वात् ।

तच्चेति । तादृशविशिष्टं चेत्यर्थः । साध्यव्यापकाभावप्रतियोगिप्रकृतहेतुमत्पक्षादौ मतभेदेन विरोधासाधारणरूपेऽतिव्याप्तिं वारयति असाधारणेति । प्रतिपक्षविधयेति । अनुमितिप्रतिबन्धकसाध्याभावव्याप्यवत्ताज्ञानविधयेत्यर्थः । सपक्षविपक्षव्यावृत्तत्वमसाधारण्यं साध्यासामानाधिकरण्यं विरोध इति मत अनुमित्यविरोधिनि तत्र नोक्तलक्षणातिव्याप्तिप्रसक्तिरतः पक्ष इत्युक्तम् । प्रतियोगित्वादित्यादिना पक्षधर्मतापरिग्रहः । तथा च प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षे प्रकृतसाध्यतावच्छेदकविशिष्टव्यापकाभावप्रतियोगित्वविशिष्टप्रकृतसाधनतावच्छेदकावच्छिन्नवैशिष्ट्यानवगाहिप-

रामर्शनिष्ठानुमितिजनकतावच्छेदकविषयताकत्वरूपमुन्नायकत्वं विवक्षणीयमित्यर्थः । रूपान्तरेण यत्र प्रकृतहेतोर्व्यतिरेकिप्रतिहेतुता तत्स्थलीयप्रतिपक्षस्य सङ्ग्रहाय प्रकृतसाधनतावच्छेदकनिवेशः। रूपान्तरावच्छिन्नप्रकृतसाध्यव्यापकीभूताभावप्रतियोगिताविशिष्टप्रकृतहेतुमत्पक्षकालीनत्वस्य यत्र साध्यतावच्छेदकघटकत्वं तत्स्थलीयतादृशसाध्यतावच्छेदकविशिष्टसाध्याभावव्याप्यवत्पक्षात्मकप्रतिपक्षसङ्ग्रहाय प्रकृतसाध्यतावच्छेदकनिवेशः। यत्र प्रकृतसाध्यव्यापकीभूताभावप्रतियोगित्वविशिष्टप्रकृतसाधनघटत्वेन रूपान्तरावच्छिन्नपक्षस्य प्रकृतपक्षतावच्छेदके प्रवेशः तत्रत्यसत्प्रतिपक्षस्य तादृशपक्षतावच्छेदकताविशिष्टे साध्याभावव्याप्यवत्तारूपस्य सङ्ग्रहाय प्रकृतपक्षतावच्छेदकनिवेशः। साध्याभावनिरूपितान्वयव्याप्तिविशिष्टप्रकृतहेतुमत्पक्षस्य लक्ष्यतोपगमान्न तत्रातिव्याप्तिः। तस्यासाधारण्यात्मकत्वे तदनवगाहित्वमपि परामर्शविशेषणं देयम्। तत्सङ्ग्राहकमप्यादिपदम् । सत्प्रतिपक्षोन्नायकस्येति। साध्याभावव्याप्यव्याप्यवत्पक्षादेरविरोधितयाऽनाभासरूपस्येत्यर्थः । आश्रयासिद्ध्याद्युन्नायकस्येति। आश्रयासिद्ध्याद्यन्तर्गतस्य पक्षविशेषणाद्यभावव्याप्यवत्पक्षादेरित्यर्थः। आश्रयासिद्ध्यादीत्यादिपदात् साध्याप्रसिद्ध्यादिपरिग्रहः। वन्ह्यादिसाध्यके बाधस्य किञ्चिदनुन्नायकतया उन्नेयविरोध्यन्तविशेषणस्य तद्वारकता न सम्भवतीति बाधविशेषे तद्व्यावृत्तिं दर्शयति विरोध्यन्तेनेति । वह्निव्याप्यवत्पक्षात्मकस्येत्यनेन वह्निमत्पक्षोन्नायकत्वं सूचितम् । अविरोध्यन्तसार्थक्याय प्रतिबध्यतायां स्वरूपसम्बन्धरूपपक्षसाध्यवैशिष्ट्यावगाहित्वावच्छिन्नत्वनिवेशासम्भवं दर्शयति संगृह्यत इति। अनेन लक्षणेन प्रतिस्थापनात्मकन्यायप्रयोगानौचित्यं दर्शयिष्यन् तस्यैव साम्प्रदायिकतामाह सत्प्रतिपक्षे चेति। यथासिद्धान्तमिति। नैयायिकादिप्रतिवादिनामित्यादिस्वसिद्धान्तानुसारेणेत्यर्थः । पञ्चावयववादीति। ह्रदत्वात् इत्यादिरूपेत्यादिः। आदिना मीमांसकसौगतसिद्धावयवन्यायपरिग्रहः। इच्छन्तीति । नैयायिकसाम्प्रदायिका इति शेषः। उचितं प्रतिभातीति। वादिना न्याये प्रयुक्ते हेतुदोषमात्रस्यैवाकाङ्क्षितत्वात्प्रथमतस्तमनुद्भाव्य विपरीतप्रतिज्ञादिप्रयोगेऽर्थान्तरस्य दुर्वारत्वादिति भावः॥

इति श्रीगदाधरभट्टाचार्यचक्रवर्तिकृतगादाधर्यां सत्प्रतिपक्षप्रकरणम्।

अथ श्रीमथुरानाथतर्कवागीशविरचितरहस्यसमन्वितं

असिद्धिप्रकरणम् ।

(चि०) असिद्धिस्तु न व्याप्तिपक्षधर्मताविरहः, प्रत्येकमननुगमात् । अथ प्रत्येकाभावेऽनुगतो व्याप्तिपक्षधर्मताविशिष्टाभावोऽसिद्धिः, यद्यपि विशिष्टस्यान्यत्वे प्रत्येकाभावाव्याप्तिरपसिद्धान्तश्च अनन्यत्वे प्रत्येकाभावएव स इत्यननुगमः, तथापि विशेषणावच्छिन्नप्रतियोगिको विशेष्याभावो विशेषणविशेष्यसम्बन्धाभावो वा विशिष्टाभावोऽनुगत इति चेत्, न । विशिष्टाभावाज्ञानेऽपि व्याप्त्यादिप्रत्येकाभावज्ञाने उद्भावने चानुमितिप्रतिबन्धो वादिनिवृत्तिश्चेति तत्प्रत्येकाभावाव्याप्तिः, अन्यथा तेषां हेत्वाभासान्तरतापत्तेः । न च विशिष्टाभावधीद्वारा प्रत्येकाभावो दोषो(१)न तु स्वत इति वाच्यम् । प्रत्येकाभावस्य स्वत एव दोषत्वसम्भवात् ।

अथ असिद्धिपूर्वपक्षरहस्यम् ।

(मा०) (२)व्याप्तीति । तथाच व्याप्तिपक्षधर्मत्वाभाववान् हेतुर-

---

(१) लभ्यत इति पाठान्तरम् ।

(२) अत्र श्रीमद्गदाधरभट्टाचार्यकृत व्याख्यानं आदितः संपूर्णं काशीस्थराजकीयभवनस्थादर्शभूते मूलपुस्तके न दृश्यते । काशीस्थराजकीयसंस्कृतपुस्तकालये मद्रासमसंस्कृतपुस्तकालये तथा वङ्गदेशवासिनां प्राचीननैयायिकानामपि पुस्तकेषु गादाधर्या असिद्धिप्रकरणमस्माभिर्महता प्रयासेन गवेषणायां कृतायामपि नोपलब्धम् । अतो मूलचिन्तामणिपाठार्थावगतये कलिकातास्थ एशियाटिकसोसाइटीयन्त्रालये मुद्रितापि माथुरी दत्ता । अतः परमपि कैश्चिद्विद्वद्वर्यैः रत्नस्या गादाधरी दीयते चेन्मुद्रापयिष्यत इति निवेदयामः ॥ सं० ॥

सिद्ध इति भावः। अत्र घटो द्रव्यं सत्त्वादित्यादौ व्याप्यत्वासिद्धेः संग्रहाय व्याप्यत्वस्य जलह्रदो वह्निमान् धूमादित्यादौ(१) स्वरूपासिद्धेः संग्रहाय च पक्षधर्मत्वस्य प्रवेशः। व्याप्तिश्च साध्याभाववदवृत्तित्वे सति साध्यसामानाधिकरण्यरूपा ग्राह्या न तु हेतुव्यापकसाध्यसामानाधिकरण्यरूपा द्रव्यं सत्त्वादित्यादिव्याप्यत्वासिद्धस्थले तत्प्रसिद्ध्याऽसम्भवापत्तेः। पक्षधर्मत्वं च हेतुतावच्छेदकसम्बन्धेन पक्षवृत्तित्वम्, तेन ह्रदो वह्निमान् धूमादित्यादौ स्वरूपासिद्धे कालिकादिसम्बन्धेन हेतोः पक्षवृत्तित्वेऽपि न क्षतिः। व्याप्तिपक्षधर्मतयोः प्रत्येकाभावद्वयमसिद्धिः व्याप्तिविशिष्टपक्षधर्मत्वाभावो वा? आद्ये इह प्रत्येकमिति। प्रत्येकाभावस्येत्यर्थः। अननुगमात्–सर्वासिद्ध्यसाधारणत्वात्। ह्रदो वह्निमान् धूमादित्यादिस्वरूपासिद्धे व्याप्यत्वाभावस्य घटो द्रव्यं सत्त्वादित्यादिव्याप्यत्वासिद्धे च पक्षधर्मत्वाभावस्यासत्त्वादित्यभिप्रायः। अन्त्याभिप्रायेणाशङ्कते अथेति। प्रत्येकाभावे अनुगतःप्रत्येकाभावमात्रवत्यपि वर्त्तमानः। प्रत्येकाभावाव्याप्तिरिति। प्रत्येकाभावमात्रवत्यव्याप्तिरित्यर्थः। ननु विशिष्टस्यातिरिक्तत्वेऽपि तदभावः प्रत्येकाभावस्थलेऽपि वर्त्तत एवेति नाव्याप्तिरित्यत आह अपसिद्धान्तश्चेति। अननुगम इति तदवस्थ इति शेषः। अनुगत इति। प्रत्येकाभावमात्रवत्यपि वर्तमान इत्यर्थः। निवृत्तिश्चेति। व्याप्त्यादिप्रत्येकाभावद्वयस्याप्यसिद्धितयेति शेषः। तत्प्रत्येकाभावाव्याप्तिरिति। व्याप्त्यादिप्रत्येकाभावद्वयेऽसिद्धिलक्षणाऽव्याप्तिरित्यर्थः। विशिष्टाभावत्वस्याऽसिद्धिरूपत्वात्तस्य च प्रत्येकाभावयोरसत्त्वादिति शेषः।

इदमुपलक्षणम्। अयोगोलकं धूमवद्वह्नेः ह्रदो वह्निमान् धूमादित्यादौ बाधसङ्कीर्णाऽसिद्धेऽसिद्धिलक्षणस्याप्यव्याप्तिः तत्र विशिष्टस्याप्रसिद्धतया तदभावस्याप्यसिद्धेरित्यपि बोध्यम्।

ननु प्रत्येकभावज्ञानस्यानुमितिप्रतिबन्धकत्वेऽपि न तस्यासिद्धित्वमतो नाव्याप्तिरित्यत आह अन्यथेति। तेषां–प्रत्येकाभावानां, हेत्वाभाससामान्यलक्षणाक्रान्तानामिति शेषः। साध्यादिभेदेन व्याप्त्यादीनां नानात्वाद्बहुवचनम्। प्रत्येकाभावः–प्रत्येकाभावज्ञानं,न तु स्वतः–न तु साक्षात्, तथा च हेत्वाभाससामान्यलक्षणमेव तत्र नास्ति अ-

(१) अयोगोलकं वह्निमद्धूमादित्यादाविति पाठान्तरम्।

नुमितितत्कारणपरामर्शयोः साक्षात्प्रतिबन्धकत्वस्य तल्लक्षणाघटकत्वादिति भावः। स्वत एव—साक्षादेव, ग्राह्याभावागाहित्वादिति भावः। इद-मुपलक्षणम् आश्रयासिद्धि—साध्याविशेषणासिद्धि—साधनाविशेषणासिद्धि—हेत्वसिद्धिषु चाव्याप्तिरित्यपि बोध्यम् ।

(चि०) वस्तुतो विशिष्टाभावो दोष एव न प्रत्येकस्य समर्थत्वे तेनैवान्यथासिद्धेर्व्यर्थविशेषणत्वात् प्रत्येकाभावमज्ञात्वा न विशिष्टाभावज्ञानमित्युपजीव्यत्वाद्विशिष्टाभावानुद्भावनेऽपि प्रत्येकोद्भावने वादिनिवृत्तेश्च। अत एव व्याप्तिपक्षधर्मताविशिष्टज्ञानविषयाभावत्वं प्रत्येकाभावानुगतमसिद्धत्वम्, व्यभिचारादावसिद्धत्वेऽप्युपजीव्यत्वेन प्राथम्यात्तदुद्भावने वादिनिवृत्तेश्च स स्वत एव दूषकः, तत्र व्याप्त्यसिद्ध्यर्थमुपाधौ तूद्भाविते विप्रतिपद्यतेऽपि, तस्य दुर्ग्रहत्वात् व्यभिचारेणैव तदन्वयाच्च, यदि च व्यभिचारादिकमज्ञात्वाप्यसिद्धिबुद्धिः, तथाऽप्युपधेयसङ्करेऽप्युपाधेरसङ्कर एवेति निरस्तम्। व्यर्थविशेषणत्वादेव । एतेन व्याप्तिपक्षधर्मतान्यतराभावोऽसिद्धिरिति प्रत्युक्तम्, अन्यतरत्वाज्ञानेऽपि प्रत्येकाभावस्य दोषत्वात् व्यर्थविशेषणत्वाच्च ।

(दी०) वस्तुत इत्याद्यभ्युच्चयमात्रम् विशिष्टपरामर्शविरोधित्वेन विशिष्टाभावस्य दोषताया दुर्वारत्वात् । प्रत्येकाभावमज्ञात्वापि शब्दादिना शक्यग्रहत्वात् । व्यर्थविशेषणत्वस्य चासाधकतासाधन एव सम्भाव्यत्वात्। न वा तदपि, तादृशाभावनिष्ठव्याप्तेर्धर्मान्तरेणावच्छेत्तुमशक्यत्वात् विशेष्यादिप्रतियोगिकत्वमात्रस्य व्यभिचारिसाधारणत्वादिति ।

(मा०) दोष एव नेति। हेत्वाभास एव नेत्यर्थः। कुतस्तद्विशेषोऽसि-

स्थिरिति शेषः । प्रत्येकस्य-प्रत्येकाभावस्य, समर्थत्वे—दूषणसमर्थत्वे, आभासत्वेति यावत् । अन्यथासिद्धेरिति । विशिष्टाभावस्य हेत्वाभासत्वं विनापि विशिष्टाभाववत्साधनस्य दुष्टत्वव्यवहारोपपत्तेरित्यर्थः । विशिष्टाभाववदिति प्रत्येकाभावस्याप्यावश्यकत्वादिति भावः । ननु साध्यव्याप्यो हेतुः पक्षवृत्तिरित्याकारकविशकलितव्याप्तिपक्षधर्मतोभयविषयकपरामर्शस्यानुमितिहेतुत्ववादिनां प्राचां नये साध्यव्याप्यत्वे सति पक्षवृत्तित्ववान् हेतुरिति व्याप्तिविशिष्टपक्षधर्मताप्रकारकपरामर्शस्याप्यनुमितिहेतुतया तद्विरोधित्वेन विशिष्टाभावस्यापि हेत्वाभासत्वं दुर्वारं विनिगमकाभावेन तादृशविशिष्टप्रकारकपरामर्शप्रतिबन्धकत्वस्यापि सामान्यलक्षणघटकत्वात्, साध्यव्याप्यहेतुमान् पक्ष इति पक्षविशेष्यकपरामर्शस्यैवानुमितिहेतुत्वमिति नव्यमतानुयायित्वे व्याप्तिविशिष्टपक्षधर्मत्वयोर्द्वयोः प्रत्येकाभावस्यापि दोषत्वाभ्युपगमासङ्गतेः पक्षवृत्तित्वाभावज्ञानस्य तादृशपक्षविशेष्यकपरामर्शाप्रतिबन्धकत्वादित्यरुचेराह व्यर्थविशेषणत्वादिति । इदमसाधकं व्याप्तिविशिष्टपक्षधर्मत्वाभावादित्यसाधकत्वानुमाने पक्षधर्मत्वाभावादित्यस्यैव सम्यक्त्वेन व्यर्थविशेषणत्वादित्यर्थः । तथा च हेत्वाभासत्वस्यासाधकताव्याप्यत्वानियमात् व्यर्थविशेषणतया च विशिष्टाभावे तदभावान्न तस्य हेत्वाभासत्वम् । न चैवं तत्र सामान्यलक्षणातिव्याप्तिरिति वाच्यम् । तस्य हेत्वाभासत्वाभावेनाऽनायत्या विशकलितव्याप्तिपक्षधर्मतोभयविषयताशालिपरामर्शप्रतिबन्धकत्वस्यैव सामान्यलक्षणे निवेशनीयत्वादिति भावः । नन्विदमप्ययुक्तं व्यर्थविशेषणत्वेऽपि व्याप्तिमत्त्वाद्विशिष्टाभावत्वस्य प्रत्येकाभावत्वाघटिततया विशिष्टाभावस्यातिरिक्तत्वेन धूमप्रागभाववद्भिन्नधर्मिकतया च वैयर्थ्यशङ्कानवकाशादित्यरुचेराह प्रत्येकाभावेति । उपजीव्यत्वादिति । प्रत्येकाभावज्ञानस्योपजीव्यत्वादित्यर्थः । तथा च प्रत्येकाभावज्ञानस्योपजीव्यतया प्रत्येकाभाव एव हेत्वाभासो न तु विशिष्टाभावस्तज्ज्ञानस्य प्रत्येकाभावज्ञानोपजीवकत्वात्, सामान्यलक्षणे चानायत्या विशकलितव्याप्तिपक्षधर्मतोभयविषयताशालिपरामर्शप्रतिबन्धकत्वस्यैव निवेशान्नातिव्याप्तिरिति भावः । नन्विदमप्ययुक्तं प्रत्येकाभावमन्तरापि(१)प्रत्यक्षशब्दाभ्यां लि-

(१) मज्ञात्वापीति पाठान्तरम्

ङ्गान्तरजन्यानुमानेन च विशिष्टाभावज्ञानसम्भवात्। न च तथापि प्रत्येकाभावलिङ्गकानुमानेन विशिष्टाभावज्ञानं प्रति प्रत्येकाभावज्ञानस्योपजीव्यत्वमस्त्येवेति वाच्यम्। विशिष्टाभावलिङ्गकानुमानेन प्रत्येकाभावज्ञानं प्रति विशिष्टाभावज्ञानस्याप्युपजीव्यत्वेन क्वाचित्कोपजीव्योपजीवकभावस्याविशेषादित्यरुचेराह विशिष्टाभावानुद्भावनेऽपीति। एतदप्यापाततः, एवं सति विरुद्धत्वादेरपि हेत्वाभासत्वं न स्यात् तदनुद्भावनेऽपि बाधस्वरूपासिद्ध्यादेरुद्भावने वादिनिवृत्तेः। न च तत्र बाधादेरनुद्भावनेऽपि विरुद्धत्वमात्रोद्भावने वादी निवर्त्ततेऽतो विरुद्धत्वस्यापि हेत्वाभासत्वम्, अत्र तु प्रत्येकाभावानुद्भावने विशिष्टाभावमात्रोद्भावनेऽपि न वादिनिवृत्तिरिति न विशिष्टाभावस्य दोषत्वमिति वाच्यम्। विशिष्टाभावमात्रोद्भावनेऽपि वादिनिवृत्तेः तस्मात्साध्यव्याप्यत्वे सति पक्षवृत्तित्ववान् हेतुरिति परामर्षस्याप्यनुमितिहेतुत्ववादिनां प्राचां नये व्याप्तिविशिष्टपक्षधर्मत्वाभाववद्धेतुरपि हेत्वाभासः स च व्याप्यत्वासिद्धावेवान्तर्भूत इति तत्त्वम्। अत एवेति। निरस्तमित्यनेनान्वयः। व्याप्तीति। व्याप्तिपक्षधर्मतोभयमात्रमुख्याविशेष्यकबुद्धिमुख्याविशेष्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावत्वमित्यर्थः। नातो विशेषाभावसामान्याभावविकल्पाभ्यामतिव्याप्त्यसम्भवशङ्कावकाशः। अधिकं तु सिद्धान्ते वक्ष्यामः। प्रत्येकाभावानुगतमिति। व्याप्तिपक्षधर्मतयोः प्रत्येकाभावद्वये वर्त्तमानत्वमित्यर्थः। असिद्धत्वं–असिद्धित्वम्। नन्वेवं व्यभिचारादेः कथं दोषत्वं तद्वति हेतौ असिद्धेरावश्यकत्वेन तस्यैव दोषत्वसम्भवादित्यत आह व्यभिचारादाविति। व्यभिचारादिमति हेतावित्यर्थः। आदिना विरोधपरिग्रहः। उपजीव्यत्वेनेति। असिद्धत्वज्ञानं प्रति लिङ्गज्ञानविधया व्यभिचारादिज्ञानस्योपजीव्यत्वेनेत्यर्थः। प्राथम्यात्–प्रथमोपस्थितत्वात्तदुद्भावने–व्यभिचारादिमात्रोद्भावने, विरोधित्वाविशेषाच्चेत्यपि द्रष्टव्यम्। सः सोऽपि व्यभिचारादिरपीति यावत्। नन्वेवमसिद्धिज्ञानोपजीव्यग्राहकत्वेनोपाधिरपि हेत्वाभासान्तरं स्यात् इत्यत आह तत्रेति। व्यभिचारादिमति हेतावित्यर्थः। व्याप्त्यसिद्ध्यर्थं–व्याप्त्यज्ञानार्थम्। उपाधौ त्विति। तुशब्दो भिन्नक्रमेउद्भावित इत्यनन्तरं योज्यः। विप्रतिपद्यतेऽपीति। व्याप्तौ विप्रतिपद्यतेऽपीत्यर्थः। विप्रतिपत्तिर्भ्रमः, तथाचोपाध्युद्भावनेऽपि व्याप्तिभ्रमोदयात्तस्य सा-

क्षाद्विरोधित्वाभावेन हेत्वाभासान्तरत्वमिति भावः। किञ्चोपाधिज्ञानं नासिद्धिज्ञानोपजीव्यं, किन्तु तद्व्यभिचारज्ञानमेवेत्याह तस्येति। असिद्धत्वस्येत्यर्थः। दुरूहत्वात्-उपाधेर्दुर्ज्ञेयत्वात्, व्यभिचारेणैव-उपाधिव्यभिचारेणैव, तदुन्नयनादग्निवदुन्नयनात्। एतच्चापाततः व्यभिचारितासम्बन्धेन उपाधेरप्युन्नायकत्वसम्भवात् तथाप्युपाधिव्यभिचारस्यैव हेत्वाभासान्तरताया दुर्वारत्वाच्च, किन्तु पूर्वोक्तयुक्तिरेव समीचीनेति द्रष्टव्यम्। असिद्धिबुद्धिरिति। प्रत्यक्षशब्दाभ्यां लिङ्गान्तरजन्यानुमानेन चासिद्धबुद्धिरित्यर्थः। उपधेयेति। उपधेययोः-असिद्धव्यभिचारिणोर्धर्मिणोः, सङ्करेऽपि-अभेदेऽपि, उपाधेः-असिद्धत्वव्यभिचारित्वादेर्धर्मस्य, असंकर एव-ज्ञानासंकर एव, परस्परग्रहकालीनग्रहाविषयत्वमेवेति यावत्। तथा चासिद्धत्वाग्रहदशायामपि व्यभिचारादिमात्रज्ञानात् व्याप्तिज्ञानानुदयेन तस्यापि स्वतःप्रतिबन्धकत्वमावश्यकमेवेति भावः। अत एवेति विवृणोति व्यर्थेति। तथाविधबुद्धिमुख्यविशेष्यतावच्छेदकत्वरूपस्य विशेषणस्य दूषकतायामप्रयोजकत्वात् तथाविधबुद्धिमुख्यविशेष्यतावच्छेदकप्रकारकज्ञानस्यानुमितितत्करणपरामर्शविरोधित्वादिति यावत्। येन रूपेण ज्ञानमनुमितितत्करणपरामर्शान्यतरप्रतिबन्धकं तदेव च विभाजकतावच्छेदकमित्यभिमानः।

यद्वा 'व्यर्थविशेषणत्वात्' अयं हेतुरसाधकः निरुक्तबुद्धिमुख्यविशेष्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववत्त्वादित्यसाधकतानुमाने निरुक्तबुद्धिमुख्यविशेष्यतावच्छेदकरूपस्य विशेषणस्य व्यर्थत्वात् व्याप्तित्वावच्छिन्नप्रतियोगिताकाभाववत्त्वेनैव व्याप्यत्वाभावस्य पक्षधर्मतात्वावच्छिन्नप्रतियोगिताकाभाववत्त्वेनैव पक्षधर्मत्वाभावस्य हेतुत्वसम्भवादित्यर्थः। असाधकतानुमापकतावच्छेदकरूपमेव च विभाजकतावच्छेदकमित्यभिमानः। एतच्चापाततः विरोधितावच्छेदकरूपमेव विभाजकतावच्छेदकमिति नियमे मानाभावात् विरोधितावच्छेदकरूपेणापि पूर्वव्यभिचारादेर्विभजनात्। एवमसाधकतानुमापकतावच्छेदकरूपमेव विभाजकतावच्छेदकमिति नियमेऽपि मानाभावात् व्यर्थविशेषणत्वस्य व्याप्यत्वविघटकतया तत्त्वेऽपि असाधकतानुमापकत्वसम्भवाच्च। तथाविधबुद्धिमुख्यविशेष्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववत्त्वस्य व्याप्तित्वाद्यवच्छिन्नप्रतियोगिताका-

भावत्वाघटिततया व्यर्थविशेषणताशङ्काया अप्यनवकाशाच्च ।

वस्तुतस्तु (१ तत्रापि आश्रयासिद्धि–साध्यविशेषणासिद्धि–हेतुविशेषणासिद्धि–हेत्वसिद्धिष्वव्याप्तिरेव दोषो बोध्यः। एवमग्रेऽपि। व्याप्तीति । व्याप्तित्वपक्षधर्मतात्वान्यतरधर्मावच्छिन्नप्रतियोगिताकाभावोऽसिद्धिरित्यर्थः। यद्वाऽन्यतरपदव्यत्यासेन व्याप्तिसामान्याभावपक्षधर्मतासामान्याभावयोरन्यतरोऽसिद्धिरित्यर्थः । यथाश्रुते सामान्याभावविशेषाभावविकल्पाभ्यामव्याप्त्यतिव्याप्तिप्रसङ्गस्य दुर्वारत्वादिति ध्येयम् । प्रत्येकाभावस्येति । प्रत्येकाभावत्वप्रकारेण प्रत्येकाभावज्ञानस्येत्यर्थः। दोषत्वात्–प्रतिबन्धकत्वात्, प्रत्येकाभावाद्यज्ञाने चान्यतरत्वप्रकारकज्ञानस्याप्रतिबन्धकत्वादिति शेषः । तथा च विरोधितानवच्छेदकतया कथमस्य विभाजकतावच्छेदकत्वमित्यभिमानः । व्यर्थेति । असाधकतानुमानेऽन्यतरत्वरूपस्य विशेषणस्य व्यर्थत्वादित्यर्थः । प्रत्येकं व्याप्तित्वाद्यवच्छिन्नप्रतियोगिताकाभावत्वेनैव गमकत्वसम्भवादिति भावः ॥

(चि०) यत्तु व्याप्तिपक्षधर्मताप्रमितिविरह आश्रयासिद्ध्याद्यनुगतोऽसिद्धिः, तत्प्रमितिसत्त्वे तत्रानुमित्यापत्तेरिति । तदपि व्यर्थविशेषणत्वात् तदज्ञानेऽपि प्रत्येकज्ञानस्य दोषत्वाच्च निरस्तम् ।

वस्तुतस्तु प्रकृतहेतुव्याप्तिपक्षधर्मतावैशिष्ट्यस्य तत्प्रमितेश्चाप्रसिद्ध्या तदभावो ज्ञातुमुद्भावयितुञ्चाशक्य एव । यत्किञ्चिद्व्याप्तिपक्षधर्मताविशिष्टप्रमितिविरहः सद्धेतुसाधारणः स्वप्रमितिविरहो यत्किञ्चित्प्रमितिविरहो वा सद्धेतावपि सकलतत्प्रमितिविरहो दुर्निरूपः व्याप्त्यभावादेव तद्ग्रहे स एव दोष उपजीव्यत्वात । यदि च प्रमितिविरहः स्वरूपसन्नेव दोषः कारणाभावत्वात् तदा व्याप्त्यादिभ्रमादनुमितिर्न स्यात न स्याच्च हेत्वाभासता ज्ञानगर्भतल्लक्षणाभावात् । एतेन व्याप्ति-

(१) अत्रापीति मु० पु० पाठ ।

प्रमितिपक्षधर्मताप्रमितिविरहान्यतरत्वमसिद्धिः, अन्यतरत्वञ्च तदन्यान्यत्वं तेनोभयविरहेऽपि नाव्याप्तिरिति–निरस्तम् । व्यर्थविशेषणत्वादेव ।

(मा०) व्याप्तिपक्षधर्मतेति । हेतुतावच्छेदकावच्छिन्नहेतुविशेष्यकसाध्यतावच्छेदकावच्छिन्नसाध्यनिरूपितव्याप्तिविशिष्टपक्षतावच्छेदकावच्छिन्नपक्षधर्मताप्रकारकभ्रमभिन्नज्ञानविरह इत्यर्थः । आश्रयासिद्ध्याद्यनुगत इति । आश्रयासिद्ध्यादिरूपसकलासिद्धिव्यापक इत्यर्थः । तत्र तादृशज्ञानस्य पक्षतावच्छेदकांशे भ्रमत्वनियमादिति भावः । आदिना स्वरूपासिद्धिसाध्यसाधनविशेषणासिद्धिव्याप्यत्वासिद्धीनां परिग्रहः । तत्प्रमितिसत्त्व इति । आश्रयासिद्ध्यादिषु तादृशपक्षधर्मत्वप्रकारकज्ञानस्य भ्रमभिन्नत्व इत्यर्थः । अनुमितिप्रामित्यापत्तेरिति । अनुमितेरपि भ्रमभिन्नत्वापत्तेरित्यर्थः । एवं च तादृशज्ञानविरहवान् हेतुरसिद्ध इत्यसिद्धलक्षणमिति भावः । तदपीति निरस्तमित्यनेनान्वयः निरासे हेतुमाह व्यर्थेति । विशेषणस्य–प्रमित्यंशस्य, व्यर्थत्वात्–दूषकतायामप्रयोजकत्वादित्यर्थः । परामर्शे प्रमितेरविशेषणतया तद्भावज्ञानस्याप्रतिबन्धकत्वादिति भावः । हेत्वन्तरमाह तदज्ञानेऽपीति । प्रत्येकज्ञानस्य–व्याप्त्यभावादिप्रत्येकज्ञानस्य, तथा च प्रत्येकाभावस्याप्यसिद्धितया तत्राव्याप्तिरिति भावः ।

प्रत्येकाभावेष्वसिद्धिलक्षणस्याव्याप्तिमभिधाय साधनविशेषणासिद्ध्यादिस्थले हेतुतावच्छेदकविशिष्टहेत्वादेरप्रसिद्ध्याऽसिद्धलक्षणस्यासम्भवमाह वस्तुतस्त्विति । प्रकृतहेत्विति । हेतुतावच्छेदकविशिष्टहेतोरित्यर्थः । एतदप्रसिद्धिश्च पर्वतो वह्निमान् काञ्चनमयधूमादित्यादिसाधनविशेषणासिद्धिस्थले बोध्या । व्याप्तीति । साध्यतावच्छेदकविशिष्टसाध्यनिरूपितव्याप्तेरित्यर्थः । एतदप्रसिद्धिश्च पर्वतः काञ्चनमयवह्निमान् धूमादित्यादिसाध्यविशेषणासिद्धिस्थले बोध्या । पक्षधर्मतेति । पक्षतावच्छेदकविशिष्टपक्षनिरूपितधर्मत्वस्येत्यर्थः । एतदप्रसिद्धिश्च काञ्चनमयः पर्वतो वह्निमान् धूमादित्याद्याश्रयासिद्धिस्थले बोध्या । वैशिष्ट्यस्येति । व्याप्तिपक्षधर्मतोभयवैशिष्ट्यस्येत्यर्थः । एतदप्रसिद्धिश्चायोगोलकं धूमवद्वह्नेः ह्रदो वह्निमान् धूमादित्यादिबाधसंकीर्णासिद्धिस्थले बोध्या । न च 'वैशिष्ट्यस्ये'त्यत्र द्वन्द्व-

समासे बहुवचनापत्तिः समाहारद्वन्द्वस्य नियतविषयतयाऽत्र तदसम्भवादिति वाच्यम्। 'सर्वत्र द्वन्द्वे(१) विभाषयैकवचनं भवतीति' पाणिन्यनुशासनादितरेतरद्वन्द्वेऽप्येकवचनसम्भवात्। न चैवं धवखदिरमित्यपि प्रयोगापत्तिरिति वाच्यम्। 'द्वन्द्वैकत्व'मिति सूत्रेण द्वन्द्वस्यैकवचनत्वे नपुंसकलिङ्गत्वावश्यकत्वबोधनात्। न चैवं समाहारेतरेतरयोः को भेद इति वाच्यम्। समाहारद्वन्द्वस्य समाहारत्वप्रकारकबोधजनकत्वेनैव भेदात् तस्यैव(२) च नियतविषयत्वादित्यलमधिकेन। नन्वत्र हेतुतावच्छेदकादिवैशिष्ट्यं वैज्ञानिकं न तु वास्तविकं ग्राह्यं येन साधनविशेषणासिद्ध्यादिस्थलेऽप्रसिद्धिः स्यात्, तथा च हेतुतावच्छेदकरूपेण हेतौ साध्यतावच्छेदकरूपेण साध्यव्याप्यत्वं पक्षतावच्छेदकरूपेण पक्षधर्मत्वं चावगाहते या साध्यव्याप्यो हेतुः पक्षवृत्तिरित्याकारिका भ्रमभिन्ना प्रतीतिस्तद्विरहवत्त्वमसिद्धत्वमिति फलितार्थ इत्यत आह तत्प्रमितेश्चेति। असिद्धिस्थले भ्रमभिन्नतादृशप्रतीतेश्चेत्यर्थः। ननु व्याप्तिपक्षधर्मताप्रमितिपदेन प्रकृतहेतुविशेष्यकप्रकृतसाध्यनिरूपितव्याप्त्यादिप्रमितिर्न विवक्षिता, किन्तु यत्किञ्चित्साध्यनिरूपितव्याप्तिविशिष्टयत्किञ्चित्पक्षधर्मत्वप्रकारकयत्किञ्चिद्धेतुविशेष्यकप्रमितिरेव विवक्षिता तद्विरहश्च न तत्सामान्याभावः किन्तु तत्प्रतियोगिकाभावमात्रं तेन हेत्वन्तरे साध्यान्तरीयव्याप्त्यादिप्रमितिसत्त्वदशायां नाव्याप्तिरित्यत आह यत्किञ्चिद्व्याप्तीति। यत्किञ्चिदिति पक्षेऽपि सम्बध्यते। यत्किञ्चिन्निरूपितव्याप्तिविशिष्टयत्किञ्चित्पक्षधर्मत्वप्रकारकयत्किञ्चिद्धेतुविशेष्यकप्रमितिप्रतियोगिकाभाव इत्यर्थः। ननु हेतुतावच्छेदकरूपेण हेतौ साध्यतावच्छेदकरूपेण साध्यनिरूपितव्याप्यत्वं पक्षतावच्छेदकरूपेण पक्षधर्मत्वं चावगाहते या प्रतीतिर्भ्रमानिरूपितविशेष्यतावच्छेदकतासम्बन्धेन हेतुतावच्छेदके तदभावोऽसिद्धिः भ्रमानिरूपितविशेष्यतावच्छेदकतासंबन्धावच्छिन्नतादृशप्रतीत्यभाववद्धेतुतावच्छेदकवान् हेतुरसिद्ध इति न कोऽपि दोष इत्यत आह स्वप्रमितीति। भ्रमानिरूपितविशेष्यतावच्छेदकतासम्बन्धेन स्वीयतादृशप्रतीतिविरहो वा विवक्षितः तेन सम्बन्धेन यस्यकस्यचित्पुरुषस्य तादृशप्रतीतिविरहो वा तेन सम्ब-

(१) सर्वो द्वन्द्वो इति मु० पु० पाठ।

(२) तथैवेति मु० पु० पाठ।

न्धेन तादृशप्रतीतिसामान्याभावो वा ? नाद्यौ सङ्केतावपि सत्त्वात्।
नान्त्यौ दुर्ज्ञेयत्वात्। परकीयप्रतीतेरयोग्यत्वादित्यर्थः। ननु व्या-
प्त्यभावादिहेतुना स्वपरसाधारणतादृशप्रतीत्यभावो ज्ञेय इत्यत
आह व्याप्त्यभावादिति। ननु स्वरूपसम्बन्धं प्रतिबन्धकोऽसौ
दुर्ज्ञेयत्वेऽपि न क्षतिरित्यत आह यदि चेति। प्रमितिविरहः-प्रमानि-
रूपितविशेष्यतावच्छेदकतासम्बन्धेन तादृशप्रतीतिसामान्याभावः।
तदेति। असिद्धे हेताविति शेषः। तादृशाभावस्य प्रतिबन्धकस्य
सत्त्वादिति भावः। तल्लक्षणाभावादिति। हेत्वाभाससामान्यलक्ष-
णाभावादित्यर्थः। अन्यतरत्वमिति। अन्यतरवत्त्वमित्यर्थः। यथा-
श्रुते अन्यतरत्वस्यासिद्धिधर्मतयाऽसिद्धिरित्यस्यानन्वयापत्तेः। न-
न्वन्यतरवत्त्वं प्रत्येकमात्रवत्त्वं तथा च प्रमितिद्वयाभावस्थले-
ऽव्याप्तिरित्यत आहान्यतरत्वमिति। एतेनेति विवृणोति व्यर्थवि-
शेषणत्वादेवेति पूर्ववत्॥

**(चि०) स्यादेतत् व्याप्तिपक्षधर्मताभ्यां निश्चयः सिद्धि-
स्तदभावोऽसिद्धिः, अत एवाव्याप्तेऽपक्षधर्म्मे च तदा-
रोपरूपासिद्धिरित्यनुमितिः, न तु व्याप्तपक्षधर्म्मादपि
तदनिश्चये। न चैवं हेतोराभासत्वं तदाभासस्यापि
हेतुत्वं स्यात्, दशाविशेष इष्टत्वात्। सेयं स्वरूपसती
दूषिका कारणाभावत्वात्। न च व्याप्त्यादिप्रत्येक-
निश्चयाभाव एव दूषक आवश्यकत्वादिति वाच्यम्।
विशिष्टनिश्चयस्य हेतुत्वे तदभावस्य कार्य्यानुत्पाद-
कत्वादिति।**

**मैवम्। एवं सव्यभिचारादेरप्यत्रैवान्तर्भावप्रस-
ङ्गात्। असिद्धेः स्वरूपसत एव दोषत्वे स्वज्ञानार्थं व्य-
भिचाराद्यनुद्भावनात्। यदि च तस्मात् सिद्धिर्नोपप-
द्यत इति तस्योपजीव्यत्वं तदाश्रयासिद्ध्यादिज्ञानात्
सिद्धेर्नेति स एव पृथग्दोषः स्यात्। असिद्धेश्च ज्ञा-**

ता परस्योद्भाव्येति स्वज्ञानार्थमुद्भाविता सिद्धिर्निर्व्वाहार्थञ्चाश्रयासिद्ध्यादिज्ञानमावश्यकम्। कथञ्च हेतुतदाभासविवेकः? सिद्धौ द्वयोरपि हेतुत्वात् असिद्धौ तदाभासत्वात्, व्यभिचारादेः सद्धेतौ सिद्धिमखण्डयतश्च हेत्वाभासत्वाभावात् ॥

(दी०) व्यभिचारादेरिति। सद्धेतौ—सद्धेतुत्वेन ज्ञायमाने, तदानीं सिद्धेरप्रतिबन्धेऽपि कालान्तरगृहीतेन व्यभिचारादिना तदानीन्तनाभासत्वं सुग्रहमिति ध्येयम् ॥

(मा०) व्याप्तीति। स्वीयव्याप्तिपक्षधर्मतोभयप्रकारकनिर्णय इत्यर्थः। तदभावः—विषयतासम्बन्धेन प्रकृतहेतौ तदभावः। व्याप्त्यादिभ्रमादनुमितिर्न स्यादिति पूर्वोक्तबाधकमुद्धरति अत एवेति। यत एव विषयतासामान्येन भ्रमप्रमासाधारणस्वीयतदुभयप्रकारकनिर्णयसामान्याभावोऽसिद्धिर्न तु भ्रमानिरूपितविषयतासम्बन्धेन स्वपरसाधारणतादृशनिर्णयाभावोऽत एवेत्यर्थः। तदा—व्याप्त्यादिभ्रमदशायां, सिद्धिः—व्याप्तिपक्षधर्मतोभयप्रकारकनिर्णयः। तदनिश्चय इति। स्वीयतदुभयप्रकारकनिर्णयाभाव इत्यर्थः। पुरुषान्तरीयतदुभयनिर्णयादनुमितिरिति शेषः। न चैवमिति। एवं—स्वीयतदुभयनिर्णयाभावस्यासिद्धित्वे, हेतोरपि—पर्वतो वह्निमान् धूमादित्यादौ सद्धेतोरपि स्वीयतदुभयनिर्णयाभावदशायामिति शेषः। तदाभासस्यापि—पर्वतो वह्निमान् आकाशादित्याद्यसिद्धहेतोरपि, स्वीयभ्रमात्मकतदुभयनिर्णयदशायामिति शेषः। हेतुत्वं—सद्धेतुत्वम्। न च भ्रमात्मकतदुभयनिर्णयदशायामपि असाधारण्यविरोधान्यतरस्य हेत्वाभासत्वप्रयोजकस्यावश्यं सत्त्वेन सद्धेतुत्वासम्भव इति वाच्यम्। पक्षवृत्तित्वे सति साध्यव्यापकीभूताभावप्रतियोगित्वरूपस्यासाधारण्यस्य वृत्तिमत्त्वे सति साध्यवद्वृत्तित्वरूपस्य पूर्वोक्तविरोधस्य च तत्रासत्त्वादिति भावः।

केचित्तु हेतुत्वस्यासिद्धिशून्यहेतुत्वमित्यर्थ इत्याहुः। सेयमिति। पूर्वोक्तं च न हेत्वाभासलक्षणमिति भावः। नचेति। न तूभयप्रकारकनिर्णयाभाव इति भावः। आवश्यकत्वात्—कारणाभावत्वेन तस्य

दोषताया आवश्यकत्वात् । विशिष्टेति तदुभयप्रकारकनिर्णयस्येत्यर्थः । तदभावस्य-तदभावस्यापि । कार्य्यानुत्पादकत्वादिति । कार्य्यानुत्पत्तिप्रयोजकत्वादित्यर्थः ।

अत्रैवेति । असिद्धावेवेत्यर्थः । व्याप्तिपक्षधर्मतानिर्णयाभावेनैवानुमित्यभावसम्भवादिति भावः । ननु प्रतिबन्धकीभूताऽसिद्धिज्ञानोपजीव्यतया व्यभिचारादिर्दोष इत्यत आह असिद्धेरिति । स्वज्ञानार्थं-प्रतिबन्धकीभूतासिद्धिज्ञानार्थम्, अनुद्भावनात्-अनपेक्षणात् । ननु प्रतिबन्धकीभूतासिद्धिज्ञानं प्रति व्यभिचारादेरनुपजीव्यत्वेपि असिद्धिस्वरूपे तस्योपजीव्यत्वमस्त्येव व्याप्तिपक्षधर्मतानिर्णयरूपसिद्धिप्रतिबन्धकत्वेनैवासिद्धिस्वरूपोपजीव्यत्वादतः पृथग् दोषत्वमित्यत आह यदि चेति । तस्मात्-व्यभिचारादिज्ञानात् । सिद्धिः-व्याप्तिपक्षधर्मतानिर्णयः । तस्य-व्यभिचारादेः, उपजीव्यत्वं-असिद्धिस्वरूपे उपजीव्यत्वम्, स एवेति एवकारो भिन्नक्रमे दोष इत्यनन्तरं योज्यः, स पृथक् दोष एव स्यादित्यर्थः । असिद्धिस्वरूपे उपजीव्यत्वात् तथाच हेत्वाभासाधिक्यापत्तिरिति भावः । नन्वसिद्धिपूर्वमाश्रयासिद्ध्यादिज्ञानाभावात्तस्य नोपजीव्यत्वं, न च व्यभिचारादावपि तुल्यं, तज्ज्ञानार्थं तत्स्वरूपनिर्वाहार्थं च तत्पूर्वं तज्ज्ञानस्यावश्यकत्वादित्यत आह असिद्धिश्चेति । आश्रयासिद्ध्यादिज्ञानम्-आश्रयासिद्ध्यादिज्ञानमपि । दूषणान्तरमाह कथंचेति । कथं वेत्यर्थः । हेतुतदाभासविवेक इति । पर्वतो वह्निमान् धूमादित्यादेरसद्धेतुभिन्नत्वेन पर्वतो वह्निमान् आकाशादित्यादेश्च सद्धेतुभिन्नत्वेन व्यवहार इत्यर्थः । सिद्धाविति । व्याप्तिपक्षधर्मतानिर्णयस्वरूपासिद्धिमत्त्व इत्यर्थः । हेतुत्वात्-सद्धेतुत्वात्, आभासत्वात्-दुष्टत्वासद्धेतुत्वात् । अन्योन्याभावस्तु नाव्याप्यवृत्तिरिति भावः । किञ्च यदि व्यभिचारादेरसिद्धिस्वरूपं प्रत्युपजीव्यतयैव हेत्वाभासत्वं तदा व्यभिचार्य्यादिहेतौ सद्धेतुताग्रहदशायां व्यभिचारादेः सिद्धिविघटकत्वाभावेनासिद्धिस्वरूपोपजीव्यत्वाभावात्तस्य तदानीन्तनहेतुदोषत्वाभावप्रसङ्गः, तस्य तदानीन्तनहेत्वाभासत्वाभावे तत्सम्बन्धेन तद्वतो हेतोरपि तदानीन्तनहेत्वाभासत्वं न स्यात्, तथा च व्यभिचार्य्यादिहेतोर्नित्यदुष्टत्वभङ्गप्रसङ्ग इति दूषणान्तरमाह व्यभिचारादेरिति । सद्धेतोः-व्यभिचार्य्यादिहेतोः सद्धेतुत्वग्रहदशायां व्यभिचार्य्यादिहेतोर्व्यां-

प्तिपक्षधर्मतानिर्णयदशायामिति यावत् । सिद्धिमखण्डयतः—व्याप्तिपक्षधर्मतानिर्णयरूपां सिद्धिमविघटयतः, हेत्वाभासत्वाभावात्तदानीन्तनहेतुदोषत्वाभावप्रसङ्गात्, भिन्नक्रमश्चकारोऽत्रैव योज्यः । न चेष्टापत्तिः तथासति तत्संबन्धेन तद्वतो हेतोरपि तदानीन्तनहेत्वाभासत्वासंभवात् व्यभिचार्यादिहेतोर्नित्यदुष्टत्वभंगापत्तिरिति भावः । एतच्चापाततः व्यभिचारादेस्तदानीं सिद्धिप्रतिबन्धकफलानुपहितत्वेऽपि सिद्धिप्रतिबन्धस्वरूपयोग्यत्वस्य तदानीमपि सत्त्वादेव तदानीन्तनहेतुदोषत्वसम्भवात् तत्सबन्धेन तद्वतो हेतोरपि तदानीन्तनहेत्वाभासत्वस्य सुग्रहत्वात्, अन्यथा सिद्धान्तिनयेऽपि व्याप्तिपक्षधर्मतानिर्णयात्मकसिद्धिविघटकतयैव व्यभिचारादेर्हेतुदोषतयैतदनुयोगस्य तुल्यत्वात् ।

केचित्तु-हेतुतदाभासविवेक इति । पर्वतो वह्निमान् धूमादित्यादेरसद्धेतुभिन्नत्वेन द्रव्यं सत्त्वात् गोत्ववानश्वत्वात् इत्यादेश्च सद्धेतुभिन्नत्वेन व्यवहार इत्यर्थः । सिद्धावित्यादिग्रन्थस्तु पूर्ववत् । ननु सिद्धिसत्त्वे द्वयोरपि सद्धेतुत्वादिरमयुक्तं सिद्धिसत्त्वेपि द्रव्यं सत्त्वादित्यादेर्व्यभिचारादिहेतुदोषवत्त्वेन दुष्टत्वादित्यत आह व्यभिचारादेरिति । अप्यर्थकाग्रिमचकारोऽत्रैव योज्यः । व्यभिचारादेरपीत्यर्थः । सद्धेतौ—सद्धेतुत्वग्रहसत्त्वे व्याप्तिपक्षधर्मतानिर्णयरूपसिद्धिसत्त्वे इति यावत् । सिद्धिमखण्डयतः— व्याप्तिपक्षधर्मतानिर्णयरूपां सिद्धिमविघटयतः, हेत्वाभासत्वाभावात्-हेत्वाभासत्वप्रयोजकत्वासम्भवाद्भवन्मते सिद्धिविघटकत्वरूपस्यासिद्ध्युपजीव्यत्वस्यैव व्यभिचारादेर्हेतुदोषत्वप्रयोजकत्वादिति भावः-इति व्याचक्षुः ॥

(चि०) अथ सुषुप्तौ जागरेऽपि व्याप्तिपक्षधर्मतासत्त्वे तदनिश्चयेऽनुमित्यनुत्पादो हेत्वाभासप्रयोज्यः सव्यभिचारादौ तथाऽवधारणादित्यसिद्धिरज्ञातापि हेत्वाभासः । न चैवं हेत्वाभासाधिक्यं क्लृप्तान्तर्भावो वा, तेन रूपेण व्याप्त्यासिद्ध्यादेरेव संग्रहादिति चेन्न ।

एवं सव्यभिचारादिरप्यसिद्धिः स्यादित्युक्तत्वात्, उपजीवनाद्भेदे आश्रयासिद्ध्यादिरपि पृथक् स्यात्। सुषुप्त्यादावनुमित्यभावः कारणाभावात् कार्यानुत्पादो हि न प्रतिबन्धकमात्रात्, किन्तु कारणाभावादपि असत्यपि प्रतिबन्धके वह्न्यभावेन दाहानुत्पत्तेः।

अथानुमित्यनुत्पादो हेत्वाभासप्रयुक्त एवेति चेत्, तर्ह्यनुमितौ मनोयोगादिरपि न हेतुः, हेत्वाभासादेवानुमित्यनुत्पादे तद्व्यतिरेकेणानुमित्यनुत्पादाभावात्, सिद्धेरेव तद्धेतुत्वे चरमकारणमेव हेतुः स्यात्॥

(दी०) तेन रूपेण—तत्साधारणरूपेण। वह्न्यभावेनेति। वह्न्यभावस्तु न प्रतिबन्धकः कारणीभूतो योऽभावस्तत्प्रतियोगिन एव तथात्वात्। यदभावत्वेन कारणत्वं तदेव तथेत्यपि कश्चित्॥

(मा०) व्याप्तिपक्षधर्मतासत्त्व इति। व्याप्तिपक्षधर्मतासत्त्वेपीत्यर्थः। तथावधारणादिति। अनुमित्यनुत्पादस्य हेत्वाभासप्रयोज्यत्वावधारणादित्यर्थः। अज्ञातापीति। तथानुमित्यनुत्पादस्य हेत्वाभासप्रयोज्यत्वान्यथानुपपत्तेरिति(१) भावः। हेत्वाभासाधिक्यमिति। आश्रयासिद्ध्यादेरतिरिक्तहेत्वाभासत्वमित्यर्थः। कल्प्यमानान्तर्भाव इति। कल्प्यमानानां व्यभिचारादीनामसिद्ध्यन्तर्भाव इत्यर्थः। तेन रूपेण—तत्साधनाश्रयासिद्ध्याद्यन्यतमत्वरूपेण। व्याप्यत्वासिद्ध्यादेरेवेति। व्याप्तिनिर्णयाभावादेरित्यर्थः। संग्रहात्—विभागस्थासिद्धिपदेन संग्रहात्, एवकाराद्व्यभिचारादिव्यवच्छेदः।

असिद्धिः स्यादिति। असिद्धित्वेनैव सूत्रकृता विभक्ता स्यादित्यर्थः। उपजीवनादिति। असिद्धिस्वरूपं प्रत्युपजीव्यत्वादित्यर्थः। भेदे—पृथग्विभजने, पृथक् स्यात्—पृथग् विभक्ता स्यात्। नन्वेवं व्याप्तिपक्षधर्मतासत्त्वेपि सुषुप्त्यादौ कथमनुमित्यभावः हेत्वाभासाभावादित्यत आह सुषुप्त्यादाविति। कारणाभावात्—परामर्शात्मक-

(१) °न्यथानुपपत्त्येति मु० पु० पाठः।

कारणाभावात् । कारणाभावादपि—भावरूपकारणाभावादपि । न हेतुरिति । स्यादिति शेषः, अनुमित्यनुत्पादे—अनुमित्यनुत्पादाभ्युपगमे । तद्व्यतिरेकेणेति । आत्ममनोयोगादिव्यतिरेकेणेत्यर्थः । तद्व्यतिरेकेण कार्य्यानुत्पादस्तस्यैव च कारणत्वादिति भावः । नन्विदमिष्टमेवेत्यत आह सिद्धेरेवेति । व्याप्तिपक्षधर्म्मतानिर्णयस्यैवेत्यर्थः । हेतुः स्यादिति । सर्वत्र हेतुः स्यादित्यर्थः । तथा च कार्य्यं निष्कारणकं स्यादिति भावः । इदमापाततः भवन्मतेऽपि कथमात्ममनोयोगो हेतुः इतरकारणसत्त्वे तद्व्यतिरेकेणानुमितिव्यतिरेकासिद्धेः । अथानुमित्यादिकमसमवायिकारणवद्भावकार्य्यत्वादित्यनुमानात् तत्सिद्धिस्तदा ममापि तुल्यम्, चरमे सत्यपि कार्य्यं सकरणमिति व्याप्तिबलात् व्याप्तिज्ञानादेः करणतासिद्धेः, अन्यथा तवापि व्याप्तिज्ञानादिकं करणं न स्यात्परामर्शादिचरमकारणे सति तद्व्यतिरेकेण कार्य्यव्यतिरेकाभावात्, परमार्थतस्तु तादृशव्याप्तिप्रयोजिकेत्येव तत्त्वम् ॥

(चि०) अन्ये तु गमकतौपयिकप्रतिद्वन्द्विव्याप्तिपक्षधर्मताविरहतन्नियतयोरन्यतरत्वं हेत्वाभासत्वम् । तत्राधिकसमानबलौ बाधप्रतिरोधौ प्रतिद्वन्द्विनौ, व्याप्तिपक्षधर्मताविरहश्चासिद्धिः तन्नियतौ च सव्यभिचारविरुद्धौ । न चानयोरप्यसिद्ध्यन्तर्भावः, व्याप्तिविरहनियतत्वेन ज्ञातयोः स्वातन्त्र्येणैव दूषकत्वात् भ्रमे विशेषदर्शनस्येवेति ।

तन्न । अत्रापि व्याप्तिपक्षधर्मताविरह एवासिद्धिः पर्यवस्यति । तत्र चोक्तमेव । अन्यतरत्वञ्च न लक्षणं व्यर्थविशेषणत्वात्, हेत्वाभासान्तरबहिष्कृतस्य व्याप्तिपक्षधर्मतानिश्चयविरोधिनो रूपस्य विवक्षितत्वात्, तच्चाश्रयासिद्ध्यादिकमेवेति ॥

इत्यसिद्धिपूर्वपक्षचिन्तामणिः ।

(मा०) केचित्तु हेत्वाभाससामान्यलक्षणं तद्विशेषलक्षणानि च प्रकारान्तरेणाहुस्तन्मतमुपन्यस्यति अन्ये त्विति । अत्र गमकतौपयिकप्रतिद्वन्द्वी च व्याप्तिपक्षधर्मताविरहश्च गमकतौपयिकप्रतिद्वन्द्वि-व्याप्तिपक्षधर्म्मताविरहं तादृशपक्षधर्म्मताविरहं च तन्नियतश्च तादृशपक्षधर्म्मताविरहतन्नियतौ तयोरित्येकवचनान्तसमाहारद्वन्द्वगर्भ इतरेतरद्वन्द्व इति न बहुवचनापत्तिरिति द्रष्टव्यम् । तथा च गमकतौपयिकप्रतिद्वन्द्विव्याप्तिपक्षधर्मताविरहतद्व्याप्यानामन्यतमत्वं हेत्वाभाससामान्यलक्षणमित्यर्थः । गमकतौपयिकप्रतिद्वन्द्वित्वं च साक्षादनुमितिप्रतिबन्धकत्वम् । गमकतौपयिकस्याबाधितत्वासत्प्रतिपक्षितत्वस्य विरोधित्वमित्यपि कश्चित् ।

तत्र–तेषु मध्ये । अधिकबलसमानबलाविति । अधिकबलसमानबलौ बाधप्रतिरोधाविति योजनया समानबलप्रतिद्वन्द्वी प्रतिरोधः अधिकबलप्रतिद्वन्द्वी बाध इत्यर्थः । समानबलप्रतिद्वन्द्वित्वं बाधनिर्णयत्वाद्यनवच्छिन्नसाक्षादनुमितिप्रतिबन्धकतावच्छेदकत्वम्, असाधारणत्वमप्येतन्मते प्रतिरोधान्तर्गतमेव । तन्निर्णयत्वाद्यनवच्छिन्नत्वेनापि या प्रतिबन्धकता विशेषणीया । अधिकबलप्रतिद्वन्द्वित्वं च साध्याभावव्याप्यवत्तानिर्णयत्वाद्यनवच्छिन्नसाक्षादनुमितिप्रतिबन्धकतावच्छेदकत्वमिति भावः । तन्नियतौ–व्याप्तिपक्षधर्मताव्याप्यौ । सव्यभिचारेति धर्मप्रधानो निर्देशः । ननु यदि तौ तन्नियतौ तदा तद्व्यनद्वारैव दोषत्वसम्भवेन कथं तयोः पृथक् दोषत्वमुपेयते इत्याशंक्य निराकरोति न चेति । असिद्ध्यन्तर्भावः असिद्ध्युपनयनद्वारा दूषकत्वम्, अनयोर्व्यभिचारविरुद्धयोः । स्वातन्त्र्येणैवेति । व्याप्त्यादिविरहानिर्णाय विनैवेत्यर्थः । व्याप्तिविरहव्याप्यत्वेनेत्युपलक्षणम् व्यभिचारित्वादिनेत्यपि बोध्यम् ।

नन्वेवं व्याप्तिपक्षधर्मताविरहत्वमेवासिद्धिलक्षणं पर्य्यवसितं नच दूषितमेवेत्यत आह अत्रापीति । अस्मिन्मतेपीत्यर्थः । उक्तमितिः । अननुगतरूपं दूषणमित्यर्थः (१)। नन्वन्यतरत्वेनानुगमोऽस्त्वित्यत आहान्यतरत्वं चेति । व्यर्थेति । असाधकतानुमाने अन्यतरत्वरूपविशेषणस्य व्यर्थत्वादित्यर्थः । प्रत्येकं व्याप्तित्वाद्यवच्छिन्नप्रतियो-

(१) मितिशेष इति मु० पु० पा० ।

गिताकाभावत्वेनैव गमकत्वसम्भवादिति भावः । ननु विशिष्टाभाव एव सामान्यलक्षणघटको न तु व्याप्त्यादिप्रत्येकाभावः तथा च विशिष्टाभावस्यैवासिद्धित्वेन व्याप्त्यादिप्रत्येकाभावस्यातथात्वात्ननुगम इत्यत आह हेत्वाभासान्तरेति । बहिष्कृतस्य-भिन्नस्य, विवक्षितत्वात्-अत्र शास्त्रेऽसिद्धित्वेन विवक्षितत्वात् । आश्रयासिद्ध्यादिकमेवेति । न तु विशिष्टाभाव इत्यर्थः । आदिपदात् व्याप्त्यादिप्रत्येकाभावपरिग्रहः ॥

इति असिद्धिपूर्वपक्षरहस्यम् ॥

(चि०) उच्यते-आश्रयासिद्धिः स्वरूपासिद्धिः व्याप्यत्वासिद्धिश्च प्रत्येकमेव दोषः-प्रत्येकस्य ज्ञानादुद्भावनाच्चानुमितिप्रतिबन्धात्, न तु विशिष्टाभावः परामर्शविषयाभावो वा व्यर्थविशेषणत्वात्, तस्य ज्ञानमुद्भावनं विनाप्यनुमितिप्रतिबन्धात्, अनुभवसिद्धे हि लक्षणं न तु लक्षणानुरोधेनानुभवकल्पना । परामर्शविषयाभावत्वेनानुगतेन त्रयाणामसिद्धत्वेन सङ्ग्रहो महर्षिणा कृत इति न विभागविरोधो हेत्वाभासाधिक्यं वा । अत एव-"ये व्याप्तिविरहपक्षधर्मताविरहरूपास्तेऽसिद्धिभेदमध्यमध्यासते, तदन्ये च यथायथं व्यभिचारादयः" इति सिद्धान्तप्रवादोऽपि । न चैवं साक्षात्प्रतिबन्धकत्वेन बाधप्रतिरोधयोर्व्याप्तिविरहलिङ्गत्वेन सव्यभिचारविरुद्धयोरपि संग्रहे विभागव्याघातः, स्वतन्त्राभिप्रायस्य निषेद्धुमशक्यत्वात् । अन्यथा शास्त्रे परिभाषोच्छेदापत्तेः । सव्यभिचारादेरप्येवंरूपसत्त्वेऽप्युपजीव्यत्वेन पृथक्त्वम् उपधेयसङ्करेऽप्युपाधेरसङ्करात् ॥

(दी०) परामर्शेत्यादि । ननु परामर्शविषयाभाववत्त्वमनाभासे आभासत्वविशेषितमपि बाधविशेषे परामर्शविरोधित्वविशेषितञ्च हेतोः साध्यासामानाधिकरण्येऽतिप्रसक्तम्, अप्रसक्तञ्च साधनाद्यभाववत्पक्षादौ पक्षादेः साधनवदन्यत्वादौ साधनादेः पक्षादिवृत्त्यन्यत्वपक्षनिष्ठाभावप्रतियोगित्वादौ । अत एव यस्य यद्धर्म्मवत्त्वं परामर्शविषयस्तस्य तदभाववत्त्वं तदिति ग्रन्थमात्रानुगतं प्रत्युक्तम् । परामर्शविरोधित्वमात्रञ्च सव्यभिचारेऽतिप्रसक्तम् । न च तदन्यत्वेन विशेषणीयम्, नित्यो घटो द्रव्यं प्रमेयो वा जलत्वादित्यादौ तदर्थाप्रसिद्धेः । अथ पक्षतावच्छेदकरूपेण पक्षे हेतुतावच्छेदकरूपेण हेतोर्यद्विशिष्टज्ञानं साध्यतावच्छेदकविशिष्टसाध्यावगाहि तद्विरोधित्वं तदिति चेन्न । पक्षवृत्तित्वविशिष्टसाध्याव्यभिचरितसामानाधिकरण्याद्यभावाव्याप्तेः । न च विशिष्टपक्षविशिष्टसाधनवैशिष्ट्यविशिष्टसाध्यग्रहाविरोधियव्याप्तिग्रहविरोधि तदन्यत्वे सति परामर्शविरोधित्वं तत्, विशिष्टपक्षवैशिष्ट्योपादानाद्वह्निमान् वह्निमान् जलह्रदत्वादित्यादौ व्याप्तिग्रहविरोधिन्या अपि स्वरूपासिद्धेर्नासंग्रह इति वाच्यम् । जलह्रदो वह्निमान् काञ्चनमयवह्निमान् वा धूमात् काञ्चनमयधूमाद्वेत्यादौ व्याप्तिग्रहविरोधिनस्तादृशग्रहाविरोधिनो रूपस्यासिद्धेः ।

उच्यते (१) साधारण्यकथितासाधारण्यानुपसंहारित्वाभिन्नं

---

(१) अयमत्र जागदीशसम्प्रदायिको दीधितिपाठः । भवानन्दादिसम्मतस्तु—

साधारण्यासाधारण्यभिन्नं तज्ज्ञानस्य विषयतापरामर्शविरोधितावच्छेदकरूपमसिद्धिः । वह्निव्यभिचारिमेयत्ववान् वह्निसमानाधिकरणह्रदत्ववान् वा पर्वतो वह्निमान् मेयत्वात् ह्रदत्वादेत्यादौ आश्रयासिद्धिविरहेऽपि न क्षतिः असिद्धित्रयस्यासार्वत्रिकत्वात् आश्रयासिद्धिलक्षणस्य चासिद्धिघटितत्वान्नातिप्रसङ्गः । प्रकृतपक्षापर्यवसायकसाधारण्यादिभिन्नं वा वक्तव्यम् । परामर्शे चास्य व्याप्तिरुपादेया तेनानुपसंहारित्वव्युदासः । साध्यसाधनभेदेनाप्रसिद्धिभेदात् यत्र साधारण्यादिकमप्रसिद्धं तत्र तदन्यत्वं नोपादेयं यथा काञ्चनमयः पर्वतो ह्रदो वा वह्निमान् मेयो वा धूमवान् मेयत्वादित्यादौ पर्वतान्यः पर्वतो दहनान्यदहनवान् धूमान्यधूमादित्यादावसिद्धिसम्पादनाय हेत्वाभास-

ज्ञानस्य विषयतया परामर्शविरोधितावच्छेदकं रूपमसिद्धिः । यत्र साधारण्यादिकमप्रसिद्धं यत्र च वह्न्यव्यभिचारिमेयत्ववान् वह्निसमानाधिकरणह्रदत्ववान् वह्न्यभावव्यापकीभूताभावप्रतियोगिह्रदत्ववान् वा पर्वतो वह्निमान् मेयत्वात् ह्रदत्वाद्वेत्यादौ साधारण्यादिकमप्रसिद्धं तत्र तदन्यत्वं नोपादेयम् शब्दानुगमस्याकिञ्चित्करत्वात् । परामर्शे च व्याप्तिर्व्यतिरेकतोऽप्युपादेया, नातो व्यतिरेकव्याप्तिविशिष्टपक्षधर्मतत्वाभावादावव्याप्तिः । साधारण्याद्यनिरूपितया ज्ञानस्य विषयितया परामर्शविरोधितावच्छेदकरूपं वा असिद्धिः । अत एव द्रव्यत्वाव्यभिचारिगुणद्रव्योभयसमवेतवान् द्रव्यत्वसमानाधिकरणगुणसमवेतकर्म्मासमवेतवान् वा घटो द्रव्यं सत्त्वात् द्रव्यकर्म्मासमवेतसमवेताद्वेत्यादौ गुणद्रव्योभयसमवेतादिनिष्ठस्य द्रव्यत्वव्यभिचारित्वादेः सत्तादिनिष्ठद्रव्यत्वव्यभिचारित्वाद्यात्मकसाधारण्यादितोऽनतिरिक्तत्वेऽपि न क्षतिः । पर्वतान्यः पर्वतो दहनान्यदहनवान् धूमान्यधूमादित्यादावसिद्धिसम्पादनाय हेत्वाभासोक्ता रीतिरनुसर्त्तव्या । तत्र ज्ञानस्य विषयतया विशिष्टपक्षग्रहविरोधितावच्छेदकं रूपमाश्रयासिद्धिः । विशिष्टपक्षाविशिष्टसाधनग्रहाविरोधिनो ज्ञानस्य विषयतया तदुभयवैशिष्ट्यग्रहविरोधितावच्छेदकं स्वरूपासिद्धिः । संगृह्यते चेत्थमनित्यगगनं रूपवत् चाक्षुषस्पर्शवत्त्वादित्यादौ गगनादेर्निस्पर्शत्वादिकम् । एवं शब्दो द्रव्यं

त्तणोक्तरीतिरनुसरणीया । तत्र विशिष्टपक्षग्रहस्य विरोधिन्यसिद्धिर्विरोधिरूपं वाश्रयासिद्धिः । कृतपक्षप्रकृतहेतुग्रहाविरोधिनो ज्ञानस्य विषयतया तदुभयविशिष्टग्रहाविरोधितावच्छेदकं स्वरूपासिद्धिः । संगृह्यते चानेनानित्यं गगनं रूपवत् चक्षुःस्पर्शाश्रयत्वादित्यादौ निःस्पर्शादिकम् , एवं शब्दो द्रव्यं गुणान्यत्वे सति सत्त्वात् गुणान्यत्वविशिष्टसत्त्वं द्रव्यत्वव्यभिचारि गुणवृत्तित्वादित्यादावपि नाप्यसिद्धिः । तदुभयाभिन्नासिद्धर्व्याप्य वासिद्धिः पक्षादिभेदेनासिद्धिभेदात् यत्र श्रयासिद्ध्यादिकमप्रसिद्धं तत्र तदन्यत्वं न वक्तव्यमिति ॥

गुणान्यत्वे सति सत्त्वात्, गुणान्यत्वविशिष्टसत्त्वं द्रव्यत्वव्यभिचारि गुणवृत्तित्वादित्यादावपि नाव्याप्तिः । तदुभयभिन्नासिद्धिर्व्याप्यत्वासिद्धिः । पक्षादिभेदेनासिद्धेर्भेदाद्यत्राश्रयासिद्ध्यादिकमप्रसिद्धं तत्र तदन्यत्वं न वक्तव्यमिति ।

सविषयवृत्तिप्रकृतसाध्यसाधनग्रहविरोधितानवच्छेदकप्रकृतपक्षप्रकृतसाधनवैशिष्ट्यग्रहविरोधितावच्छेदकरूपशून्यज्ञानस्य विषयोऽसिद्धिर्व्याप्यत्वासिद्धिः । साध्यपदोपादानात् पर्वतः पर्वतवृत्तिह्रदत्ववान् ह्रदत्वादित्यादौ साध्याप्रसिद्धेर्नासंग्रहः । तस्याः स्वरूपासिद्धौ निवेशादनुपादेयमेव वा साध्यमित्यपि कश्चित् । साध्यत्वे त्वप्रसिद्धिव्याप्तिविशिष्टपक्षधर्म्मतादिविरहाद्यथेतद्भेदाः ।

यत्तु हेतुतावच्छेदकस्य व्याप्यतानवच्छेदकत्वमपि व्याप्यत्वासिद्धिः, नीलधूमत्वादेश्च तथात्वं समानाधिकरणसम्भवदवच्छेदकान्तरमपेक्ष्य गुरुत्वादिति । अत्रावच्छेदकत्वं यद्यनतिरिक्तवृत्तित्वं तदा तस्याप्यस्ति । अथ तादृशेन समानाधिकरणेन तादृशेन वा धर्म्मान्तरेणाघटितत्वे सति तत्त्वम् । तन्न । सत्यन्तस्य गौरवेणानुपादेयत्वात् । नापि अन्यूनानतिरिक्तवृत्तित्वम् आलोकाद्यवृत्तेर्धूमत्वादेरप्यतथात्वापातात् । अथ स्वरूपसम्बन्धविशेषः, तर्हि द्रव्यं रूपादित्यादौ रूपत्वादेरपि तथात्वं न स्यात् रूपादिषु चतुर्विंशतौ सम्भवदवच्छेदकमेकं गुणत्वमपेक्ष्य रूपत्वादीनां चतुर्विंशतेः षड्विंशतेर्वा गुरुत्वात् । एवं पशुमान् सास्नादिमत् इत्यादौ सास्नादिमत्त्वादेरपि गोत्वादिकां जातिमपेक्ष्य उपाधेर्गुरुत्वात् हेतुतावच्छेदकविशिष्टहेतुव्यापकसाध्यसमानाधिकरणतादृशहेतोः साध्याव्यभिचरितसम्बन्धितादृशहेतोर्वा ज्ञानस्यानुमितिकारणस्याविरोधिना निरुक्तानवच्छेदकत्व-

स्य दोषत्वायोगाच्च । परार्थस्थले तु दृष्टान्तस्य साध्यादिवैकल्यवत् हेतोर्व्यर्थविशेषणत्वमपि निग्रहस्थानविभाजकसूत्रस्थानुक्तसमुच्चयपरेण चकारेण समुच्चितं पृथगेव निग्रहस्थानम् ॥

इत्यसिद्धिदीधितिः ॥

अथासिद्धिसिद्धान्तरहस्यम् ॥

(मा०) ज्ञानादिति । प्रत्यक्षादितो ज्ञानादित्यर्थः । तेनोद्भावनादिति सङ्गच्छते । एवमग्रेपि । विशिष्टाभाव इति । व्याप्तिविशिष्टपक्षधर्मत्वाभाव इत्यर्थः । एतच्च साध्यव्याप्यहेतुमान् पक्ष इति पक्षविशेष्यकपरामर्शस्यैवानुमितिहेतुत्ववादिनां नव्यानां मतेन, साध्यव्याप्यत्वे सति पक्षवृत्तित्ववान् हेतुरिति परामर्शस्यापि हेतुत्वनये तु विशिष्टाभाववद्धेतुरपि दोष इत्युक्तमधस्तात् । परामर्शविषयाभावो वेति । परामर्शविषयप्रतियोगिकाभावत्वरूपेण व्याप्त्याद्यिप्रत्येकाभावो वेत्यर्थः । दोष इत्यनुषज्यते, व्यर्थविशेषणत्वात्–विशिष्टाभावत्वपरामर्शविषयप्रतियोगिकाभावत्वरूपस्य विशेषणस्य दूषकतायामप्रयोजकत्वात् । तेन रूपेण ज्ञानस्याप्रतिबन्धकत्वादिति यावत् नन्वेवं तद्रूपेण ज्ञानादिसत्त्वेपि अनुमितिः स्यादित्यत आह तस्येति प्रकारित्वं षष्ठ्यर्थः । तद्रूपेण ज्ञानमुद्भावनं चानुमितिप्रतिबन्धाद्विनापीति योजना । यत्र नानुमितिप्रतिबन्धस्तत्रापि तत्प्रकारकज्ञानमुद्भावनं च तिष्ठतीत्यर्थः । तथा च तद्रूपेण ज्ञानादिसत्त्वेऽपि अनुमितावविष्टापत्तिरिति भावः ।

केचित्तु तद्रूपेण ज्ञानस्यानुमितिप्रतिबन्धकत्वाभावे हेतुमाह तस्येति । तद्रूपेण ज्ञानमुद्भावनं च विनाप्यनुमितिप्रतिबन्धात्तेन रूपेण ज्ञानमनुमित्यप्रतिबन्धकमित्याहुः ।

तदसत् । तथा सति व्यभिचारादिज्ञानं विनापि अनुमितिप्रतिबन्धकव्यभिचारादिज्ञानस्याप्यप्रतिबन्धकत्वापत्तेरिति ध्येयम् ॥

ननु परामर्शप्रतियोगिकाभावत्वस्य महर्षिप्रणीतासिद्धिलक्षणतया तद्रूपेण ज्ञानादप्यनुमितिप्रतिबन्धो भवतीत्यनुभवः कल्प्यते इत्यत आहानुभवसिद्ध इति । लक्षणप्रकारकज्ञानादनुमितिप्रतिबन्धेऽ

प्रसिद्धे इत्यर्थः। लक्षणं—लक्षणस्यानुमितिप्रतिबन्धकतावच्छेदकत्वम्। ननु त्रयाणां प्रत्येकमेव दोषत्वे त्रितयसाधारणैकरूपाभावेन विभागस्य वा न्यूनत्वं त्रयाणां मध्ये कयोश्चिद्वयोर्हेत्वाभासव्यतिरिक्तत्वं वा स्यादित्यत आह, परामर्शविषयेति। परामर्शविषयाभावत्वरूपेणानुगतेनासिद्धत्वेन त्रयाणां संग्रह इति योजना। विरोधो—न्यूनत्वम्। हेत्वाभासाधिक्यं वेति। त्रयाणां मध्ये कयोश्चिद्वयोर्हेत्वाभासव्यतिरिक्तत्वं वेत्यर्थः।

ननु परामर्शविषयाभावत्वं परामर्शविषयत्वावच्छिन्नप्रतियोगिताकाभावत्वं तत्प्रतियोगिकाभावत्वमात्रं वा? नाद्यः—व्याप्त्यादिप्रत्येकाभावेऽव्याप्तेः तादृशाभावस्याप्रसिद्धेश्च। न ह्येवं पदार्थो यत्र परामर्शविषयो नास्ति, अन्ततः परामर्शविषयस्याभावस्यैव सर्वत्र वृत्तेः। न द्वितीयः—वैशिष्ट्यव्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकव्याप्त्याद्यभावे केवलसाध्याभावसाधनभावादौ चाभासेऽतिव्याप्तेः। अथ हेत्वाभासत्वे सति परामर्शविषयप्रतियोगिकाभावत्वमसिद्धित्वमतो नाभासभिन्नेऽतिव्याप्तिः। परामर्शपदं च साध्यव्याप्तिमच्चरितसम्बन्धिहेतुमान् पक्ष(१)इत्याकारकातिरिक्ताविषयकान्वयव्याप्तिघटितपरामर्शपरम्, अतो हेतुनिष्ठव्यतिरेकव्याप्त्यभावरूपेऽनुपसंहारित्वे नातिव्याप्तिः। सप्तमपदार्थरूपाभावस्य घटकतया(२) च हेतुनिष्ठसाध्याभाववद्वृत्तित्वरूपे साधारण्ये नातिव्याप्तिः तस्य भावत्वादिति चेत्। न। गोत्ववान् अश्वत्वादित्यादौ हेतोः साध्यसामानाधिकरण्याभावरूपे विरोधे ह्रदो वह्निमान् धूमादित्यादौ यत्र भावस्य साध्यता तत्र पक्षवृत्तिसाध्याभावरूपे बाधे गोत्वाभावः सास्नादिमान् गोत्वाभावादित्यादौ यत्राभावस्य पक्षता हेतुता च तत्र साध्याभाववत्पक्षरूपे बाधे साध्याभावव्याप्यवत्पक्षरूपे सत्प्रतिपक्षे साध्याभाववद्वृत्तिहेतुरूपे साधारण्ये साध्यासमानाधिकरणहेतुरूपे विरोधे चातिव्याप्तेः तेषां हेत्वाभासत्वात् परामर्शविषयप्रतियोगिकाभावत्वाच्च। यत्र च भावस्य पक्षता तत्र पक्षतावच्छेदकाभाववत्पक्षरूपाश्रयासिद्धौ साधनाभाववत्पक्षरूपासिद्धौ चाव्याप्तेः तस्याभावत्वाभावात्। एवं यत्र भावस्य साध्यता तत्र साध्यतावच्छेदकाभाव-

(१) साध्याभाववदवृत्तिसाध्यसमानाधिकरणहेतुमान् पक्ष इत्यर्थः।

(२) षट्पदार्थभिन्नस्वरूपस्याभावस्य घटकतयेति भावः।

वत्साध्यात्मकसाध्यविशेषणासिद्धौ यत्र भावस्य साधनता तत्र साधनतावच्छेदकाभाववत्साधनात्मकसाधनविशेषणासिद्धौ व्याप्त्यभाववत्साधनात्मकव्याप्तिविरहरूपासिद्धौ चाव्याप्तेः । अथ साध्याव्यभिचरितसम्बन्धिहेतुमान् पक्ष इत्याद्याकारकातिरिक्ताविषयकान्वयिपरामर्शेण यद्धर्मावच्छिन्ने यद्धर्मावच्छिन्नवत्त्वं विषयीक्रियते तद्धर्मावच्छिन्नप्रतियोगिताकाभाववत्तद्धर्मावच्छिन्नमसिद्धिरिति विवक्षितम । न चैवं हेतुनिष्ठपक्षवृत्त्यभावप्रतियोगित्वहेतुनिष्ठपक्षवृत्त्यन्यत्वादिरूपे स्वरूपासिद्ध्यादावव्याप्तिरिति वाच्यम्। समानप्रकारकज्ञानस्यैव प्रतिबन्धकत्ववादिनां नव्यानां नये साधनाभाववत्पक्षादेरेव स्वरूपासिद्ध्यादितया तस्य स्वरूपासिद्धत्वादिविरहादिति चेत् । न। साध्यसामानाधिकरण्याभाववद्धेतुरूपे विरोधे साध्याभाववद्वृत्तित्वाभाववद्धेतुरूपे साधारण्ये चातिव्याप्तेः, साधनात्यन्ताभाववत्पक्षादेरिव साधनात्यन्ताभावव्याप्यवत्पक्ष—साधनवद्भिन्नपक्ष--साधनवद्भेदव्याप्यवत्पक्षादेरपि स्वरूपासिद्ध्यादितया तत्राव्याप्तिश्चेति(१) ।

मैवम । परामर्शविषयाभावत्वपदेन परामर्शविरोधितावच्छेदकरूपत्वस्य विवक्षितत्वात्, परामर्शविरोधितावच्छेदकरूपत्वं तु निर्णयनिष्ठं यादृशविशिष्टनिरूपितविषयितासामान्यं परामर्शप्रतिबन्धकतानतिरिक्तवृत्ति तादृशविशिष्टत्वम् । हेत्वाभाससामान्यलक्षणोक्तादिशैवात्रापि तत्तद्दलप्रयोजनमवसेयम् ।

एतेनावच्छेदकत्वमत्र न स्वरूपसम्बन्धविशेषः माणिक्यमयः पर्वतो वह्निमान् धूमादित्यादौ माणिक्यमयत्वाभाववत्पर्वतादिरूपे आश्रयासिद्ध्यादावसम्भवापत्तेः पर्वतत्वादिरूपेण वस्त्वन्तरे माणिक्यमयत्वाभावत्वरूपेण यत्किञ्चिद्वस्तुज्ञानस्यापि वह्निव्याप्यधूमवान् माणिक्यमयः पर्वत इत्यादिपरामर्शप्रतिबन्धकतया प्रतिबन्धकतावच्छेदकपर्वताद्यप्रवेशात् । अत एव विषयितासम्बन्धेनान्यूनवृत्तित्वमपि न, नापि विषयितासम्बन्धेनानतिरिक्तवृत्तित्वं माणिक्यमयत्वाभाववत्पर्वतादिरूपाश्रयासिद्ध्यादेः केवलपर्वताद्यनतिरिक्ततया पर्वत इति केवलपर्वतादिविषयक(२)ज्ञानस्यापि विषयितासम्बन्धेन

(१) तत्राऽव्याप्त्यापत्तिश्चेति पाठान्तरम् ।

(२) निश्चयेपीति मु० पु० पा० ।

तत्सत्त्वात् असम्भवापत्तेरिति निरस्तम्। माणिक्यमय एव पर्वतो वह्निमान् इत्यादौ पर्वतत्वविशिष्टपर्वतनिरूपितस्य माणिक्यमयत्वाभाववान् पर्वत इति निर्णयनिष्ठस्य माणिक्यमयत्वाभाववत्पर्वतत्वविशिष्टपर्वतनिरूपितविषयित्वस्य परामर्शप्रतिबन्धकतानतिरिक्तवृत्तितया केवलपर्वतत्वविशिष्टपर्वतादावतिव्याप्तिवारणाय सामान्यपदम्। यन्निरूपितविषयितासामान्यमित्युक्तौ माणिक्यमयत्वाभाववत्पर्वतादावसम्भवः--पर्वत इति निर्णयनिष्ठपर्वतविषयित्वस्यापि माणिक्यमयत्वाभाववत्पर्वतनिरूपितत्वेन सामान्यान्तर्गतत्वात् तस्य च प्रतिबन्धकतानवच्छेदकत्वात् अतो यादृशविशिष्टनिरूपितेति। पर्वत इति ज्ञाननिष्ठपर्वतविषयित्वं च न माणिक्यमयत्वाभाववत्पर्वतत्वविशिष्टपर्वतनिरूपितं विशिष्टसत्तानिरूपिताधारत्ववद्विशिष्टपर्वतनिरूपितविषयित्वस्य विलक्षणस्य माणिक्यमयत्वाभाववान् पर्वत इति ज्ञान एव सत्त्वात् पर्वतो माणिक्यमयो न वेति संशयनिष्ठस्य तादृशविषयित्वस्य सामान्यान्तर्गतस्य प्रतिबन्धकतातिरिक्तवृत्तित्वादसम्भववारणाय निर्णयनिष्ठेमिति। निर्णयश्चागृहीताप्रामाण्यकत्वेन विशेषणीयः नातस्तद्दोषतादवस्थ्यम्। न च विशिष्टनिरूपितविषयित्वसामान्यप्रवेशे(१) प्रतिबन्धकतायाः स्वरूपसम्बन्धरूपावच्छेदकत्वमेव विवक्ष्यतां किमनतिरिक्तवृत्तित्वपर्यन्तेनेति वाच्यम्। (२)माणिक्यमयत्वाभाववान् पर्वतो रूपवानिति निर्णयनिष्ठस्य रूपनिष्ठप्रकारित्वावच्छिन्नमाणिक्यमयत्वाभाववत्पर्वतविशिष्टपर्वतत्वनिरूपितविशेष्यकत्वस्य माणिक्यमयत्वाभावप्रकारित्वावच्छिन्नकेवलपर्वतत्वविशिष्टविशेष्यकत्वातिरिक्तस्य तादृशविषयितासामान्यान्तर्गतस्य स्वरूपसम्बन्धरूपतादृशपरामर्शप्रतिबन्धकतावच्छेदकत्वविरहात् असम्भवापत्तेः। न च तथापि साधारण्ये साध्यसमानाधिकरणहेतुत्वादिरूपविरोधे साध्याभावव्यापकीभूताभावप्रतियोगित्वाभाववद्धेतुकेऽनुपसंहारे चातिव्याप्तिर्दुर्वारैवेति वाच्यम्। साधारणत्वविरुद्धत्वानुपसंहारित्वाविषयकत्वेन यादृशविशिष्टनिरूपितविषयित्वस्य वा विशेषणात्। न चैवं वन्ह्यव्यभिचारिमेयत्ववान् पर्वतो वह्निमान् मेयत्वादित्यादौ वह्निव्यभिचारिमेयत्वादिरूपाश्रयासिद्धेः साधारण्यरूपत्वाद्व्याप्तिः, एवं वह्निसमानाधिकरणहृदत्ववान् पर्वतो व-

ह्निमान् ह्रदत्वादित्यादौ वन्ह्यसमानाधिकरणह्रदत्वादिरूपाश्रयासिद्धेर्विरोधरूपत्वाद्व्याप्तिः वन्ह्यभावव्यापकीभूताभावप्रतियोगिह्रदत्ववान् पर्वतो वह्निमान् ह्रदत्वादित्यादौ वन्ह्यभावव्यापकीभूताभावप्रतियोगित्वाभाववद्ह्रदत्वादिरूपाश्रयासिद्धेरनुपसंहारित्वरूपत्वाद्व्याप्तिरिति वाच्यम्। साध्यसाधनपक्षभेदेनासिद्धिलक्षणस्य विभिन्नतया वन्ह्यव्यभिचारिमेयत्ववानित्यादावाश्रयासिद्ध्यात्मकसाधारण्याद्यविषयकत्वादिविशेषणस्य लक्षणाघटकत्वात् शब्दानुगमस्याकिञ्चित्करत्वात्। अत एव माणिक्यमयः पर्वतो वन्हिमान् धूमादित्यादौ साधारण्याद्यप्रसिद्धावपि न क्षतिः तत्र तदविषयकत्वादिविशेषणस्यानुपादेयत्वात्। परामर्शे व्यतिरेकव्याप्तेरप्युपादानाद्व्यतिरेकव्याप्तिविशिष्टहेत्वभाववत्पक्षरूपायां व्याप्यत्वासिद्धौ नाव्याप्तिः।

ननु तथापि पर्वतान्यः पर्वतो दहनान्यदहनवान् धूमान्यधूमादित्यादौ पर्वतान्यत्वाभाववत्पर्वतादिरूपाश्रयासिद्ध्यादौ अव्याप्तिः—तत्रानाहार्यपरामर्शाप्रसिद्ध्या तत्प्रतिबन्धकत्वाप्रसिद्धेः। न च तत्तदिच्छानामुत्तेजकत्वनये आहार्यज्ञानस्यापि प्रतिबध्यत्वेनाहार्यपरामर्शविरोधितामादायैव तल्लक्षणसम्भव इति वाच्यम्। पर्वतान्यत्वाभाववान् पर्वत इत्यादिबाधनिर्णयविरहदशायां इच्छाविरहेऽपि पर्वतान्यः पर्वत इत्यादिप्रत्यक्षोत्पादवारणाय तादृशप्रत्यक्षं प्रति इच्छाया हेतुत्वावश्यकत्वे तत्र तादृशबाधनिर्णयस्य प्रतिबन्धकत्वे मानाभावात्। न च यादृशविशिष्टनिरूपितविषयताशाल्यगृहीताप्रामाण्यकनिर्णयाव्यवहितोत्तरवर्त्यनाहार्यज्ञानसामान्यं न प्रकृतपरामर्शात्मकं तादृशविशिष्टमसिद्धिरिति विवक्षितं पर्वतान्यः पर्वत इत्यादौ आहार्यरूप एव तादृशपरामर्शः प्रसिद्धः तादृशपरामर्शप्रतिबन्धकत्वस्य लक्षणे प्रवेशात् तस्याप्रतिबध्यत्वेऽपि न क्षतिरिति वाच्यम्। वस्तुमात्रविषयकनिर्णयाव्यवहितोत्तरवर्त्यनाहार्यज्ञानसामान्यस्यैव तादृशपरामर्शानात्मकतया वस्तुमात्रस्यैव तत्रासिद्धित्वापत्तेरिति चेत्। न। पर्वतान्यः पर्वत इत्यादेरपार्थकतया तत्र पर्वतान्यत्वाभाववत्पर्वतादेराश्रयासिद्धित्वानभ्युपगमादित्यास्तां विस्तरः।

अत एवेति। यत एव एको विशिष्टाभावो नासिद्धिः किन्तु नानारूपा इत्यर्थः, अन्यथा य इत्यादौ बहुवचनमसङ्गतं स्यादिति भावः।

लिङ्गत्वेन–व्याप्यत्वेन, सङ्करे–सङ्करसम्भवे । विभागव्याघातः–पञ्चविधविभागविरोधः। परिभावयति । एवं कथं न कृतमिति सर्वत्रानुयोगसम्भवादिति भावः । एवंरूपसत्त्वेपि—उक्तरूपासिद्धिसत्त्वेपि । उपजीव्यत्वेनेति । ज्ञानकृतेनेति भावः । हेत्वन्तरमाह–उपधेयेति । असङ्करात्–ज्ञानासङ्करात् । यद्वा ननूपजीव्यत्वमेव कथं विषयाभेदादित्यत आह उपधेयेति । असङ्करात्–भेदात् ।

(चि०) नन्वाश्रयाप्रसिद्ध्या कथमाश्रयासिद्धिरुद्भाव्या । न च शशीयतया गवि शृङ्गनिषेधवत् व्योमकमलमिति वाच्यम् । शशशृङ्गनिषेधो न गवीत्युक्तत्वादिति चेत् । व्योमकमलमिति निर्णीतानन्वयत्वेनापार्थकम् आश्रयविशेषणासिद्ध्या चाश्रयासिद्धिरसङ्कीर्णा ।

(मा०) पक्षाप्रसिद्ध्यापि आश्रयासिद्धिर्यथा व्योमकमलं सुगन्धि कमलत्वादित्यादाविति भ्रमेणाशङ्कते नन्विति । कथमिति । पक्षोऽसिद्ध इत्यत्र सिद्ध्यसिद्धिव्याघातादिति भावः । व्योमकमलमिति । निषेध्यमिति शेषः, व्योमीयतया कमलं नास्तीत्युद्भाव्यमित्यर्थः । शशशृङ्गेति । शशीयतया शृङ्गनिषेधो नास्तीत्युक्तत्वादित्यर्थः । आश्रयासिद्धेर्नोक्तमुदाहरणमिति परिहरति व्योमेति । व्योमकमलं सुरभीत्यर्थः । निर्णीतानन्वयत्वेन–व्योमकमलस्य निर्णीतान्वयकत्वाभावेन व्योमकमलस्याप्रसिद्धत्वेनेति यावत् । अपार्थकं–अनुमित्यजनकं न त्वाश्रयासिद्धिनिबन्धनमिति भावः । इदं तु अप्रसिद्धव्योमकमलस्य पक्षतातात्पर्यदशायामुक्तं, यदा तु गगनीयत्वेन प्रसिद्धकमलमेव पक्षस्तदा तु पक्षविशेषणाभावरूपाश्रयासिद्धिरेवेति बोध्यम् । नन्वेवमाश्रयासिद्धेराश्रयासिद्धित्वाभावे का तर्ह्याश्रयासिद्धिरित्यत आह आश्रयेति । आश्रये पक्षे विशेषणस्य पक्षतावच्छेदकस्यासिद्धिरभाव आश्रयासिद्धिरिति तदर्थः । धान्येन धनवान् इतिवदभेदे तृतीया, उदाहरणं च माणिक्यमयः पर्वतो वह्निमान् धूमादित्यादौ माणिक्यमयत्वविशेषणस्य पर्वतेऽभावादिति भावः । असंकीर्णेति । सा च हेत्वाभासान्तरेणासंकीर्णापि माणिक्यमयः पर्वतो वह्निमान् धूमादि-

त्यादावित्यर्थः। एतत्तु संभवप्राचुर्येणोक्तम्। वस्तुतो हेत्वाभासान्तरसंकरेऽपि न दोषः इत्युक्तमेव।

इदन्त्ववधातव्यम्। न केवलं पक्षे पक्षतावच्छेदकाभाव आश्रयासिद्धिः, किन्तु पक्षे पक्षतावच्छेदकविरह(१)व्याप्यः–पक्षे पक्षतावच्छेदकवदन्योन्याभावः पक्षे तादृशान्योन्याभावव्याप्यः–पक्षतावच्छेदके पक्षतावच्छेदकतावच्छेदकाभावः–पक्षतावच्छेदके पक्षतावच्छेदकतावच्छेदकाभावव्याप्यः–पक्षतावच्छेदके पक्षतावच्छेदकतावच्छेदकवदन्योन्याभावः–पक्षतावच्छेदके तादृशान्योन्याभावव्याप्यः–पक्षतावच्छेदकाभाववान् पक्षः–तद्व्याप्यवान् पक्षः–पक्षतावच्छेदकवदन्योन्याभाववान् पक्षो–तद्व्याप्यवान् पक्षः–पक्षतावच्छेदकतावच्छेदकाभाववत्पक्षतावच्छेदकं–तद्व्याप्यवत्पक्षतावच्छेदकं–पक्षतावच्छेदकतावच्छेदकवदन्योन्याभाववत्पक्षतावच्छेदकं–तद्व्याप्यवत्पक्षतावच्छेदकम् इत्यादावपि आश्रयासिद्धिः।

समानप्रकारकज्ञानस्यैव प्रतिबन्धकत्वमिति वादिनां नव्यानां नये तु पक्षतावच्छेदकाभाववान् पक्षः–तद्व्याप्यवान् पक्षः–पक्षतावच्छेदकवदन्योन्याभाववान् पक्षः–तद्व्याप्यवान् पक्षः–इत्यादिरेवाश्रयासिद्धिर्न तु पक्षे पक्षतावच्छेदकाभावः तद्व्याप्यादिरपि (२)तज्ज्ञानस्यानुमितितत्करणपरामर्शाप्रतिबन्धकतया हेत्वाभासत्वस्यैव तत्राभावात् वक्ष्यमाणानुगताश्रयासिद्धिलक्षणस्य तत्रासत्त्वाच्च। सर्वसाधारणाश्रयासिद्ध्यनुगतलक्षणं तु–पक्षतावच्छेदकप्रकारकपक्षग्रहविरोधितावच्छेदकत्वम, तादृशग्रहविरोधितावच्छेदकत्वं चाप्राप्यगृहीताप्रामाण्यकानिर्णयनिष्ठं यादृशविशिष्टनिरूपितविषयितासामान्यं तादृशपक्षग्रहप्रतिबन्धकतानतिरिक्तवृत्ति तादृशविशिष्टत्वं, तेन नासिद्धसामान्यलक्षणवदत्रावच्छेदकत्वाविवक्षणे विकल्पानवकाशः। प्रत्येकदलव्यावृत्तिरपि तत्रोक्तदिशावसेया। पक्षतावच्छेदकप्रकारकपक्षग्रहपदेन च पक्षतावच्छेदकवान् पक्ष इत्याकारकातिरिक्ताविषयकग्रहो ग्राह्यः, तेन स्वरूपासिद्धिव्याप्यत्वासिद्ध्यादेरपि परामर्शात्मकपक्षतावच्छेदकप्रकारकग्रहविरोधितावच्छेदकत्वेऽपि नातिव्याप्तिः। पक्षतावच्छेदकांशे वा प्रतिबन्धकत्वं ग्राह्यम्।

---

(१) काभावव्याप्य इति मु० पु० पाठ।

(२) पक्षतावच्छेदके पक्षतावच्छेदकतावच्छेदकाभावस्तद्व्याप्यादि रपीति पाठान्तरम्।

एवं स्वरूपासिद्धिरपि नानाविधा—साधनतावच्छेदकावच्छिन्नसाधनाभाववत्पक्षः—तादृशसाधनाभावव्याप्यवत्पक्षः—साधनवदन्योन्याभाववान् पक्षः—तादृशान्योन्याभावव्याप्यवान् पक्षः—पक्षे साधनतावच्छेदकावच्छिन्नप्रतियोगिताकसाधनाभावः—पक्षे तादृशसाधनाभावव्याप्यः—पक्षे साधनतावच्छेदकावच्छिन्नसाधनवदन्योन्याभावः—पक्षे तादृशान्योन्याभावव्याप्यश्चेति क्रमेणाष्टविधत्वात् । समानप्रकारकज्ञानस्यैव प्रतिबन्धकत्ववादिनां नव्यानां नये तु साधनतावच्छेदकावच्छिन्नसाधनाभाववत्पक्षादिरूपा चतुर्विधैव स्वरूपासिद्धिः, न तु पक्षे साधनतावच्छेदकावच्छिन्नसाधनाभावादिरूपापि तरणपरामर्शाप्रतिबन्धकतया हेत्वाभासत्वस्यैव तत्राभावात् वक्ष्यमाणानुगतस्वरूपासिद्धिलक्षणस्य तत्रासत्त्वाच्च । पक्षतावच्छेदकावच्छिन्नपक्षविशेष्यकसाधनतावच्छेदकावच्छिन्नसाधनप्रकारकग्रहविरोधितावच्छेदकत्वं स्वरूपासिद्धित्वम्, भवति च ह्रदो वह्निमान् धूमादित्यादौ धूमाभाववद्ध्रदादिरूपा स्वरूपासिद्धिः धूमवान् ह्रद इत्यादिपक्षविशेष्यकसाधनग्रहविरोधितावच्छेदिकेति लक्षणसमन्वयः । ह्रदो वह्निमान् धूमादित्यादौ द्रव्यसामान्याभाववद्ध्रदधूमसामान्याभाववद्द्रव्यादिष्वतिव्याप्तिवारणाय पक्षतावच्छेदकसाधनतावच्छेदकयोः प्रवेशः । न चैवं ह्रदो वह्निमान् धूमादित्यादौ ह्रदवृत्तित्वाभाववद्धूमादिरूपस्वरूपासिद्धौ वह्निमानाकाशादित्यादौ वृत्तित्वाभाववदाकाशादिरूपस्वरूपासिद्धौ चाव्याप्तिः । नव्यनये प्रामाण्याभावावगाहिनिर्णयस्यैव प्रतिबन्धकतया तज्ज्ञानस्य पक्षतावच्छेदकावच्छिन्नविशेष्यकसाधनतावच्छेदकावच्छिन्नसाधनप्रकारकग्रहाविरोधित्वादिति वाच्यम् । नव्यनये तस्य स्वरूपासिद्धित्वविरहात् । न चैवं तस्याधिक्यापत्तिरिति वाच्यम् । ह्रदो वह्निमान् धूमादित्यादौ ह्रदवृत्तित्वाभाववद्धूमादेर्हेत्वाभासत्वस्यैवाभावात्, वह्निमानाकाशादित्यादौ वृत्तिमत्त्वाभाववदाकाशादेश्च साध्यसामानाधिकरण्याभाववद्धेत्वादेरिवासाधारणत्वे विरोधे वान्तर्भावात् । पक्षतावच्छेदकावच्छिन्नविशेष्यकसाधनतावच्छेदकावच्छिन्नप्रकारकग्रहविरोधितावच्छेदकत्वं चात्रापि अगृहीताप्रामाण्यनिर्णयानुपूर्व्या तादृशविशिष्टनिरूपितविषयितासामान्यं तादृशग्रहविरोधितानतिरिक्तवृत्ति तादृशविशिष्टत्वम्, तेनासिद्धिसामान्यलक्षणवदवच्छेदकत्वविकल्पावकाशः । प्रत्येकदल-

व्यावृत्तिरपि तत्रोक्तदिशावसेया ।

तादृशग्रहविरोधित्वञ्च तादृशग्रहत्वावच्छिन्नप्रतिबध्यतानिरूपितविरोधित्वं, तेन पर्वतो वह्निमान् ह्रदत्वादित्यादौ वन्ह्यभाववद्वृत्तिह्रदत्वादिरूपसाधारण्यवह्निमदवृत्ति ह्रदत्वादिरूपविरोधवह्न्यभावव्यापकीभूताभावप्रतियोगिह्रदत्वादिरूपानुपसंहारित्ववह्न्यव्यभिचरितसम्बन्धित्वाभाववद्वृत्तित्वादिरूपव्याप्यत्वासिद्धिषु परामर्शात्मकतादृशग्रहविरोधितामादाय नातिव्याप्तिर्न वाश्रयासिद्धि-साधनविशेषणासिद्ध्योरतिव्याप्तिः तेषां ज्ञानस्य तादृशग्रहत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकत्वाभावात् । अत एव ह्रदो वह्निमान् धूमादित्यादौ वह्न्यभाववदवृत्तिधूमाभाववद्ध्रदवह्निसमानाधिकरणधूमाभाववद्ध्रदवह्न्यभावव्यापकीभूताभावप्रतियोगिधूमाभाववद्ध्रदवह्न्यव्यभिचरितसम्बन्धिधूमाभाववद्ध्रदादिषु व्याप्यत्वासिद्ध्यन्तर्गतेषु नातिव्याप्तिः तेषां परामर्शात्मकतादृशग्रहविरोधितावच्छेदकत्वेऽपि तादृशग्रहत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वविरहात् । स्वरूपासिद्धेरसङ्कीर्णोदाहरणं तु पर्वतो वह्निमान् महानसत्वादित्यादिकमेव, आश्रयासिद्धि--स्वरूपासिद्धिभिन्नासिद्धिश्च व्याप्यत्वासिद्धिः, यादृशविशिष्टमाश्रयासिद्धिर्यादृशविशिष्टं च स्वरूपासिद्धिस्तदुभयाविशिष्टनिरूपितं साधारणत्वविरुद्धत्वानुपसंहारित्वनिरूपितं च निर्णयानिष्ठं यादृशविशिष्टनिरूपितविषयितासामान्यं परामर्शविरोधितानतिरिक्तवृत्ति तादृशविशिष्टं व्याप्यत्वासिद्धिरिति तु निष्कर्षः । तेन ह्रदो वह्निमान् धूमादित्यादौ वह्निव्याप्यधूमाभाववद्ध्रदादिरूपव्याप्यत्वासिद्धेर्विशिष्टस्यानतिरिक्ततया धूमाभाववद्ध्रदाद्यात्मकस्वरूपासिद्धिभिन्नत्वाभावेऽपि नाव्याप्तिः, न वा काञ्चनमयह्रदो वह्निमान् धूमादित्यादौ वह्निव्याप्यधूमाभाववद्ध्रदादिरूपव्याप्यत्वासिद्धेर्विशिष्टस्यानतिरिक्ततया कांचनमयत्वाभाववद्ध्रदादिरूपाश्रयासिद्धिभिन्नत्वाभावेऽप्यव्याप्तिः पक्षादिभेदेन व्याप्यत्वासिद्धेर्भेदात् पर्वतो धूमवान् वह्नेरित्यादौ यत्राश्रयासिद्ध्यादिकमप्रसिद्धं तत्र तदनिरूपितं विशेषणं नोपादेयं शब्दानुगमस्याकिञ्चित्करत्वात्, तेन तत्र व्याप्यत्वासिद्धौ नाव्याप्तिः ।

एतेन "वह्निव्याप्यह्रदत्ववान् पर्वतो वह्निमान् ह्रदत्वादित्यादौ वह्निव्याप्यत्वाभाववद्ध्रदत्वादिरूपव्याप्यत्वासिद्धेराश्रयासिद्धिरूपत्वाद-

व्याप्तिः—ह्रदत्वाभाववत्पर्वतरूपाश्रयासिद्ध्यन्तरेऽव्याप्तिवारणाय तत्राश्रयासिद्धिभिन्नत्वविशेषणस्यावश्यं प्रवेशनीयत्वात् । एवं काञ्चनमयवह्निसमवायी पर्वतः काञ्चनमयवह्निमान् धूमादित्यादौ काञ्चनमयत्वाभाववद्वह्निरूपसाध्यविशेषणासिद्ध्यात्मकव्याप्यत्वासिद्धावाश्रयासिद्धिभिन्नत्वाभावादव्याप्तिः-वह्निसमवायित्वाभाववत्पर्वतरूपाश्रयासिद्ध्यन्तरेऽतिव्याप्तिवारणाय तत्राप्याश्रयासिद्धिभिन्नत्वस्यावश्यं प्रवेशनीयत्वात् । एवं वह्निः काञ्चनमयवह्निमान् काञ्चनमयत्वादित्यादौ काञ्चनमयत्वाभाववद्वह्न्यादिरूपसाध्यविशेषणासिद्ध्यात्मकव्याप्यत्वासिद्धौ स्वरूपासिद्धिभिन्नत्वाभावादव्याप्तिः । न च तत्राय न व्याप्यत्वासिद्धिः किन्त्वाश्रयासिद्धिः स्वरूपासिद्धिरेवेति वाच्यम् । विनिगमकाभावादत्राश्रयासिद्ध्यादिभिन्नत्ववदाश्रयासिद्ध्यादिलक्षणेऽपि व्याप्यत्वासिद्धिभिन्नत्वविशेषणस्य वक्तुमशक्यत्वात्कथकसम्प्रदायव्यवहारस्य सन्दिग्धत्वादिति”—दूषणमपि प्रत्युक्तम् । आश्रयासिद्ध्यादीनां प्रातिस्विकरूपेण भेदस्यैव लक्षणघटकतया वह्निव्याप्यह्रदत्ववान् पर्वतो वह्निमान् ह्रदत्वादित्यादौ ह्रदत्वाभाववत्पर्वतादिरूपाश्रयासिद्ध्यन्तरभेदस्यैव तल्लक्षणघटकत्वेनोक्तरूपाश्रयासिद्ध्यात्मकव्याप्यत्वासिद्धावव्याप्तिविरहात् । न चैवं तस्योभयरूपत्वापत्तिरिति वाच्यम् । विनिगमकाभावेन व्याप्यत्वासिद्ध्याश्रयासिद्ध्युभयरूपत्वस्य तत्रेष्टत्वात् । सा च व्याप्यत्वासिद्धिस्त्रिविधा—साध्यविशेषणासिद्धिः साधनविशेषणासिद्धिः व्याप्तिविरहरूपा च । साध्यतावच्छेदकप्रकारकसाध्यग्रहविरोधितावच्छेदकरूपं साध्यविशेषणासिद्धिः । विरोधितावच्छेदकत्वादिकं तु आश्रयासिद्धिलक्षणवदवसेयम् । तादृशं रूपञ्च साध्यतावच्छेदकाभाववत्साध्य-तादृशाभावव्याप्यवत्साध्यं-साध्यतावच्छेदकवदन्योन्याभाववत्साध्यं-तादृशान्योन्याभावव्याप्यवत्साध्यं—साध्यतावच्छेदकतावच्छेदकाभाववत्साध्यतावच्छेदकं—तादृशाभावव्याप्यवत्साध्यतावच्छेदकं-साध्यतावच्छेदकतावच्छेदकवदन्योन्याभाववत्साध्यतावच्छेदकं—तादृशान्योन्याभावव्याप्यवत्साध्यतावच्छेदकमित्यादि भिन्नप्रकारकज्ञानस्यापि प्रतिबन्धकत्वनये साध्ये साध्यतावच्छेदकाभावः—साध्ये तादृशाभावव्याप्यः—साध्ये साध्यतावच्छेदकवदन्योन्याभावः—साध्ये तादृशान्योन्याभावव्याप्यः—साध्यतावच्छेदके साध्यतावच्छेदकतावच्छेद-

काभावः–साध्यतावच्छेदके तादृशाभावव्याप्यः–साध्यतावच्छेदके साध्यतावच्छेदकतावच्छेदकवदन्योन्याभावः–साध्यतावच्छेदके तादृशान्योन्याभावव्याप्य इत्यादिकं बोध्यम । एतदसंकीर्णोदाहरणं च पर्वतः काञ्चनमयवह्निमान् धूमादित्यादि । साधनतावच्छेदकप्रकारकसाधनग्रहविरोधितावच्छेदकरूपं साधनविशेषणासिद्धिः । विरोधितावच्छेदकत्वादिकं तु आश्रयासिद्धिलक्षणवदवसेयम् । तादृशं च रूपं साधनतावच्छेदकाभाववत्साधनम् इत्यादिकमेवेत्युक्तप्रायम् । एतदसंकीर्णोदाहरणं च पर्वतो वह्निमान् काञ्चनमयधूमादित्यादि ।

साध्यविशेषणासिद्धिसाधनविशेषणासिद्ध्याश्रयासिद्धिस्वरूपासिद्धिभिन्नासिद्धिर्व्याप्तिविरहरूपासिद्धिः । निष्कर्षस्तु व्याप्यत्वासिद्धिसामान्यलक्षणवदवसेयः । तत्स्वरूपं च साध्याव्यभिचरितसम्बन्धित्वरूपान्वयव्याप्त्यभाववत्साधनं–तादृशव्याप्त्यभावव्याप्यवत्साधनं–तादृशव्याप्तिमदन्योन्याभाववत्साधनं–तादृशव्याप्तिमदन्योन्याभावव्याप्यवत्साधनं–तादृशव्याप्तिमत्साधनाभाववत्पक्षः–तादृशव्याप्तिमत्साधनाभावव्याप्यवत्पक्षः–तादृशव्याप्तिमत्साधनवदन्योन्याभाववान् पक्षः–तादृशव्याप्तिमत्साधनवदन्योन्याभावव्याप्यवत्पक्षः, एवं साध्याभावव्यापकीभूताभावप्रतियोगित्वरूपव्यतिरेकव्याप्तिमत्साधनाभाववत्पक्षादि–साध्याभाववद्वृत्तिसाधनाभाववत्पक्षादि–साध्यसमानाधिकरणसाधनाभाववत्पक्षादि। भिन्नप्रकारकज्ञानस्यापि प्रतिबन्धकत्वनये साधने तादृशान्वयव्याप्त्यभावादिरपि बोध्यः ॥

(चि०) व्याप्तिविरहश्च व्यर्थविशेषणादौ, तदुक्तम्–'एकामसिद्धिं परिहरतो द्वितीयापत्ति'रिति । उपाधिस्तु न व्याप्तिविरहः वह्निव्यापकधूमाव्यापकधर्म्मस्याप्रसिद्ध्या धूमे तद्विरहासिद्धेः, किन्तु यावत्स्वव्यभिचारिव्यभिचारि साध्यसामानाधिकरण्यमनौपाधिकत्वं व्याप्तिः। साध्यव्यापकसाधनाव्यापकश्च धर्म्मान्तरं न तु तद्विरहः अपि तु तन्नियतः। न चैवमुपजीव्यत्वेन उपाधिर्हेत्वाभासान्तरम् उपजीव्यत्वेऽपि स्वतोऽदूषकत्वेन तदर्थं परमुखवीक्षकत्वात् । नहि साध्यव्यापकाव्या-

प्यत्वमनुमितिविरोधि, किन्तु व्यभिचारोन्नयनेन स्वव्यतिरेकेण सत्प्रतिपक्षतया वा, तदाह 'उपाधावव्यवस्थं व्यभिचार उपाधेरेव व्यभिचारशङ्के'ति । अप्रयोजकान्यथासिद्धौ सोपाधी नासिद्धौ । प्रतिकूलतर्कानुकूलतर्काभावावुपजीव्यत्वे सति स्वतोदूषकावपि न हेत्वाभासौ–स्वरूपसतोरेव प्रतिबन्धकत्वादित्युक्तम् ॥

इत्यसिद्धिचिन्तामणिः ॥

(मा०) ननु साध्याविशेषणासिद्धिसाधनविशेषणासिद्धिरूपव्याप्यत्वासिद्धेरसंकीर्णोदाहरणसत्त्वेपि व्याप्तिविरहरूपव्याप्यत्वासिद्धेरसंकीर्णोदाहरणं दुर्लभमित्यत आह व्याप्तिविरहास्त्विति । व्यर्थविशेषणत्वादाविति । असङ्कीर्ण इति लिङ्गविपरिणामेनानुषज्यते–आदिपदाद्व्यर्थविशेष्यत्वं परिगृहीतम् । तदुदाहरणं च द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादि, तत्र हेतुतावच्छेदके विशेष्यीभूतस्य सत्तात्वस्य व्यर्थत्वात्, न तु पर्वतो वह्निमान् धूमप्रागभावादित्यादि भिन्नधर्म्मिकत्वात् । व्यर्थविशेषणस्य व्याप्यत्वासिद्धित्वे आचार्य्यसंवादमाह तदुक्तमिति । क्षितिरकर्तृका शरीराजन्यत्वादितीश्वरानुमाने सत्प्रतिपक्षानुमान इति शेषः । एकाम असिद्धिं-स्वरूपासिद्धिरूपामसिद्धिं, परिहरतः–शरीरविशेषणेन परिहरतः, द्वितीयापत्तेः–शरीरविशेषणस्य व्यर्थतया व्याप्यत्वासिद्ध्यापत्तेः, एतच्च प्राचीनमतानुसारेण । वस्तुतो व्यर्थविशेषणत्वेपि स्वव्यापकसाध्यसामानाधिकरण्यरूपा साध्याव्यभिचरितसम्बन्धित्वरूपा वा व्याप्तिर्दुर्वारा । न चैवं वह्निमान् नीलधूमादिति प्रयोगे कथं निग्रह इति वाच्यम् । उद्भावितदृष्टान्तस्य साध्यादिवैकल्यवत् अधिकप्रयोगस्यापि निग्रहस्थानविभाजकसूत्रस्थचकारेणानुक्तसमुच्चयपरेणोद्भावितदृष्टान्तस्य साध्यादिवैकल्यादिवत् तस्यापि समुच्चयात् । न चैव'मेकामसिद्धि'मित्याचार्याभिधानविरोध इति वाच्यम् । व्यर्थविशेषणतया व्याप्तिविरहस्याभ्युपगमेपि तदभिधानस्याशुद्धत्वात् शरीरजन्यत्वाभावस्याप्यप्रसिद्धतया व्यर्थविशेषणत्वस्यैव तत्राभावात् । न चैवं व्याप्तिविरहस्यासङ्कीर्णोदाहर-

णाभाव इति वाच्यम् । तद्विरहेऽपि क्षितिविरहादित्यसकृदावेदितत्वादिति पुनर्नव्यमतानुयायिनी राद्धान्तसरणिः । .

केचित्तु उपाध्यभावस्य व्याप्तितया तदभावत्वेनोपाधिरपि व्याप्यत्वासिद्धिरिति वदन्ति, प्रसङ्गात्तन्मतं निराकरोति उपाधिस्त्विति। उपाध्यभावस्य व्याप्तित्वे तथा स्यान्न चैतदित्याह वन्हीति। नन्वेवमनौपाधिकत्वं व्याप्तिरित्युच्छिद्येतेत्यत आह किन्त्विति। नन्वेवं तद्विरहरूपत्वेनोपाधिर्व्याप्यत्वासिद्धिः स्यादित्यत आह साध्येति। उपजीव्यत्वेन—व्याप्तिज्ञानाभावोपजीव्यत्वेन। हेत्वाभासान्तरमिति, स्यादिति शेषः। तदर्थं—व्याप्तिज्ञानप्रतिबन्धार्थम्। अनुमितिविरोधि—साक्षादनुमितितत्कारणयोर्विरोधि, सत्प्रतिपक्षतया—साध्याभावोन्नायकतया। ननु साध्यव्यापकाव्याप्यत्वस्य स्वतोऽदूषकत्वे साध्यव्यापकाभावघटितत्वरूपमप्रयोजकत्वं साध्यव्यापकविरहाव्यापकाभावकत्वरूपमन्यथासिद्धत्वं च कुतोऽसिद्धिस्तयोरेव साध्यव्यापकाव्याप्यत्वरूपत्वादित्यत आह अप्रयोजकान्यथासिद्धौ चेति, प्रथमाद्विवचनं धर्मप्रधानश्च निर्देशः। अप्रयोजकत्वे अन्यथासिद्धत्वे चेत्यर्थः। सोपाधी—सोपाधी अपि, उपाधिसमानाधिकरणे अपीति यावत्। नासिद्धौ—नासिद्धी, सर्वत्र प्रथमाद्विवचनम्।

केचित्तु प्रतिकूलतर्कोऽनुकूलतर्काभावश्चाऽसिद्ध्यन्तर्गत इत्याहुस्तन्मतं निराकरोति प्रतिकूलेति। उपजीव्यत्वे सतीति। अनुमित्यनुत्पादप्रयोजकत्वे सतीत्यर्थः। स्वतोदूषकावपीति। व्याप्तिग्रहकारणाभावावपीत्यर्थः। स्वरूपसतोरेव—ज्ञायमानत्वावच्छिन्नयोरेव। प्रतिबन्धकत्वादिति। व्याप्तिज्ञानकारणीभूताभावप्रतियोगितात्वादित्यर्थः। ज्ञायमानत्वावच्छिन्नानुमितितत्कारणज्ञानान्यतरकारणीभूताभावप्रतियोगित्वाश्रयस्यैव च हेत्वाभासत्वादिति भावः॥

इति श्रीमथुरानाथतर्कवागीशविरचिते तत्त्वचिन्तामणिरहस्ये अनुमानखण्डे हेत्वाभासेऽसिद्धिग्रन्थरहस्यम् ॥ ० ॥

श्रीअथानुमानगादाधर्यां

बाधप्रकरणम् ।

(चि०) बाधो न साध्याभाववत्पक्षकत्वं पक्षवृत्त्यभावप्रतियोगिसाध्यकत्वं वा, पक्षे साध्याभावज्ञानमात्रस्य प्रमात्वज्ञानं विना अधिकबलत्वाज्ञा(ने)न बाधाभावादिति वक्ष्यते । अत एव साध्याभाववत्पक्षवृत्तित्वमपि न, असिद्धिसङ्कीर्णबाधाव्याप्तेश्च । किन्तु साध्याभाववत्त्वप्रमाविषयपक्षकत्वं, प्रमितसाध्याभाववत्पक्षकत्वं, पक्षनिष्ठप्रमाविषयत्वप्रकाराभावप्रतियोगिसाध्यकत्वं वेति । विवक्षितविवेकेन साध्याभावप्रमैव दोषः । सा च प्रमात्वेन ज्ञाता न स्वरूपसती हेत्वाभासत्वात् । प्रमात्वज्ञानं विना अधिकबलत्वाभावेनादोषत्वात् अप्रमायामपि प्रमात्वज्ञानेऽनुमितिप्रतिबन्धाच्च ।

(दी०) अतिरिक्तविषयतावादिमतेनाह पक्षेति । पक्षः साध्याभाववानिति ज्ञाने पक्षनिष्ठविषयत्वस्य प्रकारः साध्याभाव इति लक्षणसमन्वयः । विवक्षितेति । हेत्वादिविषयत्वेनाप्रतिबन्धकत्वादिति भावः ।

(गा०) मूले अधिकबलत्वाज्ञाने(न) इति । अधिकबलत्वस्याज्ञानं यस्मादिति व्युत्पत्त्या अधिकबलत्वाभावे(न) इत्यर्थः । अधिकबलत्वं च तत्प्रतिहेतुत्वापर्यायकनिश्चितप्रामाण्यकत्वरूपविशेषणावच्छिन्नत्वम् । बाधाभावात्-प्रतिबन्धकत्वाभावात इति यावत् । तथाच निष्कृष्टबाधविषयकत्वस्याप्रतिबन्धकसाधारणतया न तस्य दोषत्वमिति भावः । साध्याभाववत्पक्षवृत्तित्वमिति । साध्याभाववत्पक्षकत्वं

साध्याभाववत्पक्षविषयकज्ञानविषयकज्ञानविषयत्वं न तु तादृशपक्षवृत्तित्वमतस्ततोऽस्य भेदः। साध्याभाववत्त्वप्रमेति। एतादृशबाधज्ञानस्य प्रमात्वविषयकतानियमेन प्रतिबन्धकताग्रौव्यादिति भावः। प्रमात्वं च न साध्याभाववद्विशेष्यकत्वं पर्वतो ह्रदश्च न वह्निमानित्यादिज्ञानविषयसाध्याभावमादाय पर्वतादिपक्षके बाधप्रसङ्गात्, किन्तु साध्यवदविशेष्यकत्वम्। पक्षतावच्छेदकावच्छिन्नांशे साध्याभाववत्त्वानवगाहे विरोध्यविषयकत्वेन प्रतिबन्धकत्वे विवादात् तदंशे साध्याभाववत्त्वघटितं लक्षणमाह प्रमितेति। प्रमितत्वं–स्वविशेष्यकप्रमाप्रकारत्वम्। स्वं–पक्षः, प्रमात्वं पूर्ववत्। सिद्धान्तिमते विषयिताया न सप्रकारकत्वम् अपि तु ज्ञानस्यैवातः पक्षनिष्ठप्रमाविषयत्वप्रकारत्वस्याभावविशेषणतया निवेशनं विरुद्धम्। न च विशेष्यतारूपाविषयतायां प्रकारतानिरूपकत्वसत्त्वाद्विषयतानिरूपितप्रकारतारूपस्य विषयताप्रकारत्वस्याभाववृत्तित्वाविरोध इति वाच्यम्। कार्यत्वकारणत्वयोरिव विशेष्यविशेषणविषयत्वयोर्निरूप्यनिरूपकभावसम्बन्धसत्त्वेऽपि कार्यतायाः कारणमित्याद्यव्यवहारेण तादृशनिरूप्यनिरूपकभावस्य षष्ठ्यर्थताविरहात् षष्ठीतत्पुरुषव्युत्पन्नविषयताप्रकारत्वशब्देन उक्तार्थाप्रतिपादनात्।

सविषयकज्ञानादौ विषयतारूपप्रकारताया यादृशसम्बन्धस्तादृशस्यैव षष्ठ्यर्थत्वात् प्रकारतायास्तादृशसम्बन्धस्य च विषयतायां सविषयव्यवहारविरहेणासत्त्वात्तथा विवक्षितुमशक्यत्वादतः सप्रकारकत्वं विषयताया एव न तु ज्ञानस्य प्रकारताया विषयतानात्मकप्रतियोगित्वादिनिरूपितावच्छेदकतातुल्याऽवच्छेदकताविशेषरूपत्वादित्यतिरिक्तविषयतावाद्येकदेशमताभिप्रायकतया विषयताप्रकारत्वपर्यन्तनिवेशनं सङ्गमयति दीधितौ अतिरिक्तेति। 'पक्षे साध्याभावः पक्षनिष्ठाभावप्रतियोगि साध्य'मित्यादिप्रमायां साध्याभावप्रकारकप्रमाविषयतायाः पक्षेऽसत्त्वात् यादृशज्ञानमादाय लक्षणसङ्गमनं तद्दर्शयति पक्ष इति। ज्ञाने पक्षनिष्ठविषयत्वस्य प्रकार इति। ईदृशज्ञानीया या पक्षनिष्ठविषयता तन्निरूपितप्रकारताया आश्रय इत्यर्थः। एतेन पक्षनिष्ठत्वादिकं नाभावादेर्विशेषणं किन्तु विषयत्वादेः, प्रकाराभाव इति न षष्ठीतत्पुरुषः किन्तु कर्मधारय इत्यादिकमपि स्फुटीकृतम्। साध्याभावप्रमैवेत्येवकारस्य पक्षादेर्दोषघटकत्वव्य-

वच्छेदपरता न सम्भवति पक्षादिविषयकत्वस्य प्रतिबन्धकत्वोपयोगित्वादतो हेतुतत्सम्बन्धमात्रव्यवच्छेदकतामाविष्कर्त्तुं तद्विषयकत्वस्य प्रतिबन्धकत्वानुयोगित्वम्, तद्व्यवच्छेदकहेतुमाह हेत्वादीति ॥ एवं च साध्याभावप्रमापदं साध्याभावप्रमाविषयत्वादिरूपविशेषणविशिष्टपक्षपरमित्यवधेयम् ।

(चि०) अथ साध्याभाववति पक्षे हेतोः सत्त्वज्ञाने व्यभिचारः, तदज्ञानेऽसिद्धिः, संशययोग्यत्वाभावेन पक्षत्वाभावादाश्रयासिद्धिश्च । न च पक्षभिन्ने व्यभिचारो दोषः, व्यर्थविशेषणत्वात् सर्व्वोपसंहारप्रवृत्तव्याप्तेः साध्याभाववति साधनमित्यवगमादेव भङ्गात् । न चैवं सन्दिग्धसाध्यदृष्टान्ते सन्दिग्धानैकान्तिकत्वपक्षे व्यभिचारसंशयादनुमानमात्रोच्छेद इति पक्षे साध्यसंशयोऽनुमानाङ्गमिति । व्याप्तस्य पक्षधर्मताज्ञानादनुमित्युत्पादेन संशयनिवृत्तेः, अन्यथा विशेषदर्शनस्य संशयविरोधिता भज्येत । न च पक्षे साध्याभावं प्रतीत्य व्यभिचारज्ञानमित्युपजीव्यत्वाद्बाधः पृथक्, पक्षे साध्याभावप्रतीतिरेव हि साध्याभावहेत्वोः सम्बन्धोल्लेखिनीत्येकवित्तिवेद्यत्वेन नोपजीव्यत्वम् । अन्यथा बाधदशायां पक्षे हेतोरज्ञानादसिद्धिरेव । न चोद्भावितव्यभिचारनिर्वाहाय बाधोद्भावनमावश्यकमित्युपजीव्यत्वम्, व्यभिचारोद्भावनं परं कथन्ताऽनावश्यकत्वात्, तस्यैव वा नाधिक्यादेव दूषणं फलसत्त्वात् । वह्निरूपणः कृतक इत्युद्भावनाद्वह्निरूपेण इत्युद्भावने लाघवमिति बाधः पृथगिति कश्चित् । तन्न । पक्षे साध्याभावप्रमा स्वार्थानुमाने यदि न

दोषः तदा परं प्रत्यपि न स्यादविशेषादिति तदुद्भावनस्य दूरनिरस्तत्वात् ।

अथोपनीतकाञ्चनमयत्वविशिष्टवह्न्यनुमितेः सल्लिङ्गजन्यायाः आभासत्वं हेत्वाभासाधीनम् । न चानुमितेः पूर्वं तत्र व्यभिचारज्ञानं, विशिष्टस्याप्रसिद्ध्या तदभावस्याज्ञानात् । अत एव पक्षासिद्धिरपि न अतः काञ्चनमयवह्न्यभावरूपाद्बाधादनुमानाभासत्वं व्यधिकरणप्रकारावच्छिन्नप्रतियोगिकश्चात्राऽभाव इति चेन्न ।

(दी०) साध्याभावप्रमात्वग्रहे पक्षे साध्याभाववत्त्वग्रहस्यावश्यकत्वाभिप्रायेण साध्याभावस्य बाधत्ववादिमतेन वा शङ्कते अथेति । पक्ष इति । व्याप्तौ निश्चितायां पक्षतत्समयोः साध्याभावसंशयो न दोषायेत्यर्थः । अनुमित्युत्पादेनेति फलतोऽपि विरोधित्वप्रदर्शनाय । अत एव ज्ञायः स्वरूपतो विरोधित्वं द्रढयति अन्यथेति । हेत्वाभासाधीनमिति । न च हेत्वाभासस्यानुमित्याभासताप्रयोजकत्वे साध्यवति पक्षे लिङ्गाभासजन्याया अनुमितेराभासत्वापत्तिः, लिङ्गोपधाने तथात्वस्येष्टत्वात् । पक्षासिद्धिरित्यस्य बाधकमाननिबन्धनेत्यादिः ॥

(गा०) मूले साध्याभाववति पक्ष इति । साध्याभाववत्तया ज्ञायमानपक्ष इत्यर्थः ।

ननु साध्यभावप्रमाविषयपक्षकत्वादिरूपदर्शितबाधे पक्षांशे प्रमाविषयत्वमेव निविष्टं न तु साध्याभाववत्त्वमिति उक्तज्ञानदशायां हेतुसाध्याभावयोः सामानाधिकरण्यरूपव्यभिचारधियो नावश्यकतेति कथमयमाक्षेप इत्याशङ्कां निराकरोति दीधितौ साध्याभावेति । साध्याभाववत्त्वग्रहस्यावश्यकत्वाभिप्रायेणेति । तद्वति तत्प्रकारकत्वरूपस्य तत्प्रमात्वस्य धर्मिणि तद्वत्त्वघटितत्वादिति भावः । ननु प्रमात्वघटकतया साध्याभाववत्त्वेन धर्मिणो भानेपि न व्य-

भिचारबुद्धेरावश्यकता येन रूपेण हेतुमत्ताज्ञानं तेन प्रकारेण हेतुमत्त्वप्रकारेण वा धर्मिणि साध्याभावज्ञानस्यैव व्यभिचारज्ञानत्वात्, दर्शितसाध्याभाववदविशेष्यकत्वरूपप्रमात्वप्रवेशे च साध्याभाववत्त्वबुद्धेरेव नावश्यकत्वमित्यनुशयादाह साध्याभावस्येति । पक्षनिष्ठस्येत्यादि ।

मूले-असिद्धिः-पक्षधर्मताज्ञानरूपकारणविरहः, तथाच बाधबुद्धिदशायां अनुमितिविरोधिनो व्यभिचारज्ञानस्य पक्षधर्मताज्ञानिरूपकारणविरहस्यवाऽवश्यं सत्त्वात्तत एवानुमित्यनुत्पादे कृतं बाधस्य हेत्वाभासत्वेनेति भावः । संशययोग्यता-साधकमानाभावः, तदभावेन-तद्विघटकबाधकमानसत्त्वेन । एतेन संशययोग्यताविरहापक्षताविरहयोरभेदाद्धेतुहेतुमद्भावेनाभिधानमसङ्गतमिति परास्तम् । आश्रयासिद्धिः पक्षधर्मताज्ञानविषयधर्मिविशेषणतया अनुमितिप्रयोजकस्यासत्त्वम्, सिषाधयिषाविरहसहकृतसिद्ध्यभावपक्षतामते एतद्दोषस्याकिञ्चित्करतया पूर्वदोषस्यैवोद्धारमाशङ्क्य निराकरोति न चेति । सर्वोपसंहारप्रवृत्तव्याप्तेरिति । सकलहेत्वधिकरणान्तर्भावेन साध्यसत्त्वे निर्णीतव्याप्तेरित्यर्थः । न चैवमिति । दृष्टान्ते-पक्षभिन्ने, सन्दिग्धानैकान्तिकवत्-व्यभिचारसंशयवत् । साध्याभावांशे संशयरूपत्वेऽपि प्रतिबन्धकादिति शेषः । एतेन साध्याभावांशे निश्चयरूपमेव व्यभिचारज्ञानं प्रतिबन्धकमिति पक्षभिन्नांशत्वानन्तर्भावेऽपि नानुमानमात्रोच्छेद इति शङ्का निराकृता । पक्षे-पक्षान्तर्भावेण, सर्वत्र व्यभिचारसंशयादनुमानमात्रोच्छेदः-सन्दिग्धसाध्यकपक्षेऽनुमितेरनुपपत्तिः । कथंचिदनुमितिसम्भवेऽपि दुष्टहेतुजन्यत्वसंशयात्तत्राप्रामाण्यसंशयात् तत्कार्यानुपपत्तिः ।

एतत्शङ्कायां च पक्ष इति यथा श्रुतमूले नोद्धारो सकृच्छ्रेत पक्षे साध्यसन्देहस्यानुमानाङ्गतया अपेक्षायां व्यभिचारज्ञानसत्त्वेनानुमित्यनुपपत्तितादवस्थ्यात्, परामर्शसत्त्वे व्यभिचारज्ञानस्य साक्षादनुमित्यविरोधितया अकिञ्चित्करत्वेन तत्सत्त्वे बाधनिश्चयदशायामनुमितिवारणाय बाधस्य हेत्वाभासतया आवश्यकत्वादतस्तद्व्याचष्टे दीधितौ पक्ष इति । व्याप्तौ निश्चितायामिति पूरणम् । पक्षे-साध्यसन्देहस्यादोषत्वे पक्षभिन्नेऽपि तस्यादोषत्वं स्यादिति प्रतिबन्धुद्धाराय पक्ष इत्यत्र तत्समममप्यन्तर्भावयति पक्षतत्समयोरिति । तथा-

च पक्षे तत्समे च व्यभिचारसंशयस्य यद्दोषत्वं तदपि पूर्वव्याप्तेरनिश्चय एवेति भावः । अविरोधिमात्रार्थकस्याङ्गपदस्य व्याख्यानं दोषायेति । एवं च पक्षे व्यभिचारग्रहस्य दूषकत्वेपि व्यभिचारसंशयस्य व्याप्तिनिश्चयविघटनेनैवानुमितिविरोधिता पूर्वं व्याप्तिनिश्चये च व्यभिचारसंशयेपि व्याप्तिस्मृत्या विशिष्टपरामर्शसम्भवादनुमितिर्निष्प्रत्यूहैव, व्यभिचारनिश्चयस्य च साक्षादनुमितिविरोधितया साध्याभाववत्तया निश्चीयमाने पक्षे हेतुमत्तानिश्चये व्यभिचारनिश्चयादेव नानुमितिरिति न बाधस्य हेत्वाभासतेति मूलकाराशयः । अनुमित्युत्पादेन संशयनिवृत्तिकथनञ्च शङ्किताया अप्रामाण्यशङ्काया निरासाय पक्षे साध्यसंशयो अनुमानाङ्गम्, अनुमितिपूर्वकाले विशेषदर्शनसाहित्येन प्रात्यक्षिकसिद्धिविघटकतया अनुमित्युपयोगि न तु कारणम्, तथा च पक्षे साध्याभावसंशयरूपव्यभिचारज्ञानस्यानुमितिविरोधित्वेपि तादृशसंशये विनष्ट एव परामर्शादनुमितिर्भविष्यतीति नानुमानोच्छेद इत्यपि मूलं व्याचक्षते ।

अनुमित्युत्पादेनेति । व्याप्यवत्तापरामर्शस्याप्युत्तरकाले संशयनिवर्त्तकत्वसम्भवादनुमित्युत्पादस्य संशयनिवर्त्तकत्वाभिधानासङ्गतिमाशङ्क्याह फलतोपीति । तथाच फलद्वारापि संशयनिवर्तकत्वमस्तीति तत्प्रदर्शितम् । अपिकारपूरणेन च स्वतोऽपि निवर्तकत्वं लभ्यत इति न न्यूनतेति भावः । अतएव-स्वतो विरोधित्वस्यापि तात्पर्यविषयत्वादेवेत्याशयः । फलद्वारा विरोधित्वमपेक्ष्य ज्यायः स्वरूपतो विरोधित्वम् । परामर्शस्य विशेषदर्शनविधया स्वतःसंशयविरोधित्वं युक्त्या द्रढयति अन्यथेति । एवं चान्यथेति मूलस्य परामर्शस्य स्वतः साध्यसंशयानिवर्तकत्व इत्यर्थः ।

साध्याभाववद्धर्मिवृत्तित्वरूपव्यभिचारज्ञाने धर्मिणि साध्याभावग्रहो विशेषणतावच्छेदकप्रकारकज्ञानविधया पूर्वमपेक्षित इत्यभिप्रायेण शङ्का मूले-पक्षे साध्याभावं प्रतीत्येति । ज्ञानद्वयरूपे-साध्याभाववान् पक्षः पक्षो हेतुमान् इत्याकारके । हेतुमान् पक्षः साध्याभाववानित्याकारकैकज्ञानरूपे च व्यभिचारग्रहेण साध्याभावग्रहस्य पूर्वमपेक्षेत्याशयेन पक्ष इत्यादिनोद्धारः । साध्याभावहेत्वोः सम्बन्धोल्लेखिनीति । हेतुसम्बन्धितया ज्ञायमाने साध्याभावविषयिणीत्यर्थः । एतेन क्वचिद्बाधग्रहपरामर्शयोर्भेदेपि न क्षतिः ।

दीधितौ हेत्वाभासस्येति । अनुमित्याभासता अनुमितेर्भ्रमत्वम् । मूले तत्र व्यभिचारज्ञानमिति । धूमादिरूपहेतौ काञ्चनमयत्वावच्छिन्नवह्न्यभाववद्वृत्तित्वज्ञानमित्यर्थः । एतादृशज्ञाननिराकरणं चानुमित्यौपयिकव्यापकतानवच्छेदकेनाप्युपनीततद्रूपेण साध्यानुमितौ तद्रूपावच्छिन्नसाध्याभाववद्वृत्तित्वमपि साक्षाद्विरोधितया दोष इत्यभ्युपेत्य, अनुमितेः पूर्वं तदज्ञान एव तस्य न हेत्वाभासता इत्यभिमानेन । अनुमितिपूर्वमज्ञानं बाधसाधारणतयाऽकिञ्चित्करमित्यभिसन्धायाभिमानं निराकृत्यैतन्मतं दूषयिष्यति विशिष्टस्याप्रसिद्धेरिति । अनुमितावेव यत्र काञ्चनमयत्वेन वह्निज्ञानं तत्र काञ्चनमयत्वविशिष्टवह्नेः पूर्वमभानेन प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानाभावेन व्यभिचारघटकाभावस्य प्राक्ज्ञानासम्भवादित्यर्थः । भ्रमात्मकप्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानादेव व्यधिकरणधर्मावच्छिन्नाभावबुद्धिः । स च भ्रमो विशेषदर्शिनामाहार्य्य एवेत्याशयः ।

अत एव—तादृशाभावस्य पूर्वमज्ञानादेव, न पक्षासिद्धिः—पक्षताविरहोऽपि नेत्यर्थः ।

सिद्ध्यभावरूपपक्षताविरहस्याप्रसक्तेः साध्याभावज्ञानस्य तादृशपक्षतानुपपादकत्वाच्च साधकबाधकमानाभावरूपपक्षताविरहस्य प्रसञ्जकं पूरयति दीधितौ पक्षासिद्धिरित्यस्येति ।

विशिष्टप्रतियोग्यप्रसिद्धावपि नाभावाप्रसिद्धिरित्याह मूले व्यधिकरणेति ।

(चि०) वस्तुतो व्यभिचारस्यापि तत्र सत्त्वात्, ज्ञानञ्च तस्य बाधस्येवानुमित्यनन्तरमेव । किञ्च वह्नौ काञ्चनमयत्वस्यानुमितावेव भाने काञ्चनमयवह्निमानित्यनुमितिर्न स्यात् विशिष्टस्य पूर्वमज्ञानात् वह्नौ काञ्चनमयत्वांशेऽनुमितेराभासत्वं वह्नौ लिङ्गस्यासिद्धेः व्यभिचाराच्च । न चानुमितेर्विषयाभावाधीनमप्रमात्वं किन्तु हेत्वाभासाधीनं, यस्य हि ज्ञानमनुमितिप्रतिबन्धकं स हेत्वाभासः । न च साध्याभावो ज्ञातः प्रतिबन्धक इति न स हेत्वाभासः ॥

(दी०) लिङ्गस्येत्याद्यभ्युच्चयमात्रं, वह्नेरपक्षत्वात् काञ्चनमयत्वस्यासाध्यत्वाच्च। न च साध्याभाव इति। अनुमितेः पूर्वं विशिष्टस्याप्रसिद्ध्या तदभावस्याज्ञानादिति भवतैवोक्तत्वादिति भावः॥

(गा०) व्यभिचारस्य काञ्चनमयत्वावच्छिन्नवन्ह्यभाववद्वृत्तित्वरूपस्य कदाचिदप्यज्ञाने व्यभिचारस्य न वास्तवत्वमत आह ज्ञातं च तस्येति। अनुमितेः पूर्वमज्ञानाद्यदि न हेत्वाभासता तदा तादृशबाधस्यापि सा न स्यादिति प्रतिबन्दिसूचनाय बाधस्येवेति। काञ्चनमयत्वावच्छिन्नवन्ह्यभाववत्पक्षरूपस्य भवन्मतसिद्धभ्रमत्वप्रयोजकबाधस्येवेत्यर्थः। अनुमित्यनन्तरमेवेति। विशिष्टप्रतियोगिज्ञानात्मकानुमित्या तन्मूलकस्मरणादिना वा अभावग्रहसामग्रीसंपत्तेरिति भावः। अनुमितावेव भान इति। पूर्वं यत्र तद्भानं तत्र व्यभिचारग्रहस्यापि संभवेनानुमितेरेवानुदयादिति भावः। विशिष्टस्य पूर्वमज्ञानादिति। विशेषणान्तरविशेष्यतापन्नविशेषणकज्ञानमात्र एव विशिष्टविशेषणज्ञानं हेतुरित्यभिप्रायेण काञ्चनमयत्वादिना विशिष्टस्य वन्ह्यादेर्भानेपि तद्रूपावच्छिन्नतदभावज्ञानानियमान्न व्यभिचारग्रहनियम इत्यालोच्य उक्तानुमितेराभासताप्रयोजकमन्यदाह वन्हाविति। लिङ्गस्य-काञ्चनमयत्वव्याप्यस्य, वन्हावप्रसिद्धेर्व्यभिचाराच्चेत्यस्य वन्हिवृत्तौ च काञ्चनमयत्वस्येत्यादिः। यद्यपि वन्हौ काञ्चनमयत्वभानस्य तत्र तद्व्याप्तिविशिष्टवत्ताज्ञानानधीनतया तत्र तद्वत्त्वांशे अनुमितेराभासत्वे उक्तासिद्धिव्यभिचारयोः प्रयोजकत्वमसंभवदुक्तिकम्, तथाप्यनुमितौ विधेयतावच्छेदकतोद्देश्यतावच्छेदकताविलक्षणाप्रकारता तद्व्याप्यवत्ताज्ञानप्रयोज्येति नियमानुरोधेन यदि काञ्चनमयत्वावगाहितायाः तद्व्याप्यवत्ताज्ञानाधीनत्वमंगीकरोति तदेतद्दूषणम्।

अनुमित्युपनीतभानवादिना तादृशनियमाङ्गीकारेऽनुमित्युपनीतभानमतविशेषस्यैवोच्छेदः सर्वैरेव तद्व्याप्यवत्ताज्ञानात्तदनुमित्यभ्युपगमादिति तेन तादृशानियमो नाभ्युपेयत एवेत्यभिसंधाय दीधितिकार आह लिङ्गस्येत्याद्यभ्युच्चयमात्रमिति।

उक्तस्थले पक्षनिष्ठस्य काञ्चनमयत्वावच्छिन्नवन्ह्यभावस्यानुमित्याभासताप्रयोजकत्वेपि अनुमित्याभासताया हेत्वाभासाधीनत्वानि-

धर्मो न सिध्यतीति नोक्तयुक्त्या बाधस्य हेत्वाभासतासिद्धिरित्याह मूले न चेति । अप्रामाण्यं भवतोच्यत इति शेषः । न च साध्याभाव इत्यनन्तरं प्रकृत इति पूरणीयं, प्रतिबन्धक इत्यनन्तरं भवितुमर्हतीति ।

अत्र कुत इत्याकांक्षायामाह दीधितौ अनुमितेः पूर्वमिति । अनुमित्यात्मकाविशिष्टसाध्यज्ञानानन्तरं तदभावज्ञानसंभवेऽपि तज्ज्ञानस्य पूर्वोत्पन्नायामनुमितावप्रतिबन्धकत्वादनुमित्यन्तरानुत्पादस्य च पक्षे हेतुमत्ताज्ञानसत्त्वे तदात्मकव्यभिचारज्ञानादेव निर्वाहान्न तदभावस्य हेत्वाभासतेति भावः । एतेनानुत्पन्नायामप्यनुमितौ विशिष्टविषयकमानसादिज्ञानसंभवेन विशिष्टसाध्याभावज्ञानोत्पत्तावपि न क्षतिः ॥

(चि०) वस्तुतस्तु उपनीतस्यानुमितौ भाने मानाभावः प्रत्यभिज्ञादौ च प्रतीतिबलेनैव तत्कल्पनम्, अन्यथा पूर्वोपस्थितसकलपदार्थभाने यथार्थानुमित्युच्छेदः । अपि चैवं परार्थानुमानेऽप्युपनीतभाने बाधितोऽर्थ उपनीतोऽयं मम भात इत्युद्भावनादेव विजयेत वादी उद्देश्यानुमितेरप्रतिबन्धान्न तत्र बाधो दोष इति चेत्, तुल्यं स्वार्थानुमानेऽपि । अत एव यत्र सामान्यतोदृष्टानुमानमेवेतरबाधसहायं विशेषानुमापकं तत्र बाधकानामाभासत्वे तत्प्रयुक्तं सामान्यतो दृष्टस्याप्याभासत्वमिति बाधस्यासङ्कर्यात् । न च यदि विशेषविप्रतिपत्तौ सामान्यस्य प्रतिज्ञा तदा अर्थान्तरं सामान्यविप्रतिपत्तौ तु नेतरत्र बाधकापेक्षेति वाच्यम् । स्वार्थानुमान एवैवं बाधासङ्करस्योक्तत्वादित्यपास्तम् । अनुमित्यप्रतिबन्धेन तत्र बाधस्यादोषत्वात् ।

ननु पक्षे साध्याभावग्रहवत्साध्याभावव्याप्यग्रहोऽपि दूषकः विरोधित्वाविशेषात्, तथाच साध्याभावसम्बन्धो व्यभिचारः साध्याभावव्याप्यसामानाधि-

करण्यं बाधः साध्याभावव्याप्यश्च वह्नित्वादिकमेवेति चेत् । न । पक्षे हि साध्याभावे ज्ञायमाने ज्ञाते वा यदि साध्याभावव्याप्यसामानाधिकरण्यबुद्धिस्तदा व्यभिचार एव ।

अथ पक्षे साध्याभावबुद्धिं विनैव सा, तर्हि हेतु-साध्याभावव्याप्ययोरगृह्यमाणाविशेषयोः सत्प्रति-पक्षत्वम् ।

अथ तुल्यबलेन सत्प्रतिपक्षोऽधिकबलेन बाध इति चेन्न । गमकतौपयिकरूपसाकल्यं हि बलं तच्च द्वयोर्ज्ञा-तामिति कथं न सत्प्रतिपक्षत्वं, गमकताबहिर्भूतश्च न बलम् ।

अथ साध्याभावव्याप्यबुद्धेरनन्यथासिद्धत्वं बलं, तदा ततः साधनवति पक्षे साध्याभावानुमितावनै-कान्तिकत्वमेव । पक्षे साध्याभावग्रहत्वादिति यदुक्तं त-दप्यसिद्धम् । तस्य दोषत्वानभ्युपगमात्, अन्यथा हेत्वाभासान्तरतापत्तिः ।

अथ हेतुतः साध्यसिद्धिसम्भावनायां व्यभिचा-रासिद्धेः बाधेन हेतोरसाधकत्वे सिद्धे व्यभिचार-सिद्धिरित्युपजीव्यत्वाद्बाधः पृथक्, अन्यथा हेतोरसा-धकत्वे सिद्धे साध्यसिद्धिसम्भावनाविरहाद्व्यभिचा-रबुद्धिः तस्याश्च सत्यां हेतोरसाधकत्वधीरित्यन्योऽ-न्याश्रय इति चेन्न । साध्यसिद्ध्युन्मुखहेतुज्ञानस्य प्र-मितसाध्याभावसहचरितहेतुविषयत्वेन व्यभिचार-ज्ञानतया दूषकत्वात् । तथापि व्यभिचारे साध्याभा-वप्रमा तन्त्रं तां विना तदभावादिति सैव दोष इति

चेत्। सत्यम्। किन्तु साध्याभावप्रमा व्यभिचारज्ञानत्वेन दूषिका क्लृप्तत्वात्, न स्वतन्त्रा। अत एव पक्षे साध्याभावज्ञानत्वेन प्रतिबन्धकत्वं न तु साध्याभावसमानाधिकरणसाधनज्ञानत्वेनेति प्रत्युक्तम्। तस्य लघुत्वेऽप्यक्लृप्तत्वात्। अथ प्रत्यक्षादौ प्रमामात्रं प्रति स्वातन्त्र्येण बाधो दोषत्वेन क्लृप्त इत्यनुमितावपि स एव दोष इति चेत्। न तर्हि हेत्वाभासः, अनुमित्यसाधारणदोषस्य तत्त्वात् मनोयोगाभाववत् स्वरूपसत एव प्रतिबन्धकत्वात् हेतुत्वाभिमतावृत्तित्वेनाऽसाधकतालिङ्गत्वाभावाच्च। बाधितपक्षकत्वं लिङ्गमिति चेन्न। अन्यत्र तथा दूषकत्वाकल्पनात्।

इति बाधपूर्वपक्षचिन्तामणिः॥

(गा०) व्यभिचारधीसत्त्वादेवानुमित्यनुत्पादनिर्वाहे बाधे विरोधित्वान्तरकल्पनाया निर्युक्तिकत्वादिति भावः। तद्रूपावच्छिन्नव्यभिचारस्य तद्रूपावच्छिन्नव्यापकताग्रहाधीनानुमितावेव विरोधितया उपनीततद्धर्मविशिष्टसाध्यानुमितौ काञ्चनमयत्वावच्छिन्नवह्न्यभाववद्वृत्तित्वरूपव्यभिचारो अकिञ्चित्कर इति कथञ्चिद्विशिष्टसाध्यज्ञानाधीनबाधग्रहदशायामुक्तानुमितेर्वारणाय बाधस्य हेत्वाभासत्वमावश्यकमित्यनुशयादनुमितावुपनीतस्यैव भानं दूषयति मूले वस्तुतस्त्विति। अनुमितावुपनीतभाने बाधकमप्याह अन्यथेति। यथार्थानुमित्युच्छेद इति। भ्रमाभिन्नानुमित्युच्छेद इत्यर्थः। ननु उपनीतस्य सकलपदार्थस्य भाने तत्तत्पदार्थबाधनिश्चयाभावस्य सहकारितया तादृशसहकारिसत्त्वे भ्रमत्वमिष्टमेव तदसत्त्वे तादृशकारणविरहादेव भ्रमत्वमित्यत आहापि चेति। इत्युद्भावनादिति। मध्यस्थस्येत्यादिः। अन्यथा वादिप्रतिवादिनोः परोपन्यस्तसाध्यानुमित्यजननादसंगतेः। न च तत्र बाधो दोष इति। यत्र यत्सिद्धिरनुद्देश्या तत्र तज्ज्ञानविरोधी प्रकृते न दोष इति तदुद्भावनान्न वादिविजय इत्यर्थः।

तुल्यं स्वार्थानुमानेपीति। प्रकृतहेत्वधीनं यत्र यदवगाहित्वं तत्र तदवगाहनाविरोधिनः काञ्चनमयत्वादिना वह्नयाद्यभावस्य न प्रकृतहेतुदोषत्वमिति प्रकृतहेतोरदुष्टतयाऽनुमितेरप्रमात्वानुपपत्तिर्भवतामपीत्यर्थः। इतरबाधसहाय-मितरबाधग्रहसहितं, विशेषानुमापकं-अगृहीतबाधस्य विशेषस्यानुमापकम्, बाधकानां-इतरबाधकानां आभासत्वे-अप्रामाणिकत्वे, यस्य बाधो गृहीतस्तस्य च वस्तुनो अबाधितत्व इति यावत्। तत्प्रयुक्तमिति। पारिशिष्य मानविशेषबाधप्रयुक्तमित्यर्थः। आभासत्वं-अप्रमाजनकत्वं। अनुमित्यप्रतिबन्धेनेति। स्वरूपसतो बाधस्याप्रतिबन्धकत्वात्तज्ज्ञाने च विशेषानुमापकताया एवानुपपत्तेरिति भावः। बाधस्य-विशेषबाधस्य। अदोषत्वादिति। तथा च न तत्र सामान्यतोदृष्टस्याप्रमाजनकत्वनिर्वाह इति भावः। यद्यपि तादृशबाधावतारस्य कदाचिद्विशेषानुमित्यनुत्पादप्रयोजकतया तस्य हेतुदोषत्वं यत्र तदनवतारस्तत्रत्याया विशेषानुमितेराभासताप्रयोजकत्वं चानपवादमेव, तथापि कदाचिदनुमित्यनुत्पादप्रयोजकज्ञानविषयत्वसंभवेनैव स्वतन्त्रहेत्वाभासतानिर्वाहे अनुमित्याभासताप्रयोजकत्वाभिधानमनुपयुक्तम्। विशेषानुमितिविरोधितया व्यभिचाराद्यसंकीर्णहेत्वाभासता च पक्षधर्मताबलेनेत्यादिना सिद्धान्तयिष्यत एवेति तात्पर्य्यम्।

दूषकः—अनुमितिप्रतिबन्धकः। विरोधित्वाविशेषादिति। साध्याभावस्येव तद्व्याप्यस्यापि साध्यविरोधित्वादित्यर्थः। साध्याभावसंबन्ध इति। हेतोरित्यादि, हेतुमत्तया ज्ञायमानपक्षे साध्याभाववत्त्वमित्यर्थः। व्यभिचारः-व्यभिचारग्रहविधया दूषणम्, भवत्विति शेषः। साध्याभावव्याप्यसामानाधिकरण्यमिति। तस्येत्यादिः, हेतुमत्तया ज्ञायमानेपि पक्षे साध्याभावव्याप्यवत्त्वमित्यर्थः। बाधो बाधविधयैव दूषणम्। तस्य व्यभिचारानात्मकत्वादिति भावः। वन्हित्वादिकमेवेति। वन्हिरुष्ण इत्यादि बाधस्थल इति शेषः। व्यभिचार एव-व्यभिचारग्रह एव, अनुमितिविरोधीति शेषः।

तुल्यबलेनेति। उभयत्र बलपदं बलज्ञानपरं, तथाच यत्र उष्णत्वादिसाधकवन्हित्वादेरधिकबलज्ञानं तत्र सत्प्रतिपक्षताविरहेण बाधस्यासाङ्कर्य्यमिति भावः। तच्च—व्याप्तिपक्षधर्मतात्मकं गमकतौपयिकरूपं च। द्वयोर्ज्ञातमिति। साध्याभावसाधकवन्हित्वादे·

रिव प्रकृतहेतोरपि ज्ञातम्, अन्यथा कारणविरहादेवानुमित्यनुत्पादनिर्वाहेण बाधस्य हेत्वाभासत्वासिद्धेरिति भावः । गमकताबहिर्भूतं-गमकतानौपयिकं, साध्यव्याप्यवत्ताबुद्धेः प्रमात्वे गमकतानौपयिकमपि सत्प्रतिपक्षविघटकं बलं विरोधिव्याप्यवत्ताबुद्धौ तद्व्याप्यवत्ताबुद्धिप्रमात्वनिश्चयस्योत्तेजकत्वोपगमादिति ।

साध्याभावव्याप्यवत्ताज्ञाने प्रमात्वनिश्चयदशायां सत्प्रतिपक्षताविरहेण बाधस्यैव दोषत्वं, बाधश्च प्रमितसाध्याभावव्याप्यवत्पक्षकत्वम् । न चोभयत्र प्रामाण्यग्रहदशायां यदनुमितिप्रतिबन्धकं तत एव तादृशबाधग्रहदशायामनुमित्यनुत्पादनिर्वाहे तादृशबाधबुद्धेः प्रतिबन्धकत्वान्तरमप्रामाणिकमिति वाच्यम् । तादृशप्रतिबन्धके प्रकृतपरामर्शप्रमात्वग्रहस्य उत्तेजकतया उभयत्र प्रामाण्यग्रहदशायामनुमितेर्वारणाय प्रतिबन्धकत्वान्तरकल्पनाया आवश्यकत्वादिति शंकते अथेति । अनन्यथासिद्धत्वं प्रमात्वनिश्चयः । ततः-साध्याभावव्याप्यबुद्धितः साध्याभावानुमितावेति । बाधकविरहेणेति शेषः । अनैकान्तिकमेव-व्यभिचारज्ञानमेवानुमितिं विरुन्ध्यादिति(१)शेषः । इदमापाततः तादृशसाध्याभावानुमित्युत्पादकाले साध्यानुमितेर्व्यभिचारज्ञानेनावारणात्, किन्तु एकत्र प्रामाण्यग्रहस्थले अन्यत्राप्रामाण्यग्रहात्परस्यैवानुमित्युपगमेनोक्तप्रामाण्यग्रहोत्तेजकताया अनुपयोगात् उभयत्र प्रामाण्यग्रहतदग्रहस्थलयोरप्रामाण्यग्रहानास्कन्दितविरोधिव्याप्यवत्ताज्ञानप्रतिबन्धकतयैवोपपत्तेः प्रतिबन्धकत्वान्तरं निर्युक्तिकमित्येव दूषणं बोध्यम् । इति यदुक्तमिति । इत्यनेन दृष्टान्तावधया यत्साध्याभावज्ञानस्य स्वातन्त्र्येण दूषणत्वमुक्तमित्यर्थः । हेत्वाभासान्तरतापत्तेरिति । पक्षनिष्ठसाध्याभावमात्रस्य व्यभिचारानात्मकतया बाधत्वस्यापि तत्रानुपगमेन कल्पेऽनन्तर्भावादिति भावः ।

हेतुतः साध्यसिद्धिसंभावनायामिति । हेतोः साध्यसाधकप्रमाविषयत्वसंभावनायामित्यर्थः । व्यभिचारासिद्धेरिति । तादृशप्रमाविषयत्वस्याव्यभिचारनियतत्वादिति भावः । व्यभिचारादेरसाधकत्वासिद्ध्युपगमे दोषमाहान्यथेति । बाधसिद्धिरेव व्यभिचारसिद्धिरिति नोपजीव्योपजीवकभाव इति दूषयति सेति । सैव दोष इति । सा प्रमात्वेनैव लाघवात् प्रतिबन्धिका न तु व्यभिचारज्ञानतया व्यभिचारस्य गुरुशरीरत्वादित्यर्थः । पक्षातिरिक्ते

हेतुसाध्याभाववत्त्वग्रहदशायामनुमितिवारणाय व्यभिचारधियः प्रतिबन्धकताया आवश्यकत्वाद्गौरवमकिञ्चित्करं साध्याभावप्रमायाः प्रतिबन्धकत्वान्तरकल्पन एव च गौरवमिति दूषयति सत्यमिति। साध्याभावप्रमाप्रतिबन्धिकेतीत्यादिः। अन्यत्र तथा दूषकत्वाकल्पनादिति। प्रत्यक्षादौ साध्याभाववत्पक्षकत्वपर्यन्तज्ञानस्य प्रतिबन्धकत्वाकल्पनादित्यर्थः। तथा चानुमितौ तज्ज्ञानप्रतिबन्धकतायामुक्तयुक्त्यनवकाशेन हेतुवृत्तित्वेऽपि तस्य हेत्वाभासत्वं नास्तीति भावः॥

(चि०) उच्यते। पक्षे साध्याभावनिश्चयः साध्याभावज्ञानप्रमात्वनिश्चयात्, ज्ञानमात्रादर्थनिश्चये प्रामाण्यग्रहवैयर्थ्यं भ्रमत्वेन ज्ञातादर्थनिश्चयप्रसङ्गश्च, तथा चोपजीव्यत्वेनाधिकबलत्वेन वा पक्षे साध्याभावज्ञानस्य प्रमात्वनिश्चये सव्यभिचारो नान्यथा, उभयथापि साध्याभावनिश्चयाधीनव्यभिचारज्ञानात् पूर्वं ज्ञातं साध्याभावज्ञानप्रमात्वमेव दोष उपजीव्यत्वात्। यदि च पक्षे साध्याभावज्ञानस्य प्रमात्वनिश्चयो नानुमितिविरोधी, तदा व्याप्तिपक्षधर्मतया हेतुज्ञानं विशेषदर्शनत्वेन पक्षे साध्याभावज्ञानं परिभूय साध्यं साधयेदेव पर्वते धूम इव वह्निम्। न च साध्याभावबुद्धेरवागृह्यमाणविशेषा सत्प्रतिपक्षवत् प्रतिबन्धकेति वाच्यम्। रजते न इदं रजतमिति ज्ञानेऽपि विशेषदर्शनेन रजतत्वस्य शङ्खे पीतत्वज्ञाने शुक्लत्वस्य चानुमानात्, वादिवाक्येन पक्षे साध्याभावज्ञानादनुमानोच्छेदप्रसङ्गाच।

अथ पक्षे साध्याभावप्रमैव साध्याभावहेतुविषया व्यभिचारज्ञानत्वेन दोषो न तु तस्याः प्रमात्वज्ञानमपीति चेत्, तर्हि प्रमायाः अप्रमात्वज्ञाने भ्रान्ता-

नुमितिर्न स्यात्, न स्याच्च पक्षे साध्याभावज्ञानप्रमात्वभ्रमादनुमितिप्रतिबन्धः।

(दी०) तथाचेत्यादि। अधिकबलत्वेनाधिकरणस्वरूपत्वेनापेक्षणीयो व्यभिचारनिश्चयः। साध्याभावनिश्चयेति। साध्याभावो निश्चीयते येन प्रामाण्यनिश्चयेन तदधीनेत्यर्थः।

(गा०) पक्षे साध्याभावनिश्चय इति। साध्याभावज्ञाने प्रामाण्यसंशयोत्तरं तत्र प्रामाण्यनिश्चयं विना न साध्याभावनिश्चयस्तत्संशयस्य सामग्र्या अनिवृत्तेरिति स तत्प्रमात्वनिश्चयाधीनः। एवं प्रमात्वनिश्चयं विना अप्रामाण्यसंशययोग्यतया कथंचिदुत्पन्नोऽपि निश्चयो न निश्चयकार्य्यकारी अतस्तस्य निश्चयकार्यकारित्वमपि प्रमात्वनिश्चयाधीनमित्यर्थः। ज्ञानमात्रादर्थनिश्चय इति। प्रमात्वनिश्चयनिरपेक्षाज्ज्ञानहेतोः प्रामाण्यसंशयस्थले अर्थनिश्चये तादृशज्ञानस्य निश्चयकार्य्याभ्युपगमे प्रामाण्यग्रहवैयर्थ्यं तदुपायविचारवैयर्थ्यं, अर्थनिश्चयप्रसंगः—तत्कार्यनिष्कम्पप्रवृत्त्यादिप्रसङ्ग । द्वितीयाभ्युपगमे दूषणमिदमुपजीव्यत्वेनेति। क्वचित्साध्याभावनिश्चयात्मकव्यभिचारज्ञानस्वरूपे उपजीव्यत्वेनेत्यर्थः। अधिकबलत्वेनेत्यत्र बहुव्रीहिभ्रमं निराकर्त्तुं दीधितिकृत् व्याचष्टे अधिकरणस्वरूपत्वेनेति। अनुमितिप्रतिबन्धकरूपनिश्चयकार्यकारिताप्रयोजकत्वेनेत्यर्थः। एतदुभयस्य प्रामाण्यनिश्चयापेक्षायामेव हेतुतया तल्लाभाय प्रमात्वनिश्चयाविशेषणं पूरयति अपेक्षणीय इति। निश्चयकार्य्यार्थमवश्यं स्वीकरणीय इत्यर्थः। प्रमात्वनिश्चयस्य स्वरूपसद्व्यभिचारानिर्वाहकतया व्यभिचारपदं तन्निश्चयपरतया व्याचष्टे व्यभिचार इति। व्यभिचारनिश्चयः–साध्याभावांशे निश्चयकार्यकारिताप्रयोजकरूपविशिष्टव्यभिचारज्ञाननिर्वाहः। तच्च रूपं निश्चयत्वमिव निश्चितप्रामाण्यकत्वमपीति पक्षत्रयसङ्गतिः। व्यभिचारज्ञानस्य साध्याभावनिश्चयात्मकतया तदधीनत्वकथनासङ्गतेः साध्याभावनिश्चयपदं करणव्युत्पत्त्या तत्प्रमात्वनिश्चयपरतया वर्णयति साध्याभाव इति। व्यधिकरणबहुव्रीहावसहिष्णुतया साध्याभावस्य निश्चयो यस्मादिति न व्याख्यातम्। तदधीनत्वं च तन्निश्चयाधीननिश्चयकार्य्यकारिताप्रयोजकरूपवत्त्वम्। एतच्चेदानीं ज्ञानयोः कामिकत्वे हेतुत्वेना-

भिहितम् । पूर्वं ज्ञातमिति च मूलं तज्ज्ञानभिन्नज्ञानविषयीभूतमित्यर्थकम् । उपजीव्यत्वादिति । स्वरूपे प्रतिबन्धकत्वे चेत्यादिः । एतच्चेदानीं दोषत्वहेतुतयोक्तम् ।

ननु वह्निरनुष्ण इत्यादौ साध्याभाववत्ताज्ञानादेवानुमित्युत्पादनिर्वाहात् तत्प्रमात्वधियः स्वतोऽविरोधित्वेन तत्प्रमात्वस्य हेत्वाभासता नोपपन्नेत्याशङ्क्य प्रमात्वज्ञानस्यानुमितौ स्वतः प्रतिबन्धकत्वं व्यवस्थापयति यदि चेति । साध्याभाववत्त्वबुद्धेरनुमितिसाधारणतद्विशिष्टधीप्रतिबन्धकतया तस्याः परामर्शेन विशेषदर्शनात्मकेनापि न परिभवसम्भवः प्रतिबन्धकसत्त्वे कस्यापि हेतोः कार्य्योत्पादकत्वायोगादित्याशङ्कां निराकरोति न चेत्यादिना । अगृह्यमाणविशेषा–अगृहीताप्रामाण्या, रजते नेदं रजतमिति । अप्रामाण्यज्ञानं विनैवेत्यादिः । विशेषदर्शनेनेति । परामर्शरूपेणेत्यादिः। अनुमानादिति । तथाच विशेषादर्शनविशिष्टत्वेनैव ग्राह्याभावबुद्धेः प्रतिबन्धकत्वमुपगन्तव्यमित्यनुमितिमात्र एव प्रमात्वेनानिश्चितसाध्याभावधियोऽविरोधित्वादिति भावः । प्रमात्मकग्राह्याभावज्ञानमेवानुमितिप्रतिबन्धकम्, अतो न पीतत्वादिभ्रमदशायां पीतत्वाभावाद्यनुमित्यनुपपत्तिः, तत्प्रतिबन्धकतापि व्यभिचारज्ञानविधयैव न तु स्वातंत्र्येणेति न तद्विषयस्य बाधहेत्वाभासता इति शङ्कते अथेति । तर्हीति । वस्तुगत्या प्रमाया एव प्रतिबन्धकत्व इत्यर्थः ॥

(चि०)ननूपजीव्यत्वेऽप्यत्र साध्याभावप्रमेति ज्ञानं न स्वतोदूषकं क्लृप्तत्वात् पक्षे साध्याभावनिश्चयं कुर्वत् व्यभिचारज्ञानद्वारेति चेन्न। अत्र साध्याभावप्रमेति ज्ञानान्नियमतः साध्यज्ञानानुदयात् तस्यैव प्रतिबन्धकत्वात्, शब्दादौ तथा दर्शनात्। साध्याभावप्रमाविषयवृत्तित्वस्य हेतुवृत्तित्वादसाधारणत्वेन साध्याभावप्रमाया हेत्वाभासत्वम्। साधारण्येऽपि ज्ञायमानं सत यदनुमितिं प्रतिबध्नाति तस्यैव हेत्वाभासत्वम्। न च साध्याभावप्रमाऽत्रेति निश्चयदशायां पक्षे साध्याभा-

वहेत्वोर्ज्ञानाद्व्यभिचार इति वाच्यम् । प्रमात्वज्ञानस्य साध्याभावनिश्चयहेतुत्वेन तद्दशायां तदभावात् ।

अत्रेदं तत्त्वम् । साध्याभाववान् साध्यवदन्यो वा पक्षः—पक्षावृत्तिसाध्यं—पक्षे साध्याभावः—पक्षनिष्ठसाध्याभाववत्त्वादिकं-साध्यादेः पक्षावृत्तित्वादिकं—साध्यवत्सामान्यादेः पक्षान्यत्वादिकं—विशिष्टसाध्ये पक्षादेर्वैशिष्ट्याभाववत्त्वादिकं—यथामतं पक्षे साध्यवत्ताज्ञानस्य साक्षाद्विरोधि प्रत्येकमेव बाधः । तन्निश्चयश्च विरोधिनिश्चयत्वेन दोषविशेषाद्यजन्यज्ञानमात्र एव विरोधी । अत एव 'अनन्वयनिश्चयविरहो योग्यता'इत्याचार्याः ।

विभाजकन्तु प्रकृतपक्षप्रकृतसाध्यवैशिष्ट्यग्रहविरोध्यनुमाऽयकत्वे प्रकृतपक्षप्रकृतसाध्यग्रहविरोधित्वे च सति प्रकृतपक्षप्रकृतसाध्यवैशिष्ट्यग्रहाविरोधित्वम् । पक्षादेः साध्यासमानाधिकरणधर्म्मवत्त्वादिकमपि बाध एव । साध्याभाववत्पक्षादिज्ञानप्रमात्वन्तु न बाधः । तज्ज्ञानस्य पक्षादौ साध्याभावादेरनवगाहित्वे विरोधिविषयत्वाभावात् , अवगाहित्वे तु तद्विषयत्वेनैव प्रतिबन्धकत्वात् प्रमात्वानिश्चयस्यान्यत्र प्रतिबन्धकत्वाकल्पनाच्च । सर्वत्र निश्चयस्य हेतुत्वे प्रतिबन्धकत्वे च भ्रमत्वाग्रहः, संशयसाधारणज्ञानमात्रस्य तथात्वे तु भ्रमत्वानिश्चयः प्रयोजकोऽन्यथाऽऽकाङ्क्षाकृतिसाध्यत्वादिनिश्चयहेतुप्रतिहेतुपरामर्शादीनां प्रमात्वनिश्चयो योग्यता व्यभिचारज्ञानादीनाञ्च प्रमात्वज्ञानं प्रयोजकीभवेत् । शङ्खादौ शुक्लत्वाभावभ्रमे च शुक्लत्वाद्यनुमितिर्न विना तदप्रामाण्यग्रहं, नहि स्वरूपसत्यपि बाधनिश्चये शाब्दमानसादिज्ञानमुत्पद्यते ।

(गा०) माभूत् साध्याभाववत्त्वभ्रमनुमितौ स्वतः प्रतिबन्धकं तथापि तत्प्रमात्वबुद्धेः प्रतिबन्धकत्वमफलं वह्निरनुष्ण इत्यादौ वन्ह्या-

दावुष्णत्वादिनिश्चयासत्त्वे तत्प्रमात्वनिश्चयेऽप्यनुमित्युपगमात्तन्निश्चयदशायां व्यभिचारज्ञानादेवानुमित्यनुत्पादनिर्वाहाच्छङ्कः पीत इत्यादौ अपीतत्वाद्यनुमितेर्व्यभिचारधीसत्त्वेऽपि नानुपपत्तिः साध्याभावांशेऽगृहीताप्रामाण्यकत्वस्य व्यभिचारधीप्रतिबन्धकतायां निवेश्यत्वादिति शंकते नन्विति। साध्याभाववानिश्चयं कुर्वन्निति। अनुमितिप्रतिबन्धकरूपनिश्चयकार्यकारिताप्रयोजकविशेषणवैशिष्ट्यं निर्वाहयादित्यर्थः। साध्याभावज्ञानासत्त्वेऽपि तद्विषयकप्रमात्वनिश्चयकाले न साध्यज्ञानमित्यनुभवमालंब्य समाधत्ते नेति। तस्यैवेति। तस्याधीत्यर्थः। प्रतिबन्धकत्वादिति। तादृशज्ञानकाले व्यभिचारज्ञानानियमोऽग्रे दर्शनीयः शाब्दादिसाधारणबुद्धौ ग्राह्याभावप्रमात्वज्ञानस्य प्रतिबन्धकत्वेऽपि बाधस्यासाधारणहेतुदोषत्वमुपपादयति हेतुवृत्तित्वादसाधारणत्वेनेति। हेतुवृत्तितया विरोधित्वस्यानुमितिमात्रनिरूपितत्वेनेत्यर्थः। हेतुनिष्ठसाध्याभावप्रमाविषयवृत्तित्वपर्यन्तस्य न दोषतेत्यभिसन्धायाह साधारण्येऽपीति। पक्षे साध्याभावप्रमा इति ज्ञाने प्रमात्वघटकतया पक्षे साध्याभाववत्त्वज्ञाने तदपि ज्ञानं व्यभिचारज्ञानरूपमेवेति दोषान्तरज्ञानात्मकं यज्ज्ञानमनुमितिप्रतिबन्धकं स एव दोष इति नियमात्। साध्याभावप्रमाज्ञानस्य शाब्दादिसाधारणविशिष्टज्ञानप्रतिबन्धकत्वेऽपि न तद्विषयस्य हेत्वाभासतानिर्वाह इति शङ्कते न च साध्याभावप्रमेति। हेतुमत्त्वग्रहविषयतावच्छेदकपक्षतावच्छेदकावच्छिन्ने साध्याभाववत्त्वमनवगाह्यापि पक्षनिष्ठविषयतायां साध्याभाववद्वृत्तित्वावगाहिनः पक्षे साध्याभावप्रमेति निश्चयस्य पक्षतावच्छेदकविशिष्टसाध्याभावनिश्चयोपजीव्यस्य संभवान्नोक्तबाधज्ञानस्य व्यभिचारज्ञानरूपतेति समाधत्ते प्रमात्वेति। पक्षनिष्ठग्राह्याभावस्य बाधत्वमभ्युपेत्यापि बाधस्य पार्थक्यं व्यवस्थापयति पक्षधर्मताबलेनेत्यादिना।

साध्याभावबुद्धेः प्रमात्वज्ञानस्य प्रतिबन्धकत्वं निराकृत्य तत्प्रमात्वस्य दोषताया अग्रे स्वयं दूषणीयतया दीधितिकारो वस्तुतो बाधस्वरूपान्याह अत्रेदमित्यादिना। साध्याभाववानिति। अत्र साध्याभाववत्त्वमनवच्छिन्नं ग्राह्यम्, अतो न कपिसंयोगवानयं वृक्ष इत्यादावतिप्रसङ्गः। न चानवच्छिन्नत्वानवगाहिनोऽपि तदभाववत्ताज्ञानस्याव्याप्यवृत्तित्वाग्रहदशायां तद्वत्ताग्रहप्रतिबन्धकतया अनव-

च्छिन्नत्वाविशेषितसाध्याभाववत्त्वस्यापि दोषत्वं दुर्वारमिति वाच्यम् । प्रतिबन्धकीभूताभाववत्ताज्ञाने नियमतोऽधिकरणत्वांशे सम्बन्धघटकतयाऽनवच्छिन्नत्वभानोपगमात्, अन्यथा अव्याप्यवृत्तित्वज्ञानकालीनतज्ज्ञानस्याविरोधित्वात्, तज्ज्ञानाभावविशिष्टत्वेन प्रतिबन्धकत्वस्योपगन्तव्यतया गौरवात् तदपेक्षया अनवच्छिन्नत्वावगाहितया तथात्वे लाघवात् । पूर्वोत्पन्नाऽव्याप्यवृत्तित्वज्ञानवशादनवच्छिन्नवृत्तिकत्वानवगाहिनोऽभाववत्ताज्ञानस्याव्याप्यवृत्तित्वधीनाशेऽपि अप्रतिबन्धकत्वमिष्टमेव । एकदेशकालरूपधर्मितावच्छेदकावच्छेदेन तदभाववत्ताज्ञानस्य तदवच्छेदेन तद्वत्ताज्ञानप्रतिबन्धकत्वान्तरकल्पनमव्याप्यवृत्तित्वज्ञानोत्तेजकतापेक्षयाव—श्यकम्-अव्याप्यवृत्तित्वेन ज्ञातयोरपि भावाभावयोरेकावच्छेदेन एकदाऽनिश्चयात् । न चानवच्छिन्नवृत्तिकत्वावगाहित्वेनाभावज्ञानस्य प्रतिबन्धकत्वे अयं संयोगवान् तदभाववांश्चेति समुच्चयस्यायं संयोगवान्न वेति संशयाविरोधित्वप्रसङ्गः तस्य व्याप्यवृत्तित्वानवगाहित्वादिति वाच्यम् । समुच्चयस्य कोटिद्वयसामानाधिकरण्यविषयकतया विरोधभाननिवर्तकस्य संशयविरोधित्वात्, भवतु वाऽव्याप्यवृत्तित्वज्ञानाभावविशिष्टस्य व्याप्यवृत्तित्वानवगाहिनोऽपि ज्ञानस्य प्रतिबन्धकत्वम्, तथापि वृक्षनिष्ठसंयोगाभावादौ नातिप्रसङ्गः तद्विषयकनिश्चयत्वस्यानुमितिप्रतिबन्धकताशून्याव्याप्यवृत्तित्वज्ञानकालीनज्ञानसाधारणत्वेन तदतिरिक्तवृत्तित्वादिति व्याप्यवृत्तिसाध्यकस्थले पक्षनिष्ठानवच्छिन्नसाध्याभाववत्त्वमेव बाधः । तद्विषयत्वञ्च प्रतिबन्धकतानियतमेवेति अनवच्छिन्नसाध्याभाववत्त्ववद्देशकालरूपपक्षतावच्छेदकावच्छेदेन साध्याभाववत्त्वमपि तदवच्छेदेन साध्यसाधने बाधः । एवं पक्षतावच्छेदकधर्मे अनतिरिक्तवृत्तित्वरूपसाध्यावच्छेदकताभानं यत्रोद्देश्यं तत्र पक्षतावच्छेदकसामानाधिकरण्येन साध्याभाववत्त्वम् । यत्र च तादृशधर्मसामानाधिकरण्यमात्रेण साध्यसिद्धिरुद्देश्या तत्र तादृशधर्मावच्छिन्नं साध्याभाववत्त्वं बाध इति विशेषो बोध्यः । पक्षे साध्यस्य यादृशसम्बन्धोऽनुमितिविषयः तत्संबन्धपर्याप्तप्रतियोगितावच्छेदकसम्बन्धताकोऽभावो विवक्षणीयः । यत्र च संयोगादिना साध्यानुमितिरुद्देश्या तत्र संयुक्तसंयोगादिसम्बन्धावच्छिन्नाभावस्याविरोधितया बाधानात्मकत्वात् पर्या-

त्तिनिवेशः। यत्र संयुक्तसंयोगादिरूपपरम्परासम्बन्धो अनुमितिविषयस्तत्र शुद्धसंयोगादिसम्बन्धावच्छिन्नाभावो न बाधः पक्षविषयतानिरूपितसंयोगादिविषयतायाः साक्षात्साध्यविषयत्वानिरूपिततया संयोगादौ साध्यसम्बन्धताविरहात् । धर्मितावच्छेदकव्यापकतादिविशिष्टसंयोगादिना साक्षात्सम्बन्धेनानुमाने च तादृशाभावो बाध एव। उक्तरीतिरग्रेऽप्यनुसर्तव्या। साध्यवदन्यो वेति ।तद्वत्ताबुद्धौ तदत्यन्ताभावस्येव तद्वद्भेदस्यापि धियो विरोधित्वादिति भावः। एवं च वृत्त्यनियामकसम्बन्धेनानुमितिस्वीकारे तत्सम्बन्धस्य प्रतियोगितानवच्छेदकत्वे च तत्र साध्यवद्भेदस्यैव बाधत्वं बोध्यम्। वाकारः साध्याभावसाध्यवद्भेदयोः पृथक् पृथक् पक्षविशेषणतया दोषघटकता न तु मिलितयोरिति लाभाय। पक्षः-पक्षतावच्छेदकविशिष्टः। पक्षावृत्तिसाध्यमिति । पक्षावृत्तित्वविशिष्टसाध्यतावच्छेदकावच्छिन्नमित्यर्थः। यद्यपि पक्षः साध्यवानित्यनुमितौ पक्षे साध्यस्याधिकरणत्वमेव सम्बन्धतया भासते नतु साध्ये पक्षवृत्तित्वं तथासति पक्षे साध्यस्येव साध्येऽपि पक्षस्य प्रकारतापत्तेरिति तादृशानुमितौ साध्यं पक्षावृत्तीति ज्ञानस्य न ग्राह्याभावज्ञानविधया विरोधित्वम्, तथापि पक्षः साध्यवान् पक्षे साध्यमिति ज्ञानयोः समशीलयोरेकं यत्प्रतिबध्यत्वम् अन्यस्यापि तत्प्रतिबध्यत्वमनुभवसिद्धमित्याशयेनैतदुक्तिः । पक्षतावच्छेदकावच्छेदेनानुमितौ पक्षतावच्छेदकानवच्छिन्नत्वविशिष्टसाध्यस्यापि तुल्ययुक्त्या बाधता बोध्या। एतच्च प्राचीनमतानुसारेण। वस्तुतस्तु तदीयतत्संसर्गावगाहिबुद्धौ तत्सम्बन्धावच्छिन्नतदभावबुद्धेः प्रतिबन्धकत्वमिति संसर्गविधया यद्भासते तत्संसर्गस्य विशिष्टबुद्ध्यविषयतया आधाराधेयभावसंसर्गबुद्धौ वा आधाराधेयभावाभावज्ञानप्रतिबन्धकताया अप्रामाणिकतया पक्षवृत्तित्वाद्यभावघटितस्य न दोषता। अत एवाग्रे यथामतमित्यभिधास्यते। एतन्मते अवृत्तित्वविशिष्टसाध्यस्य सिद्धिविशेषात्मकस्यापि बाधरूपता बोध्या। वक्ष्यमाणलक्षणाक्रान्तत्वात् विशेषणविशेष्यभाववैपरीत्येऽपि प्रतिबन्धकत्वमक्षतमित्याशयेनाह पक्षे साध्याभाव इति। आधेयतया पक्षेण पक्ष वृत्तित्वेन वा विशिष्टःसाध्याभाव इत्यर्थः।तादृशसाध्यवद्भेदोऽपि बोध्यः। पक्षनिष्ठसाध्याभाववत्त्वादिकमिति । साध्याभावाधिकरणत्वं साध्यवद्भेदाधिकरणत्वं च-

त्यर्थः । अधिकरणतावृत्त्या पूर्वस्माद्भेदः । एतदपि प्राचीनमतेन । साध्यादेरित्यादिना साध्यसम्बन्धपरिग्रहः । पक्षावृत्तित्वादिकमित्यादिना वृत्तित्वपरिग्रहः । आदिपदाभ्यां वा साध्यतावच्छेदकस्य पक्षनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकत्वादिपरिग्रहः । एतदपि सर्वं प्राचीनमतेन । भेदप्रतियोगित्वभेदानुयोगित्वयोः समशीलयोरेकतरज्ञानं यत्र विरोध्यपरज्ञानमपि तत्र तथा इत्याशयेनाह साध्यवदिति । साध्यवत्त्वव्यापकानुयोगिताकत्वादिविशिष्टपक्षभेदादिकमित्यर्थः । आदिपदाभ्यां पक्षतावच्छेदकावच्छिन्नस्य साध्यवत्सामान्यनिष्ठभेदप्रतियोगित्वादेः परिग्रहः । वक्ष्यमाणलक्षणे विशिष्टपक्षे विशिष्टसाध्यवैशिष्ट्यग्रहत्वे स्वरूपसम्बन्धरूपस्य प्रतिबध्यतावच्छेदकत्वस्याविशेषात् विशिष्टपक्षसाध्यग्रहाविरोधित्वविशेषणसार्थक्यमिति सूचयितुमाह विशिष्ट इति । आदिपदाभ्यां विशेष्यस्य पक्षावृत्तित्वादिपरिग्रहः । विशिष्टस्य पक्षत्वे विशेष्यतावच्छेदकावच्छेदेन साध्याभाववत्त्वादिकमपि बोध्यम् । मूलकृता ग्राह्याभावबुद्धेः प्रतिबन्धकत्वमन्यत्र क्लृप्तमिति शाब्दादौ तथा दर्शनात् इत्यनेनाभिहितम्, अत एव उक्तबाधज्ञानप्रतिबन्धकत्वस्यैव तथात्वमित्याह तन्निश्चयश्चेति । विरोधिनिश्चयत्वेनेति विरोधीत्यत्र हेतुः । धर्मिणि ग्राह्याभावविषयकत्वेनेत्यर्थः । तथात्वे सति विरोधितायाः सर्वानुभवसिद्धत्वादिति भावः । मात्र एवेति । मात्रपदं कृत्स्नार्थकम् । ग्राह्याभावनिश्चयस्य शाब्दबोधप्रतिबन्धकत्वे आचार्यसम्मतिमाह अत एवेति । मणिकृता तु एकपदार्थसंसर्गे अपरपदार्थनिष्ठाभावप्रतियोगित्वप्रमाविषयत्वज्ञानस्य शाब्दधीविरोधित्वाशयेन तत्र तादृशप्रमाविषयत्वाभावरूपयोग्यताया ज्ञातोपयोगिना शब्दपरिच्छेदे स्वीकरिष्यते ।

प्रकृतपक्षेति । सत्प्रतिपक्षेऽतिव्याप्तिवारणाय प्रथमं सत्यन्तम् । पक्षाप्रसिद्धिसाध्याप्रसिद्ध्योर्वारणाय द्वितीयम् । उदासीनवारणाय विशेष्यम् । यद्यपि साध्याभावविशिष्टप्रकृतपक्षादिरूपबाधे विरोध्युन्नायकसाध्याभावव्याप्यविशिष्टपक्षाद्यन्यत्वं विशिष्टपक्षादिग्रहविरोधिपक्षतावच्छेदकाभावविशिष्टपक्षाद्यन्यत्वं चासिद्धम्, तथापि यादृशविशिष्टनिरूपितविषयिताविरोध्यनुमितिजनकतावच्छेदकत्वं सति विशिष्टपक्षग्रहत्वस्य विशिष्टसाध्यग्रहत्वस्य च न्यूनवृत्तितया विशिष्टपक्षे विशिष्टसाध्यवैशिष्ट्यग्रहत्वान्यूनवृत्ति· प्रतिबध्यता त-

न्निरूपितप्रतिबन्धकतावच्छेदिका तादृशत्वमित्यत्र तात्पर्य्यम्। शेषं पूर्वोपदर्शितदिशावसेयम्।

अथात्र लक्षणे वह्निमान् ह्रदो वह्निमानित्यादौ वह्न्यभावविशिष्टह्रदादिरूपे बाधेऽव्याप्तिः तद्विषयकत्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतायाः विशिष्टपक्षग्रहत्वव्यापकत्वात्। न च पक्षतावच्छेदकादिभेदेन बाधलक्षणस्य भिन्नतया यत्र साध्यमेव पक्षतावच्छेदकं तत्र विशिष्टपक्षग्रहविरोधित्वस्यानिवेशनीयतया नाश्रयासिद्ध्याद्यात्मकबाधासङ्ग्रह इति वाच्यम्। वह्निमान् काञ्चनमयह्रदो वह्निमानित्यादौ काञ्चनमयत्वाभावविशिष्टह्रदादिरूपाश्रयासिद्ध्यादावतिव्याप्तिवारणाय तादृशपक्षकस्थलीयबाधलक्षणेऽविरोधित्वान्तस्यावश्यं निवेशनीयत्वात्तत्रत्याश्रयासिद्धिरूपबाधे अव्याप्तेर्दुर्वारत्वादिति चेन्न। आश्रयासिद्ध्यात्मकस्य तस्यालक्ष्यत्वाद्लक्ष्यत्वे तु उद्देश्यतावच्छेदकताविधेयतावच्छेदकतातिरिक्ताविशिष्टपक्षे विशिष्टसाध्यवैशिष्ट्यबोधीयविषयतान्तःपातिप्रकारतावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयिताकत्वस्याविरोधित्वान्तसहितविरोधित्वान्तेन विवक्षणात्। काञ्चनमयह्रदो वह्निमानित्यादावाश्रयासिद्ध्यादिज्ञानस्य प्रतिबध्यतावच्छेदिका न उद्देश्यतावच्छेदकताभिन्ना विशिष्टपक्षविशिष्टसाध्यवैशिष्ट्यबोधीयविषयतान्तःपातिनी प्रकारता इति तद्व्युदासः। उक्तपक्षाप्रसिद्धिरूपबाधबुद्धेश्च तादृशप्रकारताभिन्ना या विधेयमुद्रया या उक्तविशिष्टवैशिष्ट्यविषयतान्तःपातिनी (साध्य) प्रकारता तस्या अपि ह्रदत्वावच्छिन्नविशेष्यतानिरूपितवह्न्यादिप्रकारतात्वेन प्रतिबध्यतावच्छेदकत्वान्न तादृशबाधासङ्ग्रहः। प्रकारताया उक्तविशिष्टवैशिष्ट्यविषयताशालिज्ञानवृत्तित्वमुपेक्ष्य तादृशविषयतान्तःपातित्वनिवेशाच्च काञ्चनमयह्रदो वह्निमान् ह्रदश्च काञ्चनमय इत्येतादृशज्ञानीया या विधेयमुद्रया प्रकारता तस्या ह्रदत्वावच्छिन्नविशेष्यतानिरूपितकाञ्चनमयत्वादिप्रकारतात्वेनाश्रयासिद्धिज्ञानप्रतिबध्यतावच्छेदकत्वेऽपि नातिप्रसङ्गः।

ननु तथापि पर्वतो वह्निव्याप्याभाववह्न्यभावोभयवानित्यादौ वह्निव्याप्यवत्पर्वतादिरूपबाधेऽव्याप्तिः तस्य वह्निमत्पर्वतरूपविरोध्युन्नायकत्वादिति चेन्न। विरोधितान्तघटकप्रतिबन्धकतावच्छेदकविषयतायां विरोध्युन्नायकतानवच्छेदकत्वमनिवेश्य तादृ-

शप्रतिबन्धकतायां स्वनिरूपितप्रतिबध्यतावच्छेदकविषयत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयत्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेदकविषयत्वावच्छिन्नत्वस्य प्रतिबन्धकतायां निवेशनीयत्वात् । प्रकृते च वह्निव्याप्याभाववत्ताज्ञानत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतामादायाक्तबाधे लक्षणसमन्वयसम्भवात् । तथाहि तादृशप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकं न वह्न्यभाववत्पर्वतज्ञानत्वं, किन्तु वह्निव्याप्याभाववत्पर्वतज्ञानत्वमेवातस्तादृशप्रतिबन्धकताया वह्न्यभाववत्पर्वतज्ञानविरोधिवह्निमत्पर्वतावगाहित्वे वह्निव्याप्यवत्पर्वतविषयितावच्छिन्नत्वेऽपि वह्निव्याप्याभाववत्पर्वतज्ञानविरोधिवह्निव्याप्यवत्पर्वतावगाहित्वावच्छेदकवह्निव्याप्यवत्पर्वतविषयतावच्छिन्नत्वस्याक्षतत्वादिति । तथाच उद्देश्यतावच्छेदकताविधेयतावच्छेदकतातिरिक्तविशिष्टपक्षविशिष्टसाध्यविशिष्टविशिष्ट्यबोधीयविषयतातःप्रतिप्रकारत्वावच्छिन्नप्रतिबध्यतानिरूपिता सती स्वनिरूपितप्रतिबध्यतावच्छेदकविषयित्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकीभूतविषयित्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेदकीभूतविषयित्वानवच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयिताकत्वमिति निष्कर्षः ।

ननु पक्षादौ साध्यासमानाधिकरणधर्मवत्त्वादिज्ञानस्यानुमितिविरोधितया साध्याभावाभावत्वेन साध्यानवगाहितस्तस्य साध्याभावव्याप्त्यनवगाहित्वेन साध्याभावाननुमापकतया च तद्विषयेऽतिव्याप्तिरित्याशंकायामिष्टापत्त्या परिहरति पक्षादाविति । मूलोक्तसिद्धान्तं दूषयति साध्याभाववदिति । पक्षादाविति । पक्षतावच्छेदकावच्छिन्ने इत्यर्थः । अनवगाहित्वे इति । तत्र तमनवगाह्यापि भ्रमभिन्नत्वस्य तद्वति तत्प्रकारकत्वस्य चावगाहनसम्भवादिति भावः । ननु साध्याभाववति पक्षे साध्याभावप्रकारकामित ज्ञानमित्याकारकविरोधिविषयकप्रमात्वज्ञानस्य प्रतिबन्धकताया निर्विवादतया तद्विषयस्य साध्याभाववत्पक्षघटितप्रमात्वस्य हेत्वाभासता निष्प्रत्यूहैव इत्यत आह अनवगाहित्वे इति । तद्विषयत्वेनेति । पक्षतावच्छेदकादिविशिष्टसाध्याभावाद्यवगाहित्वेनेत्यर्थः । एवकारेण प्रतिबन्धकतावच्छेदके प्रमात्वघटकेतरांशविषयतानिवेश-

द्यवच्छेदः तन्निवेशे गौरवात् तद्विषयकज्ञानस्यापि प्रतिबन्धकताप्रयोजकविरोधिविषयताश्रयत्वेन प्रतिबन्धकतया तत्सङ्ग्रहाच्चेति भावः । साध्याभाववत्पक्षघटितप्रमात्वविषयकत्वे अनुमानप्रतिबन्धकतानतिरिक्तवृत्तित्वसत्त्वेपि मेयत्वविशिष्टव्यभिचारादेरिव तादृशविशिष्टान्तरघटितत्वेन न दोषतासम्भव इति बोध्यम् ।

ननु विरोध्यविषयस्यापि धर्मिणि ग्राह्याभावप्रमात्वविषयकज्ञानस्य शाब्दादौ प्रतिबन्धकतादर्शनादनुमितावपि तत्प्रतिबन्धकत्वमव्याहतमेव, तदुक्तं मूलकृता-शाब्दादौ तथा दर्शनादित्यत आह प्रमात्वनिश्चयस्येति । प्रतिबन्धकत्वाकल्पनादिति । शाब्दबोधादावपि तत्प्रतिबन्धकत्वानुभवस्य तुल्यन्यायेनासिद्धत्वादिति भावः । ननु साध्याभावज्ञानसत्त्वेपि तत्राप्रामाण्यग्रहेऽनुमित्युत्पत्तेरनुमितौ साध्याभावज्ञानं न प्रतिबन्धकमपि तु तत्प्रमात्वग्रह एव इत्यत आह सर्वत्रेति । भ्रमत्वाग्रहः-संशयसाधारणभ्रमत्वज्ञानत्वावच्छिन्नाभावः प्रयोजक इत्यन्वयः । प्रयोजकत्वं चावच्छेदकत्वम् । अत्र हेतुतोपादानं दृष्टान्तत्वेन । तत्र ज्ञानसामान्यमनुपादाय निश्चयरूपविशेषोपादानव्यवच्छेद्यं स्पष्टयति संशयसाधारणेति । ननु साध्याभावनिश्चयस्य तद्धर्मिकभ्रमत्वग्रहाभावविशिष्टस्य प्रतिबन्धकत्वापेक्षया साध्याभावज्ञानप्रमात्वग्रहस्यैव प्रतिबन्धकत्वमुचितम् इत्याशङ्कां निराकर्तुं प्रतिबन्दिमाह अन्यथेति । प्रयोजकीभवेदिति । यथायोग कार्यजनने कार्यप्रतिबन्धे वेति पूरणीयम्, तथाच यथाऽऽकांक्षाज्ञानाद्यसत्त्वे तत्प्रमात्वग्रहेपि न शाब्दबोधोत्पत्त्यादिरिति । गृहीताप्रामाण्यकस्यैवाकांक्षादिज्ञानस्य कारणत्वादिकं तथा साध्याभावनिश्चयासत्त्वे तत्प्रमात्वग्रहेपि न साध्यज्ञानप्रतिबन्ध इत्यप्रामाण्यग्रहाभावविशिष्टस्य साध्याभावनिश्चयस्यैव तज्ज्ञानप्रतिबन्धकत्वमिति भावः । ननु शङ्खादौ श्वैत्याभावादिभ्रमे ऽप्रमात्वज्ञानं विनापि श्वैत्याद्यनुमितेरुदयात् साध्याभावज्ञानस्य साध्यग्रहप्रतिबन्धकतेत्यत आह शङ्खादाविति । विना तदप्रामाण्यग्रहमिति । फलानुरोधेन तत्र भ्रमत्वग्रहस्यैव कल्पनादिति भावः । प्रमात्वेनाज्ञायमानापि अप्रमात्वेनागृह्यमाणा ग्राह्याभावधीः शाब्दबोधादिप्रतिबन्धिकेति भवतामप्यनुमत विशेषदर्शनत्वेन लिङ्गपरामर्शस्यैव साध्याभावज्ञानपरिभावकताया भवदभिमतत्वात्, तथा च शाब्दबोधा-

र्थां तत्प्रतिबन्धकताघटके अनुमितिसाधारणानुगतधर्मस्यैव तत्प्र-
तिबध्यतावच्छेदकत्वात् तत्र तत्र विपरीतज्ञाने भ्रमत्वज्ञानकल्पन-
या अनुमित्युपपादनमनुचितम्, अन्यथा शाब्दादिसाधारणविपरीत-
ज्ञानप्रतिबध्यतावच्छेदकगर्भे अनुमित्यन्यत्वस्य निवेशनीयतया अनु-
मितौ साध्याभावज्ञानप्रमात्वबुद्धेः प्रतिबन्धकत्वान्तरस्य कल्पनीय-
तया च गौरवात्, अनुमित्यन्यत्वस्य विपरीतज्ञानप्रतिबध्यतावच्छे-
दकत्वे आश्रयासिद्ध्यादिज्ञानकालेऽनुमित्यापत्तेश्च, पक्षतावच्छेदकादि-
व्याप्यत्वज्ञानस्य अनुमित्यजनकतया तद्विपरीतज्ञानदशायां त-
च्छाब्दबुद्ध्यादेरिव तैरवच्छिन्नपक्षादिविषयकानुमितेर्भवतोऽप्यनि-
ष्टत्वादित्याह न हीति ॥

(दी०)अथ लाघवेन संशयसाधारणं संसृष्टत्वज्ञानमेव शा-
ब्दानुमित्योः कारणम्, आस्तां च तस्यैव विरोधितया प्रकरण-
समो बाधश्च हेत्वाभासोऽसिद्धिरिव परामर्शस्य, विलीयतां चाप्रसि-
द्धसाध्यकमनुमानमिति चेन्न ।

संशयासत्त्वसमये परामर्शोत्पादे सिद्धिसिषाधयिषे विना
अनुमित्यनुत्पादप्रसङ्गात्, सति विशेषदर्शने संशयायोगादिति ।

एतेन लाघवात् प्रमात्वेन निर्णीयमानं बाधज्ञानं विरोधीति
परास्तम् ।

विपरीतमेव लाघवं, स्फुटतरश्च तद्भावसाध्ये । तत्र हि गोत्वा-
द्यप्रकारकं गोत्वाभावादिप्रकारकं ज्ञानं बाधनिश्चयः । तथा च
गोत्वादिमद्विशेष्यकगोत्वाद्यभावप्रकारकत्वज्ञानाभावो भ्रमत्वग्रह-
विरहः । बाधग्रहश्च पक्षे गोत्वाद्यप्रकारकं ज्ञानं, तस्य च गोत्वा-
दिमद्विशेष्यकगोत्वाद्यभावप्रकारकत्वाद्यप्रकारकं गोत्वाभाववद्वि-
शेष्यकगोत्वाद्यभावप्रकारकत्वप्रकारकज्ञानं प्रमात्वनिश्चय इति ।
उक्तप्रायश्च तत्तत्कार्यं प्रति प्रतिबन्धकानां कारणानां च प्र-
मात्वेन निश्चीयमानतया तथात्वापत्तिरिति । न च सति विशेष-
दर्शने विपरीतनिश्चयोऽकिञ्चित्करः तत्सत्त्वेऽपि विशेषदर्शनेन प्र-

त्यक्षोत्पादादिति वाच्यम् । विशेषदर्शनेन तन्नाशानन्तरमेव प्रत्य-क्षोदयात्, परैरपि क्वचित् प्रत्यक्षविशेष एव विपरीतनिश्चयविशेष-स्यैव तथात्वोपगमाच्च । नहि शाब्दादिबोधेऽपि विशेषादर्शनवि-शिष्टत्वेन स विरोधी, गौरवात् मानाभावाच्च । न वा चाक्षुषादि-प्रत्यक्षे मानसादिविपरीतनिश्चयो विरोधी । उपयुज्यते च क्वचिद्वि-शेषदर्शनमप्रामाण्यग्राहकत्वेन बाधबुद्धेः । नचैवं बाधावतारदशायां पक्षे हेतोरग्रहेऽज्ञानलक्षणासिद्धिः, ग्रहे च व्यभिचारधीरेवेति वा-च्यम् । बाधग्रहपरामर्शयोर्भेदात्, अभेदेऽपि पक्षः साध्यव्याप्यहेतु-मान् साध्याभाववांश्च इति ग्रहस्य परस्परोपरागानवगाहिनो व्यभि-चाराविषयत्वात् । एकत्र व्यभिचाराव्यभिचारयोरेकनिश्चयागोचर-त्वात्, पूर्णे च करणे साक्षादनुमित्याविरोधिनो व्यभिचारज्ञाना-देरकिञ्चित्करत्वात् । उक्तश्च साध्यादेः पक्षाद्यवृत्तित्वादिकमपि बाधः । न च तद्ग्रहेऽपि व्यभिचारबुद्धिरावश्यकी ।

(गा०) अथ शाब्दबोधे विपरीतनिश्चयाभावो न हेतुः योग्यता-ज्ञानहेतुतयैवोपपत्तेः, एवं च अनुमितावपि न तस्य हेतुता शाब्दानु-मितिसाधारणपरोक्षानुभवत्वस्य जातिविशेषस्य वा विशेष्ये विशेष-णवत्त्वरूपयोग्यताज्ञानजन्यतावच्छेदकत्वोपगमात्तादृशकारणविरह-णैवाबाधितार्थानुमित्यनुदयादिति बाधस्य साक्षादनुमितिविरोधि-तया हेत्वाभासताभिधानमसङ्गतमिति शङ्कते अथेति । लाघवेनेति । तदभावग्रहाभावत्वापेक्षया तद्वत्ताज्ञानत्वरूपजनकतावच्छेदकला-घवेन तद्वद्विदेतदभावव्याप्यादिनिश्चयाभावानामपि हेतुत्वाकल्पन-लाघवेन चेत्यर्थः । वाक्यार्थस्य पक्षे साध्यस्य च निश्चयः शाब्दानु-मित्योः पूर्वं नियमतो न सम्भवतीत्यत उक्तं संशयसाधारणमिति । एवकारेण विपरीतनिश्चयाभावस्य व्यवच्छेदः । प्रत्यक्षस्थले अलौ-किकप्रत्यक्षत्वमेव बाधादिधीप्रतिबध्यतावच्छेदकमिति भावः । न च प्रत्यक्षस्थले अलौकिकज्ञानत्वस्य विपरीतज्ञानप्रतिबध्यतावच्छेदक-तयैवोपपत्तेः संसृष्टत्वज्ञानहेतुत्वान्तरकल्पनायामेव गौरवमिति वा-च्यम् । इच्छाया उत्तेजकत्वं प्रत्यक्षस्थले न तु परोक्षस्थले इति पू-

थक् प्रतिबन्धकताया भवतोऽप्यावश्यकत्वात्, बाधाभावस्य शाब्दबोधादिहेतुतामते शाब्दादिसामग्र्याः प्रत्यक्षादिप्रतिबन्धकतायां योग्यताज्ञानापेक्षया गुरोर्बाधाभावस्य तदभावव्याप्यवत्ताज्ञानाद्यभावस्य च निवेशनीयतया गौरवाच्च । न च शाब्दबोधादौ बाधादिधियोऽप्रतिबन्धकत्वे तदुत्तरसंशयस्य द्वितीयक्षणे स्मरणादिरूपतदभावनिश्चये तदनन्तरं शाब्दबोधापत्तिरिति वाच्यम् । यत्र विषये संशयद्वितीयक्षणे कथंचिद्विपरीतनिश्चयः शाब्दादिज्ञानकारणान्तरसमवधानं च तत्रापत्तिवारणाय बाधादिनिश्चयप्रतिबन्धकताया आवश्यकत्वेऽपि विषयविशेषे लाघवेन योग्यताज्ञानहेतुताया निष्प्रत्यूहता इत्याशयात् । नन्वेवं बाधप्रकरणसमर्थहेत्वाभासता न स्यादित्यत आह आस्तां चेति । तस्यैव–कारणीभूतस्य संसृष्टत्वज्ञानस्यैव, असिद्धिरिव–स्वरूपासिद्धिरिव, परामर्शस्य-अनुमितिजनकस्य, विरोधितया हेत्वाभास इत्यनुषङ्गेणान्वयः ।

नन्वेवं अप्रसिद्धसाध्यकानुमितिर्विलीयेत कोऽप्यप्रसिद्ध्या साध्यसंशयासम्भवादित्यत्रेष्टापत्तिमाह विलीयतां चेति । तादृशानुमितेरेकदेशिनामेवानुमतत्वादिति भावः ।

अथ पक्षसाध्ययोः संसर्गज्ञानस्यानुमितिहेतुत्वेऽपि अप्रसिद्धसाध्यविशेष्यकानुमितौ न तस्य हेतुत्वमुपेयम्, न वा बाधज्ञानस्य साक्षादनुमितिप्रतिबन्धकत्वं साध्यविशेष्यकानुमितौ साध्यसिद्धेः प्रतिबन्धकतयैव पक्षे बाधग्रहदशायां तादृशानुमित्यापत्तेरनवकाशात् इति कथमप्रसिद्धसाध्यकानुमानानुपपत्तिरिति चेन्न ।

अभावसाध्यकस्थल एव साध्यप्रसिद्धिमनपेक्ष्यानुमित्युत्पत्त्या तत्र प्रतियोगिमत्ताज्ञानरूपबाधग्रहस्य साध्यप्रसिद्धिं विनापि सम्भवात् साध्यप्रसिद्धिप्रतिबन्धकतया तादृशबाधग्रहकालेऽनुमित्यापत्तेर्वारयितुमशक्यत्वात् तादृशानुमितिस्वीकारेऽनुमितौ बाधज्ञानस्य साक्षात्प्रतिबन्धकत्वस्यावश्यकत्वात् । एवमत्र पृथिवीतरभेद इत्यादि शाब्दबोधे पृथिवीतरभेदपक्षकधर्मिसाध्यकानुमितौ च साक्षाद्बाधज्ञानस्य प्रतिबन्धकत्वमकल्पयित्वा बाधज्ञानकाले तादृशशाब्दबोधतादृशानुमित्योर्वारणाय धर्मिणि पृथिवीतरभेदसंसर्गज्ञानस्य तदुभयसंसर्गावगाहिपरोक्षज्ञानकारणताया आवश्य-

कत्वादितरभेदादिरूपाप्रसिद्धसाध्यकानुमितेरुपगमासम्भवः ।

अथ पृथिव्यां पृथिवीतरभेद इति साध्यविशेष्यकानुमितौ संसर्गज्ञानस्य हेतुत्वासम्भवेऽपि न बाधज्ञानस्य पृथिवीतरप्रकारकज्ञानरूपस्य साक्षात्प्रतिबन्धकत्वाप्रसक्तिः पृथिवीत्वावच्छिन्ने तादात्म्यसम्बन्धेन पृथिवीतरप्रकारकज्ञानस्यानाहार्यस्याप्रसिद्धेरिति तादृशसाध्यविशेष्यकानुमितिरव्याहतैव । न च शुद्धभेदत्वावच्छिन्नाऽनाहार्यपृथिव्याद्यवृत्तित्वज्ञानरूपबाधज्ञानसम्भवात्तदानीं पृथिव्यामितरभेद इत्यनुमित्यादिवारणाय पृथिवीतरभेदसंसर्गज्ञानस्य तादृशपरोक्षज्ञानहेतुत्वमावश्यकम्, अन्यथा तादृशबाधादिबुद्धेरनुमित्यादौ साक्षात्प्रतिबन्धकत्वकल्पनेन गौरवप्रसङ्गात्, तथा च कथं तादृशसाध्यविशेष्यकानुमितिरिति वाच्यम् । तादृशबाधादिप्रदशायामुपदर्शितानुमित्यादिवारणाय भेदत्वावच्छिन्ने पृथिवीसंसर्गज्ञानत्वेनैव तादृशपरोक्षज्ञानहेतुत्वोपगमात् पृथिवीतरभेदत्वरूपसाध्यतावच्छेदकावच्छिन्नाप्रसिद्धिदशायामपि केवलभेदत्वरूपेण पृथिवीसंसर्गज्ञानात् तादृशानुमितेः सम्भवात् । न चैतन्मते साध्यसंशयादनुमितेरुपगन्तव्यतया संशयस्यैव पक्षतात्वेनानुमितिहेतुत्वमिति साध्याप्रसिद्धिदशायां पक्षताविरहेण नानुमितिसम्भव इति वाच्यम् । संशयं विनापि साध्यनिश्चयकाले सिषाधयिषाबलेनानुमित्युत्पत्तेः सिषाधयिषाविरहविशिष्टसिद्ध्यभावस्य पक्षतात्वस्योपेयत्वात् । साध्यविशेष्यकानुमितौ साध्यप्रसिद्धेः प्रतिबन्धकतयैव साध्यसिद्धिदशायामनुमितिवारणसम्भवात् तादृशानुमितौ संशयादिरूपपक्षताहेतुत्वस्य निर्युक्तिकत्वाच्चेति चेत् । न । यत्र प्रतिबन्धकबाधादिबुद्धेरसम्भवस्तत्र साध्यविशेष्यकानुमितौ संसृष्टत्वज्ञानहेतुताया निर्युक्तिकत्वेनास्वीकारेऽपि पृथिव्यां जलभेदः ह्रदे धूमाभाव इत्यादि ज्ञाने संसृष्टत्वज्ञानहेतुताया अवर्जनीयतया तादृशाऽनुमितेरसम्भवेन तदभिप्रायेणैव विलीयतां चेत्यादिग्रन्थसङ्गतेः । न च पृथिव्यां जलभेद इत्याद्यनुमितेः प्रामाणिकत्वे पृथिव्यां जलभेद इत्यादिशाब्दबुद्धौ संसृष्टत्वरूपयोग्यताज्ञानस्य हेतुत्वे शाब्दत्वमेव जन्यतावच्छेदकं वाच्यं तादृशानुमितौ चागत्या बाधबुद्धेरपि साक्षात्प्रतिबन्धकत्वमुपेयं विषयभेदेन कार्यकारणभावभेदस्यावश्यकत्वादिति कथं तादृशानुमितिविलय इति वाच्यम् । साध्यविशे-

ष्यकानुमितेः सिद्धान्तिभिरनभ्युपगमात् तदनुरोधेनानुमितिविशेषे संसृष्टत्वज्ञानहेतुतामभ्युपगम्य बाधादिबुद्धेः साक्षात्प्रतिबन्धकता-कल्पनमयुक्तमित्याशयेन तादृशानुमितिविलयस्योपगन्तव्यत्वात् । न च साध्यविशेष्यकानुमितेः सिद्धान्तिभिरनभ्युपगमे पृथिव्यां जला-दिभेदसाध्यकानुमानस्य पक्षैकदेशे साध्यप्रसिद्ध्या सम्भवेऽपि एक-व्यक्तिपक्षक—इतरभेदानुमानस्यागतिरिति साध्यविशेष्यकानुमि-तिस्वीकार आवश्यक इति कथं तदनभ्युपगम इति वाच्यम् तादृ-शानुमित्यनभ्युपगमेऽपि साध्यविषयकव्यतिरेकव्याप्त्यवगाहिपरा-मर्शाद्विशेषदर्शनरूपात्तादृशालौकिकप्रत्यक्षस्यैव प्रथमं स्वीका-रणीयतया तदात्मकविशेषणतावच्छेदकप्रकारकज्ञानात्तदनन्तरक्षणे साध्यविशेषणकानुमितिसम्भवेन सामञ्जस्यात् विशिष्टसाध्या-प्रसिद्धावपि अभावत्वादिसामान्यलक्षणया तेन रूपेण साध्यज्ञानस्य पूर्वं सम्भवेन साध्योपनायकज्ञाननिर्वाहात् प्रथमं साध्यविशेषण-कालौकिकप्रत्यक्षसम्भवात् ।

इदं तु बोध्यम् । उक्तरीत्या साध्यविशेष्यकानुमित्यनभ्युपगमेऽपि निर्वाहे तादृशानुमितिसामग्र्यन्तरकल्पनेन लाघवानुरोधेनैव तदन-भ्युपगमः समुचितः किन्त्वत्र संसृष्टत्वज्ञानहेतुत्वोपरोधः । न च साध्यविशेष्यकानुमित्यनभ्युपगमेऽपि तदुत्तरकालीनसाध्यविशेषण-कानुमित्यनुरोधेन क्लृप्तहेतुताकाद्व्यतिरेकपरामर्शादेव तन्निर्वाहे परा-मर्शकारणताधिक्यविरहान्न गौरवमिति वाच्यम् । तदभ्युपगमे तत्र साध्यप्रसिद्धेः प्रतिबन्धकताकल्पनाधिक्येन गौरवात् । अत एव (१) भेदादिधर्मिकेतरादिरूपप्रतियोगिसंशयात्मकपक्षधर्मिकसाध्यसंसर्ग-सन्देहात् संसृष्टत्वज्ञानहेतुतामतेऽपि साध्यविशेष्यकानुमितिनिर्वाहः । विशेषणतावच्छेदकप्रकारकनिश्चयविरहेण साध्यतावच्छेदकविशि-ष्टवैशिष्ट्यप्रकारकानुमित्यसम्भवादिति ।

एतेन संसृष्टत्वज्ञानस्यानुमितिहेतुत्वे महानसीयेतरवह्न्यभाव-वान् पर्वत इत्यतादृशेतरबाधादिधीबलाच्छुद्धवह्नित्वादिना व्याप-कताग्रहान्महानसीयवह्निमान् पर्वत इत्याकारकाया विशेष्ये विशे-षणमिति रीत्या जायमानाया अनुमितेरनुपपत्तिस्तत्र महानसी-यत्वविशिष्टवन्ह्यादेः प्रागप्रसिद्ध्या तत्संसर्गज्ञानासंभवात् । न

(१) एवं इति पाठान्तरम् ।

च वह्नौ महानसीयत्वस्य पर्वते च वह्नेः संशयात्मकसंसर्गज्ञानात्तादृशानुमितिर्भविष्यतीति वाच्यम्। तथासति विशिष्टविशेषणकानुमितौ विशिष्टसंसर्गज्ञानहेतुत्वे महानसीयवह्निर्नास्तीति बाधग्रहदशायां विशिष्टवन्ह्यादिविशेषणकानुमितिवारणाय बाधग्रहस्य साक्षात्प्रतिबन्धकतास्वीकारापत्तिरिति परास्तम्। यथा महानसीयवह्निमान् पर्वत इति वाक्यात् विशेष्ये विशेषणमिति रीत्या जायमानः शाब्दबोधो अवान्तरवाक्यार्थभूतमहानसीयत्वविशेषितवह्न्यादिबोधं विनापि वह्न्यंशे महानसीयत्वसंशयात्मकात्पर्वते महानसीयत्वविशेष्यतापन्नवह्निकोटिकसंशयरूपयोग्यताज्ञानान्निर्वहति तथा तादृशसंशयादेवोक्तस्थले महानसीयवह्निमान् पर्वत इत्यनुमितिनिर्वाहात् महानसीयत्वविशिष्टवह्निनिर्णयं विना प्रतियोगितावच्छेदकविशिष्टप्रतियोगिनिश्चयरूपकारणाभावान्महानसीयवह्न्यभावभानासम्भवेन नोक्तसंशयसम्भव इति चेत्। शाब्दस्थलेऽप्येषोऽनुयोगः तुल्यः स्यात्।

संशयेति। साध्यसंशयद्वितीयक्षणे यत्र परामर्शोत्पादस्तत्र द्वितीयक्षणे विनश्यदवस्थात् संशयात् अनुमितेरेतन्मतेपि निर्वाहात्।

संशयासत्त्वसमय इति। सिद्ध्यात्मकपरामर्शद्वितीयक्षणे यत्रानुमित्सा तत्र सिद्ध्यात्मकसंसृष्टत्वनिश्चयादनुमितेरेतन्मतेऽपि च निर्वाहात्। सिद्धिसिषाधयिषे विनेति। सिद्धिरूपसंसृष्टत्वज्ञानं सिषाधयिषाविरहसहकृतं प्रतिबन्धकमिति तदुपगमनिर्वाहकसिषाधयिषोपादानम्। परामर्शानन्तरोत्पन्नसंशयादेव तत्रैतन्मते अनुमितिर्भविष्यतीति शंकां निराकरोति सतीति।

ननु भ्रमत्वाग्रहविशिष्टबाधनिश्चयत्वेन प्रतिबन्धकत्वापेक्षया प्रमात्वनिश्चयविशिष्टबाधज्ञानत्वेन प्रतिबन्धकत्वमेव युक्तं तदभाववति तत्प्रकारकत्वरूपभ्रमत्वापेक्षया तद्वति तत्प्रकारकत्वरूपप्रमात्वग्रहस्यैव लघुत्वात्, मन्मते प्रमात्वज्ञाने निश्चयत्वस्येव भवन्मते बाधज्ञाने निश्चयत्वस्य निवेशनीयतया साम्यात् अभावांशे प्रमात्वेन निश्चीयमानो बाधसंशयोऽपि बाधनिश्चयकार्य्यकारी। एवं च बाधग्रहासत्त्वे तत्प्रमात्वनिश्चयसत्त्वेऽनुभूयमानानुमितिरप्युपपद्यते, बाधधीप्रमात्वस्य हेत्वाभासतापि विशेष्यविशेषणभावे विनिगमनाविरहेण प्रमात्वनिश्चयस्यापि प्रतिबन्धकत्वात्। यदि बाधनिश्चया-

विशिष्टतत्प्रमात्वग्रहेऽनुमित्यप्रतिबन्धके तत्प्रमात्वविषयकत्वसत्त्वे-नातिप्रसक्ततया तस्य न दोषता, तदा पक्षनिष्ठसाध्याभावादिविष-यकत्वस्यापि अप्रामाण्यज्ञानास्कन्दितज्ञानसाधारण्येन तत्प्रतिबन्धक-ताप्रतिप्रसक्ततया तस्यापि दोषत्वासम्भवः । तत्सम्भवस्तु प्रमित-साध्याभाववत्पक्षादेरेवेति शंकां निराकरोति एतेनेत्यादिना । ए-तेन—अज्ञायमानेपि बाधग्रहे शाब्दमानसादिज्ञानानुत्पादानुभवेन ।

उक्तलाघवमपि नास्तीत्याह विपरीतमेवेति । तदभावनिश्चय-त्वघटकतत्प्रकारकत्वापेक्षया प्रमात्वनिश्चयत्वघटकस्य तद्वति तत्प्र-कारकत्वाभावाप्रकारकत्वस्यातिगुरुतया भ्रमत्वज्ञानाभावस्यावच्छेद-कतामतेऽभावद्वयनिवेशाधिक्यस्याकिञ्चित्करत्वादिति भावः । भावसाध्यकस्थले बाधग्रहभ्रमत्वघटकसाध्याभावाभावस्य साध्या-त्मकस्य ताद्रूप्येणैव निवेशात् तादृशभ्रमत्वस्य साध्याभाववति सा-ध्याभावप्रकारत्वरूपप्रमात्वापेक्षया लघुत्वेनातिस्फुटं लाघवमित्याह स्फुटतरं चेति । गोत्वाद्यप्रकारकमिति । एतेन वक्ष्यमाणप्रमात्वज्ञा-नीयनिश्चयत्वापेक्षया बाधग्रहनिश्चयत्वस्य विशेषोऽपि दर्शितः । न च प्रमेयत्वादिना गोत्वप्रकारकनिश्चयसंग्रहाय गोत्वत्वावच्छिन्नप्रकार-कत्वं निवेश्यं तथाच सत्ययं गोत्वाभाववान् गोत्वाभावाभाववान् वेति संशयस्य धर्मिणि गोत्वाभावाभावत्वेनैव गोत्वप्रकारकस्याव्याप्ति-रिति वाच्यम् । तादृशसंशये धर्मिणि गोत्वत्वेन गोत्वस्य नियमतो भानोपगमात्—तेन रूपेण तद्वत्त्वभाने बाधकाभावात् । गोत्वा-दिमद्विशेष्यकगोत्वाद्यभावप्रकारकत्वाद्यप्रकारकेति । आदिपदा-द्गोत्वाद्यभाववद्विशेष्यकगोत्वाद्यभावप्रकारकत्वरूपप्रमात्वाभावपरिग्र-हः । भ्रमत्वाप्रकारकत्वाभिधानं तु भावद्वयकोटिकसंशयाभ्युपगन्तृ-मतावलम्बेन । ननु भावरूपसाध्याभावज्ञानस्य प्रतिबन्धकतायां त-दभाववति तत्प्रकारकत्वरूपभ्रमत्व–तद्वति तत्प्रकारकत्वरूपप्रमात्वा-भावयोः समशरीरतया विनिगमनाविरहेण द्वयोरेव ग्रहौ निवेशनी-यौ तदपेक्षया च भ्रमत्वाभावरूपप्रामाण्यतो लघुशरीरतद्वति तत्प्रका-रकत्वरूपप्रमात्वग्रहस्यावच्छेदकत्वे लाघवम्, भावद्वयकोटिकसंशया-नभ्युपगमात्, निश्चयत्वशरीरे प्रमात्वाभावाप्रकारकत्वमेव निवेश्यते न तु प्रमात्वाप्रकारकत्वमिति न तदुभयनिवेशनिबन्धनगौरवमिति शंकायां प्रतिबन्दीमाह उक्तप्रायं चेति । उक्तप्रायं–उक्तकल्पम्, पूर्वमा-

कांक्षाज्ञानहेतुप्रतिहेतुपरामर्शधर्मिकप्रमात्वनिश्चयस्य कारणत्वप्रतिबन्धकत्वे आपादिते न तु प्रमात्वविशिष्टनिश्चयानां तेष मिति प्राचः पदम् । प्रतिबन्धकानां–प्रतिहेतुपरामर्शादीनां, कारणानामाकांक्षाज्ञानपरामर्शादीनाम् । तथात्वापत्तिरिति। यथायोगं प्रतिबन्धकत्वस्य कारणत्वस्य चापत्तिरित्यर्थः । तुल्ययुक्त्या प्रामाण्यनिश्चयेपि निश्चितप्रामाण्यकत्वस्य तत्रापि च तथात्वापेक्षया अनवच्छिन्नप्रामाण्यग्रहबाधयोः कार्यग्रहप्रतिबन्धादावपेक्षिततया स एव न स्यात् , प्रतिबन्धकादिविशेषणपरम्परानवस्था चेति तत्र तत्र प्रामाण्यनिश्चयो यदि नापेक्ष्यते तदा तुल्यं प्रकृतेऽपीति भावः । अगृहीताप्रामाण्यकत्वेन प्रतिबन्धकतामतेपि तद्घटकाप्रामाण्यग्रहे अनिश्चिताप्रामाण्यकत्वं विशेषणं तत्र चागृहीताप्रामाण्यकत्वं विशेषणम् इत्येवंक्रमेण विशेषणपरम्परया अनवस्थितिरिति तु नाशंकनीयम् , प्रतिबन्धकीभूतनिश्चयविशेषणागृहीताप्रामाण्यकत्वघटकाप्रामाण्यग्रहेऽनिश्चिताप्रामाण्यकत्वानिवेशात् । तत्राप्रामाण्यनिश्चयदशायां कार्यवारणाय तदप्रामाण्यं निश्चयविशिष्टविपरीतनिश्चयादीनामगृहीताप्रामाण्यकत्वानवच्छिन्नानां प्रतिबन्धकत्वान्तरस्यैव कल्पनीयत्वात् । तादृशाप्रामाण्यनिश्चये च निश्चितप्रामाण्यकत्वाविशेषिताप्रामाण्यग्रहाभावस्य विशेषणत्वोपगमात् तद्वैशिष्ट्यनिवेशफलस्य प्रतिबन्धकत्वान्तरकल्पनयोपपादनात् दूरस्थे धर्मिणि अयं स्थाणुरित्यादिनिश्चयानन्तरं करादिरूपविशेषदर्शने सति नायं स्थाणुरित्यादिप्रत्यक्षोत्पत्त्या विशेषदर्शनविशिष्टस्यैव विपरीतनिश्चयस्य प्रतिबन्धकता वाच्या, तथा च परामर्शसत्त्वे विपरीतनिश्चयेनानुमित्यप्रतिबन्धात् तदसत्त्वे च कारणाभावादेवानुमित्यनुत्पत्त्या बाधस्य न हेत्वाभासतेति शंकां निरस्यति न चेत्यादिना । विशेषदर्शनेन तन्नाशानन्तरमेवेति । विपरीतनिश्चयानन्तरोत्पन्नविशेषदर्शनाधीनविपरीतनिश्चयनाशे सत्येवेत्यर्थः । क्षणमात्रस्यातिसूक्ष्मकालतया तद्विलम्बेन फलोपगमेऽनुभवविरोधाभावात् पूर्वक्षणे भ्रमसत्त्वेपि विशेषदर्शनवशात् ये प्रत्यक्षमङ्गीकुर्वन्ति तेषामपि परोक्षज्ञानप्रतिबन्धकतायां विशेषादर्शनवैशिष्ट्यनिवेशो नानुमतः, विपरीतनिश्चये सति विशेषदर्शने शाब्दादिबोधानुपगमादिति बाधस्यानुमितिविरोधित्वं ध्रुवमित्याह परैरिति । प्रत्यक्षविशेष एव–तदिन्द्रियजन्यप्रत्यक्ष एव, विपरीतनिश्चयविशेषस्यैव–

तदिन्द्रियजन्यदोषविशेषाजन्यविपरीतनिश्चयविशेषस्यैव, तथात्वोपगमात्-विशेषादर्शनविशिष्टत्वेन प्रतिबन्धकत्वोपगमात्। विशेषोपादानप्रयोजनमाह न वेति। दोषविशेषजन्यविपरीतज्ञानसत्त्वे तदनिवर्त्तकत्वेन विशेषदर्शनस्याकिञ्चित्करतया तत्सत्त्वेपि समानेन्द्रियजन्यप्रत्यक्षानुत्पत्त्या विशेषदर्शनविशिष्टत्वमपुरस्कृत्यैव तस्य प्रतिबन्धकत्वमिति दोषविशेषाजन्यत्वं विशेषपदार्थेन्तर्भावितम्। उक्तस्थलेपि अयं स्थाणुरिति भ्रमोत्पत्तिकाले अयं न स्थाणुरिति प्रत्यक्षवारणाय विशेषादर्शनविशिष्टदोषप्रतिबन्धकताया आवश्यकत्वे तद्विशिष्टविपरीतज्ञानप्रतिबन्धकत्वमफलमिति बोध्यम्।

ननु यत्र विपरीतनिश्चयानन्तरं तन्निवर्त्तकं विशेषदर्शनं तत्र विशेषदर्शनस्योत्पन्नविपरीतज्ञाननाशकतया विपरीतज्ञानान्तरोत्पादविरोधितया च प्रत्यक्षनिश्चयोपयोगित्वेपि यत्र शंखत्वादिदर्शनकाले दोषविशेषजन्यः पीतत्वादिभ्रमस्तत्राप्यनुभवसिद्धं मानसादावपीतत्वादिनिश्चये शंखत्वादिदर्शनस्योपयोगित्वं विशेषदर्शनस्योत्तेजकत्वं विना न निर्वहतीत्यत आहोपयुज्यते चेति। अप्रामाण्यग्राहकत्वेनेति। विशेषदर्शनकालीनविपरीतज्ञानानुव्यवसाये तद्व्याप्यवति तद्विपरीतावगाहित्वभानात्तेन हेतुना तत्राप्रामाण्यानुमितिसम्भवादिति भावः। यद्यपि यत्रोपक्रमेणाप्रामाण्यानुमितिस्तस्यानुव्यवसायादिना विनष्टत्वादेव विरोधिता न सम्भवति, तथापि तत्समानविषयकज्ञानान्तरस्याविरोधित्वायाप्रामाण्यग्रहोपयोग इत्यवधेयम्।

साध्याभावविशिष्टपक्षादेर्बाधत्वे 'अथ साध्याभाववति पक्ष' इत्यादि पूर्वपक्षग्रन्थेन दर्शितामनुपपत्तिमाशङ्क्य निराकरोति न चैवमित्यादिना। अज्ञानलक्षणा जनकज्ञानाभावरूपा। ग्रहे चेति। पक्षे हेतोरित्यनुषज्यते। व्यभिचारधीरेवेति। उभयथाप्यनुमित्यनुत्पादे बाधोऽकिञ्चित्कर इति शेषः। बाधग्रहपरामर्शयोर्भेदादिति। तथाच पक्षे हेतुग्रहेपि तस्य साध्याभाववत्ताज्ञानाभिन्नतया न व्यभिचारावगाहिता साध्याभाववद्वृत्तित्वस्य विशिष्टस्य व्यभिचारत्वात् साध्याभावविषयकज्ञानस्य विशिष्टविषयत्वात्, एवं साध्याभावज्ञानस्यापि हेतौ तदधिकरणवृत्तित्वानवगाहितया न तद्घटितव्यभिचारावगाहिता खण्डशो दोषघटकपदार्थावगाहिनो ज्ञानस्य च विरोधितेति बाधादेव तत्रानुमित्यनुत्पाद इति भावः। यत्र परा-

मर्शेऽपि लौकिकसन्निकर्षाद्दोषविशेषाद्वा पक्षे साध्याभाववत्त्वभाने तत्रापि न व्यभिचारग्रह इत्याहाभेदेऽपीति। तयोरित्यादिः। इति ग्रहस्येति। इत्याकारकस्यैव तत्रत्यबाधग्रहस्येत्यर्थः। परस्परोपरागानवगाहिन इति। हेतौ साध्यभावविशिष्टधर्मिवृत्तित्वस्य साध्याभावविशिष्टे धर्मिणि हेतुमत्त्वस्य चानवगाहिन इत्यर्थः। एतच्च व्यभिचाराविषयकत्वे हेतुगर्भं विशेषणं विशिष्टव्यभिचाराभाने च खण्डशस्तद्घटकनानापदार्थावगाहिनानाज्ञानस्यैव विशकलितसमूहालम्बनस्याप्यनुमित्यविरोधितया बाध एवानुमितिविरोधीति भावः। ननु तत्र विशिष्टव्यभिचारज्ञाने किं बाधकमित्यत आह एकत्रेति। एकनिश्चयागोचरत्वादिति। तदुभयभाने निश्चयत्वस्यैवानिर्वाहात्, तदनिर्वाहे च व्याप्तिनिश्चयाभावेनैवानुमित्यनुत्पादादिति भावः। ननु विशिष्टस्य साध्याभाववद्वृत्तित्वादेरिव तद्धर्मिणि साध्याभाववत्त्वादिना सहितं तद्धर्मिणो हेतुमत्त्वादिकमपि व्यभिचारः विशकलिततदुभयज्ञानादप्यनुमितिप्रतिबन्धस्यानुभाविकत्वादित्युक्तस्थलेऽपि व्यभिचारनिबन्धन एवानुमित्यनुत्पाद इत्याशङ्क्याह पूर्वं चेति। तृतीयलिङ्गपरामर्शसमवधाने सति परामर्शविघटकतयैवानुमितिविरोधिनो व्यभिचारस्वरूपासिद्ध्यादिग्रहस्यानुमित्यनुत्पादनिर्वाहकत्वादित्यर्थः। तथा च तृतीयलिङ्गपरामर्शसमवधाने सति पक्षे साध्याभावग्रहे बाधादेवानुमितिप्रतिबन्ध इति तस्य हेत्वाभासतेति भावः। यादृशबाधग्रहकाले व्यभिचारज्ञानानियमस्तज्ज्ञानस्य व्यभिचारज्ञानसङ्कीर्णतयापि बाधस्य पार्थक्यं निष्प्रत्यूहमित्याह उक्तश्चेति। न च-नहि, तद्ग्रहे-तादृशबाधग्रहे। व्यभिचारबुद्धिरावश्यकीति। धर्मिणि साध्याभाववत्त्वस्यैव साध्यधर्म्यवृत्तित्वस्य व्यभिचारघटकत्वादिति भावः॥

(दी०) यत्त्वनिश्चितप्रामाण्यस्य ज्ञानस्यार्थनिश्चयरूपत्वे प्रामाण्यनिश्चयवैयर्थ्यमतिप्रसङ्गश्च तथाच पक्षे साध्याभावज्ञानस्य निश्चयत्वसम्पत्तयेऽपेक्षणीयस्तत्प्रमात्वनिश्चय एव प्रतिबन्धकः, प्राथमिकत्वादुपजीव्यत्वाच्च, न तु चरमभावि तदधीनं व्यभिचारज्ञानमिति।

तत्तुच्छम् । तस्य प्रतिबन्धकत्वेनाक्लृप्तत्वादगृहीताप्रामाण्यकत्वेनैव निश्चयस्य स्वकार्यकारित्वात्, अन्यथानवस्थानात्, अप्रामाण्यशङ्कानिवर्त्तकत्वेन च क्वचित् प्रामाण्यग्रहोपयोगात् संशयसाधारणस्य व्यभिचारज्ञानस्य विरोधित्वाच्चेति । यत्तूपनीतकाञ्चनमयत्वविशिष्टवह्न्यनुमितिविरोधी व्यधिकरणकाञ्चनमयत्वावच्छिन्नप्रतियोगिताको वह्न्यभावो बाधः । न च विशिष्टसाध्याप्रसिद्ध्या कथं तद्विशिष्टानुमितिः, विशेष्ये विशेषणमित्यादिन्यायेन तत्सम्भवात् । शुद्धसाध्यव्याप्तिग्रहादेव चोपनयसहकारेणाप्रसिद्धविशिष्टसाध्यानुमितिसम्भवात् तदभावो बाधोऽस्तु । तेन रूपेण व्याप्तेरनुपादानाच्च तथाव्यभिचारो न दोषाय, उपनीतसकलभाने चाप्रामाण्यं प्रत्यक्षेऽपि तुल्यम् अनुद्देश्यांशे चानुमितेरप्रामाण्यं न वादिविजयप्रयोजकमिति । तन्न । प्रत्यक्षे हि विना सन्निकर्षमभानादुपनीतभानस्य प्रत्यभिज्ञादावानुभविकत्वादुपनयोऽपि सन्निकर्षः कल्प्यते, अनुमितौ च फलासिद्ध्या न सामग्र्यन्तरकल्पना । न खलु वह्निव्याप्यधूमपरामर्शादुपनीतरासभानुमितिरानुभविकी कस्यापि, अन्यथा पर्वते वह्निसन्देहवतो निश्चितवह्निव्यभिचारकेण अभिधेयत्वादिना पर्वतादौ प्रमेयत्वादिकमनुमिमतोऽपि वह्न्यर्थिनो वह्निमत्त्वनिश्चयान्निष्कम्पप्रवृत्त्यापत्तेरिति ॥

(गा०) साध्याभावबुद्धेः प्रमात्वस्य व्यभिचारज्ञानोपजीव्यज्ञानविषयतया हेत्वाभासत्वमिति यन्मूलोक्तं तद्दूषयितुमुपन्यस्यति यत्त्विति । निश्चयरूपत्वे–तत्कार्यकारित्वे, अतिप्रसङ्गः–गृहीताप्रामाण्यकज्ञानस्य तथात्वप्रसङ्गः । तत्प्रमात्वनिश्चय एवेति । विरोध्यविषयकोऽपीति शेषः । प्रतिबन्धक इति । अनुमितेरित्यादिः । प्राथमिकत्वं क्वाचित्कमित्यत आह उपजीव्यत्वादिति । नत्वित्यादिना व्यभिचारज्ञानस्य साक्षादनुमितिप्रतिबन्धकत्वमेव व्यवच्छिन्नं व्याप्तिज्ञानप्रतिबन्धकतायामविवादात्,, अन्यथा व्यभिचारस्य हेत्वाभासत्वानुपपत्तेः ।

तस्य—पक्षे साध्याभावबुद्धिप्रमात्वनिश्चयस्य । अक्लृप्तत्वादिति । व्यभिचारज्ञानस्य पक्षातिरिक्ते साध्याभाववद्धेतुमत्तावगाहिज्ञानात् यत्रानुमित्यनुत्पादस्तत्र प्रतिबन्धकताऽक्लृप्तेति भावः । उपजीव्यत्वमपि दूषयति अगृहीतेति । अन्यथा—निश्चितप्रामाण्यकत्वेन तथात्वे । प्रामाण्यग्रहवैयर्थ्यमुद्धरति अप्रामाण्यशङ्केति । क्वचिदिति । यत्र कोट्युपस्थित्यादिरूपकारणसमवधानं तत्रेत्यर्थः । क्वचिदित्यनेन तादृशोपयोगितायामनवस्था नास्तीति सूचितम् । व्यभिचारज्ञानस्य साध्याभावांशे निश्चयत्वापेक्षायां प्रमात्वनिश्चयापेक्षा सैव नास्तीत्यतोऽपि न प्रमात्वनिश्चयोपजीव्यतेत्यत आह संशयेति । मूलोक्तानि कतिपयदूषणान्युद्धृत्य सोन्दडमतम्परिष्कृत्योपन्यस्यति यत्त्विति । बाध इति । असंकीर्ण इत्यादिः । किंचेत्यादि मूलेनोक्तं दूषणमुद्धरति न चेत्यादिना । विशिष्टसाध्याप्रसिद्ध्या—अनुमितेः पूर्वं काञ्चनमयत्वरूपविशेषणतावच्छेदकविशिष्टवह्निरूपविशेषणाज्ञानेन, कथं तद्विशिष्टानुमितिः-कथं तादृशविशिष्टसाध्यविशेषणकानुमितेः प्रसक्तिः, तथाच कारणबाधादेव तत्र विशिष्टानुमित्यनुत्पादसम्भवाद्बाधोऽकिञ्चित्कर इति भावः ।

विशेष्ये विशेषणमतीति । अयं भावः । विशिष्टविशेषणकं ज्ञानं द्विविधं—तदुपलक्षितप्रतियोगिकवैशिष्ट्यावगाहि तद्विशिष्टप्रतियोगिकवैशिष्ट्यावगाहि च । आद्ये विशेषणज्ञानासंसर्गाग्रहयोरेवापेक्षा न तु विशेषणतावच्छेदकप्रकारकधियोऽपि, अत एव अवान्तरवाक्यार्थज्ञानं विनैव महावाक्यार्थज्ञानं स्वीकुर्वन्ति इति । न चैवमपि पूर्वं वैशिष्ट्याऽप्रसिद्धौ प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानाभावाद्बाधग्रहो न सम्भवतीति स्वरूपसतो बाधस्याकिञ्चित्करतेति वाच्यम् । प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्य विशिष्टविशेषणज्ञानविधयैव विशिष्टप्रतियोगिविशेषिताभावबुद्धौ हेतुत्वात्काञ्चनमयत्वेन वह्निर्नास्तीत्याकारिकायां स्वातन्त्र्येण प्रतियोगितावच्छेदकतया काञ्चनमयत्वाद्यवगाहिन्यामभावबुद्धौ तदपेक्षाविरहात्, प्रतियोगिविशेषणतापन्नस्यैव प्रतियोगितावच्छेदकत्वभानमिति नियमस्य व्यधिकरणधर्मावच्छिन्नाभाववादिनोऽननुमतत्वात् पूर्वं कथंचिद्विशिष्टसाध्यज्ञानेनापि बाधग्रहः विशिष्टवैशिष्ट्यविषयकानुमितिकारणान्तरसमवधानं च सम्भवतीत्यपि बोध्यम् ।

ननु विशिष्टज्ञानानपेक्षया कथंचिद्विशिष्टज्ञानसम्पत्त्या बाधग्रहसम्भवे व्यभिचारोऽपि गृहीत इति तत एवानुमितिर्न भविष्यतीति किं बाधेनेति दूषणमुद्धर्तुं तत्र काञ्चनमयत्वावच्छिन्नवह्न्यभावरूपबाधतादृशाभाववद्वृत्तित्वरूपव्यभिचारग्रहयोः काञ्चनमयत्वविशिष्टवह्न्यनुमितिविरोधित्वाविरोधित्वे दर्शयति शुद्धसाध्येति । अप्रसिद्धविशिष्टसाध्यानुमितीति । पूर्वाज्ञातकाञ्चनमयत्वादिविशेषितवह्न्यादेरनुमितिसम्भवादित्यर्थः । तदभावः—काञ्चनमयत्वावच्छिन्नवह्न्यभावः । बाधोऽस्तु–विशिष्टसाध्ये साधनीये बाधरूपः प्रकृतहेतुदोषोऽस्तु । विशिष्टसाध्यव्याप्तिग्रहविषयतयेव उपनयादिसहकृतशुद्धसाध्यव्याप्तिग्रहविषयतयापि प्रकृतहेतौ विशिष्टसाध्यघटत्वभानप्रयोजकतया बाधग्रहदशायां तस्य च तदनुत्पादकताया बाधप्रयुक्तत्वात्तादृशबाधग्रहस्य शुद्धसाध्यानुमित्यविरोधित्वेऽपि शुद्धसाध्ये साधनीये तस्य दोषत्वानुपगमे क्षतिविरहादिति भावः । तेन रूपेण–काञ्चनमयत्वादिसहितवह्नित्वादिना, तथा व्यभिचारः·काञ्चनमयत्वाद्यवच्छिन्नवह्न्यभाववद्वृत्तित्वम् । न दोषायेति । पक्षातिरिक्तहेत्वधिकरणमात्रे काञ्चनमयत्वाद्यवच्छिन्नवह्न्याद्यभाववत्ताज्ञानेपि पक्षे काञ्चनमयत्वाद्यवच्छिन्नवह्न्याद्यनुमित्युपगमेनानुमितौ साक्षाद्व्यभिचारज्ञानस्य विरोधित्वेपि काञ्चनमयत्वादिसहितवह्नित्वाद्यवच्छिन्नविधेयताकानुमितावेव तथा व्यभिचारधियो विरोधित्वात् काञ्चनमयत्वाद्यवच्छिन्ननिरूपितव्याप्तिज्ञानजन्यानुमितौ काञ्चनमयत्वाद्यंशे विधेयतावच्छेदकताख्यविलक्षणविषयताविरहेण उक्तव्यभिचारधियोऽविरोधित्वादिति भावः ।

अथ व्यधिकरणकाञ्चनमयत्वाद्यवच्छिन्नवह्न्यभावप्रतीतौ काञ्चनमयत्वमेव प्रतियोगितावच्छेदकतया भासते समानाधिकरणं वह्नित्वादिकं तु प्रतियोगिन्युपलक्षणतयैव भासते तस्य प्रतियोगितानवच्छेदकत्वात् । एवं च काञ्चनमयवह्निमानित्यनुमितौ काञ्चमयत्ववह्नित्वयोः प्रतियोगितावच्छेदकत्वपर्याप्त्यवगाहिबाधग्रहस्यैव प्रतिबन्धकतया नोक्तबाधज्ञानस्य विरोधितेति कथं स हेत्वाभासः । न चोभयधर्मप्रकारेण साध्यानुमितौ एकधर्मांशेऽवच्छेदकत्वमन्यत्र च प्रतियोगितायाः सामानाधिकरण्यावगाहित्वेनैव प्रतिबन्धकतेति वाच्यम् । तथासति काञ्चनमयत्वेन महानसीयवह्नित्वा-

तीति धियोऽपि काञ्चनमयवह्निमानित्यनुमितिविरोधितापत्तेः । अधिकं त्वित्यादिन्यायेन इतरसामानाधिकरण्याभानस्य प्रतिबन्धकताया-मतन्त्रत्वात् । न च एकांशे स्वरूपसम्बन्धरूपस्यापरांशे चानति-रिक्तवृत्तित्वरूपस्यावगाहनं प्रतिबन्धकत्वे तन्त्रम् । ईदृशप्रति-बन्धकतायाः क्वाप्यक्लृप्तत्वात् । तावतापि काञ्चनमयत्वेन वह्नि-घटोभयसामान्यं नास्तीति ज्ञानस्य काञ्चनमयवह्निमानित्यनुमि-तिविरोधिताया दुर्वारत्वाच्च ।

मेवम् । प्रतियोगिविशेषणतया भासमानधर्मस्यापि समानाधि-करणतया व्यधिकरणधर्मावच्छिन्नाभावप्रतियोगितावच्छेदकत्वो-पगमेन काञ्चनमयवह्निर्नास्तीत्यादिभ्रम इव काञ्चनमयत्वेन वह्नि-र्नास्तीत्यादिबुद्धावपि काञ्चनमयत्ववह्नित्वयोः प्रतियोगितावच्छे-दकतापर्याप्तिभानानङ्गीकारात् । न च मिलित्वा अभासमानयोः प्रतियोगिविशेषणतया स्वातन्त्र्येण च भासमानयोरुभयोर्मिलितयोः प्रतियोगितावच्छेदकतापर्याप्तिभानं दुर्घटं काञ्चनमयो नास्ति व-ह्निर्नास्तीत्यादाविवेति वाच्यम् । एकस्यां प्रतियोगिविषयतायाम-वच्छेदकतया भासमानयोरिव यदुभयधर्मावच्छिन्नप्रतियोगिताक-त्वविषयतयोरभावनिष्ठैकविषयतानिरूपितत्वं तयोरपि मिलितयोः प्रतियोगितावच्छेदकतापर्याप्तिभानोपगमादित्यलं पल्लवितेन ।

अन्यथा पूर्वोपस्थितसकलभान इत्यादिमूलोक्तमुपनीतभानदू-षणमुद्धरति उपनीतसकलभाने चेति । प्रत्यक्षेऽपि तुल्यमिति । तथा च प्रत्यक्षमात्रस्यैवानुमितिमात्रस्यापि किञ्चिदंशेऽप्रमात्वमिष्टमेवेति भावः । तावता च वादिनो न निग्रह इत्याहानुद्देश्यांश इति । वा-दिनो यद्विषयसिद्धिरनुद्देश्या तदंशेत्यर्थः । अनुमितेरप्रामाण्यमिति । वादिसम्पादितानुमितेर्भ्रमत्वमित्यर्थः । न वादिविजयप्रयोजकमिति । न वादिकर्मप्रतिवादितया जयप्रयोजकमित्यर्थः । यत्सिद्धिर्वादिन उद्देश्या तत्साधनपरिपन्थिहेत्वाभासस्यैव निग्रहस्थानत्वादुद्दे-श्यांशे अनुमितेर्भ्रमत्व एव तद्दोषसम्भवादिति भावः । एतत्समाधा-नमपि मूले शङ्काक्रमेणाभिहितमित्यवधेयम् ।

'मूलस्थाया अनुमितावुपनीतभानस्याप्रामाणिकत्वोक्तेर्विवरणेन बाधकान्तरदर्शनेन च मतमेतन्निराकरोति तन्नेत्यादिना । प्रत्यक्षेऽपि ज्ञानं यदि विशेषणज्ञानादिमुद्रया स्वविषयभासकं तदानुमितावपि

तस्य तथात्वं दुर्वारमेव विशिष्टानुभवत्वावच्छिन्नं प्रत्येव विशेषणज्ञानादेर्हेतुतया अनुभवसामान्ये एव तस्य विषयभासकतासम्भवात्, अतस्तत्र ज्ञानस्य सन्निकर्षविधया तथात्वं व्यवस्थापयति प्रत्यक्षे हीति । अनुमित्यादौ यदि नोपनीतभानं तदा प्रत्यक्षेऽपि मास्तु अविशेषादिति किं ज्ञानस्य सन्निकर्षत्वेनेति प्रतिबन्द्युद्धारायाह उपनीतभानस्येति । उपनीतत्वादिविषयकत्वस्येत्यर्थः । प्रत्यभिज्ञादावित्यादिना घटो नास्तीति सुरभि चन्दनमित्यादिप्रत्यक्षपरिग्रहः । उपनयोऽपीति । ज्ञानमपीत्यर्थः । सन्निकर्षः—स्वविषये मनसः संनिकर्षः, कल्प्यते इत्यस्य विषयभासकत्वेनेत्यादिः । तद्बलाच्चनोपनीतस्यानुमितौ भानं प्रत्यक्षत्वस्य सन्निकर्षजन्यतावच्छेदकत्वादिति भावः ।

नन्वस्तु उपनायकज्ञानस्य प्रत्यक्षत्वं कार्यतावच्छेदकं तथापि विशेषणज्ञानबाधाद्यभावबलादनुमितावनुपनीतं भासतामित्यत आह अनुमिताविति । न सामग्र्यन्तरकल्पनेति । अयं भावः । विशेषभासकसामग्रीनिरपेक्षं केवलं बाधाद्यभावसहितं विशेषणज्ञानविधया हेतुभूतं ज्ञानं न विषयभासकमतिप्रसङ्गात् । विशेषभासकसामग्री च प्रत्यक्षानुमित्योरननुगतेति प्रत्यक्षसामग्रीसहितमेव तत्तथा न तु अनुमितिसामग्रीसहितं तादृशस्य तथात्वे कल्पकाभावात् । काञ्चनमयत्वव्याप्यवान् वह्निः काञ्चनमयवह्निव्याप्यवान्पर्वत इत्यादिपरामर्शघटितवह्न्यादिभासकानुमितिसामग्रीतोऽपि वह्न्यादौ काञ्चनमयत्वादिविशिष्टबुद्धिरुत्पद्यते इति विशेष्यभासकानुमानसामग्रीसहितमपि काञ्चनमयत्वादिरूपविशेषणज्ञानादिकं स्वविषयभासकमिति चेद्भवतु तादृशमपि तत्र विशेषणज्ञानादिकं तथा वह्निव्याप्यवान्पर्वत इत्यादिना काञ्चनमयत्वादिविषयकत्वावच्छिन्नाजनकपरामर्शादिसहितकाञ्चनमयत्वादिज्ञानस्य विषयभासकत्वं तावतापि न सिद्ध्यति सर्वसाधारणं वह्न्यादिभासकसामग्रीत्वं चैकं दुर्वचं सुवचत्वेऽपि न तेन रूपेण हेतुतेति तेन रूपेण न सहकारितासम्भव इति फलासिद्धिमेव विवृणोमि न खल्विति । ननु काञ्चनमयवह्निमान्पर्वत इत्यादिमानसे तत्तद्विषयोपस्थितिबाधविशेषाभावादिघटिता या सामग्री विशिष्टविषयकत्वप्रयोजिका सा काञ्चनमयत्वाद्युपस्थितिबाधविशेषाभावादिसहिता वह्न्यादिव्याप्यवत्तापरामर्शसमवधानकालेऽप्यक्षतैव तादृशज्ञाने मानसत्वप्रयोज-

कायामेव सामग्र्यामनुमितिसामग्रीरूपप्रतिबन्धकाभावनिवेशात्तद्विशिष्टविषयावगाहिताप्रयोजकशरीरे प्रयोजनविरहेण तदनन्तर्गतत्वात् । न च तादृशसामग्रीविशिष्टविशेषणज्ञानस्य मानसानुमित्योर्नैकरूपेण हेतुतेति कथं तादृशसामग्र्या अनुगतरूपेणोभयत्र विशिष्टविषयकत्वप्रयोजकतेति वाच्यम् । प्रत्यक्षनिष्ठोपनायकज्ञानजन्यतायामपि अनुमितिसाधारणलौकिकज्ञानत्वस्यैव जन्यतावच्छेदकत्वोपगमेन मानसानुमित्योरेकरूपेण विशेषणज्ञानहेतुत्वानपायात् । न च प्रत्यक्षत्वापेक्षया अलघोर्ज्ञानत्वस्योपनायकज्ञानजन्यतावच्छेदकत्वं निर्युक्तिकं तुल्यशरीरत्वेपि विनिगमनाविरहेण उभयोस्तथात्वस्याप्रत्यूहत्वादित्याशङ्क्याऽनुमितावुपनीतभान बाधकमाहान्यथेति । अभिधेयत्वादिनेति । इदमापाततः प्रमेयत्वाद्यनुमितिपूर्वं वह्न्यादेरुपस्थितिसत्त्वेऽनुमित्यनुव्यवसायदशायां पर्वतादौ मानसवह्न्याद्युपनीतभानस्य सर्वमत एव दुर्वारतया वह्न्याद्यर्थिप्रवृत्तेः क्षणिकावलम्बनावश्यकत्वात् । यदा च तदभावस्याप्युपस्थितिस्तदा तस्यापि प्रत्यक्षे तत्तद्धर्मिगततया भानसम्भवेन यथा तन्निश्चयरूपप्रत्यक्ष तथा अनुमितावपि तदभावस्य तथा भानेपि न तन्निश्चयरूपानुमितिरिति प्रवृत्तिप्रसङ्गे समाधानं तुल्यम् । एवं तद्व्याप्यवत्ताज्ञानाजन्ये उपस्थितिबाधाभावमात्राधीने तन्निश्चयेऽप्रामाण्यशङ्कासम्भवेन न तदर्थिप्रवृत्तिरित्यपि सममेव ।

यत्तु असति अपि बाधाद्यवतार उपस्थितानां सर्वेषां धर्माणां न सकलोपस्थितधर्मिषु भानमिति यद्यज्ज्ञानव्यक्तितो यत्र यत्र धर्मिणि यद्यद्धर्मस्योपनीतभानं प्रामाणिकं तत्तज्ज्ञानव्यक्तेरननुगतरूपेण तत्र तदुपनायकता स्वीकार्या, तथा च फलाभावात्मकस्यापि ज्ञानस्यानुमितौ साध्याद्यंशे स्वविषयधर्मान्तरभासकत्वमुपेयत इत्यनुपनीतभानखण्डनम् । तदपि न सम्यक् । एवं सत्युपनीतप्रत्यक्षे बाधादिबुद्धेः प्रतिबन्धकताविलयप्रसङ्गात् । बाधादिकालीनस्य ज्ञानस्योपनायकत्वाकल्पनेनैव तदानीमपि उपनीतभानवारणसम्भवात् । पुरुषविशेषस्य उपनीतविषयविशेषभानेऽनुगतरूपेणोपनायकज्ञानहेतुत्वसम्भवाच्चेति ।

इदं तु बोध्यम् । अनुमित्युपनीतभानस्वीकारे वह्न्याद्यवृत्तिकाञ्चनमयत्वादिनेव तद्वृत्तिमहानसीयत्वादिनापि पर्वतादौ वह्न्याद्यनु-

मितेः शुद्धवह्निव्याप्यवत्तापरामर्शतः सम्भवेन तद्विरोधितया समानाधिकरणमहानसीयवह्नित्वाद्यवच्छिन्नाभावरूपबाधस्याप्यसङ्कीर्णदोषता दुर्वारेति वह्निव्याप्यधूमवान्पर्वत इत्यादिपरामर्शान्महानसीयवह्न्यादिबाधावतारादेव न पर्वतादौ भासते इति बाधस्य पृथग्दोषत्वमिति ॥

(चि०) पक्षधर्म्मताबलेन प्रसिद्धं बाधान्न सिध्यतीति बाधः पृथक् । प्रसिद्धाभाववति पक्षे व्यभिचारान्न तत्सिद्धिरिति चेत्, तर्ह्यसत्प्रसिद्धाभाववति सपक्षे व्यभिचारात् तमपि न साधयेत्, तदज्ञानात्तत्साधनेऽनुमितिरप्रमा स्यात् । अथ पक्षवृत्तेरन्य एव धूमादिः सपक्षे, तर्हि गोत्वपृथिवीत्वद्रव्यत्वादेरप्रसिद्धसास्नाद्यनुमानं न स्यात् सास्नादिप्रत्येकव्यभिचारात् । यदि च साध्यत्वावच्छेदकसास्नात्वादिसामान्यावच्छिन्नप्रतियोगिकाभाववति न गोत्वादिकमिति न व्यभिचारः, तर्हि धूमेऽप्येवं व्यभिचाराभावात् साध्यतावच्छेदकेन प्रकारेणाप्रसिद्धमिव प्रसिद्धमपि साध्यं धूमगोत्वादिकं साधयेत यदि बाधो न दोष इति वयम् ।

(दी०) पक्षधर्म्मताबलेनेत्यादि । ननु विशेषतो व्याप्त्यग्रहान्न तथासिद्धिसम्भावना, सामान्यतः सिद्धौ न विशेषतो बाधो विरोधी भिन्नप्रकारकत्वात् । न च समानविषयत्वमेव विरोधित्वे तन्त्रम् पृथिव्यादिरूपबाधग्रहेऽपि वायू रूपवान्नवेति संशयात् रूपवानित्यनुमितेश्च । न चारूपमेव रूपत्वेन शङ्कितमारोपितं वा तद्विषयः, तादृशशङ्काविरहेऽपि तयोरानुभविकत्वात् । दोषवशान्नेह श्वेतं द्रव्यमिति भ्रमेऽपि इह पीतः शङ्ख इति प्रत्ययात्, घटपटौ न स्तः दण्डी चैत्रो नास्तीति ग्रहेऽपि घटोऽस्ति चैत्रोऽस्तीत्यवग-

मात्। सलिलङ्गपरामर्शाद्बाधितविशेषभानप्रसङ्गश्च विशेषबाधावतारानवतारयोः समानः समानसमाधानश्च ।

(गा०) पक्षधर्मताबलेनेत्यादिमूलोपदर्शितसिद्धान्ते उपाध्यायोक्तदूषणं शङ्कते नन्विति । विशेषतो—महानसीयवह्नित्वादिना, तथासिद्धिः—तादृशविशेषधर्मप्रकारिका सिद्धिः, सामान्यतो—व्यापकतावच्छेदकवह्नित्वादिना, विशेषतो बाधः—महानसीयवह्नित्वाद्यवच्छिन्नाभावग्रहः, भिन्नप्रकारकत्वात्—अभावप्रतियोगितावच्छेदकतया ग्राह्यतानवच्छेदकरूपप्रकारावगाहित्वात्, समानप्रकारकत्वस्यैव प्रतिबन्धकतायां तन्त्रत्वात् इति भावः । समानविषयकत्वमेवेति । अभावप्रतियोगितावच्छेदकतया ग्राह्यवृत्तिधर्मावगाहित्वमेवेत्यर्थः । न त्वभावप्रतियोगितया ग्राह्यविषयकत्वमेवेत्यर्थः । वह्निर्नास्तीत्यादिसामान्याभावबुद्धौ महानसीयवह्न्यादेः प्रतियोगितयाऽभाने महानसीयवह्निज्ञानविरोधित्वानुपपत्तेः । न च सामान्यप्रत्यासत्तितः सामान्याभावबुद्धौ सकलप्रतियोगिभानं नियतं सामान्यज्ञानसत्त्वेऽपि तत्प्रकारकलौकिकप्रत्यक्षसामग्र्यसत्त्वे सकलसामान्याश्रयभानासम्भवात्, अनुपस्थितव्यक्तीनां विशेषणज्ञानरूपकारणविरहेणाभावांशे प्रतियोगितया प्रकारत्वायोगाच्च । एवकारेण समानप्रकारकत्वतन्त्रताव्यवच्छेदः । अनुमितावेव चेत्समानविषयकत्वेन विरोधितोच्यते तत्राह रूपवानित्यनुमितेश्चेति । अरूपं—रूपभिन्नं, शङ्कितमारोपितं वेति वाकारोऽनास्थायाम् । रूपत्वांशे निर्धर्मितावच्छेदककतदवच्छिन्नविशेषणताकबुद्धौ रूपत्वप्रकारकबुद्धित्वेन तत्संशयनिश्चययोर्द्वयोरेव हेतुत्वात्तयोः संशयानुमित्योरानुभविकत्वादिति । तथा चानायत्या तत्र रूपविषयत्वस्य स्वीकरणीयतया समानविषयकत्वेन विरोधितामते तदनुपपत्तिरिति भावः । ननु पूर्वं रूपत्वेनारूपज्ञानविरहेऽपि तादृशसंशयादौ विशेष्ये विशेषणमिति रीत्या धर्मिविशेषणतया भासमाने रूपे रूपत्वभानं सम्भवतीत्याशङ्क्य बाधकान्तरमाह—दोषवशादिति । श्वेतं द्रव्यमिति द्रव्यपदं च श्वेतपदस्य धर्मिपरतालाभाय । इह पीतः शङ्ख इति । यद्यपि ग्राह्यशङ्खवृत्तिशुक्लत्वावच्छिन्नाभावग्रहे इह शङ्ख इति पीतत्वादिविषयकज्ञानस्याप्यनुपपत्तिः, तथापि

भ्रमस्य साक्षात्कारिज्ञानविरोधिताप्रयोजकपित्तादिदोषजन्यतायाः श्वैत्यप्रकारेण शङ्खग्रहस्य तत्रानुत्पत्त्या शङ्खत्वग्रहे श्वैत्याविषयकत्वलाभाय पीत इति प्रत्ययादिति साक्षात्कारित्वप्रत्ययादित्यर्थः । अत्र शङ्खत्वेनासन्निकृष्टस्योपनीतशङ्खस्य न भानोपगमसम्भवः शङ्खं साक्षात्करोमीत्यनुभवात् । नापि लौकिकसन्निकर्षाश्रयस्य कस्यचिदशङ्खस्य तदानीं तत्राशङ्खत्वसाक्षात्कारसामग्रीसत्त्वेन शङ्खत्वग्रहासम्भवात् । अतस्तत्र शङ्खत्वेन शङ्खस्यैव भानमङ्गीकार्यं तत्रच शुक्लाऽभावग्रहदशायां भवतो न सम्भवतीति भावः ॥

ननु तत्रापि पित्तादिना प्रतिबन्धाच्छङ्खादौ श्वैत्याद्यग्रहेणैव इह श्वेतः शङ्ख इत्यादिसाक्षात्कारविरहोपपत्तेर्दोषनाशे च सति तादृशभ्रमसत्त्वेपि क्षणं तादृशसाक्षात्कारोपगमसम्भवाद्दोषविशेषजन्यभ्रमस्य लौकिकप्रत्यक्षप्रतिबन्धकत्वं सविवादमित्याशंक्य बाधकान्तरमाह–घटेति । ग्राह्यपर्याप्तधर्मावच्छिन्नाभावग्रहस्य प्रतिबन्धकत्वोपगमे द्वौ न स्त इत्यत्र परम्परासम्बन्धेन द्वित्वाभावस्य विषयत्वोपगन्तृमते च घटपटौ न स्त इति ग्रहे घटोस्तीति [illegible]स्य नानुपपत्तिरित्यतो विशिष्टाभावग्रहदशायां विशेष्यप्रतीतिपर्यन्तानुपपत्तिप्रदर्शनम् । यद्यपि विशेष्यवति विशिष्टाभावप्रत्ययस्य विशेषणाभावविषयकत्ववादिनां प्राचां नेयमप्यनुपपत्तिः । वस्तुतः समानप्रकारकत्वेन विरोधितामतेपि दण्डविशिष्टश्चैत्रो नास्तीति ग्रहदशायां दण्डोपलक्षितचैत्रवत्ताप्रत्ययस्य समानप्रकारकस्यानुपपत्तिरित्युपलक्षणीभवत्तद्धर्मप्रकारकप्रतियोगिमत्ताग्रहे तद्धर्मविशिष्टाभावीयप्रतियोगिताविलक्षणतद्वृत्तिधर्मावच्छिन्नप्रतियोगिताविशिष्टविषयकाभावग्रहस्य तद्विशिष्टप्रतियोगिमत्ताग्रहे विलक्षणप्रतियोगितावगाहिविशिष्टाभावग्रहस्य पृथक् प्रतिबन्धकता वाच्या, तथा च समानविषयत्वेन विरोधितामतेपि तद्वत्ताग्रहसामान्यविरोधितायां विशिष्टाभावीयप्रतियोगिताविलक्षणतद्वृत्तिधर्मावच्छिन्नप्रतियोगित्वावगाहित्वं विशिष्टवैशिष्ट्यावगाहिप्रत्ययाविरोधितायां च विशिष्टाभावीयविलक्षणप्रतियोगितावगाहित्वं तन्त्रमित्युक्तौ नोक्तदोषावसरः । तथापि तन्मते तद्वत्ताग्रहं प्रति वास्तवतद्वृत्तिधर्मावच्छिन्नप्रतियोगितावगाहित्वेन प्रतिबन्धकत्वे पीतो नास्तीति ग्रहे पीतः शङ्खो नास्तीत्यानुमानिकादिप्रतीत्यापत्तिः पीतत्वस्य वस्तुतश्शङ्खावृ-

त्तित्वावच्छिन्नशुक्लत्वस्य शङ्खावृत्तित्वभ्रमदशायां शुक्लो नास्तीति ग्रहेऽपि तादृशप्रतीत्यनुपपत्तिश्चेति तद्वृत्तित्वस्थाने तद्वृत्तितया गृह्यमाणत्वं धर्मविशेषणं देयम् । तथा च कालान्तरीणपुरुषान्तरीणज्ञानव्यावर्तनाय तत्तत्कालपुरुषनिवेशेन महागौरवं दूषणं बोध्यम् । न च समानप्रकारकत्वेन विरोधितामते तत्तद्व्यक्तित्वप्रकारकप्रतियोगिमत्ताग्रहे तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकाभावज्ञानस्य यावत्यः प्रतिबन्धकताः तावत्य एव बाधबुद्धिप्रतिबन्धकाः समानविषयकत्वेन प्रतिबन्धकतामते समानप्रकारकत्वेन प्रतिबन्धकतामते च घटत्वपटत्वादिरूपप्रकारान्तर्भावेण विरोधिताधिक्यमिति गौरवमिति वाच्यम् । समानविषयत्वेन विरोधितामते उक्तक्रमेण ज्ञानव्यक्तिभेदेन प्रतिबन्धकताभेदावतीवगौरवात् वायौ रूपविशेषाभावकूटग्रहदशायां वायौ रूपान्यत् किमपि समवायेन नास्तीति भ्रमसत्त्वे वायू रूपवान्न वेति संशयादेरनुपपत्तिरपि तन्मते द्रष्टव्या ।

ननु समानप्रकारकत्वेन विरोधितामते पर्वते महानसीयवह्निर्नास्तीत्यादिविशेषबाधानवतारदशायां सल्लिङ्गपरामर्शाद्वह्नित्वादिसामान्यधर्मप्रकारेण पर्वतादौ महानसीयवह्न्यादिविषयकभ्रमानुमितिप्रसङ्गः, समानविषयकत्वेन विरोधित्वमते च तत्र तद्भासकेतरबाधादिसत्त्वेऽपि विशेषबाधादेव न तत्र तज्ज्ञानप्रसङ्ग इत्यत आह सदिति । विशेषबाधावतारानवतारयोः समान इति । समानप्रकारकत्वेन विरोधितामते यथा विशेषबाधावतारदशायां तत्प्रसङ्गस्तथा विशेषभासकेतरबाधाद्यसत्त्वे विशेषबाधानवतारदशायां तत्प्रसङ्गोऽस्तीत्यर्थः । समानसमाधानश्चेति । यथा समानविषयकत्वेन विरोधितामते बाधितेतरबाधाद्यसत्वे विशेषबाधानवतारे तादृशेतरबाधादिरूपदोषविरहादेव न तादृशभ्रमानुमितिरिति समाधानं तथा समानप्रकारकत्वेन विरोधितामतेऽपि तदेव समानमित्यर्थः । समानप्रकारकत्वेन विरोधितामतेऽपि इतरबाधादितो विशेषरूपेणैव पक्षे बाधितविशेषभानमभ्युपगम्य बाधासङ्करस्य व्यवस्थाप्यतया तन्मते यद्यप्युक्तरीत्या नातिप्रसङ्गवारणसम्भवः तादृशबाधादिरूपदोषस्य सामान्यरूपेण बाधितव्यक्तिविषयकानुमितावहेतुतया तादृशविरहस्य तादृशभ्रमानुमितिवि-

रहाप्रयोजकत्वात्, तथापि तन्मते सामान्यरूपेण पक्षे बाधितविशेषानुमित्यप्रसिद्ध्या तत्सामग्र्यकल्पनेन न तत्प्रसङ्गः सामान्यरूपेण बाधितविशेषभानस्यानुमितावभावस्तु तादृशप्रत्यक्षसामग्रीविरहप्रयोज्य एवेति ॥

(दी०) अत्र वदन्ति—व्यापकतानवच्छेदकमपि रूपं लाघवज्ञानादिसहकारिवशादनुमितौ प्रकारीभवति, यथा, जीवनमरणान्यतरप्रतियोगी प्राणित्वादित्यत्र जीवनप्रतियोगित्वम् । अन्यथा जीवित्वे सति गृहासत्त्वस्य हेतोरसिद्ध्या बहिःसत्त्वानुमानायोगात् । एवं क्षित्यादिकर्तुरेकत्वमपि । अन्यथा एकोऽनेको वा क्षित्यादिकर्तेति सन्देहप्रसङ्गात्, अनुमितेश्च तादृरूप्येण लघ्वर्थाविषयकत्वे तथाविधानुव्यवसायविरहात्, सति लाघवप्रतिसन्धाने लघ्वर्थपरिच्छेदकत्वमनुमानस्येत्यपि न सिद्ध्येत्। इत्थञ्च विशेषतो जायमानानुमितिं विरुणद्धि बाधः । प्रमितिबाधः पृथक् । सलिङ्गपरामर्शात् कथं भ्रान्तानुमितिर्जायतां न जायेत वा कथं यथार्थेति चेत् ।

(गा०) यद्यपि साध्यतावच्छेदकप्रकारेणाप्रसिद्धमिव प्रसिद्धमपि साध्यं धूमगोत्वादिकं साधयेदिति मूललिखनात् साध्यतावच्छेदकवह्नित्वादिप्रकारकाबाधितविशेषसिद्धिविरोधितया बाधस्य हेत्वाभासत्वं मूलकाराभिमतं, तथापि समानविषयकत्वेन विरोधिताया विचारासहत्वात्तामुपेक्ष्य सहकारिविशेषवशाद्व्यापकतानवच्छेदकप्रकारेणापि साध्यस्यानुमितौ भानमुपगम्य समाधत्ते अत्र वदन्तीति । लाघवज्ञानादीत्यादिना एकविशेषबाधपरिग्रहः। प्रकारीभवतीति । साध्यांश इत्यादि ।

अत्र अपसिद्धान्तशङ्कामपनिनीषुर्मणिकारसम्मतिमादर्शयितुं यत्र तस्यापि व्यापकतानवच्छेदकप्रकारकत्वमनुमतं तथाविधं दृष्टान्तद्वयमाह यथेत्यादिना । इत्यत्रेति । व्यतिरेकिग्रन्थे मणिकारापदर्शितवहिःसत्त्वसाधकलिङ्गविशेषणासिद्धिपरीहारफलकानुमान इति शेषः । जीवनप्रतियोगित्वमिति । भावप्रधानं, व्यापकतानवच्छेदकमपि सा-

ष्यांशे लाघवज्ञानबलात् अन्यतरप्रतियोगित्वांशे प्रकारीभवतीत्यनुषङ्गादिनान्वयः। ननु तत्रान्यतरप्रतियोगितात्वरूपव्यापकतावच्छेदकप्रकारेणैव लाघवज्ञानबलाद्विशेषस्य जीवनप्रतियोगित्वस्य सिद्धिर्न तु ताद्रूप्येण। न चैवं लाघवज्ञानस्यानुपयोगः, परामर्शस्यैव सामान्यरूपेणाबाधितविशेषानुमापकत्वसम्भवादिति वाच्यम्। अपरविशेषभाननिवृत्तौ लाघवज्ञानोपयोगात्। यदि च बाधितविशेषभासकलाघवज्ञानरूपदोषविरहादेवाऽबाधितविशेषधर्मिकलाघवज्ञानदशायां तादृशविशेषाभावसम्भवादबाधितविषयकलाघवज्ञानस्योपयोगिता न घटते भवतु तदा तदनुपयोग्येव बाधितधर्मिकलाघवज्ञानमेव तद्भाननियामकतया अबाधितभानप्रतिबन्धकतया च उपयुक्तमित्यत आह अन्यथेति। बहिःसत्त्वानुमानायोगादिति। यत्र ज्योतिःशास्त्रावधारितनियमात् समयविशेषजन्यत्वादिरूपाल्लिङ्गात् देवदत्तस्य शतवर्षजीविता प्रथममवधारिता अनन्तरं च भूयो भूयो गृह एव दृष्ट्वा शतवर्षजीवी गृह एवेति नियमोऽप्यवधारितः ततश्च कदाचिद्योग्यानुपलब्ध्या गृहे तदभावं निश्चित्य प्रतिसन्धत्ते देवदत्तस्य शतवर्षजीवित्वे तदुपपादकं बहिःसत्त्वमावश्यकमिति गृह एवेति नियमो न सम्भवति तादृशनियमसत्त्वे च मरणस्यावश्यकतया तादृशजीवित्वनिश्चायकनियमो न सम्भवति इति तादृशनियमग्रहोऽप्रमा किं वा एतादृशनियमग्रह एवेति देवदत्तो जीवति मृतो वेति तत्र मरणापेक्षया भावरूपे जीवित्वे लाघवग्रहे सति जीवित्वोपपादकबहिःसत्त्वसिद्धेरनुमानताऽनिर्वाहादित्यर्थः। तथा सति संशयकरणकार्थापत्तेर्निराकरणं नोपपद्यते इति भावः। ननु तत्र सामान्यरूपेणैव जीवित्वसिद्धिरेव विशेषसंशयनिवृत्त्या मानसी हेतुसिद्धिरित्यपि मणिकाराभिप्रायः सम्भवतीति समानविषयकत्वप्रयुक्तविरोधित्वाभिप्रायकतयापि तन्मूलव्याप्त्यासम्भवादनुमितेर्व्यापकतावच्छेदकप्रकारकत्वस्य मणिकाराभिमतत्वं न लभ्यत इत्यनुशयेन दृष्टान्तान्तरानुसरणं एवमिति। क्षितिकर्तुरेकत्वमपीति। ईश्वरानुमाने इति शेषः। प्रकारीभवतीत्यनुषङ्गादिना अन्वयः। तत्रैकत्वस्याप्रकारत्वेनेश्वरैकत्वानेकत्वयोर्नित्यं संशय इति पूर्वपक्षयित्वा लाघवस्य प्रमाणसहकारितया सिद्धान्तं प्रणयतो मणिकृतोऽनुमतां युक्तिमाहान्यथेति। क्षितिकर्तुरेकत्वं च न क्षितिकर्तृनिष्ठभेदाप्रति-

योगित्वं क्षितिकर्तृभिन्ने तदप्रसिद्धेः। क्षितिकर्त्तरि च लाघवज्ञानादिना तदसिद्धेः अनुपस्थिते तत्र लाघवज्ञानासम्भवात्। न च द्यणुकादिकर्त्तरि अङ्कुरादिकर्त्रभेद एव क्षित्यादिकर्तुरेकत्वं स चाङ्कुरादिकर्त्तरि सिद्धे तत्रैव प्रसिद्ध्यतीत्युपस्थितेस्तत्र लाघवज्ञानसम्भवेन तत्सहकृतद्यणुकादिपक्षकसकर्तृकत्वाद्यनुमानात् द्यणुककर्त्रादावङ्कुरादिकर्त्रभेदरूपं तत्कर्त्रैकत्वं सिद्ध्यतीति वाच्यम्। कार्य्यत्वादिलिङ्गनाङ्कुरादौ विशिष्य सकर्तृकत्वस्य प्रथमतः सिद्धावपि प्रत्येकमङ्कुरादावुभयकर्तृकत्वसंशयसम्भवेन तत्कर्त्तृनिष्ठभेदाप्रतियोगित्वप्रसिद्ध्यसम्भवात्। किन्तु आत्मानात्मोभयावृत्तिदुःखसमानाधिकरणद्वित्वशून्यत्वमेव तत्, तादृशं च द्वित्वं आत्मेतरद्रव्यद्वये प्रसिद्धं तच्छून्यत्वं च गुणादाविति। ननु लाघवज्ञानात् सामान्येनैव रूपेण लघ्वर्थविषयिणी अनुमितिरस्तु न तु व्यापकतानवच्छेदकधर्मेण लघ्वर्थविपरीतसंशयं च लाघवधीरेव निवर्तयिष्यतीत्याशङ्क्य युक्त्यन्तरमाह अनुमितेश्चेति। तादृप्येणेति। लाघवधीविषयमावच्छेदकमहानसीयवह्नित्वादिरूपेणेत्यर्थः। तथाविधानुव्यवसायविरहात्—महानसीयवह्निमनुमिनोमीत्यनुव्यवसायासम्भवात्। न सिद्धेरिति। वह्निमनुमिनोमीत्यादिप्रतीतेर्वह्निविषयत्वादिमात्रसाधकतया विशेषतो महानसीयवन्ह्यादिविषयकत्वसाधकप्रतीतिविरहादिति भावः। भवतु लाघवज्ञानादिवशाद्यापकतानवच्छेदकप्रकारेण साध्यानुमितिस्तावता किमायातमित्याकाङ्क्षायामाह इत्थं चेति। महानसीयवन्हौ लाघवमित्यादिलाघवज्ञानसहकृताद्वन्हिव्याप्यवान् पर्वत इत्यादिपरामर्शात् महानसीयवन्ह्यादिबाधग्रहदशायामिव तदग्रहदशायामपि पर्वतो महानसीयवन्हिमानित्यनुमितिः स्याद्यदि नासौ प्रतिबन्धको भवेदिति बाधः पृथक्दोष इत्यर्थः। शङ्कते सल्लिङ्गपरामर्शादिति। कथं भ्रमानुमितिरिति। दोषविरहादिति भावः। न जायेत वा कथं यथार्थेति। अनुमितिरित्यनुषज्यते। गुणरूपतत्कारणसत्वादिति भावः॥

(वि०) साध्याभाववन्मात्रसहचारो न व्यभिचारः साध्यप्रागभावध्वंसवद्वृत्तित्वेन व्यभिचारितया पृथिवीत्वादिना गन्धादेः द्रव्यत्वादिना गुणस्यानुमा-

नभङ्गप्रसङ्गात्, किन्तु साध्यात्यन्ताभाववद्गामित्वम्। एवञ्च स प्रागभावप्रध्वंसावच्छिन्नतदाश्रये तत्प्रतियोगिसाधने पक्षे व्यभिचारो नेति बाधो दूषणम्।

अथावच्छेद्ये सिद्धसाधनम् अवच्छेदके हेत्वसिद्धिः विशिष्टश्च नान्यदिति चेत्। तर्हि प्रागभावप्रध्वंसप्रतियोगिनोरेकवृत्तित्वेनैकसमयतापि स्यात्।

अथ यत्समयावच्छेदेन तत्र प्रागभावः प्रध्वंसो वा न तत्समयावच्छेदेन प्रतियोगीति चेत्। तर्हि तदवच्छेदेन प्रतियोगिसाधने सिद्धसाधनं किन्तु बाध एव। अन्यथा भावात्यन्ताभावयोरप्यवृत्तित्वभङ्गः एकवृत्तित्वात्। अवच्छेदकभेदेन वृत्तिरिहापि तुल्या, तत्र देशभेदोऽवच्छेदकोऽत्र तु समयभेद इति। असिद्धेरपि बाध एवोपजीव्यः। न चैवमुपजीव्यत्वाद्बाधवत् सिद्धसाधनमपि पृथक्, उपजीव्यत्वेऽपि स्वतोऽदूषकत्वात्। नहि साध्यज्ञानं तद्बुद्धिविरोधि, धारावाहिकज्ञानोदयात्। नाप्यनुमितिविरोधि, अनुमित्सया प्रत्यक्षसिद्धेऽप्यनुमानदर्शनात्। तदुक्तं 'प्रत्यक्षदृष्टमप्यनुमानेन बुभुत्सन्ते तर्करसिका' इति। श्रवणानन्तरं मननदर्शनाच्च। तस्मात् सिद्धिमात्रार्थिनः सिद्धौ न तदिच्छा, सिद्धिविशेषार्थिनः सास्तीति तस्यानुमितिरेव। एवञ्च सिषाधयिषितपक्षविघटनद्वारा सिद्धसाधनं दूषणं न स्वतः।

(दी०) बाधानवतारे बाधितार्थलाघवज्ञानाद्दोषादेव। तथा सामान्यतोदृष्टाद्यदितरप्रसिद्धाशेषविशेषबाधसहकृतात् शिष्यमाणप्रसिद्धप्रकारिकानुमितिर्जायते, यथा भोजनसाध्यकपीनत्वा-

दिवासन्ध्याभोजनबाधे रात्रिभोजनप्रकारिका । एवं द्रव्यवृत्तित्वसाधियका गुणत्वादिच्छायां दिगन्तद्रव्यवृत्तित्वबाधे प्रसिद्धमनोवृत्तित्वानुमितिर्जायमाना मनोवृत्तित्वाभावप्रमया बाध्यत इति विशेषबाधो दोषः । किन्तु साध्येत्यादिकमापाततः ।

वस्तुतस्तु प्रतियोग्यसमानाधिकरणसम्बन्धविशेषावच्छिन्नप्रतियोगिताकसाध्याभाववद्गामित्वं व्यभिचारः । स्वप्रागभावेत्यादिकं स्पष्टत्वेनोक्तम् । तत्र तदानीं तदत्यन्ताभावस्यापि व्युत्पादितत्वात् । अत एवोत्पत्तिकालावच्छिन्ने घटे पृथिवीत्वादिना रूपादिसाधने बाधो निराबाधं पदमादधाति । एवं साध्यवत्तानवच्छेदकदेशावच्छिन्नस्य पक्षत्वेऽपि बाधो बोध्यः ।

(गा०) उभयत्रैकमुत्तरमाह बाधानवतार इति । असल्लिङ्गपरामर्शाभावेपि बाधानवतारसहकृताद्धास्तवबाधितार्थविषयकलाघवज्ञानरूपाद्दोषाद्धेतोरेव भ्रान्तानुमितिर्बाधग्रहरूपोत्तेजकाभावविशिष्टताहशदोषरूपप्रतिबन्धकसत्त्वात्प्रमानुमित्यनुत्पादश्चोपपद्यते इत्यर्थः । यद्यपि भ्रमरूपपरामर्शविरहेपि ग्राह्याभाववद्विशेष्यकव्याप्यवत्ताज्ञानरूपसल्लिङ्गपरामर्शस्तत्राक्षत एव, तथापि तन्मात्राज्ञ पर्वतादौ महानसीयवन्ह्यादिभानमिति लाघवज्ञानस्य दोषतया आवश्यकत्वे तस्य तथात्वमप्रामाणिकम् । न च लाघवज्ञानं विनापि महानसीयवह्निव्याप्यवान् पर्वत इत्यादि परामर्शाद्भ्रमानुमित्युत्पत्त्या तादृशपरामर्शस्यापि दोषत्वमावश्यकमिति वाच्यम् । सर्वसाधारणपरामर्शत्वस्यैकस्याभावात् पर्वतविशेष्यकमहानसीयवन्ह्यनुमितौ तद्विशेष्यकमहानसीयवह्नित्वावच्छिन्ननिरूपितव्याप्तिविशिष्टहेतुमत्तापरामर्शस्य हेतुत्वेपि महानसीयवह्न्यभाववद्विशेष्यकशुद्धवह्निव्याप्यवत्ताज्ञानत्वेन हेतुत्वाकल्पनात् परामर्शलाघवज्ञानयोर्जन्यतावच्छेदककोटौ अव्यवहितोत्तरत्वनिवेशाल्लाघवज्ञानजन्यानुमितौ महानसीयवह्निव्याप्यवत्तापरामर्शस्य तज्जन्यानुमितौ च लाघवज्ञानस्य न व्यभिचारः ।

केचित्तु लाघवज्ञानोपनीतमहानसीयत्वादौ न विधेयतावच्छेद-

कतारूपविलक्षणविषयता स्वीक्रियते अपि तु प्रकारतामात्रं पर्वतो वह्निमानित्यादिसिद्धिदशायां तादृशानुमितिर्न जायत एव महानसीयवह्निव्याप्यवत्ताज्ञानजन्यानुमितौ च महानसीयत्वसहितं वह्नित्वमेव विधेयतावच्छेदकमिति कार्य्यवैचित्र्यान्न परस्परं व्यभिचार इति।

तन्न। लाघवज्ञानादभिकविषयकानुमितेः साध्यतावच्छेदकावच्छिन्नप्रकारकसिद्धिप्रतिबध्यत्वे देवदत्तं जीवनमरणान्यतरप्रतियोगित्वसामान्यनिश्चयदशायां लाघवज्ञानाज्जीवितत्वस्य विशेषतोऽसिद्धया बहिस्सत्त्वानुमानानुपपत्तेः। तादृशसिद्ध्यभावघटितलाघवज्ञानसहकृतसामान्यधर्मावच्छिन्नव्याप्यवत्ताज्ञानघटितसामग्र्या भिन्नविषयकप्रत्यक्षादौ प्रतिबन्धकताधिक्यं प्रामाणिकत्वान्न दोषायेति सङ्क्षेपः

वह्निव्याप्यधूमवान्पर्वत इत्यादिपरामर्शात् महानसीयवह्नौ लाघवमित्यादिलाघवज्ञानदशायां महानसीयवह्निभिन्नवन्ह्यभाववानित्यादीतरबाधग्रहदशायां च पर्वतादौ बाधितमहानसीयवह्न्याद्यनुमितिर्बाधानवतारदशायां जायते न तु तदवतारदशायां इति बाधोऽसङ्कीर्णतया हेत्वाभासः सामान्यधर्मावच्छिन्नसाध्यकानुमितौ विशेषव्यभिचारस्यादोषत्वादिति मणिकृतः।

अत्रोपाध्यायाः। लाघवज्ञानादिसत्त्वेऽपि व्यापकतावच्छेदकतया गृहीतेनैव रूपेणानुमितिरिति महानसीयवह्नित्वादिना न महानसीयवन्ह्यनुमितिर्जायते अपि तु शुद्धवह्नित्वादिनैव, तत्र च महानसीयवह्न्यभावधीर्न विरोधिनी ह्नित्वाद्यच्छिन्नाभावनिश्चयदशायामपि प्रत्येकं संशयादेरनुभवसिद्धतया ग्राह्यतावच्छेदकावच्छिन्नाभावनिश्चयस्यैव विशिष्टधीविरोधित्वादित्यतो न विशेषबाधस्य दोषतासम्भवः। न च बाधबुद्धेः प्रतिबन्धकतायां समानप्रकारकत्वस्य तन्त्रत्वे लाघवज्ञानादिजन्यमहानसीयवन्ह्याद्यनुमितिर्यदि शुद्धवह्नित्वादिनैव तदवगाहते तदा तदुत्तरं महानसीयवह्निमान्न वा पर्वत इति संशयः स्यादिति लब्धर्थभासकमपि लाघवज्ञानमनुपयुक्तं स्यादिति समानविषयकत्वेनैव बाधबुद्धेर्विरोधित्वं अनुमितौ विशेषरूपेण लब्धर्थविषयकत्वं वा आवश्यकमिति उभयथैव विशेषबाधो हेत्वाभासीभवेदिति वाच्यम्। लाघवज्ञानस्यैव तादृशसंशयविरोधित्वाल्लाघवज्ञानजन्यानुमितिनाशानन्तरमपि क्षणं संशयोपगमे क्षतिविरहात्।

अत्र नव्याः। लाघवज्ञाननाशे लाघवज्ञानजन्यानुमितिसत्त्वेऽपि

यदुक्तसंशयः स्वीक्रियते तदा लाघवज्ञानस्य लघ्वर्थभासकत्वमेवोच्छिद्येत तज्जन्यानुमितौ लघ्वर्थविषयताया व्यर्थत्वात् । न च तस्य फलान्तरासत्त्वेऽपि लघ्वर्थविषयकत्वेनानुमितेरनुव्यवसायाल्लघ्वर्थविषयकत्वं दुरपह्नवमिति वाच्यम् । यतो वह्निमानित्यनुमितेरनुव्यवसायस्य वह्निमनुमिनोमीत्याकारकतैव न तु महानसीयवह्निमनुमिनोमीत्याकारकतेति तस्य तदवगाहिताया एवासिद्धेः । एवं महानसीयवह्नौ लाघवज्ञानसत्त्वे तदसत्त्वदशायामिव सल्लिङ्गपरामर्शात् प्रमानुमितिः स्यात् इति लाघवज्ञानस्य प्रमानुमितिप्रतिबन्धकत्वमुभयमत एवावश्यकम् । तत्र चोपाध्यायमते पर्वतीयवह्नौ महानसीयवह्नौ च लाघवमित्येतादृशलाघवज्ञानदशायां पर्वते पर्वतीयवह्न्यनुमितिनिर्वाहाय बाधितार्थविषयकलाघवज्ञाने अबाधितार्थविषयकलाघवज्ञानस्योत्तेजकता वाच्या, तथा च पर्वतचत्वरादिविशेष्यकपर्वतीयचत्वरीयवह्न्यादिविषयकानुमितित्वेन प्रतिबध्यत्वं पर्वतीयचत्वरीयवह्न्यादिधर्मिकलाघवज्ञानविरहविशिष्टमहानसीयवह्न्यादिधर्मिकलाघवज्ञानत्वेन प्रतिबन्धकत्वमुपेयम् इत्येकैकविधलाघवज्ञानप्रतिबन्धकत्वस्य पक्षविधेयभेदेनानन्त्यम् । नव्यमते च वह्नित्वपर्याप्तविधेयतावच्छेदकताकानुमितित्वं बाधितवह्निधर्मिकलाघवज्ञानस्य प्रतिबध्यतावच्छेदकं पर्वतीयवह्नौ लाघवज्ञानात् पर्वतादौ पर्वतीयवह्नित्वेनैवानुमित्युत्पादात् तस्याः शुद्धवह्नित्वावच्छिन्नाविषयकतया लाघवज्ञानस्योत्तेजकत्वमन्तरेणैव निर्वाहादिति न पक्षभेदेन प्रतिबन्धकताभेदः । वह्नित्वादौ विधेयतावच्छेदकत्वपर्याप्तिनिवेशश्चोपाध्यायमतेऽप्यावश्यकः, अन्यथा पर्वतीयवह्निव्याप्यवान् पर्वत इत्यादि परामर्शान्महानसीयवह्नौ लाघवज्ञानदशायां पर्वतादौ पर्वतीयवह्न्यनुमितेरनिर्वाहात् ।

अथ पर्वतादौ महानसीयवह्न्यादिबाधग्रहदशायां तद्धर्मिकलाघवधीसत्त्वेऽपि तत्र पर्वतीयवह्न्यादेरेवानुमितिर्नव्यमत इति तादृशबाधग्रहस्य लाघवज्ञानप्रतिबन्धकतायामुत्तेजकत्वमावश्यकं, तथा च पर्वतादौ महानसीयवह्नेर्बाधग्रहेऽपि उक्तलाघवज्ञानसत्त्वेऽपि चत्वरादौ चत्वरीयवह्न्यनुमित्युदयात्तत्तद्धर्मिकतद्बाधितवह्न्याद्यनुमितौ तत्तद्धर्मिकमहानसीयवह्निबाधग्रहमुत्तेजकीकृत्य पक्षभेदेन लाघवज्ञानस्य विभिन्नप्रतिबन्धकताकल्पनं नव्यानामप्यावश्यकमिति चेत् ।

सत्यम्। एवमपि पर्वतादिविशेष्यकशुद्धवह्नित्वावच्छिन्नविधेयताकानुमितित्वं बाधितवह्निधर्मिकलाघवज्ञानप्रतिबध्यतावच्छेदकं नव्यमते, उपाध्यायमते तु पर्वतादिधर्मिकशुद्धवह्नित्वावच्छिन्नपर्वतीयवह्न्याद्यनुमितित्वम्, अन्यथा पर्वतादौ महानसीयवह्न्याद्यनुमितेरपि तद्धर्मिकलाघवज्ञानादनुपपत्तिरिति प्रतिबध्यतावच्छेदकलाघवान्नव्यमतमेव साधीयः। न च महानसीयवह्न्यादिधर्मिकप्रतिबन्धकतायां तदज्ञानप्रतिबन्धकबाधतदभावव्याप्यवत्ताज्ञानतदभावावच्छेदकधर्मदर्शनानामनेकेषां नव्यमते उत्तेजकतया गौरवम् उपाध्यायमते च पर्वतीयवह्न्यादिधर्मिकलाघवज्ञानमात्रस्य तत्रोत्तेजकत्वं तादृशबाधादिग्रहदशायामपि पर्वतादौ महानसीयवह्न्यादेरेव वह्नित्वादिना भानसम्भवेन पर्वतीयवह्न्यादेस्तत्र भानानुपगमेन तादृशबाधादिबुद्धेरनुत्तेजकत्वमिति वाच्यम्। बाधादिबुद्धीनां महानसीयवह्न्यादिमत्ताग्रहविरोधित्वेनानुगमस्य उत्तेजकत्वसम्भवात्। नव्यमतेऽपि तेषां पृथगुत्तेजकत्वविरहात् उपाध्यायमते पर्वतीयवह्न्यादिधर्मिकलाघवज्ञानादेर्यत्रोत्तेजकता तत्र पर्वतीयवह्न्यन्यवह्न्यभाववानिति बाधादिबुद्धेरपि तद्दशायां पर्वतीयवह्न्यादिभाननिर्वाहार्थमुत्तेजकताया वाच्यतया गौरवाच्च। लाघवज्ञानप्रतिबन्धकतायां बाधविशेषस्योत्तेजकत्वानुपगमे लघ्वर्थबाधग्रहदशायां लाघवज्ञानसत्त्वे अनुमितिरेव न स्यात् प्रमाया भ्रमस्य च प्रतिबन्धकत्वसत्त्वादिति बाधग्रहाभाववैशिष्ट्यं प्रतिबन्धके निवेशितम्। बाधग्रहश्च विरोधिग्रहमात्रोपलक्षणं तेषां च महानसीयवह्न्यादिमत्ताग्रहविरोधित्वेनैकाभावः प्रातिस्विकरूपेणाभावकूटं वा निविशतामित्यन्यदेतत्। प्रतिबध्यतावच्छेदकं च न यथार्थवह्न्यनुमितित्वं यथार्थस्य तद्वति तत्प्रकारकत्वस्य तत्तद्वह्निव्यक्तिभेदेन भिन्नत्वात्। नापि वह्न्यन्तरानुमितित्वं वह्निद्वये लाघवज्ञानसत्त्वे परस्परप्रतिबन्धेनानुमित्युच्छेदप्रसङ्गात्। एकलाघवज्ञानेऽपरलाघवज्ञानानामुत्तेजकत्वे गौरवात्। किन्तु शुद्धवह्नित्वावच्छिन्नविधेयकानुमितित्वमेव अतोऽपि महानसीयवह्नित्वादिभानसिद्धिरिति दिक्।

इतरबाधसहकृतसामान्यतोदृष्टस्यापि व्यापकतानवच्छेदकप्रकारकानुमितिजनकतया उक्तत्वात्तज्जन्यविशेषधर्मप्रकारकानुमितिविरोधितयापि बाधस्य हेत्वाभासत्वं व्यवस्थापयति तथेति। सामा

न्धतोदृष्टात्-सामान्यधर्मावच्छिन्नव्याप्यवत्ताज्ञानात्, तद्वितरप्रसिद्धाशेषविशेषबाधसहकृतादिति। यद्यद्विशेषरूपावच्छिन्नं सामान्यं प्रसिद्धं तदेकतररूपाभिन्नापरसकलरूपावच्छिन्नस्य बाधसहकृतादित्यर्थः। शिष्यमाणप्रसिद्धप्रकारिकेति। यद्विशेषरूपावच्छिन्नस्य बाधो न गृहीतस्तद्धर्मावच्छिन्नप्रसिद्धप्रकारिकेत्यर्थः। तदानीमप्रतीतस्यात्मवृत्तित्वस्य बाधग्रहेऽपि गुणत्वादिना दिगन्तद्रव्यवृत्तित्वस्य बाधग्रहे विशेषतो मनोवृत्तित्वानुमित्युत्पत्त्या सहकारिशरीरे प्रसिद्धिन्निवेशः। संध्याभोजनप्रसिद्धिदशायां दिवाभोजनमात्रबाधग्रहात् विशेषतो रात्रिभोजित्वस्य पीनत्वेनासिद्ध्या साकल्यनिवेशः। अज्ञातसुरभिगन्धस्य सुरभिविजातीयगन्धबाधग्रहात् गृहीतपृथिवीत्वेन सुरभिगन्धत्वावच्छिन्नप्रकारकानुमित्यनुत्पत्त्या प्रसिद्धेः सहकारितालाभाय शिष्यमाणे प्रसिद्धिविशेषणमुपात्तम्।

अत्रेदं बोध्यम्। यादृशसामग्रीबलादात्मवृत्तित्वाप्रसिद्धिस्थले तद्बाधग्रहेऽपि मनोवृत्तित्वानुमितिस्तादृशी सामग्री अगृहीतबाधस्यात्मवृत्तित्वस्य प्रसिद्धिदशायामपि तत्कथं तदानीं न मनोवृत्तित्वानुमितिः न हि मनोवृत्तित्वानुमितावात्मवृत्तित्वप्रसिद्धेः प्रतिबन्धकता सम्भवति येन तत्सत्त्वात्सामग्रीविरहः, तथासति तद्बाधग्रहेऽपि मनोवृत्तित्वानुमित्यनुपपत्तेः। न च तत्र तत्तद्विशेषबाधग्रहाभावविशिष्टतत्तद्विशेषप्रसिद्धेः प्रतिबन्धकत्वान्नायं दोष इति वाच्यम्। तथा सतीतरबाधग्रहहेतुताया निर्युक्तिकत्वापत्तेः उत्तेजकतयैव तदुपयोगोपपत्तेः। यत्र विशेषान्तरमात्रस्यैव न प्रसिद्धिस्तत्रोपस्थितविशेषप्रकारकानुमितेर्वारणाय विशेषान्तरप्रसिद्धेरेव हेतुताकल्पनौचित्यात्, तस्मात्तद्धर्मविशेषितसामान्यधर्मावच्छिन्नविषयकानुमितौ तद्विपरीतधर्मसहितसामान्यधर्मावच्छिन्नाभावग्रह एव हेतुः न तु विशेषधर्मान्तरविशेषितसामान्यधर्मावच्छिन्नाभावग्रहश्च तद्विपरीतश्च तदत्यन्ताभावस्तद्वदन्यत्वम्। अत्यन्तान्योन्याभावयोश्च प्रतियोगितत्वावच्छेदकौ, अभाव (ग्रहे) प्रतियोगितावच्छेदकसामान्यघटितविशेषधर्मप्रकारेण भासमाने प्रतियोगिनि निरुक्तविपरीतधर्मस्य यादृशं विशेषणत्वं साक्षात्तद्विशेषणकोटिप्रविष्टपदार्थविशेषणतया वा तादृशमेवानुमितौ तद्धर्मस्य सामान्यधर्मावच्छिन्नविशेषणत्वम्। महानसीयभिन्नवह्न्यभाववानित्यत्र बाधग्रहे महानसीयत्वविपरीतस्य महानसी-

यान्यत्वस्य प्रतियोगिनि साक्षादेव विशेषणतेति साक्षान्महानसीयत्वविशेषितस्य वह्नित्वावच्छिन्नस्य महानसीयवह्निमानित्यनुमितौ भानं विशेष्याभावान्यविशिष्टाभाववद्वृत्तित्वादिबाधग्रहे विशेष्याभावान्यत्वादेर्वृत्त्यादिविशेषणकोटिप्रविष्टेऽभावादौ विशेषणत्वमिति तदधीनविशिष्टव्यभिचाराद्यनुमितावपि तादृशाभावादौ विशेष्यताभावत्वादिसामान्यधर्मस्य विशेषणतया भानाद्विशेषव्यभिचारादिसिद्धिः। एवं च नायं रात्रिभिन्नभोजी इच्छा न मनोभिन्नद्रव्याश्रिता इत्यादिसामान्याभावावगाहिबाधग्रहदशायामेव पीनत्वगुणत्वादिना रात्रिभोजित्वमनोरूपद्रव्यवृत्तित्वत्वादिप्रकारकानुमितिः। दिवा न भुंक्ते न संध्यांशे भुंक्ते न पृथिवीवृत्तिर्न जलवृत्तिरित्यादिविशेषाभावकूटग्रहश्च सामान्याभावग्राहकतयैवोपयुज्यते इति। यद्यप्येकविशेषबाधग्रहस्थले तद्विशिष्टसामान्यसाधकहेतुत एव विशेषान्तरप्रकारकसिद्धिरपि सम्भवति, तथापि यत्र तद्विशिष्टसामान्यसाधकहेतौ विशेषान्तरव्याप्तिग्रहोऽप्रामाणिकस्तत्र तत्सिद्ध्यर्थं तादृशसामग्र्यन्तरकल्पनम्। न च तत्रापि फलानुरोधात्तादृशव्याप्तिग्रहकल्पनमेवोचितमिति वाच्यम्। यत्र पूर्वं विशिष्टहेत्वाद्यनुपस्थित्या व्याप्तिग्रहो बाधितस्तत्र तत्कल्पनस्यासम्भवात्। न च विशेषणविशेष्ययोरुपस्थितौ महानसविशिष्टोपस्थितिसम्भवात् कालविलम्बेन व्याप्त्यादिग्रहोऽनुमितिश्च शक्यते कल्पयितुम्, यत्र च न व्याप्त्यादिग्रहः प्रमाणान्तरसिद्धस्तत्र फलमपलपनीयमिति वाच्यम्। यत्र धूमत्वादिकमनुपस्थितं शब्दादिना वन्हिव्याप्यमहानसीयान्यवह्न्यभावोभयत्वादिना महानसीयवह्न्यादिव्याप्तिपक्षधर्मताग्रहस्तत्र सर्वमतसिद्धमहानसीयवह्न्याद्यनुमित्यर्थं तादृशव्याप्त्यादिज्ञानस्य तादृशानुमितिसामग्रीत्वमकल्पयित्वा महानसीयान्यवन्ह्यभावादिग्रहसहकृतवन्ह्यादिव्याप्यवत्ताज्ञानस्यैव तादृशानुमितिसामग्रीत्वकल्पनादेवोपपत्तेः फलापलापादेरन्याय्यत्वादिति। यथा विशेषान्तरबाधग्रहसहकृता सामान्यज्ञानसामग्री व्यापकतानवच्छेदकविशेषधर्मप्रकारेण व्यापकानुमितिं जनयति तथा सामान्यज्ञानसहकृता विशेषान्तरबाधसामग्र्यपि विशेषधर्मप्रकारेण व्यापकमप्यनुमापयति स्थलद्वय एव विशेषधर्मप्रकारकसंशयानुत्पादस्यानुभविकत्वात् तथाविधसामग्र्यास्तादृशानुमितिजनकत्वोपगमे वह्निमहानसीयान्यवन्ह्य-

भावव्याप्योभयादिलिङ्गकमहानसीयवह्नित्वाद्यवच्छिन्नसाध्यकपरामर्शस्य महानसीयवह्नित्वाद्यवच्छिन्नविधेयकानुमितौ हेतुत्वान्तराकल्पनेन लाघवाच्चेति मतमवलम्ब्य मणिकृता पुरोवर्त्तिविशेष्यकवह्नित्वप्रकारकज्ञानत्वावच्छिन्ने वह्नित्वाभाववति वह्नित्वप्रकारकत्वाभावानुमानाद्वह्नित्ववति वह्नित्वप्रकारकत्वरूपप्रामाण्यसिद्धिरङ्गीकृतेत्यवधेयम् ।

व्यभिचारशरीरे अत्यन्ताभावत्वेनाभावनिवेशनेपि आवश्यकप्रतियोगिवैयधिकरण्यादिविशेषणेन ध्वंसप्रागभाववारणात्, किन्तु साध्यात्यन्ताभाववद्गामित्वमिति मूलमसङ्गतमित्यभिसन्धायाह किन्तु साध्येत्यादिकमापातत इति ।

प्रतियोग्यसामानाधिकरण्यविशेषणेनेव साध्यतावच्छेदकसम्बन्धाद्यवच्छिन्नप्रतियोगिताकत्वविशेषणेनापि ध्वंसप्रगभावादिव्यावृत्तिः सम्भवति ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वमतेपि तयोर्धर्मविशेषसम्बन्धविशेषावच्छिन्नप्रतियोगिताकत्वे मानाभावादिति दर्शयितुं साध्याभावे प्रतियोग्यसामानाधिकरण्यमिव सम्बन्धविशेषाद्यवच्छिन्नप्रतियोगिताकत्वमपि विशेषणं प्रदर्शितं, स्वध्वंसस्वप्रागभावावच्छिन्नस्वाश्रयस्य च सामयिकस्वात्यन्ताभावावच्छिन्नत्वसत्वादत्यन्ताभावं परित्यज्य ध्वंसप्रागभावोपादानमयुक्तमित्याशंक्याह स्वप्रागभावेत्यादिकमिति । स्पष्टत्वेनेति । तयोः प्रतियोग्यधिकरणवृत्तितायाः सर्वमतसिद्धत्वादिति भावः । उत्पत्त्यादिकाले घटादौ गन्धादेरत्यन्ताभावासत्वे तत्गन्धत्वादिना साध्यतायां प्रागभावादिकमादाय बाधसमर्थनेपि रूपत्वगन्धत्वादिसामान्यधर्मपुरस्कारेण साध्यतायां न बाधनिर्वाह इति प्रागभावादिमति तदत्यन्ताभावस्वीकार आवश्यक इत्याह अत एवेति । अत एव–ध्वंसप्रागभावसमये तदत्यन्ताभावसत्वादेव,अन्यथा साध्यात्यन्ताभावज्ञानस्यैव स्वतः साध्यवत्ताज्ञानविरोधितया ध्वंसप्रागभावयोर्विरोधित्वासम्भवेन उक्तस्थले बाधानवकाशात् उपष्टंभसङ्गतिर्न हि साध्यंप्रतियोगिकाभवमात्रज्ञानमेव साक्षात् साध्यतावच्छेदकावच्छिन्नसाध्यधीविरोधि तत्तत्साध्यव्यक्त्यभावज्ञानस्यापि साध्यसामान्यधीप्रतिबन्धकतापत्तेः, किन्तु साध्यतावच्छेदकावच्छिन्नाभावज्ञानमेव, न हि ध्वंसप्रागभावयोः सामान्यधर्मावच्छिन्नसाध्यकस्थले तथात्वम् सा-

मान्यधर्मस्य प्रतियोगितानवच्छेदकत्वादिति ।

मूलेऽवच्छेद्ये सिद्धसाधनमिति। विशिष्टघटकविशेष्यघटादौ साध्यसाधने सिद्धस्याबाधितस्यैव साधनं प्रमारूपैवानुमितिरिति यावत् । तथाच न तत्र बाधो दोष इति भावः । अवच्छेदके–ध्वंसप्रागभावादिरूपविशिष्टघटकविशेषणे, हेत्वसिद्धिः–पृथिवीत्वादिहेतोरसिद्धिः, तथाच तत्पक्षकानुमाने न बाधस्यासंकर इति भावः । ननु विशेष्यविशेषणपक्षकेऽसंकीर्णबाधासम्भवेपि विशिष्टपक्षके तस्य निष्प्रत्यूहतेत्यत आह विशिष्टं चेति। नान्यदिति । विशेषणविशेष्याभ्यामिति शेषः । गन्धादौ गन्धप्रागभावाद्युपलक्षितघटादिवृत्तित्वसत्त्वेपि न तद्विशिष्टघटादिवृत्तित्वं न हि तद्वृत्तितयैव एकसमयावच्छिन्नतद्वृत्तित्वरूपं तद्विशिष्टवृत्तित्वं निर्वहति, तथा सति प्रतियोगिनो ध्वंसप्रागभाववद्वृत्तितया एकसमयावच्छिन्नतत्सामानाधिकरण्यमपि स्यादिति तद्विरोधो भज्येत। यदि च ध्वंसप्रागभावयोः प्रतियोगिन एकाधिकरणे वृत्तौ एकसमयो नावच्छेदक इत्येकसमयावच्छेदेनैकत्राव-स्थानत्वरूपो विरोधस्तदा पक्षतावच्छेदकध्वंसादिसमयावच्छिन्नतद्वृत्तित्वरूपं तद्विशिष्टवृत्तित्वं प्रतियोगिन्यवगाहमानानुमितिर्बाधितविषयैवेति तादृशानुमितिविरोधी तदवच्छेदेन प्रतियोगिनो बाधोऽसंकीर्णस्तत्र दोष एवेति पृथिवीत्वादिरूपहेतोस्तद्विशिष्टवृत्तित्वेनासिद्धिविरहादिति समाधत्ते तर्हीत्यादि । अधिकरणैक्येनावच्छेदकैक्ये बाधकान्तरमाहान्यथेति । अवच्छेदकभेदेन वृत्तेरिति । एकस्मिन्नप्यधिकरणे विभिन्नावच्छेदेन वृत्तिरित्यर्थः ।

दीधितौ साध्यवत्त्वानवच्छेदकेत्यादि । वह्निमत्त्वानवच्छेदकशिखरावच्छेदेन पर्वतादौ धूमादिना वह्न्यादिसाधनेपीत्यर्थः ॥

(चि०) नन्वभावधीरपि न भावधीप्रतिबन्धिका नेदं रजतमिति भ्रमानन्तरं रजतनिश्चयात् । न चाभावप्रमा तथा, अपीतः शङ्ख इति प्रमापयत एव पीतोऽयमिति भ्रमदर्शनादिति चेन्न ।

विरोधिज्ञानं हि प्रतिबन्धकं प्रत्यक्षभ्रमस्य च प्रत्यक्षप्रमा विरोधिनी सा च शङ्खादौ नास्त्येव,अनुमितौ

त्वभावप्रमामात्रमेव विरोधीति कथमभावप्रमायां भावानुमितिरिति ।

स चायं दशविधः । धर्मिग्राहकमानबाधितम् घटोऽव्यापकः सत्त्वादिति प्रत्यक्षेण परमाणवः सावयवा मूर्त्तत्वादित्यनुमानेन मेरुः पाषाणमयः पर्व्वतत्वादिति सुवर्णमयत्वबोधकागमेन साध्यप्रतियोगिग्राहकबाधितं वह्निरनुष्णः कृतकत्वादिति प्रत्यक्षेण शब्दोऽश्रावणो गुणत्वादित्यनुमानेन गवयत्वं गवयपदाप्रवृत्तिनिमित्तं जातित्वादित्युपमानेन साध्यग्राहकबाधितं नरशिरःकपालं शुचि प्राण्यङ्गत्वादित्यागमेन हेतुग्राहकबाधितं जलानिलावुष्णौ पृथिवीतो विपरीतस्पर्शत्वात्तेजोवदिति प्रत्यक्षेण मनो विभु ज्ञानसमवाय्याधारत्वादित्यनुमानेन राजसूयं ब्राह्मणकर्त्तव्यं स्वर्गसाधनत्वादग्निष्टोमवदिति राजसूयकर्त्तव्यताबोधकागमेनेति ॥

इति बाधचिन्तामणिः ॥

(दी०) अथ पक्षतावच्छेदकावच्छेदेन साध्यसिद्धौ तदवच्छेदेन हेतुमत्ताज्ञानं प्रयोजकमन्यथा गृहीतभागासिद्धेर्घटत्वादेरपि पृथिवीत्वाद्यवच्छेदेन रूपादिसिद्धिप्रसङ्गात् । न च शिखराद्यवच्छेदेन धूमादिमत्त्वमिति चेन्न । अवच्छेदकत्वयोर्वस्तुनोर्भेदात् शब्दसामान्यस्याकिञ्चित्करत्वात् । अवच्छिन्नावृत्तेरपि च हेतोस्तत्त्वेन गृहीताज्ज्ञायमानामनुमितिं विरुणद्धि बाधप्रमा, सङ्करेऽपि वस्तुनोऽज्ञानासङ्करात् । सुखाद्यनवच्छेदकशरीराद्यवच्छिन्नात्मादौ सुखादिसाध्यकदुःखादेर्वर्त्तमानत्वात् कपिसंयोगाद्यनवच्छे-

दकमूलाद्यवच्छिन्ने कपिसंयोगादिसाध्यकवृक्षविशेषत्वादेर्वर्त्तमानत्वाच्च । अत्र चैतत्कालावच्छिन्नः पर्वतो वह्निमानिति शब्दादिवदेतत्कालावच्छिन्नपर्वतपक्षकधूमादेरप्येतत्कालावच्छेदेन वह्निमत्ताबुद्धिरनुभवसिद्धा नापह्नवमर्हतीत्यभिप्रायः ॥

इति बाधदीधितिः ॥

(गा०) तत्र पक्षतावच्छेदकशिखराद्यवच्छिन्ने धूमादिमत्त्वस्य तदवच्छेदेन वह्नयाद्यनुमितिजनकज्ञानविषयस्यासत्त्वाद्धेत्वसिद्धिरिति कुतो बाधस्यासंकीर्णता, पक्षतावच्छेदकसामानाधिकरण्यमात्रेण हेतुमत्ताज्ञानस्यावच्छेदकावच्छेदनानुमितिजनकत्वे भागासिद्धेरदोषताप्रसङ्गादिति शङ्कतेऽथेत्यादि । घटत्वादेरिति पञ्चमी । पृथिवीत्वाद्यवच्छेदेन रूपादिसिद्धिप्रसङ्गादिति । पृथिवीत्वादिसामानाधिकरण्यमात्रेण घटत्वाभावरूपभागासिद्धिग्रहेपि तत्सामानाधिकरण्यमात्रेण तद्वत्ताग्रहसम्भवादिति भावः । भागासिद्धेर्दोषत्वानुरोधेन पक्षतावच्छेदकपृथिवीत्वाद्यंशे साध्यस्यानतिरिक्तवृत्तित्वरूपावच्छेदकत्वावगाहिन्यामनुमितौ तत्र हेतोस्तादृशावच्छेदकत्वावगाहिपरामर्शत्वेन हेतुत्वमास्ताम्, पक्षतावच्छेदकदेशकालयोः स्वरूपसम्बन्धरूपसाध्यीयावच्छेदकत्वावगाहिन्यामनुमितौ च न तादृशावच्छेदकत्वावगाहिपरामर्शत्वेन हेतुता तदवच्छेदेन बाधबुद्ध्यादिरूपप्रतिबन्धकाभावसहितसामानाधिकरण्यमात्रविषयकानुमितिसामग्रीतस्तादृशानुमितिस्वीकारे क्षतिविरहात् । अवच्छेदकत्वपदार्थयोर्भेदेनैकस्य बाधाभावमात्राद्भानेपि अन्यस्य भान अधिकापेक्षायां बाधकाभावादिति समाधत्ते अवच्छेदकत्वयोरिति । शिखराद्यवच्छेदेन वह्न्याद्यनुमितौ तदवच्छेदेन हेतुमत्ताज्ञानस्य हेतुत्वमभ्युपेत्यापि तत्र बाधस्य दोषतां व्यवस्थापयति अवच्छिन्नावृत्तेरिति । शिखराद्यवच्छेदेन धूमाद्यसत्त्वेपि तदवच्छिन्नत्वभ्रमविषयधूमादितस्तदवच्छेदेन वह्न्याद्यनुमित्युत्पत्तिबाधप्रमैव विरुणद्धीति बाधो दोष इत्यर्थः । बाधबुद्धेः प्रमात्वाभिधानञ्च तद्विष-

यरूपदोषमसिद्धिं सूचयितुम्। तथापि तत्र स्वरूपसदसिद्धिसंकर एवे-
त्याशंक्य तत्संकरस्याकिंचित्करतामाह संकरेपि इति । ज्ञानासंक-
रादिति । सिद्धिज्ञानदशायां बाधज्ञानस्यैवानुमित्यनुत्पादप्रयोजक-
त्वादित्यर्थः । वस्त्वसंकरस्थलमप्याह सुखाद्यवनच्छेदकेति । सुखा-
द्यनवच्छेदकं यन्नारकीयशरीरादिकं शरीरव्यक्तिविशेषादिर्वा पक्षताव-
च्छेदकं तदवच्छेदेनात्मादिरूपपक्षे समवायेन सुखादिरूपसाध्यव्या-
प्यस्य दुःखादिहेतोर्वर्त्तमानत्वादित्यर्थः । तथाच तादृशहेतोरसिद्धि-
विरहात्पक्षतावच्छेदकशरीरविशेषाद्यवच्छेदेन साध्याभावोऽसिद्ध्या-
द्यसंकीर्णो बाध इति भावः । व्याप्यवृत्तेः सर्वावयवावच्छिन्नवृत्ति-
कत्वे मूलावच्छिन्नो वृक्षः कपिसंयोगी एतद्वृक्षत्वादित्यादावपि मूला-
वच्छिन्नवृत्तिककपिसंयोगाद्यभावरूपबाधस्यासंकर इत्याह कपीति ।

ननु सर्वत्रानुमितौ साध्ये पक्षतावच्छेदकस्य सामानाधिकरण्य-
मेव भासते पक्षधर्मताबलात् व्याप्यस्य हेतोः पक्षतावच्छेदकसा-
मानाधिकरण्यरूपपक्षधर्मतायाः व्यापकस्य साध्यस्य पक्षतावच्छे-
दकसामानाधिकरण्यं विना अनुपपद्यमानत्वात् न तु पक्षतावच्छे-
दकावच्छिन्नत्वमपि साध्यस्य तदवच्छिन्नत्वं विनापि हेतोः पक्षधर्म-
तोपपत्तेस्तद्बलविरहात् बाधाभावबलात् तद्भाने अन्यदपि अबाधितं
साध्यादौ किन्न भासते। अथ व्याप्यस्य पक्षतावच्छेदकव्यापकत्वरूपं
तदवच्छिन्नत्वं साध्यस्य तादृशतदवच्छिन्नत्वमन्तरेण नोपपद्यते इति
तदवगाहिनः परामर्शात् साध्ये पक्षतावच्छेदकव्यापकत्वरूपतदव-
च्छिन्नत्वावगाहिन्यनुमितिर्युक्तैव अत एव भागासिद्धेर्दोषतापीति चे-
त् । भवतु तादृशपरामर्शात् तादृश्यवच्छेदकावच्छेदेनानुमि-
तिः, न च तावताऽसंकीर्णबाधसौलभ्यम् हेतोः पक्षतावच्छेदक-
धर्मव्यापकत्वे बाधासंभवात् । एवं यत्र तदवच्छेदेन हेतुस्तत्र तद-
वच्छेदेन साध्यमिति व्याप्तौ गृहीतायां देशकालरूपपक्षतावच्छेदका-
वच्छेदेन हेतुमत्ताज्ञानात् तदवच्छेदेन साध्यानुमितिः स्यादेव. ता-
दृशव्याप्तिमतो हेतोः पक्षतावच्छेदकदेशकालावच्छेदेन सत्तायास्तद-
वच्छेदेन साध्यवत्त्वमन्तरेणानुपपत्तेस्तद्भासकपक्षधर्मताबलसम्पत्ते-
रक्षतत्वादित्येतावतापि न बाधासंकरसौलभ्यम् साध्यानवच्छेदकदेश-
कालावच्छिन्नवृत्तित्वे हेतौ दर्शिताया अवच्छेदकान्तर्भावेण व्याप्तेर-
सिद्धेरित्युपाध्यायानुयायिनामाक्षेपमनुभवावलंबनेन परिहरति अत्र

श्वेति। शब्दादिवदित्यन्तं दृष्टान्ताभिधानमनुभवदार्ढ्याय।

इदं तु बोध्यम्। यादृशव्याप्तिज्ञानात्पक्षतावच्छेदकसाध्ययोः केवलमेकत्र द्वयमिति रीत्या वैशिष्ट्यविषयिणी प्रमानुमितिस्तत्प्रमात एव चेद्बाधविशेषाभावसहकृतात्पक्षतावच्छेदककालादिविशिष्टानुयोगिकसाध्यवैशिष्ट्यविषया भ्रमानुमितिर्भवेत् तदा गुणादौ द्रव्यवृत्तित्वाद्युपलक्षितसत्तादिवैशिष्ट्यविषयकानुमित्यौपयिकजात्यादिलिङ्गकप्रतियोगितावच्छेदकावच्छिन्नत्वाविशेषितप्रतियोगिवैयधिकरण्यघटितव्याप्तिप्रमातोऽसति बाधावतारे तद्विशिष्टवैशिष्ट्यविषयभ्रमानुमितिरपि तुल्ययुक्त्या युज्येतेति व्याप्तौ प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यनिवेशनमनर्थकं स्यादिति दिक् ॥

गिरीन्द्रदुहितुर्नमत्सुरवरावतंसाभव-
त्पदांबुजरजःकृपाकलिततीक्ष्णधीसम्पदा।
गदाधरविनिर्मिता कठिनदुर्गतर्काटवी
नवीनपदवी मुदं वितनुतां सदा धीमताम् ॥

इति श्रीगदाधरभट्टाचार्यचक्रवर्तिविरचिता-
अनुमानखण्डदीधितिटिप्पणी समाप्ता ॥

॥ समाप्तेयं बाधान्ता गादाधरी ॥

॥ अथ ॥

असाधकतासाधकत्वप्रकरणम् ।

अथ हेत्वाभासानामसाधकतासाधकत्वेन सदुत्तरत्वं जात्यादीनां चासाधकतासाधारण्येन परासाधकतासाधकतया स्वव्याघातकत्वादसदुत्तरत्वम् । अथ विरुद्धत्वादिज्ञानादेव स्वानुमितेरिव परानुमितेः प्रतिबन्धे किमसाधकतानुमानेन, यश्चासि वादूयुक्तदूषणावगमः स निगृहीत इति समयबन्धेन कथाप्रवृत्तौ दूषणमात्रमुद्भाव्यमन्यथार्थान्तरत्वादिति चेन्न । द्वयं ह्युद्देश्यं परानुमितिप्रतिबन्धः, स्थापनाया असाधकतासाधनत्वञ्च । तत्राद्यं दूषणमात्रज्ञानादेव । द्वितीयन्तु अलिङ्गत्वज्ञापनात् । प्रतिबन्धकत्ववदनेनापि रूपेण दूषकत्वसम्भव इत्यभिप्रायेण वाऽसाधकतासाधनम् । नन्वेवं पञ्चावयवप्रयोगापेक्षा स्यात् अन्यथा न्यूनतापत्तिरिति चेन्न । दूषणस्यासाधकताव्याप्यत्वमङ्गीकृत्य कथेति पक्षधर्म्मताया एवोद्भाव्यत्वात् अन्यथा अधिकतापत्तेः । नन्वेवं कृतकत्वेनानित्यत्वानुमाने व्याप्तिर्नाभिधेया उभयसिद्धत्वादिति चेन्न । कथायां समयविषयतया दूषणे त्वसाधकताव्याप्त्युपस्थितेरावश्यकत्वात् अन्यथा कथकत्वविरोधात् ।

(आ०) असाधकतासाधकत्वनिर्वचनायोपोद्घातसंगतिमाह हेत्वाभासानामिति । तथाचासाधकत्वाज्ञाने सदुत्तरत्वापरिचये हेत्वा-

भासनिर्वचनमेव व्यर्थमापद्येतेति भावः। नन्वसाधकतासाधकत्वं न सदुत्तरत्वं असाधकतासाधनस्यैवाभाव दित्याह अथेति। परेति। परेण यामनुमितिमुद्दिश्य प्रयोगः कृतस्तस्या इत्यर्थः। अन्यथा यद्‌पेक्षया परत्वं तदीयविरुद्धत्वादिज्ञानस्य प्रतिबन्धकत्वप्राप्तेरसङ्गत्यापत्तेः। विरुद्धत्वाद्युद्भावनस्य त्वत्प्रयुक्तानुमानाद्विरुद्धत्वादिप्रतिहतात् मेऽनुमितिरित्यर्थो न तूद्भावितेन प्रयोक्तुरनुमितिप्रतिबन्ध इत्यर्थ इति भावः। एवमग्रेऽपि। द्वितीयं त्विति। असाधकत्वसाधनं तावन्न यावद्विरुद्धत्वादिलिङ्गत्वेन हेतुपञ्चम्यन्तत्वेनोच्यत इत्यर्थः। ननु द्वयमुद्देश्यमित्यत्रैवाक्षेपः स एव च समाधिरित्यसंगतेर्द्वयोरुद्देश्यत्वे बीजमाह प्रतिबन्धकत्ववदिति। दूषणस्योद्भाव्यतया दूषणत्वस्योभयरूपतया तदुभयरूपोद्भावनमुद्देश्यमिति भावः। वस्तुगत्या साधकेऽसाधकत्वानुमितावपि न स्वपक्षसिद्धिरित्यनुमितिप्रतिबन्धकोपन्यास आवश्यकस्तेनासाधकत्वनिर्वाहात् असाधकत्वानुमितिस्त्वनावश्यकी तदभावेऽपि स्वपक्षसिद्धेः, दूषणत्वप्रकारान्तरापेक्षायां तु क्वाचित्कस्तदुपन्यासः सामयिक इति सर्वतात्पर्यार्थः। पक्षधर्मताया इति। यद्यप्यसाधकतानुमाने विरुद्धत्वादित्येव प्रयोज्यं न तु पक्षधर्मतापि धूमवत्त्वादित्यत्रेवानाकाङ्क्षितत्वात्, तथापि विरुद्धोयमिति प्रथमोद्भावनमभिप्रेत्येदं द्रष्टव्यम्। अधिकेति। आकाङ्क्षितादधिकमनाकाङ्क्षितमर्थान्तरमिति यावत्। हेतुद्वयाद्युपन्यासेन यथाश्रुतस्यासङ्गतिरिति। अन्यथेति।

नन्वनुमितिप्रतिबन्धकतावच्छेदकत्वरूपदूषणत्वनिश्चयादेव कथकत्वनिर्वाहात्कथमेवं, न हीदमेवासाधकत्वव्याप्तिः, अपि त्विदमसाधकत्वमेव तथाच तद्व्याप्तिप्रतिसन्धानं कथकत्वेऽतन्त्रमेव। न चानुमितिप्रतिबन्धकतावच्छेदकरूपवत्त्वमनुमित्यभावनियतं यज्ज्ञानं तद्वत्त्वं तथा च यत्र विरुद्धत्वादिस्तत्रानुमित्यभाव इति व्याप्तिर्भात्येवेति वाच्यम्। अनुमित्यभावस्यासाधकत्वरूपत्वाभावादपि त्वनुमित्यभावप्रयोजकज्ञानविषयतावच्छेदकवत्त्वस्य तत्त्वं तद्व्याप्तिश्चाप्रतिसंहितैवेति।

मैवम् विरुद्धस्येवानुमितिबन्धकतावच्छेदकतया यत्र विरुद्धत्वं तत्र तथा प्रतिबन्धकतावच्छेदकवत्त्वमिति सहचारधीध्रौव्येण व्याप्तिग्रहावश्यकत्वादित्युत्तरकल्पे प्रथमकल्पे च स्फुटैव प्रतीतिरित्यभ्युपगमात्, अत एवानुमित्यभावस्य ज्ञानेन साध्यनिश्चये पक्षत्वाभावानुमितिः

सम्भवतीत्यनुमित्साधीनया पक्षतयाऽनुमितिरिति सामयिकसाधकतासाधनं सर्वसिद्धमिति ।

(चि०) नन्वेवं कृतकत्वेनानुमाने तद्व्याप्तिमनङ्गीकृत्यापि कथासम्भवात्। यस्तु कथारम्भे बाधस्याऽसाधकत्वव्याप्तिं नाङ्गीकरोति तं प्रति तद्दूषणत्वं प्रसाध्य पञ्चावयवप्रयोगः कर्त्तव्य एव । यत्तु दूषणे पक्षधर्मताभात्रमुद्भाव्यं तत्र, यत्र वादिनोस्तथा समयोऽन्यत्र तु पञ्चावयवप्रयोग एवेति । तन्न । कथासम्प्रदायविरोधात् । अथासाधकत्वं न पक्षे साध्यप्रत्ययाजनकत्वम्, तेनापि तत्त्वेनाज्ञानदशायां पक्षे साध्यभ्रमजननात् कदाचिदजनकत्वं सद्धेतावपि । नन्वेतत्काले साध्यविशिष्टपक्षधर्मिज्ञानाजनकत्वं तत्, न हि दूषणत्वज्ञानदशायां पक्षे भ्रमरूपाप्यनुमितिः, साध्यविशिष्टपक्षज्ञानञ्च हेतुत्वेन ज्ञानदशायां प्रसिद्धमिति चेन्न । सद्धेतावसत्प्रतिपक्षतादशायामपि पूर्वकाले साध्यविशिष्टपक्षज्ञानाजनकत्वमस्तीत्यसाधकताप्रसङ्गात् । अथ पक्षे साध्यभ्रमजनकत्वं तत्, बाधविरुद्धयोरपि तत्त्वाज्ञानदशायां भ्रमजनकत्वादिति चेन्न । सद्धेतौ सत्प्रतिपक्षेऽसाधारणे च तत्त्वेन ज्ञानदशायां साध्यभ्रमजनकत्वात् अज्ञाने साध्यभ्रमाजनकत्वात् । नापि व्याप्तिपक्षधर्मतान्यतरराहित्यं, सत्प्रतिपक्षासाधारणसद्धेतौरभावात् दशाविशेषे तस्य दोषत्वात् साध्याप्रसिद्धौ प्रकृतसाध्यव्याप्त्यप्रसिद्धेश्च । नाप्यनैकान्तिकाद्यन्यतमत्वम्, यत्किञ्चिदनैकान्तिकत्वस्याति-व्याप्तेः प्रकृतसाध्यानैकान्तिकत्वस्याप्रसिद्धत्वेन केव-

लान्वयिसाधनेऽप्रसिद्धेः अंशतः सिद्धसाधनात् साध्याविशेषाच्च । यत्तु एतत्कालीनएतत्पक्षीयत्वावच्छिन्नप्रतियोगिकैतत्साध्यप्रमाकरणत्वाभावः, तत्तत्कालतत्तत्पक्षविषयसाध्यत्वाभिमतानित्यत्वादिप्रमाजनकत्वाभावो वाऽसाधकत्वम् । न च प्रतियोग्यप्रसिद्धिः, एतत्कालीनैतत्पक्षीयत्वतत्तत्कालतत्तत्पक्षविषयत्वयोर्व्यधिकरणयोरेव प्रतियोगितावच्छेदकत्वादिति । तन्न । सद्धेतोःसत्प्रतिपक्षत्वाज्ञानदशायामपि तादृशप्रमायामकरणभावेनासाधकतापत्तेः।नापि तृतीयलिङ्गपरामर्शस्य प्रमात्वं तत् । विरुद्धादौ परामर्शाभावात् सद्धेतौ सत्प्रतिपक्षेऽसाधारणे च तत्प्रमात्वाच्च । नाप्यनुमितिहेतुभूताभावप्रतियोगिज्ञानविषयत्वं तत्, सद्धेतावपि कदाचित् व्यभिचारित्वसत्प्रतिपक्षत्वज्ञानस्यानुमितिप्रतिबन्धकत्वात् ।

(आ०) अनङ्गीकृत्येति । तथा चाङ्गीकारनियमो नात्रैव तत्रापीति भावः । नन्वेवं पृथिवीत्वेन पक्षतावच्छेदकेनेवेतरभेदानुमानेन पक्षधर्मत्वं न प्रदर्श्येताभयासिद्धत्वात् । न च तत्राप्यभ्युपगमानियमोऽनभ्युपगमे व्याघातापत्तिरिति, दूषणान्तरं न त्वभ्युपगम इति वाच्यम् । तर्ह्यत्राप्यनभ्युपगमे व्याघातास्तु दोषो नाभ्युपगमनियम इत्यत आह यस्त्विति । यस्तुव्याप्तिमात्रानङ्गीकर्त्ता चार्वाकादिः । बाधस्यदोषमात्रस्य,दूषणत्वमसाधकत्वव्याप्यत्वं प्रसाध्य व्याघातेनैव प्रयोग एवेत्यनन्तरं समाचार इति शेषस्तेनासिद्धिरुत्तरं घटतेऽन्यथा पञ्चावयवप्रयोगः कर्त्तुमर्हतीत्युक्तं समाचारविरोधो नोत्तरं घटतेऽनर्हताया अत्र युक्तत्वादित्यवधेयम् । हेतुत्वेनेत्युपलक्षणं हेत्वन्तरेण प्रसिद्धमित्यपि बोद्धव्यम् । अन्यथा वह्निमानयं वह्निविरहादित्यादौ हेतुत्वभ्रमस्याप्यभावादसङ्गत्यापत्तेरिति । विशेषणत्वमग्रे सिद्धान्त एवेति स्वकालस्योपलक्षणत्वपक्षमालम्ब्य दूषयति सद्धेतावेति । साध्याप्रसि-

द्धाविति न च वक्ष्यमाणमप्यसाधकत्वं साध्यगर्भं तत्र न सम्भवतीति तदसङ्ग्राह्यत्वेन न युक्तं तदव्याप्तिप्रदर्शनं तस्य केवलापार्थकत्वादिति वाच्यम्। साध्याप्रसिद्धावपि तत्प्रत्ययप्रसिद्धः शुक्तिरजतप्रत्ययादौ तथा दर्शनेन तदजनकत्वलक्षणवक्ष्यमाणासाधकत्वस्य प्रकृते समर्थनयित्वादिति भावः। केवलेत्याद्युपलक्षणम् । सत्प्रतिपक्षाद्यनुपहितेन्यत्राप्यप्रसिद्धिर्द्रष्टव्या । अंशतः सिद्धेति । संशयस्य सिद्धस्यैव साधनादित्यर्थः । एवमग्रेपि ॥

(चि०) अथानुमितिप्रतिबन्धकप्रमाविषयत्वमसाधकत्वं, सद्धेतौ व्यभिचारादिभ्रमः प्रतिबन्धकः, अनुमितिप्रतिबन्धकत्वञ्च व्यभिचारादिप्रमायास्तृतीयलिङ्गपरामर्शविघटनद्वारा तुल्यबलतया विपयतया वेति चेन्न । सत्प्रतिपक्षयोर्विरुद्धयोर्व्वास्तवतुल्यबलत्वाभावेन तद्भ्रमस्य प्रतिबन्धकत्वात् । न च तुल्यबलतया ज्ञायमानेन बाधितसाध्यविपर्ययकत्वज्ञानं प्रतिबन्धकं तच्च प्रमैवेति वाच्यम् । तुल्यबलताज्ञानमेव हि प्रतिबन्धकं न तु ज्ञायमानत्वज्ञानं गौरवादसिद्धेश्च । न च सत्प्रतिपक्षेऽन्यतराङ्गवैकल्यप्रमैव प्रतिबन्धिकेति वाच्यम् । अन्यतरत्वं तदतद्वृत्ति, न च तदतद्वृत्तिसामानाधिकरण्येन ज्ञायमानस्य दोषत्वं, धर्म्ममात्रस्य व्यभिचारज्ञानादनुमित्युच्छेदापत्तेः, अन्यतराङ्गवैकल्यज्ञानोपजीव्यस्य तुल्यबलत्वज्ञानस्यैव प्रतिबन्धकत्वाच्च, अन्यथा व्याप्यत्वासिद्ध्यन्तर्भावापत्तेः । अथानैकान्तिकादिज्ञानस्य तत्तदनुमितिप्रतिबन्धकत्वमसाधकत्वं, तथा हीदमनैकान्तिकादिज्ञानमेतत्साध्यवत्त्वैतत्पुरुषस्यैतत्कालीनैतत्पक्षकानुमितिप्रतिबन्धकम् एतदनैकान्तिकज्ञानत्वात् एतदन्य-

तज्ज्ञानवदिति चेन्न । एतत्साध्यवत्त्वेनैतत्पक्षकत्वा- नुमितेः कदाचिल्लिङ्गभ्रमात् प्रसिद्धावप्येतत्कालीन- एतपुरुषस्य तादृशानुमित्यप्रसिद्धेः । नापि समी- चीनसाध्यविशिष्टपक्षप्रत्ययाजनकत्वं, बाधविरुद्धासि- द्धेषु साध्यानधिकरणे पक्षे सत्यसाध्यप्रतीत्यप्रसिद्धेः वह्निर्नेति बाष्पे धूमभ्रमात् वह्न्यनुमितेः सत्यत्वाच्च । न चान्य एव वह्निस्तत्र भासते, मानाभावात् तद्वह्नेः प्रत्यभिज्ञानात् एकव्यक्तिके तदसम्भवाच्च । न च सानुमितिर्लिङ्गविषयत्वेन भ्रमः, अनुमितौ लिङ्गभाने मानाभावात् । किञ्च भावोऽभावो वोभयमपि प्रमेयमि- ति सत्यानुमितौ भावत्वाभावात्ववति प्रमेयत्वज्ञाने एकत्र तयोरभावादसत्यानुमितिः स्यात् । न चान्यतरत्वं लिङ्गं, तद्व्याप्तिमविदुषोऽप्यनुमितेर्व्यर्थविशेषणत्वाच्च । अथ साध्यव्याप्यत्वमेव तत्र तन्त्रं तत्र च बाधो ना- स्तीति चेत्, तर्हि कूटलिङ्गादनुमितौ वह्निव्याप्यवत्त्व- मेव तन्त्रं वह्निव्याप्यश्च किञ्चित्तत्रास्त्येव । अथ कूटलिङ्गे वह्निव्याप्याभेदः प्रतीयते तथा च वह्नौ कूटलि- ङ्गव्यापकाभेदोऽपि, अन्यथा कूटस्यैव वह्निव्याप्यत्वा- प्रतीतेः, एवञ्च कूटलिङ्गव्यापको वह्नित्वेन भासते इति वह्न्यनुमितिरसत्यैवेति चेन्न । वह्निव्याप्यालोके धूमारोपात् यत्रानुमितिस्तत्रासिद्धिभेदेऽसत्यत्वाभा- वापत्तेः आलोकव्यापके धूमव्यापकाभेदात् । अथ लि- ङ्गमनुमितिविषयो नियमतः पक्षधर्मताज्ञानविषय- त्वात् व्याप्तिज्ञानविषयत्वात् नियमेनानुमितिहेतुवि- शेषणधीविषयत्वाच्च पर्वतत्ववत्साध्यवच्च । किञ्चैकवि-

शेषणवत्त्वेन ज्ञाते विशेषणान्तरधीसामग्री तत्रैव विशिष्टवैशिष्ट्यज्ञानमिति धूमविशिष्ट एव वह्नि-वैशिष्ट्यानुमितिरिति । नन्वनुमितौ व्यापकत्व-भानेऽनुमित्यविच्छेदः । न च फलीभूतज्ञानन्यू-नविषयस्यैव परामर्शस्यानुमितिहेतुत्वं, गौरवात्, विषयान्तरसञ्चारात् नानुमितिरित्यपि न । परामर्श-स्य चरमकारणत्वात् प्रत्यक्षादिसामग्रीतो बलवत्त्वाच्चे-ति चेत् । न सिद्धसाधनेन विच्छेदात् । यद्यप्येवं लिङ्ग-ज्ञानेऽप्रमात्वेऽपि साध्यप्रमात्वात् कथं तस्यासाधकत्वं, तथाप्युक्तमसाधकत्वमत्स्यैवेति चेत्, अस्तु तावदेवं, तथापि दैवात्तत्र धूमसत्त्वे कथं तदंशेऽप्यसत्यता । अत एव आर्द्रेन्धनप्रभवो वह्निर्धूमव्यापको नान्यः, नच वह्नित्वेन व्यापकत्वादन्योऽपि तथा, तेन विनापि धूमसत्त्वात्, एवं बाष्पे धूमभ्रमात् धूमव्यापको वह्नि-र्भासते सच तत्र नास्त्येवेति न सानुमितिः सत्येति निरस्तम् । दैवाद्धूमसत्त्वे सत्यत्वात् ।

(आ०) तुल्यबलनेति । अत्र वस्तुगत्या यत्तुल्यबलमगृहीतविशेषबलं तद्विषयतयोभयविरुद्धबलाविषयतया वेत्यर्थः नतु तुल्यबलत्वमपि विषय इति । नन्वन्यतराङ्गवैकल्यसंशयाधायकतया दोष इत्यनुभवसिद्ध-मित्यस्वरसाद्दोषान्तरमाह अन्यतरेति । एकेति । सास्नाशून्यायामपि गवि तदारोपेण गोत्वाद्यनुमित्यादावित्यर्थः । लिङ्ग-लिङ्गतावच्छेदकम् । वह्निव्याप्येति । एतच्चाभ्युपेत्य समाहितम् । वस्तुतो वह्निव्याप्याभेदे वह्निस्तद्व्यापकत्वेन भासते न तु कूटव्यापके वह्नित्वं सामग्रीविरहा-दिति ध्येयम् । नियमत इति श्लिष्टमावश्यकतया निश्चीयमानतया चेत्यर्थः । तेनाद्येनाकस्मिकं द्वितीयेन तु व्यापकतावच्छेदकावाच्छि-न्नमपि संदिग्धमुदाहृतभावादि वार्यत इति भावः । मध्यमहेतावपि नि-यमेनेति पूरणीयं आकस्मिकस्य तत्रापि वारणीयत्वादिति । नांशवि-

वक्ष्यैदमसाधकत्वं निरुच्यत इत्याह तथापीति । अस्तु तावदे-वमित्यभ्युपगमवादः वस्तुतो नोक्तानुमानादपि तथा सिद्धिरित्येव-म्परः । तदसिद्धिबीजं तु अनुमानं सामग्र्यभावेन फलाभावाद्बाधितं तथाहि किं साध्यविशिष्टपक्षकानुमितित्ववत्तत्र लिङ्गमपि विषयतया कार्यतावच्छेदकं विशेष्यानुमितिं प्रति व्याप्तिज्ञानादीनां हेतुतेति म-न्यसे, अथवा सामान्यत एव प्रमाणमात्रस्योपनीतभानजनकत्वं सुर-भिचन्दनमित्यादौ क्लृप्तमित्यत्राप्येवमिति । आद्यो गौरवानुभवविरो-धाभ्यामेव निरसनीयः । द्वितीयस्तु स्यादेव यदि सौरभांशो संस्कार-रूपप्रत्यक्षसन्निकर्षवदिहापि व्याप्तिरूपलिङ्गसंनिकर्षो लिङ्गेनापि भवेत्, अत एव शक्तेः शब्दसन्निकर्षत्वस्याभावात् शब्दो न शाब्दबुद्धिविषय विशेष्याभाने संसर्गाभाने च विशिष्टबुद्ध्यसिद्धेः अन्यथानुपपत्त्यैव प-क्षसंसर्गावन्तर्भाव्यैवानुमितिशाब्दौ प्रति लिङ्गशब्दयोर्हेतुतेति व्याप्ति-क्तिविरहेऽपि पक्षसंसर्गगोचरे ताभ्यां ते जन्येते इति सर्वं सुस्थम् ॥

(चि०) उच्यते । स्वज्ञानदशायां पक्षे साध्यप्र-त्ययाजनकत्वमसाधकत्वं । तथाहि–विरुद्धत्वादिज्ञान-दशावर्त्तीदं पक्षे साध्यप्रत्ययाजनकं विरुद्धादित्वात् पक्षविशेषणमहिम्ना तत्तद्दशायां पक्षे साध्यप्रत्ययाजन-कत्वं सिद्ध्यति । बाधितादावपि लिङ्गत्वभ्रमात् पक्षे सा-ध्यप्रत्ययजनकत्वमिति न प्रतियोग्यप्रसिद्ध्या साध्याप्र-सिद्धिः । यद्वा अनुमितिप्रतिबन्धकतावच्छेदकरूपव-त्त्वमसाधकत्वं, तथाहीदानीमिदमनुमितिप्रतिबन्धक-तावच्छेदकरूपवदनैकान्तिकादित्वात् ज्ञानवत्, अ-नुमितिप्रतिबन्धकतावच्छेदकञ्च रूपं ज्ञाने विषयतयाने-कान्तिकादित्वमेव । न च साध्याविशेषः, उपाधिविशेष-स्यानुमेयत्वात्, तोयत्वेन पिपासोपशमनसमर्थतावच्छे-दकरूपपरत्वानुमानवत् ।

अन्ये त्वनैकान्तिकबाधितविरुद्धेष्वव्याप्यत्वं व्या-

प्यत्वासिद्धेऽनैकान्तिकत्वं स्वरूपासिद्धसत्प्रतिपक्षासाधारणेषु दशाविशेषेऽनुमितिप्रतिबन्धकज्ञानविषयत्वमसाधकत्वम् । न चैवमनैकान्तिकोऽसाधक इति सह प्रयोगानुपपत्तिः, तत्राव्याप्यत्वस्यासाधकशब्दार्थत्वात् । असाधकत्वाननुगमेऽपि च हेत्वाभासत्वमनुगतमेव यस्य ज्ञानमनुमितिप्रतिबन्धकं तस्य हेत्वाभासत्वादिति ।

इति श्रीमन्महामहोपाध्यायगङ्गेशोपाध्यायविरचिते
तत्त्वचिन्तामणौ अनुमानखण्डे हेत्वाभासा-
नामसाधकतासाधकत्वग्रन्थः समाप्तः ।

गादाधर्यां अनुमानखण्डो बाधान्तः समाप्तः ।

(आ०) स्वज्ञानकालस्य विशेषणत्वमादाय सिद्धान्तमाह स्वज्ञानेति । साध्यप्रत्ययाजनकत्वं साध्यप्रत्ययजनकतावच्छेदकरूपविरहस्तानि चाव्यभिचारित्वादीनि असत्प्रतिपक्षत्वाबाधितत्वान्तानि तदभावः कदाचित्सत्प्रतिपक्षेतरेऽपीति स्वज्ञानकालीनतया स विशेषितः स च न तादृशोऽन्यदा तथाज्ञानरूपविशेषणाभावेन विशिष्टाभावात्, एवं च सव्यभिचारित्वादिरेव पर्यवसितस्तथा सत्यपि यथा न साध्याविशेषस्तथाऽऽकर एव स्फुटम् । ननु स्वज्ञानकालीनतया जनकत्वाभावे विरुद्धत्वादित्यादिव्यभिचरितस्य जनकतावच्छेदकविरहरूपत्वेपि स्वज्ञानविरहकाले विशिष्टाभावात्तथा जनकत्वाभावे यथाश्रुते जनकतावच्छेदकाभावरूपे विवक्षितेऽपि साध्ये च स्वज्ञानाप्रवेशे विरुद्धत्वादिति व्यर्थविशेषणं कदाचिदजनकत्वस्य ज्ञायमानत्वलक्षणतज्जनकतावच्छेदकविरहात्मनोऽज्ञायमानत्वस्य च केवलान्वयित्वादित्यभिसंधिना साध्यं निष्कृष्याह तथाहीति । तथाहि ज्ञानकालस्य पक्षतावच्छेदकतया तत्कालीनत्वं साध्यस्य न तु तस्यापि साध्यप्रवेशो येन व्यभिचारः । न च व्यर्थविशेषणता, विवक्षितसाध्यस्यासार्वत्रिकत्वात्, साध्यसिद्धि-

जनकतावच्छेदकत्वं तु तत्प्रत्ययजनकज्ञानविषयतावच्छेदकत्वम्, अत एवासत्प्रतिपक्षितत्वं तुल्यबलत्वज्ञानाभावरूपं प्रतिबन्धकाभावरूपतया स्वरूपसदेवानुमितिजनकं न तु ज्ञातमिति मतावकाशेनेदं घटत इत्यरुच्या लक्षणान्तरं वक्ष्यते, तथाच ज्ञायमानत्वज्ञानमपि यद्यनुमिति हेतुः स्यात् तदा ज्ञायमानत्वमपि तथा जनकतावच्छेदकं भवेत् येनाज्ञायमानत्वमवच्छेदकाभावः स्यात्। एवं च सद्धेतौ सत्प्रतिपक्षाद्यनवतारेऽपि नोक्तावच्छेदकाभावः कोऽपीति न केवलान्वयित्वमिति न व्यर्थविशेषणता। न च सर्वो वह्निव्याप्यवान्वह्निमान् तत्त्वादित्यनुमानेन स न तद्वान्मेयत्वादित्यादिना सत्प्रतिपक्षेणैवमन्यत्रापीति सर्वमेव सत्प्रतिपक्षितमिति वाच्यम्। सर्वत्र सर्वस्यैवमवताराभावात् न च स्वज्ञानदशायामित्यत्र ज्ञाने यथार्थत्वायथार्थत्वविकल्पः, ज्ञानमात्रस्य विवक्षितत्वात् भ्रममादायातिप्रसङ्गस्य तादृशावच्छेदकाभावस्वरूपसत्त्वाभावादेवाभावात्। नहि व्यभिचारभ्रमे वास्तवतादृशः सः। न च सत्प्रतिपक्षे विरुद्धाव्याप्त्यादौ लिङ्गान्तरे कुतो वास्तवसत्त्वमिति वाच्यम्। प्रतीतिबलेन तत्र तत्सम्बन्धाभ्युपगमात् स च स्वरूपसम्बन्धविशेष एवेत्युक्तं हेत्वाभासलक्षणे।

अन्ये तु यथाश्रुते साध्ये व्यर्थविशेषणत्वाभावेन स्वज्ञानकालमपि साध्ये प्रवेशयंति तेषां ज्ञानमात्रगर्भतायां सद्धेतावतिप्रसङ्गः। प्रमात्वपर्यन्ते च वक्तव्ये सत्प्रतिपक्षेऽव्याप्तिरित्यपि दोषो भवति अस्माकं तु दोषशंकैव न भवतीति संक्षेपः॥

ननु बाधिते तथा साध्यप्रत्ययाप्रसिद्ध्या तज्जनकतावच्छेदकावभावोऽप्रसिद्ध इत्यत आह लिङ्गेति। तस्यान्यस्य वा लिङ्गत्वभ्रमदशायामित्यर्थः। उक्तारुच्या लक्षणान्तरमाह यद्वेति। तद्वत्त्वं चात्र तद्वर्त्तमानत्वं विवक्षितमतो न सत्प्रतिपक्षोतीर्णेऽतिप्रसङ्गः, न हि पूर्वत्रेवात्रापि स्वज्ञानदशायामित्यस्ति। अत एव तद्वर्त्तमानत्वस्य तदवच्छिन्नत्वरूपस्य सार्वत्रिकत्वात् विरुद्धत्वादित्यादौ न व्यर्थविशेषणतेति भावः।

केचित्तु नेह व्यर्थविशेषणता व्याप्तेरुभयगृहीततया व्याप्तिग्रहसामग्रीसंपादनाय हेत्वनुपन्यासात्, अपि तु समयबन्धादुपन्यस्तस्य हेतुत्वप्रतिपादनाय तद्व्याप्यतानवच्छेदकस्य विशेषणस्य प्रवेशे

पि न क्षतिः प्रतिबन्धकप्रयोजनतयोपन्यस्तस्य विशिष्टस्योभयसिद्ध-व्याप्तिकस्य पंचम्या हेतुत्वाभिधानादित्यपि वदन्ति ।

ननु व्यभिचारित्वादि न प्रतिबन्धकतावच्छेदकं तत्सत्त्वेऽप्यप्रतिबन्धादित्यत आहानुमितीति । तथाचानुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकत्वमसाधकत्वमिति पर्यवसितोऽर्थः । ननु साध्याप्रसिद्धावव्यापकमिदमिति चेन्न । आद्ये स्वज्ञानदशायामिति वचनादेव तदसंग्राह्यत्वलाभात् । अन्त्येऽपि न पदार्थरूपस्य साध्यस्याप्रसिद्धिः, जबगडदशादिवन्निरर्थकत्वात्, किन्तु वाक्यार्थरूपसाध्यस्याप्रसिद्धिर्वाच्या तथा च साध्यज्ञानस्य प्रकृतहेतुनिष्ठव्याप्तिप्रतियोगित्वाप्रकारकत्वमनुमितिप्रतिबन्धकतावच्छेदको धर्मः, स चात्राप्रसिद्धावपि साध्यस्य तद्धर्मे तथा प्रतियोगित्वप्रकारकत्वाभावादक्षतः । वस्तुतः साध्याप्रसिद्धिः शुद्धमपार्थकं हेत्वाभासानामेवासाधकतासाधकत्वात् अज्ञानरूपासिद्ध्यादीनां त्वपार्थकत्वं हेत्वर्थान्वययोग्यताविरहनिश्चयात् हेत्वाभासानां तथात्वेऽप्युपजीव्यतया पृथग्दोषत्वम् । न चाज्ञाने किञ्चिदाभासान्तरं तथोपजीव्यमस्ति, अत एव तेषामनाभासत्वे निग्रहान्तरत्वाभावेऽपि कथायामुद्भावनम्, अन्यथाऽपार्थकाप्रवेशे अन्यत्राप्रवेशे द्वाविंशत्यधिकानिग्रहस्थानानामभावे तदुद्भवनं न स्यादेव । 'हेत्वाभासाश्च यथोक्ता' इत्यत्रानुक्तरूपसमुच्चयरूपतया चकारव्याख्यानात्तत्समुच्चयः । अनुक्तप्रकारसमुच्चयार्थकत्वेन तद्व्याख्यानात् । न हि धर्म्यैवानुक्तोऽपि तु उक्तस्यापि व्याप्त्यासिद्ध्यादेरनुक्तसाध्यविकलदृष्टान्तादिप्रकारतालाभाय चकारकरणात्तदपि तथोद्भावनाय, तेन व्याप्त्यसिद्धिवद्दृष्टान्तसाध्यवैकल्यं तेनैव रूपेणोद्भाव्यत इति लभ्यते, तद्वदिहापि साध्याप्रसिद्धिलिङ्गांशज्ञानाद्यपार्थकान्तर्गतमेव साध्याप्रसिद्धित्वादिनैवोद्भाव्यं न त्वन्यथेति सर्वं सुस्थम् ॥

(१) (अनुगतसम्भवेऽननुगतं हेयमित्यरुचिं मनसि कृत्याह अन्ये-त्विति । एवं च लक्षणयोः सुस्थत्वे यथाश्रुतमादाय साध्यप्रत्ययजनकत्वं लिङ्गत्वभ्रमदशायां विरुद्धस्यापीति व्यभिचारो यदाकदा-

(१) ( ) एतदङ्कितः पाठो तातपादसंगृहीतातिप्राचीनालोकपुस्तके दृश्यते कलिकातामुद्रितपुस्तके तु नोपलभ्यत इति ।

चित्तद्जनकत्वं वस्तुमात्र एवेत्यर्थपर्यालोचनया विरुद्धत्वादिहेतौ व्यर्थविशेषणत्वमित्याद्ये । भ्रमरूपमपि साध्यज्ञानं न यत्र तत्र साध्यप्रत्ययजनकत्वाभावो साध्यप्रत्ययप्रतिबन्धकतावच्छेदको धर्मो वा दृष्टान्तासिद्धमित्युभयोः । प्रतिसाधनं साध्याभाववांश्च पक्षोऽनुमितिप्रतिबन्धकत्वधीविषयतावच्छेदकस्तद्वत्त्वं लिंगे नास्ति प्रतिसाधनवत्त्वस्य क्वचिदप्यभावात्, स्वरूपासिद्धे च तादृशपक्षसम्बन्धाभावादिति द्वितीये च दूषणमलग्नकं द्रष्टव्यम् । अन्यत्र चैतज्ज्ञमात्रसाध्यप्रत्ययजनकत्वप्रतिबन्धकतावच्छेदकत्वयोः सामान्यतो ग्रहेण विवक्षितसाध्ये दूषणास्पर्शात् तादृशप्रतिसाधनसम्बन्धस्य यथा तत्प्रतियोगित्वं तथाऽऽभाससामान्यलक्षणं उक्तम् । नाद्ये च पक्षनिष्ठान्यतमाभावप्रतियोगिसाध्यकत्वं तथा तद्वत्त्वमस्त्येव हेतावपि व्यर्थानि दूषणानि चेत् क्व समाधानवार्ता । यच्च व्यर्थविशेषणतापरिहाराय समाधानं हेत्वाभासत्वनियतसाध्यप्रत्ययाजनकत्वं साध्यमिति । तन्न, तथासति हेत्वाभासत्वस्यैव साध्यत्वौचित्ये तस्यैवासाधकत्वापत्तिरिति दिक् ॥)

(१) इति जयदेवमिश्रविरचितः हेत्वाभासानामसाधकतासाधकत्वप्रकरणस्यालोकः समाप्तः ॥

---

(१) प्रकरणस्यास्य शिरोमणिना तट्टीकाकारैश्चाव्याख्यातत्वान्मुद्रितोऽप्यालोकोऽत्र मूलपाठसंगमनार्थं प्रदत्त इति ॥

गंगेशोपाध्यायकृतानुमानखण्डस्य

अवशिष्टचिन्तामणिः ।

तत्र

ईश्वरवादः ।

(चि०) एवमनुमाने निरूपिते तस्माज्जगन्निर्मातृपुरुषधौरेयसिद्धिः–क्षित्यादौ कार्यत्वेन घटवत् सकर्तृकत्वानुमानात् ।

ननु क्षित्यादि प्रत्येकं न पक्षः, तस्य स्वशब्देनाभिधातुमशक्यत्वात् । नापि मिलितम्, एकरूपाभावात् । अत एव सकर्तृकत्वाकर्तृकत्वविचारारम्भकसंशयविषयः तथाभूतविवादविषयो वा न पक्षः, एकरूपाभावेन तयोस्तावत् ग्रहीतुमशक्यत्वात् वादिनोर्निश्चितत्वेन संशयाभावात् । न च वाद्यनुमानयोस्तुल्यबलत्वेन मध्यस्थस्य संशयः, अनुमानाभ्यां तस्य संशयो मध्यस्थप्रश्नानन्तरञ्चानुमानमिति परस्पराश्रयात् घटेऽपि कदाचित् तयोः सम्भवात्, प्रत्येकं संशये विवादास्पदत्वेनानुमानेऽर्थान्तरत्वापत्तेश्च । न च शरीरापेक्षेण कर्त्रा यन्न कृतं शरीराजन्यं जन्यं वा पक्षः, जन्यात्मविशेषगुणशब्दफूत्कारसर्गाद्यकालीनवेदपदादिलिप्यादिसंप्रदायानामीश्वरमात्रकर्तृकाणामसंग्रहात्, असिद्धेश्च अदृष्टद्वारा शरीरिणोऽपि क्षित्यादिकर्तृत्वात् । नापि जन्यकृत्यजन्यं जन्यम् उभयासिद्धकृतिजन्यान्यजन्यं वा पक्षः, क्षित्यादीनामदृष्टद्वारा जन्यकृतिजन्यत्वात् । नाप्यदृष्टज-

नककृत्यजन्यं जन्यकृतिसाक्षादजन्यं वा पक्षः, ईश्वरकृतेरदृष्टजनकत्वेन क्षित्यादौ तदभावात्। (१)घटादावप्येवं पक्षत्वेनांशतः सिद्धसाधनात् । न च क्षितिरेव पक्षः, अङ्कुरेण सन्दिग्धानैकान्तिकत्वात्। न च निश्चितविपक्षे हेतुसन्देहात् स इति वाच्यम्। हेतौ साध्याभाववद्वृत्तित्वसंशयस्य दूषकत्वात्। स च साध्याभाववति हेतुसन्देहात् हेतुमति साध्याभावसन्देहाद्वा उभयथापि दोषः। न चैवं पक्षेऽपि तत् स्यात्, अनुमानमात्रोच्छेदकत्वेन तदितरत्र तस्य दूषकत्वात्। अङ्कुरे हेतोरनिश्चये न सन्दिग्धानैकान्तिकम्, तन्निश्चये च साध्यसन्देहवति साध्यानुमितिरेव पक्षवत् सामग्रीसत्त्वात्। अत एवाङ्कुरः पक्षसम इति चेन्न। तस्यापक्षत्वेन हेतोः पक्षधर्मताविरहेण स्थापनानुमानाविषयत्वात्। तदा तस्यापि पक्षत्वे प्रतिज्ञानुपपत्तिः। अनुमानान्तराधीनतत्साध्यानुमित्यनन्तरञ्च पक्षेऽनुमिताविततरेतराश्रयान्नैकमप्यनुमानं स्यात् तत्रापि क्षित्या सन्दिग्धानैकान्तात्, क्षितेर्विवादविषयत्वे अङ्कुरे प्रथमं साध्यमाने अर्थान्तराच्च (२)। किञ्चैवमेकैकोपादानाभिज्ञसिद्धावपि नेश्वरसिद्धिः। नापि सर्गाद्यकालीनं द्व्यणुकं पक्षः, परम्प्रति सर्गाद्यसिद्धेः।

किञ्च सकर्तृकत्वं ? न तावत् कृतिमत्सहभावः कृतिमज्जन्यत्वं वा, अस्मदादिना सिद्धसाधनात्। उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वं तदिति चेत्, न। उपादानगोचरत्वं यदि यत्कि-

---

(१) घटादेरिति पाठस्य प्रकाशकास्संमतत्वेऽपि सकलादर्शपुस्तकेषु सप्तम्यन्तस्यैवोपलब्ध्याऽयमेव मुद्रितः।

(२) अर्थान्तरत्वादिति प्रकाशकृत्संमतः पाठः।

क्षितुपादानगोचरत्वं तदा अस्मदादिनाऽर्थान्तरत्वम्, ज्ञानादिजन्यत्वमपि(१) विवक्षितम्, न च घटोपादानगोचरज्ञानादीनां क्षितिजनकत्वं सम्भवति, व्यभिचारादिति चेन्न । क्षितिजनकादृष्टजनकज्ञानादीनाम् उपादानविषयनियमेनादृष्टद्वारा तैरेव सिद्धसाधनात् । न च साक्षात्तज्जन्यत्वं विवक्षितम्, तद्धि न कृतिजन्योजन्यत्वे सति कृतिजन्यत्वम् स्वजनककृत्यव्यवहितोत्तरक्षणवर्त्तित्वं वा, घटदृष्टान्तस्य साध्यविकलतापत्तेः घटादौ कुलालादिकर्तृकृत्याभावप्रसङ्गाच्च । न च शरीरक्रिया दृष्टान्त इति वाच्यम् । घटेनानैकान्तिकत्वात् चेष्टात्वस्योपाधित्वाच्च । नापि क्षित्याद्युपादानगोचरत्वं विवक्षितम्, अप्रसिद्धेः । न चोपादानशब्दस्य सम्बन्धिशब्दत्वेन घटक्षित्यादिसमभिव्याहारे तत्तदुपादानगोचरत्वं चैत्रो मातृभक्तो मैत्रवदिति वाच्यम् । शाब्दे हि बोधे तथा । न चात्र शब्दः प्रमाणं वादिनोऽनाप्तत्वात् । अनुमाने त्वनुगतेन व्यापकत्वग्रहे तेन रूपेण व्यापकसिद्धिः, तच्चोपादानत्वमेवेति कथं नार्थान्तरम् । किञ्चैवं घटादावपि तत्तदुपादानत्वेनैवोपस्थित्या सामान्येन रूपेण कुत्राप्यनुपस्थितेर्व्याप्तिरेव न गृह्येत । अपि च सामान्यलक्षणया ज्ञानलक्षणया योगजधर्मरूपया वा प्रत्यासत्त्योपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमताऽस्मदादिना सिद्धसाधनम्, तेषां क्षित्यव्यवहितपूर्वसमयासत्त्वेऽपि तद्गतः सत्त्वाददृष्टद्वारा तेषामपि जनकत्वसम्भवात् ज्ञानादिसाक्षाज्जन्यत्वस्य च निरस्तत्वात् ॥

---

(१) ज्ञानादीनामपि जनकत्वमिति पाठान्तरम् ।

महामहोपाध्यायरुचिदत्तकृतो

अनुमानखण्डचिन्तामणेः

अवशिष्टभागस्य प्रकाशः।

(प्रका०) एवमियता प्रबन्धेन निरूपितस्यानुमानस्य प्रयोजनं दर्शयति *एवमिति*। जगदिति। *कार्यमात्रेत्यर्थः*। ननु तदप्रसिद्धौ साध्याप्रसिद्धेः कथं तदनुमानमित्यत आह-*क्षित्यादाविति*। तथा च पक्षधर्मताबलात्तत्सिद्धिरिति भावः।

मिलितमिति। एकपक्षतावच्छेदकावच्छिन्नमित्यर्थः। *तयोरिति*। संशयविषयत्वविवादविषयत्वयोरित्यर्थः। ग्राहकाभावमुक्त्वा ग्राह्याभावमाह* वादिनोरिति*। *सम्भवादिति*। विशेषादर्शनदशायामिति भावः। तथाच तस्यापि पक्षान्तर्भूतत्वे तत्रांशतः सिद्धसाधनमिति तात्पर्यम्। अभ्युपेत्याह *प्रत्येकमिति*। क्षितिः सकर्तृका नवेति प्रत्येकमित्यर्थः। विवादास्पदत्वेनेत्युपलक्षणं तादृशसंशयविषयत्वेनेत्यपि द्रष्टव्यम्। *अर्थान्तरत्वादिति*। विचाराङ्गसंशयविषयतावच्छेदकेन रूपेण पक्षे साध्यसाधनस्य तत्संशयनिवर्त्तकत्वेन प्रकृतार्थसम्बद्धत्वं रूपान्तरेण तत्साधनस्य भिन्नप्रकारकतया तत्संशयानिवर्त्तकत्वेन प्रकृतार्थासम्बद्धत्वादिति भावः। *जन्येति*। जन्यात्मविशेषगुणेऽपि अस्मदादिशरीरस्य कारणत्वात्। सर्गाद्यकालीनवेदादावस्मदाद्यदृष्टोपार्जितेश्वरोपगृहीतशरीरस्य कारणत्वादिति भावः। *असिद्धेरिति*। अप्रसिद्धेरित्यर्थः। अत्र हेतुमाह *अदृष्टेति*। तथा च न सर्वसंग्रह इति भावः। वाद्यन्तरमतं दूषयति *नापीति*। द्वितीयलक्षणे दोषमाह *घटादेरिति*। चेष्टाद्वारा जन्यकृतेस्तत्र जनकत्वादित्यर्थः। *क्षितिरेवेति*। तथाच नार्थान्तरमिति भावः। *तस्यापक्षत्वेनेति। परार्थानुमाने प्रतिज्ञाविषयस्यैव पक्षत्वं भवतीति भ्रमनत इदं मुत्तरं बोध्यम्। पक्षत्वे-प्रतिज्ञाविषयत्वे। *सर्गाद्येति*। इदानीन्तनद्व्यणुकमस्मदादिनैव योगजज्ञानवता सकर्तृकं स्यादित्यर्थान्तरशङ्कया सर्गादीत्युक्तम्। अत्र सन्दिग्धानैकान्तिकमपि बोध्यम्।

साध्यं दूषयितुं पृच्छति *किञ्चेति*। *व्यभिचारादिति*। क्षितिपूर्व

मस्मदादिघटोपादानज्ञानस्यासम्भवादित्यर्थः । *घटेति* । कुलालकृते- श्चेष्टाद्वारा तज्जनकत्वादित्यर्थः । *घटादाविति* । उक्तस्य तत्कर्तृकत्व- प्रयोजकस्य तत्रासत्त्वादिति भावः । *चेष्टात्वस्येति* । न च कृतिध्वं- सादौ साध्याव्याप्तिः । पक्षधर्मावच्छिन्नसाध्यव्यापकत्वादिति भावः । *किञ्चैवमिति* । यदि शाब्देऽपि बोधे तत्तदुपादानत्वेनैवोपस्थिति- र्वाच्या तदेत्यर्थः । ननूपादानगोचरत्वेन प्रत्यक्षादीनां जनकत्वं विव- क्षितं तेन च रूपेण तेषां स्वसमवेतकार्यं प्रत्येव जनकत्वं, तथा चान्यो- पादानप्रत्यक्षस्याजनकत्वादेव नार्थान्तरमित्यत आह *अपि चेति* । इदं च नैयायिकमतेनैव दूषणं द्रष्टव्यम् । *तद्वत इति* । तदुपलक्षित स्येत्यर्थः । ननु विशिष्टस्य जनकत्वं विवक्षितमत आह *अदृष्टेति* । यद्यपि योगिज्ञानस्य नादृष्टद्वारकतासम्भवः, क्षीणदोषत्वेन योगिनोऽ- दृष्टासंभवात् । तथाप्येतदनुमानबलादेव 'धर्मिकल्पनात' इति न्यायाद्दोषं विनापि तस्य जनकत्वं भवत्वित्यर्थान्तरापादनमेवेदमिति ध्येयम् ॥

(चि०) अथ योगजधर्माजन्यसविकल्पकाजन्यसामान्यलक्षणाप्रत्यासत्त्यजन्यजन्योपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमदजन्यं जन्यं पक्षः, योगजधर्माजन्यसविकल्पकाजन्यसामान्यलक्षणप्रत्यासत्त्यजन्योपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यमिति साध्यम्, यद्वा अनागतगोचरसाक्षात्कारजनकप्रत्यासत्त्यजन्यजन्यज्ञानादिमदजन्यं जन्यम्, अनागतगोचरसाक्षात्कारजनकप्रत्यासत्त्यजन्योपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यमिति साध्यम्, ज्ञानाव्यवहितोत्तरसमयवर्त्तीच्छाऽव्यवहितोत्तरक्षणवर्त्तिकृतीनां जनकत्वं विवक्षितं न तु ज्ञानादीनां यौगपद्यं पौर्वापर्यं वाऽतो न साध्याप्रसिद्धिर्न वा क्षित्यादौ बाध इति ।

— मैवम् । योगजधर्मसामान्यज्ञानरूपप्रत्यासत्तीनामनागतगोचरसाक्षात्कारस्य तज्जनकप्रत्यासत्तीनाञ्च परस्याप्रसिद्धतया तदजन्यस्य साक्षात्कारस्याप्यप्रसिद्धत्वेन प-

क्षसाध्ययोर्विशेषणासिद्ध्या परं प्रत्याश्रयासिद्धेः साध्याप्रसिद्धेश्च। तत्सिद्धौ वा पक्षे तदजन्यत्वासिद्धेः क्षितिजनकादृष्टजनककृतिचिकीर्षासाक्षात्काराणां योगजधर्माद्यजन्यानामदृष्टद्वारा क्षितिजनकत्वेन सिद्धसाधनात्। न च तादृशसाक्षादजन्यत्वं विवक्षितम्, घटादिदृष्टान्ते तदसम्भवात्, दृष्टान्ते घटादौ जनकेष्टसाधनताज्ञानस्यानुमितित्वेन जन्यसविकल्पकव्याप्तिग्रहजन्यत्वेन साध्याप्रसिद्धेश्च।

ननु व्याप्तिबलेन साध्यं सिध्यति व्याप्तिश्च यत्र यत्र कार्यत्वं तत्र तत्र तदुपादानाभिज्ञकर्तृजन्यत्वमितिरूपा न तु यद्यत् कार्यं तत्तत् यत्किञ्चिदुपादानाभिज्ञजन्यमिति, एवञ्च यत्र यत्र कार्यत्वं तत्र तत्र तदुपादानाभिज्ञजन्यत्वमिति विशिष्य व्याप्त्या क्षित्यादौ कार्यत्वं क्षित्याद्युपादानाभिज्ञजन्यत्वमेव साधयत्यतो न सिद्धसाधनमिति चेन्न। घटे पटे च कार्यत्वस्य व्याप्तिग्रहः किं प्रत्येकं घटोपादानाद्यभिज्ञजन्यत्वेन, तत्तदुपादानाभिज्ञजन्यत्वेन, उपादानाभिज्ञजन्यत्वेन वा ? आद्ये घटोपादानाभिज्ञजन्यत्वादौ कार्यत्वस्य व्यभिचार एव। द्वितीये त्वननुगततत्तच्छब्दाभिधेयघटाद्युपादानगतानुगतरूपाभावात् कथं व्यापकताग्रहः ? तत्तच्छब्दस्य स्वभावात् समभिव्याहृतपरतया नायं दोष इति चेत्। न। अनुमाने शब्दस्वभावोपन्यासस्याप्रयोजकत्वात्। अत एवेदानीं देवदत्तो बहिरस्ति विद्यमानत्वे सति गृहासत्त्वात्, विद्यमानत्वे सति यो यदा यत्र नास्ति स तदा तदतिरिक्तदेशेऽस्ति यथाऽहमेव बहिरसन् गृहे प्रतिष्ठामीत्य- त्र पक्षदृष्टान्तसाधारणयत्त्वतत्त्वयोरननुगतयोरभावान्नान्वयि किन्तु व्यतिरेकीत्युक्तम्। तृतीये सिद्धसाधनमेव॥

(प्रका०) *अथेति* । अत्र प्रत्यासत्त्यजन्यत्वं विशेषणं पक्षे पक्षासिद्धिवारणार्थं साध्ये तु सिद्धसाधनवारणार्थम् अदृष्टद्वारा योगजादिज्ञानानामपि जनकत्वस्योक्तत्वात् । एवमग्रेऽपि । *ज्ञानाव्यवहितेति* । इदं च वस्तुगतिमभिप्रेत्य न त्विदं साध्यतावच्छेदकप्रविष्टं ज्ञानादिप्रत्येकविशिष्टजन्यत्वस्य साधने साध्याप्रसिद्ध्यादेरभावात् पक्षधर्मताबलेन विलक्षणज्ञानासिद्धेः अत एव सिद्धान्तेऽपि तथैव भविष्यति । *न त्विति* । विवक्षितमित्यनुषज्यते, साध्यतावच्छेदकप्रविष्टत्वेनेति शेषः ।

पक्षसाध्ययोरिति । पक्षविशेषणासिद्ध्या आश्रयासिद्धिः, साध्यविशेषणाप्रसिद्ध्या साध्याप्रसिद्धिरिति बोध्यम् । *सिद्धौ वेति* । योगजधर्माद्यजन्योपादानगोचरज्ञानादिसिद्धौ वा तस्याप्यदृष्टद्वारा क्षित्यादिजनकत्वसम्भवात् पक्षे तदजन्यत्वस्यासिद्धेरित्यर्थः । *सिद्धसाधनादिति* । यत्किञ्चिदुपादानाभिप्रायेणेदम् । वस्तुतोऽप्रयोजकत्वाद्विशिष्टसाध्ये न व्यापकत्वमिति बोध्यम् । *साध्याप्रसिद्धेरिति* । यद्यप्यपरोक्षज्ञानजन्यत्वं स्वत एवाप्रसिद्धम् अनुमितेरपरोक्षत्वाभावात्, तथाच किं सविकल्पकजन्यत्वोपवर्णनेन । तथापि घटादेस्तादृशप्रत्यक्षजन्यत्वं नास्ति मानाभावादित्यपरोक्षपदमपास्य ज्ञानघटितमेव साध्यं कर्त्तव्यम् । एवञ्च तेन रूपेण साध्याप्रसिद्धिरुक्तेति भावः ।

वस्तुतस्तु अनुमितित्वेन जन्यसविकल्पकव्याप्तिग्रहजन्यत्वेन चेत्यर्थः, तथा च विशेषणविशेष्योभयाविरहाद्विशिष्टसाध्याप्रसिद्धेरित्यर्थः । *उक्तमिति* । त्वयेति शेषः ॥

(चि०) अथ सर्गाद्यकालीनं द्व्यणुकं ज्ञानेच्छाकृतिसमानकालीनसामग्रीजन्यं कार्य्यत्वात् घटवत्, अदृष्टसामग्रीजन्यत्वेऽदृष्टत्वापत्तिरिति चेन्न । परं प्रति सर्गाद्यसिद्धेः । ज्ञानादीनां सिद्धावपि द्व्यणुकाजनकत्वात् उदासीनसिद्धावप्रयोजकत्वाच्च । एतेन सर्गाद्यकालीनं द्व्यणुकं द्व्यणुकासमवायिकारणसमकालीनकृतिजन्यमिति निरस्तम् । द्व्यणुकासमवायिकारणसमानकालीनकृतित्वेन गौरवाप्रयोजकाभ्यामजनकत्वात् ।

किञ्च कार्य्यत्वं, ? न तावत् योगोपस्थितकृत्यह-

त्वम्, असिद्धेः। नापि पूर्वकालासत्त्वे सत्युत्तरकालसम्बन्धित्वम्, तत्तत्पूर्वकालस्याननुगतत्वात् सकलपूर्वकालस्याप्रसिद्धेः। नापि कादाचित्कत्वं प्रागभावेनानैकान्तिकत्वात्। नापि प्रागभावप्रतियोगित्वं, ध्वंसेनानैकान्तिकत्वात्। नापि सत्त्वे सति तत्त्वं, सत्ताजातेः परं प्रत्यसिद्धेः, स्वरूपसत्त्वस्य च ध्वंसेऽपि सत्त्वात् ॥

(प्रका०) *अथ सर्गेति*। तथाच तत्कालेऽस्मदादिज्ञानाभावात्तदाश्रयेश्वरसिद्धिरिति भावः। न च ब्रह्माण्डान्तरवर्त्तिज्ञानादिकमादायार्थान्तरम्, तत्कालविशेषस्य सकलब्रह्माण्डसाधारणत्वेन युगपदेव तन्नाशसम्भवेन तत्र मानाभावात्। अत्र च सर्गान्तरज्ञानादिसमानकालीनकालादियत्किञ्चित्कारणजन्यत्वेन सिद्धसाधनवारणाय सामग्रीपदम्। ननु तथापि तादृशादृष्टजनकसामग्र्या अर्थान्तरमस्त्वित्यत आह *अदृष्टेति*। न ह्यदृष्टसामग्री अदृष्टप्रागभावादिघटिताऽन्यत्र जनिकेत्यर्थः। यत्त्वत्रादृष्टसामग्रीध्वंसेऽदृष्टसामग्रीजन्यस्वर्गे व्यभिचार इति। तन्न। सामग्र्या नित्यकारणघटितत्वेन ध्वंसासम्भवात्, अदृष्टसामग्र्याः स्वर्गं प्रत्यजनकत्वाच्च। अदृष्टजनकयागादेरेव स्वर्गजनकतया बोधितत्वात्। यद्यप्यदृष्टसहकृतादृष्टसामग्रीजन्यत्वेन द्व्यणुकस्य नादृष्टत्वापत्तिरिति। तदपि न। लाघवादृष्टसामग्रीजन्यत्वस्यैवादृष्टत्वप्रयोजकत्वादिति भावः। ननु मास्तु ज्ञानादीनां द्व्यणुकजनकत्वं तथापि तदाश्रयत्वेनेश्वरसिद्धिः स्यादेवेत्यत आह *उदासीनेति*। कार्यकारणभावादितर्काभावान्नोदासीनसिद्धिरिति भावः। उदासीनसिद्धावपि न त्वभिमतप्रयोजकेश्वरसिद्धिरित्यप्याहुः। *द्व्यणुकासमवायीति*। तद्द्व्यणुकासमवायीत्यर्थः। न च द्व्यणुकान्तरे व्यभिचारः। तस्य पक्षसमत्वादिति भावः।

असिद्धेरिति। परं प्रतीति शेषः। न चादृष्टद्वारा कृत्यर्हत्वं तन्मतपीति वाच्यम्। तथापि ध्वंसे व्यभिचारादिति भावः॥

(चि०) यत्तु अयं घटः एतद्घटकजनकानित्यज्ञानचिकीर्षाकृत्यतिरिक्तज्ञानादिजन्यः कार्यत्वात् पटवदित्यादि। तन्न। विपक्षे बाधकाभावेनाप्रयोजकत्वात्, अन्यथाऽयं घटः एतद्घटजनकानित्यादृष्टातिरिक्तादृष्ट-

जन्यः कार्यत्वात् अपरघटवत्(१)। एतत्(२)सुखदुःखसाक्षात्कारौ एतज्जनकानित्यसुखदुःखातिरिक्तसुखदुःखसाध्यौ सुखदुःखसाक्षात्कारत्वादित्यादिना नित्यधर्माधर्मसुखदुःखाश्रयस्यापि सिद्धिप्रसङ्गात्। अयं घटः स्वजनकानित्यज्ञानाद्यतिरिक्तज्ञानाद्यजन्यः घटत्वात् अपरघटवदित्यादिना सत्प्रतिपक्षाच्च ॥

(प्रका०) *यत्त्विति*। पक्षधर्मताबलान्नित्यज्ञानसिद्धिः। साध्ये एतत्पदमकिञ्चित्करम्। अप्रयोजकत्वमेव विशदयति *अन्यथेति* ॥

(चि०) केचित्तु–दृश्यते तावदभिमतविषयग्राहिणीन्द्रिये मनो निवेशयतः पुंसो मनःक्रियानुकूलो यत्नः, तथा च सर्गाद्यकालीनशरीरजन्यज्ञानध्वंसानाधारकालाधारज्ञानजनकात्ममनःसंयोगजनिका मनःक्रिया तन्मनोगोचरप्रयत्नानाधारतन्मनोगोचरप्रयत्नतद्व्याप्येतरसकलकारणाधारकालानन्तरकालानाधाराद्यसत्ताका तन्मनःक्रियात्वात् सम्मततन्मनःक्रियावत्, अर्थात् प्रयत्नाधारकालानन्तरकालाधारा सा क्रिया सिद्ध्यतीत्याहुः। तन्न, सर्गाद्यकाले ज्ञानजनकमनःसंयोगजनकक्रियायां मानाभावः पूर्वक्रिययैव संयोगसंभवात्। ईश्वरवादिनां तन्मनोगोचरप्रयत्नानाधारः कालोऽप्रसिद्ध एव, क्रियात्वस्यैव हेतुत्वे व्यर्थविशेषणत्वञ्च। किञ्चैवं प्रयत्नानाधारकालानन्तरकालाधारत्वम्, अर्थात् तत्सिद्धौ मानान्तरादीश्वरासिद्धावर्थान्तरत्वमिति।

(प्रका०) *दृश्यते तावदिति*। अनेनवक्ष्यमाणानुमाने साध्यप्रसिद्धिर्दर्शितेति। तथाच सर्गाद्येति। सर्गाद्यकालीनं यच्छरीरं तज्जन्यं यज्ज्ञानं तद्ध्वंसानाधारो यः कालस्तदाधारं यज्ज्ञानं तज्जनको य आत्ममनःसंयोगः तज्जनिका मनःक्रिया पक्षः। न च न्यायनये सर्गप्रलय-

---

(१) घटवदिति २ पु० पाठः। (२) एतौ सुख० २ पुं० पाठः।

योरनादित्वात् सर्गाद्यकालीनशरीरजन्यध्वंसानाधारकालाप्रसिद्धिः सर्गपदस्यैतत्सर्गपरत्वात्, तथाच सर्गाद्यकालीनज्ञानजनकात्ममनःसंयोगजनकमनःक्रियापक्षत्वे इदानीन्तनक्रियाणामस्मदादिप्रयत्नजन्यत्वाच्चांशतः सिद्धसाधनमिति भावः । न च सर्गाद्यकालीनमनःक्रियेत्येवास्त्विति वाच्यम् । सर्गाद्यकालीनत्वस्यान्यत्रापि विशेषणत्वात् । *तन्मन इति* । तन्मनोगोचरप्रयत्नानाधारः तन्मनोगोचरप्रयत्नतद्व्याप्येतरसकलतन्मनःक्रियाकारणाधारो यः कालः तदनन्तरकालानाधारा आद्यसत्ता उत्पत्तिर्यस्याः सा तथेत्यर्थः । अत्राकारणीभूततादृशप्रयत्नाधारकालानन्तरकालाधारत्वसिद्धिप्रसङ्गवारणाय तन्मनोगोचरप्रयत्नतद्व्याप्येतरसकलकारणाधारेति विशेषणम् । एवञ्च कारणीभूतस्यैव तस्य सिद्धिः । न हि भवति इतरसकलक्रियाकारणसत्त्वेपि प्रयत्नव्यतिरेकेणोत्तरक्षणे क्रिया जायते अथ च न प्रयत्नजन्येति । बाधवारणाय तन्मनोगोचरप्रयत्नानाधारेति विशेषणम् । तन्मनोगोचरप्रयत्नानाधारचरमक्षणे तदुत्पादितक्रियासत्त्वाद्बाध इत्यत आह *आद्येति । *अर्थादिति । प्रकारान्तरे बाधादित्यर्थः ।

दूषयति *तन्नेति* । तथाच पक्षासिद्धिरिति भावः । *पूर्वेति* । प्रलयकालीनक्रिययैवेत्यर्थः । इदं चोपलक्षणम्, तत्कालीनसंयोगेनापि ज्ञानसम्भवात् । पूर्वसहकारि शरीरविरहेणाजननात् । *क्रियात्वस्येति* । अत्रापि ईश्वरवादिनामित्यनुषञ्जनीयम्, तथाच तत्प्रयत्नमादाय तत्क्रियामात्रे साध्यसत्त्वाद्व्यर्थविशेषणमित्यर्थः । *किञ्चैवमिति* । अनुमितेर्व्यापकतावच्छेदकप्रकारकत्वानियमादित्यर्थः । *अर्थादिति* । अनुमानान्तरादित्यर्थः । तदनुकूलतयातूपस्यासेऽप्रातकालत्वमिति ध्येयम् ॥

(चि०) अत्रोच्यते अदृष्टाद्वारकोपादानगोचरजन्यकृत्यजन्यानि समवेतानि जन्यानि अदृष्टप्रागभावव्याप्यप्रागभावाप्रतियोग्युपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यानि स्वजनकादृष्टोत्तरोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यानि वा अपरोक्षज्ञानचिकीर्षाप्रयत्नविषयीभूतोपादानानि वा समवेतत्वे सति प्रागभावप्रतियोगित्वात् यदेवं तदेवं यथा घटः, तथा चैतानि तस्मात्तथा । उक्तपक्षे कस्यचिदनन्तर्भावेऽपि तदादाय तथैव निरुक्तस्य पक्षत्वनिर्देशे समूहालम्बनरूपैवानुमिति-

रुत्पद्यते। न च जन्यकृत्यजन्यत्वं तावत् अननुगतेष्वेकरूपाभावेन ग्रहीतुमशक्यमिति वाच्यम्। जन्यकृत्यजन्यत्वं हि जन्यकृतिजन्यान्यत्वमित्यन्यत्वेन रूपेण सामान्यलक्षणया तावतामुपस्थितेः। न च जन्यत्वविशेषणव्यावर्त्याप्रसिद्धिः, प्रमेयो घट इतिवद्व्यावर्त्तकत्वेऽपि तदुपरक्तबुद्धेरुद्देश्यत्वेन तस्योपरञ्जकत्वात्। उक्तान्यतमत्वमेव सकर्तृकत्वम्। अतएव घटभोक्ता न घटकर्त्ता इति व्यवह्रियते। एवञ्च शब्दफूत्कारादीनां पक्षतैव। ज्ञानेच्छादीनामपि पक्षत्वान्न सन्दिग्धानैकान्तिकता। उपादानस्य सिद्धत्वेऽप्युपादेयस्यासिद्धत्वात्तद्द्वत्त्वेन तत्रापि चिकीर्षा। यद्वा पक्षे हेतौ च समवेतत्वं न विशेषणं तेन ध्वंसोऽपि पक्षः। साध्ये चोपादानपदं कारणमात्रपरमुपादेयमेव। जन्येच्छाकृत्यजन्यत्वञ्च पक्षे विवक्षितं तेन कृतिध्वंसस्य कृतिजन्यत्वेऽपीच्छाजन्यत्वाभावात् पक्षत्वम्। क्षितिरेव वा पक्षः। न चाङ्कुरे सन्दिग्धानैकान्तिकत्वम् पक्षपक्षसमनैरपेक्ष्येण घटादौ निश्चितव्याप्तेर्लिङ्गस्य तयोर्दर्शनेनोभयत्रानुमित्यविरोधात्।

(प्रका०) *अदृष्टाद्वारकेति*। अत्रोपादानपदं स्वोपादानपरं, तथाच स्वोपादानगोचरजन्यकृतिजन्या घटादयः प्रसिद्धाः तदन्यत्वे सति जन्यत्वं पक्षतावच्छेदकम्। एतेनोपादानपदं यत्किञ्चिदुपादानपरं तदाऽदृष्टाद्वारकरूपाद्युपादानमृदङ्गादिगोचरास्मदादिकृतिजन्यानां शब्दादीनां पक्षता न स्यात, क्षित्याद्युपादानपरत्वेऽप्रसिद्धिरिति परास्तम्।

नन्वेवमदृष्टाद्वारकेति व्यर्थं अदृष्टद्वारककृतिमादाय प्रकृते दोषासंस्पर्शादिति चेत्।

अत्र वदन्ति। कांस्यादावौषधलेपादिजनिकया तद्गोचरास्मदादिकृत्याऽदृष्टद्वारा यच्चलनं जन्यते तस्य चेश्वरमात्रकर्तृकस्यासङ्ग्रहादिति तद्विशेषणमिति। तन्न। औषधलेपजनककृतेरदृष्टजनकत्वे मानाभावात्। औषधसंयोगद्वारैव तस्याश्चलनजनकत्वसम्भवात्। न च तत्संयोगध्वंसानन्तरमपि चलनोत्पत्तेस्तद्द्वारकत्वं नेति वाच्यम्। अ-

सिद्धेः। तथासति संयोगध्वंसस्यैव जनकत्वापत्तेश्च। न हि संयोगतद्ध्वंससमययोश्चलनोत्पत्तौ मानमस्तीति। विषचलनादौ मन्त्रपाठादिसाध्ये यद्यप्यदृष्टद्वारकत्वं सम्भवति कृतेस्तथापि न तदुपादानविषादिगोचरत्वम्, किन्तु कण्ठताल्वादिगोचरत्वमेवेति तदर्थमपि नैतद्विशेषणमिति।

अन्ये तु विष्णुप्रतियोगिकस्वात्माभेदचिन्तनजनककृतिजन्यस्वर्गस्य परमेश्वरकर्तृकस्यासङ्ग्रहः स्यादित्यदृष्टाद्वारकत्वं विशेषणं तस्य स्वोपादानगोचरमन्यकृतिजन्यत्वात्। न चैवं तज्जनकादृष्टस्येश्वरकर्तृकस्यासङ्ग्रहः स्यात्, न ह्यदृष्टजननेऽप्यदृष्टं व्यापारः कृतेरिति वाच्यम। अदृष्टाद्वारकपदस्यादृष्टप्रागभावव्याप्यप्रागभावाप्रतियोगित्वपरत्वादित्याहुः। तदपि न। अदृष्टजन्यकृतिजन्यगंगास्पर्शादेरस्मदादिकर्तृकस्य पक्षान्तर्भूतत्वापत्तेः। न चेष्टापत्तिः। अंशतः सिद्धसाधनप्रसङ्गात्। न चोद्देश्यप्रतीतेरसिद्धेर्न तथा, पक्षतावच्छेदकनानात्व एव तस्य दोषत्वादिति वाच्यम्। एवं सति समवेतजन्यमात्रस्यैव पक्षत्वापत्तौ घटादिवारकविशेषणानुपपत्तेः। तथा च प्राचीनमतेनेदम्। न च गङ्गास्पर्शस्यैवादृष्टजनकत्वं न तु जनककृतेरिति वाच्यम। एवं हि अभेदचिन्तनस्यैव स्वर्गादिजनकत्वं न तु तज्जनककृतेरिति तुल्यत्वात्।

अत्राहुः। कालीशरीरे यद्गौरं रूपमुत्पन्नं तत्कालीशरीरगोचरतपश्चरणादिकृत्या जन्यते, सा च कृतिरदृष्टद्वारिका तद्रूपोपादानकालीशरीरगोचरा चेति तद्रूपेऽव्याप्तिवारणायैतद्विशेषणमिति। न चैवमपि निदिध्यासनादेरसङ्ग्रह इति वाच्यम्। तत्र तदुपादानगोचराजन्यकृतेरेवानभ्युपगमात्, अभ्युपगमे वाऽस्मदादिकर्तृकत्वेनासङ्ग्राह्यत्वात अदृष्टाद्वारकतदुपादानगोचरकृतेरेव तत्कर्तृतानिर्वाहकत्वात्। न चादृष्टाद्वारकत्वमात्मगुणाद्वारकत्वमिति वाच्यम्। कृतिद्वारीभूतात्मगुण एवाव्याप्तेरिति। एवञ्चैतन्मतेऽभेदचिन्तनजन्यस्वर्गेऽप्यव्याप्तिवारणायैतद्विशेषणम। तज्जनकादृष्टं तु अस्मदादिकर्तृकमेवेति संक्षेपः। ध्वंसे गोत्वादौ चातिव्याप्तिवारणाय जन्यसमवेतपदे। तत्पक्षतायामंशतो बाधापत्तेरितिभावः। अदृष्टाजनकेत्युक्ते बाधः ईश्वरकृतेरप्यदृष्टजनकत्वादिति तद्वारणाय तमेवार्थं भंग्यन्तरेणाह *अदृष्टेति*। अत्र व्याप्तिश्च कालिकी।

ननूपादानपदं यत्किञ्चिदुपादानपरं प्रकृतोपादानपरं वा? नाद्यः। शब्दादीनामंशतः सिद्धसाधनात्। न च तत्र ज्ञानेच्छयोर्न कारणत्वं किन्तु कृतिमात्रस्यैव मिलितानां तेषां स्वसमवेतकार्यं प्रत्येव जनक

त्वादिति वाच्यम्। तथापि ज्ञानादिघटितं प्रत्येकं साध्यत्रयं, तथैवाग्रे ग्रन्थकृता विभावनात् । तथाच कृतिमादायांशतःसिद्धसाधनतादवस्थ्यात् । नान्त्यः । अप्रसिद्धेरिति चेत् ।

मैवम् । उपादानगोचरत्वेन यस्य ज्ञानादेर्जनकत्वं तादृशतज्जन्यत्वं साध्यम्, तेन च रूपेण स्वविषयसमवेतकार्यं प्रत्येव तस्य जनकत्वमिति नांशतः सिद्धसाधनम् । नन्वेवमदृष्टप्रागभावेत्यादिविशेषणं व्यर्थम् जन्मान्तरीयज्ञानादीनां तेन रूपेणाजनकतया सिद्धसाधनानवकाशात् इति चेत् । न । कालीरूपेऽभेदचिन्तनजन्यस्वर्गे चांशतः सिद्धसाधनवारकत्वादिति । अत्राऽदृष्टपदं स्वजनकाऽदृष्टपरम् । न चैवं क्वचित्पक्षः क्वचिद्दृष्टान्त इति पूर्वोक्ताऽननुगमस्तदवस्थ एवेति वाच्यम् । सामान्यव्याप्तिग्रहे तस्यादोषत्वात् । तस्या एव प्रकृतानुमानाङ्गत्वेनाभिमतत्वात् । द्वितीयसाध्ये स्वपदोपादानेन तथैव ग्रन्थकृत्तात्पर्याभ्ययनात् । अन्यथा स्वपदानुपादानेऽपि जनकत्वगर्भसाध्यमननुगतमेव स्यादिति । अत्र यद्यपि प्रत्यक्षेत्येवं वक्तुमुचितं घट इति वाच्ये ऽनघट इत्यप्रयोगात्, तथापि प्रत्यक्षत्वस्येन्द्रियजन्यत्वे बाधः, साक्षात्त्वजातिपरत्वे परं प्रत्यसिद्धिरित्युभयप्रसिद्धये अपरोक्षेत्युक्तम् । तदर्थस्तु लिङ्गादिकरणकज्ञानान्यज्ञानत्वमुभयसाधारणमेवेति ध्येयम् । *स्वजनकेति* । अत्र स्वजनकेत्यादिविशेषणं पूर्वोक्तकालीरूपादावंशतः सिद्धसाधनवारणाय, शब्दे च पूर्वोक्तरूपेणांशतःसिद्धसाधनवारणम् । *अपरोक्षेति* । तादृशज्ञानविषयोपादानसमवेतानीत्यर्थात् । व्यर्थलडर्थयोराविवक्षितत्वमत्रेति ध्येयम् । ननु कालीरूपेऽभेदचिन्तनजन्यस्वर्गे चांशतःसिद्धसाधनमिति चेत् । स्वजनकाऽदृष्टोत्तरापरोक्षज्ञानादिविषयोपादानसमवेतत्वस्य विवक्षितत्वात् । न चाऽदृष्टाजनकोत्तरकालीनतादृशज्ञानादिविषयत्वस्यापि सम्भवात् पुनः सिद्धसाधनमेवेति वाच्यम् । ज्ञानादेः स्वजनकत्वेनापि विवक्षणीयत्वात् । उपाधिभेदाच्च न पूर्वसाध्यावैशिष्ट्यम् । समवेतत्व इति । ध्वंसे व्यभिचारवारणाय सत्यन्तम् । गोत्वादौ व्यभिचारवारणाय प्रागभावेत्यादि । पूर्वं निदिध्यासनादेरभेदचिन्तनजन्यादृष्टस्य च स्वोपादानगोचरजन्यकृतिजन्यत्वानभ्युपगमात्, अभ्युपगमे वा अस्मदादिकर्त्तृकमेवेति न दोष इत्युक्तम् । स्वर्गजनकादृष्टस्य संप्रति तादृशजन्यकृतिजन्यत्वेनास्तु पक्षानन्तर्भूतत्वं माऽस्त्वस्मदादिकर्त्तृकत्वं तेषाम् । जन्यात्मविशेषगुणानामीश्वरमात्रकर्त्तृकत्वस्य पूर्वमुक्तत्वात्तथापि तमादाय पक्षत्वनिर्देशात् न कोऽपि दोष इत्यभिप्रेत्याह *उक्तेति* । *न च जन्यत्वेति* । दोषायेति शेषः । *तदुपरक्तेति* । उभयसिद्धप्रयोजनकत्वं तन्त्रं

न तु प्रयोजनस्योभयासिद्धिरिति भावः। ननु सकर्तृकत्वे विवादात्साध्यान्तरे क्रियमाणेऽर्थान्तरमित्यत आह *उक्तेति*। ननु कृतिजन्यत्वमेव सकर्तृकत्वं न त्वदृष्टप्रागभावादिघटितमित्यत आह *अत एवेति*। एवं हि भोजकादृष्टद्वारा भोक्तृकृतिजन्यघटे भोक्तृत्ववत् कर्तृत्वव्यवहारापत्तिरित्यर्थः।

ननु यद्युक्तान्यतमत्वमेव सकर्तृकत्वं तदा ध्वंसः सकर्तृको न स्यात्, तथा चानुमानाज्जगन्निर्माणकर्तृसिद्धिरित्यपि न स्यादित्यत आह *यद्वेति*।

ननु पक्षेऽप्युपादानपदं कारणमात्रपरं यथाश्रुतमेव वा? आद्ये शब्दादेरसङ्ग्रहापत्तिः, अन्त्ये कृतिध्वंससङ्ग्रहार्थं जन्येच्छाकृतिजन्यं विशेषणमनर्थकम्, तस्य स्वोपादानाभावेन स्वोपादानगोचरजन्यकृतिजन्यान्यत्वेनैव सङ्गृहीतत्वात्। न चोपादानमधिकरणं विवक्षितं, मृदङ्गादेश्च न शब्दाधिकरणत्वं किन्त्वधिकरणतावच्छेदकत्वमिति वाच्यम्। अधिकरणता समवायेन विवक्षिता सम्बन्धमात्रेण वा? नाद्यः। उक्तदोषात्। नान्त्यः। अवच्छेद्यावच्छेदकभावसम्बन्धेन मृदङ्गादेरपि शब्दाधिकरणत्वात्, अत एव शरीरस्यापि भोगाधिकरणत्वम्, अत एव च मृदङ्गादौ शब्द इति प्रतीतिरिति चेत्।

मैवम्। पक्षेऽप्युपादानपदं कारणमात्रपरम् अनुपादेयमेव वा, जन्येच्छेत्यत्र जन्यज्ञानेच्छेत्यर्थः। अन्यथा प्रतियोगितयेच्छाजन्ये विरोधिगुणत्वेन च जन्यकृतिजनिते इच्छाध्वंसे पक्षतावच्छेदकाव्याप्त्यापत्तेः। एवञ्च शब्दानां सङ्ग्रह एव। मिलितानां ज्ञानादीनां स्वविषये समवेतकार्यं प्रत्येव जनकत्वात्। अतएव तत्राऽस्मदादिना नांशतःसिद्धसाधनम्। न चैवमुक्तस्य साध्यस्य ध्वंसे बाध एव स्यात् तस्यासमवेतत्वात्, ज्ञानादीनां च स्वविषयसमवेतकार्यं प्रत्येव जनकत्वादिति वाच्यम्। अनित्यानामेव तेषां तथात्वावधारणात्। ध्वंसे च नित्यानामेव तेषां जन्यत्वस्य साध्यतात्पर्यावसानात्। न चैवं कुत्रापि महाक्षितिध्वंसादौ नास्मदादीनां कर्तृत्वं स्यादिति वाच्यम्। एतन्मते इष्टापत्तेः; अत एव ध्वंसमात्रस्यैवेश्वरकर्तृकत्वात् ध्वंसोऽपि पक्ष इत्येव ग्रन्थकृतोक्तं न तु ध्वंसविशेष इति दिक्।

अत्र च मते कृतिमात्रघटितं न साध्यमतो नांशतःसिद्धसाधनम्। तृतीयसाध्ये उपादानपदं कारणमात्रपरं बोध्यम्, न तु तदेवमेवेति। *पक्ष इति*। प्रतिज्ञाविषय इत्यर्थः। तयोरिति सप्तम्यन्तस्य पक्षपक्षसमयोरित्यर्थः।

(चि०) न त्वनुमित्योरन्योन्योपक्षत्वं, येनान्योन्याश्रयः स्यात्, प्रतिज्ञाया अविषयत्वात्तत्र पक्षसमव्यपदेशः। न चाङ्कुरस्य पक्षत्वेनानिर्देशात्तत्र न पक्षधर्मताज्ञानमिति वाच्यम्। सिषाधयिषाविरहसहकृतसाधकप्रमाणविरहवति(१) लिङ्गज्ञानस्यानुमितिमात्रकारणत्वात्, तच्च क्षितौ पक्षावयवेनाङ्कुरे स्वत एवेति न कश्चिद्विशेषः। यदि च क्षितौ हेतुनिश्चयदशायां हेतुमत्तयाऽङ्कुरस्य न निश्चयस्तदा क्व सन्दिग्धानैकान्तिकम्? (२)।

अथ पक्षसमे साध्याभावसामानाधिकरण्यसंशयाद्धेतौ व्याप्तिग्रह एव नोत्पद्यते उत्पन्नोऽपि वा बाध्येत इति चेत्, तर्हि महानसेऽपि धूमव्याप्तिग्रहो न स्यात् भूतोऽपि वा बाध्येत सन्दिग्धवह्निकपर्वतापर्वतधूमवतामेकधर्माभावेनायोग्यत्वात्, तस्मात्साध्यसन्देहवति हेतुनिश्चयो न दोषः किन्तु गुण एव, अन्यथाऽनुमानमात्रमुच्छिद्येत। पक्षादन्यत्र दूषणमिति यदुक्तं तत्र पक्षान्यत्वं सिषाधयिषितसाध्यान्यत्वं यदि, तदाऽनपेक्षितानुमितिर्न स्यात्। अथ सन्दिग्धसाध्यान्यत्वं साधकबाधकप्रमाणाभावविषयान्यत्वं वा विवक्षितं(३), तदाङ्कुरेऽपि तन्नास्ति। अथ प्रतिज्ञाविषयान्यत्वं, तदा स्वार्थानुमित्युच्छेदः। नियतविषयज्ञानाजन्यत्वेन पक्षविशेषणात् सर्वविषयज्ञानसिद्धिः। साध्ये च ज्ञानेच्छाप्रयत्नानां विशेषणत्वेन विशिष्टस्य साधनत्वं विवक्षितम्, तेन न तदुपलक्षितक्षेत्रज्ञेनाऽर्थान्तरम्, सामान्यतोऽपि साध्यनिर्देशे पक्षधर्मताब-

(१) प्रमाणाभाववतीति पाठान्तरम्।

(२) १ म पंक्तिमारभ्यैतदन्तश्चिन्तामणिः १९५३ पृष्ठेऽन्वितेः प्रमादादत्र मुद्रित इत्यवधेयम्।

(३) विवक्षितमिति नास्ति का०लि० मु० पुस्तके।

लेनाभिमतविशेषसिद्धेः(१)।

(प्रका०) तस्मादिति। तथाच व्यभिचारज्ञानस्य दूषकत्वम्, तथोक्तं साधारणानैकान्तिकलक्षणव्याख्यानावसरे। ननु सर्वत्र घटादेः पक्षान्तर्भूतत्वात्तदुपादानगोचरत्वेन ईश्वरज्ञानस्यासिद्धेर्न सर्वविषयत्वसिद्धिरित्यत आह *नियतेति*। उपादानगोचरेति विशेषणान्नाश्रयासिद्धिः। तृतीयकोटेरभावादनियतविषयज्ञानजन्यत्वसिद्धिरित्यर्थः। एतच्चोपनीतिभानवादिमते।

ननु साध्यगतेनोपादानपदेन क्षित्याद्युपादानमेव न विवक्षितं किन्तु घटाद्युपादानमपि, तथाच घटाद्युपादानगोचरज्ञानादीनां क्षित्याद्यजनकत्वेऽपि तदुपलक्षितास्मदादेर्जनकत्वसम्भवादर्थान्तरम्, न च तेषां न सर्वविषयत्वम्, अनादौ संसारे योगिनस्तादृशज्ञानादेरपि सम्भवादित्यत आह *साध्ये चेति*। साधनत्वं जनकत्वम्।

(चि०) नन्वाद्यसाध्यद्वये घटाद्युपादानगोचरापरोक्षज्ञानचिकीर्षाकृतीनामेव जनकत्वमायात्वित्यर्थान्तरम्। न च तेषां व्यभिचारात् क्षित्यादावकारणत्वमिति वाच्यम्। अनादौ प्रवाहे कस्यचित् कदाचित् क्षितिद्व्यणुकादिपूर्वं घटाद्युपादानगोचरज्ञानादिसत्त्वात्। न च सर्गाद्यकालीनस्यापि पक्षत्वात्तत्रेश्वरसिद्धिः, परं प्रति तदसिद्धेरिति चेत् न।

ज्ञानादीनां त्रयाणां स्वविषयसमवेतकार्यं प्रत्येव जनकत्वावधारणेनैतदनुमानस्य तदविषयत्वात्। अत एवान्योपादानगोचरापरोक्षज्ञानाद्यजन्यत्वेन पक्षविशेषणमपि न युक्तम्। तृतीयसाध्ये तु नार्थान्तरं क्षित्यादेर्घटाद्युपादानासमवेतत्वात्।

ननु सामान्यलक्षणादिप्रत्यासत्त्या क्षित्याद्युपादानगोचरं यत्प्रत्यक्षं तज्जन्यत्वमेवास्तु, तथाचेश्वरे न प्रत्यक्षं नवेच्छाप्रयत्नौ तयोः समानाधिकरणज्ञानाविषयेऽसत्त्वात्। न च तादृशप्रत्यासत्त्यजन्यत्वं प्रत्यक्षे विशेषणं, परं

(१) सिद्धिश्चेति पाठान्तरम्।

प्रत्यसिद्धेरिति चेन्न ।

द्रव्यत्वेन ज्ञानलक्षणया वा कपालगोचरप्रत्यक्षेऽपि घटादावकर्तृत्वात् क्षित्यादौ सकर्तृत्वनिर्वाहकं ज्ञानं सिध्यत्तद्विलक्षणमेव सिध्यति । न चावयवविभागद्वारा क्षित्यादिषु जलक्षेपात् समुद्रादिषु हस्तक्षेपात् परमाणुद्वयसंयोगे च द्व्यणुकेष्वस्मदादिकर्तृकत्वादंशतः सिद्धसाधनमिति वाच्यम् । तत्र हि क्षितिनाशे अस्मदादीनां कर्तृत्वं न खण्डक्षितौ, अवस्थितसंयोगेभ्य एव तदुपपत्तेः सकलतदुपादानगोचरज्ञानेच्छाकृतीनामभावाच्च । अत एव द्व्यणुकेऽपि न कर्तृत्वं, जलक्षेपादधिकपरिमाणसमुद्रादेः सपक्षत्वमेव घटस्येव ।

(प्रका०) *नन्विति* । ननूपादानगोचरत्वेन जनकत्वस्य पूर्वं विवक्षणात् घटोपादानगोचरस्य तथात्वान्नेयं शङ्केति चेन्न । तेनैव रूपेण जनकत्वमत्राप्यायातु इत्यर्थान्तरापादनसम्भवात् । न च तेषामसर्वविषयत्वान्न तैरर्थान्तरमिति वाच्यम् । व्यापकतावच्छेदकप्रकारनैयत्यमनुमितौ यन्मते तत्र सर्वविषयत्वसिद्ध्यर्थमग्रे प्रकारान्तरमेव भविष्यतीति तन्मतेनैतत्सम्भवात् । *ज्ञानादीनामिति* । अस्मदादिज्ञानादीनामदृष्टाद्वारकारणमिति शेषः । *अतएवेति* । बाधेन तत्सिद्धिप्रसङ्गाभावादित्यर्थः ।

द्रव्यत्वेनेति । प्रत्यासत्त्येति शेषः *तद्विलक्षणमिति* । तथाच सामान्यज्ञानप्रत्यासत्तिजन्यप्रत्यक्षयोः स्वरूपायोग्यत्वात् तज्जन्यत्वेन नार्थान्तरम् । न च योगिप्रत्यक्षमादाय दोषः । तादृशनानायोगिकल्पने गौरवादेकस्यैव सिद्धेरिति भावः । *कर्त्तृत्वमिति* । एतच्च न यन्मते ज्ञानादीनां स्वविषयसमवेतकार्यं प्रत्येव जनकत्वं तन्मतेनेति ध्येयम् । *अत एवेति* । द्व्यणुकोपादानपरमाणुगोचरप्रत्यक्षादेरभावादित्यर्थः । *सपक्षत्वमेवेति* । तत्र प्रक्षिप्तजलबिन्दुसमुद्रयोरेवावयवत्वेनोपादानगोचरज्ञानादिसम्भवादस्मदादिकर्त्तृत्वमित्यर्थः ।

(चि०)ननु घटे साध्यविकलत्वम् अन्वयव्यतिरेकाभ्यां ज्ञानादेरेव जनकत्वात् न तु तदाश्रयस्य धर्मिग्राहकस्यान्वयव्यतिरेकस्य वा, ग्राहकस्याभावात् । न च घट

आत्मजन्य उत्पत्तिमत्त्वात् ज्ञानवदिति वाच्यम्। आत्मसमवेतत्वस्योपाधित्वात्, घट आकाशजन्य उत्पत्तिमत्त्वात् शब्दवदितिवत् अप्रयोजकत्वाच्चेति चेत्।

मैवम्। प्रयत्नवदात्मसंयोगश्चेष्टाद्वारा घटहेतुरतः प्रयत्नवदात्मापि हेतुः। न चात्मसंयोगे सत्यपि प्रयत्नं विना न चेष्टेति प्रयत्न एव तत्कारणम्, असमवायिकारणं विना कार्य्यानुत्पत्तेः। न चात्मसंयोगस्य कारणत्वेऽपि संयोगपरिचायकमात्रमात्मेति वाच्यम्। संयोगमात्रस्याकारणत्वेन संयोगिविशेषितस्य हेतुत्वात्। आत्मसंयोगव्यतिरेकप्रयुक्तक्रियाव्यतिरेकस्यासिद्धेर्नात्मसंयोगः कारणमिति चेन्न। या क्रिया व्यधिकरणपदीयगुणजन्या सा तत्संयोगासमवायिकारणिका यथा स्पर्शवद्द्रव्यसंयोगजक्रियेति तत्सिद्धेः। न च क्रियाया मूर्त्तमात्रसमवेतासमवायिकारणत्वानियम इति वाच्यम्। कार्य्यमात्राभिप्रायेण ज्ञानादौ व्यभिचारात् विशिष्याऽप्रयोजकत्वात् असमवायिकारणसंयोगाश्रयस्य तत्कार्य्यजनकत्वनियमाच्च।

(प्रका०) *नन्विति*। तथाच घटादौ व्यभिचारोऽपीति भावः। *आत्मेति*। आत्मवृत्तित्वस्येत्यर्थः। यद्वा समवेतत्वपक्षधर्मावच्छिन्नसाध्यव्यापकोऽयमुपाधिरिति न ज्ञानध्वंसादौ साध्याव्यापकत्वम्। *हेतुत्वादिति* विशेषणत्वे बाधकं विना उपलक्षणत्वस्यायुक्तत्वादिति भावः। *आत्मेति*। तथा चात्मसंयोगस्य क्रियायामेव न हेतुत्वं कुतस्तद्वारा घटेऽपीत्यर्थः। *क्रियेति*। कपालरूपजन्यघटरूपे व्यभिचारादाह क्रियेति। स्पन्द इत्यर्थः। गुरुत्वजन्यपतनक्रियायां वेगजनितक्रियायां च व्यभिचारादाह *व्यधिकरणेति*। नन्वाम्रादिपतने व्यभिचारः, स्वव्यधिकरणस्वाश्रयावयवाम्रादिजन्यत्वात् स्वाश्रयावयवसंयोगाजन्यत्वाच्चेत्यत आह गुणेति। अत्र गुणजन्यत्वं गुणव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वम्, तेनेश्वरज्ञानादिजन्यत्वेऽपि क्रियायां नेश्वरसंयोगोऽसमवायिकारणमिति व्यभिचारो न भवतीति। युक्तेस्तौल्यात्त-

स्याप्यसमवायिकारणत्वमित्यप्याहुः। एतेन मन्त्रपाठजन्यविषचलने व्यभिचारो निरस्तः, इष्टापत्तेः । अदृष्टाद्वारकत्वेन विशेषणाद्वा मन्त्रस्याशुविनाशित्वेनादृष्टद्वारकत्वात् । ननु तुलायामेकदिगवस्थिताधिकगुरुजन्यापरदिगवस्थितोन्नमनक्रियायां व्यभिचार इति चेत् । न, तत्राधिकगुरुत्वाश्रयद्रव्यसंयुक्तसंयोगस्योन्नमनहेतुत्वात् पङ्कादौ तस्य तद्धेतुत्वकल्पनात् । न चैवं व्यधिकरणपदं व्यर्थम्, वेगादिजन्यक्रियायां तथापि व्यभिचारात् । न चादृष्टवदात्मसंयोगस्यैवं कारणता न स्यादिति वाच्यम् ! व्याप्त्यन्तरेणापि तत्सम्भवात् । तथाचानुपदमेव वक्ष्यामः । नन्वेवमपि क्रियायामात्मकारणत्वसिद्धावपि घटे न तत्सिद्धिः, तथा च साध्यवैकल्यं तदवस्थमेवेति चेत्, । न । मूर्त्तवृत्तियत्कार्यं यदीयगुणनिमित्तकारणकं तत्तत्समानाधिकरणसंयोगजन्यमिति व्याप्त्या तत्सिद्धेः । यदि च व्यभिचारशङ्का, तदाऽत्र विशेषणान्तरमपि प्रवेश्यम् । न चात्र विपक्षबाधकाभावः । अप्रत्यासन्नस्य जनकत्वेऽतिप्रसङ्गात् , पूर्वव्याप्तावपि तदेव विपक्षबाधकमिति संक्षेपः ।

विशिष्येति । क्रियाया इत्यत्र क्रियापदेन कर्ममात्राभिधान इत्यर्थः । *असमवायीति* प्रकृताभिप्रायेण, कारणसंयोगाश्रयस्येत्यत्र तात्पर्यम् ।

(चि०) अन्ये तु अनुकूलकृतिसमवायित्वं कर्तृत्वं न तु जनकत्वे सति, गौरवात् । कर्त्तरि कारकव्यवहारश्चाभियुक्तानां "सविशेषण" इति न्यायेन कृतिपर्यवसन्न एव । एवं ज्ञानेच्छाकृतिजन्यत्वमेव साध्यं तदाश्रयत्वमेवेश्वरस्य कर्तृत्वम् ।

अथ घटे कृतिसाध्येष्टसाधनताज्ञानं चिकीर्षाद्वारा हेतुः , तच्च न प्रत्यक्षं चिकीर्षाविषयेऽनागते इन्द्रियासामर्थ्यात्,(१) किन्तु अनुमितिरूपं, तथा च साध्यविकलो दृष्टान्तः साध्याप्रसिद्धिर्वेति चेन्न ।

सिद्धवृत्त्यसिद्धविषया हि कृतिः सिद्धविषयप्रत्यक्षे सति संभवति, न हि मृदवयवानां संस्थानविशेषे कृतिसाध्येष्टसाधनतानुमितावप्यवयवस्य प्रत्यक्षेणोपस्थि-

(१) सन्निकर्षादिति पाठान्तरम् ।

तिं विना प्रवृत्तिः, अतएव यागे शब्दाच्छब्दादुपजीविलिङ्गाद्वा कृतिसाध्येष्टसाधनत्वेऽवगतेऽपि हविरादीनां प्रत्यक्षेणानुपस्थितौ न प्रवृत्तिः। स चोपादानप्रत्यक्षं प्रवर्त्तकज्ञानोपक्षीणम्। अप्रत्यक्षपरमाणौ तत्क्रियायामिष्टसाधनताज्ञानेऽप्यप्रवृत्तेः। प्रवृत्तिविषयस्य मृदङ्गादेः प्रत्यक्षत्वान्न शब्दफूत्कारादिना व्यभिचारः। न चाभिमतग्राहकेन्द्रियसंयोगान्मनसिप्रयत्नजन्यक्रियाप्रदर्शनाच्च व्यभिचारः, अदृष्टसहकृतत्वगिन्द्रियेण हि मनोवहनाडीनामुपलम्भेन तद्गोचरप्रयत्नान्नाडीक्रिया ततः स्पर्शवद्वेगवन्नाड्या नोदनान्मनसि क्रिया न तु प्रयत्नात्। अतएव जलाद्यभ्यवहारमलोत्सर्गहेतुनाडीनामनाद्यभ्यासवासनावशाददृष्टसहकृतत्वगिन्द्रियेणोपलम्भात् तद्गोचरः प्रयत्नः।

नन्वेवं घटादावनुमितेर्जन्यत्वदर्शनादीश्वरेऽनुमितिरपि सिद्ध्येत्, यथा च प्रत्यक्षस्येन्द्रियजन्यत्वेऽपि नित्यं तदीश्वरे तथानुमितेर्नित्यं जन्यत्वेऽपि सा तत्र नित्यैव अनित्येनानादिद्व्यणुकाद्यजननादिति चेन्न। सुखदुःखाभावादिसाधनानुमिते तर्हि घटादौ हेतुत्वं गृहीतं, न च तावता शरीरादृष्टाभावेन सुखमस्यतो न क्षित्यादौ तस्यानुमितिर्यथार्था सम्भवति। न च तादृशानुमितेरनुमित्यन्तरस्य वाऽनुमितित्वेन घटादौ प्रवृत्तिविषयप्रत्यक्षवद्धेतुत्वं गृहीतमतो नेश्वरेऽनुमितिः।

ननु द्वेषजन्यकृतिसाध्ये चिकीर्षाविरहाद् व्यभिचारः तद्दृष्टान्तेन क्षित्यादौ द्वेषसाध्यत्वादीश्वरे द्वेषोऽपि स्यात् द्वेषवतः संसारित्वेन भगवतोऽपि तथा त्वापत्तिरिति चेन्न। न हि सर्पादिद्वेषादेव तन्नाशानुकूलव्यापारे कृतिरुत्पत्तुमर्हति, प्रयोजनं विना। दुःखैकफले प्रेक्षावतां

कृतेरनुपपत्तेः, किन्तु दुःखसाधनध्वंसं तत्साध्यदुःखानुत्पादं वा फलमुद्दिश्य तत्साधनताज्ञानात्, तथा चेष्टसाधनताज्ञानात्तत्रेच्छाऽस्त्येवेति सैव कृतिकारणं क्लृप्तत्वात्, द्वेषस्तु परम्परया तदुपक्षीणः। कुतस्तर्हि द्वेषसिद्धिः? शत्रुं द्वेष्मीति अबाधितप्रत्ययात्। न चादृश्यस्य कर्तुरनुपलब्धिबाधः, अनुपलब्धिमात्रस्य बाधकत्वेऽतीन्द्रियोच्छेदात् योग्यानुपलब्धेश्चासिद्धेः परात्मनोऽयोग्यत्वनियमात्, शशशृङ्गप्रतिबन्द्या च नादृश्यमात्रनिरासः, परमाण्वादिस्वीकारात्। नाप्ययोग्यकर्तृकनिरासः, चेष्टया ज्ञानादिमतः परात्मनोऽनुमानात् परं प्रति तस्यायोग्यत्वात्। नापि शृङ्गे पशुत्ववदप्रयोजकम्, कर्तुः कार्यमात्रे कारणत्वावधारणात् प्रतिबन्दिमात्रस्यादूषणत्वात्। शशे पशुत्वेनायोग्यशृङ्गासिद्धिः कुतो नेति चेत्, न अर्थान्तरत्वात् विपक्षे बाधकाभावात्(१) व्याप्त्यसिद्धेः शृङ्गत्वस्य योग्यसंस्थानविशेषव्यङ्ग्यत्वेनायोग्यस्य विरोधेन शङ्कितुमशक्यत्वात्, शशे शृङ्गस्यात्यन्ताभाव इति सर्वेषामबाधितप्रत्यक्षबाधितत्वाच्च। अथ कृतिकार्यत्वयोर्नान्वयव्यतिरेकाभ्यां व्याप्तिग्रहः त्वन्मते व्यापककृतेः सत्त्वे तद्देशे समये वा कृतिमात्रव्यतिरेकानिरूपणात्। नित्यकृतेरन्वयोऽपि न गृहीतो वह्निमात्रव्यतिरेकोऽस्ति गृह्यते च। न चैवमाकाशात्मनोरप्यसिद्धिः समवायिमात्रस्य व्यतिरेकानिरूपणेन कार्यं समवायिकारणजन्यमिति व्याप्तेरसिद्धेरिति वाच्यम्। समवायिकारणत्वग्रहे हि तत्संसर्गाभावोऽप्रयोजको निमित्तमात्रसाधारणत्वात्, किन्तु यत्समवायि तत्र कार्यं

(१) बाधकाभावेनेति पाठान्तरम्।

यत्र समवायि तत्र नेत्यन्योन्याभावमादाय कार्यं समवायिजन्यमिति व्याप्तिग्रहसम्भवात्, समवायित्वेन तयोरन्योन्याभावोऽस्ति गृह्यते च ।

(प्रका०) विशेष्ये बाधे सत्येव "सविशेषणे ही" ति न्यायावतार इत्यपरितोषं हृदि निधायाह—*अन्ये त्विति* । कृतीत्युपलक्षणं ज्ञानेच्छेत्यपि द्रष्टव्यम् , अत एवानुपदं तथैव विभावयिष्यति । *साध्याप्रसिद्धिर्वेति* । यद्युक्तदोषभिया दृष्टान्तस्त्याज्यस्तदा प्रकृतसाध्याप्रसिद्धिरेव दोष इत्यर्थः । ननूपादानप्रत्यक्षं विनापि शब्दार्थिप्रवृत्तेर्व्यभिचार इत्यत आह–प्रवृत्तिविषयस्येति । न ह्युपादानप्रत्यक्षत्वेन कारणत्वं ब्रूमः किन्तु प्रवृत्तिविषयप्रत्यक्षत्वेन, प्रवृत्तिविषयश्च न गगनादि किन्तु मृदङ्गादिकमेव तच्चास्मदादिप्रत्यक्षमेवेति न व्यभिचार इत्यर्थः । अत्र वायवीयशरीरप्रत्यक्षाभावेन तद्गोचरप्रयत्नाभावात्तत्र कथं चेष्टेति चिन्त्यम् । *अदृष्टेति* । न चादृष्टवदात्मसंयोगादेव तत्र क्रियोत्पत्तिरस्तु किं प्रयत्नेनेति वाच्यम् । स्वतन्त्रान्वयव्यतिरेकानुविधायित्वादिति भावः । *न च भगवतीति*(१) । न चायथार्थैव साऽस्त्विति वाच्यम् । विशेषदर्शनवत ईश्वरस्य तदसम्भवादिति भावः । ननु स्वसुखादिसाधनतानुमितित्वेन न कारणत्वं किन्तु स्वेष्टसाधनतानुमितित्वेन, तत्र बाधः विश्वस्येश्वरेच्छाविषयत्वादित्यपरितोषादाह–*नचेति* । तथापि तादृशानुमितित्वेन न कारणत्वं किन्तु तादृशज्ञानत्वेन, तादृशं च तत्प्रत्यक्षमेव भवतीति पक्षमधर्मताबलात्तदनुमितावपि प्रत्यक्षजन्यत्वमेव सिद्ध्यतीति भावः । रागवतः–इच्छावतः । *द्वेषस्त्विति* । दुःखे तत्साधने वा यतो द्वेष उत्पद्यते ततस्तदभाव इच्छा भवति न त्वन्यथा द्वेषाविषयघटाद्यभाव इच्छाविरहात् , तथा च दुःखादिद्वेषो दुःखाभाव इच्छामुत्पादयति ततः कृतिरितीच्छायामेव तदुपक्षय इत्यर्थः । इदं च प्रवृत्तिप्रयत्नमभिप्रेत्य–निवृत्तिप्रयत्ने तु द्वेषजन्यत्वमेव समानविषयत्वेन लाघवेन प्रवृत्तिं प्रत्येव चिकीर्षाया हेतुत्वात् , निवृत्तौ तु समानविषयतया द्वेष एव हेतुर्न भिन्नविषयचिकीर्षा । न च प्रवृत्तिविरह एव निवृत्तिः, वैपरीत्यापत्तेः, तदुक्तं कुसुमाञ्जलौ–'प्रवृत्तिप्रयत्नो रागान्निवृत्तिस्तु द्वेषादिति' । न चैवं कथं व्यभिचारोद्धारः निवृत्तेः क्रियाविरहहेतुत्वेन प्रवृत्तिसाध्यतानियमेन कार्या-

(१) अत्र मूले तावतेति कलिकातापुस्तकस्थपाठो मुद्रितः किन्तु भगवतीत्येव टीकाकारसंमतो बोध्यः ।

णां चिकीर्षाजन्यत्वस्वीकारात्। नन्वेवं कुत इत्यादिग्रन्थः कथं इत्थं कारणान्तरमेव निवृत्तेः कल्प्यतामित्याक्षेपे शत्रुं द्वेष्मीत्यनुव्यवसाय-साक्षिकं तत्र ततोऽन्यत्कारणं न कल्प्यमिति परिहार इत्येतदभिप्रायकत्वादिति।

वस्तुतस्तु प्रवृत्तिविरह एव निवृत्तिः। न च वैपरीत्यं, सुषुप्तिदशायामपि निवृत्तिविरहस्य सत्त्वेन प्रवृत्तिकार्यचेष्टादिकार्यापत्तेः। न च तदा निवृत्तिरेवास्तीति वाच्यम्। तत्कारणद्वेषाभावे तदभावात्। द्वेषाभावश्च तत्कारणदुःखसाधनत्वज्ञानाभावात्। तथा च प्राचीनमते ग्रन्थकर्त्तुरनुशयप्रकाश एवायमिति मन्तव्यम्। एवञ्च यथाश्रुत एवाग्रिमग्रन्थः सुकर इति।

यत्र तु धूमवन्ह्यादौ व्याप्तिग्रहः सिद्धस्तत्र साध्यसामान्यव्यतिरेकग्रहोऽस्त्येवेति न व्याप्तिग्रहस्तद्व्यभिचारीति दर्शयति *वह्निमात्रेति* *समवायिमात्रस्येति*। आकाशात्मादेरपि व्यापकस्य समवायित्वाभ्युपगमादिति भावः।

(चि०) यद्वा भावकार्य्यं समवेतमिति व्याप्त्या तयोः सिद्धिरिति, यथा हि यत्रवह्नेरन्वये धूमो गृहीतस्तत्तद्व्यतिरेके धूममात्रव्यतिरेकग्रहात् वह्निधूममात्रयोर्व्याप्तेर्ग्रहः न तु पर्वतीयवह्नेः रन्वयव्यतिरेकग्रहात्। न चान्यान्वयव्यतिरेकाभ्यामन्यव्याप्तिग्रहेऽतिप्रसङ्ग इति वाच्यम्। यद्विशेषयोरन्वयव्यतिरेकग्रहः तत्सामान्ययोर्बाधकं विना व्याप्तिग्रहात्, स च वह्निधूमव्याप्तिग्रहे उत्पद्यमानः सकलधूमगोचरो धूमत्वपुरस्कारेण प्रसिद्धधूमगोचर एव वा भवति, तथेहापि कृतिविशेषकार्य्यविशेषयोरन्वयव्यतिरेकग्रहो बाधकं विना कृतिकार्य्यत्वमात्रयोर्व्याप्तिग्रहे उपायः, न तु पक्षधर्मताबललभ्यविशेषान्वयव्यतिरेकग्रहः अनुमानमात्रोच्छेदप्रसङ्गात्। एतेन—

कार्य्यत्वस्य विपक्षवृत्तिहतये सम्भाव्यतेऽतीन्द्रियः
कर्त्ता चेद्व्यतिरेकसिद्धिविधुरा व्याप्तिः कथं सिद्ध्यति।
दृश्योऽथ व्यतिरेकसिद्धिमनसा कर्त्ता समाश्रीयते

तस्यागोऽपि तदा तृणादिकमिति व्यक्तं विपक्षेक्षणम् ॥

इति निरस्तम् । ननु यदि कर्तृमात्रव्यतिरेकग्रहादहश्यकर्तृसिद्धिस्तदा वह्निमात्रव्याप्तधूमाददृश्यजाठरीयवह्निसिद्धिरपि स्यात् । न स्यात्, अदृश्यवह्नेर्धूमानुत्पत्तेः दृश्यस्यैव तत्र हेतुत्वात् ।

ननु ज्ञानेच्छाप्रयत्नत्रयव्यतिरेकान्न कार्यव्यतिरेकः किन्तु एकैकव्यतिरेकात् तथा च व्यर्थविशेषणत्वेन विशिष्टव्यतिरेको न हेतुव्यतिरेकव्याप्य इति न हेतोर्विशिष्टसिद्धिः साध्याभावव्यापकाभावप्रतियोगिन एव साध्यगमकत्वादिति चेन्न । यत एकैकव्यतिरेकात् कार्यव्यतिरेकोऽत एव कार्यत्वादेरेकैकं सिध्यत्त्रयमपि सिध्यति, आर्थस्तु समाजः ।

(प्रका०) ननु द्रव्यस्य गुणकारणत्ववत्समवायिकारणत्वं विशिष्टं न ग्राह्यं किन्तु समवायित्वसमानाधिकरणकारणमेव तत् , तथा चोभयग्राहकसमाजादुभयग्रहे आर्थः समाज इत्यपरितोषादाह *यद्वेति* । *बाधकं विनेति* । सामान्येन रूपेण व्यभिचारज्ञानाभावे सति ततो व्याप्तिग्रह इति भावः । सकलधूमगोचर इति स्वमते, प्रसिद्धधूमगोचर इति परमते, तत्र सामान्यलक्षणानङ्गीकारादिति ध्येयम् ।

कार्यत्वस्येति । कार्यत्वस्य हेतोर्विपक्षवृत्तित्वनिवृत्तये सर्वत्र तृणादौ कार्येऽतीन्द्रियः कर्ता चेत्स्वीक्रियते तदा क्वापि तद्व्यतिरेकनिश्चयो नेति तद्विधुर्यात्कथं व्याप्तिर्ज्ञायेत, अथ तद्व्यतिरेकासिद्ध्यर्थितया दृश्य एव कर्ता चेत्स्वीक्रियते तदा तद्विरहेऽपि तृणादौ कार्यत्वमस्तीति तत्रैव विपक्षे तस्य व्यक्तमीक्षणमित्यर्थः । दृश्यस्य--योग्यस्य, तथा चाविन्धनवह्नेर्दृश्यमानधूमोत्पत्तिः समर्थिता तस्यापि योग्यत्वादिति भावः । *व्यर्थविशेषणत्वेनेति* । अखण्डाभावानभ्युपगन्तृमतेनेदम् । *साध्याभावेति* । केवलान्वयी नास्त्येवेति भावः । अत्र केवलान्वयिव्यवस्थापनाद्व्यतिरेकव्याप्तिग्रहविरहेऽप्यन्वयव्याप्तिसत्तामात्रेणानुमित्यविरोधेन चान्वयव्याप्तावेव व्यर्थविशेषणत्वान्न विशिष्टव्यापकत्वग्रहः विशिष्टस्य कारणत्वेन विपक्षबाधकसम्भवात् , अन्यथा इन्धनविशिष्टवह्नावपि धूमव्यापकत्वं न गृह्येत । न च तत्र वह्निमात्राद्धूमानुत्पत्तेर्विशिष्टं

कारणतावच्छेदकं प्रकृते चात्मत्वमेव लाघवादिति वाच्यम्। अन्यात्मनि ज्ञानादौ सत्यपि आत्मनः कार्यस्य पटादेरुत्पत्तिप्रसङ्गभयेन ज्ञानादेरवश्यं कारणतावच्छेदकत्वात्। न च तेषामपि कारणत्वान्न कारणतावच्छेदकत्वमवच्छेदकत्वे न करणत्वं दण्डत्ववदिति वाच्यम्। उक्तहेतोरवच्छेदकत्वेऽपि ज्ञानाद्युत्कर्षदर्शनेन कार्योत्कर्षदर्शनात्तेषामपि कारणत्वात्, अत एवालोकरूपस्यावच्छेदकत्वेऽपि व्यञ्जकत्वमिति सिद्धान्त इति यद्यपि तथाप्यभ्युपेत्याह-*यत इति*।

अन्ये तु साध्ये व्यर्थविशेषणता हेतुसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वाभावस्य गुरुण्यपि साध्यतावच्छेदके सुग्रहत्वात्। अवच्छेदकतायां हि भवति गौरवं दोषो यथा हेतुनिष्ठनीलधूमत्वादौ। साध्यनिष्ठधर्मे त्ववच्छेदकत्वं ग्राह्यमत्र न, किन्तूक्तप्रतियोगितावच्छेदकत्वाभावः, स च गुरुण्यपि सुग्रह एव, अन्यथा तादृशधर्मस्योक्तप्रतियोगितानवच्छेदकत्वस्य केनापि प्रमाणेनाग्रहे प्रतियोगितावच्छेदकत्वमेव सिद्धं स्यादित्याशङ्क्यान्योन्याभावगर्भव्याप्तौ साध्यवत्त्वावच्छेदेन साधनसमानाधिकरणान्योन्याभावाप्रतियोगित्वस्य ग्राह्यतया तत्र कल्पे व्यर्थं विशेषणत्वमेव नीलधूमत्ववदवच्छेदककोटिप्रवेशादित्याहुः।

(चि०) स्यादेतत् अशरीरसर्वज्ञनित्यज्ञानादिमान् कर्त्ता पक्षे विवक्षितः घटादौ च कार्यत्वस्य तद्विपरीतकर्तृसहचारादिदर्शनाद्विशेषविरुद्धत्वमिति चेत्। न। हेतोर्विवक्षितसाध्यविपरीतसहचारमात्रस्यादूषकत्वात्, अन्यथानुमानमात्रोच्छेदप्रसङ्गात्। न चानित्यज्ञानासर्वज्ञशरीरिकर्तृत्वेन समं कार्यत्वस्य व्याप्तिरस्ति येन तद्विपरीतसाधने विरुद्धत्वं स्यात्, तादृशव्याप्तिश्च त्वया मया वा नाङ्गीक्रियते अङ्कुरादौ योग्यानुपलम्भेन शरीरिकर्तृत्वाभावात्। अथ यथादर्शनबलप्रवृत्तव्याप्त्याऽनित्यज्ञानादिमान् कर्त्तोपनेयः पक्षधर्मतया च नित्यज्ञानादिमान्, तथा चोपनेयविशेषयोर्विरोधेन व्याप्तिपक्षधर्म्मतयोर्विरोधात् परस्परसहकारिताविरहान्नानुमानं विशेषविरोधादिति चेन्न। अनित्यज्ञानादिकर्तृजन्यत्वेन व्याप्त्यभा-

त्वात् ज्ञानादिमत्कर्तृजन्यत्वव्याप्तेः पक्षधर्मताबलेभ्यः विशेषाविरोधात् केवलाया व्याप्तेश्च पक्षधर्मतायाश्च पृथगुपनायकत्वाभावाच्च एकवैयर्थ्यप्रसङ्गाच्च। तथा च निरपेक्षतादशायां विशेषानुपस्थापनादेव न विरोधज्ञानम् सापेक्षतादशायाश्च सहोपलम्भादेव विरोधप्रतियोगिनोः सिद्ध्यसिद्धिभ्यां विरोधभावज्ञानाभावाच्च। लिङ्गविशेषेण साध्यविशेषेण च विरोधे च विशेषविरोधः, यथा चन्दनप्रभववह्निमानयं सुरभिधूमवत्त्वादिति। ननु ज्ञानत्वानित्यत्वयोः कर्तृत्वाशरीरित्वयोश्च परस्परविरुद्धत्वेन एकधर्म्यसमावेशात् कथं नित्यज्ञानादिकर्तृसिद्धिरिति चेत्, न उपसंहारस्थानस्याभावात्। तथाहीश्वरे तद्बुद्धौ च शरीरित्वकर्तृत्वे बुद्धित्वनित्यत्वे च उपसंह्रियमाणे विरुद्धे न तु स्वाश्रयस्थिते उभयोच्छेदप्रसङ्गात्। न चेश्वरस्तद्बुद्धिर्वोपस्थिता, उपस्थितौ वा धर्मिग्राहकमानेन तयोर्विरोधापहारात्, अनुपस्थिते च तद्द्वये विरोधज्ञानमकिञ्चित्करमेव अस्मदादिबुद्धौ व्योमादौ कुविन्दे मुक्तात्मनि च उपस्थिते विरोधोपसंहारात्। बुद्धित्वनित्यत्वयोः कर्तृत्वाशरीरित्वयोरनधिगमेऽपि ईश्वरेऽशरीरिकर्तृत्वनित्यज्ञानादिसिद्धिरप्रत्यूहैव। अत एव नित्यत्वावयवत्वयोर्विरोधज्ञानमकिञ्चित्करमेवेति परमाणुसिद्धिः। ईश्वरतद्बुद्ध्यादिकं तर्कितमिति चेन्न। तर्कस्य प्रसञ्जनस्य संशयस्य चाऽज्ञातेऽसम्भवात्।

(प्रका०) *योग्येति*। शरीराभावस्य योग्यानुपलम्भेन ग्रहे विशिष्टाभावस्यानुमानादित्यर्थः। क्व तर्हि विशेषविरोधो दूषणमित्यपेक्षायामाह *लिङ्गेति*। *उपसंहारेति*। यद्यपि घटत्वपटत्वयोरपि विरोधो न स्यात्तथापि तदुभयाश्रयैकसाधकमानाभावात्तद्वान्न सिध्यति प्रकृते च न तद्भावः अत एव यत्र तत्साधकमानं तत्र विरोधभा-

नमकिञ्चित्करमित्याह *अत एवेति* । *साक्षात्साधनत्वमिति । तथा-
च कृतेर्न हस्तादिव्यापारो द्वारमिति भावः ।

(चि०) स्यादेतत् घटादौ कृतिसाध्यता हस्तादिव्या-
पारादिद्वारैव न तु साक्षात्। न च पितापुत्रयोरेकघटसा-
धनत्वमिव प्रयत्नहस्तादिव्यापारयोः साक्षात् साधकत्वं
वाच्यमिति वाच्यम्। घटार्थं हस्तव्यापारादिना व्याप्रिय-
माणकुलालसमीपदेशस्थस्य हस्तादिव्यापारशून्यस्य त-
द्घटकर्तृत्वापत्तेः । न च हस्तादिव्यापारवत्ताऽशरीरस्य
सम्भवति । अन्यादृशी च कृतिसाध्यता न दृष्टा, शरीर-
तद्व्यापारौ चाङ्कुरे बाधिताविति कर्त्तुरपि बाध एव, अन्य-
था तदनुमानात् क्षेत्रज्ञ एव कर्त्ता अनुमीयेत बुद्ध्यादिम-
त्परात्मनो योग्यानुपलब्धिबाधाभावात्। शरीरव्यापा-
रद्वारैव क्षेत्रज्ञस्य हेतुत्वात् शरीरव्यापारस्य चाङ्कुरे
बाधात् बाधित इति चेत् । तर्हि कर्तृमात्रस्यापि तद्द्वारैव
चेष्टेतरकार्ये कर्तृत्वदर्शनात् तद्बाधे कर्तृमात्रबाधो-
ऽपि । एवञ्च कृतिसाध्यत्वे शरीरव्यापारजन्यत्वं प्रयो-
जकमिति स एवोपाधिः । एवं ज्ञानेच्छयोरपीच्छा-
कृतिद्वारा जनकत्वमिति कथं द्वारं विना क्षित्यादौ
जनकत्वमिति ।

(प्रका०) *तद्द्वारैवेति* । यद्यपि सर्गाद्यकालीनं घटादिकं प्रति
शरीराधिष्ठातुरीश्वरस्य न बाधस्तथापि परेण तदनङ्गीकारादिति भा-
वः । *चेष्टेतरेति* । यदि चाभेदचिन्तनादावप्यस्मदादिकर्तृकत्वं तदा
तदितरेत्यपि बोध्यम् । तत्रापि चेष्टाभावादिति । *एवञ्चेति* । चेष्टे-
तरकार्ये, इदं बोध्यम् *द्वारं विनेति* । द्वारत्वस्य जन्यत्वगर्भत्वा
दिति भावः ।

(चि०) उच्यते । जन्यमात्रे हस्तादिव्यापारजनककृ-
तित्वेन न जनकत्वं चेष्टायां क्षित्यादौ च व्यभिचारात्,
किन्तु घटादौ तथा जनकत्वमिति जन्यमात्रे कृतिमा-

अस्य जनकत्वविरोधिविशेषयोर्जन्यजनकभावे बाधकं विना सामान्ययोरपि तथाभावनियमात्। न हि विशेषे विशेषप्रयोजकत्वेन सामान्ये सामान्यप्रयोजकत्वविरोधः। चेष्टेतरकार्ये शरीरव्यापारद्वारैव कृतेर्हेतुत्वात् तेन विना क्षित्यादौ न कृतिसाध्यत्वमिति चेत्। न, चेष्टेतरकार्यमात्रे शरीरव्यापारजनककृतित्वेन न जनकत्वं क्षित्यादौ व्यभिचारात्, किन्तु तद्विशेषघटादौ इत्युक्तत्वात्। न चैवमामवातजडीकृतकलेवरस्य प्रयत्नादेव घटोत्पत्तिः स्यात् हस्तादिव्यापारं विनैव कृतेर्हेतुत्वादिति वाच्यम्। घटे कृतिवत् हस्तादिव्यापारस्यापि हेतुत्वात्। यदुक्तं–'क्षेत्रज्ञ एव कुतो नानुमीयत' इति। तत्र हस्तादिव्यापारककृतिमान् यदि क्षेत्रज्ञोऽभिमतः तदा हस्तादिव्यापारस्याङ्कुरे योग्यानुपलब्धिबाधात्। अथ हस्तादिव्यापाररहितकृतिमानभिमतस्तदोमित्युच्यते स एव भगवानीश्वरः। अत एव 'सहभावनिरूपकत्वे नियतपूर्ववर्त्तित्वं कारणत्वं समवाय्यसमवायिनोस्तथात्वेन निमित्तेऽपि तथा भावात्। अन्यथा प्रतिबन्धकाभावानन्तरं प्रतिबन्धकसत्त्वकाले कार्यं स्यात् प्रतिबन्धकाभावस्य पूर्वं सत्त्वात्, न च कृतेः सहभावनिरूपकत्वं स्वतः, कार्यसमयेऽभावात्, तथा च तत्परिचायितव्यापारद्वारा तस्याः सहभावनिरूपकत्वमतः शरीरव्यापारद्वारैव कृतेर्जनकत्वं न केवलाया' इत्यपास्तम्। समवाय्यसमवायिप्रतिबन्धकाभावानामविनश्यदवस्थत्वेन कारणत्वात् तथैवान्वयव्यतिरेकात्। तेन तेषामभावे विनाशक्षणे च न कार्यम्, अन्यथा प्रतिव्यक्ति कार्यसहभावनिरूपणे कार्योत्पत्तेः प्राक् सहभावस्य निरूप-

यितुमशक्यत्वात् कारणत्वानिश्चयेन क्वापि प्रवृत्तिर्न स्यादिति । तज्जातीयत्वस्यावश्यवाच्यत्वे विनश्यदवस्थं कथं सहभावेनापि व्यवच्छेद्यम्, अतः स्वरूपयोग्यतारूपा कारणता तत्रापि । कार्याभावस्तु सहकारिविरहात्, अन्यथा निमित्तानां प्रत्येकं कार्यसहभावानिरूपकत्वेन जनकत्वे गौरवम्, प्रागभावस्य प्रतियोग्यजनकत्वप्रसङ्गाच्च । अन्यथा उत्पन्नोपि पुनरुत्पद्येत सामग्रीसत्त्वात् । न च स एव तत्र प्रतिबन्धकः, अभावान्तरस्य तत्राकारणत्वेन कारणीभूताभावप्रतियोगित्वरूपस्य प्रतिबन्धकत्वस्य प्रागभावकारणत्व एव विश्रामात् । न चैका सामग्री एकदा एकमेव कार्यं जनयति स्वभावादिति वाच्यम् । सामग्रीतद्विरहस्य कार्यतदभावप्रयोजकत्वेन सामग्र्यां सत्यां कार्यस्य, तदभावे कार्याभावस्य वज्रलेपायितत्वात् ।

(प्रका०) प्रत्युतानूकूल्यमित्याह *विशेषयोरिति । अन्यथेति* । प्रतिबन्धकाभावस्य निमित्तत्वादिति भावः । प्रतिबन्धकाभावस्य-प्रतिबन्धकप्रागभावस्य । *अन्वयव्यतिरेकादिति* । अन्यथा निराश्रयं रूपाद्युत्पद्येतेति भावः । तत्रापि-विनश्यदवस्थेपि । *गौरवमिति* । एतच्च वस्तुगतिमनुरुध्योक्तम् । वस्तुतः सहभावगर्भेऽपि हेतुत्वे यत्र सहभावो न स्वतस्तत्रास्तु हस्तादिव्यापारद्वारा प्रकृते तु नित्यकृतेः स्वत एव तत्सहभाव इति किं तदपेक्षयेति बोध्यम् । इष्टापत्तिमाशङ्क्य प्रागभावहेतुत्वं साधयति *अन्यथेति । विश्रामादिति* । एतेन-प्रतियोगिप्रतिबन्धकत्वाभ्युपगमेन सर्वत्र प्रतिबन्धकाभावेपि न कार्यसहभूतत्वेन हेतुत्वं किन्तु यत्र तथान्वयाद्यनुविधानं तत्रैव तथेति-विभावितम् । अत एव सिद्धेः प्रतिबन्धकत्वेपि तद्विरहरूपायाः पक्षतायाः न तथा कारणत्वमिति । *एकदेति* । एकामिति सम्पातायातं एकदैव जनयतीत्येव प्रकृतसङ्गतेरिति ।

(चि०) स्यादेतत् कर्त्ता, शरीर्य्येव ज्ञानमनित्यमेव बुद्धिरिच्छाद्वारैव कृतिर्द्वारैवेच्छा हेतुरित्यादिप्राथमिकव्याप्तिप्रत्यक्षविरोधात् नाशरीरानित्यज्ञानादिकर्तृसिद्धिः ।

अत एव शरीरमनित्यमेवेति नियमान्न कर्तृत्वेन नित्यातीन्द्रियशरीरसिद्धिरीश्वरे । न चाप्रयोजकत्वम् , निरुपाधित्वेन शङ्काकलङ्कानवतारात् । कार्यत्वसकर्तृकत्वयोर्यदि निरुपाधिकत्वमस्ति तदापि तुल्यबलत्वेन सत्प्रतिपक्षात् तत्प्रतिबन्धो(१)ऽस्तु । न च कार्यत्वं पक्षधर्मतासत्त्वाद्बलीयः कर्त्ता शरीर्येवेत्यादौ तन्नास्तीति वाच्यम् । ज्ञानमनित्यमेवेति व्याप्तेरेव क्षित्यादौ ज्ञानजन्यत्वविरोधित्वात् । एवं कार्यं ज्ञानजन्यं ज्ञानमनित्यमेवेत्यनयोर्विरोध एव, अविरोधे तु द्वयमपि स्यात्, तथा च क्षित्यादौ शरीर्यनित्यज्ञानपर्यवसाने विरोध एव स्यात(२) । किञ्च ज्ञानमनित्यमेवेत्यादौ नित्यज्ञानादेरप्रसिद्धेः तद्व्यावर्त्तकतया नोपाधित्वनिश्चयस्तत्संशयो वा, कार्यत्वसकर्तृकत्वव्याप्तिग्रहदशायां शरीरव्यापाराव्यभिचारात् उपाधेर्निश्चयः संशयो वास्तीति ।

तन्न । ज्ञानमनित्यमेवेत्यादिव्याप्तेरसिद्धेः, विपक्षबाधकाभावेनाप्रयोजकत्वात् । निरुपाधिसहचारदर्शनव्यभिचारादर्शनादेव व्याप्तिग्रहः निरुपाधित्वमेव वा विपक्षे बाधकमिति चेन्न । अवयवी महानेव तेज उद्भूतरूपमेवेत्यादि व्याप्तिग्रहात् परमाणुनेत्रादेरसिद्धिप्रसङ्गात् । अथ द्रव्यचाक्षुषत्वेऽनेकद्रव्यवत्त्वस्य, साक्षात्कारे विषयेन्द्रियसन्निकर्षस्य हेतुत्वात् तन्मूलकविपक्षबाधकेन परमाण्वादिसाधकस्य बलवत्त्वात् परमाण्वादिसिद्धौ विरोधिव्याप्तिबाधः, न तु वैपरीत्यं विपक्षे बाधकाभावेन तस्याबलवत्त्वादिति मन्यसे, तर्हि ज्ञानादिकार्यकारणभावावधारणात् तन्मूलकविपक्षबाधकेन निष्कलङ्कव्या-

(१) पक्षवत्प्रतिरोध इति पाठान्तरम् ।

(२) बाध एवेति पाठान्तरम् ।

प्तिग्रहात् पक्षधर्म्मताग्रहसहितान्नित्यज्ञानादिसिद्धौ व्यभिचारान्न व्याप्तिः । अन्यथा साध्यं पक्षातिरिक्त एवेत्यादिनिरुपाधिसहचाराद्व्याप्तिग्रहे सकलानुमानोच्छेदः ।

(प्रका०) *बुद्धिरिति । कर्तृत्वनिर्वाहकं हेतुत्वं बुद्धेरिच्छाद्वारैवेति भावः । *सत्प्रतिपक्षवदिति* । एतेन सत्प्रतिपक्षच्छाययैवास्या व्याप्तेः प्रतिबन्धकत्वे हेत्वाभासान्तरत्वशङ्का नेति दर्शितम् । *बलीय इति* । तथाच न सत्प्रतिपक्षत्वं तुल्यबलत्वाभावादिति भावः । *विरोधित्वादिति* । तथाच पक्षधर्मताविनाकृताया अपि तस्या विरोधित्वात्तुल्यबलत्वमस्त्येवेति भावः । *किञ्चेति* । ज्ञानमनित्यमेवेति व्याप्तौ संसारिज्ञानत्वनित्यज्ञानान्यज्ञानत्वादिकमुपाधिर्वाच्यः, स चेश्वरनित्यज्ञानयोर्व्यावर्त्ययोरभावान्न सम्भवतीत्यर्थ इत्याहुः । वयं तु ज्ञानमनित्यमेवेति व्याप्तावनित्यत्वरूपसाध्यव्यापकस्योपाधेर्ज्ञानत्वरूपसाधनाव्यापकत्वं नास्मदादिज्ञाने ग्राह्यं तत्रोपाधिसद्भावादेव अनित्यत्वस्य तद्व्याप्यस्यास्मदादिज्ञानेपि सत्त्वात्, अन्यथा साध्याव्यापकतयैवानुपाधितापत्तेः, तथाच नित्यज्ञाने साधनाव्यापकत्वं ग्राह्यम् । तच्च न सम्भवति तदसिद्धेः, अत एवाह तद्व्यावर्त्तकतयेति । तत्र ज्ञानत्वरूपसाधनाव्यापकतया य उपाधिस्तन्निश्चयस्तत्संशयो वा नास्तीत्यर्थ इति विभावयामः । उपाधेरिति । शरीरव्यापारजन्यत्वरूपस्येत्यर्थः ।

(चि०) वयन्तु ब्रूमः । पक्षधर्म्मताबलान्नित्यं ज्ञानं सिध्यत् बुद्धिरनित्यैवेति व्याप्तिप्रत्यक्षेण न प्रतिबध्यतेऽस्मदादिबुद्धिविषयकत्वेन भिन्नविषयकत्वात् एकविषयविरोधिज्ञानस्यैव प्रतिबन्धकत्वात् नित्यत्वानित्यत्वयोरेकजातीये द्रव्येऽविरोधात् । बुद्धिमात्रेऽनित्यत्वावगमात् कथं तद्विशेषे नित्यत्वबुद्धिरिति चेन्न । बुद्धिमात्रस्येश्वरानीश्वरबुद्धिपरत्वे विरोधात् व्यभिचाराच्च । अस्मदादिबुद्धिपरत्वे च भिन्नविषयत्वेनाप्रतिबन्धकत्वात् । बुद्धित्वं नित्यावृत्त्येवेत्यवगतमतस्तत्र कथं नित्यवृत्तित्वावगम इति चेन्न । उभयसिद्धनित्यावृत्तित्वावगमेऽप्यतिरिक्तनित्यवृत्तित्वावगतौ विरोधा-

भावात् । बुद्धित्वमनित्यत्वव्याप्यमवगतं नाऽनित्यत्वाभाववति ज्ञातव्यमिति चेत् । न । अनित्यत्वव्याप्यमनित्यमात्रवृत्तित्वं तत्र चोक्तमेव । एतेन 'कर्त्ता शरीर्य्येवेत्याद्यपि ज्ञानं प्रतिबन्धकमिति' निरस्तम् ।

ननु कर्तृजन्यत्वे जन्यत्वं नावच्छेदकं, किन्तु घटत्वादिकमेव तेनैव रूपेणान्वयव्यतिरेकग्रहात् आवश्यकत्वाच्च, अननुगतमपि जन्यतावच्छेदकं वह्निजन्यतायां धूमत्वादिवत् । अथ घटत्वादिवज्जन्यत्वमवच्छेदकं न हि विशेषोऽस्तीति सामान्यमप्रयोजकम्, तथा च वह्निजन्यत्वे धूमविशेषः प्रयोज्योऽस्तीति न धूमसामान्यमग्निं गमयेत्, तस्माद्यद्विशेषयोः कार्य्यकारणभावः तत्सामान्ययोरपि बाधकं विना तथात्वनियम इति चेत् । न,तत्र बाधकाभावात् अत्र च ज्ञानमनित्यमेवेत्यादिप्राथमिकबहुव्याप्तौ बाधात्, तुल्यत्वे वा व्याप्तिसंशयाधायकत्वात् । न च कार्य्यकारणभावमूलकत्वेन कार्य्यत्वव्याप्तिर्बलीयसीति वाच्यम् । विरोधिप्रत्यक्षेण कार्यकारणभावस्यैवासिद्धेः । एतेन 'धूमादौ वह्निजन्यतावच्छेदकमनुगतं न सम्भवति इह तु जन्यत्वमनुगतमस्त्यतो बाधकं विना न मुच्यते इति' निरस्तम् । ज्ञानमनित्यमेवेत्यादिसहचारावसायस्य बाधकं विना पक्षधर्म्मव्याप्तिपर्य्यवसायितत्वेन बाधकत्वादिति ।

नैवम् । निरुपाधित्वेन सहचारावसायस्य साधकं बाधकं च विना साधारण्येन व्याप्तिसंशयाधायकत्वात् । अन्यथा साध्यं पक्षातिरिक्त एव सुखं दुःखसम्भिन्नमेवेत्यादिव्याप्तिग्रहस्य कार्य्यकारणभावग्राहकबाधकत्वे तत्संशयाधायकत्वे वा कारणानुमानोच्छेदे निरीहं जगज्जा-

येत । तस्माद्यद्विशेषयोः कार्य्यकारणभावस्तत्सामान्ययोः कार्य्यकारणभावो बलवता बाधकेनापनीयते, न चात्र तदस्ति, विरोधिव्याप्तिसाधकस्य विपक्षबाधकस्याभावात् ।

(प्रका०) ननु यथा ज्ञानादिकार्ययोः कार्यकारणभावस्तत्र विपक्षबाधकस्तथाऽत्रापि निरुपाधित्वस्य व्यवस्थापितत्वात्तदेव विपक्षे बाधकमस्त्वित्यपरितोषं हृदि निधायाह *व्याप्तिरिति* । यद्यपि ज्ञानत्वावच्छिन्ने सर्वत्रैवानित्यत्वावगमात्तदवच्छिन्ने न नित्यत्वावगमः अन्यथा बाधोऽपि प्रतिबन्धको न स्यात् । तथापि सामान्यलक्षणानङ्गीकर्त्तुस्तादृशं ज्ञानमेव न भवति, भिन्नविषयकं च ज्ञानं न प्रतिबन्धकं, क्वचिन्नास्तीति ज्ञानानन्तरं क्वचिदस्तीति ज्ञानस्यानुभवसिद्धत्वात् अस्मन्मते तु विपक्षबाधकाभावेन तादृशव्याप्तेरेवासिद्धिः । न चैवं बाधोऽपि प्रतिबन्धको न स्याद्भिन्नविषयत्वादिति वाच्यम । सामान्यलक्षणानङ्गीकर्त्तुरिदमनिष्टं नास्माकमित्याशयात् । सामान्यरूपेण कार्यकारणभावे सत्युक्तरूपं ज्ञानमप्रामाण्यशंकास्कन्दितमिति न प्रतिबन्धकमित्यपि वदन्ति । *व्याप्तीति* । व्याप्तौ पर्य्यवसायितयेत्यर्थः ।

(चि०) नव्यास्तु कार्य्यं कर्त्तृजन्यमिति व्याप्तितोऽशरीरनित्यज्ञानकर्त्तुपस्थितौ ज्ञानमनित्यमेवेत्यनेन विरोधप्रतिसन्धानं न तु तां विना, प्रतियोग्यनुपस्थितौ विरोधानिरूपणात्, तथा चोपजीव्यबाधात् ज्ञानमनित्यमेवेति व्याप्तिज्ञानमकिञ्चित्करमेव । अत एव पक्षधर्मताविनाकृतं विरोधिव्याप्तिज्ञानं न हेत्वाभासमयोक्तं विरोधप्रतियोगिसिद्ध्यसिद्धिपराहतत्वादिति ।

(प्रका०) *नव्यास्त्विति* । ज्ञानमनित्यमेव कार्यं ज्ञानजन्यमेवेत्यनयोः स्वरूपतो विरोधाभावात् द्वितीयव्याप्त्या पक्षधर्मतासहितया नित्यज्ञानोपस्थापने सति स स्यात्तथा च विरोधज्ञानमकिञ्चित्करम् उपजीव्यविरोधादित्यर्थः । अत्रेदमनभिमतिबीजम् ज्ञानमनित्यमेवेत्यनेन ज्ञानत्वावच्छेदेनापि नित्यत्वावगमात्पक्षधर्मताबलादपि न ज्ञाने नित्यत्वग्रहः नित्यत्वानित्यत्वयोर्विरोधस्य पूर्वावधारित्वादिति परस्याभिमतं न

तु नित्यानित्यज्ञानयोर्विरोधप्रतिसन्धानं प्रतिबन्धकत्वेनाभिमतं येनो पजीव्यविरोधः स्यात्, तथा च पूर्वोक्तसमाधानमेवात्र द्रष्टव्यम्।

(चि०) स्यादेतत् अस्तु शरीरजन्यत्वमुपाधिः । न च पक्षेतरत्ववत्पक्षमात्रव्यावर्त्तकविशेषणवत्त्वात् साधनविशेषितत्वात् साधनतुल्ययोगक्षेमत्वेन साध्यव्यापकत्वानिश्चयाच्च नोपाधित्वं, चेष्टेतरकार्येषु शरीरव्यापारद्वारैव कर्त्तुः कारणत्वात् शरीरसहकृतस्यैव स्वकार्ये कारणत्वाच्च । न हि शरीरविनाकृतः कर्त्ता शरीरक्रियां घटादिकं वा जनयति । न च यत्सहकृतं यज्जनकम् तेन विना तज्जनकम् अतोऽर्थाच्छरीरजन्यमेव कर्त्तृजन्यमिति साध्यव्यापकत्वनिश्चयात् । पक्षेतरत्वादौ च विपक्षबाधकाभावान्न साध्यव्यापकतानिश्चय इति तेषामनुपाधित्वे बीजम्। अत एव बाधोन्नीतं वह्नीतरत्वं वह्निमत्त्वेन धूमवत्त्वे साध्ये आर्द्रेन्धनप्रभववह्निमत्त्वं, रसवत्त्वेन गन्धवत्त्वे साध्ये पृथिवीत्वमुपाधिः विपक्षबाधकैस्तेषां साध्यव्यापकत्वनिश्चयात्। न च साधनविशेषितत्वमपि,जन्यत्वं हि प्रागभावप्रतियोगित्वं, शरीरजन्यत्वञ्च शरीरकारणवत्त्वम्, अन्यानिरुक्तेः इतरपदसमभिव्याहारेण जन्यपदादितरकारणकस्यैव प्रतीतेस्तदर्थकत्वकल्पनादिति विधो वक्ष्यते। अत एव शारीरिकर्तृकत्वमुपाधिः शरीरसहकृतस्यैव कर्त्तुः कारणत्वात् व्याप्यं व्यापककोटावनिवेशयत एव प्रमाणस्य व्याप्तिग्राहकत्वात् । शारीरिकर्तृकत्वसकर्तृकत्वयोर्न व्याप्तिग्रह इति चेन्न । विशिष्टाविशिष्टभेदेन व्याप्यव्यापकभावाविरोधात् । अत एव जन्यत्वेन कारणजन्यत्वमनुमीयत इति ।

(प्रका०) *साधनेति* । यद्यपि समवेतत्वघटितं साधनं, तच्च

न विशेषितं, तथापि ध्वंससाधारणपक्षत्वे जन्यत्वमात्रस्यैव साधनत्वमिति तदभिप्रायेणेदम् साधनाविशेषितवत्साधनैकदेशाविशेषितोऽपि नोपाधिरित्यभिप्रायेण वेदं बोध्यम् । आर्द्रेन्धनेति । इदं च पक्षमात्रव्यावर्त्तकविशेषणस्य साधनविशेषितस्य चोदाहरणं बोध्यम् । *व्याप्यमिति* । अभेदे व्याप्तिरूपसम्बन्धाग्रहादिति भावः । *विशिष्टेति* । तथाच सम्बन्धितावच्छेदकभेदग्रहात्सम्बन्धग्रहो नानुपपन्नः नीलघटयोरभेदसंबन्धग्रहवदिति भावः । *कारणजन्यत्वमिति* । यद्यपि पदान्तरसमभिव्याहृतजन्यत्वस्य तत्कारणकत्वार्थत्वेन नात्र व्याप्यस्य व्यापककोटिप्रवेशस्तथापि कारणजन्यत्वं कारणप्रागभावव्यापकप्रागभावप्रतियोगित्वं प्रागभावप्रतियोगित्वमात्रं जन्यत्वं विवक्षितम् । शरीरजन्यत्वोपाधौ तु शरीरकारणकत्वमेव विवक्षितम्, तेन तस्य पूर्वोक्तसाधनाविशेषितत्वोद्धारो नासङ्गत इति भावः ।

(चि०) मैवम् । कर्तुर्हि शरीरसहकारिता किं घटादौ कर्त्तव्ये कार्यमात्रे वा स्वकार्ये वा ? आद्ये कर्त्ता शरीरं विना घटादिकं न करोतीति किमायातं कर्त्तुः कार्यमात्रकरणे ? द्वितीये च कार्यमात्रं कर्तृजन्यमिति न त्वया स्वीक्रियते, स्वीकारे वा शरीराजन्यमपि कार्यं कर्तृजन्यमिति साध्याव्यापकत्वम् । तृतीये तु स्वजन्यत्वं न स्वजन्यतावच्छेदकमात्माश्रयात् । तथापि यत्र कर्तृत्वमस्ति तत्र शरीरजन्यत्वमावश्यकमिति तस्य साध्यव्यापकत्वम्, तुल्ययोगक्षेमत्वेन हेतुव्याप्यतासंशयाधायकत्वेन सन्दिग्धोपाधित्वं वेति चेन्न । लाघवेन बाधकं विना कर्तृजन्यत्वे सति जन्यत्वमवच्छेदकं न तु शरीजन्यत्वं गौरवात्, तथा च शरीरजन्यत्वं न सकर्तृकत्वव्यापकम् । घटादौ त्वाधः समाजः, घटत्वेन शरीरजन्यत्वनियमात् न तु व्यापकत्वप्रयुक्तः मानाभावात् । शरीरजन्यत्वं न सकर्तृकत्वव्यापकं तद्व्याप्यजलत्वाव्यापकत्वात् नित्यत्ववदिति बाधकात् हस्तादिनापि कर्तृत्वनिर्वाहेण शरीरस्याप्रयोजकत्वात् साक्षात्-

प्रयत्नाधिष्ठेयजन्यत्वस्य साधनव्यापकत्वाच्च । शरीर-कर्तृकत्वमपि नोपाधिः जन्यमात्रे कर्तुः शरीरसहकारिताविरहात् ।

(प्रका०) ननु स्वजन्यत्वं न स्वजन्यतावच्छेदकमुक्तं किन्तु शरीरं स्वजन्ये सहकारीति, तथा च स्वजन्यत्वं शरीरजन्यतावच्छेदकम्, एवञ्च शरीरजन्यत्वस्य कर्तृजन्यत्वव्यापकत्वात्तद्व्याप्यत्वेन जन्यत्वस्यैव सकर्तृकत्वाव्याप्यत्वमनुमेयमित्यपरितोषादाह *हस्तादिनापीति । साधनेति* । परमाण्वादीनामपीश्वरप्रयत्नाधिष्ठितत्वेन तज्जन्यत्वस्य पक्षे सम्भवादिति भावः । न च चेष्टाजन्यत्वमुपाधिः, चेष्टायामेव साध्याव्यापकत्वात् । न च चेष्टाश्रयजन्यत्वं तथा, अदृष्टद्वारा क्षित्यादेरपि तज्जन्यत्वात् । यद्यप्यदृष्टाजनकचेष्टाश्रयजन्यत्वोपाधौ नोक्तदोषस्तथापि विपक्षबाधकतर्काभावान्नास्य साध्यव्यापकत्वमिति भावः ।

(चि०) अथ यद्विशेषयोः कार्यकारणभावस्तत्सामान्ययोरपि बाधकं विना तथा नियम इति त्वया निरटङ्कि, तथा च कर्तृविशेषशरीरजन्यविशेषयोः कार्यकारणभावनियमात् कर्तृमात्रशरीरजन्यमात्रयोरपि तथाभावः, तथा च शरीरजन्यत्वं कर्तृतावच्छेदकमिति भवत्युपाधिः । नचैवं घटवच्छरीरजन्यत्वं सकर्तृकत्वव्याप्यं न तु व्यापकमपीति वाच्यम् । उभयसिद्धसकलसकर्तृत्ववृत्तित्वेन साध्यव्यापकतानिर्णयात् । जन्यत्वेऽपि सकर्तृकत्वव्याप्यत्वग्राहकमस्तीति चेत्तर्हि उभयत्र ग्राहकसाम्ये विनिगमकाभावात् व्याप्तिसंशयाधायकत्वेन सन्दिग्धोपाधिर्व्याप्यत्वासिद्धिर्वा । हेतुव्याप्यतासंशयाधायक एव सन्दिग्धोपाधिः, स च साध्यव्यापकत्वे साधनाव्यापकत्वे वा, उभयत्र वा सन्देहात् । न चैवं शरीरजन्यत्वसकर्तृकत्वयोरन्वयव्यतिरेकज्ञाने जन्यत्वसकर्तृकत्वयोस्तद्ग्रह आवश्यक इति लाघवात् तयोरेव व्याप्तिग्रहो न तूपाधिसाध्ययोः, हेतुसाध्ययोरन्वयव्यति-

रेकज्ञानञ्च शरीरजन्यत्वानवगमेऽपि भवतीति विनिगमकमिति। यतो न कर्तृमात्रजन्यमात्रयोरन्वयव्यतिरेकाभ्यां व्याप्तिग्रहः कर्तृमात्रस्य व्यतिरेकाभावात् । किन्तु विशेषयोरन्वयव्यतिरेकेण कार्यकारणभावेन वा सामान्ययोस्तथात्वग्रहस्तौ च तुल्यावेवेति चेत् ।

उच्यते । अस्तु तावत् घटत्ववत् जन्यत्वशरीरजन्यत्वयोरपि कर्तृजन्यतावच्छेदकत्वेन सकर्तृकत्वव्याप्यत्वं ग्राहकसमानत्वात् विनिगमनाभावाद्विरोधाभावाच्च, सकर्तृकत्वव्यापकत्वन्तु शरीरजन्यत्वस्य कुतः ? घटत्ववदव्यापकस्यापि जन्यतावच्छेदकत्वात् । उभयसिद्धसकर्तृकेऽन्वयव्यतिरेकाभ्यां शरीरजन्यत्वस्य व्यापकत्वग्रह इति चेन्न । शरीरजन्यत्वविनिवेश्यत्वेन तुल्यन्यायेन च प्रथमं कर्तृजन्यत्वे जन्यत्वमवच्छेदकं क्लृप्तमिति तद्विरोधेन शरीरजन्यत्वस्य सकर्तृकत्वव्यापकत्वानवगमात् । अतएव न सन्दिग्धोपाधित्वम् ।

(प्रका०) उक्तोपाध्यभिप्रायेणैव साध्यव्यापकताग्राहकं शङ्कते *अथेति* *शरीरेति* चेष्टाश्रयेत्यर्थः । *शरीरजन्यत्वेति* ।

ननु शरीरजन्यत्वं शरीरकारणकत्वमुक्तम् , अन्यथा साधनविशेषितापत्तेः, तथा च कथं तद्ग्रहे जन्यत्वग्रह आवश्यक इति चेत् ।

अत्र केचित् । शरीरजन्यत्वस्य गुरुत्वाल्लाघवाच्च तस्य व्यापकत्वग्रहस्तावदेव कर्तृजन्यत्वे जन्यत्वमवच्छेदकीकृत्य गृहीतमुपस्थितलाघवादित्याहुः ।

अन्ये तु सकर्तृकत्वग्रहः प्रथममवश्यं वाच्यः, अन्यथा शरीरजन्यत्वस्य तद्व्यापकत्वासिद्धेस्तत्र चावच्छेदकग्रहः प्राथमिक इत्यवच्छेदकं लाघवाज्जन्यत्वमेव न त्वन्यदित्यभिप्रायकोऽयं ग्रन्थ इत्याहुः ।

उक्तास्वरसेनैव वाऽऽह तुल्यन्यायेति । *तद्विरोधेनेति* नहि सम्भवति शरीरजन्यत्वं सकर्तृकत्वव्याप्यजन्यत्वाव्यापकं सकर्तृकत्वव्यापकं चेति भावः । *अत एवेति* । सकर्तृकत्वव्याप्यजन्यत्वाव्यापकत्वेन शरीरजन्यत्वस्य सकर्तृकत्वाव्यापकतया ऽनुपाधित्वनिर्णयादित्यर्थः ।

(चि०) ननु घटादौ शरीरजन्यत्वे 'कर्तृजन्यत्वमनुगतमवच्छेदकं बाधकाभावात् । न च लाघवाद्घटत्वादिकमेव तथा, कर्तृजन्यत्वेऽपि जन्यत्वस्यातथात्वापत्तेः । एवं शरीरजन्यत्वस्य व्याप्यं सकर्तृकत्वं वह्नेर्धूम इवेति भवत्युपाधिः । किञ्च कर्तृजन्यत्वे जन्यत्वं शरीरजन्यत्वे वा सकर्तृकत्वमवच्छेदकमिति संशयेऽपि न हेतोः साध्यव्याप्यतानिश्चय इति चेत् , तर्हि घटादौ कर्तृजन्यत्वे गृहीते तस्य शरीरजन्यतावच्छेदकत्वं ग्रहीतव्यम् घटं च घटत्ववज्जन्यत्वमपि बाधकं विना कर्तृजन्यतावच्छेदकं गृहीतमतो जन्यमात्रे कर्तृजन्यत्वान्न शरीरजन्यत्वे तदवच्छेदकत्वं प्रथमगृहीतोपजीव्यविरोधात् । अतएव न तस्य हेतौ व्याप्तिसंशयाधायकत्वमपि । एतेनानणुत्वक्षित्यवयववृत्त्यन्यत्वादय उपाधित्वेन निरस्ताः, जन्यत्वस्य साध्यव्याप्यत्वेन तेषां साध्याव्यापकत्वात् । तथापि क्षित्यादिकं न कर्तृजन्यं शरीराजन्यत्वात् गगनवदिति सत्प्रतिपक्षोऽस्त्विति चेत् । न ।

अस्य प्रसिद्धकर्तृजन्यत्वाभावविषयकत्वात् अप्रतीतप्रतियोगिकस्याभावस्य निरूपयितुमशक्यत्वात्, स्थापनानुमानञ्च पक्षधर्मताबलात् प्रसिद्धकर्तृभिन्नकर्तृकत्वसाधकमतो भिन्नविषयकत्वान्न प्रतिबध्यप्रतिबन्धकभावः । अत एव तद्व्यापकराहितत्वादिकमभावसाधकं बाधकमपास्तम् , तस्य प्रसिद्धाभावविषयकत्वेनाप्रसिद्धाभावाविषयकत्वात् । व्याप्तिसाधकस्य च विशेषतोऽप्रसिद्धव्याप्तिसाधकत्वानियमात् , अन्यथानुमानवैयर्थ्यात् । कर्तृजन्यत्वमनुगतं घटादौ प्रसिद्धं यत् साध्यं तदभावो मया साध्यत इति चेत् , कर्तृजन्यत्वमनुगतमपि पक्षध-

र्मताबलेन प्रसिद्धं कर्त्तारमादाय पर्य्यवस्यति, तदभावस्तु प्रसिद्धस्य कर्तुरभावमादाय सिध्यति नाप्रसिद्धस्य, अनुगतस्यापि कर्तृजन्यत्वस्य तदभावस्य च कर्तृव्यक्तिघटितत्वात्, अन्यथा व्यक्तितदभावासिद्धिप्रसङ्गात् । नचैवं सत्प्रतिपक्षोच्छेदः, तस्य गोत्वाद्येकभावाभावसाधकविषयत्वात् ।

(प्रका०) *कर्तृजन्यत्वेपीति* । यद्विशेषयोरित्यादिन्यायस्य ग्राहकस्योभयत्र तुल्यत्वादिति भावः । *एवं शरीरेति* । जन्यतावच्छेदकत्वाद्घटत्वाद्यवच्छेदेनैव कर्तृजन्यत्वं गृहीतं शरीरजन्यतावच्छेदकत्वेन गृह्यताम् । अत एव नोपजीव्यविरोधः । न च हस्तादिजन्ये व्यभिचारान्न शरीरजन्यतावच्छेदकं कर्तृजन्यत्वमिति वाच्यम् । शरीरपदस्य पूर्वोक्तचेष्टाश्रयपरत्वात् । न च शरीरजन्यत्वावच्छेदकमेव घटत्वादिकमस्तु कर्तृजन्यतावच्छेदकं जन्यत्वमेवास्त्विति विनिगमकाभावादिति वाच्यम् । तथापि जन्यत्वे सकर्तृकत्वव्याप्यत्वानिश्चयादिति चेत् । अत्राहुः । कर्तृजन्यत्वे जन्यत्वमवच्छेदकं शरीरजन्यत्वे सकर्तृकत्वं वा ? यद्विशेषयोरित्यादिग्राहकस्य समानत्वादिति संशये लाघवाज्जन्यत्वमेव कर्तृजन्यतावच्छेदकं स्वीक्रियते न तु कर्तृजन्यत्वस्य शरीरजन्यतावच्छेदकत्वं गौरवात् । नन्वेकप्रतियोगिकजन्यतावच्छेदकद्वयोपस्थितौ लाघवावतारः, न चात्र तथा, उभयस्याप्युभयजन्यतावच्छेदकत्वसम्भवादिति चेत् । न उभयनिरूपितोभयजन्यतावच्छेदकस्य प्रकृते विरुद्धत्वेन एकत्रैवावच्छेदकताकल्पनाप्रसक्तौ कुत्र तत्कल्प्यतामिति लाघवावतारसम्भवादिति । शरीरजन्यत्वस्य कपालादावपि सत्त्वेन तन्मते कर्तृजन्यत्वं न्यूनवृत्तितया तदवच्छेदकं न भवतीत्यप्याहुः ।

अस्य प्रसिद्धेति । इदं च सर्वं सामान्यलक्षणानभ्युपगमेन परं प्रत्यापादनं तस्य गोत्वाद्येकभावाभावविषयत्वेन त्वयाऽवश्यं वाच्यत्वादित्येवमर्थकतया तस्येत्यादिफक्किकापि योज्येति न स्वसिद्धान्तविरोध इत्याहुः । *अप्रतीतेति* । यद्यपि परमते प्रतियोगितावच्छेदकप्रकारकज्ञानस्यैवाभावधीकारणत्वं न तु प्रतियोगिज्ञानस्य आवश्यकत्वात्, अन्यथा बाधोपि तन्मते प्रतिबन्धको न स्यात्, न स्याच्च घटादिसामान्याभावज्ञानं सामान्यलक्षणासम्भवेन सकलप्रतियोगिज्ञानाभावात् । तथापि स्वमतावष्टम्भेनेदं द्रष्टव्यम् ।

वस्तुतस्तु स्थापनानुमानस्य तर्कसचिवत्वादस्य च तदभावान्न्यूनबलवत्त्वान्न सत्प्रतिपक्षत्वमिति भावः ।

(चि०) एतेन "ज्ञानत्वं न नित्यवृत्ति ज्ञानमात्रवृत्तिधर्मत्वात् स्मृतित्ववत्, ज्ञानं न नित्यगुणवृत्तिगुणत्वव्याप्यजातियोगि चेतनाविशेषगुणत्वात् सुखवत्, आत्मा न नित्यविशेषगुणाधारवृत्तिद्रव्यत्वापरजातिमान् विभुत्वात् गगनवदि"त्याद्यपास्तम्, प्रसिद्धनित्ये व्योमादौ प्रसिद्धायाश्च रूपत्वजलत्वादिजातेर्व्यतिरेकविषयत्वात् अप्रयोजकत्वाच्च । किञ्च क्षित्यादौ शरीराजन्यत्वमसिद्धम् अदृष्टद्वारा तज्जन्यत्वात् । न चादृष्टाद्वारकजन्यज्ञानाजन्यत्वं हेतुः, ज्ञाने जन्यत्वविशेषणस्याव्यावर्त्तकतया व्यर्थत्वात् । न च स्थापनायां पक्षविशेषणेऽप्येष दोषः, प्रमेयो घट इतिवत्तदुपरक्तबुद्धेरुद्देश्यत्वात् । अपि च शरीराजन्यत्वे व्यर्थविशेषणत्वं, लाघवेनाजन्यत्वस्यैव व्याप्यत्वात् । न च निष्प्रयोजनविशेषणमसिद्धं, व्याप्तिग्रहोपयुक्तविशेषणवत् पक्षधर्मतौपयिकविशेषणस्यापि सप्रयोजनत्वात् व्यभिचारवारकस्यापि सार्थकत्वेऽनुमितिप्रयोजकत्वस्यैव बीजत्वात् । व्यभिचारवारकविशेषणवत्त्वेव व्याप्तिग्रह इति चेत्, न । निर्विशेषणेऽपि गोत्वादौ व्याप्तिग्रहात् । तत्रापि व्यक्तिविशिष्टे व्याप्तिग्रह इति चेन्न । स्वतो व्यावृत्तगोत्वस्य व्यभिचारात्, अन्यथाऽन्योन्याश्रयात् । अपि च व्यभिचारवारकविशेषणवत्त्वेव व्याप्तिग्रह इत्यप्रयोजकम् सहचारदर्शनादिसत्त्वे तदभावेन व्याप्तिग्रहाविलम्बात् । व्यभिचारावारकविशेषणशून्य एव व्याप्तिग्रह इति चेन्न । प्रमेयत्वेन ज्ञायमाने धूमे व्याप्तिग्रहात् ।

(प्रका०) *ज्ञानमात्रेति*। यद्यत्र जातिपदमपि तदाऽनित्यमात्रवृत्तीति साध्यार्थो ज्ञानातिरिक्तावृत्तित्वं च हेत्वर्थो विवक्षणीयस्तथा चावृत्तौ व्यभिचारवारणाय तद्ग्रहणम्। केचित्तु कालादिवर्त्तमानत्वेनाप्रसिद्धिः स्यात्। जातिपदोपादाने तु जातित्वनिर्वाहकसम्बन्धेन ज्ञानमात्रवृत्तित्वहेतुलाभ इत्याहुः।

चेतनेति। रूपादौ संख्यादौ च व्यभिचारवारणाय चेतनविशेषपदे। यद्यपि यथाश्रुतं भावनायां व्यभिचारि परमाणुवृत्तिस्थितिस्थापकवृत्तिसंस्कारत्वजातिसत्त्वात्तथापि हेतौ गुणपदं प्रत्यक्षेण विशेष्यम्। एवञ्चात्मैकत्वप्रत्यक्षत्वपक्षे विशेषपदम्। *आत्मेति*। यद्यपि न नित्यविशेषगुणाधार इत्येव साध्यमुचितं, तथापि तन्मते शब्दस्य नित्यतयाऽऽकाश एव व्यभिचारः स्यादस्मन्मते चेश्वरात्मनः सिद्ध्यसिद्ध्योर्व्याघातेनापक्षतयाऽस्मदाद्यात्ममात्रपक्षत्वे सिद्धसाधनं माभूदिति तादृशजातिगर्भं साध्यमुपात्तमिति ध्येयम्। नन्वदृष्टाजनकशरीराजन्यत्वं हेतुः, न च हस्तादिजन्ये तथापि व्यभिचारः, शरीरपदस्य चेष्टाश्रयपरत्वादित्यपरितोषादाह—*अपि चेति*। *निर्विशेषण इति*। व्यभिचारवारकविशेषणशून्य इत्यर्थः। *अन्यथेति*। यदि जातिर्न स्वतो व्यावर्त्तिका किन्तु व्यक्तिर्व्यावर्त्तनीया तदा व्यावृत्तपरस्परव्यावर्तनीयत्वेन परस्पराश्रयापत्तिरित्यर्थः। व्यभिचारावारकविशेषणज्ञानं व्याप्तिग्रहप्रतिबन्धकमित्यभिप्रेत्य शङ्कते *व्यभिचारेति*। विशेषणशून्ये विशेषणज्ञानशून्य इत्यर्थः। अत एवोत्तरे प्रमेयत्वेन ज्ञायमानपर्यन्तमुपात्तमिति।

(चि०) अथ तत्रोपात्तव्यभिचारावारकविशेषणशून्यत्वं विवक्षितम्, न च तत्र प्रमेयत्वं विशेषणमुपात्तमिति चेन्न। विरोधात्, न हि तत्रोपात्तं तेन शून्यञ्चेति सम्भवति। यद्विषयकत्वेन परामर्शः कारणमनुमितौ तल्लिङ्गं, प्रकृते च व्यभिचारादन्यथासिद्धेश्च न विशेषणविषयकत्वेन तत्त्वमिति चेन्न। धूमस्याप्यतत्त्वापत्तेः व्यभिचारात्तद्विषयत्वेनानुमित्यकारणत्वात्। अथैकमवच्छेदकमपरत्र व्याप्तिः। यद्वा लाघवेन व्याप्यवृत्तिरेकैव व्याप्तिरिति विशिष्टव्याप्त्यर्थः, तत्र विशे-

व्यताबच्छेदकस्य व्याप्त्यनवच्छेदकत्वेन विशेषणस्य तदवच्छेदकत्वमिति नियमात्, एकवृत्तित्वबाधे सत्येव व्याप्यवृत्तित्वमिति व्याप्तेश्च न शरीराजन्यत्वाभावे नीलधूमादौ च व्याप्तिरिति विशेषमात्रे सा, तथा च स्वरूपासिद्धिः तद्वारणार्थं विशेषणाभिधाने व्याप्यत्वासिद्धिरिति चेत। न। अव्यभिचारस्यानौपाधिकत्वस्य वा विशिष्टे नीलधूमादौ सत्त्वेन तद्व्यतिरेकसाधने बाधात्। न च विशेष्यत्वमुपाधिः साधनव्यापकत्वात्। किञ्च सौरभविशेषवद्धूमरहितमिदं चन्दनप्रभववह्निरहितत्वात्, निर्धूमोऽयमार्द्रेन्धनप्रभववह्निरहितत्वादित्यादावपि कारणविशेषाभावेन कार्यविशेषाभावानुमानं न स्यात्, वह्निरहितत्वादिकश्चोपाधिर्भवेत्, व्यतिरेकिण्यष्टद्रव्यातिरिक्तद्रव्यानाश्रितत्वं च हेत्वभावव्याप्यं न स्यात्, द्रव्यानाश्रितत्वस्यैव व्याप्यत्वात्, रूपादिषु मध्ये गन्धस्यैव व्यञ्जकत्वादित्यादौ स्वव्याप्यसिद्धिवारकविशेषणस्वीकाराच्च। अपि च गौरवेण विशिष्टस्य व्यापकतापि न स्यात्, तथा च स्थापनानुमाने उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यता, धूमेनार्द्रेन्धनप्रभववह्निघटत्वेन शरीरजन्यत्वमपि नानुमीयेत।

ईश्वरानुमानदीधितिः।

(दी०) ईश्वरवादे,–न च विशेष्यत्वमुपाधिः साधनव्यापकत्वादिति। साध्यस्येति शेषः। शरीरसहकारेणैव कर्त्तुः कार्यजनकत्वात् शरीराजन्यस्य न कर्तृजन्यत्वम्। तथा चाऽकर्तृकत्वरूपसाध्यव्याप्यस्य शरीराजन्यत्वस्य हेतोरव्यापकतया साध्यस्याव्यापकं विशेष्यम् अजन्यत्वं नोपाधिरित्यर्थः। यदि विशिष्टाभावे हेत

विशेषणवैयर्थ्यं विशेष्याभावरूपश्च विशेष्यमुपाधिर्भवेत् तदाऽऽर्द्रेन्धनप्रभववन्हिरहितत्वादिना निर्धूमत्वादौ साध्ये व्यर्थविशेषणत्वम् उपाधिश्च वन्हिरहितत्वादि सम्भवेदित्याह किञ्चेति । ननु स्वरूपासिद्धिवारकत्वाद्विशेषणस्य न वैयर्थ्यमिति न भ्रमः, अपि तु व्यभिचारावारकत्वात्, रूपादिषु मध्य इत्यत्र गन्धव्यञ्जकत्वस्य हेतोर्व्यभिचारो न शुद्धेनैव वारयितुं शक्यते तस्य समभिव्याहारवशाच्छुद्धातिरिक्ताव्यञ्जकत्वरूपस्य गन्धव्यञ्जकेऽसत्त्वेन विशेषणत्वायोगादतो रूपाद्यन्तर्गतगन्धातिरिक्ताव्यञ्जकत्वं तच्च व्यभिचारवारकमेव इत्यत आह अपि चेति ।

(प्रका०) *व्यभिचारादिति* । आकाशादिपक्षकेऽजन्यत्वविषयतयैवानुमितिजनकत्वादित्यर्थः । अत एवान्यथासिद्धिरपीति भावः । *धूमस्यापीति* । आलोकविषयतयापि तज्जन्यत्वादित्यर्थः । अत्र यद्यपि व्यासज्यवृत्तिर्व्याप्तिर्यत्र विशेष्यबाधस्तत्र वाच्या यथार्द्रेन्धनप्रभववह्निमत्त्वादौ, तच्च न सम्भवति, धूमादिसामानाधिकरण्यस्य संयोगविशेषस्य वह्निधूममात्रनिष्ठत्वात्, अपि च आर्द्रेन्धनादौ विशेषणे व्याप्त्यभावनिश्चये तदवच्छिन्नवह्निविशेषे व्याप्तिग्रहादनुमितिः, तथापि प्रथमोक्तविशिष्टव्याप्त्यभिप्रायेण दूषयति *नेति*। नीलधूमे हेतौ साधनावच्छिन्नसाध्यव्यापकधूमवत्त्वमुपाधिः। तथा चानौपाधिकत्वाभावसाधनेन बाध इति शङ्कते न *चेति* । *साधनेति* नीलधूमवति सर्वत्र धूमवत्त्वसत्त्वादित्यर्थः ।

केचित्तु उभयत्रोपाधिं शङ्कते *न चेति* । अदृष्टद्वारा शरीरस्य क्षित्यादावपि जनकत्वमिति शरीराजन्यत्वं नित्यमात्रवृत्तीति अजन्यत्वोपाधेः साधनव्यापकत्वमित्यर्थ इत्याहुः । तन्न । एवं हि व्याप्यत्वासिद्धिमुद्धरतः स्वरूपासिद्ध्यापत्तेः । तथा च शरीराजन्यत्वे पूर्वोक्ते तात्पर्यम् । तच्च क्षित्यादिवृत्तीति साधनाव्यापकत्वमिति ।

ईदृशे व्यर्थविशेषणतया त्वदभ्युपगतमप्यनुमानं न स्यादित्याह—*किञ्चेति* । उभयत्र वह्निरहितत्वमात्रस्यैव गमकत्वसम्भवादिति भावः । *वह्निरहितेति* । यदि चास्यायोगोलके साध्याव्यापकत्वान्नोपाधित्वं तदा धूमवत्त्वोपाधेः साधनव्यापकत्वमिति तुल्यमिति भावः । ननु गन्धादिषु मध्ये इति व्यभिचारवारकतापर्यवसन्नमेव गन्धमात्र-

व्यञ्जकत्वं हि द्रव्यविशेषितं हेतुकार्यम्, अन्यथा सन्निकर्षे व्यभिचारः स्यात् तस्य च तेन व्यभिचारवारणं तदा यदि व्यभिचारः स्यात् स च तदा यदि गन्धमात्रव्यञ्जकत्वं प्रसिद्धं स्यात् तथाच गन्धादिषु मध्ये इति प्रसिद्धिं सम्पाद्य सन्निकर्षे व्यभिचारवारणप्रयोजकमित्यरु-चेराह *अपि चेति* ।

(चि०) यत्तु जन्यान्योन्याभावापेक्षया शरीरजन्या-न्योन्याभावस्याल्पत्वात्तेषामेव व्याप्यत्वमिति विप-रीतमेव लाघवमिति । तन्न । विरोधाभावेन बहूनामल्पस्य च व्याप्यत्वात्स्नेहे शीतस्पर्शवत्त्वजलत्वयोर्गन्धाभावेऽपृ-थिवीत्वपृथिवीत्वाभावयोरिव । अन्यथा नीलधूमस्यैव व्याप्यत्वे धूममात्रस्याव्याप्यत्वप्रसङ्गः । किञ्च त्वन्मते बहु-न्योन्याभावापेक्षया जन्यत्वात्यन्ताभावस्यैव व्याप्यता स्यात् एकत्वात् । प्रमेयत्वाद्यनन्तधर्मविशिष्टस्य व्याप्तावपि प्रयोजनाभावान्नानुमाने तदुपन्यासः । अथ लाघवेन जन्यत्वस्य शीघ्रोपस्थितिकतया जन्यत्वाभावत्वेन शीघ्रं व्याप्तिग्रहः न तु शरीरजन्यभावत्वेन विल-म्बितप्रतीतिकत्वात् । यत्र विशेषणविशेष्यान्यतराभा-ववति साध्यं तत्र विशिष्टाभावस्यापि व्याप्तिरिति चेन्न । एवं सति उत्पत्तिमत्त्वे सति सत्त्वादिकमानित्यत्व-सकर्तृकत्वव्याप्यतया न गृह्येत शीघ्रोपस्थितिकतया घटत्वादेरेव तथात्वात् । यदि च सामान्यविशेषभावा-द्विरोधाभावेनोभयस्यापि व्याप्यत्वं तदा शरीराज-न्यत्वजन्यत्वाभावयोरपि तुल्यम् । किञ्च शरीरजन्य-त्वं विशिष्टं तदभावमपि विशिनष्टि न तु साक्षात्, तथा च शरीरजन्यत्वाभावोऽखण्ड एव हेतुरतो न व्यर्थ-विशेषणता । न चात्र विशिष्टाभावो विशेष्याभाव एव, क्षित्यादावजन्यतापत्तेः । अत एव स्थापनायां शरीरज-

न्यत्वमुपाधिः' साध्याभावव्याप्याभावप्रतियोगित्वेन साध्यव्यापकत्वनियमात् । व्यर्थविशेषणेऽधिकं निग्रह-स्थानमिति चेन्न । हेतुद्वयोपन्यासे ह्यधिकम् । अत्र तु विशिष्टमेव हेतुरिति विरुद्धस्थल उक्तमिति ।

(दी०) यत्त्वित्यादि यावद्विशेषाभावानामेव सामान्याभावत्व-मते । बह्वल्पेति । बहवो जन्यान्योन्याभावा अल्पाः शरीरजन्यान्योन्या-भावाः । अपृथिवीत्वं पृथिवीसामान्यान्योन्याभावः स च विशेषा-भावसमुदायः । जन्यत्वात्यन्ताभावस्येत्यभ्युच्चयमात्रं, जन्यत्वस्या-खण्डस्य एकस्य विरहेण तुल्यन्यायतया सामान्याभावस्यापि तत्त-ज्जन्यत्वाभावरूपत्वात् । यद्यपि प्रत्येकव्याप्यत्वस्य सम्भवे बहूना-मल्पानाञ्च तथात्वम्, न चेह, एकैकस्यान्योन्याभावस्य व्यभिचा-रित्वात् तथा च शरीरजन्यान्योन्याभावसमुदायस्य व्याप्यत्वे न तत्र क्षित्याद्यन्योन्याभावानां निवेशो व्यर्थत्वात्, तथापि जन्यत्व-शरीरजन्यत्वावच्छिन्नप्रतियोगिताकावतिरिक्तावेवाभावाविति न तत्र बह्वल्पभावसम्भव इत्यत्र तात्पर्यमिति ॥

विदुषां निवहैरिहैकमत्याद्यदुष्टं निरटङ्कि यच्च दुष्टम् ॥
मयि जल्पति कल्पनाधिनाथे रघुनाथे मनुतां तदन्यथैव ॥

इति महामहोपाध्यायश्रीरघुनाथभट्टाचार्यशिरोमणि-
विरचिता ईश्वरानुमानतत्त्वचिन्तामणिदीधितिः
समाप्ता ।
अनुमानदीधितिः सम्पूर्णा ।

(प्रका०) यत्त्विति शरीरजन्यघटाद्यपेक्षया जन्याः क्षित्यादयो ऽपीति ते बहवः। प्रतियोगिबाहुल्यकृतं चाभावबाहुल्यमिति भावः। *अन्यथेति*। तथा चावच्छेदकलाघवं प्रयोजकं न तु व्यक्तिलाघवमिति भावः। *प्रयोजनेति*। प्रकृते पक्षधर्मतायामुपयोगः शरीरपदस्येति भावः। *अथेति*। न च यदि तत्र व्याप्तिरस्ति तदा न प्रथमं व्याप्तिग्रहो जातस्ततः किं? पश्चादपि तद्ग्रहेणानुमितिसम्भवादिति वाच्यम्। यत्र प्रथमं व्याप्तिग्रहः तत्रैव व्याप्तिरित्यभिमानेनाभिधानादिति। *यत्रेति*। निर्धूमोऽयमार्द्रेन्धनप्रभववह्निरहितत्वादित्यत्रार्द्रेन्धनरूपविशेषणाभाववति विशेष्यवति तप्तायःपिण्डे साध्यं निर्धूमत्वं तथा वह्निरूपविशेष्याभाववति केवलार्द्रेन्धनवति वनादौ निर्धूमत्वम्, एवञ्च प्रत्येकस्य धूमाप्रयोजकतया तदभावे विशिष्टाभावो हेतुः। न चैवं प्रकृते सिद्धं, जन्यत्वविशेष्यवति शरीररूपविशेषणाविरहेणाकर्तृत्वरूपसाध्यसम्बन्धानिश्चयात् क्षित्यादौ पक्षे तस्य सन्दिग्धत्वात। तथाचात्र विशिष्टाभावो न हेतुरित्यर्थः। यत्तु साध्यं नेति पाठस्तथाच यत्र विशेषणविशेष्यान्यतराभाववति साध्याभावः, विशेषणाद्यन्यतराभावो व्यभिचारीति यावत् तत्र विशिष्टाभावो हेतुः। अत्र तु न तथेति न सहेतुरिति। तन्न। विशेषणाद्यन्यतराभावस्य व्यभिचारित्वे विशिष्टाभावस्य व्यभिचारस्यापि वज्रलेपत्वात्। *अखण्ड एवेति*। तथाच शरीरजन्यत्वाभावे जन्यत्वप्रतियोगिकत्वाभावात् तदवच्छेदेन व्याप्त्यग्रहे विशिष्टावच्छेदेनैव तद्ग्रह इति न वैयर्थ्यमिति भावः। अधिकमिति। अनुपयुक्तनीलाद्यंशोपादानादिति भावः। *हेत्विति*। हेतूदाहरणादिकमधिकं तल्लक्षणादिति भावः।

(चि०) उच्यते। नीलधूमादौ व्याप्तिरस्त्येव, अन्यथा विशेषाणामव्याप्यत्वे निराश्रया व्याप्तिः स्यात्। नीलत्वमपि न व्याप्यतावच्छेदकं गौरवात् किन्तु धूमत्वमेव दण्डत्वेन कारणत्वे रूपमिव, धूमत्वञ्च न नीलिम्नि किन्तु तदाश्रये धूमे इति न नीलधूमस्य हेतुत्वम्। नीलधूमे नीलस्य विशेषणत्वे तद्विशिष्टे न धूमत्वम्, उपलक्षणत्वे च धूमादेवानुमितिः। किञ्च व्याप्यतावच्छेदकस्यैव हेतुतावच्छेदकत्वमिति न नीलधूमत्वं तथा। नचैवं धूम-

त्वस्यावच्छेदकत्वेऽपि सामग्रीसत्त्वात् नीलधूमादनुमित्युत्पत्तौ हेत्वाभासत्वं न स्यात् अनुमितिप्रतिबन्धकस्य तत्त्वादिति वाच्यम्। तदभावेऽपि नीलधूमप्रयुक्तसाध्यवत्प्रत्ययस्य भ्रमत्वेन तत्कारणत्वस्याभासत्वसम्भवादिति दिक्॥

एवञ्च शरीराजन्यत्वेऽपि न शरीरमवच्छेदकं गौरवात्, येन विशेषणेन विना व्याप्तिर्न गृह्यते तस्यैव व्याप्यतावच्छेदकत्वनियमात्। अत एव गन्धस्यैव व्यञ्जकत्वादित्यत्राप्रसिद्धत्वेन रूपादिषु मध्ये इति विशेषणं विना व्याप्तिर्ग्रहीतुं न शक्यते इत्यसिद्धिवारकमपि विशेषणं सार्थकमेव। सुरभिधूमविशेषादौ च चन्दनप्रभवाग्न्यादेः कारणत्वात् कारणाभावस्य कार्य्याभावप्रयोजकतया व्याप्यत्वनिश्चयः। व्यापके च न व्यर्थविशेषणता, विशिष्टस्य कारणत्वेन व्यापकत्वात् विशेषव्यतिरेकिस्थले(१) विपक्षबाधकेनानन्यगतिकतया विशिष्टस्य व्यापकत्वात् विशिष्टाभावस्य हेत्वभावव्याप्यत्वम्। यत्र च विपक्षबाधकं नास्ति तत्र विशिष्टस्य व्यापकतापि न, यथा कार्य्यस्य द्विकर्तृकत्वेनापि शरीरजन्यत्वाभावोऽखण्डो हेतुः। यदि हि शरीरजन्यत्वं सकर्तृकत्वप्रयोजकं स्यात् तदा तदभावप्रयुक्तः सकर्तृकत्वाभाव इति तस्य साध्यव्याप्यता स्यात्, नचैवं, किन्तु जन्यत्वं लाघवात्तथा तथा चाजन्यत्वमेवोपाधिः। साध्यव्याप्याभावः साध्याभावव्यापक इति नियमेन तस्य साध्यव्यापकतानिश्चयात् सकर्तृकत्वशरीरजन्यत्वयोर्व्याप्त्यभावेन तदभावयोरपि व्याप्त्यभाव इति व्याप्यत्वासिद्धत्वाच्च।

(१) परिशेष व्यतिरेकिणीति पाठान्तरम्।

अत एव शरीरजन्यत्वाभावस्याकर्तृकत्वाव्याप्यत्वात्तद्भावयोरपि व्याप्यव्यापकभाव इति निरस्तम्। शरीरजन्यत्वस्य सकर्तृकत्वाऽप्रयोजकत्वात्। न चाजन्यत्वं पूर्वसाधनव्यतिरेकत्वेन नोपाधिः सत्प्रतिपक्षोच्छेदकप्रसङ्गादिति वाच्यम्। स्थापनायां यत्राभासत्वं तत्र विशेषादर्शनदशायां सत्प्रतिपक्षे पूर्वसाधनव्यतिरेकस्य साध्याव्यापकत्वेनानुपाधिकत्वात्, यथा शब्दोऽनित्यो गुणत्वादित्यत्र शब्दो नित्यो व्योमैकगुणत्वादित्यादिना सत्प्रतिपक्षे गुणत्वाभावो नोपाधिः जलपरमाणुरूपे साध्याव्यापकत्वात्। न चैवमनैकान्तिकत्वमेव तत्रोद्भाव्यं सत्प्रतिपक्षमुपेक्ष्य तस्योद्भावनानर्हत्वात्। किञ्च प्रागभावप्रतियोगित्वे सति समवेतत्वस्य तत्प्रतियोगित्वे सति सत्त्वस्य, सत्त्वे सति उत्पत्तिमत्त्वस्य वा हेतुत्वे, एषामन्यतमव्यतिरेक उपाधिरिति न पूर्वसाधनव्यतिरेकः। अत एवाजन्यत्वस्य नोपाधित्वं ध्वंसे साध्याव्यापकत्वादिति न दोषः।

(प्रका०) तर्हि नीलधूमस्य कथं न हेतुत्वमत आह *नीलत्वमपीति*। विशेष्यतावच्छेदकस्य सम्बन्धितावच्छेदकत्व एव विशेषणस्यापि तदवच्छेदकत्वादित्यर्थः। अत्र दृष्टान्तमाह *दण्डत्वेनेति*। ननु नैल्यं व्याप्यतावच्छेदकत्वेन हेतौ मा प्रविशतु, व्याप्यत्वेनैव प्रविशत्वित्यत आह धूमत्वं चेति। व्याप्यतावच्छेदकावच्छिन्नस्यैव व्याप्यत्वं प्रकृते च धूमत्वं तथा तदवच्छिन्नत्वं च न नैल्य इति व्याप्यतया न प्रवेशस्तत्रेति भावः। इदं च वस्तुगतिमनुरुध्योक्तम्। वस्तुतो धूमत्वस्य नैल्यवृत्तित्वेपि धूमव्यक्तिस्थलीयं तदिति धूममात्रमेव हेतुरिति न नीलधूमो हेतुः, नीलधूमत्वस्यानवच्छेदकत्वात्, नैल्यस्यापि धूमत्वावच्छिन्नत्वेनैव हेतुत्वादिति नैल्ये धूमत्वासत्त्वोपवर्णनमप्रकृतमेव प्रकृते तु गौरवमेवेति ध्येयम। ननु नीलिम्नि धूमत्वासत्त्वेपि नीलधूमे धूमत्वमस्त्येव अतस्तदवच्छिन्नत्वेन हेतुप्रवेशस्तस्य स्यादित्यत आह—*नीलधूम इति*। तथाच नीलोपलक्षितधूम-

मात्रस्यैव धूमत्वावच्छिन्नत्वान्न केनापि प्रकारेण हेतौ नैल्यप्रवेश इति भावः। ननु व्याप्यतावच्छेदकमस्तु धूमत्वमात्रं किन्तु नीलधूमस्यापि व्याप्यत्वात्तेनापि हेत्ववयवनिर्देशः स्यादित्यत आह *किञ्चेति* । व्याप्यतानवच्छेदकेन हेतुनिर्देशेऽतिप्रसङ्गादिति भावः। ननु धूममात्रनिष्ठव्याप्तौ नीलधूमत्वं न्यूनवृत्तित्वादेव नावच्छेदकं न तु गौरवात, नीलधूममात्रनिष्ठव्याप्तौ नीलधूमत्वमेवावच्छेदकं न तु धूमत्वं अतिप्रसङ्गादिति चेन्न। न्यूनवृत्तेरपि व्याप्यतावच्छेदकत्वात्, अन्यथा आलोकाद्यवृत्तित्वेन धूमत्वस्याप्यतत्त्वापत्तेः ।

ननु गौरवेण नीलधूमत्वावच्छेदेन व्याप्त्यग्रहेऽज्ञानरूपासिद्धिरस्तु न तु हेत्वाभासीभूताज्ञायमानप्रतिबन्धकत्वाभावात् । ना च यतो गौरवान्नीलधूमत्वस्यानवच्छेदकत्वं तदेव व्याप्यत्वासिद्धित्वेन विवक्षितम्, तस्य ज्ञायमानतयैव प्रतिबन्धकत्वादिति वाच्यम् । परामर्शविषयाभावस्यैव असिद्धित्वेन ग्रन्थकृदभिमतत्वात् गौरवस्यातथात्वात् । तथा च व्याप्यत्वासिद्धिर्व्यर्थविशेषणादावित्यप्यसंगतमिति चेत् ।

अत्र केचित् । यत्सम्बन्धितावच्छेदकरूपवत्त्वलक्षणा व्याप्तिर्लाघवादनुमितिहेतुः, सकलसाधनाधिकरणे साध्यसत्त्वं दर्शयतोदाहरणेन सैव प्रदर्श्यते इति तदभावो व्याप्यत्वासिद्धिरवच्छेदकत्वाभाव एव पर्यवसन्नो नीलधूमादौ नीलधूमधूमत्वरूपावच्छेदकान्तरसत्त्वे नीलधूमत्वस्य तद्घटितशरीरस्यानवच्छेदकत्वात् । एवञ्च परामर्शविषयाभावत्वमपि समर्थितमित्याहुः ।

अत्र वदन्ति । सम्बन्धितावच्छेदकवत्त्वलक्षणायां व्याप्तावच्छेदकत्वं यद्यनतिरिक्तदेशवृत्तित्वं तदा तन्नीलधूमेऽप्यस्ति, अथ तत्र तादृशधर्मान्तराघटितत्वमपि विशेषणं तदा सर्वव्याप्तिलक्षणतो गौरवादनुमित्यहेतुरेवेति तदभावज्ञानस्य क प्रतिबन्धकता तादृशधर्माघटितत्वादेरुदाहरणोपदर्शनशङ्कैव नास्तीति न किञ्चिदेतत् । तस्मादिदमत्र तत्त्वम् । नीलधूमे धूमत्वावच्छिन्नव्याप्तिसत्त्वेऽपि नीलधूमत्वावच्छिन्नव्याप्तिविरहो व्याप्यत्वासिद्धिः । स च विशेषणावच्छिन्नविरहो वा सम्बन्धविरहो वेत्यन्यदेतत । एवञ्च ज्ञानगर्भहेत्वाभासलक्षणं परामर्शविषयाभावत्वं च सङ्गच्छते । न च नीलधूमत्वावच्छिन्नव्याप्त्यप्रसिद्धेः कथमेवमिति वाच्यम् । कस्तूरिकादहनादिप्रतियोगिकविशेषव्याप्तेरेव तादृश्याः प्रसिद्धेः । न च तादृशी व्याप्तिर्नीलधूमेऽस्त्येवेति नीलधूमत्वावच्छिन्ने वह्नित्वावच्छिन्नप्रतियोगिकव्याप्तिविरहस्य वा-

व्यत्वे पुनः सैवाप्रसिद्धिरिति वाच्यम्। नीलधूमत्वावच्छिन्नव्याप्तिप्रतियोगिकत्वलक्षणव्यापकत्वाभावस्य वह्नित्वावच्छिन्ने व्याप्यत्वासिद्धिपदार्थत्वात्। समानवित्तिवेद्यतया व्याप्यत्ववद्व्यापकत्वस्यापि परामर्शविषयत्वेनोक्तव्यापकत्वाभावे परामर्शविषयाभावत्वस्यापि सत्त्वाच्च।

यद्वा धूमत्वावच्छिन्ने नीलधूमत्वावच्छिन्नव्याप्त्यभाव एव व्याप्यत्वासिद्धिः। तस्यापि नीलधूमत्वावच्छिन्ने सत्त्वेनान्यधर्मावच्छिन्ने विरहादिति।

वस्तुतो वह्निनिरूपितधूमनिष्ठव्याप्तौ नीलधूमत्वावच्छेदेन व्याप्त्यग्रहेऽज्ञानरूपासिद्धिरित्यपि न स्यात् गौरवज्ञानस्यावच्छेदकत्वज्ञान एव प्रतिबन्धकत्वात्। एवञ्च यत्समानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकावच्छिन्नसामानाधिकरण्यावच्छेदकावच्छिन्नत्वं व्याप्तिस्तथा च नीलधूमेऽप्येतादृशावच्छेदकत्वाभावः परामर्शविषयाभावतया भवत्वसिद्धिः। न च व्याप्तेरेतादृशावच्छेदकगर्भत्वे मानाभाव इति वाच्यम्। व्यर्थविशेषणे व्याप्तिग्रहप्रतिबन्धस्यैव तत्र मानत्वात् गौरवज्ञानस्य अवच्छेदकत्वातिरिक्तव्याप्तिघटकपदार्थग्रहाप्रतिबन्धकत्वात्। यथा व्यभिचारिते व्याप्तिग्रहप्रतिबन्ध एवाव्यभिचारितत्वगर्भत्वे तस्या मानम्। न च तत्र व्याप्तिग्रहप्रतिबन्धो न भवत्येवेति वाच्यम्। एवं हि अज्ञानरूपासिद्धिरपि न स्यात्। तथैकामसिद्धिं परिहरतो द्वितीयापत्तेरिति सिद्धान्तोऽपि भज्येत। तस्मात्परिहर वा तत्राज्ञानरूपासिद्धिं स्वीकुरु वा व्याप्तेरवच्छेदकगर्भत्वमिति दिक्।

भ्रमत्वेनेति—ननु ज्ञायमानतया प्रतिबन्धकत्वाभावात्तथाप्यस्य कथं हेत्वाभासत्वं किञ्चित्प्रयुक्तं तद्धेतुकत्वं तज्ज्ञाप्यत्वं वा। न च लिङ्गोपहितभानपक्षेऽपि तद्भासते उपस्थापकाभावात्। तत्कथं तद्विषयत्वेनानुमितेर्भ्रमत्वमिति चेत्।

अत्राहुः। अनुमित्याभासताप्रयोजकत्वं हेत्वाभासत्वमिति सम्प्रदायमतेनास्याऽभिधानम्। तत्प्रयुक्तत्वं तद्विशिष्टत्वम्। तथा च लिङ्गोपहितभानपक्षे व्याप्यत्वासिद्धौ नीलधूमो व्याप्यत्वेनानुमितौ भासत इति तस्या भ्रमत्वम्।

केचित्तु— वह्निव्याप्यनीलधूमवान् वह्निमानित्यनुमितौ ज्ञाप्यज्ञापकभावस्य संसर्गविधया भासनात् नीलधूमे च तत्त्वेन रूपेण तदभावात्तद्विषयत्वेन तस्या भ्रमत्वमित्याहुः।

वस्तुतो अनन्यथासिद्धधूमज्ञानादनुमितिसत्त्वेन नीलधूमस्योद्देश्यानु-

मितिप्रतिबन्धकत्वेनैव हेत्वाभासत्वं—शरीराजन्यत्वादौ च विशेष्यस्या- सिद्धतया विशिष्टस्य व्याप्यत्वासिद्धतयानुमितिसामान्यप्रतिबन्धक- त्वमेव तदेतत्सर्वमभिसन्धायाह— *दिगिति* । प्रकृते योजयति *एव- मिति । *शरीराजन्यत्वेपीति* । शरीरजन्यत्वाश्रयमात्रप्रतियोगिकया- वदन्योन्याभाववपीत्यर्थः । पूर्वोक्तदोषं निरस्यति—*सुरभीति* । ननु सुरभिधूमत्वं न कार्यतावच्छेदकं प्रत्येकसामग्रीद्वयसमाजादर्थसमाज- महिम्नैव विशिष्टकार्यसिद्धेर्नीलघटत्ववदिति चेत् । न । विशिष्टस्य कार्यतावच्छेदकत्वेपि प्रत्येककारणताया एव तद्व्याप्यत्वनिश्चयमूलत्व- संभवात् । स्थापनानुमाने पूर्वोक्तव्यापके व्यर्थविशेषणत्वमुद्धरति *व्याप- कं चेति* । *विशिष्टस्येति* । यद्व्यक्तिदृष्टप्रागभावेत्यादिना कृतित्वादि- ना प्रत्येकमेव कारणत्वं न तु तादृशकृत्यादिविशिष्टात्मकत्वेन कारणत्वं कृत्यादीनां सहकारितया परस्य दंडचक्रादिवदवच्छेदकत्वाभावात् । तथापि वस्तुगतिमनुरुन्ध्यैतदुक्तं न तु तत्त्वेन जनकत्वं विवक्षितम् । नचै- वं न विशिष्टस्य व्यापकत्वमिति वाच्यम् । प्रत्येककारणताया एव तन्मूलत्वसम्भवात् । वस्तुतः प्रत्येकमेव तद्व्यापकत्वम् । आर्थसमाजम- हिम्ना विशिष्टसिद्धिः । अत एव ग्रन्थकृतापि तथैव विभावितं धूमं प्रति तु आर्द्रेन्धनप्रभववह्नित्वेनैव कारणत्वाद्विशिष्टस्यैव व्यापकत्वम् । न च वह्निसंयोग आर्द्रेन्धनसहकारीति वाच्यम् । तत्संयोगे सत्यपि तत्प्रभव- वह्न्युत्पादं विना ततो धूमानुत्पत्तेरिति वदन्ति ।

अखण्ड इति । तथा च प्रतियोगिविशेषणत्वान्न वैयर्थ्यमिति भावः । *अजन्यत्वमिति* । एवं चाप्रयोजकत्वमपीति ध्येयम् । सत्प्रति- पक्षोच्छेदः—समीचीनप्रतिपक्षोच्छेदः । यथा चैवं व्याख्यातं तथोक्तं प्राक् । *किञ्चेति* । एषामन्यतमः स्थापनाहेतुरपरस्य विरहः प्रत्यनुमानोपा- धिरित्यर्थः । *अत एवेति* । यतः समवेतत्वादिघटितस्य जन्यत्वस्या- भाव उपाधिरतस्तस्य ध्वंसवृत्तित्वान्न साध्याव्याप्तिरित्यर्थः ।

(चि०) अन्ये तु यन्निष्ठा यन्निरूपिता व्याप्तिर्येन विशे- षणेन विना न गृह्यते तत्र विशिष्टं व्याप्यतावच्छेदकम् । अकर्तृकत्वनिरूपिताभावनिष्ठव्याप्तौ च शरीरं विनैव प्रति- योगितया जन्यत्वमवच्छेदकं क्लृप्तमिति न शरीरजन्यत्व- मवच्छेदकं धूमे नीलधूमत्वमिव, अतिगौरवेण शरीरजन्य- त्वप्रतियोगितया च जन्यत्वं नावच्छेदकमिति व्याप्यता-

वच्छेदकाभावान्न शरीरजन्यत्वाभावोऽकर्तृकत्वव्याप्यः । व्यभिचाराभावात्तथेति चेन्न। क्षित्यादावेव व्यभिचारात्, अन्यथा क्षित्यादिकं नादृष्टहेतुकं शरीरजन्यत्वाभावादित्यपि स्यात् । नन्वस्तु तावदशरीरानित्यज्ञानादिकर्त्तनुमितिस्तथापि सानुमितिरयथार्थैवाऽशरीरे कर्तृत्वज्ञानत्वात् ज्ञानेच्छाप्रयत्नेषु नित्यज्ञानत्वात् शरीराजन्ये सकर्तृकत्वज्ञानत्वात्, घटः कर्त्ता घटज्ञानादिकं नित्यं व्योमसकर्तृकमिति ज्ञानवदिति साध्यम्, न चोपजीव्यबाधः, अनुमितिर्ह्युपजीव्या, नन्वस्तु तद्याथार्थ्यमपीति चेन्न । कर्तृकार्ययोर्निरुपाधिकार्यकारणाभावेन एतस्याप्रयोजकत्वात्, अन्यथा पर्वते वन्ह्यनुमितिरयथार्था उभयासिद्धवाह्निमाद्भिन्न वह्निज्ञानत्वादित्यादिना सकलान्वयव्यतिरेक्युच्छेदः । किञ्चानुमितेरयाथार्थ्यमनेन ज्ञाप्यं, न तु कार्यं, तथा च दोषादुत्पन्नस्यानेन ज्ञापने तत्रायमेव दोषो दोषान्तरं वा ? नाद्यः अन्योन्याश्रयात् उत्पन्ने तस्मिन् ज्ञापनं ज्ञापकादेव च तस्माद्दोषात्तदुत्पत्तिरिति । नान्त्योऽसिद्धेः । तर्कापरिशुद्धिस्तु न दूषणम् । यदीश्वरः कर्त्ता स्यात्, शरीरी स्यात्, इष्टसाधनताज्ञानवान् स्यात् प्रयोजनवान् स्यात् अनित्यज्ञानवान् स्यात् क्षित्यादि यदि सकर्तृकं स्यात् शरीरिकर्तृकं स्यादिति तर्काणां विपर्यये आश्रयासिद्धिव्यर्थविशेषणतादिना विपर्ययापर्यवसानेनाभासत्वात् ।

(प्रका०)· प्राचां मतमाह । *अन्ये त्विति*। यन्निष्ठेति*। यद्विशेष्यतावच्छेदकविशिष्टनिष्ठेत्यर्थः । अभावानिष्ठव्याप्तौ अभावत्वरूपविशेष्यतावच्छेदकाविशिष्टव्याप्तावित्यर्थः । अत्रेदमनभिमतिबीजम् । लाघवेन यन्निष्ठेत्यत्र व्यक्तिपरत्वं न तु विशेष्यतावच्छेदकावच्छिन्नपरत्वं गौरवात् । एवञ्च शरीरजन्यत्वाभावनिष्ठव्याप्तिः शरीरपदं विना न गृह्यते

प्रतियोगितावच्छेदकग्रहं विनाऽभावग्रहस्यैवाभावात् । तथा च कथं न विशिष्टस्य व्याप्यतावच्छेदकत्वम्, अन्यथा जन्यत्वाभावोऽपि व्याप्यो न स्यात् । सकारणकत्वाभावादौ जन्यत्वविशेषणं विनाऽपि भावत्वावच्छिन्नव्याप्तिग्रहादिति केवलव्यतिरेकिण्युभयसिद्धसाध्यवत्त्वं केवलान्वयिन्युभयसिद्धसाध्यवद्भिन्नत्वं चाप्रसिद्धमिति अन्वयव्यतिरेकीत्युक्तम् ।

(चि०) ननु क्षित्यादावेककर्तृसिद्धिः कुतः? एककर्तृकत्वेन व्याप्त्यभावात् । न च लाघवात्, तस्याप्रमाणत्वात् । सकर्तृकत्वप्रमाणादेव लाघवसहकृतात् तत्सिद्धिरिति चेत् । न तावदनुमितिमात्रे लाघवं सहकारि, व्यभिचारात् मानाभावाच्च । न हि लिङ्गपरामर्शे सति तद्विलम्बेनानुमितेर्विलम्बो येन तत् सहकारि स्यात् । नापि लघ्वनुमितौ, अन्योन्याश्रयात् । नापि व्यक्त्यनुमितौ, धूमेन वह्न्यनुमितावेकद्विहस्तादिसंशयाभावापत्तेः । साधकाभावेन नानात्वासिद्धौ कर्तृसिद्धेरेवैककर्तृसिद्धिरिति चेत् । न । एकत्वसाधकाभावेनैकत्वासिद्धौ कर्तृसिद्धिरेव नानासिद्धिरित्यस्यापि सुवचत्वात् । अथ यमर्थमनालम्बमानाऽनुमितिः पक्षे न साध्यसंसर्गं विषयीकरोति स पक्षधर्मताबलात् सिद्ध्यति न त्वधिकमपि, तथा च द्वितीयं कर्त्तारं न विषयीकुर्वत्यपि कर्त्तारं विषयीकरोत्येवेति न द्वितीयमवगाहते, एकस्तु कर्त्ता सिध्यति तदविषयत्वे कर्तृविषयतैव न स्यात् एकविषयत्वाभावे नानाविषयत्वस्याप्यभावात्, तद्घटितत्वात्तस्येति चेत् । एवं तर्हि कर्त्रेकत्वमपि न विषयः स्यात् एकत्वविषयत्वं विनापि कर्तृविषयत्वसम्भवात् । वस्तुगत्यैकः सिद्ध्यति न त्वेकत्वेनेति चेन्न, एकत्वासिद्ध्या वस्तुगत्यैक इति ज्ञातुमशक्यत्वात्, तथा चेश्वरे एकत्वानेकत्वयोर्नित्यसंशय इति ।

उच्यते । यत्र प्रमाणे लघुगुरुविषयता सम्भवति

तत्र लाघवसहकारिता, कारणताकार्यताव्याप्यतादि-ग्राहके प्रत्यक्षे प्रवृत्तिनिमित्तग्राहके उपमाने शा-ब्दशक्तिग्राहकेऽनुमाने तथाविधप्रमाणमात्रे च स-कलतान्त्रिकैः सहकारित्वकल्पनात् । एवं लाघवमेव गौरवमिति ज्ञानानन्तरं बाधकं विना लघूनामेव कार-णत्वकार्यत्वव्याप्यत्वप्रवृत्तिनिमित्तत्वशब्दशक्यत्वानां ज्ञानदर्शनात् । तत्रापि लाघवानादरे शब्दशक्यत्वादि-संशये तन्मूलकव्यवहारोच्छेदो विनिगमकाभावात्, सो-ऽयं विचारमारभते लाघवञ्च तदङ्गं नाङ्गीकुरुते इति म-हासाहसम् । नन्वेवं वस्तुगत्या नानाकर्तृकेषु घटत्वेन कुलालकर्तृकत्वानुमानेऽपि बाधकानवतारदशायां ला-घवादेककर्तृसिद्धिः स्यात्, न चेष्टापत्तिः, अनुमित्यनन्तरं (१)नानात्वैकत्वे संशयादिति चेन्न । तत्रापि लाघवेन कर्त्रै-क्यमेव सिद्ध्यति तत्सन्देहस्तु ज्ञानप्रामाण्यसंशयादि-ति पश्चान्नानाकर्तृकत्वसाधकप्रमाणादेवैककर्तृकतानुमानं तत्र बाध्यते । न चैवं क्षित्यादिकर्त्तर्यपि प्रामाण्यसंशया-देकत्वानेकत्वसंशयो दुरुच्छेदः एकत्वे बाधकस्याभावेन प्रामाण्यनिश्चयात् । न चैकत्वसाधकाभाव एव बाधकः, अनुमितेरेव लाघवसहकारेणैकत्वसाधकत्वात् ।

(प्रका०) *अन्योन्याश्रयादिति* । लाघवज्ञानजन्यानुमितित्वस्यैव लघ्वनुमितित्वादित्यर्थः ।

यत्र प्रमाण इति । नन्वेवं संभवल्लघुविषयताकानुमितित्वं लाघव ज्ञानकार्यतावच्छेदकमिति पर्यवसन्नम्, तथा च यत्र तज्ज्ञानं न जातं वस्तुतो लघोरेवानुमितिस्तत्र व्यभिचारः । न च लाघवज्ञानजन्या-नुमितित्वमेव तथा, अन्योन्याश्रयादिति चेत् । न । लाघवगौरवोप-स्थितिकालीनलघुविषयताकानुमितित्वस्य कार्यतावच्छेदकत्वात् । ननु तथापि लाघवज्ञानापनीतमेकत्वं प्रकारीभूयानुमितौ कथं भासतां, ध्या-

(१) नानैककर्तृकत्वे इति पाठान्तरम् ।

ष्ट्याद्युपनीतादन्यस्यानुमितौ भानं मानाभावादिति पूर्वोक्तविरोधात् । न च वस्तुगत्यैकः सिद्ध्यति न त्वेकत्वमपीति वाच्यम् । एकत्वानेकत्वसंशयतादवस्थ्यात् ।

अत्राहुः । व्याप्त्याद्यनुपनीतमपि लाघवज्ञानोपनीतमनुमितौ भासते नान्यत् अतिप्रसङ्गात्, लाघवज्ञानमात्रस्य प्रमाणमात्रसहकारित्वकल्पनात्, तदिदमुक्तं *तथाविधप्रमाणमात्र इति* । अत्र लाघवज्ञानोपनीतत्वस्यैव नियामकत्वान्नातिप्रसङ्गः । व्याप्त्यादित्यादिग्रन्थस्तु लाघवानुपनीतविषयकः । नन्वेकत्वविषयत्वेऽप्यनेकविषयत्वसंभवात्संशयतादवस्थ्यमिति चेन्न । एकमात्रकर्तृत्व एव लाघवावतारात्तस्यैवानुमितिविषयत्वात् । अत एव नानाकर्तृके घटे पश्चादेककर्तृकताज्ञानं बाध्यत इत्यग्रे वक्ष्यति, अन्यथा नानाकर्तृकेऽप्येककर्तृकताज्ञानस्य प्रमात्वे बाधासम्भवादिति ।

(चि०) अन्ये तु क्षितिकर्त्ता अङ्कुरकर्त्रभिन्नः अशरीरकर्तृत्वात् अङ्कुरकर्तृवदित्यभेदानुमानादेककर्तृसिद्धिः । न च क्षितिकर्त्ता अङ्कुरकर्तृभिन्नः अङ्कुराकर्तृत्वात् कुलालवदिति सत्प्रतिपक्षः, अनित्यज्ञानानामाश्रयत्वस्योपाधित्वादित्याहुः । अत्राप्यप्रयोजकत्वे भेदाभेदयोर्गौरवलाघवे एव शरणम् ।

तथापि कथं नित्यसर्वविषयज्ञानसिद्धिः । पक्षधर्मताबलादिति चेत्, व्यापकतयाऽवगतस्य पक्षसम्बन्धमात्रं पक्षधर्मताबलात् सिध्यति, तथा च पक्षे तदुपादानगोचरज्ञानमात्रं सिद्ध्येत् नतु नित्यसर्वविषयज्ञानं, तेन रूपेण व्यापकत्वाग्रहात् । न च येन विनानुपपत्तिः सोऽपि विषयः, व्यतिरेकिविलयापत्तेः ।

अत्र प्राञ्चः । यमर्थमनालम्बमानाऽनुमितिः पक्षे साध्यसम्बन्धं न विषयीकरोति स पक्षधर्मताबलात् सिद्ध्यतीत्यनुपपत्तिमूलकोऽन्वयी, प्रतीत्यनुपपत्त्या च व्यतिरेकी । तदिहाऽनादिद्व्यणुकादिकार्यप्रवाहस्य प-

क्षत्वे तदुपादानस्यानादिज्ञानगोचरत्वं विना नोपादानगोचरज्ञानजन्यत्वमनादिकार्यप्रवाहस्यानुमितिरालम्बते, अनादितैव च नित्यता, सर्वमुक्तावपि तत्सत्त्वमनादिभावत्वात्, पक्षतदुपादानविषयतैव च सर्वविषयता, लाघवात्तु तावद्विषयकमनाद्येकमेव ज्ञानं सिद्ध्यति, न तु नित्यानित्यज्ञानानीति।

(प्रका०) अन्य इत्यत्रास्वरसबीजमुद्घाटयति *अत्रापीति* किञ्चोक्तानुमानेन क्षितिकर्तुरङ्कुरकर्त्रभेदानुमितावपि सागरादिकर्तुरेतद्भिन्नत्वसंशयादीश्वरनानात्वसंशयतादवस्थ्यमिति। *अनादिभावत्वादिति*। यद्यप्यनुमितौ नानादित्वं विषयस्तथाऽप्यनादिकार्यप्रवाहविषयत्वेन तत्सिद्धिरिति भावः।

(चि०) नव्यास्तु अनित्यज्ञानाजन्यत्वेन पक्षविशेषणात् ज्ञानं सिध्यत् नित्यमेव सिद्ध्यति अनित्ये बाधात्।

वाचस्पतिमिश्रास्तु लाघवादेकज्ञानसिद्धावुत्पत्तिमतोऽनादिकार्यप्रवाहं प्रत्यजनकत्वात् परिशेषेण नित्यज्ञानादिसिद्धिः। नियतविषयता च ज्ञानस्य कारणाधीना, कारणञ्च नित्यज्ञानान्निवर्त्तमानं नियतविषयतामादाय निवर्त्तत इति सर्वविषयत्वसिद्धिरिति।

षट्पदार्थप्रतिपादकवेदकर्तृत्वेनेश्वरस्य षट्पदार्थगोचरसाक्षात्कारवत्त्वेन वा सार्वज्ञ्यम्। घटाकाशसंयोगं प्रतीश्वरस्य कर्तृत्वात् घटादिगोचरमपि ज्ञानं सिद्धमिति केचित्।

(प्रका०)नव्यास्त्वित्यस्यास्वरसोद्भावनम्। तद्बीजं तूपनीतभानानङ्गीकारान्नित्यज्ञानजन्यत्वं पक्षधर्मताबलादपि न सिद्ध्यतीति।

ननु तथापि कथं सर्वविषयत्वमित्यत आह *नियतेति*। एवं च पक्षतदुपादानाद्यतिरिक्तविषयत्वमपि सिद्ध्यति। एतेन प्रथमकल्पे ऽस्वरसोऽपि सूचितः—पक्षादिविषयत्वे तत्र सर्वविषयत्वासिद्धेरिति।

(चि०) ननु घटादीनां कथमीश्वरककर्तृत्वं भवति घटे-

ईश्वरकर्तृकः कार्य्यत्वात् क्षितिवदिति चेन्न। घटस्य द्वि-कर्तृकतया तद्दृष्टान्तेन क्षित्यादेरपि द्विकर्तृकतापत्तेः(१), तथा च घटवत् क्षितिः क्षितिवद्घट इतीश्वरानन्त्यम्। कार्य्ये कर्तृत्वेन कारणता न तु द्विकर्तृकत्वेनेति चेत्। तर्हि नेश्वरकर्तृकत्वेन कारणता किन्तु कर्तृत्वेनेति।

मैवम्। ज्ञानादीनां नित्यत्वेन सर्वविषयतया घटाद्युपादानविषयत्वमपीति कथं न तेषां घटादिकारणत्वं कुलालादिज्ञानतुल्यत्वात्। तदाहुराचार्य्याः "परमाण्वदृष्टाधिष्ठातृसिद्धौ ज्ञानादीनां नित्यत्वेन सर्वविषयत्वे वेमाद्यधिष्ठानस्यापि न्यायप्राप्तत्वात् न तु तदधिष्ठानार्थमेवेश्वरसिद्धिरिति। "अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते" इत्यागमाच्चायमर्थोऽध्यवसेयः।

अथेश्वरस्य सर्वज्ञत्वे सर्वविषयभ्रान्तेर्ज्ञाने ईश्वरोऽपि भ्रान्तः स्यात् भ्रमस्यैव तस्यापि भ्रमविषयविषयकत्वादिति चेत्। न। रजतत्वप्रकारकज्ञानवानयमिति ज्ञानं न भ्रमः अभ्रान्तस्य तथात्वात्। इदं रजतमितिज्ञाने रजतत्वं प्रकारः तेन स भ्रमः, ईश्वरज्ञाने च रजतत्वप्रकारकत्वं प्रकार इति स न भ्रमः। अत एवास्मदादिरपि भ्रान्तिज्ञो न भ्रान्त इति।

(प्रका०) नन्विति, तथाच कथं जगन्निर्मातृत्वमिति भावः। न* भ्रान्त इति*। न ह्यसद्विषयत्वेन भ्रमत्वं, किन्तु व्यधिकरणप्रकारकत्वेनेति भावः।

(चि०) स्यादेतत् प्रयोजनं विना कथमीश्वरः प्रवर्त्तते? सुखस्याभावात् अधर्म्माभावेन निर्दुःखत्वात्। करुणया प्रवर्त्तते इति चेत्। तर्हि परसुखदुःखप्रहाणे प्रयोजने, तथाच सुखिनमेव सृजेन्न नारकिणम्। धर्माधर्मपर-

(१) द्विरपि द्विकर्तृका, स्यादिति पाठान्तरम्।

तन्त्रत्वात् तदनुरूपं फलं प्रापयतीति चेत्। तर्ह्यावश्यकत्वात् कर्मनिर्मितमेव जगद्वैचित्र्यमस्तु किमीश्वरेण अनपेक्षितकीटादिज्ञानवता। कर्मनिरपेक्षत्वे चैकदैव सदा च सर्गप्रलयौ स्यातां, ज्ञानादीनां नित्यत्वात्। किञ्च तत्प्रयत्नस्य करुणाजन्यत्वेन शरीरादिजन्यतापत्तौ संसारित्वापत्तिरिति। न। ईश्वरानभ्युपगमे विचारस्याश्रयासिद्धत्वात्। तमभ्युपगम्य पृच्छसि चेत्, आकर्णय। जगत एव तदिच्छाविषयत्वेन स्वेष्टसाधनताज्ञानसत्त्वात्।

(प्रका०) *स्वेष्टसाधनत्वेति*। तथा च यत्नस्य प्रयोजनज्ञानव्याप्यत्वमव्याहतम्, प्रयोजनज्ञानजन्यत्वनियमश्च जन्यत्वोपाधिदूषित इति भावः।

(चि०) वस्तुतस्तु क्षित्यादितत्तदसाधारणकर्मिकादृष्टादिसामग्रीसमवहिता ईश्वरज्ञानादयो यदा भवन्ति तदा क्षित्यादिकं करोतीति व्यवहारः। सर्गप्रलयासाधारणकर्मिकादृष्टादिसामग्रीसमवहितत्वमेव तादिच्छाया श्चिकीर्षासंजिहीर्षात्वे। न चैवं किं तज्ज्ञानादिनेति वाच्यम्। क्षित्यादीनां कार्यत्वेन ज्ञानजन्यतया नित्यज्ञानादीनामपि जनकत्वात्, सुखादिशब्दयोरात्माकाशादिवत्।

नन्वशरीरात् कथं वेदघटादिशब्दव्यवहारसंप्रदायः। उच्यते। सर्गादावदृष्टोपगृहीतभूतभेदान्मिनशरीरोत्पत्तावदृष्टवदात्मसंयोगाददृष्टसहकृतप्रयत्नवदीश्वरसंयोगाद्वा सकलवेदार्थगोचरज्ञानाद्विवक्षासहितान्मनिककलेवरकण्ठताल्वादिक्रियातज्जन्यसंयोगाद्वेदोत्पत्तिः। एवं कुलालादिशरीरावच्छेदेनादृष्टसहकृतप्रयत्नवदीश्वरसंयोगात्सद्बुद्धीच्छासहितचेष्टोत्पत्तौ(१)सकलघटानुकू-

(१) सहितात्प्रयत्नोत्पत्तौ इति पाठान्तरम्।

त्तव्यापाराद् घटोत्पत्तिः । एवं प्रयोज्यप्रयोजकज्ञानाय व्यापाराभिमतशरीरावच्छेदेनापि अदृष्टसहकृते(१)श्वरज्ञानेच्छाप्रयत्नादेव वाग्व्यवहारः, ततस्तत्सुशीलो(२) बालो व्युत्पद्यते सोऽयं भूतावेशन्यायः ।

(प्रका०) प्रयोजनज्ञानापेक्षा प्रयत्नोत्पत्तौ न तु तत्स्थितावपीत्याह *वस्तुत इति* । *करोतीति* । ईश्वर इति शेषः । ननु त्वदिच्छायाः सिसृक्षारूपत्वे प्रलयो न स्यात् संजिहीर्षारूपत्वे च सर्गो न स्यादित्यत आह *सर्गेति* । *सुखादीति* । भावकार्यस्य समवायिकारणजन्यत्वनियमाद्यथात्मादिजन्यत्वमिति भावः ।

मीनशरीरेति । तच्च शरीरं नेश्वरस्य तददृष्टोपगृहीतत्वाभावात् किन्तु संसारिण एवेति ध्येयम् । अत एवाह *सोयं भूतावेशन्याय* इति । न चैवं संसार्यात्मा न सिध्येत् तद्व्यापाराणां भूतावेशन्यायेन परमेश्वरादेव सिद्धेरिति वाच्यम् । तथासत्यदृष्टाभावेन शरीरासिद्धौ भूतावेशन्यायस्यापि असम्भवात् भगवत्यदृष्टाभावात् ।

(चि०) यत्तु—यथा लिप्यादिना मौनिश्लोकोऽनुमाय पठ्यते तथा सर्गान्तरोत्पन्नतत्त्वज्ञानवता भोगार्थं सर्गादावुत्पन्नेन मन्वादिना सर्वज्ञेश्वराभिप्रायस्थवेदः साक्षात्कृत्यानूद्यते, ततोऽग्रिमसंप्रदायः, स एव च कायव्यूहं कृत्वा वाग्व्यवहारं करोतीति--मतम् । तन्न । प्रतिसर्गानन्तसर्वज्ञकल्पनायां गौरवात्, तेषामेव क्षित्यादिकर्तृत्वसम्भवेन ईश्वराननुमानाच्च । एतेन सर्गादौ सर्गान्तरसिद्धयोगिन एव क्षितिकर्त्तारः सन्त्विति निरस्तम् । सर्गादावनन्तसर्वज्ञसिद्धिश्च किं प्रमाणान्तरात् क्षित्यादिकर्तृग्राहकाद्वा । नाद्यस्तदभावात् नान्त्यः अनादिद्व्यणुकादिकार्यप्रवाहस्य सकर्तृकत्वानुमानाल्लाघवसहकृतादेकस्यैव सर्वज्ञस्य सिद्धेः ॥

---

(१) प्रयोज्यवृद्धप्रयोजकवृद्धभावादिमच्छरीरकृपावच्छेदेनादृष्टसहकृतेति पाठान्तरम् ।

(२) तद्दर्शीति पाठान्तरम् ।

अथेश्वरज्ञानमूलकशब्दशक्तिग्रहे प्रयोज्यव्यापारानुमितघटज्ञाने घटशब्दस्य कारणताग्रहो भ्रमः स्यात् तदीयज्ञानस्य नित्यत्वात्, तथा च तज्जन्यघटशब्दशक्तिग्रहस्य भ्रमत्वे सकलशब्दज्ञानं भ्रमः स्यात् भ्रमपरम्परामूलकत्वात्। अनित्यसर्वज्ञमूलकशब्दत्वग्रहे च नायं दोष इति चेन्न। व्यापारानुमितमिदं घटज्ञानं घटपदजन्यमिति ज्ञानस्य शब्दशक्तिग्रहकारणस्य भ्रमत्वेऽपि घटपदं घटशक्तमिति ज्ञानस्य यथार्थत्वात् विषयाबाधात्। न च भ्रममूलकत्वेन तस्य भ्रमत्वमनुमेयम्। तदंशे व्यधिकरणप्रकाराभावेन बाधात् बाधितविषयत्वस्योपाधित्वाच्च।

अत एव घटमानयेति शब्दानन्तरं सूत्रसञ्चाराधिष्ठितदारुपुत्रकस्य घटानयनव्यवहारदर्शनाद्बालो घटपदे व्युत्पद्यते। तन्मूलकशाब्दज्ञानमपि न भ्रमः, तस्यापि भ्रमत्वे प्रयोज्यव्यवहारादिदानीं व्युत्पत्तिर्न स्यात्, किमयं प्रयोज्यश्चेतनव्यवहाराद्व्युत्पन्नोऽचेतनव्यवहारश्चेति संशयस्य वज्रलेपायमानत्वात्॥ "विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतः पात्। सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन्देव एकः इत्यादि श्रुतयः,—

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः॥

इत्यादयः स्मृतयश्च बह्व्यो मानत्वेनानुसन्धेया इति॥

इत्यनुमानचिन्तामणौ ईश्वरवादः।

(प्रका०) *ईश्वरानुमानाच्चेति* । यद्यपि मन्वादिशरीरारम्भकद्व्यणुकादिकर्तृत्वेनेश्वरानुमानं स्यादेव । तथापीश्वरस्याप्यावश्यकत्वात्किं मन्वादिनेति भावः । विश्वतश्चक्षुः–विश्वविषयकसाक्षात्कारवान्, विश्वतोमुखः- विश्वविषयकवचनवान् । विश्वतोबाहुः–विश्वविषयकप्रयत्नवान्, विश्वतस्पात् विश्वव्यापी, बाहुभ्यां–धर्माधर्माभ्यां, संपतत्रैः-परमाणुभिः, संधमति–संयोजयति । किमर्थमित्यत आह द्यावाभूमी संजनयन् । द्यावेत्यूर्द्धलोकसप्तकं भूमीत्यधोलोकसप्तकमुपलक्षितम् । संहृयं व्यवहिताश्चेति सूत्रेण धमजननाभ्यामन्वीयते । स्मृतिविरोधेन श्रुतेरन्यपरत्वमाशङ्क्य तद्विरोधमेव दर्शयति *उत्तम इति* ।

॥ इत्यनुमानखण्डावशिष्टांशचिन्तामणिव्याख्यानप्रकाशे ईश्वरवादः ॥

(चि०)स्यादेतत् ईश्वरवत् कार्य्येणैव शक्तिरप्यनुमीयते, तथाहि यादृशादेव करतलानलसंयोगाद्दाहो जायते तादृशादेव सति प्रतिबन्धके न जायते, अतो यद्भावात् कार्य्याभावस्तद्द्वयादावभ्युपेयं तेन विना तदभावायत्तदाहाभावानुपपत्तेर्व्यतिरेकमुखेन शक्तिसिद्धिः । न चादृष्टवैगुण्यम्, दृष्टसाद्गुण्ये तदभावात्, तस्य तदर्थत्वात् । अन्यथा दृढदण्डनुन्नमपि चक्रं न भ्रामयेत् । अथादृष्टविलम्बादपि विलम्बो यथा वन्ध्यास्त्रीसंप्रयोगे परमाणुकर्म्मणि अध्ययनतुल्यत्वेऽपि एकत्र फलाभावे चेति चेन्न । अदृष्टविलम्बो हि न तन्नाशानुत्पादौ, मण्यपसारणानुपदं दाहाभावप्रसङ्गात् । किञ्च नियमतो मणिसद्भावे कार्य्याभावस्तदभावे कार्य्यमिति दृष्टत्वात् मण्याद्यभाव एव कारणम्, अन्यथा कदाचित् मण्याद्यभावेऽपि तदभावान्न कार्य्यं स्यात्, वन्ध्यासंप्रयोगे तु दृष्टव्यभिचारादृष्टविलम्बादेव विलम्बः । अदृष्टञ्च क्वचित् साक्षाज्जनकम्, अन्यथा परम्परया हेतुरपि न स्यात् । न च समप्रज्ञयोः समश्च(१) निरपवादमभ्यस्यतोरेकः प्रग-

(१) निरन्तरमिति पाठान्तरम् ।

लम्भो नापर इति दृश्यते । न च सर्वोत्पत्तिमतामदृष्टं निमित्तकारणम्, अगम्यागमनसाध्ये सुखे तदभावात् तद्धि नोऽधर्मात् सुखत्वात् नापि धर्मात् । तेन(१) अगम्यागमनमुत्पाद्य सुखमुत्पादनीयम्, तथा चागम्यागमनकारणत्वेन न स धर्मः, श्येनापूर्ववन्निषिद्धफलकत्वेनानर्थकत्वात् । दाहप्रतिकूलादृष्टादेव दाहाभाव इति चेन्न । तस्योत्तेजकाभावसहितमण्यजन्यत्वे तत्राऽदाहार्थिनोऽप्रवृत्तिप्रसङ्गात् । तज्जन्यत्वेऽपि तदुत्पादकादेव दाहाभाव इति किमदृष्टेन, प्रथमोपस्थितत्वादुपजीव्यत्वाच्च । प्रतिबन्धकाभावहेतुत्वस्य तेनाभ्युपगमात् अदृष्टोत्पत्तौ शौचाचमनादेः साधारणस्यात्राप्यन्वयः स्यात्, अशुचेरेव तदुत्पत्तौ शौचे सति तदभावापत्ते, प्रतिपक्षसन्निधापकादृष्टस्यैव प्रतिबन्धकत्वे सति मणिप्रयोगेऽपि दाहानापत्तिः अग्रिमकाल एव सान्निधिदर्शनेन तदसिद्ध्यभावात् । अस्तु तर्हि उत्तेजकाभावसहकृतप्रतिबन्धकाभावस्यान्वयव्यतिरेकाभ्यां हेतुत्वम् । एवं केवलोत्तेजकसद्भावे उभयसत्त्वे उभयाभावे च विशिष्टभावोऽनुगतो हेतुः । प्रतिबन्धकत्वञ्च कारणीभूताभावप्रतियोगित्वं, तच्च मण्याद्यभावत्वेन न तु प्रतिबन्धकाभावत्वेनेति नान्योन्याश्रयः । अत एव प्रतिबन्धकत्वाभिमतमण्यादीनामभावकूट एव कारणं तेन मणिसद्भावे मन्त्राद्यभावेऽपि न कार्यम् । अनतिरिक्ताभाववादिमते च व्यवहारार्थं तत्तत्स्थानाभिषिक्तस्य हेतुत्वम् । न चाभावो न कारणम्, भाववत्तद्ग्राहकतौल्यात् । दृष्टश्च कुड्यसंयोगाभावस्य गतौ, अनुपलम्भस्याभावविज्ञाने, विहिताकर-

---

(१) तद्धिनाऽधर्मात्सुखं स्यात् न धर्मात्··एतेनेति पाठान्तरम् ।

णस्य प्रत्यवाये, निर्दोषत्वस्य वेदप्रामाण्ये जनकत्वमिति प्राञ्चः ।

मैवम् । विशिष्टं हि नार्थान्तरं येन तदभावोऽनुगतः स्यात्, किन्तु विशेषणविशेष्यसम्बन्धा इति तेषां प्रत्येकाभावस्य हेतुत्वे क्वचित् विशेषणमण्यभावः क्वचिदुत्तेजकाभावरूपविशेषणाभावः-क्वचिदुभयं कारणमिति व्यभिचारान्नैकमपि हेतुः स्यात् ।

(प्रका०) प्रसङ्गादाह *स्यादेतदिति* । *कार्येणैवेति* । यथा अनुमीयत इति नैयायिकदिशा उपदर्शिताया अर्थापत्तेः पृथक्त्वेन स्वयं स्वीकारादिति ध्येयम् । नन्वेवं कार्येण न तदुन्नयनं किन्तु कार्याभावेनेत्यत आह *व्यतिरेकेति* । व्यतिरेकनिरूपकतया तत्प्रयोजकमित्यर्थः। तस्य अदृष्टस्य, तदर्थत्वात्-दृष्टसाद्गुण्यार्थत्वात्, तथा च दृष्टसाद्गुण्यमेवादृष्टसाद्गुण्ये मानमिति भावः । *परमाण्विति* । खण्डप्रलये परमाणुकर्मणि सत्यपि यथा न द्व्यणुकारम्भकसंयोग इत्यर्थः । पूर्वादृष्टस्य नाशादग्रिमस्योत्पादकाभावाद्दाहो न स्यादित्याह *मण्यपसारणेति । न च मण्यपसारणेनैव तदाऽदृष्टमुत्पद्यत इति वाच्यम् । तस्य विहितनिषिद्धेतरत्वेन तदजनकत्वादिति भावः । *मण्याद्यभाव एवेति* । इदं चादृष्टकारणतानिराससमात्राभिप्रायेणापाततः, वस्तुतोऽस्यापि न कारणत्वमित्यग्रे वक्ष्यति । तदभावात्-अदृष्टाभावात् । वन्ध्येत्युपलक्षणम् । परमाणुकर्मणीत्यपि द्रष्टव्यम् । नन्वदृष्टं दृष्टोपसंहारद्वारैव सर्वत्र जनकं न तु साक्षादित्यत आह *अदृष्टं चेति । *अन्यथेति* । द्वारे तस्य साक्षाज्जनकत्वं स्वीकार्यमेव तत्रापि द्वारान्तरापेक्षायामनवस्थानादिति भावः । *नचेति* । तथा च दाहेऽपि तदेव जनकमिति भावः । *श्येनेति* । चोदनालक्षणोऽर्थो धर्म इत्यर्थपदेन श्रेयस्करार्थकेन श्येनापूर्वमनर्थरूपं व्यावृत्तं तस्य निषिद्धशत्रुवधजनकत्वेनाश्रेयस्करत्वात्, तद्वदिदमपि न धर्म इत्यर्थः । *दाहप्रतिकूलेति* । नियताग्निसाध्यदाहप्रतिकूलमेवादृष्टमुत्पाद्यत इति नाग्न्यन्तरजन्यदाहप्रतिबन्ध इति भावः । दोषान्तरमाह-*अदृष्टेति* । *अशुचेरिति* । वामाश्रमादौ तथा दर्शनादिति भावः । उभयसत्त्वे-उत्तेजकप्रतिबन्धकसत्त्वे । *तच्चेति* । कारणत्वमित्यर्थः । मणिसद्भावे-उत्तेजकाभावविशिष्टमणिसद्भावे ।

(चि०)स्यादेतत प्रतियोगिभेदादिवत प्रतियोगितावच्छे-

दकविशेषणभेदेऽप्यभावो भिद्यते, अन्यथा पृथिव्यादित्रयप्रत्येकरूपाभावेऽवगतेऽपि वायौ रूपसंशयो न स्यात्। एवञ्च यथा केवलदण्डसद्भावे दण्डपुरुषसद्भावे द्वयाभावे च विशेषणविशेष्योभयाभावप्रयुक्तः केवलपुरुषाभावोऽबाधितानुगतव्यवहारबलात् प्रतीतिसिद्धः तथा विशेष्यस्य प्रतिबन्धकस्याभावे विशेषणस्योत्तेजकाभावस्याभावे द्वयाभावे च केवलप्रतिबन्धकाभावो विशेष्यविशेषणोभयाभावव्यापकोऽनुगत एव दाहकारणमस्तु। अथ विशेषणाद्यभावादेव केवलपुरुषाभावव्यवहार एकशक्तिमत्त्वादिति चेन्न। अनुगतव्यवहारस्यानुगतज्ञानसाध्यत्वात् शक्तेश्चातीन्द्रियत्वात्। अथोत्तेजकप्रयोगकाले मणेः कोऽभावः? न तावत् प्राक्प्रध्वंसाभावौ, तयोः प्रतियोग्यसमानकालत्वात्। न च श्यामोऽयमासीदित्यत्र यथा श्यामध्वंसप्रयुक्तः श्यामघटत्वेन पक्वघटस्य ध्वंस एव तथोत्तेजकाभावध्वंसप्रयुक्त उत्तेजकाभाववत्त्वेन मणिध्वंस एवेति वाच्यम्। ध्वंसस्यानन्तत्वे उत्तेजकापनयेऽपि दाहप्रसङ्गात्। नाप्यत्यन्ताभावः, तस्य कादाचित्कत्वाभावादिति चेत्। न। यथा दण्डोपनयापनयदशायां केवलपुरुषाभाव उत्पादविनाशवान् अन्यथाऽबाधितकेवलपुरुषाभावतदभावव्यवहारयोरुपपादयितुमशक्यत्वात्, तथोत्तेजकोपनयापनयशृङ्खलायां प्रतिबन्धकाभावोऽपि तथैवं स्वीकरणीयः तुल्यन्यायत्वात्। यदि च संसर्गाभावत्रयवैधर्म्यात्तत्र नाऽन्तर्भवति, तदा तुरीय एव संसर्गाभावोऽस्तु, न हि कलसविशेषबाधे सामान्यबाधो, विशेषान्तरमादायापि तस्य सम्भवात्। अन्यथा कलसानादिसंसर्गाभाववैधर्म्येण

ध्वंसोऽपि न सिद्ध्येत् । व्यवहारानुपपत्तिश्च तुल्यैव । सोऽयमस्माकं सगोत्रकलहो न तु शक्तिवादः ।

(प्रका०) *प्रतियोगीति* । यद्यपि प्रतियोगिभेदस्थले प्रतियोगितावच्छेदकभेदस्यावश्यकत्वात्तद्भेदादेव भेदस्तथापि यथा प्रतियोगिभेदोऽभावभेदव्याप्यस्तथा प्रतियोगितावच्छेदकभेदोऽपीत्यर्थः । *एवञ्चेति* केवलदण्डसद्भावे उभयाभावाद्दण्डपुरुषसद्भावे विशेषणाभावाद्दण्डपुरुषोभयाभावे च विशेष्याभावाद्दण्डाभावविशिष्टपुरुषाभाव इत्यर्थः । *प्रयुक्त इति* । विशेषणादिविरहान्यतरव्याप्य इत्यर्थः । *अनुगतेति* । यद्यपि शब्दप्रयोगरूपे व्यवहारे व्यभिचारः नानार्थशब्दानुगमेऽपि विषयाननुगमात्, तथापि व्यवहारशब्देन ज्ञानमेव विवक्षितम् । न चैवमनन्वयः । ज्ञानेन विषयिणा विषयस्योपलक्षणात् । तथा चानुगतज्ञानस्यानुगतविषयसाध्यत्वादित्यर्थो द्रष्टव्यः । ननु शक्तिरेवानुगता तद्विषयोऽस्त्वित्यत आह *शक्तेश्चेति* । श्यामध्वंसप्रयुक्तः—तन्नियतः, न तु तज्जन्यः समसमयत्वादिति ध्येयम् । न तु घटत्वेन, घट आसीदिति प्रत्ययाभावादिति भावः । *सोयमिति* । उत्पादविनाशवान् तुरीयसंसर्गाभावोऽस्तु नोभयथापि शक्तिसिद्धिरिति भावः ।

(चि०) अस्तु वा ध्वंस एवासौ, संसर्गाभावविभागे जन्याभावत्वेन ध्वंसस्य विभजनात् । न चैवं विनाशवत्त्वेन प्रागभाव एव सः, परिभाषाया अपर्यनुयोज्यत्वात् । यद्वाऽत्यन्ताभाव एवासौ, तस्य नित्यत्वेऽपि कादाचित्कप्रतीतिकार्य्यानुदयौ प्रत्यासत्तिकादाचित्कत्वात् । प्रत्यासत्तिश्च विशेषणाभावो विशेष्याभाव उभयाभावश्च, तदैव विशिष्टात्यन्ताभावसत्त्वादिति । तन्न । यदि ह्यतीतविशेषणावच्छेदेन विद्यमानस्यैव विशेष्यस्य ध्वंसः स्यात् तदा क्षणरूपातीतविशेषणावच्छिन्नत्वेन प्रतिक्षणं घटस्य विनाशः स्यात् इति क्षणभङ्गापत्तिः । किञ्च विद्यमानस्य विनष्टत्वेनाप्रतीतेः शिखा विनष्टा पुरुषो न विनष्ट इति विपरीताबाधितप्रत्ययाच्च न विशेषणाभावेऽपि विशेष्यध्वंसः । श्यामोऽयमासीत्

केवलोऽयमासीत् पुरुष इत्यादौ "सविशेषणे ही"ति न्यायेन विशेष्यवति श्यामकैवल्यादिध्वंस एव प्रतीयते, ध्वंसस्य ध्वंसानुपपत्तेश्च न विद्यमानस्य ध्वंसः। एतेनोत्तेजकसद्भावे सत्युत्तेजकाभावविशिष्टमणेरुत्पन्नध्वंसस्य उत्तेजकापनयसमये ध्वंसो जातोऽध्वस्तश्च ध्वंसः कारणमिति न विफल उत्तेजकापनय इत्यपास्तम्। विद्यमानध्वंसस्य च ध्वंसाभावात्। न च ध्वंसान्यः संसर्गाभावो विशिष्टाभाव इति वाच्यम्। उत्पन्नाभावस्य विनष्टप्रत्ययहेतुतया ततोऽपि विद्यमानस्य विनष्टत्वप्रत्ययापत्तेः। नापि विशिष्टाभावोऽत्यन्ताभावः, तथाहि स एव क्वचित् विशेषणाभावसहितः क्वचिद्विशेष्याभावसहितो दाहकारणमिति अननुगमस्तदवस्थ एव, विशेषणविशेष्याभावयोः प्रत्यासत्तित्वावच्छेदकानुगतधर्माभावात्।

(प्रका०) ननु तुरीयसंसर्गाभावस्वीकारे विभागव्याघात इत्यपरितुष्यन्नाह *अस्तु वेति*। ननु विनाशिनि ध्वंसपदपरिभाषैव सन्दिग्धेत्यरुचेराह *यद्वेति*। *यदि ह्यतीतेति*। यद्यपि विशेष्यतावच्छेदकघटत्वाद्यवच्छिन्नघटादिप्रतियोगिकः प्रतिक्षणं ध्वंसो नेष्यते तादृशक्षणभङ्गपात एव च दोषावहस्तथापि विशेष्यस्य प्रत्यभिज्ञायमानत्वात्समवाय्यसमवायिनाशाभावाच्च न घटादेर्विनाशः, किन्तु विशेषणस्यैव। न च विशेषणनाशसामग्र्येव विशेष्यनाशिका, नित्यमात्रापलापापत्तेः। अत एव श्यामोऽयमासीदिति प्रत्ययो न त्वयमासीदिति प्रत्यय इति भावः। *ध्वंसस्येति*। तथा चोत्तेजकापगमेऽपि दाहापत्तिः। उत्तेजककालोत्पन्नस्य प्रतिबन्धकध्वंसस्य तदाऽप्यनाशादिति भावः। ध्वस्तस्येति क्वचित्पाठः। स च सुगम एव। उत्पादविनाशशीलस्तुर्यः संसर्गाभाव एव विशिष्टाभाव इति निरस्यति *नचेति*। अत्यन्ताभाव एवासाविति पक्षे परिहरति *नापीति*। अत्यन्ताभावस्य नित्यत्वात्सदैव दाहापत्तिरिति प्रत्यासत्तिसहितस्य तस्य हेतुत्वं वाच्यम्, प्रत्यासत्तिश्च विशेषणभावादिरित्यननुगम इत्याह *स एवेति*।

(चि०) अथ विशिष्टविरोधित्वं विशेषणविशेष्याभावयोरनुगतं तदवच्छेदकमस्ति तयोश्च सत्त्व एव विशिष्टात्यन्ताभावसत्त्वादिति चेत्, तर्हि विशिष्टविरोधित्वेनानुगतेन तयोरेव हि विशिष्टाभावत्वेन दाहव्यवहारादौ जनकत्वमस्तु कृतं तदुपजीविनाऽतिरिक्तविशिष्टाभावेन। अथोत्तेजककाले विद्यमानात्यन्ताभावानुवृत्तावप्युत्तेजकापनयने उत्तेजकाभावव्यक्तिर्या जाता तदवच्छिन्नमणेरभावो न तत्रेति तदा न कार्योदयः तत्तदुत्तेजकाभावविशिष्टमणेरभावकूटस्य जनकत्वादिति चेन्न। तत्तदुत्तेजकाभावानामननुगतत्वेनानुगतविशिष्टाभावव्यवहारानुपपत्तेः, उत्तेजकाभावत्वेनानुगमेऽतिप्रसङ्ग एव।

अथ विशेषणविशेष्याभावयोर्विशिष्टविरोधित्वमनुगतकारणतावच्छेदकं यत्र तदन्यतराभावस्तत्र न विशिष्टं यत्र विशिष्टं तत्र न तयोरभाव इति सहानवस्थाननियमस्य विरोधस्यानुभवसिद्धत्वादिति चेन्न। सहानवस्थाननियमो न परस्परविरहरूपतया विशेषणविशेष्याभावस्य प्रत्येकं विशिष्टाभावतया तत्प्रत्येकाभावाभावस्य विशिष्टत्वापत्तेः, तथा च विशेष्यविशेषणयोः प्रत्येकं विशिष्टत्वापत्तिः तदभावस्य तत्त्वात्। न चोभयाभावाभाव उभयं विशिष्टम्। एवं श्चभावद्वयं विशिष्टाभावो न तु प्रत्येकाभावरूप इति प्रत्येकाभावाद्विशिष्टाभावव्यवहारो न स्यात्। नापि परस्परविरहव्याप्यत्वं तदाक्षेपकत्वं वा, विशेषणविशेष्याभावस्य विशिष्टाभावत्वेन तद्व्याप्यत्वात् तदनाक्षेपकत्वाच्च, अभेदे तयोरभावात्। एतेनान्यदपि विशिष्टव्यवहारवि-

रोधित्वादिनानुगतत्वमपास्तम् । केनाप्यनुगतेन रूपेण विशेषणविशेष्याभावस्य विशिष्टाभावत्वे प्रत्येकाभावावस्य विशेषणविशेष्यान्यतरमात्रस्य विशिष्टत्वापत्तेः, तदभावाभावस्य तत्त्वादित्युक्तत्वात्, तस्माद्वि शेषणविशेष्याभावो विशेषणावच्छिन्नविशेष्याभावो न विशिष्टाभाव इति ।

(प्रका०) *अथेति* उत्तेजककाले विद्यमाने योऽत्यन्ताभावस्तदनुवृत्तावपीत्यर्थः । *उत्तेजकाभावत्वेनेति* तर्ह्युत्तेजकाभावविशिष्टमण्यभावत्वेन हेतुत्वं, तथाच पूर्वानुवर्त्तमानतादृशाभावादुत्तेजकापनयकाले दाहापत्तिः, कारणतावच्छेदकावच्छिन्नयत्किञ्चित्सत्त्वे एव कार्योत्पत्तेरित्यर्थः । *तर्हीति* ।

पूर्वोक्त इष्टापत्तिमाशङ्कते *अथेति* । *विशेषणविशेष्याभावस्येति* अतिरिक्तविशिष्टाभावानभ्युपगमादिति भावः ।

(चि०) अत्रोच्यते । विशेषणविशेष्ययोः सम्बन्धाद्विशिष्टव्यवहार इति तयोः सम्बन्धाभावाद्विशिष्टाभावव्यवहार इति घटतदभावव्यवहाराविव घटसत्त्वासत्त्वाभ्याम् । न हि तयोरसम्बन्धे विशिष्टव्यवहारः, तथा तदभावे सति न विशिष्टाभावव्यवहारः । यस्य च यत्र सम्बन्धः स एव तत्र तस्य वैशिष्ट्यम्, स च सम्बन्धाभावो विशेषणाभावाद्विशेष्याभावात् उभयाभावात् सर्वत्राविशिष्ट एकस्तेषां व्यापकोऽनुगतविशिष्टाभावव्यवहारकारणम्, इह दण्डी पुरुषो नास्तीत्यत्र तथा दर्शनात् । अत एव दण्डमात्रसद्भावे दण्डपुरुषसद्भावे उभयाभावे चकैवल्यपुरुषयोः सम्बन्धाभावः सर्वत्रास्तीत्यनुगतः केवलपुरुषभावव्यवहारः । एवञ्च प्रतिबन्धकोत्तेजकाभावयोः सम्बन्धाभावो दाहकारणम् । स च प्रतिबन्धकाभावे प्रतिबन्धकोत्तेजकसद्भावे उभयाभावे चास्ति,

सर्व्वत्र प्रतिबन्धकोत्तेजकाभावयोः सम्बन्धो नास्तीति प्रतीतेः। नन्वेवं यत्र प्रतिबन्धकोत्तेजकाभावौ तत्रापि दाहः स्यात् अधिकरणाभावयोरातिरिक्तसम्बन्धाभावादिति चेन्न। तदभावेऽपि स्वरूपसम्बन्धस्याभावात् सर्व्वत्र स्वरूपसम्बन्धादेवाधिकरणाभावयोर्वैशिष्ट्यप्रतीतेः। तथापि प्रतिबन्धकोत्तेजकाभावावेव स्वरूपसम्बन्धः तयोरभावश्च प्रतिबन्धकाभाव उत्तेजकश्च दाहकारणं, तथा चोभयाभावे उत्तेजकासत्त्वे परं दाहः स्यात्, उत्तेजकवति च प्रतिबन्धके दाहो न स्यादिति चेन्न। अधिकरणाभावावेव स्वरूपसम्बन्धः, तयोर्घटवद्भूतलचत्वरीयतदभावयोरपि स्वरूपसत्त्वे घटवति घटाभावव्यवहारापत्तेः किन्तु घटिलप्रस्वभावत्वं, नच सम्बन्धान्तरं विना विशिष्टप्रत्ययजननयोग्यत्वम्। न च घटवद्भूतलचत्वरीयतदभावयोर्विशिष्टप्रत्ययजननयोग्यत्वमस्ति, घटवति कदापि घटाभावप्रत्ययानुदयात्, तदिहापि प्रतिबन्धकोत्तेजकाभावयोर्विशिष्टप्रत्ययजननयोग्यत्वं स्वरूपसम्बन्धः, अन्यथोत्तेजकवति प्रतिबन्धके चत्वरीयोत्तेजकाभावविशिष्टप्रत्ययापत्तेः। तादृशस्वरूपसम्बन्धाभावश्च प्रतिबन्धकाभावे प्रतिबन्धकोत्तेजकसद्भावे उभयाभावे चाविशिष्ट एव।

यद्वा अदण्डपुरुषस्याभावे दण्डी पुरुषो न प्रतियोगी तस्यादण्डत्वाभावात् किन्तु तदन्यः, तस्य चाभावो दण्डिसद्भावेऽपि दण्डमात्रसत्त्वे उभयासत्त्वे चाविशिष्ट इति तस्मात् केवलपुरुषाभावव्यवहारोऽनुगतः। तदुक्तं "न हि दण्डिनि सति अदण्डानामन्येषां नाभावः, किन्तु दण्डाभावस्यैवेति युक्तम्, अन्यथा तत्राऽन्येषामिति

पदस्य व्यर्थत्वापत्तेः, तथा केवलप्रतिबन्धकाभावे उत्तेजकसहकृतः प्रतिबन्धको न प्रतियोगी तस्य केवलत्वाभावात् किन्तु तदन्यः, तदन्यस्य च केवलप्रतिबन्धकस्याभावे उत्तेजकसहितप्रतिबन्धकसत्त्वे उत्तेजकमात्रसत्त्वे उभयासत्त्वे वा विशिष्ट एवेति नाऽननुगमः, उत्तेजकापनये च केवलप्रतिबन्धकोऽस्तीति न तदभाव इति दाहो न भवती"ति ।

(प्रका०) *सम्बन्धाभावादिति* । ननु विशेषणविशेष्यसम्बन्धस्य तदुभयमात्रवृत्तित्वाद्भूतलादौ तत्सम्बन्धाभावाद्दण्डिनि सत्यपि दण्डीह नास्तीति व्यवहारापत्तिरिति चेत् । न । यादृशेन हि सम्बन्धेन यत्र यद्विशिष्टव्यवहारस्तादृशसम्बन्धाभावस्यैव तद्व्यवहारहेतुत्वं दण्डपुरुषसंयोगस्तु नैतद्व्यवहारहेतुः, तस्य भूतलावृत्तित्वेन तत्रेदमस्तीति व्यवहारानापत्तेः, किन्तु परम्परासम्बन्धविशेषः, तथा च तदभाव एव विशिष्टाभावव्यवहारहेतुरिति फलबलेन तथा कल्पनादिति। *सम्बन्धान्तरं विनेति* । संयोगादावतिव्याप्तिराह *सम्बन्धेति* । असम्भववारणायाह *अन्तरेति* । ननु स्वात्मविषयकज्ञाने स्वात्मना समं विषयविषयिभावः सम्बन्धः स्वरूपसम्बन्ध एव वाच्यः, तत्र चेदमव्यापकं तत्र समवायस्यैव सम्बन्धान्तरस्य सत्त्वादिति चेन्न। उद्देश्यव्यवहारप्रयोजकसम्बन्धान्तरं विनेत्यर्थात् । न च समवायो विषयत्वव्यवहारप्रयोजकः । घटादिविषयकज्ञानस्य स्वात्मनि विषयत्वव्यवहारप्रयोजकत्वप्रसङ्गात् । ननु घटाभावभ्रमानुपपत्तिः, योग्यतायाः फलबलकल्प्यतया तत्र विशिष्टज्ञानोत्पत्त्या योग्यतावश्यंभावात् । न च प्रत्ययपदं प्रमापरम्, सम्बन्धसत्त्वे तस्यापि प्रमात्वात्, अन्यथा सम्बन्धाभावेन तस्याप्रमात्वं तदप्रमात्वे च तत्र सम्बन्धाभाव इति परस्पराश्रयात् । किञ्च अतीन्द्रियाभावस्वरूपसम्बन्धेऽव्याप्तिः, तत्र सम्बन्धस्य विशिष्टप्रत्ययाजनकत्वात् तत्प्रत्ययस्यानुमित्यादिरूपत्वेन विषयाजन्यत्वादिति चेन्न । विशिष्टप्रत्ययजननयोग्यतावच्छेदकरूपावच्छिन्नस्वरूपस्य सम्बन्धत्वात् , योग्यतावच्छेदकाभावे योग्यत्वस्याप्यभावात् । योग्यतावच्छेदकं चात्यन्ताभावे प्रतियोगिदेशान्यदेशत्वम्, प्रागभावादौ च प्रतियोगिदेशत्वे सति प्रतियोगिकालान्यकालत्वम्, अन्योन्याभावे प्रतियोगितावच्छेदकदेशान्यदेशत्वम् । न चान्यत्वमन्योन्याभाव-

वत्त्वं तत्र च मत्वर्थायोग इति वाच्यम् । तत्रापि तद्देशान्यत्वस्य सत्त्वात् । न चैवमनवस्था वस्त्वनवस्थायाः प्रामाणिकत्वेनादोषात्, प्रत्ययानवस्थायाश्चासत्त्वात्, उक्तावच्छेदकोपलक्षितस्वरूपस्यैव प्रत्ययविषयत्वे तस्य तदविषयत्वात् । एवञ्चोक्तावच्छेदकावच्छिन्नस्वरूपाभावे यत्राभावधीस्तत्र भ्रमः । एतेनातीन्द्रियस्वरूपसम्बन्धाव्याप्तिरप्यपास्ता । न चोक्तावच्छेदकस्य प्रत्ययाविषयत्वे विषयाभावात्कथं भ्रमत्वप्रमात्वे इति वाच्यम् । एकत्रोक्तावच्छेदकावच्छिन्नस्य सम्बन्धत्वेन विद्यमानसम्बन्धाविषयत्वादन्यत्र तदनवच्छिन्नत्वेन तस्य विद्यमानसम्बन्धाविषयत्वात् ।

ननु यत्किञ्चित्सम्बन्धाभावो न विशिष्टाभावोऽतिप्रसङ्गादिति विशेषणविशेष्योभयप्रतियोगिकसम्बन्धाभावस्तथा वाच्यः, तदभावश्च कश्चिद्विशेषणविशेष्योभयप्रतियोगित्वरूपविशेषणाभावात् कश्चिद्विशेष्यसम्बन्धाभावादित्यननुगमस्तदवस्थ एव । इयानेव विशेषो यत्पुरुषादौ विशेष्ये दण्डादिर्विशेषणं सम्बन्धे च विशेषणविशेष्योभयप्रतियोगित्वम् । ननु दण्डपुरुषोभयप्रतियोगिकसम्बन्धत्वमेकं प्रतियोगितावच्छेदकं तदवच्छिन्नाभाव एक एवेति नाऽननुगम इति चेत् । तर्हि दण्डावच्छिन्नपुरुषत्वमेकं प्रतियोगितावच्छेदकं तदवच्छिन्नाभावोऽप्यनुगत एवेति किं सम्बन्धाभावस्य विशिष्टाभावत्वोपवर्णनेन । न च विशेष्ये विद्यमाने न तदभाव इति वाच्यम् । विशेषणावच्छिन्नानामन्येषामेवाभावाभ्युपगमेन दोषाभावात् । अत एवानुपदमेव वक्ष्यति "न हि दण्डिनि सती"त्यादि । किञ्च अन्यत्र यथा तथाऽस्तु प्रकृते चोक्तज्ञानाभावमणिसम्बन्धस्य तदुभयस्वरूपतया तदभावोऽननुगत एव । न च तदुभयं न स्वरूपसम्बन्धः, किन्तु तादृशविशिष्टप्रत्ययजननयोग्यत्वमतिरिक्तमेव तथेति वाच्यम् । विशिष्टबुद्धिविषयस्य सम्बन्धत्वाद्विशिष्टप्रत्ययघटितस्य तस्य विशिष्टबुद्ध्यविषयत्वात्, अत एव सम्बन्धस्य सम्बन्धिभिन्नत्वनियमेन स्वरूपसम्बन्धः परैर्नाङ्गीक्रियते । अत एव समवायसिद्धिः, तत्तत्स्वरूपाणामनन्तत्वेन स्वरूपसम्बन्धेनार्थान्तराभावात्, अन्यथा तेनैवार्थान्तरं स्यात् । न च सम्बन्धत्वस्य मिलितवृत्तित्वेन सम्बन्धत्वावच्छिन्नाभावस्यानुगतत्वमिति वाच्यम् । एवं विशेषणावच्छिन्नविशेष्याभावस्यापि विशिष्टाभावत्वे दोषाभावादित्युक्तम् । अपि च यदि सम्बन्धाभावो विशिष्टाभावस्तदा इह दण्डी पुरुषो नास्तीत्यत्र नञर्थप्रतियोगित्वेन सम्बन्ध एव भासेत । न चैवं, दण्डावच्छिन्नपुरुषस्यैव तत्त्वेन प्रतीतेः । अन्यथा घटाभावोऽप्यतिरिक्तो न

सिद्ध्येत्, घटतदधिकरणसम्बन्धाभावादेव तद्व्यवहारसम्भवात्। यदि च सम्बन्धस्य तत्र प्रतियोगित्वेनानुल्लेखात्तज्ज्ञानं विनापि घटत्वावच्छिन्नघटज्ञानादेव तदभावज्ञानाद्य न तदभावेनान्यथासिद्धिः, तदा प्रकृतेऽपि तुल्यमित्यपरितोषं हृदि निधायाह यद्वेति। अयं च विशेषणावच्छिन्नविशेष्यप्रतियोगिताकोऽत्यन्ताभावः न तु ध्वंसो न वा विद्यमानप्रतियोगिक इति न क्षणिकत्वशङ्का। न च तस्य नित्यत्वेन प्रागपि कार्यापत्तिः, समयविशेषावच्छेदेन संसर्गित्वादिति ग्रन्थकृतैवाभिधानादिति। *दण्डी पुरुष इति*। तत्काले दण्डवानित्यर्थः। किन्तु तदन्यः तत्काले दण्डाभाववानित्यर्थः। नहीति। युक्तमिति योजना। अन्यथेति। विशेषणावच्छिन्नप्रतियोगिको यदि नाभावः, किन्तु विशेषणप्रतियोगिक एव तदाऽन्येषामिति पदस्य विशेष्यवाचिनोऽनुपादानापत्तेरित्यर्थः।

यद्वा यदि तत्कालीनदण्डाभाववानेव न प्रतियोगी, तदा अन्यकालीनदण्डाभावमादाय तत्र स्थितदण्डिनोऽप्यदण्डत्वेनाभावप्रतियोगित्वादन्येषामिति व्यर्थमित्यर्थः।

(चि०) ननु न प्रतिबन्धकाभावः कारणम् एकदण्डान्वये घटोत्पत्तिवत् प्रतिबन्धकसत्त्वेऽपि तदन्यप्रतिबन्धकाभावेऽपि(१) कार्य्यानुदयात्, न हि यावत् कारणतावच्छेदकावच्छिन्नं तावदन्वयेऽपि कार्यमिति चेन्न। प्रतिबन्धकाभावत्वेन न हेतुत्वमन्योन्याश्रयात् किन्तु मण्याद्यभावत्वेनेत्युक्तत्वात्, तत्त्वेऽपि वा घटदण्डसलिलादिवत्प्रतिबन्धकाभावकूटस्य दाहहेतुत्वात्।

यद्वा प्रतिबन्धकत्वावच्छिन्नप्रतियोगिक एवाभावः कारणम्, स च यावद्विशेषाभावनियत इति न प्रतिबन्धकसत्त्वेऽपरप्रतिबन्धकाभावेऽपि कार्य्योदयः। प्रतिबन्धकस्य च संसर्गाभावो हेतुः, तेन तत्सत्त्वे तदन्योन्याभावेऽपि न कार्य्यम्। अन्वयव्यतिरेकाभ्यां व्याप्तिकारणत्वयोर्ग्रहे संसर्गाभावस्य त्वयाऽपि हेतुत्वाङ्गीकारात्,

(१) प्रतिबन्धकान्तराभावेपीति पाठान्तरम्।

अन्यथा सामग्रीव्यापकयोः सत्त्वे तदन्योन्याभावे कार्यव्याप्याभावापत्तौ कार्यकारणव्याप्यव्यापकभावव्याघातात् । किञ्च तथापि प्रतिबन्धकाभावे शक्तिरस्तीति तत्सत्त्वे तदन्योन्याभावमादाय शक्तिसत्त्वप्रसङ्गः । न च स दुर्वचः, न वा प्रागभावादित्वेनाऽननुगमव्यभिचारौ, प्रतियोग्यधिकरणयोः संसर्गमारोप्य यो निषेधः स संसर्गाभावः । भूतलं घटसंसर्गो नेत्यत्र भूतले घटसंसर्गस्य संसर्गो नारोप्यते किन्तु तादात्म्यम् ।

(प्रका०) ननु कार्यानुत्पादप्रयोजकत्वं प्रतिबन्धकत्वं प्रयोजकत्वं च यस्मिन्सतीत्यादिगर्भं न तु पूर्ववर्त्तित्वगर्भमिति नान्योन्याश्रय इत्यत आह-*तत्त्वेपि वेति* ।

नन्वेवमन्योन्याश्रयाभावेन तत्सामान्याभाव एक एव लाघवाद्धेतुरस्तु न तु यावद्विशेषाभावा इत्यपरितोषात्तदेव सिद्धान्तयति *यद्वेति* । *संसर्गाभाव इति* । अत्रापि यत्रोत्तेजकमस्ति तत्रोत्तेजकाभावावच्छिन्नात्यन्ताभावमात्रं हेतुरन्यत्र ध्वंसादिसाधारणतत्संसर्गाभावत्वमावश्यकमिति भावः । यो निषेधः, ज्ञायत इति शेषः ।

(चि०) वयन्तु ब्रूमः । यत्र प्रतियोगिनमधिकरणे समारोप्य निषेधावगमः स संसर्गाभावः, यत्र चाधिकरणे प्रतियोगितावच्छेदकमारोप्य निषेधावगमः सोऽन्योन्याभावः । भूतलं न घट इत्यत्र भूतलस्य घटत्वावगमात् घटत्वमेव च घटतादात्म्यम् । आरोपस्य हेतुत्वे किं मानमिति चेत्, मा भूत्तावदन्यत्, नेदमिह नेदमिदमित्यबाधितविलक्षणव्यवहारस्यैव तत्र मानत्वादिति(१)। ननु प्रतिबन्धकात्यन्ताभावो न हेतुः, तस्मिन् सत्यपि कार्याभावात् । न हि करादौ मण्यत्यन्ताभावः तत्संयोगात्यन्ताभावो वा, मणेः स्वावयववृत्तित्वात् संयो-

(१) हार एव तत्र मानमिति पाठान्तरम् ।